VAKYAPADIYAM

brahma_kandam

वाक्यपदीयम्

(ब्रह्मकाण्डम्)
हरिवृषभकृतया
स्वोपज्ञया वृत्त्या
श्रीरघुनाथशर्मविरचितया
अम्बाकर्त्र्या व्याख्यया च संवलितम्
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। 1 ।।

सर्वपरिकल्पातीततत्त्वंभेदसंसर्गसमतिक्रमेण समाविष्टं सर्वाभिः शक्तिभिर्विद्याविद्याप्रविभागरूपमप्रविभागं कालभेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानुपातिभिर्धर्माधर्मैः सर्वास्ववस्थास्वनाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते ।
नहि कार्यकारणात्मकस्य विभक्ताविभक्तस्यैकस्य ब्रह्मणः सर्वप्रवादेष्वपूर्वापरे प्रवृत्तिनिवृत्तिकोटी परिसंख्यायेते । न चास्योर्ध्वमधस्तिर्यग्वा मूर्तपरिवर्तप्रत्यङ्गानां क्वचिदवच्छेदोऽभ्युपगम्यते । तत्तु भिन्नरूपाभिमतानामपि विकाराणां प्रकृत्यन्वयित्वाच्छब्दोपग्राह्यतया शब्दोपग्राहितया च शब्दतत्त्वमित्यभिधीयते । स्थितिप्रवृत्तिनिवृत्तिविभागा ही शब्देनक्रियन्ते । तच्चाक्षरनिमित्तत्वादक्षरमित्युच्यते । प्रत्यक्चैतन्येऽन्तः सन्निवेशितस्य परसम्बोधनार्था व्यक्तिरभिष्यन्दते । एवं ह्याह--
सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि सन्निनिष्टाम् ।। इति ।
विवर्ततेऽर्थभावेन । एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः । स्वप्नविषयप्रतिभासवत् । उक्तं च -- "मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम्, तौ विद्यात्मनि तत्त्वान्यत्वाभ्यामनाख्येयौ । एतद्धि अविद्याया अविद्यात्वम्" इति ।
प्रक्रिया जगतो यतः । तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणः सर्वविकारप्रत्यस्तमये संवर्तादनाकृतात्पूवं विकारग्रन्थिरूपत्वेनाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते ।
तथा ह्यक्तम्--
यः सर्वपरिकल्पानामाभासेऽप्यनवस्थितः ।
तर्कागमानुमानेन बहुधा परिकल्पितः ।।
व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ ।
सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते ।।
अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।
सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते ।।
प्रकृतित्वमपि प्राप्तान् विकारानाकरोति सः ।
ऋतुधामेव ग्रीष्मान्ते महतो मेघसंप्लवान् ।।
तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।
अङ्गाराङ्किमुत्पाते वारिराशेरिवोदकम् ।।

तस्मादाकृतिगोत्रस्थाद् व्यक्तिग्रामा विकारिणः ।
मारुतादिव जायन्ते वृष्टिमन्तो बलाहकाः ।।
त्रयीरूपेण तज्ज्योतिः परमं परिवर्तते ।
पृथक्तीर्थप्रवादेषु दृष्टिभेदनिबन्धनम् ।।
शान्तविद्यात्मकं योंऽशस्तदु हैतदविद्यया ।
तया ग्रस्तमिवाजस्त्रं या निर्वक्तुं न शक्यते ।।
सर्वतः परिवर्तानां परिमाणं न विद्यते ।
तस्या या लब्धसंस्कारा न स्वात्मन्यवतिष्ठते ।।
यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिवि मात्राभिश्चित्राभिरभिमन्यते ।।
तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते ।।
ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ।। 1 ।।

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ।। 2 ।।

यावद्विकारविकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा सर्व तत्प्रकृत्येकत्वानतिक्रमेणेत्येतदाम्नातम् । तद्यथा--`सलिल एवैको द्रष्टाऽद्वैत एक एवाभवत्'। तथा--`सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छाo उ 6/2/1) इति । पुनश्चाह--`प्रणव एवैकस्त्रेधा व्यभज्यत'इति । तथा--`असद्वा इदमग्र आसीत् । किं तदसदासीत् । ऋषयो तेऽग्रे वाव तदसदासीत् । य ऋषयः प्राणाः' इति ।
भिन्नं शक्तिव्यपाश्रयात् । एकत्वस्याविरोधेन शब्दतत्त्वे ब्रह्मणि समुच्चिता विरोधिन्य आत्मभूताः शक्तयः । तद्यथा भिन्नार्थप्रत्यवभासमात्रायामेकस्यामुपलब्धावर्थाकारकप्रत्यवभासमात्राः पृथिवीलोका इति । नहि ज्ञेयगतो वृक्षाद्याकारावग्रहो ज्ञानस्यैकत्वेन विरुध्यते । नास्याकारात् तदाकारस्यात्मभेदोऽस्ति, तेषामेकज्ञानतत्त्वानतिक्रमात् । तदेवमपृथक्त्वं पृथक्प्रत्यवभासानामपि मिथः सर्वशक्तीनाम् ।
अपृथक्त्वेऽपि शक्तिभ्य इति । न खलु जातिव्यक्तिव्यवहारवदन्याः काश्चिचच्छक्तयो ब्रह्मणो व्यतिरेकिण्यो विद्यन्ते । तत्तु प्रकाशवत्प्रकाश्यावग्रहाभ्यो बहिस्तत्त्वाभ्य इवात्ममात्राभ्यस्तादात्म्येऽपि सति पृथक्तत्त्वमिवावसीयति इति ।। 2 ।
अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ।। 3 ।

कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्टाःकालशक्तिवृत्तिमनुपतन्ति । ततश्च प्रतिभावं वैश्वरूप्यस्य प्रतिबन्धाभ्यनुज्ञाभ्यांशक्त्यवच्छेदेन क्रमवानिवावभासोपगमो लक्ष्यते । सर्वेषां हि विकाराणां कारणान्तरेष्वप्यपेक्षावतां प्रतिबन्धजन्मनोरभ्यनुज्ञया सहकारिकारणं कालः । तस्य क्रमवद्भिर्मात्रारूपैः कर्तृशक्तिः प्रविभज्यमाना विकारमात्रागतं भेदरुपं तत्राध्यारोपयति तुलासूत्र इव संयोगिद्रव्यान्तरगुरुत्वप्रतिबन्धकाले दण्डलेखावच्छेदम् । तत्रैवमभून्नाभूदित्यपूर्वापरस्य भावस्य पौर्वापर्यव्यवस्थाविकल्पे सति जन्मादयो विकाराः षट् परिणामानां सत्ताविकाराणां योनय उपप्लवन्ते । जातिसमुद्देशे तु सत्ताविभागे न्यक्षेण भावविकारा वक्ष्यन्ते ।। 3 ।

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ।। 4 ।

एकस्य हि ब्रह्मणस्तत्त्वान्यत्वाभ्यां सत्त्वासत्त्वाभ्यां चानिरुक्ताविरोधिशक्त्युपग्राह्यस्यासत्यरूपप्रविभागस्य स्वप्नविज्ञानपुरुषवदबहिस्तत्त्वाः परस्परविलक्षणा भोक्तृभोक्तव्यभोगग्रन्थयो विवर्तन्ते । तस्य च ग्रन्थ्यन्तररूपसमतिक्रमेणविवृत्तग्रन्थिपरिच्छेदस्येयमनेकधा लोके व्यवहारव्यवस्था प्रकल्पते ।। 4 ।
प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ।। 5 ।
ममाहमित्यहङ्कारग्रन्थिसमतिक्रममात्रं ब्रह्मणः प्राप्तिः । विकाराणां प्रकृतिभावापत्तिरित्यपरे ।
वैकरण्यम्, असाधना परितृप्तिः, आत्मतत्त्वमात्मकामत्वमनागन्तुकार्थत्वम्, परिपूर्णशक्तित्वम्, कालवृत्तीनामात्ममात्रास्वसमावेशः सर्वात्मना नैरात्म्यमिति प्राप्तिविकल्पाः ।
प्राप्त्युपायो ब्रह्मराशिः । यथाभ्युदयस्य दानतपोब्रह्मचर्यादिः । एवं ह्याह -- "वेदाभ्यासात् परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते विवर्तते" इति ।
अनुकार इति यां सूक्ष्मां नित्यामतीन्द्रियां वाचमृषयः साक्षात्कृतधर्माणो मन्त्रदृशः पश्यन्ति, तामसाक्षात्कृतधर्मभ्योऽपरेभ्यः प्रवेदयिष्यमाणा बिल्मं समामनन्ति स्वप्नवृत्तमिव दृष्टश्रुतानुभूतमाचिख्यासन्त इत्येष पुराकल्पः ।
आह खल्वपि---"साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽपरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽपरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च । "बिल्मं भिल्मं भासनं वा" इति । तस्य वेदो महर्षिभिः,एकोऽप्यनेकवर्त्मेव ।
एकोऽयं वेदाश्यो दर्शनात्मनि स्थितो दृश्योऽर्थः, स महर्षिभिर्भेदेनाभेदस्य प्रतिपादयितुमशक्यत्वादभिव्यक्तिनिमित्ताल्लब्धक्रमे वागात्मरूपे प्रापित एकत्वानतिक्रमेण संहितापदक्रमभागेन प्रविभक्तमार्गोऽध्ययननिमित्तमध्येतृणां चरणसमाख्यां व्यवस्थापयद्भिः समाम्नातः ।
अपर आह--यथा वाग् देशभेदेन भिन्ना सत्यपि स्वरूपभेदे एकाभिधेयनिबन्धनत्वमव्यतिक्रान्ता । सैव च देशादिभेदप्रकल्पनव्यवस्थाहेतुः । एवं चरणभेदेऽप्येकार्थनिबन्धनत्वमव्यतिक्रान्तानि श्रुतिवाक्यानि । स्वरूपभेद एव चरणभेदप्रकल्पनव्यवस्थाहेतुरिति ।
अपरे मन्यन्ते--यथाष्टाङ्ग आयुर्वेदः पुराकल्प एक एव आसीत्, स एव हि कलौ शक्तिवैकल्यान्नृणां प्रविभक्ताङ्गो दृश्यते । तथायमप्यपरिमाणमार्गशक्तिभेदो वेदो ब्रह्मराशिरिति ।। 5 ।।
भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता ।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते ।। 6 ।।

तत्र चतुर्धा भेदे सति एकशतमध्वर्युशाखाः, सहस्त्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, पञ्चदशधेत्येके, नवधाथर्वणो वेद इत्येवं प्रतिभागं बहवो मार्गाः । कर्मण्येकत्र चाङ्गता । सर्वशाखाप्रत्ययमेकं कर्म ।
तद्यथा--सर्वभिषक्शाखाप्रत्ययमेकं चिकित्सितम् । शब्दानां यतशक्तित्वम् । तथार्थप्रत्यायने सामर्थ्यात्, तथाभ्युदयहेतुत्वात् । तस्य शाखासु दृश्यत इति । "देवसुम्नयोर्यजुषि काठके" (पा० 7/4/38) "सिमस्याथर्वणेऽन्त उदात्त" (फिट्० 479) इत्येवमादि । येषां त्वयं शाखाप्रविभागो विच्छेदेन पुनः पुनर्भवतीत्यागमः, तेषां प्राक् प्रविभागादव्यभिचार एवं संहृतक्रमाया वाच इत्येतद्दर्शनम् ।। 6 ।।
स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।

तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ।। 7 ।।

तत्र काश्चिच्छब्दनिबन्धनाः स्मृतयः; काश्चिदशब्दनिबन्धनाः शिष्टेषु प्रसिद्धसमाचाराः । दृष्टप्रयोजनाश्चिकित्सितादिविषयाः । अदृष्टप्रयोजना भक्ष्याभक्ष्यगम्यागम्यवाच्या वाच्यविषयास्तुल्ये विषये प्रसक्तविरोधा दृष्टप्रयोजनाभावे विकल्पिन्यः । शिष्टानां तु विप्रतिपत्तौ यत्र दृष्टं प्रयोजनमस्ति, तासमप्रामाण्यम् ।

अविप्रतिपत्तौ तु दृष्टप्रयोजनसम्भवेऽपि विकल्प एव । तद्यथा मण्डूकवधे प्रायश्चित्तस्य ।

तमेवाश्रित्य लिङ्गेभ्य इति । श्रुत्याश्रितानि लिङ्गानि श्रुतिविहितानां स्मृतिविहितानां च कर्मणां कर्तृसामान्यं प्रवेदयन्ते । येषां हि श्रुतिविहितैर्दृष्टाप्रयोजनैः कर्मभिरधिकारस्ते श्रुत्यैव स्मृतिविहितानामपि कर्मणां कर्तृत्वेनाख्यायन्ते । तद्यथा--

"यजमानोऽतिथय आगताय महाजं वा महोक्षं पचेत्" इति । क्वचिच्च विषयेलिङ्गानि दृष्टानि

स्थालीपुलाकवच्छ्रुत्यर्थाविरोधिन्याः स्मृतेः प्रामाण्यकल्पनायालम् ।। 7 ।।

तस्यार्थवादरूपाणि निश्चिताः स्वविकल्पजाः ।

एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ।। 8 ।।

अर्थवादानर्थवादप्रकाराणि श्रुतिवाक्यानि पौरुयेषाः प्रवादाः प्रायेणानुपतन्तो दृश्यन्ते ।

पुरुषबुद्धिविकल्पाच्च प्रवादभेदाः सम्भवन्ति । तद्यथा -- "असद्वा इदमग्र

आसीत्" इत्यग्निचयनस्थानोपस्तुत्यर्थोऽर्थवादः, तद्रूपपरिकल्पननिश्रितश्चायमेकान्तत्वप्रवादः--- "असदसतो

निराहान्निरीहमपदादपदमनुपाख्यादनुपाख्येयमवस्तुकादवस्तुकं जायते" इति । अपूर्वापरभ्यां तु सत्त्वासत्त्वाभ्यामेक आत्मा विभज्यते ।

तत्राद्वये कथं हि स्यात् सोपाख्यनिरुपाख्यता इति । तथा--"नासदासीन्नो सदासीत्", "तम एव खल्विदमग्र आसीत्" इति ।

इदं फेनो न कश्चिद् वा बुद्बुदो वान कश्चन ।

मायेयं बत दुष्पारा विपश्चिदिति पश्यति ।।

अन्धो मणिमविन्दध्यत् तमनङ्गुलिरावयत् ।

तमग्रीवः प्रत्यमुञ्चत् तमजिह्वोऽभ्यपूजयत् ।।

तथा "आपो वा इदमग्र आसीत्" इति दर्शपूर्णमासविषयोऽर्थवादः ।

ततश्चायं प्रवादः- "प्रज्ञानरूपपाकश्चासंप्रख्यानरूपपाकश्चापां प्राणो रसः । खल्वावर्तो चानावर्तो च" इति । तदेवं तदेकरूपं सर्वप्रबोधरूपं सर्वप्रभेदरूपतायां समवतिष्ठते ।

द्वैतिनः खल्वप्याहुः-- "नित्याश्चानित्याश्च मात्रायोनयः, यासु रूपि चारूपि च, सूक्ष्मं च स्थूलं चेदं भुवनं विषक्तम्" इति ।

तथा --

उभौ सखायौ सयुजौ सुपर्णौ समानं वृक्षं परिषस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।

"इन्द्रियग्रामश्चान्तर्यामी च बुद्धिश्च क्षेत्रज्ञश्च" इति ।

अथापरे--"विवृत्ताविवृत्तं बहुधानकं चैतन्यम्" इत्याहुः ।

तदेजति तन्नैजति तद्दूरे तद्वदन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः । इति ।। 8 ।।

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।

ःयुक्ता प्रणवरूपेण सर्ववादाविरोधिनी ।। 9 ।।

यतश्चैते सर्वविकल्पातीत एकस्मिन्नर्थे सर्वशक्तियोगाद् द्रष्टृणां दर्शनविकल्पाः, तत एव खलु--
इहैवैकस्मिन् सर्वरूपे ब्रह्मणि यः परिकल्पः, स विरुद्धरूपाभिमतेभ्यः परिकल्पान्तरेभ्यो न भिद्यते ।
अपि खलु ब्रह्मविद आहुः-- "प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च" इति ।
तथा "सर्वं दर्शनमन्यूनमविकल्पं सविकल्पमिवायमत्रान्तरः पुरुषोऽभिमन्यते" इति । अत्र प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिसर्वनाम सर्वदर्शनोदयप्रत्यस्तमययोनिः सर्वविरुद्धार्थोपग्राही सर्वथेदं ब्रह्माभ्यनुजानाति सर्वथा च प्रतिषेधति । न च प्रतिषेधाभ्यनुज्ञयोरस्य प्रवृत्तितत्त्वं विकल्पते ।
तथा ह्याहुः---
तदेतदेकं नैकं च तथोभे नाप्युभे न च ।
कर्मस्था विषमं ब्रूयुः सत्तवस्थाः समर्शिनः । इति ।। 9 ।।
विधातुस्तस्य लोकानामङ्गपाङ्गोनिबन्धनाः ।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ।। 10 ।।

वेदो हि लोकानां प्रकृतित्वेन चोपदेष्टृरूपत्वेन च विवर्तेषु व्यवस्थासु च विधाता ।
प्रणव एव वेद इत्येके । स हि सर्वशब्दार्थप्रकृतिरिति । एतस्मिंश्च दर्शने विद्याभेदाः प्रणवात्मतया वेदतत्त्वं नातिक्रामन्ति ।
तदाहुः--"सर्वा वाचो वेदमनुप्रविष्टा", "नावेदविन्मनुते ब्रह्म किञ्चित्" ।
तथा "विधिर्विधेयस्तर्कश्च वेदः" इति । प्रणवाङ्गोपाङ्गेभ्यश्च श्रुतिस्मृतित्रय्यन्तादिभ्यो विद्याभेदाः प्रभवन्ति सम्यग्ज्ञानहेतवः पुरुषसंस्कारहेतवश्च । ज्ञानात्मकत्वाद्वा पुरुषस्यैव संस्कारहेतवः ।
वेदाख्यस्य प्रसिद्धस्य ब्रह्मणोऽङ्गेभ्यो ज्यौतिषादिभ्यः शकुनज्ञानादय उपाङ्गेभ्यश्च स्वप्नविपाकयोनिज्ञानादयो विद्याभेदाः प्रसिद्धा लोके ।। 10 ।।
आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ।। 11 ।।

तस्य शब्दब्रह्मणो हि यतः स्वरूपसंस्कारः साधुत्वप्रतिपत्त्यर्थः, तदासन्नं साक्षादुपकारि । उपकारविशेषकृता ह्यासत्तिः समाख्याता । ऊह्यं चाम्नायान्तरम् ।
इदमूह्यमिदमनूह्यमिति न्यायादवस्थिते सम्यग् विपरिणतौ लिङ्गवचनादीनां व्याकरणं
निबन्धनमिति, आम्नायान्तरप्रतिपत्तिहेतुत्वादासन्नमिति व्यपदिश्यते ।
तपसामुत्तमं तपः । यानि लोके तपस्त्वेनाख्यातानि ब्रह्मचर्याधः शयनोदवासचान्द्रायणादीनि, ये च पवित्रतमाः स्वाध्यायास्तेषामिदं दृष्टदृष्टविशेषफलहेतुत्वादभिख्याततमं तपः ।
यस्याक्षरसमाम्नायस्य ज्ञानमात्रेण सर्ववेदपुण्यफलावाप्तिरागमेन स्मर्यते, तच्छन्दसां प्रथममङ्गम्, प्रधानत्वात् । एवं ह्याह--
"प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति " इति ।। 11 ।।
प्राप्तरूपविभागाया यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ।। 12 ।।

अभिन्नात् संहृतक्रमादन्तः सन्निवेशिनः शब्दतत्त्वाद्वर्णपदवाक्यलक्षणं रूपविभागं स्थानादिभेदेन प्राप्ताया वाचः, अभिधेयत्वेन वा गावादिरूपविभागोपग्रहं नित्येनार्थसम्बन्धेन प्राप्ताया वाचः । वाच एव वा विभागा गवादित्वेनावतिष्ठन्ते । गावादयश्च बाह्यार्थरूपा इव विभागाः पुनः श्रुतिरूपत्वेन परिणमन्ते । तथा एके कार्यकारणभावमेव शब्दार्थयोः सम्बन्धं मन्यन्ते । एवं

ह्याह --
नामैवेदं रूपत्वेन ववृते रूपं चेदं नामभावेऽवतस्थे ।
एके तदेकमविभक्तं विभेजुः प्रागेवान्ये भेदरूपं वदन्ति ।।

परमो रस इति । वाचकत्वादभ्युदयहेतुत्वाच्च व्यवस्थितसाधुभावः शब्दसमूहोऽभिधीयते । एवं ह्याह-- "ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः" इति ।

यत्तत्पुण्यतमं ज्योतिः । इह त्रीणि ज्योतींषि त्रयः प्रकाशाः स्वरूपपररूपयोरवद्योतकाः । तद्यथा--"योऽयं जातवेदा यश्च पुरुषेष्वान्तरः प्रकाशो यश्च प्रकाशाप्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशस्तत्रैतत् सर्वमुपनिबद्धं यावत् स्थास्नु चरिष्णु च" इति । तस्य मार्गोऽयमाञ्जसः ।

सामान्यविशेषवद्धि लक्षणं लक्षणप्रपञ्चाभ्यां शब्दब्रह्मणः कृत्स्नस्य लघुनोपायेन समधिगमनिमित्तम् । उपदेशं चान्तरेण संस्कारवति निरपभ्रंशे शब्दब्रह्मणि लब्धप्रतिष्ठानां शिष्टानामनुमानम् । शिष्टज्ञानाच्च पृषोदरप्रकाराणां शिष्टप्रयोगत्वात् साधुत्वप्रतिपादने निनित्तं व्याकरणम् । तथा चोक्तम् --

शब्दार्थसम्बन्धनिमित्ततत्त्वं वाच्याविशेषेऽपि च साध्वसाधून् ।
साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो व्याकरणं न वेद ।। 12 ।।

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ।। 13 ।।

अर्थस्य प्रवृत्तितत्त्वं विवक्षा, न तु वस्तुस्वरूपतया सत्त्वमसत्त्वं वा । विवक्षा हि योग्यशब्दनिबन्धना । योग्यं हि शब्दं प्रयोक्ता विवक्षाप्रापितसन्निधानेष्वभिधेयेषु प्रत्यर्थमुपादत्ते । तद्यथोपलिप्समानः प्रतिविषयं योग्यमेवेन्द्रियमुपलब्धौ प्रणिधत्ते ।

अपर आह--अर्थस्य प्रवृत्तौ तत्त्वं व्यवहारे यन्निमित्तम् । यदे हि निमित्तान्निमित्तवत्स्वर्थेषु निमित्तस्वरूपः प्रत्यय उत्पद्यते, तदार्थेन व्यवहर्तुं शक्यते, न तु संसर्गिरूपान्तरविवेके कैवल्यविषयो व्यवहारो विद्यते । तदेवं जातिषु प्राप्तस्वरूपत्वादभिधानानां सामान्यस्य शब्दनिबन्धनत्वमास्थीयते ।

व्यवहारे वा तत्त्वं संसर्गः । विच्छिन्नरूपेष्विवात्यन्तसंसृष्टेषु पदार्थेषु प्रत्यवभासमानेषु व्यवहारो वाक्यनिबन्धनः । नहि संसर्गदर्शनप्रत्यस्तमये कश्चिदपि पदार्थगातव्यवहारो व्यवतिष्ठते ।

अपरोऽर्थः-- केवलं वस्तु त्यदादीनां वस्तूलक्षणानां विषयमात्रम् । तस्य प्रवृत्तितत्त्वं संसर्गः । संसृष्टो हि क्रियासु गुणभावेन चोपादीयते ।

अथवा प्रवृत्तिर्जन्मादिक्रियाऽऽख्यातपदनिबन्धना । तस्याः प्रवृत्तिरिति समाख्यातायास्तत्त्वं साध्यत्वं साधनाकाङ्क्षता क्रमरूपोपग्रहः कालाभिव्यक्तिहेतुत्वम् ।

अपरस्त्वर्थः सत्त्वमात्रं त्रिष्वपि कालेषु स्वभावसिद्धमभिधेयत्वेन प्रत्यस्तमितक्रमरूपं नामपदनिबन्धनम् ।

अथवार्थप्रवृत्तेः किं तत्त्वम्--अर्थरूपाकारः प्रत्ययात्मा बाह्येषु वस्तुषु प्रत्यस्तः, स च शब्दनिबन्धनः ।

तत्त्वावबोधः शब्दानाम् । शब्दस्य तत्त्वमवैकल्यम् । अनपगतसंस्कारं साधुस्वरूपम् । तद्धयस्याविकलं रूपम् ।

अन्ये तु तत्प्रयुयुक्षया प्रयुज्यमाना विकलाः स्युरपभ्रंशा इति ।। 13 ।।

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।। 14 ।।

शब्दपूर्व हि शब्दस्वरूपस्याभेदतत्त्वज्ञः क्रमसंहारेण योगं लभते । साधुप्रयोगाच्चाभिव्यक्तधर्मविशेषो महान्तं शब्दात्मानमभिसम्भवन् वैकरण्यं प्राप्नोति । सोऽव्यतिकीर्णां वागवस्थामधिगम्य वाग्विकाराणां प्रकृतिं प्रतिभामनुपरैति ।

तस्माच्च सत्तागुण्यमात्रात् प्रतिभाख्याच्छब्दपूर्वयोगभावनाभ्यासाक्षेपात् प्रत्यस्तमितसर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते ।

वाङ्मलानां चिकित्सितम् । आयुर्वेद इव शारीराणां दोषाणाम् । व्याकरणज्ञो हि प्रत्यवायहेतुभूतानपभ्रंशान्न प्रयुङ्क्ते । `ज्ञानं हि तस्य शरणम्' इत्युक्तम।उक्तं च --

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।

तथायमप्रमत्तगीतश्लोकः--

आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः ।
तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निरहुः ।।

अधिवद्यं प्रकाशते । सर्वो हि प्रायेण स्वस्यां विद्यायां व्याकरणमनुगच्छति, अपभ्रंशप्रयोगेण च नियतमपत्रपते ।। 14 ।।

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ।। 15 ।।

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।। 16 ।।

अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा च्छन्दोमयीं तनुम् ।। 17 ।।

प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम् ।
यदस्मिन्नेव तमसि ज्योतिः शुद्धं विवर्तते ।। 18 ।।

वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ।। 19 ।।

यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ।। 20 ।।

अथर्वणामङ्गिरसां साम्नामृग्यजुषस्य च ।
यस्मिन्नुच्चावचा वर्णाः पृथक्स्थितिपरिग्रहाः ।। 21 ।।

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ।। 22 ।।

नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ।। 23 ।।

नित्यः शब्दो नित्योऽर्थो नित्यः सम्बन्ध इत्येषा शास्त्रव्यवस्था । तत्र हि शब्द इत्यनेन शब्दकृतिरभिधीयते । एवं ह्याह-- "आकृतिनित्यत्वान्नित्यः शब्दः" इति। आकृतिप्रयुक्तं चेदं शास्त्रम् । तथा हि "आकृत्युपदेशात् सिद्धम्" (भा वा o 1/1/21) इत्याह । सा चेयमाकृतिः शब्दत्वसामान्यविशेषादन्या । शब्दत्वं हि विरुद्धैकार्थसमवायिनीभिरकृतिभिः सर्वाभिरविरुद्धैकार्थसमवायम् ।

शब्दाकृतिविशेषा हि वृक्षशब्दत्वादयः सति वस्तुसम्प्रमोहे निमित्तसरूपतामापन्ना अभिव्यक्ताः शब्दा इत्यपदिश्यन्ते । यथा हि घटे द्रव्यत्वपृथिवीत्वघटत्वादीनामविरुद्धः समवायः, तथा वृक्षशब्देऽपि गुणत्वशब्दत्ववृक्षशब्दत्वादीनामाकृतिविशेषाणामविरुद्धः समवायः ।

ननु व्यवस्थितावयवेषु घटादिष्ववयवी सामान्यविशेषाभिव्यक्तिहेतुः । अनवस्थितावयवास्तु शब्दव्यक्तिविशेषाः ।

तैस्त्वसमजन्मभिरयुगपत्कालैरव्यपदेश्यरूपैरवयवैरविद्यमानानेकसमवायिकारणं शब्दन्तरमारब्धुं न शक्यते, यत्राकृतिविशेषाणां समवायः स्यात्। शब्दत्वं तु प्रत्यवयवं परिसमाप्यते ।

तद्वच्चाकृतिविशेषस्य प्रत्यवयवं परिसमाप्तिर्यदि प्रतिज्ञायते, अवयवमात्रोच्चारणे वृक्षदिशब्दविशेषाकारावग्रहा

वकारादिष्ववयवेषूच्चरितेषु केवलेषवपि बुद्धिः प्राप्नोति । नैष दोषः, यथैवोत्क्षेपणभ्रमणरेचनादीनामुत्पन्नापवर्गिणां

कर्मविशेषाणाम्, न च तावदवयवैः कर्मान्तरमवयविस्थानीयं किञ्चिदारभ्यते । न च कर्मत्वव्यतिरेकेणोत्क्षेपणत्वादीनां जातिविशेषाणां समवायो नाभ्युपगम्यते ।

न च कर्मावयवमात्रदर्शने भ्रमणादिकर्मविशेषाकारवग्रहाः प्रत्यया उत्पद्यन्ते। तानि ह्यवयवर्माणि विशिष्टप्रयत्नहेतुकानि प्रत्यवयवमुत्क्षेपणत्वादीनामाधारत्व

मपि प्रतिपद्यमानानि दुरवधारत्वाद्विशेषस्य विशिष्टजातिविषयां बुद्धिं न प्रकल्पयन्ति।

विशिष्टापि हि सा बुद्धिरनभिव्यक्तोपव्यञ्जनविशेषपरिग्रहा । तस्मात् तया व्यवहर्तुं न शक्यते ।

यदा तु दिग्विशेषावधिपरिच्छिन्नसंयोगविभागकार्य्याणां कर्मणां प्रबन्धः क्रमेणोपलब्धो भवति, अथ जातिविशेषोपाधियुक्ता व्यवहाराः प्रकल्पन्ते ।

तथा वृक्षादिष्वपि शब्देषु यत्नविशेषजनिता विशिष्ठा वकारादयो दुर्ज्ञानाविशेषा यद्यपि प्रत्यवयवं शब्दजातिविशेषाभिव्यक्तिं कुर्वन्ति, तथाप्यपरिगृहीतानेकोपव्यञ्जनविशेषाभिस्ताभिः शब्दाकृतिभिर्व्यवहर्तुं न शक्यते ।

यदा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ जातिविशेषोपाधियुक्ता व्यवहारा अवतिष्ठन्ते ।

न चावश्यं शास्त्रान्तरे परिदृष्टा जात्यभिव्यक्तिप्रक्रिया वैयाकरणैः परिगृह्यते । न

ह्यभिव्यक्तिमतामभिव्यञ्जकैराश्रितानामेवाभिव्यक्तिर्नियमेन क्रियते । तत्रासत्यपि शब्दव्यक्तिसमवाये

शब्दकृतेर्वर्णावयवावग्रहप्राप्तसंस्काराभिः क्रमोत्पन्नाभिर्बुद्धिभिः पूर्वमगृहीता, अव्यक्तं गृहीता व संस्कृतेऽन्तः करणे चरमविज्ञानेनाकृतिः परिच्छिद्यते ।

तस्यास्तु शब्दकृतेरस्तित्वं शुकशारिकामनुष्यादिप्रयुक्तेषु वृक्षादिशब्दव्यक्तिविशेषेषु 'स एवायम्' इति प्रत्ययाभेदादनुमीयते ।

यैरप्ययमाकृतिव्यवहारो नाभ्युपगम्यते, तेऽप्यनेकध्वनिव्यङ्ग्यां नित्यां शब्दव्यक्तिमेव प्रतिजानते ।

शब्दव्यक्तिगतस्तु कैश्चिद् वर्णभदोऽभ्युपगम्यते ।

केचित्तु प्रतिवर्णं प्रतिपदं प्रविवाक्यं चैक एव शब्दत्मा क्रमोत्पन्नावयवरूपप्रत्यवभासः प्रकाशत इति मन्यन्ते ।

अपर आहुः--पारम्पर्याविच्छेदान्नित्यप्रवृत्तेः प्रयोक्तृभिरुत्पत्तावलब्धप्राथम्या व्यवहारनित्यतया नित्याः शब्दा इति ।

अर्थानामपि नित्यत्वं कैश्चिदाकृतिनित्यत्वादेवाभ्युपगम्यते । तथा ह्याह---"कतरस्मिन् पदार्थे एष विग्रहो न्याय्यः । सिद्धे शब्देऽर्थे सम्बन्धे चेति । आकृतावित्याह ।" एतस्मिंश्च भाष्योद्देशे यावन्तः पक्षास्तेष्वर्थस्य नित्यता बहुधा व्याख्याता । सा यथाभाष्यमनुगन्तव्या ।

नित्यः सम्बन्ध इत्यस्येदंभावे सति शब्दर्थयोः सोऽयमिति यः सम्बन्धः, सोऽर्थादेशनस्य कर्तुमशक्यत्वादौत्पत्तिकः स्वभावसिद्धो न केनचित् कर्त्रा कञ्चित् प्रतिपत्तारं प्रत्यज्ञातपूर्वस्तत्प्रथमं कृत इति । तस्मादनादिर्नित्यं प्राप्ताविच्छेदः शब्दर्थयोः सम्बन्धः । इन्द्रियविषयवद् वा प्रकाश्यप्रकाशकभावेन समयोपाधिर्योग्यता शब्दर्थयोः सम्बन्धः ।

अर्थसरूपप्रत्यवभासानां वा प्रत्ययानां बाह्येष्वर्थेषु प्रत्यस्तानामक्षरनिमित्ताक्षरकल्पनावदर्थवदेवैकविषयत्वेऽभ्युपगम्यमाने

नित्यमविच्छिन्नपारम्पर्यः कार्यकारणभावः शब्दार्थयोः सम्बन्धः । तथा ह्यक्तम्--`तेऽपि हि तेषामुत्पत्तिप्रभृत्यविनाशाद् बुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति' इति ।

तत्राम्नाता महर्षिभिः । सूत्रादीनां प्रणेतृभिः । व्याकरण एव ये सूत्रादीनां प्रणेतारस्ते व्यपदिश्यन्ते । तत्र सूत्राणामारम्भादेव शब्दानां नित्यत्वमभिमतम् । न ह्यनित्यत्वे शब्दादीनां शास्त्रारम्भे किञ्चिदपि प्रयोजनमस्ति । व्यवहारमात्रं ह्येतदनर्थकं न महान्तः शिष्टाः समनुगन्तुमर्हन्तीति । तस्माद् व्यवस्थितसाधुत्वेषु शब्देषु स्मृतिशास्त्रं प्रवृत्तमिति ।

अपरे तु "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा० 1/2/53) इत्येवमादीनि सूत्राणिनित्यत्वं प्रति समर्थयन्ते । अनुतन्त्रेषु खल्वपि--

`सिद्धे शब्दर्थसम्बन्धे' इति, `सिद्धं तु नित्यशब्दत्वात्' इति, `स्फोटः शब्दो ध्वनिस्तस्य व्यायाम उपजायते । सर्वे सर्वपदादेशा' इत्येवमादि ।

भाष्ये खल्वप्युक्तम्--'संग्रहे एतत् प्राधान्येन परीक्षितं नित्यः शब्दः' इति । अनुतन्त्रभाष्येऽप्युक्तम्--'नित्येषु कूटस्थैर्वर्णैरविचालिभिर्भवितव्यम्' इत्येवमादि ।

तथा व्यावहारिकेऽपि नित्यत्वे `खदिरबर्बुरौ सूक्ष्मपर्णौ गौरकाण्डौ ।' तत्र कण्टकवान् खदिरः । प्राचीनं ग्रामादाम्राः । क्षीरिणः प्ररोहवन्तः पृथुपर्णा न्यग्रोधा इति ।

अथवा यैः प्रत्यक्षधर्मभिस्तत्र तत्र प्रवचने सूत्रानुतन्त्रभाष्याणि प्रणीतानि, तैरेव शिष्टैर्व्याकरणेऽपि नित्याः शब्दार्थसम्बन्धा इत्याम्नातम् । तेषां च व्यवस्थितं लोके प्रामाण्यमिति ।। 23 ।।

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ।। 24 ।।
कार्यकारणभवेन योग्यभावेन च स्थिताः ।
धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ।। 25 ।।
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ।। 26 ।।

त्रिष्वप्येषु श्लोकेषु प्रस्तुतस्य परसमाप्तिः ।

तत्रापोद्धारपदोर्थो नामात्यन्तसंसृष्टः संसर्गादनुमेयेन परिकल्पितेन रूपेण प्रकृतप्रविवेकः सन्नपोद्ध्रियते । प्रविविक्तस्य हि तस्य वस्तुनो व्यवहारातीतं रूपम् ।

तत्तु स्वप्रत्ययानुकारेण यथागमं भावनाभ्यासवशादुत्प्रेक्षया प्रायेण व्यवस्थाप्यते ।

तथैव चाप्रविभागे शब्दात्मनि कार्यार्थमन्वयव्यतिरेकाभ्यां रूपसमनुगमकल्पनया समुदायादपोद्धृतानां शब्दानामभिधेयत्वेनाश्रीयते ।

सोऽयमपोद्धारपदार्थः शास्त्रव्यवहारमनुपतति, शास्त्रव्यवहारसदृशं च लौकिकंभेदव्यवहारम् । स चैकपदनिबन्धनः सत्यासत्यभावेनानुपाख्येयः वृक्षः, प्लक्षः, इत्यनुपसंहृते हि क्रियापदे शब्दोपग्रहाणामर्थात्मनां निरूपणं न विद्यते ।

यावच्चापवादभूताः क्रियाविशेषाः शब्दप्रवृत्तिकारणमस्तित्वं न निवर्तयन्ति, तावदस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि वृक्षादिभिः पदैराक्षिप्तः प्रतीयते ।

तानि चैकपदसरूपाण्याक्षिप्तक्रियापदानि वाक्यानीति व्याख्ययन्ते ।

तथा पूर्वपदार्थः, उत्तरपदार्थः, अन्यपदार्थः, प्रातिपदिकार्थः, धात्वर्थः, प्रत्ययार्थ इत्येकपदवाच्योऽप्यनियतावधिर्बहुधा प्रविभज्य कैश्चित् कथञ्चिदपोद्ध्रियते ।

स्थितलक्षणस्तु वाक्यरूपोपग्रहः कल्पितोद्देशविभागो विशिष्ट एकः क्रियात्माऽविच्छिन्नपदार्थग्रहणोपायप्रतिपाद्यः सत्यामपि विच्छेदप्रतिपत्तौ नमस्यति, संग्रामयते, मुण्डयति, कुट्टयति, चर्वयतीत्येवमादिभिरविशिष्टः प्रतिभोपसंहारकाले ।

यदुक्तम्--"न वा दपस्यार्थे प्रयोगात्" इति । उपसंहृतक्रियमत्र पदमाश्रीयते। संप्रत्ययानुगममात्रं वा परिगृह्यते ।

तथा हि पदस्यार्थे प्रयोगमभ्युपगम्य पुनरप्याह--`कृत्तद्धितान्तं चैव ह्यर्थवन्न केवलाः कृत्तद्धिता' इति ।

अन्वाख्येयाश्च ये शब्दाः केषाञ्चित्पदावधिकमन्वाख्यानम्, वाक्यावधिकमेकेषाम् । तत्र पदावधिकेऽन्वाख्याने श्रुत्यभेदादेकपदरूपोपग्रहे सामान्यमात्रे लब्धसंस्कारणि पदानि पदान्तरसम्बन्धप्राप्तसन्निधानेष्वर्थेषु सन्निपतितेष्वपि विशेषेषु सामान्ये प्रतिलब्धमन्तरङ्ग संस्कारमुपादायैव प्रवर्तेरन् ।

तत्रैकवचनान्तो नपुंसकलिङ्गश्च शुक्लशब्दो भिन्नलिङ्गसंख्यैराश्रयैः सम्बद्धः श्रूयेत । तदर्थम् 'विशेषणानां चाजातेः' (पाo 1/2/53) इत्यनेन योगेन भाविन्याश्रये बहिरङ्गे प्रकान्ते गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनान्यनुगम्यन्ते । वाक्यावधिके त्वन्वाख्याने नित्यसंसृष्टस्य गुणस्याश्रयविशेषेणात्यन्तमविवेकात् सर्वतो व्यवच्छेदे सामान्यार्थत्वमेव न विद्यते । तत्र चेदमुक्तम्--"स्वाभाविकमेतत्" (मo भाo 2/2/29) इति । तथा प्रत्यवयवं द्वन्द्वपदसंस्कारे "द्वन्द्वेऽबहुषु लुग्वचनम्" (मo भाo 2/4/62) उपन्यस्तम् । समुदायसंस्कारप्रक्रमे तु "न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात्" (मo भाo 2/1/62)इत्याह । तथा "विशेषणं विशेष्येण बहुलम्" (पाo 2/1/57), "उपमानानि सामान्यवचनैः" (पाo 2/1/55) इत्यादि सर्वं पदावधिक एवान्वाख्याने परिगृह्यते ।

पदस्य चान्वाख्येययत्वमभ्युपगम्य `भू, भूति, भू अति' इत्येवमादयः शब्दान्तरसमुदायप्रतिपत्तिहेतवः परिकल्पिताः प्रतिपादकाः शब्दा उपादीयन्ते ।

कार्यकारणभावेनार्थाकारनिर्भासमात्रानुगतस्य प्रत्ययस्यार्थेषु प्रत्यस्तरूपस्यार्थत्वेनाध्यवसाये तस्यार्थात्मनः शब्दो निमित्तम् । तथार्थावग्रहदर्शनं सोऽयमिति शब्दार्थयोः सम्बन्धप्रसिद्धेर्नादाभिव्यक्तस्यान्तः करणसंनिवेशिनः शब्दस्य प्रवृत्तौ कारणम् । इन्द्रियविषयवत् तु प्रकाश्यप्रकाशकभावेन विशिष्टानां शब्दानां विशिष्टेष्वर्थेषु

नित्यमकर्तृव्यापारसाध्यमव्यभिचरितप्रसिद्धसाधुभावानां वाचकानां शब्दानां वाच्येषु योग्यत्वम्, अप्रसिद्धसम्बन्धानां प्रथमप्रतिपादने समयोपाधिकम् ।

तत्र साधोर्यः सम्बन्धोऽर्थेन स ज्ञाने शास्त्रपूर्वके वा प्रयोगे धर्माभिव्यक्तौ अङ्गत्वं प्रतिपद्यते । विशिष्टप्रत्ययोत्पत्तौ च प्रत्यक्षपक्षेण व्यवस्थां प्रकल्पयति ।

अनुमानपक्षेण तु सम्बन्धिसम्बन्धादक्षिनिकोचादिवदपभ्रंशाः (अपि) प्रत्ययविशेषेष्वङ्गभावमुपगच्छन्ति ।

ते लिङ्गैश्च । अपोद्धारे हि शास्त्रव्यवहारार्थं समुदायात् संसृष्टायाः कस्याश्चिदर्थमात्रायाः क्रियमाणे तं तमवधिं प्रति निमित्तत्वेनार्थानां पुरुषाधीनो विकल्पभेदः सम्भवति ।

कथमिदं विज्ञायते हेतुमत्यभिधेये णिज् भवति, आहोस्विद्धेतुमति यो धातुर्वर्तते इति (हेतुमति) वर्तमानादिति ।

तथा "स्त्रियाम्" (पाo 4/1/3) इति । किं स्त्र्यर्थाभिधाने टाबादयः, स्त्र्यर्थवृत्तेः प्रातिपदिकात् स्वार्थे वेति ?

तथा "नञ्" इति किं प्रधानोऽयं समास इति ? (किं पूर्वपदार्थप्रधानोऽथवोत्तरपदार्थप्रधान इति) । न ह्येते विकल्पा

लौकिकाः, समुदायार्थे हि लौकिके व्यभिचाराभावात् । पुरुषविकल्पेष्वनियतेषु यथा शास्त्रव्यवस्थाभेदो न भवति, स विकल्पः परिगृह्यते ।

तथैकत्वादयो विभक्त्यर्थाः, कर्मादयः पञ्चकः प्रातिपदिकार्थः, चतुष्कः, त्रिक इति पुरुषविकल्पाधीन एवंप्रकारः पक्षभेदः । क्रियासाधनकालादयोऽपि कैश्चित् कथञ्चिदभिधेयत्वेन प्रविभक्ताः ।

`धातुः साधने दिशि पुरुषे चिति च तदाख्यातम् ।

लिङ्गे किमिति विभक्तौ ? एतन्नाम ।'

भावकर्मभ्यामात्मनेपदम्, कर्तुः परस्मैपदम् इत्यपोद्धारपरिकल्पनाव्यवस्थामाश्रित्य,`स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्' इति प्रतिपत्तिक्रमनियमानुगममात्रं क्रियते ।

नहि शब्दस्य क्रमवती विरम्य विरम्य स्वार्थादिषु वृत्तिः सम्भवति, सकृदुच्चारणात्, अर्थेन च नित्यमवियोगात् । प्रतिपत्तिक्रमो ह्ययं श्रोतुरभिधातुर्वा न व्यवस्थितः । सर्वविशेषणविशिष्टं हि वस्तु संसर्गिणीनां मात्राणां कलापं यौगपद्येनैकस्या बुद्धेर्विषयतामापन्नमुत्तरकालमिच्छन् बुद्ध्यन्तरैः प्रविभज्यते । प्रविभक्तस्यापि चानुसन्धानमन्तरेणार्थक्रियाविषया प्रतिभा नोत्पद्यत इति पुनः संसर्गरूपमेव प्रत्यवमृशति ।

योऽपि चाभिधाता श्रोता वा विभागेन मात्रासु प्रतिपत्तिं लभते, तस्यापि प्रत्यासत्त्या

महाविषयत्वेनाभिव्यक्तिनिमित्तोपव्यञ्जनप्रकर्षेणोपलिप्सया बीजवृत्तिलाभानुगुण्येन वा ग्राह्यासु मात्रास्वनियमेन बुद्धिक्रमो व्यवतिष्ठते ।

तथा ह्याह--
एकोऽयं शक्तिभेदेन भावात्मा प्रविभज्यते ।
बुद्धिवृत्त्यनुकारेण बहुधा ज्ञानवादिभिः ।।
स्थितलक्षणस्तु शास्त्रे पदार्थो वाक्यार्थो वा ? तथा ह्युक्तम्--`न वा पदस्यार्थे प्रयोगात् । यदत्राधिक्यं वाक्यार्थः स' इति ।
संग्रहेऽप्युक्तम् --
नहि किञ्चित् पदं नामरूपेण नियतं क्वचित् ।
पदानां रूपमर्थो वा वाक्यार्थादेव जायते ।।
अन्वाख्येयस्य खल्वपि पदस्वरूपस्य कृतेऽपि रूपपरिग्रहे प्रकृतिप्रत्ययादीनां विभागे रूपपरिग्रहानियमो दृश्यते ।
मरुत्तेन्द्राण्यैकागारिकगिरिशश्रोत्रियक्षत्रियादिषु वाक्यावधिकेऽन्वाख्याने ।
तदुक्तम्--
अर्थात् पदं साभिधेयं पदाद् वाक्यार्थनिर्णयः ।
पदसङ्घातजं वाक्यं वर्णसङ्गातजं पदम् ।। इति ।
व्युत्पत्तौ वाक्यस्थं पदम्, वर्णसङ्घातजं पदमिति ।
कार्यकारणभावेन खल्वपि सम्बन्धो निदर्शितः । तद्यथा--'तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशाद् बुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति' इति ।
योग्यभावेनापि सम्बन्ध उपवर्णितस्तत्र तत्र--`अभिधानं पुनः स्वाभाविकम् । समाने वर्णे शोणकर्क (र्ण) हेमा (हया) दीनामश्वविषयत्वं गवादिषु चाप्रवृत्तिः' । तथेदमुक्तम्--'समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यन्तेऽपरे न' इत्येवमादि ।
तथाजातीयकाः खल्वप्याचार्येण स्वरितञ्तिः पठिताः, ये उभयवन्तः, येषां कर्त्रभप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति ।
संग्रहकारः पठति--
शब्दर्थयोरसम्भेदे व्यवहारे पृथक् क्रिया ।
यतः शब्दर्थयोस्तत्त्वमेकं तत् समवस्थितम् ।।
स एव पुनराह--
सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः ।
शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम् ।। 26 ।।
शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ।। 27 ।।

यथैवान्यानि धर्मासाधनानि शिष्टोपदेशपारम्पर्येणागमाविच्छेदेनागतानि अनभिशङ्कनीयानि व्यवस्थितानि, यथा च प्रतिषिद्धानि हिंसानृतस्तेयादीनि, अशिष्टाप्रतिषिद्धानि च हिक्कितश्वसितकण्डूयितादीनि व्यवस्थितानि, तथा साध्वसाधुव्यवस्थानमप्यनवच्छिन्नपारम्पर्यमनभिशङ्कनोयं यथागमादेव सिद्धमिति ।। 27 ।।

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।
प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते ।। 28 ।।
यदि नित्यानां शब्दानामभिव्यक्तिर्जन्मादिविक्रियापत्तिर्वा सताम्, असतां वा सोपाख्यनिरुपाख्यत्वम्, सर्वथैषामप्रवृत्तशब्दव्यवहारा प्रथमा कोटिर्न विद्यते, न परा ।
ये चेश्वरकालपुरुषविद्यामाक्षेत्रज्ञान् विभक्ततत्तवानाहुः, ये चानीश्वरकमकालमपुरुषमविद्यक्षेत्रज्ञमविद्यामात्रमेव मन्यन्ते ।

ये यैकत्वानतिक्रमेण समुच्चितताविरुद्धापरिणामशक्तिरूपनिर्भासपरिग्रहमपूर्वापरं विश्वमाचक्षते, तेषां सर्वेषां नास्ति कश्चिदप्रवृत्तप्रणिव्यवहारः प्रथमो नाम कालाध्वा । सा चेयमनादिरविच्छिन्ना प्रवृत्तिनित्यता । तथा ह्युक्तम्--`तदपि नित्यंयस्मिंस्तत्त्वं न विहन्यते' इति ।। 28 ।।

नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति ।
तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ।। 29 ।।

को हि शिष्टः संभिन्नबुद्धिरपि लोकं प्रत्यनभिनिविष्टो दुर्ज्ञानं दुरध्येयं च स्वरसंस्कारादिनियमं लौकिकवेदिकानां शब्दानां प्रयोजनं व्यवस्थापयितुमुत्सहते ?न चानर्थको नियमः । कृतोऽपि शिष्टैरपरैर्न परिगृह्यते । प्रमाणं वा विदुषां लोके न स्यादिति । तस्मादनादिर्गुरुपूर्वक्रमागता शिष्टानुमानहेतुव्यभिचारा लक्षणप्रपञ्चाभ्यां पर्यायैः शब्दवती चाशब्दा च स्मृतिर्निबध्यते ।। 29 ।।

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।। 30 ।।

सर्वेऽपि वातिनो दूरमपि गत्वा स्वभावं न व्यतिवर्तन्ते । अदृष्टार्थानां च कर्मणां फलनियमे स्वभावसंविदागमप्रतिबद्धा । को ह्यनवस्थितसाधर्म्यवैधर्म्येषु नित्यमलब्धनिश्चयेषु पुरुषतर्केषु विश्वासः, येष्वपि तर्कातीतः पृथग् विद्याचरणपरिग्रहेषु कश्चिदनुत्तरः पुरुषधर्मः श्रूयते, तेष्वपि तदर्थज्ञानमार्षमृषीणामागमिकेनैव धर्मेण संस्कृतात्मनामाविर्भवतीत्याख्यायते । स्वाभाविके हि तस्मिन् प्रयत्नः फलाद् व्यतिरिच्येत्, स्वभावतश्च प्रत्यवायोऽपि तथाभूतः स प्रसज्येत ।। 30 ।।

धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।
न ताँल्लोकप्रसिद्धत्वात् कश्चित् तर्केण बाधते ।। 31 ।।

बहुविकल्पेष्वपि शिष्टानां चरणेषु सन्ति साधारणाः प्रसिद्धाः पुरुषहितप्रतिपत्तिमार्गाः, येष्वन्यथा प्रवृत्तिर्लोकविरसा । न च ते तर्केण कदाचिदपि व्युदस्तपूर्वाः । काममागमोद्देशनिश्चयेणैव केचिद् विनिन्दितमपि लोकसमाचारविरुद्धाचरणं प्रतिपद्यन्ते ।। 31 ।।
अवस्थादेशकालानां भेदाद् भिनानसु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ।। 32 ।।

इहाव्यभिचरिताभिमतसाहचर्यस्य दृष्टस्य सम्बन्धिनस्तत्सदृशस्य वा दर्शनाददृष्टे सम्बन्धिनि यज्ज्ञानमुत्पद्यते, तेनाप्रत्यक्षस्यार्थस्य प्रसिद्धिर्दुरवसाना ।
तथा हि--अवस्थान्तरेषु विनिश्चितबलसत्त्वादीनां पुनरवस्थान्तरेषु पुरुषगम्येष्वपुरुषगम्येषु वा दृश्यन्ते स्वभावव्यभिचारिणः । बाह्यानामपि बीजौषधिप्रभृतीनामवस्थाभेदादुपलभ्यते शक्तिव्यभिचारः ।
तथा देशभेदादपि । अतिशीतो हैमवतीनामपां स्पर्शः । स तु बलाहकाग्निकुण्डादिषु तद्रूपाणामेवात्युष्ण उपलभ्यते । तत्र रूपसामान्यादपह्नतबुद्धिः परोक्षविशेषो दुर्ज्ञानं भेदमर्वाग्दर्शनो दर्शनमात्रेणागम्यमागमेनैव प्रपद्यते ।
कालभेदादपि । ग्रीष्महेमन्तादिषु कूपजलादीनामत्यन्तभिन्नाः स्पर्शादयो दुश्यन्ते । तत्र सूक्ष्ममवस्थानविशेषं प्राकृतमप्राकृतगम्यमागमचक्षुरन्तरेणाप्रत्यक्षमनुमानमात्रेणानिश्चितं कः साधयितुमसंमूढः प्रयतते ।। 32 ।।

निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति ।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते ।। 33 ।।

अग्यन्यादीनां काष्ठादिविकारोत्पादने दृष्टसामर्थ्यानामभ्रपटलादिषु द्रव्येषु तथाभूतं सामर्थ्यं प्रतिबध्यते । तथा मन्त्रौषधिरसादिभिर्योग्येष्वपि द्रव्येषु दाहादिकं प्रतिबध्यते । तथैकस्मिन् विषये दृष्टसामर्थ्यानां पुनर्विषयान्तरेषु द्रव्याणां दुरवसानाः शक्तयः ।। 33 ।।

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ।। 34 ।।

अन्यद् द्रव्यं गुणेभ्यो व्यपदेशात् । तद्यथा--सति विशेषणविशेष्यभेदे राज्ञा राष्ट्रं विशेष्यते, न परिव्राजकेन । विशेष्यते वा चन्दनेन गन्धः, न रूपादिभिः । तस्मादन्यद् द्रव्यं गुणेभ्य इत्यनुमानेन द्रव्ये व्यवस्थापिते नायमपदेशो युक्त इत्याहुः । विशिष्टाविशिष्टाभिधेयनिबन्धनत्वात् शब्दानाम् । चन्दनशब्देन हि विशिष्टरूपादिवचनेन विशेषणमर्थवद्गन्धादीनाम् । रूपादिमात्रवचनत्वात्तु रूपादीनां तावतोऽर्थस्य निर्ज्ञातत्वादनर्थकं विशेषणम् । तथा हि--कस्यायं पुरुष इति प्रश्ने विशेषान्तरावच्छेदार्थं राज्ञ इति व्यपदिश्यते, न तु निर्ज्ञातत्वात् पुरुषस्येति ।
अपर आहुः--पदसमूहैकदेशभावेऽपि पदमृचा व्यपदिश्यते, न पदेन ऋक् ।
अपर आह--एकत्वाभ्युपगमेनैव चन्दनेन व्यपदेशो गन्धादीनाम्, रूपादिभिरव्यपदेशइति विरुद्धत्वादसिद्धमेतत् ।
श्रुतिविशेषसन्निधानासन्निधानकृतस्तु पूर्वपक्षोपन्यासः ।
तस्माद् दृष्टाददृष्टमनुगम्यत इत्यविरोधात् सिद्धमेतत् ।
तथा पाकाद्यनुमानार्थानि क्रियाविशेषेषु प्रतिनियतान्यङ्गानि विप्रलम्भार्थान्यपि कैश्चित् कथञ्चिदुपादीयन्ते ।। 34 ।।

परेषामसमाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।। 35 ।।

नहि रूपतर्कादयः सूक्ष्मानप्रसिद्धसंविज्ञानपदान् कार्षापणादीनां कल्पयित्वापि समधिगमहेतून् परेभ्य आख्यातुं शक्नुवन्ति । षड्जऋषभगान्धारधैवतादिभेदं वा प्रत्यक्षप्रमाणविषयमप्यभ्यासमन्तरेणाभियुक्ताः प्रणिधानवन्तोऽपि न प्रतिपद्यन्ते ।। 35 ।।

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः ।
पितृरक्षः पिशाचानां कर्मजा एव सिद्धयः ।। 36 ।।

स्वप्ने हि बधिरादीनां शब्दादिप्रतिपादनम्, घनसन्निविष्टावयवानां च कुड्यादीनामवयवविभागमन्तरेणान्तर्वेश्मादिषु सूक्ष्माणामर्थानां दर्शनं यत् सर्वप्रवादेषु सिद्धम्, तत्र कथम्भूतानि साधनानीत्यदृष्टशक्तिमचिन्त्यां हित्वा नान्यानि साधनान्याख्यातुं शक्यन्ते ।। 36 ।।

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।। 37 ।।

तत्रोत्पत्तिपक्षे तावत् कथमपदमवस्तु निरात्मकमदृष्टाप्रतिनियतकारणशक्तिपरिग्रहमधिगन्तुं शक्यते । पक्षान्तरे च विशिष्टव्यक्तिरूपतिरोभावाद् व्यवहारं प्रति तदविज्ञेयं वस्तु निरुपाख्यैरेव तुल्यम् । अथ च तपसा निर्दग्धदोषा निरावरणख्यातयः शिष्टाः प्रतिबिम्बकल्पेन प्रत्यक्षमिव स्वासु ख्यातिषु संक्रान्ताकारपरिग्रहमव्यभिचरितं सर्वं पश्यन्ति ।। 37 ।।

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ।। 38 ।।

अन्तर्यामिणमणुग्राममभिजातिनिमित्तनिबन्धनमनभिव्यक्तं शब्दब्रह्म शक्त्यधिष्ठानं देवता कर्मणामनुबन्धपरिणामशक्तिवैकल्यानि सूक्ष्ममातिवाहिकं शरीरं पृथगन्यांश्च तीर्थप्रवादेषु प्रसिद्धानर्थान् रूपादिवदिन्द्रियैरग्राह्यान् सुखादिवत् प्रत्यात्ममसंवेद्यान् ये शिष्टा व्यावहारिकादन्येन चक्षुषा मुक्तसंशयमुपलभन्ते, तेषामनुमानविषयतातीतं वचनं व्यभिचारिभिरनुमानैरपाकर्तुमशक्यम् । जात्यन्धानां हि रूपग्रहणमेवमुत्पद्यत इति सावस्था नैवाभ्युपगतपूर्वा कदाचित् । तस्यां कथमनुमानं प्रवर्तेत ? ।। 38।।

यो यस्य स्वमि ज्ञानं नातिशङ्कते ।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ।। 39 ।।

सन्ति प्रतिचरणं प्रतिपुरुषं चाप्ताः । येषां वचनमविचारितं स्वमिव दर्शनमत्यन्तमनतिशङ्कनीयम्, येषां चादृष्टमपि शिलाप्लवनादि प्रत्ययेन शक्यं श्रद्धातुम् ।
तथा हि--कर्मणामिह कृतानामूर्ध्वं देहादिष्टानिष्टफलप्राप्तिराप्तवचनपरिग्रहेणैव लोके प्रसिद्धा, विनापि शास्त्रोपदेशेन प्रायेण मनुष्यैरनुगम्यते ।। 39 ।।

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आ चण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ।। 40 ।।

यस्मात् प्रत्यक्षमार्ष च ज्ञानं सत्यपि विरोधे बादकमनुमानम् ।। 40 ।।

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ।। 41 ।।

यथा ह्यहमस्मीत्येवमादिप्रत्ययानुगतं सहजमनादी यच्चैतन्यं तन्नास्मि, न ममेत्येवमाप्तोपदेशे सत्यपि लोके रूढत्वाद् मुक्तात्मनामपि व्यवहारं प्रति न व्यवच्छिद्यते, तथैवायं श्रुतिस्मृतिलक्षणः सर्वैः शिष्टैः परिगृहीत आगमः ।
कार्याकार्यभक्ष्याभक्ष्यगम्यागम्यादिषु यो भिन्नानामपि प्रवादिनां प्रायेण नातिलङ्घनीयः, तमित्थम्भूतमुपसेवितं वृद्धैः सम्यगुपासीनो न तार्किकप्रवादैः कैश्चिन्न्याय्यादपनीयते वर्त्मनः । तत्रस्थश्चानिन्द्यो लोके भवति ।। 41 ।।

हस्तस्पर्शादिवान्धेन विषमे पथि धावता ।

अनुमानप्रधानेन विनिपातो न दुर्लभः ।। 42 ।।

यस्य हि स्थालीपुलाकन्यायेनैकदेशं दृष्ट्वा शिष्टेऽर्थे प्रतिपत्तिः सोऽन्ध इव विषमे गिरिमार्गे चक्षुष्मन्तं नेतारमन्तरेण त्वरया परिपतन् कञ्चिदेव मार्गैकदेशं हस्तस्पर्शेनावगम्य समतिक्रान्तस्तत्प्रत्ययादपरमपि तथैव प्रतिपद्यमानो यथा विनाशं लभते, तद्वदागमचक्षुषा विना तर्कानुपाती केवलेनानुमानेन क्वचिदाहितप्रत्ययो दृष्टादृष्टफलेषु कर्मस्वागममुत्क्रम्य प्रवर्तमानो नियतं महता प्रत्यवायेन संयुज्यते ।। 42 ।।

तस्मादकृतकं शास्त्रं स्मतिं च सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ।। 43 ।।

तस्मादपौरुषेयमनतिशङ्कनीयं पुरुषहितोपदेशाय प्रवृत्तमाम्नायं प्रमाणीकृत्य, पृषोदरादिवच्च साधुशब्दप्रयोगेषु शिष्टचरितमविच्छिन्नपारम्पर्य्यं स्वचरणसमाचारं परिगृह्य, विरोधे च स्थितविकल्पान्युत्सर्गापवादवन्ति पूर्वेषामृषीणां स्मृतिशास्त्राणि प्रतिकालं दृष्टशब्दशक्तिस्वरूपव्यभिचाराणि प्रमाणीकृत्येदमाचार्यैः शब्दानुशासनं प्रक्रान्तमनुगम्यते ।। 43 ।।

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ।। 44 ।।

उपादीयते येनार्थः, स्वरूपेऽध्यारोप्यते, तद्भावमिवापाद्यते, स उपादानशब्दः । एवं हि संग्रहे पठ्यते--"वाचक उपादानः स्वरूपवानव्युत्पत्तिपक्षे । व्युत्पत्तिपक्षे त्वर्थावहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्मणि प्रयोजकम् । उपादानो द्योतक इत्येके, सोऽयमिति व्यपदेशेन सम्बन्धोपयोगस्य शक्यत्वात्" इति । उपादेयो वा समुदाय उपादानः । तथा हि--
स्वरूपपदार्थकेष्ववयवानामनुपादेयत्वाद् विभागानामप्रतिपत्तिः ।
एको निमित्तं शब्दानाम् । यदधिष्ठाना यदुपाश्रया यदाधाराः श्रुतयः प्रत्याय्यमर्थं प्रतिपद्यन्ते, तस्य निमित्तत्वम् ।
अपरोऽर्थे । कारणव्यापारात्तु प्रतिलब्धविक्रियाविशेषः श्रोत्रानुपाती प्रकाशकभावेन नित्यं प्रत्याय्यपरतन्त्रोऽर्थेषु प्रयुज्यते ।
(अ) लब्धानुसंहारो निमित्तम्, उपजनितक्रमस्तु प्रत्यायक इत्येके । तस्यापि क्रमरूपप्रत्यस्तमयेनैव प्रतिपत्तृषु प्राप्तसमावेशस्य प्रत्यायकत्वमाचक्षते ।
अपर आह--क्रमवानक्रमनिमित्तम् । अक्रमे तु वागात्मनि श्रुत्यर्थशक्ती संसृज्येते । एवं ह्याह--
अविभक्तो विभक्तेभ्यो जायतेऽर्थस्य वाचकः ।
शब्दस्तत्रार्थरूपात्मा सम्भेदमुपगच्छति ।। 44 ।।

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।
बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते ।। 45 ।।

आत्मभेदस्य ब्रुविकर्मत्वे द्वितीया, वाक्यस्वरूपानुकरणे तु प्रथमा । तत्र कार्यकारणयोरन्यत्वपक्षे भेदः । पक्षान्तरे त्वेकस्यैवात्मनः शक्तिद्वयप्रविभागरूपपरिग्रहकृताद्बुद्ध्यवच्छेदान्नानात्वकल्पना । शब्दाकृतिव्यक्तिभेदाभेदव्यपाश्रयो वा पूर्वेषामाचार्याणां दर्शनभेद इति परस्तादेतद्वस्तुगत एव प्रपञ्चो भविष्यति ।। 45 ।।
अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ।। 46 ।।

एकत्वपक्षे नानात्वपक्षे वा बीजसत्तावस्थस्याविवृत्तस्य ज्योतिषो यथोत्तरेण प्रकाशात्मनाऽभिप्रज्वलितस्य स्वपररूपप्रतिपत्तिकारणत्वं प्रागसंवेद्यं पश्चादुपजायमानं दृश्यते, तथैव शब्दभेदभावनानुगते बुद्धितत्त्वे योऽयं शब्दः प्राप्त परिपाके स्वबीजे लब्धाभिमुख्यः स्थानकरणाद्यनुगृहीतो विवर्तते, स व्यञ्जकध्वनिभेदानुपातेन व्यवच्छद्यमानोद्देशः पौर्वापर्यवानुपलभ्यमानः स्वरूपपररूपयोः प्रकाशको भवति ।। 46 ।।

वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः ।
करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते ।। 47 ।।

इह शब्दार्थयोः सोऽयमिति सम्बन्धानुगमे क्रियमाणे यच्छब्दरूपमर्थे समारोपयितुमिष्यते, यस्मिंश्चार्थरूपमुपयोगेनानुप्रवेशं लभते, तत् पूर्व बुद्धिनिरूपणया कृतसंस्पर्शमभिधेयात्मनि प्राप्यमाणं यथाभिप्रायं रूपविपर्यासेनेव रूपान्तरोपग्राहि स्वरूपं निवेशयति ।
करणेभ्यो विवृत्तेनेति । अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिं विक्रियाधर्माणमनु विक्रियते ।
तच्च सूक्ष्मे व्यापिनि ध्वनौ करणव्यापारेण प्रचीयमाने स्थूलेनाभ्रसङ्घातवदुपलभ्येन नादात्मना प्राप्तविवर्तेन तद्विवर्तानुकारेणात्यन्तमविवर्तमानं विवर्तमानमिव गृह्यते ।। 47 ।।

नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च सः ।
अक्रमः क्रमरूपेण भेदवानिव जायते ।। 48 ।।

क्रमवता हि व्यापारेणेपसंह्रयमाणप्रचयरूपो नादः सप्रतिबन्धाभ्यनुज्ञया वृत्त्या स्फोटमवद्योतयति । स तदानीमेकोऽपि विभक्तोद्देशावच्छेद इव प्रत्यवभासते । तस्य तु क्रमयौगपद्ये नित्यत्वैकत्वाभ्यां विरोधान्न विद्येते तेनासावेकत्वमनतिक्रामन्संसर्गिणो नादस्य भेदरूपमुपसंगृह्णाति । संसर्गिधर्म एवायमित्थंभूतः । तथा ह्यत्यन्तमभिन्नात्मा भिन्नरूपावयवोऽवयवी नानादेशस्थिताधारो वैचित्र्येणोपलभ्यते ।। 48 ।।

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ।। 49 ।।

तत्त्वपक्षेऽन्यत्वपक्षे वा चन्द्रादिप्रतिबिम्बं यत्राधारे संसृष्टमिवोपलभ्यते नहि तत्तथा । तत्तु निष्क्रियमपि तोयतरङ्गादिक्रियाधर्मोपग्रहेणैव तोयादीनां भिन्नां प्रवृत्तिमनुपतत्येव । प्राकृतस्य वैकृतस्य च नादस्य ह्रस्वदीर्घप्लुतेषु द्रुतमध्यमविलम्बितासु च वृत्तिषु तावानेव स्फोटो विचित्रां वृत्तिमनुविधत्ते ।। 49 ।

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते ।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ।। 50 ।।

यथा ज्ञानं ज्ञेयपरतन्त्रम्, ज्ञेयरूपप्रत्यवभासत्वादनिर्देश्यस्वरूपमपि ज्ञानान्तरस्येव भिन्नं स्वस्यैवात्मनः स्वरूपमात्रं दर्शयति, तथा ह्यतीतमनुपलब्धमप्यन्येन ज्ञानेन स्मृतिविषयत्वं प्रतिपाद्यते । तद्वदयमर्थे शेषभावमापद्यमानः शब्दोऽभिधेयतन्त्रस्तद्रूपोपग्राही शेषिणीमिव स्वरूपमात्रां प्रत्यवभासयति । सा तु संनिहितप्रत्यवभासापि लोके भुज्यादिक्रियासम्बन्धविरोधान्नाश्रीयते । व्याकरणे

त्वर्थस्यकार्यविरोधित्वात् तस्याश्चाभिधेयरूपेण व्यवस्थानादविरुद्धः कार्यैर्योगः ।। 50 ।।

आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः
वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम् ।। 51 ।।

सर्वविभागोद्ग्राहप्रतिसंहारेण बाह्यो व्यावहारिकः शब्दोऽन्तः करणे मयूराद्यण्डरसवत् पूर्वविभागोद्ग्राहभावनामात्रामव्यतिक्रामन् प्रतिलीयते । यथा चैकस्य शब्दस्य प्रतिलयस्तथा दाशतयादीनामपि । स त्वेवं प्रतिलीनः प्रत्यस्तमितभागः प्राप्तविवक्षाप्रतिबोधायामन्तः शब्दवृत्तौ वाक्यपदविवर्तधर्ममुद्गृह्य प्रत्येकमवयवोद्ग्राहेण क्रमशक्तिं परिगृह्णाति । सा चास्योदयप्रत्यस्तमयनिर्भासमात्रा क्रियारूपेणावसीयते ।। 51 ।।

यथैकबुद्धिविषया मूर्तिरक्रियते पटे ।
सूत्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते ।। 52 ।।

यथा सावयवा पुरुषादिमूर्तिराचिकीर्षिता क्रमोपलब्धावप्येकबुद्धिनिबन्धनत्वं प्राप्ता पटगुड्यादिषु क्रमेणाक्रियते, तथा व्यावहारिकोऽपि क्रमग्राह्यः शब्दः प्रतिसंहृतक्रम एकबुद्धिनिबन्धनो भूत्वा निरवयवक्रमं बुद्धिरूपं तस्यामात्मप्रत्यवभासमात्रायां पृथग्भूतायामिव प्रत्यस्य तद्भावमिवोपनीय करणवृत्तिक्रमध्वनिधर्मप्रतिपत्त्या पुनरपि व्यवहारमवतरति । तथा चासौ तिसृभिरवस्थाभिरविच्छेदेनावर्तमानो ग्राह्यग्राहकभावं नातिवर्तते ।। 52 ।।

यथा प्रयोक्तुः प्रग्बुद्धिः शब्देष्वेव प्रवर्तते ।
व्यवसायो ग्रहीतृणमेवं तेष्वेव जायते ।। 53 ।।

यथैव प्रयोक्ता शब्दविशेषविषयं प्रयत्नमभिपद्यमानः प्रतिशब्दं परितः परिच्छिन्नान् शब्दात्मनः संस्पृशन्निव मनः प्रणिधत्ते, तथैव प्रतिपत्तापि शब्दरूपपरिच्छेदाधीनमर्थग्रहणं मन्यमानस्तं तं शब्दं सर्वेः सम्बन्धिभिर्विशेषणैराश्रितसंसर्गानुग्रहं निर्धारयति । अर्थप्रतिपत्तिभावनाभ्यासात् तु सा शब्दरूपपरिच्छेदावस्था न चित्रीक्रियते । तस्माच्छेषिभावकाष्ठामनुभूय सर्वार्थयोनयः सर्वे शब्दाः शेषभावमर्थेषु प्रतिपद्यन्ते ।। 53 ।।

अर्थेपसर्जनीभूतानभिधेयेषु केषुचित् ।
चरितार्थान् परार्थत्वान्न लोकः प्रतिद्यते ।। 54 ।।

यथैवायं शुक्ल इति सगुणे गुणिनि प्रतीयमाने क्रियाविशेषविषयमुपलक्षणत्वमपि गुणस्य क्वचिदेवान्यत्र विशिष्टत्वात् प्रतीयते, तथा यो गोशब्दः सोऽयं पिण्ड इत्यभिसम्बन्धे सति क्रियायोगविवक्षायामर्थस्योपलक्षणे चरितार्थं शब्दं शेषतां प्रतिपन्नमभिधेयमिव क्रियासाधनभावेन (न) लौकिकाः प्रतिपद्यन्ते ।। 54 ।।

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ।। 55 ।।

घटादयो हि ग्राह्यत्वेनैव व्यवस्थिता इति घटादीनां ग्रहणकाले नैव काञ्चिदुपलब्धिसहकारित्वेनेन्द्रियस्य विषयस्य वा स्वल्पामप्यनुग्रहमात्रां कुर्वन्ति ।

तथा ग्राह्यत्वमप्रतिपद्यमानान्येव सर्वेन्द्रियाणि ग्राह्यस्य विषयस्य ग्रहणनिमित्तत्वाय कल्पन्ते । तेजस्तु तमोरूपविरोधिना रूपभेदेन युक्तमवधार्यमाणस्वरूपमनुग्राहकत्वेनोपलब्धौ कारणभावं प्रतिपद्यते ।
शब्दोऽपि भावान्तरविरोधिना शब्दान्तरविरोधिना च स्वरूपेणावध्रियमाणभेदः परिगृहीतविशेषशब्दस्वरूपः प्रत्याय्यमर्थं प्रकाशयति । ते चास्य प्रतिपाद्यप्रतिपादकशक्ती नित्यमात्मभूते पृथक्त्वेनेव प्रत्यवभासेते ।। 55 ।।

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते ।
न सत्तयैव तेऽर्थानामगृहोताः प्रकाशकः ।। 56 ।।

यतश्चैतदेवं तस्मात्--
यदिग्राह्यत्वेन शेषिभावमप्रतिपन्नाः शब्दाः शेषत्वमर्थेषु प्रतिपद्येरन्, ते सत्तासम्बन्धमात्रेणोपलब्धा अनुपलब्धाश्च विषयत्वमनपेक्षमाणाः स्वं स्वमर्थं प्रत्याययेयुः, न तु प्रत्यायन्ति । तस्मादङ्गभूत एषामर्थेषु गुणभावापत्तौ प्राधान्यमात्रारूपेण संस्पर्श इति ।। 56 ।।

अतोऽनिर्ज्ञातरूपत्वात् किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ।। 57 ।।

शब्दस्वरूपसम्प्रत्ययाधीनमेवार्थप्रत्यायनं मन्यमाना लौकिकाः प्रयुक्तेष्वपि शब्देष्वप्रतीतस्वरूपषु शब्दस्वरूपविशेषप्रतिपत्त्यर्थं किं भवानाहेत्याहुः । इन्द्रियाणि तु शेषिभावमात्रासंस्पर्शेनासंसृष्टान्यपरिच्छिन्नस्वलक्षणानि विषयोपलब्धौशेषभावमुपगच्छन्ति ।। 57 ।।

भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ ।
भेदसार्येषु हेतुत्वमविरोधेन गच्छतः ।। 58 ।।

यथैव व्यपदेशिवद्भावविषयेष्वर्थात्मसु निमित्तभेदाद् बुद्धिप्रकल्पनया व्यवस्थापितभेदेषु लोके शास्त्रे च मुख्यभेदविषयाणि सर्वाणि कार्याणि क्रियन्ते, तथा शब्देष्वपि बुद्ध्या परिगृहीतग्राह्यग्राहकशक्त्यपोद्धारेषु मुख्यार्थविषयाणीव शास्त्रे संज्ञासंज्ञिसम्बन्धादीनि भेदकार्याणि विधीयन्ते ।। 58 ।।

वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः ।
आदैच्प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः।। 59 ।।

इह हि भिन्नरूपसंज्ञाप्रतिपाद्येषु `इको यणचि" (पाo 6/1/77) इत्यादिषु नोच्चार्यामाण इक्शब्दः स्थानी, नापि यण्शब्द आदेशः, तत्प्रत्यायितानां तु रूपान्तरयुक्तानां संज्ञानां स्थान्यादेशभावः शास्त्रेऽन्वाख्यायते । तुल्यरूपसंज्ञेष्वपि संज्ञिषु तादृशो सम्बन्धप्रतिपत्तिरिति सिद्धमेतत् ।
अत्र वृद्ध्यादयः शब्दाः स्वरूपाधिष्ठानाः स्वेनार्थेनार्थवन्तः स्वरूपेण शब्दान्तरस्वरूपाण्युपजिघृक्षन्तः स्वरानुनासिक्यभिन्नैराकारादिभिरादैच्छब्दादिभिः प्रत्यायितैः सम्बन्धं येन प्रकारेण प्रतिपद्यन्ते, तेनैव प्रकारेण दुरवधारत्वेऽपि भेदस्य ।। 59 ।।

अग्निशब्दस्तथैवायमग्निशब्दनिबन्धनः ।
अग्निश्रुत्यैति सम्बन्धमग्निशब्दाभिधेयया ।। 60 ।।

`स्वं रूपं शब्दस्य' इति संज्ञासंज्ञिनौ भेदैनोपादीयेते । तत्र द्वौ शब्दौ श्रूयमाणौ प्रतिपादकौ, प्रतीयमानावपि द्वावेव सम्बन्धभाजौ कार्यिणौ ।
तस्मादग्निशब्दो येनार्थभूतेनाभिन्नरूपेणाग्निशब्देनार्थवान् तमग्निशब्दान्तराभिधेयस्य तुल्यश्रुतेरग्निशब्दस्य संज्ञाभावं प्रतिपादयतीति ।। 60 ।।

यो य उच्चार्यते शब्दो नियतं न स कार्यभाक् ।
अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ।। 61 ।।

प्रतिज्ञातस्यार्थस्योत्तरस्मिन् श्लोके हेतुं वक्ष्यति । प्रत्यायको हि परार्थमुच्चारितो यदर्थमुच्चारितस्तं कार्येषु नियुङ्क्ते, तत्र कार्याण्यासजति । तस्यापि प्रत्याय्यस्य यदा प्रदर्शनार्थमन्तः करणसंनिविष्टस्योच्चारणं क्रियते, तदा तुल्यरूपमन्यप्रतिपाद्यं शब्दान्तरं प्रति न तस्य प्रत्यायकत्वं प्रतिबध्यते । सर्वस्यैवायमुच्चार्यमाणस्यात्मधर्म इति ।। 61 ।।

उच्चरन् परतन्त्रत्वाद् गुणः कार्यैर्न युज्यते ।
तस्मात् तदर्थैः कार्याणां सम्बन्धः परिकल्प्यते ।। 62 ।।

यथैव `गामानय, दध्यशान' इत्यर्थतन्त्रा श्रुतिः क्रियासु साधनत्वं न प्रतिलभते, तथा शब्दान्तरतन्त्रापि, पारार्थ्यस्याविशिष्टत्वात् । तस्मात् सर्वस्य प्रत्याय्यस्यार्थस्य चक्षुरादिग्राह्यस्य च क्रियासाधनत्वं विज्ञायते ।। 62 ।।

सामान्यमाश्रितं यद्यदुपमानोपमेययोः ।
तस्य तस्योपमानेषु धर्मोऽन्यो व्यतिरिच्यते ।। 63 ।।

इहोपमानमुपमेयं तयोश्च साधारणो धर्म इति त्रितयमेतत् सिद्धम् । तत्र `ब्राह्मणवदधीते क्षत्रियः' इत्युपमेय श्रूयमाणं सामान्यमुपमानेऽपि प्रतीयते । यदा तु `ब्राह्मणाध्ययनेन तुल्यं क्षत्रियाध्ययनम्' इत्यध्येतारौ उपमानोपमेययोः सम्बन्धत्वेनोपादीयेते, तदाध्ययनयोराश्रयविशेषभिन्नयोः सौष्ठवादयो धर्माः साधारणत्वेन प्रतीयन्ते ।
सौष्ठवादीनामप्यध्ययनसन्बन्धिनां परिनिष्पत्त्यादयो धर्मा इति नास्ति व्यतिरेकस्यावच्छेदः ।। 63 ।।

गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रिताद् गुणादेव प्रकृष्टत्वं प्रतीयते ।। 64 ।।

यावदिदं तदिति प्राधान्येनोपादीयते, तद् द्रव्यम् । न च द्रव्यस्य प्रकर्षापकर्षौ स्त इत्याश्रितैर्भेदहेतुभिः परतन्त्रैः संसर्गिभिर्निमित्तैः प्रकर्षे सव्यापारैः प्रचिकीर्षितोऽर्थः प्रकृष्यते ।
तद्यथा---प्रकृष्टः शुक्ल इति शुक्लेन रूपेण सत्यप्युपलक्षणत्वे प्रकर्षं प्रति सव्यापारेण तद्वानप्रकृष्टाश्रयः प्रकृष्टव्यपदेशं लभते । `शुक्लतरं रूपमस्य' इत्यत्र तु रूपस्य द्रव्यत्वेनोपादाने क्रियमाणे रूपाश्रितनिमित्तात् प्रकृष्टव्यपदेशः प्रकल्पते ।

न च गुणसामान्यं श्वेतसमवायि श्वैत्यमेकत्वाद् भेदहेतुः संभवतीति संसर्गिधर्मान्तराश्रयोऽवान्तरस्यैकस्यापि भेदः परिकल्प्यते । संविज्ञानपदान्तराभावाद् वा भावप्रत्ययैरनिर्देश्यास्तुल्यश्रुत्युपगृहीताः शौक्ल्यवदेव रूपाश्रिता विशेषाः प्रकृष्टव्यपदेशहेतवो विज्ञायन्ते । यावच्चेदं तदिति व्यपदेश्यस्य प्राधान्येनाश्रितस्य प्रकृष्टव्यपदेशः क्रियते, तावद् विच्छिन्नोऽयं निमित्तान्तरपरिकल्पनाधर्मप्रसङ्ग इति ।। 64 ।।

तस्याभिधेयभावेन यः शब्दः समवस्थितः ।
तस्याप्युच्चारणे रूपमन्यत् तस्माद् विविच्येते ।। 65 ।।

एवं च कृत्वोच्चार्यमाणस्य---
हेतुदृष्टान्ताभ्यां व्यतिरेकव्यवस्थानिदर्शनं कृत्वा यथाप्रकृतं स्वरूपमेव पुनरनुसंह्रियते । तस्याभिधेयभूतस्य यदा यदा निदर्शनार्थमुच्चारणं प्रक्रम्यते, तदा तदा सर्वस्यैवोच्चार्यमाणस्यैवंधर्मत्वात् तस्यापि निबन्धनभूतं रूपान्तरमन्यद् विविच्यते । केचिदाहुः--"अभिधनमावर्तते, तदेव त्वभिधेयत्वान्न प्रच्यवते ।"
एवं हि संग्रह उक्तम्---"नहि स्वरूपं शब्दानां गोपिण्डादिवत् करणे संनिविशते । तत्तु नित्यमभिधेयमेवाभिधानसंनिवेशे सति तुल्यरूपत्वादसनिविष्टमपि समुच्चार्यमाणत्वेनावसीयते" इति ।। 65 ।।

प्राक्संज्ञिनाभिसम्बन्धात् संज्ञा रूपपदार्थिका ।
षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ।। 66 ।।

आभिधेयान्तरप्रविवेकेऽप्यभिधानस्य स्वरूपेणाप्रविवेकं दर्शयति । स्वरूपाधिष्ठानं चोपसर्जनीभूतस्वरूपार्थः शब्दोऽर्थान्तरे वर्तते । यावत् संज्ञिना तु संज्ञा न सम्बद्धा, तावन्न संज्ञिपदार्थिकेत्यर्थान्तराभावे तस्याः प्रातिपदिकसंज्ञाभावाद् विभक्तियोगो न स्यात् । वाचकानां च व्यतिरेकहेतुत्वात् सम्बन्धिनि शब्दान्तरे प्रातिपदिकार्थव्यतिरेको न प्रकल्पते ।। 66 ।।

तत्रार्थवत्त्वात् प्रथमा संज्ञाशब्दाद् विधीयते ।
अस्येति व्यतिरेकश्च तदर्थादेव जायते ।। 67 ।।

स्वरूपाध्यारोपचिकीर्षायां बाह्येष्वर्थात्मसु शब्दार्थानां स्वरूपेणाधिष्ठानभूतेनार्थवत्त्वात् प्रथमा विधीयते । सोऽयमिति च संज्ञिना शक्त्यवच्छेदलक्षणः सम्बन्धो नियम्यते । तद्यथा---`गौर्वाहीकः, सिंहो माणवकः' इति । प्रातिपदिकार्थव्यतिरेकः षष्ठीप्रवृत्तिहेतु; स्वरूपाभिधेयेनार्थवता तद्वता संज्ञाशब्देन योगात् संज्ञिशब्दानामुपजायते ।
एवं ह्याह---
अर्थवता व्यपदेशः सोऽयं तस्येति वा यतो भवति ।
नानर्थकेन तस्मान्नित्यः शब्दार्थसम्बन्धः ।। इति ।। 67 ।।

स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते ।
व्यक्तेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते ।। 68 ।।

सज्ञिनीं व्यक्तिमिच्छन्ति सूत्रे ग्राह्यमथापरे ।

जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते ।। 69 ।।

इह केचिद् वृत्तिकाराः पठन्ति--`स्वं रूपं शब्दस्य ग्राहकं भवति द्योतकं प्रत्यायकम्' इति । अपरे तु `स्वं रूपं शब्दस्य ग्राह्यं द्योत्यं प्रत्याय्यम्' इति । तदनेन श्लोकद्वयेनोपन्यस्तम् । जातावपि द्वयी प्रतिपत्तिराचार्य्याणाम् ।

केचिदाहुः--प्रतिनियतस्वरूपभेदा व्यक्तयः । न ह्यसंवेद्यव्यपदेश्यविद्यमानं वा व्यक्तीनां स्वरूपम् । व्यक्तिरेव हि गौः, नाकृतिः । गुण एव हि नीलः, न गुणसामान्यं नीलत्वं नीलमिति । आकृतेस्त्वकृतसमवायानामपि स एवायमिति बुद्ध्यनुवृत्तौ भेदवत्स्वर्थेषु निमित्तत्वम् । एतद्धि तस्याः सत्तायामनुमानम् ।

अन्ये तु मन्यन्ते--जातौ प्रतिलब्धस्वरूपाः शब्दास्तद्रूपतयैव व्यक्तिमव्यपदेश्यस्वरूपां प्रत्यायन्ति । सर्वत्रैव हि निमित्तान्निमित्तवत्यर्थे निमित्तस्वरूपः प्रत्यय उत्पद्यते । तत्र हि भेदेन दृष्टाभिधानान्यदृष्टाभिदानानि च निमित्तानि शब्दप्रत्ययावेकदेशसारूप्येणात्यन्तसारूप्येण च प्रवर्तयन्ति ।

तथा च स्वं रूपमिति जातिरेव कैश्चित् प्रतिज्ञायते । शब्दस्येति तु शब्दशब्देन व्यक्तिर्व्यपदिश्यते । केषाञ्चित् तु विपर्ययेणायं व्यपदेशः । तत्र जातेर्व्यक्तिः संज्ञा व्यक्तेर्वा जातिः । सा च प्रदेशेषूच्चारिता व्यक्तिं कार्ययोगेन प्रत्याययति । सा च जतिरसंसृष्टा व्यक्त्या नोच्चरति । व्यक्तिरप्यसंसृष्टा जात्या प्रयोगविषयं नावतरति । तात्पर्येण तु विवक्षा भिद्यते । किञ्चिदत्र प्रधानम्, किञ्चिन्नान्तरीयकमिति । तच्च प्रतिज्ञाभेदमात्रम् ।

जातिः शास्त्रे कार्ययोगिनी संचिकीर्षिता, व्यक्तिः शास्त्रे कार्ययोगिनी संचिकीर्षितेति ।

स्वं रूपं शब्दस्येत्यत्र बहुविकल्पो वैयाकरणाधिकरणेष्वागमः ।

तद्यथा--रूपमात्रमेकदेशोऽर्थवतो रूपार्थसमुदायस्य सामान्यविशेषादिशक्तियुक्तस्य शब्दस्य शब्दत्वेनाश्रितस्य संज्ञा । रूपवान् वा संसर्गिणीभिः शक्तिभिर्भिन्नः सार्थकः समुदायः श्रुतिमात्रस्य ग्राहकः । मात्राकलापो हि शब्दः । तदेकदेशाः स्वरूपादयो मात्राः । मात्राबिश्च मात्रावतामप्यस्ति भेदव्यपदेशव्यवहारः । वार्क्षो शाखेति यथा ।

अपर आह--यद्यपि वस्तुन भिन्नम्, शब्दार्थस्तु भिन्नः । शब्दो हयेकवस्तुविषयाणामपि शक्तीनामवच्छेदेनोपग्रहे वर्तते । तद्यथा--`अयं दण्डः' इति प्रत्यक्षरूपतया तदेव वस्तु सर्वनाम्नाभिधीयते, नोपलभ्यमानेनापि दण्दजातियोगेन । दण्डजातियोगाभिधाने हि तस्यासामर्थ्यं सर्वनाम्नः, दण्डशब्दस्य च विशिष्टजातीयार्थाभिधायिनः प्रत्यक्षत्वेऽपि सति तस्य वस्तुनः प्रत्यक्षरूपतया प्रत्यायने प्रतिबध्यते शक्तिः ।

तथा "स्वं रूपम्" इत्यनेनाग्न्यादिश्रुतयः सत्यपि शब्दजातियोगेऽग्न्यादिरूपतयैव प्रत्याय्यन्ते, (न) शब्दजातियोगित्वेन । शब्दशब्देन तु शब्दजातियोगित्वमेवाख्यायते, नाग्न्यादिश्रुतियोगः ।

तत्र शब्दान्तरार्थः शब्दान्तरार्थस्य प्रसिद्धभेदस्य संज्ञात्वेनोपादीयमानस्य संज्ञिभावं प्रतिपद्यत इति तदेतन्निदर्शनमात्रम्, प्रसक्तानुप्रसक्तविचारणाप्रसङ्गनिवृत्त्यर्थं तु सर्वे स्वं रूपसूत्रमतभेदा उदाह्रियन्ते ।। 68 - 69 ।।

कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः ।
कार्यत्वे नित्यतायां वा केचिन्नानात्ववादिनः ।। 70 ।।

येषामेकशब्दत्वं तेषामयं जातिव्यक्तिव्यवहारो न सम्भवतीति जात्युपन्यासादनन्तरमिदमुपन्यस्तम् । तत्र नित्यतायामत्यन्तमुख्यमेकत्वम् । कार्यत्वे तु सकृदुच्चरितस्य वर्णस्य पदस्य वा पुनरुच्चारणे स एवायमित्यव्यभिचारिप्रत्ययाभेद उत्पद्यमान एकत्वं प्रकल्पयति । एकत्वदर्शनं चाश्रित्योक्तम्--`एकत्वाकदारस्य सिद्धम्' इति ।

उपलब्धिव्यवधानं तु कालशब्दाभ्याम्, न वर्णरूपव्यवधानम् । देशपृथक्त्वदर्शनं च सत्ताकृतिजलबिम्बदर्शनवत् ।

अनेकत्वपक्षेऽपि कार्यष्वपि शब्देष्ववश्यं पुनरुच्चारणे व्यवहारार्थमौपचारिकमेकत्वमाश्रयणीयम् ।

भिन्नार्थानां तु पदानां भिन्नपदस्थानां च वर्णानामत्यन्तनानात्वं नित्यपक्षे कार्यपक्षे वा नानात्ववादिभिरभ्युपगम्यते ।। 70 ।।

पदभेदेऽपि वर्णानामेकत्वं न निवर्तते ।
वाक्येषु पदमेकञ्च भिन्नेष्वप्युपलभ्यते ।। 71 ।।

अर्कः, अश्वः, अर्थ इति भिन्नेष्वप्येतेषु पदेषु कालशब्दान्ताभ्यां व्यवहितोपलब्धिरभिव्यक्तिनिमित्तासंनिधानात् तिरोभूतरूपः, निमित्तभेदाद् भिन्नेषु प्रयोक्तृषु देशपृथक्त्वे भेदरूपेण प्रत्यवभासमान एक एवायमकारश्छायादर्शजलादिप्रतिबिम्बभेदकल्पेन लोके प्रयुज्यते । वाक्येषु च प्रविवेकि निर्ज्ञातार्थभेदं व यावत् तुल्यरूपं पदं गौरक्ष इति सर्वं तदेकम् । नामाख्यातभेदेऽपि चैकमेवाक्ष्यश्व इत्येवं प्रकारं पदम् ।। 71 ।।

न वर्णव्यतिरेकेण पदमन्यच्च विद्यते ।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तंन किञ्चन ।। 72 ।।

नहि क्रमजन्मभिरुच्चरितप्रध्वंसिभिरयुगपत्कालैः सावयवैर्वर्णैः शब्दान्तरारम्भः सम्भवतीति वर्णमात्रमेव पदम् । तेषामपि सावयवत्वात् क्रमप्रवृत्तावयवानामाव्यवहारविच्छेदात् तुरीयतुरीयकं किमप्यव्यपदेश्यं रूपं व्यवहारातीतमस्तीति न वर्णपदे विद्येति । वर्णपदाभावे कुतो वाक्यस्य व्यतिरेकः ?
तथा चोक्तम्--`अनित्यत्वमेवं सम्प्राप्नोति' इति । समुदायाभावादुपगृहीतार्थउपगृहीतो वा न कश्चिच्छब्दो विद्यत इति ।। 72 ।।

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको क कञ्चन ।। 73 ।।

अपर आह--
वर्णप्रतिपत्तिनिर्भासाभ्यो बह्वीभ्यः समुदायविषयस्य प्रयत्नस्य भेदात् सत्यपि पदाभिव्यक्तिविषयस्य ध्वनेर्भेदे सादृश्यानुगमाद् वर्णविभागप्रतिपत्त्युपाया पदे प्रतिपत्तिरुपद्यते ।
तत्त्वक्रममपूर्वापरमेकमेव नित्यमभेद्यं वर्णतुरीयोपपादित इवैकात्मा । वर्णानां त्वव्यपदेश्यानि व्यवहारातीतानि भिन्नरूपाभिमतान्यकारादीनां तुरीयाणि प्रतिपादकानि कल्पितानि । तेन तेषां सुज्ञानतरमेकत्वं प्रसिद्धं शास्त्रव्यवहारे । वाक्यस्य चैकानेकपदस्वरूपस्यार्थे प्रयोगाद् वाक्यप्रतिपत्त्युपायभूता पदे प्रतिपत्तिरुपद्यते । अतत्त्वभूतास्तस्मिन्नेव वाक्यात्मनि वर्णपदरूपनिर्भासाः क्रमवत्यो बुद्धय उत्पद्यन्ते ।
तस्मादेवंभूताद् वाक्यादभेद्यान्निर्भागाच्छब्दात्मनो वर्णानां पदानां चात्यन्तमविवेक इति ।। 73 ।।

भिन्नं दर्शनमाश्रित्य व्यवहारोऽनुगम्यते ।
तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः ।। 74 ।।

आचार्या हि परिस्मिन्नक्रमेऽन्तः संनिवेशिनि शब्दतत्त्वे प्रत्यधिकरणमागमभेदपरिग्रहेण भिन्नानि दर्शनानि श्रिताः शास्त्रव्यवहारमनुगच्छन्ति ।
तद्यया--श्रुत्यभेदादनेकार्थत्वेऽप्येकशब्दत्वम्, अर्थभेदादेकश्रुतित्वेऽप्यनेकशब्दत्वमिति ।
तत्र चैकेषामौपचारिको भेदो मुख्यमेकत्वम् । अन्येषां तु पृथक्त्वं मुख्यं व्यावहारिकमेकत्वमिति ।

तथा हयुक्तम्--"एकश्च शब्दो बह्वर्थोऽक्षाः पादा माषाः" इति । `तथा ग्रामशब्दोऽयं बह्वर्थः' इत्युक्त्वा भेदेनोपसंहारं करोति--"तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तस्येदं ग्रहणम्' इति ।। 74 ।।

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ।। 75 ।।

इह नित्यत्वादात्मतत्त्वस्य स्फोटानां स्थितौ नास्ति कालपरिमाणवृत्तेः स्वल्पोऽपि व्यापारः । ध्वनिना तु संसृष्टं स्फोटस्य स्वरूपमुपलभ्यते यस्मात् तस्माद् ध्वनेः स्थितिकालः स्फोटोपलब्धिरूपः परिवर्तते । तेन च स्फोटविषयेण ग्रहणेनोपाधिना भिन्नकालेन प्रकल्पितभेदाः स्फोटस्य द्रुतमध्यमविलम्बिता वृत्तयास्त्रिभागोत्कर्षेणयुक्ताः समाख्यायन्ते ।। 75 ।।

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ।। 76 ।।

यद्येवं ह्रस्वदीर्घप्लुतेष्वपि ध्वनिरेव कालभेदहेतुः । "तपरस्तत्कालस्य" (पाo 1/1/90) इति दीर्घप्लुतयोर्थथैव, वृत्तिभेदेऽपि तथैव तत्कालव्यपदेशप्रसङ्गः । "द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्" इत्येतस्मिन् पर्यनुयोगेप्रसक्ते प्रविधीयते ।
इह द्विविधो ध्वनिः--प्राकृतो वैकृतश्च । तत्र प्राकृतो नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते । वैकृतस्तु येनाभिव्यक्तं स्फोटरूपं पुनरनिच्छेदेन प्रचिततरकालमुपभ्यते । एवं हि संग्रहकारः पठति---
शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ।।
तत्र तथा संनिवेशविशेषात् तुल्यमात्राविभागपरिमाणानि गार्गादिवाक्यानि कानिचिदुच्चारणावृत्तिप्रचयग्राह्याणि, कानिचिदपचितरूपावृत्तिग्राह्याणि । तथा स्वभावभेदादपचितध्वनिद्योत्यो ह्रस्वः । तावताऽभिव्यक्तिनिमित्तेन स्वरूपस्य ग्राहिका बुद्धिस्तत्रोत्पद्यते । प्रचितध्वनिद्योत्यस्तु दीर्घः । प्रचिततरध्वानिप्रतिपाद्यस्तु प्लुतः । स च प्राकृतध्वनिकालो व्यतिरेकाग्रहणादध्यारोप्यमाणः स्फोटे स्फोटकाल इत्युपचर्यते शास्त्रे ।। 76 ।।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ।। 77 ।।

तद्यथा प्रकाशो जन्मानन्तरमेव घटादीनां ग्रहणे हेतुः, अवतिष्ठमानस्तु ग्रहणप्रबन्धहेतुर्भवति, एवमभिव्यक्ते शब्दे ध्वनिरुत्तरकालमनुवर्तमानो बुद्ध्यनुवृत्तिशब्दविषयां विषय (नाभि) व्यक्तिबलाधानादुपसंहरति । तस्मादुपलक्षितव्यतिरेकेण वैकृतेन ध्वनिना संसृज्यमानोऽपि स्फोटात्मा तादूप्यस्यानध्यारोपात् शास्त्रे ह्रस्वादिवत् कालभेदव्यवहारं नावतरति ।। 77 ।।

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम् ।। 78 ।।

कथं पुनर्ध्वनिः शब्दोपलब्धिनिसमत्तत्वं प्रतिपद्यते--
एतस्मिञ्श्लोके शब्दाभिव्यक्तिप्रक्रियामात्रं प्रतिज्ञायते । उत्तरौ तु दृष्टान्तप्रदर्शनविषयौ ।

तत्र केचिन्मन्यन्ते--ध्वनिरुत्पद्यमानः श्रोत्रं संस्करोति, तच्च संक्रियमाणं शब्दोपलब्धौ द्वारतां प्रतिपद्यते ।
अन्ये त्वभिव्यक्तिवादिनो मन्यन्ते--शब्द एव ध्वनिसंसर्गात् प्राप्तसंस्कारः श्रोत्रस्य विषयत्वमुपगच्छति । केषाञ्चिद् ध्वनिरुभयोः शब्दश्रोत्रयोरनुग्रहे वर्तते । ताभ्यामिन्द्रियविषयाभ्यां सहकारिणा निमित्तान्तरेणानुगृहीताभ्यां शब्दविषया बुद्धिरुत्पाद्यते । प्रदीपप्रकाशानुग्रहादिवद् दृश्येष्वर्थेषु सहकारिनिमित्तान्तरापेक्षया हि शक्तयो निमित्तानां समग्रतां नातिक्रामन्ति ।। 78 ।।

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः ।
विषस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ।। 79 ।।

समाधानं हि प्राकृतमलौकिकं वा न विषयात्मनि दृश्ये विशेषमादधाति । तथाञ्जनादिद्रव्यं चक्षुरेव संस्करोति, न बाह्यं विषयम् । अलौकिकमपि समाधानं सूक्ष्मव्यवहितविप्रकृष्टोपलब्धौ चक्षुरेवानुगृह्णाति । विषयानुग्रहे हि तस्यान्यैरपि ग्रहणं प्रसज्येत, विशेषाभावात् । विषयसंस्कारस्तु तैलादीनामातपादिभिः पृथिव्याश्चोदकेन गन्धप्रतिपत्तिकाले दृष्टः, न घ्राणेन्द्रियस्य । घ्राणेन्द्रियसंस्कारे तु संस्कृतासंस्कृतेषु विषयेषु प्रतिपत्तिभेदो न स्यात्, विशेषाभावात् ।। 79 ।।

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि ।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः ।। 80 ।।

इहालोकानुगृहीतं घटादिविषयं सन्तमसेऽवस्थितोऽयं प्रतिपद्यते । तत्र येषामप्राप्यकारि चक्षुस्तेषामालोकेन विषयः प्रायेणानुगृह्यते । प्राप्यकारित्वे तु चक्षुषस्तुल्यजातीयेन तेजसा नयनरश्म्यनुग्रहः क्रियते ।। 80 ।।

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते ।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः ।। 81 ।।

अथापरेऽभिव्यक्तिवादिनां त्रयो दर्शनभेदाः । शब्देन संसृष्टो ध्वनिरुपाश्रयानुराग इव स्फटिकादीनामविभक्त उपलभ्यते । केषाञ्चित् तु यथेन्द्रियाणीन्द्रियगुणाश्चासंवेद्यस्वरूपा एव विषयोपलब्धिहेतवः, तथायं ध्वनिरगृह्यमाणरूपः शब्दग्रहे निमित्तं भवति ।
अन्ये त्वाहुः--दृष्टा केवलस्य ध्वनेः स्फोटरूपानवधारणे दूरादुपलब्धिः । शब्दोपलब्धिकल्प एवासावित्यपरे । तद्यथा--मरुष्वपचितपरिमाणानां द्रव्याणां परिमाणोपचयग्रहणं दृष्टम्, चन्द्रादीनां च परिमाणापचयग्रहणम्, वृभाद्यरूपग्रहणं च । शकलकोटरादीनां सामान्यविशेषाणां च धवखदिरादीनामप्रतिपत्तिः ।। 81 ।।

यथाऽनुवाकः श्लोको वा सोढत्वमुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्तिः निरूप्यते ।। 82 ।।

वर्णपदवाक्यविषयाः प्रयत्नविशेषसाध्या ध्वनयो वर्णपदवाक्याख्यान् स्फोटान् पुनः पुनराविर्भावयन्तो बुद्धिष्वध्यारोपयन्ति । क्रमेण तु वर्णतुरीयग्रहणे सति समुदायाभावादविषयत्वमन्त्याया बुद्धेः प्राप्नोतीति संहितासूत्रभाष्यविवरणे बहुधा विचारितम् । कृत्स्नमपि शब्दरूपं प्रकाशीकृतं यावदस्वीकृताकारमनुपगृहीतविशेषं बुद्धावसंनिविष्टं तावदनुपलब्धेनैव तेन व्यवहारो न कश्चिदपि प्रकल्पते ।। 82 ।।

प्रत्ययैरनुपाख्येयैर्ग्रहणानुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ।। 83 ।।

व्यक्तरूपग्रहणानुगुणा अनुपाख्येयाकारा बहव उपायभूताः प्रत्यया ध्वनिभिः प्रकाश्यमाने शब्दे समुत्पद्यमानाः शब्दस्वरूपावग्रहहेतवो भवन्ति ।। 83 ।।

नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ।। 84 ।।

तत्र त्वयमाकारपरिग्रहक्रमः--
नादैः शब्दात्मानमवद्योतयद्भिर्यथोत्तरोत्कर्षेणाधीयन्ते व्यक्तपरिच्छेदानुगुणसंस्कारभावनाबीजानि । ततश्चान्त्यो ध्वनिविशेषः परिच्छेदसंस्कारभावनाबीजवृत्तिलाभप्राप्तयोग्यतापरिपाकायां बुद्धावुपग्रहेण शब्दस्वरूपाकारं सन्निवेशयति ।। 84 ।।

असतश्चान्तराले याञ्छब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ।। 85 ।।

इह निर्भागेष्वपूर्वापरेष्वभेद्येषु वर्णपदवाक्येषु ध्वनिनाभिव्यज्यमानेषु वर्णे तावद्वर्णावयवग्रहणसरूपा भागाभिनिवेशिन्य इव बुद्धय उपजायन्ते पदे वर्णग्रहणसरूपाः, वाक्ये पदग्रहणसरूपाः । ताभिश्च बुद्धिभिरुपलब्धारो भागभूतानसतः शब्दानस्तित्वेनाभिमन्यन्ते । सा खलु पराप्रदर्शितविषयग्रहिणामशक्तिः प्रतिपतृणाम् । तथाभूतोपायक्रमवर्णान्तरसाध्यमेव हि तेषां शब्ददर्शनम् । निष्क्रमं तु दाशतयमप्युपायान्तरेणप्रतिपद्यन्ते प्रतिपादयन्ति च ।। 85 ।।

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपा वाग् ज्ञानं ज्ञेयव्यपाश्रयम् ।। 86 ।।

अभिन्नमपि ज्ञानमरूपं सर्वज्ञेयरूपोपग्राहित्वाभ्देदरूपतया प्रत्यवभासते--पञ्च वृक्षाः, विंशतिर्गाव इति । संहृतसर्वबीजश्चायमान्तरः शब्दात्मा व्यञ्जकध्वनिभेदक्रमानुकारेणाविर्भावकाले प्रत्यवभासते । तेन चान्यभेदरूपोपग्रहेणोपप्लुतं शब्दतत्त्वमेवेदं वाङ्मनसाख्यमविभागमन्यथा प्रतीयत इति । एवं ह्याह--
ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते ।
नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते ।। 86 ।।

यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदेऽपि तथा शब्दान्तरश्रुतिः ।। 87 ।।

यथा शतसंख्या सहस्त्रसंख्यां व भेदिकामाश्रयस्य प्रतिपित्समानस्तदुपायभूतानेकत्वादीन् भिन्नकार्यान् शतादीनामवयवानिव प्रतिपद्यते, तथा देवदत्तादिशब्दान्तरश्रुतिपरिच्छेदोपाया वाक्यरूपप्रतिपत्तिरिति नान्तरीयकं तासामुपादानम् ।। 87 ।।

प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये ।

तेषामत्यन्तभेदेऽपि संकीर्णा इव शक्तयः ।। 88 ।।

वर्णपदवाक्यविषया हि विशिष्टाः प्रयत्नास्तत्प्रेरिताश्च वायवः स्थानान्यभिघ्नन्ति । स्थानाभिघातप्रप्तसंस्काराश्च ध्वनयो यद्यपि परव्यावृत्तस्वभावाः, तथापि गोगवयजात्युपव्यञ्जनवद्, भ्रमणरेचनादिकर्मसामान्यविशेषाश्रयवच्च तेषामुपव्यञ्जनानां दुर्ज्ञानो भेदः । सामान्यमात्रया कयाचिदनुगतः प्रविभक्तकार्याणामपि शक्तीनामात्माकुतश्चित् कार्यविशेषात् संस्कारेणैवावस्थितः ततश्चायं निरवयवेषु वर्णेषु मात्राविभागाध्यवसायः, पदेषु च वर्णविभागाध्यवसायः, वाक्येषु च पदविभागाध्यवसाय इति ।। 88 ।

यथैव दशंनैः पूर्वैर्दूरात् सन्तमसेऽपि वा ।
अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ।। 89 ।।

यथा विषयेन्द्रियधर्म एवायं प्राकृतचक्षुषां दूरादाकृतिमात्रोपलब्धौ वृक्षादीन् हस्त्यादिवत् प्रतिपद्यन्ते । तद्देशावस्थिता एव प्रणिधानाभ्यासात् क्रमेण पुनर्यथावयवमुपलभन्ते । व्यक्तालोकाच्च देशात् सहसा मन्दसंनिविष्टप्रकाशात् अपवरकादीन्प्रविश्यरज्ज्वादीन् सर्पादिवत् प्रतिपद्य तथैव प्रणिधानाभ्यासात् चक्षुषि प्रकृतिस्थे यथावदुपलभन्ते ।। 89 ।।

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ।। 90 ।।

वाक्ये हि निर्भागे तदभिव्यक्तिविषयैः प्रयत्नविशेषैः समुत्थाप्यमाना ध्वनयः सत्यपि भेदे सामान्यशक्तिसमन्वयाद् वर्णपदप्रत्यवभासभागावग्रहरूपां बुद्धिं प्रवर्तयन्ति ।। 90 ।।

यथानुपूर्वोनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपतृणां नियतो बुद्धिषु क्रमः ।। 91 ।।

यथा क्षीरमुत्पत्तिपक्षेऽभिव्यक्तिपक्षे वा सर्पिरादिविकारप्रयुक्तं
नियतरूपैर्मण्डकादिभिरवस्थाविशेषैर्विशिष्टसंविज्ञानपदनिबन्धनैरसंविज्ञानपदैश्च युज्यमानं यथायथं
प्रकृतिधर्मप्रत्यासत्तिमनुवर्तमानमन्यतमानुपूर्वो नियमानतिक्रमेण प्रयोजिकां विकारशक्तिं प्रदर्शयति । शाल्यादिबीजं च तण्डुलादिप्रधानविकारप्रयुक्तं नान्तरीयकैर्नालाङ्कुरादिभिरवस्थाविशेषैर्युज्यमानं प्रयोजकेन प्रधानविकारधर्मेण प्रत्यवभासते । तथैषामर्वाग्दर्शनानां प्रतिपत्तृणां वाक्यस्वरूपग्रहणपूर्वकेण वाक्यार्थग्रहणेन प्रधानेन प्रयुक्तानां नियतोपाये साध्ये तस्मिन्नर्थे नियतक्रमपरिणामभागाकारप्रत्यवभासमात्रायुक्ता बुद्धयः प्रवर्तन्ते स्फोटेषु ।। 91 ।।

भागवत्स्वपि तेष्वेव रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् ।। 92 ।।

येऽपि भेदवादिनो गौरिति गाकारौकारविसर्जनीयमात्रमेव प्रतिपन्नाः, नान्यस्तद्व्यतिरिक्तो वर्णरूपग्रहणोपायग्राह्यो निर्भागः शब्दात्मा विद्यते इति मन्यन्ते, नित्यत्वं च शब्दानामभ्युपगच्छन्ति, तेषां क्रमेणाव्यपदेश्यवर्णतुरीयांशाभिव्यक्तौ स्वारूपानवधारणमविषयत्वं चान्त्यस्य व्यक्तरूपोपग्राहिणः परिच्छेदस्य प्रसज्यते । यौगपद्येन तु सर्वावयवाभिव्यक्तौ श्रुत्यविशेषप्रसङ्गो गवे इति च , वेग इति च, तेन इति च, न ते इति च ।
तत्र शब्दान्तरेऽर्थान्तरसम्बन्धिनि नैवायं दोषः । तस्मिन्नपि तु शब्देऽभिव्यञ्जकध्वनिक्रमकृता भेदेन प्रतिपत्तिः । दृष्टो हि

मण्डूकादिवसासम्बद्धप्रदीपाभिव्यक्तेषु रज्ज्वादिषु सर्पादिप्रतिपत्तिभेदः ।
निर्भागेषु वा भागभेदप्रकल्पनाकृतशक्तिविशेषपरिग्रहा बुद्धयो यथोपायत्वं प्रतिपद्यन्ते, तदनन्तरश्लोकेषु वर्णितम् ।। 92 ।।

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।। 93 ।।

आकृतिनित्यत्वाच्छब्दनित्यत्वं केचिद् आचक्षाणाः `उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवति' इत्येवमादिषु स्फोटशब्दवाच्यां शब्दत्वादन्यां क्रमजन्मभिरयुगपत्कालैराश्रयैः क्रमेण प्रकल्पितोपलब्धिनिमित्तसंस्कारां शब्दाकृतिमाचक्षते । उत्पत्तिमत्यस्तु शब्दव्यक्तयः सत्यव्यपदेश्यरूपत्वे स्फोटं व्यपदेश्यरूपमवद्योतयन्त्यो ध्वनिव्यपदेशं लभन्ते ।। 93 ।।

अविकारस्य शब्दस्य निमितैर्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ।। 94 ।।

अन्ये त्वाकृतिव्यक्तिव्यवहारप्रक्रियावैधर्म्यादेकमेव शब्दतत्त्वं नित्यमलब्धपरिणामं स्वनिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिरनाश्रितं ध्वनिषु प्रदीपादिप्रकाशन्यायेनासति वस्तुसंप्रमोहे प्राप्तव्यञ्जकध्वनिविक्रियानुरागमुपलब्धरूपमिवाभिव्यज्यत इत्याहुः ।। 94।।

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ।। 95 ।।

इह केचिदभिव्यक्तिमेवानित्यत्वसमधिगमहेतुत्वेनापदिशन्ति । अनित्यः शब्दोऽभिव्यङ्ग्यत्वाद् घटवत् । इहानित्यानां घटादीनां प्रदीपादिभिरभिव्यक्तिर्दृष्टा, शब्दश्चायं ध्वनिभिरभिव्यज्यत इत्युपगम्यते, तस्मादनित्यः । अथ नाभिव्यज्यते. प्राप्तमिदमुत्पद्यते इति, अतोऽप्यनित्य एव । तत्र येषां जातयः सन्ति, नित्याश्च, तान् प्रत्युच्यते--उभयथा दृष्टत्वादनपदेश इति ।
येषां तु नैव किञ्चिन्नित्यमस्ति तेष्वसिद्धत्वेन प्रत्यवतिष्ठमानेष्वनैकान्तिकत्वस्य नित्यशब्दवादिनः प्रथमतरमसिद्धत्वेनैव प्रत्यवतिष्ठन्ते । कथम् ? परं हि प्रत्यभिव्यङ्ग्यत्वादित्यनपदेशः, संदिग्धत्वाद् विकल्पप्रसङ्गो वानुषङ्गिणामित्यनवस्था स्यात् तर्कस्य ।। 95 ।।

देशादिभिश्च सम्बन्धो दृष्टः कायवतामपि ।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः ।। 96 ।।

अथापरः पूर्वपक्ष इहोपादीयते--देशभेदान्नाभिव्यज्यते शब्दः । समानदेशस्था हि घटादयः प्रदीपादिभिर्व्यज्यन्ते । करणसंयोगविभागाभ्यां तु व्यञ्जकाभ्यामन्यत्र शब्दोपलब्धिरिति । स चायं ध्वनिषु व्यञ्जकेष्वप्रसङ्गः । तत्रापि ब्रुवते--कथमेकदेशस्थः शब्दो नानादेशैरतिविप्रकृष्टैर्ध्वनिभिर्व्यज्यते इति ।
तत्रेदं प्रतिविधीयते--देशैकत्वं देशनानात्वमिति कायवतामेष धर्मः । कायवन्तोऽपि तावदादित्यादयः परिच्छिन्नदेशा नानाधिकरणस्था इहोपलभ्यन्ते । अमूर्तयोस्तु ध्वनिशब्दयोर्देशदेशिव्यवहारातिक्रमात् सत्यपि देशभेदविकल्पाभिमाने नैवासौ तयोर्भेदो विद्यत इति ।। 96 ।।

ग्रहणग्रह्ययोः सिद्धा योग्यता नियता यथा ।

व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ।। 97 ।।

अथापरः पूर्वपक्षः--अभिव्यञ्जकनियमान्नाभिव्यजयते शब्दः । इहाभिव्यङ्क्तव्यं नाभिव्यञ्जकं नियतमपेक्षते । घटादीनां हि मणिप्रदीपौषधिग्रहनक्षत्रैः सर्वैः सर्वेषामभिव्यक्तिः क्रियते । नियतनादाभिव्यञ्जकाश्चाभ्युपगम्यन्ते शब्दाः, वर्णान्तराभिव्यक्तिहेतुभिर्नादैर्वर्णान्तराणामनभिव्यक्तेः तस्मान्नाभिव्यज्यन्त इति । तत्र प्रतिविधीयते--ग्रहणग्राह्ययोरिति । तद्यथा चक्षुः समवेतं रूपमेव बाह्यरूपस्याभिव्यक्तौ निमित्तम्, न गुणान्तरणि, नापीतराणोन्द्रियाणि, नेन्द्रियान्तरगुणाः, तथा बाह्यार्थाभिव्यक्तिहेतवो भवन्ति ।। 97 ।।

सदृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ।। 98 ।।

तुल्येन्द्रियग्रह्येष्वयं नियमो न विद्यत इति पर्यनुयोगे प्रतिविधीयते --
तुल्येन्द्रियग्राह्येष्वप्येष धर्मो दृश्यते । तद्यथा नदीशैलेयादीनां द्रव्याणां किञ्चिदेव संयोगिद्रव्यान्तरं कस्यचिदेत्र द्रवयस्य गन्धविशेषाभिव्यक्तौ समर्थं भवति ।। 98 ।।

प्रकाशकानां भेदाँश्च प्रकाश्योऽर्थोऽनुवर्तते ।
तैलोदकादिभेदे तत् प्रत्यक्षं प्रतिबिम्बके ।। 99 ।।

अथापरः पूर्वपक्षः--नाभिव्यज्यते शब्दः, वृद्धिह्रासससंख्याभेदेष्वभिव्यञ्जकानामभिव्यङ्ग्यस्य तद्धर्मसमन्वयात् । न ह्यभिव्यञ्जकानां वृद्धिह्रासयोरभिव्यङ्ग्यानामर्थानां वृद्धिह्रासावुपलभ्येते । तद्यथा--प्रदीपस्य वृद्धिह्रासौ न घटादीनाम् । न खल्वपि प्रदीपस्य संख्याभेदे संख्यान्तरयुक्तानां घटादीनां प्रदीपसंख्याभेदनिमित्तः संख्यान्तरयोगो दृश्यते । शब्दस्य त्वभिघातभेदे दृश्यते संख्यापरिमाणभेदः । तस्मान्नाभिव्यज्यत इति । तत्र प्रतिविधीयते--
दृष्टमभिव्यङ्ग्यानामभिव्यञ्जकभेदानुविधानम् । तद्यथा--निम्नेष्वादर्शतलादिषु मुखप्रतिबिम्बमुन्नतं दृश्यते, उन्नतेषु निम्नम्, खड्गे दीर्घम्, प्रियङ्गुतैलेश्याम्, चीनशस्त्रयवनकाचादिष्वादर्शप्रमाणभेदानुपातीत्यपरिमाणो भेदविकल्पः । संख्याभेदोऽप्यादर्शभेदे जलतरङ्गभेदे च दृश्यते सूर्य्यादिप्रतिबिम्बानाम् ।। 99 ।।

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु ।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ।। 100 ।।

तत्रैतत् स्यात्--प्रतिबिम्बमादर्शादिषु चन्द्रादिभ्यो भावान्तरमेव संनिविष्टमुपलभ्यत इति । तत्र प्रतिविधीयते --
नही वज्रादिष्वाधारेषु विरुद्धपरिमाणानामन्तः संनिवेशिनां पर्वतादिसरूपाणां भावानामुत्पत्तिः संभवतीति ।। 100 ।।

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद् विभज्यते ।। 101 ।।

नित्यानां हि स्थितौ सहकारिण्याः कालशक्तेर्व्यापारो न विद्यते । लोके व्यवहारेण तु बुद्ध्या

पूर्वान्तापरान्तयोरनुगम्यमानात्मतत्त्वाः स्थितिं प्रति न भिद्यन्ते सर्व एव प्रचिताप्रचितरूपा वर्णपदवाक्याख्याः स्फोटाः ।
उपलब्धिविषयतापत्तौ तुतेषामभिन्नकालानामुपलब्धिस्थित्यभिमानः । वृत्तिकालः स्वकालश्चेति ।
नादो ही प्राकृतः शब्दत्मनि प्रत्यस्यमानस्थितिरूपो भेदस्याग्रहणार्थं ह्रस्वदीर्घप्लुतकालभेदव्यवहारव्यवस्थाहेतुः । वैकृतस्तु नादो बाह्यद्रुतादिवृत्तिकालव्यवस्यां प्रकल्पयति ।। 101 ।।

यः संयोगविभागाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ।। 102 ।।

अनित्यपक्षे स्थानकरणप्राप्तिविभागहेतुकः प्रथमाभिनिर्वृत्तो यः शब्दः, स स्फोट इत्युच्यते । तज्जातस्तु सर्वदिक्कालस्तद्रूपप्रतिबिम्बोपग्राहिणः सर्वद्रव्याणां स्वेनात्मना निरवयवत्वाद् आकाशस्यापि मुख्यसमवायिदेशवत् संयोगिद्रव्यान्तरदेशप्रविभागोपचारे सति, देशनैरन्तर्यप्रत्यासत्त्या कार्यकारणसन्तानाविच्छेदेन यथोत्तरमपचीयमानपूर्वप्रतिबिम्बोपग्रहशक्तयो मन्दप्रदीपप्रकाशितरूपकल्पाः क्रमेण प्रध्वंसमाना ये वर्णश्रुतिं विभजन्ति, ते ध्वनय इत्युच्यन्ते ।
नित्यपक्षे तु संयोगजविभागजध्वनिव्यङ्ग्यः स्फोटः । एकेषां संयोगविभागजध्वनिसंभूतनादाभिव्यङ्ग्यः । स्फोटरूपानुग्राहिणस्तु यथोत्तरमपचीयमानाभिव्यक्तिसामर्थ्या द्रुतादिवृत्तिभेदव्यवस्था हेतवोऽपचयात्मका ध्वनयः ।। 102 ।।

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः ।। 103 ।।

देशव्याप्तिसामान्यादल्पमहत्त्वे शब्दस्योपचर्येते । प्रसिद्धेर्वा । सर्वत्र हि प्रसिद्धिरे वार्थव्यवस्थाकारणम् ।
अनवस्थितैव हि तर्कागमाभ्यां भिन्नेषु प्रवादेषु वस्तुगता व्यवस्था । तत्राविशेषेण कार्यशब्दानां कारणशब्दानां चोत्पन्नापवर्गित्वान्नास्ति महतोऽल्पस्य वा शब्दस्य सूक्ष्मोऽपि कश्चित् कालभेदः, हस्तिमशकज्ञानवत् ।
निमित्तभेदात्तु कार्यारम्भे शब्दस्य सामर्थ्यं भिद्यते । कस्यचिद्धि भेरीदण्डाभिघातजस्येव कार्यपरम्परा दूरमनुपतति । कश्चित् तु लोहकंसाभिघात इव प्रत्यासन्नदेशग्राह्यं दीर्घकालं सन्तानमविच्छेदेनारभते ।। 103 ।।

दूरात् प्रभेद दीपस्य ध्वनिमात्रं तु लक्ष्यते ।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ।। 104 ।।

इह केचिदाचार्या व्यक्तं स्फोटं सहजेन ध्वनिना सर्वतो दूरव्यापिना प्रकाशस्थानीयेन गन्धेन युक्तं द्रव्यविशेषमिवाविर्भावकाल एव संबद्धं मन्यन्ते ध्वनिना । यथैव प्रदीपे घनसंनिविष्टावयवं प्रत्युपादानं तेजोद्रव्यं तदाश्रितश्च तद्विक्रियानुपरवर्तो प्रकाशः, तथा घण्टायाश्चाभिघातेन व्यक्ततरौ स्फोटनादौ सर्वषां वर्णानामभिनिष्पत्तौ धर्म इति ।
स चायं श्लोकद्वयेनानन्तरेण प्राकृतवैकृतयोर्नादयोर्विशेष आख्यातः ।। 104 ।

द्रव्याभिघातात् प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः ।। 105 ।।

नित्यपक्षेऽपि नैव शब्दानां प्रचये दीर्घप्लुतौ प्रचीयेते । किं तर्हि द्रव्याभिघातप्रचयादेव । स्वरूपमेव हि तयोस्तावद्भिरभिघातैर्निष्पादयितुं शक्यते । तस्मादास्वरूपलाभात् तयोः करणानामभिघातविशेषादितरेतरावयवसंस्पर्शौ

व्यक्तवायुप्रस्पन्दनानुगतः कम्पोऽनुवर्तते । कम्पे तूपरते ये नादजा नादास्ते द्रुतादिवृत्तिभेदव्यवस्थाहेतवो भवन्ति ।। 105 ।।

अनवस्थितकम्पेऽपि करणे ध्वनयोऽपरे ।
स्फोटादेवोपजायन्ते ज्वाला ज्वालान्तरादिव ।। 106 ।।

कम्पेष्वप्यविच्छेदनानुवर्तमानेषु यावानभिघातजः शब्दो नासौ कदाचिदप्यनारब्धकार्यो निवर्तते । तत्र ये कम्पजाः शब्दाः समानकाला ध्वनयः स्फोटात्मानमभिसंस्कुर्वन्ति, तांश्चाभिमर्शिनोऽनुप्रकाशान् नादान्तरालाननुषङ्गानित्याचक्षते । तेषामपि च प्रत्यनुषङ्गं कार्यपरम्परा यावत्कम्पो न विच्छिद्यते , तावत् स्फोटानुग्रहमात्रयानुवर्तत इत्याहुः ।
सा चेयमुत्पत्तिरिन्धनज्वालाप्रवृत्तिप्रबन्धधर्मेणाख्यायते । तद्यथेन्धनाश्रिताभिर्ज्वालाभिर्ज्वालाकार्यसन्तानसमुद्भवा ज्वालाः संप्रवर्तन्ते । तत्प्रकाशनेन चार्थानामुपकुर्वन्ति, तथेमपि नादप्रवृत्तिरिति ।। 106 ।।

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः ।। 107 ।।

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ।। 108 ।।

तत्र वायोस्तावच्छब्दभावापत्तिमाचक्षते --

तस्य कारणसामर्थ्याद् वेगप्रचयधर्मणः ।
सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः ।। 109 ।।

इत्येवमादिसर्वमनुगन्तव्यम् ।। 109 ।।

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः ।
छायातपतमःशब्दभावेन परिणामिनः ।। 110 ।।

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ।। 111 ।।

अणूनां शब्दत्वापत्तिमपरे प्रतिपन्नास्त एवमाहुः ।
इत्यादि सर्वमनुगन्तव्यम् ।। 110 - 111 ।।

अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ।। 112 ।।

स मनोभावमापद्य तेजसा पाकमागतः ।

वायुमाविशति प्रणमथासौ समुदीर्यते ।। 113 ।।

अन्तः करणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ।। 114 ।।

विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ।। 115 ।।

ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति--
इत्येवमादि सर्वमनुगन्तव्यम् । निदर्शनमात्रं चेदम् । बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्ते । तद्यथा--"अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितन्तः प्राणो वायुस्तेजसानुगृहीतः शब्दवहाभ्यः शुषिभ्यः सूक्ष्मांशं धूमसन्तानवत् संहति ।
स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कयाचिदन्तः संनिवेशिनः शब्दस्याविभक्तं बिम्बमुपगृह्णाति" इत्येवमादि सर्वमनुगन्तव्यम् ।
तद्यथा--"नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति, ततः शब्दनिष्पत्तिः" इत्यादिशिक्षाकारमतभेदप्रबन्धोऽनुगन्तव्यः ।
आचार्यः खल्वप्याह--
आत्मा बुद्ध्या समर्थ्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
इत्येवमादि ।
तथापरः पठति--"वायुः कोष्ठस्थानमनुप्रदानमापद्यते । स कण्ठगतः श्वासतां नादतां वा" इत्यादि ।
अथापर आह--"मनोऽभिहतः कायाग्निः प्राणमुदीरयति । स नाभेरुद्यन् मूर्धन्यभिहतोऽन्येन पुनरुद्यता मरुताभिहन्यमानो ध्वनिः सम्पद्यते, क इति वा ख इति वा" इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमागमदर्शनं दृश्यमानं सर्वं प्रपञ्चेन समर्थयितव्यम् ।। 112 - 115 ।।

अजस्त्रवृत्तिर्यः शब्द सूक्ष्मत्वान्नोपलभ्यते ।
व्यञ्जनाद् वायुरिव स स्वनिमित्तात् प्रतीयते ।। 116 ।।

अथापर आगमोऽनुगम्यते--सूक्ष्मो वायुसंनिचय इवान्तर्बहिश्च सर्वमूर्त्तोनां ध्वनिरवस्थितः । स चैकेषामाकाश इति प्रतिपद्यते । स यथैव तु सर्वत्र परमाणुसंभवे संहतत्वाद् व्यजनाभिघातेन वायुराश्रयस्थानात् प्रविभज्यमानः क्रियाभिराविश्यते, तथैव ध्वनिः स्वनिमित्तैरभिव्यक्तप्रचितविक्रियारूपः श्रोत्रप्रदेशं प्राप्त उपलभ्यते संस्करोति च ।। 116 ।।

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ।। 117 ।।

पक्षभेदा एवैते । नायमनन्तरः प्रचयधर्माध्वनिरिह श्लोके निर्दिश्यते । शब्दस्तु पूर्वप्रकृतः प्रवादभेदैरन्वाख्यायते । शब्दः खलु प्राणाधिष्ठानो बुद्ध्यधिष्ठानश्च ।
स तु द्वाभ्यां प्राणबुद्धिमात्राशक्तिभ्यां प्रतिलब्धाभिव्यक्तिरर्थं प्रत्याययति ।

तत्र प्राणो बुद्धितत्त्वेनान्तराविष्टः । स चोर्ध्वमभिप्रवृत्तो ज्वालावद् वर्णस्थानेष्वाक्षेपकप्रयत्नानुविधायी प्रतिविघातविवर्तेन नित्यशब्दोपग्राहिणा विवर्तते ।
स च संसृष्टप्राप्तशक्तिविवर्तः पृथिवीकललन्यग्रोधधानादिवद् भेपमुपगृह्णाति, भेदानुरागमात्रं च परस्मिन्नभेदे शब्दात्मनि संनिवेशयति ।। 117 ।।

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ।। 118 ।।

तत्र केषाञ्चिदाकृतयः सूक्ष्मशब्दाधिष्ठाननिबन्धनाः । ताः खल्वात्माभिव्यक्तिमधिष्ठानपरिणामेन प्रतिलभमाना वाच्यवाचकभावेन व्यवतिष्ठन्ते । यथापरेषामिन्द्रियेषु विषयमात्रशक्तयः प्रतिलयं गच्छन्ति, तथेन्द्रियमात्राशक्तयो बुद्धिषु, बुद्धिमात्राशक्तयः प्रतिसंह्रतक्रमे वागात्मनि ।
सा चेयं स्वप्नप्रबोधप्रवृत्तिः प्रविभक्तपुरुषानुकारा महत्यपि वाक्तत्त्वे कारणे नित्यमवस्थिता ।
तथाऽपरेऽप्याहुः--
वागेवार्थं पश्यति वाग् ब्रवीति वागेवार्थं निहितं सन्तनोति ।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ।। 118 ।।

षड्जादिभेदः शब्देन व्याख्यातो रूप्यते यतः ।
तस्मादर्थविधाः सर्वाः शब्दमात्रासु निश्रिताः ।। 119 ।।

संविज्ञानपदनिबन्धनो हि सर्वोऽर्थः स्मृतिनिरूपणयाऽभिजल्पनिरूपणयाकारनिरूपणया च निरूप्यमाणो व्यवहारमवतरति । षड्जऋषभगान्धारधैवतिनिषादपञ्जममध्यमानां चानवस्थितप्रसिद्धसंविज्ञानपदानांविशेषोऽवधारणनिबन्धनपदप्रत्ययमन्तरेण नावधार्यते । गोपालाविपालादयो हि निबन्धनपढानि प्रकल्प्य गवादिषु विशेषविषयं व्यवहारमारभन्ते ।
तस्मात् समाख्येयेष्वसमाख्येयेषु च सामान्यविशेषशब्देष्वध्यारूढो भेदवानर्थः शब्दशक्तिसंसृष्ट्या शब्दानुविद्धया शब्दात्मिकया बुद्ध्या प्रकाश्यत उपगृह्यते स्वीक्रियते ।। 119 ।।

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ।। 120 ।।

यथैवान्ये कार्यकारणभावमाचक्षाणाः कार्येषु कारणधर्मसमन्वयं दृष्ट्वा व्यावृत्तभेदं सूक्ष्ममसंवेद्यं सर्वविकारशक्त्यनुगतं प्रत्यस्तमितव्यक्तिरूपमणुग्रामं प्रधानशक्तिसमूहमविद्याकारणं जन्मपरिणामासंसर्गं विवर्तं व्यवस्थापयन्ति, तथैवाम्नाये संह्रतभोग्यभोक्तृशक्तेर्वागात्मनो बहुधा कारणत्वमाम्नातम्--"स उ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः । पुरुषो वै लोकः । पुरुषो यज्ञः । तस्यैता लोकम्पृणास्तिस्त्र आहुतयस्ता एव त्र्यालिखिता वै त्रयो लोकाः" इति ।
तथा--"एष वै छन्दस्यः साममयः प्रथमोऽक्षन् वैराजः पुरुषो योऽन्नमसृजत तस्मात् पशवोऽन्वजायन्त । पशुभ्यो वनस्पतयः , वनस्पतिभ्योऽग्निः । तस्मादाहुर्न दारुपात्रेण दुह्यादग्निर्वा एष दारुपात्रम् । तस्मान्न दारुपात्रेण दुह्यते" (इति) ।
ऋग्वर्णः खल्वपि--
इन्द्राच्छन्दः प्रथमं प्रास्यदन्नं तस्मादिमे नामरूपे विषूची ।
नाम प्राणाच्छन्दसोरूपमुत्पन्नमेकं छन्दो बुहुधा चाकशीति ।।

तथा पुनराह--
वागेव शिश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।
अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह ।।
पुराकल्पोऽप्याह--
विभज्य बहुधात्मानं स च्छन्दस्यः प्रजापतिः ।
छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ।।
साध्वी वाग्भूयसी येषु पुरुषेषु व्यवस्थिता ।
अधिकं वर्तते तेषु पुण्यं रूपं प्रजापते। ।।
प्राजापत्यं महत्तेजस्तत्पात्रैरिव संवृतम् ।
शरीरभेदे विदुषां स्वां योनिमुपधावति ।।
यदेतन्मण्डलं भास्वद् धाम चित्रस्य राधसः ।
तद्भावमभिसंभूय विद्यायां प्रविलीयते ।। 120 ।।

इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ।। 121 ।।

सदपि वाग्व्यवहारेणानुपगृहीतमर्थरूपमसता तुल्यम् । अत्यन्तासच्च प्रसिद्धं लोके शशविषाणादि, प्राप्ताविर्भावतिरोभावं च गन्थर्वनगरादि वाचा समुत्थाप्यमानं मुख्यसत्तायुक्तमिव तेषु कार्येषु प्रत्यवभासते ।
समाविष्टवाचां च स्वजातिषु बालानामपि पूर्वशब्दावेशभावनासंस्काराधानात् तासु तास्वर्थक्रियास्वनाख्येयशब्दनिबन्धना प्रतिपत्तिरुत्पद्यते ।। 121 ।।

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ।। 122 ।।

अनादिश्चैषा शब्दभावना प्रतिपुरुषमवस्थितज्ञानबीजपरिग्रहा । न हयेतस्याः कथञ्चित् पौरुषेयत्वं संभवति ।
तथा ह्यनुपदेशसाध्याः प्रतिभागम्या एव करणविन्यासादयः । को ह्येतान् पुरुषधर्मानन्यत्र शब्दात्मिकताया कर्तुं प्रतिपादयितुं वा समर्थ इति ।। 122 ।।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।। 123 ।।

यथास्य संह्रतरूपा शब्दभावना तथा ज्ञेयेष्वर्थेषुत्पन्नेनाप्यविकल्पकेन कार्यं न क्रियते ।
तद्यथा त्वरितं गच्छतस्तृणलोष्टादिसंस्पर्शात् सत्यपि ज्ञाने काचिदेव सा
ज्ञानावस्था, यस्यामभिमुखीभूतशब्दभावनाबीजायामाविर्भूतास्वर्थोपग्राहिणामाख्येयरूपाणामनाख्येयरूपाणां च शब्दानां प्रत्यर्थनियतासु शक्तिषु शब्दानुविद्धेन शक्त्यनुपातिना ज्ञानेनाक्रियमाण उपगृह्यमाणो वस्त्वात्मा ज्ञानानुगतो व्यक्तरूपप्रत्यवभासो ज्ञायत इत्यभिधीयते । स च निमित्तान्तरादाविर्भवात्सु श्रुतिबीजेषु स्मृतिहेतुर्भवति ।
तथैकेषामाचार्याणां सुप्तस्यापि जाग्रद्वृत्त्या सदृशो ज्ञानवृत्तिप्रबन्धः । केवलं तु शब्दभावनाबीजानि तदा सूक्ष्मां वृत्तिं प्रतिलभन्ते । तस्मात् तामसीं चेति तामवस्थामाहुः । तदेतत् संज्ञानं शब्दप्रकृतिविकारभावेनाविर्भावतिरोभावावजस्त्रं प्रत्यनुभवति

।। 123 ।।

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ।। 124 ।।

यथा प्रकाशकत्वमग्नेः स्वरूपं चैतन्यं वान्तर्यामिणः, तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम् । याप्यसञ्चेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते ।
योऽपि प्रथमोपनिपाती बाह्येष्वर्थेषु प्रकाशः स निमित्तानामपरिग्रहेण वस्तुस्वरूपमात्रमिदं तदित्यव्यपदेश्यया वृत्त्या प्रत्यवभासयति ।
स्मृतिकालेऽपि च तादृशानामुपलब्धिबीजानामाभिमुख्ये स्मर्तव्येषु श्लोकादिषु प्रकाशानुगममात्ररूपमिव बुद्धौ विपरिवर्तते । कोऽप्यसावनुवाकः श्लोको वा योऽयं मया श्रुतिमात्रेण प्रकान्त इति ।
वाग्रूपतायां चासत्यामुत्पन्नोऽपि प्रकाशः पररूपमनङ्गीकुर्वन् प्रकाशनक्रियासधनरूपतायां न व्यवतिष्ठते । भिन्नरूपाणां चानुपकारिणात्मान्तरात्मनामितरेतरस्य वस्तुमात्राज्ञाने प्रत्यवभासमाने यदुत्तरकालमनुसंधानं प्रत्यवमर्श एकार्थकारित्वविभागेन शक्तिसंसर्गयोगोपग्रहः, तद् वाग्रूपतायां बद्धम् ।
सा ह्यनुसन्दधाना प्रत्यवमृशन्ती च सर्वविशेषणविशिष्टेऽप्यर्थक्रियाकारिणि प्रत्यये शक्त्यपोद्धारकल्पनया भेदसंसर्गमात्रां न विजहाति ।। 124 ।।

सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी ।
तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ।। 125 ।।

विद्याशिल्पकलादिभिर्लौकिकेषु वैदिकेषु चार्थेषु मनुष्याणां प्रायेण व्यवहारः प्रतिबद्धः ।
मनुष्याधीनाश्चेतरस्य भूतग्रामस्य स्थावरजङ्गमस्य प्रतृत्तयः । विद्यादयश्च वाग्रूपायां बुद्धौ निबद्धाः ।
घटादीनां चाभिनिष्पादने प्रयोज्यप्रयोजकानामुपदेशसमीहादि सर्वं वाग्रूपतानुसारेण प्रकल्पते ।। 125 ।।

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
तन्मात्रामप्यतिक्रान्तं चैतन्यं सर्वजातिषु ।। 126 ।।

योऽयं चैतन्ये वाग्रूपतानुगमस्तेन लोके ससंज्ञो विसंज्ञ इति व्यपदेशः क्रियते । एवं ह्याह--
अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ।। इति ।

अन्तः संज्ञानामपि सुखदुः खसंविन्मात्रा यावद् वाग्रूपतानुवृत्तिस्तावदेव भवति । बहिः संज्ञेषु । तन्निबंधनो लोकव्यवहारस्तदभावान्नियतमुत्सीदेत् ।
नही सा चेतन्येनाविष्टा जातिरस्ति, यस्यां स्वपरसम्बोधो यो वाचा नानुगम्यते । तस्माच्चितिक्रियारूपमलब्धवाक्शाक्तिपरिग्रहं न विद्यते ।
वाक्तत्त्वरूपमेव चितिक्रियारूपमित्यन्ये । तथाह---
भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा ।
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ।।

एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबंधनाः ।
पृथक् प्रत्यवभासन्ते वाग्विबाग गवादयः ।।
षड्द्वारां षडधिष्ठानां षट्प्रबोधां षडव्ययाम् ।
ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते ।। 126 ।।

प्रविभागे यथा कर्ता तया कार्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ।। 127 ।।

प्रविभक्तसाध्यसाधनरूपो हि शब्दब्रह्मणो विवर्तः । प्राप्तजन्मादिविक्रिया वाग्विभागग्रन्थयो जागरणवृत्तिकाले वाग्रूपतामनुगच्छन्त्यो निवृत्तिविक्रियाप्राप्तिभिः कार्येषु यतन्ते । स्वप्नाद्यविभागे तु सैव वागविषया बाह्यवस्तुस्वरूपा सती निर्वृत्तिविक्रियाप्राप्तिषु कर्मभावं प्रतिपद्यते । आह च ---
प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् ।
सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवत ते ।। 127 ।।

स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा ।
तथैव रूढतामेति तया ह्यर्थो विधीयते ।। 128 ।।

सर्वो हि विकार आत्ममात्रेति केषाञ्चिद् दर्शनम् । स तु प्रतिपुरुषमन्तः संनिविष्टो बाह्य इव प्रत्यवभासते । रूढत्वाच्च व्यवहारमात्रमिदमन्तर्बहिरिति । न ह्येतदेकत्वेऽमूर्तत्वे वा संभवति ।
अपरेषां सर्वप्रबोधरूपः सर्वप्रभेदरूपश्चैकस्य चितिक्रियातत्त्वस्यायं परिणाम इत्यादि स्वमात्रावादिनां दर्शनम् ।
चैतन्यं भूतयोनिस्तिलक्षोदरसवत् प्रविभज्यत इत्येके ।
अन्ये त्वाहुः-- तद्यथा महतोऽग्नेर्विस्फुलङ्गाः सूक्ष्माद् वायोरभ्रघनाश्चन्द्रकान्ताद् विभागिन्यस्तोयधाराः पृथिव्या वा सालादयो न्यग्रोधधानादिभ्यो वा सावरोहप्रसवा न्यग्रोधा इत्येवमादि परमात्रावदिनां दर्शनम् । स्वपरमात्रावादिनां दर्शनं विद्याभाष्येभ्यः प्रतिपत्तव्यम् ।
श्रुत्या प्रक्रम्यते । शब्देनान्तः संनिवेशिना सुखदुः खादिभावेन नानाप्राणिषु बहुधा प्रक्रम्यते,, लोष्टक्षेपपातादिषु च लोकभावनासमयेन प्रसिद्ध्या व्यवतिष्ठते । तया ह्यर्थो विधीयत इति । सैव हि श्रुतिरर्थं कल्पयति संस्करोति ।। 128 ।।

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ।। 129 ।।

श्रुतिरेव हि सर्वं शब्दर्थं स्वरूपपदात्मनि संनिविष्टं दर्शयति । सा तमर्थं जनयतीव । स हि तस्यां प्रत्याय्यात्मना नित्यमवस्थितः । न च बाह्यवस्तुगतं सदसत्त्वं श्रुतिरपेक्षते, नापि विपर्ययाविपर्ययौ ।
तथा ह्यलातचक्रेऽपि सर्वप्रदेशव्यापिरूपा च क्रियादिशब्दरूपभावनानुगता श्रुतिरवतिष्ठमानाऽलातचक्रादिशब्दानां व्यावहारिकाणामर्थवत्तां प्रकल्पयति । तच्छ्रुतिबीजाभिमुख्ये तथाभूतनिमित्तया श्रुत्या प्रकल्पितो वत्स्वाकारः सत्यप्यनुमानबलीयस्त्वे रूढीभवति ।
अत्यन्तासत्सु च निर्ज्ञातेषु शशविषाणादिषु श्रुतिरेवार्थं जनयति प्रकल्पयति स्वात्मन्यवरुणद्धि । तथैनान्यान् प्रत्यक्षानर्थान् । नित्यसंनिविष्टो हि सनिबन्धनश्चानिबन्धनश्च शब्देष्वभिधेयत्वेनार्थात्मा, प्रतिपुरुषं तु भावनानुविधायिनी सत्यसति वार्थे स्वप्रत्ययानुकारेण भिन्नरूपा शब्देभ्यः प्रतिपत्तिरुपपद्यते ।। 129 ।।

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ।। 130 ।।

इह द्वौ शब्दात्मानौ--नित्यः कार्यश्च । तत्र कार्यो व्यवहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही । नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वोषामन्तः संनिवेशी प्रभवो विकारणामाश्रयः कर्मणामधिष्ठानं सुखदुः खयोः, सर्वत्राप्रतिहतकार्यशक्तिर्घटादिर्निरुद्धइवं प्रकाशः परिगृहीतभोगक्षेत्रावधिः, सर्वमूर्तोनामपरिमाणा प्रकृतिः, सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद् दवाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभः, तस्मिन, खलु वाग्योगविदो विच्छिद्यहङ्कारग्रन्थीनत्यन्तविनिर्भागेण संसृज्यन्ते ।
आह च--
चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ।। 130 ।।

तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् बह्मामृतमश्नुते ।। 131 ।।

व्यवस्थितसाधुभावेन हि रूपेण संस्क्रियमाणे शब्दतत्त्वेऽपभ्रंशोपघातापगमादाविर्भूते धर्मविशेषे नियतोऽभ्युदयः । तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभांतत्त्वप्रभवां भावविकारप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुद्ध्य नियता क्षेमप्राप्तिरिति ।
आह च--
प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः ।
क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ।।
वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च ।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ।।
ज्योतिरान्तरमासाद्य च्छिन्नग्रन्थिपरिग्रहः ।
परेण ज्योतिषेकत्वं छित्वा ग्रन्थीन् प्रपद्यते ।। 131 ।।

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते ।
बोजं सर्वागमापाये त्रय्येवातो व्यवस्थिता ।। 132 ।।

सर्वप्रवादेष्वागमवाक्यानां प्रणेतृपरिग्रहेण पौरुषेयत्वमभ्युपगम्यते । वेदवाक्यानि तु चैतन्यवदपौरुषेयाणि । तान्यागमान्तराणां प्रणेतृषु विच्छिन्नेष्वागमान्तरानुसन्धाने बीजवदवतिष्ठन्ते ।। 132 ।।

अस्तं यातेषु वादेषु कर्तृष्वन्यष्वसत्स्वपि ।
श्रुतिस्मृत्युदितं धर्मं लोको न व्यतिवर्तते ।। 133 ।।

इह प्रणेतृवदागमानामपि प्रवादेषु विच्छेदो (ना) भ्युपगम्यते । तेषु प्रत्यस्तमितेषु यावदन्ये प्रणेतारो नोत्पद्यन्ते, आगमन्तराणि च न प्रतायन्ते, तत्राप्यन्तराले श्रुतिविहितानि कर्माणि स्मृतिनिबन्धनांश्च भक्ष्याभक्ष्यादीन् नियमान्नातिक्रामन्ति शिष्टाः ।।133 ।।

ज्ञाने स्वाभाविके नार्थः शास्त्रैः कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चेत् तस्याम्नायो निबन्धनम् ।। 134 ।।

अनुपदेशं हि कस्यचिज्ज्ञानमभ्युपगच्छतामहितप्रतिषेधार्थानां हितप्रतिपादनार्थानां चोपदेशशास्त्राणां वैयर्थ्यं प्रसज्यते ।
यदि हि धर्मविशेषात् कस्यचिदेव पुरुषस्योपदेशमन्तरेण ज्ञानमुत्पद्यते, केचित् तु पुरुषाः शास्त्रेण प्रतिपादयितव्याः, तदा तस्य पुरुषविशेषहेतोर्धर्मस्य व्यवस्थितेन निबन्धनेन भवितव्यम् । विच्छिद्यन्ते चान्यानि निबन्धनानि । तस्मादम्तायनिबन्धनं धर्ममासेवमानाः पृथक्प्रवादानां प्रणेतारस्तां तां बहुविकल्पां सिद्धिं लभन्ते ।। 134 ।।

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ।। 135 ।।

आगमवाक्यानामेव हि शब्दार्थप्रविभागव्यवस्था तर्केण क्रियते । स चायमर्वाग्दर्शनानामनुग्रहे वर्तत इति पूर्वैर्न्यायविद्यास्वित्थम्भूतस्तर्क आश्रितः ।
तत्र यावाननुगम्यमानस्तर्कः स्वशास्त्रं न बाधते, तावाननुगन्तव्यः । तर्कातीतमपि बहु श्रद्धानुगम्यं सर्वेषु शास्त्रेषु दृश्यते ।
अथ तर्काननुगमेन यः केवलमागमं प्रमाणं करोति, तस्य किं प्रयोजनम् ? आगमवाक्यानां सम्यक् प्रतिपत्तिः प्रयोजनम् ।
वाक्यानां हि तुल्यरूपत्वेऽपि सति निमित्तान्तराच्छक्तिर्भिद्यते ।
तत्र यो रूपादेव केवलाद् वाक्यार्थं प्रतिपद्यते, प्रकरणसामर्थ्यादि नापेक्षते, स विवक्षितावविक्षितयोः संमोहमापद्यते ।। 135 ।।

सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी ।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ।। 136 ।।

कर्तुरीप्सिततमं कर्म, तस्यापत्यम्, ग्रहं संमार्ष्टि, कर्मणा यमभिप्रैति ससंप्रदानम् ।
"स्त्रियं ये चेपजीवन्ति प्राप्तास्ते मृतलक्षणम्" इति लिङ्गसंख्याकालानामविवक्षा क्वचिच्च विवक्षेति लक्षणव्यवस्थापनं तर्काधीनम् ।
तथा च--"नक्षत्रं दृष्ट्वा वाचं विसृजेत" इति कालोपलक्षणार्थं नक्षत्रदर्शनं तत् प्रधानस्यान्यथासिद्धौ परार्थत्वाद् दृश्यमानेषु ज्योतिः षु कालविशेषपरिच्छेदे सति तत् क्रियते ।
`काकेभ्यो दधि रक्ष्यताम्' इत्युपघातप्रतिषेधस्य चिकीर्षितत्वात् काकेष्वसत्स्वपि श्वादिभ्यो रक्ष्यते । `पात्राणि संमृज्यन्ताम्' इति भुजिक्रियाङ्गोपसंहारपरत्वात् पात्राभावेऽप्यङ्गान्तराण्युपसंह्रियन्ते ।
लैङ्गिकी खल्वपि व्यक्तिः । "अक्ताः शर्करा उपदधाति" इति सर्वाञ्जनद्रव्यप्रसङ्गे "तेजो वै घृतम्" इति लिङ्गाद्विशेषप्रतिपत्तिरित्येवंप्रकारो न्यायस्तर्केण प्रविभज्य लक्षणं व्यवस्थाप्यते ।। 136 ।।

शब्दानामेव सा शक्तिस्तर्को यः पुरुषाश्रयः ।
शब्दाननुगतो न्यायोऽनागमेष्वनिबन्धनः ।। 137 ।।

शब्द एवोपदेष्टा, तत्सामर्थ्यमेवानुगच्छन्तो वक्तारो योग्यशब्दनिबन्धनयैव विवक्षया प्रवर्तन्ते ।
नियतां तु शब्दशक्तिमर्थप्रकरणलिङ्गवाक्यादिभिरनुगच्छति पुरुषे शब्दाश्रितमेव सामर्थ्यं पुरुषाश्रयोऽयं तर्क इति मन्यन्ते, शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्रानुसारी सर्वागमोपघातहेतुत्वादनिबन्धनः शुष्कस्तर्क इत्युच्यते ।
तद्यथा--
यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत् ।।
शब्देन वाच्यमित्युक्ते द्रामिलकेन भवति वक्तव्यमिति ।। 137 ।।

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ।। 138 ।।

ज्ञाने शास्त्रपूर्वके वा प्रयोगेऽभ्युदय इत्यागमात् प्रतिपन्नानामुपपत्तिमात्रमागमस्यैवोपोद्बलकमित्युच्यते । इहैषां रूपरसगन्धस्पर्शानां प्रत्येकं समुदितानां च दृष्टादृष्टफलाः प्रत्यर्थ यताः शक्तयः परिगृह्यन्ते । दृष्टफलास्तावद् विषौषध्ययस्कान्तवनस्पतिप्रभृतीनाम् ।
अदृष्टफला मद्यतीर्थोदकादीनाम् । शब्दानामपि केषाञ्चिदुच्चारणे विषापहरणादिदृष्टं फलमुपलभ्यते । तथा सूक्तादीनामभ्यासादभ्युपगम्यते विशिष्टमदृष्टं फलम् ।।138
यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयताम् ।
साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिनाम् ।। 139 ।।

सन्ति चेह दृष्टफलाः काश्चित् प्रतिशब्दं शक्तय इत्यागमादेवावसीयते । सत्यागमे साधूनामपि तथैवावसीयतां धर्मसाधनत्वमित्यतोऽभ्युदयार्थिभिरनतिशङ्कनीयां स्मृतिमविच्छिन्नशिष्टसमाचारां परिगृह्य व्यवहारे साधव एव शब्दाः प्रयोक्तव्याः ।।139 ।।

सर्वो।दृष्टफलानर्थानागमात् प्रतिपद्यते ।
विपरीतं च सर्वत्र शक्यते वक्तुमागमे ।। 140 ।।

तत्र केचिदाहुः--यथैषां विषापहरणादिषु सामर्थ्यमधर्मेऽप्येवं कस्मान्न प्रतीयते ? एतस्मादेव दृष्टान्तादस्तु शक्तिविपर्ययप्रतिपत्तिरिति । एतस्मिन् पर्यनुयोगे प्रतिविधीयते---सर्वेष्वागमेषु दृष्टादृष्टफलासु प्रतिपत्तिषु विपरीतफलप्राप्तिःशक्यते प्रसङ्क्तुम् । तस्मादागमं कञ्चित् प्रमाणीकृत्य व्यवस्थिते तस्मिन् या काचिदुपपत्तिरुच्यमाना प्रतिपत्तावुपोद्बलकत्वं लभते ।। 140 ।।

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ।। 141 ।।

यथैव भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यादिविषया व्यवस्थिताः स्मृतयः, यासुनिबद्धं समाचारं शिष्टा न व्यतिक्रामन्ति, तथेयमपि वाच्यावाच्यविशेषविषया व्याकरणाख्या स्मृतिः । स्मृतो ह्यर्थः पारम्पर्यादविच्छेदेन पुनः पुनर्निबध्यते, प्रसिद्धसमाचारायां

स्मृतावनिबन्धनशब्दायां शिष्टसमाचाराविच्छेदेनैव स्मर्यते ।। 141 ।।

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ।। 142 ।।

परैः संवेद्यं यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी । श्लिष्टा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च । तथा याऽक्षे या दुन्दुभौ या वेणौ (या) वीणायामित्यपरिमाणभेदा ।
मध्यमा त्वन्तः संनिवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना । सा तु सूक्ष्मप्राणवृत्त्यनुगता क्रमसंहारभावेऽपि व्यक्तक्रमपरिग्रहैव केषाञ्चित् ।
प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती । सा चलाचला प्रतिलब्धसमाधाना चावृता विशुद्धा च, सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च, परिछिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमाणभेदा ।
तत्र व्यावहारिकीषु सर्वासु वागवस्थासु व्यवस्थितः साध्वसाधुप्रविभागः पुरुषसंस्कारहेतुरेकेषाम् । परन्तु पश्यन्तीरूपमनपभ्रंशमसंकीर्णं लोकव्यवहारातीतम् । तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेनाधिगम्यत इत्येकेषामागमः ।
तथेतिहासेषु निदर्शनान्युपलभ्यन्ते--
गौरिव प्रक्षरत्येका रसमुत्तमशालिनी ।
दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता ।।
एतयोरन्तरं पश्य सूक्ष्यमयोः स्पन्दमानयोः ।
प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति ।।
अन्या त्व (तु) प्रेर्यमाणैव विना प्राणेन वर्तते ।
जायते हि ततः प्राणो वाच्यमाप्याययन् पुनः ।।
प्राणेनाप्यायिता सेयं व्यवहारनिबन्धना ।
सर्वस्योच्छ्वासमासाद्य न वाग् वदति कर्हिचित् ।
घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते ।।
तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ।।
पुनश्चाह--
स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना ।।
केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ।।
अविभाग तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ।।
सेयमाकीर्यमाणापि नित्यमागन्तुकैर्मलैः ।
अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ।।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।
पुरुषे षोडशकले तामाहुरमृतां कलाम् ।।
प्राप्तोपरागरूपा सा विप्लवैरनुषङ्गिभिः ।
वैखरी सत्त्वमात्रेव गुणैर्न व्यवकीर्यते ।।

सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते । तत्रापि चास्याः किञ्चिदेव व्यावहारिकम्, अन्यत्तु सामान्यव्यवहारातीतम् ।

आह च--

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।। इति ।

तस्याश्चासंकीर्णं वाचो रूपं कार्त्स्न्येन सामान्यविशेषवत्यस्मिंल्लक्षणे व्याकरणाख्ये निबद्धम् ।

अर्वाग्दर्शनानां तु पुरुषाणां प्रायेण सातिशयाः प्रतिघातिन्यः सापराधाः शक्तयः । निरपराधस्तु लक्षणप्रपञ्चवाननेकमार्गोऽयं शब्दानां प्रतिपत्त्युपायो दर्शितः ।। 142 ।।

तद्विभागाविभागभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः ।। 143 ।।

विभागो नाम परप्रतिपादनाय कल्पितः प्रकृतिप्रत्ययादिभेदः । तद्यथा--धातोस्तव्यदादय इति ।

तथा चोक्तम्--`यत्तावदयं सामान्येन शक्नोत्युपदेष्टु तत्तावदुपदिशति' इति । अविभागस्तु यत्र स्वरूपेणोच्चारणम् । तद्यथा--`दाधर्त्तिदर्धर्तिदाश्वान्साह्वान्'इति ।

कानिचिद् व्याकरणानि बह्वविभागानि बहून् प्रत्यक्षपक्षेण शब्दान् प्रतिपादयन्ति । कानिचित् तु विभज्यानुमानपक्षेण बहूनां समुदायानां प्रतिपादनं कुर्वन्ति । सैषा स्मृतिर्यथाकालं पुरुषाशक्त्यपेक्षया तथा तथा व्यवस्थाप्यते । सन्ति तु साधुप्रयोगानुमेया एव शिष्टाः । सर्वज्ञेयेष्वप्रतिबद्धान्तः प्रकाशास्ते विशिष्टाकलावधिप्रविभागां यथाकालं धर्मा धर्मसाधनभावेन समन्वितां शब्दशक्तिमव्यभिचारेण पश्यन्ति ।। 143 ।।

अनादिमव्यवच्छिन्नां श्रुतिमाहुरर्तृकाम् ।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ।। 144 ।।

ये शब्दप्रमाणका एव केवलं सर्वमेव शास्त्रप्रत्ययमदृष्टफलेष्वर्थेष्वभिशङ्कनीयत्वादप्रमाणं पुरुषस्य दर्शनमिति मन्यन्ते, तेषां श्रुतिस्मृत्योरविच्छेदाविशेषे तुल्ये चोभयोरर्थस्य नित्यत्वे श्रुतिरव्यभिचरितस्वरवर्णानुपूर्व्यदेशकालनियमा न केनचित्कर्त्रा प्रकारान्तरेणावस्थापितपूर्वा सर्वकालं सर्वप्रदेशेषु प्रतिचरणं विभागेन व्यवस्थापिता । स्मृतिस्तु नित्यमविच्छिद्यमानार्था गद्यश्लोकवाक्यादिभेदेन प्रतिकालमन्यथा शिष्टैरेव निबध्यते ।

तत्र केचिदाचार्या मन्यन्ते--न प्रकृत्या किञ्चित् कर्म दृष्टमदृष्टं वा (दृष्टार्थमदृष्टार्थं वा) । शास्त्रानुष्ठानात् तु केवलाद् धर्माभिव्यक्तिः । शास्त्रातिक्रमाच्च प्रत्यवाययोगः । येषामेव हि ब्राह्मणवधादीनां विषयान्तरे पातकत्वम्, तेषामेव विषयान्तरे प्रकृष्टाभ्युदयहेतुत्वं शास्त्रेण विधीयत इति ।

अन्ये तु मन्यन्ते--भावशक्तिमेव प्रतिनियतविषयां शास्त्रमनुवदति । को हि शास्त्रस्य क्रीडत इव कारणस्य पुरुषानुग्रहोपघाताभ्यामर्थः । शास्त्रस्वभावाभ्युपगमाद् द्रव्यस्वभावाभ्युपगम एव युक्ततरो दृश्यते ।

तथा हि दृष्टार्थासु चिकित्सादिषु स्मृतिषु विषौषधादीनामिवार्थक्रियासु सामर्थ्यमुपलभ्यते,. न स्मृतिशास्त्राणाम् । तस्माच्छास्त्रस्वभाव इव पक्षान्तरे द्रव्यदिस्वभावोऽयं शास्त्रेणानुद्यते ।

यथैवोपघातनिमित्तान्यनुग्रहनिमित्तानि च लोके व्यवस्थितानि, तथैव तत्प्रतिपत्त्युपायानामप्यविच्छेदेन व्यवस्था विद्यते ।। 144 ।।

अविभागाद् विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ ।
भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ।। 145 ।।

येषां तावदियं नित्यैव लोकस्य विभागेन प्रवृत्तिर्नैव काचिद् युगमन्वन्तरव्यवस्था, नापि ब्रह्मणोऽसाधारणः कश्चिदहोरात्रविभागो विद्यत इति दर्शनम्, तेषामुक्तः श्रुतिस्मृतिप्रवृत्तिदर्मः पुरस्तादनन्तरे श्लोके ।
येषां तु स्वप्नप्रबोधवृत्त्या नित्यं विभक्तपुरुषानुकारितया कारणं प्रवर्तते, तेषा. मृषयः केचित् प्रतिभात्मनि विवर्तन्ते, सत्तालक्षणं महान्तमात्मानमविद्यायोनिं पश्यन्तः प्रतिबोधेनाभिसंभवन्ति ।
केचित् तु विद्यायां विवर्तन्ते । ते मनोग्रन्थिमात्मानमाकाशादिषु भूतेषु प्रत्येकं समुदितेषु वा विशुद्धमनिबद्धपरिकल्पं तथैवाभिसंभवन्ति । तेषां चागन्तुरविद्याव्यवहारः सर्व एवौपरारिकः, विद्यात्मकत्वं तु नित्यमनान्तुकं मुख्यम् । ते च स्वप्न इवाश्रोत्रगम्यं शब्दं प्रज्ञयैव सर्वमाम्नायं सर्वभेदशक्तियुक्तमभिन्नशक्तियुक्तं च पश्यन्ति ।
केचित् तु पुरुषानुग्रहोपघातविषयं तेषामर्थानां स्वभावमुपलभ्याम्नायेषु क्वचित् तद्विषयाणि लिङ्गानि दृष्ट्वा दृष्टादृष्टार्थां च स्मृतिमुपनिबध्नन्ति । श्रुतिं तु यथादर्शनमव्यभिचरितशब्दामेव प्रथममविभक्तां पुनः संगृहीतचरणविभागां समामनन्तीत्यागमः ।। 145 ।।

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ।।146 ।।

यथैव हि शरीरे दोषशक्तिं रत्नौषधादिषु च दोषप्रतीकारसामर्थ्यं दृष्ट्वा चिकित्साशास्त्रमारब्धम् । रागादींश्च बुद्धेरुपप्लवानवगम्य तदुपघातेहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राणि उपनिबद्धानि । तथैदमपि साधूनां वाचः संस्काराणां ज्ञापनार्थमपभ्रंशाना चोपघातानां त्यागार्थं लक्षणमारब्धम् ।। 146 ।।

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ।। 147 ।।

कथंभूताः पुनरपभ्रंशाः--
शब्दप्रकृतिरपभ्रंश इति संग्रहकारः । नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद्विद्यते । सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृतिः । प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते ।
तत्र गौरिति प्रयोक्तव्येऽशक्त्या प्रमादादिभिर्वा गाव्यादयस्तत्प्रकृतयोऽभ्रंशाः प्रयुज्यन्ते । ते च सास्नादिमत्येव लब्धस्वरूपाः साधुत्वं विजहति । अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते । न ह्येतेषां रूपमात्रप्रतिबद्धमसाधुत्वम् ।। 147 ।।

अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम् ।। 148 ।।

आवपने गोणीति स्वविप्रयोगाभिधाने चास्व इत्येतयोरवस्थितं साधुत्वम् । तथा सास्नादिमति ह्रेषितादिलिङ्गे च निमित्तान्तरात् प्रवृत्तावेतयोरन्यत्र विषये लब्धसंस्कारयोः साधुत्वमेव विज्ञायते । गोणीवेयं गौर्गोणीति बहुक्षीरधारणादिविषयादावपनत्वसामान्यादभिधीयते । तथाऽविद्यमानं स्वमस्य सोऽयमस्व इति ।
तस्माद् वस्त्वपरिगृहीतकारणं न किञ्चिन्नियतमस्ति, यत्र साधुत्वमसाधुत्वं वा व्यवतिष्ठेत ।। 148 ।।

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ।। 149 ।।

अपभ्रंशा हि साधूनां शब्दानां विषये प्रयुज्यमाना यथैवाक्षिनिकोचादयः परिचयादुपगृहीतस्वरूपा प्रसिद्धाः, तथा साधुप्रनाडिकयार्थं प्रत्यायन्ति । तत्र साक्षादभिधानं नेति श्लोकान्तरोपन्यासः ।। 149 ।।

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
ते यतः स्मृतिशस्त्रेण तस्मात् साक्षादवाचकाः ।। 150 ।।

अथ कस्मादेते गोशब्दस्य गाव्यादयः पर्याया न विज्ञायन्ते ? नहि शिष्टसमाचारप्रसिद्धेरन्यदेवंप्रकारेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते । गाव्यादयश्चेत् पर्यायाः स्युरेतेऽपि शिष्टैर्लक्षणैरनुगम्येरन् प्रयुज्येरंश्च । यश्च प्रत्यक्षपक्षेण प्रयोजकेष्वभिधेयेषु प्रवर्तते, स साधुः । साक्षात् प्रयोजकं वाच्यमर्थरूपं साधुभिः प्रत्याय्यते ।
इत्ययमुक्तार्थः श्लोकः ।। 150 ।।

अम्बाम्बेति यथा बालः शिक्षमाणः प्रभासते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः ।। 151 ।।

बालो हि करणमात्रशक्तिवैकल्याद् यत्नवानपि साधुप्रयुयुक्षायामव्यक्तां श्रुतिं प्रयुङ्क्ते, तदा प्रतिपत्तारस्तत्प्रकृतिं व्यक्तं शब्दमवधारयन्ति । तमेवार्थसंबन्धिनं मन्यन्ते, तस्मादाह--न बालप्रपयुक्तमपभ्रंशम् ।। 151 ।।

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ।। 152 ।।

सङ्कीर्णायां वाचि साधुविषयेऽपशब्दाः प्रयुज्यन्ते । तैः शिष्टा लक्षणविदःसाधून् प्रतिपद्यन्ते । तैरेव साधूभिस्तदर्थममिधीयमानं पश्यन्ति । अनुमानस्तु धूम इवाग्नेः, असाधुरितरेषाम् ।। 152 ।।

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ।। 153 ।।

इहाभ्यासात् स्त्रीशूद्रचाण्डालादिभिरपभ्रंशाः प्रयुज्यमानास्तथा प्रमाद्यत्सु वक्तृषु रूढिमुपागताः, येन तैरेव प्रसिद्धतरो व्यवहारः । सति च साधुप्रयोगात् संशये यस्तस्यापभ्रंशस्तेन सम्पति निर्णयः क्रियते । तमेव चासाधुं वाचकं प्रत्यक्षपक्षे मन्यन्ते । साधुं चानुमानपक्षे व्यवस्थापयन्ति ।। 153 ।।

दैवी वाग् व्यतिकीर्णेयमशक्तैरभिधात्भिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ।। 154 ।।

श्रुयते पुराकल्पे खशरीरज्योतिषां मनुष्याणां यथैवानृतादिभिरसङ्कीर्णा वागासीत्, तथा सर्वैरपभ्रंशैः । सा तु शङ्कीर्यमाणा

पूर्वदोषाभ्यासभावनानुषङ्गात् कालेनप्रकृतिरेव तेषां प्रयोक्तृणां रूढिमुपागता । अनित्यवादिनस्तु ये साधूनां धर्महेतुत्वं न प्रतिपद्यन्ते, मल्लसमयादिसदृशीं साधुव्यवस्थां मन्यन्ते, ते प्रकृतौ भवं प्राकृतं साधूनां शब्दानां समूहमाचक्षते । विकारस्तु पश्चाद् व्यवस्थापितिः, यः सभिन्नबुद्धिभिः पुरुषैः, स्वरसंस्कारादिभिर्निर्णोयत इति ।। 154 ।।

उभयेषामविच्छेदाद् अन्यशब्दविवक्षया ।
योऽन्यः प्रयुज्यते शब्दो न सोऽर्थस्याभिधायकः ।। 155 ।।

येषामपि च नैव पुराकल्पः, न च दैवी वागसङ्कीर्णा कदाचिदासीत्, तेषामपि गम्यागम्यादिव्यवस्थावदियं साध्वसाधुव्यवस्था नित्यमविच्छेदेन शिष्टैः स्मर्यते । तत्रान्यशब्दविवक्षया बालप्रलापवदर्थेषु प्रयुज्यमानो यः शब्दो रूढः, यश्च न रूढः, तावुभावप्यर्थस्य न वाचकौ भवतः । तत्र तु साधुव्यवहिता वा भवत्यर्थप्रतिपत्तिरभ्यासाद्वा प्रमत्तानामक्षिनिकोचादिवत् सम्प्रत्ययमात्रं जायते ।। 155 ।।

।। इति श्रिहरिवृषभमहावैयाकरणविरचिते वाक्यपदीये
आगमसमुच्चयो नाम ब्रह्मकाण्डं समाप्तम् ।।

---: *** :---

श्लोकानुक्रमणिका

श्लोo श्लोo संo पृo संo
----- --------- ------
अ
अग्निशब्दस्तथैवायं 60 108
अजस्त्रवृत्तिर्यः शब्दः 116 170
अणवः सर्वशक्तित्वात् 110 165
अतीन्द्रियानसंवेद्यान् 38 83
अतोऽनिर्ज्ञातरूपत्वात् 57 105
अत्यन्तमतथाभूते 129 196
अत्रातीतविपर्यासः 17 39
अथर्वणामङ्गिरसां 40 21
अथायमान्तरो ज्ञाता 114 167
अध्याहितकलां यस्य 23 3
अनवस्थितकम्पेऽपि 106 163

अनादिनिधनं ब्रह्म 1 1
अनादिमव्यवच्छिन्नां 144 224
अनेकव्यक्त्यभिव्यङ्ग्या 93 149
अन्तः करणतत्त्वस्य 114 167
अपि प्रयोक्तुरात्मानं 130 198
अपोद्धारपदार्था ये 24 52
अम्बाम्बेति यथा बालः 151 232
अरणिस्थं यथा ज्योतिः 93 46
अर्थप्रवृत्तितत्त्वानां 13 34
अथोपसर्जनीभूतान् 54 101
अल्पे महति वा शब्दे 103 159
अवस्थादेशकालानां 32 74
अविकारस्य शब्दस्य 94 150
अविभागाद् विवृत्तानां 145 226
असतश्चान्तराले यान् 85 140
अस्तं यातेषु वादेषु 133 202
अस्वगोण्यादयः शब्दाः 148 230

आ

आण्डभावमिवापन्नः 51 98
आत्मभेदस्तयोः केचित् 45 91
आत्मरूपं यथा ज्ञाने 50 97
आद्यः करणविन्यासः 122 182
आविर्भूतप्रकाशानां 37 82
आसन्नं ब्रह्मणस्तस्य 11 30

इ

इतिकर्त्तव्यता लोके 121 180
इदं पुण्यमिदं पापं 40 85
इदमाद्यं पदस्थानं 16 39
इन्द्रियस्यैव संस्कारः शब्दo 78 133
इन्द्रियस्यैव संस्कारः समाo 79 134

उ

उच्चरन् परतन्त्रत्वात् 62 109
उभयेषामविच्छेदात् 155 235

ए

एकमेव यदम्नातं 2 11
एकस्य सर्वबीजस्य 4 15
एवं साधौ प्रयोक्तव्ये 152 233

क

कायवाग्बुद्धिविषयाः 146 228
कार्यकारणभावेन 25 52
कार्यत्वे नित्यतायां वा 70 122

ग

गुणः प्रकर्षहेतुर्यः 64 111
ग्रहणग्राह्ययोः सिद्धा 97 154
ग्राह्यत्वं ग्राहकत्वं च 55 55

च

चक्षुषः प्राप्यकारित्वे 80 135
चैतन्यमिव यश्चायं 41 85

ज

ज्ञाने स्वाभाविके नार्थः 134 203

त

तत्रार्थवत्त्वात् प्रथमा 67 116

तद् द्वारमपवर्गस्य 14 37
तद्विभागाविभागाभ्यां 143 223
तस्मादकृतकं शास्त्रं 43 86
तस्मादभिन्नकालेषु 101 157
तस्माद् यः शब्दसंस्कारः 131 200
तस्य कारणसामर्थ्यात् 165 109
तस्य प्राणे च या शक्तिः 171 117
तस्याभिधेयभावेन 113 65
तस्यार्थवादरूपाणि 8 23
ते लिङ्गैश्च स्वशब्दैश्च 26 52
ते साधुस्वनुमानेन 149 231

द

दूरात् प्रभेव दीपस्य 104 161
देशादिभिश्च सम्बन्धः 96 153
दैवी वाग्व्यतिकीर्णेयं 154 234
द्रव्याभिघातात् प्रचितौ 105 162
द्वावुपादानशब्देषु 44 88

ध

धर्मस्य चाव्यवच्छिन्नाः 31 74

न

न चागमादृते धर्मः 30 72
न चानित्येष्वभिव्यक्तिः 95 151
न जात्वकर्तृकं कश्चित् 132 201
न वर्णव्यतिरेकेण 72 125
न शिष्टैरनुगम्यन्ते 150 231
न सोऽस्ति प्रत्ययो लोके 123 183
नादस्य क्रमजन्मत्वात् 48 95
नादैराहितबीजायाम् 84 139
नानर्थिकामिमां कश्चित् 99 155

नित्यत्वे कृतकत्वे वा 69 28
नित्याः शब्दार्थसम्बन्धाः 23 41
निर्ज्ञातशक्तेर्द्रव्यस्य 33 76

प

पदभेदेऽपि वर्णानाम् 71 124
पदे न वर्णा विद्यन्ते 73 126
परेषामसमाख्येयं 87 35
पारम्पर्यादपभ्रंशाः 233 153
प्रकाशकानां भेदांश्च 155 99
प्रतिबिम्बं यथान्यत्र 49 96
प्रत्यक्षमनुमानं च 36 81
प्रत्ययैरनुपाख्येयैः 83 139
प्रत्यस्तमितभेदायाः 18 39
प्रत्येकं व्यञ्जका भिन्नाः 88 144
प्रविभागे यथा कर्ता 27 69
प्राक्संज्ञिनाभिसम्बन्धात् 66 115
प्राप्तरूपविभागायाः 12 32
प्राप्त्युपायोऽनुकारश्च 5 16

भ

भागवत्स्वपि तेष्वेव 92 148
भिन्नं दर्शनमाश्रित्य 74 128
भेदानां बहुमार्गत्वं 6 20
भेदानुकारो ज्ञानस्य 86 142
भेदेनावगृहीतौ द्वौ 85 140

य

यः संयोगविभागाभ्यां 101 157
यत्नेनानुमितोऽप्यर्थः 34 77
यत्र वाचो निमित्तानि 20 40
यथाद्यसंख्याग्रहणं 87 143

यथानुपूर्वोनियमः 21 40
यथानुवाकः श्लोको वा 82 137
यथा प्रयोक्तुः प्रग्बुद्धिः 53 100
यथार्थजातयः सर्वा 15 38
यथैकबुद्धिविषया 52 99
यथैव दर्शनैः पूर्वैः 89 145
यथैषां तत्र सामर्थ्यं 139 211
यदेकं प्रक्रियाभेदैः 22 40
यो य उच्चार्यते शब्दः 61 109
यो यस्य स्वमिव ज्ञानं 39 84

र

रूपादयो यथा दृष्टाः 138 209

ल

लब्धक्रियः प्रयत्नेन 108 164

व

वाग्रूपता चेदुत्क्रामेत् 124 185
वायोरणूनां ज्ञानस्य 107 164
वितर्कितः पुरा बुद्ध्या 47 94
विधातुस्तस्य लोकानां 10 29
विभजन् स्वात्मनो ग्रन्थीन् 115 168
विरुद्धपरिमाणेषु 100 156
विषयत्वमनापन्नैः 56 104
वृद्ध्यादयो यथा शब्दाः 59 107
वेदशास्त्रविरोधी च 135 204
वैकृतं समतिक्रान्ता 19 40
वैखर्य्या मध्यमायाश्च 142 214
व्यज्यमाने तथा वाक्ये 70 146

श

शब्दः संस्कारहीनो यः 147 229
शब्दस्य परिणामोऽयं 120 176
शब्दस्योर्ध्वमभिव्यक्तेः 77 132
शब्दानामेव सा शक्तिः 137 207
शब्देष्वेवाश्रिता शक्तिः 18 39
शिष्टेभ्य आगमात् सिद्धाः 27 69

ष

षड्जादिभेदः शब्देन 119 174

स

संज्ञिनीं व्यक्तिमिच्छन्ति 39 117
सतोऽविवक्षा पारार्थ्यं 136 205
सत्या विशुद्धिस्तत्रोक्ता 9 27
सदृशग्रहणानां च 98 155
स मनोभावमापद्य 113 167
सर्वोऽदृष्टफलानर्थान् 140 212
साधुत्वज्ञानविषया 141 212
साभान्यमाश्रितं यद्यत् 63 10
सा सर्वविद्याशिल्पानां 125 188
सैषा संसारिणां साज्ञा 126 189
स्फोटरूपाविभागेन 81 136
स्फोटस्याभिन्नकालस्य 75 129
स्मृतयो बहुरूपाश्च 7 21
स्वं रूपमिति कैश्चित्तु 68 117
स्वभावभेदान्नित्यत्वे 76 130
स्वमात्रा परमात्रा वा 28 69
स्वशक्तौ व्यज्यमानायां 166 111

ह

हस्तस्पर्शादिवान्धेन 76 42

वाक्यपदीयब्रह्मकाण्डवृत्तिस्थानाम्
उद्धरणानां वर्णानुक्रमसूची

पृo संo

अन्तर्यामी स भूतानां 7
अन्धो मणिमविध्यत् 25
अर्थक्रियासु वाक् 189
आर्थावता व्यपदेशः 116
अर्थात् पदं साभिधेयं 91
अविभागा तु पश्यन्ती 219
आन्यात्वप्रेर्यमाणैवo 234
आत्मा बुध्या समेत्यर्थान् 168
आपः पवित्रं परमं 38
इदं फेनो न कश्चिद् 25
इन्द्राच्छन्दः प्रथमं 178
उभौ सखायौ सयुजौ 26
एकत्वमनतिक्रान्ताः 190
एकोऽयं शक्तिभेदेन 65
एतयोरन्तरं पश्य 278
केवलं बुद्ध्युपादाना 219
गौरिव प्रक्षरत्येका 216
घोषिणी जातनिर्घोषा 218
चत्वारि वाक्परिमिता 221
चत्वारि श्रृङ्गा 199
ज्ञेयेन विना ज्ञानं 142
ज्योतिरान्तरमासाद्य 201
तदेजति तन्नैजति 27
तदेतदेकं नैकं च 29
तथेदममृतं ब्रह्म 10
तस्मादाकृतिगोत्रस्थाद् 8
तस्यां दृष्टस्वरूपायां 220
तस्यैकमपि चैतन्यं 8

त्रयीरूपेण तज्जयोतिः 9
नहि किञ्चिद् पदं 65
नामेवैदं रूपत्वेन 32
प्रकृतित्वमपि प्राप्ता 8
प्रविभज्यात्मनाo 192
प्राजापत्यं महत्तेजः 179
प्राणेनाप्यायिताo 218
प्राप्तोपरागरूपाया 221
व्रह्मेदं शब्दनिर्माणं 10
भेदोद्ग्राहविवर्तेन 190
यथा विशुद्धमाकाशं 10
यदधीतमविज्ञातं 38
यदुदुम्बरर्णानां 208
यदेतन्मण्डलं भास्वद् 180
यः सर्वपरिकल्पानाo 6
वागेव विश्वा भुवनानि 178
वागेवार्थं पश्यति 174
वाचः संस्कारमाधाय 201
विभज्य बहुधात्मानं 179
व्यतीतो भेदसंसर्गौ 7
शान्तविद्यात्मकं योंशo 9
शब्दस्य ग्रहणे हेतुः 131
शब्दर्थयोरसम्भेदेo 68
शब्दर्थसम्बन्धनिमित्तo 34
षड्द्वारा ष़डधिष्ठानां 191
सम्बन्धस्य न कर्त्तास्ति 68
सर्वतः परिवर्तानां 9
साध्वी वाग् भूयसीo 179
सूक्ष्मामर्थेनाप्रविभक्तo 4
सेयमाकीर्यमाणापि 220
स्त्रियं ये चोपo 206
स्थानेषु विधृते वायौ 218

Bsamudesha

अथ भूयोद्रव्यसमुद्देशः ।

(1) तदेवं शब्दार्थयोः संबन्धमुक्त्वान्वाख्यानोपयोगी पदार्थः शास्त्रे कार्यार्थं लौकिकः प्रविभज्यत इत्युपक्षितः । जातिद्रव्ये हि सर्वशब्दानामर्थ इति

"सिद्धे शब्दार्थसंबन्धे"

इत्यत्रार्थनित्यतासमर्थनार्थं पूर्वमुक्ते । इदानीमन्वाख्यानाङ्गमपोद्धारपदार्थो द्रव्यगुणादिकः समुद्देष्टव्य इति प्रविभज्यत इत्युक्ते तस्य कुतः प्रविभाग इत्याह--

संसर्गरूपात् सम्भूताः संविद्रूपादपोद्धृताः ।

शास्त्रे विभक्ता वाक्यार्थात् प्रकृतिप्रत्ययार्थवत् ।। 1 ।।

निमित्तभूताः साधुत्वे शास्त्रादनुमितात्मकाः ।

केचित् पदार्था वक्ष्यन्ते संक्षेपेण यथागमम् ।। 2 ।।

(2) निरंशस्य वाक्यस्यैव वाचकत्वात् तदर्थात् पृथकत्वेन पदार्था व्यवस्थाप्यन्ते । स च वाक्यार्थः संसर्ग एव रूपम् आत्मा यस्य स तथा । क्रिया कारकतद्विशेषणसंसर्गो वाक्यार्थः । एतेन च प्रविभागबीजमाह । सर्वथा निरंशे वाक्यार्थे प्रविभजनीयरूपाभावात् । संसर्गे तु युक्तं संसृष्टार्थप्रविभजनम् । अत एव सम्भूता इत्याह । संसर्गावस्थायां सम्भवन्तो विद्यमाना इत्यर्थः । तेन संसृष्टा विद्यमाना अपोद्धर्तुं शक्यन्ते । असतामयःशलाकाकल्पानां च परस्परानन्वयेनापोद्धाराभावात् ।

(3) संवित् संवेदनम् , अपोद्धारबुद्धिस्त्वस्या रूपम् आत्मा । ततो हेतोः अपोद्धृताः पृथक्कृताः ।

(4) एतदुक्तं भवति । यद्यपि वाक्यार्थे पदार्थाः कदाचिदपि विवेकेन नावधार्यन्ते तथा च कीदृशः संसर्गः , तस्य भेदपूर्वकत्वादिति, तथापि प्रतिपत्तृभिरनंशस्य युगपत् प्रत्येतुमशक्यात्वात् क्रमेणांशाशिकया संवेदने भेदपूर्वकसंसर्गव्यवहारात् तदभिप्रायेण तयैवापोद्धारबुद्ध्या हि विविच्यन्तेऽर्थाः । तद्यथा पानकद्रव्ये गुडादिमात्रा विवेकशून्या अप्यास्वादयितृभी रासनविज्ञानविवेकेन पृथक्कृत्य व्यवह्रियन्ते ।

(5) यदा तु रूपशब्द आकारपर्यायस्तदेयं ल्यब्लोपे पञ्चमी । संविदः कल्पनाबुद्धे रूपम् आकारमाश्रित्येर्थः ।

(6) वाक्यार्थस्यानंशस्य झटिति प्रत्येतुमशक्तेरन्तरा पदार्थाकारबुद्धयो विभ्रमास्तत्तदंशाच्छुरिता इति तद्बुद्धिनिविष्ट एव त्वाकारो वस्तित्यध्यवसायात् पदार्थत्वेन परिकल्प्यतदे पूर्वकक्ष्यायामुपायभूतायाम् । प्रतिपन्ने तु समस्ते वाक्यार्थे सामान्यमात्रस्य भिन्नस्याभिन्नेन तेन सत्यभूतेन बाधः ।

(7) किमपोद्धारे प्रयोजनमित्याह--शास्त्रे विभक्ता इति । प्रत्यासत्त्या व्याकरणशास्त्र इत्यवगन्तव्यम् । अत्र हि लक्षणवाक्यानामुपायभावेन द्रव्यगुणादयोऽर्था विषयविभागेनोपात्ता इति वाक्यार्थादपोद्धार एतत् प्रयोजनं लक्षणं यथाविभागं नियतविषयमवतिष्ठतामिति ।

(8) तथा हि-उपलक्षणत्वेनार्थानामङ्गभावः शास्त्रे समाम्नातो न विधेयत्वेन, "अर्थानादेशनात्" (M.Bha. on P 2.1.1.) इति लोकप्रसिद्धमर्थमनूद्य स्वरादिसंस्कारायोपदेशः ।

(9) प्रकृतिप्रत्ययार्थवत् इति । प्रकृतिप्रत्ययययोर्नामाख्यातपदविषययोः स्वार्थोऽत्र काल्पनिकः । तेन यथा निरंशात् पदार्थात् प्रकृत्यर्थः प्रत्ययार्थश्चापोद्धारबुद्ध्यान्वयव्यतिरेकाभ्यां पदवादिभिरपोद्ध्रियते तथा वाक्यावादिमिरखण्डाद् वाक्यार्थात् पदार्थ इत्युभयत्राप्यपोद्धारः समान इत्यर्थः ।

(10) निमित्तभूता इति । यतस्तेषां निमित्तभावः शब्दसाधुत्वविषयोऽतो विभक्ता इत्यर्थः । ते चार्था द्विविधाः । लोकप्रसिद्धाः वैशेषिकादिशास्त्रपरिभाषिताश्च । तत्र लोकप्रसिद्धाः पशुरपत्यं देवतेत्यादयः । ते चेह प्रसिद्धत्वादेव न परिभाष्यन्ते । ये तु शास्त्रान्तरे परिभाषितास्ते स्वनिकायव्यवस्थया लक्ष्यन्त इत्याह ।

(11) केचित् एव शास्त्रादनुमितात्मका इति । शास्त्रादस्मादेव प्रत्यासत्तेः व्याकरणाख्यान्न वैशेषिकादेः । अनुमानेनाधिगत आत्मा स्वभावो लक्षणं येषामित्यर्थः । तथा ह्येकशेषारम्माद् भेद्यत्वं द्रव्यलक्षणमनुमितम् । द्रव्याणां प्राधान्येन वाच्यत्वे शब्दभेदप्रसक्तेस्तदारंभस्यार्थवत्त्वात् ।

"यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ"

(Va.P.5.1.119)

इति वाक्यकारवचनाद् आश्रितत्वं गुणलक्षणमनुमितम् ।

(12) जातिरपि भावप्रत्ययाभिधेयेति गुणोऽसावेवमुपपद्यते । तथा

"वोतो गुणवचनात्" (P.4.1.44)

इति गुणमुक्तवान् गुणवचन इति गुणस्य भूतपूर्वत्वेन द्रव्ये प्रत्याय्येऽभिधानं विशेषणत्वे सति कल्पते ।

(13) कालस्यापि क्रियात्मकत्वलक्षणं भूते वर्तमाने भविष्यतीति चैषां धात्वर्थोपाधित्वेन विज्ञायते ।

(14) संख्यायाश्च भेदगणनात्मकत्वं

"जात्याख्यायामेकस्मिन्" (P.1.2.58)

इति वचनादवसीयते । वैशेषिकप्रसिद्धाया गुणत्वेन द्रव्यप्रतिनियमात् स्त्रियां पुंसि नपुंसक इति सामान्येन शब्दान्वाख्यानेऽर्थस्याङ्गभावापादनात् संस्त्यानप्रसवस्थितयो लिङ्गलक्षणमनुमीयते । न हि खट्वादीनां लौकिकं स्त्रीत्वं शाण्टकादीनां च पुंस्त्वं कुण्डादीनां च नपुंसकत्वं सम्भवति ।

(15) शक्तिः साधनं न द्रव्यमिति शेषव्यवहारात्, कर्मकर्तृत्वोपगमात्, विभक्त्यर्थेऽव्ययीभाववचनाच्चानुमीयते । द्रव्यस्य ह्येकस्वभावात्वात् साधनत्वे शेषभावः कर्मकर्तृभावश्च नोपपद्यते । विभक्त्यर्थे च द्रव्यस्यैव वृत्तेरधिस्त्रीति स्त्रीशब्दप्रयोगाभावात् कस्य केन समासः ।

(16) उपसर्गाच्छन्दसि धात्वर्थ इति चार्थग्रहणं लिङ्गसंख्यावतो द्रव्यस्य प्रतिपत्त्यर्थं तस्यासाधनत्वमावेदयते । अन्यथा साधन इत्येवोच्येत किमनेन धातुकृतोऽर्तो धात्वर्थ इति ।

(17) पुरुषोपग्रहयोस्तु पूर्वाचार्यव्यवहारादेव लक्षणप्रसिद्धिः ।

(18) दिक्क्रिये तु लोकप्रसिद्धे एव शास्त्रेऽपि पूर्वादीनां व्यवस्थायामिति विशेषणात्पदार्थोपाधित्वं तल्लक्षणमनुमीयते ।

(19) क्रियापि भूवादिवार्तिके भाष्ये पूर्वापरीभूता साध्यस्वभावानुमानगम्या लक्षिता ।

(20) पदार्था इति । यद्यपि संसृष्टानामेव सर्वथा भावस्तथाप्यपोद्धृताः । अथैकैकस्य पदस्य गुणप्रधानभूता बहवोऽर्थाः । तद्यथाख्यातस्य क्रियाकालसाधनसंख्यापुरुषोपग्रहाः, नामपदस्यापि द्रव्यलिङ्गसंख्यासाधनानि क्रिया काल इत्यादि ।

(21) पदवाच्यत्वेन वा पदार्थतोपपत्तिः । केवलानां पचत्यादिपदवाच्यत्वाभावात् ।

(22) `यथागमम्' इति । यादृशो वैयाकरणानामागमस्तमनुल्लंघ्य । व्याख्यातृणामुपदेशपारम्पर्यानतिक्रमेण यस्य पदार्थस्य यस्मिन्नन्वाख्यानेऽङ्गभावः स कथ्यत इत्यर्थः ।। 1,2 ।।

(23) तत्र गुणादीनां द्रव्यपरतन्त्रत्वात् प्रथमं तदाश्रयं द्रव्यं लक्षयति ।

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।

द्रव्यामित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ।। 3 ।।

(24) इह सर्वनाम्नां द्वयी गतिः । वस्तुमात्राभिधायिनः केचिद् यथा सर्वादयः । विशिष्टवस्तुवाचकाश्चान्ये यथान्तरादयः ।

(25) तत्र पूर्वैर्द्रव्यं लक्ष्यते । तथा हि-इदं तदिति सर्वनामप्रत्यवमर्शयोग्यं द्रव्यम् । इदमिति प्रत्यक्षार्थवाचकम्, तदिति प्रमाणान्तरावगतपरोक्षार्थाभिधानम्, तेन प्रत्यक्षपरोक्षार्थाकारपरामर्शेन वस्तुमात्रवाचित्वमिदंतदोरुपादानेन सर्वनाम्नामुक्तं भवति । तथा च प्रत्यक्षपरोक्षाकारभेदवधीरणेन वस्तुमात्रं तद्वाच्यं द्रव्यं लक्षितं भवति ।

(26) प्रतिपिण्डं ह्यपरिमितस्वभावो द्रव्याणामशक्यो लक्षयितुमिति सर्वद्र्वयसाधारणलक्षणमेवमुच्यते, वस्तुरूपतायाः सर्वत्र

भावात् । एतदेवं निरुक्तकारेणायुक्तम् ।
"अद इति यत् प्रतीयते तद् द्रव्यम्"
इति ।

(27) द्वितीयमपि विशेषलक्षणमाह-भेद्यत्वेन विवक्षित इति । सामान्यादिभिरुपाधिभिरवच्छेद्यत्वेन विशेष्यत्वेन वक्तुमभिप्रेतमित्यर्थः । विवक्षितग्रहणेन न वस्त्वर्थस्येदं लक्षणमपि तु शब्दार्थस्येत्याह । तथा च जात्यादिरपि विशेष्यत्वेन चेद् विवक्षितस्तदा द्रव्यमिति तीर्थान्तरीयद्रव्यलक्षणानादरात् व्याडिदर्शनेन सार्वत्रिकी द्रव्यपदार्थव्यवस्था सिद्धयति ।

(28) यथा वाजप्यायनदर्शने जातिरन्वितप्रत्ययनिमित्तं सर्वशब्दानामर्थः । क्रियास्वप्यन्वितावभासप्रत्ययान्यथानुपपत्त्या जातिसिद्धिः । कथमन्यथा प्रत्यवस्थं पचतीत्यभिन्नः प्रत्ययः स्यात् । विक्लेदस्यैव पचत्यर्थत्वेऽधिश्रयणादीनां सामर्थ्यगम्यत्वे शब्दार्थत्वाभावात् देवदत्तस्य कर्तृत्वं न स्यात् । न हि तद्व्यापारोऽधिश्रयणादिर्धातुवाच्यः ।

(29) सामर्थ्यगम्ये च लकारवाच्यस्य कर्तुर्व्यापारे समन्वयाभावः । इत्थं च विक्लित्तेरेव धातुवाच्यत्वात्तत्रौदनः कर्मकर्तृवत् कर्ता स्यात्, न कदाचिदपि कर्म । स चापि विक्लेदोऽत्यक्षमरूपोऽक्रमो न पचिः, आश्रितपौर्वापर्यस्यैवार्थस्य क्रियात्वात् । इत्थमधिश्रयणादिरपि तत्रानुप्रविशत्येव । तावन्मात्रेऽपि च पचतीति प्रत्ययोत्पत्तेरिति प्रतिक्षणमभिन्नप्रत्ययावसेया क्रियाजातिरङ्गीकार्या ।

(30) एवं भ्रम्यादिक्रियाक्षणव्यङ्ग्या भ्रमणत्वादिजातिरपि ग्राह्या । तत्राप्युपक्रम एव विशेष्टेच्छादिकारणजन्यकर्मक्षणवैलक्षण्यात् सादृश्याद् दुरवधारान्नियतसामान्याभिव्यक्तेः । तथा हि-कमवतामपि क्षणानां स्पष्टास्पष्टत्वेन जातेरभिव्यंजकत्वम् । व्यक्तिद्वारकश्च साधनसंबन्धः, तस्याः साध्यत्वाज्जातेर्नित्यत्वेऽपि, यथा जातेर्दोहाभावे व्यक्तिद्वारकः क्रियासंबन्धो गौर्दुह्यतामिति ।

(31) अस्तिक्रियायाश्च साधनभेदात् कालभेदाच्च भेदेऽभिन्नप्रत्ययनिमित्तमपरं सामान्यं न विरुध्यते । नित्यत्वेऽपि च सामान्यस्य व्यक्तिनिष्पत्तौ फलदानसामर्थ्यमिति यजेतेति व्यक्तिनिष्पादनार्ता चोदनार्थवती । विनश्यत्यपक्षीयत इत्यत्र तिरोधानमपक्षयश्च क्रियाजातेराश्रयोऽस्तु, तथैव शब्देनावसीयमानत्वात् । शब्दार्थस्य चेहार्थत्वात् । शिष्टं क्रियाजातिसमर्थनं पूर्वमेव विहितमित्येवं द्रव्यपदार्थस्यापि सार्वत्रिकी व्यवस्थास्मिन् द्रव्यलक्षणे सत्युपपद्यते ।

(32) तथा ह्याख्यातस्यापि द्रव्यमेव साधनस्वभावं वाच्यम् । क्रियाप्राधान्येऽपि गुणभूतस्य तस्य वाच्यत्वोपगमात् । अन्यथा किमपेक्षं प्राधान्यं स्यात् । तथा च व्यापाराविष्टं तदेव प्राधान्येन वाच्यमस्तु । दर्शनान्तरेऽपि हि न सर्वथा गुणभूतत्वेन तिरोभावोऽस्य वृत्ताविवोपसर्जनपदार्थस्य, देवदत्तः पचतीति सामानाधिकरण्याभावप्रसङ्गादिति परं प्राधान्यमेव सामानाधिकरण्यान्यथानुपपत्त्यास्तु । सर्वनामप्रत्यवमर्शयोग्यत्वं त्वयं पचतीति एवं दृश्यत एव । भेद्यत्वमपि साधुत्वादिस्वविशेषणापेक्षया समस्त्येव । लक्षणानां च साम्प्रतिकव्यापारानपेक्षणात् भेदयोग्यता भेद्यत्वमत्र । एवमास्यते स्थीयते इति किमादिभिः परामर्शात् सुखमित्येवमादिभिश्च विशेष्यत्वाद् द्रव्यत्वमित्याख्यातार्थोऽपि व्याडिदर्शने द्रव्यम् ।

(33) ननु च क्रियारूपस्यैव भाव्यमानस्य प्रतीतेर्निष्पन्ननिष्पन्नयोश्च विरोधाद्भावनावचनास्तिङः. अर्थसामर्थ्याद् द्रव्यप्रतिपत्तिः सामर्थ्यलभ्या, न शब्दार्थ इति मीमांसकाः । असदेतत् । अन्वयव्यतिरेकाभ्यां धातोरेव भावनावचनत्वात् । प्रत्ययस्य च साधनाभिधायित्वात्, साध्यसाधनभावेन सिद्धासिद्धयोरप्यस्ति समन्वयः । तथा च प्रकृतिप्रत्ययोः समभिव्याहारः । अन्यथा सामर्थ्यलभ्य इति वैयाकरणानां साधनाभिधानं पर्यवसितविवादमेव । साधनं च शक्तं द्रव्यं न केवला शक्तिरिति द्रव्यार्थता सिद्धा ।

(34) चादयोऽपि द्रव्यक्रियात्मभूतसमुच्चयादिद्योतनाद् द्रव्यवचनाः क्रियावचना वा । तेन तदर्थस्यापि तथैव व्यक्त्याकृतिविकल्पः । गुणा अपि सामान्यविशिष्टा उच्यमाना द्रव्यं पदार्थ इत्येकशेषं रूपादयो भजन्ते । तथा समानाधिकरणेन समानेन द्रव्येणेति व्याख्यायमाने गुणेनापि समासो भवति सर्वगन्ध एकरस इति ।

(35) नन्वेवं

`विप्रतिषिद्धं चानधिकरणवाचि।' (P.2.4.13.)

इत्यत्राप्यधिकरणं द्रव्यमिति शीतोष्णं सुखदुःखमित्येकवद्भावः कथमुदाहृतः । शीतादीनामनेन लक्षणेन द्रव्यवचनत्वादनधिकरणवाचीति पर्युदासप्राप्तेः ।

(36) अत्रोच्यते । सुबन्तावयवस्य द्वन्द्वस्यैरवद्भावविधानात् सुबन्तस्य च सर्वस्य जात्युपहितद्रव्यपचनत्वेनानधिकरणवाचीति प्रतिषेधः सार्वत्रिकः स्यादिति विधेर्निर्विषयत्वमायातमिति विधिसामर्थ्यात् प्रतिषेधः प्रसिद्धद्रव्यविषयो विज्ञायते शीतोष्णे उदके इति । प्रसिद्धं हि लोके क्रियावद् गुणवद् समवायिकारणं द्रव्यमिति तद्वाच्येव पर्युदस्यते । तथा च शीतोष्णादेरुकादिद्रव्यवाचित्वे न भवत्येकवद्भावः । शैत्यादिगुणवाचित्व एव भवति ।

(37) एवं समर्थवार्तिके

`अथ हि गुणः पदार्थः भवति तदा सामर्थ्यम् ।

`अन्यो हि वीरत्वं गुणः अन्यो हि पुरुषत्वम् ।।'

(M.Bh. on Va on P.2.1.1.)

इति वीरशब्दस्यानेन लक्षणेन द्रव्याभिधायित्वेऽपि द्रव्योपसर्जनभूतस्य परतन्त्रस्य स्वार्थस्य सामर्थ्यविषयस्याभिधानात् संसर्ग्यादिलक्षणलक्षितगुणाश्रयेणाभिधानम् ।

(38) तथा हि पुरुषत्वमप्येवमेव । तत्र गुणमाह । लौकिकप्रक्रियया जातिरूपमपि तस्य भाव इत्यत्राभिप्रायादावतिप्रसङ्गपरिहारार्थं

`यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः'

इत्युक्ते द्रव्यगुणयोरव्यतिरेकं मन्यमानः प्रकृतिप्रत्ययार्थयोर्भेदं नावगच्छेदित्यन्यच्छब्दादिभ्यो द्रव्यमित्युक्तमिति नास्माद्भाष्यादेतल्लक्षणेन शब्दादयो द्रव्यं न भवतीति भ्रमितव्यम् । तथा ह्यस्मिन् द्रव्यसक्षणे रूपादीनामपि द्रव्यत्वादद्रव्यप्रकर्ष इत्यामुप्रत्ययाभावः समयातरं शीतम्, उपांशुतरः शब्दः, उच्चैस्तरो ध्वनिरिति ।

इति भूतिराजतनयहेलाराजकृतौ
प्रकीर्णकप्रकाशे भूयोद्रव्यसमुद्देशश्चतुर्थः ।।

---

dsamudesha

अथ द्रव्यसमुद्देशः ।

---

(1) जातिर्वा द्रव्यं वा पदार्थावित्युक्तम् । तत्र वाजप्यायनदर्शनेन जातिं विशेषणभूतां पदार्थं व्यवस्थाय व्याडिदर्शनेन विशेष्यरूपं द्रव्यमपि पदार्थं व्यवस्थापयितुं यथादर्शनं तदेव पर्यायान्तरैरुद्दिशति ।

आत्मा वस्तु स्वभावश्च शरीरं तत्त्वमिप्यपि ।
द्रव्यमित्यस्य पर्यायास्तच्च नित्यमिति स्मृतम् ।। 1 ।।

(2) इहार्थक्रियायां द्रव्यमेवोपयुज्यते इति तदेव प्रवर्तकमर्थिनाम् । अतः शब्देन तदेवोच्यते । अनभिधीयमाना तु जातिरवच्छेदिका गुडशब्दे माधुर्यादय इवेति द्रव्यवादिनां दर्शनम् । द्रव्यं च द्विविधम्, पारमार्थिकं सांव्यवहारिकं च । तत्र द्वितीयं भेद्यभेदकप्रस्तावेन गुणसमुद्देशे वक्ष्यते

`वस्तूपलक्षणं यत्र....' (Vak.III.भू.3)

इत्यादिना । अनेन च द्रव्येण व्याडितदर्शने सर्वे शब्दा द्रव्याभिधायिनो भवन्ति । इह तु पारमार्थिकं द्रव्यं निरूप्यते । तथा हि आत्मा अद्वैतवादिभिरात्मशब्देन तद् द्रव्यमुक्तम् । आत्मैव ह्युपाधिभिन्नं प्रतिभासमानं `द्रव्यं पदानामर्थ इति तेषां दर्शमिहैव वक्ष्यमाणम् । वस्तु स्वलक्षणमर्थक्रियाकारि द्रव्यमिति शाक्यैरुक्तम् । स्वभावः इति सत्ताद्वैतवादिभिः स्वभाव आत्मभूता सत्तेति कृत्वा । तथा हि क्रमरूपोपसंहारे सत्तैव सत्त्वमिति स्वसंबन्धिभिरुपाधिभिरुपहितभेदा सैव द्रव्यम् । प्रकृतेरेकदेशः चेतनः

पुरुषः तद्द्वारेण शरीरशरीरिणोख्यतिरेकात् `शरीरम्' द्रव्यं प्रधानमेवेति प्राकृतिकैः शरीरमेवैक आत्मा येषां तैः शरीरात्मभिरुच्यते । `तत्त्वम्' इति चतुर्भूततत्त्वादिभिश्चार्वाकैर्द्रव्यमुच्यते । पृथिव्यप्तेजोवायुरिति तत्त्वानि,तत्समुदाये शरीरेन्द्रियविषयसंज्ञा इति वचनात् । तदेवमेतैः परमार्थत एकमेव वस्तूच्यते । `द्रव्यमित्यस्य' इति । द्रव्यं नाम यः पदार्थः तस्यैव एव पर्यायाः । एतेषामेव पारमार्थिकरूपाभिधायित्वात् । नान्ये घटादिशब्दाः । सत्यपि तदभिधायित्वे वक्ष्यमाणनयेनात्मादिशब्दानामेव सर्वत्र घटादावव्याहतप्रसरत्वम् । तथा च भाष्यम्--

`एकोऽयमात्मा उदकं नाम' (M Bh.)

इति । अत्रात्मशब्द उदके प्रयुज्यमानो द्रव्यवचनः । आकृतिद्वारेण चान्ये शब्दा द्रव्ये वर्तन्ते । इमे तु तत्परित्यागेन मुख्यया वृत्त्येति विशेषः ।

`सिद्धे शब्दार्थसंबन्धे' (Va.1, in परस्पाशाह्निक)

इत्यत्र

द्रव्यं नित्यमाकृतिरन्या चान्या च भवति (M.Bh.on Va.1 in पस्पशाह्निक) इतिवदता भाष्यकारेण नित्यं द्रव्यं स्मृतम् । संग्रहोक्तस्य तस्यार्थस्यानुवादात् स्मृतम् इत्याह । यद्यपि शाक्यादिदर्शने नित्यं न भवति द्रव्यं तथापि तन्मतस्यानभ्युपगमाददोषः । केवलं यदस्माकं द्रव्यमन्यैरेवमभिधीयत इत्येवमत्रोपन्यासः । यद्वा भाष्यानुसारेण स्वरूपान्यथात्वानापत्तिः विकारभेदेऽपि नित्यत्वं विवक्षितमेवेति सर्वत्र तत्सिद्धिः ।। 1 ।।

एवं दर्शनान्तराश्रयणेनोद्दिष्टेष्वपि द्रव्यभेदेषु स्वसिद्धान्ताश्रयेण सार्वत्रिकीं द्रव्यपदार्थव्यवस्थां कर्तुमाह--

सत्यं वस्तु तदाकरैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ।। 2 ।।

(3) इह सर्वशब्दानां पारमार्थिकं तत्त्वं साक्षात् स्प्रष्टुमशक्तानामनेकोपाधिविषयनिहितपदानां तद्रूपालिङ्गनं व्यवहारे समालक्ष्यते । उपाधीनां चागमापायवशविधुरितनिजस्वरूपाणामर्थिसार्थसमाशापूरणप्रतिहतशक्तित्वान्न तावत्येव पर्यवसानमित्युपवक्षितरूपपृष्ठपातिनः शब्दा व्यवस्थाप्यन्ते । अवधृतरूपनिवेशित्वाच्च शब्दानामवधारणानुसारमर्थे प्रवृत्तिः, अवधृतिश्चाकारद्वारेण । निराकारस्य बुद्ध्युपारोहायोगात् यथाप्रत्ययं भेदावसायस्य बाध्यमानत्वादनुयाय्यभिन्नमेव रूपं परमार्थतः । तदेव ब्रह्मरूपं सत्यम् ।। 2 ।।

स्यादेतत् । उपाधिषु शब्दानां विश्रान्त्यभावे शब्दार्थोपाधित्वं तेषां न स्यात् । अवाच्यस्य तदुपाधित्वायोगदित्येतद्विचारयितुमाह--

अध्रुवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ।। 3 ।।

(4) अदो देवदत्तस्य गृहं यत्रासो काकः प्रतिवसतीत्यत्रानियतस्वामिकगृहोपलक्षणायोपलक्षणभूतस्य काकस्योत्पतितेऽपि तस्मिन्नुपलक्षमस्य कृतत्वाद् अध्रुवत्वम्नित्यत्वमिति तदनादरेणैव तदुपलक्षितं गृहमभिधीयते गृहशब्देन यथा तथा प्रकृतसंबन्धादसत्योपाध्युपलक्षितं सत्यमुपाधिरूपानादरेण शब्दैरभिधीयत इत्यनभिधीयमानस्याप्यभिधानविषयनियामकत्वादुपलक्षमत्वे सत्युपाधित्वनिदर्शनेन समर्थितम् । तथा हि इत्यनुबन्धस्याप्रयोगसमवायित्वादध्रुवस्योपलक्षणत्वे तद्रहितस्य शुद्धस्य प्रत्ययरूपस्य संज्ञाप्रसङ्ग इत्यत्रेदं भाष्ये निदर्शनमुक्तम् । ननु काकोऽतिविलक्षणाद् गृहाद् भेदेनावधार्यमाणो मा भूद्गृहशब्दाभिधेयः । घटादयस्त्वाकाराः पृथगनुपलभ्यमानतत्त्वाः कथमिव तच्छब्दैर्नाभिधीयेरन् । अन्यो ह्युपाधिरुपलक्षणभूतः सामानाधिकरण्येनावच्छेदकः । तद्यथा दृतिहरिरित्यत्र पशुः । अन्यत्तु विशेषणमपृथक्च्छब्दावाच्यमुपरंजकम् । तद्यथा वानेयमुदकमिति । वनसबन्धोपाधीयमानरूपविशेषमुदकम् । `अभिधीयते' इति । वनसंबन्धो विशेषणमुपरंजकतयाभिधेयकमापद्यत इति । तथा चोक्तम् ।

अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः ।
अनुपाधिरतोऽन्यः स्यात् श्लाघादिविशेषणं यद्वत् ।।

इत्याशङ्क्य सदृशतरमत्र निदर्शनमाह--
सुवर्णादि यथा भिन्नं स्वैराकारैरपायिभिः ।
रूचकाद्यभिधानानां शुद्धमेवैति वाच्यताम् ।। 4 ।।

(5) रुचककुण्डलाद्याकारविशेषोपाधीयमानरूपभेदमपि सर्वत्रानपायिरूपं सत्यमिति `अपायिभिः' आकारविशेषैस्तत्साध्यार्थक्रियाकरणान्न तत्रैव रुचकादिशब्दाः कृतपदसंबन्धाः । किन्तु तदतिरिच्यमानमर्थवस्त्वभिधायकत्वेन समाविशन्ति तद्वत् प्रकृतिसंबन्धादाकारोपहितनानात्वमपि परतत्त्वं शब्दगोचर इत्यर्थः । तत्र च अपायिभिरिति हेतुर्निर्देशः साध्यसमकक्ष्यतया कृतः । ततश्चोपाधीनामवाच्यत्वमसत्यत्वं च सिद्ध्यति । असत्यत्वादेवार्थक्रियाकरणात्तदर्थं च शब्दव्यवहारादवाच्यत्वं तेषामित्यर्थः । ननु रूचकादौ प्रकृत्यन्वयोऽवधार्यत एव । इहापि वस्तूनां ज्ञायमानत्वेन सत्वात्, ज्ञानस्य वैकल्पिकाकारानवस्थानान्निराकारशुद्धसंविन्मात्रानुगमस्य स्वसंवित्सिद्धत्वाददोषः । ननु विशेषणोपरक्तं विशेष्याभिधानं युक्तमित्युपसर्जनीभूतस्याभिधाने का क्षतिः । न काचित् , केवलमुपाधिष्वेवात्र तात्पर्यदृष्ट्या पदबन्धो निवार्यते । गुमत्वेन त्वभिधानमस्तु न तावत्येव विश्रन्तिरिति द्रव्यनिष्ठतासिद्धिः ।। 4 ।।
अत एव विशेषणोपरागात् साङ्कार्यदोषं परिहर्तुमाह ।
आकारैश्च व्यवच्छेदात् सार्वार्थ्यामवरुध्यते ।
यथैव चक्षुरादीनां सामर्थ्यं नाडिकादिभिः ।। 5 ।।

(6) सर्वभावेषु ब्रह्मणो द्रव्यलक्षमस्याभेदात्तदभिधायित्वे शब्दानां सर्वत्र तस्य भावात् सार्वार्थ्यं शब्दान्तराभिधीयमानार्थत्वं साङ्कर्यं प्रसज्येतेत्यत्रेदमुच्यते । प्रतिनियताकारपरिच्छिन्नवृत्तित्वात् सर्वार्थत्वप्रतिबन्धादसङ्कर इत्यर्थः । घटाकारोपधान पुरःसरं घटशब्देन ब्रह्मद्रव्यमभिमुखीक्रियते पटाकारोपधानेन तु पटशब्देनेत्याद्युपाधिरूपोपाहितविवेकित्वमभिधानीयम् । तद्यथा नाडिकाशुषिरवर्त्मनिहितनयनास्तदवकाशावस्थितमेवार्थभागं पश्यन्ति तताविद्यावच्छिन्नदृक्शक्तिभिराकारभेदैरेव वस्तूपलक्ष्यते । तथैव च यथाध्यवसायं शब्दनिवोशाच्छब्दैरेभिधीयत इत्यर्थः । यथावरणादिनेन्द्रियस्यैव प्रकाशशक्तिः प्रतिबध्यते न विषयो विक्रियते तथानाद्यविद्यावच्छेदप्रकल्पितविभागानां जीवानामेव संवेदनशकिर्नियम्यते येन विच्छिन्नार्थाभिधानेन भेदविषयाण्यभिधानानि प्रयुज्यन्ते, न तु तत्त्वमविद्ययाविलीक्रियते इति नाडिकानिदर्शनेन सूचयति । नाडिकादिभिरित्यादिग्रहणादवधानप्रतिघातमूर्त्यभिजनाद्यवरोधः । यत्रैव ह्यवधानं तदेव ह्यवधार्यते । मूर्त्यभिजनो रूपसौन्दर्यं तेनापहतोऽन्यं न पश्यति ।। 5 ।।
ये तर्ह्याकारमात्रनिवेशिनः सन्निवेशादिशब्दाः ते धर्ममात्रमभिदध्युः इति सार्वत्रिकी द्रव्यपदार्थव्यवस्था विशीर्येतेत्याशङ्क्याह । तेष्वाकारेषु यः शब्दस्तथाभूतेषु वर्तते ।
तत्त्वात्मकत्वात्तेनापि नित्यमेवाभिधीयते ।। 6 ।।

(7) उपाधिमात्रस्वभावेष्वपि सन्निवेशाद्याकारेषु सन्निवेशादिशब्दा वर्तमानाः परमार्थतस्तत्त्वादव्यतिरेकादुपाधीनां तन्निष्कर्षे स्वरूपास्यास्वरूपत्त्वात्तदात्मनैव सत्त्वात् तदेव नियत्यमुपाधिमद्द्रव्यमेवमप्यभिधानेऽभिहितं भवति । तत्त्वमात्मा ह्युपाधीनाम्, न तु ते तस्यात्मन इति व्यावर्तकत्वात् सर्व एवोपाधयस्तदात्मना सन्तः तथैवाभिधीयन्ते । यदा ह्युपाधिमल्लीनता तदोपाधय उपाधयो न भवन्ति । ततस्तु निष्कर्षे धर्मान्तराश्रयतया स्वातन्त्र्यादुपादिमत्त्मेव नोपाधित्वमित्याशयः ।। 6 ।। यद्येवं धर्माणामवस्थान्तरे धर्मिरूपत्वान्नित्यत्वे सत्यत्वे चाकाराणामसत्यत्वम्, द्रव्यस्य तु सत्यत्वमित्येतस्य नियमस्यानुपपत्तिरित्याशङ्ख्याह ।
न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः ।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाविचारितम् ।। 7 ।।

(8) अयमत्रार्थः । नेहाद्वैतनये सत्यासत्ये द्वे रूपे स्तः, अद्वैतहानिप्रसङ्गात् । किन्तु पारमार्थिकमेकमेवाद्वयं तत्त्वम् । तच्चानादिसिद्धाविद्याविलसितसहं प्रमातृविषयतया यथातत्त्वमनवभासमानमुत्यनेकविकल्पपरिघटिताकाररूपतया व्यवहारमवतरति । तथा च तदेवाकारनानात्वोन्नीयमानस्वरूपभेदं चकास्ति, नान्यत् । तद्व्यतिरिक्तस्यान्यस्याभावात् । तत्र च

योऽयं प्रकाशः स विद्या । अप्रकाशस्तु तमोऽविद्या । न च प्रकाशाभावोऽप्रकाशो नाम कश्चिप्रमामसिद्धो निरूप्यः । ततश्च योऽयं भेदप्रकाशः स एवैकघनप्रकाशाभावः नाम प्रकाशविच्छेदोऽविद्या । तत्र विच्छिन्नान्वयोऽवच्छेदोऽवधार्यत इति विच्छिन्नप्रकाशः सत्या विद्यैव । विच्छेदमात्रं तु अप्रधानस्वभावं च किंचिदविद्येति परमार्थविचारे न किंचित्तत्त्वं व्यवतिष्ठते । तत्त्वमेव यथाप्रतिभासं भेदेन चकासदविचारितरमणीयं प्रपंचोऽतत्त्वमिति व्यवह्रियत इति ब्रह्मविदः । तथा चाविचारितरमणीयं परूक्षया व्यवस्थापितं तत्त्वमेवाभिन्नं तीर्थिका भेददर्शनव्यवस्थिता भेदात्मकमतत्त्वं मन्यन्त इति विचारेणाविद्याविलये ब्रह्मैकनिष्ठता दर्शनानाम् । तदुक्तम् ।

सत्या विशुद्धिस्तत्रोक्ता विद्यैव

इत्यादि ।। 7 ।।

एवं तेन तेन रूपेण ब्रह्मैव विकल्पितं भवतीति सर्वशब्दानां तत्तदुपाधिमुखं तदेव विषयः सिद्ध इत्याह--

विकल्परूपं भजते तत्त्वमेवाविकल्पितम् ।

न चात्र कालभेदोऽस्ति कालभेदश्च गृह्यते ।। 8 ।।

(9) परमार्थतः अविकल्पितं विकल्पानाविषयो यत्तत्त्वं तदेव व्यवहारेऽन्यस्याभावाद्विकल्पमात्रम्, विकल्परूपं नानाविधभेदावभासम्, अनादिसिद्धाविद्यावशात् समवलंबते । जीवात्मभेदेनावतिष्ठमानं तद्गतत्वेनेति मूर्तिविवर्ताश्रयदिक्कृच्छप्रविभक्तदेशनानात्वं निमित्तपौर्वापर्यावलंबनसहम् । एवमकालकलितमपि तत्त्वमनादिनिधनं कालारव्यस्वतन्त्रशक्तिविनिवेशितप्रतिबन्धाभ्यनुज्ञावशाज्जान्मादिभावविकाराभिधीयमानपौर्वापर्यं चकास्तीत्यर्थः ।। 8 ।।

नन्वविद्यमानस्य तत्त्वे प्रतिभानमयुक्तमित्याशङ्क्य दृष्टान्तेनोपपादयति । यथा विषयधर्माणं ज्ञानेऽत्यन्तमसंभवः ।

तदात्मेव च तत् सिद्धमत्यन्तमतदात्मकम् ।। 9 ।।

(10) विज्ञानवादे विषयाकारस्य भावतोऽसत्यत्वान्नीलादिस्तद्गतो धर्मो जडोऽजडे ज्ञानेऽसंभवी अत्यन्तम् इति जडाजडयोर्न केनचिदंशेन सारूप्यमित्याह । तथा चोक्तम् --

`एकदेशेन सारूप्य सर्वं स्यात् सर्ववेदनम् ।

सर्वात्मना तु सारूप्ये ज्ञानमज्ञानतां व्रजेत् ।। इति ।। 9 ।।

अथवा संभविधर्माच्छुरितं विज्ञानं विशुद्धबोधस्वभावमप्यविद्यायां व्यवहारेऽवभासत इति इष्टं निदर्शनान्तरमाह ।

तथा विकाररूपाणां तत्त्वेऽत्यन्तमसंभवः ।

तदात्मेव च तत्तत्त्वमत्यन्तमतदात्मकम् ।। 10 ।।

(11) सांख्याभिमतमविकृतं प्रधानत्त्वं सर्वविकारग्रन्थि बीजावस्थमभिन्नमनुप्रसृष्टमेव महदादिविकाररूपैः परमार्थतः । तद्धि महदादिविकारशक्तियुक्तं गुणसाम्यावस्थात्मकं गुणवैषम्यविमर्दवशोपजायमानविकारनानात्वाद्विलक्षणमेव । अथ च व्यवहारे महदादिविकाररूपावधारणेन विना तदुपलंभासंभव इति सर्वदर्शनेष्वविद्यान्वयिनी । एवमसत्याकारोपधानेन तत्त्वप्रतिभासः सिद्ध इति साध्यान्वयो गृहीतः ।। 10 ।।

कथं पुनरेतदवगम्यते आकारा असत्याः, ततोऽन्यत् सत्यमित्याह ।

सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते ।

तन्नित्यं शब्दवाच्यं तच्छब्दतत्त्वं न भिद्यते ।। 11 ।।

(12) `तदेव हि नित्यं यस्मिंस्तत्त्वं न विहन्यते'

(M.Bh on Va.1,पस्पशान्हिक)

इति भाष्यानुसारेणैतदुच्यते । तथा हि तत्रोक्तम् ।

`कनकमित्येव सत्यं पुनरपरयाकृत्या युक्तं खदिराङ्गारसवर्णे सुवर्णकुण्डले भवतः' इत्यनेनैव दृष्टान्तेन विकारापेक्षया भिन्नस्य ब्रह्मणः सत्यतोच्यते । यथा हि तत्र रुचकाद्याकारोपमर्देन सुवर्णमित्येव सत्यम्, एवमनन्तविकारग्रामापाये

सर्वान्तेऽवतिष्ठमानमनपायि ब्रह्मरूपं सत्यं तदेव च भावतो नित्यम् । आपेक्षिकं तु जात्यादीनां व्यवहारे नित्यत्वमुच्यते । तथा हि व्यक्त्यपाये जातिरवतिष्ठमाना गोत्वादिका नित्या । तत्राप्यश्वत्वादिभेदत्यागे पृथिवीत्येव सत्यम् । तत्राप्यपूत्वादिभेदापाये वस्तित्येव सत्यं सर्वनामप्रत्याय्यम् । तत्रापि संविद्रूपस्यानपायिनोऽनुगमाद् विषयाकारविवेके तदेव पारमार्थिकं सत्यमिति नेतिनेत्युपासीतेति भावनाय चोद्यते । संविच्च पश्यन्तीरूपा परा वाक् शब्दब्रह्ममयीति ब्रह्मतत्त्वं शब्दात् पारमार्थिकान्न भिद्यते । विवर्तदशायां तु वैखर्यात्मना भेदः । तत्र च तदेव नित्यं जात्यादिरूपेण शब्दवाच्यम् । तत्राप्यान्तरोपादानविश्रान्त्या वाचकत्वस्य व्यवस्थापनात् स्वरूपान्तर्गतस्यार्थस्य वाच्यत्वाद् वाच्यवाचकयोरविभागः सिद्ध इति प्रथमकाण्डे निर्णीतम् । अत एवानन्तरमिहाभिधास्यति

`तस्य शब्दार्थसंबन्धरूपमेकस्य दृश्यते"

इति ।। 11 ।।

यदुक्तं

`तदात्मेव च तत्तत्त्वमत्यन्तमतदात्मकम्' इति तत्रात्यन्तमतदात्मतां तावद् व्याचष्टे ।

न तदस्ति न तन्नास्ति न तदेकं न तत् पृथक् ।

न संसृष्टं विभक्तं वा विकृतं न च नान्यथा ।। 12 ।।

(13) वैकारिकसर्वव्यवहारातीतत्वात् पारमार्थिकेन रूपेण विकारात्मकं तत्त्वं न भवति । तथा हि । अस्ति इति न शक्यते व्यवहर्तुम् । सत्त्वोपाधिकस्य स्वरूपस्य तत्त्वस्वरूपायोगात् तेनात्मना व्यवहारानवतारात् । नापि नास्ति इति, अभावोपाधिकस्याप्यतथात्वात् प्रमाणेन भावात्मकस्य तत्त्वस्याचोदितत्वात् । एकसंख्योपाधीयमानस्वरूपविशेषं तत्त्वं न भवति । निरूपाधिनः तत्त्वस्य वस्तुतोऽभिन्नत्वात् । तथा चैकमित्यप्रतीतेः । नापि पृथक्त्वाहितविशेषम्, तद्भिन्नस्यासत्यत्वात् । नापि संसर्गोपाधिकम्, विभागोपाधिकं वा, ततो द्वितीयस्य प्रमाणेनानुपपत्तेः, कुतोऽभिन्नं विभक्तं च केन वा संसृष्ट स्यात् । परिणामनिषेधेन विवर्ताभ्युपगमान्न विकृतम् । अनेकाभावग्रामरूपतया चाद्भुतया वृत्त्या विवर्तनादविकृतमुत्यपि न शक्यते व्यवहर्तुमिति सर्वव्यपदेशातीतं तत्त्वं परं ब्रह्म ।। 12 ।।

अथ च तदात्मैवाविद्यायामवधार्यत इत्याह ।

तन्नास्ति विद्यते तच्च तदेकं तत् पृथक् पृथक् ।

संसृष्टं च विभक्तं च विकृतं तत्तदन्यथा ।। 13 ।।

(14) भावाभावविकारावभासजननशक्ति तदेवास्ति नास्तीति च सत्तासत्तोपाधिकव्यवहारसहं भावतस्तु निःसत्तासत्तं निःसदसत् परं ब्रह्म । व्यावहारिकं चैकानेकव्यवहारं जातिव्यक्त्यात्मना तदेव वर्तत इति संख्योपाधिकमपि च । एवं संयोगोपाधिकमपि, अन्यसंसर्गितयावभासनात् । एवं विवेकावसायस्तत्र । तथा समस्तविकारात्मना जन्यमानमिवाकाशाद्यात्मना कूटस्थतया तदेवावभासत इति तदात्मैव तत्त्वमित्युक्तम् ।। 13 ।।

एवं च कृत्वा सर्वस्य तन्मयत्वाद्विरोधिनोऽपि व्यवहारास्तत्रैवोपलीयन्त इत्याह ।

तस्य शब्दार्थसंबन्धरूपमेकस्य दृश्यते ।

तद् दृश्यं दर्शनं द्रष्टा दर्शने च प्रयोजनम् ।। 14 ।।

(15) वाच्यवाचकसंबन्धानां भावतोऽद्वयरूपता । तत्र ह्यान्तरे तत्त्वे श्रुत्यर्थशक्ती संसृज्येते इति विवर्तदशायां श्रुत्यर्थशाखात्मना तस्यैव विकासाद्वाच्यवाचकरूपतया भेदावभासौ, ज्ञानज्ञेयरूपतयैवाविद्येति ब्रह्मकाण्ड एव प्रपंचेनायमर्थोऽस्माभिनिर्णीत इति तत एवावधार्यम् । द्रष्टृदृश्यरूपतया च तस्यैव विवर्तः । तथा हि दृश्यं तावद्भावजातं संविद्रूपारूढम् । वेद्यमानैकत्वादेव वेदनैकपरमार्थम्, अप्रकाशस्य प्रकाशमानतायोगात् इति पूर्वकाण्डे अद्वयसिद्धौ च वितत्य विचारितम् । द्रष्टापि जीवात्मा अविद्याकृतावच्छेदो नियतः संसारी भोक्ता ब्रह्मैव चेतनत्वाद्भावतो भेदानुपपत्तेरिति तत्रैवावेदितम् । अनेन च प्रधानकर्तृकर्मरूपकारकनिर्देशेन कारकान्तरस्याप्याक्षेपात् सिद्धरूपो विवर्तः प्रतिपादितः । दर्शनशब्देन च प्रधानक्रियानिर्देशकेन क्रियान्तरस्याक्षेपात् साध्यस्वभावक्रियाविवर्तोऽप्युक्तः । कालशक्त्यवच्छिन्नो हि क्रियाविवर्तः । दिक्च्छक्त्यवच्छिन्नश्च मूर्तिविवर्त

इति मूर्तिक्रियाविवर्तरूपं विश्वं प्रतिपादितम् । प्रयोजनशब्देन च समस्तक्रियाफलनिर्देश इति साध्यासाधनफलरूपतया विश्वसंकलनायामशेषविवर्तानुगुण्यं ब्रह्मणः प्रतिपादितम् । एतच्च

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ।।

इति ब्रह्मकाण्डे प्रतिपादितम् । तत्रैव च सतत्त्वनिर्णयोऽस्माभिरभ्यधायि । प्रख्योपाख्यात्मकत्वाच्च व्यवहारस्य द्वित्वे शब्दार्थसंबन्धरूपं तद् दृश्यं दर्शनं चेति भेदेनात्र निर्देशः । एतच्चाविद्यमयं रूपं कथ्यते । पारमार्थिकन्तु प्रशान्तप्रपंचरूपं वक्ष्यति ।

यत्र द्रष्टा च दृश्यं च दर्शनं चाविकल्पितम् ।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः ।।

इति ।। 14 ।।

उक्तमिदम् `आकृतिसंहारेऽन्ते यदवितष्ठते तत्सत्यम्' इति । तत्रैतत् स्यात् । अन्ते न किंचिदवतिष्ठते । असदपदमेवैतद्विश्वमाविर्भवतीत्याशङ्क्यापि हेतुनाभिन्नकारमपूर्वकत्वमन्वयमुखेन दृष्टान्तोपक्रमं साधयितुमाह ।

विकारापगमे सत्यं सुवर्णं कुण्डले यथा ।
विकारापगमे सत्यां तथाहुः प्रकृतिं पराम् ।। 15 ।।

(16) कुण्डलावस्थात्मकविकारापाये कुण्डले सुवर्णमेकं सत्यमवतिष्ठते यथा तथा पृथिव्यादिविकारविगमेऽन्वयिनी प्रकृतिरभिन्ना सत्यावतिष्ठते इत्युपेयम् । आहुरिति आगमप्रमाणसिद्धतां ध्वनयति ब्रह्मणः । तथा चोक्तम् ।

`एकमेव यदाम्नातम्'
इति ।
`आत्मैवेदं सत्यम्' ।

इति हि श्रुतिः । उपोद्बवनमात्रं चानुमानम् । तथा हि । निरुपाख्यादसतोऽपदाद्विकारप्रादुर्भावो न युक्तः । अभावस्य भावरूपत्वविरोधात् । न हि शशशृङ्गात्कस्यचिदुद्भवो दृश्यते । अस्ति च विज्ञानरूपतया जगत्यन्वय इति तत्पूर्वकमेवैतत् । तथा च वक्ष्यति ।

"नाभावो जायते भावो नैति भावोऽनुपाख्यताम्"

इति । तस्य चिद्रूपस्य चिच्छक्तिरपरिणामिनीति विकाराभावान्नेदं सांख्यनयवत्परिणामदर्शनम्, अपि तु विवर्तपक्षः । विशेषश्चानयोर्वाक्यपदीयेऽस्माभिर्व्याख्यात इति तत एवावधार्यम् । इहापि संबन्धसमुद्देशे वक्ष्यते ।

कारणान्तरव्युदासश्चाद्वयसिद्धावभिहित इति सत्यर्थित्वे तत एवावगन्तव्यः ।। 15 ।।

वाच्या सा सर्वशब्दानां शब्दाश्च न पृथक् ततः ।
अपृथक्त्वे च संबन्धस्तयोर्नानात्मनोरिव ।। 16 ।।

(17) तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्याभूयस्त्वे प्रतिनियताकारोपाधीयमानरूपभेदं ब्रह्मैव सर्वशब्दविषय इत्युक्तोऽर्थः । आत्मा, ब्रह्म, तत्त्वम्, इत्यादयोऽपि हि शब्दाः समवलंबितोपाधयोऽपि द्रव्यात्मानमनु परिवर्तन्ते । निरुपादिनो वाग्विषयातीतत्वात् । वाङ्मनसातीतं हि तत्त्वमित्युपदिशन्ति ब्रह्मविदः । घटादिशब्दापेक्षया त्वात्मादिशब्दाः प्रत्यासन्नाः । सर्वस्य च तन्मयत्वाच्छब्दा अपि तदात्मकः यथाविभक्तं प्राक् । अभेदेऽपि च पारमार्थिके सांवृतो लोकयात्रायां भेदोऽसत्य इतीवशब्दः । अत एव द्विष्ठसंबन्धोपपत्तिः ।। 16 ।।

ननु चेन्द्रजालमिदं यदवधृतरूपभेदानामपि भावानामनादृत्य तत्त्वमनवसीयमानाभेदपरमार्थोपदेशनमुत्याशङ्क्य दृष्टान्तेनैतत् साधयितुमाह ।

आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम् ।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः ।। 17 ।।

अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते ।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते ।। 18 ।।

(18) स्वप्नावस्थागतः प्रपंचो जागरया बाध्यमानत्वादसत्य इति सर्ववाद्यभ्युपगमः । तेनैव दृष्टान्तेन जागरायामपि भावभेदस्तुरीयदशायामननुवृत्तेरसत्योऽवस्थाप्यते । यत्किल सर्वावस्थास्वनुगतं तदेव सत्यम् । तच्च संविन्मात्ररूपमबाध्यमानम् । अवस्थाभेदस्त्वागमापायित्वाद्बाधितोऽसन् सुखदुःखादिवत् । तथा हि रागादयः सुखादयश्चास्वभावत्वात् संविन्मात्ररूपं न विकुर्वन्ति । तथावस्थाभेदोऽप्यनेकाकारकालुष्योपहृतः। तत्र स्वप्ने विरुद्धाकारोल्लेखो वैकल्पिकी दृष्टिः प्रतिप्रमातृनियता । वैकल्पिको हि मनोव्यापारानुसारी संसारी भोक्ता, स च भावतश्चोतनत्वाद् ब्रह्मेव । तथा च तावति स्वातन्त्र्यान् निर्मितावीश्वरोऽनन्योपादानात् भावानाभास्योपभुङ्क्ते प्रियाप्रियरूपतया रागद्वेषादिमयेन संसारमोहेन स्वपरविभागानुसारी परसंकथादिषु । तदाहुः वेदान्ततत्त्वनिपुणाः ।
प्रविभज्यात्मनात्मनं सृष्टवा भावान् पृथग्विधान् ।
स्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते ।।
इति । भोक्तेति वचनात् प्रत्यगात्मसृष्टिरियमुक्ता । तस्य च सर्वेश्वरत्वात् ब्रह्मरूपत्वे सृष्टिसामर्थ्यमुक्तम् । सर्वमयत्वाच्चानन्योपादानविचित्रभावरचनामात्मोपादानमाहुः । अत एव प्रविभज्यात्मनात्मानमिति कर्तृकर्मभेदाभावाच्च वैकल्पिकत्वमस्याः सृष्टेः स्फुटमुक्तम् । बाह्योपादाना तु जागरायामैश्वरी सृष्टिर्विश्वशब्दावाच्या सर्वप्रमातृसाधारणी । स्थिरत्वास्थिरत्वग्रहावेषनिमित्तस्तु भेदः । अविद्याप्रवृत्तचिरूपत्वात् पुनरसत्यता समानैव । केवलं सत्यामविद्यायामपरो मोहश्चिच्छक्तेरावारको निद्रा नाम । तद्वशादत्रैव भ्रान्तत्वाभिमानोऽर्वाग्दृशाम् । परमार्थदृशां तु जननमरणरहितेऽप्रविभक्ते कूटस्थे परस्मिन् ब्रह्मणि चिदानन्दरूपे सर्वमेव जगज्जाग्रत्स्वप्नाद्यवस्थागतं मूर्तिकियाविवर्तरूपमसत्यम् । अन्वयिचित्सामान्यंमात्रं तु परमार्थ इति सिद्धम् । विरुद्धमुपलभ्यते इति वदन्नविद्यायां विरोधमभ्युपैति । एतदेव ह्यविद्यायाः स्वरूपं यदनुपपद्यमानमप्याभासोपगमं नयति, उपपन्नत्वे विद्यैव स्यात् । तस्मादसत्यप्रपंचप्रकाशनशक्तिर्ब्रह्मणोऽनादिसिद्धा ग्राह्यग्राहकयुगलं स्वानुरूपमापरचय्य जगन्नाट्यमातनोतीत्यविचारितरमणीयामिमामपनयन्ति तत्त्वदृशः ।। 17-18 ।।
इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे द्रव्यसमुद्देशो नाम द्वितीयः ।।

---

dwitiya_kandam

भर्तृहरिप्रणीतम्
वाक्यपदीयम्
हरिवृषभरचित `स्वोपज्ञवृत्ति' --
पुण्यराजप्रणीत `प्रकाश' --
श्रीरघुनाथशर्मविरचित - `अम्बाकर्त्रो' टीकात्रयोपेतम्

अथ द्वितीयकाण्डम्

एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतम् । तस्य च साधारण्येन वाचकत्वं व्यवस्थापितम् । इदानीं मतभेदेन केषाञ्चित्पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद्वितत्य स्वरूपप्रतिपादनाय द्वितीयकाण्डप्रारम्भः ।
तत्राचार्यमतभेदाश्रयेण तावद्वाक्योद्देशार्थमाह---

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ।। 1 ।।

पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ।। 2 ।।

एतेऽष्टौ वाक्यविकल्पा आचार्यणाम् । तत्राखण्डपक्षे जातिः सङ्घातवर्त्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि । खण्डपक्षे तु-- आख्यातशब्दः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक्सर्वं पदं साकाङ्क्षमिति पञ्च लक्षणानि । अत्रापि सङ्घातः क्रम इत्यभिहितान्वयपक्षे लक्षणद्वयम् । आख्यातशब्दः, पदमाद्यम्, पृथक्यर्व पदं साकाङ्क्षमित्यन्विताभिधानपक्षे लक्षणत्रयमिति विभागः ।
इह च "पदप्रकृतिः संहिता" इति प्रातिशाख्यम् । तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहितेत्यखण्डपक्षः पदानि प्रकृतिर्यस्याः सेति खण्डपक्षः प्रादुर्भवति।
तत्राख्यातशब्दो वाक्यमिति परस्ताच्छब्दार्थनिर्णय इति प्रकरणे दर्शयिष्यत।यथा---
आख्यातशब्दे नियतं साधनं यत्र गम्यते ।
तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते ।। इति (वाo पo 2/326)
"केवलेन पदेनार्थः" इत्यादिना ।
श्लोकाष्टकेन सङ्घातो वाक्यमिति दर्शयिष्यति । "यथैक एव सर्वार्थः" इत्यादिना "देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः" इत्यन्तेन ग्रन्थेन, तथा "अव्यक्तः क्रमवान्" इत्यादिना "व्यावृत्तभेदो येनार्थः" इत्यन्तेन चाखण्ड एव स्फोटलक्षणः शब्दो वाक्यमति दर्शितम् । उक्तञ्च---"येनोच्चारितेन सास्नालाङ्गूलखुरककुदविषाण्यर्थरूपं प्रतिपाद्यते स शब्दः", तथा--- "स्फोटः शब्दो ध्वनिः शब्दगुणः" इति ।
स्फोटश्च द्विविधः--बाह्य आभ्यन्तरश्चेति । बाह्योऽपि जातिव्यतिक्तिभेदेन द्विविधः । तत्र जातिलक्षणस्य जातिः सङ्घातवर्तिनीति, व्यक्तिलक्षणस्यैकोऽनवयवः शब्द इति । आभ्यन्तरस्य तु बुद्ध्यनुसंहृतिरित्यनेनोद्देशः । तत्र जातिव्यक्तिलक्षणस्य बाह्यस्य `यथैक एवे' त्यादिना पुनः `अव्यक्तः क्रमवानि' त्यादिना ग्रन्थेन स्वरूपमुक्तम् । `यदन्तः शब्दतत्त्वमि' त्यादिना श्लोकचतुष्टयेन आन्तरस्य स्वरूपमुक्तम्, `संप्रत्यये' त्यादिश्लोकचतुष्टयेन क्रमो वाक्यमिति दर्शयिष्यति । `नियतं साधने साध्यमि' त्यनेन च श्लोकद्वयेन पदमाद्यं पृथक्सर्वं पदं साकाङ्क्षमिति लक्षणद्वयं व्याख्यस्यति । अन्यदपि वार्त्तिककारीयं पारिभाषिकं शास्त्रे वाक्यलक्षणमस्ति ।
"आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङिति" च।
जरन्मीमांसकोक्तं लौकिकमप्यस्ति--"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति । अनयोः सङ्घातपक्षेऽन्तर्भावः । एतेऽपि प्रथममेव `निघातादिव्यवस्थार्थमि' त्यादिना विचारयिष्यन्ते । इत्थमष्टावेव वाक्यविकल्पा मतभेदेन सम्पद्यन्त इति वोद्धव्यम् ।
यत्पुनरनेन वृत्तावुक्तम्---उदाहरणमात्रमेतत्, अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यतीति ।
तद्वार्त्तिककारीयवाक्यलक्षणादेरन्तर्भावमनपेक्ष्येति मन्तव्यम् । उद्दिष्टानां च वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव दर्शितक्रमेण स्वरूपमुन्मीलयिष्यतीति नार्थ इह तत्प्रदर्शनेन ।
वाक्यलक्षणप्रसङ्गेन च तथा वाक्यार्थस्य सम्बन्धस्य च मतभेदं दर्शयिष्यति । तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः । यथा दर्शयिष्यति--
"विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते ।
वाक्यार्थ इति तामाहुः" इति (2/144) ।
अवशिष्टेषु पञ्चसु लक्षणेषु मध्यादाख्यातशब्दो वाक्यमित्यस्मिन् पक्षे क्रिया वाक्यार्थः । यथा वक्ष्यति---"क्रिया

क्रियान्तरादि्भन्ना" (2/414) इत्यादि ।

यथा च--

प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम् ।
फलं प्रसूयेत यतः सा क्रिया वाक्यगोचरः ।। इति ।

सङ्घातपक्षे च संसर्गो वाक्यार्थः । स च ---

सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेतं सम्प्राहुरनेकपदसंश्रयम् ।।

इत्यादिना दर्शयिष्यते । तथा सङ्घातपक्ष एव "सर्वभेदानुगुण्यम्" इत्यादिना प्रकारान्तरेणाभिहितान्वयपक्षे प्रतिपाद्यमाने "कार्यानुमेयः सम्बन्धो रूपं तस्य न विद्यते" इत्यनेन श्लोकेन विशेषविश्रान्तः पदानामेवार्थो वाक्यार्थ इति लक्ष्यते ।

पदमाद्यम्, पृथक्सर्वं पदं साकाङ्क्षमित्यस्मिन् तु पक्षद्वये संसृष्ट एव प्रथमतरं प्रकम्यते वाक्यार्थः । यथा निरूपयिष्यति -- "तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते" (इति),

तथा---

पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु ।। इति ।

"अभिधेयः पदस्यार्थो वाक्यास्यार्थः प्रयोजनम् । "

इत्यनेन प्रयोजनं वाक्यार्थत्वेन प्रदर्शितम् ।

तत्केषाञ्चिन्मते सर्वलक्षणसाधारणमिति न प्रयोजनवाक्यार्थो वाक्यलक्षमेषु पृथग् विभज्यते ।

तदेवं प्रतिभा, संसर्गः, संसर्गवशान्निराकाङ्क्षो विशेषावस्थितः पदार्थ एव,संसृष्ट एवार्थः क्रिया, प्रयोजनं चेति षड् वाक्यार्था इहोपदर्शिताः ।

संसर्गे, संसर्गवशाद्विशेषावस्थिते पदार्थे च वाक्यार्थेऽभिहितान्वयः । संसृष्टे क्रियायां चान्विताभिधानम् । प्रतिभायां त्वेकरसैव प्रतिपत्तिरिति न तत्र काचिदभिहितान्वयान्विताविधानचर्चा । प्रयोजने त्वभिहितान्वय एव ।

विधिनियोगभावनासंज्ञास्तु वाक्यार्था न निरूपिताः, यस्माद्भावनाक्रिययोः पर्यायता प्रयशो लक्ष्यते । केवलं प्रकृत्यर्थप्रत्ययार्थतायामत्र वैयाकरणमीमांसकयोर्विवादः ।

किञ्चि, भावना सकर्मिकेवाकर्मिकापि क्रियेति सत्यपि भेदे साध्यत्वाविशेषादभेद एवानयोः । यथा धात्वर्थभूता क्रिया साध्यरूपैव, तथा भावनाऽपीति कथमवान्तरभेदाद्भेदोऽनयोर्भवेत् ? विधिनियोगौ तु लिङ्लोट्कृत्यान्तेष्वेव वाक्येष्वर्थावित्यसर्वविषयत्वादनादृताविहेति न तत्प्रदर्शनं कृतम् ।

तत्तदनादिवाक्यार्थविकल्पाहितवासनाप्रबोधजन्मा क्रमवद्भिरिवाक्रमैर्बहीरूपतयाऽध्यस्तैः पदार्थैश्चित्रीकृत इव विकल्पविशेषोल्लिख्यमान आकारो बहीरूपतयाऽध्यस्तो निर्विभाग एव शाक्यानां वाक्यार्थ इति प्रयशः प्रतिभासोदर एवासौ मन्तव्यः

वाक्यमपि तत्तदनादिवाक्यविकल्पाहितवासनाप्रबोधजन्म क्रमबद्भिरिवाक्रमैः पदैश्चित्रीकृत इव बहीरूपतयाऽध्यस्यमानो विशिष्टविकल्पोल्लिख्यमान आकारविशेष एव बहीरूपतयाध्यस्त इति प्रयशो बुद्ध्यनुसंहृतिरित्यस्य सोदरमेवेति न तन्मतानुसारेण वाक्यवाक्यार्थयोरिहासंग्रहो वेदितव्यः ।

नैयायिकादीनां तु पूर्वपूर्ववर्णस्मृतिसचिवोऽन्त्यो वर्णो नश्यदवस्थानुभवविषयीक्रियमाणः पदं यथा, तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव पदंनश्यदवस्थानुभवविषयीक्रियमाणं वाक्यमिति प्रायशः संसर्गपक्ष एवन्तर्भवति । तथा पूर्वपूर्वपदार्थस्मरणसचिवेनान्त्येन पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इति प्रायशः संसर्गपक्ष एवास्यान्तर्भाव इति न तदसंग्रहेणाव्याप्तिरत्र वक्तव्या ।

अथात्राऽनवयव एवैकस्मिन् स्फोटात्मके वाक्ये प्रतिभा लक्षणे च वाक्यार्थे वाक्यवाक्यार्थयोरध्यासरूपः सम्बन्धः ।
यद्वक्ष्यति `वाक्यवृत्तस्य वाक्यार्थे वृत्तिः" इत्यादि ।
अवशिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योग्यताख्य एव शब्दर्थयोः सम्बन्धो मीमांसकदृष्ट्या । शाक्यदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे शब्दार्थे सर्वत्र कार्यकारणभाव एव । वाक्यार्थवादे तु तत्र संकेतलक्षणोऽसौ बोद्धव्यः ।
नैयायिकाद्यनुसारेण च संकेतलक्षण एवासावित्येवमत्र वाक्यवाक्यार्थसम्बन्धानां संक्षेपतः स्वरूपं बोद्धव्यम् । सम्बन्धेषु मध्यादत्राध्यासमेव दर्शयिष्यति । पदकाण्डे तु सर्वानभिधास्यति ।
तत्र वैयाकरणस्याखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः, अध्यासश्च सम्बन्ध इति पदवादिपक्षदूषणपरः परं टीकाकारो व्यवस्थापयतीत्यस्य काण्डस्य संक्षेपः ।। 1 - 2 ।।
अथ वार्त्तिककारमीमांसकोक्तयोर्वाक्यलक्षणयोः किं समावेश उत भिन्नविषयतेति विचारार्थमाह--
निघातादिव्यवस्थार्थं शास्त्रे यत् परिभाषितम् ।
साकाङ्क्षावयवं तेन न सर्वं तुल्यलक्षणम् ।। 3 ।।
इह पदविधिः सामथ्यं सति परिभाषितः । तत्र सत्यपि पदानां सामर्थ्ये निघातादयः क्कचिन्नेष्यन्ते । यथा--अयं दण्डो हरानेन । ओदनं पच मम भविष्यति । ओदनं पच तव भविष्यतीति । अत्रानेनेति सर्वनाम्ना दण्डस्य परामर्शाद्धरतिना सह तस्य सामर्थ्यम् । तथा युष्मदर्थस्यौदनेन सम्बन्धात् पचत्यर्थस्य तेन सह सामर्थ्यम् । एवं च सति सामर्थ्ये तिङ्तिङ् इति निघातः प्राप्नोति । तेमयावेकवचनस्येति चादेशौ । न चेष्यन्ते, वाक्यभेदात् । सामर्थ्याभावेऽपीष्यन्ते । यथा --नद्यास्तिष्ठति कूले, शालीनां ते ओदनं दास्यामीति ।
अत्र नद्यास्तिष्ठतीत्यस्य च सम्बन्धानुपपत्तेः सामर्थ्यं नास्ति । इष्यते च निघातः । तथा शालीनां युष्मदश्च सामर्थ्याभावः । इष्यते च तेमयावेकवचनस्येति युष्मादादेश इत्यालोच्य वार्त्तिककृता निघातादिव्यवस्थार्थमारब्धम्--`समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति ।
एवं चायं दण्ड इत्यत्र सत्यपि सामर्थ्ये नास्ति निघातस्य प्रसङ्गोऽवध्यधिमतोभिन्नवाक्यतयावस्थानात् । अस्तीत्यध्याहारेण ह्ययं दण्ड इत्येकं वाक्यम् । हरानेनेति च द्वितीयं वाक्यम् । नद्यास्तिष्ठतीत्यादौ त्ववध्यवधिमतोः पदयोः सामर्थ्याभावेऽप्येकवाक्यव्यस्थितौ प्रवर्तन्त एव निघातादय इति नास्त्येषामव्यवस्था । समानवाक्ये निघातादयो वक्तव्या इत्युक्तम् । तत्र वाक्ये विज्ञाते समानवाक्यत्वं ज्ञायत इति प्रसङ्गात्त्र वार्त्तिककारेणादावेव वाक्यलक्षणमुक्तम्-- `आख्यतं साव्ययकारकविशेषणं वाक्यमेकतिङिति च' इति ।
एवं च मीमासकोक्तेनास्य सर्वत्र समावेशोऽस्ति, न वेति विचार्यते । शास्त्रे वाक्यकारेण निघातादिव्यवस्थार्थं यद्वाक्यलक्षणं परिभाषितं तेन मीमांसकोक्तं वाक्यलक्षणं सकलं न तुल्यलक्षणम् । साकाङ्क्षावयवमित्यनेन मीमांसकोक्तं वाक्यलक्षणं सूचितम् । तत्र कचिदेते समाविशतः । यथा निद्यास्तिष्ठति कूले, शालीनां त ओदनं दास्यामीति । अयं दण्डो हरानेन ओदनं पच तव भविष्यतीत्यादावसमावेशः मीमांसकवाक्यलक्षणसमाश्रणेनात्र प्राप्नुवन्ति निघातादयः, एकप्रयोजनत्वात् । न चेष्यन्ते ।
तस्माद्वार्त्तिककारीयमेव वाक्यलक्षणं ज्यायः ।। 3 ।।
अथआत्र प्रसङ्गान्मीमांसकवाक्यलक्षणमर्थद्वारेण प्रदर्शयितुमाह--
साकाङ्क्षावयवं भेदे पारानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते ।। 4 ।।
भेदे विभागे विशेषजिज्ञासायां यत्साकाङ्क्षावयवम्, अविभागे तु परानाकाङ्क्षाः शब्दाः पदानि यस्मिन् तत्परानाकाङ्क्षशब्दकम् । कर्मप्रधानं क्रियापदप्रधानमित्यर्थः । तस्यैव प्रधानाभिधेयप्रयुक्तत्वादित्यभिप्रायः । गुणवद्विशेषणपदयुक्तम् । एकार्थमेकप्रयोजनम् ।। 4 ।।
इदानीं वार्त्तिककारीयस्य वाक्यलक्षणस्याव्याप्तिमाशङ्क्याह--

सम्बोधनपदं यच्च तत् क्रियाया विशेषकम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ।। 5 ।।
व्रजानि देवदत्तेत्यत्र देवदत्तेत्येतत्पदं नाव्ययम्, न च कारकम्, नापि तद्विशेषणमिति वाक्यलक्षणेनासंगृहीतत्वादाष्टमिक आमन्त्रितस्य चेति निघातो न प्राप्नोतीति चोद्यम् । आख्यातं साव्ययं सकारकं सविशेषणमिति सामान्येनाभिधानात् सक्रियाविशेषणस्याप्याख्यातस्य वाक्यतेत्यदोषः ।
तथा हि--अत्र संबोध्यमानदेवदत्तविषया व्रजतिक्रिया, असंबोध्यमानदेवदत्तविषयायाः संबोध्यमानयज्ञदत्तविषयाया वा पृथगेवेति विशिष्टैवात्र व्रजतिक्रिया ।
क्रियायाश्च विशेषणं कदाचित् सामानाधिकरण्येन भवति । यथा--सुष्ठु करोति शोभनं करोतीति । अत्र करोत्यर्थस्य सुष्ठिवत्यादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठिवत्यादीनां करोत्यादिक्रियया सामानाधिकरेण्यम् ।
एवं चासत्त्वभूतायाः क्रियाया विशेषणमित्यसत्त्वप्रधानत्वाल्लिङ्गसर्वनाम्ना नपुंसकेन योगः क्रियायाश्चेत् निर्वर्त्यत्वात् कर्मत्वमिति न्यायसिद्धमेव `कर्मत्वं नपुंसकता चेति `क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च' इति नारम्भणीयं वचनम् ।
वैयधिकरण्येनापि विशेषणं भवति, यथा--व्रजानि देवदत्तेति ।
अत्र हि देवदत्त व्रजानीति देवदत्तस्य व्रजनक्रियायाश्च सामानाधिकरण्यं नास्ति। केवलमामन्त्र्य देवदत्तं व्रजत्यसाविति देवदत्तामन्त्रणिशेषिता केवला या विलक्षणा व्रजनक्रियेत्याख्यातं सविशेषणमेवेति वाक्यलक्षणसद्भावात् प्रवर्तत एव निघातः । देवदत्त व्रजानीत्येवमुदाहरणं न प्रदर्शितम् । आमन्त्रितं पूर्वमविद्यमानवदिति न निघातः स्यादिति ।। 5 ।।
पुनरप्यव्याप्तिं वार्त्तिककारलक्षणस्याशङ्क्य परिहर्तुमाह--
यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम् ।
तथा तिङ्न्तं तत्राहुस्तिङन्तस्य विशेषकम् ।। 6 ।।

इह पूर्वं स्नाति पचति ततो व्रजति तत इत्यत्र तत इत्येतस्मादुत्तरस्य व्रजतीत्यस्य निघातो न प्राप्नोति, वाक्यभेदात् । इष्यते च । अत्र तिङन्तादुत्तरस्य तु तिङन्तस्यातिङिति प्रतिषेधान्निघातनिवृत्तिः सिद्धेति नात्र स्नातीत्यस्मादुत्तरस्य पचतिशब्दस्य निघातः प्राप्नोतीति चोद्यमुद्भावनीयम् । इष्टस्य निघातस्याप्राप्तिरेवात्रोद्भावनीया ।
अत्रोच्यते--नास्त्यत्र वाक्यभेदः । व्रजतीत्येतत्प्राधान्येनैकं क्रियापदमत्र स्थितम् । अन्यानि क्रियान्तराणि तद्विशेषणान्येव । यथा स्नानभोजनपानैः कृदन्तैर्विशिष्यते व्रजतिक्रिया तथात्र तिङन्तैः स्नातिप्रभृतिभिः प्रधानं व्रजतिक्रियैव विशिष्यत इत्येकैवात्र सविशेषणा व्रजतिक्रिया । केवलायास्त्वस्याः पृथगेवेत्येतत्सविशेषणमेकमेव वाक्यमिति वाक्यभेदाभावान्नास्ति निघातासिद्धिदोषः । एकवाक्यत्वे च तिङन्तादुत्तरस्य तिङन्तस्यातिङिति प्रतिषेधान्निघाताभावः । यथा वक्ष्यति --
बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता ।
तिङां तिङ्भ्यो निघातस्य पर्युदासस्तथार्थवान् ।। इति ।
एवं चातिङ्ग्रहणे सप्रयोजने स्थिते वार्त्तिककारेण यदुक्तम्--अतिङ्ग्रहणमनर्थकं समानवाक्याधिकारादिति तत्राभिप्रायो वाच्यः । एवं वादिनस्तस्य वाक्यभेदोऽत्राभिमत इत्यभिप्राय आख्यातं साव्ययकारकविशेषणमित्यत्रैकवचनस्य विवक्षितत्वादिति । तथा च टीकाकारः प्रदर्शयिष्यति --
एकतिङ् यस्य तु शास्त्रे नियतलक्षणम् ।
तस्यातिङ्ग्रहणेनार्थो वाक्यभेदान्न विद्यते ।। इति ।
सूत्रकारस्य त्वतिङ्ग्रहणादेकमेवाखण्डं वाक्यमर्थैकत्वादख्यातभेदेऽप्यभिप्रेतमिति गम्यते । तदभिप्रायानुसारेणैव निरूपयिष्यति--
अनेकाख्यातयोगेऽपि वाक्यं न्यायपथानुगैः ।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ।।
(वा० प० 2/356) इति । 6 ।।

टीकाकारश्चामुमेव पक्षं सूत्रकाराभिप्रायसमाश्रयणेन युक्तियुक्तं मन्यमानो बहीरूप आन्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षण एव वाक्यमितिक्रमेण व्याजिहीर्षुश्चित्रज्ञानचित्ररूपदृष्टान्तप्रदर्शनपूर्वमुपक्रमते । तत्र चित्रबुद्धिदृष्टान्तप्रदर्शनार्थमाह---

यथैक एव सर्वार्थप्रत्ययः प्रविभज्यते ।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा ।। 7 ।।

चित्रज्ञानं सर्वाकारमेकमेव । प्रविभागस्त्वस्य दृश्यभेदसमाश्रयेण क्रियते । नीलपीताद्यनेकाकारमेव विज्ञानमुपजातमिति । वस्तुस्थित्या तत्र ज्ञान आकारभेदो नास्ति । तथा वाक्यवाक्यार्थयोः स्वरूपं बोद्धव्यम् । वाक्यार्थानुगमस्तथेत्यनेन हि वाक्यवाक्यार्थयोरखण्डत्वं पानकरसमयूराण्डरसचित्ररूपनरसिंहगवयचित्रज्ञानवत् समानमेवेत्युच्यते । यथा वाक्यं निर्विभागं स्फोटलक्षणं वाचकम्, तथा वाक्यार्थोऽपि तथाविध एवेत्यनयोरेकयोगक्षेमत्वमुक्तम् ।। 7 ।।

एवमान्तरं दृष्टान्तमुपदर्श्य बाह्यमप्युपदर्शयितुमाह--

चित्रस्यैकस्वरूपस्य यथा भेदनिदर्शनैः ।
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ।। 8 ।।

चित्रं हि रूपमवयविगतमनंशमेकमेव । तस्यैवाक्यवगतैर्यथा नीलादिभिर्भेदेन निदर्शनं प्रदर्शनं येषां तैः पृथग्रूपैरेव समाख्यानं क्रियते ।। 8 ।।

तथा प्रकृते किमित्याह--

तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते ।। 9 ।।

एकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं तथाव क्रियत इति ।। 9 ।। न वा पदस्यार्थे प्रयोगादित्यस्मिन दर्शने यथाखण्डमेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते तथा वाक्येऽप्यसत्यभूतानामेवाबुधबोधनाय पदानां विभागो द्रष्टव्य इति प्रदर्शयितुमाह--

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ।। 10 ।।

पदे हि यथा प्रकृतिप्रत्ययविभागोऽसत्य एव बालव्युत्पादनाय क्रियते, तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपर्ण्यत इति बोद्धव्यम् ।। 10 ।।

तत्र वाक्यादपोद्धृतानां पदानां केवलमितरपदसारूप्यमात्रं दृश्यत इति प्रतिपादयितुमाह--

वर्णान्तरसरूपं च वर्णभागेषु दृश्यते ।
पदान्तरसरूपाश्च पदभागा अवस्थिताः ।। 11 ।।

यथा संध्यक्षरेषु भागा वर्णान्तरसरूपा दृश्यन्ते, परमार्थस्त्वव्यपवृक्तत्वान्निर्विभागा एव । एवं वाक्ये दान्तरसरूपाः पदरूपा भागाः पदभागाः । पदे वा निरंशे ये भागाः प्रकृतिप्रत्ययरूपास्तेऽवस्थिता इति ।। 11 ।।

एतदेव व्यक्तीकुर्वन्नाह--

भागैरनर्थकैर्युक्ता वृषभोदकयावकाः ।
अन्वयव्यतिरेकौ तु व्यवहारनिबन्धनम् ।। 12 ।।

नही वृषभे ऋषभस्योदकयावकयोर्वोदयावशब्दयोरर्थानुगमः कश्चिदस्ति, अपि तु शास्त्रे पदस्य प्रकृतिप्रत्ययोरन्वयव्यतिरेकाभ्यां विना कथमज्ञो व्युत्पाद्येत ? एवञ्च निरंशमेव वाक्यं वाचकमित्येव युक्तम् ।। 12 ।।
शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति ।
विभागैः प्रक्रियाभेदमविद्वान् प्रतिपद्यते ।। 13 ।।

(स्वोपज्ञवृत्तिरूपं विवरणम्)--यस्तावन्निमित्तरूपफलभेदादप्रसिद्धभेदक्रमवद्भिरयुगपद्भावैरवयवैर्युक्त इत्येवं प्रतीतः शब्दस्तस्यैवं नित्यत्वपक्षे योऽयं परिकल्पितो व्यवहारविषयो द्रव्यशक्तिनिमित्तानुपाती शब्देषु प्रत्यस्तरूपो विभागः स नास्ति । कुतो बुद्धिष्वलब्धयौगपद्यासु बुद्ध्यन्तरस्य बुद्ध्यन्तरे अथ वाक्यार्थस्यापि तथैव निर्विभागत्वं प्रतिपादयितुमाह--शब्दस्येति । शब्दस्य स्फोटलक्षणस्य विभागो नास्ति, तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति, यथा निदर्शयिष्यति--

"विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यर्थ इति तामाहुः" (वा० प० 2/144) इति ।
सततसन्निधानेनानुग्रहं कुर्वति व्यवहारं प्रत्येकबुद्धिप्रत्यवमृष्टरूपेषु मूर्त्तिभेदक्रमयुक्तेषु व्यर्थरूपेषु
विभागरूपेणाविभागमापादितेष्वात्मान्तरत्वादनवयवायामतथाभ्युपगतभेदरूपबुद्धावुपसंसृष्टबुद्धिमात्ररूपनिर्भासेषु सत्यप्यात्मभेदे सर्वार्थेषु विभागो भविष्यति । तस्मात् समीहितपौर्वापर्योऽर्थात्मा स्वरूपादप्रच्युतोऽपि सर्वो विभागातीततत्त्व एव ।
विभागैः प्रक्रियाभेदमिति भेदग्रहणं हि तस्यार्थात्मनः शब्दात्मनश्चाभिन्नस्य प्रतिपत्तिद्वारम् । पदप्रतिपत्तिपूर्विका हि सामान्यविशेषावग्रहणोपाया लघुप्रक्रमा विभागेनाविभक्तस्य प्रतिपत्तिः, प्रकृतिप्रत्ययादिप्रतिपत्तिवत् । गुरुप्रक्रमा त्वत्र संसृष्टरूपस्य प्रतिपत्तिरविभागेन प्रतिपदं पाठवत् । कुशलस्तु प्रतिपत्ता सर्वमेव भेदमभेदानतिक्रमेण पश्यति । प्रक्रियाभेदास्तु शास्त्रे विभागनिबन्धनम् ।
तथा हि--हरिद्रुर्मितद्रुर्दुर्दशो दुस्तर इत्यत्र मितद्रुरवगृह्यो हरिद्रुरनवगृह्यः । तत्र विभागे प्रक्रिया भिद्यते । हरिद्रुर्हरितरवो हरिद्रव इति । तथा दुस्तर इत्यपि तरतेस्तृणातेर्वा । अतश्च विभागे भिद्यमानायां प्रक्रियायामनवग्रहः । तथा--इन्द्राणी वरुणानी पूतक्रतायी । इन्द्रादीनामानुक, पूतक्रतोरै चेति सामान्यविशेषवता लक्षणेन भेदेनान्वाख्याने शास्त्रप्रक्रियाभेदेनाविद्वांसः प्रतिपद्यन्ते ।। 13 ।।
तस्य पदानुरोधेन पदार्थस्यापि प्रकृतिप्रत्ययानुरोधेन भागकल्पना । मूढस्तु विभागेन प्रक्रियाभेदं प्रक्रियाभेदे चार्थभेदमसत्यमपि प्रतिपद्यत इति किं कुर्मः । कथं पुनः श्रुयमाणरूपा एव देवदत्तादयः प्रतीयमानाभिधेया अनर्थकाः स्युरित्येतद् विचारयिष्यामः । अपि तु ---
ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणाकम्बले ।
देवदत्तादयो वाक्ये तथाव स्युरनर्थकाः ।। 14 ।।

यथा हि विच्छेदेनोच्चार्यमाणे ब्राह्मणकम्बल इति ब्राह्मणशब्द उपलभ्यमानस्वरूपोऽपि विच्छेदग्राहिभिः समाप्तिमनपेक्षमाणैः
प्रतिपत्तृभिः, प्रतीयमानार्थोऽप्यनर्थक एवेति प्रसिद्धः । एवं सत्यपि रूपविच्छेदग्रहणे सम्प्रत्यये चानर्थका एव वाक्यरूपान्ना देवदतादिसरूपा अत्यन्तमसन्तः परिकल्पितात्मानो विभागाभिमताः ।। 14 ।।

युक्तं चैतत् यद्वाक्ये पदार्थभेदो नास्तीति दृष्टन्तप्रदर्शनपूर्वकमाह--ब्राह्मणार्थ इति । यथा ब्राह्मणकम्बलशब्दे ब्राह्मणशब्दस्य न कश्चिदर्थो विद्यते, तथैव देवदत्त गामभ्याजेत्यादौवाक्ये देवदत्तादीनां पृथगर्थो नास्तीत्यनर्थकान्येव पदानि । अतश्च स्थितमेतद् यदखण्डं निराकाङ्क्षमेकं पदव्यतिरिक्तं वाक्यं पदार्थव्यतिरिक्तो वाक्यार्थश्च तथैवेति ।। 14 ।।
देवदत्तादीनां च भागाभिमतानामर्थयोगाभ्युपगमे सामान्येऽवस्थितानां पदानां विशेषेऽवस्थानमित्येतस्मिन् सत्येकान्तेन परिगृह्यमाणे--
सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्कावतिष्ठताम् ।। 15 ।।

इह सामान्यवृत्तिरुच्चरितो देवदत्तशब्दः सामान्यार्थसम्बद्ध एव तिरोभवति । तत्र येन शब्देनाविर्भावकाल एव विशिष्टोऽर्थो न प्रतिलब्धः स शब्दः विशेषेऽवस्थातु न पुनरुत्सहते । न च सामान्यविशेषयोर्विवक्षा युगपत् संभवति । विशेषविवक्षायां हि सर्वस्यानियमेन सामान्यादवच्छेदो विज्ञायते । तत्रोपात्तस्य नित्ये शब्दर्थसम्बन्धे कुतस्त्यागः, युक्तिनिरूपणेषु चार्थात्मस्वभिधानक्रियायोगाभावे विनिवृत्तोऽनवधार्यमाणात्मा शब्दः शब्दोपक्रमस्यार्थस्याभावादविषयः क्वावस्थाप्यताम् ।
यत् पुनर्मीमांसकैरुच्यते यथा पदसंघात एवाकाङ्क्षायोग्यतासन्निधानवशात् परस्परसमन्वितो वाक्यं संसर्गश्च वाक्यार्थ इति तद् दूषयितुमाह--सामान्यार्थ

इति । इह देवदत्त गामभ्याज शुल्कां दण्डेनेति देवदत्तादीन्येव पदानि वाक्याम् । तत्र देवदत्तपदं तावद् यदि सामान्यमात्रे प्रथमं वर्तते तत्तस्य गवादिपदकाले वाचः क्रमवर्तित्वात्तिरोधानादसत्त्वमेवेति कुतः पदान्तरश्रवणकाले तदर्थप्रतीतिः । असत्त्वादेव च न पदान्तरसंनिधाने तस्य विशेषेऽवस्थानम् ।

अभ्युपगम्यापि स्मर्यमाणतया पदान्तरसंनिधाने विद्यमानत्वं पदस्य न विशेषेऽवस्थानं युज्यत इत्याह--उपात्तस्येति । सामान्य-सामान्यार्थस्तिरोभूतो लक्षणस्य सकलपदार्थसाधारणस्यार्थस्य पूर्वमुपात्तस्य वाच्यत्वेन परिगृहीतस्येदानीं पदान्तरसंनिधाने त्यागः कुतो युज्यते शब्दार्थसम्बन्धस्यानित्यताप्राप्तेः ।

न च तथा मीमांसकस्याभ्युपगम इति । तदप्यभ्युपगम्योच्यते---निवृत्त इति । स्वार्थान्निवृत्तोऽसौ पदान्तरसन्निधाने शब्दः क्वेदानीमवतिष्ठताम् । शब्दान्तरभोध्येऽर्थे तस्य वाचकभावविरहात् स्थितिः कथं युज्यते ।। 15 ।।

एव तर्ह्यशब्दो वाक्यार्थः । शब्दष्वात्मरूपमात्राप्रतिपत्तिहेतुषु तिरोभूतेष्वपदेश्यसंस्कारविशेषायां बुद्धावुपजातायां पदेषु पदार्थमात्रं प्रत्याय्य निवृत्तेष्वशब्दवाच्योऽसत्त्वभूतः सम्बन्धः संज्ञार्थानां सामान्यरूपाणां भेदहेतुरुपप्लवमानः शोकहर्षादिवदुत्तरेषु बुद्ध्यन्तरेष्वनुसन्धीयते । एतस्मिन् दर्शन उच्यते---

अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत् ।
एवं च सति सम्बन्धः शब्दस्यार्थेन हीयते ।। 16 ।।

कथं वर्णष्वप्यनर्थकेषु स्वरूपमात्रं बुद्धौ संनिवेश्य निवृत्तेष्वभ्यासान्नियतनिमित्तमानख्येपायमर्थरूपं दुद्ध्यन्तरेष्वनुसन्धीयते । तथा च शब्दार्थयोः सम्बन्धो हीयते । तथैव तु द्रव्यगुणकर्माणि विनिविष्टनिमित्तरूपाणि प्रबोजकैर्निमित्तैः सम्बद्धान्याख्यायन्ते । ज्ञानं च विनिविष्टज्ञेयरूपम् । अपरेण सम्बन्धकल्पेन ज्ञेयैरर्थैः सम्बन्ध इत्याख्यायते । ज्ञानाच्चोपगृहीतबुद्धिरूपो बुद्ध्या सम्बन्ध उच्यते । तथा शब्दोऽपुयपरेण योग्यताख्येन सम्बन्धकल्पेनोपगृहीतार्थरूपो विनिवेशिताभिधयतत्त्वः शब्दार्थयोर्भेदे तेन तेनार्थेन सम्बन्ध इत्युच्यते । अर्थभावपरिणतिपक्षे तु सर्वतो नेदीयान् सम्बन्ध इति ।। 16 ।।

अथोच्यते---अर्थप्रतिपत्तिर्दृष्टा देवदत्तेत्यादिकात् समुदायात् सा कथमपह्नूयते । तत्राह---अशब्द इति ।

उक्तनीत्या शब्दान युज्यन्ते वाचकाः । तदभावाच्चाशब्दो वाक्यार्थो यद्यभ्युपगम्यते तदयमपरस्ते दोषः । पदार्थोऽपि पदप्रतिपाद्यो न कश्चिद् अनेकवर्णवर्त्तित्वाद् वाच उच्चरितप्रध्वंसित्वाच्च, वर्णानामितिपदमप्येकं नास्ति । तदभावात् कः पदार्थः स्यात् । इत्थमशब्दोऽवाचको वाक्यार्थ इति वाच्यवाचकभावलक्षणः सम्बन्धः शब्दार्थयोस्त्यक्तः स्यान्मीसांसकेनेत्याह---एवं चेति ।। 16 ।।

विशेषशब्दाः केषाञ्चित् सामान्यप्रतिरूपाकाः ।
शब्दान्तराभिसम्बन्धाद् व्यज्यन्ते प्रतिपत्तृषु ।। 17 ।।

केषाञ्चितु प्रक्रियान्तरवादिनामक्षादिवदश्नोत्यादिक्रियायोगविशेषे विशेषान्तरयुक्ता देवदत्तादयो वाक्यविषया नित्यं परितः परिच्छिन्नार्थवृत्तयो विशेषशब्दवाचकस्य विशेषस्य प्रतिपत्तृभिः सामान्यापहृतबुद्धिभिः परोक्षविशेषैरपरिच्छेदात् सामान्यशब्दप्रतिरूपकाः शब्दान्तराभिसम्बन्धादागन्तुना केनचिदप्यर्थेनायुज्यमाना नित्यसिद्धनियतत्वान्नियमं विशेषान्तराध्यारोपरूपं चातिक्रान्ताः केवलमनुवादमात्रेण शब्दान्तराणां यथायथमर्थाभिधानसिद्धये व्यज्यन्ते प्रतिपत्तृषु प्रयोक्तृभिर्निर्धारितविशेषा इत्यभिप्रायः ।। 17 ।।

एवं तावदभिहितान्वयवादी निरस्तः । इदानीमन्विताभिधानसमाश्रयणेन पदमाद्यं पृथक् सर्वपदं साकाङ्क्षमित्युद्दिष्टे वाक्यलक्षणे प्रदर्शयितुकाम आह---विशेषशब्दा इति । इह देवदत्त गामभ्याजेत्यत्र देवदत्तपदं गां बधानेत्यस्माद् विशिष्टमेव वक्त्रा समुदीरितं भ्रमात्तु सकलसाधारणं प्रतिभाति । उत्तरकालं गावादिपदसम्बन्धाद् विशृष्टा प्रतिपत्तिरभिव्यज्यत इति तदेव वाक्यम् । सकलविशेषणखचितश्च प्रथमतरमेवोपक्रान्तः संसृष्ट एवार्थो वाक्यार्थ इति । यथा वक्ष्यति---

पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु ।। इति ।। 17 । (वाo पo 2/411)

निर्भागैकशब्दाभिधेयं त्वेकं वाक्यार्थं प्रतिपन्नाः स्वमतमुपपादयन्तो निदर्शयन्ति---

तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते ।
व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु ।। 18 ।।

तेषामेवमुपगृहीतसर्वविशेष एकस्मिन्नर्थे बहुशब्दानभ्युपगच्छतामविकल्पः कृत्स्नो वाक्यार्थः प्रतिपदं प्रतिवर्णं वा समाप्यते । तदेतत् पक्षान्तरैः सह दर्शनं विचारयिष्यते । एवं व्यक्तेषु ह्युपव्यञ्जनेष्वर्थः प्रतिपत्तृषु प्रसिद्धिं लभते । न तु सन्निधानमात्राद् अनभिव्यक्तोपव्यञ्जन इति ।। 18 ।।

एतदेव स्फुटीकर्तुमाह---एषां त्विति । उपक्रम एव विवक्षितार्थप्रत्यायनाय विशिष्टपदोदीरणमारभत इत्याद्य एव पदे प्रत्येकं वा सकलस्य वाक्यार्थस्य समाप्तिरवगन्तव्या । यद्येकस्मादेव पदात् सकलवाक्यार्थप्रतीतिस्तर्होतरपदवैयर्थ्यमित्याशङ्क्याह---व्यक्तेति । प्रतिपत्तृषु वाक्यार्थस्य सिद्धिरवगतिर्व्यक्तोपव्यञ्जना । व्यक्ता उदीरिता उपव्यञ्जना अभिव्यञ्जकाः पदविशेषा यस्याः सा तथोक्ता । अभिव्यक्ताभिव्यञ्जका वाक्यार्थावगतिरिति पदान्तराणां वाक्ये नास्त्येव वैयर्थ्यमित्यन्विताभिधानप्रदर्शनम । दूषणमस्याग्रे तत्र तत्राभिधास्यति । यथा --- नियमार्था श्रतिर्भवेदित्यादि। तथाहि--- यद्येकेन पदेन सकलवाक्यार्थस्याशेषविशेषणखचितस्यावगतिस्तदोत्तरेषां पदानां नियमायानुवादाय वोच्चारणं स्यात् । न चैतद्युक्तमिति वक्ष्यामः ।

एकस्मादेव पदात् समस्तविशेषणखचितस्य वाक्यार्थस्य प्रतीतिरुचरेषामानर्थक्यं स्यादेव । न च तस्मादेव वाक्यार्थप्रतीतिर्दृश्यते ।
व्यक्तोपव्यञ्जनेत्यसमाधानमेव । यतः किमेकस्माद् वाक्यार्थावसायोऽन्येषामुपव्यञ्जकत्वम । अथ समस्तेभ्य एव तेभ्यः । सर्वथोत्तराणि पदानि
वाक्यार्थप्रतीतय उपादीयन्त एवेत्यन्विताभिधानमसमञ्जसमेव । एकस्य वा परदोच्चारणकाले तिरोधानादभिहितान्वयस्याप्यसम्भव इत्यर्थभागे दूषणम् ।
शब्दभागसमाश्रयणेन द्वयोरपि पक्षयोर्दूषणं पदानि वाक्ये तान्येवेत्यादिश्लोकद्वयेनाभिधास्यति ।। 18 ।।
अव्यक्तः क्रमवात्शब्दः उपांश्वयमधीयते ।
अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते ।। 19 ।।

उपाधिमतो ह्येकस्य शब्दस्य विभागा इवावस्थिताः संहितासंहितयोर्द्रुतमध्यमविलम्बितासु वृत्तिषु शनैरुच्चैरुपांशु परमोपांशु संहृतक्रमं चेति । तत्र
प्राणवृत्त्यनुग्रहे सत्येव यत्र शब्दरूपं परैरसंवेद्यं भवति तदुपांशु । अन्तरेण तु प्राणवृत्त्यनुग्रहं यत्र केवलमेव बुद्धौ समाविष्टरूपो बृद्ध्युपादान एव शब्दात्मा
तत् परमोपांशु ।
यत्र तु प्रतिसंहृतक्रमशक्तियोगया बुद्ध्या निमित्तान्तरोपसंप्राप्तमव्यक्ते शब्देऽध्यारोपितं हि शब्दानां क्रमरूपमिव साक्षात्क्रियते तत् प्रतिसंहृतक्रमम्। शब्दानां
क्रमरूपोपसंहारविषयायां बुद्धावसम्प्रख्याततत्त्वमिव प्रतिपद्यमानायामारभ्यते शब्दातीतो व्यवहारः ।
संसृष्टशक्तयश्च क्रमसंहारेण समाविष्टवाचां प्रयोक्तृणां शब्दौ प्रयत्नेन प्राणे करणेषु च क्रमवृत्तितामनुभूय प्रतिपतृष्वपि क्रमप्रत्यस्तमयेनैव समावेशं
प्रतिपद्यन्ते ।
तत्रोपलब्ध्युपायानुपाती क्रमवृत्तिलक्षितो भेदो व्यावहारिकमपि शब्दतत्त्वं नानुपतति । क्रमसंहारानाश्रयणे हि व्यवहार एव विच्छिद्यते ।
तस्माच्च नभोगादिवत् प्राप्तदेशविभागैवैका यत्र बुद्धिः स एवाद्यन्तयोरेको वाक्याख्यः शब्द इति ।। 19 ।।
सम्प्रति प्रतिभाभेदव्याचिख्यासयाऽखण्डपक्षमेवानुबध्नन्नाह--अव्यक्त इति । इह निरंश एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूप आन्तरः शब्दार्थमयो
वा बुद्ध्यनुसंहारो वाक्यमिति स एव वाचक उपपन्नः । यस्तु भेदप्रतिभासः सोऽसावुपाधिकृत एवेत्यर्थः । तथोपांशु परमोपांशु व्यक्तो व्यक्ततरश्च विलम्बितो
विलम्बिततरश्च द्रुतो द्रुततरश्चेत्यादिकाः प्रतिभासा अभिव्यञ्जकध्वनिकृता न पुनः सत्या इति बोद्धव्यम्। तस्माद्यः शब्दो व्यक्त उपांशु कृत्वाधीयते
सोऽभिव्यञ्जकध्वनिकृतात् क्रमात् क्रमवान्नानाविधावस्थायुक्तः प्रतीयते ।
परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः उपाधिवशात्तु तत्र बुद्धिर्विततेवानुगम्यत इति बोद्धव्यम् । अनेनैकोऽनवयवः शब्द इत्युद्दिष्टस्य व्यक्तिस्फोटस्य
स्वरूपमुक्तमिति बोद्धव्यम् ।। 19 ।।
एतस्मिंश्चैकत्वपक्षे निरवयवा शब्दव्यक्तिरेवैका स्यात् । या वा शब्दव्यक्तिः शब्दाकृतिरेव वाक्यमिति प्रतीयेत । तत्र निरवयवस्यैकस्यार्थस्य कुतो
भेदसादृश्ये? भेदसिद्धिविशेषो ह्यात्मान्तरं सादृश्यं च । नह्यात्माभेदः सादृश्यं वा । अपि तु विनापि सामान्यविशेषाभ्यां सामान्यविशेषान्तरवत् प्रसिद्धिः ।
तद्यथाऽप्रसिद्धरूपस्यापि निरवयवस्योत्क्षेपणत्वादेः । (तत्राह)--
यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ।। 20 ।।
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तच्चस्य सरूपेव प्रतीयते ।। 21 ।।

आक्षेपविशेषाद्धि स्वजातिप्रयुक्ते भिन्नात्मनि प्रतिभेदं विनिविष्टस्वजातिविशेषे भ्रमणादौ कर्मणि कम्पनरेचनोत्क्षेपणादिभ्यो यो भेदः स न गृह्यते । आवृत्तौ तु
दिग्विशेषावधिसंयोगविभागोपाधिकायामुपलब्धायामनुपलब्धपूर्वाऽव्यक्तोपलब्धा वा भ्रमणरेचनाख्या जातिरुपलब्धृणां स्वनिमित्तप्रत्ययहेतुः सम्पद्यते । तथैव
यावत् सदृशानि जात्युपव्यञ्जनानि तावदत्यन्तभिन्नीऽप्यर्थः सर्व एव सारूप्येण गृह्यते ।
अपरः कल्पः । शब्दजातेरेव वाक्यत्वे भ्रमणत्वादयो दृष्टान्तत्वेनोपन्यस्ताः। वर्णत्वपदत्ववाक्यत्वानि हि
तुल्यातुल्योपव्यञ्जनानि, यावत्तुल्योपव्यञ्जनसन्निपातस्तावद् बुद्धिभेदं कुर्वन्ति । कथम् ? अपचितध्वनिव्यङ्ग्यस्तावदेको वर्णस्तस्याभिव्यक्तिनिमित्तैः
सदृशैरन्यैश्च श्रुतिभिन्नैरेकं निरवयवं च पदं व्यज्यते । तथेव तुल्यातुल्यैः पचिततमैर्वाक्यमिति ।। 20 - 21 ।
अथ जातिः सङ्घातवर्तिनीत्युद्दिष्टस्य जातिस्फोटस्यापि दृष्टान्तप्रदर्शनद्वारेण स्फुजीकरणायाह--यथाक्षेपेति ।
इह भ्रमणलक्षणा कर्मजातिर्यथा विशिष्टप्रयत्नजतितेनाक्षेपविशेषेणाभिव्यक्ता, प्रत्येकपरिसमाप्तत्वात् । न च पार्श्वस्थेन सा विज्ञायते । भ्रमणानामावृत्तौ तु
भ्रणमं भ्रमणं प्रति प्रतिपत्त्रा सा गृह्यते । एवं वर्णपदवाक्येषु श्रुतिरभिव्यञ्जको ध्वनिरत्यन्तभेदे तत्त्वस्य वर्णपदवाक्यस्फोटलक्षणस्य साभिव्यञ्जका सरूपेव
प्रतीयते परमार्थतो भिन्नाऽपि सती कीदृशी ? तुल्योपव्यञ्जनेति । तुल्यः सदृश उपव्यञ्जनःस्थानकरणाभिघातलक्षणो यस्याः सा तथेति । तेन
भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तोऽयं जातिस्फोटो विलक्षण एवेति बोद्धव्यम । युक्तं चैतत् ।। 20 - 21 ।।
व्यक्येकत्वपक्षे तु वाक्यस्यैकस्य पौर्वापर्यव्यवस्थां प्रत्युच्यते---
नित्येषु तु कुतः पूर्वं परं वा परमार्थतः ।
एकस्यैव तु सा शक्तिर्यदेवमवभासते ।। 22 ।।

कालाख्या हि कर्तृ शक्तिः कार्येष्वेव प्रतिबन्धाभ्यनुज्ञाभ्यां पौर्वापर्यं प्रकल्पयति । न ह्यणूनामविशिष्टे सतां योगे पौर्वापर्यमस्तीति ।

ननु च नित्यत्वग्रहणे न तस्य पौर्वापर्यं स्यात् । एकस्मिंस्तु वाक्याख्ये निरवयवे एकग्रहणविषये वर्णपदविषयं पौर्वापर्यं न संभवतीति । अत हदमुच्यते--
`एकस्यैव तु सा शक्तिः' इति । यदेवमिति । क्रमप्रत्यवभासत्वमेकत्वानतिक्रमेणाक्रमे बुद्धिलक्षणे क्षणिकवादिनः सर्वस्य विरुद्धरूपमिवाविरुद्धं भवति ।
त्रय्यन्तविदां तु--विश्वात्मन्येकत्वानतिक्रमेण क्रमप्रत्यवभासत्वं भवति । तथा शब्देऽपि स्यादिति नास्ति विरोधः । स्वशक्तियोगाद्धि
प्रत्यवभासमात्रभेदान्नात्रोपायापायौ क्वचिदपि पक्षे विद्येते ।। 22 ।।
यथा निरंशस्यास्य स्फोटस्य पूर्वापरभाव उपाधिकृतो न स्वतो नित्यत्वादिति वैतत्येन नित्यत्वसमर्थनार्थमाह--नित्येष्विति ।
नित्येषु हि परमार्थतः पूर्वापरभावोऽसंभव्युपाधिकृतो दृश्यत एव । ननु सदैकरूपतया किं नावभासते ? नहि तत्र स्वभावभेदस्य सम्भव इत्याशङ्क्योक्तम्--
एकस्येत्यादि । एकस्वभावोऽपि तथाविधशक्तियुक्त एव वस्तुस्वाभाव्यात् । यदेवं वैतत्येन पूर्वापरभावस्वरूपतया उपाधिभेदानुवर्तनेनावभासत इति ।
।। 22 ।।
कथं पुनर्वाक्यपदह्णस्वदीर्घप्लुतव्यञ्जनादिषु नित्येष्वविशिष्टेषु कालभेद उपपद्यते---
चिरं क्षिप्रमिति ज्ञाने कालभेदादृते यथा
भिन्नकाले प्रकाशेते स धर्मो ह्लस्वदीर्घयोः ।। 23 ।।

तद्यथा चिरमिति ज्ञानस्य यदात्मकत्वं क्षिप्रमित्येतस्मिंश्च ज्ञानेऽपि । न च तयोरात्मनोः कश्चिदपि स्थितिकालभेदोऽस्ति । लब्धात्मकं हि
सर्वज्ञानमविशिष्टकालं ज्ञानान्तरेण ।
अथ च चिरमित्येकं ज्ञानं ज्ञानान्तरेणातिक्रान्तप्रत्यवर्शरूपेण तद्भावना विशेषावधानाच्च भाविनापि प्रत्यवर्शरूपेण प्रकृष्टतामिव कालाध्वनः प्रदर्शयति ।
क्षिप्रमित्येतस्मिंस्तु लघुप्रवृत्तिरूपेण प्रत्यपकृष्यत इव कालाध्वा ।। 23 ।
पुनरप्युपाधिभेदेनैव शब्दस्य भेदप्रतिभासो न स्वतः, नित्यत्वादिति दृष्टान्तप्रदर्शनपूर्वकमाह--चिरमिति ।
चिरमिति ज्ञानं क्षिप्रमिति च यथा ज्ञानत्वाविशेषादेककालमपि ज्ञेयसमाश्रयणेन भिन्नकालमिव प्रथते । चिरज्ञानं विततप्रतिभासमिवाभाति ।
क्षिप्रज्ञानमेतद्विपरीतम् । तद्वद् ह्रस्वदीर्घयोर्धर्मः स्वभावोऽवगन्तव्यः । न तु ह्रस्वादिरूपता काचित् स्फोट इति नास्ति स्फोटस्य स्वतो भेदः ।। 23 ।
कथं दीर्घप्लुतादिषु कालाध्वपरिमाणभेददर्शनमविरुद्धम् ?
न नित्यः परमात्राभिः कालो भेदमिहार्हति ।
व्यावर्त्तिनीनां मात्राग्णमभावे कीदृशः क्रमः ।। 24 ।।

नित्यपक्षेऽनित्यपक्षे वा कालस्य मात्राणां वा आश्रीयमाणे न कालात्मनः सत्यतः कौचित् प्रकर्षापकर्षौ विद्येते । यदि नित्यः
कालः, नास्यादित्यगतिभिर्बह्वीभिरात्मपरिमाणमुत्कृष्यते, नाप्यल्पाभिरपकृष्यते । क्रोशयोजनादिपरिमाणमिव भिद्यमानाभिर्गन्तृक्रियाभिः । कालस्यैव
चोपाधिविशिष्टस्य परिमाणत्वात् कुतोऽस्यापरं परिमाणमित्येतत्कालसमुद्देशे व्याख्यास्यते ।
अथ गतिरपि नित्या सर्वमेवाव्यतिपाति च प्रतिज्ञायते । अथैता व्यावर्तिन्य एव विश्वस्य मात्राः, तत्र न पूर्वमपरेणानुसन्धीयते, सर्वं समीहितमसंसृष्टमेव
व्यतिपतति, निरुपाख्ययोश्च पूर्वापरयोः कोट्योर्मध्यमनवबद्धं पश्चात् पुरस्ताच्चानालम्बनमनुपाख्यं
पूर्वभागापरभागप्रत्यवमर्शिनेवाहङ्कारेणानुस्यूतमपकर्षपर्यन्तगतमभेद्यमप्यसतः पररूपस्योपग्रहेण चात्यन्तमनुपग्राहि परिमाणाभेदेऽपि मिथ्यासादविदुषो दीर्घमिव प्रकाशते ।
तदेतस्मिन् पक्षे एकधर्माविबद्धेष्वेकधर्मप्रतिष्ठितेष्वभिन्नकालेषु सर्वव्यवहारेषु कीदृशः सतामत्यन्तासतां च मात्राभेदानां क्रमः ?
नहि शशविषाणस्योष्ट्रविषाणेन हिमवता वा कश्चिदपि क्रमो विद्यते ।
यद्यप्येकस्यार्थस्य संमुखीभावे सद्भिः समानकालैर्भिन्नकालैश्च व्यापारैः सह क्रमो न संभवति, तथाप्येतस्मिन् दर्शने नान्यथा क्रमः संभवतीत्येवम्भूतव
क्रमव्यवस्था, सत्यमेवम्भूता क्रमव्यवस्था, न तु कस्यचिन्मूर्तिपरिमाणभेदातिक्रमेण परिकल्पितपरिमाणभेदो विद्यते । सहोत्पादा हि सर्वे भावाः
कालान्तरावस्थापरिकल्पिते कालाध्वनि मन्वन्तराख्ये क्षणाख्ये वा नात्मतत्त्वमतिक्रमान्तोऽनैकान्तिकेनागन्तुनाप्यनागन्तुकेन भेदेन संस्पृश्यन्ते ।
नहि तेभ्यो व्यतिरिक्तः क्षणाख्यः कालाध्वा मन्वन्तराख्यो वा कश्चिदन्यो विद्यते, यस्मिन्नधिकरणभूते प्राप्तविशेषभावाः कालान्तरावस्थायिनो नित्याः क्षणिका
इति वा प्रतिज्ञाभेदविषयतामापद्येरन् ।। 24 ।
अथोच्यते--न नित्यमुपाधिवशाद्भिन्नं वक्तुं युक्तम्, स्वभावभेदप्रसङ्गादित्याशङ्क्याह--न नित्य इति । इह कालोऽपि नित्य एवाभ्युवगतो
नित्यमेकमित्यादिलक्षणकथनात् । तस्येदानीं क्षणलवनिमेषेत्यादिव्यवहारः कथमुपपद्यते ? अथ परमात्राभिस्तस्य भेद उपचर्यते । यथा परमाणोः
स्वावरुद्धनभोदेशत्यागोपलक्षितः कालः क्षणः, क्षणद्वयं च लव इत्यादि । तथा निरंशे वाक्य औपाधिकभेदपरिकल्पनायां कः प्रद्वेषः ?
अथ ब्रूषे न वयं नित्यमेकमित्यादिलक्षणलक्षितं कालं व्यतिरिक्तं जानीमः, पूर्वापरीभूताः पदार्थमात्रा एव स्वभावभिन्नाः कालः, तत्समाश्रयणेन चायं
क्रमयौगपद्यव्यवहारः, न पुनस्तद्व्यतिरिक्तनित्यस्वभावकालकृत इति । तत्राप्याहव्यावर्तिनीनामिति। ताः पूर्वापरीभूताः पदार्थमात्रा उदयव्ययायोगिन्य एवेति
विशरारूणां तासां कीदृशः क्रमः, कथं च तत्समाश्रयणेन कालव्यवहार इति यत्किञ्चिदेतत् ।। 24 ।
एवं तर्हि क्रमवतीभ्यो मात्राभ्य उत्पन्ना बुद्धिः प्रचितमात्रा वाऽप्रचितमात्रा वा परिमाणभेदव्यवहाराय कल्पिष्यते, सर्वथा साध्वनुपात्तमात्रारूपैव---

ताभ्यो या जायते बुद्धिरेका सा भागवर्तिनी ।
सा हि स्वशक्त्या भिन्नेव क्रमप्रत्यवमर्शिनी ।। 25 ।

एकत्वाद्धि बुद्धावात्मभूतानि संसर्गिणीनां विरोधिनीनां वा मात्राणां भिन्नानि तत्त्वानि न संभवन्ति । सा त्वेका भागवर्जिता बुद्धिः प्रकाशस्वरूपत्वान्मात्राणां क्रमसंकीर्णपौर्वापर्य्याणां तद्रूपापरित्यागेनासंहार्यमपि संहृत्यैव प्रत्यवमृशति । एवम्भूत एव बुद्धिप्रत्यवमर्शः ।। 25 ।
अथ तथाविधपदार्थसमाश्रयणेन बुद्धिरुपजायमाना कालव्यवहारं निर्वर्तयिष्यतीत्याशङ्क्याह---ताभ्य इति ।
ताभ्यः पदार्थमात्राभ्यो या जायते बुद्धिः साऽपि न शक्नोति कालव्यवहारं निर्वर्तयितुम् । यत एकासौ बुद्धिर्निर्विभागेति कथं पूर्वापरव्यवहारं निर्वर्तयेत् । तत्राह--सा हीति । बुद्धिर्हि भिन्नेव स्वशक्त्या क्रमप्रत्यवमर्शिनी भविष्यति । यतः क्रमोल्लेखानुषङ्गेणैवासावनुभववासनावशादुपजायत इति कालव्यवहारनिर्वर्तनचतुरैव सा।। 25 ।
क्रमोल्लेखानुषङ्गेण तस्यां यद् बीजमाहितम् ।
तत्त्वनानात्वयोस्तस्य निरुक्तिर्नावतिष्ठते ।। 26 ।

इह यद् व्यवहितानां मात्राणामनुपाख्यानां पूर्वासु बुद्धिषूपयुक्तसामर्थ्यानां सामापशिनी (सामिस्पर्शिनी) न रूपोपग्रहोल्लेख्या.....बीजानामिव व्यपदेशातीतं तत्त्वम् ।
कुतः स्तत्र विरुद्धफलानां मात्रोपहितानामात्म शक्तिबीजानामेकस्यां बुद्धौ लौकिकमेकत्वं लौकिकं वा नानात्वं निर्वक्तुं न शक्यते ? कथं हि विरुद्धात्मकमनवयवमेकं वस्तु स्यादनेको वा विरुद्ध आत्मा कथमेकस्य प्रकल्पकः ।। 26 ।।
एतद् दूषयितुमाह--तस्यामिति । तस्यां बुद्धौ यदाहितं पदार्थमात्राभिरनुभववशाद् बीजं वासनारूपं संस्कारस्वभावं तत् किं व्यतिरिक्तं तस्या उताव्यतिरिक्तमिति द्वयी गतिः । व्यतिरेके तस्यास्तेन न किञ्चिदिति कथं तद्वशात् क्रमादिको व्यवहारः? अव्यतिरेके पुनरपि सैवैका निर्विभागेति पदार्थमात्रावत् कालव्यवहारं कथं निर्वाहयेदिति तत्त्वनानात्वाभ्यां निर्वचनं बुद्धेः कर्तुं न पार्यत इति यत्किञ्चिदेतत् ।। 26।
भावनासमये त्वेतत् क्रमसामर्थ्यमक्रमम् ।
व्यावृत्तभेदो येनार्थो भेदवानपलभ्यते ।। 27 ।

भेदभावनानुगतबुद्धीनामेकत्वेन व्यवहरतामनादिना मिथ्याभ्यासेन विहितसमवायानामेकस्यां बुद्धावव्यतिरिक्तास्वनपायोपायिनीषु सर्वमात्रासु क्रमाख्यायाः शक्तेः सामर्थ्यमविद्यमानं प्रकल्प्यते क्रमप्रसिद्धये । तद्व्यावृत्तभेदोऽपि सर्वा प्रा (सर्वो वाक्यरूपः) शब्दाख्योऽर्थो विरुद्धधर्मक्रमरूपोपग्रहेणासतामपि भेदेन प्रयुक्तइवोपलभ्यते ।
तथाहि--ऊर्ध्वमधस्तिर्यगित्येकत्वेऽपि दिशा यथायथं विनिविष्टभावनाविशेषाः सर्वप्राणिनः । गुरुत्वाहियुक्ता लोष्टादयोऽपि नात्मवत् प्राणिनां भावनासमयमनुवर्तन्ते । एकं तु वाक्यं प्रतिपद्यमानस्यासदपि नित्यत्वादत्यन्तनानात्वं व्यवहारेण ।। 27 ।
पुनश्चातकाण्डकललवदविभक्त एव युक्त इति प्रतिपादयितुमाह--भावनेति । ब्रह्मकाण्डे सर्वशङ्कानिवारणपूर्वकं स्फोटस्वरूपं निरूपितमेव । तस्मादेतद्वाक्यमक्रमं स्फोटस्वभावमेकं वाचकम् । स्वपदार्थभावनावसरे तूपाधिवशात् क्रमसामर्थ्यं क्रमे सामर्थ्यं शक्तिर्यस्य तत् क्रमसामर्थ्यमवगतम् । येनार्थो वाच्यस्वरूपो व्यावृत्तभेदोऽखण्ड एव पदार्थोपाधिवशाद्भेदवानिवोपलभ्यते, न परमार्थतः ।। 27 ।
पदानि वाक्ये तान्येव वर्णास्ते च पदे यदि ।
वर्णेषु वर्णभागानां भेदः स्यात् परमाणुवत् ।। 28 ।

यस्य पुनस्तानि पदान्येवोपलभ्यमानानि वस्तु सन्ति वाक्येऽभिमतानि, न तद्व्यतिरिक्तमेकमनंशमस्त्यखण्डस्वभावं वाक्यम्, तस्य पदान्यपि न वर्णव्यतिरेकेण विद्यन्ते । वर्णा अपि भागवन्त इति प्रकर्षप्राप्तो भेद एव सर्वत्र स्यादिति पदवादिनं दूषयितुमाह--पदानीति ।
यथावयवव्यतिरेकेणावयविन एकस्यानङ्गीकरणेऽवयवानामपि भागवत्त्वाद् भागपरिकल्पनाया अतिप्रसङ्गात् परमाणूनामवशेषः । तेषामपि केषाञ्चिन्मते षट्केन युगपद्योगात् संशतायामणीयसोऽप्यवयवस्यानुपपत्तिः । अतश्च व्यपदेश्यपदार्थविरहितं निरीहमेव जगदापतितम् ।। 28 ।
भागानामनुपश्लेषान्न वर्णौ न पदं भवेत् ।
तेषामव्यपदेश्यत्वात् किमन्यदपदिश्यताम् ।। 29 ।

यदि वाक्ये तान्येव पदानि यानि पृथगुपलब्धानि वर्णाश्च ये पृथगुपलब्धास्त एव समुदिता यदि पदेष्वाश्रीयन्ते, न च वर्णेभ्यो वाक्यपदयोरात्मा व्यतिरिक्त इति प्रतिज्ञायते । तथा सति वर्णेष्वपि यावदपकर्षपर्यन्तगतिस्तावद्वर्णभागानां परमाणुकल्पो भेदः प्रसज्यते । तथा च क्रमवतामलब्धयौगपद्यानां भागानामन्योन्यासंस्पर्शान्न वर्णो नाम कश्चिदेकः पदं वा विद्यते । अव्यपदेश्यत्वाद्धि तेषु प्रतिभागं व्यवहाराभावात् किं तदेकमस्ति शब्दरूपं यदिदं तदित्युपाख्यायेत । एवं तर्हि नानिर्देश्यभागभेदरूपेण बहिरनुपसंहारेण शब्दतत्त्वेन व्यवहारोऽस्तीति ।। 29 ।

तथैव वर्णभागानामनुपश्लेषान्न वर्ण एकः कश्चित् स्यात् । तदभावे पदमपि न भवेदिति प्रतिपादयितुमाह--भागानामिति ।
अतश्चोक्तरीत्या भागानामसत्त्वाद् व्यपदेशविरहात् किमत्र वाचकमेतद्व्यतिरिक्तमन्यदपदिश्यताम् । अखण्डस्यानङ्गीकरणात् पदानामुक्तेन न्यायेनानुपपत्तेरिति न कश्चिद् वाचकः स्यात् । अस्ति च वाक्यार्थस्य प्रतीतिः । सा सनिमित्ता भवितुमर्हतीत्येक एव नित्यः पदाभिव्यङ्गयोऽखण्डो व्यक्तिस्फोटो जातिस्फोटो वा वाचकोऽङ्गीकार्य इति सिद्धान्तः ।। 29 ।
यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ।। 30 ।

बाह्यास्याक्षरचिह्नादिवच्छब्दव्यपदेशमात्रायुक्तस्य यदुदयस्तमयनिबन्धनं वाचस्तत्त्वमक्षरचिह्नादिवदेवातथाभूतैः क्रमवद्भिर्भागैरक्रमं प्रकाश्यते, तदेव मुख्यं शब्दस्यात्मरूपमित्यपरे मन्यन्ते ।
स चेष बुद्ध्यनुसंहारलक्षण आन्तरः शब्दात्मा तत्र समाम्नातः । तस्य चेत्थम्भावे विच्छिन्नपदरूपप्रविभागदर्शन एक एवायं वाक्याख्यः शब्दो यथैव वर्णपदाख्य इति प्रसिद्ध एष समाम्नाये मार्गः ।। 30 ।
एवं तावद् बहीरूपं व्यक्तिस्फोटं जातिस्फोटं वा वाचकमाश्रित्य वाक्यं व्याख्यातम् । इदानीमन्तरेवानवयवं बोधस्वभावं शब्दार्थमयं निर्विभागं शब्दतत्त्वमिति यद् गीतं तदेव नादैर्बहिः प्रकाशितं वाक्यमाहुराचार्या इत्यान्तरं बुद्ध्यनुसंहृतिरित्युद्दिष्टं व्याख्यातुमाह--यदन्तरिति ।
वाक्यविचारे प्रस्तुते तस्यान्तरस्यैकता निरंशतैव प्रतिपाद्यत इति तदेव सत्यत्वाद्वाक्यमस्तु किं तद्व्यतिरिक्तेनासत्येन वाक्येनेत्यर्थः ।। 30 ।
अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाश्यते ।
एकस्यैवात्मनो भेदौ शब्दार्थावपृथकस्थितौ ।। 31 ।

यथैवाव्यपदेश्यशब्दभागोपायमन्तर्निवेशि वाक्तत्त्वमभिन्नं मुख्यः शब्दात्मेति प्रसिद्धं तथा व्यतिपातिनीषु व्यावहारिकीषु बाह्यास्वर्थमात्रास्वव्यपदेश्योपचीयमानविशेषं क्रमेण प्रत्यर्थनियतमुत्पद्यमानं बुद्धितत्त्वं बाह्यवस्तुतत्त्वेनैव प्रत्युपभुज्यते ।
नित्यपक्षे वा क्रमशक्तिरूपनिर्भासमात्रया निवर्तते । नहि प्रतिलब्धार्थरूपविपर्यासां बुद्धिमन्तरेण बाह्यं वस्तु व्यावहारिकीष्वर्थक्रियासु समर्थं भवति । तस्मादन्तर्निविष्टरूपेणार्थेन सर्वो व्यवहारः क्रियते ।
अन्ये तु संक्रान्तविषयरूपाया बुद्धेरात्मनि समवायाद् बुद्धिरूपनिवेशेन तद्रूपतामिवापन्ने बोधात्मके पुरुषे पुरुषार्थस्य प्रसिद्धिं मन्यन्ते ।
प्रकाशस्वभावया बुद्ध्या चितिस्वरूपस्यार्थरूपस्य च प्रतिबिम्बकयोगेनोपग्रहे सम्भवति प्राप्तविषयरूपविपर्यासायामुपगृहीतपुरुषरूपायां बुद्धौ भोग्यभोक्तृशक्त्योरत्यन्तविभक्तयोरत्यन्तसंकीर्णयोरविभागप्राप्ताविव सत्यां विभागः प्रकल्पते ।
अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति ।
तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्ते (बुद्धेः) रनुकारमात्रया बुद्धिवृत्त्या विशिष्टज्ञानस्य प्रवृत्तिराख्यायते ।
सर्वेषु च पक्षष्वन्तर्निवेशिन इव (एव) प्राप्तानुसंहारात् शब्दादन्तर्निविष्टरूपेष्विव (ष्वेव) प्रतिसंहृतेष्वविभक्तेषु विभागरूपानतिक्रमेणार्थेषु गृह्यमाणेष्वेक एवायं परिसमाप्तिप्राप्तानुसंहारो बुद्ध्यात्मा प्रतिपादकप्रतिपत्तव्यशक्त्योरविभागेन पृथगात्मनोर्भेदशक्तिरूपापरित्यागमात्रया व्यवतिष्ठते । नित्यवादिनां त्वानागन्तुकमनतिक्रान्तमनुपचयापचयम् ।। 31 ।
न केवलं वाक्यं तथा यावद्वाक्यार्थोऽप्यखण्डः प्रतिभात्मकः पदार्थभागैरभिव्यज्यत इति प्रसङ्गादाह--अर्थभागैरिति ।
तेषामान्तरवाक्यवादिनामाचार्याणां मते आन्तर एवात्रापि वाक्यार्थ इति बोद्धव्यम् । तौ च शब्दार्थावभिन्नावेकस्यान्तरस्य तत्त्वस्य सम्बन्धिनौ वस्तुतो बहिः स्थितौ भेदाविव प्रतिभासेते इति बोध्यमित्याह--एकस्यैवेति ।। 31 ।
प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ।। 32 ।

अयमन्तर्मात्राशब्दोऽनपायिन्यपायिनीभ्यां द्वाभ्यां शब्दशक्तिभ्यामनुगतः । तस्यैतस्मिन्नात्मन्यविभक्तमपि प्रकाशकत्वेन प्रकाश्यत्वं विभक्तमिव प्रत्यवभासते।अन्योन्यानुविधायिरूपतया च कार्यकारणरूपता, तस्यादेशस्यान्तर्मात्रेत्येवमाख्यायमानस्य शब्दात्मनः सर्वदा ।
सर्वदेति नास्यान्यः कालाध्वा विद्यते । भावाभावविभागाभावप्रतिपत्त्यर्थं तु व्यवहारप्रदर्शनाय सर्वदेत्युच्यते ।
भावाभावविभागाभावादन्तर्मात्रानिवेशिशब्दार्थकत्वम् ।
सर्वदैवानपायिनिर्भासोप(ग) मोऽपि चास्याव्यतिरेकानतिक्रमेण तथैव व्यवस्थितः, सर्वव्यतिरेकानतिक्रमात् (व्यतिरेकातिक्रमात) तत्र किं कृतं कदाचित् संप्रत्ययहेतुत्वम् ।
सर्वादा कदाचिदित्येतदव्यतिरिक्तस्याधाराधेयभावविकल्पना, अवस्थितेरर्थस्य मिथ्याभ्यासभावनानुगमात् परिकल्पितभेदमात्मतत्त्वमेव तत्राविशेषो विशेष इव व्यामोहं जनयति ।। 32 ।
ननु शब्दार्थौ वाच्यवाचकाविति प्रसिद्धम् । अतः कथं तयोरभेद इत्याशङ्क्याह--प्रकाशकेति । तस्य हि शब्दतत्त्वस्यान्तरस्य ज्योतीरूपस्य शक्तिभेदादयं भेदप्रतिभासो न विरुद्धः । एतच्चादावेनोक्तमागमकाण्डे `एकस्य सर्वबीजस्य' इत्यादिना।।32।
तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।

अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने ।। 33 ।

एकस्यात्मनो ह्यन्तर्मात्रानिवेशिनः शब्दार्थतत्त्वस्यात्मभूते नित्ये अनागमागपमे एकत्वमनतिक्रान्ते द्वे सामर्थ्ये भावाभावाख्ये एकबुद्धिगतमिव क्रमरूपमक्रमे संवेद्येते यथैव (तथैव) भावाभावावित्येका प्रख्या । अत्र ग्रन्थपातः

इदमपि तस्य शक्तिभेदादवभासत इति प्रसङ्गादाह--तस्यैवेति

तस्य तदेवैकं निर्विभागं परं तत्त्वमाश्रित्यायं सकललोकसंव्यवहारः शक्तिभेदात् प्रतीयते, किं पुनरयं वाच्यवाचकविभागमात्ररूप इत्यखण्डपक्ष एव युक्तः।।33।

संप्रत्ययप्रमाणत्वात् पदार्थास्तित्वकल्पने ।

पदार्थाभ्युच्चये त्यागादानर्थक्यं प्रसज्यते ।। 34 ।

इदानीं पदवादीमतमाशङ्क्य पुनरपि दूषयितुमाह---

यदि पदार्थसंप्रत्ययः प्रमाणं पदपदार्थसत्तायामुच्यते, तदा देवदत्त गामभ्याज शुक्लां दण्डेनेत्यस्मिन् वाक्ये पूर्वपूर्वपदार्थानामुत्तरोत्तरपदार्थाभ्युच्चये स्वार्थत्यागात् तत्तत्पदोपादानस्यानर्थक्यं प्रसज्यते । ततश्चानर्थकस्योच्चारणवैफल्यादुच्चारिताद्वा तस्माच्छब्दमात्रात् पदार्थप्रत्ययस्यानुपपत्तेः किं निबन्धना वाक्यार्थप्रतीतिः स्यादिति यत्किञ्चिदेतत् ।। 34 ।

राजशब्देन राजार्थो भिन्नरूपेण गम्यते ।

तथा च पदानामव्यवस्थितेः पदवादोऽनुपपन्न एव लक्ष्यते इत्यभिधातुमाह--

राजा राजानं राज्ञा राज्ञे राज्ञो राज्ञि राजनीत्येवमनियतस्वरूपेण राजपदेन राजार्थप्रतीतिर्दृश्यते । यदि पदस्य सत्यता स्यात् , तदा नियतं तत् परिदृश्येत । सर्वत्र न च दृश्यते, अतो मन्यामहे मिथ्यैव पदानीति ।

वृत्तावाख्यातसदृशं पदमन्यत्र युज्यते ।। 35 ।

इतोऽपि नास्ति पदमित्याह---

राजपुरुष इत्यस्यां वृत्तौ राजशब्द आक्यातसदृशः । ततश्च हे राजपुरुषेत्यत्र राज भ्राजस्व पुरुषेत्यर्थप्रतीतिः स्यात् । न चैतदिष्टम् । तस्मात् पारमार्थिकानि पदानि न सन्त्येव ।। 35 ।

यदि च न केवलो राजशब्दोऽन्यत्र दृष्टप्रयोगः , स राजपुरुषादिषु भिद्यते; किं कृता पुरुषे राजपुरुषो ब्राह्मणपुरुष इति विशिष्टार्थस्यावगतिः (अत आह)--- यथाश्वकर्ण इत्युक्ते विनैवाश्वेन गम्यते ।

कश्चिदेव विश्ष्टोऽर्थः सर्वेषु प्रत्ययस्तथा ।। 36 ।

तद्यथा--अजकर्णोऽश्वकर्ण इत्युक्ते नाश्वार्थस्य कर्णार्थस्य वा स्वल्पोऽपि समन्वयो विद्यते । भेदविषयेण त्वत्यन्तमतदर्थेन वाक्येनार्थप्रदर्शिका क्रियते, बहुव्रीहितत्पुरुषसंज्ञादिभिः समुदायान्तरेषु शब्दसंस्कारः ।

अश्वादीनां पदार्थनामत्यन्तासमन्वयेऽपि गम्यते व्यावृत्तानुवृत्तस्वलक्षणः कश्चिदेव नियतोऽर्थः । तथैव सर्वासु वृत्तिष्वर्थान्तरासमन्वये गंस्यत एव विशिष्टोऽर्थः ।। 36 ।

नकेवलं केवलानां नियतरूपासंभवस्तेषां यावद्वृत्तावपि स्थितानामित्याह---यथाश्वकर्ण इति ।

अश्वकर्ण इत्यत्राश्वपदार्थेन विनैव जात्यन्तरविशिष्टः कश्चिदर्थो गम्यते ।तस्मात् सर्वेष्वपि पदेषु परामृष्टविभागेषु वाक्याभिव्यञ्जकेषु सत्स्वखण्डवाक्यावगतिपूर्वको वाक्यार्थप्रत्यय इत्येव युक्तम् ।। 36 ।।

यदि तर्हि राजपुरुषादीनामश्वकर्णादिभिस्तुल्यः पूर्वपदोत्तरपदार्थ (र्था)- समन्वयः , तत्कुतो रूढ्यरूढिविभागः (अत आह) -- वाक्येष्वर्थान्तरगतेः सादृश्यं परिकल्प्यते ।

केषाञ्चिद् रूढिशब्दत्वं शास्त्र एवानुगम्यते ।। 37 ।

इह स्वभावसिद्धे वृत्तिवाक्ययोरत्यन्तमर्थस्याभेदे वृत्त्या वाक्येन प्रक्रम्यमाणेऽस्य यत्र प्रधानस्याविशिष्टः क्रियादिसम्बन्धस्तत्र वाक्यस्य विच्छेदवृत्तिमात्रकृतभेदमिव सादृश्यं कल्प्यते, सत्स्वप्युपसर्जनविशेषणादिषु भेदेषु । अतश्च सादृश्यकल्पनया तेऽरूढिशब्दा इत्यवगम्यते ।

येषां तु वाक्यप्रक्रमोऽन्य एवार्थः क्रियासम्बन्धी वृत्तिप्रक्रमोऽन्य एव, तेषां रूढिशब्दत्वम् । तेषु च `शिल्पिनि चाकृञः' (6-2-77), `संज्ञायामनाचितादीनाम्' (6-1-146), ङ्यापोः संज्ञाछन्दसोर्बहुलम्' (6-3-63), `बहुलं तणि'--इत्येवमादीनि कार्य्याणि शास्त्र एवोपव्याख्यायन्ते ।। 37 ।

नन्वेवं सति योऽयं रूढ्यरूढिविभागः शब्दानामुच्यते स वृथेत्याशङ्क्याह--वाक्य इति ।

वृत्तिवाक्ययोः सादृश्यपरिकल्पने केषाञ्चिच्छब्दानां वाक्ये विग्रहरूपेऽर्थान्तरप्रतीते रूढिशब्दत्वमुच्यते । यथा---तैलपायिकेति । अत्र तैलं पिबतीति वाक्यवेलायामर्थप्रादुर्भावः । वृत्यवस्थायां तैलपायिकेति जात्यन्तरयुक्तार्थस्य कस्यचित् प्रतीतिः । न च तस्य तैलपानक्रिया लक्ष्यत इति रूढिरूपतास्योच्यते । केषाञ्चित्तु वृत्तिवाक्ययोरर्थस्य सादृश्याद् यौगिकत्वम् । यथा -- राजपुरुष इति । परिकल्पन इत्यनेन सर्वमेतदवयवविभागादिकं शास्त्रसमय एव

कल्पनामात्रम् , परमार्थतस्तु व्यवहारकाले निर्विभागमेवोपलभ्यत इति प्रतिपाद्यते । एतदेव शास्त्र एवानुगम्यत इत्यनेन व्यक्तीकृतम् ।। 37 ।
उपादायापि ये हेयास्तानुपायान् प्रचक्षते ।
उपायानां च नियमो नावश्यमवतिष्ठते ।। 38 ।

इह शब्दसंस्कारे क्वचिदर्थस्यापि समधिगममात्रायां बुद्धौ पदानि वाक्यस्योपकारायोपादीयन्ते । चर्चादिपदानि संहितायाम्, वाक्यपदानि समासतद्धितसुब्धात्वेकशेषवृत्तिषु । तेषां च यदर्थमुपादानं तत्सन्निधाने नियत एषां त्यागः, उपायभावात् ।
शास्त्रे ह्यामन्त्रितस्य पदात् परस्य तिङ्ङतिङ इति निघातादयः शब्दसंस्काराः । तथा `एकादेश उदात्तेनोदात्तः' (8-2-5) , `स्वरितो वा अनुदात्ते पदादौ' (8-2-6), `उदात्तस्वरितयोर्यण' (8-2-4) इति । तथा तत्पुरुषे तुल्यार्थतृतीया (6-2-2), `सप्तमीहारिणौ' (6-2-6) इत्येवमादयोऽर्थप्रतिपत्तिमात्रा अपि दृश्यन्ते ।
यथा मे मात् तथा मे पिता, सुस्नातं भोः, नमो भरन्त एमसि, सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति ।
तः परो यस्मात् सोऽयं तपरः, तादपि परस्तपर इति (द्रo अष्टाo 1-1-70), वियातस्य भावो वैयात्यम् (द्रo 7-2-19) इति । त एते पुरुषसम्बोधनोपायाः ।
यदि त्वन्यथापि पुरुषाः प्रतिपादयितुं शक्यन्ते तदर्थान्युपायान्तराण्यपि प्रक्रम्यन्ते ।। 38 ।
कथमेतदुच्यत इत्याह--उपादायापीति । शास्त्रमुपायः शब्दपरिज्ञाने । ज्ञातेषु तेषु प्रयोजनसम्पत्तेरनुपयोग इति तस्य परित्यागः । उपायाश्च न नियता इत्याह--उपायानां चेति ।। 38 ।
अर्थं कथञ्चित् पुरुषः कश्चित् संप्रतिपद्यते ।
संसृष्टा वा विभक्ता वा भेदा वाक्यनिबन्धनाः ।। 39 ।

विचित्रा हि बहुधा प्रतिपत्तृणां प्रतिपत्तिः । श्रोत्रियंश्छन्दोऽधीत इति (5-2-64) वाक्यार्थे पदवचनम्, छन्दसो वा श्रोत्रभावः घꣳश्च प्रत्ययः, श्रोत्राभ्यां कृतं कर्मेति वा (द्रo भाष्यo 5-2-84) । तथा `इको वक्तव्यः' आखनिकः, `इकवको वक्तव्यः' (द्रo 3-3-125 वा o)आखनिकवकः । पात्रेसमितादिषु (2-1-48) वाऽऽखनिकवक इति पठ्यते ।
तथा---उष्ट्रगोयुगाश्वषड्गवादिषु प्रत्ययत्वेनान्यथान्यथा चान्वाख्यानं क्रियते । ते यदि विभक्ताः कदाचिदप्यनिबद्धा वाक्ये विद्यन्ते, संसृष्टा राजपुरुषः प्लक्षन्यग्रोधौ । विभक्ता राज्ञः पुरुषः, प्लक्षश्च न्यग्रोधश्चेति ।
अपर आह---संसृष्टाः देवदत्त गामभ्याज शुक्लामिति । विभक्ताः यत्र पदान्तरैः, सह पदस्याप्रयोगः । सर्वथा यान्यविच्छिन्नरूपग्रहणानि निदर्शनाय सामान्यरूपावस्थितानि पदान्युपादीयन्ते, तान्यप्यन्ततः सत्तायामुनिबद्धानि न कस्याञ्चिदप्यवस्थायां निदर्शनायालम् ।
तस्माद्यदि संसृष्टा यदि विभक्ताः, नानिबद्धा वाक्ये भेदा विद्यन्ते । भेदसंसर्गो त्वध्यारोपनियमानुवादैः पुरुषप्रतिपत्त्युपायावेवेति ।। 39 ।
कश्चिदाचार्यः पाणिनिविरचितेन लक्षणशास्त्रेण शब्दानधिगच्छति, कश्चिदन्येनेति न नियमः । एतदेव स्पष्टीकृतम्---अर्थं कथञ्चिदित्यादिना । तस्मात् संसृष्टस्य विभक्तस्य वार्थविशेषस्य वाक्यमेकमनंशमेव प्रतीतिनिबन्धनमिति पदपदार्थप्रविभागकल्पनमसमञ्जसमेवेति प्रतिपादयितुमाह---संसृष्टा वा इति ।। 39 ।
सोऽयमित्यभिसम्बन्धो बुद्ध्या प्रकम्यते यदा ।
वाक्यार्थस्य तदैकोऽपि वर्णः प्रत्यायकः क्वचित् ।। 40 ।

नावश्यं विच्छिन्नपदरूपविग्रह एव शब्दः पौर्वापर्ययुक्तमनुगतविभागमेवार्थं प्रत्याययति । यदा हि वाक्यार्थस्यैवेग्यणः स्थाने भवतीत्येवमादेर्बुद्धिविषयः सम्प्रसारणमिति वा, `भ भि' इति वा सोऽयमित्यभिसम्बन्धः क्रियते, अथो यथैवेग्यण इत्यनेन पौर्वापर्यानुपातिनी प्रतिपत्तिर्भवति, एवमपौर्वापर्यया `भ भि' इत्येकवर्णया तस्यार्थस्य संज्ञया प्रत्यस्तमितपौर्वापर्यः स एवार्थात्मा प्रतीयते । न चावश्यं शब्दव्यवहितैव तत्र प्रतिपत्तिर्भवति । कृताभ्यासानां हि शब्दान्तरेणार्थप्रतिपत्तिर्न व्यवधीयते ।
यदि च लघूपायं सामान्यविशेषयुक्तं शास्त्रं सदृशसंव्यवहारमलस इतीव मिथ्याभ्या (ध्या) सविपर्ययस्तद्दर्शिनो लोके नानुपतेत् तदा प्रतिपत्तारस्तमेवाक्रमं प्रतिपद्यरेन् । भेदरूपेण चै (नै) कत्वं संकीर्णम् । तेन सापराधैव प्रकर्षविनिवेशिन्याः प्रक्रान्तक्रमरूपोपप्लवाया वोचो वृत्तिः । सा हि सापराधेषु पुरुषेष्वन्यथैवात्मानं दर्शयति । अतश्च तामेके पश्यन्तोऽपि न पश्यन्ति, श्रृण्वन्तोऽपि न श्रृण्वन्ति । तां तु वैयाकरणा वाग्योगविदः शब्दात्मानमभिसंभूता भेददर्शनमतीत्य स्वेन स्वरूपतत्त्वेनोपलभन्ते ।
सा च तेभ्य एवात्मानं विवृणोति । उक्तमिदम्---`अर्थं कथञ्चित् पुरुषः कश्चित् संप्रतिपद्यते' इति । श्रतः पुरुषप्रतिपत्तिभेदानां परिमाणविकल्पानां निदर्शनमात्रं क्रियते ।। 40 ।
अतश्चनिरंशएवायं पदार्थशून्यो वाक्यार्थोऽध्यासमात्रसम्बन्धगर्भएकस्मादपि वर्णात् प्रतीयत एवत्यभिदातुमाह---सोऽयमिति ।
सोऽयमित्यभिसम्बन्धोऽध्यासरूपो वाक्यार्थस्य वाक्येन सह यदा वक्त्रा प्रकम्यते, तदैकोऽपि वर्णो वाक्यार्थस्य वाचको भवत्येव, किं

पुनरनेकमशोषविशेषाभिधानविवक्षयोदीरितं पदमिति । एवमध्यासवशाद् वाक्यवाक्यार्थयोरभिन्नस्वरूपत्वाद् वाक्यार्थाभिव्यक्तौ वाक्यमपि स्फोटात्मकर्माभव्यक्तमेवेक्युक्तम्---वाक्यार्थस्य तदैकोऽपीत्यादि ।। 40 ।।

केवलेन पदेनार्थो यावानेवाभिधीयते ।
वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकम् ।। 41 ।

इह यावन्तं केवलो वृक्षशब्दो जातिमात्रं भिन्नमर्थं ब्रवीति तावन्तमेव वृक्षोऽस्ति वृक्षो नास्ति वृक्षश्छिन्न इत्येवमादिष्वपि वाक्येषु प्राप्तयोगं (गः) प्रत्याययति । भावाभावच्छेदादियोगो (न) भिन्नजातियुक्तात्मकतां प्रदर्शयति । नापि जातियोग्यो भावाभावच्छेदादिसम्बन्धः । नहि माभान्तरनिबन्धनस्य मात्रान्तरप्रत्यायने सामर्थ्यमस्ति ।। 41 ।

इदानीमाभिहितान्वयपक्षसमाश्रयणेन संघातपक्षस्य प्रदर्शनायाह---केवलेनेति । केवलं पदं यस्यैवार्थस्य वाचकम् , वाक्यस्थमपि तमेवाभिदधाति ।

सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ।। 42 ।

यत्तु पदान्तरेण सम्बन्धे वीरः पुरुष इति विशेषणविशेष्यत्वात् सामानाधिकरण्यं जातिगुणविशेषयोरेकार्थसमवायप्रतिपत्तिपूर्वकमर्थेष्वाधिक्यं दृश्यते वाक्यार्थ एवासौ । नहि तस्यान्तः पदं शब्दसंस्कारे निमित्तत्वेन व्यापार आश्रीयते ।
यस्त्वेकपदविषयो व्यतिरेकः कर्मादिवद् बाह्यनिमित्तोपजनितो राज्ञः पुरुष इति सोऽन्तः पदं प्रातिपदिकान्येव विभक्तियोगविशेषयोगे नियमयति । स चायं वाक्यपदयोराधिक्ययोर्भेदो भाष्य एवोपव्याख्यातः ।
अतश्च तत्रभवानाह---`यथैकपदगतः प्रातिपदिकेऽन्तः पदं संस्कारहेतुरर्थो वचनं प्रति भवति तथैकपदगतः पदसंस्कारहेतुरेव विभक्तियोगं प्रत्यहेतुर्भवति । ग्रामो ग्रामो रमणीय इति । अनेकपदसंश्रयस्तु वाक्यार्थः प्रतिनिघातादिव्यवस्थार्थहेतुराख्यायत इति ।। 42 ।।
ततः समुदाये पदानां परस्परान्वये पदार्थवशाद्यदाधिक्यं संसर्गः स वाक्यार्थः । उक्तं च-`यदत्राधिक्यं वाक्यार्थः स' इति । अनेकपदसंश्रयमित्यनेन संघातो वाक्यमिति दर्शितम् ।। 41 - 42 ।

अथाप्यनेकपदसंश्रयत्वेऽप्यपरो दर्शनभेदः--
स त्वनेकपदस्थोपि प्रतिभेदं समाप्यते ।
जातिवत्समुदायेऽपि संख्यावत्कल्प्यते परैः ।। 43 ।

यद्यथा जातिवत् सत्तावाने (या अने) काधिकरणयोगेऽपि प्रत्यधिकरणमन्यूनकार्या (या), तथायमेकेषां वाक्यार्थ आवृ(कृ) तिन्यूनतासमतिक्रमेण प्रतिपदमेवाविकलः समाप्यते । अथापरः कल्पः---यथैकस्या विंशत्यादिकायाः संख्यायाः प्रत्यधिकरणं तन्निमित्तप्रत्ययहेतुत्वं तथा वाक्यार्थस्य प्रतिपदं प्रत्याय्यत्वेनावस्थानमिति ।। 43 ।
वाक्यार्थस्य चास्य जातिवत् प्रत्येकपरिसमाप्तिः, केषाञ्चिन्मते संख्यावत् समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह--स त्वनेकेति ।। 43 ।
सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ।। 44 ।
भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति संबन्धस्तां विशेषे निवेशयन् ।। 45 ।

अपरे तु मन्यन्ते--स्वार्थमात्रोपादायिनः सर्वभेदान् प्रति या योग्यता तदेवानुगुण्यमात्रं सामानाधिकरण्यमात्रम् । नहि तथान्यथा सर्वथा चेति सामान्यावस्थारूपं किञ्चिदस्ति । सर्व एते विशेषा एव । तस्यान्तु सामान्यावस्थायां भेदस्य कस्यचिदनिरूपणादानुगुण्याच्च या सर्वभेदोपग्रहयोग्यता परिप्लवमानकल्पनार्थस्य तां सम्बन्धो विषयान्तरादवच्छिद्य विशिष्टे विषये नियमयति । तस्मिंश्च योग्यतावच्छेदमात्रेऽर्थस्य क्रियमाणे नाध्यारोपनियमः, नानुपादानयोग्यता किञ्चिदर्थरूपं (प्रति) नाप्यर्थरूपादन्या ।। 44 - 45 ।
अथात्र संघातपक्ष एव प्रकारान्तरेणान्विताभिधानप्रदर्शनात् पदार्थ एव वाक्यार्थ इति प्रक्रमितुमाह---सर्वभेदेति । सर्वेषां भेदानामानुगुण्यं यस्मिन् तत्तथाविधं सामान्यं संसर्गलक्षणमाकाङ्क्षायोग्यतासन्निधानवशेन पदान्तरसंसर्गान्नियतस्वरूपं वाक्यार्थः ।। 44 ।
तत्र चाकाङ्क्षावसरे येयमस्फुटरूपता वाक्यार्थस्य तामितरपदार्थसन्निधिर्निवारयतीत्याह--भेदानिति । पूर्वत्र पदानां वाक्ये तावानेवार्थो यावानेव केवलानाम्, संसर्गस्तु संघातवाच्यः । इह तु तथाभूत एव सामान्यरूपः पदस्यार्थो यस्तत्तद्विशेषसन्निधौ तत्तद्विशेषविश्रान्त इति ।। 45 ।
यस्तर्हि योग्यतावच्छेदहेतुः सम्बन्धः, स च नार्थेभ्यो वाक्यस्याभिधेय इति प्राप्तं सोऽपि सर्वाभिधेयधर्मानतिक्रान्तः सम्बन्धः । यदि सर्वाभिधेयधर्मानतिक्रान्तः

कथं तर्हि सोऽस्तीत्यवसीयते--
कार्यानुमेयः संबन्धो रूपं तस्य न दृश्यते ।
असत्त्वभूतमत्यन्तमतस्तं प्रतिजानते ।। 46 ।

नहि तस्य सम्बन्धस्य स्वरूपमवधारयितुं शक्यम् । स एव योग्यतावच्छेदकार्यप्रसवानुमेय एव नित्यम्, प्राप्तसंविज्ञानपदविशेषनिबन्धनः साक्षात्सम्बन्धेऽसम्बन्धे वा सर्वप्रत्ययात्मसु (अ) विशिष्टस्वरूपः । अतश्चेदन्तदिति साक्षात्पर्यायशब्देन वा व्यपदेष्टुमशक्यत्वादत्यन्तासत्त्वभूतमनेकसम्बन्धिविषयं सम्बन्धमाचक्षते।।46।
संघातपक्षे संसर्गो वाक्यार्थ इत्युक्तम् । स च पूर्वत्र जातिवत् संख्यावद्वा पदार्थव्यतिरेकेण वाक्यार्थत्वेन कल्पितः । इदानी पदार्थव्यतिरेकेणासन्नैवैकान्तानुमेयो न समुदायवाच्यः, किं तर्हि सर्वभेदानुगुणसामान्यरूपो विशेषान्तरसन्निधानाद्विशेषविश्रान्तः पदार्थ एव वाक्यार्थ इति दर्शयितुमाह--कार्यानुमेय इति । कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयत इति कार्यानुमेयः । इदं तदिति तु रूपं तस्य न दृश्यते । अत एवासत्त्वभूतं पदार्थव्यतिरेकेण सत्त्वं नास्ति, यस्य तमेवं भूतमाचार्याः प्रतिजानते ।। 46 ।।
नियतं साधने साध्यं क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते ।। 47 ।

नियतसाधनः साध्योऽर्थः । नियतक्रियाणि च साधनान्यविभक्तरूपोपकाराण्यपि युतव्यवस्थानि प्रतिपदमभिधेयत्वेनावस्थितानि । नित्यनियतत्वाच्च नियमोऽप्यत्र विधेयः । संस्तु नियमः प्रयोगे सन्निधिमात्रेण पदान्तराणां पुरुषं प्रति प्रकाशते नानुगृह्यते ।। 47 ।
एतदेव व्यक्तीकर्तुमाह--नियतमिति ।
साध्यं साधनं च परस्परं नियतमेव । केवलमाकाङ्क्षावशादितरपदार्थसन्निधाने सति नियमः सन्नेव प्रकाशत इत्याक्षिप्तपदान्तराणि पदान्येव वाक्यम्, पदार्थस्च वाक्यार्थ इत्यव्यतिरिक्तः संघातपक्षोऽयम् ।। 47 ।
यदि तर्हि नियतसंसर्ग एव नित्याविभक्तोऽयमर्थ एवं सति किं कृता गुणप्रधानभावप्रत्यवस्था---
गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ।। 48 ।

इह साध्येनानुपकारकेणाङ्गिना मुख्येनार्थेन प्रयुक्तानि सर्वतः सिद्धानि परार्थान्युपकारं प्रति शेषभावेनौत्सुक्यवन्तीवाङ्गान्युपादीयन्ते । साध्यत्वेनैव तु निमित्तानि क्रियापदमपेक्षते ।
एतदुक्तं भवति---अर्थेषु सतीमसतीं वा शब्दवृत्त्यनुकारेण पुरुषो व्यपेक्षां समीहते । तां शब्द एव प्रकाशयति । सा हि नित्यनिविष्टरूपेव शब्दात्मनि।।48।।
अथात्र परस्परापेक्षायां समानायां विशेषमभिधातुमाह---गुणभावेनेति ।
नाम कारकपदं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षत इति ।। 48 ।
अपर आह---
सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः ।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम् ।। 49 ।

अर्थत्वमापद्यमानेषु यावन्तो विशेषाः सन्निहिता नियतप्रसिद्धिव्यवस्थास्ते शब्दान्तरविषयेण कालवृत्त्यनुग्रहेण प्रतिबन्धाभ्यनुज्ञाख्येन प्रतिपत्तृभिरनुगम्यन्ते, नापरं वाक्यं नाम किञ्चिच्छब्दरूपमभिधायकं विद्यते ।। 49 ।
कमो वाक्यमित्युद्दिष्टं क्रमपक्षं व्याख्यातुमाह--सन्त इति । पदार्थेषु देवदत्तादिपदवाच्येषु गोकर्मिकायामभ्याजक्रियायां देवदत्तपदार्थस्य कर्तृत्वं गोपदार्थस्य देवदत्तकर्तृकायां कर्मत्वमित्यादयो विशेषाः सन्त एव पदेभ्यः क्रमेण प्रतीतेभ्योऽवगम्यन्त इति क्रम एव वाक्यम् । न वाक्यमभिधायकमित्यनेन क्रमव्यतिरेकेण शब्दात्मकं न वाक्यमभिधायकमस्तीत्युच्यते ।। 49 ।
शब्दानां क्रममात्रे च नान्यः शब्दोऽस्ति वाचकः ।
क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ।। 50 ।

नहि पदेषु प्रतिबन्धाभ्यनुज्ञाभ्यां कालेनानुगृह्यमाणेष्वपरः शब्दः कश्चिदुपजायते येनार्थान्तरं प्रत्याय्येत । क्रमो हि शब्देषु कालशक्तिरूपविशेषस्य निवेश इव । स कालात्मनो न व्यतिरिच्यते । तेन वाक्यमित्यवस्तुकमेवेदमभिलापमात्रम्, पदमेवार्थवदिति ।। 50 ।
एतदेव स्फुटीकुर्वन्नाह--शब्दानामिति । अनपेक्षितविशिष्टानुपूर्वोकः क्रमः क्रमामात्रम् । तस्मिन् सत्यर्थप्रतीतेरन्नान्यस्तद्व्यतिरिक्तः कश्चित् स्फोटादिः शब्दो

वाचकोऽभ्युपगन्तुं युक्तः । अपि तु क्रम एवोपलभ्यमानो वाचकः । अथ क्रम इति किमुच्यत इत्याह--क्रमो हीति । क्रमवत् पदपदार्थोपाधिवशेनापि कालस्य स धर्म उच्यते ।। 50 ।

किमर्थं तर्हि क्रमवतां कालशक्तिरूपनिवेशानुग्रहाद्वर्णानामेवार्थवत्ता नाभ्युपगम्यत इत्याह--

ये च संभविनो भेदाः पदार्थेष्वविभाविताः ।
ते सन्निधाने व्यज्यन्ते न तु वर्णेष्वयं क्रमः ।। 51 ।।

यथा ह्यु च्चरिते पदे संभविनां भेदानां.....(अत्र ग्रन्थपातः).....

युक्तं चैतत्, यत्क्रम एव वाक्यमित्याह---ये चेति ।

पदार्थेषु ये भेदाः पूर्वोक्ताः सन्ति ते केवलेष्वविभाविताः सन्तः क्रमवत्पदार्थान्तरसंनिधानेऽभिव्यज्यन्त इति दर्शनात् क्रम एव वाक्यमिति पदक्रमो वाक्यमुक्तम् । वर्णक्रमस्तु न तथेत्युक्तम्, न तु वर्णेष्वयं क्रम इति ।। 51 ।।

वर्णानां च पदानां च क्रममात्रनिवेशिनी ।
पदाख्या वाक्यसंज्ञा च शब्दत्वं नेष्यते तयोः ।। 52 ।।

एतदेवोपसंहारेण स्फुट यितुमाह---

वर्णक्रमः पदमुच्यतां नाम । वाक्यसंज्ञा पदक्रम एव युक्ता, तथार्थप्रतीतिदर्शनात् । क्रम एव शब्दो न वर्णपदे इत्युक्तमुपसंहर्तुमाह शब्दत्वमिति । तयोर्वर्णपदयोः शब्दत्वं श्रोत्रेन्द्रियग्रह्यत्वेऽपि वाचकत्वलक्षणं नेष्यते, अपि तु क्रमस्यैव ।। 52 ।।

पदक्रमस्य शब्दत्वं वाक्यार्थेनार्थवत्तायाम् । वाक्यार्थभागैस्तु पदानामर्थवत्त्वम् । एवं वर्णक्रमस्यापि शब्दत्वं पदार्थेनार्थवतः, तदर्थवतां वर्णानां किं नाङ्गीक्रियत इत्याह--

समानेऽपि तु शब्दत्वे दृष्टः संप्रत्ययः पदात् ।
प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः ।। 53 ।

वर्णपदलक्षणस्योभयरूपस्यास्य शब्दत्वे समाने पदानां क्रमाद्वाक्यार्थस्यावगमो दृश्यते न वर्णादित्यतः पदान्येवार्थवन्ति । तत्क्रमश्चैव वाक्यम् । संसर्गो वाक्यार्थ इति ।। 53 ।

इदानीं संघातः क्रमस्तथैकोऽनवयवश्च शब्दः स्फोटात्मेति व्याख्यातानि त्रीणि वाक्यलक्षणानि श्लोकत्रयेणोपसंहरति । तत्र संघातपक्षमुपसंहर्तुतावदाह--

यथाऽस्यावयवा वर्णा विना वाच्येन केनचित् ।
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ।। 54 ।

वर्णानां समुदायार्थवत्त्वे केवलानामनर्थकत्वं यथा तथा पदानां केवलानामर्थासंभवात्तत्समुदाय एव वाक्यमिति ।। 54 ।

अनर्थकान्युपायत्वात् पदार्थेनार्थवन्ति वा ।
क्रमेणोच्चरितान्याहुर्वाक्यार्थं भिन्नलक्षणम् ।। 55 ।

क्रमपक्षमप्युपसंहर्तुमाह---

पदानि केवलान्यनर्थकानि, केषाञ्चिन्मते स्वार्थेनार्थवन्ति, क्रमेणोच्चारितानि वाक्यम् । तथाविधाद्वाक्याद्वाक्यार्थं भिन्नलक्षणं व्यतिरिक्तस्वरूपं संसर्गात्मकं विशिष्टमेव वा संसर्गवशान्निराकाङ्क्षविशेषावस्थितपदार्थस्वरूपमेव व्यतिरिक्तमवगम्यत इति ।। 55 ।

नित्यत्वे समुदायानां जातेर्वा परिकल्पने ।
एकस्यैकार्थतामाहुर्वाक्यस्याव्यभिचारिणीम् ।। 56 ।

स्फोटपक्षमप्युपसंहर्तुमाह---

इह देवदत्तगामभ्याज सुक्लां दण्डेनेत्यादिकानि भिन्नवक्त्रुदीरितानि पदसमुदायात्मकानि शब्दरूपादिभिन्नान्येव ।

अयमर्थः- तत्र तत्र वक्तरि भिन्ना अपि ध्वनय एकमेव स्फोटं व्यक्तिस्फोटात्मकं नित्यमभिव्यञ्जन्ति । देवदत्त गामभ्याजेत्यादिषु भिन्नवक्त्रुदीरितेषु वा स्फोटजातिर्नित्या देवदत्तादिपदसमुदायाभिव्यङ्ग्या वाक्यार्थस्यैकस्य प्रतिभात्मकस्य प्रतिपादिकेति मतभेदाज्जातिव्यक्तिस्फोटोपसंहारः ।। 56 ।

तदेवं संघातादीनि त्रीणि वाक्यलक्षणानि व्याख्यातानि । आख्यातं वाक्यमिति व्याख्यास्यति । एषां च मध्यादखण्डपक्ष एवोभयोरपीति सूत्रकाराभिप्रायमनुसृत्याखण्डपक्ष एव वाक्यवाक्यार्थयोरभ्युपगम्यत इति प्रदर्शितम् । इदानीं भाष्यकाराभिप्रायेणापि स एवाभ्युपगन्तव्य इत्युपक्रम्यते ।

अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिः ।

भेदपूर्वानभेदांस्तु मन्यन्ते पददर्शिनः ।। 57 ।

तथा च भाष्यम्--`न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्'। तथा--`यथालक्षणमप्रयुक्ते'इति । अत्र यदि पदानां सत्यता स्यात् तदा तेषां स्वत एव सिद्धत्वात् पदानि कुर्वन्तीति पदकारा इत्येतदसंगतं स्यात् । लक्षणेन च तदननुवर्तनम्, वस्तुसत्त्वात्तेषाम् । पदकारैर्नाम लक्षणमनुवर्त्यमित्यप्यसंगतम् । तथाऽप्रयुक्तपदविषये पदानामसत्यत्वात् तत्प्रविभागोऽयं न सिद्ध इति यथालक्षणं लक्षणानुसारेण पदकरणमप्रयुक्त इत्येतदनुपपन्नमेव । आह चैवं भाष्यकारः । तस्मान्मन्यामहे पदान्यसत्यानि, एकमभिन्नस्वभावकं वाक्यम् । तदबुधबोधनाय पदविभागः कल्पित इति । तेवाभिधातुमाह---
यत एवं सूत्रकारस्य भाष्यकारस्य चाखण्डपक्षोऽभिरुचितः । तस्माद्वाक्यवादिभिः स्फोटवादिभिरभेदकल्पनमाश्रितम् । काल्पनिकः पदवादोऽभ्युपगत इत्यर्थः ।
पदवादिमतमपि प्रसङ्गादुपदर्शयति--भेदपूर्वानिति । भेदप्रतिभासपूर्वकानभेदान् स्वाभिमतान् पददर्शिनः, पदमेव सत्यं ये न मन्यन्ते ते ह्येकमखण्डं वाक्यं नाम काल्पनिक्रमाहुः ।। 57 ।

पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया ।। 58 ।

..ति तत्पुरुषवृत्त्याशब्दसंस्कारमाचक्षाण विवभितमर्थं प्रतिपादयन्ति । तेषां (येषां) तु चतुर्णामेव पदजातानां संसर्गमात्रेण पदेष्वेव प्रसिद्धः सम्बन्धः कश्चिदर्थात्मा प्रकाश्यते । तै बहुव्रीहिवृत्त्या शब्दसंस्कारमाचक्षाणास्तथैव विवक्षितमर्थं प्रतिपादयन्ति ।
तत्र केषांचित्पौरुषेयाण्याम्नायपदानि शब्देषु स्मृतिपक्षस्य वा ।
केषांचित्तु पदरूप एवाम्नायः संहिता पौरुषेयी स्मृतिपक्षस्य वा ।
केषाञ्चित्तु नित्यावुभाप्येतौ समाम्नायौ । पदसमाम्नायस्तु प्रतिपादकत्वेन नित्यः, इतरस्तु प्रतिपाद्यत्वेन नित्यः ।
केषाञ्चिन्नित्यस्यैकस्याम्नायस्य द्व एते विभागाविभागशक्ती प्रतिपादकप्रतिपत्तव्यरूपेण वर्तेते ।। 58 ।
अथ यदि नैवं स्थितिः तत्कथं `पदप्रकृतिः संहितेति' प्रातिशाख्यम् । अत्र हि पदानि प्रकृत्तिर्यस्याः संहिताया इत्यर्थो व्याख्यायते । पदानां चासत्यत्वात् तत्कारणिका संहिताऽप्ययुक्ता स्यादित्यालोच्याखण्डपक्षेणाप्येतत्संवादयितुमाह--- पदप्रकृतीति । वृत्तिभेदमेव प्रदर्शयितुमाह--पदानामिति । अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्यायत इत्यर्थः ।। 58 ।

पदाम्नायश्च यद्यन्यः संहिताया निदर्शकः ।
नित्यस्तत्र कथं कार्यं पदं लक्षणदर्शनात् ।। 59 ।

यद्यन्य एव पदाम्नायो नित्यः पुरुषप्रयत्नव्यतिरेकेण सिद्धस्तत्रायं भाष्यग्रन्थः समर्थयितव्यः । न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्तम्, यथालक्षणं पदं कर्तव्यम् इति ।
लोकेऽप्यर्थेन प्रयुक्तेषु शब्देषु शास्त्रेण धर्मनियममात्रमेव क्रियते । अतः शास्त्रेण नित्यस्य लक्ष्स्यानुविधानं कर्तव्यं न तु नित्येन लक्ष्येण शास्त्रमनुविधेयम् ।
अपि च बहुशक्तेः समाम्नायस्य कैश्चित् पदकारैः काचिद्विभागशक्तिरनुगम्यते । वक्षस्सुरुक्मेति वक्षस्तु रुक्म इति ।
तदेवं विभागशक्त्यन्तरदर्शनेन प्रवृत्तेर्विभागशक्त्यन्तरस्यापसारितत्वाद् न शक्त्यन्तरदर्शनप्रक्रमो (मे) यथालक्षणं पदानां करणं संभवति ।। 59 । इदानीं येनाभिप्रयेण भाष्येन लक्षणेनेत्यादिकमुक्तं तमभिव्यङ्क्तुमाह-- पदाम्नायश्चेति । यदि हि पदाम्नायः संहिताप्रदर्शको नित्यः सत्यभूतोऽभ्युपगतस्तदा कथं लक्षणदर्शनात् पदं कार्यमिति न लक्षणेन पदकारा इत्यादिना भाष्यकारो दर्शयेत् । यतश्च पदान्यसत्यानि तस्य प्रतिभासन्ते तत एवमभिहितमिति भाष्यकारस्यप्यखण्डपक्षोऽभिप्रेत इति दर्शितम् ।। 59 ।
अपरे तु मन्यन्ते--वाक्यार्थ एकः, तेन चात्यन्तमनर्थकान्येव पदानि यथैव च पदार्थेन वर्णाः--

प्रतिवर्णमसंवेद्यः पदार्थप्रत्ययो यथा ।
पदेष्वेवमसंवेद्यं वाक्यार्थस्य निरूपणम् ।। 60 ।

यथैव वर्णे वर्णे पदाथप्रत्ययो नोत्पद्यत इत्यर्थो न विभज्यते, तथैव पदे पदे वाक्यार्थस्यासंनिधानात् प्रतिपदं तद्विषयोऽपि प्रत्ययो न निरूपयितुं शक्यते । अर्थनिर्भासा हि प्रकाशस्वरूपत्वादात्मनिरूपण एव । अतश्च वाढमर्थानामपि संवेद्यत्वं न व्यतिक्रामन्ति ।। 60 ।

इदानीं पदवादिनं प्रति दूषणमाह--प्रतिवर्णमिति ।
देवदत्तादौ पदे यथा न दकारादि वर्णं वर्णं प्रति देवदत्तप्रत्ययो जायते, तथैव देवदत्त गामभ्याजेत्यादिवाक्यार्थस्य देवदत्तादि पदं पदं प्रति नास्ति प्रत्ययोऽत उच्यते--एतान्यनर्थकान्येव वाक्यादेवार्थप्रतीतिदर्शनाद् वाक्यमेवार्थवदिति ।। 60 ।
यस्य तु वाक्याथ पदानि प्रतिभेदमर्थवन्ति तस्य पदार्थेन वर्णाः प्रतिभेदमर्थवन्तः प्रप्नुवन्ति ।

वाक्यार्थः संनिविशते पदेषु सहवृत्तिषु ।
यथा तथैव वर्णेषु पदार्थः सहवृत्तिषु ।। 61 ।

यदि पदेषु सहवृत्तिष्वपि सन्निविष्टो वाक्यार्थः प्रतिपदं निविष्ट इति कल्प्यते तथैव सहवृत्तिषु वर्णेषु कामं संनिविष्टः पदार्थः कल्पयितव्यः ।। 61 ।
एतावत् प्रतिविधातुं पदवाद्याह--वाक्यार्थ इति ।
इह पदे वर्णा अर्थवन्तो वाक्ये पदान्यपीति द्रष्टव्यम् । केवलं यथा समुदितेषु पदेषु सत्सु वाक्यार्थः संनिविशते स्वरूपं प्रतिलभते, तथैव वर्णेष्वपि बुद्धौ सहवृत्तिष्वेव पदार्थ उपजायत इति नैतावता वर्णदृष्टान्तेन पदानामनर्थकत्वम्।।61।
यदि तर्हि पदार्थः प्रतिवर्णं निविष्टः कस्मात् पदस्येव प्रयोगे वर्णस्यापि प्रयोगे कश्चिदर्थो न प्रतीयते---

सूक्ष्मं ग्राह्यं यथाऽन्येन संसृष्टं सह गृह्यते ।
वर्णोऽप्यन्येन वर्णेन संबद्धो वाचकस्तथा ।। 62 ।

यथा हि सूक्ष्मं ग्राह्यं दूरात् केशमक्षिकाद्यन्तिके च वातायनरजः केवलं नोपलभ्यते । संसृष्टं त्वसंयुक्तमप्युपलभ्यते । वर्णोऽप्येवमेवासत्यपि शब्दान्तरप्रादुर्भावेऽन्येन सम्बद्धः सत्यप्वर्थयोगे पूर्वमगृहीतस्यार्थस्य प्रत्यायको भविष्यति ।। 62 ।
एतदेव दृष्टान्तेन दर्शयितुमाह--सूक्ष्ममिति ।
(अ) ग्राह्यमपि सूक्ष्मं वस्तु रजः प्रभृति यथाऽन्येन केनचित्सजातीयेन विलक्षणेन वा संसृष्टं सद् गृह्यते, एवमर्थवानपि वर्ण एकैकं न संप्रत्यायकोऽन्येन संसृष्टस्तु वाचक एव ।
एतदुक्तं भवति--अर्थवन्त एव वर्णाः प्रतिपत्त्रा तु पाटवविरहादेकैकंन तथा गृह्यन्त इति नात्र तेषामपराधः ।। 62 ।

पदस्योच्चारणादर्थो यथा कश्चिन्निरूप्यते ।
वर्णानामपि सान्निध्यात्तथा सोऽर्थः प्रतीयते । 63 ।

पदे किलोच्चारिते योऽर्थो निरूप्यते तेनार्थेन तदुच्चरितं पदं तदर्थवदिति वा प्रतिज्ञायते । वर्णेष्वप्युच्चरितेषु पदवत् स एवार्थस्तथैव प्रतीयते । तस्माद्येनैव हेतुना पदार्थवादी पदस्यार्थवत्तां प्रतिजानीते तनैव हेतुना केवलवर्णार्थवाद्यपि वर्णस्यार्थवत्तां प्रतिजानीत इति ।। 63 ।
न चानर्थकमेव पदमिति वक्तुं युक्तं प्रत्यक्षविरोधादित्याह---पदस्येति ।
नही किञ्चित् पदं केनचिदर्थेनानिरूपितमिति युज्यते वक्तुमनुभवविरोधात् । यथा चैवं पदोच्चारणकालेऽस्ति काचिदर्थप्रतीतिरेवं तेनैवार्थेन संहता अप्यर्थवन्त इति प्रतिपादयितुमाह---वर्णानामिति ।
केवलं सान्निध्यात् सहोच्चारणादसावर्थस्तेषां प्रतीयते । तस्माद्यथा समुदिताः परस्परशक्त्यावेशाद्वर्णा वाचकाः, एवं पदान्यपि तथैवेति वर्णपदव्यतिरेकेण वाक्यं नाम नास्तीति । तद्वक्तम्---
"यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः" ।। इति ।। 63 ।
(श्लो o वा o स्फोटवादे, 69)
येषामत्यन्त (म) संसृष्टस्याश्रयविशेषवद्भिः साधनैः क्रियाविशेषस्यार्थभेदेष्वलब्धपदविभागमेकभिन्नस्यार्थस्य वाचकं वाक्यं तेषामङ्गभ्रेषे यत्र प्रतिनिधिरुपादीयते तत्र क्रियायाः प्रतिनिधिः प्राप्नोति । अप्रतिनिधेया च क्रिया, तस्मात् प्रसक्तानुप्रसक्तं प्रतिनिधिसम्बन्धेनेदमुच्येते--

प्राप्तस्य यस्य सामर्थ्यान्नियमार्था यतः श्रुतिः ।
तेनात्यन्तं विशेषण सामान्यं यदि बाध्यते ।। 64 ।

इह यजेतेत्याह, द्रव्यदेवतास्सामर्थ्यप्राप्ताः । नहि द्रव्यं देवतां साधनं चान्तरेम यजतिशब्दप्रयोगलक्षणार्थस्याभिधाव्यक्तिरस्ति तत्र द्रव्यं यजतिक्रियारूपैकदेशभावादङ्गत्वेन श्रुतिप्राप्तसन्निधानम् । व्रीहित्वादयस्तु सामान्यविशेषा विरुद्धैकार्थसमवाया अप्यविरुद्धेकार्थसमवायेन द्रव्यत्वेनादृष्टसाहचर्यव्यभिचाराः सामान्यमात्रा (त्र) प्राप्तसन्निधानाः । तेषां नियतेऽपि सन्निधाने शब्दरूपेणानुपादानाद् द्रव्यत्ववदङ्गभावो न प्रतीयते । यस्य तु सामर्थ्यमात्रेणापि प्राप्ता व्रीहित्वादयः पुनः श्रुत्या नियम्यमानानां यवत्वादीनां सामान्यविशेषान्तराणां निवर्तका इति दर्शनं तस्य व्रीहित्वेन यवत्वादिसहचारिणो द्रव्यस्यात्यन्तं (म) श्रुतिलभणमपसारणं प्राप्नोति ।। 64 ।

यदि च पदार्थनिबन्धनो वाक्यार्थावभासो नाङ्गीक्रियते तदा प्रतिनिधिकल्पनं पिकादिनियतपदप्रश्नः श्रुतिवाक्ययोर्विरोधे श्रुतिर्बलीयसीत्यवान्तरवाक्यानामर्थवत्त्वं च न स्याल्लक्षणानुपपत्तिश्चेति पञ्च चोद्यान्यापतन्ति । तानि क्रमेण प्रदर्शयितुमाह--प्राप्तस्येति ।

इह यजेतेत्याख्यातपदप्रतिपाद्यो यजनविधिरुपदिश्यते । तत्र क्रियाप्रधानमाख्यातभित्यत्र यजतिक्रिया साधननिर्वर्त्येत्यसौ कारकमात्रस्याक्षेपिका, कदाचिद्विशिष्टस्यैवेति द्वयी गतिः । तत्र यसाय व्रीहित्वस्य यजतिक्रियासामर्थ्यात् प्राप्तस्य व्रीहिभिर्यजेतेति पुनर्व्रोहिश्रतिरुच्चरन्ती नियममवगमयति व्रीहिभिरेव न यवैरिति, ततश्च तेन द्रव्यविशेषेणात्यन्तं द्रव्यसामान्यमात्रं यदि बाध्यते ।। 64 ।

यजेतेति यदा द्रव्यं प्राप्तं सामर्थ्यलक्षण्म् ।
व्रीहिश्रुत्या निवर्त्तेत न स्यात्प्रतिनिधिस्तदा ।। 65 ।

यदि सामान्यलक्षणप्राप्तं यवादिद्रव्यं व्रीहिश्रुत्या शास्त्रेण प्रतिषिध्यते तच्छास्त्रान्तराभावाद्यथैवान्यानि द्रव्याण्ययज्ञियानि तथा व्रीहीणामसन्निधाने मैव प्रतिनिधेयं स्यात् । सत्यप्यर्थित्वे दृष्टेऽपि सामर्थ्ये शास्त्रणापर्युदस्तस्याधिकारो युक्तः । तस्मान्मा भूत् प्रसिद्धस्यासहचरितस्य प्रतिनिधिरभावादिति ।। 65 ।

अतः किमित्याह--यजेतेतीति ।

यजेतेत्येतया क्रियया निः साधना क्रिया न भवतीति यामर्थ्याद्यदाक्षिप्तं द्रव्यमात्रं तत् व्रीहिभिर्यजेतेति पुनर्व्रोहिश्रुत्या बाधितं सन्निवर्तेत तदभावे प्रतिनिधिर्न स्यात् । क्रियया द्रव्यमात्राक्षेपे व्रीहिलक्षणस्य द्रव्यस्याभावे तत्सदृशं द्रव्यान्तरमेव नीवारादिकं समानीय तन्निर्वर्तनं क्रियते । विशिष्टद्रव्यक्षेपे तु तया कृते तदुपादानं नियमाय पर्यवस्यतीति कथं व्रीहिकरणकं यजनमन्यो निर्वर्तयेदिति प्रतिनिध्यभावः । तस्माद् द्रव्यमात्राक्षेपे प्रतिनिध्युपपत्तिः ।। 65।

इदमन्यद्दर्शनमाश्रीयते । शब्देनानङ्गीकृतं व्रीहित्वमङ्गभावेनाधिकं व्रीहिशब्दः प्रकल्पयतीति निगमयति--

तस्माद् व्रीहित्वमधिकं व्रीहिशब्दः प्रकल्पयन् ।
द्रव्यत्वमविरुद्धत्वात् प्राप्त्यर्थः सन्न बाधते ।। 66 ।।

व्रीहिशब्दो ह्यधिकार्थाध्यावापायोपादीयमानो द्रव्यत्वविरूद्धैकार्थसमवायं प्राप्त्यर्थः सन्न बाधते । नहि यवत्वादीनां विवृत्तौ तस्य व्यापारोऽस्ति, नाप्यनुज्ञायाम् ।। 66 ।।

तदेतदेव दर्शयितुमाह--तस्मादिति ।

तस्माद् द्रव्यमात्राक्षेपे व्रीहिशब्दोऽत्र प्रप्त्यर्थो व्रीहित्वमात्रपापणप्रयोजने व्रीहित्वमेवाधिकं कृत्वाऽभ्युपकल्पयन् प्रकटीकुर्वन् द्रव्यत्वं न बाधते, अविरुद्धत्वात् सामान्यस्य विशेषण सहाविरोधात् ।। 66 ।।

इदं च द्रव्यत्वस्य बाधनं यस्सामान्यविशेषान्तरैश्च्र साहचार्यादवच्छेदः ।

तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि ।
असम्भवाद् विशेषाणां तत्रान्येषामदर्शनम् ।। 67 ।

न च सामान्यवत्सर्वे क्रियाशब्देन लक्षितः ।
विशेषा नहि सर्वेषां सतां शब्दोऽभिधायकः ।। 68 ।

यदि तर्हि व्रीहिश्रुतिर्न नियमार्था तर्हि विकल्पितत्वं यवादीनां कस्मान्न विज्ञायते । तत्राहुः--असंभवो नामानियमशब्दव्यापारो नियमसदृशफलः क्वचिद्विषयेऽन्य एव धर्मोऽयमसंभवियम इति नियमविभागे न्यायविदः

केचिदाचक्षते--यत्र व्रीहित्वमधिकं शब्देनाङ्गभावं प्रतिपद्यते तत्र विरुद्धैकार्थसमवायत्वादप्रतिषिद्धान्यपि श्रुत्या यवत्वादीनि न संभवन्ति । यदि च संभवेयुः काममविरोधसामथ्यप्राप्तसन्निधानानि विना शब्दव्यापारेण समुच्चीयेरन् । न त्वेष विकल्पस्य विषयः । न च सामान्यवत् क्रियाशब्देन लक्षिता विशेषाः । नहि सर्वेषां सतां शब्दोऽभिधायकः ।। 67 - 68 ।।

अतश्च किमित्याह--तेनेति ।

तेन च व्रीहिशब्देन व्यवच्छिन्ने कृताभ्युच्चये दत्तोपचये द्रव्यत्वे सति । कीदृशे सहचारिणि अविरुद्धैकार्थसमवेते । द्रव्यविशेषाणां तत्रान्येषां समस्तानामसंभवाददर्शनमनाक्षेप एव ।। 67 ।

एवदेवोन्मीलयितुमाह--न चेति ।

यजतिना हि क्रियाशब्देनात्र द्रव्यत्वसामान्यवत्सर्वे विशेषास्तदन्तर्गता न लक्षिता आक्षिप्ता अपि तु द्रव्यत्वमेव । तदेव चाभ्युच्चयीकृतं व्रीहिशब्देन । सामान्यमात्राक्षेपः किमिति नाङ्गीक्रियत इत्याशङ्क्याह---नहीत्यादि । नही सकलसंनिहितविशेषाभिधायकः शब्दः परिदृष्टः, तथाऽप्रतीतेः ।। 68 ।

शुक्लादयो गुणाः सन्तो यथा तत्राविवक्षिताः ।
तथाऽविवक्षा भेदानां द्रव्यत्वसहचारिणाम् ।। 69 ।।

तत्रैतत् स्यात् । यथा द्रव्यत्व (त्वं) नियतसन्निधानं (न) क्रियासन्निधानं क्रियापदार्थैकदेशभूतमिव सन्निधानात् क्रियाशब्देन लक्ष्यते, तथा सर्वविशेषाणां द्रव्यत्वसहचारिणां क्रियापदार्थैकदेशभूतानामिव कस्माच्छब्देनोपादानं न विज्ञायते । अत आह--नहि सर्वेषां वस्तुत्वेन सतामर्थत्वेन शब्दोऽभिधायको भवति । विवक्षानिबन्धनं हि वस्तु सतामप्यर्थानामर्थत्वेनासत्त्वम् । विवक्षा हि शब्दे रूपसामर्थ्यनिबन्धना । तत्र यथैव द्रव्यत्वसहचारिणो नियतसन्निधाना अपि शुक्लादयो गुणाः सत्यपि सन्निधानाद् द्रव्यत्ववदुपयोगे शब्दशक्त्यनुरोधादभिन्नत्वेन क्रियाशब्दरूपेणाङ्गत्वेन प्रत्याययितुमशक्यत्वादविवक्षिताः, तथेव शब्दसामर्थ्यप्रतिबन्धा व्रीहित्वादीनां द्रव्य (त्व) सहचारिणामुपयोगवतां भेदानामङ्गत्वेनाविवक्ष।।69।

एतदेव दृष्टान्तेन स्फुटीकर्तुमाह---शुक्लादय इति ।

व्रीहिभिरित्यत्र यथा शुक्लकृष्णादिगुणयोगो न विवक्षितः, तथाऽत्र व्रीहिभिर्यजेतेति भेदानां द्रव्यविशेषाणां सामान्य (न्या) विरोधिनामविवक्षैवेति । ततश्च स्थितमेतद् यदत्र यजक्रियाक्षिप्तद्रव्यमात्राभ्युच्चयाभिधायको व्रीहिशब्दो न द्रव्यविशेषवचन इति । ततश्च न क्रिया प्रतिनिधईयते, द्रव्यं तु प्रतिनिधीयत इति मुख्याभावे तत्सदृशनीवारादिद्रव्यान्तरोपादानेन यागनिर्वृत्तिरिति प्रतिनिधिसमाश्रयणेन विध्यर्थानुष्ठानं सिद्ध्यतीति न तदवसादः ।। 69 ।।

तत्रैवं शास्त्रेणापर्युदस्ते विशेषान्तरसहचारिणि द्रव्यत्वे---

असंन्निधौ प्रतिनिधिर्मा भून्नित्यस्य कर्मणः ।
काम्यस्व वा प्रवृत्तस्य लोप इत्पपदिश्यते ।। 70 ।।

नित्यं यत्कर्म तस्याकरणे प्रत्यवायः । तस्य प्रधानस्याङ्गमात्रासन्निधाने मा भूदावृत्तिः (भूदनापत्ति), काम्यस्य वा सन्निहितेषङ्गेषु प्रकान्तस्य मा भूदङ्गभ्रेषे विच्छेद् इति शास्त्रेणापर्युदस्तः प्रतिनिधिः प्रथमकल्पासम्भवे उपादीयत इत्यविरुद्धं भवति ।। 70 ।

तदेतदेव प्रतिनिधिप्रयोजनमाह--असन्निधाविति ।

मुख्यस्यासन्निधानेऽभावे मा भून्नित्यस्य कर्मणो लोप प्रतिनिधिरुपपद्यते । काम्यस्य वा प्रवृत्तस्य तथैव लोपो मा भूदिति । प्रवृत्तस्य काम्यस्येत्यनेनैतदाह यन्मुख्याभावे काम्येऽप्रवृत्तिरेव न ज्यायसी । प्रवृत्तौ वा केनचिद्वैगुण्येनासंपत्तौ समुदायस्य (स्या) प्रतीतेस्तत्रापि प्रतिनिध्युपादानेन तन्निर्वर्तनं विधेयम् । अन्यथा शिष्टविगर्हणलक्षणः प्रत्यवायः ।। 70 ।।

विशिष्टैव क्रिया येन वाक्यार्थः परिकल्प्यते ।
द्रव्याभावे प्रतिनिधौ तस्य तत्स्यात् क्रियान्तरम् ।। 71 ।।

यस्य तु पूर्वोक्तेन धर्मेण क्रियाविशेषः शक्तिद्रव्यसंसर्गभिन्न एको वाक्यार्थस्तस्याविभक्तिशब्दार्थत्वाद्विशेषान्तरावगमे तस्मिन्नर्थात्मन्यविकल्पेन वृत्ते विशेषन्तरोपादाने पुत्रीयति प्रक्रियान्तरं मुण्डयति वा प्रतिपाद्यमानोद्देश (श्य) विभागं तत्प्रतिनिहितं स्यात्, अनिष्टश्च क्रियायाः प्रतिनिधिरिति विभागपक्ष एव न्याय्यः ।

अपर आह---क्रियायाः क्रिया निवर्तिका भवति, द्रव्यं द्रव्यस्य । तस्मात् क्रियान्तरोपादाने क्रियान्तरपरित्यागात् क्रियासु प्रतिनिधिर्भवति । क्रियात्यर्थगृहीतेषु योग्यताप्रापितेषु साधनेषु विशिष्टद्रव्यविषये नियमे कृते तस्य द्रव्यस्याभावे समर्थद्रव्यान्तरं पूर्वमेव क्रियायामङ्गीकृतमुपादीयते (दत्ते) । तत्र नियममात्रं बाध्यत इत्येतस्मिन्नपि प्रतिनिधिदर्शने यस्तु जात्युद्देशे प्रतिनिधिं प्रत्यपरो दर्शनभेदः तत्र वा (ऽ) विभागपक्षाभ्युपगमे क्रियैवाप्रतिनिधेया प्रतिनिधीयत इत्यनिष्टप्रसङ्गः ।। 71।

एवं द्रव्यमात्राक्षेपपक्षे प्रतिनिधिमुपपाद्येदानीं पदपदार्थानामनङ्गीकरणेऽखण्डवादिनो दूषणमाह--विशिष्टैवेति ।

येनाखण्डवाक्यवादिना व्रीहिकरणिका यजतिक्रिया निरस्तावयवार्था व्रीहिभिर्यजेतेत्यत्र वाक्यार्थ इत्युच्यते । तेन द्रव्यस्य व्रीहिलक्षणस्याभावे यदा प्रतिनिधिसमाश्रयणेन तन्निर्वर्तनं कार्यं तदा व्रीहिभिर्यजेतेति व्रीहिकरणकयागलक्षणस्य वाक्यार्थस्यत्यागात् प्रतिनिधइना तन्निवर्तने नीवारकरणिकायजतिक्रियाऽन्यैवानुष्ठिता भवतीति न क्रिया प्रतिनिधीयते, द्रव्यं तु प्रतिनिधीयत इति न्यायस्योपेक्षणात् चोदितस्याकरणमेव स्यात् ।

अथ त्वया प्रतिनिधिर्नाश्रीयत इत्युच्यते, तन्न, मा भून्नित्यस्येत्यादिना तदाश्रयणस्य सप्रयोजनत्वादवश्याश्रयणीयः प्रतिनिधिरिति पदपदार्थानामभावे वाक्यस्याखण्डरूपस्याभ्युपगमे प्रतिनिध्यभाव इति चोद्यम् ।। 71 ।

विज्ञातार्थं पदं यच्च तदर्थे प्रतिपादिते ।
पिकादि यदविज्ञातं तत्किमित्यनुयुज्यते ।। 72 ।।

इतश्च विभागदर्शनमेव युक्तम् । इह वनात् पिक आनीयतां व (वा)- राङ्गीजर्जरा वृषलाय दीयतामिति बहूनां पदानामर्थेष्वाहितप्रत्ययाः प्रतिपत्तारो यदेव पिकाद्यविज्ञातार्थरूपं पदं तन्मात्रमेव जिज्ञासमाना विच्छेदेन पृच्छन्ति---कोऽयं पिको नाम,यो वनादानेयः ? का च व (वा) राङ्गी नाम, या वृषलाय दातव्येति । न च वृक्षवृषभकाण्डीरादिषु प्रसिद्धभेदेषु ऋक्षऋषभभाण्डीराद्यर्थे निर्ज्ञाते वर्णमात्रविषयो वकारार्थे ककारार्थे वा प्रश्नो दृश्यते । तस्मादविभागधर्मात् प्रच्युतेन विभागे वाक्यार्थेन व्यवस्थितेन भावितव्यम् ।। 72 ।।
पिकादिनियतपदप्रश्नो नोपपद्यत इत्यप्यभिधातुमाह--विज्ञातार्थमिति ।
वनात् पिक आनीयतामित्युक्ते वनादानीयतामिति पदद्वयं विज्ञातार्थम् । तदर्थे चावगते कः पिक इति कस्यचिन्नगरिकस्य प्रश्नो नोपपद्यते किल । वनादित्याद्यखण्डमेव निरस्तपदप्रविभागं वाक्यमनंशमेव वाचकं वैयाकरणस्य मतम् ।
अतः किं पिकपदार्थः पृथगविज्ञातः कश्चिदस्ति । तदविज्ञातपिकपदार्थानुयोगो नोपपद्येत । अस्ति च तदर्थे कस्यचित्संदेह इति पृथगेवार्थवन्ति पदानि विज्ञातानि वाक्यमित्येव वक्तं युक्तमिति ।। 72 ।

सामर्थ्यप्रापितं यच्च व्यक्त्यर्थमनुषज्यते ।
श्रुतिरेवानुषङ्गे सा बाधिका लिङ्गवाक्ययोः ।। 73 ।।

अप्राप्तो यस्तु शुक्लादिः सन्निधानेन गम्यते ।
स यत्नप्रापितो वाक्ये श्रुतिधर्मविलक्षणः ।। 74 ।।

इतश्चाविभागपक्षो न युक्तः, श्रुतिवाक्यसमवाये श्रुतित्वाविशेषेण पारदौर्बल्यासंभवात् । इह श्रुतिर्नामैकशब्दविषयैकपदनिबन्धनार्था । तत्र सामर्थ्यप्रापितं यावदेकशब्दोपादनामर्थरूपं शब्दान्तरेण व्यक्त्यर्थमनूद्यमानमनुषज्यते, तदप्यनाधेयसम्बन्धत्वात् श्रुतिर्वाक्यमेव । तद्यथा---पच्यतामवहन्यतां पिष्यतामित्येकत्र सम्बद्धानां चेष्टाविशेषाणां प्रक्रान्तत्वात् पाक्यपेष्यावघृते(त्ये)षु शब्दरूपसामर्थ्यादङ्गीकृतेषु यद् व्रीह्यादिद्रव्यमात्रं व्रीहित्वादिप्रापणाय व्रीहित्वादिभिव्यक्तमात्मानं प्रदर्शयत् क्रियारूपादाक्षिप्तसम्बन्धं सम्बद्धमेव सन्निपतति, तद्वस्तूपनिबन्धनाः सर्वे श्रुतिशब्दास्तद्वस्तूपनिबन्धनत्वेन प्रतिज्ञायन्ते, न त्वधिकार्थप्रापणेन । यथा वा `दिवा सूर्य उदेति देवो वर्षति'इति व्यक्त्यर्थोऽनुषङ्गः साधनस्य साधनाश्रयस्य चेति । सर्वस्य चानुषङ्गमात्रे तथाभूता श्रुतिर्वाक्याख्यस्य श्रुत्यन्तरस्य बाधिका विज्ञायते ।
यस्तु शब्दरूपसामर्थ्यात् सन्निहितोऽपि शब्दव्यापारेणाप्राप्तसन्निधानः शुक्लादिर्गुणः शुक्लादीनां शब्दानामुपदानमन्तरेण वस्तुतः सन्नपि शब्दार्थत्वेनाप्रतीतः शुक्लादिशब्दसन्निधानेन व्यापारवान् प्रतीयते । स यत्नप्रापितसम्बन्धः श्रुत्यर्थविलक्षणो वाक्यार्थ एव । तत्र पयसा भुक्ते देवदत्तः स्त्रुतेनेति वाक्यप्रापितस्य प्रयोगविषयस्य स्त्रवणस्यासम्भवे स्त्रुतिप्रापितमुपसेचनं निवर्तते । स्त्रवणानुग्रहाय वोपसेचनत्वेन यदपि प्रसिद्धं लोके तेन स्त्रुतेन स्त्रवणस्यानुग्रहः कथं स्यादिति न भुज्यते । श्रुतिवाक्यसविकल्पसम्भवेन (वाक्ययोर्विकल्पासम्भवेन) श्रुत्यर्थ एव क्रियते न वाक्यार्थः ।। 73 - 74 ।
इदानीं श्रुतिवाक्ययोविरोधे श्रुतिरेव बलीयसीति न्यायो न स्यादिति प्रदर्शयितुमाह--सामर्थ्येति ।
इह श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यालक्षणाः संदिग्धवाक्यार्थविचारे वार्क्यावदां प्रसिद्धाः । तेषां च परस्परविरोधे पूर्वः पूर्वो बलीयानिति व्यवस्थाप्यते । तत्र श्वेतं छागमालभेतेत्यत्रालम्भनक्रियया यो द्रव्यस्य सम्बन्धः, स द्वितीयाश्रुत्या साक्षात् प्रतिपादितः । गुणस्य तु तत्सामानाधिकरण्याद्वाक्यीयः । निर्गुणस्य हि द्रव्यस्याभावाद् गुणस्य च निरधिकरणस्यासम्भवाद्वाक्यीय आश्रयाश्रयिणोः सम्बन्धः ।
तदुच्यते `आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठते'(वाo पo 3-75) इति । यदा तु द्रव्यगुणयोर्द्वयोरप्यालम्भनक्रियया साक्षात् सम्बन्धः । यद्वक्ष्यति` क्रियया योऽभिसम्बन्धः स श्रुतिप्रापितस्तयोः'(वाo पo 3-1-75) इति । ततश्च श्वेताभावेऽन्यगुणस्य छागस्यालम्भनमनुष्ठीयते । छागाभावे च श्वेतगुणयुक्तस्य मेषस्याप्यालम्भनमिति प्रतिनिधिसमाश्रयणेन न श्रुतिबाधः । वक्ष्यति च ---
तत्र द्रव्यगुणाभावे प्रत्येकं स्याद्विकल्पनम् ।
श्रुतिप्राप्तो हि सम्बन्धो बलवान् वाक्यलक्षणात् ।। इति ।।
(वाक्य पo 3-1-76)
यदि च वाक्यीयः सम्बन्धो बलवान् स्यातदाऽन्यतराभावे नालम्भनमनुष्ठीयेतेति । विध्यर्थः श्रुतिः । अतः श्रौतस्यैव सम्बन्धस्य वाक्याद् बलीयस्त्वादन्यतराभावेऽपि श्रुतिप्रापितमालम्भनमनुष्ठितमिति न कश्चिच्छ्रुतिबाधः । तदेतत्प्रतिपादयितुमुक्तम्--सामर्थ्यप्रापितमित्यादि । निर्गुणस्य

द्रव्यस्याभावाच्छ्वेतगुणयुक्तस्यालम्भनं क्रियासामर्थ्यप्रापितं श्रौतमेव । व्यक्तार्थं स्फुटीकरणाय श्वेतमाल भेतेति श्वेतादि तत् (यत्) संबध्यते, ततः किमित्याह--श्रुतिरित्यादि । ततश्च साक्षात् द्रव्यगुणयोः श्रुतावनुषङ्गोऽभिसम्बन्धः श्रुतिरेव तत्र लिङ्गवाक्ययोर्बाधिकेति न वाक्यीयसम्बन्धस्तत्र भवति ।। 73 ।

श्रौतवाक्यीययोर्भदमुपदर्शयितुमाह---अप्राप्त इति । छगमालभेतेत्यत्र द्रव्यस्यैव साक्षात् सम्बन्धः, शुक्लादिगुणस्य तु सन्निधानवशाद्वाक्यीयो यत्नप्रतिपाद्यः । स वाक्ये यत्नादवगतः श्रुतिधर्मविलक्षणः साक्षात् सम्बन्धविलक्षण इति व्यक्तम् ।। 74।।

अभिन्नमेव वाक्यं तु यद्यभिन्नार्थमिष्यते ।
तत्सर्वं श्रुतिभूतत्वान्न श्रुत्यैव विरोत्स्यते ।। 75 ।।

यस्याभिन्नमविभक्तोद्देशमेकार्थमेकं वाक्यं मुण्डिकुट्टिसूत्रिवदविकलं श्रुनिभूतं तस्य कथं श्रुत्यर्थाव्यतिरेकेणात्मभूतैर्यत्नप्रापितसन्निधानाभिमतैरसति विरोधे बाधव्यवस्था प्रकल्पते । तत्र श्रुतिलङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादित्येतदसमर्थितं स्यात् । वाक्यनिबन्धने चैकस्मिन्नर्थे परतन्त्रणां शब्दानामभावमानर्थक्यं चाभ्युपगच्छतो वाक्यास्याप्यानर्थक्यं प्राप्नोति । तत्र---"एकस्यैवार्थता (स्यैकार्थता) माहुर्वाक्यस्याव्यभिचारिणीम्" इत्येतत् प्रतिज्ञातं हीयेत ।। 75।।

इदानीं प्रकृते योजयितुमाह---अभिन्नमेवेति ।

यदि पुनरभिन्नखण्डमेव निरस्तपदविभागं वाक्यमभिन्नर्थं श्वेतगुणविशिष्टच्छागालम्भनरूप एव नाना अर्थो यस्य तत्तथाभूतमभ्युपगम्यते, तदा कुत्रायं प्रविभागोऽयं श्रौतोऽयं वाक्यीय इति । ततश्च सर्वस्य श्रौतत्वात् क्रेन कस्य बाध इति न श्वेतगुणाभावे छागालम्भन (नं) छागाभावे च श्वेतगुणयुक्तस्यान्यस्य स्यादिति श्वेतं छागमालभेतत्यत्रान्यतराभावे आलम्भनानुपपत्तेर्विध्यर्थस्य संकोच इति ।। 75 ।।

वाक्यानां समुदायश्च य एकार्थप्रसिद्धये ।
साकाङ्क्षावयवस्तत्र वाक्यार्थाऽपि न विद्यते ।। 76 ।।

इह गौर्दुह्यताम्, उपाध्यायः पयसा भुक्त्वा मामध्यापयिष्यतीति साधनद्रव्यक्रियान्तरावधिविशिष्टायां क्रियायां यदेकं वाक्यान्तरावयवं वाक्यं वर्तते तदवयवानां साकाङ्क्षाणां पदवदेकार्थेनासम्बन्धे सति वाक्यान्यप्यनर्थकानि संपद्यन्ते । न च वाक्यरूपावधिपरिग्रहे नियमोऽस्ति । कदाविद् गामभ्याजेति वाक्यं भवति, कदाचिद्देवदत्त गामभ्याजेति । कदाचिद्देवदत्त गामभ्याज शुक्लामिति । तत्र तदेवार्थवत्तदेवानर्थकमिति विरुद्धोऽभ्युपगमः सम्पद्यते । सर्वन्यायलक्षणव्यवस्थाविरुद्धश्चायमविभागपक्षः । तत्र द्वादश षट् चतुर्विंशतिर्वा लक्षणानीति लक्षणसमुद्दशे सापदेशं सविरोधं विस्तरेण व्याख्यास्यते ।। 76 ।।

अवान्तरवाक्यार्थानुपपत्तिमप्यत्रोपदर्शयितुमाह--वाक्यानामिति । एकस्यमुख्यार्थस्य प्रसिद्धये प्रतीतये योऽयमवान्तरवाक्यानां समुदायः साकाङ्क्षावयवः, साकाङ्क्षा अवयवा यस्मिन् समुदाये स तथाभूतोऽभिजानासि देवदत्त कश्मीरेषु वत्स्याम इत्याद्यात्मकोऽत्रावयवार्थोऽवान्तरवाक्यार्थात्मको न विद्यते कश्चित् । युगपत्सकलशास्त्रस्य ग्रहणं प्रतिपादनं वा न संभवतीति सकलव्यवहारोच्छेदः ।। 76 ।।

इह तु प्रदर्शनार्थमुदाहरणमात्रं प्रसक्तानुप्रसक्तं च किञ्चिदुच्यते ---

प्रासङ्गिकमिदं कार्यमिदं तन्त्रेण लभ्यते ।
इदमावृत्तिभेदाभ्यामत्र बाधसमुच्चयौ ।। 77 ।।

किंचामी पदार्थोपनिबन्धना वाक्येषु न्यायाः सकलशास्त्रीयलौकिकव्यवहारनिबन्धनभूताः पदपदार्थानङ्गीकरणे न प्रकल्पन्त इत्याह--प्रासङ्गिकमिति । एतैश्च निर्ज्ञातैर्वाक्यगोचरोऽर्थात्मा यथावल्लक्ष्यते निश्चीयत इत्येतानि मीमांसकैर्लक्षणानीत्युच्यन्ते । तत्र षङ्द्वादश चतुर्विंशतिर्वैतानि लक्षणानि तावदिह प्रदर्श्यन्ते । एतेषां च वितत्य सोपपतिकं सनिदर्शनं स्वरूपं पदकाण्डे लक्षणसमुद्देशे विनिर्दिष्टमिति ग्रन्थकृतैव स्ववृत्तौ प्रतिपादितम् । आगमभ्रंशाल्लेखकप्रमादादिना वा लक्षणसमुद्देशश्च पदकाण्डमध्ये न प्रसिद्धः । तत्र तावद् द्वादशलक्षणानि द्वाादशस्वध्यायेषु सप्रपञ्चं प्रासङ्गिकविचारसहितानि निर्णोतानि ।

तथा च तत्र `अथातो धर्मजिज्ञासा (पू० मी० 1-1-1) इत्युपक्रम्य को धर्मः किं लक्षणश्चेत्याद्याशङ्कानिरासार्थं चोदनालक्षण इत्युक्त्वा प्रथमेनाध्यायेन) चोदनालक्षणे निर्णोते चोदनैव प्रमाणमित्युक्तम् । मतभेदेनापि विधिनियोगेत्यादिका अप्यत्रास्याः संज्ञा उपवर्णिताः । तत्रैव च स्वतः प्रामाण्यं व्यवस्थापितम् । तदनुरोधेन च प्रत्याक्षादीनामपि स्वत एव प्रामाण्यमुपपादितम् । चोदना च शब्दादिवैचित्र्याद्भिन्नरूपेति भेदप्रतिपादनायास्या एव द्वितीयोऽध्यायः । भिन्नस्य च शेषशेषिभावेन विनियोगप्रतिपादनाय तृतीयोऽध्यायः । विनियुक्तस्य प्रयोजकाप्रयोजकभावप्रतिपादनाय चतुर्थः । क्रमेण विनियोग इति तदर्थं पञ्चमः । एतत्समग्रं यदर्थमसावर्थो शास्त्रेणापर्युदस्तोऽधिकारीति तत्प्रतिपादनाय षष्ठ इति ।

एवं विधिभेदशेषिभावप्रयुक्तिक्रमाधिकारिणां प्रतिपादनायाध्यायाः षडिति षड्लक्षणानि । तत्र प्रकृतिषट्कमुपदेशषट्कमिति चोच्यते । तदनन्तरमनुक्तेतिकर्तव्यताकमपि कर्मान्यतो विध्यन्तमाप्नोति सामान्यातिदेशादिति प्रतिपादनाय सप्तमः । क्वचित्सामर्थ्याद्विशेषा एवातिदिश्यन्त इति निरूपणायाष्टमः । अतिदेशप्राप्ते मन्त्रे प्रकृतिदेवता विकृतियागदेवतात्वेन विपरिणमयितव्येत्यादिसमर्थनाय नवमः । सामान्यस्य विशेषेणे बाधाभिदानाय दशमः । येन सकृदनुष्ठानादुभयसिद्धस्तत्तन्त्रं तदर्थमेकादशः । यदन्यदर्थ (न्यार्थ) मारब्धमन्यदप्येकेनैव प्रयत्नेन संभवलाघवाभ्यां निष्पादयति तत्प्रासङ्गिकम् । तदुक्तये द्वादशोऽध्याय इत्यनेनातिदेशषट्केन सह द्वादशलक्षणानि । एतत्प्रतिपक्षभूतान्यन्यानि द्वादश यथायोगमेतेष्वेवाध्यायेषु दर्शितानि ।

तत्र प्रमाणस्य प्रतिपक्षोऽसंभवः । नह्यप्रमाणं प्रमाणम्थाने नियुज्याभिमतसंपत्तिर्भवति । भेदस्य तु शास्त्रादि (शब्दादि) भेदभिन्नस्य तदभेदादभेदः प्रतिपक्षः । तत्र भेदस्य स्वरूपं निर्दिष्टम्--"शक्तिव्यापारभेदोऽस्निम् फलमत्र तु भिद्यते । संबन्धाज्जातभेदोऽयम्" (वा o प o 2-83) इति । भेदस्तत्राविवक्षित इति तत्प्रतिपक्षः । तथा शेषशेषिभावस्य गुणप्रधानभावाविवक्षा प्रतिपक्षः । सा प्रतीयमानत्वादत्र नोक्ता । तत्र शेषशेषिभावस्य इदं प्रधानं शेषोऽयमिति' (2-82) स्वरूपकथनम्, `विनियोगक्रमस्त्वयम्' `साक्षादस्योपकारीदमिदमाराद्विशेषकम्' (वा o प o 2-83) इत्यस्यैवेतिकर्तव्यतायाः प्रभेदस्य च निर्देशः । प्रयुक्तेरप्रयोजकः प्रतिपक्षः । तत्र`इदं पराङ्गैः संबन्धमङ्गानामप्रयोजकम्' इत्यनेनैकफलतया प्रयोजकाप्रयोजकप्रदर्शनं कृतम् । `प्रयोजकमिदं तेषामत्रेदं नान्तरीयकम्' (वाo पद 2-42) इत्यनेन फलभेदेन प्रयोजकाप्रयोजकोपन्यसः ।

तदेवं प्रयुक्तेर्द्विभेदायाः सापवादायाः स्वरूपं निर्दिष्टमनेन श्लोकेनेति विज्ञेयम् । क्रमस्याविवक्षा प्रतिपक्षः । अस्य `इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभः' (2-81) इति स्वरूपम् । `क्रमोऽयमत्र बलवान् अस्मिस्तु न विवक्षितः' (2-81) इति प्रतिपक्षः । अधिकारिणः स्वरूपापवादौ `शास्त्रात् प्राप्ताधिकारोऽयं व्युदासोऽस्य क्रियान्तरे'(वाo प o 2-80) इति कृतौ ।

सामान्यातिदेशविशेषातिदेशयोस्त्वपवादविरहितं स्वरूपं निर्दिष्टम्---`सामान्यस्यातिदेशोऽयं विशेषोऽत्रातिदिश्यते' इति । ऊहस्य संबन्धाबाधोऽपवादः । अस्य `ऊहोऽस्मिन् विषये न्याय्यः' इति स्वरूपम् । `संबन्धोऽस्य न बाध्यते' इत्यपवादः । तुल्वबलानामविरोधात् समुच्चयो बाधस्यापवादः । तुल्यबलानामचरितार्थानां विरोधाद्विकल्पोऽपि बाधस्यापवादत्वेन दर्शितः । `अत्र बाधसमुच्चयौ' इति बाधस्य स्वरूपमपवादश्चोक्तः ।

तन्त्रस्याप्यावृत्तिप्रतिपक्षः । तस्य `इदं तन्त्रेण लभ्यते' इति स्वरूपम् । `इदमावृत्तिभेदाभ्याम्' (2-77) इत्यनेन तन्त्रस्यावृत्तिः प्रतिपक्ष उक्तः । एकप्रयत्न निर्वर्त्यमपीच्छावशाद्भेनेच्छतीति प्रासाङ्गिकस्यापवादो भेदः । तत्र `प्रासङ्गिकमिदं कार्यम्'(2-77) इति प्रासङ्गिकस्वरूपनिर्देशः । `आवृत्तिभेदाभ्यामि'त्यस्माद्भेदः प्रासङ्गिकस्यापवादो योजनीयः ।

यद्यपि परेषां चोदनैव प्रमाणं प्रसिद्धम्, तथापीह टीकाकारो न्यायमात्रस्य प्रमाणत्वमङ्गीकरोति । अतः प्रकृतशास्त्रव्याख्योपयोगितत्तत्स्थाने न्यायजातं `प्रसज्य प्रतिषेधोऽयम्' इत्यादिना प्रदर्शयति ।

अत एव चोदनायामेव प्रमाणत्वस्याभावात् प्रथममेव लक्षणनिदर्शनं न कृतम् । सामान्येन वाक्यधर्माणां प्रसङ्गिकादीनां सापवादानामत्र निर्देशः कृत इत्यभिप्रायः ।

एतदुक्तंभवति---पदपदार्थव्यवस्थापनाप्रस्तावेयोयः कश्चित्तद्व्यवस्थापने न्यायः प्रभवति स स कीर्तनीयः । तदत्र चोदनायाः कीदृशं प्राथम्यं प्राधान्यं वा तन्त्रप्रसङ्गौ तु सूत्रे कृताविति तत्पुरः सरत्वेनैव पदपदार्थावधानमिति । समुच्चयो विकल्प आवृत्तिश्चेत्येवमादिभिः सह द्वाविंशतिर्लक्षणानि भवन्ति । द्वे लक्षणे लक्षणसमुद्देशादूह्ये । अथवा सामान्यतिदेशस्य तदभाव एवापवादः । विशेषातिदेशस्य सामान्यातिदेश एव विशेषान्तरातिदेशो वेत्यनयोः सप्रतिपक्षत्वमाश्रित्य चतुर्विंशतिः संपद्यन्त इत्येवमनेन क्रमेणैतानि लक्षणानि । एतदेव मनसिकृत्य षड्द्वादश चतुर्विंशतिर्वा लक्षणानीत्युक्तम् । अथैषां निदर्शनार्थं लेशतः स्वरूपसहितान्युदाहरणानि टीकाकारेण प्रदर्शितानि । तत्र द्वयोरर्थिनोः कार्येण संभविना प्रयोजकत्वेन निर्ज्ञातसामर्थ्ययोर्यत्रान्यतरप्रयुक्तेनापरोऽभिसंबध्यमानः कृतार्थत्वात् पृथक्प्रयोजकत्वं नोपैति स प्रसङ्गः । तत्प्रयोजनकं प्रासङ्गिकम् । तद्यथा सघाताध्ययनम् । तत्र हि कञ्चिदेव शिष्यमुद्दिश्य प्रवृत्तेऽध्यापने भेदेनाध्यापनान्तरस्य प्रयोजने समर्थतरा अध्येतारः सत्यप्यर्थित्वे पृथगध्यापनं संभवाल्लाघवाच्च न प्रवर्तयन्तिः अपित्वेकेनैव यत्नेन तदनुतिष्ठन्ति ।

वेदे यथा--अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपन्ति । अत्राग्नीषोमीयपश्वर्थः प्रयाजानुयजविध्यन्तः प्रसङ्गादग्नीषोमीयं पशुपुरोडाशमप्युपकरोति ।

शब्दानुशासनेऽपि यथा--सर्वादीनि सर्वनामानीत्यत्र णत्वाभावं प्रासङ्गिकमुदाहरन्ति । तत्र हि संज्ञासंज्ञिसंबन्धविधानपरे वाक्ये रूपविशेषमात्रादकृतणत्वादुभयसाधनत्वं विज्ञायते । शक्यो ह्यस्य स्वरूपनिर्देशात् पृथग् णत्वप्रतिषेधो वक्तुमित्येकेनैव प्रयत्नेनोभयमत्र वर्तत इति ।

अथ तन्त्रम् । यत्रार्थिनः सर्वे प्रयोजका (क) भेदेनावृत्त्या वा योऽर्थः प्रतिपत्तव्यस्तमर्थमेकमेव संभवाल्लाघवाच्च प्रयोजयन्ति तत्तन्त्रम्। तद्यथा--शालायामेकं प्रदीपं व्याकरणाध्यायिनः प्रयोजयन्ति ।

वेदे यथा--प्रधानभूता ये षड्यागा आग्नेयादयस्तदर्थं ये प्रयाजादयस्ते पूर्वं पश्चाद्वा कृताः सर्वेषां तन्त्रेण साधारण्येनोपकारका भवन्तीत्युच्यते ।

शास्त्रे यथा--भिन्नार्थयोस्तपरशब्दयोस्तपरस्तत्कालस्येति तन्त्रिणोः सूत्र उपादानं क्रियत इति । एवं च तत्र तत्र लक्षणेष्वपि तन्त्रलक्षणं प्रभवत्येवेति विज्ञेयम् । तद्यथा--संख्यासंज्ञायां रूपविशेषानुरोधात्ततत्प्रदेशेषु तन्त्रेणैव युगपदुभयप्रतिपत्तिरिति । अथावृत्तिभेदयोस्तन्त्रप्रसङ्गप्रतियोगिनोर्निदर्शनमुच्यते । आवृत्तौ तावत्तन्त्रप्रतिपक्षभूतायां निदर्शनम् । यथा एकं वस्त्रमाभरणं वा रणभूमिषु भटानामुपयेगाय कल्पत इति ।

वेदे यथा---सप्तदश सामिधेन्यो भवन्तीति । अत्रैकशब्ददर्शने सामिधेनीषु सप्तदशत्वमावृत्तिसंख्यामात् प्रकल्प्यते । यदुच्यते--"त्रिः

प्रथमामन्वाह, त्रिरुत्तमामन्वाह" इति ।

व्याकरणे यथा---संप्रसारणसंज्ञायां ज्ञापकपक्षानाश्रयणेन वर्णवाक्यविषयया आवृत्त्या कृत्स्नस्य भिन्नप्रतीयमानोपस्कारा प्रवृत्तिराख्यायते । यथा चैकशब्ददर्शने "एकाजनेकाज्ग्रहणेषु चावृत्तिसख्यानात्" इति परिहार उच्यते । भेदस्य तन्त्रप्रतियोगिनो निदर्शनम् । यथा भिन्नानि पात्राण्यसह(णिसह) भुजां भुजिक्रियायां भेदेनाधिकरणभावं प्रतिपद्यन्ते ।

वैदिकेऽपि विषये यथा---ग्रहं संमार्ष्टि" इत्यत्र यः संमार्गो ग्रहविषये चोदितः, स भेदेनैव व्यवतिष्ठन इति । शास्त्रे यथा--`न वेति विभाषा" इत्येतस्मिन् योगे प्रत्याख्यानमुभयत्र विभाषाणां क्वचिद्विधिमुखेन क्वचित् प्रतिषेधमुखेन विभक्तानां विभक्त (प्र) वृत्तिराश्रीयत इति ।

अथ बाधानिदर्शनं क्रियते । अर्थित्वात् सामान्योपदेशाद्वा सति प्रवृत्तिसंभवे दृष्टादृष्टार्थमप्राप्त्यनुमानमात्रं यत्र सा बाधा । यथार्थित्वात् प्रवृत्ते सामान्येन भक्षणे `अभक्ष्यो ग्राम्यकुकुटः'इति ग्राम्यकुकुटभक्षणं क्षुत्प्रतिघातार्थमर्थित्वात् प्राप्तमनेन बाध्यत इति वैदिकमुदाहरणम् ।

लौकिकं यथा--`ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यत्र दधिदानमौत्सर्गिकं तक्रदानेन विशिष्टे विषये बाध्यत इति । शास्त्रे यथा--- `कर्मण्यण्' इत्यस्य `आतोऽनुपसर्गे कः' इति कप्रत्ययेन बाधेति । एषा च टीकाकृता स्ववृत्तौ सा च तुल्यबलेष्वसंभवादित्यादिना बहुप्रकारा दर्शिता । न चेयत्ता प्रकाराणामस्यास्तेनापि तत्र दर्शिता । यस्मादुक्तम्--"सेयमपरिमाणविकल्पा बाधा विस्तरेण बाधासमुद्देशे समर्थयिष्यते" इति ।

अथ समुच्चयः । तुल्यबलानामविरोधिनां समुच्चयः । तद्यथा---`देवदत्तं भोजय लवणेन सर्पिषा शाकेन च' इति । वेदेऽपि -- `ब्राह्मणेभ्यः पाद्यमाचमनं च दीयताम्' इति शास्त्रेऽप्यविरोधात् फलभेदाच्च प्रत्ययकृत्कृत्यसंज्ञाः प्रत्ययतद्धितताद्राजसंज्ञाश्चैकत्र समुच्चीयन्त इति ।

विकल्पोऽपि बाधाप्रतियोगी । स च तुल्यप्रमाणविशिष्टानां विरुद्धानां भवति । वेदे यथा--`व्रीहिभिर्यजेत', `यवैर्यजेत' इति । लोके दधितक्रे कौण्डिन्याय दीयेतामित्येकफलदधितक्रदानचोदने ।

शास्त्रेऽपि ण्वुलतृचावित्यादि विधिप्रतिषेधयोरपि तुल्यबलत्वे विरोधाद्विकल्पो भवत्येव । यथा -- वेदे "षोडशिनं गृह्णाति न गृहणाति" इति । लोकेऽपि किंचिदस्य दीयतां न दीयतामिति । शास्त्रेऽपि---"वाग्रहणानर्थक्यं विधिनिषेधसामर्थ्यादुभयोः सिद्धत्वात्" इति । यथा प्रदर्शितं स्ववृत्तौ टीकाकारेण । विधिप्रतिषेधयोः खल्वपि तुल्यबलत्वे वेरोधाद्विप्रतिषेधमाह---नासिकादिभ्यो विभाषायाः `सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन ।' अयं विधिः स प्रतिषेधो विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः । अयमपि विधिर्न मृद्वनामिव कार्पासानां कृतः प्रतिषेधविषय एवारभ्यते । स यथैव बह्वज्लक्षणं संयोगोपधलक्षणं च बाधते । एवं विद्यमानपूर्वलक्षणमपि । तत्र पुरस्तान्मध्येऽपवादा इति बाधकत्वे प्रतिषिद्धे विप्रतिषेथाद्वाधाव्यवस्थाप्यत इति ।। 77 ।

ऊहोऽस्मिन् विषये न्याय्यः सम्बन्धोऽस्य न बाध्यते ।
सामान्यस्यातिदेशोऽयं विशेषोऽत्रातिदिश्यते ।। 78 ।

ऊहः खल्वपि प्रकृतौ समर्थानां विकारे सामर्थ्याभावात् प्रकृतिरूपलिङ्गवचनान्तरोपादानेन क्रियते । तद्यथा--प्रकृतावग्नय इत्यग्निशब्दः समर्थोऽङ्गरार्थो दृष्टः । तत्र विकारे सूर्यायेत्यूह इत्येवमादिना निमित्तभेदेन बहुभेदो भवत्यूह इति वैदिकमुदाहरणम् ।

लोकेऽपि यथा--देवदत्तस्योच्चानि गृहाणि आढ्यो वैधवेय इत्यत्र षण्ठ्यन्तमपोह्य निमित्तवशात् प्रथमान्त ऊह्यते । व्याकरणेऽप्यूहविषयत्वमापन्नाः सर्वे विभक्तिविपरिणामाः । तेषु हि योगान्तरे यथा विभक्त्या सम्बद्धो यः शब्द उपलब्धस्तत्संबन्धत्यागेनैव विभक्त्यन्तरयोगं स प्रतिपद्यते । तद्यथा -- `उपदेशेऽजनुनासिक इत्, इतो लोपः, भूवादयो धातवः, धातोरनुदात्तेतो ङित आत्मनेपदमि'ति ।

अथोहप्रतिपक्षभूतं सम्बन्धाबाधनमपि निदर्श्यते । यथा देवदत्तस्योच्चानि गृहाणि युक्तं तान्यभिजातस्येति । अत्र यद्विभक्त्यन्तस्यैव श्रुतिः, तथा वाक्यान्तरेऽप्यभिसम्बन्ध इति । तथा बदरी सूक्ष्मकण्टका मधुरा वृक्षः, पञ्चाला जनपद इत्येवमादिषु सम्बन्धाबाधनं भवतीत्याहुः ।

वेदेऽपि यथा---यजमानं दण्देन दीक्षयति, अद्भिर्दोक्षयति, मेखलया दीक्षयतीत्यत्र यजमानमित्यबाधितमेव सम्बध्यते । शास्त्रेऽपि -- बहुगणवतुडतिसंख्ये (पा o 1-1-23) ति योगे विधीयमानसम्बन्धस्य स्वरूपपदार्थकस्य संख्याशब्दस्य श्रुतस्य योगान्तरे संज्ञिवेशेषणत्वं विज्ञायते । ष्णान्ता संख्या षट्संज्ञा भवतीति ।

अथातिदेशनिर्देशः क्रियते । अन्यत्रान्यधर्मपरिप्रापणमतिदेशः । तस्य च द्वौ प्रकारौ सामान्यतिदेशो विशेषातिदेशश्चेति । सामान्यातिदेशो यथा---अन्यत्र रूढसम्बन्धा धर्मा निर्ज्ञातभेदेष्वर्थेषु प्रसिद्धेरनुमेयभेदसम्भवैः सम्बन्धिभिर्व्यपदिश्यन्ते । तद्यथा--ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यावानर्थो ब्राह्मणशब्दं न व्यभिचरति तावत्यर्थे यान सम्बद्धानि कार्याणि तान्यत्यन्तमलब्धब्राह्मणव्यपदेशे क्षत्रियेऽतिदिश्यन्ते । तथा गुरुवद् गुरुपुत्रे वर्तितव्यमिति । वेदे यथा--दर्शपूर्णमासवदन्येष्वपि यागेषु प्रचरितव्यमिति । शास्त्रेऽपि -- `स्थानिवदादेशोऽनल्विधौ' इति ।

अथविशेषातिदेशः । निर्ज्ञातसामान्यकार्येषु ब्राह्मणादिषु पुनरतिदेशसमर्थ्याद्विशिष्टप्रकृतिगतकार्यातिदेशः । यथा ब्राह्मणवदस्मिन् ब्राह्मणे वर्तितव्यमिति । अत्र ये ब्राह्मणे ब्राह्मणवदेव वर्तन्ते तान् प्रत्ययमेवंभूतोऽतिदेशो विज्ञायते । येषां तु संभेदात् प्रसङ्गाद्वा व्यतिकरस्तेषु नियम एव क्रियते । उक्तं च --

सामान्यमात्रं शब्दार्थो विशेषा व्यभिचारिणः ।
सामर्थ्यमन्तरेणातो विशेषो नातिदिश्यते ।। इति ।

तत्र वेदे यथा--`आग्नेयवत् सौर्ये' इत्यत्रैकदेवताकस्यैकदेवताकसंबन्ध्येव विध्यन्त इति । विध्यन्त इतिकर्तव्यतोच्यते ।

शास्त्रे रूपातिदेशादिभिः षड्भिः प्रकारैर्विशेषातिदेशः परिदृश्यते । तत्र रूपातिदेशो यथा---`द्विर्वचनेऽचि' इत्यत्र हि धातुरूपमेवादेशस्यातिदिश्यते । ततश्च `या' कृ इत्यादीनामेव द्विर्वचनं भवति । यथा---ययतुश्चक्रतुरिति ।

निमित्तातिदेशो यथा--पूर्ववत्सन इति । अत्र पूर्वस्य यन्निमित्तमात्मनेपदे ङकारादि तदेव सन्नन्तस्यातिश्यति इति ।

तादात्म्यातिदेशो यथा---`सुबामन्त्रिते पराङ्गवत् स्वरे' इति । सुबन्तमामन्त्रितस्य मृत्पासूदकवत् तादात्म्यमापद्य तत्स्वरं लभत इति ।

शास्त्रातिदेशः कार्यातिदेशो वा यथा---कर्मवत्कर्मणातुल्यक्रिय इति । अत्र हि शास्त्रातिदेशे यकः शपा बाधनं स्यादिति यग्विधौ कर्मकर्तर्युमसंख्यानमारभ्यते । विप्रतिषेधाद्धि शपो बलीयस्त्वमिति । कार्यातिदेशे तु कर्मवत्कर्मणेत्यनेनैव यग्विधीयत् इति यक एव परत्वान्नास्त्यस्य शपा बाधेति नोपसंख्यानारम्भः ।

व्यपदेशातिदेशस्तु--व्याकरणे नैव सम्भवति, संज्ञापक्षादविशेषाद् वत्करणवैफल्यप्रसङ्गच्चेति ।। 78 ।

अर्थित्वमत्र सामर्थ्यमस्मिन्नर्थो न भिद्यते ।

शास्त्रात् प्राप्ताधिकारोऽयं व्युदासोऽस्य क्रियान्तरे ।। 79 ।

अथाधिकारस्य निदर्शनम् । अर्थित्वं सामर्थ्यं शास्त्रापर्युदासयोगित्वमधिकारः स विद्यते यस्यासावधिकारी । अर्थित्वमधिकारकारणम् । परं हि पुरुषार्थमत्रापवर्गमाचक्षते । अस्मादप्यर्थो प्रमाद्यति कश्चिदिति सत्येवार्थित्वे सामथ्यमधिकारकारणम् । उत्पन्नायामपि ह्यभिनयदिदृक्षायामन्धो दर्शने नाधिक्रियते । अर्थिनः खल्वपि सामर्थ्याभावः केषुचित्कर्मसु शास्त्रेण पर्युदासात् । यथा शूदास्त्रय्यां नाधिक्रियन्ते । अदृष्टार्थविशेषे हि सामर्थ्यासामर्थ्ये शास्त्रादेव समधिगम्येते । तस्मात् प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षते । तत्र लोके यथा---अद्यप्रभृति त्वमत्र ग्रामे नगरे वाऽधिकृत इति राजा नियुङ्क्ते ।

वेदे यथा---`अग्निहोत्रं जुहुयात् स्वर्गकामो ब्राह्मणः' इत्यत्र ब्राह्मणस्यार्थित्वादिभिरधिकार इति । शास्त्रस्य तु शब्दार्थपुरुषधर्मेष्वधिकारः ।

तत्र षोढा शब्दः--साधुरसाधुश्च । साधुरपि शास्त्रीयः प्रयोगिकश्च । शास्त्रीयोऽपि त्रेधा--प्रतिपाद्यः, प्रतिपादकःष उभयरूपश्च । तत्र प्रतिपाद्यो यथा---दाधर्त्यादिर्निपात्यमानः । प्रतिपादको यथा---प्रकृतिप्रत्ययादिः । तेन हि कुम्भकारादिः प्रयोगस्थः प्रतिपाद्यते । उभयरूपो यथा---इतव्यशब्दः । स हि तव्यशब्देन प्रतिपाद्यते । प्रयोगस्थं च स इतव्यशब्दं प्रतिपादयति ।

प्रायोगिकश्च लौकिकवैदिकभेदेन द्विधा---इत्येवसाधुना सह षोढा शब्दः । तेषु मध्ये प्रतिपाद्येषु व्याकरणशास्त्रस्याधिकारः, न प्रकृत्यादिषु । नहि ते व्याकरणेन व्युत्पाद्यन्त इति ।

अर्थोऽष्टादशधा । तत्र वस्तुमात्रमभिधेयश्च । अभिधेयोऽपि द्विधाशास्त्रीयो लौकिकश्च । पुनरपि विशिष्टावग्रहसंप्रत्ययहेतुस्तद्विपरीतश्च, मुख्यः परिकल्पितरूपविपर्यासश्च, व्यपदेश्योऽव्यपदेश्यश्च, सत्त्वभावमापन्नोऽसत्त्वभूतश्च, स्थिरलक्षणो विवक्षाप्रापितसंनिधानश्च, अभिधीयसानः प्रतिपाद्यमानश्च, अभिसंहितो नान्तरीयकश्चेति । तत्र वस्तुमात्रं बाह्यार्थो यो वक्तुं प्रतिपादयितुं न समीहितः । यस्तु समीहितोऽसावभिधेयः । तत्रैव च शब्दस्याधइकारः ।

स च द्विधा शास्त्रीयलौकिकभेदेन । तत्र शास्त्रिय आवापोद्धारिकः । लौकिकस्त्वखण्डः । लौकिके चार्थे शब्दस्याधिकारो न शास्त्रीये । शास्त्रीयो हि पौरुषेयः परिकल्पितः ।

एवमतथाभूतोऽपि शब्दसाधुत्वस्य निमित्तभावेन प्रतिपादको विज्ञायते । अतश्च तस्य व्यभिचारेऽप्यव्यभिचार एव स्मर्तृणाम् । स चानियतावधिर्बहुधा प्रविभज्यत व्याख्यातृभिः ।

विशिष्टावग्रहसंप्रत्ययहेतुर्यथा--कंसं घातयति, बलिं बन्धयतीति । अत्र ह्यर्थो न तथाभूतोऽपि तु विशिष्टाकारेणैव सम्प्रत्ययेन गोचरीकृतो व्यवहारविषयतामनुपतति । तद्विपरीतो यो बहिरेव तथा व्यवस्थितः । यथा गौः शुक्ल इत्यादि । मुख्यो यथा सास्नादिमान् गौरिति । परिकल्पितो निमित्तवशेन रूपविपर्यासो यस्यासौ परिकल्पितनिमित्तरूपविपर्यासो गौणोऽर्थ उच्यते । यथा गौर्वाहीक इति । व्यपदेश्य आवापोद्धारिक (अपोद्धारिकः) एव जातिर्वा द्रव्यं वेत्येवमुक्त इति । अव्यपदेश्यस्त्वखण्ड एव वाक्यार्थलक्षण इति ।

सत्त्वभावमापन्नो व्यपदेश्य एवावापोद्धारिकसंज्ञकः । असत्त्वभूतो वाक्यार्थलक्षण एव । उक्तिभेदादेवात्र प्रयशो भेदकथनम् । स्थिरलक्षणो यथा---राजरुरुष इत्यत्र राजसंबन्धित्वं पुरुषस्य, तद्धि न व्यभिचरति ।

विवक्षाप्रापितसन्निधानो यथा--राज्ञः, पुरुषस्येति । अत्र हि संबन्धित्वं व्यभिचरति, विशेषणाविशेष्ययोर्यथेष्टत्वात् । अभिधीयमानो यथा---राजसख इत्यत्र राज्ञः सखाऽयमित्यर्थोऽभिधीयते । तस्मिंस्त्वभिधीयमाने राजा सखाऽस्येत्ययमर्थः प्रतीयमान एव ।

अभिसंहितो यथा---गोशब्दे जातिर्द्रव्यं वेति । नान्तरीयको यथा तत्रैव वर्णसंस्थानादिः- इत्येवमभिधेयभेदा उपदर्शनीयाः ।

पुरुषधर्मा वक्तृत्वप्रतिपत्तृत्वप्रभृतयः । तत्र वक्तृधर्मा आबाधः, असूयाऽसम्मतिकोपकुत्सनभर्त्सनादयश्चेति । प्रतिपत्तृधर्मास्तु कुत्स्यमानत्वप्रभृतय एव । तत्र शास्त्रस्य प्लुतद्विर्वचनादिविधायकत्वेनाधिकार इति ।

अत्र च य एव धर्माः शब्दानां शास्त्रस्य वाऽनधिकारविषयत्वेनोक्तास्तानेवापेक्ष्योच्यते---व्युदासोऽस्य क्रियान्तर इति ।। 79 ।

इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः ।
क्रमोऽयमत्र बलवानस्मिंस्तु न विवक्षितः ।। 80 ।

अथ क्रमस्य निदर्शनम् । `इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः' इति श्रुत्यादिभेदेनायं क्रमो नैकप्रकारः । तथा च श्रुतिक्रमः, अर्थक्रमः, पाठक्रमः, काण्डक्रमः प्रवृत्तिक्रमः, प्रयोगक्रमः, बुद्धिक्रमश्चेति । तत्र श्रुतिक्रमो यथा---स्नात्वा व्रजतीति । अत्र क्त्वाप्रत्ययेनैव श्रुत्या क्रम उक्तः । वेदे यथा--"हृदयस्याग्रेऽवद्यत्यथ जिह्वायाः" इत्यत्र श्रुत्यैवाग्रेऽथशब्दाभ्यां क्रमः उक्तः । शास्त्रेऽपि च `परस्मैपदानां णलतुस्' इत्यादौ यथासंख्यमनुदेशः समानामिति श्रुत्यैव क्रमः । अर्थः सामर्थ्यं तन्निमित्तः क्रमोऽर्थक्रमो यथा---भुक्त्वा स्नात्वा व्रजतीत्यत्र स्नानादीनामन्यथाशब्दोपात्तानामप्यर्थस्वरूपपर्यालोचनया स्नानादिक्रमो लक्ष्यते । वेदे यथा---अग्निहोत्रं जुहोति यवागूं श्रपयतीत्यत्र श्रपणं पश्चाद्विनिर्दिष्टमपि पूर्वमनुष्ठीयते, ततोऽग्निहोत्रमित्यर्थक्रमः ।
शास्त्रेऽपि `गुणकर्मणि लादिविधिः' इत्युक्तम् । तथा हि--गां दोग्धि पय इत्यत्र गावा कमेणा पूर्वं दुहेर्योगस्ततः पयसः । नह्यनुपादाय गां कश्चित् पय आदातुमर्हति । तस्मादत्र गोपयसोर्दुहिना यः क्रमेण सम्बन्धः, सोऽर्थसामर्थ्यादुपजायते । तस्मात् सत्यपि प्रधाने पयसि दुहेर्गवैव पूर्वं सम्बन्ध इति तत्रैव लादयोऽन्तरङ्गत्वादुत्पद्यन्ते गौर्दुग्धा सुदोहा गौरिति । उच्चारणक्रम एवपाठक्रमो यथा---

इन्दुस्वर्णैणमातङ्गपुंस्कोकिलकलापिनः ।
वक्त्रकान्तीक्षणगतिस्वरकेशैस्त्वया जिताः ।।

इत्यत्र यथापठितानां यथापठितैरेव सम्बन्ध इति । वेदे यथा---समिधो यजति, तनूनपातं यजति, इडो यजति बर्हिर्यजति, स्वाहाकारं यजतीत्वेवमात्मकेषु प्रयाजेषु यथापाठमेव क्रमेणानुष्ठानम् । शास्त्रे यथा--विप्रतिषेधे परं कार्यम्, पूर्वत्रासिद्धम् इति च । अत्र हि शास्त्रपाठमेवापेक्ष्येदं पूर्वमिदं परमिति व्यवस्थाप्यते । काण्क्रमो यथा येनैव क्रमेण ब्राह्मणक्षत्रियविशां वर्णसमाचारप्रतिपादकानि प्रकरणान्युद्दिष्टानि तेनैवाभिधीयन्त इति ।
वेदे तु कुत्रचिद् याज्ञे कर्मणि येनैव कण्डिकाक्रमेण कर्माणि चोद्यन्ते, तेनैव क्रमेण प्रवर्तन्ते । यथा याज्यानुवाक्यानामग्नेयादीनां च । अत्र येनैव क्रमेण याज्यानुवाक्यानां सन्निवेशः, तेनैव क्रमेणाग्नेयादीनां सन्निवेशात् काण्डक्रमेण सम्बन्धः । शास्त्रे यथा--द्विर्वचनकाण्डात् सम्प्रसारणकाण्डमिति । तदेव विप्रतिषेधे सति पूर्वं भवतीति ।
प्रवृत्तिक्रमो यथा---येनैव क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदितं कार्यं प्रतिलभन्त इति । वेदे यथा---"सप्तदश प्राजापत्यान् पशूनालभेत" इत्यत्र सप्तदशानामजानां प्रोक्षणविशसनपर्यग्निकरणानि क्रमेण चोदितानि । अनुष्ठातुः पुनरिच्छावशात्तेषु प्रवर्तमानस्य यत एवारभ्य पशोस्तेनानुष्ठात्रा तेषामाद्यस्यानुष्ठानमारब्धं तेनैव प्रवृत्तिक्रमेण पुनरपरयोरप्यनुष्ठानं विधत्त इति सोऽयं प्रतिपत्तरिच्छावशात् प्रवृत्तः क्रमः प्रवृत्तिक्रम इत्युच्यते ।
शास्त्रे यथा--भाष्य उक्तं ययैवानुपूर्व्याऽर्थानां प्रादुर्भावः, तयैव शब्दानामपि । यथापट्व्या मृद्व्येत्यत्र प्रथमं लिङ्गसंबन्धात् स्त्रीप्रत्यय उत्पद्यते, तदनु कर्मसंख्यादिसंबन्धादेकवचनमुत्पद्यते । तथैव च यणादेशादिकार्यं तेनैव क्रमेण प्रवर्तत इति ।
प्रपतिपत्तिक्रमो यथा--लुङलङ्लृङ्क्ष्वडुदात्त इत्यत्र यद्यपि प्रयोगे पूर्वमडागम उच्चार्यते, तथापि वयं विधिवाक्यार्थं प्तिपद्यमाना लुङादीन् प्रतिपद्यामहे, पश्चादडागममिति शास्त्रीयमुदाहरणम् ।
लोके यथा पुरुषो राज्ञ इत्युक्तेऽप्युच्चारणक्रममतिक्रम्य पाजार्थव्यवच्छेदेनैव पुरुषस्य प्रतिपत्तिः। वेदे यथा--प्रधानयागाः पूर्वमुक्ता अप्यवान्तरयागनिवर्तनानुसारेणैव प्रतिपत्तिमुपारोहन्ति । यथा--दीक्षणीयादीनां सोमस्य च । अत्र हि सोमयागस्य प्रधानस्य पूर्वं बुद्ध्युपारोहेऽपि दीक्षणीयादियागनिर्वतनपूर्वकमेव सोमप्रतिपत्तिः ।
प्रयोगक्रमस्तु यथा--डुकृञित्यादौ यथाऽऽनुपूर्व्या अनुबन्धाः प्रयुक्तास्तयैवेत्संज्ञां लभन्त इति शास्त्रीयमुदाहरणम् ।
वेदे यथा--दर्शपूर्णमासाभ्यामिष्ट्वाऽन्येन यजेत इत्यत्र दर्शपूर्णमासयागपूर्वकमन्यानुष्ठानं विज्ञेयम् । बुद्धिक्रमो यथा--शास्त्रे वर्णानामिको यणचीत्यादौ बुद्ध्या पौर्वापर्यं कल्प्यते । तथा च पौर्वापयमकालव्यपेतं संहिता चेत् पूर्वपराभावादसंहितम् । एकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानामित्याशङ्क्योक्तं भाष्यकारेण ।

"बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः ।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ।। "

इति शास्त्रे बुद्धिक्रमः । लोकेऽपि विद्यतः क्रमेण प्रवृता बुद्धौ संकलयति । वेदे प्रयाजादीनामुत्पन्नप्रधवंसिनां बुद्ध्यैव संकलनमिति बौद्धः क्रमः । सर्व एव वा बौद्धः क्रमो न वस्तुसमुत्थ इति । यदाहुः--"प्रतिपत्तिक्रमो न वस्तुसमुत्थः" इति ।

अथ एषां क्रमाणां बलाबलचिन्तां करोति--क्रमोऽयमत्र बलवानिति । यथा वेदे--प्रथमं भोजयितव्यस्ततोऽभ्यञ्जनमिति ।
अथ क्रमप्रतियोगिनं दर्शयितुमाह---अस्मिंस्तु न विवक्षित इति । क्रम इति प्रकृतम् । अविवक्षा क्रमस्य प्रतिपक्षः । तद्यथा वेदेऽनुष्ठातृणां क्रमविवक्षा निमित्तवशाद् दृश्यते । लोके प्रतिपत्तृणामपि दृश्यते । शास्त्रे यथोक्तं वार्त्तिककृता---अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति इत्यादि ।। 80 ।
अथ प्रयोजकाप्रयोजके निदर्श्येते--

इदं पराङ्गैः संबद्धमङ्गानामप्रयोजकम् ।
प्रयोजकमिदं तेषामत्रेदं नान्तरीयकम् ।। 81 ।

तत्र राजा छत्रच्छायायाः प्रयोजकः, इस्त्यादयस्तदाधारा अप्रयोजका अपि छत्रच्छायया संबध्यमानाः प्रयोजका उच्यन्त इत्येकफलतया प्रयोजकभावः ।
फलभेदेऽप्यूह्यमुदाहरणमिति लोके । वेदशास्त्रयोरप्यूह्यम् ।। 81 ।

इदं प्रधानं शेषोऽयं विनियोगक्रमस्त्वयम् ।
साक्षादस्योपकारीदमिदमाराद् विशेषकम् ।। 82 ।

अथं शेषिशेषौ दर्शयितुमाह--इदं प्रधानं शेषोऽयमिति ।
वेदे यथा--व्रीहीनवहन्तीति व्रीहयः शेषिणः, अवघातः शेषस्तदर्थत्वात् । लोकशास्त्रयोरुह्यमुदाहरणम् ।
अस्यैव शेषिशेषभावस्येतिकर्तव्यतां प्रदर्शयितुमाह--विनियोगक्रमस्त्वयमिति । तदेवं गुणप्रधानभावस्य परिकरबन्धसहितस्योपदर्शनं कृत्वा तत्रैवावान्तरभेदमाह--साक्षादस्योपकारीदमिदमाराद्विशेषकमिति ।
तत्र लोके साक्षादुपकारकं यथा स्वात्मन्यलङ्कारादि । आरात् तदेव पुत्रदारादिषु । शास्त्रेऽपि साक्षादुपकारकं प्रत्ययस्य प्रकृत्यादि ।
यत्तु प्रकृत्यादेर्विशेषणं तदारादुपकारकम् । यथा एरजित्यादाविवर्णान्तत्वादि धातोर्विशेषणम् । कर्तृविशेषणं च पश्चादीति । वेदेऽप्यवघातादि दर्शपूर्णमासयोः साक्षादङ्गम्, प्रयाजादिकं त्वारादुपकारकम् ।। 82 ।

शक्तिव्यापारभेदोऽस्मिन् फलमत्र तु भिद्यते ।
संबन्धाज्जातभेदोऽयं भेदस्तत्राविवक्षितः ।। 83 ।

इत्येवं सप्रभेदं सपरिकरबन्धं शेषशेषिभावमुपदर्श्येदानीं भेदं प्रदर्शयितुमाह--शक्तिव्यापारभेदोऽस्मिन्निति ।
शक्तिव्यापारभेदाश्रयणेन बहुविधो भेदो लक्ष्यते । तत्र लोके बलाहकाद् विद्योतते, बलाहके विद्योतते, बलाहको विद्योतत इत्यत्र बलाङ्कस्यापादानाधिकरणकर्तृशक्तीनां भेदः शास्त्रे चात्रैव विवक्षावशाद् व्यापारभेदश्चेत्येवं शक्तिव्यापारभेदः ।
(क्वचित्तु) शक्तिभेदमात्रम्, न तु व्यापारभेदः । यथा--धनुषा विध्यतीति । अत्र हि गर्भोकृतापादानशक्तिः करणशक्तिर्विध्यत्यर्थाभेदेन व्याप्रियते । न ह्यन्यथानाश्रितापादानशक्तिधनुषः करणत्वं संभवति । अत एवात्र संज्ञयोर्विप्रतिषेधो वर्ण्यते । व्यापारभेदस्तु शुद्धो न संभवति, शक्तिभेदमन्तरेण व्यापारभेदस्यासंभवात् ।
अथ फलभेदेन भेदमाह--फलमत्र तु भिद्यत इति । यथैकस्य दानस्यायुरारोग्यैश्वर्याणि भिन्नानि फलानि । अन्ये त्वायुष्यप्रभृतिषु सत्सु प्रीतिविशेषमेवैकं फलमाहुः । तथा बह्वीनां क्रियाणामेकं फलम्, यथा व्यवहारदर्शने प्रजानामेको निर्णयः । यथा वक्ष्यति--

भिन्नव्यापाररूपाणां व्यवहारादिदर्शने ।
कर्तृणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ।। इति (2-379) ।

प्रकारान्तरेणापि भेदं दर्शयितुमाह--संबन्धाज्जातभेदोऽयमिति । यथाऽऽख्यातेषु धातूपात्तायाः क्रियायाः प्रत्ययवाच्यकर्तृभेदे सति संबन्धात् क्रियाया अपि भेदः प्रतीयते, पचतः पचन्तीति । यथोक्तम्--"साधनभेदात् तिङ्क्षु फलाभावात् फलं भवत्येवावबोधश्चेत् साधनेभ्यः प्रसिद्धोऽसौ" इति ।
इदानीमस्यैव प्रतिपक्षभूतभेदं दर्शयितुमाह--भेदस्त्वत्राविवक्षितः इति । अत्र शक्त्यभेदो यथा--समानकर्तृकयोरित्यत्र पक्त्वौदनं भुङ्क्त इति कर्तृकर्मणोः क्रियाभेदेन प्राप्तः शक्तिभेदो वक्त्रा न विवक्षितः । तथा च सत्यत्र समानकर्तृकत्वमुपपन्नं भवति । व्यापाराभेदः प्रागेव दर्शितो धनुषा विध्यतीत्यत्र फलाभेदोऽपि पूर्वमुक्त एव । यथा दानस्यैका प्रीतिः फलमिति केचिदिति ।
संबन्धाज्जातभेदत्वस्य प्रतिपक्षो यत्र न सम्बन्धभेदाज्जातभेदत्वम् । यथाऽऽस्यते देवदत्तेनेत्यत्र भावे लकार उत्पन्नः साधनभेदानुपादानात् क्रियाभेदमपि

गमयितुं न शक्नोति ।
देवदत्तेनेत्यस्मात्तत्प्रतीतिरिति चेदेकपदापेक्षयैतदुक्तमस्माभिरित्यदोषः। तदेवं शक्त्यादिभेदेन बहुविधोऽयं भेद इति लक्ष्यैः स्वयमेवोत्प्रेक्ष्यः । तथा तत्प्रतिपक्षभूतस्तद्वदभेदोऽपि बहुविधि एव विज्ञेयः । अनयोश्च भेदोभेदयोः क्कचिद्वास्तवत्वम् क्कचिद्विवक्षामात्रशरणत्वम् । विवक्षापि क्कचिल्लौकिकी, क्कचित् प्रयोक्त्रीत्येतदप्यत्रानुसर्तव्यमिति ।
वेदेऽपि भेदव्यवहारो दृश्यते । यजते, ददाति, जुहोतीत्यादौ यागदानहोमरूपादनुबन्धबेदादपूर्वस्य भेदः । अभेदोऽपि यथा---
षण्णामप्याग्नेयादियागानामेकस्मिन्नेवापूर्वे साध्ये ऐक्यमिष्यति इति । एवं षड्द्वादश चतुर्विंशतिश्च लक्षणानि प्राकृतानि वैकृतानि च सप्रतिपक्षाणि दर्शितानि ।। 83 ।
इदानीं षड्द्वादशचतुर्विंशतिव्यतिरिक्त अप्यमी बहुप्रकारा न्यायाः पदार्थनिश्चयहेतवः सन्तीति प्रौढवादितया टीकाकारः प्रदर्शयितुमाह---

प्रसज्यप्रतिषेधोऽयं पर्युदासोऽयमत्र तु ।
इदं गौणमिदं मुख्यं व्यापीदं गुरु लघ्विदम् ।। 84 ।

तत्र प्रसज्यप्रतिषेधोऽयमिति । यत्र क्रियापदेन नञः संबन्धो वाक्यभेदश्च ।
शास्त्रे यथा--"अकर्तरि च कारके" इति ।
वेदे यथा---"ब्रह्मणो न हन्तव्यः । नानृतं वदेत्" इत्यादि ।

लोके यथा--"असूर्यंपश्या राजदारा" इति । "पर्युदासोऽयमत्र तु" इति । पयुदासः खलु प्रसज्यप्रतिषेधविपरीतस्तत्र ह्याख्यातेनैव नञः संबन्ध एकवाक्यता च ।
उक्तं च---"नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः" इति ।
तत्र शास्त्रे यथा---"आतोऽनुपसर्गे कः" इति । वेदे यथा---"अब्राह्मणः सोमविक्रयी" इत्यत्र जातिमात्रानुगमेन ब्राह्मणसदृशस्य कस्यचिदेव प्रतिपत्तिः ।
यथा च "नोद्यन्तमादित्यमीक्षेत" इत्येवमादि स्मार्तमुदाहरणदूरविप्रकर्षादत्र वैदिकमेव ।
लोके यथा---"अब्राह्मणमानय" इति । "इदं गौणम् " इति । शास्त्रे यथा---"तत्पुरुषः समानाधिकरणछ" इति । अत्रावयवानां समानाधिकरणत्वात् तत्पुरुषस्यापि समानाधिकरणत्वम् ।
वेदे यथा---"आदित्यो यूपः, यजमानः प्रस्तरः" इति । अत्र गुणाच्चाकचैक्यादेर्यूपादिरप्यादित्यादिरित्युच्यते ।
लोके च---"सिंहो माणवकः, गङ्गायां घोषः" इत्यादि ।
इदं मुख्यमिति । अत्र शास्त्रे यथा---"धातोछ", "प्रतिपदिकात्" इत्यादावभिधेयस्य मुख्यत्वम् ।
वेदे यथा---"यजमानोऽध्वर्युमन्वालभते" इत्यत्राध्वर्युयजमानौ मुक्यावेव ।
लोके यथा---"शूरो माणवकः" इति ।
"व्यापीदम्" इति । शास्त्रे यथा---"एकश्रुति दूरात्संबुद्धौ" इति । तत्र हि लौकिक्याः संबुद्धर्ग्रहणं व्यापित्वात् । तद्ग्रहणे हि शास्त्रीयापि संबुद्धिः परिगृहीता भवति । वक्ष्यति च---

विषयं कृत्रिमस्यापि लौकिकः क्कचिदुच्चरन् ।
व्याप्नोति दूरात् संबुद्धौ तथा च ग्रहणं द्वयोः ।। इति ।

यावत्सु चोभयानुग्रहस्तत्तत्र सर्वमनुगन्तव्यं व्यापित्वेनेति ।
वेदेऽपि---"सर्वे प्रधानयागविषया ज्योतिष्टोमेन" इत्याद्यधिकारविधयः ।
लोकेऽपि यथा---कयाचिदितिकर्तव्यतया सन्निहत्यामरसिन्धुस्नानम् ।
यदुच्यते---

उपोष्य रजनीमेकां सन्निहत्यां नरोत्तमः ।
सौर्ये तमसि गङ्गायां चान्द्रे चापि विमुच्यते ।। इति ।

अत्र सकृदेव स्नानात् त्रैलोक्याभ्यन्तरगतसर्वतीर्थस्नानमिति व्याप्युदाहरणं प्रसङ्गादुक्तम् ।
गुरु लघ्विदमिति । तत्र शास्त्रे यथा---`पृषोदरादीनि यथोपदिष्टमि'ति शिष्टप्रसिद्धसाधुशब्दौघप्रतिपादने लघुरुपायः । स एव तु

प्रातिपदिकादनभिहितकर्मादिगतैकत्वादौ स्वादय इत्यादिना गुरुरुपायः ।
लोकेऽपि--लोहितशालिमानयं ग्राम इत्यादिवचनव्यक्तिषु कर्मधारयमत्वर्थोययोरेकत्र क्रियमाणयोः गुरुप्रक्रम उपजायते, उघुत्वं तु प्रकमस्य बहुव्रीहेस्तेत्रेति ।
वेदे तु गुरुलाघवव्यवहारतन्त्रप्रसङ्गावृत्तिषु । तत्रावृत्तौ गुरुः प्रक्रमो यथा---त्रिः प्रथमामन्वाह त्रिरुत्तमामिति । तन्त्रप्रसङ्गयोस्तु लाघवव्यवहारो यथा निदर्शितं प्रागिति ।। 84 ।।

भेदेनाङ्गाङ्गिभावोऽस्य बहुधेदं विकल्प्यते ।
इदं नियम्यतेऽस्यात्र योग्यत्वमुपजायते ।। 85 ।।

भेदेनाङ्गाङ्गिभावोऽस्येति । यथा शास्त्रे---संयुक्तविधानेषु तस्यापत्यं कर्तरि कृदित्यादि ।
वेदे यथा---एकस्यैवावयवः संबध्यमानो व्यवहितैरपि वाक्यान्तरैः संबन्धमुपयाति । यथा---अच्छिद्रेणेत्यादिश्चित्पत्यादिभिरिति ।
पूर्वमेकैकस्यैवाङ्गाङ्गिभावः इदानीं बहूनामङ्गिनां यथा प्रदर्शितमेकमङ्गमिति पुनरस्योपादानम् ।
लोकेऽपि---
मणिः शाणोल्लीढः शरदि सरितः श्यानपुलिनाः
कलाशेषश्चन्द्रः सुरतमृदिता बाललनाः ।
मदक्षीणो नागः समरविजयी हेतिनिहत
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ।। (नीतिशतकम् 30)
इत्यादिदीपकालङ्गारेष्वेकस्या एव क्रियाया बहुभिर्वाक्यैः सम्बन्ध इति ।
बहुभेदं विकल्प्यत इति । तत्र शास्त्रे यथा---क्कचित्प्राप्तिविकल्पः, क्कचिदप्राप्तविकल्पः, क्कचिदुभयविकल्पः ।
वेदे यथा---"यत्किञ्चित् प्रागग्नीषोमीयात्तत्सर्वमुपांशु कर्तव्यम्" इत्यत्रोपांशुस्वरे प्राप्ते दीक्षणीयायां यथेष्टमुच्चैः स्वरविधानमित्यादि ।
लोके यथा--`किं तारुण्यतरोरियमि' त्यादौ महाकविभिरुत्प्रेक्षिता विकल्पाः । इदं नियम्यत इति । शास्त्रे यथा--`पतिः समास एव", "ते प्राग्धातोछ" इत्यादि।
वेदे यथा---"नक्षत्रदृष्ट्वा वाचं विसृजेत्" इति । अत्र नियत एव काले वाग्विसर्गो नियमितः ।
लोकेऽपि यथा--पार्थ एव धनुर्धर इत्यत्र धानुष्कत्वं पार्थे नियम्यते ।
अस्यात्र योग्यत्वमुपजायत इति । यथा शास्त्रे---"उः स्थानेऽणः प्रसज्यमानस्यैव रपरत्वं प्रति योग्यत्वमुपजायते" इति । यथा वा--"पद एकस्मिन्नुदात्ते स्वरिते वा क्रियमाणे वर्ज्यमानशेषस्य निद्याते योग्यत्वमुपजायते" इति ।
वेदे यथा---"ज्योतिष्टोमेन यजेत" इत्यत्र त्रैवर्णिकस्यैव योग्यत्वम् ।
लोके यथोच्यते---"धुरि धुर्यो नियुज्यते" इति । यो यः कश्चिदर्थो समर्थः शास्त्रेणापर्युदस्तः स योग्य इत्युच्यते ।। 85 ।।

अस्य वाक्यान्तरे दृष्टाल्लिङ्गाद्भेदोऽनुमीयते ।
अयं शब्दादपोद्धृत्य पदार्थः प्रविभज्यते ।। 86 ।।

अस्य वाक्यान्तरे दृष्टाल्लिङ्गात् भेदः प्रतीयत इति । शाश्त्रे यथा---`ओः पुयण्ज्यपरे' इति वचनाण् णौ कृतं स्थानिवद्भवतीति ।
वेदे यथा---"अक्ताः शर्करा उपदधाति" इत्यत्र केनाक्ता इत्याकाङ्क्षायाम् "तेजो वै घृतम्" इति घृतस्तुतेर्वाक्यान्तराल्लिङ्गाद् घृतेनाक्ता इति विशेषः प्रतीयते ।
लोके यथा---रामोऽसौ भुवनेष्वत्यादौ दाशारथिः परशुरामो वेति संशये वाक्यान्तरगतात् "एकबाणहतश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः" इति लिङ्गाद् दाशरथिप्रतिपत्तिरेवेति । अयं शब्दादपोद्धत्य पदार्थः प्रविभज्यत इति ।
शास्त्रे यथा---धृषिशसी वैयात्ये इत्यास्माद्वैयात्यशब्दादपोद्धत्य वियातभावो वैयात्यमिति विभज्यते ।
वेदे यथा---वायव्यं श्वेतमालभेतेत्यस्माद्वाक्याद्वायव्यपदार्थादपोद्धृत्य "वायुर्वै क्षेपिष्ठा देवता" इति प्रविभज्यते । लोकेऽपि राजपुरुष इत्युक्ते कस्य राज्ञः, शूद्रकस्येति प्रशनोत्तरयो राजपदार्थप्रविभागः ।। 86 ।।

इदानीं प्रकृते चोद्यमुपसंहर्तुमाह---

इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः ।
सर्वे ते न प्रकल्पेरन् पदं चेत् स्यादवाचकम् ।। 87 ।।

अनंशे वाक्येऽभ्युपगम्यमाने वाक्येषु पदसमुदायरूपेषु सत्यपदार्थोपनिबन्धनेषु ये धर्मा वाक्यार्थानुग्राहिणः पदार्थविशेषसंप्रत्ययप्रतिबद्धस्ते सर्वेऽत्राऽविद्यमानोद्देशप्रविभागे न प्रतिष्ठां लभेरन्, यदि सत्यं पदं वाचकं न स्यादिति पदवादी प्रत्यवतिष्ठते ।। 87 ।।
एवं पदवादिनाऽखण्डवाक्यवादिनो दूषणव्राते समापिते इदानीमेतत् समाधातुमखण्डवाक्यवाद्याह---

अविभक्तेऽपि वाक्यार्थे शक्तिभेदादपोद्धृते ।
वाक्यान्तरविभागेन यथाक्तं न विरुध्यते ।। 88 ।।

एतत्सव यथोक्तमस्मत्पक्षे न विरुध्यते । तथा चास्मत्पक्षेऽविभक्ते निर्विभागे वाक्यार्थे एकस्मिन्नपि तस्मिन् पानकरसादिवत्समाश्रीयमाणे शक्तिभेदसमाश्रयणेन चापोद्धृते कृतापोद्धारे सत्यवान्तरवाक्यार्थोपजननात् सर्वमेतत्सिध्यतीति तात्पर्यम् । यथा शाक्यदर्शने निर्विभागमेकमेव सकलत्रैलोक्यविलक्षणं सत्त्वं स्वलक्षणमभ्युपगम्यते, तत्तदितरपदार्थव्यावृत्तिसमाश्रयणेन च जात्यादिव्यवहारः कश्चिन्निर्वाह्यते, तथैवाखण्डवाक्यवादिना शक्तिभेदाद्वाक्यार्थप्रविभागे कृते सर्वं युज्यत इति न कश्चिद् दोषः । `वाक्यान्तरविभागेन' ।
`अविभक्तेऽपि वाक्यार्थे' इति च वाक्यवाक्यार्थयोरेकयोगक्षेमत्वादुक्तम् । पदार्थासंभवपूर्वके चोद्ये `वाक्यान्तरविभागेन' इत्युत्तरमसमीचीनमिव लक्ष्यत इति चेत्, बाध्यबाधकभावादिन्यायो वाक्येष्वपि दृश्यते । ततो महावाक्यापेक्षयाऽवान्तरवाक्योपप्लावनेन तदपि न विरुध्यत इत्युपदर्शितम्, तदुपदर्शनेन परिमितपरिमाणेऽपि वाक्ये पदार्थापोद्धारनिबन्धना अप्येते न्यायाः सम्भवन्तीत्युपदर्शितमेव भवति।।88।। एतदेव प्रसिद्धदृष्टान्तोपदर्शनेन द्रढयितुमाह---

यथैवैकस्य गन्धस्य मेदेन परिकल्पना ।
पुष्पादिषु तथा वाक्येऽप्यर्थमेदो विधीयते ।। 89 ।।

स्त्रक्चन्दनादावेक उपसन्निविष्ट एव गन्धस्तस्य त्वपोद्धारसमाश्रयणेन भेदः कल्प्यतेऽयं पुषपगन्धोऽयं चन्दनगन्ध इत्यादि । तथा वाक्य एवार्थापोद्धारसमाश्रयणेन पदार्थभेद उपपद्यते---अयं देवदत्तपदार्थः, अयं गोपदार्थ इत्यादि ।। 89 ।।

गवये नरसिंहे वाप्येकज्ञानावृते यथा ।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ।। 90 ।।

दृष्टान्तान्तरमाह--
एकज्ञानेनाभिन्नेनैवावृते विषयीकृते परिच्छिन्ने गवयादौ सति तदेकदेशं प्रसिद्धजात्यन्तरस्यैव प्रतिपद्यते । एवमपोद्धारसमाश्रयणेन सर्वन्यायसमर्थने कृते तत्समानयोगक्षेमतया प्रतिनिधिः स्तुतिवाक्यविरोधश्च समर्थित एव । अग्रे त्ववान्तरवाक्यानामर्थवत्त्वं समर्थयिष्यते ।। 90 ।।

अप्रसिद्धं तु यं भागमदृष्टमनुपश्यति ।
तावत्यसंविदं मूढः सर्वत्र प्रतिपद्यते ।। 91 ।।

अधुना तमेवापोद्धारमाश्रित्य पिकादिसंदेहे चोद्यमुद्धर्तुं प्रस्तावनां करोति---
तत्र च गवयादौ भागमप्रसिद्धमदृष्टमनिश्चितमनुपश्यति मूढः परमार्थतस्तु संवित्तस्य सर्वत्र निर्विभागे तस्मिन् कुतश्चित्कारणान्नोत्पन्ना । सर्वत्रायमसंविदं तावत्पुनः (मसंविदानोऽप्यसंविदं तावत्येव पुनः) प्रतिपद्यत इति ।। 91 ।।

तथा पिकादियोगेन वाक्येऽत्यन्तविलक्षणे ।
सदृशस्येव संज्ञानमसतोऽर्थस्य मन्यते ।। 92 ।।

प्रकृते योजयितुमाह--
वनात् पिक आनीयतामित्येतद्वनाद् ऋक्ष आनीयतामित्येतस्माद्वाक्यान्तरादत्यन्तविलक्षणमेव । वनादानीयतामिति चात्रासन्नेवार्थो वनाद् ऋक्ष आनीयतामित्यस्य क्रमवशात् सदृश इति मन्यते । परमार्थतस्तु पिकादियोगात् सकलमेवात्यन्तविलक्षणम् । एकपदार्थसंदेहे सकलमेवाज्ञातं वाक्यमित्युच्यते

।। 92 ।।

एकस्य भागे सादृश्यं भागे मेदश्च लक्ष्यते ।
निर्भागस्य प्रकाशस्य निर्भागेणैव चेतसा ।। 93 ।।

दृष्टान्तमाह--
यथैकमेव नीलपीतादिज्ञानं प्रकाशस्वभावाद् निरंशमेवोपजातं तस्यज्ञानत्वेन सादृश्यं मन्यते । नीलपीतादिना च भेदः । वस्तुतः पुनर्भिन्नमेव नीलज्ञानं पीतज्ञानादिति न तत्रानुगमः कश्चित् ।
अथवा चित्रज्ञानयोरेव भागे सादृश्यं भागे भेदं प्रतिपद्यते । किञ्चिद्धि चित्रज्ञानं नीलहरितोल्लेखि । किञ्चिद्धि नीलपीतोल्लेखीति नीलादिना तत्र सादृश्यं हरितादिना भेदं प्रतिपद्यत इति ।। 93 ।।

तथैव भागे सादृश्यं भागे मेदोऽवसीयते ।
भागाभावेऽपि वाक्यानामत्यन्तं भिन्नधर्मणाम् ।। 94 ।।

दार्ष्टान्तिके योजयितुमाह--
प्रतीतार्थः श्लोकः ।। 94 ।।

रूपनाशे पदानां स्यात् कथं चावधिकल्पना ।
अगृहीतावधौ शब्दे कथं चार्थो विवच्यते ।। 95 ।।

इदानीमखण्डवादी पदवादिनं दूषयितुमाह---
यदि पादन्येव सत्यानि, तदादध्यानयेत्यादिसंहितायां रूपविनाशात् पदस्य नियतस्याभावे कमवधिं गृहीत्वा तदर्थो विविच्यताम्, अतः प्रविभागशून्यं वाक्यमेवैकं सत्यमभ्युपगन्तव्यम् ।। 95 ।।

संसर्ग इव रूपाणां शब्देऽन्यत्र व्यवस्थितः ।
नानारूपेषु तद्रूपं तन्त्रेणापरिमिष्यते ।। 96 ।।

अथाखण्डपक्षे श्वेतो धावतीत्येतत्प्रश्नद्वयाऽपाकरणाय कथमेकं वाक्यम्, अत्र हि श्वा इत्येतद्रूपं संहितावशाद्विनष्टमित्येतत्पदार्थासंभवात् कथं तदवगतिः ? तत्राह--
श्वेत इत्यादौ शब्दे अन्यत्राखण्डपक्षे रूपाणां संसर्ग इव व्यवस्थितः, अतश्च तद्रूपमपरं तन्त्रेणावस्थितं तेषु नानारूपेषु प्रत्यायकमिष्यत इत्यदोषः।।96।।

तस्मिन्नभेदे भेदानां संसर्ग इव वर्तते ।
रूपं रूपान्तरात्तस्मादनन्यत् प्रविभज्यते ।। 97 ।।

तदेव व्याचिख्यासुराह--
तस्मिन्नभेदे एकस्मिन्नेव श्वेत इत्येवं रूपे भेदानां श्वा इतः श्वेतश्च इत्येतेषां संसर्ग इव स्थितः । तस्मात्तद्रूपं रूपान्तरादनन्यदपि तन्त्रन्यायसमाश्रयणेनोभयार्थप्रत्यायकतया प्रविभज्यत इत्यस्मिन् पक्षे श्वेत इत्येतदखण्मेव प्रत्यायकम् ।। 97 ।।

शास्त्रे प्रत्यायकस्यापि क्कचिदेकत्वमाश्रितम् ।
प्रत्याय्येन क्कचिद्भेदो ग्रहणग्रह्ययोः स्थितः ।। 98 ।।

अथात्रैव प्रसङ्गात् प्रत्याय्यप्रत्यायकयोर्विषयभेदेन भेदाभेदौ स्मृतावित्याह---
ऊ इत्यभेदाश्रित्य यथासंख्यं प्रकल्पितम् ।

तत्राभेदं प्रत्याय्यप्रत्यायकयोः, दर्शयति --
ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यत्रोक्तम् । ह्रस्वादिषु समसंख्याऽप्रसिद्धरुद्देशनिर्देशवैषम्यात् । सिद्धं तु समसंख्यत्वात् त्रयाणां हि विकारनिर्देश इति ततश्च ऊकाल इत्यत्र मात्रिकद्विमात्रत्रिमात्राणां संसृज्य निर्देशात् प्रत्याय्यप्रत्यायकयोरभेदे समसंख्यत्वान्निर्देशसाम्ये संख्यातानुदेशे सिद्धे ह्रस्वदीर्घप्लुतसंज्ञाः पृथगवतिष्ठन्त इति न कश्चिद्दोषः ।

लृङ्लृटोर्ग्रहणे भेदो ग्राह्याभ्यां सह कल्पितः ।। 99 ।।

प्रत्याय्यप्रत्यायकयोर्भेदं निदर्शयितुमाह---
स्यतासी लृलुटोरित्यत्र लृशब्देन लृङ्लृटौ प्रत्याय्येत इति निमित्तनिमित्तिनोर्वैषम्यात् संख्यातानुदेशाभावः प्राप्नोति । यथासंख्यमनुदेशः समानामित्यत्रोक्तम्---"संख्यासाम्यं शब्दश्चेद् णलादयः परस्मैपदानाम् । डारौरसः प्रथमस्य । एचोऽयवायाव इत्यनिर्देशः । अर्थतश्चेत् लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषः" इति चोद्यमेवं पक्षद्वय उपस्थितम् ।
तत्रोच्यते-लृलुटोरित्यत्र लृरूपमुत्सृष्टानुबन्धसामान्यमात्रं प्रत्यायकमभिन्नमेव, न पुनः प्रत्याय्यभेदाद्भिन्नमत्राभ्युपगम्यते । ततश्च निमित्तनिमित्तिनोः साम्यात् संख्यातानुदेशः सङ्गच्छत इति न किञ्चिदनिष्टम् ।। 99 ।।

यस्येत्येतदणो रूपं संज्ञिनामभिधायकम् ।
नहि प्रतीयमानेन ग्रहणास्यास्ति सम्भवः ।। 100 ।।

अथ प्रत्याय्यप्रत्यायकयोरन्यत्राप्यभेदं दशर्यितुमाह---
इश्च अश्च तद्यं तस्य यस्य यदेतत्संसृष्टेकाराकारयो रूपमणोः प्रत्यायकं तत्संज्ञिनामिवर्णावर्णानामभेदात्प्रत्यायकं भवति, तेन ईकाराकारयोरपि सौपर्णेयो वैनतेय इत्यत्र लोपः प्रवर्तते । यदि चात्र प्रत्याय्यप्रत्याय्यकयोरभेदो नाश्रीयते तदा प्रतीयमानेन प्रत्याय्यमानेनान्येषां ग्रहणस्य प्रत्यायनस्यासंभव इति नात्रेष्टं सिध्येत् । तस्मात्तन्त्रेणोच्चारितमेकमेवोभयोः प्रत्यायकं संसष्टरूपत्वादित्यस्त्येव श्वेतो धावतीत्येतस्मादुभयार्थप्रतीतिः ।। 100 ।।

ऊ इत्येतदभिन्नं च भिन्नवाक्यनिबन्धनम् ।
भेदेन ग्रहणां चास्य पररूपमिव द्वयोः ।। 101 ।।

अवान्तरवाक्योपप्लावनेनैतद्वोभयार्थप्रत्यायकं भविष्यतीति दृष्टान्तेन प्रदर्शयितुमाह---
ऊकाल इत्येतदुपात्तम् । तद्ध्रस्वदीर्घप्लुतानां त्रयाणां सामान्येनाभिन्नं रूपं बोधव्यम् । ततश्चैतदेकं ग्रहणकवाक्यस्थानीयम् , अवान्तरवाक्यनिबन्धनं भवतीत्याह--भिन्नवाक्यनिबन्धनमिति । उकालोऽज्झ्रस्वसंज्ञः । ऊकालोदीर्घसंज्ञः । उ3कालः प्लुतसंज्ञो बोद्धव्य इति । अतश्च यदा संसृष्टत्वादस्याभेदेनैव ग्रहणं प्रत्यायके स्थितं तदा ऊ इत्येतद्रूपं भिन्नवाक्यनिबन्धनमेव भवति । यथा पररूपं संसृष्टत्वादेकमपि द्वयोः प्रत्यायकं दृश्यते । तथैतद् बोद्धव्यम् । ततश्च श्वेतो धावतीत्यादाववान्तरवाक्योपप्लावनेनोभयार्थता भविष्यतीति योजनीयम् ।। 101 ।।

प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा ।
व्युदस्यता पुनर्भेदः शब्देष्वत्यन्तमाश्रितः ।। 102 ।।

शब्दानां भेदपक्ष एव वार्तिककारस्याभिरुचित इति दर्शयितुमाह--
प्लुतावैच इदुतावित्यत्रोक्तम् "अङ्गविवृद्धिर्नोपपद्यते । न ह्यैचोऽवयवोऽकार इकार उकारो वा" इत्येवमङ्गविवृद्धिं व्युदस्यता तावेव शब्दावेकत्र संमिलिताविति य उपदर्शितः प्रागभेदः स पराकृतः । तथाऽचोः समाहारं व्युदस्यता भेद एवेष्यत इति । यदाह "समाहारोऽचोश्चेन्नाभावाद्" इति । तस्मात् श्वेतो धावतीत्यादौ सदृशयोर्मेलनमनुपदमवान्तरवाक्योपप्लावनेन तन्त्रन्यायसमाश्रयणेन वा समर्थनं (यत् समर्थितं न) तज्ज्याय इति ।। 102 ।।

अर्द्धर्चादिषु शब्देषु रूपभेदः क्रमाद्यथा ।
तन्त्रात्तथैकशब्दत्वे भिन्नानां श्रुतिरन्यथा ।। 103।।

अथ तन्त्रमुपसंहर्तुमुपक्रमते--
यथा क्रमवशेन ऋचोऽर्द्धम् अर्द्धर्च इत्येकस्यैव शब्दस्य रूपभेदस्तथा तन्त्रन्यायाश्रयणेनै कशब्दत्वे भिन्नानां रूपाणामन्यथा श्रुतिरभिन्ना श्रुतिर्बोद्धव्येति तन्त्रमुपसंहृतम् ।। 103 ।।

संहिताविषये वर्णाः स्वरूपेणाविकारिणः ।
शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ।। 104 ।।

एतदेव स्फुटीकर्तुमाह--
स एव शब्दोऽनेकशक्तिवर्णतया संहिताविषये प्रतिभासत इत्येकस्यैव श्वेतशब्दस्य संहितयोच्चारणाच्छक्त्यन्तरपरिग्रहेणोभयार्थप्रत्यायकत्वं मन्यते ।। 104 ।।

इन्द्रियादिविकारेण दृष्टं ग्राह्येषु वस्तुषु ।
आत्मत्यागादृते भिन्नं ग्रहणं स क्रमः श्रुतौ ।। 105 ।।

एकस्यापि निमित्तभेदाद्भेद उपजायत इति दृष्टान्तप्रदर्शनेनाह--
यथा काचाद्युपहतचक्षुषामेकाकारमपि वस्तु नानारूपतायाऽवभासते, तथा संहितावशादेकोऽपि शब्दो रूपान्तरेणावभासते ।। 105 ।।

अभिधानक्रियायोगाच्छब्देष्वविकृतेष्वपि ।
रूपमत्यन्तभेदेन तदेवैकं प्रकाशते ।। 106 ।।

एतदेवोपसंहर्तुमाह---
अभिधानक्रिया संहितयोच्चारणमेव तया योगात्तत्सम्बन्धादविकृतेष्वपि शब्देष्वेकमेव शक्त्यन्तरपरिग्रहादत्यन्तभेदेन प्रकाशते ।। 106 ।।

ऋचो वा गीतिमात्रे वा साम द्रव्यान्तरं न तु ।
गीतिभेदाद्विगृह्यन्ते ता एव विकृता ऋचः ।। 107 ।।

अथैतदेवागमविषये दृश्यते तेन संवादयितुमाह--
ऋच एव तथोदीरिताः सामाख्यां यथा प्रतिलभन्ते । विशेषेणोदीरणमात्रं वा साम । यथोच्यते "गीतिषु सामाख्या" इति । ऋचो वा सामेत्येतद् ज्ञापयितुमाह---गीतिभेदादित्यादि ।
तदेवं भेदाभेदविवक्षाभिन्नेन प्रत्याय्यप्रत्यायकभावेनात्यन्तभेदरूपेण वा "संहिताविषये वर्णाः" इत्यत्रोक्तप्रकारेण तन्त्रेण तत्प्रतिपक्षेण वाऽवान्तरवाक्योपप्लावनरूपेण श्वेतो धावतीत्यत्रैकत्वेऽपि वाक्यास्यार्थभेदो भविष्यतीति नास्मत्पक्षे पदानामनभ्युपगमेऽपि काचित् क्षतिः ।। 107 ।।

उपायाच्छ्रुतिसंहारे (रो) भिन्नानामेकशेषिणाम् ।
तन्त्रेणोच्चारणे तेषां शास्त्रे साधुत्वमिष्यते ।। 108 ।।

अथ पुनरपि तन्त्रन्यायेनैतत् समर्थयितुमाह---
उपायात्तन्त्रलक्षणाद्भिन्नानामपि शब्दानामेकस्यां श्रुतौ संहारः संश्लेषो गीर्णत्वम् । कीदृशानां भिनाननामित्याह--एकशेषिणामिति ।
एकशेषसाधर्म्यात्तन्त्रेणोच्चारिता अप्येकशेषिण उच्यन्ते ।। 108 ।।

परिगृह्य श्रुतिं चैकां रूपभेदवतामपि
तन्त्रेणोच्चारणं कार्यमन्यथा ते न साधवः ।। 109 ।।

तस्मादेवंविधेविषये भिन्नानासपि शब्दानां किंचत्सादृश्यमुपादाय तन्त्रेणैव प्रतिपादनं कार्यमित्याह---

यद्यपि च सरूपाणां वाक्यानां शास्त्रेण साक्षात्तन्त्रेण प्रतिपादनं न कृतम् , नाप्येकशेषस्य प्रतिपादनम् , तथापि समानन्यायत्वात्सर्वमपि शब्दानुशासनोपयोगीति प्रतिपादितमुक्तमेवेत्यूह्यत इति प्रतिपादयितुमाह---
यथोक्तं वार्त्तिककृता "हलन्त्यमेकशेषनिर्देशाद्वा" (1-3-3 भा o) इति । तेनैकशेषिणां तन्त्रन्यायवतामिति यावत् । उपायादित्यादेः पूर्वस्य श्लोकस्य स्फुटीकरणायेक्तं तन्त्रेणोच्चारण इत्यादि ।। 109 ।।

सरूपाणां च वाक्यानां शास्त्रेण प्रतिपादतम् ।
तन्त्रेणोच्चारणादेकं रूपं साधूपलभ्यते ।। 110 ।।

एकस्यानेकरूपत्वं नालिकादिपरिग्रहात् ।
यथा तथैव तन्त्रात् स्यात् बहूनामेकरूपता ।। 111 ।।

एतदेव दृष्टान्तप्रर्दशनपूर्वकमुपसंहर्तुमाह--
यथैकोऽपि ध्वनिर्नालिकादिपरिग्रहोपधानवशान्नानाविधषड्जऋषभादिरूपभेदवानुपजायते, तथा तन्त्रसमाश्रयणेन श्वा इतः श्वेत इत्येवमात्मकानां भिन्नानामपि शब्दानामेकरूपता श्वेत इत्येवरूपतेति न कश्चित्तत्र दोषः ।। 111।।

यथा पदसरूपाणां वाक्यानां सम्भवः पृथक् ।
तथा वाक्यान्तराभावे स्यादेषां पृथागर्थता ।। 112 ।।

इदानीं यदुक्तमवान्तरवाक्यानामर्थवत्त्वं न स्यादिति तत्प्रतिविधातुमाह---
यथाऽखण्डपक्षे वाक्यानां पदसरूपाणामवान्तरवाक्यानामपोद्धारबुद्ध्या सम्भवमुपकल्प्यार्थस्तेषां महावाक्योपयोगी व्यवस्थाप्यते । यदि तथा न प्रकल्पेत न तदा महावाक्यार्थसम्प्रत्ययः स्यात् । तथा वाक्यान्तराभाव एषां पृथगर्थता स्यात् । यावताऽपोद्धारसमाश्रयणेन वाक्यान्तराण्युपकल्प्य पृथगर्थत्वमसत्यमप्येषामभ्युपगम्यति इति नास्त्यवान्तरवाक्यानुपपत्तिचोद्यम् ।। 112 ।।

अभिधेयः पदस्यार्थो वाक्यास्यार्थः प्रयोजनम् ।
यस्य तस्य न संबन्धो वाक्यानामुपपद्यते ।। 113 ।।

इदानीं प्रयोजनं वाक्यार्थ इति पक्षं दूषयितुमाह---
वाक्यास्यार्थो वाक्यप्रयोजनमुच्यते । न त्वभिधेयः । कस्यायमर्थः स्यादित्याह--अभिधेयः पदस्यार्थ इति । पदानामर्थोऽभिधेय उच्यते । एतन्निराकरोति---यस्या तस्येत्यादि । एवं वादिनः परस्परं वाक्यानां सम्बन्धो न स्यात् । कीलायः--शलाकाकल्पानां वाक्यानां किं कृतः संबन्धो भवति ? अभिधेयद्वारकः परस्परं संबन्धः स्यात् । अभिधेयं च वाक्यानां नास्तीत्यसम्बन्धानि वाक्यानि प्राप्नुवन्तीति यत्किञ्चिदेतत् ।। 113 ।।

तत्र क्रियापदान्येव व्यपेक्षन्ते परस्परम् ।
क्रियापदानुषक्तस्तु सम्बन्धोऽतः प्रतीयते ।। 114 ।।

अथान्विताभिधानसमाश्रयणेनैतत्समर्थयितुमाह--
क्रियापदमाक्षिप्तसमस्तसाधनव्रातं निराकाङ्क्षं संपद्यते, क्रियापदानुषक्तः परस्परसम्बन्धो निराकाङ्क्षस्तस्मादुपपन्न इति न काचित् क्षतिः ।। 114 ।।

आवृत्तिरनुवादो वा पदार्थव्यक्तिकल्पने ।
प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्तते ।। 115 ।।

ननु चान्विताभिदानं न युक्तमिव प्रतिभाति । तथा हि--यदि प्रथममेव सकलविशेषयुक्तो वाक्यार्थोऽवगतः स्यात् तदुत्तरकालभाविनां गवादीनामभिधाने न किंचित्प्रयोजनमुत्पश्यामः । अवगतार्थानां हि पदानां पुनर्वचने वैयर्थ्यमापद्यत इत्याशङ्क्य समर्थयितुमाह--
अवगतार्थानामप्यावृत्तिर्नियमाय भविष्यति । उक्तस्य वार्थस्य स्फुटीकरणायानुवादस्तेषामसाविति नास्त्यानर्थक्यम् । एकमपि पूर्वस्य पूर्वस्य तिरोहितत्वात्

सहत्वासम्भवान्वयस्यासम्भवादर्थनवगम एव । एकस्मादेव च पदात्समस्तविशेषान्वितस्य वाक्यार्थस्याप्रतितेरुत्तरेषां चानवगतार्थानां नियमानुवादपरिकल्पनायोगादसमञ्जस एवान्विताभिधानपक्षः । यदा पुनः सहभूतेष्वेवासौ प्रत्येकं समाप्तोऽर्थ इत्युच्यते । यथोक्तम्---"व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु" इति । तदा नास्त्येव सहभूतानामुपादाने वैफल्यमिति न कश्चिद्दोषः ।। 115 ।।

अविकल्पेऽपि वाक्यार्थे विकल्पा भावनाश्रयाः ।
अत्राधिकरणे वादाः पूर्वेषां बहुधा गताः ।। 116 ।।

तदेवं सङ्घातादीन्युद्दिष्टानि वाक्यलक्षणानि प्रासङ्गिकविचारसहितानि व्याख्यातानि । आख्यातं वाक्यमिति दर्शयिष्यते । वाक्याव्याख्याप्रसङ्गेन च वाक्यार्था आपे संसर्गसंसृष्टिनिराकाङ्क्षपदार्थप्रयोजनलक्षणाश्चत्वार उपदर्शिताः । प्रतिभां क्रियां च दर्शयिष्यति । नन्वेकस्यैव वाक्यार्थस्य कथं विकल्पप्रपञ्च इत्याशङ्क्य निरूपयितुमाह---
वाक्यार्थोऽविकल्प एव निर्विभाग एवाभ्युपगन्तुं युक्तः, तस्मिंश्च तथाभूतोऽपि येऽमी विकल्पास्ते पुरुषाणामनेकशास्त्रभावनासमाश्रया बोद्धव्याः । न वस्त्वनुपातिन इति तद्वाक्यार्थ एक एव युक्तः ।
एतदेव प्रतिपादयितुमाह--अत्राधिकरण इति । अस्मिन्नधिकरणे विचारस्थाने पूर्वेषामाचार्याणां प्रवादा बहुधा गताः शास्त्रसंस्कारवासितचेतसां तेषामिति कस्य पर्यनुयोगः क्रियते ।। 116 ।।

अभ्यासात् प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ।। 117 ।।

परमार्थतस्तु वाक्यार्थ एव एव, सर्वोऽपि शब्दः प्रतिभाया एव हेतुरिति तत्स्वरूपमिदानीं प्रस्तावयितुमाह---
अपरैराचार्यौः । सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः । जडानामपि प्रतिभाहेतुरित्याह--बालानामित्यादि । आस्तां विदितसमयस्य किं न भविष्यत्यसौ प्रतिभाहेतुः । येऽप्यविदितसंकेता अमी बाला जडप्राया वा तिर्यञ्चः, तेषामप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः शब्दः सम्बोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेणैव नियतैव काचित् प्रतिभा प्रबोध्यत इति तन्मूल एव सर्वः कश्चित्तेषां व्यवहारः । अनेनैतदुच्यते--- यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्ता सकलव्यवहारमूलभूताऽनपह्नवनीया तदपह्नवे स्वात्मैव विप्रलभ्यते । तत्प्रतिभाऽभ्युपगमोऽवस्याश्रयणीयः ।। 117 ।।

अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते ।

अभ्यासात् प्रतिभाहेतुरित्युक्तं, तत्राभ्यासः किमिदानीन्तन उत जन्मान्तरभावी, तस्य च किं स्वरूपमित्याशङ्क्याह--- <b2<

अनन्तरमिदं कार्यमस्मादित्युपदर्शनम् ।। 118 ।।

स चाभ्यासोऽनागम इदानीन्तनो न भवति । नहि बालस्य तदैवोपदिष्टं केनचिदिति जन्मान्तरभाव्येव स च समय इष्यते । संकेतस्वरूपोऽसाविष्यत इति स्वरूपमेवास्य स्फुटयितुमाह--
स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघातमात्रसमनन्तरमेव वाजिनोऽतियान्ति, अङ्कुशाभिघातेन च गजाः, एवमन्येऽपि यथास्वं प्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्वन्तो लोकयात्रां निर्वाहयन्तीति स्थितम् । एवमखण्डमेव वाक्यं प्रतिभा च वाक्यार्थ इति समाश्रयणीयम् । पदपदार्थापोद्धारमाश्रित्य प्रतिनिध्यादिकल्पनं प्रासङ्गिकादिन्यायनिर्वाहश्च भविष्यतीति व्यस्थापितम् ।। 118 ।।

अस्त्यर्थः सर्वशब्दनामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ।। 119 ।।

अथ पदार्थप्रविभागश्चेत् समाश्रितस्तदुच्यतां पदस्यार्थ इति प्रविभागप्रसङ्गात् पदार्थविवेचनं मतभेदेन कर्तुमाह--
सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदाहुः । एतत्सर्वशब्दानां प्रत्याय्यलक्षणं प्रत्याय्यस्य वाच्यस्य लक्षणं बोद्धव्यम् । केन तुल्यमेतत् स्यादित्याह--अपूर्वदेवदेत्यादि । अपूर्वदेवतादिपदेषु हि नाकारप्रथनम् । यत्तु गवादिपदेष्वाकारप्रथनं तन्नान्तरीयकतया बोद्धव्यम् ।

अन्यथाऽपूर्वशब्दादेवताशब्दात् स्वर्गशब्दादश्वगवादिशब्दवदाकारादिप्रथनं स्यात् । यतश्च तेभ्यो नास्त्याकारादिप्रथनम्, अतोऽर्थमात्रमेव तैः प्रत्याय्य इति युक्तम् ।। 119 ।।

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ।। 120 ।।

अथ गावादिशब्देभ्य आकारदिप्रथनं दृष्टं ततश्च तद्वक्तुं शक्यं यद्विशिष्टपदार्थप्रत्ययो युक्त इतीत्याशङ्क्याह--
सास्नादिमत्त्वेव यदा गोशब्दप्रयोगं पश्यति तद्दर्शनाभ्यासाच्च तत्राकारपरिग्रहो यः स शब्दस्य प्रत्ययो न भवति । कस्मादित्याह--स हीत्यादि । तस्मात् प्रयोगाभ्यासेन (प्रयोगदर्शनाभ्यासेन) यत्नान्तरेण शब्दावगम्यतिरिक्तेन स प्रथते ततश्च शब्दव्यापारोऽसौ न भवतीति शब्दस्यार्थमात्रमेवापरामृष्टाकारविशेषं वाच्यं युक्तमित्येकः पक्षः ।। 120 ।।

केचिद् भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः ।
अनुनिष्पादिनः कांश्चिच्छब्दार्थ इति मन्वते ।। 121 ।।

इदानीं कश्चिच्छब्दवाच्यः कश्चित्तत्राकारोऽनुनिष्पादीति पक्षान्तरमाह--
केचिद्भेदा जात्यादयः शब्दवाच्याः, केचित्तत्रार्थप्रयोजका अनुनिष्पादिन एव । तथा तांश्च शब्दार्थ इत्यपरे मन्यन्ते ।। 121 ।।

जातेः प्रत्यायके शब्दे या व्यक्तिरनुषङ्गिणी ।
न तद् व्यक्तिगतान् भेदान् जातिशब्दोऽवलम्बते ।। 122 ।।

एतदेव प्रत्याख्यातुमाह--
जातिशब्दा जातिमात्रं प्रत्याययन्ति । व्यक्तिस्तु तत्रानुषङ्गिणी । निरधिकरणाया जातेरसम्भवादिति कृत्वा । तद्व्यक्तिगतानाकारविशेषान् जातिपदार्थपक्षे जातिशब्दो नावलम्बते ।। 122 ।।

घटादीनां न चाकारान् प्रत्ययति वाचकः ।
वस्तुमात्रनिवेशित्वात् तद्गतिर्नान्तरीयकी ।। 123 ।।

एतदेव व्यक्तीकर्तुमाह--
घटादीनां प्रसिद्धानामाकारान् वचकः शब्दो घटादिर्न प्रत्याययति, पृथुबुध्नोदराकारमात्रनिवेशित्वात् । नहि सकलविशेषसहितमर्थं शब्दः प्रत्याययितुमलमिति तत्राकारविशेषावगतिर्नान्तरीयक्येवानुनिष्पादि येव बोद्धव्य ।। 123 ।।

क्रिया विना प्रयोगेण न दृष्टा शब्दचोदिता ।
प्रयोगस्त्वनुनिष्पादी शब्दर्थ इति गम्यते ।। 124 ।।

नान्तरीयकत्वमेव प्रदर्शयितुमाह--
यदेतेतिशब्दचोदिता क्रिया कर्तृकर्मसाधनसामग्रीविना न दृश्यते । ततश्चासौ साधनयोगोयथा तत्रानुनिष्पादी तथा शब्दार्थोऽवगन्तव्य इत्युपसंहृतम् ।। 124 ।।

नियतास्तु प्रयोगा ये नियतं यच्च साधनम् ।
तेषां शब्दभिधेयत्वमपरैरनुगम्यते ।। 125 ।।

अथ सर्व एवाकारा गुणप्रधानभावेन पदस्यार्थ इति तृतीयं पक्षं दर्शयितुमाह--
येन केनचिद्विना शब्दस्याभिधेयं न निर्वहति तत्सर्वं साध्यसाधनात्मकं शब्दाभिधेयं वक्तुं युक्तम् । किञ्चित् प्रत्याय्यते, अन्यत्तत्र नान्तरीयकतयाऽवगम्यत

इत्यपि न शोभनम्, किन्तु सर्वाकारमेवाभिधेयं गुणप्रधानभावेन तस्मात् प्रतीतमित्ययं पक्षः शोभनः ।। 125 ।।

समुदायोऽभिधेयो वाऽप्यविकल्पसमुच्चयः ।

समुदाय एव तुल्यकक्षतया शब्दस्यार्थ इति चतुर्थपक्षं दर्शयितुमाह--
ननु यद्याकारसमुदायं समुच्चितमेव प्रत्याययति, तर्हि बहुवचनमेव तत्र स्यात् । अथ विकल्पितं प्रत्याययति तदा वचनविकल्पः स्यादित्याशङ्क्याह--अविकल्पसमुच्चय इति। अविद्यमानौ विकल्पसमुच्चयौ यस्यासौ तथाभूतस्तस्मात् प्रतीयत इति सम्भाव्यते । एतच्चोपमासमुद्देशेऽप्यर्थविचारणावसरे सविस्तरं प्रदर्शयिष्यति ।

असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदिष्यते ।। 126 ।।

अथ जातिगुणक्रियात्मकस्यार्थस्यासत्यभूतः संसर्ग एव शब्दार्थ इति पञ्चमं पक्षं दर्शयितुमाह--
घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते । स चात्र तद्व्यतिरेकेणानुपलम्भादसत्यभूत एवोच्यते । तस्मात् संसृष्टः पदार्थ एव सत्यभूत इति।।126।।

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम् ।

अथ सत्यमेवासत्योपाधिविचित्रितं शब्दवाच्यमिति षष्ठं पक्षमाह--

शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम् ।। 127 ।।

शब्दस्य वा स्वरूपमेवाभिधेयमिति सप्तमं पक्षं दर्शयितुमाह--
अभजल्पत्वमध्यसरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः।।127।।

सोऽयमित्यभिसम्बन्धाद् रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ।। 128 ।।

अभिजल्पस्वरूपमाह--
सोऽयमित्यभिसम्बन्धोऽध्यासाख्य उच्यते । तेन पदार्थस्वरूपमाच्छदितमेकीकृतमिव प्रत्याय्यते । तदाऽभिजल्पः शब्द उच्यते । अध्यासवशाच्छब्दार्थयोरेकात्मत्वेऽप्यर्थां शस्यैव प्राधान्यमुपयोगवशात् ।। 128 ।।

तयोरपृथागर्थत्वे रूढेरव्यभिचारिणि ।
किञ्चिदेव क्कचिद् रूपं प्राधान्येनावतिष्ठते ।। 129 ।।

क्कचित्तु विषयभेदेन द्वयोरपि दृश्यत इति प्रसङ्गादभिधामाह--
तयोः शब्दार्थयोरध्यासवशाद् रूढेर्नियमादेवाव्यभिचारिण्यपृथगर्थत्वे एकरूपत्वे सति किञ्चिदेवरूपं योगवशात् क्कचिदेव लोके शास्त्रे वा प्राधान्येनोद्रिक्तयाऽवितिष्ठते ।। 129 ।।

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ।

तत्र लोकेऽर्थंशस्यैव प्राधान्यमित्यपि दर्शयितुमाह--
अर्थरूपतां प्रतिपन्नोऽर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते । अयं गौरित्यादि । तत्रार्थ एव बाह्यतया प्रधानमवसीयते ।

शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ।। 130 ।।

शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यत् इत्याह--
शास्त्रे हि स्वरूपप्रधानो निर्देशः क्वचित् क्वचिच्चार्थप्रधानोऽपीत्युभयरूपता शब्दस्य दृश्यते ।। 130 ।।

अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ।। 131 ।।

इदानीमथषु न शक्तिः पृथगस्ति किन्तु शब्दाधीनेति । यथा ते शब्दैर्विधीयन्ते तथैवावगम्यन्त इति स्वमाहात्म्योपस्थापित एव शब्दार्थ इत्यष्टम पक्षं दर्शयितुमाह-
अथवा सर्वशक्तिरर्थो व्यवस्थितः । तस्य प्रतिनियतशक्त्यभिधानं शब्देनेतिनवमं पक्षं दर्शयितुमत्रैवोक्तम्--सर्वशक्तेर्वेति । शक्त्यार्थः कदाचित् क्रियारूपतयाभिधीयते, कदाचित् सिद्धरूपतयेति नियता क्रियादिरूपता शब्दार्थतया प्रतिपाद्यते ।। 131।।

यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते ।। 132 ।।

अथवा बुद्ध्युपारूढ एव शब्दस्यार्थो न बाह्य इति दशमं पक्षमुपदर्शयितुमाह--
शब्दस्य बुद्ध्यपारूढस्य वैकल्पिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनः, बाह्यं वस्तु विकल्पजननद्वारेण निबन्धनं यस्य स तताभूतः । स च वैकल्पिकोऽर्थो भ्रमवशाद् दृश्यविकल्पैकाकारेणाबहीरूपोऽपि बहीरूपतयाऽध्यस्तोऽध्यस्तमेव वस्त्ववगच्छामि शब्दादेति शब्दनिमित्तमिति (निमित्त इति) शब्दार्थ इष्यते ।। 132 ।।

आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः ।
ये ते प्रत्यवभासन्त संविन्मात्रं त्वतोऽन्यथा ।। 133 ।।

इदानीं गावदीनां शब्दानामाकारविशेषवानर्थोऽपूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषमर्थ इत्येकादशं पक्षमाह--
कैश्चिच्छब्दैः संवेद्याः प्रत्याय्या आकारविशेषवन्तो व्यक्तस्मृतिनिबन्धनाः प्रत्यवभासन्ते । कैश्चिन्निराकाराः संविद्रूपाः प्रत्याय्यन्ते । तेषां तथैवार्थो व्यवस्थाप्यते ।। 133 ।।

यथेन्द्रियं सन्निपतद्वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ।। 134 ।।

इदानीं प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थस्तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयत् इति द्वादशं पक्षमाह--
अविपरीतमप्यर्थमिन्द्रियं दोषवशान्नानारूपमवभासयति यथा, नियतवासनावासिसां शब्दार्थप्रतीतिरिति नास्ति कश्चिन्नयत एकः शब्दस्यार्थः ।। 134 ।।

वक्त्रान्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुसारेण शब्दार्थः प्रविभज्यते ।। 135 ।।

एतदेव व्याख्यातुमाह--
तथाहि--सांख्यजैनसौगतप्रभृतयः प्रतिपत्रनुसारेणान्यथैव शब्दार्थं प्रतिपद्यन्ते , वक्त्रा तु वैसेषिकादिना स्वप्रत्ययानुसारेण वक्तुं प्रकान्तः । तथा च वैशेषिकेणावयविनं प्रतिपादयितुं घटशब्दः प्रयुक्तः, सांख्यैर्गुणसमाहारमात्रमभिमन्यते, जैनसौगतैः परमाणुसंचयमात्रमिति तथैव तसमात्तेषामर्थप्रतिपत्तिः ।।135।।

एकस्मिन्नपि दृश्येऽर्थे दर्शनं भिद्यते पृथक् ।
कालान्तरेण चैकोऽपि तं पश्यत्यन्यथा पुनः ।। 136 ।।

एतदेव व्यरक्तयितुमाह--
वस्तुत एकस्मिन्नेकरूपे दृश्येऽर्थे शास्त्रवासनाभेदाद्दर्शनं ज्ञानमस्मिन् भिद्यते । एकोऽपि च पुरुषः सुगतदर्शनसंस्कृतमतिरन्यथाध्यवस्यत्यर्थं कालन्तरेण वैशेषिककशास्त्रश्रवणादन्यथेति ।। 136 ।।

एकस्यापि च शब्दस्य निमित्तैख्यवस्थितैः ।
एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते ।। 137 ।।

अतः किमित्याह--
एकस्य घटशब्दस्य निमित्तैः शास्त्रसंस्कारैक्यवस्थितैरेकेन पुरुषेणानियतशास्त्रवासनावशात् क्रमेण बुहधार्थः प्रकल्प्यते, बहुभिश्च नानाशास्त्रसंस्कृतबुद्धिभिर्युगपत स्वप्रत्ययानुसारेण बहुधापि परिकल्प्यत इति किमत्र कुर्मः ।। 137 ।।

तस्माददृष्टतच्वानां सापराधं बहुच्छलम् ।
दर्शनं वचनं चापि नित्यमेवानवस्थितम् ।। 138 ।।

अतः किमित्याह--
यत एवं तस्मादददृष्टतत्त्वानां पुरुषाणां दर्शनमनवस्थितम् । अदृष्टतत्त्वया च सापराधमत एव बहुच्छलं बहुविधबाधकाघ्रातं तथा सति वचनमपि तेषां तथैवेति तत्त्वकथनं सुदूरमवस्थितम् ।। 138 ।।

139 ऋषीणां दर्शनं यच्च तच्चे किञ्चिदवस्थितम् । न तेन व्यवहारोऽस्ति न तच्छब्दनिबन्धनम् ।।
।।

-- , , --""139 ननु सन्त्येव परावरज्ञा मुनयस्तदनुसारेण सर्वं व्यवस्थापयिष्याम इति तदर्थमाह
परमर्षोणां भगवतां दर्शनं तात्त्विकं भवतिकिन्तु परमार्थेन व्यवहारासम्भवःव्यवहारसाधनानां निबन्धनं न भवतीति न तेन व्यवस्था । व्यवहारवेलायां व तेऽप्यदृष्टतत्त्वसदृशा इति पुनरव्यवस्थैव । यदुच्यतेरूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ । ज्ञाने प्रत्यभिलापे च सदृशौ बालपाण्डतौ।। ।।

140 तलबद् दृश्यते व्योम खद्योतो हव्यवाडिव । नैव चास्ति तलं व्योन्मि न खद्योतो हुताशनः ।।
।।

, -- , 140 ननु पुरुषबुद्धयो विचित्रा भवन्तुप्रत्यक्षेण खलु वयं यथार्थो दृष्टस्तथैव व्यवहरिष्याम इत्याशङ्क्य प्रत्यक्षस्याव्यवस्थितिमाह
अतिनिर्मलं गगनतलमित्यविप्लुतदृशामप्युक्तिर्दृश्यतेतदत्र किं कुर्मः ।। ।।

141 तस्मात् प्रत्यक्षमप्यर्थं विद्वानीक्षेत युक्तितः । न दर्शनस्य प्रामाण्यात् दृश्यमर्थं प्रकल्पयेत् ।।
।।

यत्पुनरुपपत्त्या निश्चीयते तद् दृष्ट मित्येव तथैवोपगम्यतेत्युपसंहरन्नाह

142 असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा । व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत् ।।
।।

-- 142 यस्य यथैव स्वदर्शनानुसारेण प्रतिभाति तथैव तस्य स शब्दार्थ इत्येवाश्रयणीयमित्यलं निर्वस्तुबहुविकल्पप्रदर्शनेनेत्याह
तस्माद्व्यवहारवेलायामसमाख्येयतत्त्वानामर्थानां यथा लौकिकैरन्वाख्यानंक्रियते तथैव तदनुसारेण शब्दार्थमाश्रित्य व्यवहारं निर्वाहयेन्न पिष्टपेषणमाचरणीयमिति। एवं मतभेदेन प्रदर्शितस्य द्वादशधा पदार्थस्य पदकाण्डे जात्यादिप्रपञ्चैः प्रविभज्य स्वरूपं निर्णेष्यति । एतदत्र (एषोऽत्र) वैयाकरणस्याखण्ड एव स्फोटलक्षणो वाक्यार्थोऽध्यासः सम्बन्धः पदार्थस्त्वसत्य एवेति निर्णयः ।। ।।

143 विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते । वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ।।
।।

-- --"" 143 अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुबध्नन्नाह
देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थमतिव्यतिरिक्तैव जायते तां च वाक्यार्थं वैयाकरणा आहुः । कस्तस्या उपाय इत्याहपदार्थैरुपपादिताम्इति । पदार्थैरसत्यैरेवोपाधिभूतैरुपपादितामभिव्यक्तामिति ।। ।।

144 इदं तदिति सान्येषामनाख्येया कथञ्चन । प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापिन निरूप्यते ।।
।।

-- , , 144 कीदृशीं तामित्याह
सा चोपजायमाना आख्यातुमन्यस्य न शक्यतेकेवलं स्वसंवेदनसिद्धैवासौप्रतिपत्त्रापि स्वसंवेदनसमये नियतेन रूपेण निरूपयितुमशक्यैव सा ।। ।।

145 उपश्लेषमिवार्थानां सा करोत्यविचारिता । सार्वरूप्यमिवान्ना विषयत्वेन वर्तते ।।
।।

-- , , 145किं स्वभावाऽसावित्याह
असंसृष्टानां पदर्थानामसावुपश्लेषं मेलनं करोतिसर्वरूपेव वाक्ये पदार्थानां वासौ विषयत्वेन वर्ततेतन्निष्ठास्ते साफल्यं भजन्त इति ।।।।

146 साक्षाच्छब्देन जनितां भावनानुगमेन वा । इतिकर्तव्यतायां तां न कश्चिदतिवर्तते ।।
।।

, -- 146 तां च न किञ्चित्प्राणिमात्रमतिवर्ततेअतिक्रम्य तिष्ठतीत्याह
सा साक्षाच्छब्देन कदाचिद्व्यवहारकाले जन्यते जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनामिति तन्मूल एवेतिकर्तव्यतारूपः सर्वस्य व्यवहारः ।। ।।

147 प्रमाणात्वेन तां लोकः सर्वः समनुपश्यति । समारम्भाः प्रतायन्ते तिरश्चामपि तद्वशात् ।।
।।

-- --`147 एतदेव स्फुटयति
सर्वः कश्चित्तामेव भगवतीं स्वप्रतिभां प्रमाणत्वेन पश्यति । तथा चोच्यतेसतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः' इति । तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति न तदपह्नवेन आत्मा वञ्चनीयः ।। ।।

148 यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः । मदादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा ।।
।।

-- , 148 सिद्धैव चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह
यथा द्रव्यविशेषाणां परिपाकव्यतिरिक्तयत्नान्तरनिरपेक्षा मदादिशक्तयो दृश्यन्तेतथैवेयं प्रतिनियतसंस्कारजन्या प्रतिभावतां स्फुटमुपलभ्यत एव ।। ।।

149 स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः । जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ।।
।।

-- , 149 जन्मान्तराभ्यासहेतुकेयमिति सनिदर्शनमुपपादयितुमाह
पञ्चमस्वरविरावी मधुमासे पुंस्कोकिल इत्ययन्तजमेतत्सिद्धम्लूताजन्तूनां कुलायरचना च प्रतिभामाहात्म्यादेव दृश्यते ।। ।।

150 आहारप्रीत्यपद्वेषल्पवनादिक्रियासु कः । जात्यान्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ।।
।।

-- 150 एवदेव स्फुटयितुमाह
प्रतिप्रण्याहारादिक्रिया नियताऽनादिप्रतिभावशादेवेति प्रसिद्धम् ।। ।।

151 भावनानुगतादेतदागमादेव जायते । आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते ।।
।।

-- 151 प्रतिभायाश्च शब्द एव मूलमित्याह
स चागमः कदाचिदासन्नोऽस्मिन्नेव जन्मन्यवगतः कदाचिज्जन्मान्तर इत्यासत्तिविप्रकर्षाभ्यां शब्द एव प्रतिभाहेतुः ।। ।।

152 -------- ----152 स्वाभावचरणाभ्यासयोगादृष्टोपपादिताम् । विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः ।।
।। केचिदाचार्य्या मन्यन्ते

काचित् स्वाभाविकी प्रतिभा । तद्यथापरस्याः (प्रकृतेः प्र) थमं सत्तालक्षणमात्मानं महान्तं प्रत्यानुगण्यं सुषुप्तावस्थास्येव प्रबोधानुगुण्यं फलसत्तामात्रं निद्रायाः । चरणनिमित्ता काचित् प्रतिभा । तद्यथाका (च) रणेनैवावधृतप्रकाशविशेषाणां (वसिष्ठादीनाम्) ; अभ्यासनिमित्ता काचित् । तद्यथा कूपतटाकादीनाम् (कादिखनकानाम्) । योगनिमित्ता काचित् । तद्यथायोगिनामव्यभिचारेण पराभिप्रायज्ञानादिषु । तथा काचिददृष्टनिमित्ता । तद्यथा रक्षः पिशाचादीनां परावेशान्तर्धानादिषु । काचिद्विशिष्टैरुपहिता । तद्यथासञ्जयादीनां कृष्णद्वैपायनादिभिः । एवं प्रतिभा बहुविधाऽपि सर्वैवागमिकवाक्यनिबन्धना वाक्यप्रतिपाद्या व्याकरणात्ययेऽपि सर्वशक्तिप्रत्यस्तमये प्रत्यस्तमितनिविष्टशब्दशक्तिबीजकारणाऽन्तर्भूता निबद्धबीजा वृत्तिकाले प्रथमं सूक्ष्मेणापि वर्त्मना विवर्तमात्रामनुभूय क्रमेण वर्णवाक्यनियताभिरव्यवस्थाभिः संमूर्च्छती प्राप्तबीजपरिपाकाकारापुनः पुनर्व्यक्तेन रूपेण प्रत्यवभासते ।।
।।
-- 152 तस्याश्च निमित्तभेदेन षाड्विध्यं दर्शयितुमाह
स्वभावेति । स्वभावेन यथा कपिः । चरणादिषूदाहरणान्यूह्यानि । एवमखण्डेऽपि वाक्येऽभ्युपगते पदपदार्थप्रविभागमन्तेरण व्यवहारो न निर्वहतीति पदार्थः सामन्येन मतभेदप्रदर्शनपूर्वकं निर्णोतः ।। ।।

153 154 --?) ... .. 153 - 154 यथा संयोगिभिर्द्रव्यैर्लक्षितेऽर्थे प्रयुज्यते । गोशब्दो न त्वसौ तेषां विशेषाणां प्रकाशकः ।।
।। आकारवर्णावयवैः संसृष्टेषु गवादिषु । शब्दः प्रवर्तमानोऽपि न तानङ्गीकरोत्यसौ ।।

।। द्रव्यपदर्थिकस्य जातिपदार्थिकस्य वा शब्दप्रवृत्तिकाले शब्दार्थविलक्षणभूतोऽर्थः प्रथममपि प्रतीयमानेन शब्देनोपगृह्यत इत्येष पक्षः । तद्यथा

गवादीनां नियतस्वामिविशेषाणां पयोदानादिसंयोग्युपलक्षणानि परिच्छेदार्थमप्युपादीयमानानि नाभिधेयत्वेन श्रुतिभिः प्रकाश्यन्ते । तथैकादिप्रकाशादिभि (तथाकारादिभिः) (रुपलक्षणैर्निय (सं) सृष्टेष्वाकाराद्यः प्रतिपत्तिहेतुत्वेन आमपि (आद्याया मध्यया वापि) बुद्ध्या परिगृह्यमाणाः शब्दाभिधेयत्वं न प्रतिपद्यन्ते ।। ।।
--, , 153 --154 इदानीं मुख्यनान्तरीयकविभागेन पदार्थविचारोपक्रममाहयथेति । इह शब्दस्य सामान्यं वाजप्यायनमतेनार्थःव्यक्तिर्वा व्याडिमतेनार्थः । तत्रेह सामान्यमात्रं वा व्यक्तिमात्रं वा तस्य प्रयोजकर्थत्वेनावबुध्यतेविशेषास्तु नान्तरीयकतयाततोऽवगम्यन्ते ततः शब्दस्यादृष्टव्यभिचारं सामान्यमत्रमेवार्थः । यथा संयोगिनो द्रव्यविशेषाः सूक्ष्मा मण्यादय उपलक्षणामात्रभावेन गवादीनामर्थानां स्थिता न गवादिशब्दवाच्या भवन्ति तथान्तरङ्गा अप्याकारवर्णसंस्थानादय इति न तेषामसौ प्रकाशक उच्यते ।। । एतदेव स्फूटीकर्तुमाहआकारेति । आकारादयो व्यभिचारित्वाच्छब्दवाच्या न भवन्तीत्यर्थः ।। ।।

155 .....(? , 155 संस्थानवर्णावैवर्विशिष्टे यः प्रयुज्यते । शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते ।।
।। संस्थानविशिष्टोपक्रमः परिमण्डलो दीर्घश्चतुरस्त्र इति तदवयवो नाभिधीयते । तथा मुष्टिग्रन्थिसन्धि

सक्तकुण्लकादयः शब्दास्तदवयवेषु न प्रयुज्यन्ते । वर्णशब्दानां चित्रः कल्माषः सारङ्ग इति तदवयवेष्वप्रवृत्तिः । अवयवशब्देन शतं सहस्त्रं प्रस्थो द्रोणो मासः संवत्सर इत्यादयो गृह्यन्ते । अवयवे गृह्यमाणे जातिरभिषक्ताऽतस्तावति विषये जातिप्रयुक्तः शब्दः प्रवर्तत इति । क्वचिदेव हि दृष्टे कदाचिद्दन्तशृङ्गे खुरादावप्ययं गौरिति प्रयुज्यत एव । तथा वृको वा ग्राम्यसूकर इति । यतः कश्चिदवयवोऽनेन लक्ष्यत इति तदेतन्न्यायापेतं दर्शनमित्यपरे मन्यन्ते । कथम् यदि जातिमात्रवाची शब्दः स जातिभावमेव प्रत्यायतिकिं तत्रोपव्यञ्जनैः ।। ।।

--, , , , 155 नन्वाकारवाचरकानां स्थूलह्रस्वकर्बुरशबलादीनां शब्दानां किमाकारादिवचकत्वं नाङ्गीकार्यमेवेत्याशङ्क्याहसंस्थानेति । स्वशब्दैराकारादय उच्यन्त एवेति न सर्वत्र वयं तदप्रतीतिं ब्रूमःयद्वि प्रयोजकं शब्दस्य तदेव तस्य वाच्यम्अन्यन्नान्तरीयकमिति ब्रूमः । अत आकारादिवाचकानां नावयवमात्रे एकदेशमात्रे प्रवृत्तिरङ्गीकार्याअतः शब्दैरर्थस्य क्कचिद्विशेष उच्यतेक्कचित्सामान्यमात्रम् ।। ।।

156 --156 संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्तते । बिन्दौ च समुदाये च वाचकः सलिलादिषु ।।
।। यत्राकृतिनिरपेक्षं सामान्यस्य रूपावधारणं तत्र यावदेव भवति तावदेवाभिधीयते शब्देन । तथा चोक्तम्

केवलं घृतमिति बिन्दावपि भवति खार्यामपीति ।। ।।

--, , 156 ततश्च शब्दोऽपरामृष्टविशेषे वस्तुमात्र एव प्रवर्तत इत्याहसंख्येति । एकापि जलकणिकाऽऽपो बहुलमपि सरित्स्त्रोतस्तथैवोच्यते एकापि शिला शुक्ला हिमवानपि शुक्ल इति शब्दाः प्रयोजकमात्रमेव जात्यादिकं स्वार्थोकृत्य प्रवर्तन्तेआकारादिविशेषावभासस्तु नान्तरीयक इति स्थितम् ।। ।।

157 , 157 संस्कारादिपरिच्छिन्ने तैलादौ यो व्यवस्थितः । आहैकदेशं तत्त्वेन तस्यावयववर्तिता ।।
।। इह संस्कारपक्ष उपघातपक्षो वा यदा कस्मिंश्चिन्निर्ज्ञातेऽर्थं शब्दप्रवृत्तौ व्यवस्थितः

तदावयवोपयोगापेक्षायामिदमुपन्यस्तम् । यत्तत्काकेनोपहतं तदनेन भुक्तम् । यद्वा यादतुरार्थं संस्कृत तद्देवदत्तेन पीतमिति सामानाधिकरण्यमुद्देशप्रतिनिर्देशयोरिति ।। ।।

, -- -- "" -- "" ----, -- ""157 o 4-3 o 488)ननु समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते;यथा तैलं भुक्तं;घृतं भुक्तंशुक्लो नीलः कपिश इत्युक्तं तदेतत्कथम् । उक्तं च
न जातिगुणशब्देषु मूर्तिभेदो विवक्षितः । ते जातिगुणसंबन्धभेदमात्रनिबन्धनाः ।। तथा

नेक्षिता जातिशब्दानां समुदायानुपातिता । जातिम्चक्षते ते हि व्यक्तीर्वा जातिसंगताः ।।
इति । इह च
संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्तते । बिन्दौ च समुदाये च वाचकः सलिलादिषु ।।
इति । तदेतदाशङ्क्याह
संस्कारादीति । संस्कारोपघातादिपरिच्छिन्ने तैलादौ तैलघृतादिः शब्दो व्यवथितोऽसावेकदेशं समुदायाध्यारोपेणाह । एतदुक्तं भवति
न ते जातिशब्दाः अपि तु तत्सदृशा एव ते नियतपरिमाणाभिधायिनस्तदध्यारोपेण तदेकदेशवाचिन उच्यन्त इति । अतस्तेषामवयववर्तिता भाष्य उक्तेति न कश्चिद् दोषः । उक्तं च

संस्कारादुपघाताद्वा वृत्तोऽक्तपरिमाणके । तैलादौ जातिशब्दोऽत्र समत्वादवगम्यते ।।
इति ।। ।। (वा
वृत्ति

158 , 158 येनार्थेनाभिसंबद्धमभिधानं प्रयुज्यते । तदर्थापगमे तस्य प्रयोगो विनिवर्तते ।।
।। प्रयुज्यते शब्द इत्यन्ये

तत् प्रयोजनस्याभिधेयस्य नियतं लक्षणमाचक्षते ।। ।।
--158 एतदर्थं परमार्थत इदं बोद्धव्यमित्याहयेनार्थेनेति । येनार्थेन जात्यादिना प्रयोजकेन ।। ।।

159 , 159यांस्तु संभविनो धर्मानन्तर्नोय प्रयुज्यते । शब्दस्तेषां न सान्निध्यं नियमेन व्यपेक्षते ।।
।। ये शब्दस्याप्रयोजकाः प्रयोजकसहकारिणः सम्बन्धिनः शब्दप्रवृत्तिकाले पदार्थैकदेशभूता इवोपलभ्यन्ते

तेषां सान्निध्यमसान्निध्यं वा शब्दप्रवृत्तावकारणम् ।।।।

--159 वक्तुरिच्छया धर्मान्तर्भावनेन तु प्रयुज्यमानोऽपि शब्दो न तेषां सर्वेषां नियमेन प्रत्यायनं करोतीत्याहयांस्विति ।। ।।

160 `160 यथा रोमशफादीनां व्यभिचारेऽपि दृश्यते । गोशब्दो न तथा जातेर्विप्रयोगे प्रवर्तते ।।
।। शृङ्गरोमसफादीनां (नाम) प्रयोजकानामसान्निध्येऽपि गोशब्दस्य मुख्या प्रवृत्तिः । गोत्वेन प्रत्यये तु जातिविशिष्टे जात्याश्रये द्रव्ये वर्तते ।
तत्रावयविप्रवर्तनायामवयवेषु

अभक्ष्यो ग्रामसूकरः' इत्यत्र भक्षयतिक्रिया तथाभूतमेव साधनभूतं द्रव्यावयवमपेक्षते । दृष्टा च विकारे च प्रकृतौ च प्रकृतिशब्दप्रवृत्तिः । अवयवे च समुदाये च समुदायशब्दप्रवृत्तिदर्शनम् ।। ।।

--160 एतदेवान्वयव्यतिरेकाभ्यां स्फुटीकुर्वन्नाहयथा रोमेति ।। ।।

161 ----, 161 दुर्लभं कम्यचिल्लोके सर्वावयवदर्शनम् । कैश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नोऽनुमीयते ।।
।। नहि परिपूर्णावयवं कश्चित् कलापं प्राकृतदर्शनो ह्यवि (कलं) प्रतिपद्यते । तत्र केषाञ्चिदवयवानां ग्रहणे व्यक्ति (क्ति) जातीयोऽवयवी निर्धार्यते ।
तद्यथा

गवादीनां पूर्वार्धस्यापरार्धस्य वा दर्शने । क्वचित्तु सन्देहो नैव निवर्तते । तद्यथादधिमात्रदर्शने । पटप्रावरणादिदर्शने त्ववयवा दृश्यमाना नियता नियतानुमानहेतवो भवन्ति । तत्रापि केचिज्जात्यन्तरनिवृत्त्यर्थायां श्रुतौ श्रुतिपक्षस्य मन्यन्तेकेचिद्देसान्तर्भूतेभ्यस्तेभ्योऽवययेभ्योऽनुमानात् स्वविषये शब्दाः प्रवर्तन्त इत्याचक्षते ।। ।।

--161 एवं च न शब्दस्यैवंरूपं (वाच्यं) प्रत्यक्षमप्यर्थसाक्षात्कारोपनायकमेवमेवार्थत्वरूपपरिच्छेदकं दृष्टमित्याहदुर्लभमिति ।
युगपत्सर्वावयवदर्शनस्यासंभवात् कतिपयावयवदर्शनेन सकलार्थपरिच्छेतस्तानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति ।। ।।

162 , , 162 तथा जात्युत्पलादीनां गन्धेन सहचारिणाम् । नित्यसंबन्धिनां दृष्टं गुणानामवधारणम् ।।
।। गन्धोत्पलबुद्ध्यनुमितो (जातिगन्धोत्पलगन्धबुद्ध्यनुमितितो) हि जात्युत्पलादिषु यः शब्दः प्रयुज्यते

न स गन्धमात्रमाश्रित्य गन्धसमवायं वा द्रव्यमात्रं प्रत्ययतिसहचारीणि गुणान्तराण्यपि तत्रानुमीयन्ते । न च तद्वाचिनः शब्दा दृष्टे सहचारिण्यनुमानेन हेतौ प्रवर्तन्त इत्यभ्युपगम्यन्ते । केषाञ्चित् समुदायवाचि (दि) नामुत्पलादिशब्दवाच्यत्वमिति संख्याप्रमाणसंस्थानजनकत्वेन विना गावदिषु गोशब्दस्य विषाणादिसन्निधिप्रयुक्ताभिमुख्य प्रवृत्तिर्दृश्यते ।। ।।

--, 162 तथैव शब्दादेकदेशावसायेन नित्यसहचारिधर्मान्तरावगमो जायत इत्याहतथेति । जातिगन्ध उत्पलगन्ध इति शब्दाद्विशिष्टस्य गन्धमात्रस्यावगतिःतत्सहचारिरूपस्पर्शाद्यवधारणं तत्र नान्तरीयकं न मुख्यमिति बोद्धव्यम् ।। ।।

163 163 तस्मात् संभविनोऽर्थस्य शब्दात् संप्रत्यये सति । अदृष्टविप्रयोगोऽर्थः सम्बन्धित्वेन गम्यते ।।
।। तस्मात् संप्रतीयमानोऽपि सहचारिणः (चारी) संभविनः (वी न) शब्दार्थ इति विज्ञायते । नहि तथाभूतेनार्थत्मना शब्दस्य सम्बन्धोऽपि युज्यत ।।

।।
--163 उपसंहर्तुमिदानीमाहतस्मादिति नैयत्येनादृष्टविप्रयोगो जात्यादिरेव शब्दस्य सम्बन्धित्वेन वाच्यत्वेन गम्यत इति बोद्धव्यम् ।। ।।

164 165 , --, --, , --, --, , , 164 165 वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः । स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः ।।
।। विना संख्याभिधानाद्वा संख्याभेदसमन्वितान् । अर्थान् स्वरूपभेदेन कांश्चिदाहुर्गवादयः ।।

।। यथैव वाक्यात् पदार्थप्रविभागेण व्यवहारः क्रियते

तथा पदादपि प्रकृतिप्रत्ययापोद्धारेण शास्त्रे भूयान् व्यवहारो दृश्यते । तत्र केचित्तावन्मन्यन्ते
सत्येवान्वयव्यतिरेके यावानेवान्वयव्यतिरेकाभ्यामर्थः समधिगम्यते तावानेवास्तिन तु कश्चिदन्यः समुदायार्थः । स तु समुदायार्थः पदस्य वाक्यवदशब्द इति । न्यायविदस्तु मन्यन्ते

स्वबुद्धिपरिकल्पितसमर्थापिता एव शिष्टैर्बहुधा प्रकृतिप्रत्ययादयः । तेषां चार्थाः शास्त्र एवमाचार्यार्थे निमित्तभूता अन्वयव्यतिरेकाभ्यां व्यावहारिकाभ्यां कृतप्रविभागा एवाश्रीयन्ते । कथं बुद्ध्योरर्थप्रतिपादनोपायमात्रमेतत् । सर्वथा च प्रतिपत्तौ लौकिकस्यार्थस्य भेदो नास्ति । तथा हि केषाञ्चित् स्वार्थद्रव्यलिङ्गसंख्याकर्मादयः प्रातिपदिकेनाभिधीयन्ते
द्योतिकास्तु कर्मादीनां विभक्तयः । केषाञ्चित् स्वार्थद्रव्यलिङ्गमात्राभिधायिनी प्रकृतिः
वाचिकाः संख्याकर्मादीनां विभक्तयः । प्रातिपदिकार्थे विकल्पेन संख्याकर्मादीनां यथासंभवमभिधानं विज्ञायते । लिङ्गमपि केषाञ्चिद् द्योत्यं केषाञ्चिदभिधेयम् । द्योतनमपि द्विविधम्
अनाविर्भूताविर्भावनम्अव्युदासप्रसङ्गे वा प्रकारान्तरव्युदासेन कस्यचिदवधारणम् । तद्यथाप्रतिष्ठते उत्पुच्छयतेऽभिमनायत इति । तदपि प्रसिद्धाप्रसिद्धावियुतप्रयोगाणाम् । उपास्तेप्रपचतिअधीतेअध्येतीति यथा । सहाभिधानं वा । यावको गोपायिता ब्राह्मणाधीनं जुगुप्सत इति ।। ।। अथवा संख्यावतोऽर्थस्याविभक्तोद्देशः समुदायः संसृष्टानेकशक्तिरभिधायकः । विना संख्याभिदानेन शब्दप्रवृत्तिकाले तैस्तैरभिधीयमानैः संख्याविशेषैः काककण्ठे गुणकम्बलादिवनीयैः (वदनित्यैः) परिच्छिन्नास्तद्वन्तोऽर्थाः स्वरूपभेदयुक्तैः समुदायैरभिधीयन्ते ।।
।।
------164 - 165 एवं नामपदस्यार्थविचारं कृत्वेदानीं तस्यैव भागार्थविचारं प्रस्तौति । तत्र प्रत्ययभागस्यार्थविचारं तावदाहवाचिकेति । तेन प्रत्ययभागस्य संख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वार्था इति ज्ञेयम् । इदानीं प्रकृतिभागस्यार्थमभिधातुं (प्रकृतिभागस्य प्रत्ययभागस्य चानर्थक्यमभिधातुं) प्रकृतिप्रत्ययसमुदाय एव संख्यादिविशिष्टस्यार्थस्याभिधायक इत्याहस्याद्वेति । अथवा संख्याद्युपलक्षितमेवार्थं प्रकृतिप्रत्ययसमुदायोऽभिधत्त इत्यभिधातुमाहविनेति । स्वरूपभेदेन द्वित्वादिभेदेनेत्यर्थः ।। ।।

166 166 ये शब्दा नित्यसम्बन्धा विवेके ज्ञातशक्तयः । अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ।।
।। भिन्नेषु कूपयूपादिवत्समुदायेषु यथायथं शब्देषु नित्यसम्बन्धेषु परिकल्पितानामवयवानां सम्बन्धिभिरव्यभिचरितसम्बन्धानां बुद्ध्या कृतापोद्धारप्रविवेकाणां रूपभेदप्रत्ययपरकल्पप्रत्ययविषयाणामौपचारिकाभ्यां प्रतिपादनार्थमन्वयव्यतिरेकाभ्यामभिधायकत्वेन द्योतकत्वेन वा व्यभिचार (री) प्रविभागः क्रियते ।।

।।
--166 ननु यदा शब्दा नित्यसम्बन्धा विवेकेन ज्ञातशक्तयः स्वार्थस्य प्रतीतौ तदा कथमेतदवगतमयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इत्याशङ्क्यापोद्धारस्यान्वयव्यतिरेकौ निमित्तमिति प्रतिपादयितुमाह इति । विवेके सति शब्दार्थविभागे कृते सति च प्रतिपदिके प्रत्यये चासत्येकत्वादिविरहितं वृक्षत्वमात्रमवगम्यत इत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थप्रविभागो व्यवस्थाप्यते ।।
।।

167 `-, ..(167 यत्र चाव्यभिचारेण तयोः शक्यं प्रकल्पनम् । नियमस्तत्र न त्वेवं नियमो नुट्शबादिषु ।।
।। अन्वययव्यतिरेकावर्थरूपविषयावनुगम्यमानावव्यभिचारेण यावदनुगन्तुं शक्येते तावदनुगम्येते । कूपयूपसूपेषु तु यूपसमन्वयेऽप्यर्थासमन्वयान्नानुमन्येते ।

तथास्'शब्दादीनाम(न्व) र्थसंज्ञाप्रतिपादितेऽपि प्रत्ययत्वे लिङादिष्वदर्शनादन्वयव्यतिरेकाभ्यामर्थो न प्रकल्प्यते । तत्रापि कैश्चिदेकत्वादिनिबन्धनत्वमेव तिङामभ्युपगम्यते । तथा कैश्चित् स्यति स्यतः स्यन्ति इत्येकमेव प्रत्ययरूपमन्वाख्यानेन प्रतिपादितम् । भाष्येऽपि भूशब्दः प्रकृतिःअतिशब्दस्तु प्रत्यय इत्युक्तम् । अधुनादीनां चापेचापक्षीणरूपाणां) ण रूपाणां व कश्चिदर्थः प्रकल्पितः । केवलं त्वर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यत इत्युक्तम्
।। ।।
--, ----", , " (3-1-67 o) 167 तत्रापि शक्यत्वाशक्यत्वाभ्यामन्वयव्यतिरेकावाश्रित्य तत्प्रतिपादनं कर्तव्यमित्याहयत्र चेति ।
यत्रान्वयव्यतिरेकावुपलभ्येते तत्रैव नियमः
न त्वशक्ये विषय इत्याहनियम इति । भवतामत्तीत्यादावसति शब्नुडादावर्थदर्शनाद् वृक्षाणां पचतीत्यादौ तस्य साहाय्यमात्रं स्थापितं न पृथगर्थतेति । उक्तं चभावकर्मकर्तारः सार्वधातुकार्था इति चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात्विकरणार्था इति चेत्कृताभिहितेषु विकरणाभावःभाष्यं द्र इति ।। ।।

168 , , 168 सम्भवे वाभिधानस्य लक्षणं तु न कल्प्यते । आपेक्षिक्यो हि संसर्गे नियताः शब्दशक्तयः ।।
।। अभिधानसंभवे सति यः कश्चिदपि शब्दाभिधेयमर्थमभ्युपगच्छति

न तस्य लक्षणभावाभ्पुपगमो युक्तः । शब्दसामर्थ्यमेवं सति बाधितं स्यात् । इच्छातश्च सर्वस्य लक्षणत्वमभ्युपगम्येत । तस्मादागमे यस्य सम्प्रत्ययः स तस्याभिधेयत्वेन व्यवस्थाप्यते । यद्यपि केवलानां प्रयोगेष्वदृष्टः (प्रयोग इ) त्य (व्यभिचार) संसर्गादिप्रविभागा इवावस्थिताः शक्तयः तथापि त्वासामितरेतरानपेक्षैवाभिव्यक्तिरभ्युपगम्यते । प्रतिनियमेन कृतविभागा व्यवस्थिताः शब्दानां शक्तयः प्रतिज्ञायन्ते ।। ।।
, , --, --168 यत्र तु पृथगेव तयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृश्यतेतत्र पृथगर्थाभिधानमेवाङ्गीकार्यम्न तूपलक्षमार्थत्वं कल्पनीयमित्याहसंभव इति ।
प्रकृतिप्रत्यययोः पृथगर्थाभिधानसम्भवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः
प्रत्ययार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति न युक्ता कल्पना । ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति तत्किमिति

परस्परापेक्षितया स्वार्थाभिधानमित्याह
आपेक्षिक्य इत्यादि । यस्मात् संसर्गे प्रकृतिप्रत्ययार्थयोः शब्दशक्तयोऽन्वयव्यतिरेकापेक्षिता नियता एव प्रातिस्विक्य एव प्रतीयन्त इति ।। ।।

169 , , 169 न कूपसूपयूपानामन्वयोऽर्थस्य दृश्यते । अतोऽर्थान्तरवाचित्वं संघतस्यैव गम्यते ।।
।। यदि तर्हि यावत्किञ्चित्तुल्यरूपं तस्यैकत्वमभ्युपगम्यते

यावांश्च भिन्नोऽर्थः सर्वोऽसौ भिन्नरूपनिबन्धनः प्रतिज्ञायते सत्यपि सम्बन्ध्यन्तराभेदेतथा सति कूपसूपयूपेषु योऽयमर्थभेदः स वर्णमात्रनिबन्धनः प्रयुज्यते । स्यादेतदेवं यदि भेदाभेदावत्र विषये स्याताम् । न त्वभिन्नमस्ति यदूपशब्दोऽनूपतद्विभागव्यवस्थां कुर्यात् । तस्यान्वयाभावाद् विषयाप्रविभागेणाव्यतिरेकेण व्यवतिष्ठत इत्यर्थान्तरनिबन्धनत्वमविभक्तावयवार्थानां समुदायानामाश्रीयते ।। ।।
--169 यत्र त्वपेक्षायामपि न पृथगर्थतोपलभ्यते तत्रापोद्धारो नाश्रयणीय इत्याहन कूपेति । नह्येकापगमे क्कचिद् या काचिदर्थानां वेदनोपजायते ।। ।।

170 170 अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु । बहूनां सम्भवेऽर्थानां निमित्तं किञ्चिदिष्यते ।।
।। लौकिकस्याभिधेयस्याभेदेन सव्यापारमुपलक्षणभूतं वा निमित्तमुपादायोपादाय विशिष्टैः साधुविषयाणि निपातनेन लभणेन वा क्रियामाणशब्दव्युत्पत्तिकर्मसु बहुधा भिन्नान्यन्वाख्यानानि दृश्यन्ते । अनेकशक्तियुक्तेऽर्थे या काचिन्निमित्तभावेनाश्रीयमाण शक्तिः साधुत्वान्वाख्यानेऽङ्गत्वं प्रतिपद्यते । तद्यथा वृञ्लुटितनिताडिभ्य उलच् तण्डश्च । शक्यो ह्यन्येभ्योऽपि धातुभ्यः शब्दव्युत्पत्तिकर्मण्युलच्प्रत्ययो विधातुं तण्डादेशश्च कर्तुमिति ।।

।।
--170 तदेवं शक्याशक्यावन्वयव्यतिरेकावाश्रित्यापोद्धारेणान्वाख्यानं पदभागयोः कार्यमित्युक्तम् । ततश्च किं सनिमित्तमथ निर्निमित्तमेवेत्याशङ्क्य सनिमित्तमेव पदभागयोः पदस्य चान्वाख्यानं कार्यमितीदानीमुपपादयितुमाहश्रन्वाख्यानानीति । यत्र खलु बहूनि निमित्तानि सम्भवन्ति तत्र किञ्चिदेवानैयत्येनाश्रित्यान्वाख्यानं क्रियत इत्युच्यते ।।
।।

171 , , , , , , , , , , , 171 वैरवासिष्ठगिरिशास्तथैकागारिकादयः । कैश्चित्कथाञ्चिदाख्याता निमित्तावधिसङ्करैः ।।
।। वीरकर्म वैरम्

वीरेषु भवं वैरम्वसिष्ठेन दृष्टं प्रोक्तं वा वासिष्ठम्वसिष्ठशब्दोऽस्मिन् वर्तत इति वासिष्ठम् गिरौ डश्छन्दसि गिरिशःगिरौ शोत इति वागिरौ शिरा (शिरो यस्य) इति वाऐकागारिकट् चौरेऐकास्सोढाहिंसोरैकागारितत्विति (एकागारं सोढाएकमसायमगारं प्रयोजनमस्य जिघांसोरैकागारिक इतिमुमुषिषोः) ऐकागारिक इति वा । तथा तप्पर्वमरुद्भ्याम्ददातिवृत्तं चेति निमित्तभूतानामर्थानां प्रकृतिप्रत्ययावधीनां वाऽनियमेनान्वाख्यातारः प्रवृत्ताः ।। ।।
--, , `3-2-15 o) `3-2-3) 171 एतदेव दर्शयितुमाहवैरेति । वीरस्येदं वैरं वीराया वातथा वसिष्ठस्येदं वसिष्ठेन कृतं प्रोक्तं वा वासिष्ठम्गिरौ शेते इति गिरौ डश्छन्दसि' (वाइति डप्रत्ययेऽथवा गिरिं श्यतीति आतोऽनुपसर्गे कः' (इति के गिरिशः ; इत्येवं निमित्तावधिसाङ्कर्येणान्वाख्यानं कृतम् ।। ।।

172 172 यथा पथः समाख्यानं वृक्षवल्मीकपर्वतैः । अविरुद्धं गवादीनां भिन्नैश्च सहचारिभिः ।।
।। एकस्य हि मार्गादेः प्रतिपत्तव्यस्यार्थस्य कश्चिदन्वाख्याता वृक्षेणान्वा ख्यानमपरो वल्मीकेनान्यः पर्वतादिभिः करोति । सर्वेषां हि तेषां सन्निधानात् प्रतिपादकत्वमप्रतिषिद्धम् । गवादीनां चार्थानां सम्बन्धिभिर्जातिगुणस्वाङ्गसंयोजनादिभः सर्वथा प्रतिपादनं क्रियते ।।

।।
--172 ननु नियतमेव निमित्तमत्र किञ्चिदुच्यतामित्याशङ्क्योपायानामनियतत्वादनियतमिति प्रतिपादयितुमाहयथेति । यथा वृक्षादिभिर्भिन्नैरुपायभूतैरेव कस्यचित्पथः समाख्यानमविरुद्धं तथा गवादीनां शब्दानां भिन्नैरेव सहचारिभिरन्वाख्यानमिति बोद्धव्यम् ।। ।।

173 , 173 अन्यथा च समाख्यनमवस्थामेददर्शिभिः । क्रियते किंशुकादीनामेकदेशावधारणात् ।।
।। कश्चिद्धि काञ्चिच्छक्तिं पश्यति । स यथादर्शनं तद्व्याचष्टे । पदार्थे वाक्यार्थे वा तुल्यरूपमपि पदं क्वचिदेव कयाचिच्छक्त्यानुग्रहं करोति । ततश्च वाक्यात् पदस्यापोद्धारे क्रियमाणे सा शक्तिर्निमित्तत्वेनाश्रीयते । नियतकालावधयो वा शक्तिविशेषाः प्रतिकालं केचिच्छब्दविशेषणोपादीयमानाः साधुत्वे निमित्तत्वेनावतिष्ठन्ते । ते च प्रतिकालं तथैवान्वाख्यातृभिः शिष्टैः परिगृह्यन्ते । पर्य्यायेण समुच्चिता विरोधिन्य एकस्यापरिमाणाः शक्तयो रूपभेदं दर्शयन्ति

तत्र च विरुद्धैर्निमित्तैरुपलक्षणं किंशुकानामिव कालभेदे शक्तौ कस्याश्चिच्छब्दस्य व्यवस्थायां न विरुध्यते ।। ।।

--173 अर्थस्य चावस्थाभेदा बहवः सन्ति येन च योऽवस्थाभेदः परिदृष्टिस्तेनैवासौ तत्समाख्यानं करोतीत्याहअन्यथा चेति । किंशुको नेति किंशुकशब्दं प्रयुञ्जत इति भिन्नमेव निमित्तम् ।।
।।

174 , , 174 कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः । गवतेर्गतदेर्वापि गौरित्यत्रानुदर्शितम् ।।
।। यथैव हि (गवि) गमिक्रिया जात्यन्तरैकार्थसमवायिनीभ्यो गमिक्रियाभ्योऽत्यन्तभिन्ना तुल्यरूपत्वविधौ त्वन्तरेणेव गमिमभिधीयमाना गौरिति शब्दव्युत्पत्तिकर्मणि निमित्तत्वेनाश्रीयते

तथैव गिरति गर्जति गदतीत्येवदमादयः साधारणाः सामान्यशब्दनिबन्धाः क्रियाविशेषास्तैस्तैराचार्य्यैर्गोशब्दव्युत्पादनक्रियायां परिगृहीताः । व्युत्पत्तिवाक्यस्थेभ्यो व्या (ह्या) ख्यतपदेभ्यः सरूपान् वर्णानुपादाय तत्सङ्घात इव (प) थि पदमन्वाख्यायते यावद्धात्वर्थमात्रा सनादिभात्रा वा यास्वृक्षु वा (याज्यानुवाक्यास्वृक्षु वा) वाक्यार्थानुग्राहिणी लभ्यते । यथा ह्यादित्य इत्येकस्मिन्नेवाम्नायवाक्ये तद्धितार्थेनापत्येन सम्बन्धो दृश्यते । वाक्यान्तरसम्बन्धिनि तु तस्मिन्नादित्याशब्दे निर्वचनान्तराणि क्रियन्ते । यदि निर्वचनेषु विषयानपेक्षं व्युत्पत्तिमात्रं क्रियतेसर्वो रूढिशब्दः सर्वेभ्यो धातुभ्यो रूढानुगममात्रायां तण्डुलादिवच्च प्रकृत्यादेशान् कृत्वा व्युत्पाद्येत । सर्वत्र हि रूढ्यर्थे सर्वनिमित्तं सम्भवति ।। ।।
--, 174 एवदेव व्यक्तीकर्तुमाहकैश्चिदिति । गोलक्षणस्यार्थस्य नानाविधा अवस्था दृष्टाः
तदनुगमेनैवार्थमाहुराचार्याः ।। ।।

175 175 गौरित्येव स्वरूपाद्वा गौशब्दो गोषु वर्तते । व्युत्पाद्यते न वा सर्वं कैश्चिच्चोभयथेष्यते ।।
।। अपरे वाचार्य्या औक्थिक्यादयो गौः कस्माद् गौरित्येव गौरिति निर्वचनमाहुः । गोशब्दवाच्यो गोशब्देन नित्यसम्बद्धः । तस्माद् गौरिति वाक्यार्थे पदार्थमात्राशक्तिविशेषसन्निवेशनार्थं विशृष्टं वक्ष्यामीति व्युत्पत्तिरारभ्यते । अजाश्वो वा पृथू(द) कं वा पादीयं भृत्यभरणीय इत्येवमादिषु । भाष्ये तु द्वावपि पक्षावेकेकस्मिन्नेव कार्यार्थमाश्रितौ । कश्चिद्धि परमार्थमेव निश्चित्य शास्त्रव्यवहारो व्यवतिष्ठते । कश्चित् साधुप्रतिपादनोपायं शास्त्रसमयमेवापेक्षते । शास्त्रगतो व्यवहारस्तत्रापरमार्थो धातुप्रत्ययादिभेददर्शनं च । एकत्वादिवृत्तिभेदस्तु तदा यो यथैव धातुरूपाणि तथायुभ्पगम्यते (भ्युपगच्छति) । व्यवहारपक्षे तु धातवोऽपि कैश्चिद्वर्णाश्च धात्वन्तरेभ्यो वर्णान्तरेभ्यश्च प्रकृतिप्रत्ययाद्यनुगमेव व्युत्पाद्यन्ते ।।

।। -----175 एवं शब्दस्य प्रकृतिवाच्यमेव निमित्तं ततश्च बहुविधनिमित्तप्रदर्शनम् । इदानीं स्वरूपमेव शब्दानां प्रवृत्तिनिमित्तमन्वाख्यनायोपादीयत इति पक्षं प्रदर्शयितुमाहगौरित्येवेति । अथ कस्माद् गौरित्युच्यते गौरित्येव हि गौर्गविवर्तत इत्यौक्थिक्याः । अतश्च स्वरूपमात्रप्रयुक्ताः सर्वे शब्दा इत्यव्युत्पत्तिपक्ष एवेत्याहव्युत्पाद्यते न वा सर्वमिति । कैश्चित् स्वरूपं वाच्यं च निमित्तमुच्यत इत्याहकैश्चिच्चेति । एवं सनिमित्तमन्वाख्यानं निमित्तं च वाच्यं बह्धा कैश्चित् कथञ्चित् किञ्चिदुक्तं स्वरूपं निमित्तमुभयमेव वेति दर्शितम् ।। ।।

176 , , 176 सामान्येनोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः । जात्यन्तरवदस्यापि विशेषाः प्रतिपादकाः ।।
।। इह रूपानुगमेनार्थानुगमेन वा यावत्सामान्येनोपदेष्टुं शक्यते तावदुषदिश्यते । विशेषस्त्वर्थविषयो रूपविषयो वा जात्यन्तरयुक्तमिवान्यं शब्दमयमिव चार्थं प्रतिपादयति । तत्र यो रूढिविषयो गम्यर्थः

नासौ प्राकृते गमनमात्रे वर्तते । यथैव स्त्रवति स्प (स्य) न्दते प्लवते पतति गतिसामान्येऽपि पठिता गतिविशेषं सामान्यमात्रयाऽनुगम्यमानं स्वभावादवलम्बन्तेतथा गौरित्यत्र प्रतिपत्तव्यम् । न चावश्यमत्र गमिः पादविहरणे क्रियते । एवं यावति (ती)रूढिशब्दार्थविशिष्टा क्रिया संभवति सर्वत्रानेकार्थत्वाद्धातूनां प्रवृत्तिरप्रतिषिद्धा गमेः । दृष्टं चेदं गुरुतल्पगादिषु व्यापारान्तरविषयत्वं गमेः । यथैव रूढिषु क्रियाणां फलरूपभेदस्तथा कारकभेदोऽपि । तस्माद्रूढिषु जात्यन्तरवत् सामान्याभिधानेऽप्यर्थान्तरप्रतिपत्तिरिति ।। ।।
, , -- , 176 इदानीं किं भिन्नमेव रूपं शब्दस्यआहोस्विदभिन्नमिति विचार्यते । यदि भिन्नमेव तदा गमनं गरलं गज इत्यादिषु गादीनां भिन्नत्वाद्भेदेनैवापादानं प्राप्नोतिततश्चानन्त्यादश्क्यत्वमन्वाख्यानस्येत्याह
शब्दभेददर्शने भिन्नानां सामान्यसमाश्रयेण लाघवादुपदेशः शास्त्रे क्रियतेविशेषा ये तेऽस्यैव जात्यन्तरवत् प्रतिपादका उच्यन्ते ।। ।।

177 177 अर्थान्तरे च यद् वृत्तं तत्प्रकृत्यन्तरं विदुः । तुल्यरूपं न तद् रूढावन्यस्मिन्ननुषज्यते ।।
।। ये रूढिविषया गम्यदयः प्रकृत्यन्तराण्येवैतानि । कर्मकर्तृविषयवत् सत्यपि तुल्यविषयरूपत्वेऽत्यन्तभेदान्न रूढिविषयाणामरूढिष्वरूढिविषयाणां वा रूढिषु कश्चिदनुषङ्गो विद्यते ।।

।।
-- 177एतदेवाह

रूढौ च तुल्यरूपं स्वरूपेणान्यस्मिन्ना नुषज्यते । तत्त्वतस्तद्भिन्नमेव सादृश्यात्तत्रैकत्वं मन्यते । परमार्थतस्तु भिन्नाः शब्दा गवादयः ।।।।

178 , ...-- 178 भिन्नाविजियजी धातू नियतौ विषयान्तरे । कैश्चिद् कथञ्चिदुद्दिष्टौ चित्रं हि प्रतिपादनम् ।।
।। यथैव हि रूपसामामान्ये सत्यपि स्वभावसिद्धो रूढिष्वर्थभेदस्तथार्थानुगमसामान्ये सत्यपि शास्त्रे च स्वरूपसामान्यपरिग्रहणोपदेशे कृतेऽपि यजेरन्य एवेजिः किद्विषयः । अस्तेश्चान्यदेव समात्रं स्तः सन्तीत्यन्यदेव विशिष्ट विषयम् । एतदपि च सर्वं परमार्थप्रतिरूपकं व्यावहारिकमेव दर्शनम् । नहि धातुरूपं परमार्थेन किञ्चिद्विद्यते व्यवहारस्तु कैश्चित् क्रियते । केचिदस्ति सकारमात्रमातिष्ठन्ते

तस्य त्वकारागमो विषयविशेषे तैर्विधीयते । तद्यथा निगन्तीति प्रकृत्यन्तरं गत्यर्थेषु निरुक्ते पठ्यते । तथाऽऽहिधातुं पञ्चपदविषयमन्ये वचनार्थ पठन्ति । त (द्य) था
गौ(ग्लौ) रिवासितपक्षस्य सा (ऽ) मुदे चारुहासिनि । अ(आ)हेः पञ्चपदानीव त्वमेव शरणं मम ।। इति । इजेरकृत (रकित्स्वादे) स्वादेर्यशब्दमेके कुर्वन्ति । चित्रा हि प्रतिपादनोपायाः ।।

।।
------, --, 178 स्वतश्च यजिर्भिन्न एवेत्याहभिन्नाविति । अन्यो यजिरन्य् इजिरिति नियतौ बोद्धव्यौ । इजिः कित्येव यजिस्तु तदितरस्मिन्निति । आचायः पुनः क्कचिद् भेदाश्रयेण निर्दिष्टौ क्कचिदभेदेनेति प्रतिपादयितुमाह
कैश्चिदित्यादि । कश्चिद्यजेः किति सम्प्रसारणं शास्तिइष्टःइष्ट्वेति । तृजादौ तस्य तन्नच्छतियष्टा यष्टुं यष्टव्यमिति । कश्चिदिजिमेवोपदिशतितस्य तृजादौ यादेशं विदधातीति प्रतिपादनवैचित्र्यम् ।। ।।

179 179 एवं च बालवायादिजित्वरीवदुपाचरेत् । भेदाभेदाभ्युपगमे न विरोधोऽस्ति कश्चन ।।
।। वैयाकरणा हि व्यवस्थितेषु समुदपेषु परिकल्पितमवयवं व्यवस्थापयन्तः प्रकृत्यन्तरं वा विदूरशब्दं शास्त्रस्य व्यवहारविषयमलौकिकं जित्वरी वदुपाचरन्तो व्याचक्षीरन् । बालवायशब्दस्य वा तुल्यार्थं विदूरशब्दमादेशं कुर्युः । नहि (अ) भेदेनादेशाभ्युपगमे प्रकृत्यन्तरस्य वा नियतविषयस्य प्रतिज्ञाने लौकिकस्यार्थस्य समुदायशब्दस्य वा कश्चिदपि भेदो विद्यते ।।

।।
--, -- , 179 अवस्थाभेदाश्रयेणापि प्रतिपादनं दृश्यत इत्याहएवं चेति । इह विदूरात् प्रभवति वैदूर्य इति वैदूर्यशब्दं व्युत्पादयन्ति । न च विदूरादसौ प्रभवति । बालवायादुत्पन्नो विदूरे केवलं संस्क्रियते
तत्रोक्तम्
बालवायो विदूरं च प्रकृत्यन्तरमेव वा । न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत् ।। इति । बालवायो वृत्तिविषये विदूरमापद्यते

ततश्च बालवायात् प्रभवति वैदूर्यो मणिरिति सिद्धम् । अतो बालवायविदूरयोरभेदोऽभ्युपगतः । अथवाऽन्यो वृत्तिविषये विदूरशब्द उच्यते । यथा वणिग्भिर्वाराणसी जित्वरीति । आदिशब्दाद्विश्रवणरवणशब्दाविति भेदोऽवगन्तव्यः । अतोऽभेदाभ्युपगमे भेदाश्रयणे वा न कश्चिद्दोषः । भेदपक्षाश्रयणे च सामान्यमाश्रित्य लाघवेनोपदेशः क्रियते । अभेदपक्षे त्वभिन्नरूपसमाश्रयणेनैवेति न किञ्चिदवद्यम् ।। ।।

180 181 `--180-181 अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् । धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ।।
।। तथाहि संग्रामयतेः सोपसर्गाद्विधिः स्मृतः । क्रियाविशेषाः संघातैः प्रक्रम्यन्ते तथाविधाः ।।

।। क्रियाविशेषविषया हि धातवः कार्यार्थं भेदेनोपदिष्टाः । निवासयत्यास्फोटयति जुगुप्सते मूत्रयतोति ल्यब्द्विर्वचनादीनि विभागे सतीष्टां व्यवस्थां लभन्ते ।

संग्राम युद्धे' इति क्रियाविशेषवाची सम्पूर्वः सङ्घात एव प्रक्रम्यते । पुनश्चोक्तम्अवशयं संग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्येति ।। ।।
-- , 180 --, , --181 ततो यदि शब्दभेदपक्षस्तादधातूपसर्गयोः पृथक्त्वकल्पनमित्याह
अड्द्विर्वचनव्यवस्थार्थं केवलं धातवः पृथगुपदिष्टाःवस्तुतः पुनर्विशिष्टक्रियावचना एव त इति सोपसर्गाणामेव धातुत्वम् ।। ।। एतदेव प्रतिपादयितुमाह तथाहिति । असङ्ग्रमयत
सिसङ्ग्रमयिषतेसोपसर्गस्यैवाड्द्विर्वचनदर्शनात् सोपसर्गस्यैवास्य धातुत्वम अत उपक्रम एवाख्याते विशिष्टैव धातुवाच्या क्रिया निर्वर्तयितुमुपक्रम्यत इत्याख्यातानां स्वरूपप्रदर्शनार्थमाहक्रियाविशेषा इत्यादि । संघातैर्धातूपसर्गसमुदायैरित्यर्थः । तथाविधा अभिन्ना भिन्ना वा ।। ।।

182 182 कार्याणामन्तरङ्गत्वमेवं धातूपसर्गयोः । साधनैर्याति संबन्धं तथाभूतैव सा क्रिया ।।
।। उपसर्गसम्बन्धाधीना स्वार्थव्यवस्था धातूनाम । स्वार्थयोगे च सिद्धे सम्बन्ध्यन्तरस्य सन्निधानेन भवितव्यम् । तत्र गौरखरादिवद् विशिष्टार्थे प्रकृतिरूपे प्रतिलब्धे बाह्याः सम्बन्धिन उपजायन्ते । तस्माद् विशिष्टप्रकृतिरूपवाच्या विशिष्टा क्रिया तथाभूतैव साध्या सती साधनसम्बन्ध प्रतिपद्यते ।।

।।
--, --, `o 6-1-86) `o 6-1-135, o 6) -- , o 1-3-1, o 11) 182 अतः किं भवतीत्याहकार्याणामिति । एवं धातूपसर्गाश्रयाणि यानि कार्याण्यन्तरङ्गाणीत्युच्यन्ते पूर्वं तान्येवप्रवर्तन्ते
यथा सुडादयः । तथाभूतैव च सा क्रिया साधनसम्बन्धं गच्छतीत्याहसाधनैरिति । तथाभूतैवोपसर्गविशिष्टैव कारकसम्बन्धमुपगच्छति । एवं चानुभूयत इत्यत्र कर्मणि लकारः सिद्ध्यतितथा षत्वतुकोरसिद्धः' (अष्टा इत्यारम्भणीयम् । अङभ्यासव्यवायेऽपि' (भाष्य वा इत्यनारम्भणीयमेवति स्थितम् । उक्तं चकारकाणां प्रवृत्तिर्विशिष्टक्रियायामन्यथा कृत्वः मांसौदने प्रवर्तन्तेअन्यथा च शुष्कौदने' (भाष्य वा इति । वृत्तोपसर्गसम्बन्धायाश्च तस्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्ववोपसर्गेण सम्बन्धः ।। ।।

183 183 प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशिष्यते । प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते ।।
।। इह प्रसिद्धं विशेष्यमनेकप्रकारसंभवे सति दृष्टप्रयोगेण शब्देनाभिधीयमानं विशेषणविशेष्यभावं प्रतिपद्यते । साध्यत्वाच्च क्रियायाः साधन सम्बन्धनिर्वृत्तिः । तस्मात् प्राक्र साधनसम्बन्धादनुपजाता क्रिया निरात्मिका द्योतकेनोपसर्गेण सह विशेषणविशेष्यसम्बन्धं नोत्सहते प्रतिपत्तुम् । पूर्वं धातुः साधनेन युज्यत इत्येकेषां दर्शनम् ।।

।।
--, , ----```, 183 इदानीं पूर्वं धातुः साधनेन युज्यत इति क्रमसमाश्रयणेनाख्यातस्वरूपं प्रतिपादयितुमाहप्रयोगार्हेष्विति । लब्धात्मनस्तस्या विशेष्यत्वोपपत्तेः प्रयोगार्हेषु धातुषु सिद्धः सन्नर्थो भेत्तव्यो विशेष्यो भवत्युपसर्गादिभइःन तु पूर्वकाल आख्याते विशेषणयोगः । यदि प्राक्साधनसम्बन्धात् क्रियाविशेष इत्युच्यतेतथाऽव्यु (नु) त्पन्नायास्तस्याः स्वरूपाभावेन कथञ्चित् शेषसम्बन्धः स्यादित्याहप्राक्चेत्यादि । उक्तं चसाधनं क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि' इति । पूर्वं साधनसम्बन्धस्तत उपसर्गैस्तद्विशेषणमुपपन्नम् । अस्मिंश्च पक्षे अङभ्यासव्यवायेऽपि'इत्यारम्भणीयं षत्वतुकोरसिद्धः' इति तुकि कर्तव्ये एकादेशासिद्धत्वं न वक्तव्यम्प्रत्यय इत्यन्तरङ्गत्वात् साधनाभिधायकार्ध्दधातुकाश्रयो गुणः प्रवर्तत इति सिद्धम् ।। ।।
184 धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा । धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम् ।।
।।

, , , `184 अथ पूर्वं धातुरुपसर्गेण युज्यत इत्यमुं पक्षं समाधातुमाह क्रियावचनो धातुरित्युक्तम्
साधनसम्बन्धाच्च प्राक् क्रियानिर्वृत्तेरसम्भवाद्यथा भाविसाधनसम्भन्धसमाश्रयणेनोपक्रम एव धातुत्वं धातुसंज्ञोच्यते यथा च धातोः कर्मण इत्युच्यतेकर्म यो धातुरितीषिकर्मत्वस्य भावित्वादुपक्रम एवेषिकर्मत्वमुक्तं तथान्यदपि दृश्यतां भाविसम्बम्धातुपक्रम एव विशिष्टक्रियावचनत्वं दृश्यतां को दोषः । एवं च भिन्नपक्षाश्रयणेन तथाविधविशेषनिर्वर्तन शोभत इत्युच्यते क्रियाविशेषाः सङ्घातैः प्रकम्यन्ते तथाविधाः' इति ।। ।।

185 बीजकालेषु सम्बद्धा यथा लाक्षारसादयः । वर्णादिपरिणामेन फलानामुपकुर्वते ।।
।।

-- 185 उपक्रम एव चासौ क्रिया विशिष्टैवाभ्युपगन्तुं युक्तेति दृष्टान्तप्रदर्शन पूर्वकमाह
बीजवापकाल एव यथा लाक्षारसादयो बीजसंबन्धादुत्तरकालं वर्णरसादिपरिणामेन फलोपकारं कुवन्ति ।। ।।

186 बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः । अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ।।
।।

-- , 186 तथादार्ष्टान्तिके योजयितुमाह
धातूपसर्गयोः सम्बन्धबुद्ध्या समुल्लिखितो योऽन्तर्णोतः केवलं तस्मात् सम्बन्धात्तयोर्द्धातूपसर्गयोः सम्बन्धे पदकाले पदनिष्पत्तौ सत्यामसौ भेदः प्रकाशतेन तु स्वत इति वृत्तो पसर्गसम्बन्धाया एव साधनयोग उपपन्नः ।। ।।

187 क्वचित् संभविनो मेदाः केवलैरनिदर्शिताः । उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना ।।
।।

`o o 2-181) , `-- `187 एवमपोद्धारप्रस्तावे वाक्ये पदस्य पदभागयोः प्रकृतिप्रत्यययोः शक्याशक्यान्वयव्यतिरेकसमाश्रयणेन सनिमित्तमन्वाख्यानं कर्तुमनेकधार्थः क्वचिन्निमित्तं स्वरूपं वेत्याख्यातम् ततश्च पदमेकमनेकं वेति नामपदं लेशतो निर्णोतम् । आख्यातमपि क्रियाविशेषाः सङ्घातैः प्रकम्यन्ते तथाविधाः' (वा पा इत्यादिना भेदाभेदविचारपूर्वकमपि निदर्शितप्रायम्इदानीम् नामाख्यातोपसर्गनिपाताश्चेति चत्वारि पदजाताने 'इति निरुक्तकारस्तत्र नामाख्यातस्वरूपे प्रदर्शिते । उपसर्गाणां प्रदर्शनीयमिति तत्स्वरूपं प्रदर्शयितुमाह
क्वचित्पचत्यादौ प्रकर्षादीनां सम्भवात् केवलैस्तेषामप्रतीतेरुपसर्गसम्बन्धात् तदवगम इति तेषूपसर्गाणां विशेषद्योतकत्वमुच्यते । अत एव चोक्तम् तमेव विशिनष्ट्यन्यः' इति ।। ।।

188 स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा । शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ।।
।।

-- `, `188 तर्हि द्योतकत्वमेव किं तेषामाहोस्वित्पक्षान्तरमपीत्याह
केवलं न द्योतका यावद्वाचका अपि दृश्यन्ते । यथा प्रतिष्ठत इत्यादौ धातोर्गतिनिवृत्तिवाचकत्वं प्रेण तु गतिवाचकत्वं व्यवस्थाप्यते । तथा चोक्तं धात्वर्थं बाधते कश्चित्इति । सम्भवाद् द्योतकोऽपि वा' इत्येतदादावेव कारिकायां व्याख्यातम्। अथ तृतीयमपि पक्षं दर्शयितुमुक्तम् शक्त्याधानायेत्यादि । सम्भूय धातूपसर्गावर्थमाहतुरिति शक्तिमात्रमुपसर्गः कुरुत इत्यर्थाभिधाने सहकारिण उपसर्गाः । अत्राप्युक्तम् कश्चित्तमनुवर्तते' इति ।। ।।

189 स्थादिभिः केवलैर्यच्च गमनादि तु गम्यते । तत्रानुमानाद् द्विविधात्तद्धर्मा प्रादिरुच्यते ।।
।।

, -- , , ---- , 189प्रतिष्ठत इत्यादौ प्रसिद्ध्या धातोर्गतिनिवृत्तिवाचकत्वे उपसर्गस्य गतिवाचकत्वं स्थापितम्इदानीमनुमानेन द्योतकत्वमेव सर्वत्रास्य व्यवस्थापयितुमाह
तिष्ठतिर्गतिनिरवृत्तिं प्रसिद्ध्याभिदधाति । अतः केवलेन तेन गमनं न प्रतिपाद्यत इत्यनेकार्था धातव इति कृत्वानुमानाद् गतिवाचकत्वमपि तस्या व्यवस्थाष्यतेउपसर्गस्तु तद्द्योतक एव । गतिनिवृत्तौ तु प्रसिद्धत्वात्तिष्ठतेः प्रशब्दस्य गतिवाचकरत्वमुच्यतेवस्तुस्थित्या त्वनुमानेन प्रादेर्द्योतकत्वमेव सामान्यतो दृष्टेन विशेषतो दृष्टेन चेत्याहतत्रेत्यादि । धातुरनेकार्थ उपसर्गश्च द्योतक इत्यनुमानेन व्यवस्थाप्यते । द्विविधमनुमानं भवतिविशेषतो दृष्टंसामान्यतो दृष्टं चेति । तत्राविशेषेणोपसर्गाणां द्योतकत्वं तथा च प्रशब्दो धर्मो आदिकर्मद्योतक इति साध्यो धर्मः प्रशब्दत्वात् पूर्वोदितपच्यादि (पूर्व) दृष्टप्रशब्दवदिति । विशेषतो दृष्टेनानुमानेन तद्धर्मप्रशब्दस्य समानधर्मा सर्वोऽपि प्रादिरुपसर्गो द्योतकत्वधर्मयुक्त उच्यत इति । धातुश्च सामान्यतो दृष्टेनानुमानेनानेकार्थः । यथा तिष्ठतिर्धर्म्मो अनेकार्थ इति साध्यो धर्मो धातुत्वाद् उभयवादिसम्मतानेकार्थयजत्यादिधातुवदिति । एवं सामान्यते दृष्टानुमानात् तद्धर्मान्यो धातुरप्यनेकार्थ उच्यत इति योजना।।।।

190 अप्रयोगेऽधिपर्योश्च यावद् दृष्टं क्रियान्तरम् । तस्याभिधायको धातुः सह ताभ्यामनर्थकः ।।
।।

-- o 1-4-93) , --190 इदानीं संभूयार्थाभिधायकत्वमपि दर्शयितुमाह
अध्यागच्छति पर्यागच्छतीत्यत्राधिपरी अनर्थकावागच्छतीत्यस्मादेवोपरिभावविश्ष्टस्य वा सर्वतोभावविशिष्टस्य वाऽप्यागमनस्य प्रकरणादिनावगतत्वाद् लौकिकशब्दव्यवहारे लाघवं प्रत्यनादरादिति स्पष्टार्थमेवाधिपर्योः प्रयोगः । समुदाय एव विशिष्टार्थाभिधायक इत्यधिपर्योः
केवलयोर्धातोश्चाऽत्रानर्थकत्वामनर्थान्तरवाचकत्वमित्यर्थः । अतो धातूपसर्गौ सम्भूयैवार्थविशेषं ब्रूत इति धातोरर्थाभिधाने सहकारिण उपसर्गाः । उपसर्गाणां रूढितोऽर्थवत्त्व एव तावधिपरी अनर्थकाविति (अष्टा केवलानर्थकतया । नहि तयोरूपसर्गयोः केवलयोस्तत्रार्थोऽस्तिअत एवोक्तम्कश्चित्तमनुवर्तते'इति
।। ।।

191 तथैव स्वार्थिकाः केचित् सङ्घातान्तरवृत्तयः । अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः ।।
।।

-- --, `? , `191 प्रसङ्गात् स्वार्थिकप्रत्ययानां स्वरूपमाह
यावक इत्यादौ कनादयः सम्भूयैवार्थबोधका बोद्धव्याः । यावशूब्दात् केवलात् पृथगेव कन्प्रकृतिर्यावशब्दोऽध्यवसित इति संघातान्तरवृत्तयस्ते बोद्धव्याः ।

अत एवाहअनर्थकेन संसृष्टा इति । यावशब्दः कन्प्रकृतिरनर्थक एवसमुदायस्तु परस्परशक्त्याहितविशेषस्तत्रार्थवान् नासंभूय स्वार्थमाहेत्याह प्रकृत्यर्थानुवादिनः'इति । ननु प्रकृतिभागस्येदानीमेवानर्थकत्वमुक्तमतः कथं प्रकृत्यर्थानुवादिन इत्युच्यते सादृश्यमात्रादित्यभिप्रायः । कन्प्रकृतिः केवला यावशब्देन सदृशमभिमन्यत इति तदभिप्रायेण प्रकृत्यर्थानुवादिन इत्युक्तम्वस्तुतस्तु सङ्घातान्तरवृत्तयः' इत्येव बोद्धव्यम् ।। ।।

192 निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः । आगमा इव केऽपि स्युः संभूयार्थस्य वाचकाः ।।
।।

-- --, , --, --192 अथ निपातानामनैयत्येन स्वरूपं प्रदर्शयितुमाह
तेषामुपसर्गवद् द्योतकत्वं क्वचिद् यथा वृक्षश्च ल्पक्षश्चेत्यादौ । चादीनां केवलानां च केषाञ्चित् पृथगर्थाभिधायित्वं वाचकत्वमेव सिद्धमित्याहकेचिदित्यादि । केचिन्निपाता आगमवत्संभूय वाचकाःयथा येषां पृथगर्थप्रकल्पन इति पाठःतेषां मते निपातानां द्वैविध्यम्केचिदर्थवन्तःष केचिदनर्थका इति । तत्र केचिन्निपाताः पृथगर्थप्रकल्पने सत्यर्थाभिधायिनस्ततो द्योतका इत्यर्थवतां स्वरूपकथनम्ये त्वनर्थकास्तेषां स्वरूपमाहआगमा इत्यादि ।। ।।

193 उपरिष्टात् पुरस्ताद्वा द्योतकत्वं न भिद्यते । तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा ।।
।।

-- 193 तथा च लौकिके प्रयोगेऽनियम इत्याह
पूर्वं पश्चाद्वा प्रयुक्तास्तदर्थद्योतनं कुर्वन्तीति तेषु विकल्पसमुच्चयाद्यर्थेषु द्योतकत्वमेव प्रयुज्यमानेषु स्थितम् ।। ।।

194 चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः । प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते ।।
।।

, -- , ..., --...--194 अथ वाचका एव कस्मान्नोच्यन्तेकिं द्योतकत्वेनेत्यर्थद्योतकत्वं दृढीकर्तुमाह
एते हि चादयः केवला न प्रयुज्यन्ते ततो वाचका न भवन्तीति बोद्धव्यम् । चादयो धर्मिवाचकान भवन्तीति साध्यो धर्मःकेवलानामप्रयोगात् । यदि हि वाचकाः स्युस्तदा गवादिवत् केवलानामपि तेषां प्रयोगः स्यादित्यनुमानम् । नन्वत्र प्रत्यनुमानमस्ति
चादयो धर्मिद्योतका न भवन्तीति साध्यो धर्मःकेवलानामप्रयोगात् । प्रत्ययवत्तत्राहपदत्वे सतीति । एतदुक्तं भवति
न निर्विशेषणोऽयं हेतुरपि तु पदत्वे सति केवलानामप्रयोगाद् द्योतका एत इति पदत्वे सतीत्यनेन प्रत्ययव्यावृत्तिः । एतदेव दर्शयितुमाहप्रत्ययो वाचकत्वेऽपीत्यादि । प्रत्ययस्य कस्याचिद्वाचकत्वेऽपि पदत्वाभावात् केवलस्याप्रयोगः।। ।।

195 समुच्चिताभिधानेऽपि व्यतिरेको न विद्यते । असत्त्वभूतो भावश्च क्रियाऽन्येनाभिधीयते ।।
।।

, , , , , , , -- ------, , --"--" (2-1-1) 195 अथ शब्दशक्तिस्वाभाव्याच्चादिपदस्यासत्त्वभूतो यः पृथगर्थस्तद्वाचकत्वाद्वाचकत्वं व्यवस्थाप्यतेतदनुपपन्नम्;शक्त्यनुग्रहाद्यथा तदर्थवाचकानां समुच्चयादीनां प्रयोगे षष्ठी श्रूयतेवृक्षस्य समुच्चयःप्लक्षस्य समुच्चय इतितद्वन्निपातप्रयोगे षष्ठी श्रूयेतवृक्ष्स्य च प्लक्षस्य चेति । स्यादेवं यदि समुच्याभिधायकाः स्युःन चैवम्किं तर्हि समुच्चिताभिधायिन एत इत्युच्यते तदभिधाने च व्यतिरेको नास्तीत्याह
यद्येवं समुच्चितस्य सत्त्वभूतस्याभिधानेऽसत्त्व इति प्रतिषेधान्निपातसंज्ञाया अभावे तत्पूर्विकाया अव्ययसंज्ञाया अभावाच्चादेरपि विभक्तेः श्रवणं प्राप्नोतीत्याहअसत्त्वेति । एतदुक्तं भवति
इह शब्दैरर्थाभिधानं स्वाभाविकमिति स्थितम् । अत्र निपाताः शब्दशक्तिस्वभावादेवासत्त्वभूतार्थाभिधायिनः प्रतीयन्त इति सनिदर्शनमाहक्रियते । अत्र यथेत्यनुषङ्गः । यथा पाक एवोभयत्र नामपदस्याख्यातस्य च वाच्यः शब्दशक्तिस्वाभव्यात्तथा पचतीत्याख्यातेनासत्त्वभूतोऽसावभिधीयतेपाक इत्यत्र नामपदेन परिनिष्ठितस्वभावः सिद्ध इतितद्वन्निपातैः समुच्चितादेरसत्त्वभूतस्याभिधानमिति न विभक्तेरुत्पत्तिः । उक्तं च
नेदं वाचनिकं लिङ्गसंख्यादिस्वाभाविकमेव । तद्यथासमानमधीयानानां केचिदर्थैर्युज्यन्ते अपरे नभाष्ये इति । एवं वाचकत्वात् समुच्चिताभिधानेऽप्याख्यातपदवदसत्त्वभूतार्थाभिधायित्वाद्विभक्तेरभावः ।। ।।

196 समुच्चिताभिधानेऽपि विशिष्टार्थाभिधायिनाम् । गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादयः ।।
।।

, --, , -- --196 अस्त्वेवमपि समुच्चिताभिधायित्वाद्यथा स्वतन्त्राणां तदभिधायकानां विशेषणेन योगस्तथा निपातानामपि स्थात्अथ च गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्तीत्यसत्त्ववाचकत्वाद्विभक्त्यभावात् शोभनं च वृक्ष इति प्राप्नोति । तथा चान्यत्रोक्तम्प्रतिप्रयोगं जात्यङ्गे सम्बन्धमुपगच्छति । विशेषणंततो धर्मान् जातिस्थान् प्रतिपद्यते । ततश्च पञ्चाला जनपदो बहुधनो रमणीय इति भवति । अथ लुबन्तस्य विशेषणं न जातेस्ततः पञ्चाला रमणीया जनपद इति भवतिएतदाशङ्क्य समर्थयितुमाह
गुणैर्विशेषणैः पदानां विशिष्टार्थाभिधायिनां सम्बन्ध उपपद्यते । निपातानां तु शक्तिस्वाभाव्यादसत्त्ववाचित्वेऽपि नियतपरतन्त्रत्वाद्विशेषणयोगो नास्तीति न कश्चिद्दोषः । एतदुक्तं भवतिएतदपि शक्तिस्वाभाव्यमेव यत्तेषां नित्यपरतन्त्रत्वं नोमेति । अतः समुच्चिताभिधानेऽपि न केवलः प्रयोगो नापि विशेषणसम्बन्ध इति स्थितम् ।। ।।

197 जनयित्वा क्रिया काचित् सम्बन्धं विनिवर्तते । श्रूयमाणे क्रियाशब्दे सम्बन्धो जायते क्वचित् ।।
।।

, -- `2-204) , , , --"" o 156) 197 एवं नामाख्यातोपसर्गनिपातलक्षणं पदचतुष्टयं व्याख्यातम् अथ कर्मप्रवचनीयाः पञ्चमं पदमभ्युपगतमिति तद्विचारयितुमाह
सम्बन्धवच्छेदहेतवः कर्मप्रवचनीया इष्यन्ते । यद्वक्ष्यति सम्बन्धस्य भेदकाः' (इति । सम्बन्धस्च सर्वः क्रियाकारकपूर्वको भवति । तत्र क्कचित् सम्बन्ध जनयित्वा क्रिया विनिवर्ततेयथा राजपुरुष इति । अत्र हि राज्ञः पुरुषोऽयं यस्मात् स राजा पुरुषं बिभर्त्तिअतो भरणलक्षणा क्रिया आश्रयाश्रयिभावलक्षणं सम्बन्धं जनयित्वा निवृत्ता । क्वचित् क्रियापदं श्रूयमाणसम्बन्धमुपजनयतियथा मातुः स्मरतीति । अत्र हि मातुरिति कर्मपदमतो मातृसम्बन्धि स्मरणमिति निमित्तिनिमित्तभावलक्षणं सम्बन्धं स्मरति क्रिया श्रूयमाणैव जनयति । एतदेवान्यत्रोक्तम्सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः । श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ।। वाक्यपसाधन इति ।। ।।

198 तत्र षष्ठी प्रतिपदं समासस्य निवृत्तये । विहिता दर्शनार्थं तु कारकं प्रत्युदाहृतम् ।।
।।

o 2-3-52) -- o 2-3-52) ? , ``" , , --, --"" (, 159) , 198 सम्बन्धसामान्ये षष्ठीति किमर्थम् अधीगर्थदयेशां कर्मणी'त्यादि (पा प्रकरणारम्भ इति प्रसङ्गाद्विचारयितुमाह
मातुः स्मरणमित्यादौ कर्मणि शेषत्वेन विवक्षिते सिद्धैव षष्ठीति पुनः प्रातिपद्येनाधीगर्थेत्यादिना (पाया षष्ठी विहिता सा नियमाय भवति । कर्मादौ शेषत्वेन विवक्षिते षष्ठ्येव भवति । यदन्यत् प्राप्नोति तन्निषिध्यते किं चान्यत् प्राप्नोति तत्र निदानोच्छेदनं विना न लुगादिनिवृत्तिः कर्तुं शक्येति समासनिवृत्तिरेव क्रियते । ततश्च षष्ठ्येव भवति । यदन्यतः पृषृट्वाऽऽयाति समासलुगादि प्राप्नोतितन्निवार्यत इत्यतः प्रतिपदं पुनः षष्ठी समासस्य निवृत्तये विहितेति बोद्धव्यम् । अतश्च प्रतिपदविधाना च षष्ठी न समस्यते' इति भाष्यं नारम्भणीयमेव । यद्येवं कर्मणीति किं मातुर्गुणैः स्मरणम्इति कथं प्रत्युदाहृतम् । यथा गुणानां स्मर्तव्यत्वस्यासम्भवःतथा शेषत्वस्यापि । यदि शेषत्वेनास्य (यदि शेषत्वस्यापि) विवक्षिताः स्युस्तदा तेषां षष्ठी स्यात्तृतीया न भवेत् । ततश्च द्व्यङ्गवैकल्यमेतस्येत्येतदाशङ्क्याहदर्शनार्थं त्वित्यादि । मातुर्गुणानां स्मरणमित्युक्ते संदिह्येतगुणा कर्म करणं वेति । तत्रोक्तं गुणैः स्मरणमिति । गुणैरिति करणं यदा शेषत्वेन विवक्ष्यते तदा प्रतिपदविधाना षष्ठी मा भूदित्येवमर्थं कर्मणीत्युक्तमिति द्व्यङ्गवैकल्याभावः । पुनः षष्ठीविधानं समासादिनिवृत्तय एवेति स्थितम् । उक्तं चसाधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः । प्रोक्ताप्रतिपदं षष्ठी समासस्य निवृत्तयेसाधनसमुद्देशेइति । साधनैर्व्यपदिष्टे शेषसम्बन्धे इत्यर्थः । एवं कर्मण्येव शेषत्वेन विवक्षिते षष्ठी
कारकान्तरे त्वेकैवेति वृत्तिकाराः । तेषां मते गुणैः स्मरणं न तु गुणानां स्मरणमिति काचिदपि षष्ठी । टीकाकारमते तु करणस्य शेषत्वविवक्षायां गुणानां स्मरणं गुणस्मरणमित्यपि भवतीति मतभेदः ।।
।।

199 स चोपजातः सम्बन्धो विनिवृत्ते क्रियापदे । कर्मप्रवचनीयेन तत्र तत्र नियम्यते ।।
।।

, -- , 199 एनं क्रियया सम्बन्धो जन्यत इति स्थितम्ततः किमित्याह
स च क्रिययोपजनितः सम्बन्धः तस्मिंश्चोपजाते यता क्रियापदं क्कचिन्न श्रूयतेतदा क्रियाजनितोऽयं स्यादिति सन्दहे कर्मप्रवचनीयेन तत्र तस्यां क्रियायां नियम्यत इति सम्बन्धविशेषः क्रमप्रवचनीयैः प्रत्याय्यते । अत एव कर्मप्रोक्तवन्तः क्रियाकृतं विशेषसम्बन्धं द्योतयन्तीति कर्मप्रवचनीया उच्यन्ते ।। ।।

200 येन क्रियापदाक्षेपः स कारकविभक्तिभिः । युज्यते विर्यथा तस्य लिखावनुपसर्गता ।।

।।

-- , , `o 8-1-70) , o 2-3-8) , 200अथाऽश्रूयमाणायाः क्रियाया आक्षेपकाः कर्मप्रवचनीयाः कस्मान्नाश्रीयन्त इत्याह
इह तेन शब्देन क्रियापदस्याक्षेपः क्रियतेस कारकविभक्त्या युज्यत इति दृश्यते । यथा प्रादेशं विपरिलिखतीति । अत्र विशब्दो मानक्रियाया आक्षेपकःप्रादेशं विमाय परिलिखतीत्यर्थावगतेः । ततो विमानक्रिययाऽत्र प्रादेशलक्षणं कर्माक्षिप्तमिति तस्य कारकविभक्त्यैव द्वितीयया योगः । यदा च क्रियान्तराक्षेपको विशब्दस्तदाऽस्य लिखत्यसंबन्धात् तं प्रत्यनुपसर्गत्वमेव । ततश्च
गतिर्गता' विति (पा निघाताभावः । तद्वत् कर्मप्रवचनीयैर्यदि क्रियापदमाक्षिप्येततदा तद्योगे कारकविभक्तिरेव स्यात् । ततश्च कर्मप्रवचनीययुक्ते द्वितीया' (पाइति नारम्भणीयमेव स्यात् । किन्तु सम्बन्धसामान्ये षष्ठी प्राप्नोति तद्बाधनाय द्वितीयाऽऽरभ्येततदारम्भः शोभते ।।।।

201 तिष्ठतेरुपयोगश्च दृष्टोऽप्रत्यजयन्निति । सुन्बन्तीत्याभिमुख्येऽभिः केवलोऽपि प्रयुज्यते ।।
।।

-- --201 क्रियापदक्षेपकत्वमन्यत्रापि दृष्टमिति तदेव दृढीकुर्वन्नाह
अप्रत्यजयन्नित्यत्र प्रतिशब्दः स्थितिक्रियाया आक्षेपकः परिदृष्टः । देवा असुरानप्रतितिष्ठतः प्रतिष्ठामलभमानानजयन्निति तिष्ठतेरुपयोग आक्षेपः परिदृष्टः । तथा धातुना सम्बन्धेऽपि सुन्वन्तीत्यत्राभिशब्दस्य केवलस्य चाभिमुख्ये वृत्तिः परिदृष्टेति प्रसङ्गादाहसुन्वन्तीति । तदेवं कर्मप्रवचनीयानां सम्बन्धनियामकत्वमन्वर्थसंज्ञाश्रयेणैव स्थापितम् ।। ।।

202 कर्मप्रवचनीयत्वं क्रियायोगे विधीयते । षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां विधर्मणाम् ।।
।।

-- "" (o 8-3-65) 202 अथ स्वत्यादीनां तद्रपत्वासम्भवे कथं कर्मप्रवचनीयसंज्ञा स्यादित्याह
अत्र स्वत्यादीनां कर्मप्रवचनीयत्व विधीयते संज्ञान्तरव्युदासायैवेत्यतश्चैकसंज्ञाधिकाराद् गत्युपसर्गसंज्ञाभावे तदाश्रयं षत्वादिकम् उपसर्गाद्पा इत्यादिना न भवति ।। ।।

203 हेतुहेतुमतोर्योगपरिच्छेदेऽनुना कृते । आरम्भाद्धाध्यते प्राप्ता तृतीया हेतुलक्षणा ।।
।।

-- o 1-4-90) , , , `o 1-4-84) 203 अन्यदपि प्रसङ्गादाह
लक्षणेत्थंभूतेत्यादिना (पासिद्धाऽनोः कर्मप्रवचनीयसंज्ञा । लक्षणं हि ज्ञापकं यथा तथा हेतुरप्युच्यते । ततश्च यथा ज्ञाप्यज्ञापकभावे वृक्षमनु विद्योतते विद्युदित्यत्रानोः कर्मप्रवचनीयसंज्ञातथा शाकल्यस्य संहितामनु प्रावर्षदित्यत्रापि । तत्र हेतुहेतुमद्भावलक्षणव्यतिरेकव्यवच्छेदेऽनुना कृते हेतुतृतीयैवपरत्वात् प्राप्नोतितथा च तृतीयाया अवकाशो धनेन कुलमित्यादि । लक्षणेत्थंभूते त्यस्यावकाशोऽनुर्ज्ञाप्यज्ञापकभावलक्षणस्य सम्बन्धस्यावच्छेदकःयथा वृक्षमनु विद्योतते विद्युदिति । इहोभयं प्राप्नोति शाकल्यस्य संहितामनु प्रावर्षदिति । अत्र हेतुहेतुमद्भावसम्भवात् तृतीया प्राप्नोति । परत्वात् अनुर्लक्षणे'(पाइति पुनर्विधानान्न भवति ।। ।।

204 क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः । नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः ।।
।।

-- 204 एवं कर्मप्रवचनीयानां प्रासङ्गिकं विचारं कृत्वा वाचकत्वादिप्रकारत्रितयनिराकरणेन सम्बन्धविशेषकत्वमेव व्यवस्थापयन्नाह
प्रपचतीत्यादावुपसर्गवद् नैवायं क्रियाद्योतकः । षष्ठ्यपवादभूतया च द्वितीययैवोक्तः सम्बन्ध इति न तस्य कर्मप्रवचनीयो वाचकः । नापि प्रादेशंविपरिलिखतीत्यादौ विशब्दवत् क्रियापदस्याक्षेपकः । किं तर्हि विशिष्टक्रियाजनितोऽयं सम्बन्ध इति सम्बन्धस्य भेदको विशेषकः कर्मप्रवचनीयः
।। ।।

205 अनर्थकानां सङ्घातः सार्थकोऽनर्थकस्तथा । वर्णानां पदमर्थेन युक्तं नावयवाः पदे ।।
।।

"" o o 3 o1-2) , , , ..205इत्येवमपोद्धारप्रसङ्गेन पञ्चधा पदविभागः प्रदर्शितः । एवं दर्शितं पदप्रविभागमग्रेऽनूद्य सप्रपञ्चं पदार्थभेदमुपपादयिष्यति । यथा
द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधापि च । अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ।। पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव च ।

इत्यादि । (वाप। जाति
एवमखण्डवाक्यावादिनाऽपोद्धारसमाश्रयेण प्रासङ्गिकादिकार्यसमर्थने विहिते तत्प्रसङ्गात्पदपदार्थपदभागार्थपदभागविचारः कृतःनिरुक्तकारमतानुसारेण च नामाख्यातोपसर्गनिपातलक्षणप्रदर्शनं कृतम्कर्मप्रवचनीयाः पञ्चमपदजातमिति केचित्प्रतिजानत इति तदपि प्रदर्शितम्एवं च दूषितेषु परपक्षेषु स्वपक्षे च दूषणनिराकारणपूर्वकं स्थापिते पुनरप्यखण्डपक्षमेव समर्थयितुकामो वार्त्तिकविरोधमाशङ्कयाह।।।।

206 पदानामर्थयुक्तानां सङ्घातो भिद्यते पुनः । अर्थान्तरावरोधेन सम्बन्धविगमेव च ।।
।।

, 206 किञ्च
अर्थन्तरस्य संसर्गलक्षणस्यावरोधेन परिग्रहणेन कश्चिदेव देवदत्त गामभ्याजेत्यादिकः पदसङ्गातोऽर्थवान् कश्चित्त दश दाडिमादिः परस्परसम्बन्धविगमेनानर्थक इति सम्बन्धाद् व्यपेतः ।। ।।

207 सार्थकानर्थकौ मेदे सम्बन्धं नाधिगच्छतः । अधिगच्छत इत्येके कृटीरादिनिदर्शनात् ।।
।।

-- , , 207 तदेव दर्शयितुमाह
भेदे क्रियमाणे सति यौ वर्णसमुदायौ सार्थकानर्थकौयथा कुटीशब्दोरशब्दश्चतौ सम्बन्धमनर्थकत्वान्नाधिगच्छत इति केचित् । द्योत्येनार्थेनार्थवत्त्वादपरे सम्बन्धमधिगच्छत इत्याहुः ।। ।।

208 अर्थवद्भ्यो विशिष्टार्थः सङ्घात उपजायते । नोपजायत इत्येके समासस्वार्थिकादिषु ।।
।।

-- 208 सङ्घातार्थवत्त्वादवयवार्थवत्त्वमपि दर्शयितुमाह
राजपुरुष इत्यादावर्थवद्भ्यः सङ्घातोऽर्थवानुपजायते । स्वार्थिकादिषु त्ववयवार्थप्रकृतिकमर्थान्तरं नाविर्भूतमिति नास्त्यवयवार्थवद्भ्यो व्यतिरिक्तः सङ्घातार्थस्य सम्भवः ।। ।।

209 केचित्तु युतासिद्धार्था भेदे निर्ज्ञातशक्तयः । अन्वयव्यतिरेकाभ्यां केचित् कल्पितशक्तयः ।।
।।

-- --, ``o5-4-129) , , 209 द्विविधरूपतयाऽवस्थितास्त इत्याह
युतः सिद्धोऽर्थो येषां ते तथाविधाः यथा शमीवृक्षो दाडिमीवृक्ष इत्यादयः । कस्मादेवमित्याहभेद इत्यादि । भेदे वाक्ये सतिरूपस्याऽविनष्टत्वात् पृथगेवनिर्ज्ञातशक्तयः केचित् संज्ञुपज्ञ्वादयोऽन्वयव्यतिरेकाभ्यां कल्पितशक्तय इति । अत्र हि प्रगते जानुनी यस्य' सङ्गते जानुनी यस्य' प्रसंभ्यां जानुनोर्ज्ञुः' (पाइति लक्षणानुगमेनार्थः कल्प्यःन तु पृथगेववाक्ये दृष्टस्य जानुशब्दस्य नष्टत्वात् । तस्मात् संघातार्थवत्त्वादिति भागासिद्धमनैकान्तिकं च बोद्धव्यम् ।। ।।

210 211 212 शास्त्रार्थ एव वर्णानामर्थवच्वे प्रदर्शितः । धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते ।।
।। कृत्तद्धितानामर्थश्च केवलानामलौकिकः । प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते ।।

।। अभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते । अर्थवत्ताप्रकरणादाश्रितः स तथाविधः ।।

।।

"" , -- 210 - 121 यद्यप्युक्तम् अर्थवन्तो वर्णा धातुप्रतिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्इतितत्राह।। ।।

213 आत्मभेदो न चेत् कश्चिद्वर्णाभ्यः पदवाक्ययोः । अन्योन्यापेक्षया शक्त्या वर्णाः स्यादभिधायकः ।।
।।

-- 213 वर्णानामर्थवत्त्वाभ्युपगमे पदवाक्ययोरभिधायकता भज्येतेत्याह
सुबोधम् ।। ।।

214 वर्णोन केनचिन्नयूनः सङ्घातो योऽभिधायकः । न चेच्छब्दान्तरमसावन्यूनस्तेन गम्यते ।।
।।

-- --, 214 इदानीं मतभेदं प्रदर्शयितुमाह
यदि केनचिद्वर्णेन न्यूनः सङ्घात इष्कर्तारमित्यादावभिधायकस्तदा द्वयी गतिःशब्दान्तरत्वमेकशब्दत्वं वा । यदि न शब्दान्तरत्वमिष्कर्तारमित्यस्य तदा न्यूनवर्णोऽपि (वर्णेनापि) पूर्णवर्णो निष्कर्तारमिति शब्द एव गम्यतेतस्मात् स्वार्थप्रतीतिरिति बोद्धव्यम् ।। ।।

215 स तस्मिन् वाचकें शब्दे निमित्तात् स्मृतिमादधत् । साक्षादिव व्यवहितं शब्देनार्थमुपोहते ।।
।।

-- 215 एतदेव प्रतिपादयितुमाह
यदि केनचिद्वर्णेन न्यूनः स न्यूनवर्णः परिपूर्णशब्दवाचकरूपे निमित्ताच्छास्त्राभ्यासात् स्मृतिमुपजनयन् साक्षादिव व्यवहितमप्यर्थं शब्देन स्मृत्युपस्थापितेनोपोहते समर्पयतीति । अथ शब्दान्तरत्वं तदा यथा परिपूर्णवर्णो वाचकस्तथा तत्सम्बन्धाद् न्यूनवर्णोऽपीति न कश्चिद्विशेषः ।। ।।

216 217 पदवाच्यो यथा नार्थः कश्चत् गौरखरादिषु । सत्यपि प्रत्ययेऽत्यन्तं समुदाये न गम्यते ।।
।। समन्वित इवार्थात्मा पदार्थैर्यः प्रतीयते । पदार्थदर्शनं तत्र तथैवानुपकारकम् ।।

।।

-- , , , , , 216 - 217 तस्मादवयवानां तदर्थप्रतिपादनमनुपपन्नमेवेति प्रतिपादयितुमाह
गौरखरः कृष्णसर्प इत्यादौ यथा नैव पदानां चान्यः कश्चिदर्थोऽस्तिसत्यपि वा तच्छ्रवणकाले तदर्थप्रत्यये गौरखर इत्यस्मिन् समुदायेऽत्यन्तं सर्वथा नैवायमर्थो गम्यतेजात्यन्तरमेव हि पदार्थसंस्पर्शमात्रविरहितं समुदायात्तत्रावगत्म्तथैव देवदत्त गामभ्याजेत्यादिभिः पदार्थैर्यः प्रतिभालक्षणोऽर्थः समन्वित इवपरमार्थतस्तु निर्विभागः पानकरसादिवत् प्रतीयतेतत्र पदार्थदर्शनमवयवाथप्रतिभासोऽनुपकारक एव मन्तव्यः ।। ।।

218 समुदायावयवयोर्भिन्नार्थत्वे च वृत्तिषु । युगपद् भेदसंसर्गौ विरुद्धावनुषङ्गिणौ ।।
।।

-- 218 यदि चैतन्नाभ्युपगम्यते तदा समुदायावयवयोर्भिन्नार्थत्वे सति वृत्तौ समकालमे विरुद्धधर्मसंसर्गः प्राप्नोतीति पदवादिमतं दूषयितुमाह
वृत्तिषु समासादिकासु । तुल्यकालं समुदायेन पांसूदकवदविभागापन्नस्यार्थस्य प्रतिपादनात् संसर्गः समासार्थः पदेभ्यश्च भिन्नस्यार्थस्य प्रतीतेर्भेदसंसर्गौ विरुद्धौ युगपत् प्राप्नुतः । न चैतद् युक्तं प्रतीत्यभावादिति ।। ।।

219 कश्च साधनमात्रार्थानध्यादीन् परिकल्पयेत् । अप्रयुक्तपदश्चार्थो बहुव्रीहौ कथं भवेत् ।।

।।

-- --219 पदपदार्थानां च सत्यत्वेऽध्यादीनां वाक्ये साधनाभिधायित्वं प्राप्नोति । न चैतद् दृष्टं साधनाभिधायकत्वेन स्वतन्त्राणां तेषां प्रयोगादर्शनादित्याह अधिस्त्रीत्यादौ समुदायस्याधिकरणवृत्तित्वं परिदृष्टं न कदाचिदप्यवयवस्येति । यदा च पदानि सत्यार्थानि विद्यन्ते तदा बहुव्रीह्यर्थो नावकल्पेतेत्याहअप्रयुक्तेत्यादि । चित्रगुरित्यादाववयवानां सत्यार्थत्वे चित्रशब्दस्य गुणः कश्चिदभिधेयो गोशब्दस्य गोजातयः काश्चिदित्यप्रयुक्तं वाचकं पदं यस्यासावप्रयुक्तपदो देवदत्तार्थः कस्याभिधेयः स्यात् ।। ।।

220 प्रज्ञसंज्ञ्वाद्यवयवैर्न चास्त्यर्थावधारणाम् । तस्मात् संघात एवैको विशिष्टार्थनिबन्धनम् ।।
।।

, -- --, 220 यदि चावयवानामर्थवत्त्वं स्यात्तदा प्रज्ञुः संज्ञुरित्यत्रापि ज्ञुशब्दस्यार्थः पृथगुपलभ्येतन चोपलभ्यत इति प्रतिपादयितुमाह उपसंहर्तुमाहतस्मादिति । तस्मात् समासेषु विरुद्धार्थोपस्थापनादध्यादीनां साधनमात्रार्थवृत्तित्वासम्भवाद् बुहव्रीह्यर्थस्यासङ्गतेः प्रज्ञसंज्ञ्वित्यादाववयवार्थानुपलम्भादित्युपपत्तिचतुष्येन सत्यार्थानां पदानामनुपपत्तेः सङ्घात एवैकोऽखण्डः प्रविभागशून्यः स्फोटात्मा विशिष्टस्यैव प्रतिभात्मकस्यार्थस्य निबन्धनमभ्युपगन्तुं युक्त इति सिद्धम् । सङ्घातसाधर्म्याच्च स्फोट एवात्र सङ्घातशब्देनोक्तः । सङ्घातो ह्यवयवैराच्छुरितो भवतिस्फोटश्चापि ध्वनिभिराच्छुरित इति सङ्घातसाधर्म्यम् ।।।।

221 गर्गा इत्येक एवायं बहुष्वर्थेषु वर्तते । द्वन्द्वसंज्ञोऽपि सङ्घातो बहूनामभिधायकः ।।
।।

, -- , 221 इदानीमखण्डवाद्यात्मीयपक्षे परकीयचोद्यसप्तकमाशङ्क्य क्रमेण समर्थयितुमुपक्रमते । तथा च यदि पदार्थो नैव विद्यते तदा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यत्र द्वन्द्वेनैक एवाखण्डः समुदायो वाक्यार्थो विधीयतेततश्च पदार्थभेदस्यानभ्युपगमादेकत्वे च सति बहुवचनं सति नोपपद्येतेत्याशङ्क्य समर्थयितुमाह
यथा गर्गस्यापत्यानि बहूनि गर्गा इत्यत्रैकशेषे कृते गर्गशब्द एव एव निरस्तावयवविभागो बह्वर्थवृत्तित्वाद् बहुवचनान्तःतथैव द्वन्द्वसंज्ञः संघातो निरस्तावयवभेदोऽपि शब्दशक्तिमाहात्म्याद् बहुत्वमभिधत्त इति सत्यपि बहुवचने नास्ति तावता वाक्यार्थव्यतिरेकेण पदार्थसद्भावः ।। ।।

222 यथैकदेशे भुज्यादिः प्रत्येकमवतिष्ठते । क्रियैवं द्वन्द्ववाच्येऽर्थे प्रत्येकं प्रविभज्यते ।।
।।

-- , --, 222 अथ धवखदिरपलाशाः सच्यिन्तामित्यत्र वाक्यार्थव्यतिरेकेण पदार्थासम्भवात् प्रत्येकं वाक्यापरिसमाप्त्ययोगात् समुदायस्य च युगपत्सेचनक्रियाऽसम्भवाद्वाक्यार्थस्यानुपपत्तिरित्याशङ्क्य समर्थनार्थमाह
ब्रह्मणा भोज्यन्तामित्यत्र यथा विनापि वाक्यार्थव्यतिरेकेण पदार्थसद्भावं पदार्थानां भुजिक्रिया प्रत्येकमवतिष्ठतेतथा द्वन्द्ववाक्ये समुदायलक्षणेऽर्थे प्रत्येकं प्रविभज्यत इति न कश्चिद्दोषः । एतदुक्तं भवति
ब्राह्मणा भोज्यन्तामित्यत्र यथा सत्यामपि समुदायप्तिपत्तावपोद्धारबुद्ध्या प्रकल्प्यावयवान् प्रत्येकं भुजक्रिया समाप्यतेतथैव द्वन्द्वात् समुदाये प्रतिपन्ने बुद्धिपरिकल्पितप्रविभागसमाश्रयणेन प्रत्येकं वाक्यापरि समाप्तिर्बोद्धव्या ।। ।।

223 यच्च द्वन्द्वपदार्थस्य तच्छब्देन व्यपेक्षणा । साऽपि व्यावृत्तरूपेऽर्थे सर्वनामसरूपता ।।
।।

-- `o 4-2-124) --? , -- "" 223 o o 2-410) पुनरप्याशङ्क्य परिहर्तुमाह
द्वन्द्वान्तवर्तिनः पदार्थस्य वाक्यार्थव्यतिरेकेणासम्भवात् सर्वनाम्ना परामर्शो नोपपद्यते । यथा जनपदतदवध्योश्च' इति (पा। अत्र हि जनपदात्तच्छब्देन परामृष्टाच्च तस्मादेवावधिभूतात् प्रत्यय इष्यते । वाक्यार्थव्यतिरेकेणासति च पदार्थे कथमसतः सर्वनाम्नाऽपेक्षणमिति पराभिप्रायमनूद्य समाधत्तेसाऽपीत्यादिना । नात्र किञ्चित् सर्वनाम विद्यते । तत्कुत एव तत्र द्वन्द्वपदार्थपरामर्शः स्यात् केवलव्यावृत्तरूपे विशिष्ट एवात्र वाक्यार्थे प्रतिभामात्रेऽन्वयात् सर्वनामसारूप्यमात्रमाभातिन तु वास्तवोऽत्र तत्पदार्थप्रत्ययः कश्चित् प्रतिपन्नः । यद्वक्ष्यति
यदन्तराले ज्ञानं तु पदार्थेषूपजायते । प्रतिपत्तेरूपायौऽसौ प्रकमानवधारणात् ।।
इति ।। । (वा
प

224 यथा च खदिरच्छेदे भागेषु क्रमवांश्छिदिः । तथा द्वन्द्वपदार्थस्य भागेषु क्रमदर्शनम् ।।
।।

, -- , , 224 नन्वसति पदार्थे धवखदिरपलाशाश्छिद्यन्तामित्यत्राक्रमिकनिर्विभागो वाक्यार्थ इष्टस्ततश्च यथैव शब्दादवगतोऽर्थस्तथैवानुष्ठानमिति युगपदेव च्छिदिक्रिया प्राप्नोतिन चैवमनुष्ठातुं पार्यत इत्याह
यत्रापि भवतः पदार्थवाक्यार्थयोर्भेदः खदिरश्छिद्यतामित्यादौतत्रापि युगपदेवानुष्ठातुं न याति । यावता खदिरस्य प्रथमं त्वग्भागं छिन्दन्तिततोऽप्यस्थिभागं तदनन्तरं सारभागमिति क्रमवर्तिन्येव छिदिक्रिया पर्यवस्यति । तथैव द्वन्द्वे यः पदार्थोऽपोद्धारबुद्धिपरिकल्पितस्तस्य क्रमेण दर्शनं व्यवस्थितिरनुष्ठानमिति यावत् ।। ।।

225 संघैकदेशे प्रक्रान्तान् यथा सङ्घानुपातिनः । क्रियाविशेषान् मन्यन्ते स द्वन्द्वावयवे क्रमः ।।
।।

, , -- , 225 अथास्मिन् पर्वते धवखदिरपलाशाश्छिद्यन्तामिति धवखदिरपलाशच्छेदनं निरूपितं वाक्यार्थःतत्रैकदेशमात्रेऽपि च्छिन्ने यदादिष्टं तत् कृतमिति ब्रुवन्तितदेतदनंशे वाक्यार्थे कथमुपपत्तिमदित्याशङ्क्याह
यथा ब्राह्मणा भोज्यन्तामित्यत्र सङ्घातानुपातिन्यपि भुजिक्रिया तदेकदेशे प्रक्रान्ता प्रवर्तिताअतो भुक्तं ब्राह्मणैरित्युच्यते; तथा
द्वन्द्ववाच्यसमुदायान्तरगतावयवप्रवर्तितापि शब्दार्थपरित्यागकारणतां न प्रतिपद्यत इति विज्ञेयम् ।। ।।

226 प्रतिपादयता वृत्तिमबुधान् वाक्यपूर्विकाम् । वृत्तौ पदार्थभेदेन प्राधान्यमुपदर्शितम् ।।
।।

, -- --, 226 यदि च पदपदार्थसम्भवस्तदा पूर्वपदार्थप्रधानोऽव्ययीभावःउत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिकं समासेष्वर्थाभिधानमनुपपन्नमित्याशङ्क्य परिहर्तुमाह
वाक्यपूर्विकां वृत्तिं समासलक्षणामबुधान् प्रतिपादयता तद्भेदेन समासेषु पदार्थप्राधान्यमाचायेणोपदर्शितम् । वाक्यपूर्विकामिति । पदा वाक्यमेव वृत्तौ भवति कार्यवशादन्वाख्यानपक्षे तदैवमुक्तमित्यर्थः । एतदुक्तं भवति
अबुधबोधनाय तथा शास्त्रे क्रियामात्रप्रदर्शनं कृतम्न पुनस्तावता पदपदार्थसत्ताऽभ्युपगता ।। ।।

227 अभेदादभिधेयस्य नञ्समासे विकल्पितम् । प्राधान्यं बहुधा भाष्ये दोषास्तु प्रक्रियागताः ।।
।।

-- -- "227अब्राह्मण इत्यादौ नञ्समासेऽपि यत् पदार्थप्राधान्यं बहुधा भाष्ये विकल्पितम् तदप्यबुधबोधनाय शास्त्रप्रक्रियामात्रप्रदर्शनमेव बोद्भव्यमित्याह परमार्थस्त्वेकमेव । तत्राभिधेयरूपं सकलजनप्रसिद्धं स्थितमिति न तत्र कश्चित् पूर्वोत्तरपदार्थव्यवहार उपपद्यत इति बोद्धव्यम् । प्रतिपादयिष्यते च शास्त्रवृत्तिभेदेन लौकिकोऽर्थो न भिद्यते । नञ्समासे यतस्तत्र त्रयः पक्षा विचारिताः ।।
इति ।। ।। (o o 3 250)
वा प वृत्ति

228 जहत्स्वार्थविकल्पे च सर्वार्थत्यागमिच्छता । बहुव्रीहिपदार्थस्य त्यागः सर्वस्य दर्शितः ।।
।।

-- 228 अथ पदार्थासम्भवे वृत्तिषु जहत्स्वार्थविकल्पो नोपपद्यते किल पदार्थसम्भवे कुत्रैतदुच्यत इत्याशङ्क्य समर्थयितुमाह
यत एवमत एव तत्प्रदर्शनायाचार्येण वृत्तिषु जहत्स्वार्थपक्षे सर्वार्थत्यागमिच्छता बहुव्रीहौ समासे सर्वस्य पदार्थस्य त्याग उपदर्शितः । तत्र हि पदार्थव्यतिरेकेणान्य एव समुदायार्थो विशिष्ट एव प्रतिभातीत्यतः सर्वथा न वास्तवः कश्चित् पदार्थव्यवहारोऽङ्गीकार्य इति । तदेवं द्वन्द्वबहुवचनं प्रत्येकं वाक्यपरिसमाप्तिः सर्वनामप्रत्यवमर्शः क्रमेणानुष्ठानमेकदेशानुष्ठाने समुदायार्थानुष्ठानाभिमानश्चेति पञ्च चोद्यान्यपोद्धारसमाश्रयेणाखण्डवादिना परिहृतानि । बहुव्रीहौ च जहत्स्वार्थपक्षे सर्वार्थत्यागोपदसेनादखण्डमेव वाक्यामभिप्रेतिमिति लक्ष्यते ।।
।।

229 शास्त्रे क्कचित् प्रकृत्यर्थः प्रत्ययेनाभिधीयते । प्रकृतौ विनिवृत्तायां प्रत्ययार्थश्च धातुभिः ।।
।।

-- , , 229 इदानीं सर्वोऽयं पदपदार्थव्यवहारः काल्पनिकोऽसत्यभूत एव नानाविधशास्त्रप्रक्रियामात्रशरणोऽवगन्तव्य इत्युपपादयितुमाह
तथा च पदस्य प्रकृतिभागाश्रितमभिधेयं प्रकृत्यसद्भावेऽपि प्रत्ययएवाभिदधातियथा इयानित्यादौ । तथा प्रत्ययार्थश्च विनिवृत्तेऽपि
प्रकृत्यैवाभिधीयतेयथाऽहन्नति ।। ।।

230 यमर्थमाहतुर्भिन्नौ प्रत्ययावेक एव तम् । क्कचिदाह पचन्तीति धातुस्ताभ्यां विना क्कचित् ।।
।।

-- , , , 230 पुनरप्यव्यवस्थां प्रदर्शयितुमाह
तत्र पचन्तीत्यादौ भिन्नौ प्रत्ययौ शप्तिङौ समर्थं कर्तृलक्षणमाहतुस्तमेवैकोऽप्याहअत्तिजुहोतीत्यादौ । क्कचिद्धातुरेव तमर्थं ताभ्यां विनैवाहअहन् वृत्रमिन्द्र
इत्यादाविति । किमेतत्पदार्थानां वास्तवत्वे प्रमाणधुरामवगाहत इति यत्किञ्चिदेतत् ।। ।।

231अन्वाख्यानस्मृतौ ये च प्रत्ययार्था निबन्धनम् । निर्दिष्टार्थ (ष्टास्ते) प्रकृत्यर्थाः स्मृत्यन्तर उदाहृताः ।।
।।

-- 231 शास्त्रप्रक्रियाणामप्यवास्तवात्वमुपपादयितुमाह
कस्याञ्चिच्छब्दानुशासनस्मृतौ ये प्रत्ययविधाने प्रत्ययार्था निबन्धनं निर्दिष्टास्त एव स्मृत्यन्तरे प्रकृत्यर्था निबन्धनमुदाहृता इति नास्त्येव नैयत्यं
पदपदार्थानाम् ।। ।।

232 प्रसिद्धेरुद्वमिकरीत्येव शास्त्रेऽभिधीयते । व्यवहाराय मन्यन्ते शास्त्रार्थप्रक्रिया यतः ।।
।।

-- --232 प्रसिद्धत्वाच्च शास्त्राभ्यासाधिवासितमानसाः शास्त्रव्यवहारेषु पदविभागमपि प्रयुञ्जत एव । यथा उद्वमतीत्येवं प्रयोक्तव्ये उद्वमीति लाघवार्थं
प्रयुञ्जते । करोषि करोमीति प्रयोक्तव्ये करीत्यतदेकदेशमात्रं प्रयुञ्जत एवेत्यभिधातुमाह
ननु वस्तुभूताः शास्त्रप्रक्रियाः किमिति नाश्रिता) इत्याहशास्त्रार्थेति । शास्त्रार्थप्रक्रियाः केवलमबुधानां व्युत्पादनाय । अतो न शास्त्राणि तत्त्वं वक्तुं पारयन्ति
।। ।।

233 शास्त्रेषु प्रक्रियाभेदैरविधैवोपवर्ण्यते । अनागमविकल्पा तु स्वयं विद्यापवर्तते ।।
।।

-- --233 अथाविद्यैवासत्या प्रक्रियाभेदेनोपवर्ण्यत इत्याह
यद्येवं किमविद्योपदर्शकशास्त्रप्रक्रियासमाश्रयेण प्रेक्षापूर्वकारिणामित्याहअनागमेति । अविद्योपमर्देन ह्युत्तरकालमागमविकल्परहिता शास्त्रप्रक्रिया प्रपञ्चशून्या
विद्योपावर्तते प्रकटीभवति । एतदुक्तं भवत्यविद्यैव विद्योपाय इति ।। ।।

234 अनिबद्धं निमित्तेषु निरुपाख्यं फलं यथा । तथा विद्याऽप्यनाक्येया शास्त्रेपायेव लक्ष्यते ।।
।।

-- , , 234 ननु कथमविद्या विद्यास्वरूपविलक्षणा विद्याया उपायः स्यादित्याह
नहि कारणेषु कार्यं केनचिद् व्यपदेश्येन रूपेण सम्बद्धं वक्तुं पार्यते । यत्र यथा कार्यलक्षणं फलं निमित्तेषु कारणेषूपाख्याविरहितं
कारणसमन्वयविरहितमप्यद्भुतेन रूपेणोपजायते । तथैवाविद्याविलये स्वयं विद्योपावर्तमाना शास्त्रादुपजातेति नाख्यातुं शक्यतेकेवलमदूरविप्रकर्षेण
शास्त्राभ्यासाद्यदसावनुशील्यते ततो विद्यायां शास्त्रो (शास्त्राण्यु) पाया इव लक्ष्यन्तेवस्तुस्थित्या तु प्रविवेकादसौ प्रकाशत इति बोद्धव्यम् ।। ।।

235 अ(य)थाभ्यासं हि वागर्थे प्रतिपत्तिं समीहते । स्वभाव इव चानादिर्मिथ्यासो व्यवस्थितः ।।
।।

2-233) , -- --235 शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते' (इत्युक्तम्ततश्च शास्त्राभ्यासानतिक्रमेणैव लोकस्य वाक्शब्दोऽ(शब्दादःर्थप्रतिपत्तिं समीहत इत्याह
स चानादिरभ्यासो मिथ्याभूत एव स्वाभाविक इव प्रतिभातीत्याहस्वाभाव इति ।। ।।

236 उत्प्रेक्षते सावयवं परमाणुमपण्डितः । तथावयविनं युक्तमन्यैरवयवैः पुनः ।।
।।

-- , 236 मिथ्यात्वमेव प्रतिपादयितुमाह
तारतम्ययोगादपकर्षप्राप्तिं परिमाणस्यानुमाय परमाणुः स्थापितःतस्याप्यन्यः सावयवत्वमुत्प्रेक्षत इति नास्त्येव पुरुषबुद्धीनां वास्तवत्वम् ।
अवयविनमप्यवयवान्तरयोगिनमुत्प्रेक्षते ।। ।।

237 घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते । समारम्भाच्च भावानामादिमद् ब्रह्म शाश्वतम् ।।
।।

-- 237 तथा परिमितपरिमाणं घटादिकं दृष्ट्वा लोच्यत इति लोकोऽयं विश्वप्रपञ्चरूपः परिच्छिन्नतयाऽवस्थितोऽध्यवसीयत इत्याह।। ।।

238 उपायाः शिक्षमाणानां बालानामपलापनाः । उसत्ये वर्त्मन स्थित्वा ततः सत्यं समीहते ।।
।।

238 समारम्बादुत्पादाच्च भावानामिदं शाश्वतमपि ब्रह्मादिमदिति लोके व्यपदिश्यते । तस्मादुपायाः शास्त्राणि जिज्ञासूनामबुधानामपलापनाः प्रतारणा एव बोद्धव्याः । यस्मात्तत्रासत्यरूपे शास्त्रप्रक्रियामात्रेऽर्थे स्थित्वा अविद्यामुत्सृज्य सत्यं विद्यास्वरूपं ब्रह्म समीहते प्राप्नोतीति यावत् ।। ।।

239 अन्यथा प्रतिपद्यार्थं पदग्रहणपूर्वकम् । पुनर्वाक्ये तमेवार्थमन्यथा प्रतिपद्यते ।।
।।

-- , 239 इदानीं पुनरपि पदपदार्थनिराकरणं प्रतिपादयितुमाह
यदि च सत्यभूताः पदार्थाः स्युःतदा पदार्थप्रतिपत्त्यवसरे सर्वमन्यथा प्रतिपद्यते । वाक्यार्थावसरे तत्परित्यागेनान्यथैव प्रतिपत्तिर्दृश्यमाना नोपपद्यते ।
एतच्चाग्रे स्तुतिनिन्देत्यादिना व्यक्तीकरिष्यति ।। ।।

240 उपात्ता बहवोऽप्यर्था येष्वन्ते प्रतिषेधनम् । क्रियते ते निवर्तन्ते तस्मात् तांस्तत्र नाश्रयेत् ।।
।।

, -- , , --240 यथा च पदग्रहणपूर्वकमादौ पदार्थः प्रतिपन्नःपश्चाद्वाक्यार्थप्रतिपत्त्यवसरे तदर्थपरित्यागेनान्य एवार्थ उपजायत इति प्रतिपादयितुमाह
इहाद्य धवखदिरपलाशारछेदनीया नेत्यत्र पदार्थप्रतिभाससमयेऽन्य एव धवादिच्छेदनलक्षणोऽर्थ उपादीयतेपश्चान्निषेधेन तन्निवर्तनं क्रियतेन चैततद्युक्तम्;
उपात्तस्य त्यागे शब्दार्थसंबन्धस्यानित्यत्वप्राप्तरिति तेषां तत्रानाश्रयणमेव युक्तमित्याहतस्मात्तांस्तत्र नाश्रयेदिति ।। ।।

241 वृक्षो नास्तीति वाक्यं च विशिष्टाभावलक्षणम् । नार्थेन बुद्धौ सम्बन्धो निवृत्तेरवतिष्ठते ।।
।।

-- , , -- "" 241 अतो वाक्यवाक्यार्थयोरेव सत्यत्वमत्र युक्तमभ्युपगन्तुमित्याह
एतद्वाक्यमेवाखण्डं विशिष्टाभावलक्षणमिति वृक्षाभावावगतिरूपस्य वाक्यार्थस्य लक्षणं प्रत्यायकमिष्यते । यदि पुनः पदार्थोऽत्र व्यतिरिक्तोऽभ्युपगम्यतेतदा

वृक्षलक्षणे पदार्थे व्यवस्थिते नञ्सम्बन्धस्तस्य नोपपद्यतेतस्य हि स्वकारणाल्लब्धात्मलाभस्य न जातनिवृत्तिः कर्तुं शक्यते । अथासत एव नञा सम्बन्धस्तदाऽसत्त्वादेव निवृत्तोऽसाविति नञो वैयर्थ्यम् । यदुच्यते
सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते । जगत्यनेन न्यायेन नञर्थः प्रलयं गतः ।।
इति । तस्मादर्थस्य स्वत एव निवृत्तेस्तेन सह निवृत्तिवाचकस्य सम्बन्धो न विद्यते ।।
।।

242 विच्छेदप्रतिपत्तौ च यद्यस्तीत्यवधार्यते । अशब्दवाच्या सा बुद्धिर्निवर्तेत स्थिता कथम् ।।
।।

-- --, 242 अथोच्यते विच्छेदेन पदार्थविषयास्तिबुद्धिरवधृता सा नञा निवार्यत इत्याह
एवं च बुद्धावपि नञ्सम्बन्धो नोपपद्यत इत्याहअशब्दवाच्येति । नञा शब्दवाच्योऽर्थः प्रतिषिध्यते न च बुद्धिः शब्दवाच्या । शब्देन हि बाह्योऽर्थोऽभिधीयतेबुद्धिस्त्वर्थालम्बना (न) शब्दाबिधेयत्वमर्हतीत्यतः कथं नञा सा प्रतिषिध्यते ।। ।।

243 अथ यज्ज्ञानमुत्पन्नं तन्मिथ्येति नञा कृतम् । नञो व्यापारभेदेऽस्मिन्नभावावगतिः कथम् ।।
।।

-- --, 243 अथ बुद्धिर्न निवर्तते; अपि तु तस्या नञा मिथ्यात्वमावेद्यत इत्याह
एतदपि निराकर्तुमाहनञ इति । नञ एवमात्मके व्यापराविशेषे बुद्धिनिषेधात्मकेऽङ्गीक्रियमाणे सति वृक्षस्याभावावगतिर्न स्यात् किल पर्युदासे सदृशप्रतिपत्तिविधायिनि नञ्वाच्य एतदुपपद्यते । प्रसज्यप्रतिषेधे तु नैतदुपपद्यतेवृक्षाभावो हि तत्र वाक्यार्थ इति ।। ।।

244 निराधारप्रवृत्तौ च प्राक्प्रवृत्तिर्नञो भवेत् । अथाधारः स एवास्य नियमार्था श्रुतिर्भवेत् ।।
।।

, -- ----244 अथ निवर्त्यमान एवास्याधारोऽभिधेयः कल्प्यतेतत्राप्याह
आधारमनपेक्ष्यैव नञ् प्रवर्तत इति यद्युच्येत तदा नञः प्रागेव प्रवृत्तिः प्रयोगः स्यात् । प्रतिषेद्धमिष्टे सर्वत्र नेत्येवाभिदध्युरिति । अथ विषयनियमार्थमाधारप्रयोगो न वृक्ष इति वृक्षस्य निषेधो न घटादेरिति प्रतिपादयितुमाहअथाधार इति । अत्रापि दूषणमभिधातुमाहनियमार्थेति । नञैव तदर्थनिषेधे जाते पुनरसौ तच्छ्रुतिनियमाय वा स्यात् ।। ।।

245 नियमद्योतनार्था वा अनुवादोऽथवा भवेत् । कश्चिदेवार्थवांस्तत्र शब्दः शेषास्त्वनर्थकाः ।।
।।

-- -- --, , 245 निपाता द्योतकाः केचिदित्यभिप्रयेणाह
अथवाऽनुक्रम्य विस्पष्टार्थं पुनर्वचनमनुवादः स्यादित्याहअनुवाद इति । सर्वथैवमानर्थक्यमेव पदार्थानां स्यादित्याहकश्चिदिति । न ब्राह्मण इत्यादौ नञ एवार्थवत्त्वमित्यन्येषामानर्थक्यं स्यात्न चैतदुपपन्नम् । तस्माद् वृक्षो नास्तीत्यस्मादखण्डादखण्ड एव विशिष्टाभावरूपो वाक्यार्थःन पुनस्तत्त्वतः पृथगेव पदार्थः सत्यभूतः कश्चिदुपपन्नः ।। ।।

246 विरुद्धं चाभिसम्बन्धमुदहार्यादिभिः कृतम् । वाक्ये समाप्ते वाक्यार्थमन्यथा प्रतिपद्यते ।।
।।

`239 -- --"" 246 अथ अन्यथा प्रतिपद्यार्थम्' (कारिका) इत्येतद् व्याख्यातुमाह
उदहार्यादिभिः पदैर्विरुद्धपदार्थप्रतिभासावसरेऽभिसम्बन्धमवगच्छति । यथा उदहारिभगिनि ! या त्वं शिरसानड्वाहं वहसि सा त्वं प्राचीनं कुम्भमभिधावन्तमद्राक्षीःइत्यत्रोत्तरकालं वाक्यार्थप्रतिपत्त्यवसरेऽन्यथैवार्थप्रतिपत्तिरिति न पदार्थः कश्चिदुपपन्नः ।। ।।

247 स्तुतिनिन्दाप्रधानेषु वाक्येष्वर्थो न तादृशः । पदानां प्रविभागेन यादृशः परिकल्प्यते ।।
।।

-- -- "- " --, , ? , -- "- " , 247एतदेवान्यथा प्रतिपादयितुमाह
स्तुतिप्रधानं वाक्यं किञ्चिद्भवति यत्र पदार्थो निन्दा
इन्दोर्लक्ष्म स्मरविजयिनः कण्ठमूलं मुरारि
र्दिग्नागानां मदमलमषीभाञ्जि गण्स्थलानि । आद्याप्युर्वोवलयतिलक ! स्यामलिम्नाऽनुलिप्ता न्युद्भासन्ते वद धवलितं किं यशोभिस्त्वदीयैः ।।

अत्र पदार्थप्रतिभासवेलायां निन्दावगम्यतेयस्माद्धे राजन्नलीकमेवोद्धतां कन्धरां वहसितथाहि न सर्वव्यापि त्वदीयं यशः ; यदि हि तथा स्यात् तदा किमित्यद्यापि प्रसिद्धा एव शशलक्ष्मादयः पदार्थाः श्यामलतया भासन्ते यशसो ह्यवदाततया तदीयस्य व्यापितायां तद्व्याप्तास्ते श्वेता भवेयुरेवेति पदार्थोऽत्र निन्दास्तुतिस्तु वाक्यार्थः । तथा च राजन् सर्वमेव जगद्यखसा त्वदीयेन धवलितं केवलं स्वभावस्य दुस्त्यजत्वाद्यदि परं चत्त्वार्येव वस्तूनि त्रिजगति श्यामगुणयुक्तान्यन्यत्सर्वमेव त्वदीयेन यशसा व्याप्तमिति सर्वत्र त्रिलोक्यामपि प्रथितप्रतापस्त्वमिति वाक्यार्थः । निन्दाप्रधाने स्तुतिः पादर्थो यथा हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तैयधे नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः । तृष्यत्पान्थजनोपकारघटनादौर्मुख्यलब्धाऽयशो

भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ।।
अत्र बोधिसत्तवचरितस्यापि त्वदीयेनानेन तोयनिधे ! परार्थसम्पादनषाङ्(साद्)गुण्येन पराजय इति पदेभ्यः स्तुतिरवगम्यतेवाक्यार्थस्तु निरतिश्यगर्हापात्रत्वमुदधेरवेक्ष्यति इति । ततश्च पदपदार्थानां वास्तवत्वे कथमेतत्सङ्गच्छत इति ।।
।।

248 अथासंसृष्ट एवार्थः पदेषु समवस्थितः । वाक्यार्थस्याभ्युपायोऽसावेकस्य प्रतिपादने ।।
।।

-- 248 अथात्र पदवादिमतमाशङ्कतुमाह
पदेष्वर्थोऽसंसृष्ट एव वाक्यार्थस्यैकस्य संसर्गलक्षणस्य प्रतिपादनेऽभ्युपायः स्थितः । पदार्थपूर्वको हि वाक्यार्थावसायो व्यवस्थित इति ।। ।।

249 पूर्वं पदेष्वसंसृष्टो यः क्रमादुपचीयते । छिन्नग्रथितकल्पत्वान्न विशिष्टतरं विदुः ।।
।।

-- , ? , , , , , , 249 एतन्निराकर्तुमाह
आदौ पदेषसंसृष्ट एव स्थितः क्रमाच्च संसृज्योपचीयते यो वाक्यार्थः स विशिष्टतरः सुदृढं विशिष्ट एवकस्मात् छिन्नग्रथितकल्पत्वादिति पूर्वं छिन्नः पश्चाद् ग्रथितो यस्तत्तुल्योऽसावित्यसंसृष्टपदार्थपूर्वको वाक्यार्थावसायो न युज्यत इति तदेवं प्रकृतिप्रत्यययोः परस्परमेकापायेनाप्यर्थावगतेःउभयतोऽर्थस्य सम्प्रत्यये सत्येकस्मादेव प्रत्ययात् क्कचिदर्थप्रतिपत्तेःप्रकृतिप्रत्ययार्थयोश्च साङ्कर्येण शास्त्रेष्वभिधानात्वाक्यार्थस्य च पदार्थप्रतिपत्तिविलक्षणत्वात्नञर्थानुपपत्तेःसर्वत्रोपात्तत्यागप्रसक्तेरित्युपपत्तिषट्केन वृत्तिषु विरुद्धार्थोपपादनादिना च पूर्वोक्तोपपत्तिचतुष्टयेन सत्यभूतानां पदार्थानामनुपपत्तेःअखण्डपक्षे च प्रतिनिध्यादिचोद्यपञ्चकस्य तथा द्वन्द्वाश्रयेण चोद्यसप्तकस्य परिहरणान्निरवद्यमखण्डमेव स्फोटात्मकं वाक्यं प्रतिभैव च वाक्यार्थ इति स्थितम् ।। ।।

250 एकमाहुरनेकार्थ शब्दमन्ये परीक्षकाः । निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते ।।
।।

-- , --`, --250 इदानीमपोद्धारसमाश्रयेणापि पदार्थस्याभ्युपगतत्वान्मुख्यगौणविचारमप्यासूत्रयितुमाह
अत्रैकशब्ददर्शनमनेकशब्ददर्शनं चिति द्वौ पक्षौ । तत्रापि पदपदार्थयोः सत्यत्वं पदवादिमतेनअसत्यत्वं च वैयाकरणमतेनेति चत्वारः पक्षाः । प्रतिक्षिप्तमपि पक्षं व्यवहारार्थमङ्गीकरोत्येव टीकाकारः । यतः सर्वपार्षदमिदं हि वायकरणं शास्त्रम् तत्र चायं स्थित इत्यत्र पुनः पदपदार्थावङ्गीकरोति । तत्रैकशब्ददर्शने शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः । तत्रैव चार्थोपचारो द्विधास्वरूपार्थत्वेन बाह्यार्थत्वेन च । इति त्रयः पक्षाः । एवमन्यत्र । तदेवमेतैस्त्रिभिः पक्षैश्चत्वारोऽपि पक्षा अभिहिता द्वादश सम्पद्यन्त इति बोद्धव्यम्। तत्रैकशब्ददर्शनसमाश्रयणेन तावद् गौणमुख्यविचारम् एकमाहुरि' त्यादिना करोतिसर्वेष्वप्यर्थेष्वेक एव गोशब्दो वाचकः । यद्येवं युगपदेव सर्वार्थप्रकाशनं कस्मान्न करोतीत्याहनिमित्तभेदादित्यादि । निमित्तभेदो वक्ष्यमाणस्तस्मात् सार्वार्थ्यं भिद्यत इति ।। ।।

251 यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठते । अर्थप्रकरणाभ्यां वा योगाच्छब्दान्तरेण वा ।।
।।

-- --251 ततश्च किमित्य आह
निमित्तवशाद् युगपत् सर्वार्थप्रकाशनं न करोतीत्यर्थः । निमित्तभेदमाहअर्थप्रकरणाभ्यामिति ।। ।। <b2
</b2

252 यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते । तथा स एव गोशब्दो बाहीकेऽपि व्यवस्थितः ।।
।।

-- यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठत इत्यस्योदाहरणमाह

253 सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः । प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपवर्ण्यते ।।
।।

-- 253 यद्येवं गौणमुख्यविभागः कुत इत्याह
सर्वशांक्तमत्त्वं चानेकधर्मण इत्यनेन व्याख्यातम् । प्रसिद्धिभेदात् प्रसिद्धिविशेषाद् गोजातीये सातिशया गोशब्दस्य प्रसिद्धिः । बाहीके त्वीषदिति । तस्मात् प्रसिद्ध्यप्रसिद्धिकृतो गौणमुख्यभावः ।। ।।

254 एको मन्त्रस्तथाध्यात्ममधिदैवमधिक्रतु । असङ्करेण सर्वार्थो भिन्नशक्तिर्व्यवस्थितः ।।
।।

-- , 254 तथैकदर्शन एव प्रक्रियां दर्शयति
तथा चैक एव मन्त्र आत्मन्यपि जपावसरे देवेष्वपि क्रतो यजनसमयेऽपि विनियुज्यतेभिन्नशक्तित्वादसाङ्कर्येण प्रतिनियतार्थतया व्यवस्थितिं लभत इत्यर्थः ।। ।।

255 गोत्वानुषङ्गो बाहीके निमित्तात् कैश्चिदिष्यते । अर्थमात्रं विपर्थस्तं शब्दः स्वार्थे व्यवस्थितः ।।
।।

-- --, --255 एवं शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः प्रदर्शितः । एतस्मिंश्च शब्दोपचारे शब्दार्थसम्बन्धस्यानित्यत्वं स्यादित्याशङ्क्यार्थोपचारमाश्रित्याह
अर्थः शब्दस्य द्विविधःस्वरूपं बाह्यश्च । तत्र निमित्ताज्जाङ्यादेर्गोत्वं बाहीकेऽप्यनुषज्यतेशब्दऽमृतु गोत्वमेवाभिधत्त इति बाह्यार्थोपचारः । इयांस्तु विशेषःगोरत्यित्र मुक्यमेव गोत्वम् गौर्बाहीक इत्यत्र तूपचरितं तदेव वाच्यमिति ।। ।।

256 तथा स्वरूपं शब्दानां सर्वर्थेष्वनुषज्यते । अर्थमात्रं विपर्यस्तं स्वरूपे तु स्थितिः स्थिरा ।।
।।

-- , , 256 अथ स्वरूपोपचारमाह
शब्दानां स्वरूपमेव सर्वत्र वाच्यम्तत्तु गोजातीये कदाचिदनुषज्यतेकदाचिद्वाहीक इत्यनित्यत्वं नास्ति शब्दार्थसम्बन्धस्य । प्रसिद्ध्यप्रसिद्धिकृतस्तु गोणमुख्यविभागो बोद्धव्यः ।। ।।

257 एकत्वं तु स्वरूपत्वाच्छब्दयोर्गौणमुख्ययोः । प्राहुरत्यन्तभेदेऽपि भेदमार्गानुदर्शिनः (नुसारिणः) ।।
।।

-- --`--`, , , , , --257 अथानेकशब्ददर्शनमाश्रित्याह
भेदमार्गानुसारिणः शब्दभेदवादिनः गौणमुख्यार्थाभिधायिनोर्गोशब्दयोर्भेदमेवाहुः। ते ह्यर्थभेदाच्छब्दभेदं मन्यन्ते; यतः शब्दार्थयोरिहाध्यासलक्षणः सम्बन्धो व्यवस्थितः । एकत्र चेदध्यस्तस्तस्मिंस्तेनैवाभेदमापन्नः कथमन्येन सहाध्यासमुपेयादित्यार्थः । तदेवं शब्दभेद एवोपपन्नः । एतच्च भेदाभेदस्वभावं दर्शनद्वयं शब्दानां भाष्यकारेण वार्तिकव्याख्यानावसरे दर्शितम् । तत्र ह्युक्तम्तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्' । अत्रोत्तरम्
एकत्वादकारस्य सिद्धम्' इति । यद्येवम्अनुबन्धसङ्करस्तुएकाजनेकाज्ग्रहणेषु चानुपपत्तिरित्यादीनि चोद्यानि प्राप्नुवन्तितत्रैवैतानि परिहृतानिविषयेण तु नानालिङ्गकरणात् सिद्धम्एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानादित्येवमेकशब्ददर्शनं स्थापितम् । अथानेकदर्शनमाश्रित्य तत्रैवोक्तम्
आन्यभाव्यं तु कालशब्दव्यवायाद् युगपच्च देशपृथक्त्वदर्शनादित्येवं भेदाभेदौ शब्देषु व्यवस्थापितौ । तद्व्याख्यानायैव च टीकाकारः स्वतन्त्रपक्षद्वयदर्शनं करोतीति बोद्धव्यम् ।। ।।
258 सामिधेन्यन्तरं चैवमावृत्तावनुषज्यते । मन्त्राश्च विनियोगेन लभन्ते भेदमूहवत् ।।
।।

-- , , ----`258 <258>अथैतदेव शब्दभेददर्शनं प्रसङ्गद्वैदिकष्वपि शब्देषु योजयितुमाह
त्रयोदशैकादश वा समिन्धनार्था ऋचः सामिधेन्यः । तत्र त्रिः प्रथमामन्वाहत्रिरुत्तमामन्वाह । एवं चावृत्त्या सप्तदश पञ्चदश वा सामिधेन्यो भवन्तीति स्थितम् । तत्रावृत्तं सामिधेन्यन्तरमेव विभिन्नस्वरूपमनुषक्तं बोद्धव्यम्न तत्त्वे(नै) कैवासौ पुनरावृत्तेति शब्दभेदवादिनः । एवं च मन्त्राणामपि भेदमाहुरिति प्रदर्शयितुमाह
मन्त्राश्चेति । विनियोगेनाभ्युपयोगादिनोपलक्षिता अपि मन्त्रा भिन्ना एव बोद्धव्याः । यथा आहदेवीरापः शुद्धाः' इत्यस्मादन्य एव स्तुत्यर्थबादोऽभ्यूह्यते देव आज्यं सुद्धमि त्यादि । एवमूहमन्त्राणामन्यत्वम् तथैव विनियुक्तानां मान्त्राणामन्यत्वमेव ।।।।

259 तान्याम्नायान्तराण्येव पठ्यते कश्चिदेव तु । अनर्थकानां पाठो वा शेषस्त्वन्यः प्रतीयते ।।
।।

-- , , --, 259 अन्यत्वे च तेषां किं वेदत्वं स्यान्न वेत्याशङ्क्य वेदत्वमेव तेषां बोद्धव्यमित्याह
मन्त्राणां सर्वेषां वेदत्वमेववेदे तु कश्चिदेव मन्त्रः पठ्यते । न चैतावता तेषामेव वेदत्वम्अन्यथा वेदेऽनर्थका एव सर्वे पठिता इत्याहअनर्थकानामिति । उपलक्षणभूता अनधिकारा एव वेदे मन्त्राः पठिताःतैस्तु विनियोगावसरे प्रतीयमानानामन्येषामेव वेदत्वं बोद्धव्यम् ।। ।।

260 शब्दस्वरूपमर्थस्तु पाठोऽन्यैरुपवर्ण्यते । अत्यन्तभेदः सर्वेषां तत्सम्बन्धात्तु तद्वताम् ।।
।।

, -- --, --260 तदेवमर्थभेदाच्छब्दस्य भेदे मन्त्राणां भेद एवपठितानां चोपलक्षणार्थतेति प्रदर्शितम् । अथ स्वरूपार्थमेव पाठः सर्वेषां वैदिकानां कैश्चिदुच्यत इत्याह
ततश्च सर्वेषां स्वरूपवतां भेद एवेत्याहअत्यन्त इति । ननु पाठ्यमानानामेव स्वरूपार्थत्वात् स्वरूपवत्ता युज्यतेइतरेषां तु यागादौ विनियुक्तानां कथं स्वरूपवत्त्वमेव स्यादित्याहतत्सम्बन्धादिति । तत्रापि प्रवृत्तिनिमित्तस्य स्वरूपस्यैव विद्यमानत्वात्तद्वत्त्वमेव बोद्धव्यम् ।। ।।

261 अन्या संस्कारसावित्री कर्मण्यन्या प्रयुज्यते । अन्या जपप्रबन्धेषु सा त्वेकैव प्रतीयते ।।
।।

, -- , , 261 तस्मान्मन्त्रेषु संस्कारादिविनियोगभेदात् पाठोपलक्षितानां चाभिन्नानामेव प्रतीतिः स्वरूपार्थत्वाद्वाभिन्नानामेषां भेद एव मन्तव्य इत्युपसंहर्तुमाह सारूप्यात् त्वेकत्वव्यवहारस्तत्र बोद्धव्यः । तदेवमनेकशब्ददर्शनेऽर्थभेदाच्छब्दभेदे गौणोऽर्थोऽन्यःमुक्योऽर्थश्चान्य एव; किन्तु सारूप्यादभेदे मुक्यार्थस्य प्रसिद्धत्वात् तद्वाचक उपचर्यत एवेति । शब्दोपचार एव तत्र कल्पयितुं शक्यःन त्वेकशब्ददर्शन इव शब्दसम्बन्धस्यानित्यत्वादुपचारोऽर्थस्याश्रीयते । अत एवाभिप्रायवता टीकाकृता तत्र शब्दोपचारार्थोपचारौ व्याख्यातौ ।। ।।

262 अर्थस्वरूपे शब्दानां स्वरूपाद्वृत्तिरिष्यते । वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया ।।
।।

o 2-260) -- , --262 तत्सम्बन्धात्तु तद्वताम्'(वाक्यइत्यत्र स्वरूपेण प्रवृत्तिनिमित्तेन सम्बन्धः प्रतिपादितः । तदेव च सर्वेषां शब्दानां प्रवृत्तिनिमित्तं बोद्धव्यमिति विस्पष्टयितुमाह
अर्थस्वरूपेऽर्थवस्तुनीिति यावत् । तत्र सर्वेषां स्वरूपादेव निमित्तात् प्रवृत्तिर्बोद्धव्या । न केवलं पदानां सर्वत्र स्वरूपमेव प्रवृत्तिनिमित्तम्यावद्वाक्यरूपस्यापि शब्दस्य वाक्यार्थे वर्तमानस्य वृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्येति प्रसङ्गेन प्रतिपादयितुमाहवाक्यारूपस्येति ।। ।।

263 अनेकार्थत्वमेकस्य यैः शब्दसायनुगम्यते । सिद्ध्यसिद्धिकृता तेषां गौणमुख्यप्रकल्पना ।।
।।

-- 263 इदानीमेकशब्ददर्शने गौणमुख्यविभाग इत्युपसंहरन्नाह
सिद्ध्यसिद्धिभ्यां प्रसिद्ध्यप्रसिद्धिभ्यां तत्र गौणमुक्यविभागो वोद्धव्यः । अनेनैकशब्ददर्शनेऽपि सादृस्यादभेदे पुनरपि प्रसिद्ध्यप्रसीद्धिभ्यामेव गौणमुक्यविभाग इत्युक्तमेव ।। ।।

264 अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः सह । युक्तः प्रत्याययत्यर्थं तं गौणमपरे विदुः ।।
।।

-- 264 अथोभयत्रापि गौणमुख्यविभागे निमित्तान्तरं दर्शयितुमाह
अर्थप्रकरणशब्दन्तरसंनिधानानि गौणमुख्यभावमुभयत्रापि प्रयोजयतीत्युच्यते ।।।।

265 शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते । स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः ।।
।।

-- 265 एतदेव संग्रहकारोक्तश्लोकप्रदर्शनेन संवादयितुमाह
एतन्मुक्यार्थशब्दलक्षणम् ।। ।।

266 यस्त्वन्यस्य प्रयोगेण यत्नादिव नियुज्यते । तमप्रसिद्धं मन्यन्ते गौणार्थाभिनिवेशिनम् ।।
।।

-- 266 गौणार्थशब्दस्वरूपमप्याह
यत्नादिवेति । अर्थप्रकरणादेरित्यर्थः ।। ।।

267 स्वार्थे प्रवर्तमानस्य यस्यार्थं योऽवलम्बते । निमित्तं तत्र मुख्यं स्याद् निमित्ती गौण इष्यते ।।
।।

-- , --, , 267 अथ प्रकारान्तरेण गौणमुख्यविभागमाह
यो बाहिके प्रवर्तमानः स्वार्थे सास्नादिमति वर्तमानस्य गोशब्दस्य सम्बन्धिनमर्थे निमित्तत्वेनावलम्बतेतत्र विषये मुख्योऽर्थो निमित्तं स्यात् गौणस्तु निमित्तीत्युच्यते । एतदुक्तं भवति
यत्रास्खलद्गतिः शब्दस्तत्र मुक्योऽर्थःस्खलद्गतित्वे तु गौणार्थतेति बोद्धव्यम् । नन्वेतेनार्थोपचार उक्तःस चैकशब्ददर्शनेस्थितः । तत्र यस्यार्थं योऽवलम्बत इति शब्दभेद उक्तः स्यात् । असदेतत्; अत्रापि शक्तिभेदाश्रयणे कल्पितस्य भेदस्योपपत्तेर्युज्यत एतदिति न कश्चिद्दोषः ।। ।।

268 पुरारादिति भिन्नेऽर्थे यौ वर्तेते विरोधिनि । अर्थप्रकरणापेक्षं तयोरप्यवधारणम् ।।
।।

-- , , 268 अथार्थप्रकरणादेः शुद्वस्य गौणमुख्यविभागहेतुत्वेऽतिप्रसङ्गमाह
पुराराच्छब्दौ भाविभूतदूरान्तिकलक्षणेषु यथायोगं परस्परविरुद्धेष्वर्थेषु वर्तेतेतत्रैतयोरर्थ (प्रकरणादिनार्थनिर्णयः । ततश्चात्रापि गौणमुख्य भावः स्यात्न चैतदिष्टम् ; अनयोरुभयत्रादि (मुख्यार्थ) त्वमिष्यत इत्यतोऽर्थप्रकरणादीन् केवलान् गौणमुक्यभावो न प्रयोजयतीति बोद्धव्यम् ।। ।।

269 वाक्यस्यार्थात् पदार्थानामपोद्धारे प्रकल्पिते । शब्दान्तरेण सम्बन्धः क (त) स्यैकस्योपपद्यते ।।
।।

-- , ? , ? ? --269 इदानीमखण्डपक्षमाश्रित्य गौणमुख्यतामाह
पूर्वमेकशब्ददर्शनेऽनेकशब्ददर्शने वा पदपदार्थयोः सत्यत्वमभ्युपगम्योक्तम्तत्र त्वसत्यौ पदपदार्थौ बोद्धव्यौ । अतश्चाखण्डमेव वाक्यं वाक्यार्थस्य प्रत्यायकमिति पदपदार्थासद्भावे कीदृशो गौणमुख्यभावः किल गौर्वाहीक इत्यत्र पदपदार्थाभ्युपगमे विरुद्धसामानाधिकरणयान्यथानुपपत्त्या गोपदस्योपचरितार्थत्वमुच्यते; यदा तु गौर्बाहीक इत्यनेनाखण्डेनैव गोगतधर्मावच्छिन्नो बाहीकलक्षणोऽर्थोऽखण्ड एव प्रतिपाद्यतेतदा पदपदार्थानामसत्यत्वात् क (त) स्यैकस्याविद्यमानस्यैव तथाभूतेनैवेतरेण सम्बन्ध इति तस्त्यो गौणविभागः
यद्येवमेतस्मिन् पक्षे कथं गौणमुख्ययविभागः स्यात्
उच्यतेअपोद्धारसमाश्रयणेन पदपदार्थविभागमुपकल्प्य प्रसिद्ध्यप्रसिद्धिनिमित्तको गौणमुख्यविभागोऽभ्युपगन्तव्य इत्यभिप्रायः ।। ।।

270 यच्चाप्येकं पदं दृष्टं चरितास्तिक्रियं क्कचित् । तद्वाक्यान्तरमेवाहुर्न तदन्येन युज्यते ।।
।।

, -- 270 ननु स्वतन्त्रं पदं पदान्तरमन्तरेण प्रयुज्यत एवअतस्तत्र वास्तवः पदपदार्थप्रविभाग इत्याह
एकं पदं चरितक्रियत्वाद्वाक्यमेवाखण्डमिति प्रतिपादयिष्यति । अतस्तदन्येन नैव युज्यत इति बोद्धव्यम् ।। ।।

271 यच्च कोऽयमिति प्रश्ने गौरश्व इति चोच्यते । प्रश्न एव क्रिया तत्र प्रक्रान्ता दर्शनादिका ।।
।।

-- , 271 एतदेव स्फुटीकृत्य प्रतिपादयितुमाह
कोऽयमिति प्रश्ने दृश्यते भवतीति वा कापि क्रिया गार्भोकृतासैवोत्तरेऽपि गर्भोकृतेति तदपि चरितक्रियमेकं वाक्यमेवेति मन्तव्यम् ।। ।।

272 नैवाधिकत्वं धर्माणां न्यूनता वा प्रयोजिका । आधिक्यमपि मन्यन्ते प्रसिद्धेर्न्यूनतां क्वचित् ।।
।।

-- --272 इदानीं न्यूनाधिकभाव एव गौणमुक्यविभागकारणं कैश्चिदभ्युपगतमित्याशङ्क्य निराकर्तुमाह
कस्मादेत्याहआधिक्यमपीति । आपेक्षिकत्वादस्याव्यवस्थितत्वमेवेति न तेन गौणमुख्यव्यवहारः कल्पयितुं शक्यः ।। ।।

273 जातिशब्दोऽन्तरेणापि जातिं यत्र प्रयुज्यते । सम्बन्धिसदृशाद्धर्मात् तं गौणमपरे विदुः ।।
।।

-- 273 सादृस्यमिदानीं निमित्तत्वेनाह
गोशब्दो गोत्वजातिं विनापि स्वव्यक्तिगतगुणसादृश्याद् बाहीके प्रयुज्यत इति सादृश्यं गौणमुख्यभावे निमित्तम् ।। ।।

274 विपर्यासादिवार्थस्य यत्रार्थान्तरतामिव । मन्यन्ते स गवादिस्तु गौण इत्युच्यते क्कचित् ।।
।।

-- , , 274 अथ विपर्यासमेव निमित्तत्वेनाह
अर्थस्य बाहीकलक्षणस्यार्थान्तरतां गोरूपतां विपर्यासादिव यत्र मन्यन्तेतत्र तस्मिंस्तद्वाचको गोशब्दः प्रवृत्तो गौण इति क्कचिन्मतम् । विपार्यासश्चाध्यव सायेन भवति अध्यारोपेण च । रजतमिदमित्यत्र विपर्ययाध्यवसाय एव । इह त्वध्यारोप्यगोगतान् गुणान् बाहीकेऽध्यवस्यतीत्यधारोपिततद्भावोऽयं विपर्यासः । अत एव विपर्यासादिवेत्युक्तम्तस्मादध्यवसिततद्भावनिमित्तप्रयुक्तो नास्ति गौणमुख्यव्यवहार इति ।। ।।

275 नियताः साधनत्वेन रूपशक्तिसमन्विताः । यथा कर्मसु गम्यन्ते सीरासिमुसलादयः ।।
।।

-- 275 अथ रूपशक्तिनिमित्तिको गौणमुख्यव्यवहार इति पक्षान्तरं दृष्टान्तप्रदर्शनपूर्वकं दर्शयितुमाह
खड्गगमानयेत्युक्ते सन्नद्धानां संग्रामकथा वर्तत इति रूपशक्तिमाहात्म्यादभिधीयते । एवं सीरादिषु ।। ।।

276 क्रियान्तरेण चैतेषां भवन्ति नहि शक्त्यः । रूपादेव तु तादर्थ्यं नियमेन प्रतीयते ।।
।।

-- क्रियान्तरे लताच्छेदादौ नैतेषां शक्तयो भवन्तीति वक्तुं पार्यते । ततश्च रूपे नियत एव कर्मणि सामर्थ्यमेषां व्यवसीयत इत्याह

277 तथैव रूपशक्तिभ्यामुत्पच्या समवस्थितः । शब्दो नियततादर्थ्यः शक्त्याऽन्यत्र प्रयुज्यते ।।
।।

-- --`" 277 प्रकृते योजयितुमाह
उत्पत्त्या स्वभावेनैव । यथोच्यतेऔत्पत्तिकः शब्दस्यार्थेन सम्बन्धः ।सहज एवेति गम्यते । अनेकशक्तिसद्भावाच्चान्यत्रापि प्रयुज्यते ।। ।।

278 श्रुतिमात्रेण यत्रास्य ता(या) दर्थ्यमवसीयते । मुख्यं तमर्थं मन्यन्ते गौणं यत्रोपपादितम् ।।
।।

-- --278 ततश्च गौणमुख्यभावः कथमत्र ज्ञायेतेत्याह
गौणं चत्रोपपादितमिति तदभिधानशक्तिसद्भावेऽप्यप्रसिद्धत्वाद्यत्नेन प्रकरणादिना गौणत्वाध्यवसाय इत्यर्थः । तदेवमर्थप्रकरणशब्दान्तरसन्निधानमात्रं प्रसिद्ध्यप्रसिद्धिसहितं चार्थप्रकरणादिकमत्रानादिसमुच्चयेन अङ्गाङ्गिभावेन चेति द्वौ पक्षौ । न्यूनाधिकभावः सादृश्यं विपर्यासो रूपशक्तिमति सप्त पक्षाः । अत्राथप्रकरणमात्रं पुरारादित्यादिभिरतिप्रसङ्गादनिमित्तमेव । न्यूनाधिकभावस्याव्यवस्थितेरनिमित्तत्वमेव । सादृश्यस्यापि काश्यपप्रतिकृतिः काश्यप इत्यादौ निमित्तयुक्तेऽपि गौणत्वासद्भावादनिमित्तत्वैव । पारिशेष्यात् प्रसिद्ध्यप्रसिद्धिसहिताः प्रकरणादयः प्रकरणादिसहिते वा प्रसिद्ध्यप्रसिद्धी विपर्यासोऽध्यारोपः लक्षणौ रूपशक्तिरिति चत्वारः प्रकारा गौणमुख्ययोर्निमित्तत्वैन परिगृहीताः । इत्येतैर्निमित्तैः शब्दोपचारोऽर्थोपचारो वा । स च द्विविधःवाक्या (च्या) र्थोपचारः स्वरूपोपचारो वेत्येवं गौणमुख्यविभागो मन्तव्यः ।। ।।

279 गोयुष्मन्महतां च्व्यर्थे स्वार्थादर्थान्तरे स्थितौ । अर्थान्तरस्य तद्भावस्तत्र मुख्योऽपि दृश्यते ।।
।।

-- , , `1-1-15 o) , --, , , --", " (o o 1-1-15) 279 इदानीमेतदेव लक्ष्ये योजयितुमाह
गावादीनां शब्दानां स्वार्थादर्थान्तरेऽगवादिलक्षणो आश्रितपूर्वावस्थोपचरितोत्तरावस्थात्मके स्थितौ प्रवृत्तौ सत्यामर्थान्तरस्य बाहीकादेस्तद्भावो गावादिरूपतापत्तिलक्षणो यदा तदा गौणोऽर्थस्तेषां दृश्यत इति बोद्धव्यम् । न केवलं गौणोऽर्थस्तथा यावन्मुख्योऽपि दृश्यत इति बोद्धव्यम् । तत्रागौर्गौः समपद्यत गोऽभवत्; अत्वं त्वं सम्पद्यते त्वद्भवतीत्यात्रागवि अयुष्मदि च गोरूपता युष्मद्रपता चोत्तरावस्थाऽविद्यमानैवोपर्यत इति गौणार्थता । अमहान् महान्
अशुक्लः शुक्लः सम्पद्यतेः महद्भूतश्चन्द्रमाःशुक्लीभवति पट इत्यत्र तूत्तरावस्था वस्तुसत्येवेति मुख्य एवार्थे महच्छुक्लीशब्दौ स्थिताविति नास्ति गौणत्वम् । अतश्च गौऽभवदित्यत्र गौणार्थत्वादोदन्तस्य निपातत्वेऽप्योदिति प्रगृह्यसंज्ञाया नास्त्येव प्राप्तिः । तथा त्वद्भवतीत्यत्रोपचरितस्य युष्मदर्थस्य प्रतीतेर्गौणार्थत्वादेव मध्यमपुरुषस्याप्यभावः । यतो गौणमुक्ययोर्मुख्ये सम्प्रत्यय इति भाष्ये स्थापितम् । वार्त्तिककारस्तु गोऽभवदित्यत्र च्व्यर्थवृत्तित्वान्निपातस्य गोशब्दस्य च्व्यर्थलक्षणं मुख्यमेव सर्वमर्थमवगच्छन् गौणमुख्यभावासम्भवमेवाभिमन्यमानः प्रगृह्यसंज्ञानिवृत्तये ओतश्च्विप्रतिषेधः'(वाइति यत्नमाराब्धवान् । भाष्यकारस्त्वभिप्रायानभिज्ञ एवान्तरङ्गत्वाद् गौणमुख्ययोर्मुख्ये सम्प्रत्यव इत्येवम्त्र (न) प्रगृह्यसंज्ञा । अतोऽन्तरङ्गस्य कार्यस्याप्राप्तिरिति स्थितम् । ननु गौणार्थत्वे शब्दानां कार्याप्रवृत्तौ गौर्बाहीकस्तिष्ठति

गां बाहीकमानयेत्यत्र बृद्ध्यात्वे (न) प्राप्नुतः । अत्र ह्युपचरितार्थो गोशब्द इति उच्यतेद्विविधं हि शब्दानां कार्यमस्ति प्रातिपदिककार्यं पदकार्यं च । तत्र पदकार्येषु गौणमुख्यन्यायःन प्रातिपदिककार्येषु । पदस्य विरुद्धपदसामानाधिकरण्यान्यथानुपपत्त्या गौणार्थताप्रातिपदिकस्य प्रयोगानर्हस्य पदान्तरेण

सामानाधिकरण्यासम्भवाद् गौणार्थता नैव निश्चेतुं सक्यतेप्रातिपदिककार्यं च वृद्ध्यात्वे इति तत्प्रवर्तत एव । तदुक्तम्अर्थाश्रय एतदेवं भवतिशब्दाश्रये च वृद्ध्यात्वेमा भा इति ।। ।।

280 महच्वं शुक्लभावं च प्रकृतिः प्रतिपद्यते । भेदेनापेक्षिता सा तु गौणत्वस्य प्रयोजिका ।।
।।

`-- , , --, , 280 तदेवं गोऽभवत् त्वद्भवतीति चात्र गौणार्थत्वे सिद्ध्यतीष्टं महद्भूतश्चन्द्रमा इत्यत्र तु चन्द्रमसः पौर्णमास्यां महत्त्वस्य सद्भावादनुपरितत्वमिति महच्छब्दस्य आन्महत'इत्यादिना प्राप्नोत्येवात्वमित्याशङ्क्यात्रापि गौमार्थतां प्रतिपादयितुमाह
महद्भूतश्चन्द्रमाः सुक्लीभवति पट इत्यत्रापि प्रकृतिर्महत्त्वं शुक्लभवनं च भेदेनाश्रितपूर्वावस्थोपचरितोत्तरावस्थतयैव प्रतिपद्यतेततश्च यद्यपि वस्तुवृत्त्या एव एवार्थःतथापि वक्त्रापेक्षिता आश्रिता सती गौणत्वं प्रयोजयति । एतदुक्तं भवति
यद्यप्यत्र महत्त्वं शुक्लभावश्च तथैव विद्यतेतथाप्यत्र शब्दवृत्त्योन्मज्जद्रूपा प्रकृत्यवस्थैवोच्यत इति तदाश्रयेणोपचरितत्वान्महत्त्वस्य न भवत्यत्र महच्छब्दस्यात्त्वम् । शुक्लीभवति पट इत्यस्य कार्यं न किञ्चिदस्तिअर्थप्रदर्शनाय केवलमत्र प्रदर्श्यते ।।।।

281 अग्निसोमादयः शब्दा ये स्वरूपनिबन्धनाः । संज्ञिभिः संप्रयुज्यन्तेऽप्रसिद्धेस्तेषु गौणता ।।
।।

`" (8-3-82) -- , 281 अथाग्निसोमौ माणवकावित्यत्र संज्ञाशब्दत्वान्मुख्यार्थत्वे अग्नेः स्तुत्सतोमसोमाःइति षत्वं कस्मान्न क्रियत इत्याह
इहाग्निसोमादयः शब्दा देवतावाचकाः स्वरूपनिमित्तकाश्च संज्ञाभूतार्थवृत्तयश्चेति त्रिविधाः सम्भवन्ति । तत्र देवतायां स्वरूपनिमित्तेषु चैते मुक्यार्था एव । तत्र संज्ञायां गौणतेति । देवतायामग्निसोमादयः प्ररूढिमुपगता माणवके चाप्रसिद्धा इत्येवमप्रसिद्ध्या तेषां गौणार्थत्वमुच्यतेन त्वध्यारोपेणेति बोद्धव्यम् । अतश्च षत्वाप्रवृतिरेव ।। ।।

282 अग्निदत्तस्तु योऽग्निः स्यात् तत्र स्वार्थोपसर्जनः । शब्दो दत्तार्थवृत्तित्वाद् गौणत्वं प्रतिपद्यते ।।
।।

, -- , 282 यत्र त्वतस्मिंस्तदध्यारोपेणाग्निसोमादयः प्रवर्त्यन्तेतत्र स्फुटैव गौणार्थता तेषामित्याह
स्वार्थं देवतालक्षणमुपसर्जनीकृत्यार्थान्तरमेव तदव्यारोपेण यत्राभिदधतितत्र गौणार्थत्वं स्फटमेवैते शब्दाः प्रतिपद्यन्त इति बोद्धव्यम् ।। ।।

283 निमित्तभेदात् प्रक्रान्ते शब्दव्युत्पत्तिकर्मणि । हरिश्चन्द्रादिषु सुटो भावाभावौ व्यवस्थितौ ।।
।।

-- , 283 अथ हरिश्चन्द्रो माणवक इत्यत्र सुट्समर्थनार्थं प्रस्तोतुमाह
हरिश्चन्द्रादिषु सुटो भावाभावौ नियतावेवयस्माच्छब्दव्युत्पत्तिक्रियायां तत्र निमित्तभेदः समाश्रीयते । ऋषावनादिभूते प्रसिद्धो हरिश्चन्द्रः साधुः हरिश्चन्द्रो यस्येत्येतस्मिंस्तु व्युत्पत्तिकर्मण्यभाव एव स्फुट इत्यसाङ्कर्यमेव ।। ।।

284 ऋष्यादौ प्राप्तसंस्कारो यः शब्दोऽन्येन युज्यते । तत्रान्तरङ्गः संस्कारो बाह्येऽर्थे न निवर्तते ।।
।।

, -- , , 284 अथ यदा पुरातनहरिश्चन्द्रगतगुमसंदर्शनेन साक्षाद्धरिश्चन्द्रोऽयं माणवक इत्युच्यतेतदा किं गौणार्थत्वान्न भवितव्यमेव सुटेत्यसाङ्कर्यं दर्शयितुमाह
हरिश्चन्द्रशब्दस्तावदृषावेव संस्कृत उत्तरकालं प्राप्तसंस्कारः सन्नसौ यदा हरिश्चन्द्रगुणसधर्मण्यन्यत्र प्रयुज्यते तदान्तरङ्गः संस्कारो वाक्यार्थवेलायामर्थान्तरसम्बन्धावसरे न निवर्तत इति वैयाकरणसमयः । यथा करिष्यति श्वःवर्षण गमिष्यतीत्यत्र श्वः शब्दसन्नधानाद्भविष्यदनद्यतनलक्षणकालप्रादुर्भावे भविष्यत्सामान्यसमाश्रयणेन विहितस्य लृटो न विवृत्तिः कर्तुम्एवमत्रापि हरिश्चन्द्रो माणवक इति गौणार्थत्वेऽपि सुट्सिद्धिरेवेति ।। ।।

285 अत्यन्तविपरीतोऽपि यदा योऽर्थोऽवधार्यते । यथासंप्रत्ययं शब्दस्तत्र मुख्यः प्रवर्तते ।।

।।

-- , , 285 इदानीं न्यायदर्शनच्छायया बौद्ध एव शब्दार्थो नास्ति कश्चिच्छब्देषु गौणमुक्यविभाग इत्याशङ्क्याह
इह वक्तुरिच्छया विषयीकृतेऽर्थे कश्चिद्यावच्छब्दः प्रवर्ततेतावद्यदा यथा विपर्ययेण चार्थावधारणं क्रियतेतदा यथासंप्रत्ययं प्रत्ययानुसारेणैव शब्दः प्रवर्तमानः सर्वत्र मुक्यतयैव प्रवृत्त इति वाक्ये न शब्देषु गौणमुख्यविभागः कश्चित् ।। ।।

286 287 288 यद्यपि प्रत्ययाधीनमर्थतत्वावधारणम् । न सर्वः प्रत्ययस्तस्मिन्नसिद्ध इव जायते ।।
।। दर्शनं सलिले तुल्यं मृगतृष्णादिदर्शनैः । तुल्यत्वे दर्शनादीनां न जलं मृगतृष्णिका ।।

।। यदसाधारणां कार्यं प्रसिद्धं रज्जुसर्पयोः । तेन भेदः परिच्छेद्यस्तयोस्तुल्येऽपि दर्शने ।।

।।

-- इदानीमत्रापि गौणमुख्यविभागं समर्थयितुं सत्यासत्यविभागं तावदुपक्रमितुमाह

289 प्रसिद्धार्थविपर्यासनिमित्तं यच्च दृश्यते । यस्तस्माल्लक्ष्यते भेदस्तदसत्यं प्रचक्षते ।।
।।

-- 289 अथ दर्शनस्य विषयासत्यत्वेनाप्यसत्यत्वमुपदर्शयितुमाह
यच्च नैमित्तिकदर्शनं प्रसिद्धार्थविपर्यासनिमित्तमिति प्रसिद्धः सत्यरूपोऽर्थः तस्य विपरीतो यो मिथ्यात्वलक्षणस्तस्य निमित्तं कारणमिन्द्रियविषयगतो दोष इति । यश्च तस्माद्भेदो विशेषो लक्ष्यते द्विचन्द्रादिस्तं तथाभूतं दर्शनविषयं प्रचक्षते ।। ।।

290 यच्च निम्नोन्नते चित्रे सरूपं पर्वतादिभिः । न तत्र प्रतिघातादि कार्यं तद्वत् प्रवर्तते ।।
।।

-- , 290 पुनरपि दर्शनभेदमाह
पर्वतादिभिः सरूपं निम्नोन्नत चित्रभित्तौ दृश्यतेन च तावता तत्र प्रतिघातादिकार्यभेदो ज्ञानान्तरेण तत्र भेदावगतिरेवेत्यर्थः ।। ।।

291 292 293 294 295 स्पर्शप्रबन्धो हस्तेन यथा चक्रस्य सन्ततः । न तथाऽलातचक्रस्य विच्छिन्नं स्पृश्यते हि तत् ।।
।। वप्रप्राकरातल्पैश्च स्पर्शनावरणे यथा । नगरेषु न ते तद्वद् गन्धर्वनगरेष्वपि ।।

।। मुगपश्वादिभिर्यावान् मुख्यैरर्थः प्रसाध्यते । तावान्न मृन्मयेऽप्यस्ति तस्मात्ते विषयः कनः ।।

।। महानाव्रयते देशः प्रसिद्धैः पर्वतादिभिः । अल्पदेशान्तरावस्थं प्रतिबिम्बं तु दृश्यते ।।

।। मरणादिनिमित्तं च यथा मुख्या विषादयः । न ते स्वप्नादिषु स्वस्य तद्वदर्थस्य साधकाः ।।

।।

-- , 291 - 295 एतदेव दृष्टान्तान्तरैः प्रतिपादयितुमाह
अत्र हस्तिकान् विक्रीणीतेअश्वकान् विक्रीणीते इत्यादौ कार्यभेदादेव भेदमवसाय कन्प्रत्ययान्तान् प्रतिकृतिवाचकानीरितवानिति मृगपश्वादिभिरित्यस्य श्लोकस्यार्थः । अन्यत् स्पष्टम् ।। ।।

296 देशकालेन्द्रियगतैर्भेदैर्यद् दृश्यतेऽन्यथा । यथा प्रसिद्धिर्लोकस्य तथा तदवसीयते ।।
।।

-- , , 296 इदानीमुपसंहर्तुमाह
देशभेदेनासति विप्रकर्षरूपेणकालभेदेन यथा ग्रीष्मे मरीचयो भौमेनोष्मणा स्पन्दमाना दूरस्थस्य जलज्ञानमुपजनयन्तिइन्द्रियभेदेन यथा तैमिरिकस्य द्विचन्द्रज्ञानमुपजनयन्ति तैर्देशकालंन्द्रिगतैर्भेदैरन्यथा दृश्यमानं वस्तु लोकप्रसिद्धिवशाद् दाढर्ढ्यादाढर्ढ्यप्रत्ययभेदेनार्थक्रियाभेदेन च यथावदवैपरीत्येनाध्यवसीयते ।। ।।

297 यच्चोपघातजं ज्ञानं यच्च ज्ञानमलौकिकम् । न ताभ्यां व्यवहारोऽस्ति शब्दा लोकनिबन्धनाः ।।
।।

-- , -- "" , (o o 2-142) 297 ततश्चेदमत्रार्थतत्त्वं बोद्धव्यमित्याह
उपघातजं सत्यत्व विपरीतं ग्रैष्मतिमिरिकादिज्ञानम्अलौकिकं च यदपि परमर्षोणां सम्बन्धि ज्ञानं
ताभ्यामुभाभ्यामपिव्यवहारनिर्वहणमशक्यमित्यतोयथैवाऽविसम्बाधं लोकप्रसिद्ध्या सकलव्यवहारनिर्बहणनिपुणं ज्ञानं यथावदर्थतत्त्वावधारणाय समाश्रीयते । यथोक्तम्
असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा । व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत् ।।
इतिवा प तथैवार्थस्वरूपप्रत्यायनाय शब्दा लोकनिबन्धना लोकव्यवहारनिमित्तभूताः प्रवर्तमानाः प्रसिद्ध्यप्रसिद्धिभ्यामेव स्खलद्गतित्वास्खलद्गतित्वाभ्यां गौणमुख्यविभागमापादयन्तीति बौद्धेऽपि शब्दार्थे व्यवस्थित एव गौणमुक्यविभाग इति सिद्धम् ।। ।।

298 घटादिषु यथा दीपो येनार्थेन प्रयुज्यते । ततोऽन्यस्यापि साचिव्यात् स करोति प्रकाशनम् ।।
।।

-- , --298 एवं गौणमुख्यविभागमुक्त्वा तत्प्रसङ्गेन च सत्यासत्यविभागं विधाय पुनरपि शब्दानां मुक्यनान्तरीयकविचारं वैतत्येन कर्तुमाह
इह यत्प्रतिपादनाय शब्दाः प्रयुज्यन्तेतत्तस्य प्रयोजकं मुख्यं तत्प्रतिपादनावसरे च सन्निधानाद्यदन्यत प्रत्याययति तत्तस्य नान्तरीयकमुच्यते । एतद् दृष्टान्तद्वयेन प्रदर्शयतिघटादिष्वित्यादिना । तत्र यथा दीप इति ज्ञापकदृष्टान्तोपदर्शनं घटादिषु ज्ञातेषु विषयेषु यथा ज्ञापको दीपो येनार्थेन घटादिज्ञापनलक्षणेन ततः प्रयोजकादन्यत्प्रकाशं नान्तरीयकं यथा करोति ।।
।।

299 संसर्गिषु तथाऽर्थेषु शब्दो येन प्रयुज्यते । तस्मात् प्रयोजकादन्यानपि प्रत्याययत्यसौ ।।
।।

-- 299 एवं दार्ष्टान्तिके योजयितुमाह
यथा भाव इत्यादावर्थेषु बहुषु संसर्गिषु मव्याद्येनार्थेन सिद्धत्वादिनाऽसौ भावशब्दः प्रयुज्यते तस्मादन्यनपि लिङ्गसंख्यादीन् नान्तरीयकतया स्थितान् सन्निधानात् प्रत्याययत्येवेति बोद्धव्यम् ।। ।।

300 निर्मन्थन यथाऽरण्योरग्न्यर्थमुपपादितम् । धूममप्यनभिप्रेतं जनयत्येकसाधनम् ।।
।।

-- , ? 300 कारकहेतुदृष्टान्तोपदर्शनार्थमाह
अरण्योः सम्बन्धि यन्निर्मथनं तदग्न्यर्थम् अग्निनिष्पत्तयेअग्निस्तस्य ग्रयोजक इत्यर्थः । यस्मान्नान्तरीयकतया धूममप्यनुपयोगिनं जनयत्येव ।

कीदृशम् एकसाधनमेकहेतुकमित्यर्थः । अरण्योरित्यनेनोत्तरणिरधरारणिश्च तत्रोच्यत इति दर्शितम् ।।।।

301 यथा शब्दोऽपि कस्मिंश्चित् प्रत्याय्यार्थे विवक्षिते । अविवक्षितमप्यर्थं प्रकाशयति सन्निधेः ।।
।।

-- 301 पुनरपि दार्ष्टान्तिके योजयितुमाह
कस्मिंश्चित् प्रत्याय्येऽर्थे सिद्धताख्ये धर्मेऽविवक्षितमप्यर्थं पुंस्त्वैकत्वलक्षणं प्रकाशयति प्रत्यायति सन्निधानादिति ।। ।।

302 यथैवात्यन्तसंसृष्टस्त्यक्तुमर्थो न शक्यते । तथा शब्दोऽपि सम्बन्धी प्रविवेक्तुं न शक्यते ।।
।।

, , , -- , , , 302 नन्वस्तु वस्तुगतिरीदृश्येवयथा दीपादिना नान्तरीयकप्रत्यायनेन प्रयोजकं प्रकाश्यते तत्सन्निधानाद् नान्तरीयकतयाऽन्यदपि घटकुड्यादीति तत्र युक्तम्शब्दस्तु यत्प्रतिपादनाय वक्त्रा प्रतिपादयितुमष्टःतथैव भूत्वा तत्प्रतिपादनं करोतु;किं तस्य नान्तरीयकप्रत्यायनेनत्याशङ्क्याह यथा मत्स्यमांसार्थिना मत्स्यमांससंसृष्टस्तोकत्वक्कण्टकादिरनुपयोग्यपि त्यक्तुं न शक्यतेतथा शब्दोऽप्यत्ययन्तसम्बन्धल्लिङ्गसंख्याप्रतिपादकःतत्र न केवला प्रकृतिः प्रयोक्तव्यान च केवलः प्रत्यय इति प्रविवेक्तुं परिहर्तुं न शक्यते ।। ।।

303 व्यर्थानां सन्निधानेऽपि सति चैषां प्रकाशते (ने) । प्रयोजकोऽर्थः शब्दस्य रूपाभेदेऽपि शस्यते ।।
।।

-- , 303 अतश्च तत्रार्थेषु बहुषु सन्निहितेषु कः शब्दस्यार्थो वाच्यः स्यादित्याह
बहूनां संसर्गिणामर्थानां तत्र सन्निधानादेतेषां च सत्यपि शब्दाद् दीपादिवाविशेषेण प्रकाशने यम्तस्य प्रयोजकः; स एव वाच्योऽर्थःअन्यो नान्तरीयकः न तस्य प्रयोजकत्वं तत्रापि रूपस्याभेदे समानरूपत्वे इति।। ।।

304 305 क्कचिद् गुणप्रधानत्वमर्थानामविवक्षितम् । क्कचित् सान्निध्यमप्येषां प्रतिपत्तावकारणम् ।।
।। यच्चानुपात्तं शब्देन तत्कस्मिंश्चित् प्रतीयते । क्कचित् प्रधानमेवार्थो भवत्यन्यस्य लक्षणम् ।।

।।

-- , 304 - 305 एतदेव वैतत्येन प्रकारभेददर्शनपूर्वकमाह
अत्र च गुणप्रधानताविपर्ययः पदार्थैकदेशाविवक्षा सकलपदार्थाविवक्षाउपात्तपदार्थापरित्यागैनैवान्यार्थोपलक्षणमित्येवमनेन श्लोकद्वयेन प्रकारचतुष्टयस्योद्देशः कृतः ।। ।।

306 आख्यातं तद्धितार्थस्य यत्किञ्चिदुपदर्शकम् । गुणाप्रधानभावस्य तत्र दृष्टो विपर्ययः ।।
।।

-- , -- ""306 अथाद्यप्रकारप्रदर्शनार्थमाह
तेनदीव्यतीत्याख्यातं तद्धितार्थस्य निमित्तत्वेनोक्तम् । अतश्च तत्र क्रियाप्रधानमाक्यातमिति तदर्थस्यैव तद्धितान्तादवगतिः स्यात् । यतश्च तत्र क्रियाप्रधानत्वेऽपि चाख्यातस्य तद्धितः स्वभावात् साधनप्रधान इति साधनार्थस्यैव प्राधान्येनावगतिरिति । तेन दीव्यत्यादौ निर्देशे गुणप्रधानभावो न विवक्षितःअक्षकरणकदेवनादिक्रियाकर्तृमात्रमेव तत्र प्रयोजकमिति स एक मुख्योऽर्थः । वक्ष्यति च

गुणप्रधानताभेदः पुरुषादिविपर्ययः । निर्दिष्टस्यान्यथा शास्त्रे नित्यत्वान्न विरुध्यते ।। यथानिर्देशमर्थाः स्युर्येषां शास्त्रं विधायकम् । किञ्चित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनम् ।। योऽश्वे यः पीठ इत्यत्र भूतयोरश्वपीठयोः । यथोपलक्षणार्थत्वं तथार्थेष्वनुशासनम् ।।

इति ।। ।।

307 निर्देशे लिङ्गसंख्यानां सन्निधानमकारणम् । प्रमाणमेव ह्रस्वादावनुपात्तं प्रतीयते ।।
।।

-- , --, ? --""(1-1-32) 307 अथ क्कचित् सान्निध्यमित्येतस्य प्रतिपादनायाह
सिद्धलक्षणो भावो घञादीनां निमित्तत्वेनाभीष्ट इति तत्प्रतिपादनाय भाव इत्यस्मिन् निर्देशे लिङ्गसंख्ययोर्नान्तरीयकतया प्रतिपत्तावपि सन्निधानमकारणम्न तत्र तयोः प्रयोजकत्वमिति यावत् । ननु नान्तरीयकतया प्रतिपत्तौ कथं क्कचित् सान्निध्यमप्येषां प्रतिपत्तावकारणमित्युक्तम् । प्रयोजकार्थवत् तद्व्यवहारपर्यन्तायां प्रतिपत्तावकारणमित्यभिप्रायः । इदानीं यच्चानुपात्मतमित्येतस्य प्रतिपादनायाह
प्रमाणमेवेति । इह उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तम्ह्रस्वदीर्घप्लुताश्च मात्रिकद्विमात्रिकत्रिमात्रलक्षणा उदात्तानुदात्तस्वरसमाहाररूपा भवन्ति । तत्र ह्रस्वस्वरितादीनां कियदुदात्तं कियदनुदात्तम् आदौ किमुदात्तमथानुदात्तं मध्येऽन्ते वेति सन्देहापाकरणायोक्तम्तस्यादित उदात्तमर्धह्रस्वम्इति । अत्र चार्द्धह्रस्वग्रहणमर्द्धमात्रालक्षणस्य प्रमाणस्योपलक्षणमिति तदेव तस्मात् प्रतीयते इत्यर्धह्रस्वग्रहणप्रतिपाद्यस्याप्रधानस्याविवक्षैवोक्ता ।। ।।

308 ह्रस्वस्यार्द्धं च यद् दृष्टं तत्तस्याऽसन्निधावपि । ह्रस्वस्य लक्षणार्थत्वात् तद्वदेवाभिधीयते ।।
।।

-- ------, 308 एतदेव प्रदर्शयितुमाह
अतश्च ह्रस्वस्यार्धं च दृष्टमर्धमात्रात्मकं तत्तस्य ह्रस्वस्यासन्निधावपि दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तेत्युच्यते । कस्मादित्याहह्रस्वस्य लक्षणापर्थत्वादिति । अर्द्धह्रस्वमित्यत्र ह्रस्वग्रहणं मात्राया उपलक्षणार्थम् । अतो दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तेति बोद्धव्यम् । एतदेवान्यैरुक्तम्अर्धह्रस्वमित्यनेनार्द्धमात्रा लक्ष्यते ह्रस्वग्रहणमतन्त्रमिति । तस्माद्ध्रस्वस्यात्र लक्षणार्थत्वाद् दीर्घप्लुतयोरप्यर्द्धमात्रोदात्ता भवतीत्यभिधीयते । किंवदित्याहतद्वदेवेति । यथा तस्य ह्रस्वस्यार्द्धमात्रोच्यतेतथा तदसन्निधौ दीर्घप्लुतयोरपीत्यर्थः ।। ।।

309 दीर्घप्लुताभ्यां तस्य स्याद् मात्रया वा विशेषणम् । जातेर्वा लक्षणा यस्मात् सर्वथा सप्तपर्णवत् ।।
।।

, -- "3" , -- , --309 अथवा प्रकारत्रयमत्र प्रतिपाद्यतेतत्राद्यप्रकारमाह
ह्रस्वग्रहणेन ऊकालोऽज्झ्रस्वदीर्घप्लुतःइत्यत्रैकयोगनिर्दिष्टत्वाद् दीर्घप्लुतावपि लक्ष्येतेततश्च दीर्घप्लुताभ्यां तस्यार्द्धस्यावच्छेदः स्यात् । विषमविभागेऽप्यर्द्धशब्दो दृष्टो ग्रमार्द्धं नागरार्धमिति । तथाऽत्रेति दीर्घप्लुतयोरप्यर्द्धमात्रोदात्ता भवति । द्वितीयं प्रकारमाह

मात्रया अथवार्द्धस्यावच्छेदःह्रस्वसंज्ञकत्वस्याविवक्षितत्वात् । एतच्च निदर्शितं ह्रस्वस्यार्द्धमित्यनेन । अथवा निरस्ताव यवविभागोऽर्द्धह्रस्वशब्दोऽखण्ड एवार्द्धमात्राजातेः सप्तपर्णादिवदुपलक्षक इति । तृतीयमत्र प्रकारमाह
जातेर्वेति ।। ।।

310 गन्तव्यं दृश्यतां सूर्य इति कालस्य लक्षणे । ज्ञायतां काल इत्येतत्सोपायमभिधीयते ।।
।।

-- 310इदानीं क्कचित् प्रधानमेवार्थो भवत्यन्यस्य लक्षणमिति व्याख्यातुमाह
पथिकैः क्कचिदित्थमभिधीयते त्वर्यतामद्यापरोऽध्वा गन्तव्यः सूर्यश्च दृश्यतामित्यत्र सूर्यदर्शवनप्राधान्येन शब्दः श्रूयमाणो ज्ञायतामल्पीयान भागोऽह्नः परिशिष्यत इत्यर्थस्य सोपायस्य सनिश्चस्योपलक्षकः सम्पद्यत इति प्रधानेनार्थेनान्यार्थोपलक्षणमिति लक्षितपरार्थो मुख्यः शक्त्यर्थोऽपि न त्यक्त इति ।।।।

311 विध्यत्यधनुषेत्यत्र विशेषेण निदर्यते । सामान्यमाश्रयः शक्तेर्यः कश्चत्प्रतिपादकः ।।
।।

-- ------"-" (o 4-4-83) 311 एतदेव श्लोकत्रयेण शास्त्रलोकयोरुदाहरणेषु वितत्य प्रदर्शयितुमाह
अधनुषेत्यनेन विशेषण करणसामान्यम्त्रं निदर्श्यते । तत्कीदृशमित्याहशक्तेः करणशर्केराश्रयोऽधिकरणमात्रम् ततश्च तस्या यः कश्चित्प्रतिपदाक उपादीयते । एतदुक्तं भवतिकरणनिषेधपरायां चोदनायां धनुर्लक्षणस्य विशेषस्यापरित्यागेनैव करणमात्रस्य मुख्यत्वमिति (लक्ष्यत्वमिति) शास्त्रीयमुदाहरणम् । उक्तं चविध्यत्यकरणेनेतीतरथा ह्यतिप्रसङ्गःभा इति ।। ।।

312 काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः । उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ।।
।।

312 विशेषाभिधायकेऽपि वाक्ये सामान्यमात्रमेव प्रयोजकं लोकेऽपि दृश्यत इत्याह सर्पिषः काकेभ्यो रक्षणमत्र विशिष्टमेव
विहितमप्युपघातमात्रनिवारणफले पर्यवस्यतीति तदेव तत्र प्रयोजकं बोद्धव्यम् ।। ।।

313 प्रक्षालनं शरावाणां स्थालीनां मार्जनं तथा । अनुक्तमपि रूपेण भुज्यङ्गत्वात् प्रतीयते ।।
।।

-- ""(2-81) `" ""313 क्कचित् साक्षादनुक्तमपि मुक्यार्थनान्तरीयकतया प्रतिपद्यत एवेति दर्शयितुमाह
भोजनमस्योपपाद्यतामित्यत्र भोजनोपपादनं शब्दः प्रत्याययंस्तदङ्गानामासनदानपात्रप्रक्षालनादीनां नान्तरीयकतया प्रत्यायनं करोत्येवम् । प्रक्षालने इति वा पाठः । शरावाणां प्रक्षालने शब्दनोपात्ते स्थालीनिर्मार्जनाद्यनुक्तमपि सम्भवाद् भुज्यङ्गत्वात् प्रतीयत एवेति । तदेवम् प्रयोजकमिदं तेषामत्रेदं
नान्तरीयकम्इत्येतदेव वितत्य प्रसङ्गाद्वैचित्र्येणोपदर्शितम् । एवम्
प्रमाणमर्द्धह्रस्वादौइत्यादिना प्रक्षालनं शरावाणाम्इत्यन्तेन प्रन्थेन यच्चानुपात्तमित्यादिश्लोको व्याख्यातः । एतेन श्लोकेन प्रकारद्वयेन लक्षणाप्रदर्शिता । कदाचिन्मुख्यार्थत्यागेनैवान्यस्योपलक्षणमेतदेवाविवक्षितवाच्यमुच्यते । कदाचिन्मुख्यार्थाविरामोपायपूर्वकमन्यार्थोपलक्षणमेतदेव विवक्षितान्यपरवाच्यमुक्तं विज्ञेयम् । इत्येवं मुख्यनान्तरीयकविभाग उपदर्शितः ।। ।।

314 वाक्यात् प्रकरणादर्थादौचित्याद् देशकालतः । शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ।।
।।

-- , "" " " , , "" , , , , "" , "" "" --`" (o 4-1-48) , , --314 अथात्रेदं गौणमिदं मुख्यमिदं नान्तरीयकमित्येवं शब्दर्थनिर्णयप्रस्तावे
तत्तन्निश्चयोपायानुपदर्शयितुकाम आह
तत्र वाक्याच्छब्दार्थनिर्णयो यथा कटं करोति भीष्ममुदारं दर्शनीयमिति तुल्याययामपि श्रुतौ यदा कटस्यैव करोतिक्रियया सम्बन्धःतदा द्रव्यस्य च निर्गुणस्यानुपपत्तेर्गुणानांचनिरधिकरणानामसम्भवादाकाङ्क्षादिना तत्सामानाधिकरण्यं वाक्यीयात् समन्वयादिति भीष्मगुमान्वितस्यैव कटस्य करणं वाक्यार्थः । वक्ष्यति च
आश्रयाश्रयिमोर्वाक्याद् निर्णयस्त्ववतिष्ठतेइति । तथा च शास्त्रे कर्मणि द्वितीयाइत्यादीनि पृथगव प्रकरणानि विरचितानि । तत्र प्रातिपदिकादनभिहिते कर्मादौ यदेकत्वादि तत्र द्वितीयाद्या विभक्तयो भवन्तीत्येवमर्थस्य सङ्गतेराकाङ्क्षादिवशाद् भिन्नेष्वपि प्रकरणेषु तात्पर्यालोचनके श्रोतरिवाक्यीयः सम्बन्धोऽथनिश्चयाय पर्यवस्यतीति वाक्याच्छब्दार्थनिर्णयः । तथात्र प्रकरणमप्यशब्दं शब्दार्थनिर्णनिमित्तम्यथा संग्रामप्रस्तावे सैन्धवानां चोदननश्वानयनपर्यवसायि भवतिभोजनप्रस्तावे तु तदेव लवणप्रतीतिमुपजनयतीति । शास्त्रे यथा धातुप्रकरणाद् धातुरित्युक्तम् । तथा चोभयावगतौ सत्याम् कर्तृकरणयोस्तृतीयाइत्यत्र कारकाणां प्रकान्तत्वात् करणशब्देन क्रियाग्रहणं न विज्ञायतेशब्दवैरेत्यादौ सूत्रे च धात्वधिकारे कारणशब्दात् क्रिया प्रतीयत इति । अर्थस्तु शाब्दत्वाच्छब्दार्थनिर्णयं प्रकल्पयति
यथा अञ्जलिना जुहोतिअञ्जलिना सूर्यमुपतिष्ठतेअञ्जलिना पूर्णपात्रमाहरतीत्यत्र जुहोतित्याद्यथवशाद् विभिन्नार्थवाचकोऽञ्जलिशब्दः । शास्त्रेऽप पूरणगुणसुहितार्थेत्यत्र गुणेन सह षष्टी न समस्यत इत्यर्थसामर्थ्यादेदङामसम्प्रत्ययः । तथा न शसददवादिगुणानाम्इत्यत्रनाश्रयिणो ग्रहणं भवत्यर्थादिति । औचित्यादपि शब्दार्थव्यवस्थानं दृश्यतेयथा सीरासिमुसलैः केवलैरनिर्दिष्टक्रियापरैरप्यौचित्याद् विलेखनयुद्धावहननलक्षणसमुचितक्रियापदाक्षेपे शब्दार्थनिर्णयः पर्यवस्यति । यथा वा प्रष्ठादयः शब्दा अग्रगामित्वादिनिमित्तसमाश्रयणेन प्रवर्त्तमानास्तस्य च निमित्तस्यौचित्यात् पुंस्येव सम्भवात् पुंशब्दास्त उच्यन्ते तद्योगात् स्त्रियां वर्तन्ते न साक्षादिति प्रष्ठसम्बन्ध एव प्रष्ठ्यादीनाम्
पुंयोगादाख्याम् इत्यनेननिमित्तत्वेनोपदर्शितः । यथा च
यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ।। इत्यत्रानुरक्तक्रियापदानि साधनान्येवौचित्यवशात् स्वसमुचितक्रियापदवगत्या अवान्तरवाक्योपप्लावनप्रत्यायनपूर्वकाप्रस्तुतप्रशंसालक्षणस्य वाक्यार्थस्य प्रतीतिमुपजनयन्ति । तथा च यो निम्बं परशुना छिनत्ति यश्चैनं गन्धेनानुलिम्पति सर्वस्य तस्य दुस्त्यजा प्रकृतिरिति कृत्वा कटुरेव दौर्मनस्यदाननिपुण एवेति कस्यचित् खलत्वप्रतिपादनमत्र तात्पर्यार्थः । शास्त्रे यथा
पुंयोगादाक्यायाम्पा इत्यत्रोक्तं पुंसिशब्दप्रवृत्तिनिमित्तस्य सम्भवात् पुंशब्दा एत इति । देशाच्छब्दार्थनिर्णयो यता मथुरायाः प्राचीनादुदीचीनाद्वा

नगरादगच्छामीत्युक्ते नगरविशेषात् पाटलिपुत्रादागच्छामीति गम्यते । पाटलिपुत्रस्य मथुरासम्बन्धिनोश्च प्राचीनोदीचीनभागयोर्विद्यते प्रत्यासत्तिरिति कृत्वा देशवशादत्र निर्णयः । कालात् खलु व्यवस्था दृश्यते
यथा शिशिरे द्वारमित्युक्ते पिधेहीतिग्रीष्मसमये त्वेवमभिधाने समुद्घाटयेति गम्यते । एतच्च शब्दार्थनिर्णयोपायानां दिङ्मात्रप्रदर्शनं बोद्धव्यम् । अन्येऽपि सन्निश्चयाय प्रकारा अनुसन्धातव्याः । श्लोकवशाच्चोदाहरणमात्रमेव दर्शितमिति मन्तव्यम् । सर्वथा न रूपमात्राच्छब्दार्थप्रविभागनिर्णयः कर्तुं शक्य इति प्रतिपादयितुमुक्तम्
न रूपादेव केवलादिति ।। ।।

315 316 संसर्गो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।।
।। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।

।।

-- , , , `" (o 3-1-51) , "" (o 1-3-66) , "" (o 1-3-19) , , "" (o 2-3-4) , , ----""(o 1-2-43) "" (1-2-44) , 315-316 तथा चापरैः संसर्गादयः शब्दार्थावच्छेदहेतवः प्रदर्शिता इत्याह
इह कैश्चिदर्थभेदाच्छब्दभेदोऽभ्युपगतःतदपरैरेकशब्दतेति द्वौ पक्षौ । तत्र नानात्वपक्षे स्वभावभिन्नेषु तुल्यश्रुतिषु रूपाभेदानवच्छिन्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छदः क्रियते । एकत्वपक्षे त्वर्थाभिधाने भिन्नासु शक्तिषु श्रुतिसारूपयमात्रादलब्धविभागासु तथैव संसर्गादिभिरर्थनिर्णयः क्रियत इत्युभयत्रापि प्रकरणादयः शब्दार्थनिर्णयनिपुणा इति तदुपन्यासः कथ्यते । तदत्र केचित् सामर्थ्येमेवैकं शब्दार्थनिर्णयनिमित्तमिति मन्यन्ते । योऽप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते
सोऽपि सामर्थ्यादेवात्र प्रतीयत इति कथयन्ति। सामर्थ्यमेव हि संसर्गादिभिर्व्यज्यत इति । तत्र संसर्गाद्यथा संसर्गाद्यथा सकिशोरा धेनुरानीयतामित्यत्र नियतेन संसर्गिणा किशोरलक्षणेन विशेषावसाय निमित्तेन वडवाया एव सम्प्रत्ययः
यथा च सवत्सा धेनुरित्यत्र वत्ससंसर्गाद् गोर्धेनोरेव सम्प्रत्यय इति संसर्गादर्थनिर्णयः । रूढ्या गौरेव धेनुरुच्यते इति तु येषां दर्शनं तेषामत्र संसर्गो विशेषसम्प्रत्यये नोपयुज्यत इति बोद्धव्यम् । शास्त्रे यथा
आवाद् ग्रः पा इत्यत्र यस्यावेनोपसर्गेण सम्बन्धः सम्भवति स एव गृह्यते गिरतिःगृणोतेस्तु स्वभावादर्थविरोधादेव संबन्धो नोपपद्यत एव । तथा संसर्गवद्विप्रयोगोऽप्यवच्छेदहेतुः । यथा निर्ज्ञातसम्बन्धस्योच्यते अकिशोरा धेनुः अवत्सा अकरभावा आनीयतामिति किशोरादिविप्रयोगेन विशिष्टजातीयाया एव धेनोरवगतिरुपजायत इति । शास्त्रेऽपि
भुजोऽनवनेपा इति यस्य भुजेरवनमनवनं चार्थस्तस्य ग्रहणं विज्ञायतेन तु कौटिल्यार्थस्य । निर्भुजति पाणिमिति । साहचर्याद्यथा रामलक्ष्मणावित्युक्ते लक्ष्मणसाहचर्याद् दाशरथेरेव प्रतीतिः । अत्र यद्यप्येको दृष्टव्यभिचारसाहचर्यात् तत्तुवल्यधर्मा ज्ञायत इति बोद्धव्यम्। शास्त्रे यथा
विपराभ्यां जेःपा इत्यत्र पराशब्दोऽदृष्टव्यभिचारेण विना साहचर्यादुपसर्ग एव गुह्यते । यद्यपि बहुविवनमित्यादौ विशब्दोऽनुपसर्गोऽस्तितथापि समुदायोऽर्थवान् । जहत्स्वार्थावृत्तिपक्षेऽवयवा अनर्थका एव । अजहत्स्वार्थावृत्तिपक्षे कथमुपसर्गभावमापन्नो विरप्राधान्याद् ग्रहीतुमशक्य एवेति नास्ति विरनुपसर्गः । वीजयते इत्यत्र तु वीशब्दो न विशब्द इति । भाष्येऽप्युक्तमस्य गोर्द्वितीयेनार्थ इति गौरेव प्रतीयतेनाश्वो न गर्दभ इति । यथा च अन्तरान्तरेण युक्तेपा इत्यत्र द्वावपि टाप्तृतीयान्तयोः सम्भवाद् दृष्टापचारौ । अतः परस्परसाहचर्यान्निपातयोरेव ग्रहणमित्येवंसाहचयमर्थनिर्णयहेतुः शब्दानाम् । विरोधादप्यर्थोऽवधार्यते
यथा रामार्जुनावित्यत्रार्जुनसन्निधाने निसर्गवैरिणो जामदग्न्यस्यैव प्रतीतिः । अर्थप्रकरणदेशकालौचित्यैर्विशेषेऽवस्थापनं वाक्यदर्शितम् । लिङ्गाच्च वाक्यान्तरे दृष्टाद् भेदः प्रसिद्धः प्रतीयते
यथा अक्ताः शर्करा उपदधातीत्यत्रानेकस्याञ्जनद्रव्यस्य सभवे तेजोघृतस्य स्तुतिरुक्तः । एतस्माल्लिङ्गाद् घृतसाधनत्वमञ्चिक्रियायाः शर्कराकर्मिकाया निर्द्धार्यते । तथा पशुमालभेतेत्यत्र पशुत्वसंबन्धिषु प्राणिषु सत्सु छागस्य हविषो वपाय मेदस इति लिङ्गच्छागैकार्थसमवायि पशुत्वं प्रतीयते । शास्त्रेऽप्यूह्यम् । शब्दान्तरसन्निधानादपि विशेषावगतिः । यथा अर्ज्जुनः कार्तवीर्यो रामोजामदग्न्य इति । समार्थाद्विशेषप्रतिपत्तिर्यथा

अनुदरा कन्येति । सामर्थ्यादुदरविशेषप्रतिषेधप्रतीतिः । तथाअभिरूपाय कन्या देयेति । अभिरुपव (त) रायेति सामर्थ्यात् प्रतीयते । शास्त्रेऽपि प्रथमानिर्दिष्टं समास उपसर्जनम् पा इति समासार्थे शास्त्रे समासशब्दस्य प्रवृत्तिः । एकविभक्ति चापूर्वनिपातेइत्यत्र यः समासशब्दोऽनुमीयते तस्य प्राथमकल्पिक एव । वृत्तिर्व्यक्तिर्लिङ्गम् । तस्मान्निर्णयो यथा तद्ग्रमस्यार्थं लभेतेत्यत्रसमप्रविभागेऽर्धशब्दो नपुंसकेन परामर्शात् (ग्रामस्यार्धं स्वयमेव प्रतीयते) । शास्त्रेऽप्यूह्यम् । स्वराद्यथा स्थूलपृषतीमालभेतेत्यत्रान्तोदात्तस्य श्रवणात् स्थूला चासौ पृषतीत्येवंविधार्थप्रतीतिः । पूर्वपदप्रकृतिस्वरत्वदर्शने स्थूलानि पृषन्ति यस्यामित्यन्यपदार्थप्रतीतिः । तथा वैपाशः कूप इत्यत्राद्युदात्तस्याश्रवणाद्विपाश उत्तरस्य विशिष्टस्यैव प्रतीतिः । अन्तोदात्तश्रवणे तद्विपरीतस्येति । सत्त्वाद्यथा सुसिक्तमतिस्तुतमित्यादौ पूजातिक्रमणयोः कर्मप्रवचनीयसंज्ञायामुपसर्गत्वाभावे तयोरेव प्रतिपत्तिः । उपसर्गसंज्ञायां तु सत्यां सुषिक्तं सुष्टुतमित्यादौ षत्वप्रवृत्तेरर्थान्तरस्य प्रतिपत्तिः । णत्वनत्वाभ्यां यथा प्रणायक इत्यत्रोपसर्गाश्रयणत्वसद्भावे प्रणयनक्रियाकर्तुः प्रतीतिः

णत्वाभावे तु प्रगता नायका अस्माद् देशादसौ प्रनायको देश इत्यस्य पदार्थप्रतीतिरिति । तदेवमेते शब्दर्थस्य सन्देहनिराकरणद्वारेण नियतार्थावसायहेतुत्वाद्विशेषस्मृतिहेतवो निर्णयहेतवः संसर्गादय इति बोद्धव्यम् ।।
।।

317 भेदपक्षेऽपि सारूप्यादि्भन्नार्थाः प्रतिपत्तिषु । नियता यान्त्यभिव्यक्तिं शब्दाः प्रकरणादिभिः ।।
।।

, -- 317 न त्वेकत्वदर्शने भेदाभावाच्छब्दानामथस्य सन्देहे तन्निर्णयाय प्रकरणादय उच्यन्त इति शोभनम्भेदपक्षे तु विभिन्नत्वादेव शब्दस्तदर्थप्रत्यायनं करिष्यतीत्याशङ्क्य तत्रापि रूपसादृश्योत्पादितसंशीतीनां व्यवहर्तृणां प्रकरणादिभिरेव शब्दार्थनिर्णय इति प्रतिपादयितुमाह
भेदपक्षेऽपि प्रतिपत्तिषु भिन्नार्था अपि शब्दाः सारूप्यादभिन्ना इवेति प्रकरणादिभिरेवोक्तस्वरूपैर्नियता अवच्छिन्ना अर्थाभिव्यक्तावुपयोगं यान्तीति न कुत्रचित् प्रकरणादिमन्तरेण शब्दार्थनिर्णय इति बोद्धव्यम् ।। ।।

318 नामाख्यातसरूपा ये कार्यान्तरनिबन्धनाः । शब्दा वाच्याश्च तेष्वर्थो न रूपादधिगम्यते ।।
।।

, -- `" (3-4-99) "" (3-4-100) `3-1-58-3) , "" ``"" , , "" (3-4-57) "" (9-4-105) ? "" 318 युक्तं चैतत् कस्मादित्याह
इह वाक्ये नामरूपा आख्यातशब्दा अपि सम्भवन्ति । यथा अश्व इति टु ओश्वि गतिवृद्ध्योरित्यस्माल्लुङि मध्यमपुरुषैकवचने सिपि नित्यं ङितःइतश्चइतीकारलोपे च्लिप्रत्यस्य जृस्तम्भुम्रुचु' (इत्यादिना चङादेशे श्वयतेरन्तस्यातो गुणरूपत्वे सकारस्य रुत्वविसर्जनीययोः कृतयोर्लुङ्लृङ्क्ष्वित्यादिनाऽटि कृते अश्व इत्याख्यातपदं श्वयति क्रियायाः कर्त्रवच्छिन्नाया अतीतकालायाः प्रतिपादकम्अश्व इति च नामपदमश्वजातीयस्यार्थस्य सत्त्वभूतस्याभिधायकमिति सारूप्यात् सन्देहे प्रकरणादिभिरर्थव्यवस्था । यथाऽजापय इत्येतद् जि जये इत्यस्माद्धातोः कश्चिदजेयं जितवान् तमन्योऽनुप्रयुक्तवानित्यर्थविवक्षायां हेत्वर्थे णिचि
क्रीङ्जीनां णौइत्यात्वे अर्तिह्रीव्ली' त्यादिना पुकि जापीत्येवंस्थिते लङि शपि गुणायदेशयोः कृतयोः सकारस्य सत्वविसर्जनीययोश्च लुङ्लङि' त्यादिना अडागमे च कृतेऽजापय इत्याख्यातम् । अथवाऽजायाः पयोऽजापय इत्यपि नामपदं तत्सदृशमित्त्यर्थादिना तन्निश्चयः । आख्यातसरूपाश्च नामशब्दास्तेन यस्य तस्येत्यादयः । तथा तनु विस्तारे इत्यस्माल्लिटि मध्यमपुरुषबहुवचने द्विर्वचने कृते
अत एकहल्मध्येइत्यादिना एत्वाभ्यासलोपयोः कृतयोस्तेने त्याक्यात्म्तच्छब्दस्यतृतीयान्तस्य सदृशमिति । तसु उपक्षयेयसु प्रयत्ने इत्याभ्यां विध्यादौ लोटि तस्य च सिपि सेर्ह्यपिच्चइति ह्यादेशे दिवादित्वाच्छ्यनोऽनुबन्धलोपे अतो हेःइति हेर्लुकि तस्य यस्येत्याख्यातपदं यत्तदोः ष ष्ठ्येकवचनान्तयोः सदृशमिति सारूप्यात् सन्देहे प्रकरणादिभिस्तन्निश्चीयते । कीदृशाः कार्यान्तरनिबन्धनाः । कार्यान्तरं विशिष्टप्रत्ययलक्षणं प्रकरणादिना तन्निबन्धनं निमित्तं येषां ते तथाभूताः । तेषु न रूपमात्रादर्थोऽवगम्यते । तस्मात् त्वमश्वोऽजापयः शत्रुभवनानीत्यादिवाक्यार्थपर्यालोचनयैवार्थनिर्णयः । आह च नहि किञ्चित्पदं नाम रूपेण नियतं क्कचित् । पदानामर्थरूपं च वाक्यार्थादेव जायते ।।
इति ।। ।।

319 या प्रवृत्तिनिवृत्त्यर्था स्तुतिनिन्दाप्रकल्पना । कुशलः प्रतिपत्ता तामयथार्था प्रतीयते ।।
।।

-- 319 अथ शब्दार्थनिर्णयप्रस्तावे पदपदार्थानामसत्यत्वमखण्डस्यैव च वाक्यार्थस्य सत्यत्वमभ्युपगन्तव्यमिति प्रदर्शयितुमाह
या प्रवृत्तये स्तुतिप्रकल्पना निवृत्तये च निन्दाप्रकल्पना प्रेक्षावान् अयथार्थामभिमन्यते । परमार्थतस्तु तथाविधस्य वाक्यस्य प्रवर्तस्व निवर्तस्वेति वा सत्यभूतं वाक्यार्थंतत्रावगच्छतीतिपदपदार्थप्रत्ययः सर्वत्रासत्य एवेति सैवैषां तात्पर्यशक्तिरिति कैश्चिद् व्यवस्थापितम् ।। ।।

320 विधीयमानं यत्कर्म दृष्टादृष्टप्रयोजनम् । स्तूयते सा स्तुतिस्तस्य कतुरेव प्रयोजिका ।।
।।

-- , -320 एतदेव प्रकटीकर्तुमाह
दृष्टप्रयोजनं किञ्चित्कर्म स्तूयतेयथा यो राजानं भजते स सारं भुङ्क्ते। अदृष्टप्रयोजनमपियोऽग्निष्टोमेन यजते स स्वर्गं गच्छतीति विलक्षणः प्रवृत्तिनिवृत्तिप्रयोजनोऽन्य एवाविभागो वाक्यार्थस्तथाविधवाक्यनिबन्धन एवाभ्युपगन्तव्य इति स्थितम् ।।।।

321 व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते । असत्योऽपि तथा कश्चित् प्रत्यवायो विधीयते ।।
।।

, -- , , , 321 ननु कथं न तत्रस्पष्टमेव कृत्वा प्रवृत्तिनिवृत्ती विधीयेतेकिमनुपयोगिनिन्दाद्यर्थप्रतिपादनासंभारेणेत्याशङ्क्याह
यथा रुदन्तं व्याघ्रो भक्षयतीतिबालस्योच्यते न तत्र व्याघ्रभक्षणं वस्तुस्थित्या संभविकेवलं मा कदाचित् त्वं रोदीरिति रोदननिषेध एव तस्य क्रियतेतथा तत्र प्रतिषिद्धाचरणान्नरकपातो भवतीत्येतावन्मात्रं प्रतिग्राह्यत इति तत्तदर्थसमाश्रयणेन सत्यरूपपदपदार्थाभ्युपगमो न युक्तः ।। ।।

322 न संविधानं कृत्वापि प्रत्यवाये तथाविधे । शास्त्रेण प्रतिषिद्धेऽर्थे विद्वान् कश्चित् प्रवर्तते ।।
।।

-- तथा प्रत्यवायोपदेशेन च यच्छास्त्रेण प्रतिषिद्धं न तत्राहोपुरुषिकया प्रत्यवायसंविधानमारचय्य प्रेक्षापूर्वकारिणः प्रवृत्तिरुचितेत्याह

323 सर्पेषु संविधायापि सिद्धैर्मन्त्रौषधादिभिः । नान्यथा प्रतिपत्तव्यं न दतो गमयेदिति ।।
।।

-- `" 323 दृष्टप्रयोजनप्रत्यवायप्रतिविधाननिदर्शनपूर्वकमेतदेव व्याख्यातुमाह
न दतो गमयेद् यद्दतो गमयेत् सर्पा एनं घातुका भवन्तिइत्यनेन पुरोडाशस्य दन्तोपदंशनपूर्वकं भोजनं निषिद्ध्यते यत्र कश्चित् सर्पाणां प्रतिविधानं मन्त्रौषधादिभिः कृत्वा यदि तथा प्रवृत्तस्तदाऽनेन शास्त्रानुष्ठानं परित्यक्तमिति न शोभनमाचरितम् ।। ।।

324 क्कचित् तत्त्वसमाख्यानं क्रियते स्तुतिनिन्दयोः । तत्रापि च प्रवृत्तिश्च निवृत्तिश्चोपदिश्यते ।।
।।

, -- , 324 अस्त्वेवं विधिनिषेधपरेषु स्तुत्यर्थादीनामसत्यत्वम्यत्र तु स्तुतिनिन्दे एव प्रयोजिके तत्र तदर्थानां सत्यस्वमेवोचितमित्याशङ्क्याह
यत्रापि क्वचित् स्तुतिनिन्दयोर्विषये तयोः सम्बन्धि वा तत्त्वाख्यानं क्रियतेतत्रापि सर्वथा स्तुतिनिन्दयोः केवलयोर्न किञ्चित् प्रयोजनमुत्पश्याम इति प्रवृत्तिनिवृत्ती एवोपदिश्येते इति बोद्धब्यम् ।। ।।

325 रूपं सर्वपदार्थानां वाक्यार्थोपनिबन्धनम् । सापेक्षा ये तु वाक्यार्थाः पदार्थैरेव ते समाः ।।
।।

-- , -- 2-419--420) ------325 एवं पदपदार्थानामस्त्यत्वे वाक्यवाक्यार्थयोरखण्डयोरेव सत्यत्वे प्रतिष्ठापिते पदार्थानां स्वरूपस्य वाक्यार्थ एव निबन्धनमिति दर्शयितुमाह
एतस्मिन्म वाक्यार्थे रूपनिबद्धास्ते साफल्यं भजन्तेअन्यथा विशरारव एवेति वाक्यार्थ एव तेषां परस्परसमन्वये निबन्धनम् । वक्ष्यति च पृथग्विशिष्टतत्त्वानां पृथगर्थानुपातिनाम् । इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते ।। तथा पदानां सर्वैषां पृथगर्थनिवेशिनाम् । वाक्येभ्यः प्रविभक्तानामर्थवत्तर्ने विद्यते ।। (

इति । यथोच्यते
नहि किञ्चिदित्यादि । ननु वाक्यार्थस्यापि कस्यचिदपरिपूर्णत्वे किं तस्याप्यपरवाक्यार्थनिबन्धनत्वमङ्गीकार्यमित्याशङ्क्याहसापेक्षेति । एतदुक्तं भवति अवान्तरवाक्यार्थाः साकाङ्क्षत्त्वात् पदार्थतुल्या एवेति न तत्र वाक्यार्थव्यपदेशः कार्यः ।। ।।

326 वाक्यं तदपि मन्यन्ते यत्पदं चरितक्रियम् । आख्यातशब्दे नियतं साधनं यत्र गम्यते । तदप्येकं समासार्थं वाक्यमित्यभिधीयते ।।

।।

, -- --, , , --326 अथ यत्रैकस्मात् पदान्निराकाङ्क्षोऽर्थः प्रतियतेतत्रापि किं तस्याऽसत्यार्थत्वं युक्तमभिधातुमित्याशङ्क्याह
एतदुक्तं भवतिसन्ति वाक्येषु वाक्यैकदेशाः प्रसिद्ध्यादिना वाक्यार्थप्रत्यायका इति । तदप्येकपदं वाक्यमेव । यस्मात्तच्चरितक्रियमितिचरिता गार्भोकृता आख्यातक्रिया यस्य तद्गर्भोकृनक्रियापदं नामपदं वाक्यं प्रयुञ्जतेचरितक्रियापदादस्मादर्थावगतिर्निराकाङ्क्षोपजायमाना दृश्यत इतिपदमात्रस्यैवात्र वाक्यत्वम् । एवंयथानामपदं केवलमपिगर्भोकृताख्यातं निराकाङक्षार्थप्रत्यायनाद्वाक्यमेवेति तत्प्रत्यायितादर्थात् प्रवृत्तिपर्यन्तव्यवहारसिद्धौ सत्यतैव तदर्थस्य तथैवाख्यातं केवलमर्थौचित्यादिवशाद्विशिष्टाभिधायकं वाक्यमेवोच्यत इत्याहआख्यात इति । यथा वर्षतीत्युक्ते देवो जलमिति कर्तृकर्माक्षेपात् परिपूर्णार्थत्वे वर्षति देवो जलमिति यथा वाक्यमेवं तदप्येकं पदं समाप्तार्थं परिपूर्णार्थं वाक्यमेवाभिधीयते । तदुक्तमादावेव आख्यातशब्द इति वाक्यमित्यर्थः ।।
।।

327 शब्दव्यवहिता बुद्धिरप्रयुक्तपदाश्रया । अनुमानात् तदर्थस्य प्रत्यये हेतुरुच्यते ।।
।।

-- ?, , ----, ? 327 अत्र मीमासकः प्राह
केवलात् पदाद्या साधुवद्भावना बुद्धिः सा साधुवत्तदर्थस्य तस्याप्रयुक्तस्य पदान्तरस्य योऽर्थस्तस्य हेतुरुच्यते । कीदृशी शब्दव्यवहिता । यथा धूमेन स्वार्थानुमाने शब्दमन्तरेण वह्नेराक्षेपःनैवमत्रापि । (किन्तु) श्रुतार्थापत्त्या परिकल्पितो योऽसौ तिष्ठत्यादिशब्दःतेन व्यवहिता । अथ तस्याऽश्रवणात् कथं तदव्यवहितेत्याशङ्क्याह
अप्रयुक्तपदाश्रयेति । अप्रयुक्तमनुच्चारितं वाचकं श्रुतार्थापत्त्याक्षिप्तमाश्रयो द्वारमुपायस्तिष्ठत्याद्यर्थप्रत्यये यस्या सा तथेति । कस्मात्तदर्थस्य प्रत्यये हेतुरित्याहअनुमानादिति । तिष्ठत्यादिकं शब्दं श्रुतार्थापत्त्योपस्थापितमनुमायाक्षिप्यासौ बुद्धिस्तदर्थप्रत्ययमुपजनयतीति यावत् । अतो न केवलमेव नामपदं सक्रियस्यार्थस्य वाचकम्आख्यातं च ससाधनस्येति कथमुच्यते सन्ति वाक्येषु वाक्यैकदेशा वाक्यार्थप्रतिपादका इति ।। ।।

328 यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते । तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम् ।।
।।

-- , 328 श्रुतार्थापत्त्या शब्दाभिसम्बन्धस्य किं प्रयोजनमेकपदादेव तस्माद् वृक्षस्तिष्ठतीत्यादिवन्निराकाङ्क्षार्थप्रत्यायनमुक्तं कथं वाक्यैकदेशस्यसकलवाक्यार्थप्रतिपादकत्वमन्तरेण शब्दान्तरपरिकल्पनं युज्यत इति परमतमाशङ्क्याह
इह यस्मादुच्चरिताद् यदर्थप्रत्ययो दृश्यते तं तस्यार्थमाहुःवृक्ष इत्यस्मादेव चार्थप्रकरणादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतेः । एतदेवार्थवाचकत्वाद्वाक्यमित्युक्तमेव ।। ।।

329 क्रियार्थोपपदेष्वेवं स्थानिनां गम्यते क्रिया । वृत्तौ निरादिभिश्चैव क्रान्ताद्यर्थोऽवगम्यते ।।
।।

, -- ---- ", " 329 एवं कृत्वा क्रियार्थोपपदस्येत्यनेन नारम्भणीयैव चतुर्थीतातर्थ्येन सिद्धत्वादित्याह
क्रियार्थोपपदेषु विषये क्रियार्थोपपदानां चेति षष्ठीप्रयोगे सप्तमी । स्थानिनामप्रयुक्तानां धातूनां संबन्धिनी क्रियाहरणलक्षणा एधेभ्यो व्रजतीत्यत्रैधशब्द एव हरणमभिदधातीत्येधाहरणार्थं व्रजतीति प्रतीतिः । अतस्तादर्थ्यं स्फुटमेवेति सिद्धा चतुर्थी । एवं च कृत्वा वृत्तौ निरादयः क्रान्ताद्यर्थप्रतिपादका इत्याहवृत्ताविति । निष्कौशाम्बिरित्यादौ निरादय एव सामर्थ्यात् क्रान्तार्थप्रतिपादका इति गतार्थत्वात् क्रान्तादीनां शब्दानां वृत्तावप्रयोग एव । उक्तं च उपसर्गा ह्येवमात्मका यत्र क्रियावाची शब्दः श्रूयते तत्र क्रियां विशिंषन्तिअन्यत्र क्रियाविशिष्टं साधनमाहुः इति ।। ।।

330 तानि शब्दान्तराण्येव पर्याया इव लौकिकाः । अर्थप्रकरणाभ्यां तु तेषां स्वार्थो नियम्यते ।।
।।

, -- ? ---- --330 यद्येवं वृभस्तिष्ठतिनिष्क्रान्तः कौशाम्ब्या इत्यादौ तिष्ठत्यादीनां किं प्रयोगेण केवलं वृक्ष इत्यादिकं सर्वत्र नामपदमाख्यातं वा प्रयुज्यतां केवलैरेव सर्वत्र वाक्यार्थप्रतिपादनमित्याह
केवलो वृक्षशब्दो वाक्यार्थप्रतिपादकोऽन्य एव वृक्षस्तिष्ठतीति चान्यदेव वाक्यं सादृश्याद् वृक्षस्तिष्ठतीत्यत्र वृक्षशब्दं वृक्ष इत्येकपदे वाक्येऽभिमन्यत इति । भवत्वेवं सर्वदा वृक्षशब्द एव केवलः किं न प्रयुज्यते तत एव हि सामर्थ्यादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतेः किमनेन विततेन वृक्षस्तिष्ठतीत्यादिकेन प्रयुक्तेनेत्याहपर्यायेति । एतदुक्तं भवति
लौकिके शब्दव्यवहारे लाघवं प्रत्यनादरात् क्कचिद् वृक्षः क्कचिद् वृक्षस्तिष्ठतीति प्रयुद्यते । यथा तरुशब्देनैव लाघवाद् वृक्षार्थप्रतीतौ पादपशब्दं प्रयुञ्जत एव लौकिका इति न कञ्चिद् दोषः । अथ वृक्ष इति केवलं नामपदं क्कचिद्वृक्षो दृस्यतां क्कश्चिद् वृक्षोऽस्तीत्येवंविधस्य नियतस्यार्थस्य विशेषभेदेन कथं

प्रतिपादकं स्यादित्याहअर्थेति । एषामेकपदानां वाक्यानां प्रतिनियतोऽर्थोऽर्थप्रकरणाभ्यां व्यवस्थाप्यते ।। ।।

331 प्रतिबोधाभ्युपायास्तु ये तं तं पुरुषं प्रति । नावश्यं तेऽभिसंबद्धाः शब्दा ज्ञेयेन वस्तुना ।।
।।

-- ----331 एवमखण्डवाक्ये वाक्यार्थे सत्यरूपे स्थिते किं पदपदार्थानां वाक्यानां पदविभागपदभागार्थकल्पनयेत्याह
एतदुक्तं भवतिये वाक्यार्थप्रतिबोधनोपायास्ते प्रतिनियतपुरुषसमाश्रयाः । ते चासत्यरूपा एव च पदपदार्था इत्याहनावश्यमिति । ज्ञेयेन वाच्येन वस्तुना सत्यरूपेण लौकिकेन नैव तेऽवश्यं संबद्धा इत्यासत्यभूता इत्युच्यन्त इति ।। ।।

332 असत्यां प्रतिपत्तौ च मिथ्या वा प्रतिपादने । स्वैरर्थैर्नित्यसम्बद्धास्ते ते शब्दा व्यवस्थिताः ।।
।।

, , -- 332 अथ यस्मिन्नुच्चरित इत्यादिकं यदि शब्दार्थलक्षणमाश्रीयतेतदा शब्दादुच्चरितात् प्रतिपत्तुरन्याक्षित्तचित्तत्वादकृतसङ्केतत्वाद्वाऽसत्यामर्थप्रतिपत्तौ कुतश्चिद्भ्रमाद्वाऽन्यथाप्रतिपत्तौ तदर्थानवगतेरनित्यत्वमेव शब्दार्थसम्बन्धस्य स्यात्न चैतद्युक्तमिति श्रुतार्थापत्तिवादी प्रतिपादयितुमाह
ते ते शब्दा नित्यत्वाच्छब्दसम्बन्धस्य नियतार्थप्रतिपादका एव व्यवस्थिताः ।। ।।

333 यथाप्रकरणं द्वारमित्यस्यां कर्मणः श्रुतौ । बधान देहि वेत्येतदुपायादधिगम्यते ।।
।।

, -- 333 कुतश्चिन्निमित्तादर्थानवगतौ शब्दार्थसम्बन्धहानिः प्राप्नोतितस्मादेकपदेषु पदान्तराध्याहारेण वाक्यार्थावगतिरुपपन्नेति प्रतिपादयितुमाह
प्रकरणानतिक्रमेण साधनं क्रियाया अविनाभावितया आक्षेपकं भवतीति द्वारंद्वारमित्यत्र कर्मश्रुतिर्बधान देहि वेत्येतमर्थं
प्रकरणादेरुपायात्तद्वाचकद्वारेणाक्षिपतीत्येतदेव युक्तम् ।। ।।

334 यत्र साधनवृत्तिर्यः शब्दः सत्त्वनिबन्धनः । न स प्रधानभूतस्य साध्यस्यार्थस्य वाचकः ।।
।।

`-- एवं यस्मिन्नुच्चरिते' इत्यादिके शब्दार्थलक्षणे शब्दार्थसम्बन्धस्यानित्यत्वमभिधाय दूषणान्तरमभिधातुमाह

335 स्वार्थमात्र प्रकाश्यासौ साकाङ्क्षो विनिवर्तते । अर्थस्तु तस्य सम्बन्धी प्रकाशयति सन्निधिम् ।।
।।

, -- , 335 यस्मात् साधनवृत्ताभिधायी सत्त्वप्रधानः शब्दो न स एव प्रधानभूतस्या(र्थस्य प्रतिपाद्यस्यासत्तवभूतस्या) भिधायक उपपद्यतेविरोधात् ।
तस्मादिदमत्र वक्तुं युक्तमित्याह
असावाख्यातशब्दो नामशब्दो वा स्वार्थमेव केवलं प्रतिपाद्य सापेक्षः साकाङ्क्ष एव विनिवर्तते । तस्य विनिवृत्तस्य सम्बन्धी त्वर्थः । अर्थान्तरस्य तद्वाचकशब्दप्रकल्पनद्वारेण संन्निधिमुपकल्पयतितश्च वाक्यार्थप्रत्ययः परिपूर्ण उपजायत इत्येव युक्तमिति ।। ।।

336 परार्थ्यस्याविशिष्टत्वान्न शब्दाच्छब्दसन्निधिः । नार्थाच्छब्दस्य सान्निध्यं न शब्दादर्थसन्निधिः ।।
।।

-- , , , , ----, , --, ? , , 336 इदानीमखण्डवादी श्रुतार्थापत्तिवादिनं निराकर्तुमाह
इह पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र भोजनं बिना पीनत्वं देवदत्तस्यानुपपद्यमानं रात्रिभोजनं तद्वाचकशब्दपरिकल्पनद्वारेण गमयतीत्युच्यतेतदत्र किं शब्देन शब्द आक्षिप्यतेउतार्थेन शब्दःआहोस्विच्छब्देनार्थःउतार्थेनार्थ इति चतुष्टयी गतिः । तत्र शब्देन शब्दस्याक्षेपो न युज्यते; स्वार्थप्रतिपादन एव शब्दाक्षेपात् । तत्राहन शब्दाच्छब्दसन्निधिरिति । अथार्थेन शब्दाक्षेप इत्युच्यते तत्राहनार्थाच्छब्दस्य सान्निध्यमिति । नापि शब्दाक्षेपो युज्यते वाच्ये तु वाचकमाक्षिपतीति युक्तम् । अतोऽन्यशब्दार्थस्य शब्दान्तरस्य च वाच्यवाचकताविरहात् कथमर्थेन शब्दस्याक्षेपः । अथ शब्देनोच्चारितेन श्रुतार्थापत्तिपरिकल्पितशब्दवाच्योऽर्थ आक्षिप्यत इत्युच्यतेतदप्यनुपपन्नमित्याहन शब्दादर्थसन्निधिरिति । न शब्दाच्छब्दान्तरवाच्यस्यार्थस्य सन्निधिरुपपद्यते

वाच्यवाचकभावाभावादेवेति कथं शब्देनार्थस्याक्षेपः
अथार्थेनार्थोगम्यत इत्युच्यतेअनुमानमेवैतत्स्पष्टं भवतिन शब्दार्थस्यासावर्थ (न शब्दस्यासावर्थ) इति शब्दैकत्वमेव परित्यक्तं स्यत् । अत एवात्र चतुर्थपक्षप्रदर्शनमौचित्यं न जहातीति तन्निरासो न कृत एव । तस्मादेकपदेषु श्रुतार्थापत्त्या शब्दान्तराक्षेपे वाक्यार्थावगतिरिति यत्किञ्चिदेतत् । एकपदमेव शब्दान्तराभिसम्बन्धमन्तरेण प्रकरणादिवशात् तत्तदर्थप्रत्यायननिपुणमित्येव मन्तव्यम् ।।
।।

337 नष्टरूपमिवाख्यातमाक्षिप्तं कर्मवादिना । यदि प्राप्तं प्रधानत्वं युगपद् भावसत्त्वयोः ।।
।।

-- , , , . 337 पुनः श्रुतार्थापत्तिवाद्याह
द्वारं द्वारं कर्म इत्यत्र (द्वारम् इत्यत्र) कर्मपदेनैवाख्यातमसत्कल्पमाक्षिप्तं यद्यत्रोच्यतेतदा युगपत्परस्परविरुद्ध्योः सिद्धासिद्धयोरर्थयोरेकस्मिन् शब्दे प्रधानत्वेन वाच्यत्वमापतितम्न चैतत्परिदृष्टमपूर्वं यत्र साधनवृत्तिरित्यनेन यः सत्त्वप्रधानो नासावाख्यातार्थवाचक उपपन्न इत्युक्तम्इदानीं पुनः प्रत्ययस्य च विरुद्धार्थवाचकत्वमुच्यत इति विशेषः ।। ।।

338 तैस्तु नामसरूपत्वमाख्यातस्योपवर्ण्यते । अन्वयव्यतिरेकाभ्यां व्यवहारो विभज्यते ।।
।।

-- , --, , 338 सिद्धान्तवाद्याह
द्वारं द्वारमित्येतदा (द्वारमित्येतदा) ख्यातमेवनामपदसरूपं तु वर्ण्यते । अतश्चान्याख्यातवत् प्राधान्येन क्रियाया एतदपि नामपदसरूपं प्रतिपादकमेव । यद्येवं कथमस्माद् द्वितीया श्रूयत यत्याहअन्वयेति । भाण्डं भाण्डं पिधेहिद्वारं द्वारं पिधेहीत्यादावाख्यातस्य क्रियाभिधायत्वं परिदृष्टम्नाम्नो द्रव्यवाचकत्वमित्यन्वयव्यतिरेकाभ्यामन्यत्राप्येकपदे द्वारमित्यादौ सादृश्यात् साधनाभिधायित्वमेवेति भवत्येव द्वितीया ।। ।।

339 न चापि रूपात् सन्देहे वाचकत्वं निवर्तते । अर्धं पशोरिव यथा समर्थ्यात् तद्विकल्प्यते ।।
।।

-- --, 339 अथ द्वारं द्वारमित्यस्यानेकार्थवाचकत्वात् सन्देहे कथमस्य वाचकत्वं भवेदित्याह
रूपसादृश्येऽपि सामर्थ्यादिनाऽर्थनिर्णयो व्यवस्थाप्यत इत्याहअर्धमिति । अत्र पश्ववयवोऽर्द्धं देवदत्तावयवो वार्द्धं पशुस्वामिकमिति सन्देहः । तत्र किं सन्देहे वाक्यमवाचकमेवअर्थप्रकरणादिनाऽर्थस्तत्र कल्प्यत एव ।। ।।

340 341 सर्वं सत्त्वपदं शुद्धं यदि भावनिबन्धनम् । संसर्गे च विभक्तोऽस्य तस्यार्थो न पृथग्यदि ।।
।। क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता । चत्वारि पदजातानि सर्वमेतद्विरुध्यते ।।

।।

-- 340 - 341 चोदयति
स्पष्टोऽर्थः ।। ।।

342 वाक्यस्य बुद्धौ नित्यत्वमर्थयोगं च लौकिकम् दृष्ट्वा चतुष्ट्वं नास्तीति वार्तक्षौदुम्बरायणौ ।।
।।

-- 342 एतच्चोद्यं निराकर्तुमाह
वाक्यस्याखण्डस्य बुद्धौ प्रतिपत्तृबुद्धौ नित्यत्वं दृष्ट्वा तथा तस्यैवार्थेन प्रतिभालक्षणेन योगं संबन्धं दृष्ट्वा पदे तत्पदपरिकल्पनं पदार्थपरिकल्पनं च तत्रास्त्येव नैवोपपद्यत इत्याचार्यावाहतुः । अतोऽस्माकमेषा बिभीषिका यत्पदानां चतुष्ट्वं नोपपद्यत इति ।। ।।

343 व्याप्तिमांश्च लघुश्चैव व्यवहारः पदाश्रयः । लोके शास्त्रे च कार्यार्थं विभागेनैव कल्पितः ।।
।।

-- 343 यद्येवं किं शास्त्रेणेत्याह
पदाश्रयो वाक्याव्यवहारः शास्त्रेणोपदिष्टः सन् व्याप्तिमान् सकलसाधुशब्दपरिज्ञानहेतुर्विभागेन परिकल्पित इति किमत्रानुपपन्नम् ।। ।।

344 न लोके प्रतिपत्तृणामर्थयोगात् प्रसिद्धयः । तस्मादलौकिको वाक्यादन्यः कश्चिन्न विद्यते ।।
।।

-- , , , , , 344 अथ यदि पदपदार्थविभागः सर्वथैवासत्यभूतस्तत्कथं लौकिकानां तदाश्रयेण वृत्त्यादय इत्याशङ्क्याह
लोके प्रतिपत्तृणां सर्वाथा न सत्यार्थयोगादेव प्रसिद्धयो व्यवहारनिष्पत्तयःअसत्येनाप्युपयेन मरीचिकास्वपि जलप्रसिद्धिस्तेषां दृश्यते । अथवा रेखागवयवदसत्यनाप्यनेनोपायेन सत्यभूतवाक्यपरिज्ञानं भवत्येवसर्वथा न लोकस्यार्थं विना प्रवृत्त्यादयो न सन्तीति वक्तव्यम्कदाचित् सत्यागवयेन गवयार्थप्रतीतिरस्य जन्यतेकदाचिद् रेखागवयेनेति बोद्धव्यम् । यत एवं तस्माद्वाक्यात् सत्यभूतादखण्डाद्वाक्यार्थप्रत्ययो जन्यत इति न कश्चिदलौकिकः सत्यभूतः पदार्थः पदं वा विद्यतेउपपत्तिविरहादिति ।। ।।

345 अन्यत्र श्रूयमाणैश्च लिङ्गैर्वाक्येषु सूचिताः । स्वार्था एव प्रतीयन्ते रूपाभेदादलक्षिताः ।।
।।

-- , --345 ज्ञापकगम्यश्चार्थः सर्वत्र वाक्यादेवावगम्यत इत्याह
अक्ताः शर्करा उपदधातीत्यत्र तैलेन घृतेन वेति संदेहेऽन्यत्र तेजो वै घृतमिति घृतस्य स्तुतिरुपक्रान्तातयैतत्सूच्यतेऽभ्यञ्जनं घृतेनैपोपदिष्टमिति । अतोऽत्राक्ता इत्यादौ वाक्ये घृताक्ता उपदधातीति वाक्यार्थो ज्ञायत इति विज्ञेयम् । यद्यक्ता इत्यस्यैव घृताक्ता उपदधातीयर्थोऽवगतः किं ज्ञापकानुसारेणेत्याहरूपाभेदादलक्षिताः । अक्ताः शर्करा उपदधातीति वाक्ये रूपमविशिष्टं पश्यन्तो विशेषमवगन्तुमक्षमा इति लिङ्गानुसरणेनात्रार्थनिर्णयो व्यवस्थाप्यत इति वाक्येषु वाक्यैकदेशाः सन्तीत्येतदप्रमाणमेव ।।
।।

346 उत्सर्गवाक्ये यत्त्यक्तमशब्दमिव शब्दवत् । तद् बाधकेषु वाक्येषु श्रुतमन्यत्र गम्यते ।।
।।

-- , --? , , ? , , 346 अथ बाध्यबाधकभावं निर्णेतुमाह
उत्सर्गवाक्ये सामान्यलक्षणे उपक्रम एव यत्यक्तमपवादाक्रान्तं किं तत्र शब्देन परित्यक्तम्नेत्याहअशब्दमिवेति । बोधकविरहेणेव कथं त्यक्तम् शब्दवद् बोधकवदेव त्यक्तम्धातोः कर्मण्युपपदेऽण्प्रत्ययस्तावदेव बाधकानाक्रान्तधातुविषयमेवाण्प्रत्ययविधानमिति गम्यत एवअन्यथा त्वविशेषण प्रवृत्तावुत्तरकालमाकारन्तेभ्यः कथं निवार्यते अतस्तात्पर्यपर्यालोचनवशाद् बाधकानाक्रान्तधातुविषये भवतीति वाक्यार्थो ज्ञायत एवतदृर्शिन एतत्तत्काल एव नावधारितम्उत्तरकालं तु बाधकेषु वाक्येषु तच्छ्रुतं सदन्यत्र सामान्यलक्षणे वर्जितमिति गम्यते ।। ।।

347 ब्राह्मणानां श्रुतिर्दन्धि प्रक्रान्ता माठरं विना । माठरस्तक्रसम्बन्धात् तत्राचष्टे यथार्थताम् ।।
।।

-- , - 347 लौकिकेन दृष्टान्तेनैतदेव व्याख्यातुमाह
दधि ब्राह्मणेभ्यो दीयतामित्यत्र श्रुत्या माठरवर्जमेवात्र ब्राह्मणानां दधिदानमुपक्रान्तमिति बोद्धव्यम्उत्तरकालं तक्रं माठरायेत्येतत्तत्र यथार्थबाधक (बोधकं स्व)विषयपरिहारेणैवार्थवत्तां गमयतीत्येवं भिन्नवाक्यतासमाश्रयणेन तावदप्राप्त्यनुमानं बाध इति बोधव्यम् ।। ।।

348 अनेकाख्यातयोगेऽपि वाक्यं न्याय्यापवादयोः । एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ।।
।।

-- 348 इदानीमेकवाक्यतामेवाश्रित्योत्सर्गापवादयोर्बाध्यबाधकभावं दर्शयितुमाह

कैश्चित् प्राप्यापवादयोरुत्सर्गापवादयोराख्यातभेदेऽपि एकवाक्यतैवेष्यते भिन्नवाक्यतैव तत्कालं प्रतिभाति । वस्तुतस्त्वाकाङ्क्षायोग्यता संनिधिवाशादेकवाक्यतां गतं वाक्यं बोद्धव्यम् ।। ।।

349 नियमः प्रतिषेधश्च विधिशेषस्तथा सति । द्वितीये यो लुगाख्यातस्तच्छेषमलुकं विदुः ।।
।।

-- , , ------349 एवं सतीदं तत्र बोद्धव्यमित्याह
इको गुणवृद्धी इत्यादिको नियमः सार्वधातुकार्धधातुकयोरित्यस्य गुणविधेः शेषःतेन सहास्यैकवाक्यतायां सार्धथातुकार्धधातुकयोः परताऽङ्गस्येको गुणो भवतीत्येवं वाक्यार्थो ज्ञायतेअन्यथाऽङ्गस्येगनिकोः स्थाने गुणवृद्ध्योः प्रबृत्तयोरुत्तरकालं नियमेन किमत्र कृत्यम् । उक्तं चयो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यादिति । तथा प्रतिषेधोऽपि विधिना सहैकवाक्यतां गत्वा साफल्यं भजतीत्याहप्रतिषेधश्चेति । प्रतिषेधश्च विधिशेष एव तथा सति बोद्धव्य इत्यर्थः । अलुगुत्तरपद इत्यनेनोत्तरपदे परतो लुक्प्रतिषेध उच्यमानः सुपो धातुप्रातिपदिकयोरित्यस्य लुग्विधेरङ्गभावमुपगच्छन् वाक्यैकवाक्यतयाऽर्थप्रत्यायनं करोतीति बोद्धव्यम् । एतदेव दर्शयितुमाहद्वितीय इति । द्वितीयेऽध्याये य आख्यातो लुग्विधिस्तस्य षाष्ठिकं लुक्कप्रतिषेधं शेषमङ्गं विदुर्व्याख्यातार इति ।। ।।

350 निराकाङ्क्षाणि निर्वृत्तौ प्रधानानि परस्परम् । तेषामनुपकारित्वात् कथं स्यादेकवाक्यता ।।
।।

-- , , (350 अथ वाक्यभेदवाद्याह
निर्वृत्तौ विशेषपरिपूर्णतायां वाक्यानि निराकाङ्क्षाण्येव । अतः परस्परं ग्रधानानितान्यभिधीयन्तेनतेषामङ्गाङ्गिभाव इति । अतः पररपरमुपकार्योपकारकभावाभावात् कथं तेषां निष्प्रयोजनापेक्षा परिकल्प्यतेअतो) नैकवाक्यतेति पूर्वः पक्षः ।।।।

351 विशेषविधिनाऽथिंत्वाद् वाक्यशेषोऽनुमीयते । विशेषवन्नवर्त्येऽर्थे तस्मात्तुल्यं व्यपेक्षणम् ।।
।।

-- , --, 351 अथैकवाक्यवाद्याह
उत्सर्गवाक्यशेषः सर्वत्रानुमीयतेकस्मादित्यहविशेषविधिनेत्यादि । अन्यथा वाक्यान्तरवदविशेषण तस्य प्रवृत्तिः स्यात् । न चैतद्यक्तम्ततश्च निवर्त्ये प्रतिषेध्येऽर्थेऽपेक्षणमुपयुज्यत एव । तस्मात् तयोः परस्परापेक्षणं तुल्यमेवेति कृत्वाऽर्थपर्यालोचनावशेनाकाङ्क्षादिना परस्परसम्बन्धेनाङ्गाङ्गिभावापत्तवेकवाक्यतैव ज्यायसीत्युक्तम् ।। ।।

352 संज्ञाशब्दैकदेशो यस्तस्य लोपो न विद्यते । विशिष्टरूपा सा संज्ञा कुता च न निवर्तते ।।
।।

"" "" -- , ? -- , , , 352 उद्धारेण वाक्येषु वाक्यैकदेशाः सन्तीति चतुर्भिः प्रकारैर्निरूपितम् । अर्थप्रकरणाभ्यां यथा वक्ष इत्यादौ । प्रसिद्वेर्यथा वर्षतीत्यादौ । लिङ्गाद्यथा अक्ताः शर्करा इत्यादौ । आकाङ्क्षादिना वाक्यान्तरस्य सन्निधानाद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेत्यादौ । यथा च कर्मण्यण्आतोनुपसर्गे कःइत्यादौ । इदानीमपोद्वारसमाश्रयेण प्रसङ्गात् पदेषु पदैकदेशाः सन्तीति विचारयितुं प्रस्तौतिइह देवदत्तादयः संज्ञाशब्दाः स्थिताःतत्र कदाचिद्देवः कदाचिद्दत्त इति प्रयुञ्जाना दृश्यन्ते । तदेतत्कथमुपपद्यते यस्मात्तेषु संज्ञाशब्देष्वेकदेशास्तेषां लोपस्तावच्छास्त्रे न कुत्रचिदुपदिश्यते । उपदेशोऽपि तेन कर्तुं न पार्यत इत्याहविशिष्टरूपेत्यादि । यता लोके नियतवर्णानुपूर्वोकः पदसमुदायः संज्ञात्वेन विनियुज्यतेतदा तदन्तर्गता अवयवा विनियुक्ता एवयथा वृक्षः प्रचलन् सहावयवैः प्रचलतीत्याचारानुरोधेन किमसौ न्यूनवर्णा वाचिका भवतिसा हि नियतानु पूर्वोका परिपूर्णैव कृता न निवर्तते ।। ।।

353 संज्ञान्तराच्च दत्तादेर्नान्या संज्ञा प्रतीयते । संज्ञिनं देवदत्ताख्यं दत्तशब्दः कथं वदेत् ।।
।।

- -- , , 353 अथोच्यते दत्तशब्दादसौ सकला प्रतीता स्वसंज्ञिनं प्रत्याययतीत्याशङ्क्याहदत्तशब्दः स्वतन्त्रोऽन्य एव कस्यचित् संज्ञान्तरम् । तस्मात् कथमन्या देवदत्तेति संज्ञा प्रतीयते शब्दान्तरत्वादकृतसंङ्केतत्वाच्चेत्यभिप्रायः । नापि तद्वाच्यं संज्ञिनमवगमयितुमलं दत्तशब्द इत्याहसंज्ञिनमिति ।

दत्तशब्दस्यान्य एवं संज्ञी प्रत्याय्यस्तत्कथं शब्दान्तराभिधेयमसौ प्रत्यायेत् । तदेवं नियतवर्णानुपूर्वोकायास्तस्या लोपस्तावदेकदेशस्य नोपपद्यतेनापि दत्तशब्दाद्देवशब्दाद्वा तदेकदेशभूतदेवदत्तशब्दप्रतीतिरुपपद्यतेतत्रापि तद्वाच्यप्रतिपत्तिरिति यत्किञ्चिदेतत् ।। ।।

354 सर्वैरवयवैस्तुल्यं सम्बन्धं समुदायवत् । केचिच्छब्दस्वरूपाणां मन्यन्ते सर्वसंज्ञिभिः ।।
।।

-- 354 अत्र मतान्तरं दर्शयितुमाह
सर्वैरवयवैस्तुल्यमेव समकालमेव संज्ञिनः सम्बन्धः कथं समुदायवत् । यथा समुदायस्तस्य वाचकत्वेन नियुक्तः तथा तत्काल एव तदवयवा अपीत्यतस्तदेकदेशस्तस्य प्रत्यायनं करोतीति को दोषः ।। ।।

355 वर्णानामर्थवत्त्वं तु संज्ञानां संज्ञिभिर्भवेत् । सम्बद्धोऽवयवः संज्ञाप्रविवेके न कल्प्यते ।।
।।

-- --, , , 355 अत्र दूषणद्वयं दर्शयितुमाह
संज्ञानां ये वर्णास्तेषां संज्ञिनाऽर्थवत्त्वं प्राप्नोति । ततः स्वभिमतैकदेशवदेकोऽपि वर्णो वाचकऋ स्यात् । न चैतत्परिदृष्टम् । अपि च तदवयवः पृथग्वाचको नोपपद्यत इत्याहसम्बद्ध इति । योऽसौ भवता वाचकोऽवयव एकदेशः परिकल्प्यतेस संबद्ध एव वाचकत्वेन विनियुक्तःसमुदायाच्च तस्य प्रविवेके पृथग्भावे वाचकत्वं न कल्प्य (प) तेविलक्षणत्वात् ।। ।।

356 सर्वस्वरूपैर्युगपत् सम्बन्धे सति संज्ञिनः । नैकदेशसरूपभ्यस्तत्प्रत्यायनसम्भवः ।।
।।

-- , --, 356 एतदेवापरेण श्लोकेन प्रतिपादयितुमाह
युगपत् सर्वावयवस्वरूपैः सम्बन्धे नैकदेशास्तद्वाचका उपपन्नाःअथवा तदेकदेशास्ते न भवन्तीति प्रतिपादयितुमाहनैकदेशासरूपभ्य इत्यादि । एकदेशसरूपभ्य इत्युक्तम्। एकदेशसदृशास्ते दत्तादयःन पुनस्तदेकदेशा इति ।। ।।

357 एकदेशात्तु सङ्घाते कंषाञ्चिज्जायते स्मृतिः । स्मृतेस्तु विषयाच्छब्दात् सङ्घातार्थः प्रतीयते ।।
।।

-- 357 मतान्तरमाह
स्पष्टोऽर्थः ।। ।।

358 एकदेशात् स्मृतिर्भिन्ने सङ्घाते जायते कथम् । कथं प्रतीयमानः स्याच्छब्दोऽर्थस्याभिधायकः ।।
।।

-- , ? 358 एतन्निराकर्तुमाह
सदृशवस्तुसन्दर्शनात् स्मृतिरुपजायत इति प्रसिद्धम् । तत्र संङ्घाते भिन्नस्वरूपे कथं तस्मात् स्मृतिःकथं च तस्मात् प्रतीयमाना देवदत्तस्य संज्ञिनोऽभिधायक उपपद्यते प्रतीयमानस्य वाचकत्वेऽतिप्रसङ्गः स्यात् । श्रुतिपथमवतीर्णाः शब्दा वाचका इति प्रसिद्धम् ।। ।।

359 एकदेशसरूपास्तु तैस्तैर्लिङ्गैः समन्विताः । अनुनिष्पादिनः शब्दाः संज्ञासु समवस्थिताः ।।
।।

-- , 359 सिद्धान्तमाह
यदा तु समुदायः संज्ञात्वेन विनियुज्यतेतदैव तदन्तर्गतावयवसरूपा अपि संज्ञात्वेन विनियुज्यन्त इति तेष्वनुनिष्पादिन्ययेन सिद्धाः संज्ञात्वेन बोद्धव्या इति
।। ।।

360 साधारणत्वात् संदिग्धाः सामर्थ्यान्नियताश्रयाः । तेषां ये साधवस्तेषु शास्त्रे लोपादि शिष्यते ।।
।।

--, , -- , --, , ..."" 360 तदन्तर्गतावयवसरूपा अनुनिष्पादिन्यायेन विनियुक्ता अपि साधारणत्वात् संज्ञिनमभिधआतुमसमर्थाः । तथआ हिदेवशब्दो देवानां वाचकः कस्यचित् संज्ञिनोऽपितथा दत्तशब्दः क्रियाशब्दोऽपि संज्ञाशब्दोऽपितत्र कथं नियतस्य संज्ञिनस्तेभ्यः प्रतिपत्ति स्यादित्याशङ्क्य नियतार्थतामेषां समर्थयितुमाह
सामर्थ्यादिभिर्नियताश्रयाः संज्ञयभिधायका व्यवस्थाप्यन्तेतेषामनुनिष्पादिनामेव शास्त्रे लोपादिविधिप्रणालिकया साधुत्वमुच्यत इत्याहतेषामित्यादि । तेन देवदत्ते स्वतन्त्रः क्रियावाचकदत्तशब्दसाधारणो दत्तः संज्ञाशब्दः देवोऽपि संज्ञाशब्दोऽनुनिष्पादित्वान्न् तदन्तर्गतोऽपीति बोद्धव्यम् । एतदेव शास्त्रे लोपादिद्वारेणान्वख्यायतेयथात्तम्चतुर्थादनजादौ च लोपः पूर्वपदस्य चइत्यादि ।। ।।

361 तुल्यायामनुनिष्पत्तौ ज्ये द्रा घा इत्यसाधवः । नह्यन्वाख्यायकं शास्त्रे तेषु दत्तादिवत् स्मृतिः ।।
।।

-- , , 361 एतत्स्फुटीकरणायाह
समुदाये यथा पदान्यनुनिष्पादिन्यायेन तत्र विनियुज्यन्तेनैवमत्र समानायामप्यनुनिष्पत्तौ वर्णानां वर्णा विन्युज्यन्ते । अथश्च ज्येष्ठादिषु न ज्यादयो वर्णमात्रा वृद्धव्यवहारे साधवोऽभ्यनुज्ञायन्त इतिशास्त्रेऽप्यन्वाख्यायकेन तथा भूतानामनुगमः क्रियत इति बोद्धव्यम् । अतो नैते घादयो वर्णा मघादिवाच्येष्वर्थेषु वाचका इति ।। ।।

362 कृतणत्वाश्च ये शब्दाः नित्यं खरणसादयः । एकद्रव्योपदेशित्वात्तान् साधून् संप्रचक्षते ।।
।।

-- ? ? --, --, , 362 अथ पदेषु पदैकदेशाः सन्तीति विचारप्रस्तावे संज्ञाशब्दानां शब्दार्थसम्बन्धस्यानित्यत्वमाशङ्क्य समर्थयितुमाह
इह संज्ञाशब्दानां संज्ञिसम्बन्धात् प्राग्लक्षणयोग उत तदुत्तरकालम यदा प्राक् तदासौ न कस्यचित् संज्ञेति तन्निबन्धनं कार्यं कथं साय्त्
अत्रोच्यतेअत्र (यत्र) संज्ञासंज्ञिसम्बन्धात् संज्ञात्व तत्र लक्षणमिति । अथोत्तरकालं संज्ञात्वम् (अथोत्तरकालं लक्षणयोगः)तदा चाकृतणत्वोऽसौ शब्दः सम्प्रति णत्वं भजत इत्यनित्यत्वं शब्दानां स्यादित्याशङ्क्याहकृतणत्वा इत्यादि । इह द्वौ राशी कृतणत्वानामेको राशिर्नित्यएव
अकृतणत्वानामपर इति । तत्र ये कृतणत्वास्ते साधवो नित्या एवएकद्रव्योपदेशित्वात् स्वभावेनैव ते संज्ञाशब्दा इत्यथः । शास्त्रे पूर्वपदात् संज्ञायामगः' इत्यनेन कृतणत्वानामेव तेषां साधुत्वमन्वाख्यायत इति कृतणत्वता शास्त्रे प्रक्रियासमाश्रयणेनैषामुक्तेति न कश्चिद्विरोधः ।। ।।

363 गोत्रण्येव तु तान्याहुः संज्ञाशक्तिसमन्वयात् । निमित्तापेक्षणं तेषु स्वार्थे नावश्यमिष्यते ।।
।।

-- , 363 एतदेव प्रतिपादयितुमाह
संज्ञाशब्दकुलानि व्यवस्थितानिन तेषु स्वार्थे संज्ञिनि निमित्तान्वेषणमिष्यते नित्यत्वाच्छब्दार्थसम्बन्धस्य । तद्वाचकास्ते स्ववाच्ये नियता इति स्वरूपव्यतिरेकेण निमित्तान्तरान्वेषणमव्यापकमेव ।। ।।

364 व्यवहाराय नियमः संज्ञानां संज्ञिनि कचित् । नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ।।
।।

, -- "" , -- , -- "" o o 3-3-29) 364 ननु च नित्यत्वं संज्ञाशब्दानामनुपपन्नं सम्प्रति क्रियमाणत्वात्यस्मात्पुरुषेच्छया यथा कथञ्चिन्नियुज्य संज्ञाः क्रियन्ते । उक्तं च
कृतकत्वादनित्यत्वं सम्बन्धस्योपजायते । संज्ञायाः सा हि पुरुषैर्यथाकामं नियुज्यते ।।

यथा हि पांसुरेखाणां बालकैर्मधुरादयः संज्ञाः क्रियन्तेसंज्ञासु सर्वाष्वेषैव कल्पना इत्याशङ्क्य समर्थयितुमाह
संज्ञाशब्दानां कचित्संज्ञिनि यदि परं व्यवहारार्थं पुरुषैर्नियममात्रं क्रियते । यथाऽस्मिन् गृहेऽद्यप्रभृति डित्थशब्दवाच्योऽयमिति बोद्धव्यम् शब्दार्थसम्बन्धस्तु डित्थादिष्वनादिर्योग्यतालक्षणो नित्य एवयद्वक्ष्यति

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ।।
इति । (वा
प
तदेवं यथा गवादिष्वनादियोग्यतासम्बन्धाद्वाचकत्वं गोशब्दादीनां तथैव डित्थादीनां बोद्धव्यम् ।। ।।

365 वृद्ध्यादीनां च शास्त्रेस्मिञ्छक्त्यवच्छेदलक्षणः । अकृत्रिमोऽभिसम्बन्धो विशेषणाविशेष्यवत् ।।
।।

-- , , , , , 365 शास्त्रेऽपि तथैव व्यवहारनियमः संज्ञाशब्दानामवसातव्य इत्याह
शास्त्रे वृद्ध्यादीनां संज्ञाशब्दानां सर्वार्थप्रकाशनशक्तियोगः संज्ञिनामादैजादीनां च क्वशब्दवाच्यता योग्यताअतः केवलं शास्त्रे संज्ञान्तरादवच्छिद्यादैजादिप्रत्या यन एव शक्तिर्वृद्ध्यादीनां नियम्यतेआदैजादीनां वृद्ध्यादिशब्दवाच्यत्वमेव व्यवस्थाप्य इति सहजशक्तिप्रतिनियम एव वाच्यवाचकयोरुच्यतेन पुनः कृत्रिमसम्बन्धाधानं विज्ञेयम्यथा विशेषणाविशेष्ययोरनादिः शब्दवाच्यतात्मक ेव सम्बन्धःन पुनस्तत्र पुरुषेण नीलादियोगः क्रियत इति ।। ।।

366 संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी । काचित् प्रवर्तते काचिन्निमित्तासंनिधावपि ।।
।।

-- , 366 अथ संज्ञाप्रवृत्तिनिमित्तं विचारयितुमाह
सर्वसंज्ञाशब्दानां स्वरूपमेव प्रवृत्तिनिमित्तं बोद्धव्यम् । तस्मिन् सति कुत्रजिदर्थानुपात्तं निमित्तं विद्यतेकुत्रचित्तस्याभाव एव डित्थादाविति कैश्चित् तत्राप्युच्यत एव ।। ।।

367 शास्त्रे तु महती संज्ञा स्वरूपोपनिबन्धना । अनुमानं निमित्तस्य संनिधाने प्रतीयते ।।
।।

, -- , 367 न केवलं तत्रैकाक्षराणां स्वरूपमेव प्रवृत्तिनिमित्तं विद्यतेयावन्महतीनामपि स्वरूपमेवोपनिबन्धवं प्रवृत्तिनिमित्तं बोद्धव्यमित्याह
केवलं तत्र निमित्तस्यावयवार्थस्य संनिधाने सत्यनुमानं तत्सद्भावे प्रतीयतेअनुमानेनावयवार्थोऽपि तत्र निमित्तमिति प्रतीयत इत्यर्थः ।। ।।

368 आवृत्तेरनुमानं वा सारूप्यात्तत्र गम्यते । शब्दभेदानुमानं वा शक्तिभेदस्य वा गतिः ।।
।।

-- -----368 कथं तदनुमानमित्याह
स एक एव द्विरावर्तते तत एकेन स्वरूपनिरूपतसंज्ञिनः प्रतिपत्तिरपरेणावयवार्थनिबन्धानता व्यवस्थाप्यते । नन्वावृत्तिरनुमीयते किं यदि ह तत्र तवाभीष्टंस्याद् द्विधोच्चारणादित्याहसारूप्यादिति । सारूप्यादेक एवोच्चारतिः शब्दः इति गम्यते । अथवा तन्त्रेण द्वावेव शब्दावुच्चारितावित्यनुमीयत इत्याहशब्दभेदानुमानं वेति । तत एकेन स्वरूपाच्छादितसंज्ञिनः प्रतिपत्तिरपरेणावयवार्थनिबन्धनेति । तृतीयम पे पक्षं प्रदर्शयितुमाहशक्तिभेदस्य वा गतिरिति । स एवैको द्विशक्तिरुच्चारितस्तत एकथा संज्ञिनः प्रतिपत्तिरपरेणा (रपरया) वयवार्थसङ्गतिरिति ।। ।।

369 क्कचिद्विषयभेदेन कृत्रिमा व्यवतिष्ठते । संख्यायामेकविषयं व्यवस्थानं द्वायोरपि ।।
।।

, , -- , "" , ``--`369 इदानीं लौकिकस्याकृत्रिमस्य क्कचिद्ग्रहणंक्कचिद् कृत्रिमस्य पारिभाषिकस्यक्कचिदुभयगतिरिह शास्त्रे सम्भवतीत्युभयोरपि कृत्रिमाकृत्रिमयोः क्कचिदकृत्रिम एव व्याप्तेः परिगृहीत इतरस्यापि विषयं व्याप्नोतीति चातुर्विध्यं संज्ञाशब्दानां प्रदर्शयितुमाह
कृत्रिमा साश्त्रीया पारिभाषिक्युच्यते । सा विषयभेदेन व्यवतिष्ठतेन तु सर्वत्र तथैव व्यवसाथा । यथा कतेरि कर्मव्यतिहारेइत्यत्राकृत्रिमा गृह्यतेव्यतिहारस्यात्र कृत्रिमसंज्ञा (संज्ञायामा) श्रयणानुपपत्तेः । कर्मण्यण्' इत्यत्र कृत्रिमा शब्दवैरेत्यादावकृत्रिमा धात्वधिकारात्कृत्रिमाया अत्रानुपपत्तेः । कर्तृकरणयोस्तृतीया' इत्यत्र कृत्रिमेति क्कचिदेकत्रोभयरूपताया ग्रहणमिति दर्शयितुमाहसंख्यायामिति । संख्याविषये शास्त्रे कृत्रिमाकृत्रिमयोरपि समाश्रयणं शास्त्रीयाया बहुगुणवतुडती' त्यादिकाया अपि कृत्रिमाया लौकिक्या अथ (प्य) कृत्रिमाया विशंत्यादिकाया अतिशदन्ताया इति प्रतिषेधादत्र

ज्ञापकाद् ग्रहणम् ।। ।।

370 विषयं कृत्रिमस्यापि लौकिकः क्कचिदुच्चारन् । व्याप्नोति दूरात्सम्बुद्धौ तथाहि ग्रहणं तयोः ।।
।।

-- , `, 370 क्कचिदकृत्रिमः संज्ञाशब्दो गृहीतः कृत्रिमस्यापि प्रत्यायनं करोतीति प्रदर्शयितुमाह
लौकिकोऽकृत्रिमः संज्ञाशब्दः समुच्चरन् कृत्रिमस्यापि शास्त्रीयस्य विषयं व्याप्नोतियथा एकश्रुति दूरात् सम्बुद्धौ' इत्यत्र सम्बोधनं सम्बुद्धिरिति लौकिकेन शास्त्रीयमप्येकवचनं सम्बुद्धिरिति गृह्यत एवतत्रापि सम्बोधनस्य विद्यमानत्वादित्यर्थः ।। ।।

371 सङ्घैकशेषद्वन्द्वेषु केचित्सामर्थ्यलक्षणम् । प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते ।।
।।

-- , `? , 371 अथेदानीं वाक्यविचारप्रस्तावे क्कचित्प्रत्यकं वाक्यपरिसमाप्तिः क्कचित्समुदाय इति प्रदर्शयितुमाह
वाक्यवद्वाक्यार्थस्यापि प्रत्येकसमुदायपरिसमाप्तिवाक्यपरिसमाप्तिं प्रसङ्गान्मतभेदेन निरुपयति । तत्र वाक्यार्थस्य प्रत्येकपरिसमाप्तिरिति तावद्दर्शयतिगगसङ्घैकशेषद्वन्द्वेष्वित्यादिना । कदाचित्संघेनैकशेषेण द्वन्द्वेन वार्थप्रतिपादनं क्रियतेयथा ब्राह्मणा भोज्यन्तां ब्राह्मणो भोज्यता' देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् । अत्र ब्राह्मणकर्तृकाया भुजिक्रियाया वाक्यार्थभूताया प्रत्याश्रयमवस्थानं प्रतिजानतेऽभ्युपगच्छन्ति । कीदृशम सामर्थ्यलक्षणमितिसामर्थ्यं समर्थभावात्मकमग्रे निरुप्यमाणलक्षणं स्वरूपं (निरूप्यमाणं लक्षणं निमित्तस्वरूपं) यस्य तत्तथाविधं सामर्थ्यलक्षणत्वादित्यर्थः ।। ।।

372 भोजनं फलरूपाभ्यामेकैकस्मिन् समाप्यते । अन्यथा हि व्यवस्थाने न तदर्थः प्रकल्प्यते ।।
।।

-- , , , 372 अथ भुजिक्रिया कारकसमुदाय एव नाट्यक्रियावत् कि न समाप्यत इत्याह
इहैकेन पादप्रक्षालनमपरेणासनोपवेशनमपरेणान्नदानमन्येनान्ननिगरणमिति नैवं भुजिक्रिया निर्वर्तयितुमायातियस्मादसौ भुजिक्रिया फलेन तृप्तिलक्षणेन रूपेणान्नदानादीनां (णान्नादनादिना) चैकाधिकरणेन निर्वर्त्यतेतथाऽनाश्रयणेन (ऽनाश्रयणे च) भुज्यर्थानिष्वत्तेःभिन्नाधिकरणा सा स्वरूपं न प्रतिभजत इति प्रत्यक्षसंद्धमेव ।। ।।

373 अन्नादानादिरूपां च सर्वे तृप्तिफलां भुजिम् । प्रत्येकं प्रतिपद्यन्ते न तु नाट्यक्रियामिव ।।
।।

-- , , 373 एतदेव स्फुटयितुमाह
नियतस्वरूपा हि वस्तुगतयो दृश्यन्तेनास्यक्रियाऽनेकसाधनसाध्या सती फलवत्युपजायतेभुजिक्रिया त्वेकैककारकनिर्वर्त्येति वस्तुगतिः ।। ।।

374 पाद्यवत् सा विभागेन सामर्थ्यादवतिष्ठते । भुजिः करोति भुज्यर्थं न तन्त्रेण प्रदीपवत् ।।
।।

-- , 374एतदेव दृष्टान्तान्तरेण व्याचष्टे
श्राद्धकर्मणि ब्राह्मणेषु कर्त्रा यथा पाद्यमनेकाधिकरणं तदभ्यर्चनायोपकल्प्यतेतथैवेयं भुजिक्रिया सामर्थ्याद्वस्तुस्वाभाव्याद्विभागेनैवावतिष्ठत इति । नतु तन्त्रेण साधारण्येनासौ प्रदीपवदेकाधिकरणैव भुज्यर्थं तृप्तिलक्षणं करोति ।। ।।

375 दृश्यादिस्तु क्रियैकापि तथाभृतेषु कर्मसु । आवृत्तिमन्तरेणापि समुदायाश्रया भवेत् ।।
।।

-- , 375 अथ भुजिक्रियावदन्यासामपि क्रियान्तर (र) समाश्रयणेन समुदायपरिसमाप्तिमुपदर्शयितुमाह
देवदत्तयज्ञदत्तविष्णुमित्रा दृश्यन्तामित्यत्र दृशिक्रिया तथामूतेषु योग्यदेशस्थितेषु विषयेषु प्रत्येकपरिसमाप्तिं विना भुक्तिवन्नोपपद्यत इति नोत्यतेयुगपदेवात्र

दर्शनक्रियाधिगमफला समुदायमाप्नोतीत्यसौ समुदायाश्रया भवेत् ।। ।।

376 भिन्नव्यापाररूपाणां व्यवहारादिदर्शने । कर्तृणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ।
।।

, -- , , ----, 376 अथ पच्यादिक्रिया किं समुदायपरिसमाप्ताकिं वा प्रत्येकं समाप्तेत्याशङ्क्याह
देवदत्तः काष्ठैः स्थाल्यामोदनं पचतिविक्लिद्यतस्तण्डुलान् विक्लेदयतीत्यत्र भिन्नव्यापाररूपाणां कारकाणां दर्शनं भिन्नं प्रार्थनादिको व्यापारो भिन्नःस सम्भूय सङ्घादर्थस्य पाकक्रियालक्षणस्य साधको दृश्यते व्यहारादिदर्शन इति । व्यवहारः कश्चिन्नियतविषय एवोपयोगोऽत्राभिप्रतः । आदिग्रहणेन तदन्येषां परिग्रहः । तेषां दर्शनं समारम्भः प्रारम्भ इति यावत् । तस्मिन् सतीत्यर्थः । एतदुक्तं भवति
कर्तृस्था वा क्रिया भवति कर्मस्था वेत्यत्र पचिक्रिया कर्मणि समवेता न समुदाय इति केचित् । अन्ये त्वाहुःयद्यपि कर्मणि
समवेतातथाप्यधिश्रयणोपसर्जनविक्लित्तिरपि पचेरर्थ इत्यवान्तरक्रियान्याभावे प्रधानक्रियासमाश्रयणेन व्यावृत्तव्यापारस्याविशेषात् संभूय सर्वैर्निर्वर्त्यत इति समुदाय एव परिसमाप्यत इति ।। ।।

377 लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिङ्गस्य दर्शनात् । अर्थित्वादैक्षुभेदेन वृद्धिसंज्ञा समाप्यते ।।
।।

-- `, , --, , , ``, , `377 अथ शास्त्रे प्रत्येकं वाक्यपरिसमाप्तिमुपदर्शयितुमाह
वृद्धिरादैच्' इत्यत्र वृद्धिशब्दः प्रत्येकमादैक्ष्वर्थिषउ संज्ञात्वेन नियुज्यतेयस्माल्लोकेतथैक लक्ष्यं सिध्यतिआम्रगुप्तायनिःऐतिकायनिःऔपगव इति । तथा शास्त्रे प्रत्येकमादैचां वृद्धिसंज्ञा लिङ्गाद् दृश्यतेयथा प्रस्थेऽवृद्धमकर्क्यादीनाम्' मालादीनां च'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यत्र प्रस्थे उत्तरपदे
पूर्वपदमवृद्धमाद्युदात्तं भवतितदनन्तरंमालादीनामादिरुदातो भवतीत्युक्तम्यदि चैकैकस्य वृद्धिसंज्ञा तदा मालादीनां वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति मालादयो वृद्धा भवन्ति ।। ।।

378 शतादाने प्रधानत्वाद् दण्डने शतकर्मके । अर्थिनां गुणभेदेऽपि संख्येयोऽर्थो न भिद्यते ।।
।।

-- , , , , , --, 378 इदानीं क्वचित् समुदाये वाक्यपरिसमाप्तिरिति प्रदर्शयितुमाह
गर्गाः शतं दण्ड्यन्तामित्यत्र ज्ञतकर्मकं दण्डनं समुदाये परिसमाप्यते । अर्थिनश्च राजानो हिरण्येन भवन्तिन च प्रत्येकं दण्डयन्ति यस्माद्वाक्यार्थज्ञा राजानो विवेचयन्तियथात्र द्वे कर्मणी प्रधानमप्रधानं चेति । तत्र शतकर्मके दण्डने शतादानमेव प्रधानम् । यदि च प्रत्येकंशतकर्मदानं समाप्येत
तदा गर्गाः शतानि दण्ड्याः स्युः । ततश्च प्रधानकर्मणः स्वरूपभ्रंशो भवेत् । न च प्रधानार्थपरित्यागो युक्तः अतः संख्यान्तराश्रयणे विरोधो वाक्यस्य स्यात्वीप्सायां बाधप्राप्तेः । अत्र गुणभेदेऽपि दण्ड्यभेदेऽप्यप्रधानत्वात्तेषां नात्र प्रत्येकमपि त्वर्थिनां राज्ञां शतर्मकं दण्डनं समुदाय एवावतिष्ठत इति बोद्धव्यम् । एतदुक्तं भवति
प्रत्येकं वाक्यपरिसमाप्तिः समुदाये वाक्यपरिसमाप्तिरित्येतन्न राजाज्ञावशाद् व्यवस्थाप्यतेअपि त्वर्थतथाभावादिति न्यायसिद्धमेवैतद् वेदितव्यम् ।। ।।

379 संघस्यैव विधेयत्वात् कार्यवत्प्रतिपादने । तत्र तन्त्रेण सम्बन्धः समासाभ्यस्तसंज्ञयोः ।।
।।

-- --``--, --, 379 शास्त्रे प्रदर्शयितुमिदानीमाह
समासंज्ञाऽभ्यस्तसंज्ञा च समुदाय एव परिसमाप्यतेसह सुपा' उभे अभ्यस्तम्' इति च । अत्र समाससंज्ञाया अभ्यस्तसंज्ञायाश्च तन्त्रेण साधारण्येन समुदायस्यैव सम्बन्धः । कस्मादित्याहसङ्घस्यैव विधेयत्वादिति । यस्मादत्र सङ्घ एव विधीयते । पूर्वपदोत्तररूपे हि समाससंज्ञा विधीयते ।
तथाऽभ्यस्तमित्यत्र युगपद् द्वयोरभ्यस्तसंज्ञा विधीयते किञ्चित्कार्थं विधातुमिति । ननु समाससंज्ञायां कथं राजपुरुष इत्यादौ समुदायो विधीयते यावता नित्यत्वाच्छब्दार्थसम्बन्धानां तविधेयतानुपपत्तिरित्याशङ्क्याकार्यवत्प्रतिपादन इति । यदा कार्यवन्वाख्यानमिति पक्षः प्रतिपाद्यतेतदैतदुक्तमित्यर्थः
।। ।।

380 लक्षणार्था स्तुतिर्येषां कञ्चिदेव क्रियां प्रति । तैर्व्यस्तैश्च समस्तैश्च स धर्म उपलक्ष्यते ।।
।।

-इदानीं क्कचिदेकत्रैवोभयथापि वाक्यपरिसमाप्तिर्दृश्यत इति प्रतिपादयितुमाह

381 वृषलैर्न प्रवृष्टव्यमित्येतस्मिन् गृहे यथा । प्रत्यकं संहतानां च प्रवेशः प्रतिषिध्यते ।।
।।

-- 380 - 381 उदाहरणमाह
अत्र वृषलजातीयस्य प्रवेशनिषेधः क्रियते । तत्र चैकस्यापि वृषलत्पस्म सद्भावात् सामर्थ्यात् पृथक् समुदाये च प्रवेशनिषेधार्थः सम्पद्यत इति ।। ।।

382 सम्भूय त्वर्थलिप्सादिप्रतिषेधोपपादने । पृथगप्रतिषिद्धत्वात् प्रवृत्तिर्न विरुध्यते ।।
।।

-- , , 382 प्रकारान्तरेणोपदर्शयितुमाह
भवद्भिः समग्रैरेवाद्यप्रभृति राजोपसेवा न कार्यासमुद्गमनं वा न विधेयम्कृषिकर्म वा नानुष्ठेयमित्यत्र समुदाये प्रत्येकं वा निषेधे वाक्यस्य न प्रवृत्त्यनुपपत्तिः ।। ।।

383 व्यवायलक्षणार्थत्वादट्कुप्वाङादिस्तथा । प्रत्येकं वा समस्तैर्वाणत्वं न प्रतिषिध्यते ।।
।।

-- 383 अत्रापि शास्त्रीयमुदाहरणं दार्शयितुमाह
व्यवायो व्यवधानं तदुपलक्षणार्थत्वादट्कुप्वाङादिभिरिति प्रत्येकं समुदायेऽपि तेषां स्थितेर्व्यवायस्य सिद्धत्वात्तथैव णत्वं प्रर्वतत इति न कश्चिद् दोषः ।। ।।

384 अनुग्रहार्थ भोक्तृणां भुजिरारभ्यते यदा । देशकालाद्यभेदेन नानुगृह्णाति तानसौ ।।
।।

, -- , 384 इदानीं भुजिक्रियाया एकत्वानेकत्वविचारः । तत्रापि किमेकस्मिन् देशे काले पात्रेऽनुष्ठिता स्वरूपमासादयतिउत देशादिभेदनानुष्ठितेति विचारयितुमाह
देशकालाद्यभेदेनेति नात्र भुजेरनुग्रहार्थाया विशेषः कश्चित्उभयथापि तदनुग्रहस्य निर्वृत्तेरिति ।। ।।

385 पात्रादिभेदान्नानात्वं यस्यैकस्योपदिश्यते । विपर्यये वा भिन्नस्य तस्यैकत्वं प्रकल्प्यते ।।
।।

-- , , 385 अथास्या एकत्वानेकत्वे विचारयितुमाह
यस्य मते एकैव भुजिः तृप्तिलक्षणसमानफलत्वात् तस्य देशकालभेदात्नानात्वं स्वतस्त्वेकत्वमेव । कस्यचिन्मते तु भोक्तृभेदात् फलभेदे भुजिक्रियाभेद एव । तस्य विपर्यये पात्राद्यभेदादेकत्वं तस्या बोद्धव्यं स्वभावतस्तु भिन्नत्वमेवेति मतभेदः ।।।।

386 संहत्यापि च कुर्वाणा भेदेन प्रतिपादिताः । स्वं स्वं भोज्यं विभागेन प्राप्तं संभूय भुञ्जते ।।
।।

-- 386 किञ्च
देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यत्र सामर्थ्याद्भेदेग वाक्यार्थप्रतिपत्ताविच्छावशात् संभूय स्वं स्वं भोज्यं विभागेन प्राप्तं संभूय भुञ्जते ।। ।।

387 वीप्साया विषयाभावाद् विरोधायन्यसंख्यया । द्विधा समाप्त्ययोगाच्च शतं सङ्घेऽवतिष्ठते ।।
।।

-- , , , 387 अथ शतादानप्रधानत्वादित्येतत्प्रतिपाद्यस्यार्थस्योपपत्तिं प्रतिपादयितुमाह
यद्येकैकं शतं शतं दण्ड्येततदा वीप्साविषयोऽपहृतः स्यात्तथा शतकर्मकमत्र दण्डनं प्राधान्येन विधीयते । यदि तु प्रत्येकं शतदण्डनं प्राधान्येन विधीयतेप्रत्येकं शतदण्डने संख्यान्तरोपजननाच्छतसंख्या विरुद्ते । न चाप्यत्र द्विधा वाक्यं समाप्यते । यत एकेन प्रधानकर्मणः सम्बन्धोऽपरेण गुणकर्मणामिति वाक्यार्थज्ञैः पर्यालोच्य सङ्घ एव शतादानमवतिष्ठत इत्युच्यते ।।
।।

388 भुजिद्वन्द्वैकशेषाभ्यां यत्रान्यैः सह शिष्यते । तत्रापि लक्षणार्थत्वाद् द्विधा वाक्यं समाप्यते ।।
।।

, -- , 388 अथ भुजिक्रियायाः प्रत्येकं परिसमाप्तावपि यत्र देवदत्तयज्ञदत्तविष्णुमित्रैः सह भोक्तव्यमित्युच्यतेतत्र द्विधापि प्रत्येकं समुदाये च वाक्यार्थश्च परिसमाप्यत इत्याह
लक्षणार्थत्वादिति यस्मादत्र सह भोजनं सहैव वा तत्प्रतिषेध इत्येव तावल्लक्ष्यते । तत्र बहुभिः सह बोक्तव्यम् द्वाभ्यां त्रिभिर्वा न वेत्येतदत्राभिधीयते । एवं च सहैव भोक्तव्यं न वेति समुदाय एव विधिर्वा प्रतिषेधो वा विधीयतेकेवलं सह भोजनविधिस्तत्प्रतिषेधो वाऽभीष्ट इति प्रत्येकं समुदाये च वाक्यार्थोऽत्र समाप्यत इति बोद्धव्यम् ।। ।।

389 वाक्यान्तरणां प्रत्येकं समाप्तिः कैश्चिदिष्यते । रूपान्तरेण युक्तानां वाक्यानां तेन संग्रहः ।।
।।

-- 389 एवं वाक्यार्थाश्रयणेन प्रत्येकं वाक्यपरिसमाप्तिः समुदाये च वाक्यापरिसमाप्तिरिति प्रदर्शितम् । इदानीं वाक्यसमाश्रयणेन प्रतिपादयितुमाह
इहैकं यद्वाक्यं श्रुतं तेन वाक्यान्तराणां वाक्यरूपाणां संग्रहो लक्षणंप्रत्यायनमिष्यते । तानि वाचकानि । तस्मान्महावाक्यं प्रत्येकं समाप्यते । ततश्च तथैवर्थावगतिरिति ।। ।।

390 न वाक्यस्याभिधेयानि भेदवाक्यानि कानिचित् । तस्मिंस्तूच्चरिते भेदांस्तथान्यान् प्रतिपद्यते ।।
।।

-- , 390 अथ वाक्यान्तरणां कमेकमेव तन्महावाक्यमभिधायकमुच्यत इत्याशङ्क्याह
तस्मादुच्चरितादर्थप्रतिपत्तावर्थपर्यालोचनावशेनावान्तरवाक्यप्रतिपत्तिः सम्पद्यत इत्युच्यतेन पुनस्तेन तान्यभिधीयन्त इति ।। ।।

391 येषां समस्तो वाक्यार्थः प्रतिभेदं समाप्यते । तेषां तदानीं भिन्नस्य किं पदार्थस्य सत्तया ।।
।।

-- 391 अत्राखण्डवाक्यवादी प्रौढवादितया पदवादिमतं निराकर्तुमाह
प्रत्येकमखण्डस्यैव वाक्यार्थस्य परिसमाप्तेः पदार्थानाममुपयोगात् पदार्थकल्पना वृथैव ।। ।।

392 अथ तैरेव जनितः सौऽर्थो भिन्नेषउ वर्तते । पूर्वस्यार्थस्य तेन स्याद्विरोधः सह वा स्थितिः ।।
।।

-- , 392वाक्यवादी विकल्पयितुमाह
अथोच्यते पदार्थैरेव वाक्यार्थो जनितो भिन्नेषु वर्तते । पूर्वस्य तेन सह विरोधः सहानवस्थानलक्षणो वा स्यात्अथवा सहावस्थितिरिति द्वयी गतिः।।।।

393 सहस्थतौ विरोधित्वं स्याद् विश्ष्टाविशिष्टयोः । व्यभिचारी तु सम्बन्धस्त्यागेऽर्थस्य प्रसज्यते ।।
।।

-- , --393 तत्र सहस्थितौ चोद्यमाह
भेदसंसर्गौ विरुद्धावत्रानुषज्येयातामित्यर्थः । अथ पदार्थवाक्यार्थयोरत्र सहानवस्थानं यत्पूर्वः पदार्थो वाक्यार्थो वाक्यार्थे तत्र समाप्ते विनिवर्ततेतदायं दोष इत्याहव्यभिचारीति । वाक्यार्थफलानां पदानामुपात्तर्थपरित्यगे शब्दार्थसम्बन्धो व्यभिचार्यनित्यः प्राप्नोति । अतः प्रत्येकं वाक्यपरिसमाप्तिपक्षे सत्यभूतपदपदार्थासम्भव एव ।। ।।

394 एकः साधारणो वाच्यः प्रतिशब्दमवस्थितः । सङ्घे सङ्घिषु चार्थात्मा संनिधाननिदर्शकः ।।
।।

, -- --, ----"" (115) 394 अथ समुदायवाक्यपरसमाप्तिपक्षे किं समुदायार्थेन सङ्घ एवार्थवान् नावयवाःआहोस्वित्तदवयवा अपीति विचारयितुमाह सोऽर्थात्मा वाच्यः सत्यभूतो वाक्यार्थलक्षण एकोऽखण्डः प्रतिशब्दमवस्थितो बोद्धव्यः । यतोऽसौ साधारणः सर्वेषां वाच्यभूतः स्थितः । अथ तेष्वेव स्थितोऽसौ नेत्याहसङ्घिषु चेति । साधारणत्वात् समुदायेऽप्युच्यते तदवयवेष्वपीति । यदि प्रतिशब्दमवस्थितः
तत एकपदोपलम्भकाले किमित्यसौ नावगम्यत इत्याहसंनिधाननिदर्शक इति । इतरपदसंनिधानं निदर्शकं यस्यासौ तथाभूतः । यथोक्तं पुरस्तात् प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्ततेइति । अतः सकलपदोपलम्भकाले प्रतीयत इति न कश्चिद्दोषः ।। ।।

395 यथा साधारणे स्वत्वं त्यागस्य च फलं धने । प्रीतिश्चाविकला तद्वत् सम्बन्धोऽर्थे न तद्वता ।।
।।

-- 395 एतद् दृष्टान्तद्वारेण व्यक्तीकर्तुमाह
धने बहूनां साधारणे स्वत्वं स्वस्वामिभाव आत्मीयत्वं वा सर्वेषां त्यागस्य च दानलक्षणस्य फलम् । तदपि सर्वेषामस्माकं बहु धनमस्तीति । चेतसश्च प्रीतिनिर्वृत्तिलक्षणा साप्यविकला साधारणत्वादेव सर्वेषां भवति । तद्वत्तेनार्थेन समंकृत्वा तद्वातां सङ्घसघिनां सम्बन्धो बोद्धव्यः ।। ।।

396 वर्णानामर्थवत्तायां तैनैवार्थेन तद्वति । समुदायेन चैकत्वं भेदेन व्यवतिष्ठते ।।
।।

-- , , 396 इदानीमेतत्प्रसङ्गेन सङ्घातस्यैकार्थ्यात् सुबभावो वर्णादित्येतद् व्याख्यातुमाह
यदा वर्णा अप्यर्थवन्तः समुदायेऽप्यर्थवत्तातदा तत्रार्थवत्त्वस्य साधारण्येनैवैकत्वात् समुदायादेवैकत्वप्रतिपादनायैकवचनमुत्पद्यतेन प्रत्येकं वर्णेभ्य इति ।। ।।

397 एकेनैव प्रदीपेन सर्वे साधारणं धनम् । पश्यन्ति तद्वदेकेन सुपा संख्याऽभिधीयते ।।
।।

-- , 397 एतदेव दृष्टान्तप्रदर्शनपूर्वकं दर्शयितुमाह
सन्तमसे साधारणधनस्वरूपपरिज्ञानं यथैकेनैव प्रदीपेन सम्पद्यतेतद्वदत्रापि साधारणार्थवत्ताऽभिव्यक्तये एकेनैव सभुदायादुत्पन्नेन सुपा एकत्वलक्षणां संख्या समुदाया पगताऽभिधीयत इति न तपृथक् पृथक् सुबुत्पत्तिः ।। ।।

398 नार्थवत्ता पदे वर्णे वाक्ये चैवं विशिष्यते । अभ्यासात् प्रक्रमोऽन्यस्तु विरुद्ध इव दृश्यते ।।
।।

, -- , ? --, , 398 अत एवं साधारणैवासावर्थवत्ता एकेनैव सुपाऽभिहितातस्मादसौ वर्णपदयोरपि वाक्ये च भवन्तीति न विशिष्यते न पृथगभिधातुमुपयुज्यत इति बोद्धव्यमित्यभिधातुमाह
ननु पूर्वे वाक्यस्यैवार्थवत्त्वं महता प्रबन्धेन व्यवस्थापितम्पदान्यनर्थकान्येवाभिहितानि । वर्णानामर्थवत्वे कैव कथा इदानीं वर्णे पदे वाक्ये च समंकृत्वैवार्थवत्तोद्घोष्यत इति किमेतदुच्यत इत्याशङ्क्याहअभ्यासादिति । इह भिन्नान्यागमदर्शनानि लौकिकैश्चार्वागदर्शिभिस्तत्राभिनिविष्टैः परस्परं शास्त्राणां पृथक् पृथक् प्रक्रमाः परिपाटयो दृश्यन्ते विरुद्धा इवपरमार्थतस्तत्त्वं सत्यरूपमेकमविरुद्धमेव सर्वत्र स्थितमिति । अतश्च सर्वपार्षदत्वादेतदनुषङ्गात् कथञ्चिदाश्रितम्नैतावताऽभ्युपेतस्याखण्डपक्षस्य त्याग आयात इति बोद्धव्यम् ।। ।।

399 विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः । अर्थाभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते ।।

।।

-- , 399 इदानीं शब्दस्यार्थाभिधाने स्वव्यापारं विचारयितुकाम आह
इहैक एव शब्दो वह्वर्थः । स यदा वक्त्रः प्रतिनियत एवार्थे विनियुज्यतेतदा तमर्थं प्राशियतीति दृष्टम् । अतः शब्दस्यार्थप्रतिपादनयोग्यता उक्तिद्वारैवेत्याहुः ।। ।।

400 यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते । तथाऽभिसंहितः शब्दो भवत्यर्थस्य वाचकः ।।
।।

---- , --, ---"" 400 अथ किं स्वाभाविकः शब्दार्थसम्बन्धोऽथेदृशी दशामुपेतो यदमो शब्दा वक्तृविनियोगमुखप्रेक्षणसम्बन्धाः । इन्तैवंवादिना भवता विभूषितैववैयाकरणधुरेत्याशङ्क्यैतत्समर्थनार्थमाह
यथा सहजयैव योग्यतया चक्षुरिन्द्रियमर्थविषये दर्शनमुपकल्पयद् द्रष्टसम्बन्धि प्रणिधानमपेभतेअन्यथा सवेदा दशनोपजननप्रसङ्गात् ; तथैव शब्दः स्वाभाविकेनैव सम्बन्धेनार्थप्रत्यायकोऽप्यभिधातृसम्बन्ध्यभिसन्धानमपेक्षत एव । एतदुक्तं भवति
वाक्यानि स्वव्यापारे प्रतिनियतस्वार्थभाञ्जि भवन्त्यभिधेयार्थं प्रकाशयन्त्यभिधाख्यं स्वव्यापारं पुरस्कृत्यार्थप्रकाशनं कुर्वन्तीति बोद्धव्यम्स चाभिधाख्यो व्यापारः प्रयोक्तृसम्बन्ध्यभिसन्धाननिमित्तक इत्यभिसन्धानत्वेनोपचर्यते । यदाहतथाभिसंहितः शब्दोऽर्थस्य वाचको भवतीत्यभिसन्धानमेव ह्यत्र शब्दस्योक्तिलक्षणव्यापारतयाऽतिदिशति । यदा त्वभेदपक्षस्तदा वक्तुरन्तरुल्लसिता प्रतिभैवाभिसन्धइरूपा शब्दमयी भवती । स्पष्ट एवाभिसन्धानोक्तेरभेदनिर्देशः । अतः प्रचारश्चक्षुषोऽपि व्यापारः प्रणिधानात्मक एव उक्तिः करणविन्यासो न विना शब्दभावनाम्इत्यनुसन्धानकारणकः शब्दस्य स्वव्यापारोऽभिधाऽनुसन्धानमेव वा शब्दमयी भूतमभिधेति विज्ञयेम् ।। ।।

401 क्रियाव्यवेतः सम्बन्धो दृष्टः करणकर्मणोः । अभिधा नियमस्तस्मादभिधानाभिधेययोः ।।
।।

, -- , 401 ननु चाभिधानमभिधेयं सम्बन्धश्च तयोरित्येतावदेव सुप्रसिद्धम् यत्त्वत्र विनियोग उक्तिरभिसन्धानमभिधेत्येवंरूपस्य चतुष्कस्योपयोगः प्रतिपाद्यते तदप्रसिद्धमेवेत्याशङ्क्याह
इह कारकाण्ययः शलाकाकल्पानि परस्परमसम्बद्धान्येव तेषां च यथा क्रियाव्यवधानेन क्रियासमाश्रयणेन सम्बन्धो दृश्यतेतथैवाभिधानाभिधेययोर्वाच्यवाचकभावलक्षणः सम्बन्धोऽभिधाख्येन शब्दव्यापारेण नियम्यत इति नापूर्वमत्राभिहितमिति ।। ।।

402 बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु । यत्प्रयोक्ताभिसन्धत्ते शब्दस्तत्रावतिष्ठते ।।
।।

-- , 402 एतदेव स्फुटीकर्तुमाह
तथा च बहुष्वर्थेषु गवादिषु वस्तुष्वेकाभिधानेष्वेकशब्दप्रतिपाद्येषु शब्देषु च तत्रार्थषु सजातीयत्वादेकार्थकारिषु सन्निहितेषु सत्सु प्रयोक्ता यत्तत्रार्थरूपमभिसन्धत्तेऽभिसन्धानेन विनियोगेनाभिधाविषयीकरोतितत्रैवार्थे वाचकत्वेन शब्दोऽवतिष्ठते नान्यत्रेति स्फुटमेव परिदृष्टम् ।। ।।

403 404 आम्नायशब्दानभ्यासे केचिदाहुरनर्थकान् । स्वरूपमात्रवृत्तींश्च परेषां प्रतिपादने ।।
।। अभिधानक्रियाभेदादर्थस्य प्रतिपादकात् । नियोगभेदान्मन्यन्ते तानेवाकत्वदर्शिनः ।।

।।

-- , , , 403 - 404 प्रकरणान्तरेणाप्येतदेव स्फटयितुमाह
तथा चाम्नायशब्दा वैदिका अभ्यासवेलायां न कञ्चिदप्यर्थमभिदधतितदाऽनर्थकानेव तानाहुः । यदा त एव स्वरूपग्रहणाय शिष्याणां प्रतिपाद्यन्तेतदा स्वरूपप्रधानास्त इति तत्र तदर्था एवोच्यन्ते । यदा पुनः कुत्रचिद्याज्ञे कर्मणि नियोगभेदेनाभिसन्धानभेदेन त एव विनियुज्यन्तेतदा स्वव्यापारेणाभिधाख्येन तत्तर्थप्रतिपादकास्तदर्थनिष्ठाः सम्पद्यन्त इति स्फुटमेवाभिधेयव्यतिरिक्तोन्मज्जन्त्य भिधा प्रतिभात्येवेति न तदपह्नव उपपन्नः ।। ।।

405 तेषामत्यन्तनानात्वं नानात्वव्यवहारिणः । अक्षादीनामिव प्राहुरेकजातिसमन्वयात् ।।
।।

-- --405 एवमेकशब्ददर्शनेऽभिसन्धाननिमित्ताभिधालक्षणव्यापारसमाश्रयणेन शब्दस्य तत्तदर्थाभिधानं समुपपदितमिदानीं शब्दे भेदं समाश्रित्यैषां प्रकरणादिभिरेव तत्तदर्थप्रकाशनमुपपदयितुमाह
तेषां शब्दानां भेदवादिनो नानात्वमाहुः । केवलमेकजातिसमन्वयस्तेषां सादृश्यरूपोऽस्ति । उदाहरणमाहअक्षादीनामिवेति । यथाऽक्षादयः शब्दा भिन्ना एव स्थिताः । सादृश्यात्त्वभेदेनैव प्रतीयन्त इति ।। ।।

406 प्रयोगादभिसन्धानमत्पदेषु न विद्यते । विषये यतशक्तित्वात् स तु तत्र व्यवस्थितः ।।
।।

-- 406 अतश्च किमित्याह
प्रयोग उच्चारणम् । तस्मादन्यत्तेष्वभिसन्धानमुक्तिरभिधा नैव विद्यते । कथं तर्हि नियतमेवार्थमभिदधातीत्याह विषय इति । तत्र तत्र विषये नियतशक्तित्वाद्विभिन्नशक्तित्वादेव स शब्दस्तत्र तत्र व्यवस्थित इति ।। ।।

407 नानात्वस्यैव संज्ञानमर्थप्रकरणादिभिः । न जात्वर्थान्तरे वृत्तिरन्यार्थानां कथञ्चन ।।
।।

-- , --407 तथा भिन्नत्वं सादृश्येऽपि सत्यर्थप्रकरणादिभिर्निगृहीतार्थाभिधानादवगम्यत इत्याह
युक्तं चैतदन्यथैकत्रार्थान्तरवृत्तित्वं शब्दस्योपलब्धम्पुनस्तस्यैवान्यार्थत्वं कथमुपपद्यतेत्यभिधातुमाहनजात्वित्यादि ।। ।।

408 पदरूपं तु यद्वाक्यमस्तित्वोपनिबन्धनम् । कामं विमर्शस्तत्रायं न वाक्यावयवे पदे ।।
।।

-- , ----""(423) , , 408 इदानीं पूर्वोक्तग्रहणाय पुनरखण्डवाक्योपक्रमेण वाक्यवाक्यार्थनिर्णयं संक्षेपेण कर्तुमाह
योऽयमत्र विमर्शो विचारःकामं स पदे तदेकपदरूपमेव वाक्यं वाचकं तत्रोपपन्नः । कीदृशं तत्पदरूपं वाक्यमित्याहअस्तित्वोपनिबन्धनमिति । अस्तित्वमस्तिक्रिया वाक्यत्वे वाचकत्वे उपनिबन्धनं यस्य । यद्वक्ष्यतिअस्तित्वेनानुषक्तो वाइत्यादि । अथवा प्रकरणादिनास्तित्वोपनिबन्धनमित्येतच्चोपलक्षणं कदाचिन्नवृत्तयात्मतया चेति बोद्धव्यम् । तत्रैष विचारो यदुताभिधाव्यापारद्वारकं वाचकत्वं प्रतिनियतशक्तिकृतं चेतिन तु वाक्यावयवभूतेऽपोद्धारे परिकल्पिते पद इतितस्यार्थवत्ताविरहादित्यभिप्रायः ।। ।।

409 यथैवानर्थकैर्वर्णैर्विशिष्टार्थोऽभिधीयते । पदैरनर्थकैरेवं विशिष्टार्थोऽभिधीयते ।।
।।

-- , 409 तस्मात् स्फोटरूपमखण्डमेव वाक्यं निराकाङ्क्षं वाचकमभ्युपगन्तव्यमिति दृष्टान्तद्वारेणाभिधातुमाह
यथा त्वन्मते वर्णैरनर्थकैरभिव्यक्तो विशिष्टार्थः पदरूपः स्फोटात्मा वाचकोऽभिधीयतेएवं पदैरनर्थकैरभिव्यक्त एव विशिष्टार्थः स्फोटात्मा वाचकोऽभिधीयत इति ।। ।।

410 यदन्तराले ज्ञानं तु पदार्थेषूपजायते । प्रतिपत्तेरूपायोऽसौ प्रक्रमानवधारणात् ।।
।।

, -- 410 ननु पदार्थसम्प्रत्ययस्तत्रोपजायत एवपदानां त्वनर्थत्वे कथं तत्सद्भाव इत्याह
यदेतत्पदपदार्थज्ञानं विभ्रमरूपमन्तराले वाक्यवाक्यार्थप्रतिपत्तेरेवीपायभूतं बोद्धव्यम् । तस्मान्निरंशत्वेऽपि वाक्यवाक्यार्थयोः प्रक्रम एव प्रथमसमय एव रूपं तयोर्नावधार्यत इति ।। ।।

411 पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः । संसर्ग एव प्रकान्तस्तथाऽन्येष्वर्थवस्तुषु ।।

।।

-- , 411 एवं वाचकाश्रयणे प्रकारत्रितयमुक्त्वेदानीं वाच्यसमाश्रयणेन तथैव प्रतिपादयितुमाह
अनेन श्लोकेनान्विताभिधानसमाश्रयणेन संसृष्टं वाक्यार्थप्रदर्शनं क्रियते । तथा त्वभिहितान्वयवादिनः पूर्वपूर्वार्थानुगतः संसर्गो वाक्यार्थःअन्विताभिधानवादिनस्तूत्तरोत्तरपदार्थावगतः प्रथमतरमेव संसृष्ट एव । यदि परमत्र सन्निधानं निदर्शकं यस्येतीतिकर्तव्यतामात्रस्वरूपावगतावपेक्षन्त इति बोद्धव्यम् ।। ।।

412 अङ्गीकृते तु केषाञ्चित् साध्येनार्थेन साधने । आधारनियमार्थैव साधनानां पुनः श्रुतिः ।।
।।

, , 412 यदा केषाञ्चिन्मते तत्र साध्येनार्थेन साध्यार्थनिष्ठेन संसर्गेणेति यावत् । साधने उपकारलक्षणेऽङ्गीकृत आश्लिष्टेऽविनाभावितया स्वयमवधृते सति या तत्र वाक्ये साधनानां पुनः श्रुतिःसा नियमार्थैव बोद्धव्या कारकाणाम्यदि तत्र परमाधारनियमः क्रियत इति बोद्धव्यम् । इन्धनधारा करणशक्तिः स्थाल्याधारैवाधिकरणशक्तिरेवमन्यत्र ।। ।।

413 आधारनियमाभावात् तदाक्षेपो न विद्यते । सामर्थ्यात्सम्भवस्तस्य श्रुतिस्त्वन्यनिवृत्तये ।।
।।

-- , 413 तत्र निस्साधना क्रिया न भवतीति साधनमात्रमनियताधारमाक्षिप्तं न त्वाधारसहितमित्याह
साधनानामाधारनियमो नास्ति । करणादिशक्तयो हि नियताधारा दृश्यन्त इत्याधाराक्षेपः । तत्र साधनं नास्ति । सामर्थ्याद्यदि परं तस्य साधनस्य तत्र सम्भव एवाभ्यूह्यतेततः क्रियाधारा एताः साधनशक्तयः स्युरिति दण्डेन गामित्यादिका श्रुतिरन्याधारनिवृत्तये तासां पर्यवस्यतीति बोद्धव्यम् ।। ।।

414 क्रिया क्रियान्तरादि्भन्ना नियताधारसाधना । प्रक्रान्ता प्रतिपत्तृणां भेदाः सम्बोधहेतवः ।।
।।

-- --414 अथ क्रियां वाक्यार्थमाश्रित्याह
क्रियैव विशिष्टा सर्वत्र प्रथमतरमेव वाक्यार्थत्वेन प्रक्रान्ता क्रियान्तरादि्भन्नेत्यनेन विशेषकथनम् । एतदेव स्फुटीकर्तुमाहनियताधारसाधनेति । तत्र वाक्ये भेदानां विशेषाणां प्रयोगोऽसौ सम्बोधनोपायमात्रमिति बोद्धव्यम् ।। ।।

415 अविभागं तु शब्दभ्यः क्रमवद्भ्योऽपदक्रमम् । प्रकाशते तदन्येषां वाक्यं वाक्यार्थ एव च ।।
।।

-- 415 अथ स्वपक्षानुसारेण वाक्यार्थप्रदर्शनं कर्तुमाह
अक्रम एव निर्विभागः पानकरसादिवत् प्रतिभात्मको वाक्यार्थः स्फोटात्मकं च वाक्यमित्येकयोगक्षेमत्वादेवमुक्तम् वाक्यं वाक्यार्थ एव चेति ।। ।।

416 स्वरूपं विद्यते यस्य तस्यात्मा न निरूप्यते । नास्ति यस्य स्वरूपं तु तस्यैवात्मा निरूप्यते ।।
।।

-- , --, 416 इदानीमसत्योपाधिः सत्यरूपः शब्दार्थ इति विचारपूर्वकं निदर्शयितुमाह
यस्य वस्तुनः प्रत्यक्षादिप्रमाणपरिच्छिन्नस्वरूपं विद्यते नीलं पीतमितितस्य तावता नात्मा निरूप्यते न व्यवहारगोचरतां नीयते । एतदुक्तं भवतिपदार्थः पृथग्रूपः सन्नपि पङ्गुप्रायोऽसाविति व्यवहारपदवीं नेतुं वार्यतेससर्गस्य त्वन्वयात्मनः प्रधानस्य तदितरोपपत्तेः पदार्थो यावदुपायो द्वारमिति तन्निरूपणमेव साफल्यं भजत इति तस्यैव सत्यत्वं युक्तम् ।। ।।

417 अशब्दमपरेऽर्थस्य रूपनिर्धारणं विदुः । शर्थावभासरूपा हि शब्देभ्यो जायते स्मृतिः ।।
।।

--- , --, 417 अथ पदार्थासत्यत्वप्रतिपादनपूर्वकं तदाच्छुरितस्यैव संसर्गस्य वाक्यार्थत्वं परिघटयितुमुपक्रमते
अर्थस्य रूपनिर्धारणस्य स्वरूपपरिच्छेदोऽशब्द एवन तत्र शब्द उपायभावमुपयाति । तद्धि निर्विकल्पकैकसमधिगम्यमित्यर्थः । तर्हि शब्दस्य तत्र क्वोपयोग इत्याहअर्थावभासेत्यादि । अर्थप्रतिभाससदृशायां स्मृतावेव शब्दानामुपयोगःशब्दस्यार्थेन सह सुदूरमेव विप्रकर्षः । ततश्च कथं शब्दोऽर्थमभिदधीतेत्यसत्य एव शब्दार्थः पर्यवस्यति ।। ।।

418 अन्यथैवाग्निसम्बन्धाद्दाहं दग्धोऽभिमन्यते । अन्यथा दाहशब्देन दाहाद्यर्थः प्रतीयते ।।
।।

-- 418 अतश्चैतदेव बोद्धव्यमित्याह
यदि शब्देन यथावद् बाह्योऽर्थः प्रत्याय्येत तदा शब्दसन्निधापितोऽसौ तामर्थक्रियां कथं न कुर्यात् यतश्चाग्निसम्बन्धाद्दग्धो दाहमन्यथाऽनुभवति दाहशब्देन च दाहमन्यथाऽवगच्छतीति शब्दर्थयोर्नास्ति कश्चिद्वास्तवः समन्वय इति बोद्धव्यम् ।। ।।

419 पृथङ्निविष्टतत्त्वानां पृथगर्थानुपातिनाम् । इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते ।।
।।

-- , , , 419 तदेवं पदार्थो विपरीतख्यातिरुपोऽसत्ख्यातिस्वरूपो वा बोद्धव्य इति पदार्थस्यासत्यत्वमभिधाय तदाच्छुरितस्य वाक्वार्थस्य सत्यत्वं प्रतिपादयितुमाह
पृथङ्निविष्टं तत्त्वं स्वरूपं पार्थिवत्वादिना भेदेनअथवा प्रतिनयतस्थानसमाश्रयणेन निविष्टमभिव्यक्तं तत्त्वं स्वरूपं येषां तानि तथा तेषामिति तथा पृथक् पृथगर्थं शब्दादिलक्षणमनुपतन्ति विषयीकुर्वन्ति तच्छीलास्ते तथा तेषाम्यथा सत्यपि तपृथक्स्वभावे देहाद्विना कार्यं प्रातिस्विकं नोपकल्पतेतथैव पदानां केवलानां वाक्यव्यतिरेकेण स्थितानामर्थवत्ताविरहः परिदृश्यत इति ।। ।।

420 तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम् । वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ।।
।।

-- प्रकृतं योजयितुमाह

421 संसर्गरूपं संसृष्टेष्वर्थवस्तुषु गृह्यते । नात्रोपाख्यायते तत्वमपदार्थस्य दर्शनात् ।।
।।

-- , 421 वाक्यार्थस्वरूपं प्रतिपादयितुमाह
न पुनरत्र पृथक्पदार्थप्रतिभासावसरे तस्य तत्त्वमुपाख्यायते प्रकटीभवतियस्मात् पदार्थरूपाद्विलक्षणमेव वाक्यार्थस्वरूपं दृश्यत इति ।। ।।

422 दर्शनस्यापि यत्सत्यं न तथा दर्शनां स्थित्म् । वस्तुसंसर्गरूपेण तदरूपं निरूप्यते ।।
।।

, , , -- , 422 ननु च शशो नास्ति विषाणमस्तीतिवदप्रतीतिकं कथं सर्वमभिधीयतेपदपदार्थप्रतिभासः संवेद्यमानोऽपि नाभ्युपगम्यतेपदार्थोपहितो वाक्यार्थस्तु सत्यत्वेन निरूप्यत इत्याशङ्कय सर्वोपरि निरूपितमेव व्यवहारगोचरतामुपयातिन स्वरूपेणेति प्रतिपादयितुमाह
इह सर्वोपरि बोध एव पारमार्थिकस्तद्व्यतिरेकेणान्यस्य विचार्यमाणस्यानुपपत्तेः । स च यथा सत्यत्वेन स्वच्छत्वादिरूपतया स्थितो न तथा तद्बोधस्वरूपदर्शनं पदार्थप्रतिभासावसरे स्थितम् । तदवसरे विवस्तु संसर्गरूपेण नीलपीताद्युपसृष्टतया नीलबोधः पीतबोध इति तद्रूपविरहितमपि निरूप्यते । एवमेतत्संसर्गादिकं वस्तुसंसर्गरूपेण पदार्थोपहितं तथारूपं तद्रूपविरहितमपि निरूप्यत इति किमत्रापराद्धम् । तस्मात् सर्वथा केवलः पदार्थः पदं वाऽव्यवहार्यमेवअथश्चैतदसत्यमित्युच्यते ।।।।

423 अस्तित्वेनानुषक्तो वा निवृत्तयात्मनि वा स्थितः । अर्थोऽभिधीयते यस्मादतो वाक्यं प्रयुज्यते ।।
।।

-- वाक्यवाक्यार्थौ तु व्यवहार्यत्वात् सत्यभूतावित्यर्थप्रतिपत्तये वाक्यमेव प्रयुज्यत इत्याह

424 क्रियानुषङ्गेण विना न पदार्थः प्रतीयते । सत्यो वा विपरीतो वा व्यवहारे न सोऽस्त्यतः ।।
।।

-- 424 एतदेव स्फुटयितुमाह
अतो व्यवहारे केवलः पदार्थो नास्त्येवेति बोद्धव्यम् ।। ।।

425 सदित्येव तु यद्वाक्यं तदभूदस्ति नेति वा । क्रियाभिधानसम्बन्धमन्तरेण न मन्यते ।।
।।

, -- --425 यत्राप्येकमेव पदं सदित्येतन्निराकाङ्क्षायाः सत्तायाः प्रतिपादकम् तत्रापि तदभूतस्ति नाभून्नास्ति वेति क्रियापदसम्बन्धमन्तरेण परिसमाप्तार्थं न भवतीति सर्वथा केवलस्य पदमात्रस्य नास्त्यर्थवत्तेति प्रतिपदायितुमाह
तत्र च वाक्ये साध्यसाधने परस्परमविनाभाविनी अन्योन्यापेक्षके स्पर्धयैव व्यवस्थिते । तथा हिसाधनं यथा निष्क्रियं न भवतीत्याकाङ्क्षावशात् क्रियापेक्षकमुच्यते । तथा क्रियापि निः साधना न भवतीत्याख्यातपदप्रतिपाद्ये क्रियालक्षणे सत्त्वाभिधानेन विनाऽऽकाङ्क्षा न निवर्तत इति ।। ।।

426 आख्यातपदवाच्येऽर्थे साधनोपनिबन्धने । विना सत्तवाभिधानेन नाकाङ्क्षा विनिवर्तते ।।
।।

-- तत्र सा क्रिया साधनमाकाङ्क्षत्येवेति प्रतिपादयितुमाह

427 प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते । साध्यप्रयुक्तान्यङ्गनि फलं तस्याः प्रयोजकम् ।।
।।

-- , , --427 साधनमुपनिबन्धनं यस्याख्यानपदवाच्यस्यार्थस्य तस्मिंस्तथाभूते तस्मात् सत्त्वाभिधानेन विनाकाङ्क्षा न निवर्तते । साधनं हि सत्त्वाभिधायि । ततस्तदवतिष्ठते । किं कृस्तत्र गुणप्रधानभावस्तयोर्यदुच्यते साध्यस्यैव पूर्वं प्रविभाग इत्याशङ्क्याह
अर्थस्य वाक्यार्थलक्षणस्याख्यातप्रतिपाद्यस्य क्रियाप्रधानत्वात् क्रियैव प्रधान्यात् पूर्वं प्रविभज्यते न साधनानियस्मात् साध्यार्थं साध्य निष्पत्तये प्रयुक्तानि साधनानिअतोऽङ्गात् प्रधानभूतानि तानीति न तेषां तत्र प्रविभागः । एवं क्रियाप्रयुक्तानि बोद्धव्यानि । प्रसङ्गात् क्रियाया अपि प्रयोजकमाहफलं तस्याः प्रयोजकमिति । फलप्रयुक्ता क्रियाऽपीति फलापेक्षया क्रियाया अङ्गत्वं बोद्धव्यम् ।। ।।

428 प्रयोक्तैवाभिसन्धत्ते साध्यसाधनरूपताम् । अर्थस्य वाऽभिसम्बन्धकल्पनां प्रसमीहते ।।
।।

, -- 428 इदानीं सर्वोऽयं साध्यसाधनव्यवहारः काल्पनिकःतयोश्च साध्यसाधनयोः परस्परसम्बन्ध आपेक्षिक एव न वास्तव इति प्रतिपादयन् पुनरपि पदार्थासत्यत्वं व्यवस्थापयिमुमाह
इदं साध्यमिदं साधनं तयोश्चाभिसम्बन्धः सर्वमेतत्काल्पनिकम् । ततस्तत्त्वं च शून्यमेव प्रयोक्तृसमीहामात्रजीवितमिति यावत् ।। ।।

429 पचिक्रिया करोमीति कर्मत्वेनाभिधीयते । पक्तिः करणरूपं तु साध्यत्वेन प्रतीयते ।।
।।

, -- , , ? , 429 यदि हि वास्तवमेतत् स्यात्तदा वस्तुस्वभावस्य ब्रह्मणाऽन्यथाप्यकर्तुंमशक्यत्वाद् व्यवस्थितमेवैतद्भवेत्न च तथा परिदृश्यत इति प्रतिपादयितुमाह
देवदत्तः पचतीत्यत्र या पाकक्रिया प्राधान्येनोपलब्धासैव पचिक्रिया देवदत्तः करोतीत्यत्र कर्मत्वेनैव पक्तिः पाकक्रिया व्यवस्थापितापचिक्रियाकरणं तु प्राधान्ये मज्जद्रूपं प्रतिपादितमिति नैषा वस्तुगतिःसाधनसमुद्देशे च सर्वमेतद्वैवक्षिकमिति विस्तरेण प्रदर्शयिष्यति । तथा सम्बन्धस्यापि काल्पनिकत्वमेव वक्ष्यतीति नेह प्रतन्यज्यते ।। ।।

430 योऽसौ येनोपकारेण प्रयोक्तृणां विवक्षितः । अर्थस्य सर्वशक्तित्वात् स तथैव व्यवस्थितः ।।
।।

अथवाऽनेकशक्तिरर्थः स्थितोऽपि यद्यदुपकारवशाद् यथा प्रयोक्तृभिर्विवक्ष्यते तथैवात्मानमुपदर्शयतीत्याह

431 आराद् वृत्तिषु सम्बन्धः कदाचिदभिधीयते । आश्लिष्टो योऽनुपश्लिष्टः स कदाचित् प्रतीयते ।।
।।

-- , 431 तथा चेदमपि वस्तून्यनेकशक्तिखचितत्वात् सहन्त इति प्रदर्शयितुमाह
आराद्वृत्तिष्वतिदूरमपि विप्रकृष्टेषु पदार्थेषु कदाचित् परस्परसम्बन्धः संश्लेषोऽभिधीयतेकदाचित्तु य आश्लिष्टः सम्बद्धोऽपि सोऽनुपश्लिष्टोऽसम्बद्धो दूरत इति विवक्षावशात् प्रतीयते ।। ।।

432 संसृष्टानां विवेकित्वं संसर्गश्च विवेकिनाम् । नानात्मकानामेकत्वं नानात्वं च विपर्यये ।।
।।

-- , , , , 432 रूपान्तरमप्याह
एकत्वेऽपि च कल्पनावशान्नानात्वं वस्तूनां दृश्यते राहोः शिर इति यथानानात्मकानां च धवखदिरपलाशादीनामेकत्वमेकर्स्या बुद्धौ सङ्कलनरूपं दृश्यतेवनमिति यथा; विवेकिनां परस्परविलक्षणानां पदार्थानामयः शलाकाकल्पानां संसर्गो वाक्यार्थरूपो दृश्यतेयथा देवदत्तः काष्ठैरित्यादौ; संसृष्टानां च विभक्तत्वम्यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ । एषां बुद्ध्या सङ्कलितानां सतां पश्चाद्विभागेनावस्थापनं क्रियते ।। ।।

433 सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा व्यवस्थितम् । अत्यन्तयतशक्तित्वाच्छब्द एव निबन्धनम् ।।
।।

-- 433 तदेतत्कथमुपपद्यत इत्याह
सर्वशक्तिरर्थस्तेनतेन रूपेण निरूपतस्तत्तद्व्यपदेशपात्रं भवतीति नियतशक्तिभिः शब्दैस्तथा तथा व्यपदिश्यत इति स्थितम् । अथवा निरात्मक एवासत्यभूतोऽसाविति यथा यथा विवक्षया निरूप्यते तथा तथा अवस्थानमुपदर्शयतीति शब्दैस्तथैव व्यपदिश्यत इति बोद्धव्यम् ।। ।।

434 वस्तूपलक्षणं शब्दो नापकारस्य वाचकः । न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते ।।
।।

, -- इदानोमर्थस्वरूपं शब्दा नैव स्पृशन्तिकेवलं तत्र दूरविप्रकर्षेणार्थस्योपलक्षणभावेन स्थिता व्यवहारोपयोगितामुपयान्तीत्यभिधातुमाह

435 सम्बन्धिधर्मा संयोगः स्वशब्देनाभिधीयते । सम्बन्धः समवायश्च सम्बन्धित्वेन गम्यते ।।
।।

, , -- , , --" 435 शब्दार्थयोर्न बाच्यवाचकभाव उपपद्यतेतथा सति शब्दानामर्थस्वरूपं प्रकाश्यतामुपेयात्न च तथा दृश्यत इत्याह
संयोगशब्दात् संयोगोद्रव्ययोरिति यथावत्परिनिष्ठितस्वरूपःतत्र सम्बन्धइस्वभावः प्रतीयतेन च तस्य तद्रपम् । एवं समवायशब्दात् समवायः प्रतीयत इत्याहसम्बन्धः समवायःइत्यादि । सम्बन्धित्वेन सम्बन्धस्वरूपविरहेण समवाय इत्यस्मात् प्रतीयते । अथवा यदा संयोगशब्देनासौ सम्बन्धः स्वतन्त्रोऽभिधीयते तदा तत्र समवायः सम्बन्धत्वेन गम्यत इति यदा सम्बन्धत्वेन गम्यत इति पाठस्तदैवं योजनीयंम् ।। ।।

436 लक्षणाद् व्यवतिष्ठन्ते पदार्था न तु वस्तुतः । उपकारात् स एवार्थः कथञ्चिदनुगम्यते ।।
।।

-- 436 पदार्थानां स्वतो रूपं न किञ्चिद् व्यवतिष्ठते यथा यथा निरुप्यन्ते तथा तथात्मानमासादयन्तीत्याह
स एवार्थः केनचित् कथञ्चिदुपयोगादन्यथा व्यपदिश्यत इत्येवमनेकप्रपञ्चैरसत्यभूत एव पदार्थ इति संगृह्य व्यवस्थापितम् ।। ।।

437 वाक्यार्थे योऽभिसम्बन्धो न तस्यात्मा क्कचित् स्थितः । व्यवहारे पदार्थानां तमात्मानं प्रचक्षते ।।
।।

-- , 437 इदानीं वाक्यार्थस्तु सत्यभूत इति प्रतिपादयितुमाह
परस्पराभिसम्बन्धस्वरूपः पानकरसादिवदनिर्विभागोऽनंश एव यो वाक्यार्थस्तस्य क्कचित् पृथग्रूपतयात्मास्थितोऽवधारयितुं न शक्यत इति यावत् ।
पदार्थानां पुनरयः शलाकाकल्पानां व्यवहारावसरे तमात्मानं जीवितमिव प्रचक्षतेतद्वशत्तत्प्रतिपादितपदार्थोद्देशेन सर्वस्य कस्यचित् प्रवृत्तिनिवृत्तिसाफल्यात् ।
स चैकस्मिन् पदार्थे समुदाय एव वा परिसमाप्तो बोद्धव्यः ।। ।।

438 पदार्थे समुदाये वा समाप्तो नैव वा क्कचित् । पदार्थरूपभेदेन तस्यात्मा प्रविभज्यते ।।
।।

-- -, 438 अथवा नैवासौ क्कचित् परिसमाप्त इदं तदिति पृथग्रूपतयानुपलक्षणात् केवलं पदार्थसम्बन्धिना स्वरूपेणाखण्डस्य वाक्यार्थस्य स्वरूपं प्रतिपद्यते इति प्रतिपादयितुमाह
एतदुक्तं भवतिन पृथगेव श्रृङ्गग्राहिकतया (तस्य) स्वरूपं विवेक्तुं शक्यतेपरोपाधिद्वारकमेव सर्वदा तस्य निरूपणमवसातव्यमित्युच्यते ।। ।।

439 अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबन्धनम् । साकाङ्क्षावयवं भेदे तेनान्यदुपवर्ण्यते ।।
।।

-- , ? `439 एतदेव स्फुटीकरणमा (णाया) ह
तस्यान्वाख्यानाय यो भेदः पदार्थभेदोऽपोद्धियतेस तस्यैव प्रतिपत्तिनिबन्धनं बोद्धव्यः । अतः पदार्थानां भेदे क्रियमाणे सति तेनापोद्धृतेन पदार्थभेदेनान्यदेव पदार्थव्यतिरिक्तं वाक्यार्थस्वरूपमुपवर्ण्यते प्रकटीक्रियते । कीदृशम् साकाङ्क्षावयवम्' इति । भेदे सति साकाङ्क्षा अवयवाः पदार्थस्वरूपाः प्रतिपत्त्युपाया यस्य तत्तथाभूतमिति ।। ।।

440 अनेकशक्तेरेकस्य प्रविभागोऽनुगम्यते । एकार्थत्वं हि वाक्यस्य मात्रयाऽपि प्रतीयते ।।
।।

-- , , `--440 तथाभूतस्य च वाक्यार्थस्य नानाशक्तिखचितस्य निर्विभागस्योपाधिकृतः पदार्थद्वारकः प्रविभागो नानारूपत्वमनुगम्यते । प्रतीयते परमार्थतस्त्वेक एवासावित्याह
वाक्यस्य स्फोटात्मनो वाचकरूपस्यैकार्थत्वमेक एव निर्विभगास्वरूपो वाच्यार्थो यस्य तत्तथातस्य भावस्तत्त्वं प्रतीयतेकथम् मात्रयाऽपि'इति । यदा तस्य मात्रया नियतसंख्याकेनाल्पीयसा शब्देन योगोऽभिसन्बम्धो दृश्यते । यथोक्तम्इग्यण इति योगे स्थान्यादेशभावलक्षणो वाक्यार्थः स संप्रसारणमिति व्यपदिश्यते । अतः सम्प्रसारणमित्येवमेकसंख्येन लघीयस्त्वान्मात्रया व्यपदिश्यते तस्य योगो यदा न परिदृष्टस्तदैतदवगम्यते यदुतानंश एक एवाखण्डस्वरूपोऽसौ वाक्यार्थोऽन्यथा सम्प्रसारणमित्यनेनैकसंख्याकेन कथं युज्येत वक्तुम् ।। ।।

441 संप्रत्ययार्थाद् बाह्योऽर्थः सन्नसन्वा विभज्यते । बाह्यीकृत्य विभागस्तु शक्त्यपोद्धारलक्षणः ।।
।।

-- ", --`, , , , 441 तदिदं वाक्यार्थः सत्यरूपः पदार्थस्त्वसत्य एवेति निर्णोतम् । स च वाक्यार्थो बौद्ध एवाबहीरूप इति प्रतिपादयितुमाह
सम्प्रत्ययो बुद्धिर्विज्ञानमित्यनर्थान्तरम् । सम्प्रत्ययोऽर्थोऽभिधेयरूपो यस्यासौ तथा तथाभूतात्तस्माद्बौद्धाद्धाक्यार्थाद्वाह्यार्थः सन् बहीरूपतया विद्यमान एवाथवाऽसन्बहिरसत्यभूत एव विभज्यते विभागेनानुगम्यते व्यवस्थाप्यते । कथं कृत्वेत्याहबाह्यीकृत्य'इति । अबाह्य एवासौ बाह्यरूपतया प्रथतेविवेकानवधारणाद्दृश्यविकल्पैकीकारेण वाक्यार्थं प्रतिपद्य पश्चादसौ विभागेनानुगम्यत इति यावत् । विभागस्तत्र कीदृश इत्याहशक्त्यपोद्धारलक्षणः' इति । शक्तीनां पदार्थसम्बन्धिनीनामपोद्धारः पृथक्करणं लक्षणंयस्यासौ तथा । पदार्थशक्तयस्तस्मादपोदिध्रयन्त इत्यर्थः । अत्र तु बौद्धे वाक्यार्थे समाश्रिते शक्तीनां तत्राविद्यमानत्वात् तस्मादपोद्धारस्तासं कीदृशः स्यात् । ताः पदार्थव्यक्तयो न (तत्र) व्यवस्थिताः । यदि हि तत्र ताः स्ुःतदा ह्यतीतेऽवगतेऽर्थे

स्यादेवार्थक्रियावाप्तिः । तस्माद् बौद्धादर्थादन्यत्र बाह्य एवार्थेताः शक्तयो व्यवस्थिताःततश्च बौद्धादर्थादन्यत्र बाह्येऽर्थे विद्यमानमपि तासां रूपं निराकारेण विज्ञानेनोपलभ्यते । तस्माद्विज्ञानाकारस्य बाह्यस्य चार्थस्य शक्तित एकाकारेण विना व्यवहारो नोपपद्यत एवेति बाह्यीकृत्येत्युक्तम् । तथा चैकयोगक्षेमत्वाद् बौद्धार्थबाह्यार्थयोर्युक्तो बौद्धेऽप्यर्थे शक्त्यपोद्धारलक्षणो विभागः । तत्र यदि विज्ञानाकारस्य विकल्पवासनामाहात्म्याद् बाह्येनैकीकृतस्य सत्यतो बहिरर्थोऽस्तियेनोपजन्यते ; तदा बाह्य एव शब्दार्थःन चेदसन्नेव बहिर्बौद्ध एव शब्दार्थ इति निर्णयः ।। ।।

442 बहुष्वपि तिङ्न्तेषु साकाङ्क्षेष्वेकवाक्यता । तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान् ।।
।।

-- 442 अथ वाक्यविचारप्रस्तावे वाक्यानामेकवाक्यात्वं वा वाक्यनानात्वमेववाक्यत्वं वा इति मतभेदेन प्रतिपादयितुमाह
इह वार्त्तिककारेणाख्यातं साव्ययकारकविशेषणं वाक्यमित्यत्रैकवचनस्य विवक्षितत्वादेकतिङिति वाक्यलक्षणान्तरप्रतिपादनादनेकाख्यातसद्भावे वाक्यभेद एवेष्यते सूत्रकारेण त्वतिङ् इति प्रतिषेधोपादानसामर्थ्यात् सत्स्वपि बुहषु तिङन्तेष्वर्थस्य साकाङ्क्षत्वात् तत्रैकवाक्यतैवेष्यत इति प्रदर्शितं बहुष्वपीत्यनेन
।। ।।

443 एकतिङ् यस्य वाक्यं तु शास्त्रे नियतलक्षणम् । तस्यातिङ्ग्रहणेनार्थो वाक्यभेदान्न विद्यते ।।
।।

-- 443 वार्त्तिककारमतेन वाक्यभेदस्तत्रेत्युपदर्शयितुमाह
नियतलक्षणमिति विवक्षितैकत्वमित्यर्थः ।। ।।

444 तिङन्तान्तरयुक्तेषु युक्तयुक्तेषु वा पुनः । मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः ।।
।।

-- , --, 444 केषाञ्चित् पुनरनेकाख्यातसद्भावेऽपि वाक्यार्थस्य भेदाभेदौ व्यवस्थितावेवेत्याह
इह मृगः पश्यत यातीत्यत्र तिङन्तान्तरसद्भावाद्वाक्यभेद एवतथा च मृगशब्दस्य यातीत्यस्य च सम्बन्धादेकं वाक्यम् । अनन्तरं विभक्तिविपरिणामेव कर्मपदेन प्रत्यवमर्शादेतं मृगं पश्यतेति द्वितीयं वाक्यम् । अन्यस्त्वाह
युक्तयुक्तत्वाद् बहुष्वप तिङन्तेष्वभेद एव । तथा ह्यत्र मृगशब्देन यातिपदस्य योगःतद्युक्तेन यातिपदेनाख्यातान्तरस्य योगः । तेनात्रपदेनाख्यातान्तरस्य योगः । तेनात्र मृगकर्त्तृकं सरणं पश्यतेति दृशिक्रियापेक्षयाप्येकतिङित्यत्रैकतिङ्त्वं प्रधानतिङन्तापेक्षया प्रतिपाद्यमानं सूत्रकारमतानुगुण्यं भजत एवेत्यनयोर्नास्ति मतभेदः । तदपरेषां मतभेद एव बोद्धव्यः ।। ।।

445 इतिकर्तव्यताऽर्थस्य सामर्थ्याद्यस्य काङ्क्ष्यते । अशब्दलक्षणाकाङ्क्षं समाप्तार्थं तदुच्यते ।।
।।

, , -- , , , , 445अथ वाक्यपरिसमाप्तिज्ञानपूर्विका नानावाक्यतैकवाक्यता वाज्ञातुं शक्यानान्यथेत्यशङ्क्य शब्दलक्षणा
वाक्यपरिसमाप्तिर्बोद्धव्यानार्थलक्षणेत्यत्र साकाङ्क्षत्वानाकाङ्क्षत्वविचारमाह
अविद्यमाना शब्दलक्षणा शब्दाश्रितां आकाङ्क्षा यस्मिंस्तद्वाक्यं समाप्तार्थमुच्यते । तदवगतस्यार्थस्य तु यत्र सामर्थ्यादर्थतथाभावलक्षणात् तदीयायामितिकर्तव्यतायामाकाङ्क्षा जायतेतावता न तत्र तद्वाक्यमपरिसमाप्तमित्युच्यत इति बोद्धव्यम्यथा व्रीहयो बहवोऽवहन्यन्तामित्यत्र शब्दापेक्षा तावन्नास्त्येवव्रीहीणां त्ववहननमुलूखलमुसलकर्मकर्त्रादिसन्निधानमन्तरेण न सम्पद्यत इति तदपेक्षणाद्वाक्यं नात्र परिसमाप्तमिति न युक्तं वक्तुम्शब्दलक्षणापेक्षाऽयोगादिति ।।।।

446 तत्त्वान्वाख्यानमात्रे तु यावानर्थोऽनुषज्यते । विनाऽपि तत्प्रयोगेण श्रुतेर्वाक्यं समाप्यते ।।
।।

, 446 व्रीहीणामवहननमात्रमत्रान्वाख्यायतेतस्मिंश्च सति उलूखलादिसन्निधानं यदत्रानुषज्यते तस्य प्रयोगेण शब्देन प्रतिपादनेन विनाऽपि तत्र तद्वाक्यं श्रुत्या शब्दव्यापारेण समाप्तमेवेति बोद्धव्यम् ।। ।।

447 चङ्क्रम्यमाणोऽधीष्वात्र जपंश्चङ्क्रमणं कुरु । तादर्थ्यस्याविशेषेऽपि शब्दाद्भेदः प्रतीयते ।।
।।

-- , , , 447 इदानीमर्थप्रत्यायनाभेदेऽपि शब्दवृत्तेन गुणप्रधानरूपतयाऽभिधानं शब्देषु सम्भवतीति प्रसङ्गाच्छब्दधर्मप्रतिपादनं कर्तुमाह
चङ्क्रम्यमाणोऽत्र जपं कुरु अथवा जपंश्चङ्क्रमणं कुर्वित्यत्र उभयथा जपविधिः प्रतीयतेकेवलं चङ्क्रम्यमाणो जपेत्यत्र जपः प्राधान्येनाभिधीयतेचङ्क्रमणं गुणवृत्त्या; जपश्चङ्क्रमणं कुर्वित्यत्र तु जपस्य गुणभावःप्राधान्यं तु चङ्क्रमणस्य । अथवोभयथाऽपि जपयुक्तत्वाच्चङ्क्रमणस्यार्थभेदो न कश्चित् । शब्दप्रतिपादनवैलक्षण्यमात्रमेवावसीयत इति ।। ।।

448 फलवन्तः क्रियाभेदाः क्रियान्तरनिबन्धनाः । असंख्याताः क्रमोद्देशैरेकाख्यातनिदर्शनाः ।।
।।

-- "", "" -"" , , -"" , , 448एवमर्थाभेदेऽपि शब्दप्रतिपादनवैचित्र्यमुपदर्शितमिदानीं शब्दभेदात् सामर्थ्यादर्थप्रतिपत्तिवैचित्र्यं भवतीत्यत्राशाब्दमपि व्यापारं प्रदर्शयितुमाह
यावज्जीवमग्निहोत्रं जुहोतितथा यजते देवदत्तःइत्यादावेकाख्यातनिदर्शनाः ेकमाख्यातपदं निदर्शनं वाचकं येषां ते तथाभूताः क्रियाभेदा प्रतीयन्ते । भेदश्च स्वरूपेण फलेन च भवतीत्याहफलवन्तःइतिफलभेदवन्त इत्यर्थः । स्वर्गकामः कदाचिद् यजतेकदचिद्धस्तिकामः कदाचिप्तुत्रकामो धनकामो वेति । फलभेदस्वरूपमाहक्रियान्तरनिबन्धनाःइति । इतिकर्तव्यतायां क्रियान्तराणि निबन्धनं येषां ते तथाभूताः । किं च बहुनाक्रमेण प्रातिस्विकेनेतिकर्तव्यतयोद्देशेन फलस्वरूपेण च ते संख्यातुमशक्या एवक्रियाभेदास्तेनाख्यातेनैकरूपेणाभिन्नेनैव निदर्श्यन्त इति बोद्धव्यम् ।। ।।

449 निवृत्तभेदा सर्वैव क्रियाऽऽख्यातेऽभिधीयते । श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना ।।
।।

-- , 449एतदेव स्फुटीकृत्य प्रतिपादयितुमाह
आख्यातपदे क्रिया सर्वैव निवृत्तभेदा सामान्येनाभिधीयतेयस्माच्छ्रुतिमात्राच्छब्दमात्रात् सामान्येन श्रुताद्भेदानां प्रविभागरूपताऽवसातुमशक्या ।।।।

450 अश्वमेधेन यक्ष्यन्ते राजानः सत्रमास्ते । ब्राह्मणा इति नाख्यातरूपाद्भेदः प्रतीयते ।।
।।

-- , 450 उदाहरणमाह
अत्र फलसाधनभेदाद् यजिक्रियायाः सत्यपि भेदे नैवाख्यातशब्दात् तत्प्रतीतिरस्तिअर्थसामर्थ्यात्तु भेदस्तस्या अवगम्यते इति नाना शब्दधर्माः ।। ।।

451 सकृच्छ्रुता सप्तदशस्वनावृत्तापि या क्रिया । प्राजापत्येषु सामर्थ्यात् सा भेदं प्रतिपद्यते ।।
।।

-- 451 वैदिकमप्युदाहरणमाह
सप्तदश प्राजापत्यानेकवर्णानजांस्तूपरानालभतेत्यत्रानावृत्ताप्यालम्भनक्रिया सकृच्छ्रुता शब्देनानावृत्तेनैकेनावगतोत्तरकालं त्वालभ्यभेदाद्भेदेनावतिष्ठत इति बोद्धव्यम् ।। ।।

452 देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठते । प्रतिस्वतन्त्रं वाक्यं वा भेदो न प्रविभज्यते ।।
।।

-- `" 452 यस्माच्चाख्यातान्तर्गतो धातुर्निवृत्तभेदाया एव क्रियायाः प्रतिपादकः तस्माद् भेदासम्भवाद् यथासंख्येन सम्बन्धानुपपत्तेर्भुजिक्रिया देवदत्तादिषु प्रत्येकमवतिष्ठत इत्याह
देवदत्तादिकर्तृका भुजिर्वाक्यार्थरूपाऽत्र प्रत्येकमवतिष्ठत इत्यर्थसमाप्तिदर्शनं शब्दस्य समाप्तिमप्युपदर्शयितुमुक्तम् प्रतिस्वतन्त्रम्इत्यादि । वाक्यमेवात्र प्रत्येकं देवदत्तादिषु भेदेनावतिष्ठत इति बोद्धव्यम् ।। ।।

453 उच्चारणे तु वाक्यानामन्यद्रूपं निगृह्यते । प्रतिपत्तौ तु भिन्नानामन्यद्रूपं प्रतीयते ।।
।।

, -- 453 ननु देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यभेदरूपमेव वाक्यं प्रयुक्तम्अतः कथमस्माद् भेदेनावसायः स्यादित्याह
शब्दानामन्यथोच्चारणसमये स्वरूपवृत्तिः प्रतिपत्त्यवसरेत्वन्यथैव स्वरूपावसाय इति सत्यप्याख्यातस्याभेदेऽर्थपर्यालोचनेनात्र प्रत्येकं समाप्तिर्वाक्यवाक्यार्थयोः पर्यवस्यतीत्युच्यते ।। ।।

454 एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते । कर्तरीति यथा तच्च पश्वादिषु विभज्यते ।।
।।

-- , 454 शास्त्रविषयमप्येतदेव प्रदर्शयितुमाह
शास्त्रेऽपि च कर्तरि कृदित्येकं प्रत्ययार्थप्रतिपादकं सामान्येन ग्रहणकवाक्यमुपादीयतेतच्च प्रत्येकं प्रत्ययार्थोपाधिषु पश्वादिषु विभिन्नेषु विषयेषु विभागेन सम्बन्धमुपनीयाभिमतलक्ष्यनिष्पत्तये व्यापार्यत इति प्रत्येकमेव तत्परिसमाप्यते ।। ।।

455 यद्याकाङ्क्षा निवर्तेत तद्भूतस्य सकृच्छ्रुतौ । नैवान्येनाभिसम्बन्धं तदुपेयात् कथञ्चन ।।
।।

-- ", 455 यदि पुनः संयुक्तविधिनोपादीयेत तदाऽभिमतसिद्धयेन स्यादित्याह
यदि सकृदेव प्रत्ययविधायकेनैव स वोपादायार्थपरिसमाप्तेराकाङ्क्षा निवार्येततदा तद्योगेन तत्रैव परिक्षीणशक्तित्वाद् ग्रहणकवाक्यताविरहादन्येन प्रत्ययविधायकेन सम्बन्धे (न्धं) नैवोपेयादित्यभिमतलक्ष्यानिष्पत्तिरेव ।। ।।

456 एकरूपमनेकार्थं तस्मादुपनिबन्धनम् । योनिर्विभागवाक्यानां तेभ्योऽनन्यदिव स्थितम् ।।
।।

-- 456 तस्मादेतदुपनिबन्धनभूतं सामान्येनासंयुक्तं विधिनैवोपात्तं सकृद्ग्रहण (क)वाक्यं सद्विभागवाक्यानामवान्तरवाक्यानां योनिः कारणं बोद्धव्यमित्याह
अनेकेऽर्थाः प्रत्याय्या यस्य तत्तथआ अवान्तरवाक्यान्युपनिबद्न्तेऽस्मिन्नित्युपनिबन्धनम् । अथ तेभ्योऽनन्यदिवाभिन्नमिव स्थितम् । अथ च प्रत्येकं भेदेन सम्बन्धमुपगत्य यथावल्लक्ष्यसिद्धये विभवतीति ।। ।।

457 क्कचित् क्रिया व्यक्तिभागैरुपकारे प्रवर्त्तते । सामान्यभाग एवास्याः क्कचिदर्थस्य साधकः ।।
।।

-- "" , , 457 अथाख्याते घातुवाच्याऽसत्त्वभूता पूर्वापरीभूतावयवा साध्यमानावस्था क्षणप्रचयात्मिका या क्रिया तस्याः कीदृशो जातिव्यक्तिव्यवहार समाश्रीयत इत्याह
क्कचित्इति बाधविकल्पसमुच्चयातिशयप्रशंसादौ विषये क्रिया व्यक्तिभागैः समीहितार्थसिद्धौ प्रवर्त्ततेजातिसमाश्रयेण विकल्पसमुच्चयाद्यनुपपत्तेः । न हि देवदत्तः पचतियज्ञदत्तः पचतीत्यादौ जातेः समुच्चयादिरुपपद्यते । क्कचित्तु यजते पचत इत्यादौ देशकालसाधनादे (रनुपन्यासेनै) कव्यक्तिव्यवहारोऽवास्तवः स्यादिति संवृत्त्या लोकव्यवहारसिद्धये तत्र क्कचित्क्रियापरामर्शात् सामान्यभाग एव वाक्यार्थमुपरोति ।। ।।

458 कालभिन्नाश्च भेदा ये ये चाप्युष्ट्रासिकादिषु । प्रक्रमे जातिभागस्य शब्दात्मा तैर्न भिद्यते ।।
।।

-- , 458 इहापि जातिभागमेव क्रियासम्बन्धिनं शब्दाः प्रत्यायन्तीत्याह
ये क्रियाभेदाः क्रियाविशेषाः कालभिन्नाः पचत्यपाक्षीत्पक्ष्यतीत्येवमादयो ये चाप्युष्ट्रासिकादिषु विषये साधनभिन्ना उष्ट्रासिका आस्यन्तेहतशायिकाः शय्यन्ते इत्यादौ तेषु क्रियासम्बन्धतो जातिभागस्य प्रक्रमे सामान्येनैवापर्यालोचितदेशकालसाधनतया प्रक्रमे च शब्दात्मा शब्दस्वरूपं न भिद्यते साधनसम्बन्धकृतस्तत्र भेदो न प्रथत इति यावत् ।। ।।

459 एकसंख्येषु भेदेषु भिन्ना जात्यादिभिः क्रियाः । भेदेन विनियुज्यन्ते तच्छब्दस्य सकृच्छ्रुतौ ।।

।।

"" , -- "" 459 तदेवं देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठतेइत्यादिना शब्दलक्षणभेदमाश्रित्यैका क्रियाऽनेकैः साधनैः प्रत्येकमर्थसमाप्त्या वाक्यसम्बन्धमुपयातीति प्रदर्शितम् । इदानीं यत्र विजातीया विभिन्नपदवाच्या क्रियाएकशब्दवाच्यानि च साधनानि तत्र कथं भिन्नाभिः क्रियाभस्तेषां साधनानां सम्बन्धः स्यादित्याशङ्क्य तत्रापि प्रतिपत्तिकालसमाश्रयणेन भिन्नान्येव साधनान्यवगतानीति तथैवैताः क्रियास्तैर्भिन्नैरेव साधनैः प्रत्येकमर्थसमाप्त्या वाक्यसम्बन्धमुपयान्तीति प्रतिपदयितुमाह
सामानसंख्येषु भेदेषु साधनविशेषेषु तेषु जात्यादिभिःइति । जात्या आदिग्रहणादितिकर्त्तव्यतादिभिश्च याः क्रिया भिन्ना असम्बद्धा उपात्तास्ताः साधनाभिधायिनः शब्दस्य सकृदभेदेन श्रुतावपि प्रतिपत्तिभेदसमाश्रयणेन भेदेनैव विनियुज्यन्ते सम्बन्धमुपगच्छन्तीति बोद्धव्यम् ।। ।।

460 अक्षादिषु यथा भिन्ना भञ्जिभक्षिदिविक्रियाः । प्रयोगकालाभेदेऽपि प्रतिभेदं पृथक् स्थिताः ।।
।।

-- 460 उदाहरणमाह
अक्षा भज्यन्तां भुज्यन्तां दीव्यन्तामिति या भिन्नजातिका भिन्नशब्दवाच्याश्च क्रिया यास्ता वाक्यभेदोपादानरहिता अपि प्रत्येकं समाप्त्या भेदेनैव स्थिता इति । यस्मादन्यसाधनानि तत्र निबद्धानि भेदेनैवोपात्तानीति प्रतिपत्तिवेलायां भेबेनैव क्रिया यथास्वं सम्बन्धमुपयान्तीति ।। ।।

461 अक्षाणां तन्त्रिणां तन्त्रमुपायस्तुल्यरूपता । एषां क्रमो विभक्तानां तन्निबद्धा सकृच्छ्रुतिः ।।
।।

-- 461 तन्त्रन्यायप्रतिपादनपूर्वकमभिधातुमाह
तुल्यरूपतेत्यनेन तन्त्रं व्याचष्टे । युक्तं चैतत् । यस्माच्छब्दाः क्रमेण विभागेनैव कदाचित् प्रयुज्यन्ते कदाचित्तन्त्रन्यायसमाश्रयणेन युगपदेवेति शब्दानां प्रयोगवेलायां क्रमयौगपद्ये उपायस्तदत्र तन्त्रेण युगपदेव भिन्नाः प्रयुक्ता अक्षा इति क्रियाभेदेवैषां सम्बन्धं गच्छन्ति ।। ।।

462 द्वावभ्युपायौ शब्दानां प्रयोगे समवस्थितौ । क्रमो वा यौगपद्यं वा यौ लोको नातिर्त्तते ।।
।।

--अथ क्रमयौगपद्यस्वरूपमत्रोद्दिश्य व्याख्यातुमाह
463 क्रमे विभिद्यते रूपं यौगपद्ये न भिद्यते । क्रिया तु यौगपद्येऽपि क्रमरूपानुपातिनी ।।
।।

.-- --, , 463तत्र
रूपविभागेनैव क्रमः साधारण्येन यौगपद्यं तत्र भिन्नाक्रिया यौगपद्येति (पि) शब्दानां प्रयोगे क्रमरूपमेवानुपततीत्यर्थतथाभावात्क्रमरूपानुपातिन्येव बोद्धव्येति प्रतिपादयितुमाहक्रियेति । तथा च शकटाक्षस्यैव भञ्जनं न विभीतकदेवनाक्षयोःतथा विभीतकाक्षस्यैव भक्षणं नेतरयोःदेवनाक्षस्यैव देवनं न पूर्वयोरित्यर्थतथाभावाद्यौगपद्येऽपि क्रमानुपातिन्येवासाविति । ततश्च ते क्रमयौगपद्ये बेदसंसर्गशक्तिरूपे शब्दव्यापाररूपे अपि शब्देभ्यो भिन्ने इव व्यतिरिक्ते इव स्थते लक्ष्येते ।।।<b2
</b2

464 भेदसंसर्गशक्ती द्वे शब्दाद्भिन्ने इव स्थिते । यौगपद्येऽप्यनेकेन प्रयोगे भिद्यते श्रुतिः ।।
।।

-- , , , --, 464 परमार्थतस्तु शब्दशक्ती एव क्रमयौगपद्ये इत्यभिधातुमाह
किन्तर्हिशब्दस्यैवैते द्वे शक्तीयद्भेदशक्त्या क्रमेणावभातिसंसर्गशक्त्या तु युगपदिति । नन्वेवं भेदप्रयोगेऽनेकेन क्रियापदेन सम्बन्धाद्भिद्यत एव साधारण्याद् यौगपद्यक्रमस्वरूपयोर्भेदात् कथं युगपत्प्रयोगे क्रमरूपानुपातित्वमेव क्रियायाः श्रुतेरुक्तमित्याहयौगपद्य इति । यौगपद्येऽपि साधनस्य प्रयोगे भेदेन क्रियापदसम्बन्धाद्भिद्यत एव साधारणी श्रुतिरितितन्त्रे हि सा भिन्नैवोपात्तेत्यर्थः ।। ।।

465 अभिन्नो भेदरूपेण य एकोऽर्थो विवक्षितः । तत्रावयवधर्मेण समुदायोऽनुगृह्यते ।।
।।

, -- 465 अथवा अक्षा इत्यत्रोद्भूतावयवभेदः समुदाय एव प्रतिनिर्दिश्यतेतत्रावयवधर्मेण समुदायो व्यपदिश्यते इत्येवं भेदमुपपाद्ययथायोगं प्रत्येकमर्थसमाप्त्या वा क्रियाणां भिन्नानां विनियोगः क्रियत इत्याह
अभिन्नः समुदायस्वरूपो भेदरूपेणोद्भूतावयवभेदतया योऽत्रार्थो विवक्षितस्तत्रावयवधर्मेण भेदेन क्रमेणेति यावत्समुदायोऽनुगृह्यते उपोद्बलीक्रियत इति भेदप्रतिपत्तौ भेदेनैव क्रियाणां सम्बन्धः । अतश्चास्य समुदायस्य भेदप्रतिपादने प्रत्येकं वाक्यार्थः परिसमाप्यते ।। ।।

466 भेदनिर्वचने त्वस्य प्रत्येकं वा समाप्यते । श्रुतिर्वचनभिन्ना वा वाक्यभेदेऽवतिष्ठते ।।
।।

, --अथवा वचनभिन्न एकशब्द एवाक्षो भुज्यताम्अक्षो दीव्यतामित्येवमवान्तरवाक्योपप्लाविनी साधनश्रुतिर्भेदेनैवावतिष्ठत इत्याह

467 तत्रैकवचनान्तो वा सोऽक्षशब्दः प्रयुज्यते । प्रत्येकं वा बहुत्वेन प्रविभागो यथाश्रुति ।।
।।

-- 467 शब्दपरिसमाप्तेर्भेदप्रकारमाह
एकसमाद्वाक्याद्वाक्यभेदेन सम्बन्धिनीव्यवह्रयमाणे सत्यक्षो भक्ष्यतामित्याद्येकवचनस्यैवाक्षशब्दस्य प्रयोगः कदाचित् । अथवा यथाश्रुति प्रत्येकं बहुवचनान्तेनैववाक्याभेद इत्याह प्रत्येकमिति । अक्षा मज्यन्तामित्यादिकः प्रविभागः श्रुत्यनतिक्रमेणैक वाक्यानां करणीयः ।। ।।

468 द्विष्ठानि यानि वाक्यानि तेष्वप्येकत्वदर्शिनाम् । अनेकशक्तेरेकस्य स्वशक्तिः प्रविभज्यते ।।
।।

-- "" "" `" , 468 इदानीमभेदवादिनामपि मते द्विष्ठानां वाक्यानां शक्तिभेदेनैव विभागमभिघातुमाह
द्वयोरर्थयोस्तिष्ठन्तीति द्विष्ठानि शास्त्रीयाणि लौकिकानि च यानि वाक्यानि तेष्वपि शब्दैकत्वदर्शिनां मते एकस्यैव तस्य प्रतिपादकस्य शब्दस्यानेकश्क्तेरसौ स्वशक्तिरेव प्रविभज्यते । यथा इग्यणः सम्प्रसारणम्द्विर्वचनेऽचितद्धरति वहत्यावहति भाराद्वशादिभ्यः तदस्य ब्रह्मचर्यम्इत्यादीनि शास्त्रीयाणि । तथा श्वेतो धावतिअलम्बुसानां पातेत्यादीनि लौकिकानि वाक्यानि । तेष्वप्यर्थद्वयप्रतिपादनाय शक्तिर्विभज्यत इति शक्तितन्त्रप्रतिपादनम् ।। ।।

469 अत्यन्तभिन्नयोर्वा स्यात् प्रयोगस्तन्त्रलक्षणः । उपायस्तत्र संसर्गः प्रतिपत्तृषु भिद्यते ।।
।।

-- , ? , , , 469 भेददर्शिनां पुनर्मते भिन्नावेव शब्दौ तन्त्रेणोपात्ताविति शब्दतन्त्रं प्रतिपादयितुमाह
तत्रैवं तन्त्रेण द्व्यर्थे तस्मिन् प्रयोगे प्रतिपत्त्ययोगे प्रतिपत्त्यनुसारेणोभयात्मासौ संसर्गो वाक्याभिधेयलक्षणो भिद्यते । यथा यण्स्थानिकस्येग्लक्षणस्य वर्णस्य का संज्ञा स्यादित्येकेन पृष्टम्तदपरेण यणि कोऽर्थः स्थान्यादेशभावलक्षणः सम्बन्धःस किं संज्ञ इतिलाघवादाचार्यस्तन्त्रन्यायसमाश्रयणात् सम्प्रसारणमित्येकेनैव शब्देनोत्तरमाह । तथैकेन पृष्टं किञ्जातीयो धावतीत्यपरेण किंवर्णो धावत्यनयोर्लाघवात् प्रतिवक्ति श्वेतो धावतीति । तत्रासौ वाक्यार्थः प्रतिपत्तृषु भिद्यतेयेन पृष्टं किञ्जातीयस्तस्य श्वा इतो धावतीत्येवंरूपतया व्यवतिष्ठते । येन च किंवर्ण इत्युक्तं तस्य श्वेतगुणयुक्तो धावतीत्यर्थरूपोऽसौ जायत इति तन्त्रनिबन्धना द्विधात्रार्थव्यक्तिरुपजायत इति । एवमन्यत्र व्याख्येयम् ।। ।।

470 भेदेनावगतौ पूर्वं शब्दौ तुल्यश्रुती पुनः । तन्त्रेण प्रतिपत्तारं प्रयोक्त्रा प्रतिपादिताः ।।
।।

-- , 470 एतदेव व्याख्यातुमाह
पूर्वं यौ शब्दौ भेदेन रूपवैलक्षण्येनाधिगतौ श्वा इतः श्वेत इति तावेव तुल्यश्रुती भिन्नावेव तन्त्रेण प्रतिपत्तारःयस्मात्तन्त्रन्यायसमाश्रयणेनात्र प्रयोक्त्रा प्रतिपादिताः प्रतिबोधिताः ।। ।।
471 एकस्यापि विवक्षायामनुनिष्पद्यते परः । विनाऽभिसंधिना शब्दः शक्तिरूपः प्रकाशते ।।

।।

, -- ----, 471 इदानीमत्र वक्तुरेकस्यैव शब्दस्य प्रतिपादने विवक्षोपजायतेतस्यां सत्यामपरोऽनुनिष्पद्यत इति शब्दभेदमते प्रकारान्तरेण तन्त्रमुपपादयितुमाह

वक्त्रिच्छाविरहादपि साधारणत्वादपरस्य निष्पत्तिस्ततोऽर्थद्वयप्रतिपत्तिः । अभेदवादिनामपि मते तन्त्रस्य प्रकारान्तरमाहविनेति । प्रयोक्त्रभिसन्धानमन्तरेण तत्रासौ शब्दः साधारणत्वाच्छक्तिद्वययुक्तः प्रकाशते । एतदुक्तं भवति

शुल्कजातीयप्रत्यायनशक्तिः प्राणिविशेषप्रत्यायनशक्तिर्वा श्वेतशब्दस्तत्रोदीरितःस तत्रैकमर्थं प्रत्याययंस्तन्त्रेण सामर्थ्यादर्थान्तरप्रकाशनं करोत्येव ।। ।।

472 अनेकशक्तिरेकस्य युगपच्छ्रीयते क्कचित् । अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते ।।

।।

-- , 472 अथवा तुल्यकक्षतया शक्तिद्वययोगाद्युगपदेव अर्थद्वयप्रकाशनं करोतीति शक्तितन्त्रतामाश्रित्यह

एकस्यैव शब्दस्य क्कचित् श्वेतो धावतीत्यादौ विषये युगपदेवार्थद्वयप्रत्यायनसमर्थं शक्तिद्वयमाश्रीयतेयथा क्कचिदवसरे दाहप्रकाशाभ्यां युक्तोऽग्निरेकत्रापि प्रकाशे दाहे वा नियुज्यते उपयोगवशाद्धर्मद्वयायाप्युपादीयत इत्यर्थः । तथैवानेकशक्तियोगाद्युगपदर्थद्वयप्रकाशनाय शब्दः समाश्रीयत इति ।। ।।

473 आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते । लिङ्गाद्वा तन्त्रधर्माद्वा विभागेनावतिष्ठते ।।

।।

-- , , , 473 इदानीं शास्त्रविषयमप्येतदुपदर्शयितुमाह

इग्यणः सम्प्रसारणमित्येतस्मिन् वाक्ये सकृदपि श्रुते कीदृशे शब्दभेदवादिनां मते आवृत्तिभिन्नार्थेएकत्ववादिनां मते शक्तिभ्यां भिन्नार्थे । तत्र हि शक्तिभेदादर्थभेदःअनन्तरं तद्वाक्यं प्रतिपत्तिशब्दभेदमते लिङ्गाद् ज्ञापकाद्विभागेनावतिष्ठते वर्णवाक्यार्थप्रत्यायकतयाऽवतिष्ठत इत्यर्थः । यस्मात्यम्प्रसारणस्येति भूतविभक्तिनिर्देशं पश्यतिततोऽवस्यति वर्णः संज्ञीति वसोः सम्प्रासरणमित्यादौ भाविविभक्तिनिर्देशाद्वाक्यार्थस्यापि संज्ञित्वमवस्यतीत्यावृत्तिमेव शब्दभेदवाद्यनुमिनोति । अभेदवादी तु शक्तिभेदं तन्त्रधर्माच्छक्तितन्त्रलक्षणादनुमिनोतीत्यत्र सम्प्रसारणशब्दः शक्तिद्वयवशाद्युगपद्वर्णवाक्यलक्षणस्यार्थद्वयस्यापि प्रतिपादनं करोत्येव ।। ।।

474 सम्प्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः । प्रविभागस्तत्र सूत्रे एकस्मिन्नेव कल्पते ।।

।।

474 लिङ्गाभ्यामुपदर्शिताभ्यां भाविभूतविभक्तिनिर्देशलक्षणाभ्यां तत्र एकस्मिन्नेव सूत्रे वर्णवाक्यार्थयोः संज्ञिनोः प्रयोगो लभ्यत इति ।। ।।

475 तथा द्विर्वचनेऽचीति तन्त्रोपायादिलक्षणः । एकशेषेण निर्देशो भाष्य एवोपवर्णितः ।।

।।

-- , --"" 475 उक्तं च विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य' इति । तन्त्रं चेदमेकशेषसमानफलं भाष्ये प्रदेशेषूपन्यस्तमिति भाष्यकाराभ्युपगमेनार्थतन्त्रसिद्धिमुपपादयितुमाह

इह द्विर्वचनेऽचीत्यत्र द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचन एव कर्तव्ये स्थानिवदिति सूत्रार्थो व्याख्यायतेतत्रोक्तं यत्पुनर्द्वितीयं द्विर्वचनग्रहणं कर्त्तव्यं न कर्त्तव्यमित्याहएकशेषनिर्देशात् सिद्धम्इति । यद्येकशेषस्तदा द्विर्वचनं प्राप्नोतीत्यत एकशेषसमानफलसाधारणलक्षणं तन्त्रमेवात्रैकशेषशब्देनोक्तम् । तेन तन्त्रोपायाद्धेतोर्लक्षण एवैकशेषनिर्देशः प्रदर्शितः । तस्मादेकशेषमन्तरेणापि तन्त्रन्यायसमाश्रयणाद् द्विर्वचनेऽचीत्यत्रार्थसङ्गतेरेकशेषसमानफल शास्त्रप्रवृत्त्युपायभूतं तन्त्रमभ्युपगतं भाष्य इति सिद्धम् ।। ।।

476 प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान् । संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ।।

।।

-- 476अथ महाभाष्यस्यावतारान्वाख्यानपूर्वकं टीकाकारो महत्तामुपवर्णयन् स्वरचितस्य ग्रन्थस्य गुरुपूर्वक्रममभिधातुमाह

इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं ग्रन्थलक्षपरिमाणं संग्रहाभिधानं निबन्धनमासीत् । तच्च कालवशात् सुकुमारबुद्धीन् वैयाकरणान् प्राप्यास्तमुपागतम् । तस्मात् क्लेशभीरुत्वात् संक्षेपरुचयस्ते जानाः । अत एवाल्पो विद्यासु परिग्रहः स्वीकारो येषां ते तथा । ततस्तैः संग्रहाध्ययन उपेक्षिते सत्यस्तं यातः संग्रहः ।।।।

477 कृतेऽथ पचञ्जलिना गुरुणा तीर्थदर्शिना । सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।।

।।

-- 477 साधुत्वज्ञानौपयिकतया धर्मसाधनत्वेनोपजातोपयोगाय व्याकरणस्मृतेरविच्छेदाय करुणाप्रयुक्तेनाथ भगवता पतञ्जलिना वार्त्तिकव्याख्यानपुरःसरं माभाष्यनिबन्धनमुपरचितमित्यभिधातुमाह

गुरुणेति भाष्यकर्त्तुः पूजापदे । तीर्थान्यागमविशेषाः । तान् पश्यति विजानातीति तीर्थदर्शो । अनेन गुरुत्वनिबन्धनः प्रभावातिशयो भगवत उक्तः । तच्च

भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके ।। ।।

478 अलब्धगाधे गाम्भीर्यादुत्तान् इव सौष्ठवात् । तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ।।
।।

-- --? --""--, 478 अथ महत्त्वमेव विशेषणद्वारेणास्योपपादयितुमाह
गाधो निष्ठापरिच्छेद इयत्तेति यावत् । असावलब्धो यस्य । कस्मादित्याहगाम्भीर्यात् इति । गाम्भीर्यं गहनता प्रमेयबाहुल्येन दुर्वगाहत्वम् । अतिगम्भीरं हि भाष्यमुपरचितं भगवता पचञ्जलिनेति न तस्याभिधेयं व्यवच्छेत्तुं केनचिछक्यत इति । किमेवमेकान्तं गहनमिदं भाष्यम् नेत्याहउत्तान इव इत्यादि । उत्तानं स्पष्टं सौष्ठवं परिपाटी यस्मादेतद्भाष्यं परिपाटिलक्षणादत्र सौष्ठवादुत्तानं स्पष्टप्रायं यत एव प्रतिभाति । अतोनेदमसेव्यं सज्जनमानसमिव निसर्गसुकुमारमतिगम्भीरं चैतदत एव महाभाष्यमित्युच्यत इत्यर्थः । एतेन संग्रहानुसारेण भगवता पतञ्जिलिना संग्रहसंक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमित्युक्तं वेदितव्यम् । तदेवं ब्रह्मकाण्डे कायवाग्बुद्धिविषया ये मलाःइत्यादिश्लोकेन भाष्यकार प्रशंसोक्ता । इव चैवं भाष्यप्रशंसेति शास्त्रस्य शास्त्रकर्त्तुश्च टीकाकृता महत्तोपवर्णिता । अत एवेदं माहभाष्यमकृतबुद्धयो नैव बोद्धुमलमित्याहतस्मिन्निति । कृता व्युत्पत्त्या प्रकर्षं प्राप्ता महती बुद्धिर्येषां तेतथा तद्रूपवैकल्येनाकृतबुद्धयः स्वलपप्रज्ञा उच्यन्ते । तेषां निश्चयो निर्णयपर्यन्तो बोधो नैवात्रावास्थित न प्रतिष्ठामलभत । न तेनास्मद्गुरोस्तत्रभवतो वसुरातादन्यः कश्चिदिमं भाष्यार्णवमवगाहितुमहमित्युक्तं भवति ।। ।।

479 बैजिसौभवर्य्यक्षैः शुष्कतर्कानुसारिभिः । आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ।।
।।

-- , -- "" 479 तथा च संग्रहप्रतिपक्षभूतैराचार्यैस्तर्कविद्यामात्रवेदिभिर्बुद्ध्यपाटवादिदमाप्लावितमामासीकृतमित्याह
शुष्कतर्कः केवल एवान्यशास्त्रपरिमलरहितो भण्यते । तमेवानुसरन्ति प्रमेयनिर्णयायेति तदनुसारिणः । महाभाष्यं हि बहुविधविद्यावादबलमार्षं व्यवस्थितमृततश्चान्वाक्षिकीमात्रकुशलः कथं तन्निश्चिनुयादिति तर्कमात्रानुसारिभिस्तैस्तद्विप्लावितम् । तर्कश्च पुरुषाणां स्वबुद्धिमात्रनिर्मितविग्रहोऽव्यवस्थित एव । यदुक्तम्
यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः । अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते
।। इति ।।

480 यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्यकरणागमः । काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ।।
।।

-- 480इत्थं च परस्परवैमत्यादागमसंज्ञात्यगाच्च यथावस्थितो व्याकरणागमः पतञ्जलिशिष्येभ्यः कालपरिवासाद् भ्रष्टः सन् ग्रन्थमात्रे पाठमात्र एव व्यवस्थितो दाक्षिणात्येष्वित्याह
तदेवमुत्सन्नकल्पः संजातो व्याकरणागमः ।।।।
481 पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः । स नीतो बहुशाख्त्वं चन्द्राचार्यादिभिः पुनः ।।
।।

-- , 481 अथ कालान्तरेण चन्द्राचार्यादिभिरागमं लब्ध्वा तेन चोपायभूतेन सकलानि भाष्यावस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि स्फीततां नीत इत्यभिधातुमाह
पर्वतात् त्रिकूटैकदेशवर्त्तित्रिलिङ्गैकदेशादिति । तत्र ह्युपलतले रावणविरचितो मूलभूतव्याकरणागमस्तिष्ठतिकेनचिच्च ब्रह्मरक्षसाऽऽनीय चन्द्राचार्यवसुरातगुरुप्रभृतीनां दत्त इति । ते खलु यथावद् व्याकरणस्य स्वरूपं तत उपलभ्य सततं च शिष्याणा व्याख्याय बहुशाखित्वं नीतो विस्तरं प्रापित इत्यनुश्रूयते ।। ।।

482 न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम् । प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः ।।
।।

-- , 482 अथ कदाचिद् योगतो विचार्य तत्र भगवता वसुरातगुरुणा ममायमागमः संज्ञाय वात्सल्यात् प्रणीत इति स्वरचितस्यास्य गुरुपूर्वक्रममभिधातुमाह
न्यायस्य प्रतिष्ठा प्रस्थानं तस्य मार्गान् न्यायप्रस्थानमार्गान् न्यायप्रतिष्ठितैर्बहुभिर्मार्गैरिति यावत् । न्यायप्रस्थानमार्गास्तंस्तान् स्वं च दर्शनं व्याकरणसिद्धान्तलक्षणमभ्यस्यायं प्रणीतः । अनेन गुरुणा संज्ञायन तथा ममायमागमसंग्रहः प्रणीतःयेन सन्दहो भवेतपि तु सावधानेनेत्युक्तं भवति । अस्माकमिति बहुवचनादन्येषामपि सहाध्यायिनां ग्रहणम् । अथवा मया तु तदनुच्छेदायामुपनिबन्धः कृत इत्यात्मनो बहुमानः प्रकटितः ।। ।।

483 वर्त्मनामत्र केषाञ्चिद् वस्तुमात्रमुदाहृतम् । काण्डे तृतीये न्यक्षेण भविष्यति विचारणा ।।

।।

-- 483नन्वेतावानेव किमयं काण्डद्वयप्रोक्तो व्याकरणागम इत्याशङ्क्याह
अत्रास्मिन् वाक्यकाण्डे काण्डद्वये वा केषाञ्चिदेव न्यायवर्त्मनां वस्तुमात्रं बीजमात्रं प्रदर्शितमिव । शिष्टे तु तृतीयेऽस्य ग्रन्थस्य पदकाण्डद्वयनिष्यन्दभूते न्यक्षेणादरविशेषण स्वसिद्धान्तपरसिद्धान्तवर्तिनां विचारणा युक्तायुक्तविचार पूर्वकनिर्णोतिर्भविष्यति । ततो नायमेतावान् व्याकरणागमसंग्रह इति ।।।।
484 प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः । कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ।।
।।

-- , 484 ननु तत्तन्न्यायप्रत्थानमार्गाभ्यासेन किं कृत्यं स्वदर्शनमेव निश्चितं किं न विचार्यत इत्याह
नानाविधैरागमदर्शनैरागम सिद्धान्तैः खलु प्रज्ञा विवेकं लभते वैशारद्यमाप्रोति । ततश्च निः संदिग्धं स्वसिद्धान्तमेव संपरिष्कर्तुर्भिन्नागमदर्शनैः शक्तिर्जायते । अन्यथाऽदृष्टपरकीयागमस्वरूपेण प्रतिपत्त्रा स्वोत्प्रेक्षामेव तेषु तेषु चावस्थानेष्वनुसरता वि यच्छक्यामुन्नेतुं प्रतिविधातुम् । कदाचित्परमर्षयो योगजधर्मोत्पन्नसामर्थ्याद् यथावत्पदार्थान् पश्यन्तः सिद्धान्तमलमिति शोभते । ये त्वारुरुक्षवः प्राथमकल्पिका मलिनचित्तवृत्तयः शास्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निश्चिन्वन्तितेषं नानागमोपसेवयैवानुप्रसीदति भगवती प्रतिभेति युक्तम् ।। ।।
485 तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना । अनुपासितवृद्धानां विद्या नातिप्रसीदति ।।
।।

-- , 485 एतदेव निरुपयितुमाह
प्रतिष्ठामुपगतैः पूर्वैरागमैर्बहुविधैर्विना स्वयमेव तत्तदित्ययथायथमेवोत्प्रेक्षमाणानां विकल्पयतां प्रतिपतृणां शास्त्रोपज्ञमेधाविरहिणां पण्डितम्मन्यानामभिमानाग्रहाघातानां तेषां भगवती विद्या विशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदति अत्यर्थम्किं तर्हि वृद्धोपसेवाशालिनामागमजुषां विगलिताभिमानानामेवैषा भगवती प्रज्ञा प्रसादमुपयातीति सिद्धः ।। ।। --1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18 19 20 21 22 23 24 25 26 27 28 29 30 31 32 33 34 35 36 37 38 39 40 41 42 43 44 45 46 47 48 49 50 51 52 53 54 55 56 57 58 59 o
o(46146041228228118046928539224323524820555118234384472440348263373345173239418261231170439190977475465404106113212752271173916431208272177791034781138841547319131417164503321277014242311986(133154306426326121341340343111536847314 4(44587144818280105(45323634614314520038338108(9910178(107139284(45439444325735933735825045645993171137471136397254179(20221931218246458362477211209121411744632641442427634120432912440145732418730436 9(3102218048363255279175(237298123(447194833(197228273122(485114198467446129140141631386697331624754209225618194277191933025925444201331681840533 8(28742230916137545329646346 8(184(16968339243443903373224073183983562219228347275125349245370244307300449272482(42958240821663206285943810948138537433626824941141932313484220226361601474281204061838428923242764476771027(448(44240218518647934714(29271513761783884663174644585470372 (295280294293(48027122329030527029765167334202241486162112103334001603023615339525254134722302409893041028828645523026632810015931951200158166391132430851(35o o32575 (436380377130(13529221523553961121448343632634226931476389614373716414324272320311165399274246713511737038724136538117130336438362134 3(833783271326050210229367962336926527 8(1563792253523523663444196421299315432157155316104451371199215434254921735195o19621812647443542516838211033234044253356433354188393414636073316151762852076212840147189291152149416335267(308203

tदयमत्र मेयसमुच्चयः

वाक्यानामष्टधैवादौ विभागः परिकीर्तितः ।शास्त्रीयमैमांसकयोः कीर्तनं वाक्ययोस्ततः ।।

।। बालाबलविचारोऽपि शास्त्रीयो व्याप्तिनिर्णयात् ।ततश्चात्र समासेन वाक्यलक्षणनिर्णयः ।।

।।सन्देहश्चागमेनापि वाक्यभेदस्य दर्शितः ।स्फोट एव तु सिद्धान्ते वाक्यं वाक्येषु साधितम् ।।

।।पदवादस्त्वनुमतो नेति व्याकरणे स्थितम् ।ततोऽन्विताभिधानस्याभिहितान्वयकस्य च ।।

।।शब्दभागार्थभागाभ्यां दूषणव्रातकीर्तनम् ।प्रसङ्गेनापरेऽप्यत्र वाक्यार्थाः षट् प्रदर्शिताः ।।

।।अखण्डवाक्यपक्षे च चोद्यपञ्चककीर्तनम् ।उपपत्तिः प्रतिनिधेर्नास्तीति प्रथमं यथा ।।

।।पिकादिपसन्देहो नोपपद्यत इत्यपि ।श्रुतिवाक्यविरोधे तु श्रुतिरेव बलीयसी ।।

।।प्रतिष्ठितस्य न्यायस्याप्येवं त्यागः प्रसज्यते ।अवान्तराणां वाक्यानामुपपत्तिर्विरुध्यते ।।

।। प्रासङ्गिकादिषु तथा लक्षणेष्वप्यसम्भवः ।प्रान्पोत्येवमखण्डेऽस्मिन्वाक्ये दोषा उदाहृताः ।।

।।अपोद्धारं समाश्रित्य दोषास्त्वेते निराकृतः ।संहितायां विभागेऽथ पदयोर्विलयं गते ।।

।।उपादानावधिं कर्त्तुं तयोरर्थः प्रकल्प्यताम् ।इति दूषणमत्राधात्पदे वाक्ये च वाक्यवित् ।।

।।तत्र न्यायवशादत्र स्वपक्षे दोषसंवृतिः ।वाक्यार्थस्यात्र भेदोऽपि विकल्प्य परिकल्पितः ।।

।।प्रतिभेदं च सिद्धान्ते वाक्यार्थ उपपादितः ।प्रविभागाश्रयादत्र पदार्थस्यापि सम्भवः ।।

।।स च द्वादशधा भिन्न इत्यत्रोपपादितम् ।प्रतिभालक्षणं सम्यग्विधातुं संहितं कुतम् ।।

।।पदभागार्थभागाश्च वितत्य प्रतिपादिताः ।अन्वयव्यतिरेकाभ्यां विवक्तितोपपादिता ।।

।।सनिमित्ता च साऽप्यत्र नामाख्यातसमाश्रया ।उपसर्गनिपाताश्च कर्मप्रवचनीयकाः ।।

।।पदभेदाः प्रसङ्गेन लक्षणेनोपलक्षिताः ।सार्थकानर्थकत्वाभ्यां विचारे वर्णनिष्ठिते ।।

।।कृतेऽप्यखण्डपक्षोऽत्र प्रतिष्ठामुपनामितः ।पदवादेऽथ दोषाणां चतुर्णां परिकीर्तनम् ।।

।।समासेषु विरुद्धार्थप्राप्तिरादावुदाहृता ।अध्यादीनां तथा वाक्ये साधनस्याभिधायिता ।।

।। अर्थासङ्गतिरप्यत्र बहुव्रीहेरुदाहृता ।प्रज्ञसंज्ञत्रादिषु तथा नास्त्यर्थोऽवयवेष्वपि ।।

।।इति चोद्यचतुष्केण पदवादः पराकृतः ।स्थापितेऽखण्डपक्षेऽपि चोद्यसप्तकमाहितम् ।।

।।द्वन्द्वे समासेनैव स्याद् बह्वर्थस्याभिधायिका ।विभक्तिरिति दोषोऽत्र प्रथमं परिकीर्त्तितम् ।।

।।वाक्यस्यार्थसमाप्तिस्तु प्रत्येकं नोपपद्यते ।परामर्शश्च नैव स्यात् सर्वनामभिरेव च ।।

।।अनुष्ठानं क्रमेणाथ वाक्यार्थस्य न जातुचित् ।स्यादक्रमे त्वनुष्ठानं शक्यते न कथञ्चन ।।

।।एकदेशस्य करणे समुदायेऽर्थकारिता ।अभिमन्यत इत्येतदखण्डे नोपपद्यते ।।

।।एतानि पञ्च चोद्यान्यपोद्धारस्य समाश्रयात् ।समर्थितानि वै सम्यगखण्डं वाक्यमिच्छता ।।

।।अथाखण्डं यदा वाक्यं समासेष्वर्थवर्णना ।पृथक् पृथक् तदा तस्याः सा च शास्त्रे प्रकीर्तिता ।।

।।नञ्समासे पदार्थस्य विकल्पैर्बहुभिः पुनः ।प्राधान्यं परिकल्प्याथ भाष्ये पक्षाः परीक्षिताः ।।

।।यद्यखण्डमिदं वाक्यं नैषा स्यात् कल्पना क्कचित् ।दोषावेतावपि शब्दप्रक्रियामात्रमेव च ।।

।। शास्त्रप्रवृत्ताविति च निराकरणमेतयोः ।ततश्चाखण्डपक्षस्य स बाध उपदर्शितः ।।

।।जहत्स्वार्थविकल्पेन बहुव्रीह्यादिगामिना ।प्रत्युत प्रज्ञुदोषश्च पदवादे प्रकीर्त्तितः ।।

।।प्रकृत्यर्थः प्रत्ययार्थ इति भिन्नो परस्परम् ।यावत् स्थितौ तयोरेकापायेनावगतिः कथम् ।।

।।इहाऽहं नास्तीति च सा दृष्टा स्याद्वास्तवे कथम् ।पदार्थं प्रति दोषोऽथं पदवादे समुद्धृतः ।।

।।प्रत्ययद्वयगम्येऽर्थे एकस्मादेव तन्मते ।अत्तीत्यादौ कथं च स्यात् सत्यता पदपद्धतेः ।।

।।सत्यत्वेऽथ पदानां स्यात् प्रकृतिप्रत्ययार्थयोः ।कथं लक्षणशास्त्रेषु साङ्कर्येण व्यवस्थितिः ।।

।।पदार्थमन्यथैवादौ प्रतिपद्यान्यथा पुनः ।वाक्यार्थप्रतिपत्तिश्च दृष्टा नैतत्समञ्जसम् ।।

।।सत्यभूतेष्वथ पदेष्विति वाक्यविदो जगुः ।नञर्थानुपपत्तेश्च नास्ति वादः पदाश्रयः ।।

।।उपात्तत्यगसंप्राप्ते सर्वत्रेति च दूषणम् ।सह प्रागुक्तदौषैश्चाप्येकादश समीरिताः ।।

।।पदवादेऽत्र दोषास्तु पृथक् पक्षद्वयं पुनः ।शब्दभागार्थभागाभ्यां विस्तरेण विचक्षणैः ।।

।।निराकृतमतो युक्तो वाक्यवादपरिग्रहः ।दोषः संज्ञिन्यतिक्रान्तः सूत्रकाराभिसंमतः ।।

।।अपोद्धाराश्रयादत्र गौणमुख्यविचारणा ।ततः कृता सुनियतं टीकाकारेण सादरम् ।।

।।सत्यासत्यविभागोऽपि ज्ञानानामुपपादितः ।मुख्यानान्तरीयकयोरर्थयोरनिवर्तनम् ।।

।।ततस्त्वर्थचतुष्कस्य चिन्तनं विहितं क्रमात् ।शब्दार्थनिर्णयोपायाः सादरं परिकीर्त्तिताः ।।

।।तात्पर्यं परिपाट्याश्चार्थतात्पर्यमपीति च ।वाक्यनिष्ठं समासेन विचारितमतः पृथक् ।।

।।उत्सर्गस्याऽपवादस्य विवेकः परिकीर्तितः ।संज्ञाशब्देष्वथ कृता निर्णयः परिवत्सरान् ।।

।। प्रत्येकं समुदाये च समाप्त्या वाक्यनिश्चितिः ।न्यायः सञ्चिन्तितश्चात्र लक्षितोऽप्यभिधीयते ।।

।।अथ पूर्वोक्तसंक्षेपद्वारेणाप्युपपादितः ।वाक्यवाक्यार्थनिष्ठश्च पदनिष्ठश्च निर्णयः ।।

।।वाक्यैकवाक्यतायाश्च विचारोऽपि निरूपितः ।साकाङ्क्षत्वं निराकाङ्क्षा वाक्यानां परिकीर्तिता ।।

।।यद्वा चिन्तासमासेऽप्यन्यस्माद्वस्तुनिरूपिता ।अथात्र तन्त्रन्यायस्य सिद्धिर्भाष्यानुगा स्मृता ।।

।।अवतारोऽपि भाष्यस्य संग्रहेऽस्तमुपागते ।निबन्धहेतौ शास्त्रस्य टीकाकारेण कीर्तितः ।।

।।संग्रहार्थाद्यनुगुणरूपत्वं चोपपादितम् ।विप्लावनमथैतस्य संग्रहप्रतिपक्षतः ।।

।।कृतमाचार्यदैवज्ञैरावेशविवशैस्ततः ।भ्रष्टस्याम्नायसारस्य वैयाकरणगामिनः ।।

।।मूलभूतमवाप्याथ पर्वतादागमं स्वयम् ।आचार्यवसुरातेन न्यायमार्गान्विचिन्त्य सः ।।

।।प्रणीतो विधिवच्चायं मम व्याकरणागमः ।मयापि गुरुनिर्दिष्टाद्भाष्यान्न्यायाविलुप्तये ।।

।।काण्डत्रयक्रमेणायं निबन्धः परिकीर्तितः ।ग्रन्थकारेण ग्रन्थेऽस्मिन् स्वस्मिन्गुर्वागमः स्फुटम् ।।

।।इत्येवं वाक्यकाण्डस्य प्रमेयविषया स्फुटम् ।सङ्गतिः कीर्तिता लघ्वी समासेन निराकुला ।।

।। विद्वज्जनानां यः खलु सर्वत्र गीयते जगति ।तत उपसृत्य विरचिता राजानकशूर वर्मनाम्ना वै ।।

।। शशाङ्कशिष्याच्छ्रु त्वैतद्वाक्यकाण्डं समासतः ।पुण्यराजेन तस्योक्ता सङ्गतिः कारिकाश्रिता ।।

।। गुरवे भर्त्तृहरये शब्दब्रह्मविदे नमः ।सर्वसिद्धान्तसन्दीहसारामृतमयाय ।।

।।इति श्रीपुण्यराजकृता वाक्यपदीयद्वितीयकाण्डटीका समाप्ता ।।श्लोकानुक्रमर्णाश्लो

का
अ)अक्षाणां तन्त्रिणां तन्त्र

अक्षादिषु यथा भिन्ना
अङ्गीकृते तु केषाञ्चित्
अग्निदत्तस्तु योऽग्निः स्यात्
अग्निसोमादयः शब्दा
अडादीनां व्यवस्थार्थं
अत्यन्तभिन्नयोर्वा स्यात्
अत्यन्तविपरीतोऽपि
अथ तैरेव जनितः
अथ यज्ज्ञानमुत्पन्नं
अ(य) थाभायासं हि वागर्थे
अथासंसृष्ट एवार्थः

अनर्थकानां सङ्घातः
अनर्थकान्युपायत्वात्
अनागमश्च सोऽभ्यासः
अनिबद्धं निमित्तेषु
अनुग्रहार्थं भोक्तृणां
अनेकशक्तिरेकस्य
अनेकशक्तेरेकस्य
अनेकाख्यातयोगेऽपि
अनेकार्थत्वमेकस्य
अन्नादानादिरूपं च
अन्यत्र श्रुयमाणैश्च
अन्यथा च समाख्यान
अन्यथा प्रतिपद्यार्थं
अन्यथैवाग्निसम्बन्धा
अन्या संस्कारसावित्री
अन्वाख्यानस्मृतौ ये च
अन्वाख्यानानि भिद्यन्ते
अन्वाख्यानाय यो भेदः
अप्रयोगेऽधिपर्योश्च
अप्रसिद्धं तु यं भाग
अप्राप्तो यस्तु शुक्लादिः
अभिन्नमेव वाक्यं तु
अभिन्नो भेदरूपेण
अभिधानक्रियाभेदा
अभिधानक्रियायोगा
अभिधेयः पदस्यार्थो
अभिव्यक्ततरो योऽर्थः
अभेदपूर्वका भेदाः
अभेदादभिधेयस्य
अभ्यासात् प्रतिभाहेतुः
अर्थः कथञ्चित् पुरुषः
अर्थप्रकरणापेक्षो
अर्थभागैस्तथा तेषा
अर्थवद्भ्यो विशिष्टार्थः
अर्थस्वरूपे शब्दानां
अर्थान्तरे च यद् वृत्तं
अर्थित्वमत्र सामर्थ्य
अर्द्धर्चादिषु शब्देषु
अलब्धगाधे गाम्भीर्या
अविकल्पेऽपि वाक्यार्थे
अविभक्तेऽपि वाक्यार्थे
अविभागं तु शब्देभ्यः
आवृत्तिशक्तिभिन्नार्थे
अव्यक्तः क्रमवाञ्छब्दः
अशक्तेः सर्वशक्तेर्वा
अशब्दमपरेऽर्थस्य
अशब्दो यदि वाक्यार्थः
अश्वमेधेन यक्ष्यन्ते
असत्यां प्रतिपत्तौ च

असत्योपाधि यत्सत्यं
असन्निधौ प्रतिनिधि
असमाख्येयतत्त्वाना
अस्तित्वेतानुषत्कोवा
अस्त्यर्थः सर्वशब्दाना
अस्य वाक्यान्तरे दुष्टां

आ)आकारवन्तः संवेद्या

आकारवर्णावयवैः
आख्यातं तद्धितार्थस्य
आख्यातपदवाच्येऽर्थे
आख्यातशब्दे नियतं
आख्यातशब्दः सङ्घातो
आत्मभेदो न चेत् कश्चिद्
आधारनियमाभावात्
आम्नायशब्दानभ्यासे
आराद् वृत्तिषु सम्बन्धः
आवृत्तिरनुवादो वा
आवृत्तेरनुमानं वा
आवृत्तिशत्किभिन्नौथ
आहारप्रीत्यपद्वेष

इ)इतिकर्तव्यताऽर्थस्य

इति वाक्येषु ये धर्माः
इदं तदिति सान्येषा
इदं पराङ्गैः सम्बद्ध
इदं प्रधानं शेषोऽयं
इयं श्रुत्या क्रमप्राप्ति
इन्द्रियादिविकारेण

उ)उच्चारणो तु वाक्याना

उत्प्रेक्षते सावयवं
उत्सर्गवाक्ये यत्यक्त
उपरिष्टात् पुरस्ताद्वा
उपश्लेषमिवार्थानां
उपात्ता बहवोऽप्यर्था
उपादायापि ये हेया
उपायाः शिक्षमाणानां
उपायाच्छ्रुतिसंसारे

ऊ)ऊ इत्यभेदमाश्रित्य

ऊ इत्येतदभिन्नं च
ऊहोऽस्मिन् विषये न्याय्यः

ऋ)ऋचो वा गीतिमात्रं वा

ऋषीणां दर्शनं यच्च
ऋष्यादौ प्राप्तसंस्कारो

ए)एकं ग्रहणकं वाक्यं

एकः साधारणो वाच्यः
एकतिङ् यस्य वाक्यं तु
एकत्वं तु स्वरूपत्वा
एकदेशसरूपास्तु
एकदेशात्तु सङ्घाते
एकदेशात् स्मृतिर्भिन्ने
एकमाहुरनेकार्थं
एकरूपमनेकार्थं
एकसंख्येषु भेदेषु
एकस्य भागे सादृश्यं
एकस्यानेकरूपत्वं
एकस्यापि च शब्दस्य
एकस्यापि विवक्षाया
एकस्मिन्नपि दृश्येऽर्थे
एकेनैव प्रदीपेन
एको मन्त्रस्तथाध्यात्म
एवं च बालवायादि

क)कर्मप्रवचनीयत्वं

कश्च साधनमात्रार्थान्
काकेभ्यो रक्ष्यतां सर्पि
कार्याणामन्तरङ्गत्व
कर्यानुमेयः संबन्धो
कालभिन्नाश्च भेदा ये
कृतणत्वाश्च ये शब्दाः
कृतेऽथ पतञ्जलिना
कृत्तद्धितानामर्थश्च
केचित्तु युतसिद्धार्था
केचिद् भेदाः प्रकाश्यन्ते
केवलेन पदेनार्थो
कैश्चिन्निर्वचनं भिन्नं

क्रमे विभद्यते रूपं
क्रमोल्लेखानुषङ्गेण
क्रिया क्रियान्तरादिभन्ना
क्रियानुषङ्गेण विना
क्रियान्तरेण चैतेषां
क्रियाप्रधानमाख्यातं
क्रियाया द्योतको नायं
क्रियार्थोपपदेष्वेवं
क्रिया विना प्रयोगेण
क्रियाव्यवेतः सम्बन्धो
क्वचित् क्रिया व्यक्तिभागै
क्वचित् तत्त्वसमाख्यानं
क्वचित् संभविनो भेदाः
क्वचिद् गुणप्रधानत्व
क्वचिद्विषयभेदेन

ग)गन्तव्यं दृश्यतां सूर्य

गर्गाइत्येक एवायं
गवये नरसिंहे वा
गुणभावेन साकाङ्क्षं
गोत्राण्येव तु तान्याहुः
गोत्वानुषङ्गो बाहीके
गोयुष्मन्महसां च्व्यर्थे
गौरित्येव स्वरूपाद्वा

घ)घटादिदर्शनाल्लोकः

घटादिषु यथा दीपो
घटादीनां च चाकारान्

च)चङ्क्रम्यमाणोऽधीष्वात्र

चादयो न प्रयुज्यन्ते
चित्रस्यैकस्वरूपस्य
चिरं क्षिप्रमिति ज्ञाने

ज)जनयित्वा क्रिया काचित्

जहत्स्वार्थविकल्पे च
जातिशब्दोऽन्तरेणापि
जातेः प्रत्यायके शब्दे

त)तत्तदुत्प्रेक्षमाणानां

तत्र क्रियापदान्येव
तत्र षष्ठी प्रतिपदं
तत्रैकवचनान्तो वा
तत्त्वान्वाख्यानमात्रे तु
तयोरपृथगर्थत्वे
तलवद् दृश्यते व्योम
तस्मात् प्रत्यक्षमप्यर्थ
तस्मात् संभविनोऽर्थस्य
तस्माददृष्टतत्त्वानां
तस्माद् व्रीहित्वमधिकं
तस्मिन्नभेदे भेदानां
तस्यैवास्तित्नास्तित्व
तथा जात्युत्पलादीनां
तथा द्विर्वचनेऽचीति
तथा पदानां सर्वेषां
तथा पिकादियोगेन
तथा स्वरूपं शब्दानां
तथाहि संग्रामयतेः
तथैव भागे सादृश्यं
तथैव रूपशक्तिभ्या
तथैव स्वार्थिकाः केचित्
तथैवैकस्य वाक्यस्य
तानि शब्दान्तरण्येव
तान्यम्नायान्तराण्येव
ताभायो या जायते बुद्धि
तिङन्तान्तरयुक्तेषु
तिष्ठतेरुपयोगश्च
तुल्यायामनुनिष्पत्तौ
तेन चापि व्यवच्छिन्ने
तेषां तु कृत्स्नो वाक्यार्थः
तेषामत्यन्तनानात्वं
तैस्तु नामसरूपत्व

द)दर्शनं सलिले तुल्यं

दर्शनस्यापि यत्सत्यं
दीर्घप्लुताभ्यां तस्य स्याद्
दुर्लभं कस्यचिल्लोके
दृश्यादिस्तु क्रियैकापि
देवदत्तादिषु भुजिः
देशकालेन्द्रियगतै
द्वावभ्युपायौ शब्दानां
द्विष्ठानि यानि वाक्यानि

ध)धातोः साधनयोगस्य

न)न कूपसूपयूपाना

न च सामान्यवत् सर्वे
न चापि रूपात् सन्देहे
न नित्यः परमात्राभिः
न लोके प्रतिपत्तृणा
न वाक्यस्याभिधेयानि
नष्टरूपमिवाख्यात
न संविधानं कृत्वापि
नानात्वस्यैव संज्ञान
नामाख्यातसरूपा ये
नार्थवत्ता पदे वर्णे
निघातादिव्यवस्थार्थं
नित्यत्वे समुदायानां
नित्येषु तु कुतः पूर्वं
निपाता द्योतकाः केचित्
निमित्तभेदात् प्रक्रान्ते
नियतं साधने साध्यं
नियताः साधनत्वेन
नियतास्तु प्रयोगा ये
नियमः प्रतिषेधश्च
नियमद्योतनार्था वा
निराकाङ्क्षाणि निर्वृत्तौ
नराधारप्रवृत्तौ च
निर्देशे लिङ्गसंख्यानां
निर्मन्थनं यथाऽरण्यो
निवृत्तभेदा सर्वैव
नैवाधिकत्वं धर्माणां
न्यायप्रस्थानमार्गास्ता

प)पचिक्रिया करोमीति

पदप्रकृतिभावश्च
पदमाद्यं पृथक्सर्वं
पदरूपं तु यद्वाक्य
पदवाच्यो यथा नार्थः
पदस्योच्चारणादर्थो
पदानामर्थयुक्तानां
पदानि वाक्ये तान्येव
पदाम्नायश्च यद्यन्यः
पदार्थे समुदाये वा
परिगृह्य श्रुतिं चैकां

पर्वतदागमं लब्ध्वा
पात्रादिभेदान्नानात्वं
पाद्यवत् सा विभागेन
पारार्थ्यस्याविशिष्टत्वा
पुरारादित भिन्नेऽथें
पूर्वं पदेष्वसंसृष्टो
पूर्वैरर्थैरनुगतो
पृथङ्निविष्टतत्त्वानां
प्रकाशकप्रकाश्यत्वं
प्रक्षालनं शरावाणां
प्रज्ञाविवेकं लभते
प्रज्ञुसंज्ञ्वाद्यवयवै
प्रतिपादयता वृत्ति
प्रतिबोधाभ्युपायास्तु
प्रतिवर्णमसंवेद्यः
प्रमाणत्वेन तां लोकः
प्रयोक्तैवाभिसन्धत्ते
प्रयोगदर्शनाभ्यासा
प्रयोगाद भिसन्धान
प्रयोगार्हेषु सिद्धः सन्
प्रसज्यप्रतिषेधोऽयं
प्रसिद्धार्थविपर्यास
प्रसिद्धेरुद्वमिकरी
प्राधान्यात्तु क्रिया पूर्वं
प्राप्तस्य यस्य सामर्थ्या
प्रायेण संक्षेपरुची
प्रासङ्गिकमिदं कार्यं
प्लुतस्याङ्गविवृद्धिं च
फ)फलवन्तः क्रियाभेदा;

ब)बहुष्वपि तिङन्तेषु

बहुष्वेकाभिधानेषु
बीजकालेषु सम्बद्धा
बुद्धिस्थादभिसम्बन्धा
बैजिसौभवहर्य्यक्षैः
ब्राह्मणानां श्रुतिर्दध्नि
ब्राह्मणार्थो यथा नास्ति

भ)भागानाममनुपश्लेषा

भागैरनर्थकैर्युत्का
भावनानुगतादेत
भिन्नव्यापाररूपाणां
भिन्नाविजियजी धात्

भुजिदून्द्वैकशेषाभ्या
भेदनिर्वचने त्वस्य
भेदपक्षेऽपि सारूप्या
भेदसंसर्गशत्की द्वे
भेदानाकाङ्क्षतस्तस्य
भेदेनाङ्गाङ्गिभावोऽस्य
भेदेनावगतौ पूर्वं
भोजनं फलरूपाभ्या
म)मरणादिनिमित्तं च

महत्त्वं शुक्लभावं च
महानाव्रियते देशः
मृगपश्वादिभिर्यावान्

य)यः पतञ्जलिशिष्येभ्यो

यच्च कोऽयमिति प्रश्ने
यच्च द्वन्द्वपदार्थस्य
यच्च निम्नोन्नते चित्रे
यच्चानुपात्तं शब्देन
यच्चाप्येकं पदं दृष्टं
यच्चोपघातजं ज्ञानं
यजेतेति यदा द्रव्यं
यत्र चाव्यभिचारेण
यत्र साधनवृत्तिर्यः
यथाक्षेपविशेषऽपि
यथा च खदिरच्छेदे
यथा द्रव्यविशेषाणां
यथानेकमपि क्त्वान्तं
यथा पथः समाख्यानं
यथा पदसरूपाणां
यथा पदे विभज्यन्ते
यथा प्रकारणं द्वार
यथा प्रणिहितं चक्षु
यथा रोमशफादीनां
यथा शब्दोऽपि कस्मिंश्चत्
यथाश्वकर्ण इत्युक्ते
यथा संयोगिभिर्द्रव्यै
यथा साधारणो स्वत्वं
यथा सास्नादिमान् पिण्डो
यथाऽस्यावयवा वर्णा
यथेन्द्रियं सन्निपतद्
यथैक एव सर्वार्थ
यथैकदेशे भुज्यादिः
यथैवात्यन्तसंसृष्ट
यथैवानर्थकैर्वर्णै
यथैवैकस्य गन्धस्य

यदन्तः शब्दतत्त्वं तु
यदन्तराले ज्ञानं तु
यदसाधारणं कार्यं
यद्यपि प्रत्ययाधीन
यद्याकाङ्क्षा निवर्तेत
यमर्थमाहतुर्भिन्नौ
यस्त्वन्यस्य प्रयोगेण
यस्मिंस्तूच्चरिते शब्दे
यस्येत्येतदणो रूपं
यांस्तु संभविनो धर्मा
या प्रवृत्तिनिवृत्त्यर्था
ये च संभविनो भेदाः
येन क्रियापदाक्षेपः
येनार्थेनाभिसंबद्ध
ये शब्दा नित्यसम्बन्धा
येषां समस्तो वाक्यार्थः
यो वार्थो बुद्धिविषयो
योऽसौ येनोपकारेण
यौगपद्यमतिक्रम्य
र)राजशब्देन राजार्थो

श्लोपृ
रूपं सर्वपदार्थानां
रूपनाशे पदानां स्यात्

ल)लक्षणाद् व्यवतिष्ठन्ते

लक्षणार्था स्तुतिर्येषां
लक्ष्यस्य लोकसिद्धत्वा
लोकेऽर्थरूपतां शब्दः

व)वक्त्रान्यथैव प्रक्रान्तो

वप्रप्राकारतल्पैश्च
वर्णवाक्यपदेष्वेवं
वर्णानां च पदानां च
वर्णानामर्थवत्त्वं तु
वर्णानामर्थवत्तायां
वर्णान्तरसरूपं च
वर्णेन केनचिन्न्यूनः
वर्त्मनामत्र केषाञ्चिद्
वस्तूपलक्षणं शब्दो
वाक्यं तदपि मन्यन्ते
वाक्यस्य बुद्धौ नित्यत्व
वाक्यस्यार्थात् पदार्थाना
वाक्यात् प्रकरणादर्था

वाक्यानां समुदायश्च
वाक्यान्तराणां प्रत्येकं
वाक्यार्थः संनिविशते
वाक्यार्थे योऽभिसम्बन्धो
वाक्येष्वर्थान्तरगतेः
वाचिका द्योतिका वा स्यु
विच्छेदग्रहणोऽर्थाना
विच्छेदप्रतिपत्तौ च
विज्ञातार्थं पदं यच्च
विधीयमानं यत्कर्म
विध्यत्यधनुषेत्यत्र
विना संख्याभिधानाद्वा
विनियोगादृते शब्दो
विपर्यासादिवार्थस्य
विरुद्धं चाभिसम्बन्ध
विशिष्टैव क्रिया येन
विशेषविधिनाऽर्थित्वाद्
विशेषशब्दाः केषाञ्चित्
विषयं कृत्रिमस्यापि
वीप्साया विषयाभावात्
वृक्षो नास्तीति वाक्यं च
वृद्ध्यादीनां च शास्त्रेऽस्मि
वृषलैर्न प्रवेष्टव्य
वैरवासिष्ठगिरिशा
व्यर्थानां सन्निधानेऽपि
व्यवहाराय नियमः
व्यवायलक्षणार्थत्वा
व्याघ्रादिव्यपदेशेन
व्याप्तिमाँश्च लघुश्चैव

श)शत्किव्यापारभेदोऽस्मिन्

शतादाने प्रधानत्वाद्
शब्दव्यवहिता बुद्धि
शब्दस्य न तविभागोऽस्ति
शब्दस्वरूपमर्थस्तु
शब्दानां क्रममात्रे च
शास्त्रार्थ एव वर्णाना
शास्त्रे क्वचित् प्रकृत्यर्थः
शास्त्रे तु महती संज्ञा
शास्त्रे प्रत्यायकस्यापि
शास्त्रेषु प्रक्रियाभेदै
शुक्लादयो गुणाः स्न्तो
शुद्धस्योच्चारणो स्वार्थः
श्रुतिमात्रेण यत्रास्य

स)संख्याप्रमाणसंस्थान

संघस्येव विधेयत्वात्
संघैकदेशे प्रक्रान्तान्
संज्ञान्तराच्च दत्तादे
संज्ञाशब्दैकदेशो य
संज्ञास्वरूपमाश्रित्य
संप्रत्ययप्रमाणत्वात्
संप्रत्ययार्थाद् बाह्यो
संसर्ग इव रूपाणां
संसर्गरूपं संसृष्टे
संसर्गिषु तथाऽर्थेषु
संसगों विप्रयोगश्च
संसृष्टानां विवेकित्वं
संस्कारादिपरिच्छिन्ने
संस्थानवर्णावयवै
संहत्यापि च कुर्वाणा
संहिताविषये वर्णाः
सकृच्छ्रुता सप्तदश
सङ्घैकशेषद्वन्द्वेषु
स चोपजातः सम्बन्धो
स तस्मिन् वाचके शब्दे
स त्वनेकपदस्थोऽपि
सदित्येव तु यद्वाक्यं
सन्त एव विशेषा ये
समन्वित इवार्थात्मा
समानेऽपि तु शब्दत्वे
समुच्चिताभिधानेऽपि व्यति
सम्मुच्चिताभिधानेऽपि विशिष्टार्था
समुदायावयवयो
समुदायोऽभिधेयो वा
सम्प्रसारणसंज्ञायां
सम्बन्धिधर्मा संयोगः
सम्बन्धे सति यत्त्वन्य
सम्बोधनपदं यच्च
सम्भवे वाभिधानस्य
सम्भूय त्वर्थलिप्सादि
सरूपाणां च वाक्यानां
सर्पेषु संविधायापि
सर्वं सत्त्वपदं शुद्धं
सर्वभेदानुगुण्यं तु
सर्वशक्तेस्तु तस्यैव
सर्वस्वरूपैर्युगपत्
सर्वात्मकत्वादर्थस्य
सर्वैरवयवैस्तुल्यं
स वाचको विशेषाणां
सहस्थितौ विरोधित्त्वं
साकाङ्क्षावयवं भेदे
साक्षाच्छब्देन जनितां

साधारणत्वात् संदिग्धाः
सामर्थ्यप्रापितं यच्च
सामर्थ्यमौचिती देशः
सामान्यार्थस्तिरोभूतो
सामान्येनोपदेशश्च
सामिधेन्यन्तरं चैव
सार्थकानर्थकौ भेदे
सूक्ष्मं ग्राह्यं यथाऽन्येन
सोऽयमित्यभिसम्बन्धाद्
सोऽयमित्यभिसम्बन्धे
स्तुतिनिन्दाप्रधानेषु
स्थादिभिः केवलैर्यच्च
स्पर्शप्रबन्धो हस्तेन
स्वभावचरणाभ्यास
स्वरवृत्तिं विकुरुते
स्वरूपं विद्यते यस्य
स्वार्थभावं प्रकाश्यासौ
स्वार्थे प्रवर्तमानस्य

ह)ह्रस्वस्यार्द्धं च यद्दृष्टं

हेतुहेतुमतोर्योग

Gsamudesha

अथ जातिसमुद्देशः ।
श्री गणेशाय नमः ।
।। ओम् नमः श्रीभगवत्पाणिनिकात्यायनपतञ्जलिभ्यः ।।
(1) यस्मिन्संमुखतां प्रयाति रुचिरं कोऽप्यन्तरुज्जृम्भते
नेदीयान्महिमा मनस्यभिनवः पुंसः प्रकाशात्मनः ।
तृप्तिं यत्परमां तनोति विषयास्वादं विना शाश्वतीं
धामानन्दसुधामयोर्जितवपुस्तत्प्रातिभं संस्तुमः ।। 1 ।।
काण्डद्वये यथावृत्ति सिद्धान्तार्थसतत्त्वतः ।
प्रबन्धो विहितोऽस्माभिरागमार्थानुसारिभिः ।। 2 ।।
तच्छेषभूते काण्डेऽस्मिन्सप्रपञ्चे स्वरूपतः ।
श्लोकार्थद्योतनपरः प्रकाशोऽयं विधीयते ।। 3 ।।
(2) इह पदार्थष्टकविचारउपरत्वाद् वाक्यपदीयस्य प्रथमकाण्डेन प्रयोजनादिपदार्थे निर्णीतेऽनन्तरकाण्डोपपादितोपपत्तिभिः वाक्यतदर्थयोरन्वाख्येयस्थितलक्षणयोः पदार्थयोर्निर्णीतत्वात् तदौपयिकापोद्धाररूपपदविचारः प्रक्रम्यते । तत्रानियतविकल्पो यथाभिप्रायमपोद्धार इति यथासंभवं पदभेदानुद्दिशति--
द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधापि वा ।
अपौद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ।। 1 ।।
(3) वाक्यस्यैव निरंशस्य वाचकत्वादन्तरा पदप्रतिपत्तिर्विभ्रम इति किमसत्येन पदेन व्युत्पादितेनेत्याशङ्क्य `अपोद्धृत्यैव वाक्येभ्यः' इत्याह । अपोद्धृत्य कल्पनाबुद्ध्या पृथक् पदं निष्कृष्य । अखण्डवाक्यव्युत्पत्तावुपायः

पदव्युत्पत्तिर्वाक्यवादिनाम्,अखण्डपदव्युत्पत्ताविव परिकल्पितरूपप्रकृतिप्रत्ययागमादेशादिप्युत्पत्तिः पदवादिनाम् । आनन्त्याद्धि वाक्यानां स्वालक्षण्येनाशक्या व्युत्पत्तिः कर्तुमिति सदृशपदद्वारा तदुपपत्तिरित्यर्थः ।।

(4) उभयोरपि चापोद्धृतस्यासत्यत्वं समानम् । तथा हि-अनियतानुपूर्वीको यथार्थं परिकल्पितान्वयव्यतिरेकनिबन्धनो वाक्यवादिनां पदापोद्धारः । एवं पदवादिनां शास्त्रीयान्वयव्यतिरेकनिमित्तार्थापोद्धारवशः प्रकृतिप्रत्ययाद्यपोद्धारः । यदाह वाक्यकारः--

`सिद्धं त्वन्वयव्यतिरेकाभ्याम्' (Va on P.I.2.45)

इति । तत्र भिन्नत्वं सामान्यम्, द्विधा-इत्यादिको विशेष इति विधार्थे धाप्रत्ययोपपत्तिः । प्रकारो हि विधार्थः, स च सामान्यस्य भेदको विशेषः, सादृश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते इत्येकीयमतम्, कैश्चिद् इति वचनात् । भेदेऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यते इत्युक्तेः । यदि वा अत्र बुद्धिरूपप्रकल्पितं सादृश्यमेव विधार्थः । ज्ञानप्रतिबिम्बितस्य हि बाह्यानुकारित्वेन सादृश्यं सर्वत्र प्रकारार्थः, संकल्पितसादृश्यस्य बाह्यस्य निर्वर्तनात् वाक्याच्चापोद्ध्रियमाणस्य पदस्य वाक्यार्थांशपरिकल्पनया अर्थवत एवापोद्धारो युक्तः । अर्थापोद्धार एव हि पदापोद्धारस्य निमित्तम् । अनिमित्ते हि तस्मिन्वर्णापोद्धारस्यापि प्रसङ्गातेषामपि व्युत्पाद्यता स्यात् ।

(5) वाक्यार्थश्च स्थितलक्षणो निरंशः कारकोत्कलितशरीरक्रियास्वभावः । तत्र चांशांशिकल्पनया अपोद्धारे कारकात्मा क्रियात्मा चांशो विभागार्ह इति सिद्धसाध्यलक्षणांशद्वयविषयः, पदापोद्धारो द्विविधो नामाख्यातरूपः प्राथमकल्पिकः,शक्तिशक्तिमतोरभेदात् कारकात्मा सिद्धरूपोंऽशः । यद्यपि च नामपदानां प्रत्ययार्थस्य संख्यादेः शाब्दं प्राधान्यं तथाप्यर्थतः प्रातिपदिकार्थस्य जात्याच्छुरितस्य द्रव्यस्यैव प्राधान्यं सिद्धरूपस्य, संख्याकारकशक्तीनां तदाश्रयत्वात्, अनयोरेव च नामाख्यातयोर्विशेषणत्वान्निपातेपसर्गकर्मप्रवचनीयलक्षणः पदभेदोऽन्तर्भवति ।

(6) तथा हि-सिद्धार्थाभिधायि नामपदमिति तदर्थगतं विशेषं द्योतयन्निपातः तत्रैवान्तर्भवति । सिद्धं ह्यर्थं साक्षाद् वाभिदधातु तद्गतं विशेषं वा प्रकाशयतु, नेयता भेदः । स्वरादयस्तु केचित् सत्त्प्रधाना एवेति तेऽपि नामपदमेव । ये तु हिरुगादयः क्रियाप्रधानाः तेषामाख्यातेऽन्तर्भावः । न हि तिङन्तमेवाख्यातम्, क्रियाप्रधानस्य सर्वस्यैव तल्लक्षणत्वात् । अत एवोपसर्गकर्मप्रवचीयपदान्यप्याख्यातपदमेव, साध्यार्थगतविशेषद्योतनात् । एवं निपातोऽपि । तद्गतभेदान्तरविवक्षायान्तु निपातोपसर्गयोरपि कैश्चित् पृथक्करणम् । तथा हि-अस्त्येवापोद्धारेऽर्थमात्राविशेषोऽनयोः । न ह्येतौ साक्षादर्थं वदतः, अपि तु तद्गतविशेषद्योतकाविति वाचकाभ्यां नामाख्याताभ्यां प्रविभक्तौ । सिद्धसाध्यार्थविषयविशेषद्योतकत्वान्निपातानां साध्यैकनियतत्वाच्चोपसर्गाणां परस्परतो भेदः । कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसंबन्धावच्छेदहेतव इति संबन्धविशेषद्योतनद्वारेण क्रियाविशेषप्रकाषनादुपसर्गेष्वेवान्तर्भवन्तीति चतुर्धा एव कैश्चिति पदं भिन्नम् ।

(7) साक्षात्क्रियाविशेषप्रकाशनाभावात्तदपि पञ्चमं पदमिति कैश्चित् । तथा हि-कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति अतिक्रान्तक्रियाख्यानलक्षणस्य व्यापारस्यात्र संभवो न तु वर्तमानस्येत्युपसर्गेभ्यो भेदः । क्रियागतविशेषद्योतनपूर्वकं हि संबन्धावच्छेदनमत्र वर्तमानम् । तथा हि सर्वः संबन्धः क्रियाकृतः, उपकारप्रभावितत्वात् तस्य, क्रियामन्तरेणोपकारभावात् । तत्र क्वचित् क्रियाशब्दः श्रूयते क्वचिन्न । यत्र श्रूयते तत्र श्रौत एव संबन्धविशेषवसायः । तद्यथा मातुः स्मरति, मातुः स्मृतम्,सर्पिषो जानीते इत्यादौ । क्रिया हि स्वभावादेव क्रियान्तरव्यधानमन्तरेण द्रव्यैः संयुज्यते । अन्ये तु यस्मान्मातृविषये प्रवर्ततेऽवतिष्ठते वा तस्मान्मातृसंबन्धीदं स्मरणमिति क्रियाकारकभावपूर्वक एवायमपि संबन्ध इति वर्णयन्ति ।

(8) अश्रुते तु क्रियापदे द्वयी गतिः । क्वचित् संबन्धिस्वरूपमहिम्नैव नियतक्रियाक्षेपसिद्धेः प्रतिनियतक्रियाकारकभावपूर्वकत्वं शेषसंबन्धस्य विनैव कर्मप्रवचनीयमवगम्यते । तद्यथा-उपगोरपत्यम्, वृक्षस्य शाखेत्यादावपत्यापत्यवत्संबन्धो जनिक्रियानिमित्तोऽवयवयविसंबन्धश्च स्थितिक्रियानिमित्त इत्यादि । क्वचित्तु संबन्धानां प्रतिनियतक्रियापूर्वकत्वावधारणे नास्ति सामर्थ्यम् । तद्यथा-राज्ञः पुरुष इत्यत्र स्वस्वामिभावो भरणाद्यनेकक्रियानिमित्त इत्येवावगम्यते । क्रियाविशेषस्तु नावधार्यते

तन्निमित्तभूतः । तथा च भाष्यम्--

`यदेतत्स्वं नाम तच्चतुर्भिः प्रकारैर्भवति भरणादपहरणात्क्रयणाद्याञ्चया' ।(M.Bh. on P.2.3.50 Cf. Kielhorn 1.463)

इति । दानादीनां त्वन्यतमाविनाभावात्क्रिया अनुमीयत एव । क्वचित्त्वविनाभाविनी क्रियापि न प्रतीयते । तथा चैवंजातीयके विषये कर्मप्रवचनीयो नियतविशिष्टक्रियाकृतत्वं संबन्धस्य विशेषमवगमयति । तदुक्तम्--

"जनयित्वा क्रिया काचित्संबन्धं विनिवर्तते ।

श्रूयमाणे क्रियाशब्दे संबन्धो जायते क्वचित् ।। (Vak.a.II.197)

स चोपजातः संबन्धो विनिवृत्ते क्रियापदे ।

कर्मप्रवचनीयेन तत्र तत्र नियम्यते ।। " (Vak.a.II.199)

इति । नियमस्तस्य नियतक्रियाजनितत्वम् । तथा हि--शाकल्यस्य संहितामनु प्रावर्षदिति योऽयं संहिताप्रवर्षमयोर्हेतुहेतुमद्भावलक्षणः संबन्धः स नियतक्रियाजनित इत्यनुना वेद्यते । अनुनिशम्येत्यत्रानोर्निशमयतिक्रियासाहचर्योपलब्धेरिह संपाठरूपत्वात्संहितायास्तदनुमानस्यौचित्यात् तत्र क्रियावचनत्वमस्यान्यत्र दृष्टषक्तेर्न कल्प्यम् ।

(9) द्योत्यार्थनिष्ठं च द्योतकत्वमिति तदपि क्रियापदाप्रयोगादत्र नास्ति । न च क्रियापदाक्षेपकत्वम्, यथा प्रादेशं विपरिलिखतीति । अत्र वेर्लेखनासमन्वयानुपपत्तेर्निर्मातिक्रियाक्षेपकत्वम् । कारकविभक्तिर्ह्यत्र प्रादेशमिति द्वितीयेति युक्तस्तत्समुचित क्रियाक्षेपः । इह तु संहितामिति शैषिकीयं विभक्तिरिति कथं क्रियाक्षेपः । क्रियाकारकयोरेव परस्परमाक्षेप्याक्षेपकभावस्याविनाभावेन न्याय्यत्वात् । तद्यथा प्रविश, पिण्डीमित्यादौ । नापि संबन्धवाचित्वमत्रानोः, विभक्त्यैव तदभिधानादिति संबन्धावच्छेदस्य प्रत्यायको नान्यः संभवतीति पारिशेष्यादनोरत्र सामर्थ्यामध्यवसीयते । तदुक्तम्--

`क्रियया द्योतको नायं संबन्धस्य न वाचकः ।

नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ।। (Vak.a.II.204)

इति । भेदको विशेषद्योतक इत्यर्थः । अयमत्र भावः । यदनन्यथासिद्धं तत्रानोर्व्यापारकल्पना युक्ता । यत्पुनरन्यथा अर्थसामर्थ्यादिना निमित्तेन सिध्यति न तत्र तस्य शक्तिः कल्पयितुं पार्यत इति पदान्तराणामर्थान्तर निवेशात्संबन्धविशेषस्य ततोऽनवगतस्य कर्मप्रवचनीयविषयता सिद्धा । ननु च

`यदत्राधिक्यं वाक्यार्थस्सः'(M.Bh.onP.2.3.46Cf.Kiel.4-51.462) इति क्रियाविशेषजनितत्वलक्षणः संबन्धस्यावच्छेदो वाक्यार्थः किमिति न कथ्यते । अनोस्तु पश्चाद्भावमात्रवृत्तित्वमेवेति ।

(10) अत्रोच्यते--इहाधिक्यं वाक्यार्थत्वेनोध्यमानं पदार्थपृष्ठपातित्वेनैवानुसरणीयम् न तु पदार्थोल्लङ्घनेन । तत्तद्वाक्योपात्तस्य हि साध्यस्य वा विशेष्यस्य वोपात्तैरेव साधनैर्विशेषणैश्च संसर्गस्तत्राधिक्यम् । तद्यथा--गां शुक्लामानय, नीलोत्पलमिति च । अत एवोच्यते--

`आश्रयाश्रयिणोर्वाक्यान्नियमस्तववतिष्ठते ।'

इति । इत्थं चानुपात्तस्यैव पदार्थस्य वाक्यात्प्रतीतिर्नास्तीति न संबन्धावच्छेदोऽत्रापदार्थो वाक्यार्थः शक्यते कल्पयितुमिति कर्मप्रवचनीयविषय एवायम् । यद्वक्ष्यति--

`निमित्तनियमः शब्दात्संबन्धस्य न गृह्यते ।

कर्मप्रवचनीयैस्तु स विशेषेऽवरुध्यते ।।' (Vak.c.सा.शे.3)

इति । अत्र च दर्शनद्वयम्--स्वरूपेणैव संबन्धान्तरविलक्षणः कर्मप्रवचनीयेन संबन्धोऽवच्छिद्यते, क्रियाविशेषजनितत्वेन वेति । तत्र स्वरूपेणावच्छेदे विशिष्टक्रियाजनितत्वप्रतीतिः संबन्धिविशेषपर्यालोचनालभ्या । तथा हि--अधि ब्रह्मदत्ते पञ्चालाः इति स्वस्वामिभावोऽयं संबन्ध इत्यधिना वेद्यते । ब्रह्मदत्तश्च स्वामी ईश्वरः पञ्चालाश्च जनपदः स्वमिति तयोः संबन्धिनोः

परिपालनकरादानाक्रियाप्रभावित एवायं संबन्धो न्याय्य इत्यवगम्यते । एवमभिमन्युरर्जुनतः प्रतीति प्रतिना सादृश्यलक्षणोऽयं संबन्ध इति द्योत्यते । स पुनः संबन्धिस्वरूपपर्यालोचनादत्र संप्रहरणादिक्रियाकृत इत्यवगम्यते । इत्थं च शाकल्यस्य संहितामनु प्रावर्षदित्यत्रापि हेतुफलभावो नामायं संबन्ध इत्येतावत्येवायमनुर्विश्राम्यति । पाठविशेरूषपत्वात् संहिताया निशमनक्रियावगतिः । शब्दश्रवणेन हि देवोऽवर्षदिति संबन्धमहिम्ना विशिष्टक्रियाप्रभावितत्वमवसीयते । केचिदियाननोरेव व्यापार इत्याहुः ।

(11) स्वरूपावच्छेदेऽपि च क्रियायाः कार्यभूतसंबन्धापेक्षया अतीतत्वात्कर्म प्रोक्तवन्त इत्यर्थस्समन्वेत्येव । वस्तुतः क्रियाफलस्यैव संबन्धस्य प्रकाशनात् । यथा तु तत्रभवद्भर्तृहरेस्तत्र तत्राभिप्रायो लक्ष्यते तथा निमित्तविशेषावच्छेद एव कर्मप्रवचनीयकृत इति राद्धान्तः । अधि ब्रह्मदत्ते पञ्चालाः इति परिपालनक्रियाहितत्वं स्वस्वामिभावस्याधिना व्यज्यते । अभिमन्युरर्जुनतः प्रतीत्यमित्रपराजयादिकृतोऽनुकार्यानुकरणभावः प्रतिना प्रकाश्यते इत्यादि सर्वत्र योज्यम् । सुस्तुतम्, अति स्तुतमित्यादौ तु

`सुः पूजायाम्' (P. 1.4.94)

`अतिरतिक्रमणे च' (P.1.4.95)

इत्यादिना कर्मप्रवचनीयसंज्ञाधिकारिकी स्वार्थनिरपेक्षैवोपसर्गसंज्ञाबाधनाय प्रवर्तते । यथोक्तम्--

`कर्मप्रवचनीयत्वं क्रियायोगे विधीयते।

षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां विधर्मणाम् ।।'(Vak.a.II.202)इति । आर्थेन तु रूपेण विभागे प्रस्तुते क्रियाविशेषावद्योतकत्वादुपसर्गपदे स्वत्यादिरन्तर्भवतीति नाव्याप्तिः । तदेवं वाक्यादपोद्ध्रियमाणस्य पदस्यापोद्धारार्थविशेषाश्रयेण यथासंभवं भेदो निरंषकवाक्यव्युत्पत्त्युपायभूतः प्रदर्शितः । अत एव स्वादिपदं वाक्यव्युत्पत्त्यनङ्गत्वाच्छस्त्रे संकेतितं सुबन्तपदव्युत्पत्त्युपायभूतं नेह गणनार्हं प्रकृतिप्रत्ययवदिति दृष्टान्तपक्षनिक्षिप्तमिति नाव्याप्तिः । पदात्किलासावपोद्धारो न वाक्यात् ।। 1।।

(12) तदित्थं पदापोद्धारे प्रदर्शिते तदर्थस्यापोद्धृतस्य सिद्धसाध्यरूपद्वययोगिनो मतभेदेन स्वरूपापदर्शनार्थमाह--

पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा ।
पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ ।। 2 ।।

(13) अर्थद्वारेण पदं परीक्ष्यत इति दर्शनभेदेन प्रथममपोद्धारपदार्थविचारः । तथा हि--सर्वेषामपि शब्दानां पदरूपाणां नामाख्यातादिस्वभावानां जातिवादिमते जातिरेवार्थो न द्रव्यम् । द्रव्यवादिमते तु द्रव्यमेव न जातिः । द्वितीयेन वा शब्देन पदार्थान्तरं सूचितं जातिविशिष्टद्रव्याभिधानमिति । अत एव तदेव संकलनारूपं पदार्थाविति स्फुटीकृतम् । अन्यथा वार्थे प्रक्रान्ते चार्थोपसंहारोऽयं नोपपद्यते । तद्वदभिधाने तु अभिधानं तावद् द्वयोरपि समानम्, विरग्य व्यापाराभावाच्छुब्दस्य । आर्थस्तु जातिद्रव्ययोर्गुणप्रधानभावः । यद्वा प्राधान्येनैव भिन्नविषयतया पाणिनिदर्शने जातिद्रव्ये शब्देनाभिधीयेते इत्ययमत्र पक्षः पदार्थौ इत्युक्तः । तत्र नामपदस्य गौरित्यादेः गोत्वादिजातिः नियतक्रियाविषयसाधनैकार्थसमवेतसंख्याजातिविशेषभावमापन्ना अभिधेया । अनाश्रयाया जातेरनुपपत्तेः । सामर्थ्यात्प्रतीतं द्रव्यम् ।

(14) एवमाख्यातपदस्यापि विभिन्नक्रियाक्षणसमवेताभिन्नाभिधानप्रत्ययहेतुक्रियाजातिविषया साक्षाद्वाचकशक्तिः । कारकादिजातिस्त्वत्र गुणभूता नामपदगतया च कारकजात्या क्रियाजातिराख्यातपदगता व्यक्तिद्वारेण समन्वयमेति । द्रव्यजातिस्त्वेकार्थसमवायात्साधनशक्तिद्वारेण क्रियायोगमनुभवति । संख्याजातिरप्येकार्थसमवायात्स्वव्यकृत्यात्मना शक्तिमुखेनैव क्रियान्वयिनीति सर्वपदार्थसमन्वयोपपत्तौ कल्पते वाक्यार्थः । यथा चोत्क्षेपणादिक्षणैवरसमसमयभाविभिरप्यावृत्त्योत्क्षेपणत्वादिजातिरभिव्यज्यते तथा अधिश्रयणादिभिः क्रियाक्षणैः पचत्यादिक्रियाजातिरिति विचारयिष्यते । व्यक्तिद्वारकं चास्या नित्याया अपि साध्यत्वमुपपद्यते ।

(15) उपसर्गादिभिरप्यत्र दर्शने नामाख्यातसहभावी तदर्थस्य विशेषावद्योतकत्वाज्जातिपदार्थ एव । विशेषस्य विशिष्टविश्रान्तरयैवावसायात्कर्मप्रवचनीयोऽपि संबन्धजातिनिष्ठ एव । गुणशब्दानामपि शुक्लादीनां गुणजातिर्वाच्या ।

संज्ञाशब्दानामपि डित्थादिशब्दानां जातिवाचित्वं समर्थयिष्यते ।

(16) तदित्थं वाजप्यायनाचार्यमतेन सार्वत्रिकी जातिपदार्थव्यवस्थोपपद्यते । व्याडिमते तु सर्वशब्दानां द्रव्यमर्थः, तस्यैव साक्षात्क्रियासमन्वयोपपत्तेः वाक्यार्थाङ्गतया चोदनाविषयत्वात् । यथाह--

`चोदनासु च तस्यारम्भात्'(Va.on P. 1.2.64)

इति । एकजातिसमन्वयवशेन चात्र संकेतोपपत्तिः । अनभिधीयमानापि जातिरुपलक्षणीक्रियते शब्दार्थे यथा गृहादौ काकादि । आख्यातेऽपि च साधनाधारद्रव्यप्राधान्यं व्याडिमते । देवदत्तः पचतीति द्रव्येणैव साक्षात्सामानाधिकरण्योपपत्तेः । क्रिया तु गुणभूतात्र, व्यापाराविष्टं हि द्रव्यमाख्यातार्थः, इदं तदिति सर्वनामप्रत्यवमर्शयोग्यं चात्र द्रव्यमिति सार्वत्रिकीयं व्यवस्था । तथा च वक्ष्यति--

`द्रव्यधर्मा पदार्थे तु द्रव्ये सर्वोऽर्थ उच्यते ।'

इति । अत एव शुक्लादीनामपि द्रव्यपदार्थता सिद्धा । तत्तदुपाधिव्यवच्छिन्नं वा ब्रह्म द्रव्यशब्दवाच्यं सर्वशब्दानां विषय इति वक्ष्यत एव । व्यक्तिपर्यायो वा द्रव्यशब्द इति जातिव्यक्तिविकल्पेन सर्वशब्दविषयः । तथा च

सर्वशब्दानामित्यभिधानात्पदादप्यपोद्धारे प्रकृतिप्रत्ययरूपस्यापि शब्दस्य यथायोगं क्रियाकारकसंख्यादिरपोद्धारपदार्थो जातिव्यक्तिभेदेन समाम्नातः । उभयस्यापि वा शब्दात्प्रतीतेरुभयं पदार्थः । गुणप्रधानभावभेदाश्रयस्तु मतविकल्पः । नित्यत्वोपवर्णनं च

`सिद्धे शब्दार्थसंबन्धे' (Va. in पस्पशाह्निका of the M.Bh.Kiel.1.6 16)इत्यत्र भाष्ये--

`यस्मिसतत्त्वं न विहन्यते' (M.Bh.Cf.Kiel.1.7 22)

इति द्रव्यस्यापि नित्यत्वम्, प्रवाहनित्यतया शब्दात्सदैव प्रतीतेः ।। 2 ।।

(17) तदेवं दर्शनभेदेन जातिर्द्रव्यं वा पदार्थ इत्युक्ते जातिपदार्थविषयशास्त्रोपयोगी विचारोऽत्र समुद्धेशे । पदस्य हि परीक्षार्थमिदं काण्डम्, अर्थद्वारेण च पदपरीक्षा, वाक्यार्थौपयिकत्वेन च तद्विचार इति जातिपदार्थनये वाक्यार्थभूतया आख्यातपदवाच्यया क्रियया कथं समन्वयः । साधनेन हि क्रिया अन्वेति । न च जातिः साधनम् । तदाश्रयः साधनमिति चेत्, एवमपि जातेः साक्षाच्छब्देन चोदितत्वात्सामर्थ्यात्तदाधारप्रतिपत्तौ यथाचोदितानुषङ्ग इति--

`असंभवे प्रतिनिधिर्मा भून्नित्यस्य कर्मणः ।

काम्यस्य वा प्रवृत्तस्य लोप इत्यपदिश्यते ।।'(Vak.a.II.70)

इति प्रतिनिध्यनुपपत्तिरित्याशङ्क्य तत्समर्थनामाह--

`केषाञ्चित्साहचर्येण जातिः शक्त्युपलक्षणम् ।

खदिरादिष्वशक्तेषु शक्तः प्रतिनिधीयते ।। 3 ।।

(18) इह केषाञ्चित् जातिवादिनामेकार्थसमवायाच्छक्तेः प्रतिपादने जातिः उपलक्षणम्--उपायः इति मतम् । अन्येषां पुनस्तात्पर्येण जातिरेव शब्देन प्रतिपाद्यते, कार्ययोगस्तु तस्याः क्वचित्साक्षात्, क्वचिव्द्यक्तिद्वारेणेति मतम् । अथवा केषाञ्चिद् इति शब्दानाम् । ये साधनाभिधायिनः तत्र शक्तितात्पर्येण जातेरुपलक्षणत्वान्नान्तरीयकमुपादानम्, शक्तिवाचिन्या विभक्तेः केवलाया अप्रयोगार्हत्वात् । ततश्च प्रातिपदिकस्यावश्यमुपादानमिति तद्वाच्यया जात्या शक्तिरवच्छिद्यते सति संभवे । तदभावे तु तत्सदृशापरजातिसहचरितापि शक्तिर्गृह्यते, तात्पर्येण चोदनात् । वाक्यार्थभूतया हि क्रियया साधनमात्रस्याक्षेपे सिद्धे विशिष्टजातीयप्रतिपत्त्यर्थं साधनश्रुत्यपादानेऽपि जातिविशेषस्यासंभवे क्रियासाधनशक्त्यावेदनपरतया जातेः प्रयोगान्माभूत्प्रधानभूतायाः शक्तेरपि त्यागे क्रियाया असंपत्तिरिति शिष्टसमाचारादन्यजातीयद्रव्यगतापि शक्तिः परिगृह्यते । न चैवमतिप्रसङ्गः, चोदितप्रतिनिधिविषय एवैतस्य न्यायस्येष्टत्वात् । तथा च गोदोहादिचोदनासु तदसामर्थ्ये न महिष्याद्याक्षेपप्रसङ्गः ।

(19) उपसक्षमत्वाच्च जातिर्नियमं न विधत्ते । तद्यथा--उपघातकनिवारणपरे वाक्ये काकादिरिति सदृशोपादाने श्रौतार्थत्यागो

न भवति । यत्र च संभवश्चोदितस्य श्रोतस्यार्थस्य, तत्र श्रुतिः सफला । तस्मात् `खदिरे बध्नाति, पलाशे बध्नाति' इत्यादौ खदिरादेर्बन्धनसमर्थस्यालाभे तत्सदृशकदरादिशक्तसाधनपरिग्रहो युज्यते । अनाधारायाः शक्तेरसंभवात् नान्तरीयकत्वेन जातेरुपादानम्, नियमस्याविधानात् । जातिर्हि शक्त्युपलक्षणम् न कार्ययोगिनीति तदाश्रयस्याशक्तत्वे तमन्तरेण द्रव्यान्तरगतापि शक्तिर्गृह्यते । यदि तु तज्जातीयमेव शक्तं स्यात् तदा सन्निहितपरित्यागे कारणाभावात् तज्जातीयमेवोपादीयेत । तदशक्तत्वे तूपलक्षणस्योपलक्षणे चरितार्थत्वात् अन्यस्यापि तत्कार्ययोगे तदुपलक्षिता शक्तिः शास्त्रचोदितेत्यर्थान्तरगताप्यपर्युदस्तत्वादुपादीयते इति नियमो नास्ति । सदृशार्थान्तरगता च शक्तिर्गृह्यत इति नातिप्रसङ्गः ।। 3 ।।

(20) अथ येषां जातिवादिनां मते तात्पर्येण जातिरभिधेया न शक्त्युपलक्षणम्, तेषां कथं प्रतिनिधिरुपपद्यत इत्याशङ्क्याह--

अस्वातन्त्र्यफलो बन्धिः प्रमाणादीव शिष्यते ।

अतो जात्यभिधानेऽपि शक्तिहीनं न गृह्यते ।। 4 ।।

(21) अत इति । अस्वातन्त्र्यफलस्य बन्धेर्विधानात् चोदनात् जातेः प्रतिपाद्यत्वेऽप्युपलक्षमत्वाभावेऽप्यस्वातन्त्र्यप्रयोजनबन्धिविधिसामर्थ्याच्छक्तिहीनस्य खदिरादेस्त्यागे शक्तं कदरादि प्रतिनिधीयते । वाक्यार्थभूता हि बन्धिक्रिया प्रधानमिति तत्संपादनशक्तस्य पदार्थस्य परिग्रहो न्याय्यः । ननु च दृष्टफले बन्धौ कोऽनुरोध इत्याशङ्क्योक्तम् प्रमाणादीव शिष्यते इति । यथा दृष्टफलं प्रमाणादि चोदितं तथा तदङ्गभूतोऽपि बन्धिरिति सर्वथासावनुरोध्यः । तथा हि-असति पशोर्यूपे बन्धने प्रमाणाद्यनुपपत्तावदानग्रहाभावात् स्वर्गफलस्य यजेरेवासंपत्तिः स्यादिति तदनुरोधात्तदङ्गसंपत्त्यर्थं तत्समुचितसाधनक्षेपः । तत्र प्रमाणं हिसाप्रारम्भः । मीञो हिंसार्थस्य ल्युट्येज्विषये रूपम्, आत्वे च कृते मानम्, तस्यारम्भः प्रशब्देन द्योत्यते । आदिग्रहणादालम्भनादेरवदानग्रहणपर्यन्तस्य तदुत्तरस्य प्राकरणिकस्याङ्गकलापस्यानुरोधः । अयमत्र पक्षद्वयेऽप्याशयः । यदि नाम जातेः प्रकृत्यर्थभूतायाः शक्त्यवच्छेदकत्वेनोपात्ताया असंभवः तज्जात्यवच्छिन्नस्याशक्तत्वात् तथापि प्रत्ययार्थस्य शक्तेरवच्छेद्याया अपि त्यागो न युक्तः, अपि त्वन्यगतापि सा गृह्यते । मा भूत्तद्वाचिनः पदस्यानर्थक्यम्, वाक्यार्थस्य च क्रियाया असंपत्तिरिति गामालभेतेत्यादौ च सर्वत्र योग्यव्यक्रितविषयैव क्रियावृत्तिष्ठते इति प्रतिनिधावपि किमिति संभ्रमः ।। 4।।

(22) इदानीमत्रैव लिङ्गेनापि प्रतिनिधिमुपपादयति--

`संश्लेषमात्रं बध्नातिर्यदि स्यात्तु विवक्षितः ।

शक्त्याश्रये ततो लिङ्गं प्रमाणाद्यनुशासनम् ।। 5 ।।

(23) बध्नात्यर्थ उपचाराद् बध्नातिः इत्युक्तः । संश्लोषो यूपे पशोर्योजनम् तदेवास्वातन्त्र्यलक्षणफलानपेक्षं तन्मात्रम् । तद्यदि बध्नात्यर्थोऽभिमतः तदा तस्य खदिरलतयापि संपाद्यत्वसंभवे कदरोपादने सामर्थ्यं नास्तीति ततः संश्लेवादुत्तरकासं प्रमाणादीनां `पशुमालभेत', `हृदयेऽवद्यति अथ वक्षसि' इत्यादिवचनेन यदनुशासनं तदत्र समर्थद्रव्योपादाने लिङ्गम् अनुमानम् । अथवा पूर्वं बन्धिरेव लिङ्गमासीत्, इदानीं यदि संश्लेषमात्रं बध्नातिस्ततः प्रमाणाद्यनुशासनं लिङ्गमित्यर्थः । पशुविशसनाङ्गस्य हि बन्ध्यर्थस्यात्रोपादानं युक्तम् । असमर्थश्च विशसने बध्नात्यर्थो न तदङ्गमिति एकप्रकरणोपात्तप्रमाणाद्यर्थपर्यालोचनालभ्यः प्रतिनिधिः । पूर्वं पदार्थसामर्थ्यादनन्तरं वाक्यार्थसामर्थ्यात्प्रतिनिधिरुक्तः, संप्रति प्रकरणसामर्थ्यादिति पक्षत्रये विशेषः । शक्तेराश्रयः कदरद्रव्यं तत्रोपादीयमाने लिङ्गमिति संबन्धः । यद्वा शक्तिः कार्यस्य निर्वर्तको द्रव्यस्यात्मातिशयः, तदाश्रये तदभ्युपगमे इत्यर्थः ।

तदेवं यदुक्तं वाक्यकाण्डे--

`यश्च जातिसमुद्देशे प्रतिनिधिं प्रत्यपरो दर्शनभेदः' ।

इति सोऽयमिह व्याख्यातः । तत्र पुनरन्यो दर्शनभेदः प्रतिपादितः-असंभवनियमत्यागो नियममात्रबाधश्चेति । तथा हि-- त्रीहिभिर्यजेतेति देवतोद्देशेन द्रव्यत्यागस्य यज्यर्थत्वाद्यजतिक्रियैकदेशभावापन्नं द्रव्यमात्रं यजेतेत्येव सामर्थ्यात्प्राप्तम् । एतावानेव

हि यज्यर्थ इति श्रुतिप्राप्तसन्निधानमेव द्रव्यमात्रम् । द्रव्यदेवतारहितस्य त्यागमात्रस्य यज्यर्थत्वायोगात्प्रतीते तस्मिन्नर्थसामर्थ्यादनन्तरं द्रव्याक्षेपस्यायोगात् । इत्थं च क्रियाप्रधानत्वेऽप्याख्यातस्य तदेकदेशभूतं साधनाधारमपि द्रव्यसामान्यं श्रुतिप्राप्तसन्निधानं शाब्दमेव । तत्र व्रीहिभिरिति व्रीहित्वेनाविरुद्धैकार्थसमवायेन विशेषेण परिपोषः, निर्विशेषस्य सामान्यस्याभावात् । अध्यावापार्था हि व्रीहिश्रुतिः शब्दसामर्थ्यप्राप्तं द्रव्यत्वमात्रमविरोधान्न बाधते । तद्धि श्रुतिसामर्थ्यप्राप्तम्, व्रीहित्वं पुनरर्थसामर्थ्यायातम्, निर्विशेषस्य सामान्यस्याभावात् । एवं च द्रव्यत्वमात्रस्य श्रुत्या अङ्गभावश्चोदितो न वींहित्वस्य विशेषस्येति तदसम्भवेऽपि विशेषान्तरेण सामान्यमात्रस्य परिपोषे प्रतिनिधि विषये चोदितस्य बाधा न भवति ।

(24) ननु चाध्यावापे व्रीहिभिर्द्रव्यत्वस्याबिधितत्वाद्विकल्पः प्राप्नोति सर्वत्र व्रीहिभिर्यवैर्वेत्यादि । अविशिष्टं हि द्रव्यत्वं श्रुतिसामर्थ्यप्राप्तम्, तस्य चेद् व्रीहिश्रुत्या विशेषान्तरादवच्छेदो न क्रियते तदा तदपि विशेषान्तरं तेन स्वीकृतं प्राप्तसन्निध्येवेति विकल्पप्रसङ्गः तथा च व्रीहिश्रुतेरानर्थक्यम् । अत्रोच्यते-इह व्रीहित्वेन द्रव्यत्वे विशेषिते वस्तुसामर्थ्याद्यवत्वादीनामसंभवः । न हि यत्र व्रीहित्वैकार्थसमवायि द्रव्यत्वं तत्रैव यवत्वैकार्थसमवायि संभवति । ततश्चासंभवनियमो नामायम् । द्विप्रकारो हि नियमः--कश्चिच्छब्दसामर्थ्यायातो भवति यत्र पक्षे प्राप्तौ सत्यां श्रुतिः । यथा व्यक्तौ पदार्थे `विप्रतिषेधे परम्' इति । कश्चित्पुनरसत्यपि शब्दव्यापारे पदार्थानामितरेतररूपसाङ्कर्याभावादेकचोदना तदन्यनिवृत्तिफलेति पदार्थस्वरूपविमर्शायातोऽसंभवनियम इत्युच्यते । तथा चेह शब्दसामर्थ्यायातं द्रव्यत्वमिति व्रीहिभिरिति तत्राध्यावापः शब्दव्यापारः । अखण्डेऽपि हि वाक्यार्थनयेऽरोद्धारदशागतो भेदसंसर्गादिविकल्पः । तत्र व्याडिमते भेदो वाक्यार्थः, पदवाच्यानां द्रव्याणां द्रव्यान्तरनिवृत्तितात्पर्येणाभिधेयत्वात् । जातिवादिनो वाजप्यायनस्य तु मते संसर्गो वाक्यार्थः, सामान्यानां पदार्थानां संश्लेषमात्ररूपत्वाद्वाक्यार्थस्य । इयति चरितार्थे व्रीहिशब्दे व्रीहित्वस्य यवत्वादिभिर्विरुद्ध एकस्मिन्नर्थे समवाय इति तत्र तानि निवर्तन्ते । ततश्च प्रतिनिधौ वस्तुसामर्थ्यायातस्य नियमस्य बाधेऽपि शाब्दस्य द्रव्यत्वमात्रस्याबाधितत्वान्न चोदितार्थत्यागः ।

(25) ननु च निर्विशेषस्य सामान्यस्यासंभवात् यजिना विशेषनिष्ठमेव द्रव्यत्वमाक्षिप्तमिति सर्वविशेषाणां श्रुतिसामर्थ्यप्राप्तत्वात् व्रीहिभिरिति पुनः श्रुतिर्नियमफलैव श्रौतेनापि रूपेण संजातेति कथं न श्रौतार्थत्यागः । प्रतिनिधौ नैतन्न्याथ्यम् । न हि शब्दो वस्तुचिन्तामनुसरति, कस्यचिदेव वस्तुभागस्य शब्दव्यापारविषयत्वात् । तथा च टजतिशब्दस्येयत्येव सामर्थ्यं द्रव्यमात्राक्षेपे न तु तद्विशेषे । अन्यथा निर्गुणस्य च द्रव्यस्यासंभवात् गुणस्याप्याक्षेपकोऽसौ किमिति न वर्ण्यते । तस्माद् द्रव्यत्वमात्रस्यैवाक्षेपः शाब्द इति तत्परिपोषाय विशेषान्तरावापो न नियमफल इति शास्त्रेणापर्युदस्तानां विशेषान्तराणां प्रतिनिधिसिद्धिः । तदित्थमसंभवनियमत्यागो वर्णितः । नियममात्रबाधश्चाप्युच्यते । इह स्रवत्रैव क्रियाप्रधानं वाक्यार्थः । तथा च स्वसिद्ध्यर्थं योग्यद्रव्य माक्षिप्यते साधनम् । तदेव च पदान्तरेण विशिष्टं कथ्यते । इत्थं स्थिते यत्र श्रुतस्य साधनस्यासंभवस्तत्र प्रधानभूतक्रियासंपत्त्यर्थं साधनान्तरं प्रतिनिधीयते । क्रिया हि न प्रतिनिधीयते प्राधान्यात् । क्रियान्तराश्रयणे च कर्मान्तरस्याचोदितस्यानुष्ठानाच्छास्त्रार्थोल्लङ्घनं स्यादिति गुणभूतस्य साधनस्यैव प्रचिनिधिराचरितः शिष्टैः । तत्र च प्रधानभूतक्रियापदार्थाक्षिप्तस्य शास्त्रचोदितस्य साधनमात्रस्य न त्यागः, अपि तु व्रीह्यादि पदोपात्तस्य द्रव्यविषयस्य नियममात्रस्य बाधः । स च न दोषाय, शक्तिमात्रस्य साधनरूपस्य क्रियासामर्थ्याक्षिप्तस्य प्राधान्याच्छास्त्रचोदितार्थोल्लङ्घनाभावात् ।। 5 ।।

(26) तदेवमेतदनन्तरकाण्डे दर्शनद्वयमुपपादितमिति यथासंभवं प्रतिनिधिश्च चिन्तितः । इदानीं जातौ शब्देनाभिधीयमानायां तत्र जात्यन्तराभावान्निर्निमित्ता शब्दस्य प्रवृत्तिरायातेत्याशङ्क्योपपादयितुमाह--

स्वा जातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।
ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना ।। 6 ।।

(27) स्वा असाधरणी आत्मीया गोशब्दत्वादिका न तु सकलशब्दसाधारणी शब्दत्वादिः । एवं चासाधारणत्वेन विशेषणात्तया संबन्धाव्यभिचारः शब्दस्यार्थजात्या संबन्धव्यभिचारेऽपीति स्वा जातिः एव मुख्यमभिधेयमित्युक्तं भवति । तथा च वाक्यकारः--

`न वा शब्दपूर्वको ह्यर्थे संप्रत्ययः'(Va.on P.1.1.67)
इति । अत एवाव्यभिचारिण्याः स्वारूपजातेरर्थजात्यभिधाने शब्दस्य नान्तरीयकमभिधानमिति प्रथमम् इत्याह । यदभेदेन यत्प्रतिपत्तिः तदवश्यं तत्र प्रतिपत्तव्यमित्येतावतात्र प्राथम्यम्, न तु क्रमेणाभिधानात् । यद्वा संबन्धव्युत्पत्तिकालापेक्षं प्राथम्यम् । तथा हि-संबन्धव्युत्पत्तिकालेऽर्थजात्या नास्ति संबन्धः । तथात्वे वाचकत्वेन तत्र विनियोगोऽनर्थकः स्यात्, अर्थस्य प्रतिपन्नित्वादिति सोऽर्थस्तावत्तेन शब्देन न प्रतिपन्नः । यदि च स्वजात्यभिधानं तदानीं न स्यात् तदानर्थकत्वाद्विभक्तियोगो न स्यादिति

`प्राक् संज्ञिनाभिसंबन्धात्संज्ञा रूपपदार्थिका'(Vak.b.I.66)
इत्युक्तम् । रूपं हि स्वरूपं स्वा जातिर्वेति दर्शनभेदेन कथ्यते । सर्वैः इति । स्वरूपपरैरर्थपरैश्च, तस्या एव स्वरूपतया व्यवहारात् । तथाव्युत्पन्नैरपि शब्दैरविनाभावाच्छब्दस्वरूपेणावस्थिता जातिः प्रतिपद्यते । अर्थस्य झटित्येव शब्दस्वरूपाभेदेनावबोधेऽपि यथा प्रतिपादितक्रमाश्रयेण ततः स्वजातिप्रत्यायनादनन्तरमर्थजातीनां गोत्वादीनामात्मसु तस्याः शब्दजातेः समारोपस्य कल्पना न परमार्थः, शब्दविवर्तत्वेनार्थस्य शब्दात्तत्त्वतो भेदाभावात् ।

(28) यद्वा संबन्धव्युत्पत्तिकाले गोरयमर्थ इत्यर्थजात्या शब्दजातेरत्यन्तभेदात्सामानाधिकरण्यान्यथानुपपत्त्या अभेदाध्यारोपः कल्प्यते । यथा गोर्वाहीक इति । अन्यथा सङ्केतस्यैव कर्तुमशक्यत्वात् । यथा चायमनादिरपौरुषेयो वाच्यवाचकभावः तथाध्यारोरोऽपि । अन्यथा वाच्यवाचकभाव एव न घटेत, यथा बौद्धस्य दृश्यविकल्पार्थैकीकारो भेदानध्यवसायलक्षणः, न तु यथा गौर्वाहीक इत्यत्र पुरुषेच्छया अध्यारोपः । व्यवहारे शब्दार्थयोः सदैवाभेदावसायात्कथमियं प्रतिवर्णनभिव्यक्तासाधारणी जातिरसमसमयभाविभिर्वर्णैरभिव्यज्यत इति चेत् यथोत्क्षेपणत्वादिजातिरिति ब्रूमः । तथा हि--प्रत्येकं कर्मक्षणानामुपव्यञ्जकत्वेऽपि यः प्रथम उत्क्षेपणक्षणः स परमाणुमात्रदेशाक्रमणमात्ररूपत्वात् भ्रमणक्षणात् सारूप्यवशादनवधार्यमाणभेद एकैकोऽसमर्थो नियतजात्यभिव्यञ्चने इति क्षणान्तरमपेक्षते । न च तस्य भ्रमणक्षणाद्विशेषो नास्ति, उपक्रम एनोत्क्षिपामीत्येवंप्रयत्नजनितत्वात् । एवं गोशब्दमुच्चारयामीत्ययं प्रयत्नो यद्यपि गानगगनशब्दजनकात्प्रयत्नादन्य एव,हेतुभेदाच्च गकारयोरपि भेद एव तथापि सादृश्यादसौ दुरवधार इति व्यञ्जकोऽपि सन् प्रथमो ध्वनिरस्फुटमभिव्यक्तीत्यावर्तमानोऽपि न विशदतरसामान्यविशेषाभिव्यक्तौ हेतुः । यदा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ शब्दजातिविशेषोपाधियुक्ताः व्यवहारा अवतिष्ठन्ते । तदानीं साहचर्यात्परस्परावच्छेदवशेन विलक्षणतया प्रतिभासनात् । यथा च श्लोकः सकृत्पठ्यमानो नावधार्यते, अभ्यासेन तु स्फुटावभासः तथा चरमचेतसि चकास्ति रत्नतत्त्ववत्स्फोटतत्त्वम् । प्रथमाक्षरेण हि जातेराभासमात्रं जन्यते तदुत्तरोत्तरवर्णकलापेन तु स्फटतरस्फुटतमपरिच्छेदाधानम् । संस्कारविशेषोत्पादनद्वारेणाभिव्यक्तिविशेषस्य रत्नतत्त्वादौ दृष्टेः । तस्माच्छब्दादर्थं प्रतिपद्यामहे इति व्यवहाराद्वर्णानामर्थावसायजनकत्वानुपपत्तेः प्रक्रियाभङ्गस्य प्रथमकाण्ड एव विहितत्वान्निरवयवं प्रत्यायकं शब्दतत्त्वं जातिव्यक्तिभेदेन भिन्नं स्फोटस्वभावमेवाङ्गीकार्यम् । गौरयमर्थ इति च वाचकाभेदेन वाच्यप्रतीतेः तदध्यासखचितवपुर्व्ववहार्योऽर्थः । तत्र च स्वरूपस्य वाच्यता प्रथमकाण्ड एव निर्णीता, इह तु संबन्धसमुद्देशेऽपि निर्णेष्यते ।। 6 ।।

(29) तत्रैतत् स्यात्--शब्दसमवायि सामान्यं व्यधिकरणत्वात्कथमर्थजातिमभेदेन व्यपदिशेदित्याशङ्क्य निदर्शनेनैतद्व्युत्पादयति--

यथा रक्ते गुणे तत्त्वं कषाये व्यपदिश्यते ।
संयोगिसन्निकर्षाच्च वस्त्रादिष्वपि गृह्यते ।। 7 ।।
तथा शब्दार्थसंबन्धाच्छब्दे जातिरवस्थिता ।
व्यपदेशेऽर्थजातीनां जातिकार्याय कल्पते ।। 8 ।।

(30) रक्ते गुणे तत्त्वम् । तस्य रक्तस्य गुणस्य भावो रक्तत्वं लौहित्यसामान्यं गुणव्यक्तिसमवेतमुच्यते । तत्समवेतसमवायात्

कषाये रक्तगुणाधारे द्रव्ये व्यपदिश्यते व्यपदेशाय कल्पते । तद्विशेषणभूतं हि तत्कषायद्रव्यमभिधीयते लोहिता लाक्षेति । तेन संयोगिनो वस्त्रादयः तयोः संयोगिनोः कषायवस्त्रयोः संनिकर्षः संभेदः, तस्मान्निमित्तात्तत्रापि तल्लौहित्यं गृह्यते । संयुक्तसमवेतसमवायाद्वस्त्रादिष्वपि लौहित्यनिमित्तो व्यपदेशः, लोहितं वस्त्रमित्यर्थः । तथा शब्दार्थसंबन्धात् इति । लोहितगुणकषायद्रव्यसंबन्धस्थानीयात्समानाधिकरणतयावस्थितात् स्वाभाविकात्तथा केवलं व्युत्पत्तिकाले निर्ज्ञातात्तदन्यथानुपपत्त्यैवाध्यारोपस्य कल्पनात्संबन्धादेव शब्दजात्या व्यपदेशः । अर्थोऽत्रार्थजातिः, तस्या एव वाच्यत्वप्रक्रमात् । व्यपदेशे कल्पते स्वरूपाभेदेन, जातिकार्याय कल्पते-जात्यादिशब्दे जातिषु वाचकत्वेन प्रवर्तमाना स्थिता जातिर्न केवलं व्यपदेशाय कल्पते यावज्जातिकार्याय च । अथवा व्यपदेशे सति जातिकार्याय कल्पत इत्यर्थः । निःसामान्यानि सामान्यानीत्यर्थजातीनां स्वतो जातिरहितत्वे तत्कार्यं शब्दप्रत्ययानुवृत्तिलक्षणं शब्दार्थयोः सोऽयमित्यभेदेन संबन्धाच्छब्दसमवायिनी जातिरर्थेनाध्यारोपिताभेदा संपादयन्ती तदात्मना संपद्यत इत्युपचर्यते । व्यक्तिरूपे च शब्दे जातेस्समवायो न तु वर्णेष्विति अवस्थिता इत्युपपद्यते । वर्णानां हि यौगपद्याभावादवाचकत्वमिति कथं तत्र शब्दजातेः समवायस्स्यात् । केवलं स्फोटस्य जातिव्यक्तिभेदेन दर्शनद्वयमिति व्यक्तिस्फोटे जातिः समवेता । अर्थभेदेन हि भिन्नस्य नित्यस्य शब्दस्याभिन्नाभिधानप्रत्ययहेतुर्जातिरवश्याभ्युपगन्तव्या । अत एव जात्याच्छुरिताया व्यक्तेरेव वाचकत्वम् । उपलक्षणभूता तु जातिराश्रीयते इति कथमत्राननुयायिन्या व्यक्तेर्वाचकत्वमिति न चोदनीयम् ।

(31) शब्दार्थसंबधश्चात्र योग्यतालक्षणोऽभिप्रेतः । सर्वो हि शब्दः संज्ञात्वेन नियुज्यमानः सर्वत्रार्थे योग्यतालक्षणेन संबन्धेन संबद्धः । केवलं शक्त्यवच्छेदमात्रे संज्ञाकर्तुर्व्यापारो न त्वपूर्वसंकेतकरणे, अर्थसंबन्धस्यापौरुषेयत्वात् । एवं चादैक्षु वृद्धिशब्दो नापूर्व एव संकेतित इति सर्वेषामनेकार्थत्वाद्वक्तृभेदाद्वानेकत्वे समानाकारप्रत्ययनिबन्धनजातिरेषणीया । तद्यथाकाशस्य संयोगिभेदेन कल्पिताभेदस्यानेकत्वे सत्याकाशत्वं लक्ष्यते । न चैवं सर्वस्मात्सर्वार्थप्रतीतिप्रसङ्गः, प्रसिद्धिवशेनार्थप्रतीतेः कुत्रचित् कस्यचित् प्रसिद्धत्वात् । प्रसिद्धानां चार्थानामर्थप्रकरणादयो विभागहेतव उक्ताः । तद्यथा गोशब्देन नवस्वर्थेषु सन्निहितेष्वपि प्रकरणादेः प्रतिनियतार्थावसायः । तदेवं शब्दजात्या शब्दव्यक्तिर्वाचिका प्रथममभेदेन व्यपदिश्यते ततोऽर्थजातिः ततस्तव्द्यक्तिरित्ययं वास्तवः क्रमः । प्रत्यायने त्वक्रमतैव । शब्दाच्छुरितत्वेऽपि चार्थस्य न स्वरूपव्यपगमः । यथा ह्यालोकाच्छुरितोऽपि घटो न स्वरूपेण तिरोभवति, एवं शब्दस्वरूपोपरक्तोऽर्थः । स्वरूपारोपेण शब्दालोकयोरर्थप्रकाशकत्वस्यैवंविधस्य दृष्टेः । यथा च गौर्वाहीक इत्यन्त्र न गोत्वमात्रं प्रतीयते, अपि त्वध्यारोपितगोरूपो वाहीकः, एवमिहापि, न तु स्फटिकमणाविवार्थे शब्दजातेः समावेशो विवक्षितः, तस्यैव वाहीकवत् प्रत्याय्यत्वात् । स्वाभाविकश्चायमर्थप्रत्यायने शब्दानामभेदजसंबन्धोऽभ्युपाय इति प्रतिपाद्योऽपि तथैव प्रतिपद्यते । न हि पुरुषाधीनमेतत् । अनादौ संसारेऽनेनैव प्रकारेंण संबन्धव्युत्पत्तेः कोऽत्र नियतोऽध्यारोपयिता कल्प्यताम् । अव्युत्पन्नसंकेतस्यापि चाभिन्नप्रत्ययोत्पत्तेरर्थजातिरप्यस्तीति न शब्दजातिरेवाध्यारोपितास्त्विति वाच्यम् । शाब्दी चेयमेवंविधा प्रतीतिरिति चाक्षुषेण रक्तादिप्रत्ययेन निदर्शनभूतेन व्युत्पादिता । वस्तुसन्निवेशित्वाभावेऽपि च शब्दजातेरयमनादिरध्यारोपो रूढः । सदैव व्यवहारे शब्दार्थयोरभेदावसायाद्भेदस्यापि च गोर्वाहीक इतिवत् प्रतिभानान्मित्याज्ञानमिदं न भवति । प्राक् च संबन्धसंवेदनसमयादर्थजातयो भेदेनावभान्त्येव । अव्युत्पन्नसंकेतस्य बालकस्य पुरोऽवस्थितेषु सास्नादिमत्सु पिण्डेषु भिन्नः प्रत्यय उत्पद्यते तदा वाचकसन्निधानाभावादभिन्नप्रत्ययहेतुरर्थजातिरवधार्यते । अत एव कथं भेदेनानिर्धारितायामर्थजातौ शब्दजातिः समारोप्यते इत्यादि न चोदनीयम् ।। 7,8 ।।

(32) जातिकार्याय कल्पत इत्युक्तमेवार्थमभिव्यनक्ति--

जातिशब्दैकशेषे सा जातीनां जातिरिष्यते ।

शब्दजातय इत्यत्र तज्जातिश्शब्दजातिषु ।। 9 ।।

(33) "आकृत्यभिधानाद्वैकविभक्तौ वाजप्यायनः" (Va.on P.1.2.64)

इति जातिपक्षे प्रत्याख्यानादेकशेषस्य तत्फलमेकशब्दप्रयोगोऽत्रैकशेष उक्तः । सहविवक्षा चैकशेषेण लक्ष्यते । जातिशब्दैकशेषे प्रसक्त इति वा योजनीयम् । सा इति शब्दजातिः । अर्थजातीनाभेदेन प्रत्यवस्यमाना जातिशब्दगता जातिरेकशब्दत्वं

संपादयति जातिकार्यम् । तद्यथा गावो वृक्षा इत्यादिरभिन्नसामान्यनिबन्धनस्तदेकार्थसमवायात् समाश्रितविशिष्टसङ्ख्य एकशब्दप्रयोगः । तथा जातय इमा इत्ययमपि जात्याश्रयापरजात्यभावाद्वाचरजात्यध्यासाश्रय उपपद्यते । शब्दगतं च सामान्यं जातिकार्यमुपचरतीत्युच्यते न त्वर्थजातिष्वेवेति नियमः केनचित्क्रियते इति । यदा शब्दजातयोऽपि प्रत्याय्याः तदा आस्वप्यभिधानगतं जातिकार्याय कल्पत एवेत्याह शब्दजातय इत्यत्र इति । तज्जातिः शब्दजातिः शब्दगतं सामान्यम् । शब्दजातय इमा इत्यत्रैक पदप्रयोगे तस्योच्चरितस्य शब्दजातिशब्दस्य या जातिः सा शब्दजातिषु होशब्दत्वादिकासु व्यक्तिस्थानीयासु प्रतिपाद्यास्वभिन्नशब्दप्रयोगे निबन्धनमित्यर्थः ।। 9 ।।

(34) यद्येवं शब्दजातिः शब्दगतानामपि जातीनामन्या वाचकजातिस्तासामप्यन्येत्यनवस्थाप्रसङ्ग इत्याशङ्क्याह--

या शब्दजातिः शब्देषु शब्देभ्यो भिन्नलक्षणा ।
जातिस्सा शब्दजातित्वमप्यतिक्रम्य वर्तते ।। 10 ।।

(35) प्रयोक्तृभेदाद्बहुषु शब्दजातिशब्देषु, अभिन्नप्रत्ययनिबन्धना या जातिस्तेभ्य एव शब्देभ्यः स्वाश्रयभूतेभ्यो भिन्नस्वभावा सा गोशब्दात्वादिशब्दजातिवर्गान्तः पातिनी न तु व्यपदेशान्तरार्हा । शब्दजातिशब्दस्यापि होशब्दत्वादिवत् शब्दजातय इत्यनेनैवैकशब्दप्रयोगेण सापि प्रत्याय्यत इति न प्रयोगानवस्थापत्तिरित्यभिप्रायः ।। 10 ।।

(36) तदेवं स्वनिकायसिद्धाध्यासदर्शनाश्रयेण सार्वत्रिकी जातिपदार्थव्यवस्था दर्शिता । स्वरूपभूता हि जातिः सर्वेषां शब्दानामन्तरङ्गत्वादसाधारणत्वादहेयत्वाच्च प्रथमं प्रतिपाद्या । इदानीमध्यासानाश्रयेणापि प्रौढवादितया जातिपदार्थव्याप्तिमुपपादयितुमाह--

अर्थजात्यभिधानेऽपि सर्वे जात्यभिधायिनः ।
व्यापारलक्षणा यस्मात्पदार्थाः समवस्थिताः ।। 11 ।।

(37) अन्यथा चात्र संबन्धः । तथा हि--अस्तु शब्दजातेरर्थजातीनां जातिकार्यम्, संबन्धव्युत्पत्तिस्तु न घटते । यत्र हि संकेतस्तत्र शब्दजातिरध्यस्यते । स एव त्वनेकत्वादर्थजातीना सामान्यान्तरमन्तरेण न संभवतीत्याह-अर्थजात्यभिधानेऽपि इत्यादि । यदा विशुद्धा एनार्थजातयः शब्दैरभिधीयन्त इत्याश्रीयते तदापि सर्वे जात्यभिधायिनः जात्यादिशब्दा अपि तदा जातिवाचिन एव । ननु निस्सामान्यानि सामान्यानीति सिद्धान्तात्कथं जात्यादिशब्दा अपि जात्याधारं जातिमभिदध्युरित्याह-- `व्यापारलक्षणाः' इति । व्यापारः कार्यं प्रयोजनं तदेव लक्ष्यतेऽनेनेति लक्षणं हेतुर्येषां पदप्रत्याय्यानामर्थानां ते तथा नियमितस्वरूपाः । अयमाशयः । वैशेषिकादीनां भवन्तु निःसामान्यानि सामान्यानि । तानि हि व्यक्तिष्वन्वयप्रत्ययावसेयांनि परोपाधिरूपाणि स्वतन्त्रव्यक्तिवदिदन्तावभासित्वाभावात् सामान्यान्तरेण नोपाधीयन्ते । वैयाकरणानां शब्दार्थोऽर्थ इत्यभ्युरेयतामन्वयिरूपावच्छेदेन शाब्दस्य प्रत्ययस्योत्पत्तेर्जातिष्वपि जातिरविरुद्धाभ्युपगम्या । एतदेव हि व्यक्तिषवपि जात्यभ्युपगमे निमितमित्यत्रापि तथाभ्युपगमे कः प्रद्वेषः । प्रत्यक्षा अपि च पदार्थाः स्वाकार्यं विज्ञानादिकं कुर्वन्तः सन्तीति व्यवह्रियन्ते, किं पुनवः शब्दवाच्याः पदार्था इति सामान्यवचनाद् द्रव्यादयोऽपि शब्दवाच्यत्वेनैव लक्ष्यन्ते । शब्दप्रमाणकानां हि यच्छब्द आह तत्परमार्थरूपम् । तथा चान्वयिरूपेण गुणोऽप्यभिधीयमानो जातिरेव । यथोपमासमासे श्यामादिः । तथा च `उपमानानि सामान्यवचनैः' (P.2.1.55)
इत्युच्यते ।

(38) एवं क्रियाप्यभेदेनाभिधीयमाना जातिः । तथेदं तदिति स्वातन्त्र्येण विशेष्यतयाभिधीयमाना जातिगुणक्रिया अपि द्रव्यमिति यथावसरमग्रे निर्णेष्यत एव । एतच्च लौकिकव्यवहारानुगुण्येन शास्त्रेऽस्मिन् व्युत्पाद्यते । शास्त्रान्तरप्रसिद्धा हि व्यवस्था लोकविरुद्धा । लोके हि `गवि शृङ्गम्', `वृक्षे शाखा' इति व्यवहारः । तथैव च व्याकरणेऽप्याधारसप्तमी । शास्त्रान्तरे त्वावयवेष्ववयवीति `शृङ्गे गौः',`शाखायां वृक्षः' इति स्यात् । इत्थं च शब्दाभिधेयस्येहार्थत्वात्सर्वे जात्यभिधायिनः,यस्माच्छब्दव्यापारेण पदार्था लक्ष्यन्ते । यद्यपि बहिर्वस्तूनि न सन्ति तथापि शब्दैस्तथा प्रत्याय्यन्ते, अतोऽभिधाव्यापारवशादन्वयिरूपेण प्रत्यायनाव्द्याप्तिर्जातौ पदार्थे सिद्धेत्येषोऽप्यर्थः ।। 11 ।।

(39) अभिधालक्षणव्यापारत्वमेव व्यक्तयति--

जातौ पदार्थे जातिर्वा विशेषो वापि जातिवत् ।

शब्दैरपेक्ष्यते यस्मादतस्ते जातिवाचिनः ।। 12 ।।

(40) जातौ पदार्थे इति पक्षावच्छेदं करोति । अत्र हि पक्षे सर्व एव शब्दो जातिवाचींत्यभ्युपगन्तव्यम् । भवतु मा वा भूज्जातिषु जातिः । शब्दैस्तु जाति व्यतिरिक्तया जात्यैकस्वभावैव अपेक्ष्यते प्रत्याय्यत्वेनाङ्गीक्रियते । स्वालक्षण्येन हि वस्तूनां भेदः शब्दैः स्प्रष्टुं न शक्यते, अन्वयिरूपावेशेन संबन्धव्युत्पत्तौ शब्दस्य वाचकत्वात् । तथा च जातीनामितरेतरभेदो वस्तुसन्नाभिधीयते, अपि त्वभेदकल्पनेन ता अभिधीयन्ते । अभेदश्च सामान्यमिति सिद्धमेकशब्दत्वाज्जातय इति ।

(41) तथा योऽपि विशेषः संज्ञाशब्दानां वाच्यः प्रतीतिनियतः सोऽपि जातिवत् प्रसिद्धजात्या तुल्यम्, अपेक्ष्यते शब्दैः । तत्रापि बाल्यकौमाराद्यवस्थाभेदः शब्देन न स्पृश्यते, अपि त्ववस्थातृरूपमेवानुगतम्, तद्धि प्रत्यभिज्ञाप्रत्ययनिमित्तं तत्रावश्याभ्युपगन्तव्यम् । अतः यस्माज्जातिवत्सर्वमपेक्ष्यते शब्दैस्तस्माज्जातिं विशेषं वा प्रतिपादयन्तः सर्वे जात्यभिधायिनः इति जात्यभिधानव्याप्तिं निगमयति । इत्थं च संज्ञाशब्दानामपि जातिवादिमते जातिशब्दत्वमित्येकैव शब्दानां प्रवृत्तिः ।। 12।।

(42) एवं दर्शनान्तरेऽपि शब्दव्यापाराश्रयण एव व्याप्तिसिद्धिरित्याह--

द्रव्यधर्मा पदार्थे तु द्रव्ये सर्वोऽर्थ उच्यते ।

द्रव्यधर्माश्रयाद् द्रव्यमतः सर्वोऽर्थ इष्यते ।। 13 ।।

(43) न केवलं मयैव जातिपदार्थवादिनैतदङ्गीकृतं सर्वोऽर्थो जातिरिति, यावद् द्रव्ये अपि पदार्थे, द्रव्यपदार्थपक्षेऽपि द्रव्यधर्मा सर्वोऽर्थ उच्यते, कुतः ? द्रव्यधर्माणामाश्रयणात् । द्रव्यमतः सर्वोऽर्थ इष्यते । व्याप्तिरतः सिद्धा भवतीत्यर्थः । द्रव्यवादिनाप्येतदभ्युपेतव्यं व्याप्तिसिद्धये । शब्देन योऽर्थ उच्यते सर्वोऽसौ द्रव्यधर्मयुक्त एवेत्यभिप्रायः । यथा तव द्रव्यवादिनः केचिदेव शब्दा मुख्यद्रव्याभिधायिनस्तदन्ये तूपचपितद्रव्याभिधायिनः तथा ममापि जातिवादिनो मुख्यां जातिमभिदधति केचित्, उपचरितामन्य इति मतद्वयेऽपि साम्यम् । तत्र द्रव्यधर्मा इदं तदिति प्रत्यवमर्शयोग्यत्वम्, परिनिष्पन्नता, स्वातन्त्र्यम्, लिङ्गसङ्ख्यायोगश्चेत्येवमादयः । तेषां शुक्लादिगुणेष्वप्यध्यारोपात्तेऽपि द्रव्यस्येव धर्मो येषामिति द्रव्यधर्माणः । तथा हि--शुक्लो नीलं स्त्रीपुन्नपुंसकानि सत्त्वगुणाः । तथैकत्वादयश्चेत्यादिभिः शब्दैः प्रत्याय्यमाना गुणादयो द्रव्यधर्माणः स्वातन्त्र्यादिरूपेणावभासन्त इति सर्वोऽर्थो द्रव्यरूपेणाभिधीयते ।। 13 ।।

(44) एवं शब्दव्यापाराश्रयेण व्याप्तिरुपपादिता । अधुना वैशेषिकदृष्ट्याप्यर्थगतसमानधर्माश्रयेण जातिपदार्थव्याप्तिमाह--

अनुवृत्तिधर्मो वा जातिस्स्यातसर्वजातिषु ।

व्यावृत्तिधर्मसामान्यं विशेषे जातिरिष्यते ।। 14 ।।

(45) जातीनामेतज्जातित्वं येयं स्वाश्रयानुवृत्तिः सर्वजातीनां साधारणो धर्मः । सा च ताभ्योऽनन्यापि सादृश्यादभेदेन परामृष्टा सती सर्वासां जातिः । सर्वैव हि जातिः स्वव्यक्तीरनुवर्तते । उपलक्षणं चैष धर्मः । तेन स्वानुरूपप्रत्ययजनकत्वम्, यद्बलाद् द्रव्यं तद्रूपमाभाति । स्वानुरूपाभिधानहेतुत्वम्, यद्वशाद् द्रव्यं यद्वशाद् द्रव्यं तद्रूपाभिधानवाच्यं भवति । प्रत्याश्रयं च सर्वात्मना परिसमाप्तिः साधारणो जातिधर्मः । यदि भागशो जातिर्वर्तेत तदा भागश एव गोत्वादिप्रत्ययः स्यात् । संपूर्णश्च विषाणाद्यवयवदर्शनेऽपि झटिति गोत्वाकारः प्रत्ययः प्रसूयते । प्रत्याश्रयपरिसमाप्ता अपि च गुणाः प्रतिद्रव्यं भिन्नाः, जातिस्तेकैवेत्येवमादयोऽसाधारणा धर्मा वाच्याः । यथा च गोत्वादिजातिस्सर्वा व्यक्तीर्व्याप्नोति तथैते धर्माः सर्वजातीर्व्याप्नुवन्तीति जात्या तुल्यरूपत्वाज्जातिकार्याय कल्पन्ते । एवं सर्व एव विशेषा व्यावर्तन्ते । अन्यथानुगमात् सामान्यानि स्युर्न विशेषा इति सर्वविशेषेषु साधारणी व्यावृत्तिः सामान्यसमो धर्मो भवंस्तेषु जातिः इत्युच्यते ।

(46) नन्वेवं गोपिण्डेष्वपि सास्नालाङ्गूलखुरककुदविषाणाद्यवयवसंबन्धस्य साधारणत्वात्सैव जातिरस्तु । मैवम् । सास्नादिमत्त्वेन सास्नाजिमानित्यादिप्रत्ययो जायते न तु गौर्गौरिति । अनुरूपं हि कार्यं कारणं कल्पयति,तद्यथा दण्डीति

प्रत्यये दण्डसंबन्धो निमित्तं न तु दण्डौपादित्सा । यद्येवमनुप्रवृत्तावपि न जातिर्जातिरिति प्रत्ययो युक्तः, व्यावृत्त्या च विशेषो विशेष इति । नैतदेवम् । गत्यन्तराभावादत्र सदृशा एव धर्मा जातिः कल्पते, मुख्ये जातिमत्त्वे निर्णीतम् । नित्यद्रव्यवृत्तिषु व्यावृत्तिप्रत्ययजनकेषु विशेषेषु सामान्याभ्युपगमे संशयापनोदाय विशेषान्तरकल्पने तेषामपि सामान्यसमवाये सन्देहविषयत्वाद्विशेषान्तराभ्युपगमेऽनवस्थाप्रसङ्गः । अथ कश्चिन्निस्सामान्योऽस्ति विशेषः, तदा तदविशेषात्सर्वेऽपि तथा स्युरित्यन्यत्र विस्तरेणोक्तम् । गोपिण्डेषु सामान्याभ्युपगमे न किञ्चिद्बाधकमिति न तत्र यथाकथञ्चिन्निमित्तं परिकल्प्यम् । तदेवं यत्र जात्यभ्युपगमे प्रमाणबाधास्ति तत्र सदृशधर्मरूपा जातिः । तथा चाभावेऽवपि सामान्याभ्युपगमे भावत्वापत्तेरभवनात्मकधर्मसामान्यादन्वयिप्रत्ययविषयतेति सैव तत्रापि जातिः ।। 14 ।।

(47) कालाकाशादिशामेकत्वान्नित्यत्वेनावस्थाभेदाभावाच्च कथं जातिः, येन व्याप्तिसिद्धिरित्यत आह--

संयोगिधर्मभेदेन देशे च परिकल्पिते ।

तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ।। 15 ।।

(48) यथा सामान्यविशेषाणामन्वयिधर्मोपाधिरभेदः तथाकाशस्यापि संयोगोपाधिर्भेद इति प्रकृतापेक्षः समुच्चयः । आकाशेन संयोगो विद्यते येषामाकाशाधिकरणानां घटादीनाम्, ते संयोगिनः । आकाशं हि सर्वेषां मूर्तानामधिकरणम् । अवकाशदानाद्धि तदाकाशम् । मूर्तास्तु भावाः परस्परं प्रतिबन्धका इति न तेऽवकाशदायिनः । संयोगिनां धर्मभेदः प्रत्यक्षादिप्रमाणसिद्धं परिमितत्वं तद्वशाद्वा लोकप्रसिद्धं परिमितदेशवृत्तित्वम् । यत्र हि देशे संयोगः परिसमाप्तो वर्तते स प्रदेशो भवत्याकाशस्यानेकः । कार्यं प्रति देशः प्रदेश इति निर्वचनात् । गुणाश्च केचिव्द्याप्यवृत्तयः, यथा रूपादयः । संयोगस्तु मूर्तिपरिच्छिन्नवस्तुवृत्तिरिति सर्वदा प्रदेशवृत्तिरेव । अतः संयोगस्य नियतदेशतया संयोगिनोऽपि नियतदेशवृत्तय इति संयोगिधर्मभेदेन आकाशस्य भेदो भवत्युपाधिकृतो न स्वतः । यदाह-देशे च परिकल्पिते इति । देशभेदाच्च सामान्यमाकाशस्यापि विद्यते । अतश्च प्रतिदेशम् `इदमाकाशम्, इदमाकाशम्' इत्यभिन्नाभिधानप्रत्ययानुवृत्तिलक्षणमाकाशसामान्यमाकाशशब्दगोचरोऽस्ति ।

(49) एवं समानन्यायत्वात्कालादीनामपि प्रदेशपरिकल्पनेन सामान्यमुपवर्णनीयम् । तथा हि-कालस्य युधिष्ठिरादिसंयोगवशेन भेदे सत्यभिन्नं कालसामान्यं कालशब्दवाच्यमस्ति । एवं मेरुं प्रदक्षिणमावर्तमानस्य सवितुर्लोकपालगृहीतैर्दशविशेषैर्ये संयोगाः तदुपाधिना सूर्येण दिशः संयोगे सति भेदेऽभिन्नं दिक्सामान्यं दिक्शब्दवाच्यं परिकल्प्यम् । आत्मा तु प्रतिशरीरमन्य एवेति तत्राप्यस्त्येवात्मत्वसामान्यम् । एवं समवायस्यापि संबन्धिभेदान्नानात्वोपचारे सर्वत्रेहबुद्ध्यनुवृत्तेर्जातिः परिकल्पनीया । ननु च संयोगिदेशेनाकाशस्य देशपरिकल्पः तेन संयोगिनामितीतरेतराश्रयत्वम् । नैतदस्ति । इतरेतरव्यावृत्तिरूपतैव रथादीनां मूर्तत्वापरिच्छिन्नपरिमाणत्वं बोधयति । कल्पितास्त्वाकाशदेशा लोकप्रसिद्धाः संयोगिवस्तुगतां परिच्छिन्नदेशतां ज्ञापयन्ति । सामान्येन ह्याकाशदेशत्वे रथादीनां प्रत्यक्षादिप्रमाणावसितरूपविरुद्धं व्यापित्वमारोपितं स्वगतेन परिमितत्वेनाकाशस्य प्रदेशकल्पनया निराक्रियेत । यद्येवं कल्पिता देशाः कथमाकाशस्य स्वतो निरवयवस्य देशभेदनिबन्धनं कार्यं जातिप्रक्लृप्तिलक्षणं जातिशब्दप्रवृत्तिलक्षणं वा कुर्युः, येन तद्नता जातिरभिधीयेत । उच्यते । व्यक्तिस्थानीयानां देशानामद्वैतदर्शने यथासत्यत्वम्

`असत्या व्यक्तयः स्मृताः'(verse 32 infra)

इति वक्ष्यते तथेहाप्याकाशस्य सत्यत्वे व्यक्तीनां न कश्चिद्विरोधः ।। 15 ।।

(50) अथवा मुख्या एवाकाशस्य देशा घटाजीनामिवेत्याह--

अदेशानां घटादीनां देशास्संबन्धिनो यथा ।

आकाशस्याप्यदेशस्य देशास्संबन्धिनस्तथा ।। 16 ।।

(51) इह देशोऽवयव उच्यते । घटादयश्चावयविनः स्वात्मनि निरवयवाः । ये हि तेषामवयवभूताः कपालादयस्ते आरम्भकाः कारणभूता व्यतिरिक्ता एव समवायसंबन्धेन संबन्धिनः । एवमाकाशमपि केनचिदप्यनारब्धत्वादमूर्तं व्यापि

निरवयवमित्यात्मभूतदेशाभावाद् द्रव्यादयः संयोगिन एवास्य देशाः, तथा तद्भेदादाकाशभेदे सर्वत्राभिन्नप्रत्ययानुगमाज्जातिपरिकल्पः । आकाशं ह्यवच्छिन्दन्तोऽर्था देशास्तस्य भवन्ति । तत्कृतावच्छेदं चाकाशमपि तेषामाधारभावापत्तेर्देश इत्यन्योन्यदेशत्वं मूर्तामूर्तयोः मूर्तास्त्वव्यापकाः परस्परमवच्छेदका न भवन्तीत्याधार एवैतेषां देशः ।। 16 ।।

(52) कथं तर्हि देशे गौणत्वव्यवहारः । यदि हि कस्यचिन्मुख्याः प्रदेशा आत्मभूताः स्युस्तदायं युक्तः स्यान्नान्यथेत्यत आह--

भिन्नवस्त्वाश्रया बुद्धिः संयोगिष्वनुवर्तते ।
समवायिषु भेदस्य ग्रहणं विनिवर्तते ।। 17 ।।
अतः संयोगिदेशानां गौणत्वं परिकल्प्यते ।
अविवेकात्प्रदेशेभ्यो मुख्यत्वं समवायिनाम् ।। 18 ।।

(53) भिन्ने पृथक्सिद्धे वस्तुनि आश्रयो यस्या बुद्धेः । अप्राप्तयोः प्राप्तिः संयोग इति पृथक्सिद्धपदार्थविषया संयोगबुद्धिः । भेदस्य ग्रहणं विनिवर्तते इति, यतोऽपृथक्सिद्धानामिहबुद्धिहेतुः समवायः, यथा `इह कपालेषु घटः' इति । अतः इति,भेदेन ग्रहणात् । अविवेकात्, विवेक्तुमशक्यत्वात् । यतो भिन्ना बुद्धिः संयोगिनाम्, अतः तत्प्रदेशानां गौणत्वम् । यतश्च समवायिनामभिन्ना बुद्धिः, अतस्तत्र मुख्यत्वम् । समवायप्रभावाद्धि प्रदेशेभ्यो विवेक्तुं समवायिनो न शक्यन्त इति तेष्वेव देशेषु कपालादिष्वेव तदारब्धमवयवि द्रव्यमुपलभ्यते । अतस्तत्र मुख्याः समवायिनः प्रदेशत्वेन व्यवस्थाप्यन्ते । संयुक्तानां तु नैवमिति गौणत्वमित्यनेनौपचारिकत्वमाकाशदेशानां समर्थितम् । ननु च घटादीनां संयोगिनां परस्परसंयोगेऽपि परस्परदेशभावो न भवति, एवमाकाशेनापि न स्यात् । नैतदस्ति। आकाशेन सदा संबद्धा स्थादय इति तत्राध्यारोपो युक्तो न तु घटादीनामनियतसंयोगानाम् । अत एव घटादिष्वाकाशानुगतः प्रत्ययो दृश्यत एव घटाकाशः पटाकाश इत्यादि, अध्यारोपे च न भेदविगलनमित्युक्तम् ।। 17,18 ।।

(54) तदेवं वैशेषिकदर्शनाश्रयेण जातिपदार्थव्याप्तिरुपपादिता । इदानीं विज्ञानवादेनापि पदार्थव्यवस्थामाह--

अनुप्रवृत्तिरूपां यां प्रख्यातामाकृतिं विदुः ।
केचिव्द्यावृत्तिरूपां तु द्रव्यत्वेन प्रचक्षते ।। 19 ।।

(55) `सर्वपार्षदं हीदं शास्त्रम्' इति, शब्दार्थोऽर्थ इति वा पदार्थव्यवस्थेयम् । अनुगताकारा या बुद्धिस्तस्यां प्रतिभासमानस्तदाकारोऽर्थरूपतयावसीयमानवपुर्दृश्यविकल्पयोरभेदाध्यवसायात्सामान्यमाहुः । व्यावृत्ताकारबुद्धिसन्निवेशित्वाकारोऽत्र च दर्शने द्रव्यमिति प्रसङ्गादुक्तम् । एवं च बाह्यस्य सामान्यस्याभावादाकाशादावपि तत्समर्थने न प्रयतितव्यम् । अनपह्नवनीयाभिन्नाकारप्रत्ययोपजनस्य सर्वत्रैव सिद्धेर्विज्ञाननये च सर्वमेव प्रत्ययात्मकमङ्गीकृतमेव । शब्दादुच्चरिताद्वाकारवती बुद्धिरुत्पद्यत इति तदाकारस्यैव शब्दार्थत्वम्, न बुद्धेः । स ह्याकारो बाह्योऽस्तु, न वा, शब्दवाच्यत्वस्य न काचित्क्षतिः ।। 19 ।।

(56) ननु च वस्तूनां देशकालादिनिमित्तो भेद इति तदनादरेणाभिन्नान्येव तानु सिद्धानीति किमर्थं व्यतिरिक्तसामान्यकल्पनायां प्रयस्यत इत्याशङ्क्याह--

भिन्ना इति परोपाधिरभिन्ना इति वा पुनः ।
भावत्मसु प्रपञ्चोऽयं संसृष्टेष्वेव जायते ।। 20 ।।

(57) निरुपाधिनो वस्तुनोऽव्यवहार्यत्वात्सर्व एव परोपाश्रयो व्यवहार इति सामान्यादौ व्यतिरिक्तसामान्यकल्पनैवमकारीत्यत्र तात्पर्यार्थः ।। 20 ।।

(58) एतदेव व्यतिरेकमुखेनापि प्रपञ्यति--

नैकत्वं नापि नानात्वं न सत्त्वं न च नास्तिता ।
आत्मतत्त्वेषु भावानामसंसृष्टेषु विद्यते ।। 21 ।।

(59) एकत्वसङ्ख्यीधीन एकत्वेन व्यवहारः, पृथक्त्वनिबन्धनो नानात्वेन, सत्तानिबन्धनः सत्त्वेन, स्वरूपसत्त्वेन तु सामान्यादीनामभावोपाधिर्नास्तीति व्यवहार इति संसर्गदर्शने सर्वः परोपाश्रयोऽयं प्रपञ्चो वैचित्र्यम् ।। 21 ।।

(60) एवं व्यतिरिक्तोपाधिदर्शनमुपन्यस्याधुना स्वशक्तय एवोपाधय इत्यद्वैतदर्शनाश्रयेणापि प्राह--

शर्वशक्त्यात्मभूतत्वमेकस्यैवेति निर्णयः ।
भावानामात्मभेदस्य कल्पना स्यादनर्थिका ।। 22 ।।

(61) एकमेव ब्रह्म सर्वशक्तीति प्रमाणेन सिद्धेऽस्मिन्नर्थेऽविद्यापारिकल्पितस्य भावभेदस्यापारमार्थिकत्वात्कार्यनानात्वोन्नीयमानः शक्तिभेद एवैकस्य युक्तो न तु स्वरूपभेदः ।। 22 ।।

(62) तथा च

तस्माद् द्रव्यादयः सर्वाः शक्तयो भिन्नलक्षणाः ।
संसृष्टाः पुरुषार्थस्य साधिका न तु केवलाः ।। 23 ।।

(63) द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणाः पदार्था न पृथग्भूताः । एकस्यैव शक्तयो विलक्षणव्यापारानुमेया इति ता यथायथमुपगतसमन्वयाः प्रावरणाद्यर्थक्रियाकारिण्य इत्यस्मिन् मते सर्वत्रैव जातिव्यक्तिप्रविभागः कल्पितः `सत्यासत्यौ तु यौ भागौ' (verse 32 infra) इत्यत्र वक्ष्यमाण इति नाकाशादीनामपि कश्चिद्विशेष इत्यर्थः । यथा हि वैशेषिकाणां व्यतिरिक्तं सामान्यम्,नैवमिह, केवलं विश्वमूर्तेः पदार्थस्य शक्तिमात्रम् । न केवलं सामान्यमेव, यावद् द्रव्यादयोऽपीति प्रसङ्गात्कथितम् । भेदाभ्युपगमेऽपि द्रव्यादीनां संसृष्टानामर्थकारित्वे वरमेकमेव शक्तिमदस्त्वित्यर्थः ।। 23 ।।

(64) तत्रैतत्स्यात् संसृष्टानां साधनत्वे तासामसामर्थ्यम्, संसर्गस्यैव तथात्वात्, तस्य च व्यतिरेके द्वैतापत्तिरित्याशङ्क्याह--

यथैव चेन्द्रियादीनामात्मभूता समग्रता ।
तथा संबन्धिसंबन्धसंसर्गेऽपि प्रतीयते ।। 24 ।।

(65) चक्षूरूपालोकमनस्कारा आत्ममनइन्द्रियार्था वा परस्पराहितविशेषाः संघटिता विज्ञानहेतवोऽन्वयव्यतिरेकाभ्यां दृष्टा इति नेयमेभ्यः सामग्री नाम पदार्थान्तरं जनिका । अत एव हि सामग्रीजनकाः सामग्रीशब्दवाच्याः, वस्त्वन्तरस्यानुपलब्धेः । एवमेकेन संबन्धिना सर्वशक्तीनामाधारभूतत्वेन प्रकृतत्वात्संबन्धो द्रव्यादिशक्तीनाम् । ततो य एकस्मादाधारादव्यतिरेकात्संसर्गो रूपसंमूर्च्छनं तस्मिन्नपि संसर्गे सति पुरुषार्थसाधके स्वभावभूता समग्रता विज्ञायते । तत्रापि हि आत्मभूता एव न्यायायाता, द्रव्यमात्रेण गुणादिसंसर्गरहितेन द्रव्यव्यवहाराभावात् । एवं गुणादिमात्रेणेत्यवश्यंभाविनः संसर्गस्य द्रव्यादिभ्यो विवेकानवधारणात् तत्स्वभावतैव । क्वचित्पाठः--तथा संबन्धिसंबन्धसंसर्गोऽपि प्रतीयते इति । तत्रापि संबन्धिना सर्वशक्त्याधारेण, संबध्यन्त इति संबन्धाः द्रव्यादिशक्तयः, तासां संबन्धानां शक्तीनामन्योन्यसंसर्गोऽप्यात्मभूत एवेति व्याख्या । यद्वा सर्वशक्तेः पदार्थस्य संबन्धिनीनां शक्तीनां संसर्गेऽपि संसर्गावस्थायामपि तथैवासौ संबन्धः, आत्मभूत एवासौ संसर्ग इत्यर्थः । चित्सामान्यानुगमाच्च विश्वस्य प्रमाणसिद्धोऽभेद इति प्रथमकाण्ड एव निर्णीतम् ।। 24 ।।

(66) तदेवं यथादर्शनं जातिः शब्देन प्रतिपाद्यते इत्युपपादितम् । सा च नित्येति नित्यः शब्दार्थः । तथा च "नित्यावेवोपवर्णितौ" इत्युक्तम् । तत्र जातेर्नित्यत्वे कार्योपयोगमाह--

न तदुत्पद्यते किञ्चिद्यस्य जातिर्न विद्यते ।
आत्माभिव्यक्तये जातिः कारणानां प्रयोजिका ।। 25 ।।

(67) व्यक्त्यधीना जात्यभिव्यक्तिरिति स्वाश्रयकारणानां प्रयोजककर्तृत्वमिवावलम्बते जातिः । सदा सन्निहिता कार्योत्पत्तौ कारणानां सहकारिणीत्यर्थः । निमित्तकारणत्वाद्वैशेषिकदर्शने जातीनामेषोऽर्थः प्रयोजकपदेन भङ्ग्याभिहितः ।। 25 ।।

(68) ननु कारणेष्वसन्निधानात्कथं तेषां प्रयोजिकेत्याह--

कारणेषु पदं कृत्वा नित्यानित्येषु जातयः ।

क्वचित्कार्येष्वभिव्यक्तिमुपयान्ति पुनः पुनः ।। 26 ।।

(69) सर्वगतत्वाज्जातीनां कारणेषु अपि सन्निधानात्पदबन्धः । तथा च जात्यात्मना कारणेषु कार्याणामवस्थानाज्जातिरूपोपरागेण तदवसायात् तत्र साधनानां प्रवृत्तौ कार्यारम्भे तत्समवेतजात्यभिव्यक्तिरसकृदाश्रयोपलब्धौ भवति । नित्याः परमाणवः कारणानि, दर्शनान्तरे वा प्रधानपुरुषादयः । अनित्या वीरणादयः । `क्वचित्' इति । दृश्येषु किञ्चित् किल कार्यं जात्याश्रयं निष्पन्नमप्यदृश्यं यथा वायुर्द्रव्यमिति । तत्र हि तज्जात्यभिव्यक्तिर्नास्ति ।। 26 ।।

इत्थं च कृत्वा प्राक् प्रभवादपि जातेर्विद्यमानत्वान्नित्यत्वं पोषितम् । तथा च जातिपदार्थनयेऽत्र जातेरुपयोगं दर्शयति--

निर्वर्त्त्यमानं यत्कर्म जातिस्तत्रापि साधनम् ।

स्वाश्रयस्याभिनिष्पत्तौ सा क्रियाणां प्रयोजिका ।। 27 ।।

(70) घटं करोतीति कथमसतो निर्वर्त्त्यमानस्य क्रियायां साधनभावः कर्मण इत्येतदत्र चोद्यं नावतरति । जातेः सत्त्वात् स्वाश्रयनिर्वर्त्तनाय क्रियां प्रत्युक्तेन कारणपदबन्धन्यायेन प्रयोजकत्वादिति जातिरूपाश्रयेण च साधनता, व्यक्तिरूपाश्रयेण च कर्मता, निर्वर्त्त्यत इति कारकं कर्मेति सामानाधिकरण्योपपत्तिः । न हि जातिव्यक्ती अत्यन्तभिन्ने गवाश्ववत्, संमूर्च्छितस्वभावत्वादित्युभयरूपाश्रयो व्यपदेशोऽविरुद्धः । प्राप्यविकार्ययोस्तु कर्मणोस्सत्त्वात् स्वत एव साधनतोपपत्तिरिति `निर्वर्त्त्यमानम्' इति विशेषमाह । जात्यात्मना च निरूप्य वस्तु कारणेषु योग्येषु प्रवर्तन्ते तदर्थिनः इति `प्रयोजिका' इत्युच्यते । एतच्च जात्यभिधानपक्षे संभवति घटशब्देन जातेरभिधानात् । व्यक्तिपदार्थपक्षे तु उपचारसत्ताश्रयं साधनत्वं वक्ष्यति--

व्यक्तौ पदार्थे शब्दार्जन्यमानस्य कर्मणः ।

साधनत्वं तथा सिद्धं बुद्धिरूपप्रकल्पितम् ।। (Vak.III.सा.7)

इति । कारणानां प्रयोजिका जातिरितियुक्तम् । तथा च जातिपदार्थपक्षे न द्रव्यस्य क्रियासाधनत्वम्, अपि तु सैव विधिप्रतिषेधयोः साधनं जातिरित्याह--

विधौ वा प्रतिषेधे वा ब्राह्मणत्वादि साधनम् ।

व्यक्त्याश्रिताश्रिता जातेः संख्याजातिर्विशेषिका ।। 28 ।।

(71) जातेः पदार्थत्वे तत्र विधौ चोदिते प्रतिव्यक्तिपरिसमाप्तत्वात्तस्याः सकृदनुष्ठानेऽपि कृतः शास्त्रार्थो `ब्राह्मणमालभेत' इति । एवं `ब्राह्मणं न हन्यात्' इत्यादिरपि प्रतिषेधो जातावेव । सकृदनुश्ठनेऽपि च पुनरुल्लङ्घने चोदितस्य दोषः । तथा हि-- अहननं चोदितम्, हननं तु क्वचिदनुष्ठितमिति विरुद्धक्रियाचरणात्प्रत्यवायएव । क्वचित्तु विध्यनुष्ठानेऽन्यत्र तदभावेऽपि न विरोधः । तथा चाहुः--

नाकारणानि विधिं बाधन्ते प्रतिषेधस्तु क्रियां निर्वर्तयति'

इति । तस्माद्यदा यदा हननबुद्धिरुत्पद्यते तदा तदा प्रतिषेधः सर्वत्र ब्राह्मणजातौ व्याप्रियते । अत्र च जात्यवच्छिन्नकर्तव्यताप्रतिषेधावभासस्य सङ्कल्पस्यानुष्ठेयत्वम् । इत्थं प्रवृत्तिनिवृत्तिमये पुरुषार्थे सर्वत्र जातेरुपयोगो दर्शितः । अनुष्ठानस्य प्राधान्यात्तदङ्गम्--

`पराङ्गभूतं सामान्यं युज्यते द्रव्यसंख्यया' (III.जा.82).

इति वक्ष्यमाणन्यायेन । सङ्ख्याविवक्षामत्राह "व्यक्त्याश्रिता" इति । व्यक्तिं द्रव्यमाश्रिता या एकत्वसङ्ख्या तदाधारा या जातिः आश्रयभेदभिन्नेष्वेकत्वगुणेषु प्रत्ययानुवृत्तिनिमित्तं सा प्रातिपदिकवाच्यां द्रव्यजातिकार्थसमवेतसमावायादवच्छिनत्ति । जातेः पदार्थत्वे विभक्तेरपि संख्याजात्यभिधायित्वात् वास्तवेन च रूपेण संख्याजातिर्विशेषिका । शाब्देन तु प्रत्ययार्थस्य

प्राधान्याद्विशेष्यासौ । एवं चैकत्वसङ्ख्याया अत्र विवक्षितत्वान्न युगपदनेकव्यक्तिविषयमनुष्ठानं चोदितम् । सत्यपि जातिपदार्थत्वे एकस्यामपि च व्यक्तौ सर्वात्मना परिसमाप्ता जातिरिति न काचित्क्षतिः । कामनाहेतुकश्च विधिरिति सत्यां कामनायां व्यक्त्यन्तरेऽप्यनुष्ठानाविरोधः । एवं प्रतिषेधेऽपि हननबुद्धिर्निमित्तमिति तदुत्पत्तौ सर्वत्र तत्प्रवृत्तिः । तदेवं जातेः पदार्थत्वे चोदनासूपपत्तिः । यदाह वाक्यकारः--

`धर्मशास्त्रं च तथा' । (Va.on P.I.2.64)

इति ननु जातिरेव पदार्थ इत्यवधारणानुपपत्तिः, तस्याः स्वाश्रयसमवायावियोगात् । अत एव चासां कार्यसिद्धेः कारणानामाश्रयेषु भाव इत्याश्रयादुत्कर्षयितुमशक्या जातिः केवला कथं शब्देनाभिधीयत इत्याशङ्क्या दृष्टान्तेनैतदुपपादयितुमाह--

यथा जलादिभिर्व्यक्तं मुखमेवाभिधीयते ।
तथा द्रव्यैरभिव्यक्ता जातिरेवाभिधीयते ।। 29 ।।

(72) प्रतिबिम्बे भावान्तरोत्पत्तिः

`विरिद्धपरिमाणेषु' (Vak.b.I.100)

इत्यादिना पूर्वं निराकृतेति मुखादिप्रतिनिम्बमादर्शादौ भ्रान्त्यापि दृश्यमानं मुशशब्दाभिधेयमादर्शादिव्यञ्जकरहितं शुद्धम् । एवं शब्दोऽपि जातिं व्यक्तिरहितामभिदधाति । अयमाशयः--आश्रयसमवायावियोगेऽपि सर्वत्राभेदात्सङ्केतोपपत्तौ जातिः शब्दाभिधेया शुद्धा, शाब्दे ज्ञाने तथा प्रतीतेः । ऐन्द्रियके तु ज्ञाने विवेकानवसायाद्भवतु जातिव्यक्त्योः ंसमूर्च्छितावभासः । शब्दस्य तु यथाशङ्केतं प्रतीतिहेतुत्वे न काचित्क्षतिः ।। 29 ।।

यद्येवं शब्दादप्रतीयमाना व्यक्तयः कथं शब्दज्ञानविषयतया जातीर्विशिष्युरित्याशङ्काह--

यथेन्द्रियगतो भेद इन्द्रियग्रहणादृते ।
इन्द्रियार्थेष्वदृष्टोऽपि ज्ञानभेदाय कल्पते ।। 30 ।।
तथात्मरूपग्रहणात् केषांचिद् व्यक्तयो विना ।
सामान्यज्ञानभेदानामुपयान्ति निमित्तताम् ।। 31 ।।

(73) शब्दाद्युपलब्ध्यन्यथानुपपत्त्यानुमितसत्वानीन्द्रियाणि नित्यपरोक्षत्वादनुपलभ्यमानस्वगतचक्षुः श्रौत्रादिविशेषाणि शब्दस्पर्शरूपरसगन्धेषु इन्द्रियार्थेषु चाक्षुषादिप्रत्ययविशेषहेतुभावं नियमेन प्रतिपाद्यन्ते । न हि चाक्षुषं ज्ञानं श्रोत्रेन्द्रियकार्यम् । एवमगृह्यमाणस्वभावा व्यक्तयः । शब्देनाभिधानवेलायां केषांचिद् एव सामान्यज्ञानभेदानां काश्चन प्रत्यक्षप्रत्ययानामिवोपयान्ति हेतुतां व्यक्तयः । शाब्दे प्रत्यये शब्दार्थभूतानां सामान्यानां वस्तुतः समवायनियमात् विशेषमावेदयन्तीति न साङ्कर्यं शब्दार्थ इत्यर्थः । अगृह्यमाणस्यापि तदानीं व्यक्तिरूपस्यान्यदा प्रत्यक्षकाले गृहीतत्वाद् व्युत्पन्नसंबन्धस्यापि तद्विषयावसायाविरोधात् संप्रत्यगृह्यमाणस्यापि दृष्टं प्रतीतिविशेषहेतुत्वमिति । एतावता साम्येनात्रेन्द्रियाणि दृष्टान्तः । `केषांचित् सामान्यज्ञानभेदानाम्' इत्यर्थात् काश्चनैव व्यक्त्यय इति लभ्यते । तदेवं केवलं जात्यभिधानपक्षः समर्थितः । तद्वदभिधाने तु जातिरनभिधीयमानैवोपलक्षणमभेदेन सङ्केतार्थं द्रव्यस्येति तत्रैव क्रियायोगोपलब्धे। शब्दवाच्यत्वम् । यथोक्तम्--

`चोदनासु च तस्यारम्भात्' (Va.on P. 1.2.64)

इति ।। 30,31 ।।

इदानीं यदुक्तं प्राक्

`सर्वशक्त्यात्मभूतविभागमाह--

सत्यासत्यौ तु यो भावौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयः स्मृताः ।। 32 ।।

(74) अविद्याप्रवृत्तिरूपस्य सर्वपदार्थेष्वागमापायिनोऽसत्यत्वाद् व्यक्तिरिति व्यवहारः ।

`तदेव हि सत्यं यस्मिंस्तत्त्वं न विहन्यते' (M.Bh.on Va.1.>(पस्पशाह्निक) इत्यन्वयिरूपं भेदप्रत्ययेष्वबाध्यमानं सत्यं जातिः' इति व्यवहृतमद्वैतिभिः । तद्यथा--रुचकस्वस्तिककुण्डलादयो विकाराः परल्परोपमर्देन भवन्तोऽस्थिरप्रत्ययविषयाः, सुवर्णमित्येव तु सत्यमन्वयिविज्ञानावसेयसतत्त्वम् । एवमभेदान्तरविवक्षायां तेज इत्येव सत्यम् । तत्राप्यभेदस्तत्कारणमित्यन्त्या परा प्रकृतिः सत्या सर्वविकारानुयायिनी प्रशान्तकल्लोला चिदेकघना ब्रह्मेत्यागमविदः । तदुक्तम्--

`पृथिवीधातौ किं सत्यम्, विकल्पः, विकल्पे किं सत्यम्, विज्ञानम्, विज्ञाने किं सत्यम् ऊँ अथ तद्ब्रह्म ।'
इति । प्रतिभावम्' इति । परमतेन वस्तूनां भेदाद्वीप्सा ष चित्सामान्यस्य सर्वत्रानुगमादेव महासत्तारूपमभावप्रतियोगि विश्वस्य जगतः सत्यरूपमवदातदर्शनैः साक्षात्कृत्योपदिष्टम् । प्रमाणं नस्ते भगवन्तः ।। 32 ।।

इत्थं चात्राद्वयनये परमार्थसत्येकैव जातिर्महासत्ताख्या परब्रह्मस्वभावा, तस्या एव गोत्वादिजातिभेदेन विवर्त्ते व्यवहार इत्याह--
सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।। 33 ।।

(75) वक्ष्यमाणैराश्रयादिभिः स्वसंबन्धिभिः भिद्यमाना उपचरितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः गोत्वाश्वत्वादिका, अपरसामान्यम्, नान्या परमार्थभिन्ना सा विद्यते । तथा हि गोः सत्ता गोत्वम्, नापरमन्वयि प्रतिभासते । एवमश्वस्य सत्ता अश्वत्वमित्यादि वाच्यम् । तस्याम् एव च गवादिभेदभिन्नायां सत्ताख्यायां जातौ सर्वे गवादयो डित्थादयश्च शब्दा वाचकत्वेन व्यवस्थिताः इत्यसाङ्कर्येण नियतोपाधिवशाज्जात्यभिधायिनः सिद्धाः ।। 33 ।।

सर्वशब्दविषयत्वमेवाभिव्यनक्ति--
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।। 34 ।।

(76) सर्वभावेषु सद्रूपं सामान्यमनुगतम् । अभावस्यापि बुद्ध्याकारेण निरूपणात्, महासत्तयानयावियोगात् प्रातिपदिकमात्रवाच्या सत्ता । तदुक्तम्
प्रातिपदिकार्थः सत्ता'
इति धातुभिरपि साधनधीनलब्धजन्मसु क्रियाव्यक्तिषु समवेता यथोपाध्युपगृहीतनानात्वा सत्तैवाभिधेयत्वमापाद्यते । सिद्धसाध्यरूपार्थद्वयात्मना च तस्या एव वृत्तेस्तदपरश्यभावात् सर्वशब्दविषयत्वं सत्तायाः । प्रत्ययभागेनाप्यत्र यथायथं सङ्ख्याकारकाद्युपाधिविशिष्टा सत्तैवाभिधीयते । सा चोदयव्ययरहितत्वात् नित्या, सत्प्रत्ययस्य सर्वदानुवृत्तेः । एते सत्तामात्रस्यात्मनो महतः षड् विशेषपरिणामाः, यत्तत्परं विशेषेभ्यो लिङ्गमात्रं महत्तत्वम्, तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकाष्ठामनुभवन्ति । प्रतिसंसृज्यमानाश्च तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय यत्तन्निःसत्तासत्तं निःसदसदव्यक्तमलिंङ्गं तस्मिन्प्रतियन्तीत्येवं साङ्ख्ये बुद्धितत्त्वं महच्छब्दवाच्यमाद्यं जगत्कारणं निर्दिष्टमित्यतोऽनन्तरस्य विकारग्रामस्य कारणरूपानुगमात्सत्तारूपत्वमविरुद्धमिति सत्तारूपं सर्वं जगदाख्यातं भवतीति सत्ताद्वैतवादः साङ्ख्यनयेनाप्युपबृंहितः । एवं च स्रवशब्दवाच्या सत्ता शब्दप्रवृत्तिनिमित्तभूतेति यथायथं भिन्नोपाधिभावप्रत्ययाभिधेया सैव । नन्वेवं गोत्वमिति प्रकृतिप्रत्ययोरेकार्थताप्रसङ्गः । नैतत् । उपाधिभेदेन सत्तायाा भेदात् । प्रातिपदिकेन गवाश्रयायास्तस्या अभिधानम्, प्रत्ययेन तु निष्कृष्टाश्रयस्य सामान्यस्याभिधेत्यदोषः । प्रकृत्यर्थनिमित्तश्च भावप्रत्ययभेदः इति न साङ्कर्यप्रसङ्गः ।। 34 ।।

यदुक्तम्--
`तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते' (Vak.III.जा.34) इति । एतदेवोपपादयितुमाह--
प्राप्तक्रमा विशेषेषु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ।। 35 ।।

(77) क्रियावाची धातुः सत्त्ववाचितामेति । गीयते क्रियासत्त्वे च सत्तैव । तथा हि--साधनापरिस्पन्दवशात्क्रियाणां व्यक्तिस्थानीयानां विशेषशब्दवाच्यानां पौर्वापर्ये तद्नतापि जातिस्तथात्वेन प्रितिभासत इति सैव सक्रमा क्रिया सकलधातुविषया । तस्या एवावान्तरो धात्वर्थभेद इत्यनन्तरमेव वक्ष्यते । साधनसम्पर्कहेतुकप्रतायमानरूपापरामर्शे सत्तैव सत्त्वं द्रव्यमित्युच्यत इति सिद्धसाध्यरूपो द्विधा विवर्तः सन्मात्ररूपस्य परस्य ब्रह्मणः प्रतिपादितः । तदेव हि सर्वत्रानुगतम् । न चात्र दर्शने सद्भ्यः सत्ता व्यतिरिक्ता भावत इति सर्वं तन्मयम् । ततश्च सर्वशब्दानां सत्तावचनत्वाज्जातिपदार्थव्याप्तिः । यद्यपि च द्रव्यपदार्थेऽपि ब्रह्मद्रव्यस्याभिधानमुपाधिभेदभिन्नस्य वक्ष्यति तथापि तात्पर्यभेदादवस्थाभेदः । जातिपदार्थे सर्वत्रान्वयिरूपं जात्यात्मना ब्रह्म विवक्षितम् । द्रव्यपदार्थनये तु परिनिष्ठतरूपं परमार्थतयेति दर्शनविकल्पः । अयमेव च पक्षद्वयेऽप्येकपक्षीभावरूपः सिद्धान्तः परमार्थदृष्ट्या । अत्र सर्वपार्षदत्वात्पुनरस्य शास्त्रस्य दर्शनान्तरोपन्यासः । एष च सर्वत्रैवास्य ग्रन्थकारस्याभिप्रायः, पदार्थचर्चाविषये ब्रह्मदर्शननयेनैव संबन्धादिविचारे विनिगमनात् ।। 35 ।।

इदानीं समग्र क्रियाकलापः सत्ताविवर्त एवेति निरुक्तकारमतेन संवादमाह--

सैव भावविकारेषु षडवस्थाः प्रपद्यते ।
क्रमेण शक्तिभिः स्वाभिरेवं प्रत्ययभासते ।। 36 ।।

(78) `षड् भावविकारा भवन्तीति हि स्माह भगवान् वार्ष्यायणिः' (Ni.I.2.8)

इति निरुक्तकारः । तत्र च भावस्य परमार्थरूपस्य सत्तात्मकस्य जन्मादयो विकारा इत्यर्थः । सन्मात्रस्वभावा हि सत्तोत्तरोत्तरविकारापत्तौ

`जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यति'(Ni.I.2.9)

इति व्यपदेशमासादयति । प्रथमतरं च सन्मात्रं रूपमस्तिशब्देन नाभिधीयते अपि तु जन्मोत्तरकालभावी तस्या अवस्थाविशेषः । जन्मानन्तरभावि हि रूपं तस्या लोके सदिति व्यवहार्यम् । ततः प्राक्पश्चाद्भविन्यः पुनरवस्था जन्मविपरिणामादिरूपेण व्यवहार्याः । तथा हि--स्वशक्तिमाहात्म्यात्पूर्वं जायत इत्यवसीयते पश्चादस्तीति । अवस्थितस्य विकारापत्तिरिति विपरिणमते । तच्च विपरिणमन्मुहूर्तमपि नावतिष्ठते इति वर्धते यावदनेन वर्धितव्यम्, ततोऽपक्षीयते मुहूर्तमप्यनवस्थानादेव । अत एवोक्तं--

`ततोऽपायेन युज्यते'(M.Bh.on.P.I.1.4.51)

इति । ततोऽपि विनाश इत्येवं क्रमस्थितिः । एवंभूतास्तस्याः काश्चन शक्तयो विद्यन्ते येनैकैव सती तथा तथा विचित्रेण रूपेण प्रतिभासते । न च परिणति दर्शनाभिप्रायेणायं विकारशब्दः, अनित्यत्वप्रसङ्गात्, अपि तु विवर्त्तपर्यायोऽयम् । तथा हि-- सर्वशक्त्यात्मभूतत्वाद्ब्रह्मणोऽनेकविकारप्रदर्शनसामर्थ्यलक्षणा अविद्याख्या शक्तिः कार्यभेदादुपचरितनानात्वा समस्तीत्यागमविदः । इत्थं च स्वाभिरेव शक्तिभिरव्यतिरिक्ताभिर्जन्मादिरूपतया अविद्यायामाभासते । तदेव ब्रह्म सर्वभावेषु समानरूपं सत्तात्मकमन्यस्य तव्द्यतिरिक्तस्याभावादित्येषोऽत्रार्थः ।। 36 ।।

यदि तर्हि स्वशक्तिमाहात्म्याज्जन्मादिरूपतया सत्तैवावभासते कथं न युगपदवभासः । क्रमेणेति कथम् ? न हि क्रमो नाम कश्चित्क्रियाविशेष इत्याशङ्क्य कालाख्यापि शक्तिर्ब्रह्मण एवेत्याह--

आत्मभूतः क्रमोऽप्यस्या यत्रेदं कालदर्शनम् ।
पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितम् ।। 37 ।।

(79) योऽयं क्रियाणां क्रमः सोऽपि आत्मभूतोऽस्याः सत्तायाः । न केवलं ताः क्रिया एव, क्रमवद्भयो व्यतिरिक्तस्य क्रमस्यासञ्चेतनात् । यत्र क्रमे इदं कालदर्शनम्, कालं नाम पदार्थान्तरं तीर्थिकाः पश्यन्ति पौर्वापर्यादिरूपेण प्रविभक्तम् । कालस्य प्रविभक्तत्वाद्दर्शनमपि प्रविभक्तमित्युक्तम् । तात्पर्येण तु कालः पौर्वापर्यादिरूपेण प्रविभक्त इव क्रियोपाधिवशात् । क्रमाख्य हि कालशक्तिः ब्रह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्येणावभासोपगमविधायिनी नापरो द्रव्यभूतः काल इति

`अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।

जन्मादयो विकाराः षड् भावभेदस्य योनयः ।। (Vak.I.3)

इत्यत्र शब्दप्रभायां निर्णीतोऽयमर्थः ।। 37 ।।

ननु च जन्मनाशावस्तुत्वात्कथं सत्तात्मकौ स्यातामित्याशङ्क्य नाशस्य तावत्सत्तात्मकत्वमुपपादयति--

तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।

लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ।। 38 ।।

(80) नपायोपजनविकारित्वान्नित्या ब्रह्मात्मिका सत्ता निरन्वयविनाशासहेत्यभावो नाम न भावाव्द्यतिरिक्तः । केवलं प्रागूर्ध्वं च तिरोभावमात्रं भावावभासस्य यदस्माभिरभ्युपगम्यते सैव नास्तिता कथ्यते । सत्तैव तिरोभूता स्वकारणेषु शक्तिरूपतयावस्थिता वस्तूनां नाशो न तु निरूपाख्योऽसौ । समस्तेषु च भावेषु तिरोभूतेषूपसंहृतक्रमः सिद्धरूपः `तिरोभावो नाश' इत्यादिनामपदप्रत्याय्यः। यदा तु सैव नास्तिता तिरोभावावस्थारूपा साधनसम्पर्कवशात्प्रतायमानस्वभावा विवक्षिता तदाख्यातपदप्रत्याय्या । पूर्वावस्था `अपक्षीयते' इत्युच्यते, तदुत्तरा तु `विनश्यति' इति द्वौ भावविकारौ प्रातिलोम्यपरिणामलक्षणौ । तत्र च भवनधर्मणो भावस्याभवनविरोधात्तिरोभावामात्रं विनाशः ।। 38 ।। एवं सत्ताप्रतियोगिनोऽपि प्रथमं तद्विकारत्वमवस्थाप्य जन्मनस्तद्विकारत्वं व्याचष्टे--

पूर्वस्मात्प्रच्युता धर्मादप्राप्ता चोत्तरं पदम् ।

तदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ।। 39 ।।

(81) कारणे शक्तिरूपेणावस्थानाख्यात्पूर्वधर्मात्प्रच्युता, धर्मान्तराभिव्यक्तिगुणां निष्ठाम् अप्राप्ता सत्ता, गृहीतक्रमा कार्याभिमुखोत्तरोत्तरावस्थाविशेषमासादयन्ती जायत इति व्यपदिश्यते, न त्वसत एवोत्पादो जन्म । तद्यथा न सतोऽत्यन्तं विनाशः तथा जन्मापि नाभूतपूर्वस्याविर्भावः । एतच्च

`नाभावो जायते भावो नैति भावोऽनुपाख्यताम्' (Vak.III.सं.61)

इत्यादिना प्रकटयिष्यति । अत एव चावस्थामात्रत्वात्कार्यकारणयोरभेदाद्यथाविवक्षं जनिक्रियाकर्तृत्वोपपत्तिः `अङ्कुरो जायते' इत्यादौ । एतच्च निपुणतरं कारकसमुद्देशे वक्ष्यते । पूर्वापरावस्थान्तरालवर्त्तिक्षणपरम्पराक्रमविवक्षायां च जनिक्रियान्वयोन परिनिष्ठावस्थायाम् । तथा च वक्ष्यति--

`पूर्ववस्थामविजहत्संस्पृशन् धर्ममुत्तरम् ।

संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ।। (Vak.III.सा.117)

इति । उत्तरावस्थायाश्च पूर्वावस्थासु समारोपात्कर्तृत्वम् । व्यापृतं हि कारकं निरूपयन्तो जायत इति व्यवहरन्ति । निष्ठायां पुनरस्तीति जन्मोत्तरकाला सत्ता व्यपदिश्यते । ततोऽपि धर्मान्तराविर्भावोन्मुखतायां विपरिणमते । तत्रापि वृद्धौ वर्धत इति जन्मविशेषा एवैतेन पृथगुपात्ताः । तदयमानुलोम्यपरिणामः । तत्रैव च सिद्धरूपतायां द्रव्यता । सिद्धिर्हि निष्पत्तिरिति क्रिया पूर्वभाविनी नात्यन्तमर्थान्तरभूता ।। 39 ।।

अथ यदुक्तम्--

`संबन्धिभेदात्सत्तैव भिद्यमाना' (Vak.III.जा.33)

इति, तदिदानीं संबन्धिनः प्रदर्शयितुमाह--

आश्रयः स्वात्ममात्रा वा भावा वा व्यतिरेकिणः ।

स्वशक्तयो वा सत्ताया भेददर्शनहेतवः ।। 40 ।।

(82) क्रियाद्रव्ययोः सत्तात्मकत्वप्रतिपादनात् तव्द्यतिरेकेण वस्त्वन्तराभावाद् यद्यपि सर्वं सत्तात्मकपरब्रह्ममयम्, तथापि व्यवहारेऽविद्याप्रवृत्तिरूपे यथावभासंभेदस्यासत्यस्यानपह्नवनीयत्वाद् द्रव्यादिसत्ताश्रयः प्रविभागोऽयमविरुद्धः । तत्र आश्रयः सत्तायाः स्वाधारः व्यञ्जकत्वात्, भेददर्शनस्य भेदावभासस्य न तु भेदस्यैव स्वतोऽभेदात् हेतुः । तद्यथा--एकमपि मुखं

तैलोदकादर्शमणिकृपाणादावनेकरूपमवभासते । एवं व्यञ्जकानां गवादीनां भेदात्सत्ता गोत्वाश्वत्वादिरूपतयावभासत इत्यर्थः । स्वात्मीया वा मात्राः कलाः परिकल्पिता भागा अंशा गोत्वादिसामान्यविशेषाः परिच्छिन्नविषयाः सर्वविषयायाः सत्तायाः विच्छिन्नावभासतां दर्शयन्ति, येनु तैरेव सा विच्छिन्नेवाविच्छिन्नाप्यवभासते । ते चाश्रयभेदादेव ततः परिकल्पितभेदाः । तथा च--

`सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता'

इति गोत्वादिभिः सत्ताभेदं वक्ष्यति । दृष्टश्च स्वांशैरेव परिकल्पितैर्भेदावभासः । तद्यथावयविनः । आत्मा परोऽपि संभवति कल्पनानिर्मितेन भेदेनेति स्वग्रहणेन विशेष्यते स्वश्चासावात्मा चेति । दृष्टश्च काल्पनिको भेदः यथा हन्त्यात्मानमात्मना' इति । न ह्यात्मव्यतिरिक्तो हन्ता कश्चित् प्रत्यवभासते । अर्थान्तरत्वेनावभासमाना वा देैशरावेन्द्रियादयो भेददर्शनहेतवः सत्तायाः । इहेदानीमिदमन्यत्रान्यदान्यदिति देशादिनिमित्तोवस्तुभेदः । तथा देशासत्तिविप्रकर्षकृतोऽन्यथावभासो वस्तूनाम् । यथाहुः--

`दूरे यथा वा मरुषु महानल्पोऽपि दृश्यते' ।

इति । तथा रात्रौ नीलोत्पलानामन्यथावभासः, अन्यथाहनीति कालकृतो भेदः । तथा काचकामलाद्युपहतनयनानां शुक्ले शङ्खे पीतावभास इति इन्द्रियनिमित्तो भेदः । देशादावपि च सत्तायाः संबन्धिनोऽन्ये भेदका इति विषयभेदान्नेतरेतराश्रयता । तथा चायमत्र परमार्थः--आत्मीया एव शक्तयो योग्यताख्यास्सत्तायास्तथाविधाः सन्ति याभिर्विश्वप्रपञ्चं रचयति । तद्यथा चिन्तामणिरर्थिनां यथाशयमाकारनानात्वमुद्दर्शयति तथानन्तशक्ति सन्मात्रं ब्रह्म अविद्याविलसितसहं सांसारिकप्रमातृविषये नानारूपं चकास्तीत्यन्ते वस्तुसतत्त्वमुद्घाटितम् ।। 40 ।।

इत्थं च दर्शनान्तरोपन्यासपूर्वकं स्वदर्शने जातिपदार्थव्यवस्थामुपपाद्य व्यवहारे भिन्नाया गोत्वादिजातेर्यथासंभवं स्वगतो धर्मश्चर्च्यते--

पृथिव्यादिष्वभिव्यक्तौ न संस्थानमपेक्षते ।

अनुच्छिन्नाश्रयाज्जातिरनित्येऽप्याश्रये स्थिता ।। 41 ।।

(83) पृथिवीत्वाप्त्वतेस्त्वादयो जातिविशेषाः प्रतिनियतावयवरचनानपेक्षा एव महति परिमिते चाश्रयेऽभिव्यक्तिमासादयन्ति । तथा हि--लोष्टोऽपि पृथिवीरूपेण प्रतीयते, मृत्समूहोऽपि घटोऽपि पर्वतौऽपीत्यादि । एवं समुद्रोऽपि बिंदुरपि चोदकत्वेन प्रतीयत इत्यादि वाच्यम् । क्वचित्तु गोत्वादिका सालत्वतालत्वादिका च जातिः संस्थानमभिव्यक्तौ नियतमपेक्षत एवेत्यर्थादुक्तं भवति । तथा समवेतत्वेऽपि न गुणवदाश्रयविनाशाज्जातिर्विनश्यति । घटादौ गुणा ह्याश्रयप्रतिबद्धोदयाः युक्तं यदाश्रयविनाशमनु विनश्येयुः । जातीनां त्वाश्रयप्रतिबद्धो नात्मलाभः । केवलं प्रतीतावाश्रयमपेक्षन्ते ताः । एकव्यक्तिविनाशेऽपि च तदन्यत्रानुगतसंविदन्यथानुपपत्तेरनुमितिसद्भावाज्जातिः समवस्थितैवेति अनुच्छिन्नाश्रयात् आश्रयादुच्छेदोऽस्या नायाति,आश्रयोऽस्या नोच्छेदहेतुरित्यर्थः । आश्रयश्च विनश्यन्नुच्छेदहेतुः संभाव्यत इति नाश्रयविनाशादस्या विनाश इत्यर्थः । तृतीयार्थे वा पञ्चमी । आश्रयेण सह न विनश्यतीत्यर्थः ।। 41 ।।

ननु महाप्रलये नित्यानां सर्वेषां विनाशादाश्रयाभावे कथं जातयोऽवतिष्ठेरन् इत्याह--

अनुच्छेद्याश्रयामेके सर्वा जातिं प्रचक्षते ।

न यौगपद्यं प्रलये सर्वस्येति व्यवस्थिताः ।। 42 ।।

(84) एके इति । य आधारं विना तासामवस्थानमन्ते नेच्छन्ति त आश्रयोच्छेदो नास्त्येवेत्याहुः । तथा हि--इति वद्न्तो महाप्रलयस्याभावमिच्छन्तः परमाणुत्वादिजातिवद् घटत्वादिजातीनामाश्रयोऽनुच्छेद्यः सर्वथोच्छेत्तुमशक्य इत्याहुः । तथा च सदैव व्यवस्थिता जातयः कस्यचिदाश्रयस्यापायेऽप्यपराश्रयवृत्तित्वादिति नित्यत्वसिद्धिः । अथवा पृथिव्यादौ विनष्टेऽपि पार्थिवादिपरमाणुषु पृथिवीत्वादयो विश्राम्यन्ति, तद्गतेषु च रूपादिषु, रूपत्वादयः । आदिसर्गवत् युगपत्सर्वभावप्रलयो नास्तीत्यस्मिन्मते व्यवस्थिता एक इति समन्वयः । एवं एकस्मिन्नपि ब्रह्माण्डे युगपत्सर्वभावानां प्रलयो नास्तीति दर्शनाश्रयेणोक्तम् । यद्वा ब्रह्माण्डान्तरे विनष्टेऽपि ब्रह्माण्डान्तरस्य संभवाद्युगपत्प्रलयो नास्ति । तथा चाहुः--

अण्डानामीदृशानां तु परिसंख्या न विद्यते ।
इति ।। 42 ।।
ये तर्हि महाप्रलयमिच्छन्ति तन्मते कथमित्याह--
प्रकृतौ प्रविलीनेषु भेदेष्वेकत्वदर्शिनाम् ।
द्रव्यसत्त्लं प्रपद्यन्ते स्वाश्रया एव जातयः ।। 43 ।।
(85) एकत्वमभेदं मूलप्रकृत्या प्रधानेन सह परब्रह्मणा वा ये पश्यन्ति जगतः, तेषां मते सर्वथा भावप्रपञ्चस्य निरन्वयविध्वंसाभावान्महासामान्यरूपे तत्र परस्मिन्मूलकारणे प्रविलयमात्रं महाप्रलय इति शक्तिरूपेषु पदार्थेषु यथायथं स्वजातियोगस्तदानीमविरुद्ध एवेति द्रव्यात्मना जातीनां तदानीमरि सत्त्वम्, द्रव्यादर्थान्तराभावात् । अत एव सत्त्वमित्येव वक्तव्ये द्रव्यग्रहणं द्रव्यादभिन्नत्वं बोधयितुम् । यद्वा-द्रव्यं मूलकारणम्, तत्र सत्त्वं तस्य वा यत्सत्त्वम्, कारणसत्तामवलम्बत इत्यर्थः । अद्वैतिनां हि कारणमेवानुगतं सामान्यम् । द्रव्यशब्दो वा वस्तुपर्यायः । तेन द्रव्यसत्त्वं वस्तुन एव विद्यमानत्वं मुख्यं सत्त्वम्, न तूपचरितं साधारणमेव, शक्तिरूपतयावस्थानादित्यर्थः । वैशेषिकदर्शने तु निराधारा एव घटत्वादिजातयो महाप्रलय आसते । न हि गुरुत्वादधःपतनमासां मा भूदित्याधारः, अभिव्यक्तिमात्रे तस्योपयोगात् । तदानीं चानभिव्यक्ता एव आसताम् , को विरोधः ?। शास्त्रकारस्तु स्वसिद्धान्तेनैव निगमितवान् ।। 43 ।।
एवं व्यक्तिसर्वगतत्वं सामान्यानामाश्रित्योक्तम् । इदानीं सर्वसर्वगतत्वनयेनाप्याह--
ब्राह्मणात्वादयो भावाः सर्वप्राणिष्ववस्थिताः ।
अभिव्यक्ताः स्वकार्याणां साधका इत्यापि स्मृतिः ।। 44 ।।
(86) भवन्ति सर्वत्रेति भावाः ब्राह्मणत्वक्षत्रियत्वादयः सामान्यविशेषाः । ते प्राणिषु पिण्डेषु क्षत्रियादिष्ववस्थितत्वात्सर्वगताः । तथापि च `ब्राह्मणमालभेत' इत्यादौ न सांकर्यप्रसङ्गः, यस्मात्सर्वहतत्वेऽपि प्रतिनियताभिव्यञ्जकव्यङ्ग्या इति प्रतीतस्य क्रियाङ्गत्वात् यत्रैवाभिव्यक्तिमासादयन्त्युपदेशादिना व्यञ्जकेन तत्रैव स्वकार्यसम्पादका इत्यविच्छिन्नाहमपारम्पर्येण स्मर्यते । यथा सर्वगतत्वं पारम्पर्यागतं तथा प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमपीत्यर्थः ।। 44 ।।
एवं च प्रलये घटत्वादिजातयः परमाण्वादिष्ववस्थिता इति प्रकरणसामर्थ्यादुक्तं भवति । आदिग्रहणेन ह्यचेतनजातीनामपि सर्वगतत्वमत्र विवक्षितम्, चेतनजातयोऽप्यचेतनेष्ववस्थिता इति पूर्णं सर्वगतत्वमाह--
चित्रादिष्वप्यभिव्यक्तिर्जातीनां कैश्चीदिष्यते ।
प्राण्याश्रितास्तु ताः प्राप्तौ निमित्तं पुण्यपापयोः ।। 45 ।।
(87) आलेख्यनिर्मिते पुस्तकर्मणा दार्वादिना वा कृतेऽपि ब्राह्मणे सादृश्यात्तदाकारानुकारप्रत्ययोदय इति तत्रापि तज्जातिप्रकाशः । प्राण्युपघातात्पुनरधर्म इति चित्रस्थोपघाते तदभावः । एवं धर्मोऽपि चित्रस्थब्राह्मणपूजायां न भवति । कैश्चिद् इति वचनादत्रारुचिं सूचयति किल । मुख्यसादृश्यात्प्रतिकृतिषु प्रत्ययानुगमोपपत्तिर्न तु तद्वशाज्जातिसमवाय इति युक्तम । तदेव पूर्वं
`निर्वर्त्यमानं यत्कर्म' (Vak.III.जा.27)
इत्यादिना प्राक् प्रभवनादपि जातेः सद्भावान्नित्यत्वमुपपादितम् । इदानीं पुनराश्रयध्वंसेऽप्यवस्थानादिति पूर्वापरकोटिगामित्वात् प्राक्प्रघवंसाभावाभ्यामयोगात्परिपूर्णस्य नित्यत्वस्य सिद्धिः ।। 45 ।।
नन्वविदितशब्दार्थसंबन्धस्यान्येभ्यो व्यावृत्तं गोष्वनुगतं रूपं गौर्गौरिति न प्रतिभासते । यदि च ताभिर्व्यक्तिभिरभिव्यक्तं तत्सामान्यं कथं तत्प्रत्ययो न स्यात् । अथान्येभ्योऽव्युत्पन्नः प्रतिपत्स्यते तेऽपि कुत इति साक्षाद्दर्शिनं सर्वज्ञं द्रष्टारमन्तरेणान्धपरम्परा प्रसज्यते । सर्वत्र च शब्दार्थसंबन्धेऽन्धपरम्पराया एव वृद्धव्यवहार इति नाम कृतं स्यात्, निर्मूलत्वात् । ब्राह्मणत्वादीनां रूपव्यञ्जनसादृश्याद् बालमूकादिज्ञानसदृशोऽप्यसौ गोत्वादीनामिवावृत्तव्यावृत्तरूपावभासो नास्तीत्यवश्यमेव सर्वज्ञोऽभ्युपगन्तव्य इति मन्यमान आह--

ज्ञानं त्वस्मद्विशिष्टानां तासु सर्वेन्द्रियं विदुः ।
अभ्यासान्मणिरूप्यादिविशेषेष्विव तद्विदाम् ।। 46 ।।
(88) अस्मद् इति पञ्चमीबहुवचनम् ।
पञ्चम्या अत् (P.7.1.31)
इत्यदादेशे कृते प्रतिनियतपदार्थदर्शिभ्यो विशिष्टाः सर्वदृश आदिगुरव सन्ति । तथा च पतञ्जलिः--
`स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' (Y.Dar.I.26)
इति । सर्वज्ञानामीश्वरो गुरुरुपदेष्टा । तस्य च बुद्धीन्द्रियदेहानां कालेनानवच्छेदान्नित्यता । अन्यथा प्रलये वृत्ते पुनरुत्पन्नेषु ब्रह्मादिषु क उपदेष्टा स्यात् । ततश्च निःशास्त्रं निरनुष्ठानं विधिनिषेधयोरन्धमूकप्रायं जगत्स्यात् । अथ प्रलयो नैवास्ति, अपि तु
`न कदाचिदनीदृशं जगत्'
इति जैमिनीयाः । तदेतदसत् । सर्वशास्त्रेषु प्रलयस्मृतेः । अथाम्नायस्य क्रियार्थत्वाद्भूतार्थप्रातिपदिकं वाक्यमप्रमाणमित्युच्यते । तथा हि--कार्यपरत्वेनैव वृद्धव्यवहाराच्छब्दार्थसंबन्धव्युत्पत्तिप्रतिपत्तेः `यत्परश्च शब्दस्य शब्दार्थः' इत्याख्यायिकामात्रवर्णने सिद्धार्थाभिधाने प्रयोजनाभावाद्विधिनिषेधचोदनाभावत्कस्यचिदप्यशासनाद् भूतार्थं वाक्यशास्त्रत्वादेन न प्रमाणतामर्हति । प्रवर्तकवाक्याङ्गभानेन तु समन्वयमेति । शास्त्रे स्तावकत्वेन ह्यर्थवादवाक्यानि विधिवाक्याङ्गभावगमनादन्वयभाञ्जि भवन्ति । एवं हि विधिरुपोद्बलितो भवति ।
अत्र ब्रूमः । किमनर्थकानि वर्णवदेवार्थवादवाक्यानि महावाक्ये विधायके कार्यार्थप्रतिपादकेऽङ्गभावमुपयान्ति, आहोस्विदात्मीयः कश्चिदेशामर्थोऽस्ति यत्र प्रतिपत्तिमादधति कार्यपराणि संपद्यन्त इति पक्षद्वयम् । प्रथमः पक्षो न युक्तः । यथायथं सिद्धार्थानां स्वार्थप्रतिपत्तिदर्शनादकिञ्चित्करस्यानर्थकस्य परत्राङ्गभावानुपपत्तेः केवलं सा प्रतिपत्तिः तत्र स्वार्थे प्रमाणभूत अन्यथा वेति विचार्यम् । यत्र बाधः तत्राप्रमाणम् । अबाधे तु प्रमाणमेव । अबाधिता हि संवित् स्वतः प्रमाणमिति जैमिनीयनयः । सर्वज्ञेश्वरदेवतानां च शास्त्रदधिगतानां न किञ्चन बाधकमुत्पश्यामः । ननु च मार्जारादीनां शास्त्रे सार्थकं वचनं श्रूयते । न च तत्र संवादोऽस्तीत्येवमेव सर्वमदृष्टार्थमप्रमाणम् । मैवं वोचः । सर्वज्ञभूतानां वचनस्यागमान्तरेणापि सार्थकत्वस्य संबनादोपलब्धेरबाधितत्वमेव । चर्मचक्षुषः परमेतन्न मन्यन्ते । तथा हि भगवान् पतञ्जलिः--
`शब्दार्थसंयमनात्सर्वभूतरुतज्ञानम्'(Y.Dar.III.17)
आदिदेश । तस्माद्यत्र नास्ति संवादो बाधकमात्रपर्यवसानमर्थवादवाक्ये, तदसत्यार्थप्रतिपादनेनास्तु कार्यमात्रप्रतिपादनपरम् । यत्र तु नास्ति बाधः शास्त्रान्तरेण संवादः तत्प्रमाणमेव । न च तत्र कार्यपरता । सिद्धार्थप्रतिपादनेन पुराणेतिहासवाक्यानां तावत्येव प्रश्नोत्तरयोः समाप्तत्वदर्शनात् तत्परिज्ञानमात्राच्च धर्मोत्पत्त्यभ्युपगमात् । किञ्च ध्येये निर्ज्ञाते ध्यानादिरमुष्ठातुं शक्यते इति निष्प्रयोजनतापि नास्तीश्वरादिप्रतिपादकानां वाक्यानाम् । तथा च शास्त्रम्--
`आत्मा ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः'
इति । पातञ्जलमपि--
`तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनम्, ततः प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्च' (Y.Dar.I.27-29)
इति । स्मृतिकाराणां च मन्वादीनामभ्युपगमो महेन्द्ररुद्रादीनां प्रत्याख्यानमिति पक्षपातऋः । न हि मन्वादयो महर्षयो न सर्वज्ञा वीतरागा वा । रागादिमत्त्वेऽज्ञत्वे वा तेषां कथं तद्वचनं प्रमाणम् ।
"तस्मात्साक्षात्कृतधर्माण ऋषयो बभूवुः तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्राहुरुपदेशाय ग्लायन्तोऽवरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च" (Ni.I.20.2)
इत्यागप्रमाण्यात्सन्ति सर्वज्ञाः, येषामन्धपरम्पराव्युदासार्थमादिगुरुर्भगवान् सर्वशास्त्रप्रवक्ता तैरेव मुनिभिरागम्यते । शास्त्रस्य हि शब्दनित्यत्वेऽपि रचनावत्त्वादीश्वरप्रणीतत्वमेव । तथा च शास्त्रदीश्वरः समधिगम्यते । तस्माच्छास्त्रं प्रवृत्तमिति तस्य शास्त्रं

निमित्तम् । शास्त्रं पुनः किन्निमित्तम् ? ईश्वरनिमित्तम् । तदेतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्तमानयोरनादिः संबन्ध इत्युक्तम् । तथा च गीतास्वाविष्टमहेश्वरभावेन भगवता कृष्णावतारेणाभिहितम्--

`वेदान्तकृद्वेदविदेव चाहम्'

इति । एवमपि च शास्त्रस्य नित्यत्वे क्षतिर्नास्तीश्वरबुद्धिरूपत्वात्तस्य । ईश्वरस्य नित्यत्वं कालेनानवच्छेदादुक्तमेव । विशिष्टरचनावत एव वेदस्येश्वरबुद्धौ दर्शनात्मनि सदावस्थितत्वमिति स्मृतिवद्यथाकालं मन्वादिवदस्य रचनाकर्तापि नास्तीत्युक्तं ब्रह्मकाण्डे--

`अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।

शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ।।'(Vak.I.100)

इति । तदेवमागमप्रमाण्याद्भावतत्त्वदृशः शिष्टास्सन्त्यतीन्द्रियार्थदर्शिन इति ते यथायथं गोत्वब्राह्मणत्वादिजातीराश्रयविवेकेनाध्यक्षयन्ति । तच्च तेषां शिष्टानां ज्ञानं सर्वेन्द्रियं प्रतिनियमानपेक्षत्वात् । सर्वज्ञा हीन्द्रियान्तरेणापीन्द्रियान्तरव्यापारं कुर्वन्ति । तथा चागमः--

`नदेनीमिन्द्रियैरेव पश्यन्ति, घ्राणतः शब्दं श्रृणोति, पृष्ठतो रूपाणि पश्यति, अप्यङ्गुल्यग्रेण सर्वेन्द्रियार्थानुपलभते'

इति । अथवा न चाक्षुषमेव तेषां विप्रादिजातिविषयं विज्ञानम्, अपि त्विन्द्रियान्तरसंबन्ध्यपि । शब्दादौ सूक्ष्मजातिविशेषावधारणक्षममित्यर्थः । तदेवमागमप्रामाण्यमाश्रित्यसर्वज्ञसिद्धिरत्र सूचिता पूर्वार्धेन । विस्तरेणागमप्रामाण्यं वाक्यपदीयेऽस्माभिः प्रथमकाण्डे शब्दप्रभायां निर्णीतमिति तत एवावधार्यम् । उत्तरार्धेनागमसिद्धे सर्वज्ञेऽत्रानुमानं तदुपोद्बलकमाह--`अभ्यासाद्' इत्यादिना । इहाभ्यासवशाज्ज्ञानैश्वर्यादीनां पुरुषविशेषेष्वतिशयो दृष्टः । यथा वैकटिकानां रत्नतत्त्वपरीक्षायाम्,रूप्यतर्काणां च रूप्यगतातिशयपरिच्छेदे यथाभ्यासं प्रकर्षतारतम्यम् । यच्च सातिशयं दतवश्यं क्वचित्काष्ठाप्राप्तं सम्भाव्यते । यथादित्ये तेजः, दाहकत्वमग्नौ शैत्यमप्सु । तथा ज्ञानैश्वर्यशक्तिबलादयो गुणाः सातिशयाः पुरुषेषु दृष्टाः सर्वज्ञेयव्यापिकाष्ठाप्राप्तमतिशयमावेदयन्तः तत्समुचितमाधारं पूर्णसमस्तसम्पत्कमनुमापयन्त्येव । अतिशय एव हि ज्ञानादीनां तारतम्येन दृश्यमानः सर्वज्ञबीजम् ।

न च यत्राप्यतिशयो दृष्टः स स्वार्थनतिलङ्घनादिति वाच्यम् । स्वार्थस्य स्वाश्रयानुसारेण व्यवस्थापयितुमशक्यत्वात्, आदित्यादौ च प्रकाशकत्वादेः स्वार्थातिलङ्घनेन दृष्टत्वात् । तस्मात्संभावनानुमानेनापि सर्वज्ञसिद्धिरुचिता । तदुक्तम्--

`तत्र निरतिशयं सर्वज्ञबीजम्'(Y.Dar.I.25)

इति । यदेतत्सर्वज्ञबीजं ज्ञानादीनामतिशयलक्षणं तत्तत्र निरतिशयम् । यत्र निरतिशयं स सर्वज्ञ इत्यर्थः । सर्वज्ञग्रहणं चात्रैश्वर्योपलक्षणम्, तेन यत्र निरतिशयमैश्वर्यं स सर्वेश्वरः परमेश्वर इत्यपि सिद्धम्, राजादीनामैश्वर्यतारतम्यदर्शनात् । इत्थं च मूलभूतेश्वरसम्भवात्

`ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्' (Vak.I.30)

इत्युक्तम् । परमेश्वरस्तु कालेनानवच्छिन्नः सहजज्ञानैश्वर्यादिधर्मयुक्तः । तस्य चेतन स्याचेतनं जगदिच्छानुविधायि प्रत्यगात्मन इव शरीरमित्युपकार्योपकारकभावसंस्थानविशेषयोगादिज्ञाता स एतन्निर्मिमीत इति बुद्धिमत्कर्तृकमपीदमत्र विश्वं सिद्धमिति स्थितम् । तदेवमागमसिद्धाः सन्त्यस्मद्विशिष्टाः । इन्द्रियप्रतिनियमानपेक्षं च साक्षात्काररूपं तेषां ज्ञानमित्यतीतानागतसूक्ष्मव्यवहिताविप्रकृष्टार्थसतत्त्वदृशो योगिनः सर्वा गोत्वब्राह्मणत्वादिजातीरध्यक्षयन्तः तदुपदेषमसङ्करेणारभन्ते । ब्राह्मणत्वादिष्वस्ति किञ्चित्सास्नादिस्थानीयमुपव्यञ्जनमस्माकं परमतीन्द्रियम् । शिष्टैस्तदवधार्य संज्ञाः प्रणीताः । तदुक्तं--

`प्रत्यक्षपूर्वकं संज्ञाकर्म'

इति । तत्रभवतामुपदेशाद्वयमपि सम्प्रदायपारम्पर्याद्यथायोगं गोत्वादिजातीरध्यवस्यामः । अस्मद्विशिष्टानां चेदं संज्ञाप्रणयनं

यथावस्थितशब्दार्थसंबन्धप्रकाशनमात्रं न त्वपूर्वसङ्केतकरणं स्वाभाविकत्वाच्छब्दार्थसंबन्धस्येति शिष्टप्रमाण्यात्सन्ति ब्राह्मणत्वादिजातयो विविक्ता यथायथं भावप्रत्ययाभिधेयाः ।। 46 ।।

तत्रेदं विचार्यते ।

`तामाहुस्त्वतलादयः' (Vak.III.जा.34)

इत्युक्तम्, जातिगन्धत्वम्, उत्पलगन्धत्वम्, मल्लिकागन्धत्वमित्यत्र किं परजातौ गन्धसामान्ये भावप्रत्ययः किं वापरजातावपरसामान्ये विशिष्टाश्रयगन्धसमवायिनीत्याशङ्क्याह--

जात्युत्पलादिगन्धादौ भेदतत्त्वं यदाश्रितम् ।
तद्भावप्रत्ययैर्लोकेऽनित्यत्वान्नाभिधीयते ।। 47 ।।

(89) इह लौकिके शब्दव्यवहारे विवक्षाधीने यदा जातिगन्धादिशब्दात्समासाद्भावप्रत्ययः क्रियते तदा सामर्थ्ये समासविधानात्तदेव प्रवृत्तिनिमित्तमिति तत्रैव भावप्रत्ययः,

`समासकृत्तद्धितेषु सम्बन्धाभिधानम्'

इति वचनादित्याधाराधेयसम्बन्धः सप्तमीसमासे, तत्पूर्वकः शेषसम्बन्धो वा षष्ठीसमासे तद्वाच्यः । यदा तु गन्धशब्दादेव पूर्वं भावप्रत्ययः पश्चात्समास इति विवक्षा तदा भेदस्य जात्युत्पलाद्याश्रितस्य विशिष्टस्य गन्धस्य यत्तत्त्वं पारमार्थिकं तत्कर्मभूतं यदाश्रितं कर्तृभूतमपरसामान्यं तद्भावप्रत्ययवाच्यं न भवति, अनित्यत्वात्सर्वत्रासन्निधानात् । भेदस्य वा गन्धविशेषस्य तत्त्वं विशिष्टं सामान्यम्, यदाश्रितं समवेतमिति समानाधिकरणे पदे ।

अयमत्रार्थः--यदुत्पलगन्धसमवेतं विशिष्टं सामान्यं न तच्चन्दनगन्धादिव्यक्तौ सन्निहितमिति व्यभिचारादनित्यम्, न तु सामान्यमनित्यं भवति । गन्धशब्दश्चाविशेषेण गन्धमात्रे वर्तत इति गन्धमात्रव्यापिनैवास्य प्रवृत्तिनिमित्तेन भावप्रत्ययाभिधेयेन भवितव्यम् । न चोत्पलगन्धसमवेतं विशिष्टं सामान्यं सर्वगन्धव्यापीति नेदमभिन्नं गन्धशब्दप्रवृत्तिनिमित्तम् । आश्रायविशेषेण तु जातेः गन्धत्वं उत्पलगन्धत्वमिति समवेतसमवायाद्विशेषणे विशिष्टावसायसिद्धिः । न चैवं नास्त्येव सामान्यविशेषः,आश्रयभेदेन गन्धव्यक्तीनां भेदात् शाबलेयत्वादिवदुपरजातियोगोपपत्तेः । तथा च भेदतत्त्वं यदाश्रितम् इत्याह । गुणानामाश्रयभेदाद्भेद इति वक्ष्यत्येव । अस्त्येव चोत्पलगन्धानामन्यतो व्यावृत्तोऽन्वयी प्रत्यय इति तन्निमित्तसामान्यसम्भवः केन वार्यते । अत एव लोक ग्रहणम् । लोकव्यवहारे परं नाभिधीयते । गन्धयुक्तिविदस्त्वभियुक्ताः पश्यन्त्येव विशिष्टं सामान्यम् । समासादपि च भावप्रत्यये सामान्यविशेषसंबन्धस्य समासवाच्यत्वाच्छब्देनाप्रतिपादनादनित्य इति नाभिधीयते ।। 47 ।।

काश्चित्तु ज्जातयोऽसंविज्ञानपदा अपि सन्तीत्याह--

अस्वशब्दाभिधानास्तु नरसिंहादिजातयः ।
सरूपावयवेवान्या तासु श्रुतिरवस्थिता ।। 48 ।।

(90) नरसिंहगौरखरत्वादिजातयोऽविद्यमानासाधारणवाचकाः । समानं रूपं ययोक्तावयवौ यस्याः नरसिंह इत्यादि श्रुतेः शब्दस्य सा तत्र वाचिका । एषा हि श्रुतिः नरत्वसिंहत्वजातिविषयनरसिंहशब्दद्वयसादृश्येनावभासमाना नरत्वसिंहत्वजातिप्रतिभामत्रोत्पादयति । न च नरसिंहाभ्यामारब्धो नरसिंहः, अपि तु जात्यन्तरमेवात्र शबलरूपे वस्तुनि समवेतम्, चित्र इव रूपे चित्रत्वमिति तदसाधारणमेषा न शक्नोति प्रत्याययितुम् । भावतश्च निरंशैवेयं श्रुतिरित्यवयवसादृश्यमपि न वास्तवमिति इवशब्दः, सादृश्याभिमानमात्रमत्र परम् । यथा निरंशवाक्यस्थानां पदानामिति भ्रान्त्या नरत्वादिजातौ प्रतिभोत्पादनान्नेयमसाधारणा नरसिंहजातौ श्रुतिः न चान्यापि विद्यत इति अस्वशब्दाभिधान-न विद्यते स्वशब्दः अभिधीयतेऽनेनेत्यभिधानं यस्या इति ।। 48 ।।

तदेवमर्थद्वारेण पदे परीक्ष्यमाणे प्रकृतिभागस्य जात्यर्थतया व्याप्तिमुपपाद्य प्रत्ययभागस्यापि तदुपपादनेन जात्यभिधायितायां प्रकृतिप्रत्यययोस्समभिव्याहारमुपपादयितुमाह--

जात्यवस्थापरिच्छेदे सङ्ख्या सङ्ख्यात्वमेव वा ।

विप्रकर्षेऽपि संसर्गादुपकाराय कल्पते ।। 49 ।।

(91) द्रव्यजातेः क्रियाजातेश्च सुबन्ततिङन्तपदगतप्रकृतिवाच्यायाः स्वाश्रये द्रव्येऽवस्थानं अवस्था समवायः तत्र परिच्छेदः, किमेकत्र द्रव्ये तस्याः समवायो विवक्षितः किं वानेकत्रेत्येवंरूपः । तस्मिन्निर्णीयमाने यथायथं सुप्तिङ्प्रत्ययवाच्या सङ्ख्याजातिरेकार्थसमवेतसमवायात्साक्षात्सम्बन्धाभावेऽप्युपयोगाय संपद्यते । तिङन्तपदवाच्याया अपि सङ्ख्याजातेः क्रियाजात्या स्वाश्रयद्वारेणास्त्येवैकार्थसमवेतसमवायः । जातेर्वा अवस्था रूपभेदः स्वाश्रयविशेषेण संसर्गलक्षणः । शब्दप्रतीतया वा संख्याजात्या सामर्थ्यादाक्षिप्ता सङ्ख्याव्यक्तिरेकार्थसमवायात्प्रकृतिवाच्यां जातिं विशिनष्टि । प्रतीतस्य ह्यवच्छेदकत्वम् । प्रतीतिश्च शब्दादर्थत्सामर्थ्याद्वा भवन्ती न विशिष्यते ।

यद्वा द्रव्यपदार्थपक्षे संख्या व्यक्तिः शब्दवाच्या विशेषणम् । जातिपदार्थपक्षे तु सङ्ख्या जातिरिति विकल्पः । तत्र गौः, पचति, पचत इत्यादौ विशिष्टजातीयो विशिष्टसङ्ख्यावच्छिन्नश्चार्थः प्राधान्येन प्रतीयत इति प्रत्ययार्थस्य विशेषणत्वम् प्रकृत्यर्थस्य च विशेष्यत्वं । तथा च

`क्रियाप्रधानमाख्यातम्'

इत्युपपत्तिः । पचतीत्यादौ साध्यत्वात्प्रकृत्यर्थस्य प्राधान्यात्कारकादिना प्रत्ययार्थेन तस्य विशेषणात् । औपगव इत्यादौ तु प्रकृत्यर्थोपरक्तस्य प्रत्ययार्थस्यापत्यलक्षणस्याभिधानं प्राधान्येनेत्येतद्विषयमेवेदम्

`प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः'

इति । प्रायिकमेतत् । तथा हि--सङ्ख्या प्रकृत्यर्थानुग्रहायेहोक्तेति `गामानय'इत्यादौ तद्विशिष्टस्य प्राधान्यम् ।। 49 ।।

एवं तावत्समान्येन प्रत्ययार्थविशिष्टः प्रकृत्यर्थोऽभिधीयते पदेनेति द्रव्यद्वारेण सम्बन्धाज्जात्योः प्रकृतिप्रत्ययोः समभिव्याहारोपपत्तिरुक्ता । इदानीं क्वचित्तात्पर्यभेदाच्छुतोऽप्यर्थो न विवक्ष्यत इति वाक्यार्थौपयिकत्वं पदार्थस्य विचारयितुमाह--

लक्षणा शब्दसंस्कारे व्यापारः कार्यसिद्धये ।
सङ्ख्याकर्मादिशक्तीनां श्रुतिसाम्येऽपि दृश्यते ।। 50 ।।

(92) कर्मादयोऽपि शक्तयो विभक्तिवाच्याः सङ्ख्यावदिति तासां संख्याकर्मादिशक्तीनां श्रुतेः शब्दस्य स्ववाचकस्यामादेः साम्येऽपि, द्विविदो व्यापारो वाक्यार्थे । लक्षणा एकः । स च शब्दासंस्कारे शब्दसंस्कारविषये । सङ्ख्याकर्मादिरहितस्य प्रातिपदिकार्थमात्रस्यासम्भवात्

`न केवला प्रकृतिः प्रयोक्तव्या'

इति शब्दसंस्कारार्थं स्वार्थेन प्रकृत्यर्थमनवधारयन्त्यपि विभक्तिः प्रयुज्यते क्वचित् । तद्यथा `ग्रहं सम्मार्ष्टि' इति । कथमत्रैकत्वं न विवक्षितम् ? शब्दसंसकारमात्रफलमेव त्वेकवचनमिति चोद्ये न्यायं वक्ष्यति । इह वस्तुमात्रोपक्षेपः । तथा कर्मादिशक्तीनां शब्दसंस्कारार्थमुपादानेऽविवक्षा । यथा `सक्तून् जुहोति' इति । अत्र हि सक्तुसाधनो होम इत्येतावन्मात्रं विवक्षितम् । हवनक्रियाया अदृष्टार्थत्वेन फलवत्त्वात्प्राधान्यात् क्रियाविषयत्वमात्रेणेप्सिततमा अपि सक्तवः क्रियासमन्वयमात्रे चरितार्थाः । न हि कथं नाम सक्तवो भस्म सम्पद्येरन् इति होमः क्रियते, अपि तु सक्तुसाधनेन तेनादृष्टं सम्पद्यतामिति । यद्येवमदृष्टार्थत्वात्क्रियायाः सक्तवो नैवेप्सिततमा िति नास्त्येवात्र कर्मशक्तिः । तदसत्यास्तस्याः कथमविवक्षा । सतो ह्यविवक्षा शब्दोपात्तस्य न्याय्या । तद्यथा `ग्रहम्' इत्येकत्वस्य, न त्वसतः । न हि `काष्ठानि पचन्ति इत्युक्त्वा काष्ठानां कर्मशक्तिरविवक्षितेत्युच्यते, अपि तु करणशक्तिः । सत्यमेतत् । अदृष्टमेव तु न सम्पद्येत यदि सक्तव ईप्सिततमत्वेन नाश्रीयेरन्, अनन्योपायसाध्यत्वादित्यदृष्टार्थत्वसामर्थ्यादेव सक्त्वर्थिताभ्युपेतव्या क्रियायाः । तद्यथाराधनस्य देवतार्थता । अदृष्टार्थमेव हि देवताराध्यते इत्यदेवतार्थत्वे तस्यादृष्टार्थत्वमेव हीयेत । एवमिह प्रधानमङ्गं सक्तवोऽदृष्टस्येति भवन्त्येवेप्सिततमाः । अविवक्षितन्तु तदीप्सिततमत्वम्, तावन्मात्रफलत्वेन क्रियाया अनभिसंहितत्वात्, फलान्तरप्रयुक्तत्वाच्च सक्तूनाम् । क्रियाफलत्वस्य न ग्रहाणामिव रूपान्तरेणोपादानादविवक्षितत्वम् । तस्मादीप्सिततमत्वं

कारकान्तरापेक्षयासच्चाविवक्षितं च रयाचिदपक्षयात्रेति स्थितम् । क्वचित्तु कार्यसिद्ध्यर्थं सङ्ख्याकर्मादिशक्तीनां व्यापारः कार्यस्य वाक्यार्थभूतायाः क्रियायाः सिद्धिनिमित्तो द्रव्यावच्छेदोपयोगः । सङ्ख्यादिविशेषवता द्रव्येण साध्यमानायाः क्रियायाः प्रतिपादनात् । तद्यथा पशुना यजेतेति । अत्र हि यजिरेकेनापि पशुना अविकलो निष्पद्यत इति विवक्षितैव सा सङ्ख्येति वक्ष्यते न्यायः । कर्मशक्तेश्च विवक्षा `व्रीहीनवहन्ति' इति । व्रीहयो ह्यवघातेन संस्कार्यत्वादीप्सिततमाः न त्ववघातमात्रार्थं कश्चित्प्रवर्तते, अपि तु व्रीह्यर्थम् । तेषामवघा तेन संस्कृतानां पुरोडाशयोग्यस्वभावातिशयप्रतिलम्भेन यज्यङ्गतासिद्धेरित्यवहननक्रियात्राप्रधानम्, संस्कार्या व्रीहय एव प्रधानम्, तण्डुलीकृतानामुत्तरत्रोपयोगात् । स्कतूनां तु भस्मीभूतानामसत्त्वन्नोत्तरत्रोपयोगः ।

तदाहुः--

"भूतभाव्युपयोगं हि द्रव्यं संस्कार्यमिष्यते ।

सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित् ।।"(Tant.Var.onMi. Su.2.1.4,p.411.Anandasrama Edition).

इति । अवहननक्रिया चात्राप्रधानं वास्तवेन रूपेण कथ्यते । शाब्देन तु रूपेण क्रियैव सम्पाद्यतया चोद्यते सर्वत्रेति सैव प्रधानम् । तथा च तदपेक्षं कर्मणः कारकत्वमत्रेति वाक्यार्थप्रधानभूता क्रियेति क्रियाविवेके विस्तरेणास्माभिरभिहितमिति तत एवावधार्यम् । इत्थं च

`तानि द्वैधं गुणप्रधानभूतानि'

इति भावशब्दानां द्वैविध्यकथनं वास्तवरूपाभिप्रायमवगन्तव्यम् । पूर्वे तु

`लक्षणा शब्दसंस्कारो व्यापारः कार्यसिद्धये'

इति पठन्तो लक्षणा द्रव्योपलक्षणम्, तत्र शब्दसंस्कारमात्रोपयोगिसङ्ख्योपादानमिति तद्विषयत्वाच्छब्दसंस्कारो लक्षणेति सामानाधिकरण्यं व्याचक्षते ।। 50 ।।

इदानीं शब्दसंस्कारे लक्षणाख्यो व्यापारो विभज्यते--

न विना सङ्ख्यया कश्चित्सत्त्वभूतोऽर्थ उच्यते ।

अतः सर्वस्य निर्देशे सङ्ख्या स्यादविवक्षिता ।। 51 ।।

(93) इदं तदिति सर्वनामप्रत्यवमर्शयोग्यं द्रव्यं सङ्ख्यासमन्वयसहम्, `तस्यापत्यम्' इत्यादौ निर्देशे साक्षान्निर्दिदिक्षितमिति नान्तरीयकत्वान्निर्देशमात्रे

`न केवला प्रकृतिः प्रयोक्तव्या'

इति चरितार्था सङ्ख्या न विवक्ष्यत इत्युत्सर्गः । तदुक्तम्--

`तद्वितार्थनिर्देशे लिङ्गवचनमप्रमाणम्, तस्याविवक्षितत्वात्' (Va.1.on P.4.1.92.)

इति । जातिस्तु द्रव्यस्य द्रव्यान्तराद्विवेकमवगमयितुमुपादीयत इति न तदविवक्षा न्याय्या । सर्वथा विवक्षाभावे प्रकृतिप्रत्ययार्थयोः शब्दप्रयोगस्यैवाभावात् । तथा च प्रकृतिवाच्या सङ्ख्या विवक्ष्यत एवेति हि वक्ष्यति ।। 51 ।।

अस्योत्सर्गस्य केचिद्विशेषमाहुः--

एकत्वं वा बहुत्वं वा केषाञ्चिदविवक्षितम् ।

तद्धि जात्यभिधानाय द्वित्वं तु स्याद्विवक्षितम् ।। 52 ।।

(94) यज्जातौ न संभवति तव्द्यक्तिगतं पारम्पर्येण व्यवच्छेदकतयावसीयते इति द्रव्यगता सङ्ख्या जातेरवच्छेदिका न्याय्या न तु स्वगता एकत्वबहुत्वलक्षणा । एकत्वं हि जातेरव्यभिचारि बहुत्वम् अप्यातिदेशिकम् । ननु जातेर्नैव सङ्ख्यास्ति, द्रव्यधर्मत्वात्तस्याः । नेह शास्त्रान्तरप्रसिद्धा प्रक्रिया प्रमाणम्, अपि तु स्वकृतान्तः कश्चिदास्थेयः । अस्ति च प्रमाणमेकत्वे । जातेः प्रमाणेनैकत्वविशिष्टाया एव सिद्धेः । तथातिदेशिकं

`जात्याख्यायामेकस्मिन्बहुवचनम्'(P.1.2.58)

इति । जातिपरायां चोदनायामेकत्वबहुत्वे न विवक्ष्यते `ब्राह्मणो न हन्तव्यः', `सुरान पेया', `वृषलैर्न प्रवेष्टव्यम्' । यत्र तु विवक्षा तत्र द्रव्यपरा चोदनेति । द्वित्वं तु न जात्याख्यायां विहितमिति तत्सर्वथा द्रव्याश्रयमेवेति विवक्ष्यते सर्वत्र ।। 52।।

तदपि क्वचिन्न विवक्ष्यत इत्याह--

यद्येतौ व्याधितौ स्यातां देयं स्यादिदमौषधम् ।
इत्येवं लक्षणेऽर्थस्य द्वित्वं स्यादविवक्षितम् ।। 53 ।।

(95) औषधदानविषयभूतव्याधितोपलक्षणार्थस्यैवमनेन प्रकारेण व्याधिं निमित्तत्वेनोपादाय प्रवृत्तस्योपलक्षणस्यैतावित्येवमुपात्तस्य यद्वाच्यं द्वित्वं तदत्राविवक्षितम् । सप्तमी चेयम् । लक्षणे ज्ञापने, अर्थस्यौषधदानविषयस्योपलक्षणे वेत्यर्थः । औषधस्वरूपमहिम्नैवात्र व्याधिविषयतासिद्धेः । तद्दानस्यैताविति व्याधितान्तरनिवृत्त्यर्थमुपादीयमानमेकस्यापि तयोर्मध्यात्संभाव्यमाने व्याध्युद्भवे तदौषधदानस्येष्टेरविवक्षात्र द्वित्वे । सम्भावनाविषयत्वाच्च व्याधिसम्भवस्य यदा द्वयोरपि तत्सम्भवः तदा समुदितावेवौषधदानस्य विषय इति सहविवक्षया चोदनार्थवती । व्याधिप्रतीकारप्रयुक्तं पुनरौषधदानमित्येकस्यापि व्याधितत्वे तत्सम्भवः । बहुषु च प्रकृतेषु एताविति परामर्शस्यानुपपत्तेरविवक्षायामपि द्वित्वस्य बहुषु तदौषधदानाप्रसङ्गः । किञ्चौषधदानेन द्वावनुग्राह्याविति प्रधानेऽत्र सङ्ख्या न विवक्ष्यते । यत्र नु क्रमेणापि द्वयोरेव चोदनार्थप्रतिपत्तिः वक्षौ छेत्तव्याविति तत्र विवक्षैव । इह तु सम्भावनाविषयं व्याधितत्त्वं भविष्यदुत्प्रेक्ष्यचोदनेति क्रमेण युगपद्वा व्याधिसम्भवे तदुपपत्तिः । न हि भविष्यतो नियमेन साहभाव्यं निर्णीयते ।। 53 ।।

तदेवं प्रत्ययोपात्ताया विवक्षितावविवक्षितत्वं वाक्यार्थपर्यालोचनया विषयविभागेन प्रतिपाद्याधुना प्रकृत्युपादानाया एकान्तेनैव विवक्षेत्याह--

एकादिशब्दवाच्यायाः कर्मण्यङ्गत्वमिष्यते ।
सङ्ख्यायाः खनति द्वाभ्यामिति रूपाद्धि साश्रिता ।। 54 ।।

(96) द्वाभ्यां मन्त्राभ्यां मृदं खनति, `चतुर्भिरादत्ते', `षडभिर्हरति' इत्यत्र प्रवृत्तिनिमित्तभूतायाः प्रातिपदिकवाच्याया व्द्यादिसङ्ख्यायाः क्रियावच्छेदकत्वमभ्युपगम्यते, सा सङ्घ्या विवक्षितैव । अन्यथा शब्दार्थ एव त्यक्तः स्यादिति प्रातिपदिकस्यान्यथानुपपन्नप्रयोगस्य रूपात् स्वभावात्, विशिष्टसङ्ख्याभिधायिनः सामर्थ्यादत्र विवक्षा । रूपशब्दो वा प्रातिपदिकपर्याय इति रूपात् प्रातिपदिकात् न विभक्तेरित्यर्थः, यथा द्विपुत्र इत्यादौ । अत्र हि विभक्तिवाच्यो भेदः समास एकार्थीभावान्निवर्तते । प्रकृतिवाच्यस्त्ववतिष्ठत एव । तदभावे हि शब्दप्रयोग एव निष्फलः स्यात्,ग्रहमित्यादौ तु प्रत्ययः प्रातिपदिकार्थप्रत्यायने साहाय्यं गच्छतीत्यर्थवानित्यत्राविवक्षा युक्ता ।

`यस्योभयं हविरार्त्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्'

(Taitt.Bra.3.7.1.7.8,p.1446)

इत्यत्रावयवद्वयारब्धः सङ्घ उभयशब्दवाच्यो न तु सङ्ख्यावाच्युभयशब्द इत्येकावयवविनाशेऽपि समुदायस्य विनाशान्निर्वापः क्रियत एव ।। 54 ।।

इदानीं यदुक्तं `व्यापारः कार्यसिद्धये' इति तद्विभज्यते । तत्र द्वित्वमेव विवक्ष्यते नैकत्वबहुत्वे इति पूर्वमुक्तम् । अधुना त्वेकत्वमपि क्वचिद्विवक्ष्यत इत्याह--

यजेत पशुनेत्यत्र संस्कारस्यापि सम्भवे ।
यथा जातिस्तथैकत्वं साधनत्वेन गम्यते ।। 55 ।।

(97) शब्दसंस्कारार्थत्वं यद्यप्यत्र विभक्तेः संभाव्यते तथापि पशुजातेर्यथा प्रातिपदिकवाच्यायाः क्रियाङ्गभावः, `तथैकत्वम्' अपि विभक्तिवाच्यमेकपदोपादानान्न त्यज्यते । जातिवदेकत्वमपि क्रियाङ्गमित्यर्थः । एकपदोपादानो ह्यर्थ एकत्वेन बुद्धौ विपरिवर्तमानः कथं भेदेन `पशुना यजेत', `एकेन च' इति सम्बध्येत । प्रकृतिप्रत्ययाभ्यां हि यो विशिष्टः पदार्थोऽभिधीयते

तेनाभिन्नयैव प्रवृत्त्या संस्पृश्यते यज्यर्थः । एकपदत्वेऽन्तःपदसम्बन्धस्यापौरुषेयत्वात् । अतश्चोभयमपि शक्यविधानम् । भेदेन तु संस्पर्शे वाक्यभेदप्रसङ्गादशक्यविधानं स्यात् । भिन्नपदोपादानं तु कदाचिद्भेदेन सम्बध्येतापि, शक्यविधानत्वात् । यथारक्तमश्वमानयेति, तत्र च वाक्यभेदो रक्तमानय, अश्वमानयेति वाक्यीयस्समन्वयः । एकपदोपादाने तु शोणमानयेतिवद् औपादानिको विनियोगः । `ग्रहं सम्मार्ष्टि' इत्यत्र तु यथा न शक्यविधानं तथा दर्शयिष्यते । अनेन च पशुशब्दार्थस्य पूर्वमनिर्ज्ञातत्वमप्रधानत्वं च विवक्षानिबन्धनं ध्वनति । अस्मादेव वाक्यात् साधनत्वेन प्रतीयत इत्यर्थः । अग्रे तु स्फुटमेव दर्शयिष्यति ।

ननु विनियोजिकया श्रुत्या द्रव्यस्य क्रियासाधनत्वं विहितम्, न तु गुणस्य सङ्ख्यायाः, विनियोजकप्रमाणस्य द्रव्य एवोपक्षीणत्वाद् गुणविनियोगे प्रमाणाभावः । सत्यम् । श्रुत्यादिप्रमाणषट्कव्यतिरिक्तोऽयमुपादानाख्यः । न हि सङ्ख्यारहितं द्रव्यमात्रं विधिरूपादत्ते । एकपदोपात्तस्य गुणस्य त्यक्तुमशक्तयत्वात् । प्रतीयते हि सगुणं द्रव्यमेकरसया शाब्द्या प्रतीत्येति यथायोगं गुणद्रव्ययोरन्वयः ।। 55 ।।

तदेवमयं वादी बाधकमन्तरेणाविवक्षां न मन्यते । ये तु शब्दसंस्कारार्थत्वमेव सङ्ख्यायाः प्रतिजानते ते कथमत्रैकत्वं विवक्षन्तीत्याह--

लिङ्गात्तु स्याद् द्वितीयादेस्तदेकत्वं विवक्षितम् ।
एकार्थविषयत्वे च तल्लिङ्गं जातिसङ्ख्ययोः ।। 56 ।।

(98) शब्दसंस्कारार्थमेव पशुनेत्येकत्वम् । विवक्षा तु लिङ्गाज्ज्ञापकाद्वाक्यान्तरगतात् । तथा हि `आग्नेयमजमग्निष्टोम आलभेत' इत्युक्त्वा `ऐन्द्राग्नं द्वितीयमुक्थ्ये, ऐन्द्रं पृश्निं तृतीयं षोडशिनि' इति द्वितीयादित्वेनाजो विशेष्यते । यदि चाजमित्येकत्वमविवक्षितं स्यात्तदा द्वितीयादित्वस्यासिद्धत्वात् द्वितीयमित्यादि पुनर्विधानं न स्यादित्यस्मादभिधानसामर्थ्याद् विवक्षितमेकत्वम्' इति निश्चीयते । नन्वविवक्षायामप्येकत्वस्यात्र द्वितीयं तृतीयमित्यपपद्यत एव। अनियतसङ्ख्याप्रसङ्गे द्वितीयादित्वेन विशेषणात् । नैतदस्ति । एवं हि पक्षेऽनुवाददोषः स्यात् । लिङ्गत्वे तु द्वितीयादित्वमपूर्वमेव विहितं नित्यमविकल्पितं श्रुतं नोपरुध्यते । पक्षेऽनुवादे हि श्रुतस्य वैकल्पिकत्वं स्यादित्यविकल्पितं श्रवणं परित्यक्तं भवेदिति दोषप्रसङ्गः । एकाश्रये परिसमाप्तत्वं चैकत्वसङ्ख्याया जातेश्चैतदेव लिङ्गमिति प्रसङ्गादाह । यथा ह्येकत्वं प्रत्याश्रयपरिसमाप्तं तथा सत्यप्यनेकार्थसमवाये जातिरपीत्यस्मादवसीयते । तथैकत्वसङ्ख्याया एकः समानोऽर्थो विषय आश्रयोऽस्या जातेरित्यत्रापि तदेव द्वितीयादित्वं लिङ्गम् । अन्यथाश्रयेषु जातेरेकदेशेन प्रवृत्तौ यो द्वयोः पूरणो नासौ तज्जातीयः स्यात्, अपि नु जात्येकदेशः । न च जात्येकदेशो जातिर्भवति । समानाश्रयत्वे च जात्येकत्वयोर्जातिः प्रकृत्यर्थः साकल्येन क्रियाङ्गतयोपादीयते । अन्यथैकत्ववत्तत्राधारे सर्वात्मना जातेः परिसमाप्त्यभावे एकत्वमशक्योपादानम्, एकस्मिन् सर्वात्मना जातेरपरिसमाप्तत्वात् । अतश्च द्वितीयादित्वं विघटेत । तस्मादेकत्वमनुमापयत्तदाश्रये सर्वात्मना जातेस्समाप्तिमप्यनुमापयत्येतल्लिङ्गम् । यावता हि विना नोपपद्यते तावतोऽर्थस्यैतल्लिङ्गम् । यथा चैकत्वं विवक्षां विना नोपपद्यते तथा जातेस्तत्समानविषयत्वमपि विनेति । अन्यथा तत्र जातेः समाप्त्यभावे साकल्येन प्रकृत्यर्थः क्रियाङ्गतया नोपात्तः स्यादिति प्रकृत्यर्थोपरोधप्रसङ्गः । द्वित्वादेरनेकाश्रयवृत्तित्वात्प्रत्याश्रयपरिसमाप्त्यभावान्न तेन सह जातेरेकार्थविषयत्वे लिङ्गमेतत् । एवं ह्यनेकाश्रितत्वमेव ज्ञापितं स्यात् । तच्च जातित्वादेव सिद्धमित्येकत्वेनैव सह जातेरेतदेकार्थसमवाये लिङ्गमवगन्तव्यम् ।। 56 ।।

इदानीं यदुक्तं `यजेत पशुना' इत्यत्रैकत्वं जातिवद्विवक्ष्यते इति तत्र पूर्वसूचितं विवक्षानिबन्धनं ग्रहवैलक्षण्येन प्रकटयति--

अन्यत्राविहितस्यैव स विधिः प्रथमं पशोः ।
क्रियायामङ्गभावश्च तत्त्वेतस्माद्विवक्षितम् ।। 57 ।।

(99) यजेः कर्तव्यता वाक्यान्तरात्सिद्धेति `पशुना यजेत' इति गुणविधिस्तात्पर्यतः । तथा चाज्ञातस्य पशुगुणस्य प्रमाणान्तरात् प्रथमम् अनेनैव ज्ञापनमित्युत्पत्तिविधिरयं पशोः । अस्माद्वाक्यात्प्रथममुत्पन्न इव पशुरनेनैव ज्ञापितत्वात् । ज्ञप्तिरेव हि प्रथमोत्पत्तिर्भण्यते । स चोत्पत्तिविधिरत्राङ्गत्वेन यजिक्रियाविषयेण नाङ्गित्वेन इत्यस्मात्कारणद्वयात् तत् एकत्वमत्र

विवक्षितम् । तथा हि शब्दप्रमाणका वयम् । शब्देन चैकत्वविशिष्टोऽर्थश्चोदित इति कथं तदेकत्वं त्यज्यताम् । तदुक्तम्--
`यथा जातिस्तथैकत्वं साधनत्वेन गम्यते'
इति । यथा शब्दचोदिता जातिस्तथैकत्वमपीतीहत्यस्तत्र न्यायस्सूचितः । शब्दश्च प्रथममिदमाह न तु शब्दान्तरं सङ्ख्यान्तरयुक्तं ग्रहादिवदस्तीति प्रथमोपदेशो विवक्षा कारणम् । अङ्गत्वोपदेशश्च यागस्य प्राधान्यात् । यदि ह्यङ्गितयोपदेशः स्यात्पशोः तदा `ग्रहं सम्मार्ष्टि' इतिवद्भवेदविवक्षेत्यर्थः । तस्माच्छ्रुतसङ्ख्याहाने हेत्वभावादेकत्वविशिष्टसाधनसाध्यत्वेन नियतरूपं प्रधानमवगतं भवतीत्यनियतानेकसङ्ख्योपादानमप्रमाणकम् । अत्र केचित् `क्रियायामङ्गभावस्य' इति पठन्तः प्रथमं क्रियायामङ्गभावस्य विधिरिति योजितवन्तः ।। 57 ।।
एतन्न्यायवैपरीत्येन `ग्रहं सम्मार्ष्टि' इत्यत्र लक्षणाख्यं व्यापारमाह--
ग्रहास्त्वन्यत्र विहिता भिन्नसङ्ख्याः पृथक् पृथक् ।
प्राजापत्या नवेत्येवमादिभेदसमन्विताः ।। 58 ।।
अङ्गत्वेन प्रतीतानां सम्मार्गे त्वङ्गिनां पुनः ।
निर्देशं प्रति या सङ्ख्या सा कथं स्याद्विवक्षिता ।। 59 ।।
(100) `प्राजापत्या नव ग्रहा भवन्ति, दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति, ऐन्द्रवायवं ग्रहं गृह्णाति, मैत्रावरुणं ग्रहं गृह्णाति'
इत्यादावुत्पत्तिवाक्ये ग्रहाणां सोमाधाराणां पात्राणां भिन्नसङ्ख्यानां पृथक् पृथक् तेषु प्रकरणेषु भेदेनोपात्तानां तथैवानुभूतानां `ग्रहं सम्मार्ष्टि' इत्यत्र स्मृत्योपस्थापितानां यथोत्पत्तिवाक्यानुभवमेवात्र स्मृतिबुद्धावुपस्थानं युक्तमिति भिन्नसंख्या एव प्रतीयन्ते । उत्पत्तिवाक्ये हि ग्रहाणाम् अङ्गत्वेन सोमधारणार्थमुपदेश इति तत्राप्राधान्याद्विवक्ष्यते सङ्ख्या । अपूर्वोपदेशाच्च `पशुना' इतिवत् `नव दश' इति प्रातिपदिकार्थत्वादपि तत्र नियोगतो विवक्षा । सम्मार्गे तु वास्तवेन रूपेण सम्मार्गस्य ग्रहशुद्ध्युत्पादनार्थत्वात् संस्कार्या ग्रहा एवाङ्गिनः प्रधानभूताः शाब्देन रूपेण क्रियाप्राधान्येऽपि । ततश्चोत्पत्तिवाक्यापेक्षया सम्मार्गवाक्येन पुनर्योऽयं `ग्रहम्' इति निर्देशः तत्र पूर्वश्रुता एव ते सम्मार्जनविषयभावार्थमुपात्तास्तात्पर्यत इति पूर्वसङ्ख्यान्वयिनः । प्रकरणार्थपर्यालोचनया हि वाक्यार्थोऽवतिष्ठते न तु यथाश्रुते पदार्थमात्रेऽवस्थातव्यम्--
`स्तुतिनिन्दाप्रधानेषु वाक्येष्वर्थो न तादृशः ।
पदानां प्रविभागेन यादृशः परिकल्प्यते'
इति न्यायात्, अवान्तरवाक्यान्वयेन महावाक्यार्थानुसरणेन पदार्थापोद्धार इत्यत्र प्रकरणानुभूतभिन्नसंख्याकग्रहग्रहणम् । तदनेनाविवक्षायां हेतुद्वयमुक्तम्--अन्यत्र विधानं प्राधान्यं च । यद्यपि बहुष्वेकत्वमप्यविरुद्धमनुभूतं तथाप्यनेकमध्यपात्येकत्वमनुभूतं न तु केवलमित्यनेकसहचारिणा एवात्र स्मृतिः । अत एव `पृथक् पृथक्' इत्यनेकसङ्ख्याया भूयोदर्शनेन तत्प्रभववासनोत्पत्तिस्थैर्यं स्मृत्यव्यभिचारस्थापनार्थमाह । पृथक् पृथग्भिन्नसङ्ख्यानामनुभूतत्वात्तथैव स्मृतिः सम्मार्गे अनुवादेऽत्रेत्यर्थः । `ग्रहैर्जुहोति' इति हवने ग्रहाणामुपयोगात्संस्कार्यत्वम् । अङ्गानां प्रधानोपकाराय संस्कारर्हत्वात् । न च ग्रहैकत्वविशिष्टः सम्मार्गविधिर्न्याय्यः । गुणस्य द्रव्यसमकक्ष्यतया क्रियायामङ्गभावाभावाद् द्रव्यद्वारेणाङ्गत्वात् द्रव्यानुयायित्वेऽनुभूतद्रव्यभेदाश्रयणात् । `चित्रगवीर्बध्नाति', `शोणं योजय' इत्यत्र तु चित्रशोणश्रुत्यन्यथानुपपत्त्या गुणविवक्षौत्पत्तिकी ।। 58,59 ।।
इदानीमविवक्षौत्सर्गिकी सर्वत्र, शब्दसंस्कारार्थं विभक्तियुपादानादिति यत्नाद्विवक्षामाह--
नान्यत्र विधिरस्तीति संस्कारो नापि चाङ्गिता ।
हेतुः सङ्ख्याविवक्षायां यत्नात्सा हि विवक्षिता ।। 60 ।।
(101) वाक्यान्तरे ग्रहाणां भिन्नसङ्ख्यानां विधिरस्ति इति अतो हेतोरत्र `ग्रहं सम्मार्ष्टि' इत्येकवचनं

शब्दसंस्कारार्थमात्रमित्येतन्न युक्तम् । नाप्यत्र सम्मार्गे ग्रहाणां अङ्गिता प्राधान्यम्, एकत्वस्य विवक्षाभावे हेतुः निमित्तम्, अपि तु

`न विना सङ्ख्यया कश्चित्' (Vak.III.जा.51)

इत्युक्तान्न्यायात् सर्वत्रैव प्रातिपदिकार्थस्योपलक्षणार्थं वचनमित्यविवक्षितम् । यत्र तु कश्चिन्न्यायो युक्तिरूपोऽस्ति तत्र तस्मात् यत्नात् सङ्ख्या विवक्ष्यत इत्यौत्सर्गिक्या अविवक्षाया विवक्षापवादः ।। 60 ।।

न च विवक्षाहेतुर्यत्नोऽस्ति `ग्रहम्' इत्यादावित्याह--

सम्मार्जने विशेषश्च न ग्रहे क्वचिदाश्रितः ।

विहितास्ते च संस्कार्याः सर्वेषामाश्रयस्ततः ।। 61 ।।

(102) `ग्रहं सम्मार्ष्टि' इत्यनुपात्तविशेषस्य पूर्वावधृतस्य ग्रहस्य संस्कारश्चोदितः । पूर्वं च भिन्ना ग्रहा दृष्टाः । तदाह- विहितास्ते इति । न ह्येको ग्रहः स्वोत्पत्तिवाक्ये विहितः । अपि तु बहवो `नव, दश' इत्येवं विहिताः । न च तेषां मध्यात् कश्चिदेव संस्कारार्हः, अपि तु सर्व एव ते तथेत्याह ते च संस्कार्याः इति । सर्वेषां संस्कार उपयुज्यते, उत्तरत्र सोमधारणे सर्वेषां संस्कृतानामुपयोगात् । ततश्च भूयसां विहितानां यद्येको विवक्षितोऽभविष्यत्तदा तस्य चिह्नभूतः कश्चिद्विशेषो निरदेक्ष्यत `आर्कमाश्विनं मैत्रावरुणं वा ग्रहं सम्मार्ष्टि' इति । न चासौ निर्दिष्टः । एकवचनं तु न विशेषः । तस्य प्रतिनियतैकविषयत्वाभावादनियतैकोपादाने कस्येति विशेषावधारणाभावादशक्यानुष्ठानार्थोपदेशप्रसङ्गादिति जातावेदमेकवचनं बोद्धव्यं न तु व्यक्ताविति नास्माद्यत्नाद्विवक्षासिद्धिः । किञ्च सर्वत्र शब्दसंस्कारार्थमेकवचनमित्येवमिदमुरक्रान्तम् । तथा चैकवचनं न यत्नः । तस्मात्सामान्योपदेशात्संस्कार्यत्वस्य च समानत्वादुत्पत्तिवाक्यावधृतसङ्ख्यानां सर्वेषामेव ग्रहाणां संस्कार्यत्वपरिग्रह इति सिद्धम् ।। 61 ।।

`पशुना यजेत' इत्यत्र को यत्नः सङ्ख्याविवक्षायामित्याह--

प्रत्याश्रयं समाप्तायां जातावेकेन चेत्क्रिया ।

पशुना न प्रकल्पेत तत्स्यादेव प्रकल्पनम् ।। 62 ।।

(103) जातेः प्रत्याश्रयपरिसमाप्तत्वं पूर्वं लिङ्गेनापि साधितमित्येकत्रापि पशुत्वजातेरवैकव्यात्क्रियाङ्गतोपपत्तौ किमर्थं द्वितीयाध्युपादीयेत । यदि हि जातिराश्रय एकदेशेन वर्तेत तदैकव्यक्त्युपयोगे जातिः पदार्थो बाध्येत जात्यंशस्याजातित्वादिति प्रकृत्यर्थसामर्थ्याद् द्वितीयाद्युपादीयेत । न चैवम् । एकत्रापि जातेर्निष्ठितत्वात् । स्यादेतत् । भवत्वेकत्रापि प्रकृत्यर्थोपपत्तिः । वाक्यार्थभूता तु क्रिया नैकसाधनसाध्येति प्रधानानुरोधादङ्गान्तरमुपादीयेतेत्याशङ्क्याह--एकेन चेत्क्रिया पशुना न प्रकल्पेत इति । अदृष्टफलस्य यागस्य पशुनैकेनाप्यवदानद्वारेणोपकारान्निष्पत्तेरसम्पत्तिर्नास्ति, यतस्तदनेकत्वप्रकल्पनमत्र भवेत् । सामर्थ्याद् बुद्धिस्थमनेकसङ्ख्योत्प्रेक्षणं `तद्' इत्यनेन निर्दिशति । अस्मादेव `पशुना यजेत' इति प्रमाणभूताद्वाक्यादेकस्य क्रियासाधनतावसीयते । अन्यथा ग्रहवद्वाक्यान्तरात्सङ्ख्यान्तरस्यानवसायेऽनियतैकपरिग्रहेऽशक्यानुष्ठानोऽर्थ उपदिष्टः स्यात् ।। 62 ।।

नन्वङ्गभूतस्तवात्फभूयस्त्वमिति यथासम्भवं पश्वन्तरोपादानं भविष्यतीत्याशङ्क्याह--

एकेन चेत्प्रसिद्धायां क्रियायां यदि सम्भवात् ।

पश्वन्तरमुपादेयमुपादानमनर्थकम् ।। 63 ।।

(104) अथमर्थः--इहैकस्य पशोः क्रियासिद्धौ हेतुभावोऽस्ति न वा । द्वितीये पक्षे शास्त्रेल्लङ्घनमित्याद्यः पक्षः । तत्र च लाघवादेकेनैव क्रियानिष्पत्तावधिहगतसमीहिताः किमर्थं साधनान्तरान्वेषणप्रयासमनुभवेयुरधिकारिणः । न हि यथासम्भवमिति शास्त्रचोदना । अचोदितानुष्ठाने च शास्त्रेल्लङ्घनादानर्थक्यमिति फलभूयस्त्वस्याप्यभावः । न ह्येकेनानेकेन वा यजौ निष्पाद्यायां फलहेतुः कश्चित्स्वरूपातिशयः । तस्मादुपायलाघवात्प्रथमेनैव पशुनावदानगणस्य निष्पत्तेरेकस्य पशोरालम्भेऽपरस्यालम्भो निष्प्रयोजनः ।। 63 ।।

क्व यथानिष्पन्नस्य निष्पत्त्यर्थं यत्नान्तरं नाद्रियत इत्यत्र दृष्टान्तमाह--
यथैवाहितगर्भायां गर्भाधानमनर्थकम् ।
तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ।। 64 ।।
(105) आहितः बीजात्मनोपक्षिप्तः, गर्भो यस्यां तत्र पुनः गर्भाधानम् अफलम्, आहितस्याधाने विशेषाभावात् । एवमेकपशुसाध्ये यागे पश्वन्तरम् अफलम्, सिद्धस्य साधनवैफल्यात् । पश्वन्तरोपादाने तु तत्साधनं क्रियान्तरमेव स्यात् । न च तत्र विधिप्रतिपत्तिः । इत्थं दार्ष्टान्तिकानुगुण्याद् गर्भाधानमनर्थकम् इत्युक्तं नाशक्यमिति । आनर्थक्यस्य साध्यस्य प्रक्रमे निदर्शने सम्भवदप्यशक्यत्वं साध्येन समन्वितं न स्यात् । गर्भार्धानार्था वा संस्कारा गर्भाधानशब्देनात्र विवक्षिताः शास्त्रचोदिता इति तेषामाहितगर्भायामानर्थक्यमिति दृष्टान्तदार्ष्टान्तिकयोः साम्यं सुष्ठु संगच्छते ।। 64 ।।
तदेवं लाघवाच्चोदितमेकत्वं पशावाश्रीयत इत्येकीयं मतम् । अन्ये तु न्यायान्तरमत्राहुरिति प्रदर्शयति--
तावतार्थस्य सिद्धत्वादेकत्वस्याव्यतिक्रमम् ।
केचिदिच्छन्ति न त्वत्र सङ्ख्याङ्गत्वेन गृह्यते ।। 65 ।।
(106) नात्रैकत्वसङ्ख्या पशुविषये विवक्ष्यते, अपि तु प्रातिपदिकार्थोपलक्षणमेव सा । सङ्घ्यामात्रयुक्तः प्रातिपदिकार्थः साधनम् । तस्य तु पूर्वं लाघवमेकत्वस्योपादाने निमित्तमभिहितमू । इदानीं त्वेकत्वपूर्वकत्वादनेकत्वस्य क्रमव्यतिक्रमे प्रयोजनाभावादेकसङ्ख्याकस्यैवैपादानं कथ्यते, तत्परिमाणेनैव क्रियासिद्धिरिति सामर्थ्यादेकत्वस्य अव्यतिक्रमः अत्यागः । तदेवं लाघवे पूर्वोक्ते सामर्थ्ये वेहोपात्ते शेषभूतमिदम्-न त्वत्र सङ्ख्याङ्गत्वेन गृह्यत इति । एकवाक्यतयैवोपपत्तेर्वाक्यभेदेन व्याख्यानं पूर्वैर्दूषणरसिकतया कृतम् । सामर्थ्यादेकत्वस्याव्यतिक्रमे तु न सङ्ख्याङ्गत्वेन गृह्यते । न वचनप्रापितः सङ्ख्यायाः क्रियाङ्गभावः स्यात् सामर्थ्यादव्यतिक्रममात्रमिति शब्देन विहितमेकत्वमित्यचोदितार्थानुष्ठानप्रसङ्ग इति दूषणं कारिकावयवाद्विभज्य पूर्वैः कल्पितम् । ग्रन्थकारस्त्वत्र मते कारिकान्तरेणैव
`अन्वयव्यतिरेकाभ्याम्' (Vak.III.377)
इत्यादिना दूषणं दास्यति ।। 65 ।।
कथं तर्हि द्वितीयादि लिङ्गमेकत्वविवक्षायामन्यन्त्रोक्तमित्याह--
द्वितीयादिषु यल्लिङ्गमुक्तं न्यायानुवादि तत् ।
न सङ्ख्या साधनत्वेन जातिवत्तेन गम्यते ।। 66 ।।
(107) एकत्वविवक्षासिद्ध्यर्थं नैतल्लिङ्गम्, अपि तु लाघवादेकेन सिद्धत्वात्क्रियाया अनेकोपादानस्य निष्प्रयोजनत्वात् क्रमव्यतिक्रमे प्रयोजनाभावाच्चैकत्वसङ्ख्यापरिग्रह इति यदेतन्न्यायद्वयमुक्तं तदनुवादपरम्, उक्थे द्वितीयमित्यादि लिङ्गं नापूर्वमर्थं गमयति, यस्मात्तेनानन्तरोक्तेन न्यायद्वयेनैकत्वस्यापरित्यागाच्छाब्देन रूपेण न सङ्ख्या साधनत्वेन गम्यते, शब्दसंस्कारमात्रार्थत्वादेकवचनस्य । तेन वा कारणेन सङ्ख्यात्र न विवक्ष्यते, यस्मादविवक्षायामपि न्यायादिष्टसिद्धिः । यद्वा तेन लिङ्गेन सङ्ख्या साधनत्वेन नावेद्यते न्यायादेवेष्टसिद्धेरनुवादमात्रं तदित्यर्थः । जातिवदिति वैधर्म्यदृष्टान्तः । यथा शब्दचोदिता जातिरङ्गमिति गम्यते नैवमेकत्वमुक्तादेव न्यायात् तदनङ्गत्वेऽपि समीहितसिद्धेः ।। 66 ।।
केचिदिति वचनात्परमतम्, एतद् दूषयति--
अन्वयव्यतिरेकाभ्यां सङ्ख्याभ्युपगमे सति ।
युक्तं यत्साधनत्वं स्यान्न त्वन्यार्थोपलक्षणम् ।। 67 ।।
(108) विभक्तिप्रत्ययमन्वेति अनुवर्तते, तस्मिन् सति प्रतीयते तदभावे व्यतिरिच्यते व्यावर्तते न प्रतीयते सङ्ख्येति पशुमालभेतेत्यादौ शब्दोपादानायास्तस्याः प्रतीतिश्चेदभ्युपगम्यते विधानमपि कथं नास्तीति शब्दोपात्तायास्त्यागो न युक्तः, अपि त्वेतदेव युक्तं यत्साधनत्वं क्रियाङ्गत्वम् न त्वन्यार्थोपलक्षणं प्रकृत्यर्थोपलक्षणं युक्तमित्यर्थः । सत्त्वभूतस्यार्थस्य शब्देनाभिधाने तत्संस्कारप्रतिपत्तये वचनमिति प्रकृत्यर्थोपलक्षणमात्रं तद्भवति । न चैतन्न्याय्यम् । यथा ह्यन्वय्वयतिरेकाभ्यां प्रकृतिवाच्या

जातिः शब्दवकी न त्यज्यते तथा सङ्ख्यापीति न्याय्यम् । न ह्येकयोगक्षेमस्याङ्गङ्गितया एकपदोपात्तस्यार्थस्य खण्डशो विनियोगाविनियोगौ युक्ताविति भावः । शब्देनाचोदिते त्वेकत्वे सामर्थ्यात्प्रतिपत्तौ यदैकपशूपात्तानामेकादशानामवदानानां दैवान्मानुषाद्वा वैगुण्यादन्यतमविलोपः तदा पश्वन्तराण्यवदानार्थमुपादीयेरन् ।

न ह्येवं काचिच्छब्दार्थबाधा तदानीं भवति, शब्देनाचोदितत्वादेकत्वस्य । तथा च तत्कर्माज्येन न निर्वर्त्त्येतेति प्रतिनिध्यभावः । मुख्याभावे हि प्रतिनिधिरुपादीयते । मुख्यं च वचनेन सङ्ख्यानुपादाने विद्यत एव । यस्य पुनः शब्दचोदितमेकत्वं तस्योपपन्नोऽत्र प्रतिनिधिरित्यवदानलोपे तत्कर्माज्येन सम्पाद्यते, न तु पश्वन्तरमुपादीयते, चोदितैकत्वत्यागप्रसङ्गात्, यद्येवं वपाविनाशेऽपि पश्वन्तरं नोपादीयेत । नैतदस्ति । यस्मान्नालम्भनमात्रसम्पत्त्यर्थं पशोरुपांदानम्, अपि तु यागार्थम् । तत्रैव च तदेकत्वं विवक्ष्यते । यागश्च वपां विना न सम्पद्यते । तस्मात्पश्वन्तरोपादानेऽपि नातिक्रान्तमेकत्वम् । तत्रैकेनैव यागस्य निर्वृत्तत्वात् अवदानान्तरार्थन्तु पश्वन्तरे चोदिते सत्येकत्वे न लभ्यते इत्यवदानान्तरकार्यं घृतेन सम्पद्यत इति न्यायः ।।67 ।।

यतश्च साधनत्वं युक्तम्, अतः--

साधनत्वे पदार्थस्य सामर्थ्यं न प्रदीयते ।
सङ्ख्या व्यापारधर्मोऽतस्तेन लिङ्गेन गम्यते ।। 68 ।।

(109) यदा शब्दोपात्तत्वाज्जातिसङ्ख्ययोस्तुल्यत्वम् तदा साधनत्वे पदार्थस्य सामर्थ्यं न प्रहीयते । पदस्येति वाक्यशेष । सकलस्य हि पदार्थस्य साधनत्वे पदस्य तदभिधानलक्षणं सामर्थ्यं न दापितं भवति । अतश्च परिपूर्णस्य पदार्थस्य साधनत्वात्सङ्ख्याया एकत्वलक्षणायां क्रियाया व्यापाराख्यो धर्मः तेन लिङ्गेन गम्यते । यतस्तत्पदस्य सामर्थ्यमप्रहेयम् अतस्तेन सामर्थ्यवक्षणेन, लिङ्गेन हेतुना गम्यते सङ्ख्या व्यापारधर्मः । यतस्तदप्रहेयम् अतस्तद्भवति हेतुः सङ्ख्याव्यापाराधिगतौ । यथा यतोऽविनाभूतो धूमः अतस्स भवयत्यग्न्यधिगमहेतुः । अथवा-तेन लिङ्गेन द्वितीयादिना एतद् गम्यते न तु पूर्वोदितस्य सामर्थ्यादपरिग्रहमात्रस्य न तदनुवादि लिङ्गं यथा तैरुक्तम्, अपि तु मदीयन्यायेनैव तत्सङ्गतमित्यर्थः । यत्र तु लिङ्गं नास्ति सङ्ख्याव्यापारसूचकम्, तत्राविवक्षेति भावः, तद्यथा `ग्रहं सम्मार्ष्टि' इति । अत एव सङ्ख्यायाः क्वचिदव्यापारलक्षणो धर्मः, तेन लिङ्गेन गम्यते इत्यकारप्रश्लेषं केचिद्व्याचक्षते किल । लिङ्गाभावे `ग्रहं सम्मार्ष्टि' इत्यादौ न्यायादविवक्षेति लिङ्गमभवत्तत्र साधकतमम् । यथा साधनाभावः स्तोकान्मुक्तः इत्यादौ । तदेवमनेन श्लोकद्वयेन स एवार्थो निर्वाहितो यो

"अन्यत्राविहितस्यैव" (Vak.III.जा.57)

इत्यादौ निर्णीतः ।।

ननु च विवक्षां प्रतिजानताभ्युपेतः सङ्ख्यायाः साधनभावः । सङ्ख्या च द्रव्यविशेषणम्, शक्तिस्तु साधनमिति कथमतद्विशेषणं तथा स्यात् । नैष दोषः । शक्तेर्निराधाराया अनुपपत्तेस्तदभेदापन्नं फलतो द्रव्यमेव साधनं न्याय्यम् । तथा च कटः कर्म देवदत्तः कर्तेति सामानाधिकरण्यं दृश्यते । अथ कर्मादिशब्दैर्द्रव्यायमाणं तदभिधीयते तर्हि `कर्मणि द्वितीयेत्यादौ विभक्तिविधाने शक्त्यवच्छिन्नस्य द्रव्यस्यैव सङ्ख्यादिविशेषणत्वम् । युक्तं चैतत् । न हि शक्तिषु सङ्ख्या समवैति । तस्मादाश्रयस्य साधनत्वात्सङ्ख्यापि तथा । एतदेव हि सङ्ख्यायाः क्रियाङ्गत्वं यत्साधनावच्छेद इति सर्वं सुस्थम् ।। 68 ।।

पूर्वं ग्रहाणां संस्कार्यत्वादार्थेन रूपेण प्राधान्ये सत्यविवक्षोक्ता । अथ पुनः प्रकारान्तरेणात्र विवक्षाविवक्षे व्यवस्थापयितुमाह--

अपूर्वस्य विधेयत्वात्प्राधान्यमवसीयते ।
विहितस्य परार्थत्वात्वाच्छेषभावः प्रतीयते ।। 69 ।।

(110) वास्तवेन रूपेण पूर्वं गुणप्रधानभावश्चर्चितः । अयन्तु वाक्यव्यापाराश्रयेणेति विशेषः ।

तथा हि--पशोरूत्पत्तिवाक्येन अपूर्वस्य विधेयत्वात्प्राधान्यम् इति यथाश्रुतमेकत्वं न त्यज्यते । विधेयत्वादित्यनेनैवापूर्वस्याक्षेपे सति पुनर्वचनं व्याप्त्यर्थम् । क्रियाया वाक्यार्थत्वेन प्राधान्येऽपि सर्वत्रापूर्वस्य प्राधान्यम्, अप्रज्ञातज्ञापनेन विधीयमानत्वादित्यर्थः । विहितस्य तु ज्ञातस्य सतोऽन्यार्थत्वेनानुवादादप्राधान्यमिति तत्र विधिवाक्यगतरूपानुसरण न्याय्यम् ।। 69 ।।

एतदेव प्राकरणिकेऽर्थे योजयति--

संमार्गस्य विधेयत्वादन्यत्र विहिते ग्रहे ।

विधिवाक्ये श्रुता सङ्ख्या लक्षणाया न बाध्यते ।। 70 ।।

(111) `ग्रहं सम्मार्ष्टि' इत्यपूर्वस्य सम्मार्गस्य विधेयत्वात्प्राधान्यम् । अन्यत्र `प्रजापत्या नव ग्रहाः' इत्यादौ विधिवाक्ये, विहिते प्रथमं ज्ञापिते, ग्रहे ग्रहसामान्य इत्यर्थः । तत्र च विधिवाक्ये या श्रुता नव दशेत्यादिका सङ्खापदोपादाना सङ्ख्या सा लक्षणायां `ग्रहं समार्ष्टि' इत्यत्र पूर्वोद्दिष्टग्रहोपलक्षणपरेऽनुवादवाक्ये न बाध्यते न त्यज्यते, अस्या विधौ प्राधान्यात् । इह त्वनुवादवाक्ये ग्रहणमात्रोपलक्षणपरायां चोदनायां नान्तरीयिका द्रव्योपलक्षणार्था शब्दसंस्कारमात्रपरा सङख्या,ग्रहश्रुतिस्त्वनर्थिका मा भूदिति ग्रहजात्युपलक्षणार्थेति यथाविहितभिन्नसङ्ख्याकग्रहोपादानाप्थं मा भूद्गुणेन प्रधानोपरोध इति । गुणा हि प्रधानोपकाराय प्रवर्तन्त इति प्रधानसङ्ख्यया गुणसङ्ख्यात्र बाध्यते । ननु च `दशैतानध्वर्युः प्रातः सवने ग्रहान्गृह्णाति' इत्युपत्तिवाक्यं क्रियाविषयम् । `ग्रहं सम्मार्ष्टि' इत्यनुवादवाक्यं सम्मार्जनक्रियाविषयमिति विषयभेदादविरोधे बहवो ग्रहा गृह्यन्ताम्, एकस्तु सम्मार्ज्यतामिति नास्ति बाधः । अत्रोच्यते । यद्यपि बहिर्व्यापारभेदाभिन्नविषयत्वादविरोधः,तथापि प्रतिपत्तौ तयोः सङ्क्ययोर्वि◌िरोध एव । तथा हि--पूर्वं नव दश वा बुद्धौ समवस्थिताः, इदानीं तदुन्मूलनेनैको बुद्धावुपारोहयितव्यः । एवं चान्यथावगते प्रधानेऽन्यथा पुनरप्रधानवेलायामवगमो न युक्तः । अपि तु यथासिद्धस्यैवानुवादात्संमार्गे प्रधानवेलावगतसङख्याकानामेवावधारणं ग्रहाणां युक्तम् । यत्रस्थो हि ग्रहोऽनूदितः तत एवास्य स्वरूपमनुसर्तव्यम् । एवं च साधनप्रचयात्संमार्गस्यापि प्रधानस्योपकारादुभयानुग्रहः सम्पद्यते । बहुषु मध्येऽवस्थितश्चनुमूत इति तथैवात्र स्मृत्या अनुवादो न्याय्यः । तथा च प्रधानोपकारानुरोध एवेहान्यथोक्तः । पूर्वं ग्रहार्थत्वात्संमार्गस्य संमार्गवाक्य एव ग्रहाणां प्राधान्यमुक्तम्, इह तु विधिवाक्यगतं प्राधान्यमभिहितमित्येतावता विशेषः ।। 70 ।।

`पशुना यजेत' इत्यत्रापि तर्हि यागस्य विधेयत्वात्पशोरप्राधान्यमिति तदीयमेकत्वं त्यज्येतेत्याशङ्क्याह--

विधिवाक्यान्तरे सङख्या पशोर्नास्ति विरोधिनी ।

तस्मात्सगुण एवासौ सदेकत्वेन गम्यते ।। 71 ।।

(112) पशुगुणविशिष्टो यागो विधीयत इत्यज्ञातपनात्पशोरपि विधानम् । उत्पत्तिवाक्यगता च सङ्ख्या न त्यज्यत इत्युत्सर्गः । तद्यथा पशौ । ग्रहे तूत्पत्तिवाक्यापेक्षया संमार्गविधिवाक्ये तद्विरोधिनी सङ्ख्या त्यज्यते । पशौ तु विधिवाक्यान्तरं नास्तीति प्राथमकल्पिकी न त्यज्यते सङ्ख्यैकत्वलक्षणेति, तेन सहासौ क्रियाङ्गभावमनुभवति । सगुण इति । सह लिङ्गलक्षणेन पुंस्त्वाख्येन गुणेन वर्तत इत्यर्थः । यद्वा गुणः शुक्लादिः । यत्र गुणश्रुतिर्नास्ति, यथा--`पशुना यजेत' इति,तत्राक्षिप्तगुणसामान्य इत्यर्थः । यत्रापि गुणश्रुतिर्नास्ति , यथा `गामभ्याज शुक्लाम्' `श्वेतं छागमालभेत' इति, तत्रापि तद्गुणः स गृह्यते एकवाक्योपात्तगुणयुक्त इत्यर्थः । एतच्च वक्ष्यमाणार्थोपोद्घातार्थमुक्तम् । केचित्पुनराहुः--सगुण इत्येतदेव स्फुटीकृतं सदैकत्वेनेति । अत्र तु पौनरुक्त्यं दोषः । न हि कारिकाभागस्य भागान्तरेण व्याख्यानं युक्तम् । यदि वा गुणो विशेषणं जातिः पशुत्वलक्षणा, तया सह गम्यते । जातेरिव श्रुतस्यैकत्वस्य त्यागे कारणाभावात्तदेकत्वमपि गम्यत इति दृष्टान्तगर्भं वचनम् । तदेवं न्यायवादिमतानुसारेण सिद्धान्तोऽत्रावस्थापितः । तथा हि--न्यायवादिभिः पूर्वपक्षोऽत्र कृतः--

`एकत्वयुक्तमेककत्वस्य श्रुतिसंयोगात्'(Mi.Su.III.1.7.13)

इति ।

`य एवं विद्वान् सोमेन यजेत'

इति सोमयागे

`दशापवित्रेण ग्रहं संमार्ष्टि'

इति श्रूयते । तत्रैकस्य ग्रहस्य संमार्गः प्राप्तः, एकत्वश्रुतिसंयुक्तो ह्ययं पदार्थः श्रूयते । एवं पूर्वपक्षं कृत्वा सिद्धान्तितम्--
`सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम्'(Mi.Su.III.1.7.14)
प्राप्ते द्वितीयादौ संमार्गो विधीयते । पशोस्तु यागार्थत्वात्परिच्छेन्नेन तेन यागोपकारादेकत्वविवक्षेत्युक्तम्--
चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेत (Mi.Su.IX.1.14.40)
इति वाक्यविदां राद्धान्तः ।। 71 ।।
इदानीं सङ्ख्यावदन्यस्यापि गुणस्याश्रयावच्छेदकत्वद्वारेण क्रियाङ्गतयोपादानमनुपादानं वेति सङ्ख्याप्रसङ्गेन विचारयितुं सगुण एवासावित्युपोद्घाते सत्याह--
निर्ज्ञातद्रव्यसंबन्धे यः कर्मण्युपदिश्यते ।
गुणस्तेनार्थिता तस्य द्रव्येणेव प्रतीयते ।। 72 ।।
(113) निर्ज्ञातः प्रथमंद्रव्यसंबन्धो यस्य तस्मिन्कर्मणि क्रियायां यो गुणः शुक्लादिः विधीयते तेनापि तस्य कर्मणः क्रियालक्षमस्य द्रव्यवत् अर्थिता । तथा च संबन्ध इति विचारबीजोपक्षेपः । द्रव्यसंबन्ध इति च द्रव्यपदार्थपक्षे प्राह्य । जातिपदार्थपक्षे तु वक्ष्यति--
`यदा तु जातिः शक्तिर्वा'
इत्यादि ।
ननु च क्रिया जनकत्वात्साधनमपेक्षताम्, गुणे तु कापेक्षा तस्याः । अथ सगुणेन द्रव्येण निर्गुणस्यासंभवाज्जन्या क्रियेत्युभयापेक्षा तर्हि क्रमोऽयं कुतः ? निर्ज्ञातद्रव्यसंबन्धे पश्चाद् द्रव्यवद्गुणेऽप्यपेक्षेति अपेक्षाऽसाम्याच्चोपमा नोपपद्यते । अत्रोच्यते । क्रिया तावत्साध्यस्वभावत्वात् साधनमपेक्षते, तच्च द्रव्यमिति तदपेक्षोपदिश्य मानगुणपेक्षापि तस्य गुणस्य साधनावच्छेदोपयोगाद्विद्यत एव क्रियायाः । तत्र यदव्यवहितमन्तरङ्गं तत्प्रथममपेक्ष्यम्, तथा च द्रव्यम् । गुणस्तु तदाधारस्तन्मुखेन संबन्धसहो बहिरङ्गः पश्चादपेक्षणीयः । अत एव निर्ज्ञात इति भूताभिधानम् । द्रव्यस्य शक्त्याधारत्वात्प्रथमं क्रियसंबन्ध इत्यर्थः । एवं च साक्षादसमन्वयादुपमा । एतच्चार्थक्रमापेक्षयोच्यते न तु शब्दव्यापारापेक्षया । `गामभ्याज शुक्लाम्' इति हि वाक्यं सकृदेव गुणप्रधानभावेन संबन्धविशिष्टमर्थमाहेति न तत्र कश्चिद् विरम्यं व्यापारः ।। 72 ।।
एवं गुणद्रव्ययोः श्रौतः क्रियासंबन्ध उक्तः । इदानीं तयोः परस्परं वाक्यीयसमन्वयप्रतिपादनायाह--
कश्चिदेव गुणो द्रव्ये यथा सामर्थ्यलक्षणः ।
आधारोऽपि गुणस्यैवं प्राप्तः सामर्थ्यलक्षणः ।। 73 ।।
(114) निर्गुणस्य द्रव्यस्यासम्भवः सामर्थ्यम् तेन लक्ष्यते, तत्र द्रव्ये । आधारोऽपि द्रव्यं गुणस्य सामर्थ्येन निराधारगुणासंभवस्वभावेन लक्ष्यते, गुणमात्रं च द्रव्येणापेक्षितं द्रव्यमात्रं च गुणेन, अस्मात्सामर्थ्यादित्याह--कश्चिदेवेति । अपरामृष्टजातिभेदौ द्रव्यगुणौ परस्परेणापेक्षितौ । प्राप्त इति । प्रतीतिलब्धः इत्यर्थः । सामान्यमात्रे प्रतीत्यव्यभिचारात्, विशेषाणां व्यभिचारात् ।। 73 ।।
एवमाधाराधेयसामान्यसंसर्गे लब्धे श्रुतयोरेव तयोरेकवाक्यत्वाद्वाक्यीयेन समन्वयेन परस्परसंबन्धमाह--
तयोस्तु पृथगर्थित्वे संबंधो यः प्रतीयते ।
न तस्मिन्नुपघातोऽस्ति कल्प्यमन्मन्न चाश्रुतम् ।। 74 ।।
(115) पूर्वोपवर्णितेन सामर्थ्येन पृथक् परस्परं गुणद्रव्ययोराकांक्षायां सत्यामेकवाक्योपात्तयोरेव समन्वयो यः प्रतीयते न तत्र बाधः, श्रौतेऽर्थे त्यागाभावात् । असति तत्परित्यागहेतावश्रुतपरिकल्पना न न्याय्या । अत एव प्रतीयत इति निर्बाधप्रतीतिप्रमाणतामाह । अपोद्धारबुध्द्याश्रयणे चैतदुच्यते । निरंशे हि वाक्ये पूर्वमेव विशेषविवक्षा । तथा हि--निरवयवेन वाक्येन विशिष्ट एवार्थः प्रतिपादितः । तत्र प्रतिपत्त्यर्थमंशांशिकतया अपोद्धारपदार्थः परिकल्प्यते सामान्यात्मा । स एव विशेषो

भवति विशेषसंबन्धे सतीति प्रतिपादनोपायक्रमः । तथा च विशेषसंबन्धेऽपि सामान्यात्मा पदार्थो न स्वरूपात्प्रच्यवते, अपि तु तद्विशेषनिष्ठ एवावतिष्ठते । न तु सत्यतः सामान्येऽवस्थितानां पदानां विशेषेऽवस्थानमुपपद्यते । सामान्यवृत्तीनामुच्चरितानां तथाभूतानामेव तिरोभावादुत्तरकालं कोऽसौ विशेषेऽवतिष्ठताम् । न च सामान्यविशेषयोर्युगपद्विवक्षा संभवति । विशेषविवक्षायां हि सर्वस्यां नियमेन सामान्यादवच्छेदो विज्ञायत इत्युपात्तस्य सामान्यस्य त्यागप्रसङ्गः । स च नित्ये शब्दार्थसंबन्धे न युक्तः । तिरोभूतश्च निवृत्तोऽनवधार्यमाणात्मा शब्दो.न्यस्यापि पदस्य सामान्यनिष्ठत्वाकेनचिदप्यप्रतिपादिते विशेषे निर्विषयः क्वावतिष्ठताम् । यदुक्तम्--

`सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम् ।।'(Vak.a.II.15)

इति । तस्माद्विशिष्ट एवार्थो वाक्यादवगन्तव्य इत्यश्रुतस्य कल्पितस्य कल्पनावकाश एव नास्ति । नापि श्रुतस्यार्थस्य त्यागसंभवः । आपोद्धारपदार्थाश्रायेण त्वयं विचारः प्रस्तुतः । तथा च श्रुत्यादीन्यखण्डवाक्यपक्षे नोपपद्यन्त इत्याक्षिप्य वाक्यकाण्डेऽपोद्धारपदार्थकल्पनेनैवोपपादितानि । श्रुतिप्रतिपादितस्य योग्यस्य त्यागेऽश्रुतकल्पना न युज्यते इत्येकवाक्योपात्तत्वमत्र संबन्धहेतुः । परस्परसंबन्धे हि एकवाक्यतापीष्यते । वाक्यार्थेन प्रधानेन गुणानामाक्षेपादश्रुतपरिग्रहे सर्वत्र वाक्यभेदप्रसङ्गान्न क्वचिदेकवाक्यता भवेत् ।। 74 ।।

ननु च क्रियाकारकसंबन्धे विशेषणविशेष्यभावे च प्रतिपाद्ये वाक्यभेदप्रसङ्गः । न चासौ न्याय्यः । नैष दोषः । गुणप्रधानभावेनात्र संबन्धद्वयसंभवः । स चैकस्मिन्वाक्येऽविरुद्धः । तथा हि--श्रुतिवाक्यलक्षणमत्र प्रमाणद्वयमस्तीत्याह--

क्रियया योऽभिसंबन्धः स श्रुतिप्रापितस्तयोः ।
आश्रयाश्रयिणार्वाक्यान्नियमस्त्ववतिष्ठते ।। 75 ।।

(116) श्रुत्या कारकविभक्त्या क्रियायां संबन्धो द्रव्यगुणयोः समशीर्षकतया प्रातिपादितः । वाक्यादखण्जप्रतिभोत्पत्तावपोद्धारेण `गामभ्याज', `शुक्लामभ्याज' इति पदार्थविभजनात् गामेव शुक्लामेवेति गुणगुणिनोरेकवाक्योपात्तयोर्विनियोगो वाक्यस्य प्रामाण्येनावतिष्ठते । अश्रुतगुणद्रव्यपरिकल्पने हि प्रतिपदार्थं क्रियाभेदात् `गामभ्याज, शुक्लां च' इति वाक्यभेदः स्यादित्येकरसयैव प्रवृत्त्यौपात्तगुणविशिष्टस्य द्रव्यस्य क्रियासमन्वये तदेकवाक्यत्वं पोषितं भवति । नियमो द्रव्यगुणयोराधेयान्तरादाधारान्तराच्च व्यवच्छेदः सति परस्परसंबन्धे । न चान्यनिवृत्तेः शब्दान्तरमस्ति वाचकमित्येकवाक्याख्यशब्दोपादानासो न श्रौतीति वाक्यीयावतिष्ठते । तदुक्तं न्यायवादिभिः-- `अर्थैकत्वे द्रव्यगुणयोरेककर्म्यान्नियमः स्यात्' (Mi.Su.3.1.6.12)

इति । यत्राथैकत्वं श्रूयते वाक्ये तत्र द्रव्यगुणयोर्नियमो भवति परस्परसंबन्धात्मकः । कुतः ? एककर्म्यात् । एकं हि कर्म वाक्यार्थभूतं क्रियालक्षणम् । प्रधानमुद्दिश्य द्रव्यगुणौ शेषभूतौ विधीयेति इति तयोः परस्पराकाक्षत्वादेकवाक्यतायां सामानाधिकरण्यावसाय इति सूत्रार्थोऽस्मन्नयानुगुणः ।। 75 ।।

एवमवस्थिते सतीदमत्रापपतीत्याह--

तत्र द्रव्यगुणाभावे प्रत्येकं स्याद्विकल्पनम् ।
श्रुतिप्राप्तो हि संबन्धो बलवान्वाक्यलक्षणात् ।। 76 ।।

(117) श्रुतिप्राप्तः श्रुत्योपस्थापितः क्रियाकारकसंबन्धः वाक्यं लक्षणं लक्ष्यतेऽनेनेति प्रातिपदिकं यस्य तस्माद्बलवान् इति तस्य सर्वथा त्यागाभावः । साक्षाद्द्वितीयाश्रुतिस्तिङ्विभक्तिश्च श्रौतसंबन्धावेदिका, अन्योन्यस्वरूपानुविद्धयोः क्रियाकारकयोः प्रतीतेः । वाक्ययस्य तु संबन्धस्य साक्षाद्वाचकं नास्ति केवलमुभयस्मैकवाक्योपादानाद्योग्यार्थसमन्वयपदान्तरसमवधानात्परस्परेण संबन्धो व्यवस्थाप्यत इति श्रुत्यपेक्षया दुर्बलत्वम् । पदान्तरापेक्षणाच्च पदान्तरस्य नियतस्य सन्निधानाभावान्नावश्यं वाक्पीयसंबन्धो विशेषणविशेष्यभावलक्षम इति तस्मिन्बहिरङ्गे निवृत्तेऽपि श्रौतस्यान्तरङ्गस्यपानिवृत्तिः ।। 76 ।।

एवं च `श्वेतं छागमालभेत' इति वाक्ये श्वेताभावे कृष्णस्यालम्भनवच्छागाभावे पिष्टपिणडीमालभ्य कृती स्यादिति चोद्यमत्र दर्शने । जातिपदार्थनये तु सिद्ध्यतीष्टव्यवस्थेत्याह--

यदा तु जातिः शक्तिर्वा क्रियां प्रत्युपदिश्यते ।
सामर्थ्यात्संनिधीयेते तत्र द्रव्यगुणौ तदा ।। 77 ।।

(118) `केषांचित्साहचर्येण जातिः शक्त्युपलक्षणम्'

(Vak.III.जा.3.)

इति जात्युपलक्षिता शक्तिः । जातिपदार्थे प्रतिनिध्युपादानार्थं क्रियासाधनत्वेव चोद्यते इत्युक्तत्वाज्जातिः शक्तिर्वेत्याह । अत्र दर्शने न द्रव्यगुणयोः श्रौतः क्रियाभिसंबन्धः, अपि तु जातिक्रिययोः शक्तिक्रिययोर्वा विभक्तिप्रापितः संबन्धः । निराधारयोश्च जातिशक्त्योरसंभवात् सामर्थ्यात्संनिधापितं स्वाधारं द्रव्यं तेनापि स्वाधेयो गुण इति द्वयोरपि द्रव्यगुणयोः सामर्थ्यप्राप्तत्वम् ।। 77 ।।

ततश्च प्रतिनिधिविषये--

जातीनां च गुणानां च तुल्येऽङ्गत्वे क्रियां प्रति ।
गुणाः प्रतिनिधीयन्ते छागादीनां न जातयः ।। 78 ।।

(119) द्रव्यव्यवधानाद्द्वावपि जातिगुणौ क्रियाङ्गभावमनुभवत इति तुल्यत्वम् । तत्र तथापि छागादीनां संबन्धिन्यो जातयो न प्रतिनिधीयन्ते छागाभावे मेषो नालभ्यते, अपि तु गुणानामेव प्रतिनिधिः प्रसिद्धः--श्वेताभावे कृष्णोऽपि छाग आलभ्यते ।। 78 ।।

कात्र युक्तिरित्याह--

व्यक्तिशक्तेः समासन्ना जातयो न तथा गुणाः ।
साक्षाद्द्रव्यं क्रियायोगि गुणस्तस्माद्विकल्पते ।। 79 ।।

(120) व्यक्तिशक्तेः द्रव्यशक्तेः, शक्तस्य द्रव्यस्येत्यर्थः । शक्त्यायत्तो द्रव्यस्य क्रियापयोग इति शक्तिग्रहणम् । उत्पत्तिप्रभृत्याविनाशादन्वयादधिष्ठानसंबन्धयोश्चैककालत्वादासन्ना द्रव्ये जातिः । गुणास्तु तन्निष्ठोत्तरकालभाविनः कालान्तरपरिवासादन्योन्यस्वभावपरिणामिन इति द्रव्याद्विप्रकृष्टाः । यदि नाम न समासन्ना गुणाः कथमेतावता विकल्प इत्याह--साक्षाद् द्रव्यं क्रियायोगि इति । एतदुक्तं भवति । यदि द्रव्यमनपेक्ष्य गुणः साक्षात्क्रियायोगी स्यान्न विकल्पेत । यदा तु द्रव्यं साक्षात्क्रियायोगि, जातिगुणौ तु तद्द्वारेम तदा प्रत्यासत्तिविप्रकर्षचिन्ता जायते । तथा हि--द्रव्यं साक्षाच्छक्तं क्रियासंबन्धक्षममिति तद्द्वारेण समन्वययोग्यम् । तत्रासन्नं न विकल्पते जातिरूपमित्यन्यजातीयस्य न प्रतिनिधिः, अपि त्वन्यगुणस्य । कृष्णेऽपि छागे छागबुद्धिरन्वेत्येव । अन्यजातीयस्योपादाने तु जातेरात्मकल्पायास्त्यागे सर्वथैव साधनभेदात्क्रियान्तरमेव स्यात् । कदरे तु जातेरात्मकल्पायास्त्यागे सर्वथैव साधनभेदात्क्रियान्तरमेव स्यात् । रदरे तु सादृश्यात्खदिरबुद्धेरनपगमः । एतच्च जातिपक्षे युज्यते, श्रौतस्य जातिरूपस्यात्यागात् । द्रव्यपदार्थपक्षे तु जातेरनभिधेयाया उपलक्षणत्वात्तत्त्यागेऽपि नास्ति श्रौतार्थत्याग इति अन्यजातीयस्यापि प्रतिनिधिप्रसङ्गः । श्रौतस्य संबन्धस्य च द्रव्यपदार्थपक्षे पूर्वं गुणद्रव्ययोः साम्यमुक्तम् , इह तु सामर्थ्यादाक्षेपे प्रत्यासन्ना जातिर्न त्यज्यते इति जातिपदार्थमुत्कर्षयितुमेवं विचारितम्, अत एव `यदा तु जातिः' इति तु शब्दः पूर्वस्माद्विशेषणार्थः । तदेतद्भाष्येऽभिहितम्--

`यत्र ह्यन्तरद् द्रव्यं तत्प्रधानम्, न हि शुक्लामालभेतेति पिष्टपिण्डीमालभ्य कृती भवति' (M.Bha.on P.2.1.56)इति । प्रत्यासन्नतरत्वाज्जातेस्तद्वाची द्रव्यशब्दोऽभिप्रेतः न गुणोपसर्जनद्रव्यवाची । अनिर्धारितरूपस्य हि द्रव्यस्य जातिरात्मरूपनिर्धारणोपयोगिनी स्वात्मप्रदानेनारूपिता तदाकारतां प्राप्नोति । तत्प्रतिनिधौ वस्त्वन्तरभावाच्चोदितस्य त्यागप्रसङ्गः ।। 79 ।।

पूर्वोक्तं पक्षमन्यमतत्वेनोपसंहरति--

साम्येनान्यतराभावे विकल्पः कैश्चिदिष्यते ।
अतद्गुणोऽतश्छागः स्यान्मेषो वा तद्गुणो भवेत् ।। 80 ।।

(121) यथा जातिर्द्रव्योपलक्षणम्, निरुपाधेरर्थस्याव्यवहार्यत्वात्, एवं गुणोऽपि । तथा जातिवदाधारनियतो गुणो नीलादिर्वाय्वाकाशादेस्तदभावादिति सति साम्ये ये द्रव्यवद्भेद्यत्वाद्ग्रव्यलक्षणप्राप्तं गुणमप्यभिधेयं मन्यन्ते व्याडिदर्शनस्थिता द्रव्यपदार्थिकाः, तेषां गुणोऽपि क्रियासंबंन्धं जातिवद्ग्रव्यद्वारेणार्हति इति श्रौतसंबन्धपरिपोषार्थं वाक्यीयसमन्वयत्यागेन द्वयोरपि गुणद्रव्ययोः प्रतिनिध्युपपत्तिरित्यनभिमतमपि पक्षं मतान्तरत्वेन निर्दिशति कैश्चिदिति । द्रव्यस्य हि प्रतिनिधिर्भाष्यकारप्रभृतिभिः शिष्टैर्नाङ्गिकृतः ।। 80 ।।

एवं प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसन्धातुमाह--

जातेराश्रितसंख्यायाः प्रवृत्तिरुपलभ्यते ।
संख्याविशेषमुत्सृज्य क्वचित्सैव प्रवर्तते ।। 81 ।।

(122) प्रासङ्गिकेन पूर्वप्रस्तुतस्य व्यवधानादुक्तमप्येतत्पुनः स्मारितं सामान्येनाधिकं विशेषं वक्तुम् ।। 81 ।।

तथा हि--

पराङ्गभूतं सामान्यं युज्यते द्रव्यसंख्यया ।
स्वार्थं प्रवर्तमानं तु न संख्यामवलम्बते ।। 82 ।।

(123) पूर्वं शाब्देन व्यापारेण विधीयमानानूद्यमानत्वेन गुणप्रधानभावमाश्रित्य गुणेऽपि ग्रहे संख्याविवक्षितेति प्रतिपादितम् । इदानीं तु वास्तवं गुणग्रधानभावमाश्रित्य गुणे संख्या विवक्ष्यते इति न्यायोऽवतार्यते ।। 82 ।।

यजेत पशुनेत्यत्र यज्यर्थायां पशुश्रुतौ ।
कृतार्थैकेन पशुना प्रधानं भवति क्रिया ।। 83 ।।

(124) यागस्य प्राधान्यात्तत्साधनभूतः पशुरित्येकेन यागसंपत्तौ प्रधानस्य क्रियालक्षणस्य वाक्यार्थस्य निष्पत्तेर्गुणभेदं प्रत्यनादरात्पराङ्गभूतमत्र पशुसामान्यं द्रंव्यसंख्यया युज्यते इति जातेराश्रितसंख्याया अत्र प्रवृत्तिः । तथा हि--प्रधानं गुणभेदे सत्यावर्त्तेतेति क्रियान्तरमेवैतत्स्यात् । ततश्च न प्रधानानुयायिनो गुणाः स्युः, अपि तु प्रधानं गुणानुयायीत्येतदनिष्टं प्रसज्येतेत्याह ।। 83 ।।

यावतां संभवो यस्य स कुर्यात्तावतां यदि ।
आलम्भनं गुणैस्तेन प्रधानं स्यात्प्रयोजितम् ।। 84 ।।

(125) यस्य इति । अधिकारिणः । अङ्गप्रयुक्ते च प्रधाने प्रधानत्वमेव तस्य न स्यात्, तत्प्रति गुणानां च गुणत्वमिति संरक्ष्योऽयं नय इत्यभिप्रायः ।। 84 ।।

`स्वार्थं प्रवर्तमानं तु न संख्यामवलम्बते' (Vak.III.जा.82)

इत्यत्रोदाहरणमाह--

संमृज्यमानतन्त्रे तु ग्रहे यत्र क्रियाश्रुतिः ।
संख्याविशेषग्रहणं नैव तत्राद्रियामहे ।। 85 ।।

(126) समृज्यमानो ग्रहार्थस्तन्त्रं यत्र ग्रहे ग्रहशब्दे । विशेषणसमासो वायम् । संमृज्यमानं च तन्त्रं च तस्मिन् ग्रहे संस्कार्यत्वात्प्रधाने संमार्जनक्रियायाः शब्दे न प्रधानभूतायाः यत्र श्रुतिः `ग्रहं संमार्ष्टि' इत्यत्र, तत्र स्वशब्देन प्रतिपादितस्यापि संख्याविशेषस्यैकत्वलक्षणस्य विवक्षा न भवति । उत्पत्तिवाक्यानुसारेणानेकसंख्यस्यैव तस्यात्र विवक्षितत्वात् । न हि संसर्गोऽत्र तन्त्रम्, येनैकेनापि ग्रहलक्षणेन साधनेन तस्य संपत्तावनेकोपादानं पशुवन्निष्फलं स्यात्, अपि तु ग्रहस्तन्त्रमिति यथासंभवं तस्य संस्कार इति संख्याविशेषमुत्सृज्यात्र जातिः प्रवर्तते ।। 85 ।।

तदेवं `गुणे संख्या विवक्ष्यते' न तु प्रधानभूत इत्यत्र शास्त्रीयं ज्ञापकमाह--

शिष्यमाणपरे वाक्ये यदेकग्रहणं कृतम् ।

शेषे विशिष्टसंख्येऽपि व्यक्तं तल्लिङ्गदर्शनम् ।। 86 ।।

(127) `सरूपाणामेकशेषः' इत्यत्र शिष्यत इति शेष इति कर्मसाधनशेषशब्दाश्रयेण शिष्यमाणः अवतिष्ठमानः, परः प्रधानं एकशेषलक्षणेन संस्कारेण संस्कार्यत्वाद्भवतीत्येकवचनान्तत्वादेकसंख्यायुक्तेऽपि प्रतीते शेषशब्दे यत्पुनरेकशब्दोपादानम् तत्स्वार्थं प्रवर्तमानं प्रधानभूतं सामान्यमाधारगतसंख्याश्रयेण न प्रवर्तत इत्यस्यार्थस्य ज्ञापकं स्फुटम् । भावसाधने तु शेषशब्दे शेषणक्रियायाः प्राधान्यम्, न शिष्यमाणस्येति द्विबहव्वोरपि शेषणमेकमेवेति, एकत्वे विवक्षितेऽपि द्विबहव्वोर्निवारणार्थमेकशब्दोऽर्थवानेवेति न ज्ञापकं स्यात् ।। 86 ।।

एवं `गुणे संख्या विवक्ष्यते ' इति न्यायं वैदिकोदांहरणपृष्ठपातितयावस्थाप्य प्रकृतोपयोगितां दर्शयितुं व्याकरणेऽप्युदाहरणमत्राह--

समासप्रत्ययविधौ यथा निपतिता श्रुतिः ।

गुणानां परतन्त्राणां न्यायेनैवोपपद्यते ।। 87 ।।

(128) `सुप्सुपा' इत्यत्र समासस्य विधिरिति तस्यैव प्राधान्यम् । न ह्यवयवानामिदमनुशासनम्, समुदाये तेषामन्तर्भूतत्वात् स्वातन्त्र्याभावात् । न चाप्यवयवाः केचनात्र वस्तुतः सन्ति । विशिष्टेऽर्थे समासपदस्याभिन्नस्यैव प्रवृत्तेः । यथोक्तं वाक्यकाण्डे--

`ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले'(Vak.a.II.14)

इति । अभिन्नस्य समासपदस्यैव परिकल्पितपूर्वपरावयवविभागस्य सञ्चिकीर्षितत्वम् ष अन्वयव्यतिरेकाभ्यां हि विशिष्टार्थशब्दावधारणम् । तौ चात्र समासपदे राजपुरुषादौ स्तः । समुदायेन विशिष्टस्य संबन्धस्य प्रतिपादनात्, अवयवाभ्यामप्रतिपादनात् । समुदायसंस्कारप्रयुक्त एव चावयवानां विभक्तिलोपह्रस्वत्वपुंवद्भावादिसंस्कारः । अवयवसंस्कारनान्तरीयकत्वात्समुदायसंस्कारस्य । तस्मादत्र समासविधौ येन प्रकारेणैकसंख्यामुपादायैकत्वं प्रतिपादयन्ती श्रुतिः `सुप्सुपा' इति शब्दोपनिपतिता श्रोत्रविषयभावमागता, तेनैव प्रकारेण न्यायेनोपपद्यते युज्यते । श्रुतमेकत्वं विवक्ष्यत इत्यर्थः । कोऽसौ न्याय इत्याह `गुणानां परतन्त्राणाम्' इति । प्रधानवशवर्तित्वाद्गुणानाम् अवयवानां यां संख्यामुपादायार्थे प्रवृत्ता सती `सुप्सुपा' इति श्रुतिस्तत्संख्यायोगिनमेवार्थं प्रतिपादयतीत्येकैकस्य सुबन्तस्य समासः कष्टश्रित इत्यादौ भवति न तु बहूनाम् । महत्कष्टं श्रित इति द्वितीयान्तजातेराश्रयादनेकस्य हि समासे तस्यानियतत्वादनवस्थानात्प्रधानभूतः समासोऽनियमेन प्रतीयत इति विप्लवात्तस्यानुग्रहो निराकृतः स्यादिति प्रत्यवयवं समासभेदात् गुणायत्तं प्रधानं स्यात् न तु गुणाः प्रधानानुयायिन इत्यर्थः ।

द्वन्द्वबहुव्रीह्योस्तु `अनेकम्' इति वचनसामर्थ्यादनेकपदावयवः समासोऽभ्युपगत एव । अत एव च लिङ्गादन्यत्र संख्याविवक्षासिद्धिः । प्रत्ययविधौ अपि `ङ्याप्प्रातिपदिकाद्' इत्यत्र समाहारद्वन्द्वनिर्दिष्टायाः प्रातिपदिकलक्षणायाः प्रकृतेः सिद्धरूपाया अनुवादात्स्वादिविधिवाक्येऽधिकारादपूर्वस्य स्वादेरेकवाक्यतया प्रत्ययस्य विधानमिति तस्य प्राधान्यात्तदङ्गे प्रातिपदिके यथाश्रुतसंख्याङ्गीकारः । ननु च `सुप्सुपा' इति विभक्त्यैकत्वस्य प्रतिपादितत्वादस्तु संख्याविवक्षा, `ङ्यात्प्रातिपदिकाद्' इत्यत्र तु कासावेकत्वसंख्या श्रुता यस्या विवक्षोच्येत । यदि समाहारैकत्वं तदयुक्तम्, तस्य समुदायसंबन्धित्वात्, समुदायाच्च प्रत्ययोत्पत्तेरविवक्षितत्वान्न तस्यैकत्वमत्र विवक्षितत्वेन प्रतिपाद्यम्, अपि तु प्रत्येकमवयवानाम् । तेषां चात्र वृत्तावन्तर्गतत्वाव्द्यित्वादिप्रतियोग्येकत्वं न प्रतीयते, अपि त्वनिर्ज्ञातसंख्याविशेषाणि स्वरूपमात्रेण ङ्याप्प्रातिपदिकानि । भवतैव तर्ह्यस्माकं दिक् प्रदर्शिता, लयमप्यधुना तर्ह्येवं व्याचक्ष्महे । यथा निपतिता श्रुतिः येनैव प्रकारेण निपतिता अर्थवच्छब्दरूपं च स्वरूपमात्रेण प्रतिपादयन्ती निपतिता । तथा च तावति तात्पर्यमिति न द्वितीयमपेक्षते, द्विवचनबहुवचननान्तानामसमासाद् वृत्तौ संख्याविशेषानवगतेः प्रतियोगापेक्षामन्तरेण च द्वित्वाद्यनुत्पत्तेः ।

अतश्चार्थात्प्रत्येकमेकत्वं `ङ्याप्प्रातिपदिकाद्' इति वदतो विवक्षितम् । अन्ये तु ग्रहणकवाक्यादस्माद्यत्प्रातिपदिकं जायते ङ्यन्तादाबन्तात्प्रातिपदिकादिति, तत्र श्रुतमेकत्वं विवक्ष्यत इति व्याचक्षते, अत्र तु `यथा निपतिता श्रुतिः' इत्यवाचकम् । न हि प्रातिपदिकमुपप्लवमानं वाक्यं श्रुतिविषयम् । तदत्र संख्याविवक्षायां बहुभ्यो ङ्याप्प्रातिपदिकेभ्यः स्वादेः प्रत्ययस्य परत्वासंभवाद्यथाप्रकृत्यावर्तेत प्रत्ययः । तथा च गुणानुयायि प्रधानं स्यान्न तु गुणास्तदनुयायिनः ।

ननु च स्वादीनां प्रकृतिसंबन्धस्य विधीयमानत्वात्कथं तेषां प्राधान्यम् । एवमपि प्रकृतीनां तावद्गुणत्वं सिद्धमिति तत्र `गुणे संख्या विवक्ष्यते' इति सिद्धोऽस्मन्नयः । न च प्रकृतिरेव प्रत्ययपरतया संचिकीर्षिता । प्रकृतिप्रत्ययपरिकल्पनेन पदस्यैवान्वाख्येयत्वात् तस्यैव लोके प्रयोगात् । यद्यपि च प्रत्ययपरत्वेन संस्कृता प्रकृतिरेव पदम्, तथापि तात्पर्यदृशा प्रकृतेः प्रक्रियाभेदेनासत्यत्वादविकल्पं पदमेव सत्यमुद्दिश्य संस्कारप्रवृत्तिः । वाक्यार्थप्राधान्ये त्वपूर्वस्य प्रत्ययस्यैव लिधीयमानत्वात्प्राधान्यम् । अत एव `समासप्रत्ययविधौ' इत्याह । इत्थं च नात्र भिन्नवाक्यतया संबन्धिविधानम् , प्रक्रियायां प्रकृत्यनुवादेनैकवाक्यतया स्वादीनां विधानात् । सुप्तुङोरविशेषविधानादिति तु संख्यावाक्यभेदाभिप्रायम्, न तु प्रकृतिवाक्येनापि नैकवाक्यतात्र विवक्षितेति मन्तव्यम् । न चैकवाक्यतया विधाने प्रत्ययसंज्ञासंबन्धो विलक्षणः प्रवृत्तिभेदेन विना न शक्यते विधातुम् । विधिसंबन्धौ हि पूर्वम् ततो विधानाल्लब्धसत्तानां स्वादीनां प्रत्ययसंज्ञासंबन्धः । सतो हि कार्यिणः कार्येण भवितव्यमिति वाच्यम् । भाविनोऽपि बुद्धया विषयीकरणाद्भाव्यमानावस्थानामेव प्रत्ययादिसंज्ञासमन्वयादित्येकवाक्यतयैवात्र प्रत्ययविधिर्ग्रन्थकाराभिमतः ।। 87 ।।

किमेष एवोत्सर्गः गुणे संख्या विवक्ष्यत इति । नेत्याह--

गुणेऽपि नाङ्गीक्रियते प्रधानान्तरसिद्धये ।
संख्या कर्ता तथा कर्मण्यविशिष्टः प्रतीयते ।। 88 ।।

(129) तथा कर्तेति । एवं च सति कर्ता अविशिष्टः प्रतीयते । इति संबन्धः । स हि गुणः । ईप्सिततमं तु कर्म संजाद्वारेणाधीयमानसंस्कारं प्रधानम् । `कर्मणि' इति । `कर्तृरीप्सिततमं कर्म' इत्यत्र कर्मसंज्ञायां विधीयमानायां तस्या एव तया वा संस्क्रियमाणस्य कर्मणः प्राधान्यात् कर्तुः क्रियया ईप्सिततममिति स्वाश्रयक्रियासंबन्धितया कर्ता निर्दिश्यमानो गुणोऽविशिष्टः सूत्रोपात्तलिङ्गसंख्याभ्यामनवच्छिन्नः, कर्त्रोः कर्तृणां च क्रिययेप्सिततमस्यापि कर्मसंज्ञासिद्धयर्थं भूयः प्रधानानुग्रहाय प्रतीयते अवगम्यते । समासप्रत्ययविधौ तु बहूनां सुबन्तानां समासेऽव्यवस्था स्यात्, बहुत्वस्यानियतत्वात् । कर्मसंज्ञा तु बहुविषया प्रचयमनुभवतीति न दोषः । प्रत्ययविधिरपि बहुभ्यः प्रकृतिभ्यो नास्ति, परत्वस्यानिर्वाहात् । तथा च सरूपवार्त्तिक उक्तम्--

`एकविभक्ताविति चेन्नाभावाद्विभक्तेः' (Var.on P.1.2.64)
इति ।

तदेवं प्रधानप्रचये भूयाननुग्रहः कृतो भवतीति प्रधानस्याविवक्षितसंख्यत्वे सिद्धे न गुणगता संख्याश्रीयते । अन्यथा प्रधानसङ्कोचे तदुपरोधः स्यादिति प्रधानान्तरसिद्धिः । प्रयोजनमेतद्युक्तिगर्भं द्रष्टव्यमिति गुणानां पारतन्त्र्यादेव न्यायात्`कर्तुरीप्सिततमं कर्म' इत्यत्र न विवक्ष्यते संख्येत्युक्ता युक्तिः ।। 88 ।।

अत्रैपोद्वलनार्थमाह--

यस्यान्यस्य प्रसक्तस्य नियमार्था पुनः श्रुतिः ।
निवृत्तौ चरितार्थत्वात्संख्या तत्राविवक्षिता ।। 89 ।।

(130) यस्य पुनः श्रुतिरिति संबन्धः । पूर्वं सामान्येनाक्षेपादेकैव श्रुतिः पुनः श्रुतिरित्युच्यते । यथेह कर्तुः । पुनः शब्दो वा तुशब्दार्थे । पूर्वमप्रधाने विवक्ष्यते संख्येत्युक्तम्, तदपेक्षयेह विशेषद्योतनार्थः । किमर्थमसौ पुनः श्रुतिरित्याह अन्यस्य कर्मादेः, प्रसक्तस्य प्राप्नुवतः, नियमार्था निवृत्त्यर्था । तथा हि ईप्सिततमस्य संबन्धिशब्दत्वाद्येनोप्सिततमं कर्म तस्याक्षेपस्तवत्सिद्ध इति करणादेरपीप्सिततमप्रसङ्गे कर्तुरित्युच्यमानं कारकान्तरनिवृत्तितात्पर्यान्नियमार्थमिति । द्वौ बहवो वा

कर्तारो न निवारिताः, तथापि कारकान्तरनिवृत्तिर्विवक्षिता सिद्ध्यत्येवेति निर्देशार्थैवात्र संख्या । नन्वेवमनेनैव न्यायेन यजिना अनियताङ्गाक्षेपात्पशुनेति करणान्तरनिवृत्तितात्पर्येणोच्यमानमविवक्षितसंख्यं प्रसज्येत ।

नैष दोषः । यथेप्सिततमस्य संबन्धिशब्दत्वादवश्यं साधनमात्राक्षेपे सिद्धे कर्तुरिति पुनः श्रुतिर्भवति, नैवं यजेः करणाक्षेपोऽवश्यंभावी । देवतोद्देशेन हविःप्रक्षेपमात्रस्य यज्यार्थत्वात्त्यज्यमानस्यैवाक्षेपो न करणस्येति करणाक्षेपनान्तरीयकत्वाभावान्न पशुनेति पुनःश्रुतिः, अपि त्वपूर्व एवायमङ्गविधिः । पशुरेवात्र त्यज्यमान इति चेत्, त्यागमात्रेऽपि तर्हि यजेः प्रयोगो दृश्यते--अग्नौ सुष्ठु यजत इति । अत्रापि हविष अक्षेप इति चेत् एवं तर्हि दृष्टार्थानां क्रियाणां लोके भवेन्नाम सामर्थ्यात्साधनाक्षेपः । अदृष्टार्थासु तु शब्दप्रमाणकत्वात्त्यजेतेत्यतो यागः कर्तव्य इत्येव प्रतीतेः पशोरपूर्वैव चोदनेयमिति यथाश्रुतसंख्याविवक्षैव न्याय्या । न च तस्मिन्यागे द्वाभ्यां प्रधानान्तरसिद्धिरस्ति । नापि यागान्तरे, एकेनैव सर्वस्य यागस्य सिद्धेः । ननु च कारकान्तरनिवृत्तितात्पर्ये कर्तुः सार्थाद्धीयते पथिक इत्यत्रापादानेन सार्थेनेप्सिततमस्य पथिकस्य कर्मसंज्ञाभावाद्धीयत इति कर्मणि लकारोत्पत्तिः कथम् ? न चायं कर्मकर्तृविषयः, कर्मस्थक्रियाणां कर्मवद्भावस्योक्तेः । जहातिश्च त्यागमात्रवचनः कर्तृस्थक्रियः । सार्थो हि त्यजति पथिकम्, तं नानुगच्छति । ततश्च पथिकस्यापायस्तत्फलं न धातुवाच्यः । किञ्च पूर्वं कर्मणः सतः कर्तृत्वं कर्मकर्तृत्वम् । इह तु सार्तापेक्षमेव पथिकस्य कर्मत्वम् , स च सार्थोऽपादानमिति कथं तदपेक्षं कर्मत्वमित्येतदेव चोद्यते । अत्रोच्यते--इह कारकाणां स्वव्यापारे स्वातन्त्र्यं सर्वेषामेव विद्यते, अकिञ्चित्करस्य क्रियाङ्गभावायोगात् । तथा च सामान्यसंज्ञापूर्वको विशेषसंज्ञासंभव इति सार्थस्य जहातौ स्वातन्त्र्यमपादानस्यानपगतमेव । सार्थो हि पथिकं जहदपाये साधनभावमनुभवति । यथा ज्वलन्ति काष्ठानि पाके । ततश्च सामर्थ्यात्प्रतीयमानं स्वातन्त्र्यं कर्मसंज्ञाहेतुरत्रोपपद्यते--यथा प्रविश पिण्डीमिति । यद्येवं कर्मादीनामपि स्वव्यापारे स्वातन्त्र्यमस्त्येवेति तदाश्रयापि कर्मसंज्ञा स्यात् माषेष्वश्वं बध्नातीत्यनर्थकं कर्तुरिति विशेषणम् । नैतदस्ति । सदपि तत्र स्वातन्त्र्यं प्रधानेन कर्त्रा न्यग्भावितमिति न कर्मसंज्ञाहेतुः । इह तु सार्थस्यापगमाङ्गे त्यागे जहातेर्वर्तनादपगमेऽपादानत्वं न्याय्यम् । त्यागे तु स्वातन्त्र्यं न विरुध्यत इति भवति तदपेक्षं कर्तृत्वम् । नन्वेवमपि स्वातन्त्र्यस्यात्र न्यग्भावाभावे `अपादानमुत्तराणि' (Va.on P.1.4.1.)

इति कर्तृसंज्ञाया अपादानसंज्ञाया बाधनात्कर्तृतृतीयैव स्यात् । तद्यथा `धनुषा विध्यति' इति करणे तृतीया । नैष दोषः । नान्तरीयकयोः शक्त्योः शब्दसामर्थ्यादुभयोः प्रतीतौ युगपद्विवक्षायां बाध्यबाधकभावः । तथा हि --धनुषः शरनिस्सरणेऽवधिभावगमनं विना वेधने साधकतमता नोपपद्यत इति द्वयोर्युगपद्विवक्षायां करमसंज्ञया अपादानसंज्ञाबाधनात् तृतीया । कृतायामपि तृतीयस्यामस्याबधिभावः प्रतीयत एवेति । अभिन्नफलत्वे सति तुल्यबलत्वात्परत्वेन व्यवस्था । सार्थेन हि पथिको हीयते । यावच्चासावपि ततोऽनपेतस्तावत्सार्थस्य कुतस्तं प्रत्यपादनत्वमिति तदभिधातुमपादाने पञ्चम्येवात्र न्याय्या । तत्र च त्यागफलरूपापायस्य प्रतीतेस्त्यागे स्वातन्त्र्यमवगम्यत एव । ननु सार्थेन हीयत इत्यत्रापायो गम्यत एव । तथा हि--हीयत इति कोऽर्थः ? त्यज्यत इति । यदि च ततः सार्थादपेयात्पथिकः, ततोऽस्य सार्थस्य तस्यां जहातिक्रियायां कर्तृत्वमुपपद्यते नान्यथा । सत्यमेतत्, किन्तु सार्थेन हीयत इत्युक्ते संशयो जायते--किं सार्थेनात्मनः सकाशात् पथिकः परित्यज्यते किं वा अन्यतः सार्थेनापकृष्यते इति । अवधिभावे तु सार्थस्य पञ्चम्या प्रतिपादिते तस्यैव कर्तृत्वं नियतमवगम्यते । तस्मादन्यथासिद्धावधिभावप्रतिपत्त्यर्थमपादानसंज्ञैव तत्र विधेया न तु विप्रतिषेधः फलभेदे सत्यतुल्यबलत्वादाश्रयितुं शक्यः धनुषा विध्यतीत्यत्र तृतीयस्यां कृतायां धनुषः शरावधिभावोऽपि अभिन्नफलत्वे सति तुल्यबलत्वेन परत्वादपादानमुत्तराणि बाधन्त इति युक्तम् । सार्थे तु विवक्षितार्थप्रतिपादनसामर्थ्यात्कर्तृसंज्ञा न प्रवर्तते । यद्येवं कर्तृरिति कर्तृसंज्ञकेनोप्सिततमस्य कर्मसंज्ञायां पथिकस्य तदभाव इति तदवस्थं चोद्यम् । नैतत् । कर्तृग्रहणस्य स्वातन्त्र्योपलक्षणादिति सामान्येन कर्तृसंज्ञकत्वात्कर्तृसंज्ञकत्वमनपेक्ष्य प्रधानभूतं स्वातन्त्र्यमात्रं यस्यास्ति कर्तृसंज्ञकस्याकर्तृसंज्ञकस्य च तस्योभयस्याप्येकवाक्यतया संग्रह इति वाक्यभेदानवतारात्सर्वं सुस्थम् । एवं `लः कर्मणि च भावे चाकर्मकेभ्यः'(P.3.4.69)

इति वचनात् भावकर्मकर्तृषु सामान्येन विधानात्परस्मैपदात्मनेपदयोरविशेषेण प्रसक्तौ भावकर्मणोः `शेषात्कर्तरि' इति नियमार्था

पुनः श्रुतिर्निवृत्तितात्पर्यादविवक्षित संख्येति प्रत्ययनियमपक्षे नियम्यमानत्वात्प्रत्ययस्य प्राधान्येऽर्थानां गुणत्वाद्गुणेऽपि संख्या नाङ्गीक्रियतेऽत्रेति द्विबहुष्वपि कर्मादिष्वात्मनेपदपरस्मैपदसिद्धिरत्रोदाहरणत्वेन योजनीया । अयमेव ह्यस्य मुख्यो विषयः, पूर्वश्रुत्यैव विदावुपादानात्पुनश्शब्देन नियमार्थमेवानुवादात् । तथा च `यजेत पशुना' इत्यादावतिप्रसङ्गो न भवति । पशोरुत्पत्तिवाक्यं किलेदं प्रथममित्यविषय एवायमस्य श्लोकस्य । एवं

`सरूपाणामेकशेषः'(P.1.2.64)

इत्यत्र शिष्यमाणपरे वाक्ये विरूपनिवृत्त्यर्थत्वात्सरूपश्रुतेः श्रुतसंख्याऽविवक्षायां द्वयोरित्येकशेषः सिद्धयति ।। 89 ।।

गतमदः । उक्तमिदम्--

`समासप्रत्ययविधौ यथा निपतिता श्रुतिः ।
गुणानां परतन्त्राणां न्यायेनैवोपपद्यते ।।' (Vak.III.जा.97)

इति । तथा च प्रातिपदिकेभ्य एकस्या विभक्तेरभावात्

`एकविभक्ताविति चेन्नाभावाद्विभक्तेः' (Va.on P.1.2.64)

इति प्रातिपदिकैकशेष एकविभक्तिनिमित्तो दूषितः । अत्र तु भाष्ये

`अथवा पुनरस्त्वेकविभक्तावेकशेषः'

इति स एव सिद्धान्तितः, तत्कथमुपपद्यत इत्युपपादयितुमाह--

सरूपसमुदायात्तु विभक्तिर्या विधीयते ।
एकस्तत्रार्थवान्सिद्धः समुदायस्य वाचकः ।। 90 ।।

(131) सहविवक्षायामेकशेषवचनात्परस्परापेक्षावयवार्थोपपादितसमुदायार्थप्रादुर्भावात्सरूपप्रातिपदिकविषयेऽवयवानां समुदायस्य च पृथगेवार्थवत्त्वाद्भिन्नैव प्रातिपदिकसंज्ञा । ततश्च समुदायात्प्रातिपदिकादस्त्येका विभक्तिः

`ङ्याप्प्रातिपदिकात्' ।(P.4.1.1)

इत्यत्र संख्याविवक्षायामपि । ननु च समुदायात्प्रातिपदिकादिवावयवेभ्योऽपि प्रातिपदिकेभ्यो विभक्तेरुत्पत्तिरत्र स्यात् । तथा च समुदायविभक्तेरन्त्यावयवविभक्त्या व्यवधानात्कथं `एकविभक्तौ' इत्यरयोपपत्तिः । अथ सुबन्तानां सरूपाणामेकशेषो न प्रातिपदिकानामिति नास्ति व्यवधानम्, एवमपि योऽसावेकः सुबन्तः शिष्यते तदीया विभक्तिरपि शिश्यत इति सा समुदायविभक्तिश्चेति द्वे श्रूयेयाताम् । अत्रोच्यते--समुदायावयवसन्निधाने समुदायकार्यमेव प्रवर्तते नावयवकार्यम् । समुदायपारतन्त्र्यादवयवानाम् । अस्ति च समुदायकार्येण विभक्त्याख्येनात्रावयवानामनुग्रहः । तथा हि--समुदायादुत्पद्यमाना विभक्तिरवयवार्थगतमपि संख्याविशेषं विभजति स्पष्टम् । अवयवार्थानामेव परस्परापेक्षितरूपाणां समुदायार्थत्वादिति लाघवेनैकेनैव प्रयत्नेन तन्त्रलक्षणेनावयवानुग्रहः कृतो भवतीति नावयवेभ्यः पृथग्विभक्त्युत्पत्तिः । तद्यथा--पपाचेत्यत्र समुदायैकाच एव द्विर्वचनेनावयवैकाचामप्यनुग्रहः । विरूपसमुदायविषये तु सहविवक्षासम्भवेऽपि न समुदायार्थप्रादुर्भावः । तथा ह्युक्तम्--

`याभ्यां चैकमनेकार्थं ताभ्यामेवापरम् '

इति । अवयवार्थानां प्राधान्यात्प्रत्यवयवं तत्र विभक्त्युत्पत्तौ द्वन्द्वः सुबन्तानां सिद्धयति । ननु च सरूपविषयेऽपि परस्परापेक्षैवावयवानां समुदायप्रादुर्भावबीजम्, न तु

सरूपार्थसमवेतजातिसम्भवात्समुदायस्य, तद्वाचकत्वेऽभिन्नसमुदायार्थोपपत्तिः,जातिपदार्थदर्शने प्रत्याख्यानादेकशेषस्य । किञ्च जातेरभिधेयत्वे द्विवचनबहुवचनानुपपत्तिः, एकत्वात्तस्याः । कामं बहुवचनं तान्त्रिकं भवेत् न तु बहुद्रव्यावसायः । तस्मादुद्भूतावयवार्थभेदः समुदायोऽपेक्षितेतरेतरावयवार्थाभिधायित्वात्सरूपविरूपविषयेऽपि समान एव । एवं तर्हि सुबन्तानां द्वन्द्ववचनसामर्थ्यात्तन्त्रेण विरूपसमुदायादेकाविभक्तिर्नोत्पद्यते । सरूपविषये तु न किञ्चिद्बाध्यते इति तत्रैवायं न्यायः । यदि वा व्यक्तिपदार्थनयेऽप्यारब्धे एकशेषे जातिरनभिधीयमानापि सम्बन्धव्युत्पत्त्यर्थमवश्यमुपलक्षणत्वेनापेक्षणीयेति तन्निबन्धना

सरूपाणां सङ्घटना । प्रातिपदिकानां विरूपाणां त्वेकक्रियाविषयत्वेना पेक्षितसुबन्तावस्थायां संघटनम्, न प्रातिपदिकावस्थायां घनमित्यादौ समुदायस्यैवार्थवत्वान्नायं तन्त्राख्यो न्यायः संभवतीत्यतः सत्यां
प्रातिपदिकसंज्ञायामर्थवद्ग्रहणेऽवयवेभ्योऽप्यनर्थकेभ्यो विभक्त्युत्पत्तौ नलोपादिचोद्योद्भावनं युक्तमेव ।
अप्रयोगसमवायिनोऽपि च प्रातिपदिकस्य परस्परार्थापेक्षा प्रयोक्त्राकांक्षायत्ता पदवदुपचर्यत एव । न हि पदमपि वाक्यमपि वा अप्रयोगसमवायि स्वतः किञ्चिदपेक्षते । प्रयोक्त्रधीना ह्याकांक्षापरपर्यायेच्छा योग्येषु शब्देषवध्यारोप्यते । असति च प्रातिपदिकस्यापेक्षणे नियतक्रियाविषयसाधनभावापरिज्ञानाद् द्वितीयाद्यनुपपत्तेः पदमेव नावतिष्ठेत इत्यपेक्षासिद्धौ समुदायार्थोपपत्तिः । सामर्थ्ये च समासविधानात् प्रातिपदिकार्थानामपेक्षानुमानम् । सर्वत्रैन च प्रकृतिप्रत्ययादीनामपोद्धारार्थेनार्थवत्ताभ्युपगमे परस्परमन्वयोपपत्तिः । तदेव समुदायार्थोपपत्तौ तस्य वाचकः प्रातिपदिकसमुदायोऽर्थवत्त्वात्प्रातिपदिकसंज्ञकः सिद्धः । समासग्रहणेन तुल्यजातीयविषयत्वान्नियमस्य, सुबन्तसमुदायस्य वाक्यस्यैव प्रातिपदिकसंज्ञा निवार्यत इत्येकविभक्तौ प्रातिपदिकैकशेषः समर्थितः संख्याविवक्षायामपि ।। 90 ।।

एवं च कृत्वा भूयान्प्रधानस्यानुग्रहः कृतो भवतीत्याह--

प्रत्ययस्य प्रधानस्य समासस्यापि वा विधौ ।
सिद्धः संख्याविवक्षायां सर्वथानुग्रहो गुणे ।। 91 ।।

(132) `ङ्यात्प्रातिपदिकात्' इति प्रकृत्यनुवादेनापूर्वस्य प्रत्ययस्य विधौ विवक्षितदायामपि संख्यायां गुणे केवलात्प्रातिपदिकात्समुदायाच्चोत्पत्तिः तस्य सिद्धेति सर्वथा सर्वेण प्रकारेण, प्रधानस्य प्रत्ययरूपविषयव्याप्तिलक्षणः अनुग्रहः सिद्धः । तथा `सुप्सुपा' इति समासस्यापि प्रधानस्य विधौ विवक्षितायामपि गुणे संख्यायां द्वन्द्वेऽनेकग्रहणात् बहूनां समासः करिष्यते । बहुव्रीहौ त्वनेकपदावयवे स्वरसमासान्तपुंवद्भावेषु दोषोऽवयवतत्पुरुषाश्रयेण निवारित इति नास्त्यनिष्टम् । अविवक्षितायां संख्यायां बहूनामव्यवस्थितत्वान्नियमेन समासो न विज्ञायेतेत्युपरोधस्तस्य कृतः स्यात् । उत्तरपदे द्विगुविधानाच्च लिङ्गात्सुसूक्ष्मजटकेशादावनेकपदो बहुव्रीहिः सिद्धः । द्वयोश्च द्वन्द्वे कृते पुनरपरेण सह द्वन्द्व इत्येकवचनमुपसर्जनार्थमित्युक्तम् ।। 91 ।।

एवं पूर्वं प्रातिपदिकार्थभूतां जातिं निरूप्य विभक्त्यर्थोऽपि संख्याजातिरित्युक्त्वा तत्प्रसङ्गेन विवक्षाविवक्षे विचार्य इदानीं तस्यामेव जातौ यदधिकं विचार्यमवशिष्यते तदेव विचारयितुमाह--

अभेदरूपं सादृश्यामात्मभूताश्च शक्तयः ।
जातिपर्यायवाचित्वमेषामप्युपवर्ण्यते ।। 92 ।।

(133) इयमत्र शङ्का । अन्वयविज्ञानोन्नीयमानसद्भावा जातिरित्युद्घोष्यते । सा च व्यक्तिभ्यो व्यतिरेकेणात्मानं नो दर्शयति । तदेता एव व्यक्तयः सादृश्यादेकाकारप्रत्ययप्रसवहेतवः प्रकृत्यैवैकप्रत्यवमर्शजननसामर्थ्यादध्यासाद्वा सन्तु, किमपरेण सामान्येन कृत्यम् । तदेतदभ्युपगच्छति । अभेदरूपम् अव्यतिरिक्तं व्यक्तीनां यत्सादृश्यम् एकप्रत्यवमर्शजनकं वा व्यतिरिक्तमेव शक्तिलक्षणं सामर्थ्यं तदपि जातिरिति व्यपदिश्यत एव । अन्विताकारज्ञानजनकं हि व्यक्तीनां किञ्चन रूपं सामान्यमिति सर्वपार्षदो न्यायः । ततश्च सादृश्यं शक्तिरित्यापि नामान्तरेणोच्यताम्, न काचिदनुपपत्तिः । व्यतिरेकाव्यतिरेकचिन्ता तु प्रवादिनां ग्रह एवेत्यभिप्रायः ।। 92 ।।

अत्र वैशेषिकदर्शनाश्रयेण व्यतिरेकपक्षं जातीनां समर्थयितुमाह--

दण्डोपादित्सया दण्डं यद्यपि प्रतिपद्यते ।
न तस्मादेव सामर्थ्यात्स दण्डीति प्रतीयते ।। 93 ।।
नेच्छानिमित्तादिच्छावानिति ज्ञानं प्रवर्तते ।
तस्मात्सत्यपि सामर्थ्ये बुद्धिरर्थान्तराश्रया ।। 94 ।।

(134) अयमत्रार्थः--इहानुगताकारे ज्ञाने व्यक्तीनां व्यावृत्ताकाराणां हेतुत्वं नोपपद्यत इति सामान्यं परिकल्प्यते ।

सादृश्यसामर्थ्ये तु व्यक्त्यव्यतिरिक्ते । तद्वदनुयायिनी व्यतिरिक्ता जातिरभ्युपगन्तव्या । ननु च सापि कथमनवयवेन व्यक्तिं नानुयायात् । तथा च गवाश्वादौ सांकर्यप्रसङ्गः । नैतदेवम्, प्रतिनियताश्रयवृत्तित्वात्सामान्यानाम् । किमत्र निमित्तमिति चेत् विशिष्टसंस्थानयोगित्वं व्यक्तीनाम् । अन्यो ह्यवयवसन्निवेशो गवाम्, अन्यस्त्वश्वानामिति गोत्वाश्वत्वयोराधारनियमसिद्धिः । तत एव तर्हि विशिष्टात्सन्निवेशात्सादृश्यापरपर्यायात्प्रतिनियमेनानुगताकारप्रत्ययोऽस्तु । यथा ह्यवयवसन्निवेशः प्रतिव्यक्ति भिन्नोऽपि सामान्यस्याभिन्नस्याश्रयावच्छेदहेतुः तथा अनुगताकारस्यापि ज्ञानस्य हेतुर्भवतीत्यलमन्तर्गडुना सामान्येन । तदुक्तम्--

`तुल्यभेदे यथा जातिः प्रत्यासत्त्या प्रसर्पति ।
क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम् ।। '

इति । अत्रोच्यते--इह कार्याणां प्रतिनियतकारणजन्यत्वान्न सर्वो जनकः सर्वत्र कार्ये व्यापारयितुं पार्यते। तथा हि--दण्डीति प्रत्यये दण्डसंबन्धो निमित्तम् । स तु दण्डसंबन्धः सर्वत्र किं न भवतीत्युक्ते दण्डजिघृक्षा तस्य निमित्तं भण्यते । न चैतदत्र वक्तुं शक्यते । दण्डोपादानेच्छाया एव दण्डसंबन्धं प्रति नियतहेतोरस्तु दण्डीति प्रत्ययः, किमपरेण तत्र दण्डसंबन्धेन निमित्तेन कृत्यम् इति । दण्डोपादित्सा दण्डसंबन्धस्य निमित्तम् । तस्या अपि किं निमित्तमित्युक्ते दण्डस्य यत्र कार्ये विनियोगः तत्र सामर्थ्यादिदर्शनं तदुपादित्सानिमित्तं वक्तव्यम् । तथा च तत ऐवच्छानिमित्ताद् दण्डोपादित्सावानित्यस्तु प्रत्ययः, किमत्रेच्छसमवायः स्वात्मनि निमित्तमुद्घोष्यत इति । नैतच्छक्यतेऽभिघातुम् । अनुरूपं कार्यं अनुरूपकारणजन्यमितीच्छासंबन्धादिच्छावानिति ज्ञानम्, न दण्डीति । एवं सादृश्यादेः सामान्यस्य विषयनियमसामर्थ्ये सत्यपि न तस्मादेव सामर्थ्यादनुगताकारज्ञानजनकत्वं युक्तं तत्सदृशमित्यादिज्ञानदिति तन्निमित्तं व्यतिरिक्तं सामान्यमवश्याश्रवणीयमिति सिद्धम् ।। 94 ।।

अन्यथा अतिप्रसङ्ग इत्याह--

स्वभावोऽव्यपदेश्यो वा सामर्थ्यं वावतिष्ठते ।
सर्वस्यान्ते यतस्तस्माव्द्यवहारो न कल्पते ।। 95 ।।

(135) इह कार्याणां प्रतिनियतकारणानभ्युपगमे कारणकारणादेव सिद्धावभ्युपगम्यमानायां तत्रापि तत्कारणादित्यनवस्थायामापादितायां सर्वान्ते मूलकारणेऽवस्थातव्यम् । तच्च मूलं कारणं सर्वस्य वस्तुनः सर्वस्य वादिनोऽन्ते पर्यनुयोगावसाने नित्यस्य प्रधानादेः कारणस्य स्वभावोऽव्यपदेश्योऽयमस्य स्वभावोऽस्माद्धेतोरित्येवं व्यपदेष्टुमशक्यः अवतिष्ठते । अत एवास्मिन्नवधौ हेतुप्रश्नपरम्परा निवर्तते । येषां त्वनित्यं कारणम्, तेषां सामर्थ्यं हेतुशक्तिः प्रश्नपरम्परावसानेऽवतिष्ठते । तदपि सामर्थ्यमव्यपदेश्यमेव, वैलक्षम्येन `इदं तत्' इति शब्देन व्यपदेष्टुमशक्यत्वात् । अथवा नित्यकारमपरिग्रह एव तस्यात्यन्तपरोक्षत्वात्स्वभावोऽव्यपदेश्यः । अनेकशक्त्यात्मकत्वे तु सामर्थ्यमप्यस्य परोक्षत्वादेवाव्यपदेश्यम् । एकमेव वा वस्तु स्वभावशब्देन सामर्थ्यशब्देन च व्यवहरन्तीति तदुक्तिभिरेव प्रतिपादयति । एवमव्यपदेश्यस्वभावेऽवस्थानात् तस्मादव्यपदेश्याच्छाब्दो व्यवहारो न प्रकल्पते । वाक्ये यथानुयातवस्तुनिबन्धनो हि परिदृश्यमानः स्थूलार्थाश्रयो गामानय, ओदनं भुंक्ष्वेति व्यवहारः सोऽन्त्यहेतुवशः इति स्वभावः सामर्थ्यं वा आनय भुंक्ष्व चेत्येवं वक्तव्यम् । अव्यपदेश्यत्वाच्च स्वाभावादेस्तेन व्यवहारो नोपपद्यत इत्ययुक्तम व्यवहार्यं वस्तूपक्षेप्तुमित्यर्थः । तदेवमभिन्नव्यवहारनिबन्धनानि सामान्यान्यभ्युपगन्तव्यानि । सादृश्यात्तु सदृश इति व्यवहारः शक्तिमत्त्वात्तु शक्तिमानिति । अन्यच्च सादृश्यज्ञानं सामान्यज्ञानादिभिन्नजातीयेष्वपि गोगवयादिषु भावात् । अथ नावधार्यन्ते विवेकेन जातय इत्यनुगतस्य ज्ञानस्य निमितपरिकल्पनायां यदेव किञ्चिन्निमित्तं स्यादिति को ग्रहो जातिष्विति । उच्यते--तत्र रूपिसमवायात् चाक्षुषाण्येव सामान्यानीति ब्रूमः । विप्रतिपन्नं तु प्रति कार्यकल्प्यत्वमुच्यते । न च ज्ञानं नाम कार्यं जडाङ्कुराजिसदृशम्, अपि तु बोधरूपमिति । तस्य तत्सामान्यं न चक्षुरादिवदधिपतिप्रत्ययरूपं कारणम्, अपि त्वालम्बनप्रतययरूपम् । आलम्बनं च संवेद्यमानम् । अतश्चेहापि तदेवायातं संवेद्यते तस्य स्वरूपमुपयुज्यमानमिति । अथ विकल्पस्य सामान्यं विषयो न तु प्रत्यक्षस्य । तदयुक्तम् । असति सामान्ये विकल्पो न प्रत्यक्षम् । न सति, सत्यविषयत्वात् । विकल्पविषयत्वाच्च

तस्यासत्यत्वम्, असत्यविषयत्वाच्च तस्य सत्यविकल्पत्वमिति इतरेतराश्रयता । किञ्च प्रतिकर्मव्यवस्थायां ज्ञानस्य बौद्धैरुच्यते यतो नीलाकारमतो नीलस्य संवेदनमिति । तद्वत् सामान्यवादिभिरष्युच्यते यतोऽभिन्नाकारमतोऽभिन्नस्य संवेदनमिति । कोऽनयोरुक्तोयर्विशेषः ? ये न नीलं प्रत्यक्षं सामान्यमीदृशमेवाप्रत्यक्षमिति । एवमस्य न कश्चिद्विशेषो दण्डादिभ्य इति नास्ति वैसादृश्यं निदर्शनैः । एकार्थकारित्वाच्च भिन्नः प्रत्ययो नास्ति हेतुभेदात् कार्याणामपि भेदात् इत्येकप्रत्यवमर्श एवासति सामान्ये नोदियात् । रूपादिव्यतिरेकेण च द्रव्यानभ्युपगमात् प्रत्यर्थमपि नास्त्येकार्थसाध्या काचिदर्थक्रिया किमुतार्थभेदो भवेत् । उदकाहरमाद्यपि रूपादिसमुदायसाधयमेकमिति तत्र समुदायबुद्धिर्भवेन्नैकबुद्धिः, यथैकाङ्कुरजनकत्वेऽपि क्षितिबीजादीनाम् । मिथ्यारूपसंविच्चैकबुद्धिरित्यापि क्वचित् सम्यक्संवेदनमूलत्वान्मिथ्याबुद्धेरवश्यं काचिद्भेदबुद्धिः सत्याप्येष्टव्येत्यनपह्नवनीयानि प्रतिनियतकार्यसाधनानि सामान्यानीति स्थितम् ।। 95 ।।

अधुना साङ्कनयैनाद्वैतनयेन वा व्यतिरिक्तां जातिं समर्थयितुमाह--

यदा भेदान्परित्यज्य बुद्धयैक इव गृह्यते ।
व्यक्त्यात्मैव तदा तत्र बुद्धिरेका प्रवर्तते ।। 96 ।।

(136) इहैकरूपसमन्वयादेककारणपूर्वकं विश्वम् । असदनुत्पत्तेश्च कार्यकारणयोरभेद इति सर्वं किञ्चिद्भेदाभेदात्मकं वस्तु । एकस्यैवानेकधावश्तानात्ततोऽभेदः सामान्यं भेदो विशेषः । तत्र सर्वाभेदो महासामान्यम्, तस्यैव च यथाभागमवच्छेदादवान्तरसामान्यानि । अवच्छेदकाश्च धर्मास्तस्यैव तथा परिणाम इति न ततोऽतिरिच्यन्ते । सर्वं ह्येकस्यैव परिणामो विवर्त इति वा । एवं च कृत्वा कार्यकारणयोर्धर्मधर्मिणोः सामान्यविशेषयोश्च नात्यन्तं भेदः, एवमप्रतीतेः । नाप्पत्यन्तमभेदः, तथाप्यप्रतीतेः । केवलं स्वसंविज्ञानपदाभावादगत्या भेदाभेदशब्दाभ्यां यदाभिधीयते तदा शब्दसादृश्यामात्रादविवक्षितभेदाभेदरूपाध्यारोपेण परैर्विरोधो निर्विषय इवापद्यते । तत्र यदा भेदान्परित्यज्य भेदाभेदरूपाविवक्षया व्यक्त्यात्मैव व्यक्तेरात्मैव व्यक्तिरूपमेव बुद्ध्या एक इव गृह्यते, अभिन्नं प्रतीयते तदा तदेव सामान्यमेकबुद्धिवषयो न ततोऽन्यत्किञ्चित् । व्यक्त्यात्मनो हि मूलभूतमेकत्वमात्मभेदहेतुपरित्यागादविरुद्धम् । यद्यपि च प्रकृतिरूपान्वयात्सर्वमेकमेव तत्त्वतः तथापि परिणामवैचित्र्याद्विकाराणामनर्थान्तरभूतानामपि सांव्यवहारिकमनेकत्वमप्यनवगतमिति इव शब्दः । तत्र यदा समस्तभेदपरित्यागः तदा सद्वस्तुमात्रं पदार्थ इति चैकबुद्धिः प्रवर्तते । धर्मतिरस्कारे तु धर्मिमात्रं द्रव्यमिति बुद्धिः । सजातीयगतभेदहेतुपरित्यागे विजातीयभेदारेक्षायां पृथिव्यापस्तेज इत्यादिव्यवहारः । तत्राप्यर्थान्तराद्भेदहेतुपरित्यागे विजातीयभेदापेक्षायां पृथिव्यापस्तेज इत्यादिव्यवहारः । तत्राप्यर्थान्तराद्भेदापेक्षायां स्वसदृशाभेदापेक्षणे गौरश्वो घट इत्यादि भेद इति यथायथमुदाहार्यम् ।। 96 ।।

तदेवं दर्शनद्वयेन भिन्नाकाराया जातिबुद्धेर्विषयमवस्थाप्य जातिपदार्थे प्रत्याख्यानादेकशेषस्य तद्विषये समूहबुद्धेर्विषयमवस्थापयितुमाह--

भेदरूपैरनुस्यूतं यदैकमिव मन्यते ।
समूहावग्रहा बुद्धिर्बहुभ्यो जायते तदा ।। 97 ।।

(137) भेदरूपाण्यपि यत्र संचेत्यन्तेऽभेदरूपं च तत्र समूहमवगृह्णाति परिच्छिनत्ति या बुद्धिः सा प्रवर्तते । `एकमिव' इति । भिन्नेष्वपि एकत्वस्याध्यारोपात् । एवमपि चैकत्वोपसर्जनेभ्यो बहुभ्य एवेयं बुद्धिर्जायते न चु जातिप्रत्ययवदेकस्मादेव । अयमाशयः--यद्यपि ता एव व्यटक्तभेदो व्यक्तयो जातिरिति दर्शनम् तथापि संभवत्येकशेषस्य विषयो भेदप्राधान्येनैकधर्मावेशनिमित्ताभेदोपसर्जनतया तासां प्रतीतेः । अत एव च द्वन्द्वैकशेषयोर्वचनभेदोपपत्तिः । जातिप्रत्ययस्तु सर्वथा अभेदप्राधान्येनैव ।। 97 ।।

इदानीं सदृशबुद्धेर्विषयमाह--

सकृत्प्रवृत्तावेकत्वमावृत्तौ सदृशात्मताम् ।
भिन्नात्मिकानां व्यक्तीनां भेदापोहात्प्रपद्यते ।। 98 ।।

(138) इह भेदहेतूनां त्यागे सामान्यबुद्धिरित्युक्त्वा तेषामपि च परिग्रहे समूहबुद्धिरिति राश्यन्तराभावान्निर्विषया सादृश्यबुद्धिः स्यादित्यशंक्येदमुच्यते--भिन्नात्मिकानां व्यक्तीनां सकृत्प्रवृत्तौ भेदापोलत् अनालीढभेदं तदनुस्यूतं वा एकत्वं जात्यात्मकं समूहात्मकं वा प्रतिपद्यते बुद्धिः । आवृत्तौ तु सदृश्यात्मताम् । भेदहेतुपरित्यागेनाभिन्नात्मिका व्यक्तीरवगृह्य कार्यान्तरविषयतया गृहीतभेदा एव ता गृह्णातीत्यविश्रान्ता सैव बुद्धिः सामान्यं गृह्णाति । गोगवययोस्तु पूर्वं भेदं प्रतिपद्यानन्तरमवयवसन्निवेशायत्तोऽभेदोऽवसीयत इति सादृश्यबुद्धिस्तत्र । एवं च बुद्धिभेदादेव न सादृश्यं सामान्यमुत्युक्तं भवति ।। 98 ।।

तदेवं व्यतिरिक्तजातिदर्शनमव्यतिरिक्तजातिदर्शनं च विस्तरतोऽभिधायेदानीं सौगतानां संबन्धि काल्पनिकं जातिदर्शनमाह--

अनुप्रवृत्तेति यथाभिन्ना बुद्धिः प्रतीयते ।
अर्थो व्यावृत्तरूपोऽपि तथा तत्त्वेन गृह्यते ।। 99 ।।

(139) इहाभिन्नप्रत्ययावसेया जातिरित्युच्यते । न चाभिन्नः प्रत्ययोऽस्ति । न हि य एवैकस्यां व्यक्तौ गौरिति प्रत्ययः स एव द्वितीयस्याम् , अपि त्वन्य एव, प्रत्यर्थनियतत्वाद् बुद्धीनाम् । अतश्च नैव कश्चिद्भिन्नेष्वभिन्नप्रत्ययः, केवलं भिन्नापि सती बुद्धिरनुंप्रवृत्ता अनुगता अभिन्ना प्रतीयते । न च तत्र बुद्दितत्त्वव्यतिरेकेणान्यत्सामान्यं गोत्वादिज्ञानत्वाद्यस्ति । तस्याप्यभिन्नप्रत्ययस्य प्रतिबुद्धि भेदात् । तत्राप्यपरसामान्यकल्पनायामनवस्थापातात् । न च बुद्धिष्वपरसामान्यस्यासाधारणः कश्चिद्वाचकोऽस्तीति किं तत्सामान्यं नाम, यतश्चानादिकालीनभेदावग्रहसामर्थ्यप्रतिघातनिमित्तविभ्रमवशाद्यथा बुद्धीनामभेदावसायो भिन्नानामपि वस्तुतः, तथार्थानामपि व्यक्तिलक्षणानां स्वरूपपररूपाभ्यां व्यावृत्तस्वभावानां तत्त्वेन अभेदेन सामान्यावग्रहेणावसायो भविष्यतीति भेद एव परमार्थोऽभेदावसायो मिथ्येति सौगताः ।। 99 ।।

किमनादिकालीनविभ्रमवशादेवायम् उत बहिरस्याभेदावसायस्य किंचन निमित्तमस्तीत्याह--

सरूपाणां च सर्वेषां न भेदोपनिपातिनः ।
विद्यन्ते वाचकाः शब्दा नापि भेदोऽवधार्यते ।। 100 ।।

(140) प्रख्योपाख्यात्मको द्विविधो व्यवहारः । तत्र समानं रूपमेषां वास्तवस्य भेदस्यानवधारणादर्वाग्दर्शनानां वस्तूनां प्रतिभासते । न हि तत्त्वतो वास्तवं सारूप्यमस्ति, सौगतनये तस्य निराकृतत्वादिति दुरवधारभेदत्वेन यत्सरूपत्वम् , तदेव निर्दिश्यत इति सादृश्यनिबन्धनोऽभेदावसायलक्षणः प्रख्यात्मको व्यवहारः ।
असाधारणभावरूपनिवेशसंविज्ञानपदाभावाच्चोपाख्यात्मकोऽप्यभेदेनैव व्यवहारः । उपाख्याया वाचकस्य शब्दस्य सांकेतिकत्वात्स्वलक्षणे वृत्त्यनुपपत्तेः ।

"शब्दाः साकेतिकं प्राहुः व्यवहाराय संस्मृताः ।
तदा स्वलक्षणं नास्ति संकेतस्तेन तत्र नः ।।"

इत्यादिना वेदितत्वात् । यद्यपि चावधारणाभावादेव वाचकाभावोऽवगतः, अवधारणपूर्वकत्वाद्वाचकानाम्, तथापि यत्रापि गवादिष्ववधार्यते भेदः तत्रापि तस्य वाचका न सन्ति । स्वलक्षणस्य शब्देनाभिधातुमशक्यत्वात् अपि त्वभेदाध्यवसायानुविधायिन एव ते तत्रापीति दर्शयितुं भेदेन वाचकाभाव उक्तः । इत्थं च विशेषाणामविवेचनादप्यनुगमाभिमानो वाचकाभावाच्चाभिन्ना शब्दप्रवृत्तिर्न तु बहिर्वस्तुभूतं सामान्यं नाम किञ्चनाक्ष निमित्तमित्युक्तं भवति ।। 100 ।।

सर्वेषामिति व्याप्तिर्ह्यत्रोक्ता, तामेवोपपादयितुमाह--

ज्ञानशब्दार्थविषया विशेषा ये व्यवस्थिताः ।
तेषां दुरवधारत्वाज्ज्ञानाद्येकत्वदर्शनम् ।। 101 ।।

(141) ज्ञानानां तावद्विषयभेदाद्भेदो न्याय्योऽप्यर्वाग्दर्शिनो गोर्गौरित्यभेदावसायादशक्यपरिच्छेद इत्येकत्वमसदध्यारोपितं तत्र पश्यन्ति । एवं च शब्दानामनुनासिकतादीनां धर्माणां भेदाद्वक्तृभेदाच्च भेदेऽप्यभेदेनावसायः स एवायं गोशब्द इति । क्रमवतामवस्थायिनां शब्दानां न किञ्चित्सामान्यमस्ति । अथाभेदेनावसीयन्ते सूक्ष्माणां विशेषाणां दुरवधारत्वात्, अर्थानामपि

खण्डमुण्डादिः स्फुट एव भेदो नादृतोऽर्वाग्दर्शनैः विजातीयव्यावृत्त्या अन्वयिरूपोल्लेखनात् । तथा च
मणिमुक्ताप्रवालादीनामभियुक्तप्रणिधानगम्यो विशेषो न सर्वैर्विच्यते ।। 101 ।।
अवदातदर्शनास्तु यथातत्त्वं विवेकिन एवेति भेदवादिनयः । जातिवादिनस्तु मन्यन्ते--
ज्ञानेष्वपि यथार्थेषु तथा सर्वेषु जातयः ।
संसर्गदर्शने सन्ति ताश्चार्थस्य प्रसाधिकाः ।। 102 ।।

(142) अनपह्नवनीयोऽयमभिन्नावसायः सर्वत्र जातिसद्भावावेदक इति ज्ञानानामपि सामान्यविशेषाः सन्तु कानुपपत्तिरिति वस्तूनां भेदाभेदादिरूपमर्थान्तरसंसर्गनिमित्तं मन्यमानाः प्राहुः । ता एव ज्ञानजातयो अर्थस्य प्रसाधिकाः बाह्यानामर्थजातीनां निश्चायिकाः । बुद्धेरन्वितावभाससिद्धौ व्यक्तीनामपि सामान्यावधारणात् । अर्थस्यात्मीयस्य वा सामान्यकार्यस्यानुवृत्त्यादेः प्रसाधिकाः । यत्र तत्र च सत्यप्यवान्तरविशेषेऽभिन्नः प्रत्ययोऽस्ति तत्र तत्र प्रमाणसिद्धानां सामान्यविशेषाणामङ्गीकरणमानन्त्येऽपि न दोषाय । असाधारमसङ्केताभावेऽपि च जात्युत्पलादिगन्धादीनामिव सत्त्वमस्त्येव ।। 102 ।।

संसर्गदर्शन एव प्रकारान्तरमाह--
ज्ञेयस्थमेव सामान्यं ज्ञानानामुपकारकम् ।
न जातु ज्ञेयवज्ज्ञानं पररूपेण रूप्यते ।। 103 ।।

(143) यथा ज्ञेयं व्यतिरिक्तसामान्यरूपेण रूप्यते क्रियते नैवं ज्ञानं संविदात्मसमवेतेन व्यतिरिक्तसामान्यरूपेण रूप्यते । ज्ञेयधर्मः किलायं यत् पररूपेण रूपणम् । ज्ञानं तु स्वतन्त्रं ज्ञेयमेव न भवति । ज्ञेयनिष्ठतया हि ज्ञानानां ज्ञेयस्थस्य सामान्यस्याभेदेन तदभेदावसायः प्रत्यर्थनियतत्वेऽप्युपपद्यते । बाह्यपरवशत्वेनास्वाधीनत्वाज् ज्ञानानां स्वत एव वैलक्षम्यानुपपत्तेः बहिरभिन्नेन निमित्तेन तत्र भाव्यम् । तद्यथा घटो घट इति घटाकारे बाह्यं निमित्तं तथा भेदेऽपि तद्गतं सामान्यमिति युक्तम् ।। 103 ।।

कथं पुनर्ज्ञानं ज्ञेयं न भवतीति पररूपेण न रूप्यत इत्याह--
यथा ज्योतिः प्रकाशेन नान्येनाभिप्रकाश्यते।
ज्ञानाकारस्तथान्येन न ज्ञानेनोपगृह्यते ।। 104 ।।

(144) यथा घटादीनां दीपः प्रकाशकः स्वप्रकाशे दीपान्तरं नापेक्षते तथार्थस्य प्रकाशकं ज्ञानमात्मप्रकाशनाय प्रकाशान्तरानपेक्षमिति स्वप्रकाशकं सिद्धम् । जडवैलक्षण्यं हि प्रकाशकत्वमिति तस्यापि प्रकाश्यत्वे जडतापत्तिः । अर्थप्रकाशकाले च प्रकाशकस्याप्रकाशेऽर्थसंवेदनमेव न स्यात् । प्रकाशासञ्चेतने तल्लग्नार्थसञ्चेतनासिद्धेः । उत्तरकालं तु वेदनं क्वोपयोगि । उत्पन्नायां च प्रकटतायां आत्मसमवेतस्य तदानीं ज्ञानस्यासञ्चेतनान्मम प्रकटितोऽर्थ इत्यात्मगामि संवेदनं न स्यात् । तस्याज्ज्ञानान्तरेण स्वप्रकाशकं ज्ञानं न गृह्यते परप्रकाश्यत्वे प्रकाशकत्वाभावादिति तदाकारस्य परेण रूपेणभावाज्ज्ञेयस्थमेवाभिन्नं सामान्यमस्याभेदनिमित्तम् । तद्वशादस्य ग्राह्याकारस्य ज्ञानान्तरेणाभेदग्रहणात् । स्वसमवेतसामान्यवशेन त्वभेदप्रतिभासे बहिः सामान्यपरिकल्पो निर्निबन्धन एव स्यात् । अन्यथैवाभेदप्रतिभासस्योपपत्तेः । अर्थानान्तु व्यतिरिक्तत्वादभिन्नं सामान्यमुपपद्यते । ज्ञानानां तु सामान्याकारो न व्यतिरिक्त इति नाभिन्न उपपद्यते । प्रत्यर्थनियतत्वेन तेषां भेदात्तदभिन्नस्य तस्यापि तथात्वोपपत्तेरिति नार्थैः साम्यमस्ति । बुद्ध्यःाकाराणामाकारसाम्यादेव च ज्ञानानामभेदावसायसिद्धेर्न संवेदनभागेऽपि सामान्ययोग इति साकाराः स्वप्रकाशाः निःसामान्या बुद्धयः सिद्धाः । यद्यपि च वैशेषिका ज्ञेयस्थमेव सामान्यं ज्ञानानामुपकारकमिच्छन्तो न साकारं नापि स्वप्रकाशं विज्ञानमिच्छन्ति, तथापि न वयं दर्शनान्तरप्रक्रियां ब्रूमः । अपि तु यत्प्रमाणोपपन्नमितीदमत्र दर्शनमुपक्षिप्तम् ।। 104 ।।

ननु च यथा घटोऽयमिति ज्ञाने घटोऽवसीयते तथा घटज्ञानमेतदिति ज्ञाने घटज्ञानम् । को ह्यत्र विशेषः ? यदि तु विषयसंवेदनरूपा बुद्धिर्नानुभूयेत शब्देनापि तथा नाभिधीयेत, अनुभवपूर्वकत्वादभिधानस्य । न चात्मना आत्मानमनुभवति बुद्धिः ,स्वात्मनि व्यापारविरोधात् । बोधरूपत्वात्तु स्वयमज्ञातैवार्थमवभासयतु । एतावानस्य बाह्याद्विशेषोऽस्तु । तद्बुभुत्सायां तु

बुद्धन्तरमेवापेक्ष्यम् । ज्ञानज्ञेयसिद्धिमात्रनिष्ठत्वाच्च व्यवहारस्य प्रत्ययान्तरानपेक्षणाद् बुद्धिमालापि नानुषज्यत इत्याह--
घटज्ञानमिति ज्ञानं घटज्ञानविलक्षणम् ।
घट इत्यापि यज्ज्ञानं विषयोपनिपाति तत् ।। 105 ।।
(145) घटज्ञानमिति ज्ञानं घटाद्याकारं ज्ञानं यदा ज्ञानान्तरेण परामृश्यते एवं ममात्रानुभवो भूत िति प्रत्ययविषयं यत्परामर्शज्ञानं तद्घटज्ञानाद्भिन्नलक्षमं साक्षाद्विषयोणाजनितत्वात् । अनुकार्यप्रत्यया एव हि विषयेण जन्यन्ते नान्ये ज्ञानालम्बनाः,व्यवधानात्; सारूप्यबलेन च ग्राह्यग्राह्कभावेन वैधर्म्येण न च घटज्ञानं ज्ञानान्तरे प्रतिभासते । अतो न तद् गृह्यते । अथोच्यते--सरूपमेव तज्ज्ञानं घट इत्येवमनुसन्धानादित्याह--घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत् । न तु ज्ञाने उपनिपतति । अतो न बुद्धिर्बुद्धिमालम्बनते, स्वयमेव तु प्रकाशत इत्यर्थः । अन्ये व्याचक्षते, घटज्ञानाद् बाह्यविषयात् घटज्ञानमिति एवं ज्ञानं भिन्नं न विषयप्रविष्टं स्वात्मव्यवस्थितं ज्ञानं सञ्चेत्यते यस्माद्घट इत्येवमाकारं यद्विच्छिन्नं ग्राह्यप्रसृतं तदपि विषयमनुपतति ग्राह्यपरवशम् । विषयाप्रकाशने ज्ञानास्तिताया एवानिबन्धनत्वात् । एवं च बोधत्वाविशेषात् यद्यपि ज्ञानत्रानमिति मतं तदपि बाह्यविषयमेवेत्युक्तं भवति । अन्ये तु व्याचक्षते--घयज्ञानमिति ज्ञानं विषयो यस्य तद् घटज्ञानविलक्षणम्, एवंस्वरूपमनाकारम् । न हि संविदाकारस्तज्ज्ञानाभिमतो प्रतिबिम्बीभवति । सारूप्यवशेन ग्राह्यग्राहकभावः, अन्यथा ज्ञानत्वाविशेषादिदमस्य संवेदनमिति प्रतिनियमो न स्यात् । घट इति तु यदेतद्बाह्यविषयं ज्ञानं तद्विषयोपनिपाति विषयाकारमुपादत्ते । अथ वा-घट ज्ञानमिति ज्ञानं घटज्ञानविलक्षणम् । किं तद्वैलक्षम्यमित्याह-घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत् । निराकारमपि तद्विलषयमनुपतति परिच्छिनत्ति निरूपयति-एवंरूपोऽयमर्थ इति । घटज्ञानमिति तु ज्ञानं न ज्ञानरूपानुपाति, यतो घटज्ञानगतं विषयं निरूप्य ज्ञानरूपं किमपि तदित्येतावद्यदि परं निरूपयितुं शक्नोति, न तु सा तदीया बोधरूपता तस्य प्रतिभासते परसंवेदन इव । परेण हि घटज्ञानमस्योत्पन्नमिति कयाचिद्युक्त्या ज्ञानं परिच्छिद्यते, न तु स्ववत्परस्य प्रतिभासते इति ततो विलक्षणं न तस्य परिच्छेदकम् । उपलम्भात्मकत्वात्स्वयं प्रकाशत इति स्वसंवेदनं ज्ञानमुच्यते । न त्वात्मनामर्थमिव प्रकाशयतीति न स्वात्मन्यस्य कश्चिव्द्यापारः ।। 105 ।।
ननु ज्ञानस्य ग्राह्याकारो न व्यतिरिक्तः, स च घटज्ञानमिति ज्ञानेन संवद्येत इति बुद्धिरेव संवेदिता भवतीत्याशङ्क्याह--
यतो विषयरूपेण ज्ञानरूपं न गृह्यते ।
अर्थरूपविविक्तं च स्वरूपं नावधार्यते ।। 106 ।।
(146) निराकारवादेऽप्ययं परिहारो लगति, यतस्तत्रापि घटज्ञानमेतदिति ग्राह्यस्वभावेन ज्ञानं ज्ञानानत्रेणोपलक्ष्यति, न तद्रहितमात्मतत्त्वं तस्यावधारयति । न च ग्राह्याकारो ज्ञानस्वरूपम्, औपाधिकत्वात् । यथा स्फटिकस्य नीलादि । न च ग्राह्याकारविविक्तं ग्राहकरूपं ज्ञानान्तरेणोपलक्ष्यते शुद्धबुद्ध्यनुकारेण बुद्ध्यन्तरानुपपत्तेः । एवं च विषयाप्रकाशने ज्ञानत्वायोगात् ज्ञानज्ञानाभिमतमपि विषयनिष्ठमेव । तथा चोपसर्जनेन विषय एव तेन विशिष्टोऽवस्थाप्यते ज्ञातोऽयमर्थ इति । नीलज्ञानमित्येतदपि नीलनिष्ठतया विषयप्रभवं ज्ञानं परामृश्यते । एवं च कृत्वा संविदाकारस्य ज्ञानान्तरेणाग्रहणान्न व्यतिरिक्तसामान्यनिमित्तम्, तेन तस्य ग्राह्याकारस्याविलक्षणस्य जनेन तथैव बुद्ध्यन्तरेण ग्रहणादिति न तत्र सामान्यान्तरमुपयुज्यते । नापीतरेतराश्रायदोषः । ज्ञेयसामान्यस्याभिन्नज्ञानजनकत्वेनाभिन्नज्ञानस्य च ज्ञेयताप्रतिपादकत्वेन व्यापारभेदात् । तेनैतदचोद्यम् । यथा विनैव सामान्यमभेदावसायो बुद्धीनाम् एवमर्थानामपि भविष्यतीति बुद्धीनामरि सामान्यवशेनैवोक्तप्रकारेणाभेदावसायात् इति । ननु यदि ज्ञानरूपमर्थरूपविविक्तं नावधार्यते स्वतोऽप्यस्य सिद्धिर्न स्यात् । सत्यम् । सर्वदैव ग्राह्याकारः सहभाव्यनुभूयतेऽस्य, किन्तु तत्प
ृष्ठभाविनो ह्लादनीयप्रकामा अहङ्कारास्पदविच्छिन्नग्राह्याकारविधर्माण उत्तररूपा अहङ्कारास्पदतया संचेत्यन्त इति स्वतस्तद्विविक्तरूपावधारणमस्ति बुद्धीनाम् । ज्ञानान्तरेण तु ह्लादादयो गृह्यमाणा अपि तथा न संवेद्यन्त इति अनुभवसिद्धमेतदनपह्नवनीयम् इत्यलमतिविस्तरेण ।
तदेवं प्रमाणपरिशुद्धा जातिः शब्देनाभिधीयमाना दृष्टादृष्टविषयव्यवहारसाधनसमर्थेति जातिपदार्थसिद्धिः ।। 106 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
जातिसमुद्देशः
समाप्तः ।।

Gunasamudesha

अथ गुणसमुद्देशः ।

(1) इदानीं गुणस्य शास्त्रीयलिङ्गानुमितं लक्षणमाह--

संसर्गि भेदकं यद् यत् सव्यापारं प्रतीयते ।

गुणत्वं परतन्त्रत्वात्तस्य शास्त्र उदाहृतम् ।। 1 ।।

संसर्गि आधारेण संसृष्टम्, रूपसम्भेदेन वर्तमानम्, न संबन्धामात्रेण । अत एवाश्रयान्तरावच्छेदमाधारस्य करोति शुक्लोऽयं (न) नील इति । एवं गौरयं नाश्य इत्यत्राश्रयान्तराद्यवच्छदे गोत्वमपि गुणो भवति । तथा यद्यद् इति वीप्सापदेन सर्वस्यैवंप्रकारस्य सामान्यादेरपि गुणत्वमिति परिभाषां कथयन्, नेदं वस्तुरूपावस्थितमिति सूचयति । अनेन चावच्छेद्याद् द्रव्यादवच्छेदकत्वेन गुणस्य विशेषमाह । सव्यापारम्, अवच्छेदकरूपेण प्रतीयमानं गुणव्यपदेश्यं न रूपान्तरेणेत्यर्थः । यदेवंविधं तस्य गुणत्वमिति संबन्धः ।

(2) ननु किमयं परिभाषैव गुण इति, अथ निबन्धनमत्रास्तीत्याह `परतन्त्रत्वात्' इति । लोके हि परतन्त्रो गुण इत्याच्यते इति प्रतीतिरियं न परिभाषामात्रमित्यर्थः । तथा च लौकिकस्यैवायं लक्षणस्य वैशेषिकप्रसिद्ध्यपाकरणायानुवाद इत्युक्तं भवति । इत्थं च वीप्सा सफला । `शास्त्र उदाहृतम्' इति । व्याकरणेऽन्वाख्यानवाक्याङ्गं लौकिक एव गुणो गृहीत इत्यर्थः । तथाहि समर्थवार्तिके ।

"समानाधिकरणेषूपसंख्यानमसमर्थत्वात्"(Va on P 2.1.1.)

"द्रव्यं पदार्थ इति चेत् ।"(Va. on P.2.1.1.)

इति वीरपुरुषो द्रव्ययोरत्यन्ताभेदात् सामर्थ्याभावे द्रव्यपादार्थपक्षे समासाभावे चोदिते ।

अथ हि गुणः पदार्थो भवति (तदा) सामर्थ्यम् । अन्यो

हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम् । (M.Bha.on Va.above)

इतदि जातेरपि पारतन्त्र्यात् द्रव्ये समवायाद् गुणत्वमुक्तम् । तथा च गुणभेदात् प्रतीयमानं द्रव्यैकत्वाश्रयं सामर्थ्यमिति सिद्धः समासः । तथा

"यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः ।"(Va. on P.5.1.119)

इति भदेको गुणो भेद्यं द्रव्यमित्येतदेव लक्षणमनुसृतम् । तथा हि-विशेष्यमात्रवचनाद् विशेषणमात्रवचने गुणे भावप्रत्ययः ।

(3) गोशब्दस्य जात्यवच्छिन्नद्रव्यवाचित्वे जातौ गोत्वमिति जातिमात्रवचनत्वे तु शब्दस्वरूपेऽव्यभिचारिणि प्रवृत्तिनिमित्ते, तस्य च वाच्यत्वं भिन्नत्वं च पूर्वमेवोपपादितम् । स्वरूपेण हि परमुपरञ्जयद्विशेषणम् । यथा जात्यादिगुणः । तथा स्वरूपोवेशेनार्थं प्रत्याययतः शब्दस्य भवति स्वरूपमुपरञ्जकत्वाद्गुणः प्रवृत्तिनिमित्तमर्थे तद्बूपाध्यासेन चार्थप्रतीतिः । अभिधाव्यापाराविष्टस्यैव न वाच्यत्वमपि तु साधारणस्य प्रयोगगतस्य । यथा रक्ते गुणे तत्त्वमित्यादिना च संबन्ध उपपादितः । शुक्लादीनां गुणावच्छिन्नद्रव्यवाचित्वे शुक्लत्वमिति गुणे तत्त्वमित्यादिना च संबन्ध उपपादितः । शुक्लादीनां गुणवच्छिन्नद्रव्यवाचित्वे शुक्लत्वमिति गुणे भावप्रत्ययः । गुणाभिधायित्वे जातौ तद्वाचित्वे पूर्ववत् स्वरूपे । एवं चाद्यायां शब्दप्रवृत्तौ डित्थादीनामपि स्वरूप एव भावप्रत्ययः । स्वरूपाध्यासेन संज्ञायाः संज्ञिप्रत्यायनात् तदेव तत्र प्रवृत्तिनिमित्तम् । तदेतदस्य डित्थत्वमिति तु क्रियागुणाध्यासादन्यत्र प्रवृत्तौ डित्थत्वसहचरुतयोः क्रियागुणयोर्भावप्रत्ययः । तथा क्रियागुणयोरभेदाध्यासाभिप्रायं

`डित्थत्वं त एतत्' (M.Bha. on P.5.1.119)

इति भाष्यम् । यद्वोत्पत्तिप्रभृत्याविनाशात् पिण्डस्यावस्थान्तरेऽपि प्रत्यभिज्ञाप्रत्ययनिमित्तं जातिरेव भावप्रत्ययवाच्या आद्यायां शब्दप्रवृत्तौ । राजपुरुषत्वं पाचकत्वमौपगवत्वमित्यादौ तु संबन्धो यथायथं स्वरूपेणोपरञ्जकं प्रवृत्तिनिमित्तं भावप्रत्ययाभिधेयम् । विशिष्टसंबन्धावच्छिन्नो हि संबन्धी प्रतीयतेऽत्रेति संबन्धस्यैनोपरञ्जकत्वाद् गुणत्वे भावप्रत्ययवाच्यता । न हि राजादिसंबन्ध्यवच्छिन्नः पुरुषादिः प्रतीयते अपि तु तत्संबन्धावच्छिन्नः । भेदस्य चोद्भूतत्वाद्भेदाधिष्ठानः संबन्ध एव प्रवृत्तिनिमित्तमभिहितोऽन्तर्भूतः ।

(4) यत्र तु संबन्ध्यनुरक्ता प्रतीतिः भेदस्य च तिरोधानं तत्र संबन्ध्येव जात्यादि प्रवृत्तिनिमित्तं गुणो गोत्वं शुक्लत्वमित्यादौ भावप्रत्ययवाच्यः । अत्र हि न समवायोपरक्ता प्रतीतिः अपि तु जातिगुणोच्छुरिता द्रव्ये समवायशात्तिरोहितभेदे । संबन्धस्तु जातिगुणयोराधारावच्छेदकः । हस्तित्वमित्यादौ रूढिविषये जातिरेव वाच्या । एवं कुम्भकारत्वमित्यादौ । अत्र हि शब्दव्युत्पत्तिनिबन्धनं संबन्धो जातिरेव शब्दवाच्या । सत्तेत्यत्रापि सत्तासतोः संबन्धस्याव्यभिचारादनवच्छेदकत्वे जातिरेव भावप्रत्ययवाच्या । तदुक्तम्

"समासकृत्तद्धितेषु संबन्धाभिदानमन्यत्र रूढयभिन्नयोगाव्यभिचरितसंबन्धेभ्यः" इति । इत्थमत्र विशेषणं स्वरूपेण परमुपरञ्जयत्सूत्रे भावशब्देन प्रतिपादितम्, भवत्यस्मात्तेनाकारेण द्रव्यमिति भावः । तथा हि गोत्वाद्गवाकारेण द्रव्यं प्रतीयते, शुक्लादिगुणात्तदाकारेणेति, परोपाधिमन्तरेणार्थानामव्यवहार्यत्वेनासत्कल्पत्वात् । ततश्च विशेषणेनाभेदमापादितं शब्दोऽभिधत्त इति शब्दप्रवृत्तिकारणमपि भवत्यर्थरूपसंबन्धि । तेन णेनाभेदमापादितं शब्दोऽभिधत्त इति शब्दप्रवृत्तिकारणमपि भवत्यर्थरूपसंबन्धि । तेन

`यस्य गुणस्य भावात्'(Va. on P. 5.1.119)

इत्यत्र पक्षेऽर्थवाचिनी प्रकृतिः, गोर्भावो गोत्वमिति ।

"यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावः"

(Va.onP.5.1.119)

इत्यत्र तु पक्षे शब्दवाचिनी प्रकृतिः, गोशब्दस्य भावो गोत्वमिति ।

तथा हि सर्वे भावाः सर्वे शब्दाः स्वेन भावेन भवन्त्यस्मादिति व्युत्पत्त्या प्रवृत्तिनिमित्तलक्षणेनार्थेन भवन्ति । अनेकार्थत्वाद्धातूनां भवतेः प्रयोगवचनत्वात्प्रयुज्यन्त इति । स प्रवृत्तिनिमित्तलक्षणो भावस्तेषां शब्दानां प्रत्ययवाच्य इति तच्छब्दवाच्या शब्दात्मिका प्रकृतिरत्र पक्षे भवति । तदेवं गुणलक्षणमत्र शास्त्र उदाह-तम् ।

(5) यत्र त्वस्य गुणस्य न ग्रहणं शास्त्रे तत्र युक्तिर्वक्तव्या । तथा हि ।

"वोतो गुणवचनात्" (P.4.1. 44)

इत्यत्र नायं गुणः, प्रातिपदिकाधिकारात् । स्त्रीत्वस्य च द्रव्यधर्मत्वाद् द्रव्याभिधाय्येव किंचित् प्रातिपदिकं गुणवचनग्रहणाद् गृह्यते । गुणमुक्तवान् गुणवचन इति पट्वादिभ्यो गुणोपसर्जनद्रव्यवचनेभ्यः प्रत्ययः । गुणश्चात्रोपसर्जनभूतो न संसर्ग्यादिलक्षणो जातिशब्देभ्योऽपि प्रसंङ्गादिति परिभाषितोऽसौ गृह्यते

`सत्वे निविशतेऽपैति ।'(M.Bh. on P.4.1.44)

इत्यादिः । नन्वेवं वैशेषिकप्रणीतस्यैव गुणस्य ग्रहणं स्यादिति पट्वी मृद्वीत्यादावीकारो न स्यात् । नैष दोषः । पाटवादीनामप्यस्य लक्षणस्य सम्भवात्, एतदर्थमेव हीयं परिभाषाऽऽरब्धा । अन्यथा प्रतीतिबलादेव रूपादीनां गुणत्वमितीयमनर्थिका स्यात् ।

"गिणवचनब्राह्मणादिभ्यः" (P.5.1.124)

इत्यत्रापि पारिभाषिक एव गुणो गृह्यते । तथा हि वाक्यकारेण

अर्थवत् प्रातिपदिकम् । (Va. on P.1.4.1)

गुणवचनं च । (Va. on P.1.41)

इति प्रातिपदिकमात्रस्य गुणवचनसंज्ञारब्धा । यद्येवं प्रातिपदिकाधिकारादेव सिद्धे किमर्थं गुणवचनम् । ब्राह्मणादिग्रहणं चानर्थकम् । उच्यते । प्रातिपदिकाधिकारादप्रसक्ते गुणवचनसंज्ञानामेव यथा स्यादिति विधानम् । गुणवचनसंज्ञाया हि बाधिकाः

"समासकृत्तद्धिताऽव्ययसर्वनामाऽसर्वलिङ्गा जातिः ।"

(Va.on P.1.4.1)

इति च समासादिसंज्ञा समारब्धाः ।

(6) तथा च समासाविवक्तं प्रातिपदिकं ष्यञमुत्पादयति । अत एव च ब्राह्मणादिग्रहणमप्युपपद्यते । ब्राह्मणशब्दस्य तद्धितान्तत्वाद् गुणवचनसंज्ञाभावात् । माणवशब्दोऽपि तद्धितान्तो मनोरपत्यमिति । तथा वाडवशब्दोऽपि

`वडवाया वृषे वाच्ये'(Va. on P.4.1.120)

इति ।

`अर्हतो नुम् च' (Va. on P.5.1.124)

इति तु कृत्संज्ञकः । एवमन्यदपि ब्राह्मणादिगणे गुणवचनसंज्ञाबाधकं योज्यमिति । तत्रापि ष्यञ् यथा स्यादिति ब्राह्मणादिग्रहणम् । ये च ष्यञो बाधकाः प्रत्ययास्तानपि बाधित्वा ष्यञ् यथा स्यादित्यपि ब्राह्मणादिग्रहणमुपपद्यते । तथा हि ब्राह्मणशब्दस्याव्युत्पत्तिपक्षे

`प्राणभृज्जाति...' (P.5.1.129)

इत्यञ् प्राप्तः । माणववाडवयोर्गोत्रत्वात्

`गोत्रचरणात्....' (P.4 3.126)

इति वुञ् प्राप्नोतीत्येवमन्यत्राप्यूह्यम् । येषां तु न तद्धितादिसंज्ञा नापि कश्चिदपवादः प्राप्नोति तेषामत्र प्रपञ्चार्थः पाठः ।

(7) सूत्रकारमते तु गुणमुक्तवान् गुणवचन इति गुणोपसर्जनद्रव्यवचनो वचनग्रहणादत्र गृह्यते ।

`तृतीया तत्कृतार्थेन गुणवचनेन'(झ.2.1.30)

इत्यत्रापि खण्डादिस्तृतीयान्तार्थकृतः कश्चिदेव गुणोपसर्जनो द्रव्यविशेषो गृह्यते । खण्डनगुणयोगाद्धि द्रव्यं खण्डशब्दवाच्यम् ।

`संख्याया गुणस्य निमाने...'(P.5.2.47)

इत्यत्र समभागो गुणो ग्राह्यः । न यथोक्तलक्षणः, नापि

`सत्त्वे निविशते...' (M. Bha. on P.4.1.44)

इत्यादिलक्षणः । द्विमयमुदश्विदिति द्वौ समौ भागौ यवानां निमानमेकस्योदश्वितः क्रीयमाणस्येत्यर्थः । सापेक्षत्वेऽपि गमकत्वाद् वृत्तिः । दृष्टश्च समावयववचनो गुणशब्दः, यथा त्रिगुणा रज्जुरिति ।

`गुणवचनेभ्यो मतुपो लुक्'(Va.on P.5.2.94)

इत्यत्र येऽभिन्नरूपा गुणमभिधाय तद्वति वर्तन्ते शब्दशक्तिस्वाभाव्यात् ते गृह्यन्ते शुक्लादयः । तथा च

`अव्यतिरेकात् सिद्धम्' (Va. on P.5.2.94)

इति प्रत्याख्यानमभेदोपचारयोग्यताश्रयेण । तेन रूपादयस्तदयोग्या निवर्तिता भवन्तीति मत्वर्थीयान्ता एव तद्वति ते साधवो रूपवान् घट इत्यादि ।

(8) `प्रकारे गुणवचनस्य'(P.8.1.12)

इत्यत्र सर्वस्यैव पदस्य द्विर्वचनमिति स्वतन्त्रं गुणोपसर्जनं द्रव्यं पट्वादि गृह्यते ।

`पूरणगुण....'(P.2.2.11)

इत्यत्र गुणशब्देनार्थग्रहणाभिसंबन्धादेतेषां तावत् प्रत्यायनं नास्ति । आश्रितमात्रस्यापि धर्मस्य संसर्ग्यादिलक्षणस्य परिग्रहे

द्रव्यसामर्थ्याद्यसिद्धिः । तस्मात् `सत्त्वे निविशते....'(M.Bha. on P.4.1.44)

इत्यादिलक्षणो गुणो गृह्यते । स च वैशेषिकशास्त्रप्रसिद्धः । तथा हि--पार्थिवानां रूपादीनामग्निसंयोगादुपजनापायौ द्रव्ये स्तः । कालाकाशात्मसु परममगत्त्वादीनां चाक्रियाजन्यत्वमपीति व्याप्यते तेन लक्षणेन गुणपदार्थः । तथा च रूपादिभिरपि प्रतिषेधप्राप्तौ

"तत्स्थेश्च गुणैः " (Va on P.2.2.8)

माणार्थगतत्वेनासम्भवाद्युक्तं यत्प्रतीयमानक्रियागुणनिमित्तत्त्वम् । समासस्त्वीषत्पिङ्गल इत्यादौ सावकाश इति कथमत्र प्रसजेत् । यदपि भाष्यम्--

`आकृतेतिह्युच्यमाने...इह न स्यात् समासः ईषत्कडारः इति'

(M. Bh. on P.2.2.7)

तदपि कथम् । यावता नैवात्र क्रियाकारकसंबन्धः प्रतीयत इत्यव्युत्पन्न एवायम् । केवलं स्वरर्णानुपूर्वीज्ञापनाय

`गडेः कड च'

इत्येवमसत्येव व्यत्पत्तिराश्रिता । तस्मात्सूत्रार्थदर्शनपरत्वेनेवनैतद् भाष्यं व्याख्येयम् । गुणवचनत्वादत्र समास इति ।

`अजादी गुणवचादेव' (P.5.3.58)

इत्यत्र

`सत्त्वे निविशते'

इत्येवंलक्षणो गुणो गृह्यते न तु संसर्ग्यादिलक्षणः । एवं हि सर्वस्य प्रातिपदिकस्योपाधिविशिष्टार्थाभिधायकत्वात् प्रातिपदिकमात्रात् प्रत्यये गुणवचनग्रहणमनर्थकं स्यात् ।

(11) `नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः' (P.6.2.155) इत्यत्र संसर्ग्यादिरूप एव गुण आश्रीयते । तथा हि--नञ उत्तराणि सम्पाद्यर्हाद्यर्थतद्धितप्रत्ययान्तानि गुणप्रतिषेधेऽन्तोदात्तानि भवन्तीति सूत्रार्थः । अत्र प्रतिषेध भाजश्चत्वारः--प्रकृत्यर्थः, प्रत्ययार्थः, तदुपाधिः , संबन्धो वाक्यार्थरूप इति । तत्र गुणप्रतिषेध इति वचनादकार्णवेष्टकं मुखमित्यत्र न कर्णवेष्टकादन्यदाश्रीयते, नापि तदभावः । किं तर्हि। कर्णवेष्टकाभ्यां न सम्पद्यते मुखमिति यासो मुखस्य संम्पद्यमानस्याच्छेदिका सम्पत्तिरुपसर्जनमुपाधिभूता सा प्रतिषिध्यते । तदा च प्रकृत्या कर्ण वेष्टकशब्देन नञोऽसंबन्धादसमर्थसमासोऽस्मादेव ज्ञापकादवसेयः । सत्यपि च प्रतिषेध आद्यविधिपदोपात्तार्थनिबन्धनत्वात्तद्धितो भवत्येव । उत्तरकालं तु पदान्तरेण नञ प्रतिषेधो बहिरङ्गो न बाधकः शब्दसंस्कारस्यान्तरङ्गस्य । तथा च ग्रामं न गच्छतीत्यादो क्रियाप्रतिषेधेऽपि कर्मादौ द्वितीयादयो भवन्त्येव । वाक्यार्थस्य कर्णवेष्टकाभ्यां सम्पद्यते मुखमित्येवंरूपस्य प्रतिषेधो नञा क्रियते इत्यन्ये । वाक्यार्थश्च सामान्ये वर्तमानानां पदानां विशेषेऽवस्थापकः संबन्धः । स च पदार्थावच्छेदकत्वादुपसर्जनं गुण इत्युच्यते । संबन्धे च निर्वर्तमाने प्रकृतिप्रत्ययार्थयोरपि संबन्धिनोॠ निवृत्तिप्रतीतिः । अत्रापि पक्षे प्रकृत्यर्थासंबन्धे नञोऽसमर्थसमासोऽस्मादेव ज्ञापकाद्विज्ञेयः । असामर्थ्यं च प्रकृतेः प्रत्ययार्थसापेक्षतया । सापेक्षस्यासामर्थ्यात् । प्रत्ययार्थसंबन्धे तु न दोषः । प्रधानं हि तदा प्रत्ययार्थः । प्रधानस्य सापेक्षस्यापि भवत्येव वृत्तिः ।

(12) अन्ये त्वाहुः । प्रकृत्यर्थोऽत्र प्रत्ययार्थं प्रत्युपसर्जनत्वाद् गुण इति भाष्यकारमतमुन्नीयते । तथा हि--

`न नञ्पूर्वात्तत्पुरुषात्....' (P.5.1.121)

इत्यत्र भाष्यकारेणोक्तम्--

`आचार्यप्रवृत्तिर्ज्ञापयति सर्व एव तद्धितः सापेक्षाद्भवतीति यदयं नञो गुणप्रतिषेधे सम्पाद्यर्हेत्यादिकमाह'

इति । तथा हि --न पृथोर्भावोऽपार्थिवमप्रथिमेति प्रकृत्यर्थः प्रतिषिध्यते नञा । तथा चासामर्थ्यात् तद्धितौ नैव स्यात्

`समर्थानां प्रथमाद्वा'(P.4.1.82)

इति वचनात् । अतो ज्ञापकेनायमर्थ उक्तः । तत्र च यथा प्रतिषिद्धस्य पृथोर्भावः, पृथोर्वान्यस्य भावः इत्ययमर्थस्तथा प्रतिषिद्धाभ्यां कर्णवेष्टकाभ्यां संपादि मुखं ततो वान्येन संपादीत्येवं प्रकृत्यर्थेन नञः संबन्धादिमवसीयते प्रकृत्यर्थो गुणत्वेन भाष्यकारस्याभिमत इति । एतत्तु न युक्तम् । प्रधानाप्रधानसन्निधौ प्रधान एव कार्ययोग इति सम्पद्यामानार्थविषयः प्रतिषेधः सम्पत्तेर्युक्तो नाप्रधाने प्रकृत्यर्थे । एकपदोपात्तश्चार्थोऽन्तरङ्गः संसर्गीभवत्यतोऽपि सम्पत्तिरेव गुणो युक्तो न पदान्तरोपात्तः प्रकृत्यर्थो विप्रकृष्टः । ज्ञापकं च न्यायानुवर्तनं न कारकम् । नञश्च प्रधानार्थेनाभिसंबन्धे प्रकृत्या न स्यात् समासोऽसामर्थ्यादिति ज्ञापकेन प्रकृतेराश्रितसमासायाः प्रत्ययो ज्ञापितो भाष्यकारेण । तदेवं पूर्वप्रदर्शित एव सूत्रार्थो युक्तः । अभैदिकमित्यर्हार्थतद्धितोऽत्रोदाहार्यः । अवसीय इति हितार्थे । असाम्परायिकमित्यलमर्थे सम्परायाय प्रभवतीति तद्धितः । अनया दिशान्यत्रापि गुणप्रदेशे यथाभाष्यं सूत्रवार्तिकेषु गुणस्वरूपं व्याख्येयम् । दिङ्मात्रमिह प्रदर्शितम् ।। 1 ।।

(13) अतिशायनसूत्रे भाष्यम्--

`प्रातिपदिकार्थो वै द्रव्यम्, न च द्रव्यस्य प्रकर्षापकर्षौ स्तः । एवं तर्हि गुणः प्रातिपदिकार्थः । ननु च द्वयमपि प्रकृत्यर्थः । तत्र कुत एतत्, गुणस्य प्रकर्ष इति ।

तत्रैतदुक्तम्--

`यस्यास्ति प्रकर्षस्तत्प्रकर्षे भविष्यति'(M.Bh. on P.5.3.55)

इति ।

`उभयं वै प्रातिपदिकार्थः'

इत्येतल्लिङ्गं संसर्ग्यादिलक्षणो गुणो गृह्यत इति । स हि द्रव्योपसर्जनभूतः शुक्लादिप्रातिपदिकेन प्रत्याय्यते । तत्र च गुणस्यैव प्रकर्षोऽस्ति न द्रव्यस्येत्यत्र कारणं वक्तव्यम् । शब्देन निष्पन्नरूपस्य द्रव्यवद् गुणस्यापि प्रतिपादनात् कारणायत्तुगुणवत् कार्यद्रव्यमपि कथं न प्रकृष्येत । तथा गुणः प्रतीयमानः कश्चिदभिधीयमानोऽन्यः । तत्राभिधीयमानगुणापेक्ष एव द्रव्यस्य प्रकर्ष इत्यत्रापि कारणं वक्तव्यम् । एकस्मिन्नप्यर्थे बहुतरोपाधीनां सम्भवान्नियमेनैकस्योपादानमयुक्तम् । सर्वत्र द्रव्यातिशायनास्पदं स गुणः सन्निधीयत इत्येतत् कथम् । न हि गुणपरो गुणो निर्गुणा गुणा इति वचनात् । सामान्येषु चावच्छेदको नास्ति । निःसामान्यानीति सिद्धान्तात् । तथा कर्मादिष्वपि नास्ति गुण इति तत्र किंनिबन्धनः प्रकर्षो भवेत् । कथं चान्यस्मिन् प्रककृष्यमाणेऽन्यस्य प्रकर्षो युक्त इत्येतदपि वक्तव्यम् । न ह्यर्जुनशौर्येण चैत्रस्तथा । द्रव्यं च प्रकृष्यमाणं लोकः प्रत्येति शब्दात् । इत्येतान् विकल्पान् क्मेण निवारयितुमाह--

द्रव्यस्याव्यपदेशस्य य उपदीयते गुणः ।
भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते ।। 2 ।।

(14) इहोपाधिविवेकेन निरूपयितुमेव न पार्यते द्रव्यम् । न हि सामान्यादिपदार्थं विनाध्यक्षयितुमिदन्तया शक्यते । यच्च स्वेन रूपेम निरूपयितुमपि न शक्यते तत् कथं स्वतः प्रकर्षेण युज्येत । अतः `अव्यपदेशस्य' इति सामानाधिकरण्यच्छलेन हेतुरुपात्तः । तदित्थं संसर्गिधर्मान्तरनिमित्तः प्रकर्षः । गुणादिभिरेव संसर्गिभिर्विशेष्यमाणं द्रव्यं सजातीयात् प्रकृष्यते । तत्र संसर्गिणो गुणादथो बहवः सन्निहिता इति किङ्कृतोऽतिशय इत्याह--`य उपादीयते गुणो भेदको व्यपदेशाय' इति। द्रव्यं व्यपदेष्टुं व्यवच्छेदकोऽन्यस्माद्यो गुण उपादीयते , शब्देन गृह्यते तत्कृतः प्रकर्षः प्रत्ययवाच्यः । न त्वनभिधीयमानापरसन्नियमकारणाभावात् प्रतीतेरुपप्लवमानत्वाद् बहिरङ्गत्वात् । अभिधीयमानस्तु गुणोऽन्तरङ्गो नियतप्रतीतिः । यदावेशेन हि द्रव्यमभिधीयते तदात्मन एवातिशय्यमानता न्याय्या । प्रकृत्यर्थोपाधित्वादतिशयस्य, अभिधीयमानस्यैव च प्रकृत्यर्थत्वात् । `गुणो भेदकः' इति स्वशास्त्रलक्षितं गुणरूपमत्र गृह्यते इत्याह । संसर्गि भेदकं यद् यद् इति हि लक्षणम् । भेदकत्वं चात्र मुख्यं गुणवक्षणम् ।्समवेतस्यापि दण्डस्य दण्डिनि गुणत्वाद्, अदण्डिव्यवच्छेदेन । तदेवं शुक्लतरः पट इति शुक्लगुणनिमित्तो द्रव्यप्रकर्षो न गरिमीदिप्रतीयमानगुणनिमित्तः ।। 2।।

यथा च निरुपाधिनो द्रव्यस्य प्रकर्षो नास्ति तथा द्रव्यान्निष्कृष्टस्य स्वतन्त्रस्य गुणस्यापि शुक्लतरं रूपतरं रूपमिति स्वतः

प्रकर्षो नास्ति, अपि तु तदवस्थायां द्रव्यायमाणत्वाद् गुणस्यापरसंसर्गिधर्मान्तरनिमित्त एव प्रकर्ष इत्याह--
सर्वस्यैव प्रधानस्य न विना भेदहेतुना ।
प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यताम् ।। 3 ।।

(15) गुणोऽपि प्राधान्येन शब्देनाभिधीयमानो द्रव्यलक्षममिदं तदिति सर्वनामप्रत्यवमर्शयोग्यस्वभावमनुपततीति तस्य निरुपाधेर्व्यपदेशाविषयत्वाद्यदुपाधिर्व्यपदेशस्तन्निबन्धन एव प्रकर्षः । तत्र जातिर्व्यपदेशहेतुरपि न प्रकर्षे सव्यापारा । समानजातीयाद्धि प्रकर्षः । तत्र जातेरभेदः । अत एवोक्तं भाष्ये
`जननेन प्राप्यते इति जातिः । न चैतस्यार्थस्य प्रकर्षापकर्षौ स्तः ।'
(M.Bha. on P.5.3.55)
इति । जन्मकालसंबन्धाज्जातिः, न तूत्पन्ने द्रव्ये कारणान्तरसन्निधानायत्तो निवेशोऽस्याः, येन कारणभेदाच्छुक्लादिवत् प्रकृष्यते । तस्मान्नित्यत्वाज्जातेर्नास्ति सावस्था या जातिशून्येति जन्मकालेऽपि तेनैव रूपेण सावस्थिता व्यक्तेरवियोगेन प्रवर्तमाना तज्जातीयादेव व्यवच्छेदं प्रापयितुं शक्नोतीत्यर्थः । अतश्च जातेरतिशायकत्वासम्भवात्तदेकार्थसमवायि भासुरत्वं वैमल्यं रागान्तराव्यतिभिन्नतेत्येवमादयो विशेषाः प्रकर्षवृत्तिनिबन्धनम् । यद्यपि चाग्निसंयोगादिना स्वत एव गुणस्य प्रकर्षो भवति तथापि व्यपदेशो परोपाधेरे वेति तन्निमित्त एव प्रकर्षो न्याय्यः । न हि स्वगतो विशेषः शब्देन सर्वः
शक्यतेऽभिधातुम्, रूपादिशब्देन रूपत्वादिजातीयस्याविशेषेण सर्वस्याभिधानात् । अत एव यदा भासुरत्वादयोऽपि प्राधान्येन व्यपदिश्यन्ते तदा तदाश्रितधर्मान्तरद्वारक एव प्रकर्षो विज्ञेयो भासुरतर इति । तत्रापि धर्मान्तरस्य प्राधान्ये तदपराश्रितधर्मनिमित्त एव प्रकर्ष इति यावत् सम्भवति शब्दव्यापारस्तावदपर्यवसानमेव धर्माणामिति
गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रितगुणादेव प्रकृष्टत्वं प्रतीयते ।।
इत्युक्तमेव । अत एवात्र `सर्वस्यैव प्रधानस्य' इति व्याप्तिरिक्ता सर्वग्रहणेन । यदा तु शब्दव्यापारोपरमस्तदा धर्मान्तरपर्येषणा पर्यवस्यति ।। 3 ।।
ननु च भासुरत्वादयः शुक्लशब्दस्य न वाच्या इत्यशब्दवाच्यप्रतीयमानधर्मद्वारकेऽत्र प्रकर्षेऽनेकोपाधिसन्निधानादनियमः प्रसज्येतेत्याशङ्क्याह--
विग्यामानाः प्रधानेषु न सर्वे भेदहेतवः ।
विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिभिः ।। 4 ।।

(16) इह प्रधानेषु द्रव्येषु वस्तुसन्तो बहवोऽन्यस्मात्सजातीयविजातीयाद् व्यवच्छेदहेतवो धर्माः । ते च सर्वे न केनचिच्छब्देन शक्यन्तेऽभिधातुम् । अनेकव्यावृत्तिनिष्ठस्यैकस्य शब्दस्याभावात् । एकैकाव्यावृत्तिनिष्ठा हि बहवः शब्दा वस्तुनि प्रवर्तन्ते । तथा च ते तत्र विशेषशब्दा इत्युच्यन्ते, प्रतिनियतविशेषाभिधायित्वात् । यदि सर्वविशेषविशिष्टं द्रव्यमेकेन शब्देनाभिधीयेत स्यादसावेकः शब्दः साधारणः । न चैवम् । तस्मात्प्रतिनियतव्यावृत्तिविशिष्टार्थाभिधायिभिः शब्दैः
सर्वविशेषाणामसंसस्पर्शादुपात्तविशेषहेतुरक एव प्रकर्षः । सूक्ष्माणां च विशेषणामसंविज्ञातपदानां भासुरत्वादीनामस्त्वेव शुक्लादिशब्दैर्वाच्यता तदुपाधिविवक्तस्य शुक्लस्य प्रधानस्य शब्दविषयभावोपगमायोगात् । संसर्गिरूपोपहितत्त्वाच्छब्दवाच्यस्य जातिहेतुकप्रकर्षाभावात् शुक्लतरं रूपमित्यादिप्रयोगदर्शनाच्चात्र भासुरत्वादिहेतुकः प्रकर्षो निश्चीयते । न
चाशब्दवाच्यधर्मनिमित्तः सः, अतिप्रसङ्गादिति भासुरत्वादीनामपि प्रयोगप्रामाण्यादत्र शब्दवाच्यत्वं निश्चीयताम् ।। 4 ।।
ननु भवतु स्वतोऽव्यपदेशस्य द्रव्यस्य संसर्गिधर्मनिमित्ता व्यपदेशप्रवृत्तिः । तत्रैव तु व्यपदेशे संसर्गिण उपक्षयात् प्रकर्षेऽपि कतं तस्य व्यापारः कल्प्यत इत्याह--
वस्तूपलक्षणे तत्र विशेषो व्यापृतो यदि ।
प्रकर्षो नियमाभावात् स्यादविज्ञातहेतुकः ।। 5 ।।

(17) वस्तुनिर्देशमात्रचरितार्थत्वे विशेषस्योपाधिभूतस्य यः शुक्लो दृष्टः स गरिमादिना प्रकृष्टः शुक्लतर इति प्रतीयेत । तथा

च विशेषः प्रकर्षस्य निबन्धनं न ज्ञायेत । न चैवं प्रसिद्धिः शुक्लगुणनिमित्तस्यैव प्रकर्षस्यातोऽवगमात् । ततश्च यथा प्रतीतिः , यथा च युक्तिः प्रत्यासन्नतरत्वाच्छब्दवाच्यस्येति तथा प्रकर्षे व्यपदेशहेतोरेव विशेषस्य व्यापारः कल्पयितुं न्याय्य इत्यर्थः ।। 5।।

इह कथं प्रकर्षप्रत्ययः निकृष्टतरः प्रकृष्टतर इत्याशङ्क्याह--

सर्वं च सर्वतोऽवश्यं नियमेन प्रकृष्यते ।
संसर्गिणा निमित्तेन निकृष्टेनाधिकेन वा ।। 6 ।।

(18) व्यपदेशहेतुप्रकर्षे प्रकर्षप्रत्यय ितिे निकर्षोपाधेरभिधाने निकर्षापेक्ष एव प्रकर्षो वाच्यः, प्रकर्षोपादेश्चाभिधाने प्रकर्षोपेक्ष इति सजातीयापेक्षायां सर्वस्य प्रकर्षसम्भवादेतदुपपद्यते । निकृष्टस्य निकृष्टात्वादेव प्रकृष्टस्य प्रकृष्टात्वादेवातिशयः सम्भवत्येव । एवं गुणप्राधान्येऽप्यपरधर्मनिमित्तः तत्प्रादान्येऽप्यपरनिमित्तः प्रकर्ष इत्यनवस्थां पूर्वप्रदर्शितामर्यनेनाह ।। 6 ।। इह गोतरेति प्रयोगो दृश्यते । तत्र च न जातिनिमित्तः प्रकर्ष इत्युक्तम् । न चान्यनिमित्तमत्र सव्यापारं प्रतीयत इति निर्निमित्तः प्रकर्षो द्रव्यस्य । एवं शुक्लतरादावपि भविष्यतीति किमिति गुणहेतुकः प्रकर्षः समुद्घोष्यत इत्याशङ्क्याह--

नापेक्षते निमित्तं च प्रकर्षे व्यापृतं यदि ।
द्रव्यस्य स्यादुपादानं प्रकर्षं प्रत्यनर्थकम् ।। 7 ।।

(19) परिनिष्ठितरूपं द्रव्यं निर्ह्रासोपचयसंबन्धायोग्यं स्वत इति न स्वनिमित्तं प्रकर्षमनुभवति । तद्यदुपाधिरूपं निमित्तं प्रकर्षे सव्यापारं नाङ्गीकरोति तदा प्रकर्षे प्रतिपाद्ये तस्योपादानं निष्प्रयोजनम् । शुक्लतर इत्यादिप्रयोग एव न स्यादित्यर्थः । तस्मात्प्रयोगप्रामाण्याद्यथोपपत्ति प्रकर्षोऽनुविधेय इति व्यपदेशहेतुस्वसंसर्गिधर्मनिमित्तः स व्यवस्थाप्यः सर्वत्र । जातेश्च व्यपदेशहेतुभूतायास्तदसम्भवे यथा शुक्लतरं रूपमित्यत्रैकार्थसमवेतभासुरत्वादिधर्मद्वारकः प्रकर्षो व्यवस्थाप्यते तथा गोतरेत्यत्राप्येकार्थसमवेताद्वाहदोहादेर्धर्मादसौ व्यवस्थाप्यः । भासुरत्वादेरिव चात्र प्रयोगप्रामाण्याद्वाहदोहादेरपि शब्दार्थत्वमवसेयम् । ततश्च प्रकृष्टवाहदोहो गौर्गोतरेति भण्यत इति सर्वं सुस्थम् ।। 7 ।।

प्रकरणार्थं समापयितुमाह--

सव्यापारो गुणस्तस्मात्स्वप्रकर्षनिबन्धनः ।
द्रव्यात्मानं भिनत्त्येव स्वप्रकर्षे निवेशयन् ।। 8 ।।

(20) द्रव्यस्य स्वतो निरतिशयत्वात् स्वनिमित्तभूतप्रकर्षाधानोद्युक्तः संसर्गिगुणः स्वातिशयहेतुकेन विशेषेणाश्रयान्तराद् व्यवच्छेदं विदधाति ।

कथमन्यस्य प्रकर्षऽन्यत्प्रकृष्टमित्याशङ्क्याह--

अरूपं पररूपेण द्रव्यमाख्यायते यथा ।
अप्रकर्षं प्रकर्षेण गुणस्याविश्यते तथा ।। 9 ।।

(21) नीरूपस्य निरुपाधिनो द्रव्यस्य शाब्दव्यवहारोपगमायोगादुपाधिरूपाच्छुरितस्य तदुपगमे सर्वशब्दार्थपृष्ठपाती व्यवहारः स्वोपाधिनियमितशरीर इत्यर्थः । उपाध्युपाधिमतोश्च विवेकस्य दुरवधारत्वात् सङ्कर इति व्यवहारे गुणुप्रकर्षो गुणिनि विश्राम्यति, न गुणात्मन्येव निष्कृष्टगुणिनि व्यवतिष्ठते, नापि गुण्यात्मन्येव निष्कृष्टगुण इति सिद्धम् ।। 9 ।।
इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे गुणसमुद्देशः (पञ्चमः) ।

---

k_samudesha

अथ क्रियासमुद्देशः ।

इदानीं साध्यापेक्षत्वात् साधनस्य साधनान्तर'मिद्दिष्टायाः क्रियायाः शास्त्रीयं लक्षणमाह--

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।

आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते ।। 1 ।।

इह क्रियावचनो धातुरिति पूर्वाचार्यलक्षणे

"अस्तिभवतिविद्यऽतीनां धातुत्वं वक्तव्यम्" (M.Bha,I,p.255,1.I) इति चोदितम् । तथा हि-यथा किं करोति ? पचति, इति पचादीनां करोतिना सामानाधिकरण्यात् क्रियाविशेषवाचकत्वाध्यवसायः, न तथा भवत्यादीनाम् । न हि भवति किं करोति ? भवति, इत्यादीति न ते क्रियावचनाः स्युः । किं च परिस्पन्दस्वभावा लोके क्रिया प्रसिद्धा । अस्तिभवतिविद्यतीनां च न परिस्पन्दस्वभावोऽर्थ इति सकलधातुव्यापकं क्रियालक्षणं भाष्ये प्रणीतं

"कारकाणां प्रवृत्तिविशेषः क्रिया" (M.Bha.I.p.258, 1.11)

इति । तत्र विचार्यते । सर्वेषां वा कारकाणामेकः प्रवृत्तिविशेषः, प्रतिकारकं भिन्ना वा प्रवृत्तिरिति । आद्ये पक्षे कारकाणां फलभूता भूतिपक्त्यादिका वा प्रवृत्तिः स्यादन्या वेति द्वैतम् । तत्र न तावत् सर्वेषामेकः प्रवृत्तिविशेषः । असम्भवात् । न हि यैव करणस्य प्रवृत्तिः सैव कर्तुः, यैवाधिकरणस्य सैव संप्रदानस्येत्यादि । अनेकाश्रयाया एकस्याः क्रियाया अदर्शनात् । तस्मात् प्रतिकारकं भिन्ना प्रवृत्तिः क्रिया । इत्थं च क्रियावाची धातुरिति सकलकारकव्यापाराभिधायी धातुः प्राप्तः । किमतः । इदमतः । सर्वकारकाभिधायी लकारः स्यात् । धातूक्तव्यापार साधनो हि लो धातोः परः प्रयुज्यमानो न्याय्यः । नैतदस्ति । कर्तृकर्मणोर्लस्यानुशासनात् तद्व्यापार एव लान्तात् प्रतीयते । ननु न शब्दनिमित्तेन नामार्थेन भवितव्यम्, अपि त्वर्थनिमित्तेन शब्देनेति साधनमात्रे लोऽनुशिष्यताम् । भवेदेतद् यदि साधनमात्रव्यापारो लान्तादवगम्येत, कर्तृकर्मव्यापार एव तु प्रतीयते इति शब्दशक्त्यनुसारेणानुशासनं युक्तम् । न तर्हि साधनमात्रव्यापाराभिधायी धातुः । अन्वयव्यतिरेकाभ्यां तदनवगमात्, उपायान्तराभावाच्च प्रकृतिप्रत्ययानुसरणस्य । सत्यमेतत् । कि्ं तु देवदत्तः काष्ठैः स्थाल्यामोदन पचतीत्यादाव विशेषेण पचतेर्धातोः सर्वकारकव्यापारस्वीकारोपलब्धेरखिलकारकलान्तात् प्रतीयत इत्येकीयं मतऽम् । अन्ये मन्यन्ते-सम्प्रदानादिव्यापारे धातोर्नवृत्तिः । करणादिव्यापार एव तु वृत्तिः । तथा च करणादावेव स्वातन्त्र्यविवक्षा, नापादानादौ । इत्थं च

"अधिश्रयणोदकासेचन.."(Va.8,onP.I.4,23,M.Bha.I.p,324,1.17) इत्यादिना कर्त्रादीनामेव व्यापारः पचिक्रियेति वार्तिककारो दर्शयति । अतश्च

"कारकाणां प्रवृत्तिविशेषः क्रिया"(M,Bha.I.p.258,1.11)

इति क्रियास्वरूपमात्रं कथितम्, न तु धातुवाच्यत्वम् । यस्य कारकस्य या प्रवृत्तिः सा क्रिया । ततो बहुकारकविषयत्वेन बह्वय एव पाकक्रियाः । काचिदेव तु धातुनाभिधीयते कर्मगता कर्तृगता वा, पच्यते पचतीति । अत एव कर्तृकर्मणोरेवोत्पद्यते लकारः, तद्व्यापारस्यैव धातुनाभिधानात् । अन्ये तु विशेषपदे भरं कृत्वा प्रवृत्तीनां विशेषः प्रवृत्तिविशेष इति सकलकारकजन्या विक्लित्त्यादिरूपा भूतिः फलभूता कारकप्रवृत्तेः क्रियेति व्याचक्षते । अपरे पुनः कारकमत्र प्रधानं विवक्षितं कर्तृरूपं न पुनरप्रधानं करणादि । बहुवचनं त्वनेकक्रियाभेदेन कर्तृभेदात् । कर्तृग्रहणमेव तु न कृतम्, कर्मणि लकारदर्शनात्तद्व्युदासोऽस्य मा भूदिति । तेन यत्र सम्भवति कर्म तत्र तद्व्यापारोऽपि क्रिया । यद्येवं तदपेक्षयैव बहुवचनं व्याख्येयम् । कर्मार्थत्वाच्च प्रवृत्तेस्तदपि प्रधानम् । नैतदस्ति, कर्मणोऽसर्वविषयत्वात् । कर्ता पुनः सर्वत्र स्थित इति व्यापकत्वात् स एवात्र प्रधानं कारकं विवक्षितम् । अत्र च

"अन्यथा शुष्कौदने कारकाणि प्रवर्तन्ते, अन्यथा मासौदने"

(M.Bha,I,p.258,1.11)

इति भाष्यमेव लिङ्गमाह । तथा हि-मांसौदने संरम्भवत्त्वेन प्रवर्तते कर्ता, शुष्कौदने मन्दप्रस्थानेन । यतश्च संरम्भेण मन्दतया

च प्रवृत्तिं दर्शयति अतोऽवसीयते कर्तैवात्र कारकशब्देनाभिधित्सित इति । तथा हि चेतनत्वात् स एव तथा प्रवर्तते । तदेवंप्रकारा ससंरम्भा तद्विपरीता वा प्रवृत्तिविशेषरूपा क्रियेति भाष्यकारेण स्वयमेवोदाहृता । अत्र केचिच्चोदयन्ति चेतन स्यैवैवं प्रवृत्तिसंभवादचेतनः कर्ता न गृहीतः स्यादिति तत्प्रवृत्तिः क्रियेति नोक्तं स्यात् । मासौदनादौ च करणादीनामपि सम्भवात् कथं कर्तैवात्र निर्दिष्ट इति । अत्रोच्यते । संरम्भस्य मान्द्यस्य च कर्तुरेव संभवः । न हि कंसपात्र्यादिकमधिकरणमन्यद्वा कारकं संरम्भवत्त्वेन मन्दतया वा प्रवर्तते । सामान्येन च कर्तृकर्मणां ग्रहणादचेतनप्रवृत्तिरपि गृहीतैव । "अन्यथा मासौदने...." इत्यादिना तु संरम्भेण मन्दतया च प्रवृत्तिविशेष उपलक्षितः । न पुनः पूर्वोक्ता कर्तृमात्रप्रवृत्तिर्नियम्यते । अतः कर्तुर्या विशिष्टा प्रवृत्तिः सा क्रियेत्यर्थः । एवं च कृत्वा प्रवृत्तिरेव विशेष इति समासः । कर्मणोऽपि सूचितत्वात् कारकशब्देन तद्व्यापारो।ऽपि क्रियेति । प्रतीयते । अन्यथा कर्तृपदमेवाकरिष्यदित्युक्तम् । अस्मिन् मते

"अथ कः पचेः प्रधानोऽर्थः, यासौ तण्डुलानां विक्लित्तिः "

(M.Bha II,p.32,1.24-25.)

इति भाष्यं कथम् । कर्तृव्यापारो हि क्रिया धातुवाच्या । सा च विक्लेदना, न तु विक्लित्तिः । नास्ति विरोधः ।नात्र शब्दार्थो निरूप्यते अपि तु वस्त्वर्थ इत्यार्थेन रूपेण विक्लित्तेः प्राधान्यादेवमुक्तम् । शाब्देन तु रूपेण विक्लित्त्युपसर्जनं विक्लेदनमर्थः । कर्मणि लकारोत्पत्तौ तु विक्लित्तिरेवार्थ इति केचित् । विक्लेदनोपसर्जना विक्लित्तिरित्यपरे । तेन कर्तृकर्मव्यापार एव सर्वत्र धात्वर्थ इतीदं दर्शनम् । अन्ये तु

"सामान्यभूता क्रिया वर्तते" (M.Bha.I.p.326,1.15.)

इत्येतद्भाष्यानुसारेण प्रवृत्तिमात्रमगृहीतविशेषं सकलकारकानुयायिनी क्रियेति मन्यन्ते । तथा हि फलजननैव साधारणात्मिका क्रिया प्रवृत्तिविशेष इत्युच्यते प्रवृत्तिश्चायं विशेषश्चेति । विशेषोऽस्याः फलजननारूपत्वं न पुनरधिश्रयणादिरूपतैव । तेन जननाख्ये विशेषः प्रवृत्तीनां क्रिया । सर्वेषां हि कारकाणामेका प्रवृत्तिः फलजननालक्षणा । सर्वाणि हि फलजनाय प्रवर्तन्ते । अतो यत् फलजननारूपं तत् सर्वकारकेष्वविशिष्टम् । किञ्चित् खलु कारकं केनचिदेव रूपेण जनयतीति फलजनना सर्वसाधारणरूपैव । अवान्तरभादेन तु जनकत्वात् करणादिव्यपदेशः । कणाददर्शने चैका क्रियानेकत्र न भवेत् । तीर्थिकान्तरदर्शनं चेह नाश्रीयते । अत एव परिस्पन्दलक्षण एव व्यापारो न क्रिया । प्रवृत्तिरित्येतावत्युच्यमाने हि लोकप्रसिद्ध्या परिस्पन्दलक्षण एव व्यापारः प्रतीयेत । विशेषग्रहणात्तुः प्रवृत्तिमात्रमवगम्यत इति केचिद् व्याचक्षते । तथा हि सर्वा प्रवृत्तिः प्रवृत्त्यन्तराद् भिद्यमाना विशेषरूपतामापद्यत इति सकलक्रियानुयायीदं लक्षणम् । विशेषश्च सजातीयाद्विजातीयाच्च । तत्र सजातीयाद् भेदः `अन्यथा कारकाणि शुष्कौदने प्रवर्तन्ते, अन्यथा मांसौदने' इति प्रतिपादितः । भुजिक्रिया हि कारकभेदाद् भिद्यमानात्रोक्ता । औदासीन्येन शुष्कौदने कारकाणां प्रवृत्तिः । संरम्भेण तु मासौदने इति विशिष्यते । यदि च संरम्भरूपतैव साधनानां क्रिया स्यात् तदा शुष्कौदने भुजिः क्रियारूपतां न प्रतिपद्येतेति प्रवृत्तिविशेष इति क्रियासामान्यलक्षणम् । विजातीयाद्भेदस्तु पचति पधतीत्यादौ स्पष्ट एव । ननु द्रव्यादन्यत्वामेव तावत् कथं क्रियायाः प्रतिपन्निमिति वक्तव्यम् । तत्राप्युक्तम् ।

"इह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचतीत्येतद्भवति कदाचिन्न"

(M.Bha.I.p.254,1.17.)

इत्यादि । अन्वयव्यतिरेकाभ्यां पचत्यादिशब्दवाच्या क्रिया द्रव्यात् कारकसक्तियुक्तादन्या । तथा हि-औदासीन्यावस्थायां सत्स्वपि साधनेषु पचतीत्यादिप्रख्योपाख्ययोरबावादर्यान्तरविषयत्वं तयोः । तद्यथा घटसन्निधानेऽनुत्पद्यमानानां पाकजानामग्निसंयोगापेक्षित्वम् ।

"अथवा यथा देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया"

(M.Bha.I.p.254,1.19.)

इत्यपरमत्रोक्तम् । पूर्वेण ग्रन्थेन कादाचित्कः प्रख्याविशेषो हेतुः क्रियाया व्यतिरेकेऽभिहितः । स त्वसत्यपि विषये मरीचिकाजलावसायवत् स्यादितीदमपरमत्र लिङ्गमुपन्यस्तम् । तथा हि प्राप्तिलक्षणं फलं द्रव्यमात्रादभवद् व्यापारान्तरं

ततोऽन्यदावेदयते । मिथ्याप्रत्यये विषयस्याभावात् फलानुत्पत्तिप्रसङ्गात् । न च साधानादेव शक्त्यात्मनः फलोपजनः । शक्तत्वेऽपि व्यापाराभावे फलादर्शनादित्यस्ति कश्चित् सोऽर्थः यः क्रमविशेषापेक्षः कार्यमभिनिर्वर्तयति । सा च क्रिया न शक्या पिण्डीभूता निदर्शयितुमित्यनुमानगम्योक्ता । ननु च पचतीति प्रख्याया निरालम्बनत्वेन भ्रान्तत्वादनुमापकत्वमयुक्तं स्यात् । सालम्बनत्वे तु प्रत्यक्षैव क्रिया प्रख्याविशेषविषयत्वात् । फलानुमानेऽपि प्रतीतासौ शब्देन नाभिधीयेत । फलमुपजनय्य व्यतीतायास्तस्या वर्तमानाभिधानं विरुध्यते । अत्रोच्यते-इह व्याकरणे न वस्त्वर्थोऽर्थः, अपि तु शब्दार्थोऽर्थः । तथा चान्वयव्यतिरेकाभ्यां धातुभागस्य योऽर्थो व्यवस्थाप्यते नासौ साक्षादुपलब्धुं शक्यते । समाश्रितक्रमो ह्यर्थात्मा आख्यातात् प्राधान्येन प्रतीयमानः क्रियेति शाब्देन रूपेण क्रिया चैव हि भाव्यते, स्वभावसिद्धं तु द्रव्यमित्युक्तम् । वास्तवेन रूपेण साधनाधीनसिद्धेरनित्यस्य द्रव्यस्य कथं स्वाभाविकी सिद्धिः स्यात् । शाब्देन रूपेण वस्तु भाव्यमानात्मकमपि प्रातिपदिकैः सिद्धरूपमुच्यते । तथा हि-द्रव्यशब्दाः प्रवर्तमानाः घटः क्रियते, पटः क्रियते इत्यादिसाध्यमानावस्थेष्वपि सन्मात्राकारावलम्बनं प्रत्ययं जनयन्ति । घटस्य हि भाव्यमानावस्था शिवकस्तूकादीनामवस्थानां क्रमेण प्रादुर्भावः । न चासौ घटशब्दात् प्रतीयते,क्रियत इति क्रियाशब्दप्रयोगादेव तदवगतेः । तथा च यः पदान्तरनिरपेक्षाच्छब्दादन्वयव्यतिरेकाभ्यामर्थोऽवगम्यते स तस्यार्थ इति घट इत्यस्मात् केवलात् सत्ताकारस्यैवार्थस्यावगमात् प्रातिपदिकार्थः सत्तेति निर्णीतम् । क्रियापदप्रयोगात्तु आश्रितक्रमरूपतावगमात् तिङन्तानां भाव्यमानोऽर्थोऽवस्थाप्यते । घटः क्रियते इति च घट इत्येवं बुद्ध्या गृह्यमाणो योऽर्थः स निर्वर्त्यत इत्येवं पदसमन्वयः । घटोऽभूद् भविष्यतीत्यादावपि सदाकारप्रत्ययाद भिधेवात्मना नित्यत्वमर्थानामिति

"अनित्येष्वपि नित्यत्वमभिधेयात्मना स्थितम्" (Vak.IIIसं.34.)

इत्युक्तम् । तस्माच्छाब्देन रूपेण भाव्यमाना क्रियेति । ध्वनतीत्यादावपि क्रियात्वमिति वक्ष्यते । एवं च

"पूर्वपरीभूतस्य सक्रमस्यार्थस्यागमापायित्वाद् भागानामवर्तमानत्वात् प्रत्यक्षाभावः"

इत्यपि वक्ष्यते । तदेवमन्वयव्यतिरेकाभ्यां द्रव्यानुमिता क्रिया । नन्वेवमप्यस्त्यादीनां क्रियात्वं न स्यात् । न हि सर्वेषु साधनेषु सन्निहितेषु कदाचिदस्ति भवति विद्यते वेति भवति, सर्वदा भावात् । पचतितरामित्यादाविव चास्तितरामित्यादौ प्रकर्षाभावात्, किं करोति पचतीत्यादिवच्च किं करोति अस्तीत्यादिप्रश्नप्रतिवचनाभावात्, सत्तायाश्च निर्विशेषत्वाद्भेदाभावः । अत्र ब्रूमः । इह

"अन्यथा साधनान्यस्तौ प्रवर्तन्ते, अन्यथा म्रियतौ"

(M.Bha.I.p238,1.11.)

इति प्रवृत्तिविशेषरूपत्वं तावदस्ति । अस्तौ ह्यात्मोपग्रहरूपेण साधनानां प्रवृत्तिः । एवं भवतौ विद्यतौ च । म्रियतौ त्वात्मपरित्यागरूपेणेत्यस्ति तावद्विजातीयाद्भेदः । असंरब्धसाधनसाध्या च सत्ता नियतमेव साधनानां सन्निहितेति प्रख्योपाख्ययोः कादाचित्कत्वाभावः । प्रकर्षप्रत्ययश्चापि दृश्यते । विद्यतेतरामयमिह नित्यसन्निधानात् । अनियतसन्निहिताद्धि नित्यसन्निहितस्य सत्ता विशिष्यते । तेन साधनान्यत्वादभिद्यमानापि प्रकर्षेण युज्यते । किं करोतीति च क्रियाविशेषप्रश्नेऽस्ति, न काञ्चित् पच्यादिकां क्रियामनुतिष्ठतीत्यास्ति प्रतिवचनम् । सामान्येन ह्यवगतायां सत्तायामस्य प्रश्नस्योपपत्तेः नास्ति क्रियाविषय एवायम् । प्रत्यासन्नविनाशे च किं करोति देवदत्तः, अस्ति तावद्, विद्यते तावदिति भवत एव प्रश्न प्रतिवचने । किञ्च सर्वासां क्रियाणामनन्तरफलजनकत्वमस्ता वप्येतदस्ति । किमत्र फलमिति चेदात्मामोक्षरूपेणेति ब्रूमः । षड् भावविकाराः इति निरुक्तकारवचनात् भावशब्दाभिधेयायाः सत्तायाः समग्रक्रियायोनित्वे मूलभूतायाः क्रियात्वं प्रत्यस्या न विवादः । यद्यपि च भावविकारेषु तिष्ठतिर्नोपसंख्यातः तथाप्यस्यास्त्येव क्रियाधर्मान्वथः । तथा हि--

"क्रिया क्रियाया निवर्तिका भवति द्रव्यं द्रव्यस्य"

(M.Bha.I.p.258.1.15.)

इत्युक्तम् । तिष्ठतीत्युक्ते वृद्ध्यपक्षययोर्निवृत्तिः प्रतीयते इति क्रियैषा कारकाणां प्रवृत्तिरूपा । असंब्धानि हि वृद्धावपक्षये च कारकाण्यौदासीन्येनावतिष्ठन्ते । तथा हि यावत् कारकाणि प्रवर्तन्ते तावत् पूर्वापरीभूतावयवः साध्यमानस्वभावः प्रवृत्तिविशेषस्तेषामवधार्यते । यदधीना फलनिष्पत्तिः । शब्दार्थोऽर्थ इति चैतल्लक्षणमिति वस्तुतः सिद्धमपि

साध्यत्वेनाभिधीयमाना क्रिया । तद् यथा ध्वनतीति । एवं सत्तादीनामपि साध्यतयाख्यातेनाभिधानात् क्रियात्वमित्यस्त्यादीनां धातुत्वं सिद्धम् । तथा तिष्ठतेरपि क्रियान्तरनिवृत्तिवचनत्वादेतदेव क्रियालक्षणमनुगामि । तथा हि तिष्ठतीत्युक्ते न वर्धतेऽपक्षीयते वेति गम्यते । तथा च क्रियान्तरापाकरणेन कारकप्रवृत्तिविशेषत्वात् क्रियात्वम् । साधनसंसर्गदर्शनाच्च भूमौ तिष्ठति, बलेन तिष्ठतीति । एवमुपवसतीति भाजननिवृत्त्याकारा प्रवृत्तिः क्रिया । विनश्यत्यपक्षीयत इत्यसदवस्थापूर्वभावी कारकप्रवृत्तिविशेषः समाश्रितक्रमः क्रियेति भावविकारेषु प्रपञ्चयिष्यते । तदेवं साधनेभ्यो भिन्ना क्रिया । साधनेभ्यश्चान्यद् भवद् वस्तु किमन्यत् साध्यात् स्यादिति साध्यस्वभावा क्रिया धातुवाच्या । न हि संयोगविभागात्मकः सिद्धस्वभावोऽर्थो धातुवाच्यः, साध्यतया पूर्वापरीभूतत्वेनावगमात् । तद्व्यतिरिक्तस्य चापरस्य कर्तृव्यापारस्याप्रतीतेर्न भावनान्या काचिद् धात्वर्थो विद्यते । समस्तधात्वर्थसामान्यरूपश्च करोत्यर्थ इति पचत्यादिना सामानाधिकरण्यं प्रतीयते । पाकः पचतीति च कृदाख्याताभिहितयोर्भावयोः सिद्धसाध्यतारूपभेदात् बुद्धिभेदः । पाकं करोति पचतीति च धात्वर्थ एव विक्लोदनाख्यः शब्दात् प्रतीयमानो वास्तवकर्मगतविक्लित्तिनिष्ठतया व्याक्रियते । विक्लिद्यतस्तण्डुलान् विक्लेदयतीत्यर्थः । अत एव विक्लिद्यन्ति पचन्तीति कर्मकर्तृगतव्यापाराभिधानात् प्रतीतिभेदः । द्वयर्थः पचिरिति च कर्तृव्यापारस्य धात्वर्थतायामुपपद्यते । तस्मान्न भावना काचिदिति यागेन भावयेत् स्वर्गमिति नैष वाक्यार्थो यजेतेति अपि तु यजिः साध्यमानशरीरोऽवसीयते । यदनुष्ठानात् फलं वस्तुसामर्थ्याद् भवतीति क्रियाविवेके क्रियैव प्रधानभूता वाक्यार्थ इति निर्णीतं तत एवावधार्यम् । अलमिह विस्तरेण ।। 1।।

इदानीमेतदेव क्रियालक्षणमुदाहरणेन स्फुटीकरोति ।

कार्यकारणभावेन ध्वनतीत्याश्रितक्रमः ।
ध्वनिः क्रमनिवृत्तौ तु ध्वनिरित्येव कथ्यते ।। 2 ।।

घण्टा ध्वनतीति ध्वनिराख्योतेनोपात्त पौर्वापर्यः क्रियात्वमनुप्राप्तोऽभिधीयते । तथा हि-घण्टाः ध्वनेः कारणम्, कार्यं ध्वनिः । तयोः संबन्धेन हेतुना कार्ये सव्यापारा घण्टा ध्वनतीत्येवमुच्यते । ध्वनेरेव वा प्रबन्धेन जायमानस्य वीचीसन्तानवद् विप्रसृतावयवत्वात् पूर्वो भागः कारणम्, उत्तरस्तु कार्यम् । यदा तूपरत व्यापारा घण्टा तदा पूर्वापरभावस्य निवृत्तौ घण्टाया ध्वनिरित्येवं सिद्धतया शब्देन प्रतिपादितो न क्रियालक्षणमनुपतति । ध्वनिं करोतीति तु शब्दान्तरसंबन्धात् प्रतीयमानो वाक्यार्थः, न पदात् साध्यतयावसायः, न स्वशब्दादिति क्रियात्वाभावः । प्रातिपदिकेन सिद्धस्वभावतापन्नोऽर्थोऽभिधीयते । तत्र करोतीति त्वाख्यातात् साध्यरूपतावसायः शब्दान्तरसंबन्धात् प्रतीयमानो वाक्यार्थः, न पदार्थः । एवं पाकं करोतीत्यादावपि द्रष्टव्यम् । आख्यातेनैव हि साध्यस्वभावः क्रियारूपोऽर्थः प्रत्याय्यते, न नामपदेन । शब्दश्च स्वार्थे यथाभिधानं प्रमाणमिति निश्चितमेतत् । तथा हि शब्दार्थोऽर्थो न वस्त्वर्थ इत्यसकृदुक्तम् ।। 2 ।।

अत्रैवोदाहरणान्तरमाह ।

श्वेतते श्वेत इत्येतच्छ्वेतत्वेन प्रकाशते ।
आश्रितक्रमरूपत्वादभिधानं प्रवर्तते ।। 3 ।।

श्वेते गुणे श्वेतते इत्येतत् तिङन्तम् अभिधानम् क्रमरूपाश्रयेण प्रवर्तमानं क्रियारूपतामावेदयते । तत्रैव च श्वेतशब्देन सिद्धावस्थो गुणः कर्तृत्वेनोच्यते । तदाह--श्वेतत्वेन प्रकाशते इति । शौक्ल्येन गुणेनोपलक्षितः प्रतिभासत इति श्वेतते इत्यस्यार्थः कारिकायामेव व्याख्यातः ।। 3 ।।

तदेवं शब्देन साध्यतयाभिधीयमानः समाश्रितक्रमः पौर्वापर्यवानार्थः क्रियेति लक्षितम् । पूर्वापरीभूतस्य क्षणप्रवाहस्य युगपदसन्निधानादेकक्रियालक्षणानुपपत्तिरित्याशङ्क्याह ।

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ।। 4 ।।

क्रमवतां क्षणानामेकफलोद्देशेन प्रवृत्तानां सङ्कलनाबुद्ध्या समापादितैक्यानां क्रियात्वव्यवहारः । तत्रावयवानां समुदाये गुणभावापत्तेः शब्दभेदप्रयोजकत्वाभावादेकधातूपादानाक्रियैका समुदायस्वभावावतिष्ठते । तस्याश्चावयवाश्रयः क्रमः पौर्वापर्यं च व्यवह्रियते । समुदायाश्रयं चैकत्वमध्यारोपितम्, उत्पत्तिसमनन्तरनिरुद्धानामवयवानां वस्तुभूतसमुदायाभावात् ।

ततश्चाधिश्रयणादीनां व्यापाराणां यः समुदायो वुद्ध्यैकत्वेन गृहीतः स पचत्यादीनां वाच्यः । समुदायादेव हि फलं निष्पद्यते, न विचटनमात्राद्, अधिश्रयणादिवैयर्थ्यप्रसङ्गादिति व्यवहितैरप्याधिश्रयणादिभिः समीहितफलानुगुणैर्यथास्वं विशेष आधातव्यः इत्यनेकापेक्षे कार्ये नानान्तर्यमात्रेण कस्यचिद् विशेष इति फलविशेषसम्पादकत्वेन पचादीनामर्थः प्रतीयमानः फलैक्यादेकत्वेनावसीयमानः क्रिया ।। 4 ।।

यदि तर्हि समुदायः क्रिया अधिश्रयणादीनामवयवानां पचिक्रियात्वं न स्यात् । तथा च सर्वास्वधिश्रयणाद्यवस्थासु पचतीति प्रत्ययो न प्राप्नोतीति केषुचित् क्षणेष्वतीतानागतेषु तावन्मात्रस्य पचिरूपत्वाभावाद् भूतभविष्यद्व्यवहारो न स्वादित्याशङ्क्याह ।

समूहः स तथाभूतः प्रतिभेदं समूहिषु ।
समाप्यते ततो भेदे कालभेदस्य सम्भवः ।। 5 ।।

अधिश्रयणारम्ङ एव फलादिसन्धेः समस्तक्रियाकलापस्तत्रैवाध्यस्यते । तथा च पचतीति वर्तमानकालतायां प्रयोगः । तावन्मात्रस्य च फलोपयोगिनो रूपस्यातीतत्वादपाक्षीदित्यपि प्रयुज्यते । क्षणान्तरस्य भाविनोऽध्यारोपितपचिरूपस्याभिसन्धाने पक्ष्यतीति । तथाभूतः इति । गुणभूतक्रमजन्मावयवः । तथाभूतस्य हि समुदायस्य प्रत्येकमवयवेऽध्यासात् तत्प्रत्ययोत्पत्तिः । अध्यासश्च सर्वत्र पचतीति प्रत्ययस्यानुवृत्तेरेव ज्ञायते । प्रत्यवयवपरिसमाप्तत्वाच्च समुदायस्यावयवानां तद्रूपाध्यारोप उपपद्यत एव । एवमप्येकत्रावयवे समुदायरूपारोपात् साध्यताप्रत्ययः कथम् । एकत्रैव ह्येकीकृते समुदायेऽवयवान्तराभावात् किमपरमवशिष्टं यत् साध्यं प्रतीयेत । अत्रोच्यते । न समुदायबुद्धयैकत्वेन, नाप्यवयवबुद्ध्या अयं चायं चेति समुच्चयेन प्रत्येकं समुदायस्यावयवेष्वारोपोऽत्र । किं तर्हि ? पूर्वापरीभूतावयवत्वेनैव । तथा चैकस्मिन्नप्यवयवे व्यपगते समुदायस्य व्यपगमारोपादपाक्षीदिति भूतकालता । भाविनि च पक्ष्यतीति भविष्यत्कालता ।। 5 ।।

यदि तर्हि प्रत्यवयवं समुदायाध्यारोपात् क्रियात्वं तदा तस्यावयवस्य वर्तमानरय प्रत्यक्षत्वात् कथमिदमुक्तं भाष्ये "क्रिया नामेयमत्यन्तापरिदृष्टा न शक्या पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठितः । सासावनुमानगम्या" (M.Bha.I,p.254,1,15.) इत्याशङ्क्याह ।

क्रमात् सदसतां तेषामात्मानो न समूहिनाम् ।
सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिः ।। 6 ।।

समूहिनाम् क्रियाक्षणानां क्रमेण भवतां सद्सद्रूपत्वात् सदेकवस्तुविषयैरिन्द्रियैः संबन्धाभावादिन्द्रियार्थसन्निकर्षजज्ञानविषयभावापत्त्ययोगादत्यन्तापरिदृष्टा साधनेभ्योऽन्यानुमानगम्या क्रिया भाष्येऽभिहिता । एकस्मिन्नपि हि क्षणे समूहोऽध्यस्यमानः समाश्रितपौर्वापर्य एवाध्यस्यते । तथारूपस्यैव क्रियात्वात्, तेन च रूपेणेन्द्रियाविषयत्वात् ।। 6 ।।

एतदेव दृष्टान्तनोपपादयति ।

यथा गौरिति सङ्घातः सर्वो नेन्द्रियगोचरः ।
भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते ।। 7 ।।
इन्द्रियैरन्यथा प्राप्तौ भेदांशोपनिपातिभिः ।
अलातचक्रवद्रूपं क्रियाणां परिकल्प्यते ।। 8 ।।

गौरश्व इति वर्णसमुदायोऽयुगपद्भाव्यवयवो यथा वर्तमानावयवद्वारेण श्रोत्रेन्द्रियपरिच्छेद्योऽपि संस्कारक्रमायातान्त्यबुद्धिनिर्गाह्यः तथा क्षणसमाहारात्मिकापि क्रिया वर्तमानक्षणगतेन्द्रियसंबन्धाध्यारोपितप्रत्यक्षभावा समुदायरूपतया फलानुमेया । तत्र स्फोटः प्रत्यक्ष एवेति नासौ दृष्टान्तोऽक्रमोद्भिन्नश्च । समुदायस्तु वर्णानामुच्चरितप्रध्वंसिनामयुगपत्कालत्वादप्रत्यक्षो बुद्ध्या निरूपितैकत्वो दृष्टान्तो वर्णसमाहारमात्रदर्शनाश्रयेणात्र क्रियाया अप्येवंरूपत्वादसमस मयावयवसमाहारात्मकत्वात् । अत एव अलातचक्रवत् इत्याह । भ्राम्यमाणोल्मुकराजीनां चक्राकारतया भ्रान्त्याध्यवसायवत् क्रियाक्षणनामेकत्वपरिकल्पना प्रत्यक्षताभिमानश्च । क्रियया प्रत्यक्षतयाध्यवसितया सह गृहीतसंबन्धमाख्यातपदं प्रयुज्यते ।

एकपदोपात्ताङ्गभूतकारकभेदावधारणान्निर्ज्ञातभेदा धातुभिरभेदेन प्रत्याय्यत इति शब्दार्थत्वमाश्रित्योच्यते एका क्रिया इति ।
तथा च साधनस्य लकारेणानभिधाने क्रियैकत्वेन व्यवह्रियते आस्यते भवद्भिः इति ।। 7,8 ।।
भवत्वेवमधिश्रयणाद्यवयवानां पचादिक्रियाणाम् । अधिश्रयणादीनां त्वावयवक्रियाणां प्रत्यक्षतैव न्याय्येत्याशङ्क्याह ।
यथा च भागाः पचतैरुदकासेचनादयः ।
उदकासेचनादीनां ज्ञेया भागास्तथापरे ।। 9 ।।
अधिश्रयणादीनामपि संस्कारकाः स्वावयवा विद्यन्त इति तेऽपि पूर्वापरीभूताः क्रमवन्त एव क्रियाविशेषाः प्रत्यक्षभावमतिवर्तन्त एव । तथा हि स्वावयवपरिकल्पनया पूर्वापरीभूतसमुदायात्मका एवैते । तद् यथा हस्तप्रसारणस्था
लीविन्यासेष्टकाविनियोजनादयोऽध्यारोपि तसमुदायारूपाः कालत्रयाभिधायिनापि अध्यशिश्रयद्, अधिश्रयिष्यति, अधिश्रयतीति शब्देन प्रत्याय्यन्त इत्यवयवसमूहात्मकत्वात् पचिक्रियावदप्रत्यक्षत्वमेव ।। 9 ।।
अत्र पर्यन्तवर्ती भागस्तर्हि निरंशः प्रत्यक्षः स्यादित्याशङ्क्याह ।
यश्चापकर्षपर्यन्तमनप्राप्तः प्रतीयते ।
तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते ।। 10 ।।
अल्पीयसः परमाणुप्रख्यस्याशक्यावयवविभागस्य क्रियाक्षणस्य क्रियात्वं नास्ति । आश्रितक्रमरूपत्वात् क्रियाया इति न तेन क्रियाया अप्रत्यक्षताव्यभिचार उद्भावनीय इत्यर्थः क्रियात्वाभावादेव च क्रियाशब्दस्याप्रयोगः । शब्दार्थोऽर्थ इति न्यायात् । क्रियाशब्दस्याप्रयोगे क्रियात्वाभावमाह । साध्यमानरूपतया हि तिङन्तेनाभिधीयमानोऽर्थः क्रिया । केवले च निरंशे क्षणमात्रे क्रियाशब्दाप्रयोगः । अयमर्थः । नेहवास्तवो भागभेदश्चिन्त्यते, अपि तु शब्दात् प्रतीयमानः । शब्दाच्च क्षणमात्रस्वभावापि विप्रकीर्णावयवा समूहात्मनैव सर्वा क्रिया प्रतीयत इति सिद्धं शब्दवाच्यतया क्रियायाः सक्रमत्वमतीन्द्रियत्वं च ।
क्रमरूपानध्यासे तु प्रत्यस्तक्रमो नाख्यातावाबिधेयः ।। 10 ।।
यदा तु प्रयोगस्तदा--
पूर्वोत्तरैस्तदा भागैः समवस्थापितक्रमः ।
एकः सोऽप्यसदध्यासादाख्यातैरभिधीयते ।। 11 ।।
सोऽप्यपकर्षपर्यन्तमनुप्राप्तो भागः समूहान्तः पाती पूर्वोत्तरबागगतपौर्वापर्याध्यारोपितक्रमः क्रियालक्षणमनु पतत्येवेति क्रमात् सदसतां तेषां समूहिनामप्रत्यक्षतैवेति सर्वथात्यन्तापरिदृष्टा क्रियेति सिद्धम् । अनेनैवाशयेन निरुक्तकारः प्राह--
"पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीव्युपक्रमप्रभृत्यपवर्गपर्यन्तम् "
(Ni.1.1.11.)
इति । न क्षणानां पूर्वापरीभावोऽत्यन्तभेदात् । न हि यः पूर्वक्षणः स एव परः सम्पद्यते । न चैकस्यार्थस्य रूपान्तरेणापरिणामे च्विप्रत्यय उपपद्यते । अवयवेषु तु समुदायाध्यासात् तस्या चाभेदात् पूर्वापरीभावो युज्यते । पूर्वावयवानुस्यूतत्वे रूपान्तरेणावस्थानाध्यवसायाच्व्यर्थोऽपि च सङ्गच्छते । भागशः प्रत्यक्षत्वाच्च न शक्या पिण्डीभूता पांसुराशिवत् क्रिया निदर्शयितुमित्युक्तम् ।। 11 ।।
एवं साध्यस्वभावः सक्रमोऽर्थः क्रियेति लक्षणे सत्ताया नित्यत्वादसाध्यत्वादक्रमत्वात् कथमस्तीति क्रिया तिङन्तावाच्येत्याशङ्क्याह ।
कालानुपाति यद्रूपं तदस्तीति प्रतीयते ।
परितस्तु परिच्छिन्नं भाव इत्येव कथ्यते ।। 12 ।।
इह साध्यत्वेनाभिधीयमानोऽर्थः सिद्धो ।अपि क्रियेति
"क्रिया चैव हि भाव्यते, स्वभावसिद्धं द्रव्यम्" (M.Bha.I,p.2571,9.)
इति शाब्देन रूपेण क्रियालक्षणाख्यानात् सत्तापि आख्यातात् साध्यतया प्रतीयमाना क्रिया । तथा च कालात् क्रिया विभज्यत इति कालानुपातिता यथायथमुपपद्यते, अभूद् अस्ति भविष्यतीति । क्रियाधर्मस्य कालाभिव्यङ्ग्यत्वस्य दर्शनादस्त्यादीनां

क्रियात्वम्, सिद्धस्य कालेनायोगात् । न हि घट इत्युक्ते कालविशेषावगतिरस्ति । निर्ज्ञातायां च सत्तायां किं करोतीति प्रश्नासम्भवादस्तीति प्रतिवचनाभावः । न तु क्रियात्वाभावात् । विनाशा शङ्कायां किं करोति देवदत्त इति प्रश्ने अस्ति तावदिति प्रतिवचनोपपत्तेः । कृभ्वस्तयः क्रियासामान्यवचनाः, पचत्यादयः क्रियाविशेषवचनाः, करोतिना हि पचत्यादीनां सामानाधिकरण्यात् तद्विशेषत्वावसायो ब्राह्मणो गार्ग्य इति यथा । यथा ब्राह्मण्यं सामान्यं तद्विशेषो गार्ग्यस्तथा करणं सामान्यं पाकादयस्तद्विशेषा इति किं करोति पचतीत्यादिसामानाधिकरण्योपपत्तिः । इत्थं च करोत्यर्थप्रश्नः पचत्यादिभिर्व्याकृतो भवति । अर्थभेदे तु न प्रश्नसामानाधिकरणो निर्णयो भवेत् । अत एव विशेषसामानाधिकरण्ये विसेषवचना अपि कृभ्वस्तय इत्युक्तम् ।

अभिन्नां चैव भिन्नां च प्राहुः कृभ्वस्तय क्रियाम् ।
एकानेकविशेषस्ता प्रवृत्तिः सार्वनामिका ।।

इति । अनेकव्यक्तिसमवेता सामान्यात्मिका अभिन्ना । नियतव्यक्तिनिष्ठा भिन्ना । सामान्यस्य प्रत्येकं परिसमाप्तत्वात् प्रतिनियतविशेषपरेऽभिधाने सामान्यशब्दोऽपि प्रयोगार्ह एव । तद्यथा सर्वनामशब्दाः सर्वार्थावमर्शयोग्या एव नियतेऽर्थे प्रयुज्यन्ते तं ब्राह्मणमानयेति । अत एव सर्वस्मिन् प्रातिपदिकार्थे प्रवृत्तेः प्रवृत्तिः सार्वनामिका' इत्युक्तम् । ननु च करोत्यर्थ विशेषत्वे सर्वधात्वर्थानामासनमपि करणमिति किं करोतीति प्रश्ने न करोत्यास्ते इति करोत्यर्थनिषेधेनोत्तरं कथं सङ्गच्छते । उच्यते । नात्र क्रियासामान्यं पृच्छ्यते, अपि तु लोकप्रसिद्ध एव गमनादिविशेषः । तत्रैवलौकिकानां क्रियात्वाभिमानादिति युक्त एव गमनादिव्युपरमे करोतिप्रतिषेधः । यदा तु यां काञ्चित् कियां जिज्ञासते तदास्ते शेते इत्यपि प्रतिवचनं भवत्येवेत्यासनादेरपि क्रियात्वम् । कथमपरिस्पन्दरूपस्य तस्य तथात्वमिति चेत्, तन्न, यस्मान्न कायव्यापार एव क्रियालक्षणः , अरि तु साधनानां प्रवृत्तिविशेष इति प्रक्रान्तम् । स च प्रवृत्तिविशेषः सर्वत्रैवानुभवसिद्धः । पर्वतस्तिष्ठतीत्यादावप्याश्रितक्रमरूपस्यार्थस्यावगमात् । न हि सर्वेषां साधनानामेकरूपो व्यापारः केनचिदुपपादयितुं शक्यते । तस्मात् पर्वतादेरप्येकदेशापरित्यागलक्षणस्तिष्ठतौ व्यापारोऽस्त्येव । तदेवमाख्यातान्नियतकालास्तिक्रिया प्रतीयते । सैव च सत्ता नामपदात् सिद्धतया प्रतीयते भाव इति । अपूर्वापरो हि भावः शब्दशक्त्यनुरोधात् तिङन्तेनासादितपूर्वापरोऽभिधीयते पचतीति । कृता तु सिद्धरूपः पाक इति । अत्रापि च धातुभागेन साद्यमानावस्थैव क्रियाभिधीयते । एतावांस्तु विशेषः । आख्याते प्राधान्येनोच्यते पूर्वापरीभूता क्रिया, कृत्सु प्रत्ययार्ते गुणीभूतेति । तथा चौदनस्य पाक इति प्रकृत्यर्थद्वारकः साधनयोग उपपद्यते । साधने च प्रत्ययः । अन्यथा कस्य तत् साधनं प्रत्ययार्थः स्यात्, कस्य वा सिद्धताख्यो धर्मो घञादिनोच्येत । प्रत्ययार्थस्य सिद्धतायाः सत्त्वभूतस्य प्राधान्यात् तस्याभ्यावृत्त्ययोगात् पञ्चकृप्वः पाक इति प्रयोगायोगः । क्रियोपपदाश्रयस्तु प्रत्ययः प्रकृत्यर्थाश्रयः भोक्तुं पाक इति भवतीत्यनन्तरकाण्डे निर्णीतमिहाप्यग्रे निर्णेष्यते । तदेवं पूर्वोत्तरभाग गतक्रमाश्रयेणाख्याताभिधेया सर्वैव क्रियाध्यारोपितक्रमेति न सत्ताया अपि काचित् क्रियात्वे विचिकित्सा ।। 12 ।।

यद्येवं क्रमस्यासतोऽध्यारोपादमुख्यत्वं क्रियायाः प्राप्नोतीत्याशङ्ख्याह ।
व्यवहारस्य सिद्धत्वान्न चेयं गुणकल्पना ।
उपचारो हि मुख्यस्य सम्भवादवतिष्ठते ।। 13 ।।

गोशब्दस्य सास्नादिमति मुख्यत्वात् तत्समानगुणे वाहीकादावुपचरिता प्रवृत्तिपरित्युच्यते । क्रियायास्तु समानकालानाश्रितपौर्वापर्यावयवाया अभावान्न मुख्यता काचित् । सर्वत्र पूर्वोत्तरासमसमया वयवगतकमरूपाध्यारोपादिति नोपचारार्थः कश्चित् । एवंविध एव हि क्रियाव्यवहारः प्रसिद्धः । तथा चैकोऽपि क्षणः समाश्रितक्रमः क्रियेत्युक्तम् ।। 13 ।।

अत्र पूर्वं `प्रतिभेदं समूहः समूहिषु समाप्यते' इति क्रमकल्पनोक्ता । अधुना प्रकारान्तरेणाह ।
आहितोत्तरशक्तित्वात् प्रत्येकं वा समूहिनः ।
अनेकरूपा लभ्यन्ते क्रमवन्तः इवाक्रमाः ।। 14 ।।

समूहिनः क्षणाः प्रत्येकमक्रमा अपि भावतः समनन्तरवर्तिक्षणसमूहगतभेदक्रमाध्यारोपादनेकत्वेन सक्रमत्वेन चावसीयन्त इति प्रत्येकं ते क्रियालक्षणमनुपतन्ति । तथा च सर्वत्राधिश्रयणादौ पचतिशब्दप्रवृत्तिः, अतीतानागतवर्तमानतासिद्धिश्च पचत्यपाक्षीत् पक्ष्यतीति । पूर्वं समूहस्यैव प्रत्येकमध्यास उक्तः । इह तूत्तररूपस्य पूर्वेषु, न तु पूर्वस्य परेषु तस्यानुभववासनावशेनैव

तद्विशिष्टोत्तरप्रतिपत्तेरयत्नसिद्धत्वादिति विशेषः ।। 14 ।।
अथवा प्रधानभूतैव पचत्यादिक्रिया फलं प्रत्यनन्तरा अधिश्रयणादीनां तु तादर्थ्यात् तथात्वमित्याह
अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः ।
प्रधानभूतां तादर्थ्याद् अन्यासां तु तदाख्यता ।। 15 ।।
यत्समनन्तरमोदनादिफलनिष्पत्तिः सा क्रिया फलोपायत्वेनानुष्ठीयमाना । तया हि यत् तत् विचटनं तण्डुलावयवानामवयवान्तरेभ्यो विभागो यदनन्तरं मार्दवादयो निष्पद्यन्ते तद् यदाधिश्रयणादिषु प्रत्यस्तरूपं भवति तदा पचतीत्याख्यातशब्दाभिधेयं क्रियारूपमिति । यतो ह्यनन्तरं फलनिष्पत्तिः सा क्रिया । विचटनानन्तरमेव चौदननिष्पत्तिरिति विचटनमेव तु पाकः । पूर्वे तु व्यापारास्तदुपकारिणो न कार्यजन्मनि साक्षादुपयुज्यन्ते । न हि साक्षादजनयत् किञ्चित् कारकं नाम । यस्त्वधिश्रयणदिकाले पचतीति प्रत्ययः स विचटनोपा यत्वादधिश्रयणादीनां प्रधानभूतविचटनक्रियाध्यासवशात् । नन्वेवमधिश्रयणस्य सिद्धस्योपकारकत्वा(स्व?) भावात् सिद्धत्वम्, तत्र पचिरूपाध्यासश्चेति प्रत्यक्षःपाकः प्राप्तः । नैतदेवम् । सिद्धस्वभावस्यार्थस्य धातुवाच्यत्वाभावादधिश्रयणं सिद्धेन रूपेण न पचिः, अपि तु साध्येन विचटनरूपेण धातुवाच्यम् । तदध्यासात् पचिः । सिद्धसाध्ययोर्हि निष्पन्नानिष्पन्नपोरधिश्रयणविचटनयोरैकात्म्यापत्तौ पचत्यादिशब्द प्रयोगः । विचटनस्य तर्हि नियतकालत्वात् पूर्वापरीभावः कथम् । उच्यते । विचटनं पारशब्दवाच्यं भेदाभावाद्यद्यपि न पूर्वं न परं तथापि गुणक्रियासु तद्भूपारोपाद् गुणक्रियाणां पौर्वापर्यात् पूर्वापरीभूतमित्युच्यते । अन्ये तु विचटनस्यैव रूपमधिश्रयणादिरूपं प्रतिपन्नाः, न रूपशून्यानधिश्रयणादीन प्रत्यस्तविचटनरूपानिति । पूर्वत्र मते।ऽधिश्रयणादिषु विचटनरूपस्याध्यासात् पचिप्रत्ययः उक्तः । सम्प्रति तु विचटनस्यैवानेकरूपत्वादिति मतविकल्पः । अत्र चायमाशयः । शब्दप्रमाणका वयम् । शब्दाच्चाधिश्रयणादयः पाकात्मनावगम्यन्ते । न च पचतिप्रत्ययस्य सर्वावस्थासु विशेषमुपलभामहे, येनाधिश्रयणादिषु पचतिरूपाध्यासाद् गौणः स आश्रीयेत । तस्मादनेकरूपं विचटनमेव शब्दार्थ इति केचित् । यथा तु कारिकार्थः तथा विचटनमेव मुख्यं पचिरूपं पूर्वापरानुसन्धानेन समाश्रितक्रमं साध्यमानावस्थम् । तत्समर्थानां तु व्यापाराणामुपचरितं तत् क्रियात्वम् । तथा च
"अथ कः पचेः प्रधानोऽर्थः, यासौ तण्डुलानां विक्लित्तिः "
(M.Bha.II.p.32.1.24-25)
इति च भाष्ये कर्तृव्यापारस्य पचेरूपलक्षणार्थत्वात् सर्वधात्वर्थविषयस्याभिधानम्, तादर्थ्यादेव धातुबिरस्मिन् दर्शने युज्यते । सर्वत्रैव हि कर्तृभावनोपसर्जनमर्थमभिदधति धातवः । तथा च कर्तृस्थक्रियाणामपि बुध्ये द्वेष्टि इच्छतीत्यादौ बोधनं निर्वर्तयतीत्याद्यर्थः । कर्तृव्यापारश्चात्र यथायथं करणप्रणिधानादयः । अस्तीत्यत्राप्यात्मानं बिभर्तीत्यर्थः । तथा चात्मभरणार्था व्यापारास्तादर्थ्यादभिधीयन्त एव । एवं च कृत्वा द्वयर्थः पचिरिति पचिग्रहणं सर्वधातूपलक्षणार्थं वेदितव्यम् । उदाहरणमात्रत्वादस्य । तदेवं प्रत्येकं व्यापारभेदाः समारोपितसमूहरूपाः समारोपितानन्तरक्षणभेदा वा क्रमिकाः क्रियारूपत्वाच्च व्यवहारस्य समानसङ्केताः समारोपं प्रतिपद्यन्त एव । फलप्रसवयोग्योऽन्त्यो भागः क्रिया । तदर्थास्त्वन्ये व्यापारा इति दर्शनभेदेनोपपादितम् ।। 15 ।।
इदानीं सत्तायाः क्रमरूपाध्यासेऽपि साध्यता कथमित्याह ।
सत्सु प्रत्ययरूपोऽसौ भावो यावन्न जायते ।
तावत् परेषां रूपेण साध्यः सन्निभिधीयते ।। 16 ।।
सत्सु हेतुषु, प्रत्ययरूपो हेतुस्वभाव असौ पदार्थः कारणात्मना सत्त्वाद्, यावन्न जायते कार्यात्मना सत्त्वं न प्रतिपद्यते, प्रत्ययरूप आविर्भूतस्वभावो वा यावन्न सम्पद्यते, तावत् अत्रान्तराले, परेषाम् हेतूनाम्, रूपेण उपलक्षितः सिद्धत्वात् कर्तृभावमनुभवन् स्वात्मना साध्यो भवन्नाख्यातेन पूर्वापरीभूतः साध्यमानावस्थःऽभिधीयते समुद्युक्तकारणव्यापारः प्रतिष्ठामासादयंस्तिङन्तगोचरः पदार्थ इत्यर्थः । तत्र च पूर्वभागो जायतेशब्दगोचरः । यथा वक्ष्यति
"पूर्वाभागस्तु यज्जातात् तज्जन्म व्यपदिश्यते "(verse 28)
इति । उत्तरभागोऽस्तिशब्दगोचरः । सत्ताप्रतिलम्भाभिमुख्यं हि जन्म । तत्र व्यापृतं वस्तु व्यापारावसाने सत्ता समासाद्यास्तीति

पूर्वव्यापाराध्यारोपेणाभिधीयते । अस्त्यात्मानं बिभर्ति सत्तां भावयतीति यावत् । एवं समाश्रिते साधनव्यापारे साध्यता ।। 16 ।।

तदभावे पुनः--

सिद्धे तु साधनाकाङ्क्षा कृतार्थत्वान्निवर्तते ।

न क्रियावाचिनां तस्मात् प्रयोगस्तत्र विद्यते ।। 17 ।।

परिसमाप्तरूपो भावे फलाभावान्निरपेक्षकारणव्यापारेऽपरिगृहीतव्यापारे परिगृहीतक्रमार्थवचनानि तिङन्तपदानि प्रयोगं नासादयन्ति । तथा च तत्र भाव इति सिद्धार्थवाचकं नामपदं प्रवर्तत इत्युक्तम् ।। 17 ।।

तदेवं सर्वैव क्रिया साध्यस्वभावा क्रमवतीति निगमयितुमाह--

स च पूर्वापरीभूत एकत्वादक्रमात्मकः ।

पूर्वापराणां धर्मेण तदर्थेनानुगम्यते ।। 18 ।।

सः अनन्तरप्रतिपादितसत्तत्त्वः क्रियाख्योऽर्थः, एकत्वात् पूर्वापरभावरहितोऽत एव पूर्वापरभागगतानुपूर्वीरहितोऽपि तद्व्यतिरिक्ततदर्थपूर्वापरक्षणगतानुपूर्वीसमारोपादाश्रितक्रमरूपं क्रियालक्षणं पुष्णातीत्यर्थः । तदर्थेन इति तादर्थ्याद् गुणक्रियागतो धर्मः प्रधानक्रियायामुपचर्यत इत्याह ।। 18 ।।

यतः फलैक्यादभेदाध्यवसायोऽत्रेत्याह ।

असन्निरवर्तते तस्माद् यत् सत् तदुपलभ्यते ।

तयोः सदसतोश्चासावात्मैक इव गृह्यते ।। 19 ।।

एकफलोद्देशेन प्रवृत्तानां क्रमवतां क्षणानां पूर्वो व्यपगतोऽसन् । वर्तमानश्च उपलभ्यते क्षणः सन्निति । तयोर्भिन्नयोरप्यैक्यमध्यवसाया पूर्वापरापि पूर्वापरीभूता क्रमवती क्रिया व्यवस्थाप्यते ।। 19 ।।

एवं तावत्

पदार्थानामपोद्धारे जातिर्वा व्यक्तिरेव वा । (Vak.III.जा.2.)

इति व्यक्तिवादिमतेन क्रियालक्षणोऽपोद्धारपदार्थो निर्णीतः । इदानीं जातिवादिमतेनाह-

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।

असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यते ।। 20 ।।

सर्वत्र प्रत्ययानुवृत्तिप्रमाणसाधिता जातिरिति पचतीति प्रत्ययस्य कर्तृकर्मादिभेदेऽप्यनुवृत्ते क्रियाव्यक्तिसमवेता जातिपवश्याब्युपगन्तव्या । सैव च धातुवाच्या । स्फोटवच्चास्या असमसमयभाविभिरपि क्षणैरभिव्यक्तिः अत एव अनेकव्यक्तिवर्तिनीम् इत्याह । जातित्वादेवानेकव्यक्तिवर्तित्वे लब्धे सदसद्व्यक्तिव्यङ्ग्यत्वमावेदयितुमिदमुक्तम् । भ्रमणत्वादिजातिवदुपव्यं जनावृत्तिबलेन क्रियाजातिरभिव्यक्तिमासादयति । तथा च स्वतो नित्यत्वेऽप्यस्याः स्वाश्रयमुखेन साध्यत्वं सक्रमत्त्वं च क्रियालक्षणमवतिष्ठते । अतश्च स्वाश्रयद्वारेणैवास्याः साधनाकाङ्क्षा ।। 20 ।।

यथा व्यक्तिदर्शने

अनन्तरं फलं यस्याः.....(verse 15.)

इति मतान्तरमुपदर्शितं तथात्रापि जातिदर्शने प्राह ।

अन्ते या वा क्रियाभागे जातिः सैव क्रिया स्मृता ।

सा व्यक्तेरनुनिष्पादे जायमानेव गम्यते ।। 21 ।।

यस्याः क्रियाव्यक्तोरनन्तरं फलं निर्वर्तते तत्र समवेता या जातिः सैव क्रिया । पूर्वास्तु तादर्थ्यात् क्रिया इति पूर्वानुसारेण गम्यमानत्वात् पुनरिह नोक्तम् । स्वाश्रयनिष्पादनद्वारेण चास्या अपि साधनयोगः साध्यत्वं च ।। 21 ।।

एवमपरा जातिर्दर्शनभेदेन क्रियेत्युक्तम् । इदानीं परा जातिः सत्ताख्या महासामान्यरूपा जाति क्रियेत्युपपादयति । स्वव्यापारविशिष्टानां सत्ता वा कर्तृकर्मणाम् ।

क्रिया व्यापारभेदेषु सत्ता वा समवायिनी ।। 22 ।।

"संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।

जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।।"(Vak.III.जा33.)

इत्युक्तत्वात् क्रियाजातित्वं संबन्धिभेदोपधानेन सत्तायाः समर्थयितुं कर्तृकर्मसमवेतव्यापारावच्छिन्ना सत्ता क्रियाजातिरित्याह । व्यतिरेकिणोऽपि हि भावाः सत्ताया भेदोपाधय इत्युक्तं कर्तृकर्मणाम् इति । तत्रैव क्रियासमवायात् । तेषु च व्यापाराविष्टेषु क्रियाव्यवहारात् तत्समवेतैव क्रियोचिता । व्यापारसमवेता वा सत्ता स्वाश्रयोपहितभेदा अस्तु क्रिया । किमनेन व्यवधानेन कर्तृकर्मगता सत्तेति ।। 22 ।।

अत्रैव सत्ताजातिदर्शने मतान्तरमाह ।

अन्त्ये वात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते ।

भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः ।। 23 ।।

यदनन्तरं फलं तत्र व्यापारभागे या सत्ता सा क्रिया पूर्वास्तु तादर्थ्यात् । व्यापारविशिष्टा चेत् सत्ता क्रिया, अलमनया, व्यापार एवास्तु क्रियेत्याशङ्कयागमेनैत दभ्युपगमयति भाव एव हि इत्यादिना ।

"षड् भावविकारा भवन्तीति ह स्माह वार्ष्यायणिः"(Ni.I.2.8.)

इति भाष्यकारेणैवागमोऽनुसृतः । तथा च

"तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते"(Vak.III,जा.34)

इति सत्तैव भावशब्दवाच्या गुरवः क्रियेति मन्यन्ते । सैव हि संबन्धिभेदोपधानमात्रेण भिद्यमाना शब्दार्थवैचित्र्यमुपपादयति । तथाहि संबन्धिनोऽप्यस्यास्तत्त्वतः स्वशक्तिविष्फारा एवेति सत्ताद्वैतवादाभिप्रायेणेदं निगमयति

सत्ता स्वशक्तियोगेन.....

इत्यादि ।। 23 ।।

इदानीं बुद्धिः शब्दार्थ इति बौद्धपक्षे क्रियाव्यवस्थामाह ।

बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे ।

प्रत्यस्तरूपां भावेषु क्रियेति प्रतिजानते ।। 24 ।।

बुद्धिरिति तत्प्रतिभास्याकारोऽत्र विवक्षितः । तस्यैव हि भावेष्वध्यारोपो दृश्यविकल्पयोरभेदाध्यवसायात् । मतभेदेन चात्र जातिव्यक्ती क्रिये । महासामान्यं वा सत्ता । बुद्ध्याकारसमवायिनी सत्ता क्रिया भावेष्वध्यारोपिता च सैवमिति तदाश्रयेण साधनाकाङ्क्षा साध्यत्वं च सर्वमुपपद्यते । एतच्चोपचारसत्ता शब्दार्थ इति नयेन कथ्यते । सत्तायाः क्रियात्वे

"सैव भावविकारेषु षड्वस्याः प्रपद्यते" (Vak.III,जा.36)

इत्युक्तम् । तत्र भावस्य सत्ताया विकारा विशेषाः षट् सर्वक्रियाणां योनयः । षट्त्वमपि नात्यन्ताय भेदा वलम्बि ।। 24 ।।

यतः

आविर्भावतिरोभावौ जन्मनाशौ तथापरैः ।

षट्सु भावविकारेषु कल्पितौ व्यावहारिकौ ।। 25 ।।

सत्कार्यनये पदार्थानामाविर्भावोऽभिव्यक्तिरेवोत्पत्तिः । तिरोभावश्च ध्वंसः । असत्कार्यनये तु जन्मापूर्वोत्पत्तिर्विनाशश्च लयः । इत्येतौ दर्शनभेदेन भिन्नो द्वौ भावविकारौ षट्सु मध्ये परिकल्पितौ व्यवहारप्रसिद्ध्यारोपितौ । तथा हि-सत्तालक्षणस्य भावस्य नित्यत्वादुदयप्रध्वंसायोगः । सदैकस्वरूपत्वाच्चाविर्भावतिरोभावावपि न स्तः । धर्मान्तरस्य तु तौ सत्तागतत्वेन व्यवहृतौ । सतो विनाशविरोधोऽपि सतश्च जन्मायोगो धर्मान्तरस्यापि ।। 25 ।।

एवं जन्मनाशावेव कल्पितौ क्रियाव्यवहारं सर्वं व्याप्नुत इत्याह ।

ताभ्यां सर्वप्रवृत्तीनामभेदेनोपसंग्रहः ।

जन्मैवाश्रितसारूप्यं स्थितिरित्यभिधीयते ।। 26 ।।

सर्वः क्रियाकलापो यथायोगं जन्मानाशाभिन्नः । उपचयापचयरूपौ हि विकारावजस्रप्रवृत्तिषु भावेषु । तौ च तात्पर्यतो धर्मान्तराविर्भावतिरोभावलक्षणौ । तथा हि - जन्म केनचिद् धर्मेणाविर्भावः । तत्र सव्यापारं पूर्वोत्तरावस्थात्यागावाप्त्योरन्तराले वर्तमानं जायते इत्यभिधीयते वस्त्वात्मलाभोन्मुखम् । समासादितरूपं तु सव्यापारमिवास्तीत्याख्यातपदेनाभिधीयत इत्यस्तित्वमात्मलाभपर्यायमाविर्भावरूपस्य जन्मन एवोत्तरोऽवस्थाविशेषः । तथा च निरुक्तकारः

"जायत इति पूर्वभावस्यादिमाचष्टे"(Ni.I.2.)

इत्याह । पूर्वभावस्य विपरिणामादेर्व्यावहारिकात् प्रथमस्यास्तित्वस्यादिर्जन्म इत्यर्थः । तथा

"अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणमाचष्टे" (Ni.I.2)

इति । उत्पन्नस्य सत्त्वस्येति जन्मोत्तरकालतामेवाभिव्यनक्ति । अवधारणं निश्चयः । अस्त्यात्मानं भावयति । अस्याश्च भाव्यमानायाः सत्तायाः सन्तानेन प्रवृत्तेः पूर्वोत्तरक्षण निरोधोपजनाभ्यां सङ्गहः । यावच्च सदृशसन्तानप्रवाह स्तावदलक्षितविवेको भावोऽस्तीत्यवधारणार्थमभिधीयते । अस्त्यात्मानं विभर्त्येव न ध्वंसते इत्यर्थः । विसदृशसन्तानोपजनेऽर्थभेदेन विपरिणमत इति व्यपदिश्यते तत्त्वादप्रच्युतं वस्तु । यदाह निरुक्तकारः ।

"विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद् विकारमाचष्टे" (Ni.I.2,)

इति । अत्रैवोपचयविवक्षायां वर्धत इति । यदाह निरुक्तकृत् ।

"वर्धत इति स्वाङ्गाभ्युच्चयं संयोगिनां पदार्थानामाचष्टे"(Ni.I.2,)

इति । वर्धते शरीरेण, वर्धते विजयेन इति । अपचयविवक्षायां तु पूर्वमपक्षीयत इति तदनन्तरं विनश्यतीति तिरोभावाभिधानमवस्थाद्वयेन । यदाह स एव ।

"अपक्षीयत इति स्वाङ्गापचयं संयोगिनामर्थानामाचष्टे, विनश्यतीति पूर्वभावस्यान्तमाचष्टे" (Ni.I.2.)

इति । पूर्वभावोऽस्तित्वमुक्तम् । तदेवं द्वाभ्यां षड् व्याप्ताः । तत्राव्याप्तिर्भाव्यकृतोद्भाविता ।

"सर्वथा स्थित इत्यत्र धातुसंज्ञा न प्राप्नोति । बाह्यो ह्येतेभ्यस्तिष्ठतिः "

(M.Bha,I,p.258,1.14-15)

इत्याशङ्कय तिष्ठतेरपि क्रियात्वं वक्तुमुक्तम् जन्मैवाश्रितसारूप्यं स्थितिरित्यभिधीयते इति ।

सदृशप्रवाहरूपतयानिर्धार्यमाणविभागं जन्मैवम्(वा?)भिधीयते स्थितिरिति । जायते इतिवत् तिष्ठतीत्यपि सिद्धम् ।

क्रियान्तरनिर्व(व?)र्तकत्वेन चैवमभिधानाद् व्यापारविशेषः साध्यस्वभावो धातुनाभिधीयत एव ।। 26 ।।

किं बहुना, जन्मनाशावपि नार्थान्तरभूतौ अपि तु सत्तैव धात्वर्थः सर्वत्रेत्याह ।

जायमानान्न जन्मान्याद् विनाशेऽप्यपदार्थता ।

अतो भावविकारेषु सत्तैका व्यवतिष्ठते ।। 27 ।।

धर्माणां धर्मिपारन्त्र्येणावभासात् ततो व्यतिरेको न सिद्धः । अतश्च धर्म्येवानुगतो व्यावहारिकैः सर्वावस्थो व्यवहर्तुं सकृदाशक्य एवमभिधीयते जायते अस्ति विपरिणमते वर्धते इति । सत आविर्भावविरोधाद् असतोऽपि निरूहस्यात्मासादनासमर्थत्वाज्जन्मार्थोऽपि वस्तुतो न कश्चित् । सतो निरन्वयध्वंसविरोधाच्च विनाशोऽपि न व्यतिरिक्तः पदार्थः कश्चित् । तस्योपजने भावस्य प्रागिवोपलम्भप्रसङ्गात् तेन तस्य विनाशे तस्यापि व्यतिरिक्तस्योदये पूर्ववत् प्रसङ्गादुत्पद्यमानस्य च भावताप्रसङ्गादित्यादिदूषणमन्यैरेवाभिहितमनुसन्धेयम् । एवञ्च षट्स्वपि भावविकारेषु सत्यभूता सत्तैव महासामान्यस्वभावा । तस्याश्च नित्याया अप्याख्यातवाच्यत्वेन क्रमरूपोपग्रहवशेन साध्यस्वरभावतालक्षणं क्रियात्वमुक्तम् । नामपदप्रत्याय्यत्वेन तु साधनत्वम् ।। 27 ।।

असत्यपि च वस्तुतो जन्मादिभेदे व्यवहारः तत्तद्रूपतया प्रसिद्धः । तथा हि ।

पूर्वभागस्तु यज्जातात् तज्जन्म व्यपदिश्यते ।

आश्रितक्रमरूपेण निमित्तत्वे विवक्षिते ।। 28 ।।

परिनिष्ठितरूपो भावो जात इति व्यपदिश्यते । अस्मात्तु पूर्वोऽवस्थाविशेषो जन्म, यद्वशादसौ जात इति व्यपदेशमासादयति ।

तच्च जन्म निमित्तत्वेन साधनानां सव्यापारत्वे विवक्षिते पूर्वापरीभूतं जायतेशब्दगोचरः क्रिया भवति ।। 28 ।।
यतः
आख्यातशब्दैरर्थोऽसावेवंभूतोऽभिधीयते ।
नामशब्दाः प्रवर्तन्ते संहरन्त इति क्रमम् ।। 29 ।।
असौ जाताद्वस्तुनः पूर्वो भागः कारणात्मनावस्थानलक्षणो वस्तुतोऽविद्यमानक्रमोऽप्याख्यातशब्दाज्जायत इत्यस्मात् एवंभूतः समाश्रितक्रमः प्रतीयत इति क्रिया लक्षणमनुपतत्येव । तथा हि ।
पूर्वस्मात् प्रच्युता धर्मादप्राप्ता चोत्तरं पदम् ।
तदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ।। (Vak.III.जा.39)
इति पूर्वोत्तरावयवभेदानुपूर्वीसमाश्रयेणैव जन्यर्थो व्याख्यातः । स एव च पूर्वभागो जन्मेति नामपदेन संहृतक्रमरूपतया द्रव्यायमाणः सिद्धरूपोऽभिधीयते । आख्यातवाच्येन चाभेदाध्यवसायाच्च तत्र दृष्टस्य क्रमस्योपसंहरणाभिमान इति संहरन्त इव इति इवशब्दः । तथा च सर्वत्र नामाख्यातयोः सिद्धसाध्यरूपार्थाभिधानमनुसरणीयम् ।। 29 ।।
यथा च जन्म पूर्वभागस्वभावं तथा विनाशोऽप्युत्तरभागस्वभाव इति केषांचिन्मतमित्याह ।
फलं फलापदेशो वा वस्तु वा तद्विरोधि यत् ।
तदन्यदेव पूर्वेषां नाश इत्यपदिश्यते ।। 30 ।।
फलं कार्यरूपं कारणविरुद्धं विनाशाख्यां लभते । तद्यथा संयोगः कर्मणः, ज्ञानं वा ज्ञानान्तरस्य, धर्माधर्मयोः सुखदुःखसंवेदनमित्यादि वाच्यम् । फलापदेशो यः फलमिति भ्रान्त्या परमपदिश्यते वस्तुतोऽफलमपि । तद्यथा घटस्य कापालादयो मुद्गराभिघातज्जायमानाः, पटस्य तन्तवः शीर्णस्यानन्तर्यात् फलत्वेनाभिधीयमाना विनाशव्यपदेशमासादयन्ति । तद् इति बुद्धिस्थविनाश्यप्रत्यवमर्शः । तस्य यो विरोधी भावोऽकार्यभूतोऽपि सोऽपि विनाश इति व्यवह्रियते । तद्यथा संयोगस्य विभागः, सुखस्य दुःखमित्यादि । तदेवम् अन्यदेंव वस्तु विनाशः । न त्वपदार्थोऽभावरूपस्तुच्छः ।
तस्यावस्तुत्वादभाव्यत्वम्, भाव्यत्वे वा तुच्छतायोग इति चिरन्तनवैशेषिकाणां मतम् । स चाख्यातेन क्रियारूपकतयाभिधीयते सक्रमो विनश्यतीति,नामपदेन तु संहृतक्रमो विनाश इति ।। 30 ।।
ननु च वस्त्वन्तरं कथं वस्तुनो विनाश इत्याशङ्क्योपपादयति ।
नैवास्ति नैव नास्तीति वस्तुनो ग्रहणाद् विना ।
कल्पते पररूपेण वस्त्वन्यदनुगम्यते ।। 31 ।।
यथा कस्यचिद्रूपस्यानुभवं विनास्तीति व्यवहारो न कल्पते तथा नास्तीत्यपीति दृष्टान्तगर्भमभिधानम् । तदयमत्रार्थः । संसर्गिरूपविवेकेन न कश्चिदपि वस्तुनो व्यवहार इति यथा सत्ताबिसन्धानादिना अस्तीति व्यवह्रियते तथा फलाद्युपजने नास्तिताव्यवहरोऽपि युज्यते । भावप्रतियोगी ह्यभावः । स च शून्यतारूपो न युज्यते, अकिञ्चिद्रूपस्य प्रत्येतुमशक्यत्वात् । न हि प्रत्ययश्च जायते प्रत्येतव्यं च नास्तीति युज्यते । तस्माद्वस्त्वन्तरं फलाद्येव विनाश इति युक्तमुच्यते । पररूपेणैव हि वस्तुनो ब्रह्मकल्पस्यान्यान्यरूपतया व्यवहारावतरणम् ।। 31 ।।
ननु च वस्तुनो ग्रहणं विनान्धतमसे स्पर्शनेन्द्रियेण शून्यतारूपानुभवादभावोऽवसीयत इत्याशङ्क्याह ।
भावाभावौ घटादीनामस्पृशन्नपि पाणिना ।
कश्चिद्वेदाप्रकाशेऽपि प्रकाशे तत एव वा ।। 32 ।।
पाणिना संस्पर्शमन्तरेणाप्रकाशे तत एव वस्तुनो ग्रहणात् प्रकाश इव वस्तूनां भमावावावैत्येव कश्चित् प्रतिषत्ता । तथा हि सत्यप्यालोके तदभावे वा प्रमाणान्तरात् पुरोऽवस्थितं वस्तु सम्भावयन् भावमवैति, तद्विरोधिनं चार्थं निश्चित्याभावामिति,वस्तुग्रहणायत्तावेव भावाभावव्यवहारौ । सर्वस्यामपि दशायां समन्धकारेऽपि पूर्वप्रवृत्तवस्तुग्रहणानुस्मरणनिमित्तत्वात् पाणिसञ्चारेणापि चाभावावसायो वस्तुग्रहणादेव हस्तस्या स्पृष्टस्यानुभवात् । हस्तगतं हि स्प्रष्टव्यरूपमर्थान्तरविविक्तमनुभूय स्पर्शनेन्द्रियेणार्थान्तरस्याभावो निश्चीयते । तदेवं स्थितमेतद् वस्त्वन्तरं इति ।। 32 ।।

इदानीं दर्शनान्तराश्रयेण जन्मनाशौ विभजति ।
व्यापि सौक्ष्म्यं क्वचिद् याति क्वचित् संहन्यते पुनः ।
अकुर्वाणोऽथवा किञ्चित् स्वशक्त्यैवं प्रकाशते ।। 33 ।।
व्यापकं प्रधानतत्त्वं क्वचिद्देशे काले वा सौक्ष्म्यं तनुतामापद्यत इति सावस्था तिरोभावात्मिका नाशो नश्यतीति च नामाख्याताभ्यां सिद्धसाध्यरूपतयाभिधीयते । तदुक्तम् ।
तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ।। (Vak.III.जा.38.)
इति । क्वचित् पुनस्तदेव व्यापि वस्तु स्वनिमित्तवशात् संहन्यते संघातरूपतां भजते इति सावस्थाविर्भावात्मिका जन्म जायते इति च पूर्ववद् व्यवह्रियते । एतच्च प्रदानस्यावस्थाद्वयमनवरतप्रवृत्तिशीलरजोगुणवसाद् भवतीति क्रियारूपमनुपततीति । तदेवं निरुक्तकारमताश्रयेण भावविकाराः क्रियासामान्यभूताः व्याख्याताः ।। 33 ।।
यद्वा निष्क्रिय एवैको व्यापकः परब्रह्माभिधानो भावोऽचिन्त्यशक्तियुक्तो जन्मनाशव्यवहारमविद्यादशायां वर्तयति । न तु भावतो जन्मनाशौ कौचित् । तथा हि ।
सर्वरूपस्य तत्त्वस्य यत् क्रमेणेव दर्शनम् ।
भागैरिव प्रक्लृप्तिश्च तां क्रियामपरे विदुः ।। 34 ।।
सर्वपरिकल्पातीतमपि ब्रह्म समाविष्टसर्वशक्तित्वात् सर्वरूपेणावबासमानं कालाख्यस्वातन्त्र्यशर्तिप्रवर्तितक्रमावभासं पूर्वापरीभूतावयवसमाहारात्मिकां क्रियाप्रतीतिमुपजनयति साध्यस्वभावभावविषयाम् । सिद्धस्वभावभावविषयेतु दिक्शक्तिप्रकल्पितभागभेदप्रकल्पनान्मूर्तिविभागमारचयति । तथा चा प्रविभागमपि देशकालाभ्यां प्रविभक्तमिव चकास्तीति । तत्प्रविभागानुसारिणौ जन्मनाशौ समस्तक्रियाभेदानुसारिणौ व्यावहारिकौ प्रसिद्धौ । तदेवमियं विवर्तदर्शनेन क्रियाख्याता पूर्वं तु परिणामदर्शनेनोक्ता । अत एवात्र क्रमेणेव इतीवशब्दः । एकस्य हि तत्त्वादप्रच्युतस्य वस्तुतः क्रमो नास्ति । तथा तु दर्शनमात्रम् । अत एव
अकुर्वाणोऽथवा किञ्चित् स्वशक्त्यैवं प्रकाशते ।
इति तत्त्वादप्रच्युतस्य निष्क्रियस्य सक्रियस्येव प्रकाशनं विवर्तो द्योतितः ।। 34 ।।
इदानीं सत्ताद्वैतदर्शनेन "षड् भावविकारा भवन्ति" इति निरुक्तकारमतमेव निगमयितुमाह ।
सत्ता स्वशक्तियोगेन सर्वरूपा व्यवस्थिता ।
साध्या च साधनं चैव फलं भोक्ता फलस्य च ।। 35 ।।
"तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते"(Vak.III.जा.34)
तथा "सैव भावविकारेषु षडवस्थाः प्रपद्यते' (Vak.III.जा.36)
इति जातिसमुद्देशे सर्वभावानुयायिनी सत्सदिति प्रत्ययहेतुः सन्मात्ररूपस्य सर्वत्रानुगमान्माहासमान्यस्वभावा सत्ता सर्वशब्दानां विषय इति प्रतिपादितम् । तथा च स्वशक्तिरूपोपाधिनियमितशरीरा सर्वात्मकत्वमनुभवन्त्यपि सिद्धसाध्यरूपतया नामाख्यातपदवाच्यतामनुभवति । तद्व्यतिरेकेण च पदार्थान्तराभावात् सैव विचित्रशक्तित्वाद् भोग्यभोक्तृतत्साधनरूपतया विस्वयात्रामुद्वहति । सर्वत्र भोक्त्रादिषु सन्मात्रस्य संविद्रूपस्यानुगमात्तस्यैव सत्यता । विकल्पपरिघटितस्तु नानात्वव्यवहार इति सर्वाद्वैतावादिषु समानमेतत् ।। 35 ।।
अधुना यत्तत् साधनसमुद्देशे
प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।
शक्तिरेकाधिकरणे स्रोतोवदपकर्षति (Vak.III.सा.33)
इति क्रियालक्षणमुक्तं तदनुस्मारयति ।
क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् ।
साधनैकार्थकारित्वे प्रवृत्तिमनपायिनीम् ।। 36 ।।

प्रवृत्तिलक्षणेयं क्रिया नित्याना श्रिता

अपूर्वं कालशाक्तिं वा.....(Vak.C.का 34)

इत्यादिना पूर्वमेव व्याख्याता साधनशक्तिभिः सह साध्यमेकं फलं साधयतीति ताः शक्तीर्द्रव्याणां प्रवहद्रूपा सती समाकर्षयति ।। 36 ।।

कथमस्या नित्याया साध्यत्वमिति चेदाह ।

सामान्यभूता सा पूर्वं भागशः प्रविभज्यते ।

ततो व्यापाररूपेण साध्येव व्यवतिष्ठते ।। 37 ।।

प्रथमावस्थायामपूर्वादिरूपतया सा प्रवृत्तिः सामान्येनाभिधीयते । परतस्तु यथास्वं साधनव्यापारोपपादितप्रविभागा साध्यमानरूपतया क्रियेति व्यवह्रियते । तथा चानुद्भिन्नविशेषरूपदशायां कारकशक्तीनां प्रवर्तिका । ततो निष्कृष्य प्रवृत्तिरिति सामान्यसमारव्यायानाश्रयैव मण्यते । विशेषप्रक्रमे तु साधनसगवायिनी साध्यतामनुभवन्ती यथायथं पचिक्रिया भिधिक्रियेत्यादि व्यवहारं वर्तयति । अत एव

कारकाणां प्रवृत्तिविशेषः क्रिया" (M.Bha.I.p.258,1.11)

इति लक्षण मुद्दिष्टम् ।। 37 ।।

प्रकृति साधनानां सा प्रथमं तच्च कारकम् ।

व्यापाराणां ततोऽन्यत्लमपरैरुपवर्ण्यते ।। 38 ।।

अपूर्वादिस्वभावासौ सामान्यभूता प्रवृत्तिर्द्रव्याणां कारकशक्तीरादधाना प्रकृतिरिति मण्यते । अत एव प्रवर्तकत्वात् स्रोतसा तुल्या कथिता । एवंभूतापि च नित्यत्वादन्यसाधनसाध्या न भवतीति तदेव प्रथममाद्यं कारकम्, कारकाणामपि साधकमित्यर्थः । तदेव च प्रवृत्तिरूपं साधनभेदेषु प्रविभक्तशरीरं विशिष्टक्रियास्वभावमित्येकीयं मतम् । अन्ये तु ततः सामान्यभूतात् प्रवृत्तिलक्षणात् साधनभेदसमवेतानां विशिष्ट क्रियास्वभावानां व्यापाराणामन्यत्वं भेदमभ्युपयन्तीति दर्शनविकल्पः

सामान्यविशेषयोर्व्यतिरेकमतावलम्बनेनोक्तः ।। 38 ।।

तदेवं विभक्तलक्षणा क्रियाख्यातशब्दैरभिधीयते इत्युक्तम् । तत्रोच्यते-साधन-संख्याकालपुरुषोपग्रहा अप्याख्यातपदात् प्रतीयन्त इति कथं क्रिवावाचि नियमेन तदित्याशङ्क्योपपादयति ।

बहूनां सम्भवेऽर्थनां केचिदेवोपकारिणः ।

संसर्गे कश्चिदेषां तु प्राधान्येन प्रतीयते ।। 39 ।।

बहूनामर्थानां सम्भवे सति संबन्धोऽवश्यंभावी । तत्र च न सर्वे समशीर्षिकया संबन्धभाजः । अपि तु केचिदेवोपकारिणः अङ्गभूताः । ततोऽन्यः कश्चिद्-उपकार्योऽङ्गीति प्रतियते । तथा च प्रधानोपसर्जनभावे सति संबन्धः प्रतिष्ठामासादयति ।।39 ।।

ततः किमित्याह ।

साध्यत्वात्ततत्र चाख्यातैर्व्यापाराः सिद्धसाधनाः ।

प्राधान्येनाभिधीयन्ते फलेनापि प्रवर्तिताः ।। 40 ।।

व्यापाराः क्रियारूपाः साध्यस्वभावाः तिङन्तैः प्रदानभावेन अभिधीयन्ते इति साधनाद्यभिधानेऽप्याख्यातस्य क्रियावाचित्वमुपपद्यते । क्रियाप्रधानं ह्याख्यातम् । प्रधानेन च व्यपदेशा भवन्ति । सिद्धसाधनाः इति । सिद्धं निर्वृत्तं साधनमेषामिति कारकापेक्षया व्यापाराणां प्राधान्यमुद्दीपयति । भाव्यं हि निर्वर्त्यं प्रधानं भूतापेक्षया । यद्येवं क्रियापेक्षयापि फलं प्रधानं तदर्थं प्रवृत्तेरित्याशङ्क्याह फलेनापि प्रवर्तिताः इति । वस्तुवृत्तेन भवतु फलं प्रधानम् । आख्यातात्तु क्रियायाः प्रधान्याध्यवसायः । पचतीति हि न फलं शब्देनोपादीयते । अपि तु पदान्तरनिबन्धनं तत् । एकपदनिबन्धनेषु चार्थेषु गुणप्रधानभावश्चिन्त्यते । पच्यते इत्यपि कर्मणि प्रयोगे शब्दात् पाकस्यैव साध्यतया प्राधान्यं प्रतीयते । पाको निर्वर्त्यते, इति ह्यत्रार्थः । स तु पाकः फलसाधनायेति सामर्थ्यात् प्रतीयते फलं प्रत्यङ्गभावः क्रियायाः । साक्षात्तु शब्दव्यापारेण प्राधान्यमेवास्याः । क्रियैव हि

प्रधानभूता चोदिता सत्यनुष्ठीयते । वस्तुसामर्थ्यात्तु फलं भवति । न तु फलाय क्रिया चोदिता, प्राधान्येन चोदनाद् यजेत इत्यादि । अत एव सैव प्राधान्याद् वाक्यार्थो वैयाकरणानामिति क्रियाविवेकेऽस्माभिर्विवेचितं तत एवावधार्यम् । साधनानां तु सिद्धानां परमनुपकुर्वतामभिधाने प्रयोजनाभावात् तिङन्तेन गुणभूतान्येव क्रियायां साध्यायां तान्यभिधीयन्ते । कर्मणोऽपि साधनसाधारणस्य कारकत्वस्य भावात् क्रियां प्रति गुणभाव एव । यत्र तु तदेव फलं तत्र फलरूपानुप्रवेशादस्य वास्तवं प्राधान्यम्, न तु शाब्दम् । एतच्च क्रियाविवेकादेव विस्तरतोऽवगन्तव्यम् । संख्यापुरुषौ साधनाधारद्रव्यधर्मत्वात् साधनद्वारेण क्रियामुपकर्वन्तौ गुणभूतौ । तत्र कालोपग्रहौ तु साक्षादेव क्रियोपकारितया गुणभूतौ । यत्र च भावे लकारस्तत्र सङ्ख्याद्यपेक्षमेव प्राधान्यं क्रियायाः । एकपदोपात्तस्य साधनस्याभावात् संङ्ख्यया साक्षात् संबन्धः प्राधान्यादेव न भवति, क्रियायाः साध्यत्वाद्ध्यसौ प्रधानम् । न ह्यनिर्वृत्तं परस्याङ्गभावमुपगन्तुमर्हति । तथा चास्या भेदाभाव इति एका क्रिया (M.Bha.I.p.238 1.10)

इति भाष्यम् । एकशब्दश्चायं भेदाभावप्रदर्शनपरो न सङ्ख्यावचनः । असत्त्वभूतत्वेन निःसङ्ख्यत्वात् क्रियायाः ।। 40 ।।
यद्येवं संख्यावाचिभ्यः क्रियागणनावृत्तौ कृत्वसुजादयः कथं पञ्चकृत्वः पचति द्विः पचतीतीत्याशङ्ख्योपपदयति ।
एकत्ववृत्तिभावाभ्यां भेदाभेदसमन्वये ।
संख्यास्तत्रोपलभ्यन्ते संख्येयावयवक्रियाः ।। 41 ।।
निःसंख्या एकापि क्रिया यदा आवर्तते तदा आवृत्तिनिबन्धनं भेदं स्वतश्चाभेदमुपादाय भेदाभेदयोगेऽस्याः संख्या दृश्यन्ते । [संख्येयावयवक्रियाः इति ?] संख्येया अववयक्रियायासाम् । अयमर्थः । एकफलत्वादेककर्तृकत्वाच्च क्रियैका पुनः पुनः प्रवृत्तिलक्षणां चावृत्तिमनुभवति । तत्राख्यातेन सकलक्रियाप्रवाहोऽभेदेनाभिधीयते । आवृत्तिनिबन्धनं तु भेदमवयवाधिकरणं संख्यापदमनुभवति । तथा च कृत्वसुजाद्युत्पत्तिः । न ह्यत्यन्तभेदेऽभेदे वा आवृत्तिः सम्भवति । अपि तु भेदा भेदाभ्याम् । एवं तावत् क्रियायाः स्वतः संख्यायोगो नास्ति । पचति पचतः पचन्ति इति तु साधनगतसंख्यासम्प्रत्यय इति । इह तर्हि कथं संख्याभेदावगमः पाकः पाकौ पाकाः इति । न ह्यत्र साधनमस्ति कृदन्तैः सिद्धतयाबिदीयमानत्वात् क्रियायाः संख्यायोगो न विरुध्यते ।। 41 ।।

अत्र यदि सिद्धतयाभिधानं तदा ---
सिद्धस्यार्थस्य पाकादेः कथं साधनयोगिता ।
साध्यत्वे वा तिङन्तेन कृतां भेदो न कश्चन ।। 42 ।।
परिनिष्ठितरूपः पदार्थः साधनसंबन्धं नानुभवति ।तथा च पाकादिरिति तत्रापि साधनयोगाभावात् कृत्प्रयोगे कर्तृकर्मणोः षष्ठीविधिर्नोपपद्यते । अथ कृदभिहिते पाकादौ साध्यतैव तदा भाष्यकाराभिमतः कृतां तिङन्तेन भेदो विरुध्येत । भाष्यकारो हि पञ्चकृत्वः पचतीतिवत् पञ्चकृत्वः पाक इति प्रयोगं नेच्छति ।। 42 ।।
अथ पाकादेः सिद्धत्वेऽपि षष्ठ्याः साध्यतयाभिधानं यत्राख्याते स विषय इत्याशङ्ख्य व्युदस्यति ।
तत्र कारकयोगाया यद्याख्यातं निबन्धनम् ।
षष्ठ्याः सा लेन संबन्धे व्युदस्ता कर्तृकर्मणोः ।। 43 ।।
"कर्तृकर्मणोः कृति" (P.2.3.65)
इति वचनादाख्यातमविषय एवारयाः षष्ठ्याः । अभ्युपगम्यापि तूच्यते
न लोकाव्यय..... (P.2.3.69)
इति लकारप्रयोगे प्रतिषिद्धा षष्ठीति नायमस्या विषयः । अत एव कृद्गहणस्यैतद्वयावर्तनेऽनुपयोगात् तदनादरेणैतदुक्तम् ।
शत्रादिव्यावृत्त्यर्थं तु तत्रलग्रहणम् ।। 43 ।।
एवं तर्हि पाकादौ साधनसंबन्धकाले साध्यत्वं संख्याभेदप्रति पत्तिवेलायां तु सिद्धत्वं भविष्यतीत्याशङ्क्याह ।
एकाभिधान एकोऽर्थो युगपच्च द्विधर्मभाक् ।
न सम्भवति सिद्धत्वे स साध्यः स्यात् कथं पुनः ।। 44 ।।

एकोऽर्थो युगपद् विरुद्धधर्मद्वययोगी न संभवतीति सिद्धसाच्योभयरूपता पाकादेरेकपदोपादानस्य नास्ति । भिन्नशब्दोपादानस्तु स धर्मद्वययोगी भवत्येव पचति पाचकः पाकः ? इत्यादि ।। 44 ।।

इदानीमेकाभिधानत्वमेवात्र नास्ति अपि तु भिन्नाभिदानत्वमिति पाकादौ शब्दद्धयेन धातुप्रत्ययरूपेण सिद्धसाध्यरूपोभयार्थप्रतिपादनमविरुद्धमित्येतदुपषादयितुमुपक्रमते ।

एतावत् साधनं साध्यमेतावदिति कल्पना ।

शास्त्र एव न वाक्येऽस्ति विभागः परमार्थतः ।। 45 ।।

एकशब्दोपादाने ह्यर्थेऽन्वयव्यतिरेकवशेन शास्त्रेपोद्धारकल्पनायां प्रकृति प्रत्ययविभागेनार्थविभागः शक्यक्रियः लोके त्वखण्ड एव शब्दोऽखण्डस्यार्थस्य वाचक इति न तत्रार्थप्रविभागः नापि शब्दप्रविभागः सत्यरूपः । वाक्येन तत्र व्यवहाराच्च वाक्ये इत्याह ।। 45 ।।

तत्र कियत् साधनं कियत् साध्यं क्व कथं प्रकल्पते शास्त्रे इत्याह ।

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता ।

प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ।। 46 ।।

पचतीत्यादावन्वयव्यतिरेकवशेन धातुभागः । क्रियायां प्रत्ययभागस्तु कारकादौ वर्तत इति शास्त्रे परिकल्प्यते । यदाह वाक्यकारः ।

`प्रत्ययार्थस्याव्यतिरेकात् प्रकृत्यन्तरेषु । धातोश्चार्थाभेदात् प्रत्ययान्तरेष्वन्वय इति । एवं पाकादावपि ।। 46 ।।

तथा हि ।

साध्यत्वेन क्रिया यत्र धातुरूपनिबन्धना ।

सत्वभावस्तु यस्तस्याः स घञादिनिबन्धनः ।। 47 ।।

भिन्नाभिधानत्वे धर्मद्वययोगे निदर्शनमत्राह ।

प्रकृतिप्रत्ययानां शास्त्रेऽसकृदुपदेशादभेदाध्यवसायेनान्वयव्तिरेकाभ्यां प्रक्रियासिद्ध्यर्थमर्थवत्ताप्रतिज्ञानाद् य एव धातुराख्याते स एवात्र कृदन्त इति तन्निबन्धनोऽप्यभिन्नः साध्यस्वभावः । ततश्चात्र धातुभागवाच्यसाध्यार्थापेक्षितानि साधनानि स्वनिमित्तं संस्कारं विभक्तिलक्षणं प्रयुञ्जत एव । धातोः परस्तु प्रत्ययो घञादिस्तस्य प्रकृत्यर्थस्य सत्त्वभावं दर्शयति । येन लिङ्गसंख्याभ्यां योगः । अतश्च तिङन्तेन कृतो भेदोऽप्युपपन्नः ।। 47 ।।

भिन्नाभिधानत्वे धर्मद्वययोगे निदर्शनमत्राह ।

बन्धुता भेदरूपेण बन्धुशब्दे व्यवस्थिता ।

समूहो बन्ध्ववस्था तु प्रत्ययेनाभिधीयते ।। 48 ।।

बन्धुशब्दे बन्धुता भेदरूपेण वाच्यावस्थिता । बन्धूनां समूहो बन्धुतेति समूहप्रत्ययेऽबेदेन बन्ध्ववस्था वाच्या । न हि समूहो नाम बन्धुभ्योऽन्यः कश्चित् । एवं च यथा प्रकृतिप्रत्ययावत्र भेदाभेदाभ्यामर्थमभिधत्तस्तथा सिद्धसाध्यताभ्यां पाकादौ धातुप्रत्यथाभ्यामर्थाभिधानम् ।। 48 ।।

शब्दभेदाच्चात्र विषयभेदेनाविरोध इत्याह ।

तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया ।

सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति ।। 49 ।।

साधनान्यपेक्ष्य साध्यात्वादनिर्वृत्ता क्रिया धातूपादाना । कृत्प्रत्ययापेक्षया तु सिद्धतेति न साध्यत्वं तं प्रति । तथा च न साधनयोग इत्यर्थः ।। 49 ।।

अपेक्षणीयभेदात् स्वभावद्वययोगे दृष्टान्तमाह ।

राज्ञः पुत्रस्य नप्तेति न राज्ञि व्यतिरिच्यते ।

पुत्रस्यार्थः प्रधानत्वं न चास्य विनिवर्तते ।। 50 ।।

राज्ञः पुत्रस्य नप्ता विजयतामित्यत्र नप्त्रपेक्षया पुत्रस्या प्राधान्ये व्यतिरेकेऽपि राजापेक्षया व्यतिरेको न भवति । तथा च

तदपेक्षया प्राधान्यं न निवर्तते यथा एवं पाकार्थस्यापि शब्दद्वयापेक्षे सिद्धसाध्यते न विरुध्येते इत्यर्थः ।। 50 ।।
तदृशतरं दृष्टान्तमाह ।
मृगो धावति पश्येति साध्यसाधनरूपता ।
तथा विषयभेदेन सरणस्योपपद्यते ।। 51 ।।
धावतीति तिङुपात्तकर्त्रपेक्षया सरणक्रिया साध्या । दर्शनक्रियापेक्षया साधनत्वं कर्मतामनुभवति । न ह्यत्र मृगः कर्म, द्वितीयाप्रसङ्गादिति सरणक्रियैव कर्मं । तस्याश्च साधनप्रत्यक्षताया प्रत्यक्षताभिमानात् पश्येति दर्शनक्रियाकर्मतोपपत्तिः । साधनत्वं च न साध्यावस्थायामेव, अनिष्पन्नत्य परमनुपकुर्वतः साधनत्वायोगात् । उत्तरकालं तु साधनत्वं निर्वृत्तायाः क्रियायाः क्रियान्तरं प्रत्युपपद्यते । एवं घञादिविषयेऽपि धातुना साध्यत्वेनाभिहितायां क्रियायां प्रत्ययेन सिद्धताभिधानम् । प्रकृतिप्रत्ययौ च प्रत्ययार्थं सह ब्रूत इति सिद्धतायाः प्राधान्यात् साध्यतागतावृत्त्यभावात् कृत्वसुजादयो न भवन्ति । कृत्यादयस्तु लकारवत् साध्यावस्थं भावं स्वबावादाचक्षते । केवलं तु शब्दान्तरोपादानमेषां साधनमिति कृत्वोर्थप्रत्ययसंबन्धो भवत्येवैषाम् । द्विः शयितव्यं भवता । त्रिर्भुक्तं देवदत्तेन । द्विर्भुक्त्वा गतः । द्विर्दत्तवान् ।। 51 ।।
तदेवम्--
लकृत्यक्तखलर्थानां तथाव्ययकृतामपि ।
रूढिनिष्ठाघञादीनां धातुः साध्यस्य वाचकः ।। 52 ।।
सर्वत्रैवान्वयव्यतिरेकाभ्यां साध्यस्वभावार्थाभिधायित्वं धातोः । संज्ञाशब्दानामपि व्युत्पत्तिकर्मणि क्रियाया उपयोगः । तत्र लकारे क्रिया प्राधान्येनाभिधीयते । कृत्यक्तखलर्थेष्यपि तथैव । निष्ठातो भेदेन क्तो नपुंसकविषय उक्तः । एवं साध्यताभिधानात् साधनसंबन्धो न विरुध्यते । अत्र साधनसंबन्धादेव सात्यतावसायः । धातुप्रातिपदिकाभ्यां हि स्वार्थस्य सिद्धसाध्यते नावेद्येते । अपि तु साधनसंबन्धायत्ता धात्वर्थस्य साध्यताप्रतीतिः । साधनविभक्तयश्च प्रातिपदिकादुत्पद्यमानास्तदर्थस्य सिद्धतामावेदयन्ते । गतमेतत् ।। 52 ।।
`परिदेवने श्वस्तनी भविष्यन्त्यर्थे (Va.1.on P.3.3.15,M.Bha.II.p.143 1.18)
इत्युपसंख्यानं
`कालविप्रकर्षात्तूपमानम्' (Va.2onP.3.3.15,M.Bha.II.p.143 1.21.)
इति प्रत्याख्यातम् । तत्र भाष्य उक्तम् ---
`न [वै] तिङन्तेनोपमानमस्ति' (M.Bha.II.p.143 1.23)
इति । तत् कथं तिङन्तेनोपमानं न भवतीत्येदुपपादयति ।
साध्यस्यापरिनिष्पत्तेः सोऽयमित्यनुपग्रहः ।
तिङन्तैरन्तरेणेवमुपमानं ततो न तैः ।। 53 ।।
इह तिङन्तार्थः साध्यस्वभावोऽपरिनिष्पन्नरूपः सोऽयम् इत्युपमेयेन सहाभेदकल्पनेनोपग्रहीतुं न पार्यते । तिङन्तपदैः सिद्धरूपस्यैव प्रत्यायनासंभवात् । अतश्च
"इयं नु कदा गन्ता (M.Bha.II.p.143.1.19.)
इत्यादौ क्रिया क्रियया नोपमीयते । तद् यथा सिंहो माणवक इति सोऽयमित्यभेदेनाध्यवसायादिवार्थगर्भः संबन्धो नैवमत्र । असिद्धत्वादेव सोऽयमिति संबंन्धस्यैवाभावात् । ततश्चावशब्दमन्तरेण सिंहो माणवक इतिवद् अत्राभेदेनोपमानोपमेयभावो नास्ति । इवशब्दप्रयोगे तु भेदेनोपमानोपमेयभावः प्रतीयते, क्रन्दतीव गायतीति । तत्र च साध्यत्वादेव न क्रियागतः सः । साधनगतस्तु यो गायति स क्रन्दतीवेति न क्रिययोः सारूप्यम् । अपि तु सर्वनाम्ना व्यापारे गुणभूतमपि साधनं प्राधान्येन प्रत्यवमृश्य सम्बध्यते । तद् यथा यः पचति तस्यापत्यमिति न तिङन्तार्थस्यापत्ययोगः ।छ
`लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।'
इति तूत्प्रेक्षा नोपमा, उपमेयानिर्देशात् ।। 53 ।।

ननु स्वतोऽसिद्धत्वान्मा भूत् क्रियाया उपमानोपमेयभावः । साधनमुखेन तु भविष्यतीत्याशङ्क्याह ।
साधनत्वं प्रसिद्धं च तिङ्क्षु संबन्धिनां यतः ।
तेनाध्यारोप एव स्यादुपमा तु न विद्यते ।। 54 ।।
तिङन्तवाच्ये विषये ये संबन्धिन उपादीयन्ते तेषां साध्यार्थापेक्षया कारकत्वं निश्चितम् । अन्यथा संबन्धाभावात् । अतः पर्वतश्चलति नभश्चलति इत्यादौ पर्वतादीनां श्रुत्या तावत् साधनभावः प्रत्याय्यते । स तु यदि नाम नावकल्पते इत्यध्यारोपितसामर्त्याश्चलने साधनभावमुपयान्त्यगादयः, न त्वतो वाक्याच्चलतीवेत्युपमानोपमेयभावः प्रतीयते । तद्यथा शक्त्यतिशयख्यापनाय कश्चिदभिधत्ते पर्वतं भिनत्ति, महोदधिं प्रतरतीति । नास्माद्भिनत्तीवेत्यादिप्रतिपत्तिः । अपि तु संभावितसामर्थ्यं साधनमभिसम्बध्यते क्रियया । एवं
`विभेत्यल्पश्रुताद् वेदः'
इत्यादावध्यारोपेणैव समन्वयो नोपमयेति कारकमुखेनापि क्रियायामुपमानोपमेयभावाभावः । इत्थं च
`इयं नु कदा गन्ता' (M.Bha.II.p.143.1.19)
इत्यादावध्यारोपेणैवोपपत्तिर्व्याख्येया । भविष्यत्सामान्ये भविष्यदनद्यतनत्वेन दीर्घकालतया गमनस्य विवक्षिते तत्र गन्तृत्वाध्यारोपः ।। 54 ।।
इतश्च क्रिययोरुपमानोपमेयभावो नास्तीत्याह ।
न्यूनेषु च समाप्तार्थमुपमानं विधीयते ।
क्रिया चैवाश्रये सर्वा तत्र तत्र समाप्यते ।। 55 ।।
चन्द्र इव दर्शनीयं मुखमस्या इत्यादावुपमानं परिपूर्णगुणं प्रसिद्धम्, उपमेयं तु न्यूनगुणमिति । क्रिया तु साधनसाध्या स्वाधारे परिसमाप्ता सर्वैव समेति नोपमाविषयः ।। 55 ।।
अत्रोदाहरणार्थमाह ।
येनैव हेतुना हंसः पततीत्यभिधीयते ।
आतौ तस्य समाप्तत्वादुपमार्थो न विद्यते ।। 56 ।।
गमिक्रियां साधयन् हंसः पक्षाभ्यां पततीत्युच्यते, आतिरपि पक्षिविशेषस्ताभ्यामेव स्वपक्षाभ्यां तथैव गमिक्रियां निष्पादयन्ती पचतीत्यभिधीयते इति प्रत्याश्रयपरिसमाप्तत्वात् क्रियायां न्यूनाधिकभावाभावात् सजातीयत्वे सति गवय इव गवय इतिवदुपमानोपमेयभावो नास्तीत्यर्थः । आतिः पतति हंस इवेति तु साधनयोरुपमानोपमेयभावो न तिङन्तवाच्ययोः क्रिययोः ।। 56 ।।
ननु सजातीययोः क्रिययोर्मा भूदुपमानोपमेयभावः । विजातीययोस्तु स्यादित्याशङ्क्या तत्रापि निषेधति ।
क्रियाणां जातिभिन्नां सादृश्यां नावधार्यते ।
सिद्धेश्च प्रक्रमे साध्यमुपमातुं न शक्यते ।। 57 ।।
भिन्नजातीयाः पचति गच्छतीत्यादयः क्रियाः परस्परतोऽत्यन्ताय व्यावर्तमानाः सादृश्यनिबन्धनमुपमानोपमेभावं नासादयन्ति । इदं तदिति सिद्धतया परामृष्टुमुपमानं क्रियारूपमन्यत्र साध्यस्वभावे क्रियारूपे संबन्धमुपनेतुमशक्यम् । आख्यातात् प्रतीयमानायाः क्रियायाः सिद्धत्वेनायो(त्वायो?)गात् । तदेवं तिङन्तार्थस्योपमानो पमेयभावभावात्
`कालविप्रकर्षात्तूपमानम् (Va.2.onP.3.3.15,M.Bha.II.p.143 1.31)
इत्यस्य वार्तिकस्यायमर्थः । गमनाध्ययनयोरलसविषयतया सम्भावनायां भविष्यत्सामान्यमपि दीर्घकालतयोपमाया(मया?) नद्यतनकालविवक्षायां प्रत्ययः सिद्धः । अनद्यतन इवायं भविष्यत्काल इत्यर्थः ।
लक्षणहेत्वोः क्रियायाः (P.3.2.126)
इति तु लक्ष्यलक्षणभावस्य शतृशानच् प्रयोगेण प्रतीतेर्भवति क्रियायास्तद्योगः । एवं हेतुहेतुमद्भावस्य लिङ्प्रत्ययादप्यवगतेः । इतिशब्दप्रयोगादपि हन्तीति पलायते वर्षतीति धावतीति । विशेषणविशेष्याभावोऽपि न तिङन्तवाच्यावस्थायाम् अपि तु

स्वातन्त्र्येण परामर्शे सति क्रियाया उपपद्यते । तथैवोपमानोपमेयभावस्तु न सम्भवति न्यूनाधिकभावाभावात् । पचतिकल्पं पचतितरामिति क्रियासंबन्धिना(नां?) न्यूनाधिकभाव इत्याहुः । गतमेत त् ।। 57 ।।

इदानीमिदं विचार्यते । इह धातुवाच्योऽर्थः साध्यस्वबावो घञादिवाच्यस्तु सिद्धस्वभावः इति भाष्येऽनयोर्भावयोर्बाह्याभ्यन्तरयोर्भेदोऽभिहितः । तमेव दृष्टान्तोपदर्शनेन व्युत्पादयितुमाह । वनं वृक्षा इति यथा भेदाभेदव्यपाश्रयात् ।

अर्थात्मा भिद्यते भावे स बाह्याभ्यन्तरे क्रमः ।। 58 ।।

वृक्षसमुदायो वनमित्यभेदेन कथ्यते । वृक्षा इति तु भेदेन नानात्वेन । तथा च भिद्यतेऽर्थस्वभावो न शब्दशक्तिमात्रकृतोऽत्र भेद इत्यात्मग्रहणम् । भेदाभेदयोरन्यत्वात् समुदायावयवौ भिन्नावेव । एवं धात्वर्थो भावोऽभ्यन्तरे प्रकृतिरूपे वाच्यतया भवः प्राथमकल्पिकत्वाद् आभ्यन्तरः । स साध्यमानावस्थतया घञादिप्रत्ययवाच्याद् बाह्यात् सिद्धरूपाद् भावाद् भिद्यते । प्रकृतिवाच्यो हि भावोऽभेदेन प्रतीयते, साध्यमानावस्थस्य सिद्धधर्मसंख्यायोगाभावात् । साधनभेदप्रतीत्यैव चाख्याते भेदप्रतीतेर्धातुभेदेनैव क्रियामाचष्टे । घञादिप्रत्यवाच्यस्तु भावः सिद्धतयाभिधानात् लिङ्गसंख्याभ्यां भेदेनैव प्रत्याय्यते पाकः पाकौ पाकाः इति । आख्याते च साध्यमानावस्थस्य भावस्य प्राधान्यात् स्वधर्मेण कालेन साधनधर्मेण च प्रत्याक्तादिना पुरुषेण योगः । फलवत्वाच्च क्रियायाः कर्त्रभिप्रायादिनात्मनेपदादिद्योत्येन फलधर्मेणोपग्रहेण योगः । घञादिविषये तु सिद्धत्वाद् द्रव्यायमाणत्वान्नैवं कालादियोगः । केवलं द्रव्यधर्मेण लिङ्गेन संख्यया च योगः । तदेवमनयोः प्रकृतिप्रत्ययार्थयोर्भावयोर्बाह्याभ्यन्तरयोर्भेदः । यस्तु लकारवाच्यो भावः शय्यते स्यीयते इत्यादौ असौ धात्वभिधेयामेव साध्यतामनुवर्तते, न तु घञादाविव सिद्धरूपम् । स्वात्मावस्थो हि भावः साधनात्मना सिद्धतया चासंसृष्टो लकारवाच्यः । धातुवाच्यस्तु साध्यतया युक्त इति नायं लकारः स्वार्थिकः । तद्यथा स्वात्मप्रतिष्ठे प्रातिपदिकार्थे विधीयमाना प्रथमा न स्वर्थिकत्वेन व्यवह्रियते । धात्वभिधेयसाध्यतानुवर्तनाच्चास्य भावस्य कालादिना योगः । भाव्यत्वाच्च कर्त्रा न वियुज्यतेऽयमिति द्विविधो बाह्यो।ऽपि भावो व्यवह्रियते तिङभिहित एकः कृदभिहितोऽपर इति । तुमुन्नादिविधौ च क्रियासामान्येन सिद्धसाध्यरूपोभयधर्मानाश्रयेम उपपदमुपादीयते । तेन भोक्तुं पाकः कारकस्य व्रज्येत्यादिसिद्धिः । साध्यमानावस्थमन्यदेवोपलक्षितं वा क्रियारूपं धात्वर्थमाश्रित्य तुमुन्नादिविधिरित्यदोषः । अभ्यावृत्तिस्तु भाव्यमानधर्म इति सिद्धताविषये तदभावात् कृत्वोऽर्थप्रत्ययाः पाकादिप्रयोगे न भवन्ति । तदेवं घञादिवाच्यो विलक्षणो भावः । तत्र

`कर्तरि कृत्' (P.3.4.67)

इति वचनात् कर्तरि घञादीनां प्राप्तौ

`भावे' (P.3.3.18.)

इत्यर्थो निर्दिश्यते स च प्रत्ययविधेः प्राधान्याद् गुणभूतोऽत्रेति गुणे संख्याविवक्षायां यथाश्रुतस्य च लिङ्गस्य विवक्षायां वचनान्तरे लिङ्गान्तरे च प्रत्यया न स्युरिति वार्तिककारेण

"भावे सर्वलिङ्गो निर्देशः" (Va 1.on P.3.2.18.M,Bha.II.p.144 1.9)

कर्तव्यतया चोदितः । लिङ्गग्रहणस्योपलक्षणार्थत्वात् संख्यापि गृह्यते तत्र । तेन भूतो(तौ) भवने भावे भावयोरित्यदिनिर्देशः कर्तव्यः । तथा च पक्तिः पचनं पाकः पाकावित्यादिसिद्धिरित्यर्थः ।। 58 ।।

अत्र भाष्यकारेण

"निर्देशे नान्तरीयकर्त्वाल्लङ्गसंख्यमतन्त्रम्"(CfM.Bha.IIp.144.1.13)

इति सर्वतः सिद्धिरुपपादिता । तत्र कथं नान्तरीयकत्वेनातन्त्रत्वमित्युपपादयति । सामान्ये भाव इत्यत्र यल्लिङ्गमुपलभ्यते ।

भेदानामनुमेयत्वान्न तत् तेषु विवक्ष्यते ।। 59 ।।

क्रियासामान्यवचनाः कृभ्वस्तय इति भवतिना अर्थनिर्देशः क्रियमाणः सर्वधात्वर्थविषयः कृतो भवतीति `भावे' इति सामन्यचोदनायां भावशब्दार्थे सामान्यरूपे भिन्नार्थप्रकृतीनां प्रत्ययानामसम्भवाद् विशेषपर्यवसाने यथाविशेषं स्त्रियां भावे नपुंसके भावे इति भावसामानाधिकरण्यान्यथानुपपत्त्या

प्रत्ययविधेर्भूयोऽनुग्रहानुरोधान्नियतव्यक्तिगतलिङ्गसंख्योपादानमतन्त्रमविवक्षितमित्यर्थः । सर्वव्यक्त्नुयायि हि भवत्यर्थसामान्यमत्र निर्दिदिक्षितम् । तच्च निराश्रयं निर्देष्टुमशक्यमिति नान्तरीयकं नियतव्यत्क्युपादानम् । अन्येषां तु व्यक्तिविशेषाणां सामर्थ्यात् सन्निधानमिति यथाविशेषं सर्वलिङ्गसङ्ख्यापरिग्रहः । सकलविशेषपरिग्रहाय सामान्यचोदनायां नान्तरीयकनियतोपात्तविशेषनिष्ठतायोगात् । तद् यथा । अयं गौः पदा न स्प्रष्टव्य इति सामान्यचोदनायां नेदन्तानिर्दिष्टनियतव्यक्तिनिष्ठतैव ।। 59 ।।

ननु च सामान्यचोदनायां विशेषपर्यवसानाद् भवतु पाकादौ बहुप्रकारोऽपि प्रत्ययः । प्रातिपदिकार्थस्तु भाव इति पुंस्त्वं कथं त्यज्यत इत्याशङ्ख्याह ।

निर्देशे चरितार्थत्वाल्लिङ्गं भावेऽविवक्षितम् ।

उपमासविधत्वाच्च भावादन्यत् पचादिषु ।। 60 ।।

प्रातिपदिकार्थस्य सत्त्वभूतस्य लिङ्गहितस्यासम्भवात् तन्निर्देशे नान्तरीयकं लिङ्गोपादानम् । ततश्च तन्नैर्देशिकमविवक्षितम् । कार्ये निरुपाधिर्भावार्थ एव विधावङ्गम् । स चात्रोपमानसदृशः, धातुसामान्याद् विधेः, यथा भवतेर्भावस्तथा पचतेः पाकस्त्यजतेस्त्यागो धात्वर्थोऽत्र प्रत्ययर्थत्वेन बोद्धव्य इत्यर्थः । अतश्च भावाद् भवत्यर्थाद् अन्यदर्थरूपं विशिष्टं पचादिधातुविषये पाकादिरूपः प्रत्ययार्थः । तथा भावादपरं पक्तिरित्यादौ यद्यपि लिङ्गं तथापि भिन्नलिङ्गयोरुपमानोपमेयभावो न विरुध्यत इत्यर्थः ।। 60 ।।

" पचतेर्भवतौ यत्तन्निर्दिश्यते"(M.Bha.II.p.145,1.4.)

इत्यत्रैव परिहारन्तरं भाष्येऽभिहितं व्याचष्टे ।

भवतौ यत् पचादीनां तावदत्रोपदिश्यते ।

न च लिङ्गं पचादीनां भवतौ समवस्थितम् ।। 61 ।।

पूर्वं सामान्यचोदनायां सर्वव्यक्तितात्पर्यादतन्त्रे लिङ्गसंख्ये इत्युक्तम् । इदानीं ये एते पुंस्त्वैकत्वे उपात्ते ते अविवक्षिते एव सामान्यगते सामान्यं ह्येकं व्यक्तिभेदेऽप्यनुवर्तमानमेकत्वं न जहात्येव । अन्यथा सामान्यमेव न भवेत् । अतश्च व्यक्तिविशेषाणां लिङ्गसंख्यान्तरयोगेऽपि पचादीनां भवतौ वर्तमानं यद्रूपं सन्मात्रे रूपेऽस्तीति पक्तिः पचनं पाकौ पाका इत्यादौ सन्मात्रस्य रूपस्याजहत्स्वलिङ्गसंख्यस्यस्यानुवृत्तेस्तदाश्रयो विधिः सर्वत्रोपपद्यत इत्यर्थः ।। 61 ।।

ननु च सामान्यस्य विशेषात्मकत्वाद् विशेषगतं लिङ्गं सामान्यसंबन्ध्येवेति नियतलिंङ्गोपादानेऽन्यत्र कथं विधिरित्याशङ्क्याह ।

एकश्च सोऽर्थः सत्ताख्यः कथञ्चित् कैश्चिदुच्यते ।

लिङ्गानि चास्य भिद्यन्ते पचिरूपादिभेदवत् ।। 62 ।।

स एकोऽर्थो भावशब्दाभिधेयः सकलधात्वर्थविषयसिद्धतासमवेतसामान्यरूपो घञादिप्रत्ययवाच्यः सत्ताख्यः स्वशक्त्या कैश्चिच्छब्दैः केनचित् प्रकारेणाभिधीयते भावः सत्तेत्येवमादिभिः सामान्यशब्दैः सामान्यरूपः । पाकस्त्याग इत्यादिविशेषशब्दैर्विशेषरूपः । तत्र च यथा पचे रूपं पठे रूपं स्वभाव इत्यादिव्यक्तिविशेषोपाश्रयवशात् सत्ताख्योऽर्थो भिद्यते तथा शब्देभेदेन पक्तिः पचनमित्यादिना लिङ्गानि स्त्रीत्वादीन्यस्यविशिष्यन्ते । एवमपि च विशेषे सर्वव्यक्त्यनुयायि व्यापकं रूपमखण्डितमिति तदाश्रयेण सर्वत्र स्वकार्यं सम्पादयति । न तु नियतव्यक्तिगतेन लिङ्गसंख्यादिना धर्मेण नियम्यते । महाविषयत्वात् सामान्यस्य विशेषस्वीकारसामर्थ्यांत् । विशेषस्य तु सामान्यमात्मसात्कर्तुमसामर्थ्यात् स्वलिङ्गेन नियमे लिङ्गान्तरे विधिं प्रापयितुमशक्तिः । तथा च भाष्यम् ।

"यच्च पचतेर्भवतिर्भवति न तद्भवतेः पचतिर्भवति । किं च पचतेर्भवतिर्भवति । सामान्यम् । किं च भवतेः पचतिर्भवति । विशेषः"

(M.Bha.II.p.144.1.23.)

सामान्यविशेषभावेनान्योन्यस्वीकारा सामर्थ्यमुक्तम् (न्यस्वीकारसामर्थ्यमसामर्थ्यं चोक्तम् ?)। भवतिर्हि सामान्यं पचिं स्वीकरोति, न तु पचिर्विशेषो भवतिमित्यर्थः ।। 62 ।।

संबन्धिभेदेनैक एवार्थोऽनेकरूपत्वेन प्रतिभासते इत्यत्र भाष्ये निदर्शनमुपन्यस्तं व्याचष्टे ।
आचार्यो मातुलश्चेति यथैको व्यपदिश्यते ।
संबन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः ।। 63 ।।

उक्तमिदं भाष्ये--

"उपाध्यायस्य शिष्यो मातुलस्य भागिनेयं गत्वाह उपाध्यायं भवानभिवादयतामिति । स गत्वा मातुलमभिवादयते । तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यं गत्वाह मातुलं भवानभिवादतामिति । स गत्वोपाध्यायमभिवादयते ।"

(M.Bha II.p.144.1.24-p.145,1,1-3.)

इति । अत्र च यथा एकोऽर्थः किञ्चित् प्रत्युपाध्यायः कञ्चित् प्रति मातुलोऽभिधीयते तथा स प्रकारः पक्तिभावयोः बोद्धव्यः । स्वगतविशेषापेक्षया सामान्यस्वभावोऽपि पचिर्भावं प्रति विशेषः । भावः पुनः पक्तिं प्रति सामान्यमेव । ततश्च यथोपाध्यायशब्देन मातुलरूपतयानभिधीयमानोऽपि मातुलो वस्तुवृत्तेन तत्त्वात् स्वकार्यं प्रतिपद्यते तथा भावशब्देन सामान्यवाचिना साक्षादनभिधीयमानोऽपि विशेषः सामर्थ्यादनुमीयमानसन्निधिरिति सामान्यप्रयुक्तं कार्यं प्रतिपद्यते । तथा हि नोपाध्यायरूपादन्यत्र(त्?) मातुलत्वं तथा न भावादन्यत् पचिरूपम् । सामान्यविशेषयोरत्यन्तभेदाभावात् सकलविशेषपरिहारेण सामान्यरूपानुपपत्तेरिति सर्वत्र सिद्धिः ।। 63 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे क्रियासमुद्देशोऽष्टमः ।।

Kalasamudesha

अथ कालसमुद्देशः ।

क्रियानन्तरं काल उद्दिष्टः । स हि क्रियायाः परिच्छेदकः । तत्र दर्शनान्तरलक्षितं तावत्तत्स्वरूपमाह ।
व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम् ।। 1 ।।

परापरादिप्रत्ययलिङ्गो व्यापक एकोऽमूर्तोऽत एवाकृतकत्वान्नित्यः कालः क्रियाव्यतिरिक्तो जन्मादिक्रियाद्वारेण भावपरिच्छेदको वैशेषिकैराम्नातः । स विस्तरतस्तत एवावगन्तव्यः ।। 1 ।।

कालस्य परिच्छेदकान्तरेभ्यः परिच्छेद्यभेदेन भेदमाह ।
दिष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ।। 2 ।।

मूर्तिरसर्वगतद्रव्यपरिमाणम् । स परिच्छिद्यते दिष्टयाद्यायामानेन । तधा च मूर्तिमद्वस्तुगतमेतद् दिष्टिर्वितस्तिरित्यादि । एकदिग्विभागावच्छेदेन चानेन वस्तुपरिच्छेदः । एतच्च प्रमाणम् । प्रस्थादिना तु सर्वतोऽवच्छेदेनारोहपरिणाहाभ्यां व्रीह्यादेः परिच्छेदः । प्रस्थः द्रोणः आढकमित्येतत् परिमाणम् । परिः सर्वतोभावे । सुवर्णादि तून्मानं गुरुत्वविशेषेण द्रव्यं परिच्छिनत्ति । सुवर्णं निष्कं फलमित्यादि । एभ्यो व्यतिरिक्तः कालोऽमूर्तक्रियापरिच्छेदहेतुः । सूर्यादिसञ्चारो हि कालेन मीयते मासः संवत्सर इत्यादि । संख्या तु मूर्तामूर्तस्य सर्वस्य परिच्छेदमादधाति प्रमाणादेश्च । द्वौ घटौ । बहव आत्मानः । द्वे क्रिये । एका वितस्तिः । द्वौ हस्तौ । चत्वारः प्रस्थाः । पञ्च फलानि । संख्यापि च संख्यया मीयते । द्वे विंशतू । पञ्च पञ्चाशत इति ।। 2 ।।

कालेन कथं क्रियाः परिन्छिद्यन्ते इत्याह ।
उत्पतौ च स्थितौ चैव विनाशे चापि तद्वताम् ।
निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम् ।। 3 ।।

जन्मस्थितिविनाशाः समस्तक्रियाकलापान्तर्भावनहेतव इति तद्द्वारेण जन्मादिमतां पदार्थानां निमित्कारणं कालमाहुः । तदपेक्षो

हि पदार्थानामुदयादिरवतिष्ठते प्रविभक्तशरीरः । तथा हि । केचिद् वसन्ते प्रसूयन्ते, अपरे शरदि, प्रावृष्प्यन्य इत्यादि वाच्यम् । एवं स्थितिविनाशयोरपि । उपाधिभेदाच्च भिद्यमानः कालः संसर्गिषु भेदायालम् ।। 3 ।।

यतश्चोत्पत्त्यादौ भावानां कालो निमित्तमतः ।
तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते ।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते ।। 4 ।।

यन्त्रपुरुषप्रख्यं विश्वं सूत्रधारपुरुषकल्पकालप्रतिबद्धचेष्टम् । कालेन हि स्वशक्त्या भावानां स्थगनोन्मज्जने जन्मनाशपर्याये विभजता सूत्रधारेणेव यन्त्रपुरुषस्य सूत्रसञ्चारवशेनोन्मेषादिक्रियाकारिणा विश्वं प्राप्तपौर्वापर्यप्रविभागं प्रविभागलक्षणाश्चेष्टः कार्यन्ते ।। 4 ।।

तथाहि ।
यदि न प्रतिबध्नीयात् प्रतिन्बधं च नोत्सृजेत् ।
अवस्था व्यतिकीर्येरन् पौर्वापर्यविनाकृताः ।। 5 ।।

कालकृतप्रतिबन्धाभावाद् युगपद्भावानामुत्पत्तिः स्यादिति बीजाङ्कुरनालकाण्डादीनामानुपूर्वीनियमाभावात् सङ्करः स्यादिति कारणादुदयतामपि भावानां कालपरिवासदर्शनादवश्यमपेक्षणीयः कालो निमित्तकारणमेष्टव्यः ।। 5 ।।

इदानीमेकत्वे विभाविते कालस्य नानात्वमुपाधिभेदनिहितमाह ।
तस्यात्मा बहुधा भिन्नो भेदैर्धर्मान्तराश्रयैः ।
न हि भिन्नमभिन्नं वा वस्तु किञ्चन विद्यते ।। 6 ।।

धर्मान्तराणि वक्ष्यमाणानि संसर्गीणि क्रियारूपाणि । तद्गतैर्भेदैरेकोऽपि कालोनानात्वेन व्यवह्रियते । तथा च नानाविधकार्यजनकः । सर्वत्रैव च पदार्थाना परोपाधिक एव भेदः । स्वतो भेदाभेदाभ्यामनिर्वाच्यत्वात् । तथा चोक्तम् ।
भिन्ना इति परोपाधिरभिन्ना इति वा पुनः ।
भावात्मसु प्रपञ्चोऽयं संसृष्टेष्वेव जायते ।। (Vak.III.जा.20)
इति ।। 6 ।।

न हि भिन्नमभिन्नं वेत्युदाहरणेन व्यक्तयति ।
नैको नाप्यनेकोऽस्ति न शुक्लो नापि चासितः ।
द्रव्यात्मा स तु संसर्गादेवंरूपः प्रकाशते ।। 7 ।।

निरूपाधिर्द्रव्यस्वभावो व्यवहारं नापततीत्येरत्वादिसंख्यासमवायादेकादिव्यवहारः । शुक्लकृष्णरूपसमवायाच्च शुक्लकृष्णरूपतया द्रव्यमभिधीयते । एवं गोत्वादिसमवायाद् गौरित्यादिव्यवहारा बोद्धव्याः । तथा कालेऽप्युत्पत्त्यादिक्रियासंबन्धवशादुत्पत्तिकालः स्थितिकालो विनाशकाल इत्यादिव्यवहार इत्यर्थः ।। 7 ।।

अतश्च ।
संसर्गिणां तु ये भेदा विशेषास्तस्य ते मताः ।
स भिन्नस्तैर्व्यवस्थानां कालो भेदाय कल्पते ।। 8 ।।

संसर्गिणः कालस्य संबन्धिनः सूर्यादिग्रहप्रचाररूपाः क्रियाविशेषाः । तेषां भेदेनोपहितात्मातिशयोऽसावहोरात्रपक्षमासर्त्वयनसंवत्सरयुगमन्वन्तरादिव्यवस्थाभेदमासादयति । तथाहि । दिवसकरोदयास्तमयावधिपरिच्छिन्नः कालोऽहरिति व्यपदेश्यः । तदुदयविच्छेदोपहितभेदस्तु निशा । आवर्तमानश्चाहोरात्राभ्यां पक्षादिव्यपदेशं यथायोगमासादयति । अक्षिपक्ष्मगतनिमेषोन्मेषादिक्रियोपहितभेदस्तु क्षणलवकाष्ठादिव्यवहारं वर्तयति ।। 8 ।।

तदेवमुपाधिभेदाहितविशेषोऽसङ्करेण निमित्तभावमुपजनादिक्रियाव्यवच्छेदेन भावेषु कालः प्रतिपद्यते । तथाहि ।
विशिष्टकालसंबन्धाद् वृत्तिलाभः प्रकल्पते ।
शक्तीनां संप्रयोगस्य हेतुत्वे नावतिष्ठते ।। 9 ।।

वसन्तादिकाले साधनशक्तीनां प्रवृत्तिदर्शनात् तासां प्रयोजको हेतुर्निमित्तकारणं काल उन्नीयते । कालप्रेरिता हि शक्तयो जन्मादिक्रिया भावानां साधयन्ति ।। 9 ।।

तथा च

जन्माभिव्यक्तिनियमाः प्रयोगोपनिबन्धनाः ।

नित्याधीनास्थिति त्वाच्च स्थितिर्नियमपूर्विका ।। 10 ।।

कालेन प्रयुक्ताः कारणशक्तयोऽभ्यनुज्ञाताः सत्यो जनयन्ति कार्यमभिव्यञ्जयन्ति च । सत्कार्यदर्शने नियमो जातस्याभिव्यक्तस्य च नियतकालमवस्थानम् । अत एव स्थितिर्नियमपूर्विका इत्याह । सापि च शाश्वतरूपकालायत्ता । विनाशोऽपि विनाशकानां कालकृतशक्तिप्रयोगाणां सामर्थ्याद् भावानां कालायत्त इति । `उत्पत्तौ च स्थितौ च' इत्यादि पूर्वोक्तमेवानेन प्रपञ्चितम् ।। 10 ।।

अन्यदपि कालकृतमाह ।

स्थितस्यानुग्रहस्तैर्धर्मैः संसर्गिभिस्ततः ।

प्रतिबन्धस्तिरोभावः प्रहाणमिति चात्मनः ।। 11 ।।

ततः कालादवस्थितस्यापि वस्तुनो वर्धकैर्विनाशकैश्चापरैः संबन्धिभिर्भावैः क्रमेणानुग्रहो वृद्धिक्षयलक्षणः, भावात्मनश्च प्रतिबन्धः स्वकार्यासामर्थ्यं तिरोभावोऽदर्शनं प्रहाणं विनश्यत्तेत्यादयः सर्व एव विकाराः कालाधीना नियतसमयत्वात् ।।11 ।।

एवं च कृत्वा ये क्रमवन्तः क्रियाविशेषाः भावानां ते कालाधीनत्वात् पृथगप्रत्यवभासमानाः काल एवेति व्यवह्रियन्त इत्याह ।

प्रत्यवस्थं तु कालस्य व्यापारोऽत्र व्यवस्थितः ।

काल एव हि विश्वात्मा व्यापार इति कथ्यते ।। 12 ।।

अनुग्राहकत्वादिभेदेन नियतस्थितिप्रसवनिरोधावस्थासु कालस्य व्यवहारोऽविनाभावीति विश्वस्यैतदायत्तत्वादात्मा सूत्रस्थानीयश्चेष्टाहेतुत्वाद् व्यापार एवोभेदेनासौ व्यवह्रियते ।। 12 ।।

विश्वात्मत्वमेवास्य प्रतिपादयितुमाह ।

मूर्तीनां तेन भिन्नानामाचयापचयाः पृथक् ।

लक्ष्यन्ते परिणामेन सर्वासां भेदयोगिना ।। 13 ।।

प्राण्यप्राणिरूपाणां भावानां तेन कालेन परिणामकरणादानुपूर्व्या वृद्धिह्रासा विवेकेन लभ्यन्ते यौवनस्थाविरावस्थासु । भेदयोगिना इति । संसर्गिक्रियाविशेषोपहितनानात्वेनेत्यर्थः । मूर्तिग्रहणेन नित्येषु कालकृतोपकाराभावमाह ।

प्रतिबन्धाभ्यनुज्ञाभ्यां हि जन्मविनाशवन्तो भावाः काले समायतन्ते ।। 13 ।।

अन्वर्थेन नाम्नैव कालो विश्ववैचित्र्यहेतुरित्याह ।

जलयन्त्रभ्रमावेशसदृशीभिः प्रवृत्तिभिः ।

स कलाः कलयन् सर्वाः कालाख्यां लभते विभुः ।। 14 ।।

जलस्योद्धरणार्थं यन्त्रमरघट्टप्रायं तस्य भ्रमः परिवर्तनं तेनावेशस्तस्यैव क्षोभः तत्तुल्याः परावर्तमानस्य कालस्य पुनः पुनर्वसन्तादिभावेनावृत्तयः ताभिरयं विभुः व्यापको नित्योऽपि विकलयति विक्षिपति कलाः भावपर्यायाः समुत्सृजति स्वकारणेभ्यः प्रवर्तयतीति कालाख्याम् अन्वर्थां लभते । अनेनैतत् सूचयति । विश्वात्मैक एव परब्रह्माभिधानः सत्यो भावः । स एव नानाविधकार्यकारितयानन्तशक्तित्वेन व्यवह्रियते । तथा च क्रमिकांश्चक्रभ्रमवत् परावर्तमानान् भावान् प्रकाशयन् कालयति भूतानीति काल इत्युच्यते । स विभुः स्वतन्त्रः । अत एव स्वातन्त्र्यशक्तिः काल इति वाक्यपदीये सिद्धान्तितम् ।

अध्याह्रितकालां यस्य कालशक्तिमुपाश्रिताः । (Vak I.3.)

इत्यत्र । इहापि च सिद्धान्तयिष्यति ।

`शक्त्यात्मदेवतापक्षैर्भिन्नं कालस्य दर्शनम्'(Vak.III.का.62.)

इति । यथाहि भ्रामको बाहुना जलयन्त्रं परिवर्तयति तथा कालशक्त्या विभुर्भावानिति ।। 14 ।।

प्रतिबन्धलक्षणापि कालप्रवृत्तिरभ्यनुज्ञयैवाक्षिप्तेति, सर्वथा कालपारतन्त्र्यं निदर्शनोपन्यासेनाह ।

प्रतिबद्धाश्च यास्तेन चित्रा विश्वस्य वृत्तयः ।

ताः स एवानुजानाति यथा तन्तुः शकुन्तिकाः ।। 15 ।।

हेमन्तादिकालभेदापन्ने साधनशक्तयः कालेन प्रतिबद्धास्ता एव वसन्तादिभावमनुप्राप्तः स एवोत्सृजतीति कालयतीत्युच्यते । तद् यथा । बृहत्पक्षिग्रहणोपायभूतान् सूक्ष्मपक्षिणः तन्तुः बन्धनसूत्रमेव प्रसारितं प्रवर्तयत्युत्सृजति, पुनस्तदेव सङ्कोचितं प्रतिबध्नाति । धीवरा हि पक्ष्यन्तराणां ग्रहणाय सूत्रप्रतिबद्धान् पक्षिणश्चेष्टयन्ति । तथा च ते सूत्रप्रतिबद्धा स्तत्संकोचविकासाभ्यां प्रतिबन्धोत्सर्गावनुभवन्ति, न तूच्छृङ्खलाइवोड्डीय गन्तुं प्रभवन्ति, तयेच्छायां तन्तुनाकर्षणात् । एवं कालसूत्रप्रतिबद्धाः पदार्थाः संकोचविकासलक्षणावुत्पत्तिध्वंसावनवरतमनुभवन्तीत्यर्थः । अतश्च कालप्रसेवकान्तर्गतं विश्वं प्राप्तकालं प्रसूयते प्रसूतमवतिष्ठते, अवस्थितं कृतकरणीयं विनश्यति ।। 15 ।।

कथमित्यत्रैव क्रममाह ।

विशिष्टकालसंबन्धाल्लब्धपाकासु शक्तिषु ।

क्रियाभिव्यज्यते नित्या प्रयोगाख्येन कर्मणा ।। 16 ।।

इह प्राणिनामुपभोगाय विश्वरचनाप्रपञ्च इति प्रलयपर्यवसानसमयेऽदृष्टवशात् परमाणुषु यथास्वं कार्यजनिकाः शक्तयोऽभिमुखीभवन्ति । दर्शनान्तरे प्रधाने वा मूलकारणे कार्योन्मुखशक्तिषु च नित्येषु मूलकारणेषु परस्परसंश्लेषाय प्रयोगः प्रेरणाख्यः कर्मविशेषो जायते, येन सामान्यभूता प्रवृत्तिरिति पूर्वव्याख्यातसतत्वा सर्वभावगता नित्या क्रिया प्रकटीक्रियते । तथा च सव्यापाराणि कारणानि परस्परं संयुज्यन्ते ।। 16 ।।

ततश्च

जातिप्रयुक्ता तस्यां तु फलव्यक्तिः प्रतीयते ।

कुतोऽप्यद्भुतया वृत्त्या शक्तिभिः सा नियम्यते ।। 17 ।।

तस्यां नित्यायां क्रियायामभिव्यक्तायां सत्यां

कारणेषु फलव्यक्तिः कार्यव्यक्तिः प्रजायते ।

स्वाश्रयस्याभिनिष्पत्त्यै सा क्रियायाः प्रयोजिका ।। (Vak.III.pe.25-26.)

इति जातेः प्रयोजकत्वमुक्तम् । नियतजातीयाभिसंधानेन कारणानां व्यापारोपपत्तेः जाति प्रयोजककर्त्री । सदसत्पक्षभेदेन दर्शनद्वयस्य पूर्वं प्रत्याख्यानादाह कुतोऽप्यद्भुतया वृत्त्या इति ।

अत्यद्भुता त्वियं वृत्तिर्यदभागं यदक्रमम् ।

भावानां प्रागभूतानामात्मतत्वं प्रकाशते ।। (Vak.III.सं.81)

इत्यत्र निर्णीतमेतत् । सा च जाता कार्यव्यक्तिः कारणशक्तिभिर्नियम्यते येन तत्रैव तिष्ठति । तत्संबन्धितया च व्यवह्रियते । सदसत्पक्षयोरपि च कारणानां व्यापारस्य पराकरणात् स्वात्मनि कार्यस्य प्रतिष्ठापनं नियमोऽप्यद्भुताश्चर्यभूता वृत्तिः ।।17 ।।

अनन्तरं किं भवतीत्याह ।

ततस्तु समवायाख्या शक्तिर्भेदस्य बाधिका ।

एकत्वमिव ता व्यक्तीरापादयति कारणैः ।। 18 ।।

इह तन्तुषु पट इत्यादीहप्रत्ययहेतुः समवायः पारतन्त्र्यसाम्यात् पूर्वं शक्तित्वेन व्यवस्थापितः । स नियमानन्तरं कार्यकारणर्भेदं तिरोधापयति । यत एकत्वमिव अत्र भासते । तथा च केचित् कारणव्यतिरिक्तं कार्यं नेच्छन्ति ।

भेदप्रत्ययविषयेभ्योऽभेदप्रत्ययविषयस्यावयविनोऽवयवेभ्यो वस्तुतो भेदान्नैकत्वमिति इव शब्दः ।। 18 ।।

एवं प्रतिष्ठितायां कार्यव्यक्तौ--

अथास्मान्नियमादूर्ध्वं जातयो याः प्रयोजिकाः ।

ताः सर्वा व्यक्तिमायान्ति स्वच्छे छाया इवाम्भसि ।। 19 ।।

अथ इति समुच्चये । ऊर्ध्वशब्देनानन्तर्यस्योक्तत्वात् । कारणशक्तिभिर्यदाव्यक्तिःस्वात्मनि नियमिता तदनन्तरं निष्ठासंबन्धयोरेककालत्वात् कार्यव्यक्तिर्जातैव स्वजात्या संबध्यते । प्रयोजिकया । निष्ठोत्तरकालं तु क्षणान्तके रूपादिगुणोपजनाद् इन्द्रियार्थसन्निकर्षात् संयुक्तसमवायेन रूपिद्रव्यसयवायाज्जातयः प्रकाशन्ते । तद् यथा निर्मले जले वृक्षादीनां छायाप्रतिबिम्बं जलाभेदेन, एवं व्यक्तेरैकात्म्यमिव प्राप्ता जातयोऽपि गृह्यन्त इति दृष्टान्तसाम्यम् । सर्वाः इति सत्ताद्रव्यत्वपृथिवीत्वादयः ।। 19 ।।

अतोऽनन्तरं गुणानामुत्पत्तिमाह ।

कारणानुविधायित्वादथ कारणपूर्वकाः ।

गुणास्तत्रोपलभ्यन्ते स्वजातिव्यक्तिहेतवः ।। 20 ।।

कारणानुविधायित्वेन पूर्वं कारणोत्पत्तेः पश्चात् कार्योत्पत्तिमाह । तेनैकस्मिन् क्षणे निर्गुणैव कार्यव्यक्तिः ततोऽवयवगुणेभ्योऽसमवायिकारणेभ्यः स्वावयविसमवायकारणसहितेभ्योऽवयविनि रूपाद्युत्पत्तिः । उत्पन्नाश्च रूपादयः स्वजाती रूपत्वादिकाः समभिव्यञ्जयन्ति । अदृष्टवशात् परमाणुषु क्रियोत्पन्ना पूर्वदेशसंयोगविभागाविनाशपूर्वकं परस्परोपश्लेषेण द्वयणुकादिप्रक्रमेण भोगसाधनान् पदार्थान् उत्पादयतीति पिण्डितार्थः । अत्र सर्वत्र क्रमाख्या कालशक्तिः सव्यापारेत्यभ्यनुज्ञेयम् ।। 20 ।।

कालकृता जन्मपर्याया भावानां व्याख्याताः । इदानीं स्थितिः व्याचष्टे ।

आश्रयाणां च नित्यत्वमाश्रितानां च नित्यता ।

ता व्यक्तीरनुगृह्वाति स्थितिस्तेन प्रकल्पते ।। 21 ।।

यासां तावत् कार्यव्यक्तीनां नित्या आश्रयाः कारणानि तासां कारणविनाशपूर्वकस्य विनाशस्याभावादवस्थितत्वम् । अतश्च परमाण्वादीनां कारणानां नित्यत्वं कर्तृताः कार्यव्यक्तीरुपकरोति स्थापरत्वेनावस्थापनात् । अन्यथाधारविनाशान्नावतिष्ठेरन् । अनित्याश्रयाणामपि कार्यव्यक्तीनामाश्रितानां जातीनां नित्यत्वादविनाशकारणमवस्थानं स्वजातिभिरेवानुगृह्यते, तावन्तं कालं नियतजातीयतयावस्थानसम्भवात् । अन्यथाधेयानां सामान्यानामपाये द्रव्याण्यव्यवहार्यत्वादस्थितकल्पानि स्युः ।। 21 ।।

इत्थं चोत्पत्तिरिव स्थितिरपि पराधीनेत्याह ।

अनित्यस्य यथोत्पादे पारतन्त्र्यं तथा स्थितौ ।

विनाशायैव तत् सृष्टस्वाधीनस्थितिं विदुः ।। 22 ।।

कारणं विनोत्पत्त्यभावात् यथासौ तत्परतन्त्रा तथा कारणावष्टम्ममन्तरेण स्वतःस्थित्यभावात् कृतकमुत्पत्त्यनन्तरमेव प्रध्वंसमियादिति विनाशायैव तत् सृष्टं स्यात्, नार्थक्रियार्थमित्यर्थः । तन्मा भूदस्यापार्थकं जन्मेति कारणायत्तस्थितिकं तन्मन्यन्ते वैशेषिकाः ।। 22 ।।

ननु क्रमयौगपद्याभ्यां स्थिरार्थक्रियानुपपत्तेरन्ते विनाशदर्शनात् तत्रापेक्षाभावात् कृतकः सन्नित्येव विनश्यतीति स्थित्यभाव इत्याशङ्क्याह ।

स्थितः संसर्गिभिर्भावैः स क्रियास्वनुगृह्यते ।

नैषां सत्तामनुद् गृह्य वृत्तिर्जन्मवतां स्मृता ।। 23 ।।

संसर्गिभिः सहकारिभिः अनुगृहीतो भावोऽर्थक्रियासु योग्यः । न ह्येकं किञ्चन जनकं सामग्रीतः क्रियासिद्धिरित्येषां संसर्गिणां सहकारिणां सत्त्वमस्वीकृत्य कार्ये वृत्तिः व्यापारो नास्ति जातानां भावानाम् । तदेवं क्रमभाव्यनेककार्यकर्तृत्वं तत्तत्सहकारिप्राप्तौ स्थितिलक्षणमुपपद्यते । तथा च स्थितिपर्यन्ताभ्यनुज्ञोपपत्तिः । यत्तु सहकारिणः किं कुर्वन्तीति चोद्यते तत्र सहकरणमेव सहकारार्थोऽतिशयादेरन्यत्र विचारितत्वाद् यथाप्रतीति स्थिरत्वं समर्थितं तद्वादिभिः ।। 23 ।।

इदानीं प्रतिबन्धलक्षणां कालवृत्तिं व्याचष्टे ।

जराख्या कालशक्तिर्या शक्त्यन्तरविरोधिनी ।

सा शक्तिं प्रतिबध्नाति जायन्ते च विरोधिनः ।। 24 ।।

जीर्यते भावोऽनयेति जरा नाम कालस्य शक्तिः प्राण्यप्राणिसाधारणयौवनादिशक्त्यन्तरप्रतिबन्धिनी कार्यव्यक्तीनां

कालान्तरपरिवासावधृतार्थक्रियासु सामर्थ्यं विघ्नयति । ततश्च सामर्थ्यविरोधिनोऽवस्थाविशेषाः प्राण्यप्राणिषु प्रज्ञामान्द्यशोषादयः प्रादुर्भवन्ति । यतः प्रध्वंसः प्रत्यासन्न इति लक्ष्यते ।। 24 ।।

एवं जरसाधिष्ठिते भावे

प्रयोजकास्तु ये भावाः स्थितिभा गस्य हेतवः ।

तिरोभवन्ति ते सर्वे यत आत्मा प्रहीयते ।। 25 ।।

यैः (ये?) प्रवर्तिताः स्वकार्ये भावाः संसर्गिभिः सहकारिभिः स्थित्यंशहेतवः ते सर्वेऽस्य जराधिष्ठितस्य कृतध्ना इव सहोषिता अपि निवर्तन्ते । तेषु निवृत्तेषु कृतकरणीयस्यास्य भावस्य स्वरूपं प्रच्यवते ।। 25 ।।

न तु विनाशकारणैरस्य किञ्चित् क्रियत इत्याह ।

यथैवाद्भुतया वृत्त्या निष्क्रमं निर्निबन्धनम् ।

अपदं जायते सर्वं तथास्यात्मा प्रहीयते ।। 26 ।।

जन्मनि सदसत्पक्षभेदेन पूर्वं कारणव्यापारस्य व्युदासादविभावितत्त्वमविद्यमानकारणभूतनिबन्धमत एव कारणव्यापाराभावात् पौर्वापर्येणांशांशिकयानिष्पत्तेरक्रमं विश्वमाजायमानमुपलक्ष्यत इति पूर्वमेव विवर्तचिन्तायां निर्णीतमेतत् । एवं विनाशेऽपि । क्रियमाणतायां भावतापत्तेर्निर्निबन्धनमेव प्रहाणं कालपरिवासाधीनं भावानामित्यर्थः । तदेवं सर्गस्थितिप्रलयानां कालकृतप्रतिबन्धाभ्यनुज्ञावशेन सम्भव इति विश्वात्मनः कालस्य व्यापारोऽत्र सर्वत्रेति निर्णीतम् । तदुक्तम्

प्रत्यवस्थं तु कालस्य व्यापारोऽत्र व्यवस्थितः (Verse.12.)

इति ।। 26 ।।

इदानीमपरमपि कालानुमानहेतुमाह ।

क्रिययोरपवर्गिण्योर्नानार्थसमवेतयोः ।

संबन्धिना विनैकेन परिच्छेदः कथं भवेत् ।। 27 ।।

इह क्रिया तावदनेकक्षणसमाहारात्मिका युगपत् क्षणानामभावात् सक्रमेति कालशक्त्यनुगृहीतैव । सर्वः क्रमे हि कालधर्मः । द्वयोश्च क्रिययोरुदयानन्तरध्वंसित्वे समानेऽपि चिरेण कृतं क्षिप्रं कृतमिति विलक्षणः परिच्छेदो विनैकं संबन्धिनमुपाधिभूतं नावकल्पते । नानार्थसमवेतयोः इत्यनेनाश्रयभेदात् क्रियाभेदामाह । ततश्च नैकक्रियानिमित्तोऽयं व्यपदेशः, पटश्चिरेण कृतो घटश्चिरेण कृत इति आश्रयबेदेऽप्यनुवृत्तेः । क्रियाया भिन्नाश्रयसमवेताया भेदे सति तदनुपपत्तेः । अत एव न कार्यद्रव्यनिमित्तोऽयं व्यपदेशः, कार्यद्रव्यस्य भेदादभिन्नव्यपदेशहेतुत्वानुपपत्तेः । न च काराकादि निमित्तमत्र तस्यापि भेदस्यानुवृत्तेः । तस्माद् यदत्र निमित्तं स कालः । सोऽपि चेद् भिन्नो नासावनुवृत्तः प्रत्ययः स्यादित्युक्तम् एकेन इति । एको हि साधारण्यात् कालोऽनुवृत्तं प्रत्ययं जनयति ।। 27 ।।

यद्येवं विलक्षणचिरक्षिप्रादिव्यप्रदेशः कुत इत्याशङ्क्याह ।

यथा तुलायां हस्ते वा नानाद्रव्यव्यवस्थितम् ।

गुरुत्वं परिमीयेत कालादेवं क्रियागतिः ।। 28 ।।

सुवर्णरजतादिद्रव्यसमवेतं गुरुत्वमेक एव तुलादण्डो रेखासूत्रसंबन्धोपहितभेदो यथा पलादिभावेन परिच्छिनत्ति तथा कालोऽपि स्वशक्तियोगाद् वैश्वरूप्यमनुभवन् निमेषादिक्रियाभेदोपहितनानात्वं क्रियासन्तानं चिराचिरादिभावेन परिमिमीते । अभ्यासातिशयवतां वणिजां हस्तो द्रव्याणां गुरुत्वविशेषं परिच्छिनत्तीति सोऽपि दृष्टान्तः । यथासौ हस्तः एवं निरुपाधिरेक एव स्वसामर्थ्यात् कालः क्रियागतं भेदं परिच्छिनत्ति ।। 28 ।।

एवं चैकः स कालः

जहाति सहवृत्ताश्च क्रियाः स समवस्थिताः ।

व्रीहिर्यथोदकं तेन हायनाख्यां प्रपद्यते ।। 29 ।।

अवस्थिते एकस्मिन्नेव काले नानाविधाः क्रियास्तत्सहचारिण्योऽप्ययन्ते । अतः स कालो हायनाख्यां संवत्सरपर्यायां प्रपद्यते ।

जहाति क्रिया इति हायनः । तद्यथा व्रीहिबीजं सहावस्थितमुदकमपजहद्धायन इति व्यपदिश्यते । अत एव
हश्च व्रीहिकालयोः (P.3.1.148)
इति सूत्रेकारेणोपमागर्भं (र्भा?) सहैव व्युत्पत्तिरनुशिष्टा । यथा जलैर्वीहिः सहावस्थितैरूपक्रियते तथा कालोऽपि क्रियाभिः सहकारिणीभिर्भावानुकरोतीति औपाधिकोऽस्य भेदः । मुख्यस्त्वभेदः ।। 29 ।।
यदि तर्ह्यवस्थित एकः कालः, कथमस्य क्रमरूपतेत्याह ।
प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्या शाश्वती ।
तया विभज्यमानोऽसौ भजते क्रमरूपताम् ।। 30 ।।
कस्याश्चित् क्रियायाः साधनशक्तीनां व्यापारविघाते प्रतिबन्धः । तद्विपर्ययोऽभ्यनुज्ञा । ताभ्यामुपलक्षिता कालस्य नित्या प्रवृत्तिर्भावेषु । सततपरिणामिषु हि भावेषु किञ्चिदाजायते किञ्चिदपक्षीयते इति नियतमेतत् । तथा च कार्यनिवेशी क्रमः काले समारोप्यते, नत्वसौ तत्र भाविक इत्यर्थः । क्रियाधर्मो हि मुख्यः क्रमस्तदन्यत्रोपचरितः । पौर्वापर्यं हि पूर्वापरेषु वस्तुषूपाधिभूतं लक्ष्यते न तु स्वतन्त्रम् । एवं यौगपद्यमपि क्रमविरोधी धर्मः कार्यगतः काले समारोप्यते ।। 30 ।।
समविषमरूपतापि कालस्योपचरित्याह ।
कर्तृभेदात् तदर्थेषु प्रकर्षापचयौ गतः ।
समत्वं विषमत्वं वा स एकः प्रतिपद्यते ।। 31 ।।
इह यदानुष्ठातारः श्रुतिस्मृतिनिबन्धनमाचारमनुतिष्ठन्ति तदा प्रकर्षमासादयन् कालः स एवैकः कृतादिर्व्यपदिश्यते । शुभसमाचाराधिकारिबाहुल्यादि भिन्न इत्यर्थः । तदर्थः कर्तृसाध्यः समाचारः । यदा तु कर्तारो विशृङ्खला यथावत्समाचारमुल्लंघयन्ति तदा समाचारापकर्षादपचयप्राप्तेः कलिप्रभृतिर्विषभः कालोऽभिधीयते । तदयमेकोऽप्यनुष्ठातृभेदाद् विभागमासादयति कालः ।। 31 ।।
अन्यदप्यध्यारोपितं कालस्य विभागमाह ।
कियाभेदाद्यथैकस्मिंस्तक्षाद्याख्या प्रवर्तते ।
क्रियाभेदात् तथैकस्मिन्नृत्वाद्याख्योपजायते ।। 32 ।।
तक्षणायोविकरणा दिक्रियाविशेषोपल्पिता तक्षायस्यकारादिसंज्ञा यथैकस्य कर्तुः प्रवर्तते तथा विशिष्टपुष्पादिप्रसवलक्षणक्रियाभेदादेकस्यापि कालस्य वसन्तादभेदेन समाख्या जायते । आदिग्रहणात् सितासितपक्षव्यपदेशोऽहोरात्रव्यपदेशः प्रदोषप्रत्यूषव्यपदेशश्च यथायथं क्रियाभेदोपहितो गृह्यते ।। 32 ।।
अन्योऽपि कालभेदोऽध्यारोपितो भवतीत्याह ।
आरम्भश्च क्रिया चैव निष्ठा चेत्यभिधीयते ।
धर्मान्तराणामध्यासभेदात् सदसदात्मनः ।। 33 ।।
उत्पत्तेः पूर्वमसदात्मा पदार्थः । उत्पन्नस्तु सदात्मा । तस्य बुद्ध्यैकत्वेन वस्तुरूपतया स्वीकारे सति विलक्षणधर्मभेदवशादारम्भादिकालो भेदेन वयवह्रियते । तथा हि बुद्ध्याभिसन्धाय पदार्थरूपं योग्यसाधनोपार्जनमारम्भकालः । उपार्जितसाधनस्य करणं क्रियाकालः । कर्तव्यस्य समाप्तिर्निष्ठाकालः । तदेवं यथाकालं धर्मभेदकल्पनयारम्भादिकालप्रवियागः ।। 33 ।।
स च सर्वत्र समान इत्याह ।
यावांश्च द्व्यणुकादीनां तावान् बिमवतोऽप्यसौ ।
न ह्यात्मा कस्यचिद् भेत्तुं प्रचेतुं वापि शक्यते ।। 34 ।।
अवयविनां निरंशत्वादारम्भादिकालः सर्वेषां समानः । अवयवास्तु ततोऽर्थान्तरम् । परिमाणमपि च गुणोऽन्य एवावयविन इति न तद्भेदे तस्य रूपं प्रचेतुमपचेतुं वा शक्यते । तस्मादवयविमात्रस्य कार्यद्रव्यस्य समानत्वान्न तद्वशेनाल्पपरिमाणानां महापरिमाणानां चारम्भादिकालो विशिष्यते, अपि त्ववयविव्यतिरिक्तधर्मान्तरवशेनेत्यर्थः ।। 34 ।।

तदाह ।

अन्यैस्तु भावैरन्येषां प्रचयः परिकल्प्यते ।

शनैरिदमिदं क्षिप्रमिति तेन प्रतीयते ।। 35 ।।

अल्पपरिमाणमहापरिमाणानामवयविनामन्यैर्व्यतिरिक्तैरेवावयवैर्बहुभिः प्रचयोऽल्पैरपचयश्च परिकल्प्यतेऽध्यारोप्यते । तथा च बह्ववयवोऽवयवी शनैर्निष्पद्यते, अल्पावयवस्तु क्षिप्रमित्यारम्भादिकालस्तत्र विलक्षणोऽवधार्यते ।

समवायतिरोहितभेदत्वादवयवधर्मैरवयविनो व्यपदेशः, न तु भावतः कालो भिद्यतेऽवयविनाम् ।। 35 ।।

यतः

असतश्च क्रमो नास्ति स हि भेत्तुं न शक्यते ।

सतोऽपि चात्मतत्त्वं यत् तत् तथैवावतिष्ठते ।। 36 ।।

उत्पत्तेः पूर्वमसन् भावः । तस्य निःस्वभावत्वात् पौर्वापर्येण विभागाभावात् क्रमो नास्ति । उत्पन्नस्यापि विद्यमानस्य तेनैव प्रकारेणाशक्यभेदत्वेन स्वरूपस्यावस्थानादविद्यमानः क्रम इति बुद्ध्यानु सन्धाने न क्रमव्यवहारः सदसतोरित्यर्थादभिहितं भवत् । भेदाश्रयो हि क्रमः । स च भेदः पदार्थस्योत्पद्यमानावस्था तत्त्वतः सदसदवस्थाद्वयरूपस्य प्रत्यवस्थमसंभवीति तत्सङ्कलनया पूर्वापररूपताध्यारोपः । एवं प्रथम एव क्रमः काल्पनिक इति सर्वस्तथारूपो न मुख्यः ।। 36 ।।

न केवलं क्रियाभेदनिमित्ताः काले एकस्मिन्नृत्वाद्याख्याः प्रवर्तन्ते, यावद् भूतादि व्यपदेशा अपीत्याह ।

क्रियापाधिश्च सन् भूतभविष्यद्वर्तमानताः ।

एकादशभिराकारैर्विभक्ताः प्रतिपद्यते ।। 36 ।।

उत्पन्नध्वस्ता यदा क्रिया भवन्ति तदा तदुपाधिः कालो भूत इति व्यपदिश्यते । यदा तु सन्निहितसाधनाः सम्भाव्यमानोदयाः क्रियाः तदा तदुपाधिः कालो भविष्यत्तां प्रतिपद्यते । प्रारब्धापरिसमाप्तक्रियोपाधिस्तु वर्तमानसंज्ञः । ते च भूतादयः

कालविभागाः पुनरवान्तरभेदेनैकादशधा भवन्ति ।। 37 ।।

कथमित्याह ।

भूतः पञ्जविधस्तत्र भविष्यंश्च चतुर्विधः ।

वर्तमानो द्विधाख्यात इत्येकादश कल्पनाः ।। 38 ।।

भूतसामान्यं विशेषेभ्यो व्यावृत्तेरेको भूतभेद इति गण्यते । तथा चोक्तं

"सामान्यमपि यथा विशेषस्तद्वत् "

इति । अद्यतनो द्वितीयो भूतभेदः । अनद्यतनस्तृतीयः । अद्यतनानद्यतनसमुदायस्ताभ्यामन्यत्वाच्चतुर्थः । परोक्षस्तवनद्यतनभेदो न भूतभेद इति न पृथग् गण्यते । यस्तु भविष्यन्नप्यतिदेशाद् भूतकार्याणि लभते स पञ्चमो भूतभेदोऽध्यारोपितभूतभावो गौणः । भविष्यत्सामान्यमद्यतनोऽनद्यतनोऽद्यतनानद्यतनसमुदायश्चेति चत्वारो भविष्यद्भेदाः । यस्तु अनद्यतनवत्प्रतिषेधाद् भविष्यत्सामान्यकार्याणि प्रतिपद्यते सोऽनद्यतनोऽपि शास्त्रव्यवहारे भविष्यत्सामान्यमेव । मुख्यो वर्तमान एकः ।

तत्समीपभूतस्त्वतिदिष्टवर्तमानभावः

वर्तमानसमीप्ये...(2.3.3.131.)

इति भूतोभविष्यंश्च स द्वितीयः । तदेते शास्त्रकार्यप्रविभागार्थं कालस्य भेदाः कल्पिताः, न त्वसा वियत्संख्यः ।

एवमनन्तभेदत्वात् क्रियाभेदाद् भूतादिभेद उक्तः ।। 38 ।।

क्रिया चातीताऽविद्यमाना कथं भूतव्यपदेशं काले समर्पयेदित्याशङ्कयाह ।

काले निधाय स्वं रूपं प्रज्ञया यन्निगृह्यते ।

भावास्ततो निवर्तन्ते तत्र संक्रान्तशक्तयः ।। 39 ।।

क्रियया निर्वर्तिताः पदार्थाव्यतीता इति भण्यन्त व्यपगतस्वरूपाः । तत्र यत्तेषां वर्तमानावस्थायां बुद्ध्या स्वरूपं गृहीतं तत् स्थायिनि काले स्वाधारे समर्प्यव्ययन्ते, यतोऽनुभूताः स्मर्यमाणावस्था जायन्ते । तथा चातीतेऽध्वनि संक्रान्तशक्तयो व्यवहारं

स्मार्तमनुपतन्ति । एतदुक्तं भवति । भावोपाधितया कालतत्त्वं प्रख्यायते । भावाश्चानुभूतौ स्मर्यमाणावस्थास्तस्य भूतव्यपदेशमेव स्वोपाधितया कल्पयन्ति । तथा चभूद् घट इत्यादिव्यवहारः । अतश्चैतदेव कालसद्भावावेदकं लिङ्गम् । असत्यर्थे तद्व्यवहारानुपपत्तेः । कालसंक्रान्तरूपत्वेऽभूदिति व्यवहारात् कालसिद्धिः ।। 39 ।।

तर्हि भविष्यद्व्यपदेशोऽपि कथमित्याह ।

भाविनां चैव यद्रूपं तस्य च प्रतिबिम्बकम् ।

सुनिर्मृष्ट इवादर्शे काल एवोपपद्यते ।। 40 ।।

समर्थहेतुसन्निधानसमये संभावितोत्पत्तीनां पदार्थानां यद्रूपं बाह्यं यच्च तस्य बाह्यस्वरूपस्य बुद्धौ निश्चितं प्रतिबिम्बरूपं तदाकारस्तयोर्द्वयोर्दृश्यविकल्पयोरेकत्वाध्यवसायत् स्थायिनि काले समारोहस्तत्र संक्रान्तशक्तित्वमिति तदध्यारोपात् काले भविष्यत्त्वमध्यवसाय नियतरूपनिश्चय इत्यर्थः । कालादिप्रसेवकान्तर्गता एव पदार्थाश्चकासतीत्यादर्शसाम्यम् ।। 40 ।।

एवं च कालसंक्रान्तरूपत्वाद् भावानामजस्रपरिणाम इत्याह ।

तृणपर्णलतादीनि यथा स्रोतोऽनुकर्षति ।

प्रवर्तयति कालोऽपि मात्रा मात्रावतां तथा ।। 41 ।।

नदीप्रवाहो यथा तृणादीनि कानिचित् प्रेरयति स्वस्थानात् प्रच्यावयति, कानिचित् पुनराक्षिप्य तत्स्थाने निवेशयति एवमजस्रप्रवृत्तिः कालो भावानाक्षिप्याक्षिप्योत्सृजति, उत्सृष्टानां च धर्मपरिणामान् वर्तयति ।। 41 ।।

दष्टान्तान्तरेण तदेव द्रढयति ।

आविश्येवानुसन्धत्ते यथा गतिमतां गतीः ।

वायुस्तथैव कालात्मा विधत्ते क्रमरूपताम् ।। 42 ।।

यथा प्राणाख्यो वायुः शरीरिणामन्तरवयवसन्धिष्ववस्थितो गमनागमनादिचेष्टाः साधयति तथा कालात्मा अपि भावानामात्मन्यनुप्रविश्य प्रतिबन्धाभ्यनुज्ञाभ्यां निमज्जनोन्मज्जने कुर्वत् क्रमं पौर्वापर्यलक्षणं प्रवर्तयति ।। 42 ।।

ततश्चेदं सिद्ध्यतीत्याह ।

अयनप्रविभागश्च गतिश्च ज्योतिषां ध्रुवा ।

निवृत्तिप्रभवाश्चैव भूतानां तन्निबन्धनाः ।। 43 ।।

दक्षिणायनमुत्तरायणमिति कालकृकतमर्यादायत्तः प्रविभागः । नक्षत्राणां च नियता गतिः उदयादिरूपा कालमनुपतति । महाभूतानां च सर्गप्रलयसमये जन्मविनशावाविर्भावतिरोभावलक्षणौ कालायत्तौ इति सर्वोपकारी कालो विश्वात्मेत्युच्यते ।। 43।।

ज्योतींषि नक्षत्रपर्यायाणि कालप्रविभागरूपाणि नान्यत्तत्त्वमित्याह ।

मात्राणां परिमाणा ये कालवृत्त्यनुयायनः ।

नक्षत्राख्या पृथक् तेषु चिह्नमात्रं तु तारकाः ।। 44 ।।

विशिष्टकालसंबन्धवशेन ये भावानां विशिष्टाः परिणामास्ते पृथक् पृथक् विभक्ताः कृत्तिकादिनक्षत्रसंज्ञाः प्रतिपद्यन्ते । तथाहि चन्द्रमसा योगे पुष्यादीनां यो भावो जातः स तद्व्यपदेशं लभते तिष्यः पुनर्वसुर्वा माणवक इति । अत एवात्र जातप्रत्ययस्यादर्शनमन्वाख्यायते । स्वाभाविकं ह्यर्थाभिधानं शब्दानां व्युत्पाद्यते । तेन विशिष्टोपजातः पदार्थः तिष्टादिव्यपदेश्य इति भावतो मात्रापरिणाम एव नक्षत्रोपाधिः कालः । पृथक्ग्रहणात् कालस्यापि नक्षत्रसमारव्या गम्यन्ते कृत्तिका रोहिणीत्यादि । स हि कालभागो भावेषूपाधिर्जनिक्रियामुखेन । तस्यैव तु ज्ञापकानि ज्योतींषि, न तु तावदेव नक्षत्रस्य रूपं चन्द्रमसा योगे तदुपपत्तेः ।। 44 ।।

यथा च नियतकालविशेषो ज्योतीरूपैश्चिह्णैः कार्यभूतैर्ज्ञाप्यते , तथान्यैरपीत्याह ।

रुतैर्मृगशकुन्तानां स्थावराणां च वृत्तिभिः ।

छायादिपरणामैश्च ऋतुधामा निरूप्यते ।। 45 ।।

ऋतवो धाम स्थानं यस्य, तदात्मकत्वेन प्रतिभासात् । कालाख्या हि स्वातन्त्र्यशक्तिर्ब्रह्मणो वसन्तादिभेदेन प्रविभक्ता चकास्ति । तथा चासौ नियतऋतुभेदः पुंस्कोकिलादिकूजितवशेन नवनवकिसलययोगेन सूयादि
सञ्चारविशेषोपलक्ष्यमाणच्छायातपादिभेदेन लतावतानप्रसूनविशेषेण चावधार्यते । तथाहि ।

सुगन्धिकुसुमामोदमत्तषट्पदनिर्भरः ।
पुंस्कोकिलरवाकीर्णवनोद्देशो विभाव्यते ।।
मधुर्मधुरझंकारसुखमारुतसङ्गमः ।
प्रबोधितप्रियाबाहुमञ्जरीसक्तवल्लभः ।।
मल्लिकामोदरुचिरो धर्मार्तगजकम्पतिः ।
प्रकम्पिपवनः शुष्कलताकुसुमसञ्चयः ।।
शुष्यदास्यपिपा सार्तप्राणिसङ्करग्रहनरः ।
प्रतप्तपांसुनिचयो ग्रीष्मः सोष्मा विभाव्यते ।।
प्रशान्तातपसञ्चारा नीरदाच्छादिताम्बराः ।
जलाप्लावितभूभागाः सञ्चारविषमाः क्वचित् ।।
मयूरकेकारवपूरिताशा लतागृहान्तः स्थितकामिसंघाः ।
उत्कण्ठितप्रोषितदत्तकम्पा वर्षा विभाव्यन्त इह क्रमेण ।।

हंसानां निनदेन पद्मनिचयैर्लाक्षाद्रवोद्भासिभि--
र्नैर्मल्येन दिशां विशुद्धधवलैरभ्रैर्नभोलाञ्छनैः ।
शालीनां परिपाकशोभिवपुषां हृद्यैर्मृगाणां गतैः
संभाव्या शरदभ्रमुक्तविमलव्योमस्फुरत्तारका ।।

प्रसूनैस्तत्रत्यैर्दिशि दिशि चकासद्भिरमलै-
जडिम्ना सन्नाङ्गैः पशुभिरथ काकैर्वनगतैः ।
निशानां विस्तारैरभिमततमैः कान्तमनसां
हिमैर्हेमन्ताख्यः समय इहलक्ष्यः स्फुटवपुः ।।
हिमप्रपातस्थगितोरुमार्गो विशीर्णपर्णः शिशिरोऽपि लक्ष्यः ।
शीतार्तसीदच्छकुनिप्रकाण्डो नीहारधारावृतभूमिपृष्ठः ।।
प्रफुल्लकुन्दप्रकरप्रचारस्तुषारसङ्घातविभेददक्षः ।
वहत्यजस्रं शिशिरो नभस्वान् यत्राभितः स्फीततरुप्रकर्षः ।।45 ।।

इदानीमद्वैतवादेऽपि कालोपयोगं भावानामाह ।

निर्भासोपगमो योऽयं क्रमवानिव दृश्यते ।
अक्रमस्यापि विश्वस्य तत् कालस्य विचेष्टितम् ।। 46 ।।

संबन्धसमुद्देशे प्रदर्शितदिशाऽक्रमं ब्रह्मविवर्तरूपं विश्वम् । तस्य यदिदं क्रमेणावभासनं तत् कालशक्तिकृतप्रतिबन्धाभ्यनुज्ञासामर्थ्यम् । कालाख्या हि ब्रह्मशक्तिरविद्यैव क्रमावभासकारितया जीवात्मसु सफलेति ब्रह्मकाण्ड एव निर्णीतम् । एवं तावत् प्रथमः कालव्यापारोऽत्र क्रमावभासः ।। 46 ।।

तदनन्तरोऽपि कालभेद औपाधिक इत्याह ।

द्रान्तिकव्यवस्थानमध्वाधिकरणं यथा ।
चिरक्षिप्रव्यवस्थानं कालाधिकरणं तथा ।। 47 ।।

दूरोऽयमध्वा निकटोऽयमिति कर्तृगतिभेदेनाध्वनि व्यवस्था, न तु मार्गभेदोऽत्र कश्चित् । य एव हि मन्दगतीनां दूरः स एव चतुरचेष्टानामासन्नोऽध्वा । एवं स्थायिन्यपि काले प्रचितसन्तानक्रियोपाधिः चिरमिति व्यवस्थानम् । अपचितसन्तानक्रियोपाधिः

क्षिप्रमिति ।। 47 ।।

इदानीं पूर्वोक्तोऽपि भूतादिभेदः कालस्य क्रियापाधिः । विशेषमत्र वक्तुं पुनः प्रतिपद्यते ।

तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः ।

भेदा इव त्रयः सिद्धा याँल्लोको नातिवर्तते ।। 48 ।।

अभिन्नेन कालेन व्यबहर्तुमशक्यत्वाल्लोके त्रयो भेदा इव परमार्थत एकत्वात्, क्रियोपाधयः प्रसिद्धाः तस्य भूतभविष्यद्वर्तमानाख्याः । क्रियाव्युपरमे भूतः, सम्भावितायां क्रियायां भविष्यन्, क्षणप्रवाहरूपेण प्रवर्तमानायां तस्यां वर्तमानः । मुख्य एवायम् ।। 48 ।।

कथमस्य भेदो न भवतीत्याह ।

एकस्य शक्तयः तिस्रः कालस्य समवस्थिताः ।

यत्संबन्धेन भावानां दर्शनादर्शने सताम् ।। 49 ।।

कार्यभेदे न कारणभेदानुमानम्, शक्तिभेदादेव कार्यभेदोपपत्तेः । कालाख्यस्य जगत्कारणस्य मुख्यो भेदो नास्ति । तथाहि । वर्तमानशक्तिसंबन्धेन भावानां सतामेवाभिव्यक्तिर्जन्म । अतीतानागतकालशक्तिसंबन्धेन तु सतामेव तिरोभावोऽदर्शनमनभिव्यक्तिर्विनाशः प्राक्प्रध्वंसाभावरूप इति शक्तिभेदात् कार्यभेदोपपत्तौ कालभेदकल्पना निर्निमित्ता ।। 49 ।।

दर्शनादर्शने एव शक्तिप्रविभागेन विभजति ।

द्वाभ्यां स किल शक्तिभ्यां भावानां वरणात्मकः ।

शक्तिस्तु वर्तमानाख्या भावरूपप्रकाशिनी ।। 50 ।।

अतीतानगतशक्तिभ्यां वरणं तिरोधानं भावानां सतां कालः करोति । वर्तमानशक्त्या दर्शने भावरूपप्रकाशनम् ।। 50 ।।

ननु यथानागतशक्तिकृतावरणानां पुनरभिव्यक्तिर्वर्तमानशक्तिसंबन्धो दृश्यते तथातीतशक्तिकृतावरणानामपि कथं न भवतीत्याशङ्कयाह ।

अनागता जन्मशक्तेः शक्तिरप्रतिबन्धिका ।

अतीताख्या तु या शक्तिस्तया जन्म विरुध्यते ।। 51 ।।

जन्मसहचरिताया वर्तमानशक्तेरनागतशक्तिरविरोधिनी प्रतिबन्धं न करोत्युदये । स्वकाले हि तया सा प्रतिबद्धा । समर्थहेतुसम्पाते तु वर्तमानशर्तेरुदयानुकूल्यमनागतशक्तिर्भजते । यस्य हि कालान्तरे वर्तमानता स एवानागतः कथ्यते । अतीतशक्त्या तु जन्मशक्तिर्वर्तनाख्या विरुध्यते एव न हि मृतस्य पुनर्जन्मेतिनातीतेऽध्वनि पतितमाविर्भवति वस्तु ।। 51 ।।

ननु शक्तिमदाश्रिताः शक्तयः शक्तिमानिव सदा संनिहिता इति सदैव तद्योगे भावानां युगपद् विरुद्धरूपदर्शनादर्शनप्रसङ्ग इत्याशङ्क्याह ।

तमःप्रकाशवत्त्वेते त्रयोऽध्वानो व्यवस्थिताः ।

अक्रमास्तेषु भावानां क्रमः समुपलभ्यते ।। 52 ।।

भूतभविष्यद्वर्तमानाख्यास्त्रयः कालविभागा अध्वान इवाध्वानः । यथा ह्यध्वसु गन्तारो गमनागमनादिप्रबन्धं वर्तयन्ति तथैतेषु भावाः परिणाममनुभवन्तो गतागतप्रबन्धमुपरचयन्ति । भविष्यदध्वनि य एव स्थितः स एव वर्तमानाध्वनि पतित्वातीतेऽध्वनि पुनः पतति । तथा च त्रैयाध्विकाः पदार्थाः परिणामवादिभिरभ्युपगम्यन्ते । यदुक्तं पाकञ्जले

धर्मास्त्र्यध्वानः (Vyasabhasya on Y.Dar.III.13.)

इति । यद्यपि चैते त्रयः शक्तिविशेषाः कालात्मन्यक्रमा एवावस्थिताः तथापि तमः प्रकाशरूपत्वादाधेयेषु भावेषु प्रवृत्तिं वर्तयन्तो दर्शनादर्शनाभ्यां सदसद्रूपोपकल्पनया पौर्वापर्यं विदधति । तद्यथा सत्त्वरजस्तमोलक्षणगुणा नित्यत्वाद् युगपदवस्थाना अपि अङ्गाङ्गिभावोपगमनेन यथायथं स्ववृत्त्युल्लासे विचित्रपरिणामाद् भावानुपपरचयन्ति तथेमे कालभेदाः स्वशक्तिमाहात्म्याद् भावभेदेषु क्रमोपरचनचतुरा इत्यर्थः ।। 52 ।।

तमः प्रकाशरूपत्वमेव विभजति ।
द्वौ तु तत्र तमोरूपावेकस्यालोकवत् स्थितिः ।
अतीतमपि केषाञ्चित् पुनर्विपरिवर्तते ।। 53 ।।
अतीतानागतावध्वानौ भावावरणहेतुत्वात् तमः स्वभावौ । वरणं हि तमोधर्मः ।
`गुरु वरणकमेव तमः' (sankhya Karika 13.)
इति । रजस्तु प्रवृत्तिसामान्यं कालस्वरूपं सर्वत्रान्वयि । प्रतिबन्धाभ्यनुज्ञाभ्यां प्रवर्तकं प्रेरणारूपं राजः कालात्मकमेव त्रैगुण्यपरिणामात्मकत्वं च ब्रह्मदर्शनेऽपि कालस्योपपन्नमेव शक्तिरूपस्यापि । ज्ञानक्रियाशक्ती हि जीवात्मनि गुणत्रयम् । तत्रैव च कालशक्तिस्ताद्रूप्यातीतशक्तिर्जन्मशक्तेः प्रतिबन्धिकेति पूर्वमुक्तम् । केचित्तु मन्यन्ते अतीताध्वपतितमपि पुनः कालान्तरे जहतपरिवर्तेषून्मज्जति । कृतपरिनिष्ठिता हि भावाः प्रधान प्रसेवकान्तर्गता यथाकालमुद्दर्शयन्त्यात्मा नं पुनः प्रलये तत्रैव तिरोभवन्ति । पञ्चाधिकरणदर्शनस्थानां सांख्यानामयमागमः । इत्थं चात्र दर्शने सुतरां त्रैयध्विकत्वमुपपद्यते, सर्वेषामपि त्रिष्वप्यध्वसु सञ्जारात् । प्रबन्धप्रवृत्ते जगति पूर्वमतीतानां वर्तमानता नास्ति । जगत्परिवर्तेऽपि न तदेवावर्तते, अपि तु तत्सदृशमित्यतीतशक्तेर्वर्तमानशक्तिविरोधः पूर्वमुक्तः । इह तु
`नाभवो विद्यते सतः'(B.Gita II.16.)
इति तिरोभावं पुनस्तदेवावर्तते इति दर्शनान्तरं कथ्यते । तदेवं धर्मर्धार्मणोः कथंचिद् व्यतिरेकमभ्युपगम्य स्थायी धर्मी वर्तमानो धर्मास्तु त्र्यध्वान इतीदं दर्शनमुक्तम् ।। 53 ।।
इदानीं धर्मधर्मिणोरव्यतिरेकं भाविकमाश्रित्या धर्मिणो युगपदपि व्यपदेशत्रयं धर्मद्वारकं प्रवर्तते इति महाभाष्यमतमाह ।
युगपद्वर्तमानत्वं तद्धर्मा प्रतिपद्यते ।
केषांचिद्वर्तमानत्वाच्चैति तद्वदतीतताम् ।। 54 ।।
ते अतीतवर्तमानानागतरूपा धर्मा यस्यासौ तद्धर्मा धर्मी युगपद् एकवारमेव वर्तमानत्वम् सांप्रतिकत्वं प्रतिपद्यते । धर्मस्य वर्तमानात्वात् तद्व्यतिरिक्तो धर्मी तथा वर्तमानत्वाच्च अनन्तरामपि अतीततां तद्वद् वर्तमानत्ववद् एति युगपदेवातीतताम्प्यासादयति । कस्यचिद्धर्मस्यातीतत्वात्तद व्यतिरिक्तो धर्मीत्यर्थः । एवं कस्यचिद्धर्मस्यानागतत्वादनागतताम्प्येति । तदेवं धर्मी यथायी भावतः सदैव वर्तमानोऽपि धर्मत्रैविध्यात् सकृदपि त्र्यध्वा व्यवह्रियते । अव्यतिरिक्ताश्च संनिवेशवद्धर्मा इत्यन्यत्र स्थापितम् ।। 54 ।।
नन्वतीतवर्तमानयोर्विरोधात् कथमेकत्र समावेश इत्याशङ्क्याह ।
हेतूरकारादाक्षिप्तो वर्तमानत्वमागतः ।
शान्तहेतुपकारः सन् पुनर्नोपैति दर्शनम् ।। 55 ।।
यदा संरब्धा हेतवः कार्योपकारमारभन्ते तदा तत्सामर्थ्याज्जायमानो भावो दर्शनपथमवतरन्नर्थक्रियाः सम्पादयन् वर्तमान इति व्यपदिश्यते । उपरतकारणव्यापारस्तु दानागतः । इत्येकस्यापि परोपाधिप्रकल्पितो व्यपदेशभेदोऽविरुद्ध इत्यर्थक्रियासदसत्त्व निमित्तो व्यपदेशभेदः । ननु यदेवार्थक्रियाकारि तदेव परमार्थसदित्यतीतेऽध्वनि तदभावात् कथं सत्त्वम् । न वयमर्थक्रियाकारि तदेव परमार्थसदित्यतीतेऽध्वनि तदभावात् कथं सत्त्वम् । न वयमर्थक्रियानिमित्तं सत्त्वमुपेमः, अपि तु स्वरूपेण सन्तः पदार्थाः । स्वरूपं चैषां गुणत्रयमयम् । तस्य च नित्यस्य नास्ति विनाशः । सर्वत्र सर्वदानुगमात्, वीतपञ्चकेन साधितत्वात् ।
तदुक्तम्--
`तदेतत् त्रैलोक्यं व्यक्तेरपैति, न सत्त्वात्'
इति ।। 55 ।।
अतीतानागतयोरध्वनोर्भावस्यादर्शनं समानमभिप्रेत्य केचित् संक्षेपरुचयः कालस्य शक्तिद्वयमेव प्रतिबन्धाभ्यनुज्ञापर्यायमभ्युपयन्तीत्याह ।
द्वे एव कालस्य विभोः केषांचिच्छक्तिवर्त्मनी ।

करोति याभ्यां भावानामुन्मीलननिमीलने ।। 56 ।।
प्राक्प्रध्वंसाभावयोर्भावस्यादर्शनमविशिष्टमिति एकैव तत्कारिणी कालस्य सर्व भावग्रहिष्णुरूपस्य शक्तिः प्रतिबन्धलक्षणा । द्वितीयात्वभ्यनुज्ञालक्षणा भावाभासविधायिनी सर्वभाव प्रभविष्णुरूपस्य । तदेवं कालत्त्वं व्याख्यातम् ।। 56 ।।
अत्र तु केचिद् विप्रतिपद्यन्ते-अभिन्नेन कालेन व्यवहर्तुमशक्यत्वाद् य एव तद्भेदोपाधिः क्रियादिः परिकल्प्यते स एव व्यवहारनिमित्तं किमदृश्यमानेनानुपपन्नेन कालात्मना कृत्यमिति वदन्तः । यदि च परिकल्पितरूपेण कालेन विना व्यवपहारदौस्थ्यं तदीदृशमस्तु कालतत्त्वमिति । तद्दर्शनेनाह ।
कालाभिः पृथगर्थाभिः प्रविभक्ते स्वभावतः ।
केचिद् बुद्ध्यनुसंहारलक्षणे ते प्रचक्षते ।। 57 ।।
भिन्नाः क्रियाः संकलनाबुद्ध्यानुसंह्रियमाणाः सङ्कल्प्यमानाश्चिरक्षिप्रादिव्यपदेशस्य निमित्तं भवन्ति, एवमहोरात्रादिव्यपदेशस्य । तथा च बुद्ध्या संकलनमात्रमेवाबहुस्तत्त्वं चिरादिकालरूपं विलक्षणमेव व्यवतिष्ठते । तथाहि चिरकालस्यावान्तरप्रविभागेन भिन्ना एव कलाः स्वांशाः परिकल्प्यन्ते । एवं क्षिप्रकालस्याहरादिकालस्य च । न तु क्रियापाधिवशादयं चिरादिभेदः । पूर्वोक्तनयेन बुद्धेः स्वयं भेदात् । स एव च स्वविषये सङ्कल्प्यमाने क्रियासन्ताने समारोप्यते । बुद्धिधर्मो हि विषयरूपानुपातीति दृष्टमेतत् । विषयभूतलक्षणगतास्पत्त्वमहत्त्ववशेन चिरादिभावो बुद्धिसङ्कलनस्य कालरूपस्य व्यवह्रियते इत्येतावत् कालतत्त्वम् ।। 57 ।।
नास्त्यन्यो बाह्यः कश्चित् काल इति बौद्धप्रायाः । भवत्वेवं नास्माकं विप्रतिपत्तिरत्रेत्याह ।
ज्ञानानुगतशक्तिं वा बाह्यं वा सत्यतः स्थितम् ।
कालात्मानमनाश्रित्य व्यवहर्तुं न शक्यते ।। 58 ।।
ज्ञाने बुद्धावनुगतास्तदाकाराः शक्तयश्चिरक्षिप्रवर्तमानादिभेदरूपा यस्यासावेलंविधो बुद्ध्यनुसंहारमात्रस्वभावो वास्तु कालो बाह्यो वा कश्चित् प्रविभक्तवर्तमानादिशक्तिः पारमार्थिको द्रव्यपदार्थः । नास्माभिर्दर्शनविवेकः प्रारब्धः, किन्तु शाब्दे व्यवहारे यदङ्गं, तत्परीक्ष्यम् । अस्ति च भिन्नकालः शाब्दो व्यवहारोऽभूदस्ति भविष्यतीति । तत्र यथायोगमविचारितरमणीयः कालोऽभ्युपगन्तव्य इत्यर्थः ।। 58 ।।
तथा हि कैश्चिद् भावेभ्यो व्यतिरिक्त एव कालोऽभ्युपगत इत्याह ।
तिस्रो भावस्य भावस्य केषाञ्चिद् भावशक्तयः ।
ताभिः स्वशक्तिभिः सर्वं सदैवास्ति च नास्ति च ।। 59 ।।
पारमर्षनये सततपरिणामिषु भावेषु सत्त्वरजस्तमसां शक्तिमात्रमतीतादिकालभेदसमाख्यम् । तथा च सर्वेषां भावानां गुणत्रयमयत्वाच्छक्तित्रययोगित्वे यथायथं शक्त्युद्भवानुद्भवाभ्यां सदसत्त्वेन व्यवहारः ।। 59 ।।
तथा हि ।
सत्त्वादव्यतिरेकेण तास्तिस्रोऽपि व्यवस्थिताः ।
क्रमस्तास्तदभेदाच्च सदसत्त्वं न भिद्यते ।। 60 ।।
भावादव्यतिरिक्तास्ता एव शक्तयः क्रमः इत्युच्यन्ते । आविर्भावतिरोभावौ हि वर्तमानादिशक्तिसमन्वयवशाद् भावाः प्रतिपद्यमानाः क्रमरूपमात्मनि दर्शयन्तीति शक्तयस्ता एव तात्पर्यतः क्रमः । अव्यतिरेकेऽपि च भावाच्छक्तीनां सदा भाववदवस्थानेऽपि वृत्तिवैचित्र्यात् सङ्करो न भवति । दर्शनादर्शने हि तत्रासां व्यापारः । स च विलक्षणः । तद्वशादेव च सदसत्त्वव्यवहार इति सोऽपि भावतदो न विभिद्यते । अतीतानागतावस्थस्य हि दर्शनमप्रवृत्तं न सत्त्वमिति दर्शनाभाव एवासत्त्वव्यवहारात् सत्त्वस्य च तदानीमपि विद्यमानत्वात् सदसत्त्वं न भिद्यते ।। 60 ।।
यतः
दर्शनादर्शनेनैकं दृष्टादृष्टं तदेव तु ।
अध्वनामेकता नास्ति न च किञ्चिन्निवर्तते ।। 61 ।।

वर्तमानशक्त्या प्रकाशनं दर्शनं संवेदनम्, अतीतानगतशक्तिभ्यां तु तिरोधानमदर्शनमसंवेदनम्, तयो परस्परपरिहारेणावस्थानाद् नैकत्वमिति कार्यभेदादध्वभेद एव न सङ्करः । यत्पुनस्तद्वस्तु दृष्टं सददृष्टमतीतं च तदेकमेव धर्मिरूपम्,धर्माणामागमापायाभ्यामपि धर्मिणस्तत्त्वादप्रच्युतेः । अतश्चात्र भावदभिन्नानामप्यध्वनां वर्तमानादिरूपाणां कार्यसाङ्कर्याभावादेकत्वसङ्करो नास्ति । यतश्च सद्रूपमत्यन्तनिरन्वयध्वसं नोपपद्यते, तिरोभावमात्रं तु । ततः सदसत्त्वं न भिद्यते, सत्त्वादसत्त्वस्य भेदो नास्ति, सत्त्वमेव हि तिरोभूतमसत्त्वमिति व्यवह्रियते, न त्वभावो नाम कश्चिन्निरूप्य इत्यर्थः । तदुक्तं पातञ्जले--

"[न] धर्मी त्र्यध्वा धर्मास्त्र्यध्वानस्ते तल्लक्षितास्तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते"(Vyasa-bhasya on Y.Dar.III.13)

इति । तथा चानागतलक्षणं हित्वा वर्मानलक्षणं प्रतिपन्नो न चानागतातीताभ्यां वियुक्त इति ।। 61 ।।

इदानीं यथासम्भवं कालतत्त्वे मतान्तराण्युपसंहरति ।

शक्त्यात्मदेवतापक्षैर्भिन्नं कालस्य दर्शनम् ।
प्रथमं तदविद्यायां यद्विद्यायां न विद्यते ।। 62 ।।

कालाख्या स्वातन्त्र्यशक्तिर्ब्रह्मण इति तत्रभवद्भर्तृहरेरभिप्रायः । व्याख्यातारस्तु कारणशक्तिरेव काल इति व्याचक्षते । तथा हि बीजशक्तिरङ्कुरोपजनमभ्यनुजानतीकाण्डप्रसवं च तदानीं प्रतिबध्नती कालकार्यकरणात् कालः । एवमङ्कुरादिशक्तावपि यथोत्तरमनन्तरकार्यजननाद् व्यवहितकार्यप्रतिबन्धाच्च कालतत्त्वं बोद्धव्यम् । एतच्चा युक्तमिति लक्ष्यते । नियतकारणा हि भावाः स्वकारणसन्निधाने भवन्ति नाप्यथेति कारणसामर्थ्यमेवेदम् । तत्र तु नियतकालत्वात् सहकारी कालस्तदन्य एव युक्तः । कारणपरम्परया बावानामुत्पद्यमानानां च क्रमदर्शनाच्च क्रमाख्या कालशक्तिर्भावोपाधिरित्येवोपगन्तव्या । ततश्च भावभेदावभासने प्रभुः स एव तत्र तदनुयायिक्रमावभासनेऽपीति स्वतन्त्रस्य चिदात्मन एव जीवात्मगतेयं शक्तिः कालाख्या युक्ता । तथा ह्युक्तं वाक्यपदीयेऽस्माभिः । अत एवैतद्दर्शनानुगुणदर्शनान्तरमाह-आत्मा पुरुषो जीव एव काल एव जीवस्तस्यैव क्रमावभासात् । स हि यथातत्त्वमर्थान् प्रत्येतुमसमर्थः स्वाभासकालानुसारेण तत्र क्रममध्यवस्यति । ततश्च ततः कालभेदप्रक्लृप्तेः स एवोपचारेण कालाख्यां प्रतिपद्यते । स एव हि कालशक्तिरविद्याशक्तिसहचारिण्याः फलभूमिः । तददृष्टादिवशेनैव च भावेषु प्रतिबन्धाभ्यनुज्ञे । अन्ये तु विग्रहवतीं महाप्रभावां देवतां कालत्वेन प्रतिपन्नाः । अत्रापि चिद्रूपस्य ब्रह्मणः सक्तिर्देवतैव सकलजगद्ग्रासघस्मरेत्येतदानुगुण्यमेवेतीदमेवात्र सिद्धान्तरूपं दर्शनम् । अत एवैतत् कालदर्शनम्-

`अविद्यायां संसारहेतुभूतायां प्रथमं भेदवभासमयो हि संसारः, भेदश्च देशकालाभ्याम्, तत्र च कालभेदो जगत्सृष्टेराद्यः । अक्रमा हि पश्यन्तीरूपा संवित् प्राणवृत्तिमुपारूढा कालात्मना परिगृहीतक्रमेव चकास्ति इति कृतनिर्णयं वाक्यपदीये शब्दप्रभायामस्माभिस्तत एवावगमनीयम् । निष्क्रमं हि ब्रह्मतत्त्वं विद्यामयमकालकलितमविद्यावशात् क्रमरूपोपग्रहेण यथायथं विवर्तते इति कालानुवेधात् पदार्थानां क्रमेण प्रत्यवभासोऽनादिसिद्धजीवात्मगतः, सर्वस्य भेदजातस्याविद्यामयत्वात् । कालेऽपि दर्शनभेदेन योऽयं विभागः सोऽप्यविद्याविजृम्भित एव । आविर्भूतायां तु विद्यायां सर्वस्य भेदप्रपञ्चस्या पगमादयमप्यपैति । अतश्चात्र युक्तायुक्ततया विचारणं प्रयासमात्रफलमेव । व्यवहारे सर्वस्यैवासत्यतया तत्त्वव्यवस्थयानु (स्थानु?) पपत्तेरित्यत्र तात्पर्यार्थः । तदेवं जन्मवतां पदार्थानां व्यवहारे काल उपयोगीति स्थितम् । कथं तर्हि नित्यानां शब्दानां कालकृतो ह्रस्वत्वादिभेदः । कल्पित इति ब्रूमः । तद् यथा चिरमिदं कृतं क्षिप्रमिदं कृतमिति ज्ञानयोः स्वतः समानकालत्वेऽपि विषयगतप्रचयापचयाभ्यां कालभेदप्रतिभास इव स्वात्मनि लक्ष्यते तथा ह्रस्वादावपि शब्दतत्त्वस्य नित्यत्वात् समानकालत्वेऽपि समुपचरितः कालभेदः ।। 62 ।।

अभेदे यदि कालस्य ह्रस्वदीर्घप्लुतादिषु ।
दृश्यते भेदनिर्भासः स चिरक्षिप्रबुद्धिवत् ।। 63 ।।
ह्रस्वदीर्घप्लुतावृत्त्या नालिकासालिलादिषु ।
कथं प्रचययोगः स्यात् कल्पनामात्रहेतुकः ।। 64 ।।

वास्तवेह्रस्वादौ कालस्याभेदेऽपि चिरक्षिप्रज्ञानवदुपचरिते कालभेदे समाश्रीयमाणे ह्रस्वस्य पुनः पुनरुच्चारणे नालिकायाः पानीयस्रुतिरल्पा, ततस्त्रिभागाधिका दीर्घस्योच्चारणावृत्त्या, ततोऽपि प्लुतस्य त्रिभागाधिकेति योऽयं प्रकर्षसंबन्धः सलिलस्रुतेः स कथं कल्पनामात्रकृतकालभेदात् स्वतः कालविभागशून्याद् ह्रस्वादिभेदाद् भवेत् । ह्रस्वादीनां ह्यभिन्नकालता पारमार्थिकी, कल्पिता तु भिन्नकालता । न च कल्पनाकल्पितोऽर्थोऽर्थ क्रियास्वन्वयीति ह्रस्वादिसमुच्चारणे सलिलस्रुतिरेकरूपैव स्यात् । आदिग्रहणादन्येषां भावानां निष्पत्तिभेदो ह्रस्वादिसमुच्चारणे दृश्यमान उदाहार्यः । तस्मात्तत्त्वत एव भिन्नकाला ह्रस्वादयः शब्दा इति कावृत्त्यनुरोधान्नित्यत्वव्याघात इत्यर्थः ।। 63,64 ।।

अत्र समाधिः ।

अबिव्यक्तिनिमित्तस्य प्रचयेन प्रचीयते ।

अभिन्नमपि शब्दस्य तत्त्वमप्रचयात्मकम् ।। 65 ।।

शब्दस्य ह्रस्वादिभेदभिन्नस्यापि नित्यत्वात् कालावच्छेदाभावेऽपि तदभिव्यञ्जकध्वनिग्रामस्योपचयापचयाभ्यां कालभेदाद् व्यङ्ग्यव्यञ्जकयोर्भेदानवधारणाच्छब्देऽपि कालभेदाव धारणम् । प्राकृता हि ध्वनयः शब्दस्वरूपसंभेदेन श्रूयमाणाः स्वगतं कालभेदं तत्रावभासयन्ति । न हि व्यञ्जकध्वनिविवेकेन शब्दतत्त्वग्रहणम् । अन्त्येन ध्वनिना सह बुद्धौ शब्दोऽवभासते' इत्युक्तम् । ततश्चाभिव्यञ्जकाधीनत्त्वाच्छब्दतत्त्वोपलम्भस्य यथाव्यञ्जकं तद्धर्मः स्वरूपनिवेश्येवेति भिद्यते नालिकासलिलस्रुतिः ।

अत एव

तपरस्तत्कालस्य (P.1.1.70)

इति ध्वनिगतकालाध्यासादुपपद्यते । वैकृतध्वनिजनितस्तु वृत्तिभेदो न भेदक इति निर्णीतमेव पूर्वकाण्डे । वक्ष्यते चाग्रे--

"सर्वश्च ह्रस्वदीर्घानुनासिकत्वादिधर्मव्रातः शब्दात्मनि व्यञ्जकाधीनः"

इति । ब्रह्मकाण्ड एव विस्तरेणोक्तम्--

नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च सः ।

अक्रमः क्रमरूपेण भेदवानिव जायते ।। (Vak.I.48.)

इत्यादि । तदत्र चिरक्षिप्रज्ञानवन्नायमस्वरूपसमवायी कालभेदो येनाभेदस्य भाविकस्य बावात् कार्यभेदो न स्यादित्युच्येत । अपि तु व्यङ्ग्यव्यञ्जकयोः शब्दानादयोरविवेकेन श्रोतृभिरभेदाध्यवसायाद् व्यञ्जकमन्तरेण शब्दस्वरूपाव्यवस्थानादन्तरङ्गध्वनिनिहितः कालभेदो व्यवहाराङ्गमेवेत्यर्थः । न हि यथा ज्ञानस्य विषयस्तथा शब्दस्य ध्वनयः । विषयाकारस्य शताद्यात्मकस्य ज्ञानाकाराद् विवेकेन संवेदनाच्छब्दध्वनीनां चाविवेकात् । पूर्वपक्षे तु स्वरूपानिवेशी गजनिमीलितेन भेद निर्भासः शङ्कितः । तथा च कार्यभेदानुपपत्तिश्चोदिता ।। 65 ।।

न केवलं ह्रस्वदीर्घादावेव शब्दतत्त्वमभिन्नं यावत् सर्वत्रैव पदवाक्यविषय इत्याह ।

एवं मात्रातुरीयस्य भेदो दाशतयस्य वा ।

परिमाणविकल्पेन शब्दात्मनि न विद्यते ।। 66 ।।

मात्रायाश्चतुर्थस्य भागस्यापचिततरध्वनिव्यङ्ग्यस्य, दश अवयवा येषां ते दशतयाः समुदायाः ऋगात्मानः तेषां समूहस्य दाशतयस्य चतुष्षष्ट्यात्मकस्य वेदराशेः प्रचिततरध्वनिव्यङ्ग्यस्य कालपरिमाणभेदेन विशेषो नास्ति । द्वयोरपि शब्दयोर्नित्यत्वेन समानत्वाद् व्यञ्जकगतः केवलं कालभेद इत्यर्थः । तद्यथा हस्तिमशकज्ञाने स्वरूपेणैकरूपेऽप्याकारोपप्लवाद् विलक्षणे इवानुभूयेते एवं शब्दात्मा स्फोटस्वभावः सर्वत्र पदवाक्यविषयेऽविलक्षणोऽभिव्यञ्जकभेदाद् विलक्षण इव चकास्ति ।। 66।।

यदि तर्हि ध्वनिभेदाद् ह्रस्वादिभेदः कार्यभेदाभिधायिवृत्तिभेदोऽपि कथं स्यात् । ततश्च द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यं स्यादित्या शङ्क्याह ।

अनुनिष्पादिकल्पेन येऽन्ताराल इव स्थिताः ।

शब्दास्ते प्रतिपत्तृणामुपायाः प्रतिपत्तये ।। 67 ।।
प्राकृतध्वनिभिरभिव्यक्ते शब्दतत्त्धेऽनुरणनरूपा ये पश्चात्कालभाविनो ध्वनयः सन्तानेन वर्तन्ते श्रोत्रान्तराल इव स्थिताः शीघ्रसन्तानवर्तनात्ते श्रोत्रदेशमनुप्राप्ताः शब्दप्रचयग्रहणहेतुतां श्रोत्रगुणात् प्रतिपद्यमाना द्रुतादिवृत्तिभेदं रचयन्ति । ततश्च ते शब्दतत्त्वाद् बहिर्भूता न भिन्दन्ति तत् । तदुक्तम्--
शब्दस्योर्ध्वभिव्यक्तेर्वृत्तिभेदं तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ।। (Vak.I.77.)
इति । वार्तिकेऽप्युक्तम्--
"सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते"(Va5,on.P.I.1.70.M.Bha.I.p.185.113)
इति । तदेवं जन्मवतां कालेनानवच्छेदाद् नित्यानां शब्दानां तदनुपपत्तिं चोदयित्वा व्य़ञ्जकगतत्वेन समर्थितम् ।। 67 ।।
इदानीं प्रकृतमेव कालस्य परोपाधिकं भेदव्यवहारं दर्शयति ।
विशिष्टमवधिं तं तमुपादाय प्रकल्पते ।
कालः कलावतामेकः क्षणमासर्तुभेदभाक् ।। 68 ।।
कलावतां सावयवानां अनित्यानां भावानामवच्छेदकः कालो नियतपदार्थोदयाद्यवधिपरिग्रहेण लवमुहूर्तादिविबागव्यवस्थामासादयति ।। 68 ।.
तथापि नैषा व्यवस्था भाविकीत्याह ।
बुद्ध्यवग्रहभेदाच्च व्यवहारात्मनि स्थितेः ।
तावानेव क्षणः कालो युगमन्वन्तराणि वा ।। 69 ।।
क्षणसन्तानो यावान् सङ्कलनाबुद्ध्यैकत्वेन गृह्यते तावानेकः कालो मासादिरूपो व्यवस्थाप्यते । अपचयकाष्ठागतस्तु क्षण इत्युपचयकाष्ठाप्राप्तो मन्वन्तरमित्यादीति भावतो द्रव्यभूतस्यैकत्वेऽपि कालस्य कल्पनेयं बौद्धी । बुद्ध्यनुसंहारकालपक्षे तु मुख्यैवेयम् ।। 69 ।।
ननु नालिकास्त्रुत्या क्षणाहोरात्रादिकालव्यवहार इति सैवास्तु कालः, किमपरेण तेन कल्पितेनेत्याशङ्क्याह ।
प्रतिबन्धाभ्यानुज्ञाभ्यां नालाकाविवराश्रिते ।
यदम्भसि प्रक्षरणं तत्कालस्यैव चेष्टितम् ।। 70 ।।
घटिकोदरवर्तिनः पयसश्छिद्रान्निःसरतो यत् कस्यचिद् भागस्य पूर्वं निस्सरणमपरस्य तदैवानिस्सरणं तत् कालकृतशक्तिप्रतिबन्धाभ्यनुज्ञासामर्थ्यम् । अन्यथा गुरुत्वादम्भोऽवयवी समस्तावयवव्यापी युगपन्निर्गच्छेत् । क्रमेण तु निस्सरणात् कालोऽत्र सव्यापारो व्यतिरिक्त इति नाम्भःस्त्रुतिरेव कालः । तत्परिच्छेदिकात्सौ । सा हि निमेष क्रियया प्राणप्रवाहेण बुद्धिक्षणसन्तानेन वा परिच्छिन्ना तदपरकालपरिच्छेदायलम् । निमेषादिरपि सूक्ष्मेण क्रमरूपेण कालेन परिच्छिन्ना तदपरकालपरिच्छेदायालम् । निमेषादिरपि सूक्ष्मेण क्रमरूपेण कालेन परिच्छिन्न इति क्रमाख्या कालशक्तिः सूक्ष्मरूपानुस्यूता सर्वभावेष्वशक्यप्रतिक्षेपानुभायमानत्वात् । सर्वा हि संवित् क्रमरूपाच्छुरितेति अक्रमं परं तत्त्वमग्नीषोमस्वभावं सोमसूर्यादिरूपविवर्तदशावलम्बनेनाविरतपरिवर्तं प्राणिनामनुग्रहोपघाताय जगदण्डवृत्तिमातनुते । एतच्च वाक्यपदीये विस्तरेणास्माभिर्निर्णीतम् ।। 80 ।।
कालस्य तर्ह्येकरूपत्वाच्छिद्रापचयोपचयाभ्यामम्भःस्त्रुतेस्तद्भेदः कथमवधार्यत इत्वाशङ्क्याह ।
अल्पे महति वा छिद्रे तत्संबन्धे न भिद्यते ।
कालस्य वृत्तिरात्मापि तमेवास्यानुवर्तते ।। 81 ।।
अल्पेन नालिकाच्छिद्रेणाम्भःसंबन्धे सति कालस्यव्यापारः प्रतिबन्धाभ्यनुज्ञालक्षणो न भिद्यते । नापि महता छिद्रेणाम्भःसंबन्धे सति । एवमपि च कालात्माभिन्नरूपोऽपितमेव छिद्रसंबन्धम् अनुवर्तते । तदनुवर्तनाच्चायमल्पच्छिद्रे प्रतिबन्धाभ्यनुज्ञाबाहुल्याद् दीर्घः कालोऽवधार्यते । अयमर्थः । अभेदेऽप्यत्र कालस्य छिद्रविशेषसंबन्धोपधीयमानो भेदोऽवधार्यत इति । अत एव

घटिकावरुद्धमम्भो न पतति । छिद्रमुक्तं तु पततीति किं कालेन कृत्यमिति न वाच्यम् । मूलभूतस्य कालव्यापारस्याप्रत्याख्येयत्वात् । ये एवोपहितप्रतिन्बधाभ्युनुज्ञे कावकृते ते एव घटिकावयवच्छिद्राभ्यामनुविधीयेते । यथा बीजस्याङ्कुरजननप्रतिबन्धाभ्यानुज्ञे कालकृते कुसूलक्षेत्राभ्यां पोष्येते । अत एवात्मापि तमेवास्यानुवर्तते इत्युक्तम् । दृष्टस्य हि कारणस्य काल शक्तेश्च परस्परमानुगुण्यात् सहभावान्नैकतरावलम्बनेनेतरप्रतिक्षेपो न्याय्यः ।। 81 ।।

किं बहुना, स्वशक्तिवैचित्र्यादभिन्नोऽपि कालात्मा सर्वत्र भावेषु भेदमादर्शयतीत्याह ।

आक्रीड इव कालस्य दृश्यते यः स्वशक्तिभिः ।
बहुरूपस्य भावेषु बहुधा तेन भिद्यते ।। 82 ।।

कालमुखप्रेक्षित्वाद् भावानामसौ प्रभुरेतैराक्रीडैराक्रीडमानस्तदुन्मज्जननिमज्जने डोलादिक्रीडावत् सम्पादयन् वर्तमानादिरूपवैचित्र्येण स्वसामर्थ्याध्यासितमात्मभेदमुद्दर्शयति ।। 82 ।।

तथा हि ।

त्वचिसारस्य वा वृद्धिं तृणसारस्य वा दधत् ।
तावद् तदूवृद्धियोगेन कालतत्त्वं विकल्पते ।। 83 ।।

तावत् एव तत्परिमाणमेव कालतत्त्वं प्रतिबन्धाभ्यनुज्ञामात्रहेत्वभिन्नं वंशस्य वेणोः क्रमेण फलप्रसवपर्यन्तां वृद्धिम् उपचयं सम्पादयत् ततोऽधिकतरां तालस्य वृद्धिं जनयत् तेन वृद्धिसंबन्धभेदेन भावेष्वाक्रीडभूतेन भिद्यते । तथा च वंशस्य वृद्धिपर्यन्तः कालोऽल्पः तालस्य तु भूयानवतिष्ठते । एवमन्यत्रापि भावेषु जन्मस्थितिविनाशावस्थाभेदसंबन्धेन कालविभाग उदाहार्यः ।। 83 ।।

यदि तर्ह्यवस्थाभेदात् कालभेदः अवस्थाविनाशादपि तस्य विनाशे नित्यत्वं न स्यादित्याशङ्क्याह ।

व्यतिक्रमे।ऽपि मात्राणां तस्य नास्ति व्यतिक्रमः ।
न गन्तृगतिभेदेन मार्गभेदोऽस्ति कश्चन ।। 84 ।।

कालाधिकरणत्वाद्भावानां तदवस्थानां चापगमेऽपि नाधारापगमः । यथा गन्तृणां तद्गमनानां चोपरमेऽपि मार्गोऽध्वा नापैति । क्रियाव्युपरमादेव हि वसन्तादिकालोपरमो व्यवह्रियते परम् । न वस्तुतः कालोऽपैति, नित्यात्वात् ।। 84 ।।

तथा हि ।

उदयास्तमयावृत्त्या ज्योतिषां लोकसिद्धया ।
कालस्याव्यतिपातेऽपि ताद्धर्म्यमिव लभ्यते ।। 85 ।।

सूर्यादिसञ्चारोपनीतविभागः कालात्मेति तदपगमादेवानपयन्नपि व्ययगत इवावधार्यते गतमहो व्युष्टा रजनी निर्गतः शिशिर इति ।। 85 ।।

यतश्च ज्योतिर्गत्या कालनानात्वव्यवहारः ततः सैव काल इत्यार्वाग्दर्शनाः केचिन्मन्यन्त इत्याह ।

आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ।। 86 ।।

उदयवधिरस्तमयावसानः सूर्यसञ्चारो दिवसः । अस्तमयादिरुदयपर्यवसानो रात्रिः कालः । स च पञ्चदशावृत्तिः पक्षः । त्रिंशत्कृत्वो मासः । चन्द्रमसः सकलनक्षत्रातिक्रमो मास इत्येवं वा कल्पना । बृहस्पतेरेकराशिसञ्चरणं संवत्सरः । एवमन्येषामपि ग्रहनक्षत्राणां ज्यौतिषशास्त्रप्रसिद्धेन गतिप्रचारभेदेन युकगमन्वन्तरकल्पमहाकल्पादिप्रविभागः कालोऽनुसर्तव्यः ।। 86 ।।

तदेवमेषां क्रिया कालः प्रसिद्धा सती क्रियान्तरप्रसिद्धं परिमापयतीत्याह ।

क्रियान्तरपरिच्छेदप्रवृत्ता या क्रियां प्रति ।
निर्ज्ञातपरिमाणा सा काल इत्यभिधीयते ।। 77 ।।

सूर्यादीनां गतिप्रचारो दिवसादिशब्दवाच्यः, गोदोहादिक्रियाविशेषश्च परिच्छिन्नपरिमाणत्वात्

तदपराप्रसिद्धपरिमाणास्यादिक्रियाविशेषपरिच्छेदहेतुत्वात् कालाख्यामासादयति । दिवसमधीते, रात्रिमधीते, गोदोहमास्ते । क्रियान्तरपरिच्छेद प्रवृत्ता इत्यनेनैव गतत्वात् क्रियां प्रति इति पुनर्वचनमपेक्षाभेदेन क्रियायाः कालत्वानियमख्यापनार्थम् । तथा चान्यतः प्रसिद्धपरिमाणो गोदोहनादिरपि देवदत्तादिगतास्यादिक्रियाः परिच्छिन्दन् भवत्येव कालः ।। 77 ।।

अन्तर्मुखोऽपवरकान्तर्गतः सूर्यादिसञ्चारं नालिकास्त्रुतिं चानवधारयन् कथं कालप्रविभागमवैतीत्याह ।

ज्ञाने रूपस्य संक्रान्तिर्ज्ञानेनैवानुसंहृतिः ।

अतः क्रियान्तराभावे सा क्रिया काल इष्यते ।। 78 ।।

अन्तर्मुखोऽपि प्रकृतां काञ्चिदेव प्राणप्रवाहादिरूपां क्रियां बुद्धौ संक्रान्ताकारामवैति । बुद्ध्यन्तरैश्च तान् बुद्धिनिवेशिनः क्रियाक्षणान् सङ्कलयति । तथा च बाह्यक्रियाभावेऽपि बुद्धिनिवेशिनीयं क्रिया बाह्यापरक्रियापरिच्छेदकत्वात् काल इत्युच्यते । तथा हि भूयसीनां बुद्धीनामुदये बाह्ये चिरकालत्वमवैति, अल्पीयसीनामुदये क्षिप्रकालत्वमिति प्राणचारेण कलयन्त्येवार्थान् योगनः, अन्येऽपि प्राणक्षणगणनयेति प्रसिद्धमेतत् । तथा हि षष्ट्युत्तरशतत्रयावधिप्राणप्रचारनालिकाकलनया सहस्राण्येकविंशतिः षट्शतानि चाहोरात्रगणनामाहुः ।। 78 ।।

यदि तर्हि क्रियातिरिक्तो नास्ति कालः तदा सत्ताख्यायाः क्रियायाः सत्तान्तरेण क्रियाभूतेन योगाभावात् भूता सत्तेति कथमुच्यत इत्याशङ्क्याह ।

भूतो घट इतीयं च सत्ताया एव भूतता ।

भूता सत्तेति सत्तायाः सत्ता भूताभिधीयते ।। 79 ।।

भूतो घट इत्यत्र कस्य भूतत्वम् । न तावद् घटस्य, तस्य द्रव्यात्मकत्वात् कालेनासंस्पर्शात् । क्रियाणां साध्यस्वबावानामधिकरणभूतेन कालेन संबन्धात् । धातुवाच्या तु सत्ताख्या क्रिया भूतेति निष्ठाप्रत्ययेनावेद्यते । सा तु सत्तात्र घटसमवायिनीति पारम्पर्येण घटेन सम्बन्धो न तु साक्षाद् द्रव्यकालयोः व्यतिरिक्तकालदर्शने ऽप्यस्ति संबन्धः । क्रियामुखस्तु सः । एवं भूता सत्ता इत्यत्रापि शाब्देन धातुवाच्यान्या सत्ता क्रियारूपा, अन्या च प्रातिपदिकवाच्या द्रव्यायमाणेति सत्तान्तरयोगे धातुवाच्यसत्ताभूतत्वद्वारेणैव द्रव्यायमाणसत्ताभूतत्वसम्प्रत्यय इति न काचिदनुपपत्तिरित्यर्थः । नित्याया अपि सत्तायाः स्वाश्रयोपधानेन भेदे सति तद्द्वारेण त्रिकालयोगोऽविरुद्धः । गतमेतत् ।। 79 ।।

इदानीं कालस्वरूपे निर्णीते तदाश्रयः शास्त्रे व्यवहारो विचार्यते ।

`वर्तमाने लट्' (P.3.2.123.)

इत्यत्रोक्तम्

"नित्यप्रवृत्ते च कालाविभागात्"(Va.2onP.3.2.123.M.Bha.II,p.123,1.5)

इति । नित्येष्वर्थेषु कालविभागाभावाद् वर्तमानत्वानुपपत्तेः शासितव्या भवन्ती । ननु च सम्प्रतितनत्वं वर्तमानत्वं भूतभविष्यत्प्रतियोगि । नित्येषु चाविच्छेदेन प्रवर्तमानेषु भूतभविष्यतोरभावात् सुतरां तदुपपत्तिः । अत्रोच्यते । इहेमे कालनिमित्ता व्यपदेशाः परस्परव्यावृत्तशरीराः कालकृतोपकाराणामेव भावानां युक्ताः । ते च जन्मवन्तः । तत्र हि नियतावधिजन्मपरिग्रहेणैतदुपपत्तिः । तथा हि साधनसन्निधानेऽभिमुखोत्पत्त्यो भाविनः । साधनादवाप्तजन्मानो यावदवस्थानां वर्तमानाः व्यपगतशरीरा भूताः । तदयं वर्तमानव्यपदेशो भूतभविष्यदवधिमध्यवर्ती यत्र भूतभिविष्यन्तौ न स्तः तत्र नैव सम्भवति । तदुक्तं भाष्ये

भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानः...(M.Bha.II.p.123,1.7.)

इति । यत्र हि भूतभविष्यन्तौ तत्र तत्प्रतियोगी वर्तमान इत्यर्थः । नित्येषु च भूतभविष्यतोरभावात् तदभावः । प्रक्रमापेक्षया च भवन्ती शिष्येत्युक्तम् । सर्वं एव तु कालप्रत्ययाः शिष्याः । अत एवाह

`कालाविभागात्'....

इति । एवं च कृत्वात्र कालावच्छेदाभावात् कालोपाधिरूपा क्रियैव नास्ति । सा हि कालोपाधिः सक्रमा साध्यमानस्वभावा । तदभावश्चात्रेति क्रियाकारकोपाधिनिबन्धना सर्वैव व्यवस्ता वक्तव्येत्युक्तं भवति । अत्र परिहार उक्तः ।

`सन्ति च कालविभागः' (Va.5onP.3.2 123,M.Bha.II.p.123,1.164)

इति । स्थास्यन्ति पर्वतास्तिष्ठन्ति, अस्थुरिति । पुनश्चोदितम्--

`किं शक्यन्त एते शब्दा प्रयोक्तुम् इति सन्ति कालविभागाः ।"

(M.Bha.II.p.123,1.18)

इति । अयमभिप्रायः । कालविभागादेवैषां शब्दानां प्रयोगोऽसिद्ध इति चोद्ये कथमेष एव निश्चायकः कथ्यत इति । अत उक्तम्--

`नावश्यं (शब्द) प्रयोगादेव' (M.Bha.II.p.123,1.19.)

इति । पूर्वापरीभूतस्याख्यातात् प्रतीतेः शब्दप्रमाणकानां तत एवार्थव्यवस्थानाद् भवेदपि शब्दप्रयोगः कालविभागो प्रमाणं किन्त्ववधीर्यापि तमत्रार्थ एव कालविभागः प्रतिपाद्यत इत्यर्थः । तदाह--

"भूतभविष्यद्वर्तमानानां राज्ञां याः क्रियास्तास्तिष्ठतेरधिकरणम्"

(M.Bha.II.p.123.1.19.)

इति । एतद्भाष्यं व्याचष्टे--

परतो भिद्यते सर्वमात्मा तु न विकल्पते ।

पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ।। 80 ।।

पर्वतनद्यादीनामपि नित्यानामपरतत्सहचरितपदार्थगतसत्तोपाश्रयेण सत्ताभेदात् कालभेदोपपत्तिः । सर्वमेव हि भावजातमुपाधिसंसर्गवशेन भिद्यते न तु स्वरूपेणेति

`भिन्ना इति परोपाधिः' (Vak.III.जा.20.)

इत्युक्तमेव । राज्ञां हि क्रियाः पर्वतादिस्थितेर्भेदकत्वाद् आश्रयत्वेन व्यवह्रियन्ते । यथा हि राजक्रियाणां त्रैकाल्यं क्रमिकत्वं साध्यमानता च तथा तत्सहचरितानामपि पर्वतादीनां स्थितेस्तदध्यारोप इति गौणस्त्रिकालविषयः प्रयोगोऽत्रोपपन्न इति न्याय्या भवन्ती ।। 80 ।।

अथवा राजक्रियासाहचर्येण वर्तमाना स्थितिः प्रत्यवस्थमाश्रयोपकारमनुभवन्ती पर्वतादीनां स्वयमेव भिद्यते । सहचरितक्रियाभेदेन तु भेदस्तस्याः सारूप्यादनधिगतसतत्त्वो ज्ञाप्यत इत्याह ।

प्रसिद्धभेदा व्यापारा विरूपावयबक्रियाः ।

साहचर्येण भिद्यन्ते सरूपावयवक्रियाः ।। 81 ।।

विसदृशस्वभावा अवयवक्रिया येषां व्यापाराणां ते पचिभिदिक्रियारूपाः प्रसिद्धभेदा भिन्नकाला विलक्षणा एव प्रतीताः । अधिश्रयणादायो हि पच्यवयवा विलक्षणाः, एवमुद्यमनादयो भिद्यवयवाः । ये तु सदृशावयवक्रियाव्यापाराः पर्वतादेरात्मभरणलक्षणस्थितिरूपाः ते सादृश्यादेव दुरवधारभेदा राजक्रियाभिर्विसदृशसन्तानाभिरवधृतविभागाभिः सहचरिताभिः कालभिन्ना ज्ञाप्यन्ते । अतश्च ता राजक्रियाः परिच्छेदकत्वादाधारभूताः पर्वतादिस्थितेः कालत्वेन व्यवह्रियन्ते । सूर्यादिसञ्चारविशेषोपलक्ष्यमाणभेदाश्चापि पर्वतादिस्थितयः राजक्रियाणामुपलक्षणत्वात् । प्रसिद्धतरा हि राज्ञां क्रिया भाष्य उक्ताः । आधारावष्टम्भेन स्थितेः प्रतिक्षणमुपजनात् समाश्रितक्रमत्वे क्रियात्वमप्यविरुद्धम् । तथा हि

`जन्मैवाश्रितसारूप्यं स्थितिः' (Vak.111.कि 26)

इत्युक्तम् । नित्यानामपि चाधारेण प्रतिक्षणं ध्रियमाणत्वमविकल्पितपौर्वापर्यमेव जन्मसमाख्यां प्रतिपद्यते । शाब्दे च व्यवहारे शब्दार्थोऽर्थ इत्याख्यातात् सक्रमः प्रतीयमानोऽर्थः क्रियालक्षणमनुपतत्येव ।। 81 ।।

उक्तमिदं वार्तिके

"प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात्"(Va.I.onP.3.2.123 M.Bha.II.p.123.1.2.)

इति । प्रवृत्तक्रियस्य मुख्यफलानवाप्तेर्यदा विरामो न भवति, अथ च क्रियान्तरारम्भात् सा प्रवृत्ता क्रियातीता, तदा

वर्तमानप्रत्ययो वक्तव्यः । इह वसामः । इह पुष्यमित्रं याजयामः इति । क्रियान्तरे प्रवृत्तो याजयन्नप्येवं प्रयुङ्क्ते दक्षिणादिमुख्यफलानवाप्तेश्च याजनाभिसन्धेरविरतः । अत्र समाधिरुक्तः

`न्याय्या त्वारम्भानपवर्गात्' (M.Bha.II.p.123.1.9.)

इति । मुख्यस्य फलस्यानभिनिर्वृत्तेस्तत्पर्यन्तात्वाच्च क्रियायाः क्रियान्तरव्यवधानेऽप्यनपवृक्तैव क्रियेति वर्तमानप्रत्ययो भवन्ती न्याय्या । अथान्तरा क्रियान्तरैर्विच्छेदादवर्तमानत्वमभिमतमत्र चकास्ति तदा

`अस्ति च मुक्तसंशये विरामः' (Va.4.onP.3.2.123.M.Bha.ज.123.1.12)

इत्युक्तम् । भुङ्क्ते इत्यादावपि हि वर्तमाने निस्संशयोऽस्त्येवावान्तरक्रियाव्यवधिः । तथा हि

"सोऽप्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबति ।"

(M.Bha II p.123 1.14)

इति भाष्य उक्तम् । तदेतद् व्याचष्टे ।

व्यवधानमिवोपैति निवृत्त इव दृश्यते ।

क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः ।। 82 ।।

न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्तते ।

सर्वैव हि क्रियान्येन सङ्कीर्णेवोपलभ्यते ।। 83 ।।

पूर्वापरीभूतावयवसमाहारात्मको भुज्यादिक्रियासमूहोऽन्तरालपतिताभिर्हाससङ्कथनादिक्रियाभिरतीतानागतलक्षणानां व्यवधानमिव प्राप्नोति । तृप्तिफलत्वाच्च भुजेरेकः सन्तानो व्यवस्थित एवेति इवशब्दः न हि समूहव्यवधानम्, अपि तु क्षणानाम् । न च तावन्मात्रं क्रियास्वरूपम् । अनागतावयवाभावं चाभिप्रेत्यातीतावयवकल्पनया निवृत्त इव स क्रियासमूहो दृश्यते । एवमपि चान्तारालक्रियाभिरवयवद्वारेण विच्छिन्नस्वभावोऽडसावा फलप्राप्तेरनुवर्तनादविरतोऽवस्थित एव वर्तमानस्वभावः । न केवलं भुज्यादिरेव, यावद्धाससंकथनादिरपि क्रियान्तरैर्व्यवधीयता एव । अक्षिनिमेषादे (दिभि?)रपि व्यवधानम्, अन्ततः प्रश्वासोच्छासादेरपि भावात् । विश्रम्य विश्रम्य च क्रियारम्भात् सङ्कीर्णेव न तु सर्वथा सङ्कीर्णा, आ फलप्राप्तेर्विरामाभावात् । अन्तरालक्रियाणामवश्यंभाविनीनां सहकारित्वस्यायोगात् । सन्दर्शनादिफलपर्यन्तः क्षणसमूहः क्रिया । तत्र च भौतिकव्यापारोपरमेऽप्यन्तरा सन्दर्शनप्रार्थनादेर्मानसव्यापारस्य यावत् फलाधि गमस्तावदविराम एव । एवं भोजनादेरप्यविरतत्वाद् वर्तमानता सिद्धा ।। 82,83 ।।

एवं तावत् फलावसानः समूहः क्रियेति फलान्तरहेतुक्रियान्तरव्यवधानमुपेत्यापि वर्तमानत्वं समर्थितम् । यद्वान्तरालप्रवृत्तं क्रियान्तरं भिन्नजातीयमेव न भवतीत्याह ।

तदन्तरालदृष्टा वा सर्वैवावयवक्रिया ।

सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते ।। 84 ।।

तस्या भुज्यादिक्रियाया मध्यवर्तिनो ये क्रियाभेदा हसितादयस्ते भुज्यादेरवयवा एव, गुणव्यापाररूपा आचमनादिवदुपकारकत्वात् । ततश्चाचमनादिभिः सादृश्यात् सत्यपि हासादीनां क्वचिदसन्निधानेऽपि भुजिनिर्वृत्तेः प्रसिद्धतरैर्दध्युपसेचनादिभिरङ्गैर्भेदे भूज्यङ्गत्वेन ग्रहणं यथा द्विपुरुषवाह्ये भारे तृतीयस्योपनिपततः । तुशब्दोऽप्यर्थे । सुहृदोहि निर्वृतचेतसः परस्परं हाससङ्कथनादि कुर्वाणा एव भुजिं प्रतिपद्यन्ते । तदेवमत्र प्रत्यवयवं क्रियासमाप्तिमादिकर्मणि

"न्याय्या त्वाद्यपवर्गात् "(Va.5onP.3.2.102,Bha.II.p.114.1.4.)

इति निष्ठासमर्थनन्यायेनाभिप्रेत्य पूर्वपक्षः प्रवृत्तः । फलपर्यन्तक्रियासमूहाश्रयेण तु सिद्धान्त इति स्थितम् ।। 84 ।।

इदानीं सर्वत्रैव वर्तमानत्वं क्रियाया अनुपपन्नमित्याक्षिपति ।

सदसद् वापि वस्तु स्यात् तृतीयं नास्ति किञ्चन ।

तेन भूतभविष्यन्तौ मुक्त्वा मध्यं न विद्यते ।। 85 ।।

साध्यमानावस्था क्रिया भण्यते । तत्र च यः क्षणोऽतीतः स सन् सिद्धस्वभाव इति क्रिया तत्रातीता । यश्चासन् स साध्यः स

भावी क्षण इति तत्र भविष्यदुपाधिका क्रिया । न चान्योऽस्ति कश्चित् क्षणः सदसदुभयरूपः । विरुद्धस्वभावस्यैकत्वविरोधात् । ततश्च वर्तमानता धात्वर्थविशेषणं नोपपद्यते । तदुक्तं भाष्ये
अनागते न पतसि कृत्स्नो लोकः पतत्ययम् । हिमवानपि चलति
(M.Bha.II.p.124.1.3)
इति । परोक्षा क्रिया फलेनानुमीयमानतीतत्वात् कथं वर्तमानप्रत्ययेनोच्येत । एव हिमवानुपरिदृष्टसंयोगविभागक्रियाकार्यः कस्मान्न पततीति वर्तमानप्रत्ययेन व्यपदिश्येतेत्यर्थः ।। 85 ।।
साध्यमानावस्थत्वमेव क्रियायाः स्वेन रूपेण सत्त्वं वर्तमानत्वमिति चेदाह ।
निर्वृत्तिरूपमेकस्य भेदाभावान्न कल्पते ।
सदसद् वापि तेनैकं क्रमरूपं कथं भवेत् ।। 86 ।।
एकस्यार्थात्मनो विभागाभावान्निष्पत्तिरूपं क्रमरूपत्वं क्रियालक्षणं नास्ति । तथाहि सद्वा वस्तु स्याद् असद्वा । तत्र सद् विद्यमानत्वादेवानिर्वर्त्यमा (नम?) नाश्रितक्रमरूपम्, असदप्यसत्त्वादेव तदवस्थायामनाश्रितनिर्वृत्तिरूपं कथं क्रमिकं स्यात् । न ह्यसतः सर्वधर्मशून्यस्य कश्चित् क्रमः । तृतीयराश्यभावाच्च निर्वर्त्यमानं क्रमिकं क्रियारूपं नास्तीति कथं तद् वर्तमानं स्यात् ।। 86 ।।
अथोच्यते । बहवः क्षणाः समाश्रितपौवापर्याः क्रियेति सा फलोपजनात् प्राग् वर्तमानतामासादयेदिति । तदपि न । यतः बहूनां चानवस्थानादेकमेवोपलभ्यते ।
यथोपलब्धिस्मरणं तत्र चाप्युपपद्यते ।। 87 ।।
क्रमजन्मानोऽवयवा विप्रकीर्यमाणस्वभावाः, न युगपत्कालभाविनः । ततश्च सन्निहित एक एव क्षणः समुलभ्यत इति तस्य भेदाभावात् क्रमाभावः । अथ बहवः क्रमिका युगपत् स्मर्यन्त इत्युच्यते, तदपि न । यस्मादनुभवपूर्वकं स्मरणमेकस्य च क्रमानुभवो न वृत्त इति कथं स्मरणमपि तत्र क्रमावेदकं स्यात् ।। 87 ।।
न चापि बहूनामेकक्रियात्मकत्वं युज्यत इत्याह ।
सदसद्रूपमेकं स्यात् सर्वस्यैकत्वकल्पने ।
निर्वृत्तिरूपं निर्वृत्तेः सामान्यमथवा भवेत् ।। 88 ।।
अतीतानागतानां सदसद्रूपाणां क्षणनामेकक्रियात्मत्वाभ्युपगमे सर्वस्य वस्तुनः सदसर्दूपमयं विरुद्धमेकत्वं प्रसज्येत । न चैतद्युक्तं विरुद्धानामनुभवेनैकत्वबाधात् । यद्वा बहूनां भिन्नानामेकत्वविरोधात् कश्चिदन्वयी स्वभाव एकः कल्पयितव्यः । तथा च निर्वृत्तेः निष्पद्यमानायाः साद्यस्वभावायाः क्रियायाः निर्वत्तिरूपं निष्पत्तियोग्यत्वं प्रत्येकं क्षणानामेकक्रियात्मकत्वरूपं सामान्यं भवेत् । तथा चैका क्रिया न सिध्येदित्यभिप्रायः । बहूनां ह्यन्वयी कश्चित् स्वभावोऽङ्गीकृतः क्रियात्मा, न तु बहव एका क्रियेति क्रियाव्यक्तेरभाव एव । भिन्नानामेव हि क्षणानां निर्वृत्तिरूपान्वयो न तु प्रत्येकं क्रियाव्यक्तिस्वभावता तेषां सिध्यति । ततश्च कथं वर्तमानाः क्रियाः ।। 88 ।।
अत्र समाधिमाह ।
कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तत् तथा ।
आत्मतत्त्वे गृह्येत सा चास्मिन् वर्तमानता ।। 89 ।।
इहैकत्वं क्रियायाः क्षणसमुदायरूपायाः कल्पितम् । तथा हि-एकफलोद्देशेन प्रवर्तमाना नियतपौर्वापर्याः क्षणाः क्रियेति फलाभेदादसावेका एवं यथायथं फलभेदेन भिद्यते क्रिया । अत्र च सदसत्वेऽपि क्षणानां वर्तमानतोपपद्यत एव । न हि सत्त्वं वर्तमानतालक्षणं किन्तु प्रारब्धापरिसमाप्तत्वम् । तच्च यावतः क्षणसमूहस्य फलावधिप्रवृत्तिः तावतः प्राक् फलोपजानदभेदेनाध्यवसितस्यास्त्येव । कार्योत्पत्तौ च स एव समर्थः । स च मनोव्यापारपूर्वभावी कायव्यापारपर्यन्तः साधनसंरम्भफलानुमेयः । तत्र च स्वेन क्रमात्मकेन धर्मेण युक्तं तत्समूहरूपं यद् आत्मतत्त्वेन आत्मीयेन विद्यमानेन स्वभावेन गृह्यते तदा तस्यैवंविधस्य येयं विद्यमानता सा वर्तमानता । वा--शब्दो वक्ष्यमाणापेक्षया विकल्पद्योतकः । अयमर्थः ।

नियतपौर्वापर्यः समूहस्तावत् क्रमिकः । तस्य च सदसद्रूपरकत्वेऽपि फलावधि परस्परमध्यस्तक्रमः स्वकाले सन्निहित एकैकोऽपि क्षणो वर्तमानतामनुभवति । यद्यपि च नासावेकः क्रमिक इति न क्रिया तथाप्यपरक्षणगतः क्रमः तत्रानुभववासनया निश्चीयत एवेति न कश्चिद् दोषः । तदुक्तं भाष्ये

क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद् विचेष्टितम् ।

तद पेक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन् ।। (M.Bha.II.p.124,1.8)

इति । फलकामना मानसो व्यापारो भौतिकक्रियाप्रवृत्तौ हेतुः । क्रियार्थं विचेष्टितं साधनानां संरम्भः । सामान्यविशेषभावेन च तदर्थता । एवञ्च मानसव्यापारपूर्वकः कायव्यापारः फलावसानोऽभेदेनाध्यवसितो वर्तमानक्रियास्वभावः स्ववाचकशब्दप्रतिपाद्य इति स्फुटमुक्तम् ।। 89 ।।

वाशब्दसूचितं पक्षान्तरमाह ।

क्रियाप्रबन्धरूपं यदध्यात्मं विनिगृह्यते ।

सङ्क्रान्तबिम्बमेकत्र तामाहुर्वर्तमानताम् ।। 90 ।।

पूर्वं क्षणसमूहस्यैकत्वमेकफलोद्देशेन समर्थितम् । इदानीं सङ्कलनाबुद्ध्युपारूढस्य बुद्ध्याकाररूपत्वेन भाविकमेकत्वमुच्यते । तथाहि-विप्रसृतावयवः क्रियाकलापो ज्ञानस्वभावे सङ्क्रान्ताकार एकस्मिन् यदावधार्यते तदा तस्मादेकज्ञानादभेदात् तद्वद् वर्तमान एकश्च निश्चीयते । क्रमेणानुभूतानामपि च सङ्कलना भवत्येवानुभववासनायाः प्त्यासन्नत्वात् । अन्यथा समुदायादिविज्ञानाभावः । अनुभवपूर्वकत्वं हि स्मरणस्य नियतं न तु क्रमेणोपलब्धं युगपन्न स्मर्यते, शतादिप्रत्ययाभावप्रसङ्गात् । बुद्ध्याकारस्य च बहीरूपतयाध्यवसायाद बाह्यमेकं वर्तमानं क्रियारूपं व्यवह्रियते । तत्सिद्धौ च तदपेक्षयातीतानागतसिद्धिर्नान्यथेति सिद्धं क्रियायाः कालत्रयविशेषणम् । गतमदः ।। 90 ।।

इह क्रियातिपत्तौ लृङ्विधाने भूतभविष्यन्तावुपादीयेते । तयोरनुपपत्तिं चोदयति ।

क्रियातिपत्तिरत्यन्तं क्रियानुत्पत्तिलक्षणा ।

न च भूतमनुत्पन्नं न भविष्यत्तथाविधम् ।। 91 ।।

`यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यद्' इति कमलकाह्वानशकटापरिभवनलक्षणायाः क्रियाया अतिपत्तिः साधनशक्तिवैकल्यान्नियतानुत्पत्तिः । न चानुत्पन्नं क्रियास्वरूपं भूतं भविष्यद् वा शक्यते व्यवस्थापयितुम् । उत्पन्नस्य हि सत्तातिक्रमो भूतः, समर्थसाधनसन्निधाने सम्भावितोत्पत्तिश्च भविष्यन् । अत्र च साधनाभावात् सम्भावितापि नोत्पत्तिः । अत एवात्यन्तग्रहणेनानुत्पत्तिर्विशेषिता ।। 91 ।।

अत्र भूतभविष्यद्व्यवहारं समर्थयते ।

प्राग्विरुद्धक्रियोत्पादान्निर्वृत्ते वा विरोधिनि ।

व्यापारेऽवधिभेदेन विषयस्तत्र भिद्यते ।। 92 ।।

यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यदित्यपरिभवस्य निमित्तं समर्थसाधनाह्वानं भविष्यदसम्भावयन्नेवमभिधत्ते । एवं चाह्नानविरोधिनः कमलकदेशान्तरगमनादपरिभवविरोधिनः शकटगुरुतभारारोपाच्च पूर्वमप्रतिद्वन्द्विनो भविष्यत्त्वे कालस्यापेक्ष्यस्य भेदाद् अवच्छेदात् क्रियातिपत्तेरपि भविष्यद्विषयो विभज्यते । शकट परिभवस्य क्रियारूपस्य निष्पत्तिः कमलकाह्वानाभावात्, तदाह्वानं च देशान्तरगमनान्न सम्पत्स्यत इति तस्य भविष्यतोऽसम्भावनायामत्यन्तानुत्पत्तिलक्षणस्य क्रियातिपत्तिरूपस्यापि भविष्यत्ता । यदि हि समर्थसाधनाह्वानं भविष्यति तदा क्रिया संपत्स्यते इति तस्या भविष्यत्त्वे तदत्यन्ताभावोऽपि भविष्यन् । तथा यदि स तेन ब्राह्मणार्थिनादृष्टोऽभविष्यदुताभोक्ष्यताप्यभोक्ष्यत, न तु भुक्तवानित्यत्राभोजनस्य भोजनप्रतिद्वन्द्विनो व्यापारस्यातीतत्वात् क्रियातिपत्तेरप्यवधिभेदादतीतविषयतया भूतत्वेन व्यवहारः । गतमेतत् ।। 92 ।।

इदानीं कालप्रसङ्गेनायथाकालप्रत्ययविधानार्थं धातुसंबन्धे प्रत्ययाः (P.3.4.1).

इति सूत्रं विचारयति ।

व्यभिचारे निमित्तस्य साधुत्वं न प्रकल्पते ।

भाव्यासीदिति सूत्रेण तत्कालेऽन्यत्र शिष्यते ।। 93 ।।
इग यथास्वं नियत एव काले प्रत्यया विहिता इति स्वकालव्यभिचारे कालान्तरे तेषां साधुत्वं न स्यात् ।
तद्यथा `भाव्यासीत्' `अग्निष्टोमयाज्यस्य पुत्रो जनिता' इत्यादौ भावीति भविष्यत्काले प्रत्ययोऽन्वाख्यातः आसीदिति भूतकालेन संबन्धं न यायात् । तथा अग्निष्टोमेनेष्टवान् इति भूते प्रत्ययोऽन्वाख्यातो जनितेति भविष्यत्कालेन संबद्धो न स्यादिति सूत्रारम्भः । धातूनां स्वतःसंबन्धाभावात् तदर्थोऽत्र धातुरित्युक्तः । भेदाधिष्ठानत्वाच्च संबन्धस्य वृत्तौ अनेकसंख्यान्तर्भावः । साधनद्वारेण च धात्वर्थान्तं विशेषणविशेष्यभावलक्षणः संबन्धः । प्रत्ययाधिकाराच्च प्रत्ययपरिग्रहे
सिद्धेऽधात्वधिकारविहितप्रत्ययस्यापि मतुपो वर्तमानकालसत्तोपाधिपरित्यागे कालान्तरेऽपि सति धातुसंबन्धे साधुत्वं यथा स्यादिति पुनः प्रत्ययग्रहणस्य प्रयोजनमुक्तं भाष्ये
`गोमानासीत्, गोमान् भवितेति'(M.Bha,II,p.165,1.3)
इति । तदेतत् सूत्रं वार्तिके प्रत्याख्यातम्
`धातुसंबन्धे प्रत्ययस्य यथाकालविधानात् सिद्धम्' (M.Bha.II.p.168,1.3)
इति । यथास्वं कालेषु प्रत्ययाः पदसंस्कारदर्शने विहिता इत्यन्तरेणाप्येतत् सूत्रं सिद्धमिष्टमित्यर्थः ।। 93 ।।
अत्रोच्यते ।
स्वकाल एव साधुश्चेत् कालभेदे गतिः कथम् ।
वाक्यार्थादतदर्थेषु विशिष्टत्वं न सिध्यति ।। 94 ।।
भाव्यादिशब्दस्य स्वकाले संस्कारेऽङ्गीक्रियमाणे सत्यासीदिति प्रयोगसंबन्धे कालान्तरप्रतीतिः कुतस्त्या । अत्राप्युक्तं वार्तिके इति ।
`उपपदस्य तु कालान्यत्वम्' (Va.2.onP.3.4.1.M.Bha,IIp,168,1.9)
इति उपपदस्य विशेषणस्य विशेष्यसंबन्धात् तत्कालत्वं वाक्यादवसीयत इति वाक्यार्थोऽसौ पदसंस्कारवेलायामसंनिहितो नाङ्गम् ।
एतद् व्याचष्टे ।
सोऽर्थो वाक्यार्थपर्यालोचनाहम्यो येषां पदानां न भवति तेषु अतदर्थेषु वाक्यार्थायोग्यार्थेषु सत्सु वाक्यार्थस्य तैरव(रनव?)च्छेदाद् विशिष्टत्वं न भवति । तथा च भावीत्यस्य भूतकालानुपादानाद् आसीदित्यनेन संबन्धाभावाद् वाक्यार्थो विशिष्टो नावतिष्ठेत । तस्मादेकवाक्यतावशाद् विशेष्यकालानुवृत्तौ विशेषणस्य सिद्धायां नार्थः सूत्रेणेत्यर्थः ।। 94 ।।
प्रत्युत सूत्रारंभे विवक्षितोऽर्थो न प्रतीयेतेत्याह ।
तदर्थश्चेदवयवो भाविनो भूततागतिः ।
न स्यादत्यन्तभूतत्वमेवैकं तत्र सम्भवेत् ।। 95 ।।
यद् यस्माद् वचनाद्भावि कृत्यमासीद् इत्यादौ वाक्येऽवयवो भावीत्यादिर्विशेषणभूतः, प्रधानभूताख्यातविषयभूतकालाभिधायी व्यवस्थाप्यते तदा भविष्यतः कृत्यस्य या भूतकालता प्रतिपिपादयिषिता सा न विज्ञायेत । केवलमासीदित्यनेन भूतायागमिताया अपि भावीत्यनेन पुनःश्रुतितुल्येनावधारणं प्रतीयेत । तथा च यदिदं कृत्यं कर्तव्यरूपं वस्तु तदासीदेव भूतमेवेति वाक्यार्थोऽवतिष्ठेत । न चैष विवक्षितः । तस्मात् स्वकाल एवान्वाख्यानात् वाक्यार्थपर्यालोचनाद् भाविनो भूततागतिः सिध्यति । विवक्षिता भाव्यवस्याप्यस्य कृत्यस्यातीता । सम्प्रतीदं वर्तमानं जातम् । त्रैयध्विका हि पदार्थाः पूर्वमुपपादिताः । तथा च भविष्यदध्वनोऽतीताध्वप्रवेशो न्याय्यः । यथोक्तं भगवता व्यासमुनिना ।
अवश्यंभाविनं नाशं भावित्वाद् विध्युपस्थितम् ।
अयमेव हि ते कालः पूर्वमासीदनागतः ।।
इति ।। 95 ।।
नन्वेवं स्वकालेऽन्वाख्यातस्य वाक्यार्थात् कालान्तरावहतावप्युपात्तकालत्यागप्रसङ्गः । न प्रसङ्ग इत्याह ।
विशिष्टकालता पूर्वं तथापि तु विशेषणे ।

आश्रयात् सोऽन्तरङ्गत्वात् तत्र साधुर्भविष्यति ।। 96 ।।
पदान्तरसंबन्धात् पूर्वं भाव्यादिशब्दस्य विशिष्ट एव स्वकाले व्युत्पादितत्वात् साधुत्वम् । विशेषणेऽपि च तस्य पदान्तरसंबन्धे तथैव विशिष्टकालता । यस्मादजहदेव स्वकालयोगं तत्र विशेष्यकालमनुवर्तते । भाविनो हि भूतता । अतश्च योऽसावाश्रितः स्वकालः संस्कारनिमित्तत्वेन तस्य पूर्वमेवाश्रयणादन्तरङ्गत्वे सति तत्रैव साधुः शबेदो भाव्यादिः पदान्तरयोगेऽपि । न तु स्वकालत्यागः, तद्गतत्वेनैव वाक्यार्थाद् विशिष्टतागतेः । एवमग्निष्टोमयाज्यस्य पुत्रो जनितेत्यत्र भूतस्यैव भाविता वाक्यार्थात् । सूत्रारम्भे त्वत्यन्तं भविष्यत्तैव गम्येतेति प्रत्याख्यातं सूत्रम् ।। 96 ।।
वार्तिकाभिप्रायेणा केचित्तु समर्थयन्ते । कथमित्याह ।
आमिश्र एव प्रक्रान्तः स पदार्थस्तथाविधः ।
केवलस्य विमिश्रत्वं नित्येऽर्थे नोपपद्यते ।। 97 ।।
इह प्रयुक्तानां शब्दानामन्वाख्यानाद् व्यवहाराय शब्दप्रयोगाद् वाक्यमेव तदङ्गमन्वाख्येयम् । तथा च पदान्तरार्थसमन्वययोग्यपदार्थापोद्धारपूर्वकं पदानामनुशासनाद् वाक्यावधिकेऽन्वाख्याने प्रथमत एव सर्वः पदार्थो विशिष्टः आमिश्रः एवोपात्तः यादृशो वाक्यप्रयोगादवसीयते । इतरपदार्थसमन्वयनिरपेक्षं तु पदानुशासने केवलस्य पूर्वमवस्थि तस्य पश्चादितरपदसमन्वये विशिष्टतायां नित्यः शब्दार्थसंबन्धो विरुध्येत ।
सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वातिष्ठताम् ।। (Vak.II.15)
इत्यादि चात्र दूषणमुक्तम् ।। 97 ।।
एवं सामान्येनाभिधाय एतदेव प्रकृते योजयति ।
शुद्धे च काले व्याख्यातमामिश्रे न प्रसिध्यति ।
साधुत्वमयथाकालं तत् सूत्रेणोपदिश्यते ।। 98 ।।
भावीति भविष्यति भूतेनासंसृष्टे प्रत्ययः साधुरुक्तः । स भूतसंसृष्टे न प्राप्नोति प्रथममेवापेक्षिते । तस्मात् सूत्रेण व्यामिश्रे काले प्रत्ययविधानमुपपद्यते ।। 98 ।।
विशेषाभावात् तर्हि भूतकालोऽप्यासीदिति भावीत्येतद्भविष्यकालसंमिश्रे कस्मात् साधुर्न भवतीत्याह ।
आख्यातपदवाच्येऽर्थे निर्वर्त्यत्वात् प्रधानता ।
विशेषणं तदाक्षेपात् तत्काले व्यवतिष्ठते ।। 99 ।।
`भूतं भव्यायोपदिश्यते'

इत्याख्यातवाच्या क्रिया साध्यमानस्वभावा सर्वत्रैव वाक्यार्थभूता प्रधानाम् । नामपदवाच्यं तु सिद्धस्वभावं कारकं गुणभूतम् । प्रधानानुयायिनश्च गुणाः । न तु गुणानुयायि प्रधानमित्याख्यातवाच्येनार्थेन स्वोपकारायाक्षिप्तो नामपदवाच्योऽर्थो गुणभूतस्तत्कालमनुविधत्ते । एवं च न्यायेनैव समन्वयान्यथानुपपत्त्या (समन्वयस्याप्युपयत्त्था?) गुणप्रधानसन्निधावेकस्मिन् वाक्ये प्रधानानुयायित्वाद गुणानां प्रधानानुग्रहाय तत्काल स्यापि स्वकालापरित्यागेनैवानुवर्तनात् भाव्यासीदित्यादिप्रयोगे सिद्धे नार्थः सूत्रेणेति । एतदुक्तं भवति । आमिश्रत्वं हि सर्वत्र संबन्धे सति पदार्थानां यथायोगं विशिष्टमस्त्येव । केवलं पदान्तरप्रयोगं विना न निश्चीयते तदित्येतावता सामान्येऽर्थे पदं वर्तते, विशेषेऽर्थे वाक्यमित्युच्यते । न तु त्यागग्रहौ कौचित् ।।99 ।।
तथा विधे चार्थे पदसंस्कारादामिश्रेऽपि प्रक्रम एव वृत्तः संस्कारः । न हि कालान्तरव्यतिभिन्ने स्वकाले निषेधोऽस्ति प्रत्ययस्य । तस्मान्नार्थोऽत्र यत्नेनेत्याह ।
सम्प्रत्ययानुकारो वा शब्दव्यापार एव वा ।
अध्यस्यते विरुद्धेऽर्थे न च तेन विरुध्यते ।। 100 ।।
इह वचनेनार्थानां स्वाभावातिक्रमाभावात् कालान्तरे साधुत्वानुशासनमात्रात् तत्र प्रतीतिर्नोपपद्यत इत्यकिञ्चित्करं सूत्रम् । सङ्गितिस्तु गुणप्रधानभावेन समन्वयोपपत्तेः प्रधानकालानुरोधनैकवाक्यतावशेन दर्शिता । अथवा यथास्वं कालेष्विव

संबन्धेऽप्येते प्रत्ययाः । अध्यारोपेण तु समन्वयः । तथाग्निष्टोमयाजीत्यनेन भूतविशिष्ट एवार्थः प्रत्याय्यते ।
जनितेत्येतत्संबन्धे तु स भूतकालावच्छिन्नो ज्ञानाकारो ।अनुपपद्यमानो विरुद्धे तस्मिन् भविष्यति काले अध्यस्यते समारोप्यते ।
योऽयं भविष्यन् कालो जनितुः तत्र जन्मोत्तरकालमग्निष्टोमकरणयागसमाप्तिमाश्रित्याधुनैव भूतकालोऽयमुपात्तः । तेनायमर्थः ।
सोऽस्य पुत्रो जनिता योऽग्निष्टोमेन यष्टेति । यद्वा शब्दस्याग्निष्टोमयाजीत्यस्य व्यापारः स्वार्थाभिधानलक्षणो भविष्यति
कालेऽध्यस्यते । उत्पत्स्यमानस्यार्थस्यानेन प्रतिपादनानुपपत्तेर्भावी व्यापारोऽस्य । सोऽस्य पुत्रो जनिता यो
जातोऽभिवृद्धोऽग्निष्टोयमाजीतीमं व्यपदेशं लप्स्यत इत्यर्थः । तदेतदुक्तं भाष्ये
कदा चैवं व्यपदेक्ष्यते । यदाननेष्टं भवति । (M.Bha.II.p.168.1.15)
इति । तदित्थं सम्प्रत्ययानुकारेण शब्दव्यापारेण वा अध्यस्यमानेन सोऽर्थो विरुद्धत्वाभिमतो न विरुध्यते । नास्त्यत्र
समन्वयविरोध इत्यर्थः ।। 100 ।।
एतदेव निदर्शनेन व्युत्पादयति ।
भूतं भविष्यदित्येतौ प्रत्ययौ वर्तमानताम् ।
अत्यजन्तौ प्रपद्येते विरुद्धाश्रयरूपताम् ।। 101 ।।
तद्वस्तु भूतं भविष्यदन्यद् इत्येतौ प्रत्ययौ ज्ञाने समुत्पद्यमानौ स्वतो वर्तमानकालावपि विषययोः
स्वकालविरुद्धयोर्भूतभविष्यतोराकारं धारयतो यथा एवं स्वकालापरित्यागेन कालान्तरेऽध्यारोपोऽत्र युक्त इत्यर्थः ।
सङ्गृहीतसाध्यान्वयभूतभविष्यदाकारौ हि प्रत्ययौ भूतभविष्यद्रूपतया स्वाकारमध्यवस्यतोऽपरित्यक्तवर्तमानस्वसंवेदनरूपौ ।
एवमग्निष्टोमयाजीति सम्प्रत्ययानुकारोऽपि स्वकालमजहदध्यारोपविषयस्य विरुद्धस्य भविष्यत आश्रीयमाणस्य रूपं प्रतिपद्यते ।
न ह्यध्यस्यमानं स्वरूपं जहाति गोत्वमिव वाहीके ।। 101 ।।
इदानीं कालप्रसङ्गेन वर्तमानसारूप्यं विचारयति ।
अध्वनो वर्तमानस्य यः शेषो य उपक्रमः ।
तद् वर्तमानसामीप्यं शास्त्रे भेदेन दर्शितम् ।। 102 ।।
आफलसमाप्तेः क्रियाप्रबन्धोऽव्युपरतो वर्तमानः काल इत्युक्तम् । तस्य च यः शेषः समाप्तत्वेऽपि संस्कारानुवृत्तिलक्षणः तद्
भूतविषयं वर्तमानसामीप्यम् । यश्च प्रारम्भो मानसः सङ्कल्पो वर्तमानस्य तद् द्वितीयं भविष्यद्विषयं वर्तमानसामीप्यम् । तत्र
कायव्यापारादर्शनाद् वर्तमानतावसाये भूतभविष्यत्स्वभावे वर्तमानप्रत्यया अतिदिश्यन्ते । वावचनात् पक्षे
भूतभविष्यत्प्रत्ययानामनुसासनान्नेदं वर्तमानमेव सद् भेदेनोपादीयते । अत्रापि पूर्ववत् स्वकाल एव गच्छामीत्यादिपदस्य
संस्कारः । अतो हि वर्तमानस्यैव प्रतीतिः । पदान्तरप्रयोगे तु तत्कालेऽध्यारोपः । वावचनात् पक्षेऽध्यारोपितरूपाश्रयाद्
भूतभविष्यत्प्रत्यया भवन्तीति नार्थो यत्नेन ।। 102 ।।
प्रार्थनास्वभावाशंसा प्रतीतिविशेषत्वादू वर्तमाना प्रत्युपस्थिता कथं
भविष्यत्काला (M.Bha.II.p.158 1. 18)
इति भाष्येऽभिहितेत्यत आह ।
अशंसा वर्तमानापि विषयेण भविष्यता ।
भाष्ये भविष्यत्कालेति कार्यार्थं व्यपदिश्यते ।। 103 ।।
ज्ञानस्वभावत्वाद् वर्तमानकालापि प्रार्थ्यमानस्य विषयस्यानागतत्वाद् विषयधर्मेण भविष्यत्कालाशंसा व्यपदिष्टा । तथा च
भूतप्रत्ययलक्षणं कार्यं भविष्यति विषयेऽतिदेष्टुं युक्तम् ।। 103 ।।
यदि विषयधर्मेणापि व्यपदेशो भवति तदेष्यमाणस्यानागतत्वादिच्छापि भविष्यत्काला स्यादिति तत्र चिकीर्षतीति
वर्तमानकालप्रत्यया अप्यतिदेष्टव्या इत्याशङ्क्याह
इच्छा चिकीर्षतीत्यत्र स्वकालमनुरुध्यते ।
भविष्यति प्रकृत्यर्थे तत्कालं नानुरुध्यते ।। 104 ।।
चिकीर्षतीत्यत्र येयमिच्छा सन्नन्तधातुवाच्या सा प्रधानम् । तदुपसर्जनभूता करोतिक्रिया तद्विषयः । तस्योपसर्जनस्य

भविष्यत्कालत्वेऽपि सनः प्रकृतिभूतधातुवाच्यस्य प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति सन्नन्तधातुवाच्याया इच्छाया वर्तमानत्वात् स एव कालोऽनुवर्त्य इति सिद्धो वर्तमानप्रत्ययः । न हि प्रधानं गुणाननुविधत्त इति गुणभूतकरोतिक्रियाकालानुवृत्तिरत्र नास्ति ।। 104 ।।

आशंसायामपि स्वकालानुवृत्तिः कथं न भवतीत्याह ।

आशंस्यमानतन्त्रत्वादाशंसायां विपर्ययः ।

प्रयोक्तृधर्म शब्दार्थे शब्दैरेवानुषज्यते ।। 105 ।।

यथेच्छा प्रत्ययार्थत्वात् प्रधानं नैवमाशंसा । न हि सा प्रत्ययवाच्या, अपि तु तद्विषय एवाशंस्यमानः प्रत्ययाभिधेयः । प्रयोक्तृधर्मो ह्याशंसा, न शब्दार्थः । तथाहिउपाध्यायश्चेदागतो व्याकरणमधीतमेवेत्याशंस्यमानमुपाध्यायागमनं व्याकरणाध्ययनं च प्रत्ययवाच्यं तन्त्रं प्रधानमिति तत्कालानुवृत्तिरेव न्याय्या । एतदाशंसिना तु प्रयोक्त्रा वाक्यमिदं प्रयुक्तमिति गम्यमानत्वमाशंसायाः । कथं तर्हि प्रयोक्तृधर्म आशंसा शब्दसंस्कारनिमित्तम् । शब्दार्थो हि शब्दसंस्कारनिमित्तं न्याय्य (नान्य?)इत्याशङ्कायोक्तम्

प्रयोक्तृधर्मः शब्दार्थे शब्गदैरेवानुषज्यते

इति । अध्यारोप्यते प्रयोक्तृधर्मः प्रयोज्यस्य शब्दस्याभिधेये शब्देनैव । तस्मिन् हि प्रयुक्ते गम्यते स धर्मः प्रयोक्तरीति गम्यमानत्वादा बाधादिवद् युक्तं शब्दसंस्कारनिमित्तत्वमस्य । पुरुषधर्मेष्वपि हि शास्त्रमधिकृतमिति विचारितं वाक्यपदीये । गतमेतत् ।। 105 ।।

इह वार्तिककारः पपाठ

`अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वात्' (M.Bha.II.p.159 1.21)

इति । अनिर्वृत्ते कार्ये भूतप्रत्ययाः वक्तव्या इत्यर्थः । तद्यथा--

`देवश्चेद् वृष्टो निष्पन्नाः शालयः' (M.Bha.II,p.159,1.23)

इति । निष्पन्नसदृशार्थोऽनिष्पन्न इति पर्युदासेन योग्यहेतूनिपाते सम्भाव्यमाननिष्पत्तिरुच्यते । तेनानागतमात्रे भूतप्रत्यया न भवन्ति । अनिष्पन्न इत्युक्ते।ऽपि चानिष्पन्नत्वादिति हेतुप्रदर्शनम् । उपचारेणायं प्रयोगो न वेदितव्य इत्यर्थः । अनागतरूपेणैवानुपचरितातीतावस्थेन कार्यमत्र प्रतीयत इत्युपसंख्येयो भूतप्रत्यय इत्यर्थः । अत एव भाष्यम्--

`तत्र भवितव्यं निष्पत्स्यन्ते शालयः' (M.Bha.II.p.159.1.23)

इति भविष्यत् प्रत्ययस्यैव युक्तामाह । अस्य प्रत्याश्यानम्--

`सिद्धं तु भविष्यत्प्रतिषेधात्' (Va.3.onP.3.3133,M.Bha.II,p.159,1.24)

इति । `देवश्चेद् वृष्टः सम्पत्स्यन्ते शालय' इति केनचिदुक्ते मैवं वोचः, सम्पन्नाः शालय इत्येवं ब्रूहीति भविष्यद्वाचिनः शब्दस्य लोके प्रतिषेधो दृश्यते । भूतवाचिन एव त्वम्यनुज्ञानमिति वार्त्तिकार्थः । तदेतत् कथं भवतीति वार्तिकाभिप्रायमाचष्टे--

अप्शालिबीजसंयोगे वर्तते निष्पदिर्यदा ।

तत्रावयववृत्तित्वाद् भविष्यत्प्रतिषेधनम् ।। 106 ।।

इह निष्पत्तिर्धात्वर्थः समग्रसाधनसम्पत्तौ फलोपजनो मुख्यः । स यदावयवमात्रे जलशालिसंबन्धमात्रेऽध्यारोप्यते तदा तावन्मात्रस्य वर्षमात्रेण सम्पत्तेरतीतो धात्वर्थ इति सिद्धां भूतप्रत्ययाः । भविच्यत्प्रत्ययानामयमविषय एव जलशालिसंयोगस्य निष्पत्तेरिति भविष्यतः प्रतिषेधो युक्तः ।। 106 ।।

यदा तु मुख्य एव निष्पत्त्यर्थः तदात्र कथं भूतकालतेत्याह ।

फलप्रसवरूपे तु निष्पदौ भूतकालता ।

धर्मान्तरेषु तद्रूपमध्यस्य परिकल्प्यते ।। 107 ।।

समग्रसाधनसन्निधानसाध्ये यदा निष्पत्तिलक्षणे धात्वर्थे फलजन्मपर्यन्ते निष्पदिर्धातुर्वर्तते तदा पूर्वेषु कार्यनिष्पत्तेपरन्येषु कारणाश्रितेषु बीजोदकसंयोगाहितातिशयेषु धर्मेषु तत् कार्यनिष्पत्तिरूपमध्यस्यते । तेषामतीतत्वात् फलप्रसवस्याप्यतीतता

परिकल्प्यत इति सिद्धा भूतप्रत्ययाः ।। 107 ।।
प्रकारान्तरेणोपचारमाह ।
उपयुक्ते निमित्तानां व्यापारे फलसिद्धये ।
तत्र रूपं यदध्यस्तं तत्कालं तत् प्रतीयते ।। 108 ।।
सामग्रीसाध्यत्वात् कार्यस्य बहूनि निमित्तानि सापेक्षाणि जनकानि । तेषां फलजन्मनि यो व्यापार उपकारस्तस्योपयुक्तत्वात् फलस्य यद्रूपं भाव्यपि तत्र तस्मिन् हेतूपकाररूपं तदध्यस्तं तस्य हेतुव्यापारस्यातीतत्वादतीतकालत्वे तदभेदापन्नं तत्फलमपि तत्कालम् अतीतकासमवसीयते । पूर्वं कारणधर्मेषु फलस्याध्यारोपः, इह तु फले कारणधर्माणामिति विशेषः । उपचारप्रयोजनं तु कारणानामत्र समर्थतरत्वप्रतिपादनम् । एतेन च
`हेतूभूतकालसम्प्रेक्षितत्वाद्वा' (Va.4.on P.3.3.133.M.Bha.II.p.160,1.3)
इति द्वितीयं प्रत्याख्यानवार्तिकं विवृतम् । निमित्तस्य वर्षस्य योऽतीतः कालः स कार्येऽध्यस्यते ।
कारणान्तरापेक्षाभावप्रतिपादनाय प्रतीयत इत्यर्थः । निष्पन्नत्वे निष्पन्नकार्याणि शालयः कथं तदानीमेव न कुर्वन्तीति चोदयित्वोक्तम्--
`अन्यदिदानीमुच्यते' (M.Bha.II.p.160,1.6.)
इति । यद्यर्थक्रियाकरणं शालीनां निष्पत्तिः तदा कोष्ठस्था अपि न निष्पन्नाः स्युः अर्थक्रियायां भुजिलक्षणायामवहननाद्यपेक्षणात् ।। 108 ।।
अथ हेतूपकारसमाप्तिमात्राधीना निष्पत्तिः तदा यथायथं हेतूपयोगनिष्पत्तौ निष्पत्तिव्यवहारः सिद्ध इत्याह ।
निष्पत्तावविधिः कश्चित् कश्चित् प्रतिविवक्षितः ।
हेतुजन्मव्यपेक्षातः फलजन्मेति चोच्यते ।। 109 ।।
इह कश्चिद् बीजसलिलसंयोदमात्राधीनां निष्पत्तिं शालीनां मन्यते ।
कश्चिदुत्तरकालभाव्यातपादिसंयोगजनितोपकारपरम्पराधीनाम् इति निष्पत्तिहेतुरनवस्थितः । कारणस्य ह्युपकारविशेषख्यापनायैवमुच्यते । तत्र च प्रथमतरनिमित्तगतोपकाराधिक्यकल्पनायां निमित्तान्तरव्यापारापह्नवेन तावत एव हेतोर्जन्मनः फलजन्मव्यवहारः । आतपादिसंयोगलक्षणहेतुजन्मनो वेति तस्यातीतत्वात् फलमप्यतीतताव्यवहारयोग्यम् । एष चोपचाराश्रय एव व्यवहारो हेतुभूतकालसंप्रेक्षाया इति नर्तेऽध्यासाद् भवत्यसौ । जलबीजसंयोगमात्रं तु निष्पदिवाच्यमाश्रित्य पूर्वः परिहारः । अत्र निष्पद्यर्थो गौणः । उत्तरत्र तु परिहारे निष्पद्यर्थो मुख्यः । कार्यकारणयोस्त्वभेदाध्यासः । इति विकल्प उपपन्नः ।। 109 ।।
सामग्रीसाध्यत्वात् कार्यस्य कथमेकसाधनसम्पत्तिमात्रे सम्पत्तिः स्यादित्येतत् चोचं विचारयितुमाह ।
अबहिस्साधनाधीना सिद्धिर्यत्र विवक्षिता ।
तत् साधनान्तराभावात् सिद्धमित्युपदिश्यते ।। 110 ।।
अन्तरङ्गे कस्मिंश्चित् साधने सन्निहिते ततोऽन्यस्य बहिर्भूतस्य साधनस्यापेक्षा तिरस्कारेण विवक्षितं साध्यं सत्कल्पं सिद्धमेवेति लोके व्यवहारः प्ररूढः । तदनुसारेणैव च शास्त्रे व्यवस्थोपपत्तिः । लोकप्रसिद्धस्यैव शब्दार्थव्यवहारस्य शास्त्रेणानुगमात् । तथा च यथाविवक्षं कालत्रययोगेनात्र व्यवहारः सिद्ध इति ।। 110 ।।
निगमयति--
तस्मादवधिभेदेन सिद्धा मुख्यैव भूतता ।
अनागतत्वमस्तित्वं हेतुधर्मव्यपेक्षणे ।। 111 ।।
निष्पत्तौ योऽवधिः कारणं तस्य भेदेन यथाभेदं तत्र कार्यस्याध्यासात् तद्वदतीतता मुख्या । कारणे हि कार्योपचारः, न तु भूतस्य कालस्य । यदा तु हेत्वन्तरस्य भाविकार्यजननव्यापारोऽपेक्ष्यते तदा मुख्येनैव रूपेणानागतत्वं भविष्यत्त्वं कार्यस्य । यदा तु हेत्वन्तरस्य प्रत्यासन्नकार्यजननव्यापारो विवक्ष्यते तदा व्यापारप्रबन्धस्य फलावधेरेकत्वेन पूर्वोत्तरसदवयवात्मकस्यापि

सत्त्वात् वर्तमानत्वमिति प्रयोगत्रयं सिद्धं निष्पन्ना निष्पत्स्यन्ते निष्पद्यन्ते शालय इति । गतमेतत् ।। 111 ।।

अपरमपि वार्तिककारः पपाठ--

`अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुर्विद्यमानत्वात्'

(Va.5.onP.3.3.133,M.Bha.II.p.160,1.10)

इति । भवन्त्या लङ्विभक्तेरर्थे वर्तमाने काले भूतभविष्यदर्यास्तिङ्विभक्तयो वक्तव्याः । वर्तमाने हि लडेव स्यात् । तत्र भवन्त्यर्थ इत्युक्तेऽपि कर्तुर्विद्यमानत्वादिति हेतूपादानं प्रयोकालावधृतं सत्त्वं शब्दनिबन्धनं न तु वास्तवमेवेत्येतत्प्रतिपादनार्थम् । कूपोऽभूदभवद् बभूव भविष्यति प्रयोगकालेऽपि कूपस्य कर्तुरविनष्टस्यैवोपलम्भादित्यर्थः । तथा चैतद् व्याख्यानभाष्यम्--

`कूपोऽनैन कदाचिदवधृतो न चास्यापायं पश्यति'

(M.Bha.II.p.160.1.14)

इति विद्यमानत्वं सम्प्रत्यवध्रियमाणत्वमेव व्याचष्टे । अत्र प्रत्याख्यानम्--

`सिद्धं तु यथास्वकालं समुच्चारणात्' (M.Bha.II.p.160.1.19.)

इति । आत्मीयेष्वेव कालेषु यथायोगं तिङ्विभक्तीनां प्रयोगोऽयम् न तु वर्तमान एवेति नार्थ उपसंख्यानेनेत्यर्थः । एतदेव साधयितुमुक्तम्

`अवात्वात्' (Va 7on P.3.3.133.M.Bha.II.p.160,1.19.)

इति । अविकल्पत्वादेषां प्रयोगाणामात्मीय एव काले समुच्चारणम् । वर्तमाने ह्येषां साधुत्वोपसंख्यांने तत्रैव सर्वास्तिङ्विभक्तयः पर्यायेण दृश्येरन् । न च दृश्यन्त इत्युक्तम्

`असिद्धविपर्यासश्च'(Va.8on P.3.3.133,M.Bha.II.p.160,21.)

इति । असिद्धं च वैपरीत्यमित्यर्थः । न हि कश्चित् कूपोऽभूदिति प्रयुयुक्षिते कूपो भविष्यतीति प्रयुङ्क्ते । तस्मादविकल्पितात् प्रयोगादसङ्करेण च प्रयोगाद् यथास्वं काले तिङ् विभक्तीनामुच्चारणं सिद्धम् ।।

तदेतत् कथमुपपद्यत इति वार्तिकाभिप्रायमाचष्टे ।

सतामिन्द्रियसंबन्धात् सैव सत्ता विशिष्यते ।

भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः ।। 112 ।।

इह पदार्थानां सर्वो व्यवहारः संसर्गिधर्मान्तराच्छुरणेनेत्युक्तमेव । ततश्चात्र येयं कूपसत्ता सा गृहीता सती शब्दप्रयोगस्य निमित्तभावमापद्यते, अगृहीताया असत्कल्पात्वादिति ग्रहणोपाधिर्व्यवहारमवतरति । ग्रहणं चेन्द्रियार्थसन्निकर्षनिमित्तमिति पथि कूपस्येन्द्रियेण सन्निकर्षो यत्र भावी तत्र भविष्यन्ती सत्ता व्यवह्रियते । यत्र तु भूतः सः, तत्र भूता । यत्र तु सम्प्रतितनः तत्र वर्तमानेति त्रिकालविषयाः प्रयोगाः सामान्यविशेषभूता अपि सिद्धाः । विप्रकृष्टे हीन्द्रियसंबन्धेऽतीते भूतविशेषविषया लङादयः । विप्रकृष्टे चागामिनि भविष्यद्विशेषविषया लुडादयः ।। 112 ।।

ननु च यथा भूतभविष्यद्विभक्तयो वर्तमान विषयं नावगाहन्ते तथा सापि तद्विषयान् नावगाहेतेति कूपोऽस्तीति प्रयोगो भूते भविष्यति चेन्द्रियसंबन्धे न स्यादित्या शङ्क्याह ।

अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते ।

यः समासादनाद् भेदः स तत्र न विवक्षितः ।। 113 ।।

इन्दियसंबन्धासंबन्धनिमित्तस्य भूतभविष्यल्लक्षणस्य भेदस्याविवक्षायां मनसा सन्मात्रे कूपमभिसन्धायास्तीति प्रयोगः सामान्येनात्रोपपद्यत इत्यर्थः । विशेषास्तु परस्परविरोधिना न सङ्कीर्यन्ते ।। 113 ।।

किं वात्रौपाधिकेन सत्ताया भेदेन, तात्त्विक एव सत्ताया भेदः प्रत्यवस्थित इत्याह ।

योगाद्वा स्त्रीत्वपुंस्त्वाभ्यां न किंचिदवतिष्ठते ।

स्वस्मिन्नात्मनि तत्रान्यद् भूतं भावि च कथ्यते ।। 114 ।।

"न कश्चित् स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते,वर्धते यावदनेन वर्धितव्यमपायेन वा युज्यते"(M.Bha.II.p.198.1.8.)
इति स्त्रीसूत्रे भाष्यम् । तत्रोपचयः पुंस्त्वम्, अपचयः स्त्रीत्वमिति लिङ्गसमुद्देशे वक्ष्यति ।
`उत्पत्तिः प्रसवोऽन्येषां नाशः संस्त्यानमिष्यते ।' (Vak.III.लि.27.)
इति । एव स्त्रीत्वपुंस्त्वाभ्यामपचयोपचयाभ्यामजस्रप्रवृत्तिभ्यां सर्वभावानां संबन्ध इति
प्रतिकलमन्योन्यरूपसदृशप्रबन्धरूपभावमध्येऽवस्थाभेदगतस्त्रिकालयोग उपपद्यत एव तात्त्विकः ।
अतश्चान्यदेवातिक्रान्तेन्द्रियसंबन्धं भूतं रूपम्, अन्यदेव च भविष्यदिन्द्रियसंबन्धं भावि, अन्यदेव च वर्तमानेन्द्रियसंबन्धम् ।
अभेदेन तु बुद्ध्या समीक्ष्य रूपसामान्यमस्तीतिं वर्तमानप्रत्ययवाच्यं सिद्धम् ।। 114 ।।
इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे कालसमुपद्देशो नवमः ।।
.....

Lingasamudesha

अथ लिङ्गसमुद्देशः

तदेवं तिङन्तार्थो विचारितः । तत्र सङ्ख्यासाधने सुबन्तसाधारणे । क्रियाकालपुरुषोपग्रहास्तिङन्तैकनियताः । लिङ्गं तु नामपदानामधिकं वाच्यमिति तदिदानीं विचारयितुं यथासम्भवं दर्शनभेदेन तल्लक्षणमाह ।
स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः ।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा ।। 1 ।।
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि ।
लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सप्त दर्शिता ।। 2 ।।
लोके यद्यल्लिङ्गं दृष्ट्वा अयं पुमान् इयं स्त्री इदं नपुंसकमिति प्रतीयते तदिह पक्षद्वयेन निर्दिष्टम् ।
प्रसवयोग्यस्तनकेशकलापप्रजननादिभिरुपव्यञ्जनैरवयविनः सम्बन्धः संयोगसमवायलक्षणो लिङ्गम्, तेन वा सम्बन्धेन विशिष्टाः स्तनादय इति पक्षद्वयम् । तदुक्तम्--
स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ।। (M.Bha,II,p,196.1.4)
इति । उभयव्यञ्जनाभावात् तदभावे व्यञ्जनवत्त्वसाम्याच्चानेनैव नपुंसकत्वमपि लक्षितं भवति । `तदभावे नपुंसकम्' इत्येवोक्तेऽव्ययानां तिङन्तानां च तत्प्रसङ्गः । `उभयोरन्तम्' इत्येतावत्युक्ते कुक्कुटमयूर्याविति लिङ्समुदायविषये नपुंसकत्वं स्यादित्युभयमुपात्तम् । यत्र लिङ्गान्तराभावे तुल्यजातीयं स्त्रीपुंसव्यतिरेकेण लिङान्तरं सोऽर्थो नपुंसकलिङ्गयुक्त इत्यर्थः । अत्र च मत्वर्थीयेन य एव सम्बन्धविशेष उक्तः स एवेहानूदितः स्तनकेषसम्बन्धस्य चोपलक्षणत्वात् । प्रसवयोनिविशेषादि यथास्वं दृष्टो विशेष इहादिग्रहणाद् गृह्यते । एवं लोमसम्बन्धोऽपि विशिष्टोऽन्यस्याप्युपलक्षणमिति प्रसवादयोऽपि गृह्यन्ते । तेन
`लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते ।' (M.Bha,II,p.196 1.6.)
नत्वं खरकुटीः पश्य' (M.Bha.II.1.196,1.9.)
इति चोद्यं नावतरति विशिष्टसंबन्धस्याश्रयणात् । लोके हि यो दृष्टः सम्बन्धस्तमनूद्य लक्षणे क्रियमाणे नातिप्रसङ्गो भवति । अत एवादिग्रहणाद् यथास्वं स्त्र्यादिनियतस्य भेदस्य ग्रहणम् । एतत्तु दर्शनद्वयमचेतनानां स्तनादिरहितत्वादव्यापकमित्युक्तं
`खट्वावृक्षौ न सिध्यतः'(M.Bha.II.1.196.1.13.)
इति । अतः पक्षान्तराश्रयणम् । तत्र च तीर्थिकमतभेदेन पक्षभेदः । सर्वत्रा भिन्नाभिधानप्रत्ययोन्नीतसद्भावां जातिं मन्यन्ते इति

स्तनाद्युपव्यञ्जनाभिव्यक्तविशेषा स्त्रीत्वपुंसकत्वरूपा लिङ्गजातिरित्याहुः । सा चाचेतनेष्वपि यथास्वमुपव्यञ्जनाभिव्यक्ता विद्यत एवेति वक्ष्यते । ननु स्तनाद्युपव्यञ्जनापि जाति कथमचेतनेषु, न हि तत्र स्तनादयः सन्ति । अथादिग्रहणाद् यतायथं विशिष्टमेवोपव्यञ्जनम्, एवं सति पूर्वोक्तमपि पक्षद्वयं नाव्यापकम् । अचेतनेष्वपि यथास्वयुपव्यञ्जनविशेषस्य ग्रहणात् । अस्ति हि खट्वादीनामपि किञ्जिन्निमित्तं यद्वशात् स्त्र्याद्याकारप्रत्ययप्रसवः । सत्यमेतत् । अर्थव्यक्तिवस्तुशब्दानां तु त्रिलिङ्गानां सर्वभावेष्वव्याहतप्रसरत्वात् त्रिलिङ्गयोगस्तदाकारप्रत्ययान्यथानुपपत्त्यानुमीयते । तत्र च परस्परविरोधिनियतव्यञ्जनसम्बन्धरूपं लिङ्गत्रयं लौकिकं कथं स्यादिति तदवधीरणेन जातिपक्षावलम्बनम् । जातीनां हि सर्वगतत्वादेकाश्रयसमवायित्वं वह्वीनामप्युपपद्यते । एवं गुणावस्थादीनामपि लिङ्गानां सर्वत्राविरोधः । तथाहि संख्या सत्त्वरजस्तमसां गुणानां सततपरिणामिनामुपचयापचयमाध्यस्थ्यलक्षणा अवस्थाविशेषा यथायोगं पुस्त्वादिलिङ्गमातिष्ठन्ते । तदेतद् भाष्यकाराभिमतं दर्शनम् । संस्त्यानप्रसवस्थितयो हि तस्य लिङ्गम् । तथा चाह--

"संस्त्यानप्रसवौ लिङ्गम् । (M.Bha.II.p.197.1.27.)

"सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः"

(M.Bha.II.p.198 1.5.)

इति । सर्वा इति वदता वृक्षादावपि लिङ्गयोग उपपादितः । त्रिलिङ्गता च समर्थिता । नियमे तु कारणं वक्ष्यते । तत्र संस्त्यानं संहननं प्रतिलयस्तिरोधानमित्यवस्था स्त्रीत्वम् । प्रसवः प्रवृत्तिराविर्भाव इति पुंस्त्वम् । न स्त्रीपुंसौ नपुंसकमिति स्थितिर्नपुंसकमर्थाल्लक्षितम् । तथाहि संग्रहकारः पठति--

"संसत्यानं संहननं तमोनिवृत्तिरशक्तिरुपरतिः प्रवृत्तिः प्रतिबन्धस्तिरोभावः स्त्रीत्वम् , प्रसवो विष्वग्भावो वृद्धिशक्तिर्वृत्तिलाभोऽभ्युद्रेकः प्रवृत्तिराविर्भाव इति पुंस्त्वम्, अविवक्षातः साम्यं स्थितिरौत्सुक्यनिवृत्तिर परार्थत्वमङ्गाङ्गिभावनिवृत्तिः कैवल्यमिति नपुंसकत्वम्"

इति । अवस्थाविशिष्टा वा गुणा एव लिङ्गमित्यत्रैव दर्शने पक्षान्तरम् । ते हि कार्यान्तरवत् स्त्र्याद्यवभासमपि प्रत्ययमुपजनयन्तो भवन्ति लिङ्गव्यपदेश्याः । एकस्यापि वस्तुनः शब्दभेदेनार्थो व्यक्तिर्वस्त्विति लिङ्गभेदस्य दर्शनाद् बहिसन्नेव शब्दैरुपपादित इव बाह्ये वस्तुनि लिङ्गयोग इति शब्दाभिधेयस्वभावं लिङ्गमिति केचित् । तटस्तटी तटमित्यभिन्नेनापि शब्देनाभिन्नं वस्तु त्रिलिङ्गं प्रत्याय्यत इति शब्दसंस्कारमात्रं लिङ्गमाश्रितं कैश्चित् । एवमपि च बाह्यत्वेनावसायान्नोदात्तादिधर्मवच्छब्दधर्मत्वं लिङ्गस्य, किन्तु स्त्रियां पुंसि नपुंसक इति शब्दान्वाख्याननिमित्तभावदर्शनाच्छब्दसंस्कारत्वमस्य ।

"तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः ।"

(M.Bha.II.p.197 1.12,14)

इति भाष्ये वर्णितम् । तदेते मतभेदाश्रयाः सप्त पक्षाः यथायथुमुत्तरत्र विचारयिष्यन्ते ।। 1,2 ।।

सम्प्रति शब्दशक्तिस्वभावानुसारेणापरं विकल्पसप्तकमाह ।

उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः ।
विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिताः ।। 3 ।।

उपादानं शब्दैर्विशिष्टशक्तिभिरर्थोपाधित्वेन ग्रहणं लिङ्गानाम् । तस्य सप्त भेदाः ।

लिङ्गाभिव्यञ्जकशब्दशक्तिप्रतिनियमाद्ध्यसांकर्यं लिङ्गानां गुणावस्थादिरूपाणां सर्वत्र सम्भवतामपि । तथाहि-विकल्पेन स्त्रीपुनपुसकानां शब्दैः प्रत्यायने चत्वारो भेदाः । केचित् पुंनपुंसकविषयाः, शङ्खः पद्मः, शङ्खं पद्मम् इत्यादयः । पद्मशङ्खौ निधौ पुंसि स्थितौ पुंसि च तोयजे ।

इति । केचित् स्त्रीनपुंसकनियताः, भागधेयं भागधेयी भेषजं भेषजी अर्चिरित्यादयः । अन्ये स्त्रीपुंससाधारणाः । यथा इषुः अशनिः वत्सः वत्सेत्यादयः । अपरे त्रिलिङ्गाः तटस्तटा तटमित्यादयः । सन्नियोगो नियमः, तेन त्रयो विकल्पाः । तद् यथा-

वृक्षादयः पुंस्येव नियताः, खट्वादयः स्त्रियामेव, दध्यादयो नपुंसक एवेति सप्त विकल्पाः ।। 3 ।।
इदानीं जातिपक्षोऽत्र विचार्यते । लौकिकस्य लिङ्गलक्षणस्योपेक्षणात् तत्र गोत्वादीनामिव स्त्रीत्वादीनामेकत्र कथं न विरोध इत्याशङ्क्याह--

तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ।। 4 ।।

स्त्रीत्वाद्यनुरक्तप्रत्ययजननात् सर्वत्राविरुद्धसमवायाः स्त्रीत्वादिजातयो विरुद्धैकार्थसमवायाभिर्गोत्वाश्वत्वादिजातिभिः सहैकस्मिन्नाश्रये वर्तन्ते । प्रत्ययाभेदो जातीनां लिङ्गम् । स च गोत्वाश्वत्वादिनिमित्त एकस्मिन्नाश्रये न जायते, स्त्रीत्वादिनिमित्तस्तु गोत्वाद्याश्रयेऽपि जायत इति कथमासां जातीनां गोत्वादिभिरुविरुद्धत्वं न स्यात् ।। 4 ।।

तथाहि--

हस्तिन्यां वडवायां च स्त्रीतिबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ।। 5 ।।

भिन्नजातीयेष्वपि स्त्र्याद्याकारबुद्धेरनुगमात् जात्यन्तरैः स्त्रीत्वादिजातीनामविरुद्ध एकार्थसमवायः । अयमत्र परमार्थः । इह शब्दाल्लिङ्गोपाधेः प्रत्ययस्य भिन्नजातीयेष्वप्यनुगमस्य दर्शनाच्छब्दप्रमाणकानां शब्दार्थोऽर्थ इति सर्वत्र द्रव्यगुणकर्मसामान्यादावपि लिङ्गजातियोगः कल्प्यते । तथा च स एवार्थः केनचिच्छब्देन नियतलिङ्गोऽभिधीयमानस्तल्लिङ्गजातियोगीं, शब्दान्तरेण तु लिङ्गजात्यन्तरयोगी प्रत्याय्यत इति न काचित् क्षतिः । तद् यथा भावशब्देन पुंस्त्वोपाधिः सत्तोच्यते, सत्ताशब्देन स्त्रीत्वोपाधिः, सामान्यशब्देन नपुंसकत्वोपाधिः । एवं तटादौ वाच्यम् । गोत्वादयोऽपि भावजातिसामान्यशब्दैः स्त्री(त्रि?) लिङ्गोपाधयोऽभिधीयन्ते इति शब्दशक्त्यनुसारेणैव सर्वत्र लिङ्गजातिर्व्यव स्थिता । शब्दा हि द्रव्यायमाणं वस्त्वाचक्षाणास्तद्धर्मविङ्गोपाधितयैव तत्र तत्र प्रवर्तन्ते । तथा च स्त्रीत्वं स्त्रीता स्त्रीभाव इति लिङ्गेष्वपरो लिङ्गयोग इति वक्ष्यते ।। 5 ।।

एतदेवोपपाटयितुमाह---

परतन्त्रस्य यल्लिङ्गमपोद्धारे विवक्षिते ।
तत्रासौ शब्दसंस्कारः शब्दैरेव व्यपाश्रितः ।। 6 ।।

नामपदेन सत्त्वभूतस्यार्थस्याभिधीयमानत्वात् तस्य वृत्तावुपसर्जनभूतस्यापि प्रक्रियायामपोद्धारवाक्येऽभिधित्सिते यल्लिङ्गमुपादीयते नान्तरीयकं तत्केवलं शब्दस्यान्वाख्याननिमित्तमिति शब्दैरेवाङ्गीकृतं प्रयोगे तु लौकिके तदविवक्षितमित्यर्थः । तथाहि कुक्कुट्यादीनामण्डादिषु पुंवद्वचनं प्रत्याख्यातं

`न वा अस्त्रीपूर्वपदविवक्षितत्वात्'

(Va.3.on P.6.3.42,M.Bha.III,p.157,1.18)

इति । कुक्कुटाण्डं मृगक्षीरमिति कुक्कुटादेरण्डादिविशेषणस्य जातिमात्रविवक्षायां स्त्रीत्वस्याविवक्षा । अतिदिष्टेऽपि हि पुंशब्दे पूर्वपदवाच्यं स्त्रीत्वमत्र नावगम्यत इति किमतिदेशेन । यत्र हि गम्यते स्त्रीत्वं तत्र पुंशब्दोऽतिदिश्यतां यथा दर्शनीयभार्यादौ । अत्र ह्युत्तरपदेन स्त्रींलिङ्गेन सामानाधिकरण्यात् पूर्वपदस्य स्त्र्यर्थतावगम्यत इति पुंशब्दातिदेशो युक्तः । इह त्वण्डादेः स्त्रीलिङ्गताभावात् पूर्वपदस्य स्त्र्यर्थता नियमेन नावधार्यते । प्रक्रियावाक्ये तु शास्त्रीयेऽपोद्धारे कुक्कुटस्याण्डं मृगस्य क्षीरमित्येव पुंल्लिङ्गेन प्रदर्शनं सत्त्वभूतस्यार्थस्य लिङ्गनान्तरीयकत्वात् । ततश्चासौ सत्ताभिधायिनः शब्दस्य संस्कारः, अण्डक्षीरादीनां तु पुंसः सम्बन्धाभावादर्थात् प्रयोगे लौकिके स्त्रीत्वावगतिः ।। 6 ।।

यदुक्तं सर्वत्र जातयः समवस्थिता इति तामिदानीं व्याप्तिमुपपादयति ।

बुद्ध्या कल्पितरूपेषु लिङ्गैष्वपि च सम्भवः ।
स्त्रीत्वादीनां व्यवस्था हि सा लिङ्गैर्व्यपदिश्यते ।। 7 ।।

बहिर्वस्तूनां बुद्ध्या ज्ञानेन कल्पिताकारेषु समारोपितरूपेषूपाधित्वेन वस्तुविषयेऽभिधीयमानेषु स्त्रीत्वादिष्वपि

लिङ्गेष्वपरलिङ्गयोगो यथास्वं शब्दप्रतिपाद्येष्विति सर्वशब्दविषया लिङ्गानां व्याप्तिः । सा व्यवस्था स नियमः स्त्रीत्वादीनां लिङ्गैर्लिङ्गोपाधिभिः शब्दैः प्रतिपाद्यते । तथा हि भावप्रत्ययान्तैर्लिङ्गाभिधायिभिः शब्दैरेषां स्त्रीत्वादीनां लिङ्गनियमेन प्रत्यायनं स्त्रीत्वं स्त्रीता स्त्रीभाव इति । स्त्रीत्वविशिष्टस्य द्रव्यस्य स्त्रीशब्देनाभिहितस्य भावप्रत्ययेन प्रवृत्तिनिमित्तं नपुंसकत्वादियोगि स्वभावात् प्रकाश्यते । भावशब्देन च पुंस्त्वविशिष्टमिति शब्दजेन प्रत्ययेन लिङ्गेष्वपरलिङ्गयोगो लक्ष्यते । तदुक्तं प्राक्--

`लिङ्गेषु लिङ्गमेव व्यवस्थितम्'

इति ।। 7 ।।

`असत्तु मृगतृष्णावत्' (M.Bha.II.p.196,1.21)

इत्यचेतनानां लिङ्गमवस्थापयितुं भाष्येऽभिहितं व्याचष्टे ।

यथा सलिलनिर्भासा मृगतृष्णासु जायते ।

जलोपलब्ध्यनुगुणाद् बीजाद् बुद्धिर्जलेऽसति ।। 8 ।।

तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु ।

मुख्येभ्य इव लिङ्गेभ्यो भेदा लोके व्यवस्थिताः ।। 9 ।।

मृगतृष्णा मरुचरीचिकाः प्रसिद्धाः । ता हि तरङ्गायमाणा मृगाणां तत्तुल्यानां मुग्धानां च पिपासामुपजनयन्ति । दिनकरकरनिकराः प्रसर्पन्तोनभोदेशमूर्ध्वाधरभावेन समाक्रामन्तस्तरङ्गाकारप्रत्ययमुपदधति पिपासूनाम् । अत एव तृष्णाकृताद् भावनावेशादुदकत्वेन प्रतिभासमानास्तृष्णाशब्देनोच्यन्ते । यथा ह्युदकवासनालक्षणाद् बीजाद् असति अपि तत्र जले सन्तापसन्धुक्षितानां पिपासूनां जलाकारावनग्राहिणी बुद्धिः उपजायते, एवमेव तारका पुष्पो नक्षत्रमित्येवमादिष्वचेतनेषु बहिरविद्यमानेभ्य एव लिङ्गेभ्योऽत एवाविद्यमानत्वादेव अव्यपदेश्येभ्यो लोके तारकादिशब्दैर्भेदाः प्रतिनियतलिङ्गानुगताः प्रकाश्यन्ते यता बहिर्विद्यमानलिङ्गनिमित्ताः । अन्यत्राभ्यस्तोदकमावनावदिहाप्यन्यत्राभ्यस्तत्वात् स्त्रीत्वाद्यसदध्यारोपितं प्रतीयत इति दृष्टान्तसाम्यम् । व्यञ्जकाभावश्चात्र बाधकं प्रमाणम् । अयमर्थः । शब्दानां शक्तिनियमादसदपि बाह्ये रूपमभिधातुं न व्याघातः, सदृशश्च सदसतोस्ततः प्रत्ययः प्ररूढः । शब्दो हि सम्यङ्मिथ्याज्ञानावेदितमर्थमविशेषेणाभिधत्ते । मरुमरीचिषूदकं सादृश्यादध्यारोप्यते, न त्वेवं खट्वावृक्षयोः स्त्रीपुंसाभिव्यञ्जकसदृशं किञ्चिद् दृश्यते इत्याशङ्क्य विषयसादृश्यमनपेक्ष्याप्यनादिमिथ्याभ्यासवासनावशाद् भ्रान्तयो भवन्तीति निदर्शनान्तरमुक्तं

`गन्धर्वनगरं यथा' (M.Bha.II,p.196,1,24.)

इति ।। 8,9 ।।

अतोऽनन्तरमिदमुक्तं भाष्ये

"आदित्यगतिवत् सन्न"(M.Bha.II.p.197.1.1)

`वस्त्रान्तर्हितवच्च तत्' (M.Bha.II.p.197.1.4.)

इति । एतद् व्याचष्टे ।

व्यक्तेषु व्यक्तरूपाणां स्तनादीनां तु दर्शनात् ।

अव्यक्तव्यञ्जनाव्यक्तेर्जातिर्न परिकल्प्यते ।। 10 ।।

व्यक्तेषु चेतनगतेषु लिङ्गेषु स्तनकेशादीनां तदुपव्यञ्जनानां स्पष्टरूपाणामुपलम्भादचेतनेषु खट्वादिष्वनभिव्यक्तव्यञ्जना लिङ्गजातिः न परिकल्प्यते न व्यवस्थाप्यते । सर्वथैव अव्यक्तेः अप्रतीतेः । यत् किल प्रमाणेन प्रतीयते तदवस्थापनमर्हति । यथादित्यगतिर्देशान्तरप्राप्त्यानुमीयते । वस्त्रान्तर्हितं च वस्तु वस्त्रापाये व्यवधाननिवृत्तेः साक्षाद् गृह्यते । नैवं लिङ्गजातिर्वृक्षादिषु कदाचनाप्युपलभ्यत इत्यसती शब्देन परं स्वशक्तिवशात् प्रत्याय्यते । तथा च भाष्यम्--

"येऽप्येते रथकारा वासीवृक्षादनहस्ताः".....

(M.Bha.II.p.197,1.7)

इत्यादि । प्रमाणसिद्धस्य ह्यनुलपब्धिहेतवः

`अतिदूरात् सामीप्यादिन्द्रियङ्घातान्मनोऽनवस्थानात्' (San.Ka.7)

इत्यादिनोक्ताः । न चेह लिङ्गं प्रमाणसिद्धं किञ्चनापि वस्तु सत्यभूतं वस्तुधर्मः ।। 10 ।।

एवमपि सत्त्वाभ्युपगमे प्रत्यक्षणे विरुध्यत इत्युक्तं भाष्ये ।

अस्तित्वं च प्रतिज्ञाय सदादर्शनमिच्छतः ।

अत्यन्तादर्शने न स्यादसत्त्वं प्रति निश्चयः ।। 11 ।।

खट्वावृक्षादौ लिङ्गस्य सत्त्वमभ्युपगम्य व्यञ्जकानामनुपलब्धेर्नित्यमनुपलब्धिमभ्युपगच्छतो वादिनो दृश्यानुपलब्धिरप्रमाणभूताभावं प्रति स्यादित्यभावे शशविषाणादौ सत्त्वसन्देहप्रसङ्गः । तत्रापि अत्यन्तादर्शने सत्यसत्त्विनिश्चयो न स्यात् । यतस्तत्राप्येतच्छक्यते वक्तुम्---`अस्ति तत्, इन्द्रियदौर्बल्यासु न दृश्यते' इति । तदयं प्रत्यक्षविरोधो यद् दृश्यस्वभावस्य प्रत्यक्षेण कदाचिदप्यगृह्यमाणस्य सत्ताभ्युपगमः ।। 11 ।।

लिङ्गकार्यस्य खट्वावृक्षादौ टाबादेर्दर्शनाल्लिङ्गानुमानमित्युक्तम् --

`तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः' (M.Bha.II.p.197 1.12)

इति । आकाशः प्रकाशः, तेन यथा तत्कारणस्य जोतिषोऽनुमानं तथा लिङ्गकार्येण लिङ्गस्येति । एतद् दूषितम् --

`अन्योन्यसंश्रयं त्वेतद्' (M.Bha.II,p.197,1.16.)

इति । तद् व्याचष्टे

न चालमनुमानाय शब्दोऽदर्शनपूर्वकः ।

सिद्धे हि दर्शने किं स्यादनुमानप्रयोजनम् ।। 12 ।।

इह सिद्धस्यार्थस्य स्त्रियां पुंसि नपुंसक इत्यनुवादः शब्दसंस्कारार्थः । तथा च यदि वृक्षादौ लिङ्गस्यास्ति प्रमाणात् सिद्धिस्तदा शब्दात् तदनुमानं व्यर्थम् । अथ नास्ति तदा प्रत्ययादे कार्यस्य विधीयमानस्य निमित्तत्त्वेनोपादानमप्रमाणकमनुपपन्नमित्यन्यतोऽनवगतस्य शब्दादेव प्रतीत्यभ्युपगमेऽन्योन्यसंश्रयमेतद् इतरेतराश्रयदूषणदुष्टमित्यर्थः । लिङ्गासिद्धौ निमित्तत्वेनोपादानायोगात् तन्निबन्धनस्य शब्दस्याभावात् तेन तत्सिद्धेरयोगात् । तदेवं लौकिकं लिङ्गमचेतनेष्वव्याप्तमुपेक्ष्य

`संस्त्यानप्रसवौ लिङ्गमास्थेयौ' (M.Bha.II,p.197.1.27)

इति पारिभाषिकं भाष्ये लिङ्गमुक्तम् । तथा चाह --

"संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान्' (M.Bha.II.p.198,1.1.)

इति । संस्त्यानं संहननं प्रतिलयस्तिरोभावोऽपचयो रूपादीनां सत्त्वादिमयानां गुणानां स्त्री । लोके तु स्त्यायति संहननमापद्यतेऽस्यां गर्भ इत्याधिकरणं स्त्री । सूतेर्धातोर्भावे प्रचये उपचये डुमसुन्प्रत्यये परतः सकारस्य परापादेशे कृते पुमानिति । यदाह `सप्' इति । सकारस्य पकारादेशे कृते पुमानिति । यदाह `सप्' इति । सकारस्य पकारादेश इत्यर्थः । अनेन च प्रकारेण पातेरेव सूत्यर्थे वृत्तिं सूचयति । अत एव प्रत्ययं नोपन्यस्यति । पातेर्डुमसुन् इत्येवं तस्य प्रसिद्धेः । अर्थानां च प्रसिद्धानामेव शास्त्रेऽनुवादाद् रूढ्यर्थबाधा विज्ञायते । तेन प्रसवः प्रवृत्तिराविर्भावो गुणानां शास्त्रे पुमान् । लोके तु पाति सन्ततिमिति पुमान् कर्ता । यद्यपि चाविर्भावतिरोभावावपि लौकिकावेव, लोकप्रसिद्धस्यैव शास्त्रेऽनुवादोपपत्तेः, तथापि प्रसिद्धतरस्तनादिसंबन्धो लौकिकस्त्यज्यते, अव्याप्तेः ।

"सर्वाश्च पुनर्मूर्तय एवमात्मिका शब्दस्पर्शरूपरसगन्धवत्यः"

(M.Bha.II,p.198,1.5.)

इति । संस्त्यानप्रसवयोर्लिङ्गयोर्व्याप्तिरुपपादिता । तथा चाचेतनेष्वपि सिद्धिः । मूर्तिशब्देन हि वस्तुमात्रं लक्षितम् । आकाशादीनामपि चास्मिन् दर्शने सत्त्वादिगुणत्रयमयत्वादाविर्भावतिरोभावयोरपि प्रतिपत्तिः । चैतन्यम् - आत्मा - चिद् इति

नित्यभूतेऽप्यात्मनि देहाश्रयत्वेन गुणमध्यव्यवस्थितत्वात् तद्धर्माविर्भावतिरोभावोपपत्तिः । तदेवं
"न शक्यं वैयाकरणैर्लौकिकं लिङ्गमाश्रयितुम्, अवश्यं कश्चित् स्वकृतान्त आस्थेयः "(M.Bha.II.p.197,1.25)
इति संस्त्यानप्रसवौ लिङ्गं स्त्रीपुंसलक्षणमुक्तम् । उभयधर्मसामान्यरूपा तु स्थितिर्नपुंसकमर्थादुक्तं भवति ।। 12 ।।
तथाहि भाष्यतात्पर्यं व्याचष्टे ।
आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ।। 13 ।।
"वर्धते यावदनेन वर्धितव्यम्, अपायेन वा युज्यते"
(M.Bha.II.p.198.1.8)
इति भावानां सततपरिणामित्वाद् धर्मत्रयस्यानपायित्वम् ।। 13 ।।
तथा हि
सर्वमूर्त्यात्मभूतानां शब्दादीनां गुणे गुणे ।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थिताः ।। 14 ।।
"सर्वाश्च पुनर्मूर्तय एवमात्मिकाः शब्दस्पर्शरूपरसगन्धवत्यो यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः रसगन्धौ न
सर्वत्र"(M.Bha.II.p.198.1.5)
इति भाष्यकारेणैव सर्वाभावात्मकत्वं शब्दादीनाम् उक्तम् । शब्दादिगुणसमुदायात्मका हि मूर्ताः पदार्थाः ।
एकैकगुणोत्कर्षेणाकाशादिषु पृथिव्यन्तेषु शब्दादयः पञ्चगुणाः समुदायभावमापद्यन्त इति शब्दादिगुणात्मिका मूर्तयः ।
व्यतिरेकेऽपि द्रव्यस्य समवायवशात् तदात्मकत्वमिव । तत्र शब्दः स्पर्शो रूपमिति गुणत्रयमव्यभिचारि । रसगन्धौ तु
तेजस्यभावाद् व्यभिचारिणौ । ते च शब्दादयः सत्वरजस्तमोलक्षणगुणमया इति गुणे गुणे शब्दादौ सत्त्वादिगुणत्र्यधर्मा
व्यवस्थिताः । सर्वस्य सत्त्वादिसंनिवेषमात्ररूपत्वाद् वीप्सया गुणधर्माविनाभाव उक्तः । तत्र प्रकाशः प्रसव आविर्भावः
सत्त्वधर्मः, प्रवृत्तिः क्रिया रजोधर्मः , वरणं तिरोभावः स्थितिः तमोधर्मः एत एव धर्मा लिङ्गम् । तथा हि-
आविर्भावःप्रकाशनियमरूपसत्त्वतमोधर्मानुगत प्रवृत्तेः क्रियाया रजोधर्मलक्षणाया विशेषः पुंस्त्वम् । एवं तिरोभावः स्त्रीत्वम् ।
सामान्यरूपा तु प्रवृत्तिः तमोबहुला स्थितिर्नपुंसकम् । इति लिङ्गत्रयं सार्वत्रिकम् ।। 14 ।।
भवतु रूपादिसमुदायात्मनो वस्तुनो धर्मत्रययोगः । रूपं रसः शब्द इत्यादि तु कथम् । न हि रूपादीनां केवलानां
रूपाद्यन्तराभावात् कस्यचिदाविर्भावादयः सन्ति येन लिङ्गयोगः स्यादित्याशङ्क्याह ।
रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणं ।
काचित् प्रलीयते काचित् कथञ्चिदभिवर्धते ।। 15 ।।
रूपमवस्थाविशेषासादनक्रमेण परिणमते । तस्यापि सत्त्वादिगुणात्मकत्वात् । यथोक्तं
शब्दादीनां गुणे गुणे ।
त्रयः सत्त्वादिधर्मा..... (Verse 14.)
इति , तथा च क्षणे क्षणे व्यतिरेकिणामात्ममात्राणामवस्थाविशेषाणां नवनवानामासादनात् कदाचिदवस्थाविर्भवति । काचित्
केनचित् प्रकारेण बाह्यनिमित्तोपधानवशेन प्रलीयते अपचीयत इत्याविर्भावतिरोप्भावावनुयायिनौ । पुरुषार्थं हि
परिणामिनागुणानां प्रतिकलमवस्थाविशेषो भावतत्त्वदृगवसेयः सौक्ष्म्यात् स्थूलदृग्भिर्नावधार्यते । यथोक्तं
कलानां पृथगर्थनां प्रतिभेदः क्षणे क्षणे ।
विद्यते सर्वभावेषु सौक्ष्म्यात् तु न विभाव्यते ।। इति । प्रतिकलमन्तरा परिणामाभावे झटिति
स्थूलविशेषासादनानुपपत्तेरन्त्यविशेषदर्शनादनुमीयत एव सूक्ष्मपरिणामः । तथाहि--फलादीनां
पूर्वपूर्वश्यामादिरूपापगमेऽभिनवरक्तादिरूपोत्पत्तौ परिपाण्डुरूपावसानसमयप्रभवपरिपाकाविर्भावः । एवं रसादीनामपि
प्रतिकलमवस्थाविशेषः परिणामपरम्परासादनेन स्वादिष्ठादिपरिणामावसानः ।। 15 ।।

अत्रैवार्थे भाष्यकारीयं संवादमाह ।
क्वथितोदकवच्चैषामनवस्थितवृत्तिता ।
अजस्रं सर्वभावानां भाष्य एवोपवर्णिता ।। 16 ।।
"नेह कश्चित् स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते वर्धते यावदनेन वर्धितव्यमपायेन वा युज्यते" (M.Bha.II.p.198,1.8.)
इति भाष्ये पच्यमानजललवसदृक्षा चञ्चलता मूर्तीनामाख्याता । तथा चाविर्भावतिरोभावयोर्यापकत्वात् सर्वत्र
स्त्रीपुंसलिङ्गयोगः ।। 16 ।।
यद्येवं स्थितेः कोऽवसरो यन्नपुंसकं स्यादित्यत आह ।
प्रवृत्तेरेकरूपत्वं साम्यं वा स्थितिरुच्यते ।
आविर्भावतिरोभावप्रवृत्त्या वावतिष्ठते ।। 17 ।।
उपचायपचयलक्षणे द्वे अवस्थे पदार्थानाम् । तत्रोपचयप्रवाहे या वृद्ध्याख्या प्रवृत्तिस्तस्या अभेदेनाध्यवसायात्
स्थितिर्व्यवस्थाप्यते । एवमपचयप्रवाहे यापायलक्षणा प्रवृत्तिस्तस्या अभेदमध्यवसाय स्थितिः कल्प्यते । प्रतिकलं प्रवाहयोर्भेदे वा
प्रवृत्तिरूप साम्यात् स्थितिः । वृद्धिपरिणामेऽपायपरिणामे च प्रवृत्तिरूपं तुल्यमिति तदेव साम्यं स्थितिः । यद्वा
आविर्भावतिरोभावर्योर्या निरन्तरा प्रवृत्तिस्तया हेतुभूतया स्थितिरव कल्पते । तथाहि-कस्याश्चित् कसायास्तिरोधानानन्तरमेव
यदा कलान्तराविर्भावः तदा तिरोधानस्यानिष्ठितत्वात् स्थितिरेवावसीयते । तदेवं सततपरिणामिनां गुणानामध्यवसायवशेन
स्वभावैक्यं साम्यं तिरोभावापर्यवसानं वेति प्रकारत्रयेण स्तितिरिह निरूपिता ।। 17 ।।
यद्वा किमध्यवसायापेक्षया, वस्तुरूपैव स्थितिरित्याह ।
गुणा इत्येव बुद्धेर्वा निमित्तत्वं स्थितिर्मता ।
स्थितेश्च सर्वलिङ्गानां सर्वनामत्वमुच्यते ।। 18 ।।
इह सत्त्वादयो गुणा वैश्वरूप्यमापद्यमाना स्वजात्यनतिक्रमेणैव वर्तन्ते । तथा हि प्रतिकलं प्रकाशप्रवृत्तिनियमाना
सत्त्वादिधर्माणामनुवृत्तिः । इत्थं च गुणाः सामान्यानुगमादन्वयिप्रत्ययस्य सर्वास्ववस्थास्वेते गुणा इत्यस्य हेतवो भवन्तः
स्थितिलिङ्गतामासादयन्ति । सामान्यं हि गुणरूपं स्थितिः । तत्र च सामान्ये सर्वविशेषान्तर्भावादाविर्भावतिरोभावयोरपि
तदनुगमात् स्त्रीत्वादिलिङ्गभेदस्य नपुंसकलिङ्गं स्थितिशब्दवाच्यं सर्वनामेव सर्वनाम व्यवह्रियते । यथा हि तदादि सर्वनाम
वस्तुमात्रप्रत्यवमर्शजनकमविहितप्रवृत्ति सर्वत्र तथा नपुंसकमपि विशेषाविवक्षायामभेदेन सर्वलिङ्गपरामर्शकं किं
जातमित्यादावव्यक्ते गुणसन्देहे प्रयोगार्हमिति ।। 18 ।।
तदेवं गुणावस्था लिङ्गमिति निर्णीते सर्वत्र तस्याः सम्भवात्
`कुतो व्यवस्था' (M.Bha.II,p.198.1.9.)
इति भाष्ये चोदयित्वा
विवक्षातः (M.Bha.II,p.198.1.10.)
व्यवस्थेत्युक्तम् । तद् व्याख्यातुमाह ।
स्थितेषु सर्वलिङ्गेषु विवक्षानियमाश्रयः ।
कस्यचिच्छब्दसंस्कारे व्यापारः क्वचिदिष्यते ।। 19 ।।
सत्त्वादिगुणत्रयमयेषु सर्वभावेष्वाविर्भावादिरूपसम्भवेऽपि योग्यशब्दनिबन्धनविवक्षानियमाश्रयेम कस्यचिद् एव लिङ्गभेदस्य
कस्मिंश्चिच्छब्दे संस्कारार्थं व्यापारः स्त्रियां पुंसि नपुंसके चेत्येवमुपात्तः । शब्दशक्तिनियमाद्धि नियतलिङ्गोपाधेरर्थस्याभिधानम्
। प्रयुक्तानां चेदमन्वाख्यानमिति व्यवस्था सिद्धा ।। 19 ।।
दृष्टान्तेनैतत् साधयति ।
सन्निधाने निमित्तानां किञ्चिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ।। 20 ।।

वस्तुन्यनेकनिमित्तसन्निधानेऽपि शब्दानां स्वशक्तिवैचित्र्यात् किंचिदेव तत्र प्रवर्तकम् । तद्यथा तक्षणच्छेदनाद्यनेकक्रियासन्निधावपि तक्षणमाश्रित्य तक्षायमित्यभिधानमर्थस्य । शरावादिकरणेऽपि कुम्भकरणनिमित्तः कुम्भकारशब्दः । एवं स्त्रीत्वादिविशिष्टेष्वप्यर्थेषु शब्दानां लिङ्गनियमेन प्रवृत्तिरभिधानवैचित्र्यात् । तथाहि

`तस्योक्तौ लोकतो नाम' (M.Bha.II.p,198,1.11.)

इति लोकप्रसिद्धिर्नियतलिङ्गाभिद्योतनोपायः शब्दानामुक्तः ।। 20 ।।

स च न यः कश्चिल्लोकोऽत्र ग्राह्य इत्याह ।

भावतत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थितं ।

यद् यद् धर्मेऽङ्गतामेति लिङ्गं तत्तत् प्रचक्षते ।। 21 ।।

इह लोकशब्देन शिष्टा विवक्षिताः । तेषां च वस्तुपरमार्थसाक्षात्कारिता लक्षणम् । ते हि निरावरणख्यातयोऽभिधेयेषु समवेतं स्त्रीत्वादि लिङ्गमभ्युदये यद् यद् यस्य शब्दस्य साधनतामेति तत् तदेव तस्याचक्षते । अतश्च यल्लिङ्गस्य शब्दस्य धर्मसाधनत्वं शिष्टैरुपलब्धं तस्य तथाभूतस्यैव प्रसिद्धस्य सतः साधुत्वमभ्युपगन्तव्यम् । तथा च प्रयोक्त्री विवक्षात्र न लौकिकी स्वेच्छारूपेत्युक्तं भवति । अत एव शिष्टसमाचारादेव सिद्धौ शब्दानां लिङ्गविशेषाभिद्योतनशक्तिप्रतिपादकं

`स नपुंसकम्' (P.2.4.17)

इत्येवमादि शास्त्रं प्रत्याख्यातं

`लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य'

इति । शिष्टप्रसिद्धेश्चाविगीतप्रमाणभावायाः शब्देषु लिङ्गव्यवस्था न सङ्कीर्यते, यथायथं विषयभेदेन व्यवस्थानात् ।। 21 ।।

एतदेव निदर्शनोपक्रमं साधयति ।

स्वरभेदाद् यथा शब्दाः साधवो विषयान्तरे ।

लिङ्गभेदात् तथा सिद्धात् साधुत्वमनुगम्यते ।। 22 ।।

सूक्ष्मरूपस्योदात्तादेः स्वरस्य विशेषाद् यथा जातिरूपाभेदेऽपि शब्दा विषयविशेषाश्रयणेन प्रतिनियतसाधिमावलम्बिनः । तथा हि

`अक्षस्यादेवनस्य' (Phitsutra 35)

इति देवनाक्षव्यतिरेकिणोऽक्षशब्दस्याद्युदात्तत्वं देवनाक्षस्यान्तोदात्तत्वमित्याद्युदात्तः शकटाक्षादादेव साधुर्न देवनाक्षे, अन्तोदात्तश्च तत्रैव न शकटाक्षादाविति विषयान्तरगामितया प्रतिनियतं साधुत्वं शब्दशक्तिनियमाच्छिष्टपरिदृष्टाद्, एवं शिष्टप्रयोगादेव सिद्धात् निश्चितलिङ्गनानात्वात् साधुत्वम् अनपभ्रंशत्वं विषयविभागेन शब्दानामवस्थितम् अनुगम्यते व्यवहारे । तथा हि समप्रविभागेऽर्दशब्दो नपुंसकलिङ्गः पिप्पल्या अर्धमर्धपिप्पलीति । एकदेशमात्रे तु पुल्लिंगः सारशब्दो न्यायादनपेते नपुंसकलिंगः नैतत् सारममिति । उत्कर्षे पुंल्लिगः, चन्दनसारः खदिरसारः ।

"पद्मशङ्खौ निधौ पुंसि स्थितौ पुंसि च तोयजे ।"

इत्याद्युदाहार्यम् ।। 22 ।।

यद्येवं स्वरसंस्कारनियमो यथा शिष्टप्रसिद्धः शास्त्रेऽनुमीयते तथा लिङ्गनियमोऽपि कस्मान्नातुविधीयते येन प्रत्याख्यात इत्यत आह ।

प्रयोगो विप्रयोगश्च लोके यत्रोपलभ्यते ।

शास्त्रमारभ्यते तत्र न प्रयोगाविपर्यये ।। 23 ।।

अक्षीणि मे दर्शनीयानि, पादा मे सुकुमारतरा इति विपरीतस्यापि प्रयोगस्य लोके दर्शनाद्

`बहुषु बहुवचनम्' (P.1.4.21.)

इत्यादि शास्त्रमारभ्यते विप्रयोगनिवृत्त्यर्थम् । यत्र तु विपरीतः प्रयोगो न दृश्यते किं तत्र शास्त्रेणस, नियमार्थत्वाच्छास्त्रस्यानियमे नियमप्रवृत्तेर्व्यवच्छेद्याभावे तदप्रवर्तनात् । तथा च

`ते प्राग्धातोः; (P.1.4.80.)
`उपसर्जनं पूर्वम्' (P.2.2.30)
इत्येतद्
`न वानिष्टादर्शनात्' (Va.2.on P.2.2.30)
इति प्रत्याख्यातम् । एवं
`लिङ्गमशिष्यम्' (M.Bha.II.p,198,1.16)
इत्यपि । तदेवं शब्दशक्त्यनुसारेण शिष्टप्रयोगान्नियतलिङ्गाः सिद्धा इति शब्दधर्मस्तात्पर्यदृशा लिङ्गमवतिष्ठते, वस्तुधर्मस्य नियतस्य शब्दैरावेदनात् । तथा च वार्त्तिकम् ---
"एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्, अपयवान्यत्वाच्च ।"
(Va.6.7 on P.4.1.92)
इति ।। 23 ।।
तदेतद् गुणावस्था लिङ्गमित्यस्मिन् मते कथमुपपद्यते इति व्याचष्टे ।
उपाधिभेदादर्थेषु गुणधर्मस्य कस्यचित् ।
निमित्तभावः साधुत्वे विवक्षा च व्यवस्थिता ।। 24 ।।
गुणानां सत्त्वादिमयानां शब्दादीनां धर्मो लिङ्गम् । सत्त्वादयो हि प्रधानशब्दवाच्याः सूक्ष्मतमा गुणा व्यवहारं न साक्षादवतरन्तीति तत्परिणामरूपाणां रूपादीनामाविर्भावाद्यवस्थारूपं लिङ्गमाख्यातं भाष्ये । तस्य लिङ्गस्य वस्तुष्ववस्थितस्यावच्छेदकत्वेन कस्यचिदेवान्वाख्यानहेतुत्वं व्यवस्थितम् । प्रतिनियतस्य शब्दस्य तत्र नियता विवक्षा । तथा हि यत्र शब्दान्यत्वं तत्र लिंगनियमः । तद् यथा पुष्यस्तारका नक्षत्रमिति । असति तु शब्दान्यत्वे तस्यैवावयवान्यत्वाद् अर्थेषु लिङ्गभेदाः शब्दैः प्रकाश्यन्ते । तदयमुपाधेरवच्छेदकस्य वस्तुगतस्य वक्ष्यमाणस्य महत्त्वादेर्भेदादन्यथात्वात् त्रिष्वपि लिङ्गेषु वस्तुगतेषु गुणावस्थारूपेषु कस्यचित् प्रतिनियतस्य समाश्रयणमिति वाक्यकारेणाप्युक्तम् ।। 24 ।।
अत्रैव निदर्शनमाह ।
हिमारण्ये महत्त्वेन युक्ते स्त्रीत्वमवस्थितम् ।
ह्रस्वोपाधिविशिष्टाया कुट्याः प्रसवयोगिता ।। 25 ।।
महत्त्वलक्षणेनोपाधिना संबद्धयोर्हिमारण्ययोः स्त्रीत्वं संस्त्यानं समवेतम् । महद्धिमं हिमानी, महदरण्यमरण्यानीति । तथा ह्रस्वत्वलक्षणेनोपाधिनावच्छिन्नायाः कुट्याः प्रसवेन पुस्त्वेन संबन्धः । कुटी चोपलक्षणमेकयोगनिर्दिष्टयोः शमीशुण्डयोरपि । ह्रस्वा कुटी कुटीरः, शमी शमीरः, शुण्डा शुण्डारः । स्वार्थिकश्चायं ग्रत्यय इति सर्व एव शब्दोऽवयवान्यत्वाद् भिन्नलिङ्गः । एवं दुष्टो यवो यवानीत्यादि रूदाहार्यः ।। 25 ।।
ननु चोपादिभेदमात्तात् कथं स एव शब्दो लिङ्गान्तरयोगी स्यादित्याशङ्क्याह ।
शब्दान्तराणां भिन्नेऽर्थ उपायाः प्रतिपत्तये ।
एकतामिव निश्चित्य लघ्वर्थमुपदर्शिताः ।। 26 ।।
इह लघुनोपायेन शब्दानामनुशासनम् । तत्र च
"यावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदयमुपदिशति"
(M.Bha.I.p.113,1.10)
इत्युक्तत्वाद् हिमादिशब्दसामान्यमाश्रित्यार्थान्तरविषयशब्दान्तरानुशासनं क्रियते हिमानी कुटीर इत्यादि । एवं हि लाघवं सम्पद्यते । अन्यथा प्रतिविशेषं विशिष्टेऽनुशासने महद् गौरवं स्यात् । एवमपि चानुशासनेनाभेदोऽर्थबेदादन्यत्वमेव शब्दानां भाविकमिति प्रतिनियतलिङ्गा विलक्षणा एव शब्दा यथास्वमर्थविशेषनियता न त्ववयवापचयः । लध्वर्थम् इति ।

लाधवार्थमित्यर्थः । वृत्तिविषये भावप्रधानो लघुशब्दः, गुरुलाघवमिति यथा । तदित्थमनेन

`एकार्थे शब्दान्यत्वम् '

इत्यादिना

`लिङ्गमशिष्यम्'

इति च प्रत्याख्यानेन शब्दशक्तिभेदोपवर्णनतात्पर्यरूपेण गुणावस्था सर्वत्र सम्भविनी लिङ्गमिति सूचितं भवति । वाक्यकारस्यापीदमेव दर्शनमिति वार्तिकोन्मेषे कथितमस्माभिः ।। 26 ।।

मतान्तरेण संस्त्यानप्रसवादि लक्षयति ।

उत्पत्तिः प्रसवोऽन्येषां नाशः संस्त्यानमित्यपि ।

आत्मरूपं तु भावानां स्थितिरित्यपदिश्यते ।। 27 ।।

पूर्वं सांख्यदर्शनाश्रयेम संस्त्यानादि विभक्तम् । इदानीं वैशेषिकादिनयेनयेनोच्यते । उत्पत्तिः अपूर्वावयवोपजनः प्रसवः पुंस्त्वम् । पूर्वदर्शने तु स एवाविर्भाव इति विशेषः । संस्त्यानं संहननमवयवानामपचयो निरन्वयो विनाशः स्त्रीत्वम् । पूर्वं तु तिरोभावमात्रमुक्तम् । नित्यानामनित्यानां च बावानामनौपाधिकं निजं तत्त्वं स्थितिः नपुंसकम् । तत्र नित्यानां चैतन्यमाकाशमिति शरीराद्युपाधिसंसर्गे तु यथा पूर्वमाविर्भातिरोभावावुक्तौ तथात्रापि पक्षे चैतन्यस्यौत्पत्तिविनाशौ व्याख्येयौ पुरुषश्चितिरिति । एवमाकाशस्यापि संयोगिधर्मोपचारात् प्रसवयोगः । अनित्यानामपि सर्वावस्थास्वनुवर्तमानमेकत्वेन प्रत्यभिज्ञायमानं स्वरूपं स्थितिः नपुंसकं तत्त्वमिति व्यवहारात् प्रसवः प्रसूतिः प्रसवनं, संस्त्यायः संस्त्या संस्त्यानमित्यत्र प्रसवादीनामन्येषामबावान्मृगतृष्णावच् कल्पितं लिङ्गम् ।

बुद्ध्या कल्पितरूपेषु लिङ्गेष्वपि च संभवः ।

स्त्रीत्वादीनाम्.....(Verse 7.)

इति वा निर्णीतमेतत् । तथा हि -- प्रकृतिः स्वरूपेणाभिधत्ते वस्तु । प्रत्ययस्तु यथायथं स्त्रीत्वादिलिङ्गयुक्तमाहेत्यवास्तवत्वेऽपि शब्दप्रकल्पितोऽत्र भेदः प्रकृतिप्रत्ययाभ्यां लिङ्गस्य स्वरूपेण विशेषणत्वेन च प्रतिपादनात् । अत एव

`भावस्य च भावयुक्तत्वाद्' (Va.7,M.Bha.II p.2001.7,)

इत्युक्तम् भाष्यमपि स्त्रीत्वेन युज्यत इति । एवञ्जातिर्विनाश इति विनाशोपजनायोगेऽप्यर्थस्य लिङ्गयोगः शाब्दः । तथाभिव्यक्तिदर्शनेऽभिव्यङ्ग्यः अभिव्यक्तिरभिव्यञ्जनमिति शपब्दप्रमाणको लिङ्गभेदो `भावस्य च भावयुक्तत्वाद् इत्यत्र वार्तिकोन्मेषे विस्तरेण यथातत्त्वमाभिर्व्याख्यात इति तत एवावधार्यम् । गतमेतत् ।। 27 ।।

इदानीं `शब्दोपजनितोऽर्थात्मा लिङ्गम् इत्येतद्दर्शनं मतान्तरेणावस्थापयितुमाह ।

इष्टं निमित्तं केषाञ्चिज्जात्यादिवदवस्थितम् ।

दृष्टवच्छब्दसंस्कारमात्रं तु परिकल्पितम् ।। 28 ।।

केषाञ्चिच्चेतनानामर्थानां समवेतमुपलब्धमेव स्तनकेशादि निमित्तं स्त्र्याद्याकारस्य प्रत्ययस्य । तथा हि तत्र प्रतिनियता जातिः समवेतोपलब्धा । तथा स्तनाद्युपव्यञ्जनमपि लिङ्गानाम् । अन्यत्र तु तारकादौ तद्दर्शनाभ्यासात् सत्त्वमवगम्य कल्पितं लिङ्गं शब्दात् सत्त्ववचनात् तारका पुष्ये नक्षत्रमिति । प्रतीतेः शब्दसंस्कारमात्रसतत्त्वमन्वाख्याने समाश्रितम् । एतत् पुनर्

`अन्योन्यसंश्रयं त्वेतद्'

इति पूर्वदूषितमिहान्यथोपन्यस्तम् । प्रयोगात् किलावसितस्य लिङ्गस्य चेतनविषयादन्यत्र समारोपाच्छब्दसंस्कारहेतुत्वमात्रं न तु वास्तवरूपतेत्यनेनापि नयेन व्याप्तिसिद्दिरित्यर्थः ।। 28 ।।

अत्रैव निदर्शनमाह ।

यथा प्रसिद्धेऽप्येकत्वे नानात्वाभिनिवेशिनः ।

नानात्वं जनयन्तीव शब्दा लिङ्गेऽपि स क्रमः ।। 29 ।।

निश्चितेऽपि वस्तुन एकत्वे दाराः आपः गृहाः सिकताः इत्यादयः शब्दा धर्मभेदाश्रयबहुत्ववृत्तयस्तत्र बहुत्वं जनयन्तीव तथा व्यवसायजननात्, न तु परमार्थता, तथा लङ्गेऽपि स्त्रीत्वादौ स क्रमः परिपाटिः । बहिरसतोऽपि तस्य तारकादौ प्रकाशनात् ।। 29 ।।

एवञ्च कृत्वा `शब्दसंस्कारो लिङ्गम्' इत्यन्तिममेव दर्शनं प्रमाणभूतमभ्युपगच्छति ।
इदं वेयमयं वेति शब्दसंस्कारमात्रकम् ।
निमित्तदर्शनादर्थे कैश्चित् सर्वत्र वर्ण्यते ।। 30 ।।

इदं वस्तु, इयं व्यक्तिरयमर्थ इति त्रिलिङ्गानां शब्दानां सर्वत्र वस्तुमात्रे बहिर्निमित्तानपेक्षा प्रवृत्तिर्न व्याहन्यत इति अस्मान्निमित्तदर्शनाच्छब्दान्वाख्यानमात्रं लिङ्गमभ्युपगन्तव्यम् । बाह्येऽर्थे तस्य लौकिके रूपानवधारणाच्छास्त्रसमयान्तः पातिनः परमुपकल्पयन्ति । शब्दार्थोऽर्थ इति दर्शनाद् बहीरूपत्वेनाध्यवसायात् युवत्यादिभ्योऽविशेषसम्प्रत्ययो न विरुध्यते । बहिः सदसत्तानपेक्षणाच्च शब्दार्थस्यानुशासनाङ्गस्य
`स्त्रियाम्' (P.4.1.3.)
इत्यादेरविशेषेण लिङ्गप्रत्ययविषयमात्रेऽनुगमः । युवतिः ख्टवेत्यादौ स्त्रीप्रत्ययस्यासदाकारस्य वा सदाकारस्य वाविशेषात् । वास्तवे तु शब्दान्वाख्याननिमित्तेऽङ्गीक्रियमाणे राहोः शिरः, स्वस्य स्वभावः इत्यादौ व्यतिरेकविभक्तिः कथम् । तस्मादसतोऽपि बाह्यत्वेनावसितस्य लिङ्गस्यान्वाख्याननिमित्तत्वम् । अत एव
`टाबृचि' (P.4.1.9.)
इति ऋचोऽभिधेयत्वेनोपादानं युक्तम् । तदत्र
`शब्दोपजनितोऽर्थात्मा'
इत्यस्माद् दर्शनात् सर्वत्रैव शब्दादवधृतस्य शास्त्रसाधुत्वनिमित्तभाव इत्ययं विशेषः । तत्र तु दर्शने विषयान्तरे भूयसा दृष्टस्यान्यत्र समारोपोऽभिमत इति दर्शनभेदः । कैश्चिद् इति वचनाद् ये गुणावस्थारूपं लिङ्गं वस्तूनां विवेकेन परिज्ञातुमशक्तास्तेषामिदं दर्शनमिति प्रतिपादयति । सति तु विवेककौशले यथाप्रविभक्तमेव लिङ्गं न्याय्यमितिध्वनयति ।। 30 ।।

बहिरगृह्यामाणस्य कथं शब्दसंस्कारनिमित्तत्वमिति चेदाह ।
नावश्यं विषयत्वेन निमित्तं व्यवतिष्ठते ।
इन्द्रियादि यथादृष्टं भेदहेतुस्तदिष्यते ।। 31 ।।

यदन्यस्यावच्छेदनिबन्धनं तन्नियोगतो ज्ञानगोचरतया नावतिष्ठते । यस्मात् तद् भेदहेतुरिष्यते अवच्छेदकमभ्युपगम्यते । अवच्छेदकं च नियमेन ग्रहणगोचरतां न भजते । तथा हि चक्षुरादीन्द्रियमगृह्यमाणस्य स्वज्ञानस्य यथायथं नियतविषयस्य विषयान्तरावच्छेदं विदधात्येव । एवं कारणं कार्यावच्छेदकमदृष्टमपि, इति लिङ्गस्यापि शब्दसंस्कारकार्यकारणस्यागृह्यमाणस्य स्वकार्यशब्दसंस्कारनिमित्तत्वमन्वाख्याने समुपादीयमानं युक्तमेव । चक्षुरादि इत्यादिग्रहणाद् राजपुरुष इत्यादौ वृत्तिशब्दे संबन्धस्यागृह्यमाणस्यापि भेदहेतुत्वं गृह्यते । तथाहि राजपुरुषो नीलोत्पलमित्यादिशब्दाः संबन्धनिमित्ततयान्वाख्याताः समासे सबन्धस्याप्रतीतावरि तदपरेभ्यो भिद्यमानं स्वार्थविशेषमर्पयन्ति । तथा व्यक्तौ पदार्थे जातेरप्रतीतावपि स्वाश्रयावच्छेदकत्वं येन गवादिशब्दैः प्रतिनियतमेव द्रव्यमभिधीयते । तथा चेदं बाह्यं निमित्तमगृह्यमाणमत्र सदृशं निदर्शनम् । इन्द्रियं त्वध्यात्ममगृह्यमाणत्वसाम्याद् दृष्टान्तः । तदेवं यथासम्भवं लिङ्गं विचारितम् । सिद्धान्तस्तु यथाभाष्यं गुणावस्थारूपं लिङ्गमित्यस्माभिर्वार्त्तिकोन्मेषे यथागमं व्याख्यातं तत एवावधार्यम् । गुणधर्मरूपे हि लिङ्गे धर्मशून्यस्य सर्वथैवाव्यवहार्यत्वाद्वस्तुष्वपि वस्तुत्वाभिमानाल्लौकिकानां लोकसम्प्रत्ययसमारूढस्यैव शब्दार्थत्वादात्मादीनां रूपादीनां तमश्छायाप्रभृतीनां च सर्वेषां लिङ्गयोग उपपन्नः । अभावशशविषाणादीनामपि वस्तुभूतोत्तरपदार्थाश्रयं लिङ्गं, न चान्यथा, भावोपाश्रयत्वादभावो व्यवह्रियत इति व्यापकमिदं संस्त्यानप्रसवौ स्थितिश्चेति लिङ्गत्रयं सिद्धान्तितमवगन्तव्यम् । इत्यन्तः पदसंस्कारनिमित्तभूताः पदार्थाः पर्यवसितविचाराः ।। 31 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे लिङ्गसमुद्देशस्त्रयोदशः ।।

Purushasamudesha

अथ पुरुषसमुद्देशः

तिङभिहितेन भावेन कालपुरुषोपग्रहसंख्या अभिव्यज्यन्ते इति स्थिते कालं परीक्ष्य पुरुषं परीक्षते ।

प्रत्यक्ता परभावश्चाप्युपाधी कर्तृकर्मणोः ।

तयोः श्रुतिविशेषेण वाचकौ मध्यमोत्तमौ ।। 1 ।।

प्रतिपुरुषं प्रतिनियतं वाञ्चति चेष्टत इति प्रत्यङ्, अन्तर्यामी जीवात्मा । स हि प्रतिदेहं नियतो वर्तते । तद्भाव उत्तमपुरुषवाच्योऽर्थः । अहङ्कारसमानाश्रयत्वं यदाख्यातात् प्रतीयते क्रियायाः स उत्तमपुरुषविषय इत्यर्थः । तथा चाहङ्काराश्रयस्य कर्तुस्तिङन्तवाच्यस्य कर्मणश्च स उपाधिभूतः प्रज्ञायते स्ववाचकादात्मनेपदपरस्मैपदरूपेण भिन्नात् । तद्यथा पचे पचामीति कर्त्रुपाधिरुत्तमविषयः पुरुषः । कर्मोपाधिस्त्वात्मनेपदादेव प्रतीयते , कर्मण्यात्मनेपदस्यैव भावात् पच्ये इति । तदयं कर्त्रादिसाधनविशेषणं पुरुष इत्युच्यते । मध्यमस्तु पुरुषः परत्वम् । मध्यमवाच्यः स हि कर्तृकर्मविशेषणभूतः प्रश्नादिविषयभावोपगमनयोग्यः स्वात्मनः परः स्ववाचकात् पूर्ववद् भिन्नात् प्रतीयते । तद्यथा । पचसि पचसे इति कर्त्रुपाधिः । कर्मोपाधिस्त्वात्मनेपदादेव पच्यस इति । तदेवं श्रुतिविशेषेण शब्दविशेषेणोपलक्षितौ मध्यमोत्तमौ यथायोगं स्वार्थमाचक्षाते । यः कर्तृकर्मविशेषणभूतः स पुरुष इति पूर्वाचार्याः प्राहुः । अत एव कर्तृकर्मविशेषणत्वात् पुरुषस्य भावविषयता नास्तीति तत्र लकारे मध्यमोत्तमयोरप्रयोगः । प्रथम एव शेषत्वात्तत्र प्रयुज्यते । प्रत्यक्तापरभावौ तु शब्दान्तरप्रयोगावसेयौ, आस्यते मया, शय्यते त्वया इति ।। 1 ।।

यदि प्रत्यक्ताहङ्कारेण समानाधिकरणता ततोऽन्या परभावेन समानाधिकरणता चानयोः पुरुषयोर्यथायोगं वाच्या तदा चेतनेष्वेवाहङ्कारपरभावयोरुपपत्तेरचेतनविषये शृणोत ग्रावाण' इत्यादावनयोः प्रयोगो न प्राप्नोतीत्याशङ्क्याह ।

सदसद्वापि चैतन्यमेताभ्यामेव गम्यते ।

चैतन्यभागे प्रथमः पुरुषो न तु वर्तते ।। 2 ।।

स्वपराधिष्ठानं चैतन्यं भाविकमध्यारोपितं वा आब्यामभिधीयते कर्तृकर्मोपांधिभूतम् ।

शब्दादवगम्यमानस्येहार्थस्यान्वाख्याननिमित्तत्वाच्छाब्दं चैतन्यं सर्वत्रास्ति । पदान्तरसंबन्धादनवधृतचैतन्यस्य तु समारोपकल्पना । यदि समारोपितचैतन्योऽप्यनयोर्विषयस्तदा प्रथमपुरुषस्य को विषय इत्यत आह चैतन्यभागे इत्यादि ।

अध्यारोपितचैतन्योऽपि प्रथमपुरुषस्य न विषयः । तस्य शेषे विधानात् । ततश्चानध्यारोपितचैतन्योऽचेतनोऽस्य विषयः `पतति कूलं' `शुष्यन्ति व्रीहय' इत्यादि । भागग्रहणं समानाधिकरणाभ्यां स्थानित्वोपाधिकाभ्यां युष्मदस्मद्भ्यां योऽन्यश्चेतनो विषयस्तत्र प्रथमस्य प्रवृत्तेः `भवान् पचति' `आस्यते त्वया' `शय्यते मया' इत्यत्रापि पदान्तरगम्यं चैतन्यमिति चैतन्यांशासंस्पर्शेन साध्यसाधनभावमात्रमवगमयति प्रथमः पुरुष इति युक्तम् । चैतन्यमात्मपरवर्ति द्वौ पुरुषावुत्तममध्यसौ, चैतन्यरहितत्वं प्रथमः पुरुष इत्यत्र तात्पर्यार्थः ।। 2 ।।

बुध्यते जानाति चेतयते इत्यादौ चैतन्योपाधेः कर्तुरवगमात् कथं चैतन्यभागे प्रथमः पुरुषो न प्रवर्तत इत्यत आह ।

बुधिजानातिचितिभिः प्रथमे पुरुषे सति ।

सज्ञानार्थैन चैतन्यस्योपयोगः प्रकाश्यते ।। 3 ।।

संवेदनार्थैर्बुध्यादिधातुभिर्ज्ञानलक्षणेन वार्थेन वाच्येन करणभूतेन बुध्यते इत्यादौ प्रथमपुरुषोत्पत्तौ सत्यामपि न चैतन्यस्य व्यापारो व्यज्यते । धात्वर्थो ह्यत्र चैतन्यलक्षणः । स च कर्तृकर्मणोरवच्छेदक इति तद्वशाच्चैतन्यप्रकाशो न तु प्रथमपुरुषप्रयोगात् । अन्यत्राज्ञानार्थधातुविषये प्रथमपुरुषान्नियमेन चैतन्यानभिव्यक्तेः । न हि यथा मध्यमोत्तमाभ्यां युष्मदस्मदर्थविषयतया विधानाच्चैतन्योपाधिकयोः कर्तृकर्मणोरवगतिस्तथा प्रथमात्, शेषे विधीयमानत्वेन चैतन्योपाधिनियमाभावात् । युष्मदि तु

विधीयमानो मध्यमो नियमेन चैतन्यमभिद्योतयति, युष्मदश्चेतनेष्वेव प्रयोगात् ।। 3 ।।
परभावे मध्यमे विधीयमाने मतान्तरेण विशेषमाह ।
संबोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते ।
तथा संबोधने सर्वां प्रथमां युष्मदो विदुः ।। 4 ।।
यत्र प्रैषो विवक्षितः तत्र क्रियासु विनियोगावस्थापनार्थं संबोधनमस्त्येव सर्वेषामपि मते । तद्यथा गच्छ भुङ्क्ष्व इत्येवमादौ । त्वं पचसीत्येवमादावपि तु प्रैषाभावे केचित् संबोधनमिच्छन्ति, ये आभिमुख्यकरणमात्रलक्षणं संबोधनमुपयन्ति । अतश्च युष्मदो विधीयमाना प्रथमापि सर्वैव वचनत्रयरूपापि संबोधनविभक्तिरेतेषां मते ।। 4 ।।
यद्येवं मध्यमप्रथमयोः सम्बोधनार्थत्वात् `स्वाहेन्द्रशत्रुर्वर्धस्व',`राजा भव युध्यस्व' इत्यादावपि मध्यमसमानाधिकरणं प्रथमान्तं पदं सम्बुद्ध्यन्तं स्यात् । नैवं दृश्यत इति कथमेतदित्याशङ्क्याह--
संबोधनं न लोकेऽस्ति विधातव्येन वस्तुना ।
स्वाहेन्द्रशत्रुर्वर्धस्व यथा राजा भवेति च ।। 5 ।।
`सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः' (Vak.III.सा.163)
इति साध्यस्य विधीयमानस्य सम्बोधनं नास्ति । न ह्यपूर्वोऽर्थ
उपदिश्यमानोऽनवाप्तसत्त्वोऽप्रतीयमाननियतरूपोऽभिमुखीभावमर्हत्युपगन्तुम् । इह चेन्द्रशत्रुत्वं राजत्वं च विधीयमानमिति सत्यपि प्रैषे सम्बोधनभावः । तथा च गुणनलोपप्रतिबोधौ न भवतः । तदत्र मध्यमे सम्बोधनं नास्तीति कैश्चिदत्रैतदिष्यत इत्युक्तम् ।। 5 ।।
यदा च युष्मदः प्रथमा संम्बोधनविभक्तिस्तदा शास्त्रकार्यमिदं सिद्धमित्याह ।
युष्मदः प्रथमान्तस्य परश्चेन्न पदादसौ ।
युस्मदर्थस्य सिद्धत्वान्नियता चाद्युदात्तता ।। 6 ।।
सिद्धत्वाद् इति सम्बोधनविषयत्वं पुष्णाति । तथा चामन्त्रितादिरुदात्तो भवतीति प्रथमान्तस्य युष्मदो नयमेनाद्युदात्तत्वं भवति, यदि पदाद् उत्तर असौ न भवति । तद्यथा
`त्वमग्ने प्रयाजानुयाजानां पुरस्तात्'ट
`त्वमग्ने द्युभिः त्वमाशुशुक्षणिः'
इत्यादौ । पदात् परत्वे त्वामन्त्रितमनुदात्तं भवति, तत्र निघातविधानात् । यथा
`देवीरापः शुद्धा यूयम्'
इति ।। 6 ।।
यदि तर्हि पुरुषप्रत्ययानामर्थनियमस्तदा
`तेन दीव्यति' (P.4.4.2.)
इत्यदौ प्रथमपुरुषेणार्थे निर्दिश्यमाने शालाकिकोऽस्मि, आक्षिकोऽस्मि, शालाकिकोऽसि आक्षिकोऽसीत्यादौ मध्यमोत्तमविषये तद्धितो न स्यादित्याशङ्क्याह ।
गुणुप्रधानताभेदः पुरुषादिविपर्ययः ।
निर्दिष्टस्यान्यथा शास्त्रे नित्यत्वान्न विरुध्यते ।। 7 ।।
नित्याः शब्दाः शास्त्रेणानुविधीयन्ते । तत्र चापोद्धारार्थोऽन्वाख्यानेऽङ्गभावेनोपादीयमानो नान्तरीयकपुरुषादिनियमानादरेण निमित्तभावमुपैति । ततश्च लक्षणे क्रिया प्रधानाख्यातपदोपादानेऽपि लक्ष्ये तद्धितान्तं सत्वप्रधानं भवति येन लिङ्गादिना तद्धर्मेण युज्यते । एवमन्यथापि लक्षणे पुरुषसंख्याकालोपादाने सर्वत्र नित्यशब्दानुगमः कृतो भवति
एतदेवोपोद्बलयितुमाह ।

यथानिर्देशमर्थाः स्युर्येषां शास्त्रं विधायकम् ।
किञ्चित् सामान्यमाश्रित्य स्थिते तु प्रतिपादनम् ।। 8 ।।
यदि शास्त्रं शब्दानां जनकं स्यात् तदा यथाशास्त्रं तेषामर्थोऽवतिष्ठेत । न चैवम्
`कार्ये युगपदन्वाचययौगपद्यम्' (Va.16 on P.1.1.44,M.Bha.1.p.104.1.20.)
`द्वेधाप्रतिपत्तिः' (Va.15 onP.1.1.44,M.Bha.I,p.104,.13.)
इत्युक्तत्वात् । नित्याः शब्दाः शास्त्रेण ज्ञाप्यन्ते । तथा चार्थानादेशनात् किंचिदर्थरूपमदूपविप्रकर्षेण
समानमन्वाख्यानाङ्गबावेनाश्रित्यावस्थितमेव शब्दरूपं नियतार्थ मन्वाख्यायत इति । सिद्धमिष्टम् ।। 8 ।।
अत्रैव भाष्यकारीयं निदर्शनमाह ।
योऽश्वे यः पीठ इत्यत्र भूतयोरश्वपीठयोः ।
यथोपलक्षणार्थत्वं तथाऽर्थेष्वनुशासनम् ।। 9 ।।
`बहुष्ववस्थितेषु क इह देवदत्त इति प्रश्ने कथ्यते
"योऽश्वे पीठे वा तिष्ठति "' (M.Bha.II.p.1.1.14)
इति । अत्र यथाश्वपीठयोः सिद्धयोरेव देवदत्तज्ञापनाय भूतविभक्त्योपादीयमानयोर्यथावस्थितयोरेवोपयोगो भवति, एवमर्थानामपि यथास्वभावं शब्देषूपयोगः । यथा चात्राश्वपीठयोर्विधीयमानेन देवदत्तसंज्ञारूपेण योगः तथार्थानामपि प्रत्ययादिना विधीयमानेनेति न तेऽत्र वाक्ये भेदेन विधीयन्ते । अपि तु तेषु सप्तम्या भूतविभक्त्या निर्दिश्यमानेषु सिद्धेषु निमित्तेषु प्रत्ययादेरेव कार्यस्य विधिरिति यथायोगं सर्वत्रेष्टसिद्धिः ।। 9 ।।
इति भूतिराजनतनयहेलाराजकृते प्रकीर्णकप्रकाशे पुरुषसमुद्देशो दशमः ।

Sadhanasamudesha

अथ साधनसमुद्देशः ।
(1) `दिक् साधनम्' इति दिशोऽनन्तरं साधनमुद्दिष्टं लक्षयितुमाह--
स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ।। 1 ।।
(2) क्रियानिर्वृत्तौ द्रव्यस्य शक्तिः साधनम्, साध्यतेऽनया क्रियेति भाष्यकारप्रभृतयो विदुः । तथा हि
"गिणः साधनम् " (M.Bha. on P.3.2.115)
इति भाष्य उक्तम् । शक्तिरेवात्राधारपारतन्त्र्यादन्यस्माच्च स्वाश्रयस्य भेदकत्वाद् गुणशब्देनोक्ता ।
कृदाख्याताभिहितयोर्भावयोर्भेदाभिधानप्रसङ्गे तु यद् भाष्यम्--- "द्रव्यं क्रियाभिनिर्वृत्तिं प्रतिं साधनभावमुपैति"
(M.Bha.on P.3.1.67)
इति तदन्यत्राहत्य द्रव्यस्य साधनत्वव्युदासाच्छक्तिव्यवधानाश्रयेण गमयितव्यम् । शक्तं हि द्रव्यं साधनम्, न तु निराधारा शक्तिः सम्भवति ।
"परोक्षे लिट्" (P.3.2.115)
इत्यत्रापि
"यदि गुणसमुदायः साधनम्, साधनमप्यनुमानगम्यम् । अथान्यद्गुणेभ्यः साधनम्, भवति प्रत्यक्षपरोक्षतायाः संभवः"

(M.Bha. on P.3.2.115)

इति यद् भाष्यं तदप्येवमेव नेतव्यम् । शक्तेर्नित्यपरोक्षत्वात् क्रियावद्विशेषणमव्यभिचारादयुक्तमिति परोक्षताविशेषणसामर्थ्याच्छकृत्याविष्टं द्रव्यं साधनमुपन्यस्तम् । एवम्

"उपसर्गाच्छन्दसि धात्वर्थे"(P.5.1.118)

इत्यत्र

"साधनेऽयं भवंल्लिङ्गसंख्याभ्यां योक्ष्यते"

(M.Bha. on P.5.1.118)

इति भाष्यं साधनशक्तिविशिष्टे द्रव्य इति व्याख्येयम् । तथा हि-धातावित्येवोक्ते शब्दे वृत्तसम्भवात् क्रियाप्रतिपत्तौ सिद्धायामर्थग्रहणाद्धातुकृतोऽर्थ इति समासप्पतिपत्त्यर्थाद् द्रव्यमाश्रितम् । वस्तुपर्यायो ह्यर्थशब्दः । द्रव्यस्य च स्वरूपेण सिद्धस्वभावत्वात् क्रियया करणानुपपत्तेः कर्मादिकारकरूपेणैव तस्य करणम् । क्रिया हि कारकाणि करोति, तदपेक्षत्वात्तद्व्यवहारस्येति साधनात्मना द्रव्यस्य क्रियया करणादेवमुक्तम् । धातुरर्थः प्रयोजनमस्येत्येतत्तु भाष्याव्याख्यानमयुक्तम् । एवं हि शक्तेरेव क्रिया साध्यत्वेन प्रयोजनमिति द्रव्यं न प्रत्याय्येत । यत्तु

"साधनं वै द्रव्यम्, न च द्रव्यस्य प्रकर्षापकर्षौ स्तः"

(M.Bha. on P.5.3.55)

इत्यद्रव्यप्रकर्षव्याख्याने भाष्ये द्रव्यस्य साधनत्वाभिधानं तच्छक्तिशक्तिमतोर्भेदाविवक्षयेत्यवगन्तव्यम् । तथा हि-तिङन्तात् क्रियासाधनाभिधायिनः प्रकर्षप्रत्यय इति शक्तेः क्रियावक्षणकार्यानुमेयायाः कार्यद्वारेणैव प्रकर्ष इति क्रियाप्रकर्षे प्रत्ययस्येष्टस्य संग्रहे द्रव्याधारत्वाच्छक्तेः कार्यमुखवत् कारणभूतद्रव्यमुखेनापि कथं न प्रकर्ष इत्याशङ्क्य द्रव्यस्य तदभावमभिधातुमेतदुक्तमिति व्यतिरेकोऽनादृतः तत्र कर्तृकर्मणोः क्रिया समवैतीति स्वाश्रयसमवोतक्रियानिष्पत्तौ तयोः कारकता, करणादीनां तु पराश्रयसमवेतायां क्रियायां साधनभावः । न हि करणादिषु क्रिया समवैति । क्रियाणाम् इति व्यक्तिभेदापेक्षं बहुवचनम् । गुणक्रियापेक्षया वा सर्वेषां स्वाश्रयसमवेतक्रियापेक्षं साधनत्वम् । गुणक्रियायां हि कर्तारः सर्वे। अकिंचित्करस्य साधनत्वानुपपत्तेः । अत एव करणं कारकमित्यादिसाधनसामानाधिकरण्योपपत्तिः । इत्थं च क्रियाणाम् इति बहुवचनं सुष्ठु गमितं भवति । कर्तृकर्मस्था तु प्रधानक्रिया करणादीनामाश्रयान्तरसमवेता ।। 1 ।।

कथं पुनरेतदवगम्यते शक्तिः साधनं न पुनर्द्रव्यमित्याशङ्क्याह---

शक्तिमात्रासमूहस्य विश्वस्यानेधर्म्मणः ।

सर्वदा सर्वथा भावात् क्वचित् किंचिद् विवक्ष्यते ।। 2 ।।

(3) घटादयो भावा विश्वशब्दवाच्याः । ते च तत्तदुदकाहरणादिकार्यसाधिकानां शक्तीनां समूहरूपाः । अत एव ताः शक्तयस्तत्र मात्रा भाग इति शक्तिसमाहारमात्रं घटादयः । ताश्च शक्तयोऽनेकविधाः । काश्चित् स्वहेतोरेव प्रभवन्ति, आश्रयविनाशमन्वपि च विनश्यन्ति । यथा बोधप्रदीपादीनां प्रकाशशक्तयः । काश्चित् पौरुषेय्यः स्थित एवाश्रये निरुध्यन्ते । यथा बलादिशक्तयः । ता हि श्रमाभ्यासेन वृष्यद्द्रव्योपयोगेन च जायन्ते । अन्याः सत्येवाश्रये पुरुषप्रयत्नेन विधार्य्यन्ते । यथा विषस्य मारणशक्तिः । बीजस्याङ्कुरजननशक्तिः । अन्याः प्रबावातिशयवता विपरिवर्त्यन्ते । यथा योगिना सर्वभावानां रूपपरिवृत्तिराधीयते । काश्चित् कालपरिवासेन व्यज्यन्ते, यथा धर्माधर्मादिशक्तिः फलदान इत्याद्यनेकविधमुन्नेयम् । एवमनेकस्वभावत्वे शक्तिसमुदायस्य विचित्रे कार्ये यथाशक्ति भेद विवक्षायां प्रतिनियतसादनभावोपपत्तिः । द्रव्यस्य तु साधनत्वे तस्यैकरूपत्वात् कार्यवैचित्र्यं न स्यादित्यर्थः । तदुक्तं भाष्ये

"गुणसमुदायः साधनं" (M.Bha. on P.3.2.115)

इति । प्रधानक्रियाया एकैकशक्तिसाध्यत्वाभावात् समुदायग्रहणम् । गुणक्रियापेक्षया तु प्रत्येकं शक्तेः साधनता । तस्याश्च प्रधानक्रियापेक्षया वैचित्र्यात् कर्मादिरूपता । यद् वा प्रत्येकं साधनत्वेऽपि समुदायग्रहणं शक्तीनां साधनत्वे तासां भेदादेकस्य कार्यभेदोपपत्तिरव्यापनार्थम् । तेनानेकशक्तेरपि पदार्थस्य सदैव तथावस्थानेऽपि काचिच्छक्तिः क्वचिदुद्भूता विवक्ष्यत इति घटं

पश्य, घटेनोदकमानय, घटे उदकं निधेहीत्यादि कर्मकरणादिभावो नियमेनोपपद्यत इति न कारकसाङ्कर्यप्रसङ्गः । द्रव्यस्य त्वेकस्वभावत्वात् कर्मकरणादित्वं नोपपद्यत इति गर्भीकृतेयमत्र युक्तिः शक्तेः साधनत्वे बोद्धव्या ।। 2 ।।

ननु च यत्र सन्ति शक्तयस्तत्र युक्तं यन्नियमेन विवक्ष्येरन् । यत्र दृश्यन्ते पुनरसत्यस्तत्र कथं तासां विवक्षा । तद्यथा शक्तिमादधाति, शक्त्या साधयति, शक्तावायतते, शक्तेर्व्यपैतीति । न हि शक्तेः शक्त्यन्तरयोगः, अनवस्थापातात् । तथा धनविनाशं करोति, धनाभावेन युक्त इति निरूपाख्ये भावे का शक्तिः । स्थाल्यां पचति, स्थाल्या पचति, इति सम्भवनधारणोपकारा स्थाली करणाधिकरणभिन्ना कथमित्याशङ्क्याह--

साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः ।
सन्नसन् वार्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते ।। 3 ।।

(4) विवक्षारूपाया बुद्धेः शब्दनिमित्ता येऽवस्थाविशेषाः प्रतिनियतशब्दनिबन्धनाः तदाश्रयः कर्त्रादिकारकव्यवहारः । तथा हि-- निरूपितेऽर्ते शब्दप्रयोगाद् यथानिरूपणं शब्दोपपत्तिः । निरूपणं चानपेक्ष्यापि बाह्यमर्थं स्वातन्त्र्यात् परिकल्पयति तांस्तानर्थविशेषान् । तत्र शक्तेर्द्रव्यायमाणाया बुद्धया स्वातन्त्र्येण निरूपणाच्छब्देनाभिधाने शक्त्यन्तरयोगो विरुद्धः । न हि तदा शक्त्यवस्थायामेव तस्यां तद्योगो येनानवस्था स्यात्, अपि तु द्रव्यावस्थायामभावोऽपि बुद्ध्या निरूपिताकारो द्रव्यायमाण एव शब्दवाच्यः । एवं तनुतरकपालत्वात् स्थाली पाकेऽनपेक्षितकर्तृविनियोगोत् स्वातन्त्र्येण विवक्ष्यत इति क्रत्री, इन्धनोपकारानपेक्षया तस्या एव साधकतमत्वविवक्षायां तु करणम्, वास्तवाधारविवक्षायां त्वधिकरणमिति सर्वमुपपद्यते । अत एव हन्त्यात्मानमात्मना, आत्मनः स्वात्मन्यवस्थानम्, इत्यादयोऽपि प्रयोगाः प्रथितसाधिमानः । वक्ष्यति चैतत्---

"बुद्ध्यैकं भिद्यते भिन्नमेकत्वं चोपगच्छति "

इत्यादि । दृश्यविकल्पयोरभेदाध्यवसायेन व्यवहारोपपत्तेर्बहिरन्याव्यावृत्तिपरतया समन्वयोऽत्र समर्थनीयः, स्वात्मनि नान्यस्मिन्, स्वात्मन एव नापरस्यावस्थानमित्यादि । यथा शिलापुत्रकस्य शरीरमिति । इत्थं च वाक्यादपोद्धृतस्यापि पदस्य संस्कारे प्रथमत एवाप्रयुक्ते पदान्तरे विवक्षितस्यापि विशेषस्य रूपसामान्यादनवधारणे संभवत्येव पदावधिकमन्वाख्यानं संबधिसामान्येऽपेक्षिते । अन्यथा बुद्ध्या नियतमर्थरूपं क्रियादिसंबन्ध्यपेक्षं कथं निरूप्येत । अनपेक्षितसंबन्धिरूपस्यार्थसामान्यस्याभावादभ्युपगतं पदावधिकमन्वाख्यानम् । शास्त्रे

"धातुसंबन्धे प्रत्ययाः"(P.3.4.1)

इत्येवमादीनां प्रत्याख्यानात् । यत्र च सर्वथाऽसङ्गतिः स्थालीमोदनेन काष्ठे पचतीत्यादौ तद् वाक्यमेव न भवतीति कतं वाक्यादपोद्धृतानां पदानामन्वाख्यानेऽत्र प्रसङ्गः । अत एव चाक्षीणि मे दर्शनीयानीत्यादेर्विप्रयोगस्य निवृत्तये शास्त्रमर्थवदेव । सामान्यमपि हि पदार्थरूपमर्थान्तरसंसर्गयोग्यमेव संस्तूयते, न त्वङ्गुल्यग्रे करिशतमास्त इत्याद्यसमन्वितमेव । एवं च कृत्वा छन्दसि

"चषालं ये अश्वयूपाय तक्षति"

इत्यादवसाधुत्वशङ्कापनुत्तये व्यत्ययोऽर्थवानेव । नियतानुपूर्वीकस्य छन्दोवाक्यस्य संभवात्ततस्तथैव पदापोद्धारस्य न्याय्यत्वात् । लोके तु नानवस्थितं नियतानुपूर्वीकमसङ्गत वाक्यमिति न ततोऽपोद्धारप्रसङ्गः । तस्माद्वाक्यादपोद्धृत्य पदानुशासनेऽपि निर्दोषमेव पदावधिकमन्वाख्यानम् । तत्र च समस्तविशेषणविशिष्टस्यार्थस्य निरंशत्वादपोद्धारे सामान्यमात्रा बुद्धिपरिकल्पितशरीरैव । उपक्रम एव तु विशेषापेक्षायां वाक्यावधिकमन्वाख्यानं कथ्यते । न तु वाक्यस्यानन्त्यात् साक्षादन्वाख्यानं युज्यते । प्रकृतिप्रत्ययादिविभागकल्पनया हि पदस्यैवानुशासनुमुपपद्यते । तस्य च केवलस्यासंभवाद्वाक्यस्थत्वे संबन्धिसामान्यापेक्षायां पदावधिकं तद्वाक्योपात्तसंबन्धिविशेषापेक्षायां तु वाक्यावधिकमन्वाख्यानमितीयाननयोः पक्षयोः विशेषः ।। 3 ।।

बौद्धे साधनव्यवहारे भाष्यकाराभ्युपगमसंवादकमाह---

बुद्धया समाहितैकत्वान् पञ्चालान् कुरुभिर्यदा ।

पुनर्विभजते वक्ता तदाऽपायः प्रतीयते ।। 4 ।।

(5) कुरुभ्यः पञ्चाला अभिरूपतरा इति

"पञ्चमी विभक्ते" (P.2.3.42)

इति पञ्चम्यर्थं सूत्रं भाष्ये प्रत्याख्यातम्, बौद्धस्यापायस्य सम्भवादपादान इत्येव सिद्धेः । तथा ह्याभिरूप्येण समानेन गुणेन कुरुभिः सह पञ्चालान् बुद्ध्यैकत्वं समुदायभावमापाद्यातिशयाभिरूपतावशात् कुरुभ्यः पञ्चालाः पृथक् क्रियन्त इत्यस्ति संश्लेषपूर्वको विश्लेषोऽपायः । तदुक्तं भाष्ये

"यस्तैः साम्यं गतवान् स एवं प्रयुङ्क्ते"(M.Bha.on P.1.4.24)

इति । तैः कुरुभिः पंचालानां सादृश्यं सम्प्रधारणासामर्थ्यादाभिरूप्येण प्रथमं यो ज्ञातवानित्यर्थः । अनेन चैकबुद्धिनिवेशित्वेन कुरुपंचालानां देशप्रत्यासत्तिमाह भाष्यकारः । तत्पूर्वकस्तु सातिशयस्य निरतिशयाद्विभागः ।
पंचमीशब्दोऽपादानसंज्ञानत्वान्नोक्तो भाष्यकृता । सूत्रारंभवादिनापि निर्धारणाश्रयत्वेनैषां बुद्ध्यैव समुदायभावः समानगुणत्वादाश्रयणीयः । अन्यथा निर्धारणाधिकारादेव विभागे लब्धे विभक्तग्रहणादत्थन्तविभागप्रतीतौ न वास्तवः समुदायभावो युज्यते । तदेवं बौद्धः साधनभावोऽस्मादवसीयते । कारकप्रकरणे च तमब्ग्रहणात् प्रकर्षो न विवक्ष्यत इति गौणेऽप्यत्रापायेऽपादानसंज्ञा भवति ।। 4 ।।

अन्यदपि भाष्योक्तं संवादकमाह--

शब्दोपहितरूपाश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ।। 5 ।।

(6) "हेतुमति च" (P.3.1.26)

इत्यत्र

"आख्यानात् कृतस्तदाचष्टे...."(Va. on P.3.1.26)

इत्येवमाद्युपसंख्यानं

"न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्"(Va. on P.3.1.26)

इत्येवं प्रत्याख्यातम् । चित्रपुस्तादौ हि प्रतिकृतिरूपस्य प्रयोज्यप्रयोजकभावाध्यवसायात् कंसं घातयति, बलिं बन्धयतीति सिद्धम् । एवं कृतानुकरणे नाट्येऽपि नटानां कंसवासुदेवानुकारेण सादृश्यात्तद्रूपतोपपत्तिः । तत्र

" ग्रन्थिकेषु कथम् "(M.Bha. on P.3.1.26)

इति चोदितम् । तत्र ग्रन्थिकाः कथका इति वृत्तरूपेणैव कंसवधमाचक्षते । तत्र च प्रतिकृतिरूपस्याभावात् कथं प्रयोज्यप्रयोजकत्वमिति पर्यनुयोगः । अत्र परिहार उक्तः ।

"तेऽपि हि तेषामुत्पत्तिपृभृत्या विनाशादृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति " (M. Bha. on P.3.1.26)

इति चिरकालातीतत्वात् कंसादीनां बहिरसत्वात् बुद्धिगोचरतया सतो विद्यमानांस्तान् प्रकाशयन्ति शब्देनावभासयन्ति । बुद्धिप्रतिभास्येव ह्याकारो शब्दार्थो न वस्त्वर्थः । तथा च कथकः श्रोतरि कंसाद्याकारप्रत्ययजनतात् बुद्धिवांसुदेवेन बुद्धिकंसं घातयतीति प्रयोजकत्वसमारोपात् प्रयोगोपपत्तिः । तथा हि-कथकोदीरितशब्दसामर्थ्योपजातरूपविशेषान् श्रोतृबुद्धिगोचरमापन्नान् सव्यापाररूपान् कंसादीन् कर्मादिसाधनतया भाष्यकारो मन्यत इति बुद्ध्यवस्थानिबन्धनः साधनव्यवहारः सिद्धः । गौणेऽपि च प्रयोजके कारकप्रकरणे प्राकर्षनाश्रयाद्धेतुसंज्ञायां तद्वयापारेऽत्र णिच् सौत्रः । प्रत्यक्षम् इत्यव्ययीभावः । मननक्रियाविशेषणं चैतत् । इन्द्रियनिमित्तेन ज्ञानेन परिस्फुटानवधारयतीत्यर्थः । एतच्च `ऋद्धीर्व्याचक्षाणा' इति भाष्यास्याभिप्रायव्याख्यानम् । प्रभावातिशययुक्ते हि वस्तुन्यादरवशात् स्पष्टरूपः प्रत्ययः प्रसूयते । स्पष्टे च ज्ञानेऽवभासमान आकारो बाह्यात्मकोऽवसीयते ।। 5 ।।
तदेवं बुद्ध्या साधनव्यवहारोपपत्तौ एकस्यापि वस्तुनः शक्तिनानात्वं बौद्धमुपपद्यत इति निगमयति ।
बुद्धिप्रवृत्तिरूपं च समारोप्याभिधातृभिः ।

अर्थेषु शक्तिभेदानां क्रियते परिकल्पना ।। 6 ।।

(7) बुद्धेः प्रवृत्तिः व्यापारः परिच्छेदलक्षणः । तस्या रूपमाकारो विषय आभासमानः । तमर्थेषु बाह्येष्वध्यस्य तेषां शक्तिनानात्वं परिकल्प्यते वक्तृभिः । अययर्थः । दृश्यविकल्पयोरभेदाध्यवसायाद् बौद्धः शक्तिभेदो बाह्य एवेत्यभिमानात् तत्र विचित्रं साधनबावमभिमन्यन्ते । बुद्धिप्रतिभासस्य स्वप्रतिष्ठत्वेनानवगमात्तत्र क्रियाभेदं प्रतिपत्तृव्यपेक्षां चानुवर्त्य वस्त्वेन नानाशक्तिकमवगम्यत इति बहिरर्थे शब्दः प्रमाणम् । क्रियाकारकसंसर्गस्य बाधकाभावात् सति संवादे च वाक्यस्य प्रमाण्यमवगमयन्ति व्यवहर्तारः । सौगतानां विकल्पप्रतिबिंबस्य भेदानध्यलसायात् बहिष्वप्रवृत्तिः । प्रामाण्यं तु वक्त्राभिप्रया एव शब्दानां न बाह्ये व्यभिचाराशङ्कनात्, अन्यव्यावृत्तिमात्रनिष्ठता तु बहिः । वैयाकरणानां तु व्यावृत्तवस्तुविषयता, तथाध्यवसायात् तत्रैव प्रामाण्यमिति दर्शनभेदः । नियतोपादिनियमितत्वाच्च न साङ्कर्यम् । उपकारकाश्च शक्तयः प्रत्युपाधिभिन्नाः संमूर्च्छितशरीरात्वाद्वस्तुनस्तत्त्वान्यत्वाभ्यामनिर्वाच्या इति नानुपाध्युपकाराङ्गत्वादेरप्रसङ्गः ।। 6 ।।

बुद्ध्यावस्थासमाश्रये च साधनभावे सतीदमपि सिद्धं भवतीत्याह---

व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्मणः ।
साधनत्वं तथा सिद्धं बुद्धिरूपप्रकल्पितम् ।। 7 ।।

(8) जातौ पदार्थे तज्जातीयाभेदेनानागतं निरूप्य योग्यसाधनविनियोगाज्जातिद्वारेण क्रियासिद्धावङ्गता व्यक्तिद्वारेण तु निर्वर्त्यमानता कर्मणो युज्यत इत्युक्तम्

"निर्वर्त्यमानं यत्कर्म जातिस्तत्रापि साधनम् "

इति । व्यक्तौ तु पदेन प्रत्याय्यायां शब्दं जनयति संयोगं करोतीत्यादौ जन्यमानस्य निर्वर्त्यस्य शब्दादेः कर्मणोऽनागतस्यापि वर्तमानव्यक्तिसारूप्यादसत्यपि जातेः प्रत्यायने भेदानध्यवसायाद् बुद्ध्याकारमुल्लिख्य योग्यसाधनविनियोगात् बौद्धस्यैव बहीरूपताध्यवसायाद् बाह्येन रूपेण निर्वर्त्यमानता, बौद्धेन तु साधनभावो युज्यत इत्यर्थः । जन्यमानस्येत्यनेन विकार्यप्राप्ययोर्व्यवच्छेदः ।। 6 ।।

विकार्यं हि प्रकृतिरूपेण स्थितमेव । प्राप्यमपि स्वत एव कियद्वा बुद्ध्या नाध्यारोप्यत इत्याह---

स्वतन्त्रपरतन्त्रत्वे क्रमरूपं च दर्शितम् ।
निरीहेष्वपि भावेषु कल्पनोपनिबन्धनम् ।। 8 ।।

(9) सदसत्पक्षभेदेन कार्यकारणभावस्य निराकृतत्वात् सर्वे भावाः क्रियारहिताश्चेष्टाशून्याः । तत्र क्रिययां स्वातन्त्र्यपारतन्त्र्यादिलक्षणं कर्तृकरणादिरूपं कारकत्वम् । क्रियारूपमेव च सक्रमत्त्वं यथावबासमनादिमिथ्याभ्यासवासनावशेन कल्पनाबुद्ध्युपरचितसतत्त्वम् । अपूर्वापरस्यापि भावतो विश्वस्य पूर्वापरतया स्वातन्त्र्यादिनात्रावभासनादिति मित्यावभासोऽयमर्थेषु क्रियाकारकभाव इत्यर्थः । अद्वैतनये हि सर्वमुपप्लवते, असत्यत्वादिति विकल्पपरिघटितः शाब्दो व्यवहारो यथाप्रतीत्यविचारितसिद्धोऽभ्युपगन्तव्य इति दिगादिपदार्थवत् साधनपदार्थसिद्धिः ।`दर्शितम्' इत्यद्वैतनयावलम्बिभिर्भाष्यकारप्रभृतिभिः, "कूलं पिपतिषति" इत्यादिप्रयोगसिद्ध्यर्थमाख्यातमित्यर्थः ।। 8 ।।

एवं तावद् द्रव्यव्यतिरिक्तशक्तिदर्शनेन साधनं लक्षितम् । अव्यतिरिक्तशक्तिदर्शनेनाप्याह---

शक्तयः शक्तिमन्तश्र सर्वे संसर्गवादिनाम् ।
भावास्तेष्वस्वशब्देषु साधनत्वं निरूप्यते ।। 9

(10) समवायवशाद्धर्मधर्मिणोरभेदमिव भेदेऽपि ये वदन्ति ते संसर्गवादिनो वैशेषिकः । ते च स्वरूपं सहकारिणश्च भावानां स्वकार्यजनने शक्तिरिति प्रतिपन्नाः । सहकारिणः शक्तिः, कारणं शक्तिमत् । एवं सहकारिणामपि कारणं शक्तिः स्वकार्ये सहकारि रूपमिति शक्तिशक्तिमन्तः सर्व एव भावाः, न त्वन्या काचिदतीन्द्रिया शक्तिः ष ट्पदार्थल्यतिरिक्ता विद्यते । एवमपि साधनत्वं भावानां पदार्थानामपादानादिशब्दैर्न प्रत्याय्यते, अपि तु विभक्तिभिरेव । तथा च

प्रत्यायनं योग्यतामात्रेण त्वपादानादिशब्दप्रवृत्तिः । `घटं पश्यति' इत्यादावेव द्वितीयादिभिर्महत्त्वाद्याधारनियतं प्रत्याय्यमानं शक्तिः साधनं भवति । आधारानवच्छिन्नस्तु महत्त्वादिः कर्मादिशब्दवाच्यो न किंचनापि साधयतीति विभक्त्येकसमधिगम्यः । प्रातिपदिकादाधारवाचिनस्तदुत्पत्तेः । आधारसमवाये साधनत्वस्य संस्पर्शादुपकारावस्थायां शक्तित्वमुपकार्यावस्थायां तु शक्तिमत्त्वं प्रमाणदृष्टमिति न काचिदनुपपत्तिः । अत एव शक्त्यवस्थायां शक्त्यन्तरेमायोगादनवस्थापि नास्ति । अभावस्यास्मिन् दर्शने स्पतमपदार्थरूपत्वेन भाव्यत्वाच्छक्तियोगोऽविरुद्धः ।। 9 ।।

तत्र को भावः कस्य क्व शक्तिरित्युदाहरणमाह--

घटस्य दृशिकर्मत्वे महत्त्वादीनि साधनम् ।

रूपस्य दृशिकर्मत्वे रूपत्वादीनि साधनम् ।। 10 ।।

(11) `घटं पश्यति' इति दर्शनक्रियाकर्मभावापन्नस्य घटद्रव्यस्य महत्त्वानेकद्रव्यवत्त्वरूपाणि शक्तिस्वसमवोतानि साधनं कर्मकारकम् । तथा हि कणादसूत्रम् ---

"महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः" (Vai.Su.4.1.6)

इति । अस्यार्थः । अनेकद्रव्यं समवायिकारणं यस्य तदनेकद्रव्यं द्वयणुकादि । तद्यस्यास्ति तदारब्धस्य तदनेकद्रव्यवत् । तद्भावस्तत्त्वम् । तस्माद्धेतोरुपलब्धिर्महति द्रव्ये । तेन बहुव्रीहिणा मतुपा च द्वौ मत्वर्थावुक्तौ । तत्रैकेन परमाणोर्यव्वच्छेदः । स हि रूपवानप्यनेकस्य द्रव्यस्यारंभकस्याभावान्नोपलभ्यते । अपरेण तु मत्वर्थेन द्वयणुरादेर्व्यवच्छेदः । अत एव सूत्रान्तरमुक्तम् ---

"अद्रव्यत्वात्परमाणावनुपलब्धिः"

इति । परमाणुग्रहणमत्रादृश्यमानस्योपलक्षणार्थम् । महति दृश्यमाने चानेकद्रव्यवत्त्वं दर्शनहेतुरिति त्र्यणुकस्य कारणबहुत्वमहत्वप्रचयेभ्यो महत्त्वस्योत्पत्तिरिति त्रिभिर्द्व्यणुकैरारंभान्मगतोऽनेकद्रव्यवत्त्वेऽपि तदभावः । महतो हि दृश्यमानस्यानुवादेनेदं विधीयत इत्यदृस्ये नायने रश्मौ नास्यादृश्यतापत्तिः । न हि महत्त्वमप्यत्र दर्शनकारणं विधीयते । एवं ह्येकस्या आकृतेश्चरितः प्रयोग इति न्यायात् प्रक्रमो भेदार्थः पंचम्येव क्रियेत । अनेकद्रव्यवतश्च महत्त्वाव्यभिचारान् `महति' इति न हेतुनिर्देशः, अपि तु विषयोपलक्षणमेव । `रूपात्' इति च द्वितीयो दर्शनहेतुः । नीरूपस्य वाणोर्महतोऽनेकद्रव्यवतश्चाप्यनुपलंभात् । तदुक्तं सूत्रम्---

"रूपसंस्काराभावाच्च वायावनुपलब्धिः"(Vai Su.4.7.1)

इति । यतश्चानेकद्रव्यत्वस्य रूपस्य दर्शनहेतुत्वं न महत्त्वस्यापि ततो द्वयोरेव व्यतिरेकः प्रदर्शितः । महत्त्वस्याकारणत्वेऽपि च तद्विषयत्वाद्दर्शनस्य पारम्पर्येणोपयोगान् `महत्त्वादीनि साधनम्' इति बहुवचनम् । यद्वा द्रव्यत्वादीनां सामान्यविशेषाणामप्यादिशब्देन सङ्ग्रहणात् बहुवचनम् । अत्र सामान्यविशेषा हि प्रधानं दर्शननिबन्धनम् । तदुपाधिकत्वेनार्थानाम्, पररूपव्यावृत्तिस्यात्मन उपलंभात् । `महति इत्येव तूक्ते व्यभिचार आकाशादिनेत्यनेकद्रव्यवत्त्वादिति मतुपाऽवयविद्रव्ये प्रतीतिरभिव्यज्यते । `अनेकद्रव्यवत्त्वात्' इति पुनरुच्यमाने तत्पुरुषसंभावनया द्रव्यप्रचयमात्रं गम्येत । `रूपं पश्यति' इत्यत्र रूपस्य दर्शनक्रियायां रूपत्वं स्वसमवेतं सामान्यमनेकद्रव्ये च द्रव्ये समवायः साधनम् । तथा च सूत्रम्---

"अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः" (Vai. Su.4.1.8)

इति । अनेके आरंभका यस्यावयविद्रव्यस्य तदनेकद्रव्यम्, तेन समवायात्, तत्र समवेतत्वात् । रूपस्य विशेष उद्भूतत्वम् । अतो नायनरश्मिरूपं बाह्यतैजसद्रव्यरूपेणाभिभूतमपोह्यते । अन्ये तु रूपं विशेष्यते व्यावर्त्यतेऽनेनान्यस्माद्रसादेरिति रूपत्वमेव सामान्यविशेष एवमुपदिष्ट इति वर्णयन्ति । अनेकद्रव्यत्वाभावाच्च परमाणोस्तद्गतरूपस्यादृश्यता । योग्यदेशत्वादयोऽपि सामर्थ्यात् साधनमिति बहुवचननिर्देशः ।। 10 ।।

स्वैः सामान्यविशेषैश्च शक्तिमन्तो रसादयः ।

नियतग्रहणा लोके शक्तयस्तास्तथाश्रयैः ।। 11 ।।

(12) रसं रसयति, गन्धं जिघ्रति , स्पर्शं स्पृशति, शब्दं शृणोति इति र,त्वादयः सामान्यविशेषाः समवेताः रसनादीनां रसनादिक्रियासाधनम् । तथा हि तैस्तैः नियतग्रहणाः नियतं स्वजातिबलादेव गृह्यन्ते, न तु द्रव्यवदनियतग्रहणाः । द्रव्यं हि कदाचित्सामान्योपादिना गृह्यते `द्रव्यम्' इति, कदाचिद् गुणेन शुक्लमिति, कदाचित् कर्मणा `गच्छति' इति । रसत्वादीनां तु शक्तीनां स्वाधारा एवावच्छेदकाः स्वरूपग्रहणे शक्तिः । यथा हि रसस्योपलंभे रस्तवमप्युपलभ्यते तद्विशिष्टस्य तस्योपलंभादित्याश्रिताक्षेपः तथा रसत्वोपलंभेऽपि स्वाश्रयाक्षेपः । तथा रसस्योपलंभे तदाश्रयं द्रव्यमपि शक्तिरित्यापि ज्ञेयम् । पूर्ववच्चानेकद्रव्ये समवायोऽपि गृह्यते, परमाणुगतस्य रसादेरनुपलंभात् । एवं शेषेष्वपि वाच्यम् । इत्थं परस्परं शक्तिशक्तिमन्तो भावाः । तथा च न काचिन्नियता शक्तिः । संसर्गिणां परस्परं शक्तिशक्तिमन्तो भावाः । तथा च न काचिन्नियता शक्तिः । संसर्गिणां परस्परं तत्त्वात्, अन्यस्य च योग्यदेशत्वादेः सहकारिणः तथात्वात् ।। 11 ।।

इन्द्रियार्थमनः कर्तृसंबन्धः साधनं क्वचित् ।
यद्यदा यदनुग्राहि तत्तदा तत्र साधनम् ।। 12 ।।

(13)आत्मेन्द्रियमनोऽर्थसन्निकर्षात् ज्ञानं निष्पद्यते रूपादाविति संयोग एव साधनम् । सुखादौ त्वात्मान्तः करणसंयोगादिति `क्वचित्' इत्याह । किं वात्र परिगणनया, यद्यत्रोपकरोति तत्तत्र साधनमिति यथायोगं सर्वे भावाः शक्तिशक्तिमन्तः । तथा हि संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ कर्म च रूपद्रिव्यसमवायाच्चाक्षुषाण्युक्तानि । अवयवानामवयविनिष्पत्तौ संयोगः शक्तिः । गुणनिष्पत्तौ त्ववयविनः समवायः शक्तिः इति परोपकारि परतन्त्रं सर्वं शक्तिलक्षणमनुपतति ।। 12 ।।

सा च स्वकार्यपरतन्त्रावस्था साधनादिना सिद्धस्वभावार्थाभिधायिना शब्देन नाभिधातुं शक्यते , अपि तु यथायथं विभक्त्यादिरस्याः प्रत्यायने समर्थ इत्याह--

स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते ।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ।। 13 ।।

(14) स धर्मः, क्रियां प्रति शेषभावः । कारकं साधनमपादानमित्यादिशब्दैः क्रियोपकारोपलक्षितं द्रव्यमभिधीयते प्राधान्येन, न तु क्रियोपकारलक्षणः साधनभावः समुद्भूतोऽस्मात् प्रतीयते । तथा हि-अत्रापि द्रव्यरूपतया साधनमामुखीकरोति । क्रियोपकारलक्षणो धर्मो द्वितीयां प्रतिपाद्यत इति परिगृहीतक्रियोपकारं द्वितीयादिविभक्तिप्रतिपाद्यं वस्त्विति शक्तिर्विभक्तिवाच्या । क्वचित्तद्धितवाच्या । शतेन क्रीतः शत्यः शतिक इति क्रये साधकतमत्वं प्रत्ययवाच्यम् । `यत्र' `तत्र' इत्याधारभावस्त्रल्वाच्यः । पयः पयो जरयति, मधु निरीक्षते, दधि समश्नाति इति प्रातिपदिकादेव शक्तिः प्रतीयते । अन्तरा त्वां च मां च कमण्डलुपरित्यन्तराशब्दोऽव्ययोऽधिकरणमाहेत्यादिग्रहणम् ।। 13 ।।

कः पुनरसावुपकारलक्षणो धर्मः साधनमित्याह---

निमित्तभावो भावानामुपकारार्थमाश्रितः ।
नतिरावर्जनेत्येवं सिद्धः साधनमिष्यते ।। 14 ।।

(15) साध्यस्वाभावायां क्रियायामुपकाराय सिद्धस्वभावानां भावानां निमित्तभावो हेतुभावः । नतिः नमनमुपकाराभिमुख्यम्, `आवर्जनम्' अङ्गभावेन स्वात्मप्रत्यर्पणम्, क्रियाोपजननतात्पर्य्यम् । इति शब्दः प्रकारे । इत्येवमादिभिः शब्दैरभिधीयमानोऽन्योऽपि सिद्धः निष्पन्नतया प्रतीयमानः, एवं भूतेन वा धर्मेण निश्चितः, न वस्तु संभवमात्रेण साधनमित्युच्यते ।। 14 ।।

एवं मीमांसकवैशेषिकदर्शनेन शक्तिः साधनमित्युपपाद्य स्वदर्शने व्यतिरेकाव्यतिरेकग्रहं त्यजति ।

स तेभ्यो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
व्यतिरेकमुपाश्रित्य साधनत्वेन कल्प्यते ।। 15 ।।

(16) `सः' इति हेतुभावः शक्त्यपरपर्यायः ।

"शक्तयः सर्वभावानां कार्यार्थापत्तिगोचराः"

इत्यतीन्द्रियाः पदार्थाद् व्यतिरिक्ताः शक्तयः केषांचिद् भवन्तु । सहकारिसमवधानोपकृतो भावः स्वरूपेणैव कार्यजनकः किमदृष्टशक्तिपरिकल्पनेनेत्यात्मैव भावानां शक्तिः । संसर्गिणः सहकारिणो वार्थान्तरभूताः । स्वकारणपरंपरया हि पदार्थः समुपजातो विशिष्टो यस्तत्तत्सहकारिसंपर्के तत्तत्कार्यजनने शक्त इति किमदृष्टया व्यतिरिक्त्या शक्त्या । तत्कल्पने तस्या नियमहेतुर्भावस्वभाव एव वक्तव्य इति वरं स एवास्तु । तदत्राव्यतिरेकवादो वास्तु व्यतिरिक्ता वा शक्तयः सन्तु । नास्माकमत्र कश्चिद् ग्रहो व्यतिरेकाव्यतिरेकवादे । शब्दप्रमाणका हि वयम्, यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च पदार्तानां व्यतिरिक्तमेव साधनभावं प्रत्याययति घटस्य दृशिक्रियायां कर्मभाव इत्यादाविति व्यतिरेकोपाश्रयः शब्दनिबन्धनो व्यवहारः । तथा च प्रातिपदिकेन द्रव्येऽभिहिते शक्तौ कृतबन्धा शक्तिः प्रवर्तते ।। 15 ।।

"यद् यदा यदनुग्राहि तत्तदा तत्र साधनम्"

इति व्याप्तिमुक्तां क्रियाया अपि साधनत्वेन भाष्यकाराभिमतेन संवादयितुमाह--

संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा ।

व्यवसायस्तथारंभे साधनत्वाय कल्पते ।। 16 ।।

पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता ।

सन्दर्शने तु चैतन्यं विशिष्टं साधनं विदुः ।। 17 ।।

(17) संप्रदानसंज्ञायाम्

"क्रियाग्रहणमपि कर्तव्यम्" (Va on P.1.4 32)

इत्युक्ते इह कश्चित् कंचिदर्थं सम्पश्यति, स दृष्ट्वा प्रार्थनया व्यवसायं करोति, अध्यवसाये प्रारंभः, प्रारंभे फलप्राप्तिरिति सन्दर्शनादिभिराप्यमानत्वात् "क्रियापि कृत्रिमं कर्म" इति भाष्य उक्तम् । तत्र साध्यस्वभावाया अपि

सन्दर्शनादिभिराप्यमानत्वात् "क्रियापि कृत्रिमं कर्म" इति भाष्य उक्तम् । तत्र साध्यस्वभावाया अपि सन्दर्शनादिक्रियायाः साधनत्वमापेक्षिकम् । सम्यक् समन्ताद्वा दर्शनं सन्दर्शनं फलविषयः संकल्पः । तत् प्रार्थनायां फलोपायविषयेऽभिलाषे,साधनत्वाय कल्पते, साधनं भवति । अर्थदर्शने हि सत्यभिलाषोत्पत्तिः । व्यवसायो दृढग्राहिता, क्रियाविशेषस्य उलसाधनत्वेन निश्चयः । तत्र `अनन्तरा' प्रार्थना साधनम्, अभिलाषे सति निश्चयकरणात् । व्यवसायश्चांरभक्रियायां मानस्यां प्रवृत्तौ साधनम्, व्यवसायबलेनार्थक्रियाकरणांरभात् । तया च क्रिययाऽऽप्यमानत्वाद् भौतिकी क्रिया कर्म भवति संक्षेपतः । पूर्वस्मिन् पूर्वस्मिन् व्यापारेऽपेक्षिते या क्रिया कर्तव्यत्वात् सैव पूर्वस्मान्निवृत्ता पूर्वकालभाविनी क्रिया परस्मिन् उत्तरोत्तरभाविनि साध्ये साधनं भवति । तदात्मलाभे सिद्धत्वेनोपयोगात् । तदयमर्थः । पूर्वस्मिन् सन्दर्शने या क्रिया प्रार्थनादिका सैवोत्तरां प्रति साधनं मता । अथ सन्दर्शनक्रियायाः किं साधनमित्याह---

"सन्दर्शने तु चैतन्यम्"

इति । `तुः' विशेषद्योतकः । चिद्गूप आत्मा यो भुङ्क्ते भावान् । विशेषोऽस्य फलमिलाषयोग्यता । यद्यपि च क्रिया साध्यस्वभावाऽनिष्पन्ना तथापि निष्ठावस्थायां सिद्धत्वात्, साधनशब्देन च शक्तेस्तत्रासमवायेऽपि व्यतिरेकेणाश्रयाद् युक्तः साधनभावः । क्रियायां च क्रियान्तरस्यासमवेतत्वात् सैव क्रियान्तरभावने कर्तुः करणम् । अयमत्र परमार्थः । यदपेक्षया यत् सिद्धं तत्तस्य साधनं निष्पादकं कारकं भवति । तदानीं हि कर्तुः क्रियानिष्पत्तौ करणान्तरं नास्ति । भावी चांशो भूतेनांसेनाप्यमानत्वात् कर्म भवति । कर्ता हि क्रियया यदीप्सति तत्कर्म । अत्र च क्रियांश एवेप्स्यतेऽपरेण सिद्धेन क्रियांशेनेत्यारंभेण मानसव्यापारेणाप्यमानत्वाद् भौतिकी क्रिया कर्मेति तेनाभिप्रेयमाणस्य संप्रदानत्वं सिद्धम्, `युद्धाय सन्नह्यते', `श्राद्धाय निगह्लते' इति । गत्यर्थधातुविषये संदर्शनादीनां भेदाभेदविवक्षा, पच्यादावभेदविवक्षैव, श्राद्धाय निगह्लत इत्यादौ भेदविवक्षैवेति च वक्ष्यते । तदेवं `व्यतिरेकमुपाश्रित्य साधनत्वेन कल्पत' इति क्रियाया अपि साध्यसाधनभावो

व्यतिरेकाश्रयेणोपकार्योपकारकभावेन भाष्योक्त उदाहृत इति स्थितमेतत् शक्तिव्यतिरिक्ता क्रियोपकारार्थमाश्रिता साधनमिति सामान्येनोच्यत इति ।। 16,17 ।।

वार्त्तिके कारकमिति संज्ञा साधनमिति संज्ञिनिर्देशेन कर्तव्या । अन्वर्थसंज्ञाविज्ञानाद्वा साधकस्य लाभ इति ।

"अन्वर्थमितिचेदकर्तरि कर्तृशब्दानुपपत्तिः"

(Va. on P.1.4.23)

इत्युक्तम् । तत्राकर्तरि करणादौ कर्तृशब्दस्य कारकमित्यस्योपपत्तिं समर्थयितुमाह-- निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणादित्वसंभवः ।। 18 ।।

(18) सामग्रीसाध्यत्वात् क्रियाणां सर्वे कारकत्वं क्रियानिष्पत्तिविषयभेदेन प्रतिपद्यन्ते इति । यदा तु कः कथं पचतीति विवक्षा तदा प्रधानक्रियानिष्पादने विचित्रव्यापाराणि कारकाणि यथास्वं व्यापारातिशयवशेन करणादिसंज्ञाः प्रतिलभन्ते । तथा हि साधनान्तरविनियोगव्यापारः कर्ता । निर्वृत्तिविकारप्राप्त्याहितसंस्कारं कर्तुः क्रियेयप्सिततमं कर्म । ज्वलनाद्यनुभवत् कारकान्तरव्यापारैरव्यवहितव्यापारं करणम् । प्रेरणानुमननानिराकरणव्यापारं कर्मणा संबन्धयमानं संप्रदानम् । अपायमवधिभावोपगमनेन साधयदपादानम् । र्तृकर्मव्यवहितक्रियाधारकमधिकरणम् । स्वतन्त्रं प्रेषयद्धेतुरिति । सामान्यपूर्वकत्वाच्च विशेषस्यावान्तरव्यापारेऽपि कारकत्वमनुवृत्तिमिति करणं कारकमिति सामानादिकरण्योपपत्तिः । अकारकस्य च विशेषसंज्ञाभावः,वृक्षस्य पर्णं पततीति । अनपेक्षिते च कर्तृव्यापारे स्थाली पचति, एधाः पचन्ति, असिश्छिनत्ति इति प्रधानक्रियायामेवैषां कर्तृत्वम् । संप्रदानापादानयोः स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति । द्वितीयस्यादातुरपगन्तुश्चापेक्षणात् । अत एव

"सिद्धं तु प्रतिकारकं क्रियाभेदात्..."(Va. on P.1.4.23)

इति प्रधानक्रियार्थेषु यथास्वं कारकव्यापारेषु पचादीनामेव वृत्तिर्वर्णिता । तदेतद्भाष्य उक्तम्---

"सामान्यभूता क्रिया वर्तते, तस्या निर्वर्तकं कारकम्"

(M.Bha. on P.1.4.23)

इति ।। 18 ।।

अत्रैव दृष्टान्तमाह---

पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते ।
अयमस्यामियं त्वस्मादिति भेदो विवक्षया ।। 19 ।।

(19) पितरौ पुत्रं जनयत इत्यविवक्षिते जननव्यापारभेदे जनिक्रिया कर्तृत्वमुभयोः प्रसिद्धम् । कः कथं जनयतीति भेदविवक्षायामयं पिता बीजमादधदस्यां मातरि गर्भमाधत्ते । इयं तु माताऽस्मात् पितुः पतद् बीजं धारयन्ती जनिक्रियाकर्तृत्वमनुभवतीत्यधिकरणत्वं मातुः । कर्तृत्वमपादानत्वं च पितुः, कर्तृत्वं मातुरिति भिद्यते प्रवृत्तिः । सामान्यपूर्वकत्वाच्च विशेषस्य जनि सामान्येनात्मलाभवचनो विशेषविषये प्रेषणविषयबीजधारणबीजच्युतिवचनः । यद्वा प्रकृत्यर्थोऽविशिष्टः, प्रत्ययार्थस्तु णिजर्थो जनयतीति प्रेषणादिः यत्रायं विभागः । साधयपक्षनिक्षिप्तमपीदं प्रसिद्धत्वान्निदर्शनम् ।। 19 ।।

तदेवं प्रधानक्रियायामेव सामान्यविशेषभावेन कारकं करणमित्यादिसामानाधिकरण्यमुपपादितम् । इदानीं गुणक्रियापेक्षया स्वातन्त्र्यं प्रधानक्रियापेक्षयास्वातन्त्र्ये सत्यप्यनपगतमिति प्रकारान्तरेण

`सामान्यभूता क्रिया वर्तते' (M.Bha. on P.1.4.23)

इत्येतद्भाष्यं गमयितुमाह---

गुणक्रियाणां कर्तारः कर्त्रा न्यक्कृतशक्तयः ।
न्यक्तायामपि सम्पूर्णैः स्वैर्व्यापारैः समन्विताः ।। 20 ।।

करणत्वादिभिर्ज्ञाताः क्रियाभेदानुपातिभिः ।
स्वातन्त्र्यमुत्तरं लब्ध्वा प्रधाने यान्ति कर्तृताम् ।। 21 ।।

(20) ज्वलाद्यवान्तरव्यापाररूपाणां गुणक्रियाणां स्वातन्त्र्यात् सर्वे कर्तारः, प्रधानक्रियाविषये तु कर्त्रा स्वतन्त्रेण विनियोक्त्रा न्यक्कृता शक्तिः स्वातन्त्र्यमेषामिति तेन यथायथं न्यग्भावमस्वातन्त्र्यमापादिताः सन्तः न्यक्तायां न्यग्भावेऽपि स्वव्यापारे स्वातन्त्र्यानपगमात् अकिंचित्करस्य क्रियासिद्धौ हेतुभावानुपपत्तेः यथास्वं स्वव्यापारानुष्ठाने प्रधानक्रियाङ्गभावगमनात् कर्तृविनियागेऽपि यथायथमात्मीयैः सर्वैरेव ज्वलनादिवन्यापारैरवियुक्ताः तत्क्रियाविशेषविषयैः करणादिसंज्ञारूपैरधिगताः तद्रूपमत्यजन्त इव विनियोगोत्तरकालमपि स्वव्यापारानुष्ठानलक्षणं स्वाधीनत्वामासाद्य स्वस्मिन् क्रियाभेदे स्वतन्त्राः प्रधानक्रियायामेव कर्तृतां कारकत्वं भजन्त इति करणं कारकमित्याद्युपपत्तिरित्यर्थः । करणादीनि हि कर्तृप्रैषे न्यग्भूतानि स्वव्यापारमनुतिष्ठन्ति तथा भवन्तीति कर्त्रा स्वव्यापारे कर्तृत्वार्थमेवैषां नियोगात्, नियुक्तानां सतां स्वव्यापारे स्वातन्त्र्यमनुभवतां करयणादित्वे प्रधानक्रियानिष्पत्तिरित्यविरोधः स्वातन्त्र्यपारतन्त्र्ययोः । यदेव हि स्वव्यापारे स्वातन्त्र्यं तदेव प्रधानक्रियायां पारतन्त्र्यं नान्यत् किंचित् । तच्च क्रतृविनियोगे सत्युत्तरकालमेव भवति । पूर्वन्तु कर्तृविनियोगाद्योग्यतामात्रेण स्वातन्त्र्यमुच्यते । इत्थं च करणं कारकमिति विषयभेदोऽपि नास्ति। स्वव्यापारे, स्वातन्त्र्यस्यैव प्रधानक्रियायां करणादित्वात् । तदेततदुक्तम् ।

"सिद्धं तु प्रतिकारकं क्रियाभेदात् पचादीनां करणीधिकरणयोः कर्तृभावः"

(Va. on P.1.4.23)

इति । तत्र

`अधिश्रयणोदकासेचन...'(Va. on P.1.4.23)

इत्यादिना कर्तृकरणाधिकरणानां गुणक्रियामुक्त्वा

`अपादानादीनां त्वप्रसिद्धिः'(Va. on P.1.4.23)

इति पुनश्चोदिते

"न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं नचनाश्रया च संज्ञा"

इति पुनः सिद्धान्तितम् । तथा हि वलाहको विद्योतते इति विद्युदभेदाविवक्षायां प्रयोगात् स्वव्यापारेऽस्त्येवापादानस्य स्वातन्त्र्यम् इत्याहुः । ग्राम आगच्छतीति तूक्तेऽर्थान्तरावगमादपादानव्यापारानवसायात् प्रयोगाभावः । अस्ति तु ग्रामस्यापादानस्य क्रियासिद्धौ कश्चिद् व्यापारोऽवधिभावापत्तिलक्षणः । अन्यथा ग्रामस्य समीपादागच्छतीतिवत् ग्रामादागच्छतीत्यत्रापि ग्रामस्याकारकत्वं स्यात् । संप्रदानस्यापि अनिराकरणात् कर्तुः, प्रेरणानुमतिभ्यां च तत्त्वमित्यस्त्येव स्वव्यापारः । ब्राह्मणो ददातीति तु प्रयोगाभावः, संप्रदानत्वे ब्राह्मणस्यास्माद्विवक्षितार्थानवसायात् । अत एवापादानसंप्रदानव्यापारे धातोर्न वृत्तिः, अपि तु कर्मकरणादिव्यापार एव, पच्यते ओदनः स्वयमेव, असिश्छिनत्ति, स्थाली पचतीत्यादौ । तदेवं सर्वत्र क्रियाभेदसंभव इति तत्र स्वातन्त्र्यात् करणादित्वेऽपि कर्तृशब्दः प्रवर्तते । यद्येवं करणादित्वेऽपि स्वातन्त्र्यात् कर्तृसंज्ञा स्यात् । नैतदस्ति । कारकाधिकाराल्लब्धे स्वातन्त्र्ये स्वतन्त्रः कर्तेति पुनः श्रुतिः पारतन्त्र्यानाच्छुरितस्वातन्त्र्यप्रतिपत्त्यर्थेति मुख्य एव स्वतन्त्रे क्रतृसंज्ञावतिष्ठते । एवमपि परत्वात् करणादीनां करणादिसंज्ञां बाधित्वा कर्तृसंज्ञा प्राप्नोति । नैष दोषः । करणादिसंज्ञानामनवकाशत्वात् ताभिः कर्तृसंज्ञायां अत्र बाधनात् । कारकव्यपदेशस्तवनुवृत्तिसामर्थ्याद्भवति । अथ वा स्वातन्त्र्यनिमित्ता कारकसंज्ञेति नात्र बाद्यबाधकभावो निमित्तनिमित्तिनोः । अत्र हि स्वातन्त्र्यनिमित्तं पारतन्त्र्यमिति करणादिभावेऽप्यनुमितं स्वातन्त्र्यं निविशत एव कारकसंज्ञात्यपादानादिसंज्ञाभिः समावेश एवास्याः । यत्र तु पारतन्त्र्यविवक्षानान्तरीयिका स्वातन्त्र्यविवक्षा तत्र करणं पराणि बाधन्त इत्युच्यते । तद्यथा धनुषा विध्यतीति । तत्र हि धनुषः साधकतमत्वाविनाभाविनी स्वातन्त्र्यविवक्षा । स्वतन्त्रः कर्तेत्यत्र च नैवमवधार्यते यत् सर्वास्ववस्थासु स्वतन्त्रमिति, अपि तु यत् स्वतन्त्रमेवेति स्थाली पचतीत्यादावपि कर्तृसंज्ञासिद्धिः । अधिकारसामर्थ्याच्च करणाद्यवस्थायामप्यनुमितस्वातन्त्र्यहेतुककारकशब्दप्रवृत्तिरविरुद्धेति सर्वं सुस्थम् । तदेवं पूर्वं क्रियाया अभेदमाश्रित्य निष्पत्तिमात्रे कर्तृत्वमिति सामान्यभूता क्रिया निष्पत्तिमात्रस्वभावा व्याख्याता । इदानीं तु गुणप्रधानभावेन

क्रियाभेदमप्याश्रित्याकर्तरि कर्तृशब्दुपपादितः । तत्र च सामान्यभूता साध्यत्वेन सर्वेषां साधारणत्वं प्राप्ता प्रधानक्रिया वर्तत इति भाष्यार्थः ।। 20,21 ।।

स्वव्यापारे स्वतन्त्राणामेव प्रधानव्यापारे पारतन्त्र्ये दृष्टान्तमाह---

यथा राज्ञा नियुक्तेषु योद्धृत्वं योद्धृषु स्थितम् ।
तेषु वृत्तौ तु लभते राजा जयपराजयौ ।। 22 ।।
तथा कर्त्रा नियुक्तेषु सर्वेष्वेकार्थकारिषु ।
कर्तृत्वं करणादित्वैरुत्तरं न विरुध्यते ।। 23 ।।

(21) यथा राज्ञा स्वामिना नियुक्तेषु प्रेषितेषु योद्धृत्वं व्यूहविभागादिना योद्धृषु स्थितम् । तेषु युध्यमानेषु च या वृत्तिः शत्रुमहत्गदेशोत्सादनादिका तस्यां कृतायां राजा जयं पराजयं वाऽपि पर्यायेण लभते । एतदाह । योद्धारो योद्धृत्वे कर्तारः । पूर्वं तद्व्यापारस्य तत्रस्थत्वात् । पुना राजनियोगादस्वतन्त्राः । पुनश्च तन्नियोगे निरपेक्षाः स्वतन्त्राः । एवं कर्त्रा नियुक्तेषु संभूयार्थं पाकादिकं कुर्वत्सु भृत्येष्विव करणादिषु यत् स्वातन्त्र्यं जायते नियोगादुत्तरकालभवं तत्करणत्वादिभिर्नियोगकालभाविभिर्न विरुध्यते इत्यर्थः । तदेवं

`कारक इति संज्ञानिर्देशश्चेत् संज्ञिनोऽपि निर्देशः । इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य' (Va. on P.1.4.23)

इत्यादिना साधकं निर्वर्तकं वा संज्ञि निर्देष्टव्यमिति चोदिते, अन्वर्थसंज्ञाविज्ञानाद्विशिष्टसंज्ञिसिद्ध्या परिहृते, अधिकारेणोत्तरत्रानुवृत्तेः कारकसंज्ञायाः करणादिष्वनुपपत्तेरुद्भावितायां निष्पत्तिमात्रापेक्ष्या कर्तृत्वाश्रयणेन प्रतिकारकं क्रियाभेदेन गुणक्रियायां स्वातन्त्र्याश्रयणेन च परिहृतमिति प्रकरणार्थः ।। 22,23 ।।

अन्वर्थसंज्ञाश्रयेण क्रियानिर्वर्तकस्य साधकत्वेऽभिहितेहेतुरपि क्रियानिर्वर्त इति करण इत्येव सिद्धायां तृतीयस्यां किमर्थं हेताविति पुनर्विधिनमित्याशङ्क्या हेतोः साधनाद्व्यतिरेकं दर्शयति ।

अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।
आश्रितावधिभावं तु लक्षणे लक्षणं विदुः ।। 24 ।।

(22) व्यापारमनाश्रित्य विवक्षितार्थसिद्धौ योग्यतामात्रेण निमित्तत्वेनाश्रियते यः स हेतुः । स चाकारकविभक्तेः शेषलक्षणाया विषयः तृतीयस्याः संबन्धषष्ठीबाधिकायाः । तद्यथा अध्ययनेन वसतीति । अध्ययनं हेतुः, वासो हेतुमान् । तयोः संबन्धे शेषषष्ठ्यां प्राप्तायां हेतौ तृतीया । नैयायिकास्त्वाचक्षते, गुणद्रव्ययोर्यन्निमित्तं स हेतुः । स चाकारकविभक्तेर्विषयः । यत्तु क्रियापदोपात्तायाः क्रियाया निमित्तं तत्कारकमेव । यथा `विद्यया वसति' इत्यादाविति

`अनर्लक्षणे' (P.1 4.84)

इत्यत्र हेतोरपि लक्षमशब्देनाख्यानादविशेषमनयोः संभाव्यापाकरोत्याश्रितेत्यादिना । लक्षणे इत्यत्र लक्षणशब्दो भावसाधनः । `लक्षणं विदुः' इत्यत्र तु करणसाधनः । लक्षणे लक्ष्यमाणवस्तुप्रकाशने । यद् `आश्रितावधिभावम्,' आश्रितोऽवधिभावो मर्यादारूपं यत्र तल्लक्ष्यतेऽनेनेति लक्षणं ज्ञापकं विदुः जानन्ति तज्ज्ञाः । यत्रावधिभावः प्रज्ञायते हेतावपि तल्लक्षणम् । अत एव तुः' विशेषावद्योतकः । अन्ये त्वाहुः । कार्योत्पत्तावुपयोगो हेतोः, प्रत्ययोत्वत्तौ तु लक्षमस्येति । तदसत् । हेतोरपि प्रत्ययोत्पत्तौ व्यापारदर्शनाद्विद्यादेरपि हि वासादिनिश्रये व्यापाराल्लक्ष्यमाणवस्तूपजने योग्यतामनादृत्यावधित्वेनाश्रितो जनको भवति मा वा भूदिति लक्षणम् । तद्यथा वृक्षमनु विद्योतते विद्युदिति वृक्षो लक्षणं विद्योतनस्य । वृक्षं प्राप्य विद्योतत इत्यर्थः । कथं तर्ह्यनुर्लक्षण इत्यत्र शाकल्यस्य संहितामनु प्रावर्षद् इत्युदाहरणम् । यावता संहिता नावधिमात्रेण वर्षणस्य परिच्छेदिका प्रतीयते , अपि तु जनकत्वेन । जनकश्च हेतुः, न लक्षणमिति हेतुरेवात्र ज्ञापकत्वसामान्याल्लक्षमशब्देनोक्त इत्यविरोधः । ननु च धूमोऽग्निना प्रसिद्धसाहचर्योऽसकृद्दर्शनावधृतः केवलोऽप्यदृश्यमानमग्निं कारणान्तरप्रभवं लक्षयतीत्येवं लक्षणं स्यात् । संहिता तु प्रथममेव दृश्यमाना, न तस्या असकृदृर्शनं दर्शनावृत्तिरस्तीति कथमसौ लक्षणं स्यात् । अत्रोच्यते । यद्यप्येतदस्ति

लोके येनासकृल्लक्ष्यते तल्लक्षणमिति तथापि प्रतीता कार्योदये शक्तिर्यस्य कारणस्य तथाविधमपि कारणं लक्षणं भवति । कार्यस्य हि यः परिच्छेदः तत्र हेतुभावेन कारणमपि लक्षणम्, कार्यपरिच्छेदकत्वात् । यथैव हि भूयोदर्शनेन गृहीताविनाभावोऽन्यं गमयति तथा हेतुरपि परानपेक्षो जनयन् कार्यस्याव्यभिचारात् परिच्छेदकत्वेन भवति लक्षणम् । यथा मेघोदयो वृष्टेः कारणत्वेन निश्चितोऽसत्यामपि वृष्टौ तत्परिच्छेदक इति लक्षणं भवति यल्लोको मेघोदयं दृष्ट्वा वृष्टिमनुमिनोति । नन्वन्वयव्यतिरेकबलाद्धेतुत्वं निश्चीयते । यस्मिन् सति यद्भवति अन्यस्मिंस्तु सत्यपि विना तेन न भवति स तस्य हेतुः । अन्वयव्यतिरेकौ चासकृदृर्शनाद्भवतः । सकृद्दर्शनेऽन्वयव्यतिरेकयोरनिश्चयात् । संहिता च यद्यपि कारणं प्रवर्षणस्य तथापि सकृत्प्रवृत्तेर्न निश्चीयते तत्र कारणत्वम्, तत्कालसन्निहितार्थान्तरादपि कदाचित् कार्योत्पत्तेः संभावनात् । एवं च मेघोदयवन्न लक्षणमसौ युज्यते । अत्र ब्रूमः सकृद्दर्शनादपि हेतुभावोऽवगम्यते । यस्य हि यज्जनकं न भवति तस्मात् सकृदपि तन्न दृश्यते, यथा शाल्यङ्कुरो यवात् । न च तत्कालभवोऽन्यो जनकोऽन्यदा तस्माददृष्टेः । तथा चाहुः

यस्मिन् सति भवत्येव यत्ततोऽन्यस्य कल्पने ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः ।।

इति । न च काकतालीयन्यायेन तत उत्पत्तिः, अतत्स्वभावस्य सतृदप्यजननात् । संहिता च प्रत्यक्षेण दृश्यते वर्ष जनयन्तीति सकृद्दर्शनादपि हेतुभावोऽत्र निश्चीयते । किं चागमादपि हेतुत्वमत्र निश्चितं संहितायाः प्रवर्षण इति हेतुरेवात्र ज्ञापकत्वसामान्याल्लक्षममित्युक्तम् । तदुक्तं भाष्ये

`लक्षणेन हेतुरपि व्याप्तः' (M.Bha. on P.1.4.84)

इति । लक्षमस्य व्यापकत्वात् । कारणमपि हि कार्यं लक्षयल्लक्षणं भवति, यथा मेघोदयो वृष्टेः । न च व्यभिचारः । समग्रस्याविकलस्य जनकत्वात् । तथा विवेचने चाव्यभिचारात् । प्रापणशक्तिश्च प्रामाण्यं न प्रापणमेवेति न्यायः । यदि तर्हि लक्षणशब्देन पदार्थान्तरपरिच्छेदहेतुभावो वर्ण्यते तदाश्रितावधिभावेत्येतत् कथम् । आश्रितावधिभावेऽपि लक्षणे परिच्छेदहतुत्वमेव लक्षणमन्यथा कथमलक्षयल्लक्षणं स्यात् । इयांस्तु विशेषः, यद् वृक्षोऽवधिभावेन परिच्छेदहेतुः, संहितादेस्त्ववधित्वानाश्रयेऽपि ज्ञापकत्वसामान्याल्लक्षणत्वम् । बहुधा हि लक्षणं भवति । क्वचिदवधिभावेन यथा विद्योतमानायास्तडितो वनस्पतिरवसायनिबन्धनम् । क्वचित् कारणावच्छेदेन यथा धूमो वन्हेः । क्वचित् कार्यपरिच्छेदहेतुतया यथा मेघोदयो वृष्टेः । संहितापि चोक्तेन प्रकारेण लक्षणं हेतुश्चेति । यद्येवं

`लक्षणेत्थंभूताख्यान....'(P.1.4.90)

इत्यादिना सामान्यलक्षणेनैव सिद्धायां कर्मप्रवचनीयसंज्ञायां

`अनुर्लक्षणे' (P.1.4.84)

इति पुनर्विधानमनर्थकम् । तदुक्तम् ।

`अनुर्लक्षणेवचनानर्थक्यं सामान्यकृतत्वात्'(Va. on P.1.4.84)

इति । अत्रोत्तरम्---

`हेत्वर्थं तु वचनम्' (Va. on P.1.4.84)

इत्युक्तम् । नायमभिधेयपर्यायोऽर्थशब्दः, किं तु निवृत्तिवचनः । कार्ये च कारण शब्दमुपचर्य हेतुशब्देन हेतुतृतीयोक्ता । बाधोऽपि बाध्यान्नान्येति `हेतुरेवार्थो निवर्त्यो यस्ये'ति समासः । तेन हेतुसंज्ञाबाधनार्थं पुनः संज्ञाविधानमित्युक्तं भवति । ननु च पुनः संज्ञाविधानात् प्रदेशेषु संज्ञिप्रत्ययः स्थिरतरो भवेत् । तृतीया तु कथं बाध्येत । परत्वेन हि बाधिकासौ । नैतत् । असकृद्विधीयमाना संज्ञा

`कर्मप्रवचनीययुक्ते द्वितीया'

इत्यादिप्रदेशेषु द्विरुपतिष्ठते । तत्रैकभुपस्थानं द्वितीयार्थम् । यत्तु द्वितीयमुपस्थानमनुर्लक्षण इति तदनर्थकं मा भूदिति हेतुतृतीयं बाधित्वा द्वितीयमेव स्थिरयति । ननु द्विरुपस्थानात् संज्ञिप्रत्ययो द्विर्भवेत्, न तु द्वितीयाविधिः प्रचयमनुभवति । कार्यार्था संज्ञा गुणभूता । कार्यं द्वितीयाख्यं प्रधानम् । न च गुणभेदे प्रधानभेदः । किमर्थ तर्हि गुणो द्विरुक्तः । निरर्थको

भवतु, न त्वियता प्रदानमावर्तते । यद्यपि च प्रधानमात्मसंस्कारार्थं गुणदेशं गच्छति यथोद्देशे संज्ञापरिभाषे तथापि साकांक्षस्य गुमदेशगमनादेकेनैव गुमेन नैराकांक्ष्यादपरगुणदेशं किमर्थं व्रजेदिति एकैव द्वितीया । तां परत्वात्तृतीया बाधेत । ननु च प्रधानमन्तरेण गुणानां स्वरूपहानप्रसङ्गात् गुणान्तरमकृतार्थं प्रधानान्तरमाविर्भावयेत् । यथा अमात्या राजाभावे स्वात्मनो गुणरूपमीहमाना राजान्तरं स्यापयन्ति । तत्स्थापने तेषामात्मरूपं संपद्यते । राजानमन्तरेणामात्यादेरभावात् । नैतत् समानम्, राजामात्ययोः परस्परमुपकार्योपकारकभावात् । गुणप्रधानभावनियमस्यैवानिश्चयात् । तथा हि राजा प्रकृतीर्धर्मशास्त्रोक्तयां मर्यादायां स्थापयति । स्वयं चानुवर्तते । ताः प्रकृतयोऽपि राजानं विनयन्तीति प्रधानभेदादेव तत्र गुणभेदः । एवं तर्हि उपायविधिरेवोपेयविधिर्भवति । तद्यथा `अनीकस्थो भव' इत्युक्तेऽनीकस्थता हस्तिनामन्नयवसरक्षासंपादनमिति अनीकस्थताविधानद्वारेण तदेव कार्यं विहितं भवति । एवं कर्मप्रवचनीयसंज्ञाविधानद्वारेण तत्कार्यं द्वितीयाख्यमेव विहितं भवति । तथा च पुनर्द्वितीया विधीयमाना बाधकबाधनार्था जायते, येन नाप्राप्तिन्यायेन । संबन्धे हि षष्ठी प्राप्ता, तस्या बाधिका । अत्र वचनसामर्थ्यं निबन्धनम् । अन्यथा पुनः संज्ञाविधानमेव द्वितीयाविधानार्थं कथमुपपद्यते । इत्थं च कृत्वा कल्पनान्तरमप्युपपद्यते । गुणभेदेन प्रधानभेद इति वचनेन न्यायस्य बाधनात् । तथा च भाष्यम्--- `दृष्टान्तस्यापि पुरुषारंभो निवर्तको भवति ' (M. Bha. on P.1.1 85) इति । यद्वा संज्ञाभेदादनुशब्दः संज्ञी भिद्यते । न तु द्वितीयाविधिः प्रधानभूतः, येन न्याय्यो गुणभेदात् प्रधानभेदो भवेत् । संज्ञिभेदाच्च लब्धबलातिशयो द्वितीयाविधिस्तृतीयाविधिं बाधते । यथोद्देशपक्षे च गुणदेशं गच्छत् प्रधानमेकेन गुणेन कृतार्थं न भवति । तत्प्रकरणगतेन सर्वेणार्थित्वात्, संबन्धस्याविशेषात् । अत एव प्रधानान्तरं गुणोऽकृतार्थः कल्पयतु राजान्तरं यथा प्रकृतयः । न च वैसादृश्यं प्रकृतीनां राजकृतोपकारापेक्षित्वेऽपि सर्वथा गुणत्वात् तदङ्गभावपरिपोषार्थमेव हि तत्कृतोपकारापेक्षणम्' न तु स्वप्रधान्यार्थम् । कार्यकालपक्षेऽपि कार्यवाक्ये संज्ञाद्वयं भेदेनैव संज्ञिद्वयमुपपस्थापयति । तस्मात् पुनः संज्ञाविधानलक्षणाद्वचनसामर्थ्यात् प्राप्तातिशयः कक्ष्यान्तरप्राप्तो द्वितीयाविधिः परमपि तृतीयाविधिमपसारयतीत्येव युक्तम् । तथा च वक्ष्यति ।

हेतुहेतुमतोर्योगपरिच्छेदेऽनुना कृते ।
आरंभाद् बाध्यते प्राप्ता तृतीया हेतुलक्षणा ।।

इति । तदित्थमनुर्लक्षण इत्यत्र हेतुरेव लक्षणव्यापकत्वं कथयितुं लक्षमतयोपात्तः सत्यप्यवान्तरभेदेऽनयोः । तथा हि `लक्षणहेत्वोः क्रियायाः' (P.3.2.126)
इत्यत्र लक्षणाद्भेदेन जनकत्वविवक्षया हेतुरुपात्तः । तदेवं निमित्तसामान्यं त्रिधा विभक्तम् । स्वरूपभेदेन क्रियानिर्वर्तकं कारकम्, सामान्येन जनको हेतुः, ज्ञापके लक्षणमिति ।। 14 ।।

जनकत्वसाम्येऽपि हेतुसाधनयोर्विषयभेदात् भेदमाह---

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।

(23) द्रव्यगुणक्रियासाधनसमर्थं वस्तु द्रव्यादीनां हेतुः । तद्यथा बीजेनाङ्कुरः, धनेन कुलम्, कन्यया शोकः, विद्यया यशः, शिल्पाभ्यासेन नैपुण्यम्, अग्निना पाकः । क्रियासाधनसमर्थमप्यनाश्रितव्यापारं हेतुरेवेति पाकादयो यद्यपि क्रियाः तथाप्यत्रोपरतव्यापाराणां सन्निधिनात्रोपकारितया तेजःप्रभृतीनां विवक्षितत्वादविद्यमानकरणभावास्ते हेतुतृतीयया संबध्यन्ते । धनेन सह संपत्तिक्रियाप्रभावितः कुलस्य संबन्धः । कुलस्य हि धनेन प्रसिद्धिरुपजन्यते । तत्र चोपरतव्यापारं धनं योग्यतामात्रात्कुलस्य हेतुरिति शेषषष्ठीबाधिकया हेतुतृतीयया संयुज्यते कन्यापि जनयितुः शोकस्य जननक्रियाद्वारेण । विद्यापि यशस्विना प्राप्यमाणैव यशसो हेतुरिति प्राप्तिकियाजनितोऽत्र शेषसंबन्धः । एवमन्यत्रापि यथायोगमभ्यूह्यम् । शिल्पाभ्यासेन नैपुण्यमध्ययनेन वसतीति गुणक्रियाविषयता हेतोः । क्रियासाधननियतं तु कारकम् । तत्र हि क्रियैव विषयभूता नियता, व्यापाराविष्टत्वं च स्वरूपभेदः । कस्यचित्तु व्यापारविष्टस्यापि क्रियाविषयस्य शास्त्रीयं हेतुत्वमुक्तमित्याह ।

कर्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते ।। 25 ।।

कर्ता प्रयोजकः प्रयोज्यकर्तृशक्तिव्यवधानेन क्रियायमुपयुज्यमानः प्रयोज्यकर्तारं प्रेषयन् तत्प्रयोजको हेतुः इति शास्त्रे हेतुत्वेनेष्यते । वचनात् कारकविशेषोऽपि न त्वयं रूढो हेतुरित्यर्थः ।। 25 ।।

इदानीं क्रियाविषयत्वे समानेऽपि हेतुकारणयोर्विशेषमाह ।
क्रियायै करणन्तस्य दृष्टः प्रतिनिधिस्तथा ।
हेत्वर्था तु क्रिया तस्मान्न स प्रतिनिधीयते ।। 26 ।।

(24) क्रियासाधनाय प्रकृष्टोपकारकं करणमप्रधानम्, क्रिया तु साध्य स्वभावा प्रधानम् । अत एव प्रधानानुरोधित्वाद् गुणानामसति श्रुते करणे शिष्टैः प्रतिनिधिराचरितः । प्रधानभूता हि क्रिया साध्यत्वात् योग्यसाधनाक्षेपसमर्थेति साधनसामान्यस्याक्षेपेऽध्यावापार्थं श्रुतः साधनविनियोग इति तदसंभवेऽपि प्रधानेन क्रियास्वरूपेण यदाक्षिप्तं साधनसामान्यं तद्विशेषान्तरेणापि परिपोष्यमाणं न श्रौतार्थत्यागाय प्रभवति । सामान्यस्यापि श्रुतत्वात् तस्य च सर्वविशेषस्वीकारयोग्यत्वादिति प्रतिनिध्युपपत्तिः पूर्वमेव चर्चिता विस्तरतः । अङ्गभ्रेषेऽपि प्रधानानुच्छेदात् प्रदानक्रियास्वरूपसंरक्षणाय शिष्टैः संप्रदायपारंपर्यावगतं सदृशमङ्गं मुख्यबुद्ध्यैवोपादीयत इति क्रियायाः प्राधान्यस्यैतत् फलम् । अत एव केचित् करणशब्दोऽत्र सर्वकारकवचनो जातौ चैकवचनमिति सर्वाणि कारकाणि गुणभूतानीति गुणस्य प्रतिनिधिरुपपद्यत इति व्याचक्षते । अध्ययनेन वसतीति तु वसतिक्रियाऽऽख्यातात् प्राधान्येनापि प्रतीयमाना वस्तुसामर्थ्यादध्ययनाख्यहेतुपरतन्त्रा । तथा ह्यध्ययनार्थो ममात्र वास इति वक्तारो भवन्ति । न च गुणानुरोधि प्रधानमित्यध्ययनाभावे वासार्थमन्यत् किंचिदत्र प्रतिनिधातुं युक्तम् । अन्यस्य ह्युपादाने तादर्थ्यं क्रिययाः प्रतीयेतेति तदानीं स एव मुख्यो हेतुः स्यात् । तस्मादध्ययनेन वसतीति नेयं करणतृतीया, अपि तु हेतुतृतीयैवेति । न ह्यध्ययनेन व्यापाराविष्टेन वासो निर्वर्त्यते अपि तु वासस्याध्ययनमेव संपाद्यं प्रधानमिति निर्व्यापारं योग्यतामात्रेणोद्देश्यमध्ययनं वासस्य हेतुः । व्यापाराविष्टत्वेऽध्ययनस्य वासं प्रत्यानुकूल्यविवक्षायां भिक्षादिवत् तत्समर्थाचरणात् प्रयोजककर्तृत्वम् , अध्ययने वासयतीति । तदेवं कारकविषये क्रियाप्रधानं कारकं गुणभूतम् । हेतुविषये तु विपर्यय इत्यनेनापि विशेषेण कारकाद्धेतोर्यतिरेक उक्तः ।। 26 ।।

इदानीं चतुर्थीविषयं तादर्थ्यं तृतीयाविषयाद्धेतोर्यतिरेचयितुमाह ।
प्रतिलोम्यानुलोम्याभ्यां हेतुरर्थस्य साधकः ।
तादर्थ्यमानुलोम्येन हेतुत्वानुगतं तु तत् ।। 27 ।।

(25) अपचीयमानावस्थो हेतुरपतिकमेव कार्यं जनयन् प्रातिलोम्योपलक्षितः । तद्यथा जलमातपसंसर्गविशेषोपजातापचितरूपमुत्तरोत्तरापचिततरापचिततमलक्षणावस्थापरंपरासादनानुगुणम् । अर्थान्तरसंसर्गोपचीयमानरूपविशेषं तु कार्यमुपचिततरमेव जनयन् कारणमानुकूल्योपलक्षितो हेतुः । तद्यथा बीजमुदकातपसंयोगाहितविशेषमुच्छूनतरावस्थमङ्कुरप्रसवसमर्थम् । इत्थं द्विप्रकारो हेतुः । तद्विशेषस्तु तादर्थ्यम् । आनुकूल्यैकनियतमर्थसिद्धिनिमित्तमानुकूल्येन यद्धेतुत्वं जनकत्वं तदनुगतं हेतुविशेषरूपम् । तादर्थ्यं कार्यकारणसंबन्धस्योद्भूतरूपमित्यर्थः । तत्र चतुर्थी तदनुगतं हेतुविशेषरूपम् । तादर्थ्यं कार्यकारणसंबन्धस्योद्भूतरूपमित्यर्थः । तत्र चतुर्थी कुण्डलाय हिरण्यमिति । `तस्मा इदं तदर्थम्' इति इदमोपकारकस्य निर्देशः,तच्छब्देनोपकार्यस्य । समासाद्भावप्रत्ययेन संबन्धस्योद्भूतरूपाभिधानम् । तत्र चोत्तरपदार्थस्य कारणरूपस्य प्रज्ञापनीयत्वेन प्राधान्यात्तच्छब्दवाच्ये गुणे संबन्धः पदं बध्नाति । तत्र ह्यसावुद्भूत इति तादर्थ्ये कारणस्योपकारित्वे गम्यमाने कार्यकारणसंबन्धोद्भवे चतुर्थी विधीयमाना कार्यवाचिन एव भवति । तथैव कारणगतस्यापि संबन्धस्य निर्भोगात् । कारणवचनात्तृतीया न भवति । कार्यमेव प्रयोजकतया परिणतं तदर्थमित्युच्यत इत्ययुक्तमभिधानम् । उत्तरपदार्थप्रधानत्वात्तदर्थशब्दस्य कारणवचनता न्याय्या यतः । अत एव हेतुत्वानुगतं तादर्थ्यम् । कारणविशेषो न कार्यम् । यदर्थमस्य गमनं तदनेन साधितमित्यत्र तूपसर्जनस्यैव यच्छब्देनोद्दिष्टस्य समानाधिकरणेन तच्छब्देन निर्देशात् सर्वनामर्थः कार्ययोगी युक्तः । न त्वेतावतेह सर्वनामार्थस्य प्राधान्यमुत्तरपदार्थे गुणत्वात् ।। 27 ।।

तदेवं कारकं हेतुर्लक्षणं तादर्थ्यमिति निमित्तत्वसाम्येऽपि प्रविभक्तस्वरूपविषयाः पदार्थाः इति न तत्र लक्षमसाङ्कर्यप्रसङ्ग इत्यानुषङ्गिकेऽर्थे निर्णीते प्रस्तुतमेव कारकविषयं विचारं प्रस्तावयितुमाह ।
सर्वत्र सहजा शक्तिर्यावद्द्रव्यमस्थिता ।
क्रियाकाले त्वभिव्यक्तेराश्रयादुपरकारिणी ।। 28 ।।

(26) अनित्यानां पदार्थानां स्वहेतोरेव शक्तानामुद्भव इति सहजाता शक्तिः । न ह्यनाधेयातिशयत्वाद् भावानामशक्तस्योत्पत्तावनन्तरमाधातुं शक्यते शक्तिः । नित्यानां तु स्वाभाविकी शक्तिः । आश्रयसमवेतास्तु शक्तयः । तदपाये निराधारा नावस्थातुं पारयन्तीति यावद्द्रव्यभाविन्यः । एवमपि सहकारिसन्निधाने स्वकार्योद्युक्ताः शक्त्याभिव्यक्तिमाश्रयन्ते भावा इत्यभिव्यक्तिकाल एव कार्योपयोगित्वात् साधनमित्युच्यन्ते नान्यदा सत्वेऽपि । तथा हि ।

कुड्यस्यावरणे शक्तिरस्यादीनां विदारणे ।

सर्वदा स तु सन् धर्मः क्रियाकाले निरूप्यते ।। 29 ।।

(27) आवरकं कुड्यम्, पाटकं च शस्त्रम् , छेद्यावरीतव्यवस्तुसन्निधाने ज्ञायत इति विद्यमाना शक्तिर्विषयायत्ताऽभिव्यक्तिः । परिच्छिद्यते त्रिकालाऽप्यर्वाग्दर्शनैः । उपादाननियमाद्धि कार्यात् पूर्वमपि शक्तिरस्ति । पुनरपि कार्यकारणादुत्तरकालमपि । आगमेनाप्येतत् संवादयति ।

स्वाङ्गसंयोगिनः पाशा दैत्यानां वारुणा यथा ।

व्यज्यन्ते विजिगीषूणां द्रव्याणां शक्तयस्तथा ।। 30 ।।

(28) दैत्यानां स्वकर्मनिर्माणा वारुणाः पाशाः स्वहस्ततलावलीनाः सदा सन्निहिताः शक्तिरूपेणेत्यागमः । ते तु परसैन्यावजयवेलायामभिव्यज्यन्त इति श्रूयते । एवं द्रव्याणां सदा सन्निहिताः शक्तयः स्वकार्यनिष्पादनकाले प्रकाशन्त इत्यपि युक्तम् ।। 30 ।।

यदुक्तमस्त्रादीनां विदारणे शक्तिरिति तदेव प्रतन्यते ।

तैक्ष्ण्यगौरवकाठिन्यसंस्थानैः स्वैरसिर्यदा ।

छेद्यं प्रति व्याप्रियते शक्तिमान् गृह्यते तदा ।। 31 ।।

(29) निबिडतरसंहननानामवयवानां क्रमेणाग्रे सूक्ष्मीभवतां तनुत्वप्रकर्षस्तैक्ष्ण्यम्, छेदनिमित्तं धर्मः । भिन्नजातीयावयवसंभेदविच्छेदे विच्छिन्नान्तरालानामवयवानामुपचयाद् गौरवं निपतनहेतुर्धर्मः । तापनोत्तेजितानां लोहावयवानां निबिडत्वं काठिन्यं नाम धर्मो यतः प्रहारविशेषो निष्पद्यते । संनिवेशविशेषो मण्डलाग्रादिव्यपदेशनिबन्धनमस्यन्तराद्विभागहेतुः संस्थानम् । यतः प्रहारवैचित्र्यमाजायते । तदेतैर्धर्मैरसियष्टिश्छेद्यविपाटनमारभमाणा शक्तिमतीति गृह्यते । व्यापारशून्या तु सत्स्वप्येतेषु धर्मेषु न तथावसीयते । एवमन्येषामपि पदार्थानां यथायोगं वाच्यम् । असेरुपलक्षणत्वात् ।। 31 ।।

पक्षान्तराण्यप्यत्र साधने संभवन्तीत्याह ।

प्राङ् निमित्तान्तरोद्भूतं क्रियायाः कैश्चिदिष्यते ।

साधनं सहजं कैश्चित् क्रियान्यैः पूर्वमिष्यते ।। 32 ।।

(30) सिद्धे सत्वेऽभिव्यक्तिप्रतीक्षा शोभते । सत्त्वमेव तु शक्तीनां कार्यानुमेयत्वात् क्रियातः पूर्वमसिद्धमिति क्रियायाः पूर्वमपेक्षणीयान्निमित्ताच्छक्तयो द्रव्याणां क्रियानुगुणा जायन्त एव । सत्वेऽप्यभिव्यक्तिनिमित्तमपेक्षणीयमिति तदेव जनकम् । तथा हि सहकारिसव्यपेक्षाणां भावानां जनकत्वात् परस्परहितशक्तयस्ते स्वकार्यहेतव इत्युन्नीयन्ते, केवलानामजनकत्वात् न तदानीं शक्ता इति न स्वाधारजनकादेव शक्तिजन्म, अपि तु निमित्तान्तरादेव । प्रत्यभिज्ञायमानत्वाच्च शक्ताशक्तत्वेऽपि न वस्तुभेद इति केचित् । अत एवोपादाननियमोऽपि योग्यतावधारणत् सिद्धः । अन्ये तु शक्तेर्वस्तुनोऽनन्यत्वात् स्वभावभेद एव शक्ताशक्तत्वे मन्यन्ते । सहजं कैश्चित् सादनं शक्तिर्द्रव्याणामिष्यत इति पूर्वप्रतिपादितपक्षानुवादः । केचितु न येनैव कारणेन क्रिया जन्यते तेनैय साधनम्, अपि त्वन्येनैवेति क्रियापेक्षया निमित्तान्तरत्वं मन्यमानाः सहजत्वमपि क्रियापेक्षयैव व्याचक्षते । तथा हि इतरेतरस्य शक्तिमर्पयन्तः क्रियां निर्वर्तयन्ति भावाः सहकारिणः इति साधनशक्तिभिः सहैव क्रियाणां व्यापाररूपाणां जन्म मन्यते । तथा च येभ्य एव क्रिया जायन्ते तेभ्य एव शक्तय इति सहजत्वम् । उपजातशक्तयस्तु क्षणान्तरे क्रियानिर्वर्तका इति साध्यसाधनभावे नास्ति क्षतिः न हि साध्यसाधनयोः सहभावः प्रमाणोपपन्नः ।। 32 ।।

अन्ये तु साधनात् पूर्वभाविनीं क्रियां मन्यन्ते । तत् कथं युज्यत इत्याह । प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।

शक्तिरेकाधिकरणे स्रोतोवदपकर्षति ।। 33 ।।

(31) अनपेक्षितहेतुव्यापारा नित्या क्रिया अनपाश्रिता क्वचिदपि भण्यते । स्वाश्रये तु समवेतैव । अत एव तत्राश्रये साधनशक्तीराविर्भावयति प्रतिनियतस्वकार्यसंपादिकाः । अन्ये त्वनाश्रितैवेत्याहुः । सततव्यापारप्रवहद्रूपा नदीप्रवाह इव तृणपर्णलतादीन् साधनशक्तिः प्रवृत्तिलक्षणा क्रिया कर्षति वहतीति केषांचिज्जरन्मीमांसकानामागमः । रजोलक्षणा वा प्रवृत्तिर्नित्या सर्वभावेष्वनुयायिनी स्वकार्यप्रसवसमर्था कार्याणि जनयतीति सांख्यनयः । व्यापाराविष्टस्य सर्वस्य कार्यजनकत्वाद् व्यापारः पूर्वभावी समवस्थितः । तेन च शक्त्याक्षेप इति युक्तम् ।। 33 ।।

केयं प्रवृत्तिरनपाश्रया नित्येत्याह ।

[इतो ग्रन्थपातसन्धानाय फुल्लराजकृतिर्लिख्यते ।]

इदानीं मतान्तरानुसारेण साधनस्वरूपं वर्णयितुमाह ।

अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा ।

तमेवंलक्षणं भावं केचिदाहुः कथंचन ।। 34 ।।

(32) अपूर्वं धर्माधर्माख्यमदृष्टसंज्ञकं केचिदेवंरूपं तं सामर्थ्यलक्षणं भावमाहुः । अदृष्टवशाद्धि सर्वं भवति वा न वेत्यदृष्टमेव सर्वकार्याणां निमित्तं बोद्धव्यम् । केचित्तु वादिनः कालशक्तिम् एव भगवतो ब्रह्मणः संबन्धिनीं साधनमाहुः । कालशक्त्यनुप्राणितं हि सर्वं क्रियायै प्रभवति । क्रियां वा राजसीमनन्तरोपवर्णितस्वरूपा साधनमाहुः । न तूत्तरकालभावि किंचन साधनं नाम शक्यं निरूपयितुम् । पूर्वं क्रियामूलं सादनं व्याख्यातम् । अधुना क्रियैव साधनमिति विशेषः । सैव हि स्वयं प्रवर्तमाना विशेषीभवतीति कालमेवा वा नित्यमेकमित्यादिलक्षणलक्षितं द्रव्यकालवादिनः साधनमाहुः । कालवशाद्धि सर्वे भावाः प्रभवन्ति कार्यसंपत्तये इति काल एव साधनम् । यथा वक्ष्यति

`यदि न प्रतिबध्नयात्...' (Vak.III का. v.5)

इति ।। 34 ।।

अथ शक्तेः सामर्थ्यलक्षणायाः साधनत्वेन पूर्वं निरूपितायाः संख्याविचारं कर्तुमाह ।

नित्याः षट् शक्तयोऽन्येषां भेदाभेदसमन्विताः ।

क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः ।। 35 ।।

(33) अन्येषां मतेनार्थेषु नित्याः पट् शक्तयः पृथग्लक्षणलक्षिताः कर्माद्या व्यवस्थिता इति स्थितम् । कीदृश्यः । भेदाभेदसमन्विताः, एकान्तेनार्थेभ्यश्चेद्भेदसमन्विता अभिधीयेरन्नर्थस्य शक्तिवैकल्यान्नीरूपता स्यात् । अथाभिन्नाः कथ्यन्ते तर्हि विभिन्नकार्योदयो नावतिष्ठते । तस्मात् कथंचिद् भेदेन, कथंचिदभेदेनेति भेदाभेदाभ्यां समन्विताः शक्तयोऽर्थजातिवदवस्थिताः यथा सत्वद्रव्यत्वगोत्वशाबलेयत्वादिजातयः सततं भेदाभेदसमन्वयेनार्थेष्वित्येके मन्यन्ते ।। 35 ।।

तासां तु द्रव्यादिभेदेनानन्त्येऽपि षट्त्वमेव षड्विधत्वमेव तत्त्वं नातिवर्तत इत्याह ।

द्रव्याकारादिभेदेन ताश्चापरिमिता इव ।

दृश्यन्ते तत्त्वसायां तु षट् शक्तीर्नातिवर्तते ।। 36 ।।

(34) द्रव्यभेदेन भिन्ना शक्तिः । यथा दात्रमन्यथा छिनत्ति, खड्गोऽन्यथेति । आकारभेदेन खड्गोऽन्यथा खड्गलता त्वन्यथेति । आदिग्रहणाद्देशकालभेदेन सैव दहनशक्तिरग्निवैचित्र्यमुपयाति, षट्त्वं पुनस्तत्स्वरूपं नातिक्रामति ।। 36 ।।

अथैकैव शक्तिर्निमित्तभेदाद्विशेषरूपतया षोढात्वमापन्ना वा साधनमित्याह ।

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।

षोढा कर्तृत्वमेबाहुस्तत्प्रवृत्तेर्निबन्धनम् ।। 37 ।।

(35) यस्मात् कर्तृत्वमेव निमित्तभेदेनेप्सिततमत्वादिना ज्वलनत्वादिना वा षोढावस्थितः सन् तत्प्रवृत्तेः शक्तिभेदप्रवृत्तेः कारकव्यवहारभेदस्य निबन्धनं निमित्तभूतं बोद्धव्यम् । यथोक्तम्-एधाः पक्ष्यन्त्या विक्लित्तेः ज्वलिष्यन्तीति ज्वलनक्रियाकरणस्य पाक इत्यादिन्यायेन कर्तृत्वमेवावान्तरव्यापारविवक्षया करणादिव्यपदेशरूपतां भजते ।। 37 ।।

तदेवमेकानेका वा शक्तिरुपपादिता । अथासौ व्यतिरिक्ता वा स्यादव्यतिरिक्ता वेत्याशङ्क्याह---
तत्त्वे वा व्यतिरेके वा व्यतिरिक्तं तदुच्यते ।
शब्दप्रमाणको लोकः स शास्त्रेणानुगम्यते ।। 38 ।।
(36) भेदाभेदाभ्यां तावदनिर्वाच्यसौ केवलं भेदाभेदसमन्वितेत्युक्तम् । अथात्र निष्कोषाणिकां करोषि तत्त्वया सहास्माकं किं प्रयोजनम् । सर्वथा शक्तिशक्तिमतोरेकान्तेन तत्त्वमव्यतिरेको वाभेद एव वा । वैयाकरणनयानुसारिभिस्त्वस्माभिः सामर्थ्यं व्यतिरिक्तमेवोच्यते । यस्मात् शब्दप्रमाणको लोकः । शास्त्रेम चानेन स एवानुगम्यत इत्याह `स शास्त्रेणानुगम्यते । लोकप्रतीत्यनुसारेण हि शब्दस्यार्थो वितन्यते । लोकश्च शब्दक्रियानिमित्तायाः शक्तेर्व्यतिरेकमेवानुगच्छति । अव्यतिरेके हि सततं क्रियानिष्पत्तिप्रसङ्ग इत्युक्तम् ।। 38 ।।
अथ परमार्थपर्यालोचनां विना न निर्वृतिमुपलभसे तदत्रोच्यते किंचिदित्याह ।
परमार्थे तु नैकत्वं पृथक्त्वादि्भन्नलक्षणम् ।
पृथक्त्वैकत्वरूपेण तत्त्वमेव प्रकाशते ।। 39 ।।
(37) पृथक्त्वादि्भन्नलक्षणं पृथक्त्वव्यतिरिक्तं नैकत्वमस्ति, पृथक्त्वैकत्वरूपेण हि तत्त्वमेव प्रकाशते । तद्धि व्यतहारदशायां पृथक्त्वेन प्रकाशते । अविद्याविलये त्वेकत्वेन प्रकाशते इति बोद्धव्यम् ।। 39 ।।
एतदेव व्याख्यातुमाह ।
यत् पृथक्त्वमसंदिग्धं तदेकत्वान्न भिद्यते ।
यदेकत्वमसंदिग्धं तत् पृथक्त्वान्न भिद्यते ।। 40 ।।
(38) असंदिग्धं याथात्म्यावगमात् सन्देहं विना कृतं यत् पृथक्त्वं तदेकत्वान्न भिद्यते । यच्चैकत्वमसंदिग्धं विगतभ्रमं तत् पृथक्त्वान् नानात्वान् न भिद्यते ।। 40 ।।
तथा च यदैकत्वं काष्ठामनुप्राप्तं तदा सर्वत्र तदेव प्रकाशत इत्याह ।
द्यौः क्षमा वायुरादित्यः सागराः सरितो दिशः ।
अन्तः करणतत्त्वस्य भागा बहिरवस्थिताः ।। 41 ।।
(39) अथवास्तां कतिपयवस्तुविषयो नानात्वैकत्वविचारः । य इमे द्यौश्चाकाशं च पृथिवी च द्यावापृथिव्यौ महत्यौ महाभूतसंज्ञिके वस्तुनी, तदन्तरे च वायुरपि तृतीयः, तथादित्यलक्षणमपि सकलतेजसां प्रधानं दिव्यं तेजः, आपः सरित्समुद्रा वा विकाराः, सर्वाण्येतानि महाभूतानि सकलजगज्जीवितभूतानि, दिशो वा लोकव्यवहारनिमित्तभूताः, कालश्च वक्ष्यमाणः, तदेतत् सर्वम् `अन्तःकरणतत्त्वस्य' इति अन्तःकरणसंज्ञकं अन्तःकरणत्वेनान्तररूपतया प्रतिभासमानं यत् तत्त्वं तस्यैवैते भागाः प्रतिबिंबकाः आभासा बहिरवस्थिताः । परमार्थे तु कीदृशोऽन्तर्बहिर्भावः । एकमेव संविन्मयं परं शब्दब्रह्म तथा तथावस्थितमिति कारिकार्थः ।। 41 ।।
महाभूतरूपत्वं दिग्रूपतां चाभिधाय कालरूपतां तस्यैव प्रतिपादयन्नाह ।
कालविच्छेदरूपेण तदेवैकमवस्थितम् ।
स ह्यपूर्वापरो भागः पररूपेण लक्ष्यते ।। 42 ।।
(40) स ह्यपूर्वापरः परमार्थेन । अथवा कालशक्तिवशात् चिरक्षिप्रादिक्रमेण लक्ष्यते । तदेवं पदार्थसामर्थ्येन लोकप्रसिद्ध्या वैयाकरणमतेन साधनम् । अथ वा बुद्धिप्रकल्पनारूपं विज्ञानवादाभिप्रायेण, संसर्गिरूपं वा पदार्थान्तरभूतं संसर्गवादानुसारेण, अदृष्टलक्षणपूर्वशब्दवाच्यं वा मीमांसकदृष्ट्या, ब्रह्मसंबन्धिनी ला कालशक्तिरद्वैतदर्शनेन, क्रिया राजसी प्रवृत्तिरूपा वा सांख्यदर्शनानुसारेण, नित्यमेकं द्रव्यलक्षणं वा कालरूपं द्रव्यकालवादिनां मतेन विज्ञायम् । साधनप्रस्तावेन च कारकशब्दविचारः तत् प्रसङ्गेन च हेतुलक्षणकारककरणतादर्थ्यानां भेदनिरूपणपूर्वकं लेशतः स्वरूपमुक्तम् । ततः शक्तेः किं सह प्रागुत्तरकालं वा भाव इति कालविकल्पः । सा च किं कर्मदिभेदेन भिन्नैवाहोस्विदेकैव तथा तथा परिकल्प्यत इति

संख्याविकल्पः । सा च किं पदार्थाद्व्यतिरिक्तैवाथाव्यतिरिक्तेति व्यतिरेकाव्यतिरेकचिन्ता तत्प्रस्तावेन च ब्रह्मस्वरूपनिरूपणमिति प्रकरणस्य समुदायार्थः ।। 42 ।।

इदानीं प्रकृतं वैयाकरणमतमेवानुबध्नन् शक्तेर्व्यतिरेकमेवान्वयव्यतिरेकमुखेन परिघटयन् सद्भावमुपपादयितुमाह ।

दृष्टो ह्यव्यतिरेकेऽपि व्यतिरेकोऽन्वयेऽसति ।
वृक्षाद्यर्थान्लयस्तस्माद्विभक्त्यर्थोऽन्य इष्यते ।। 43 ।।

(41) अव्यतिरेके अभेदेऽपि प्रकृत्यर्थस्य वृक्षो वृक्षं वृक्षेण वृक्षायेत्यादौ विभक्त्यर्थस्य साधनलक्षणस्य व्यतिरेकः तथा तत्रैव विभक्त्यर्थस्यासत्यन्वये प्रातिपदिकार्थस्यान्वयोऽनुगमो दृष्टः । ततो मन्यामहे अस्ति कश्चिद् व्यतिरिक्तः प्रत्ययार्थभूतोऽनपह्नवनीयः साधनलक्षणः शक्तिशब्दवाच्योऽर्थ इति साधनसिद्धिः ।। 43 ।।

इदानीं व्याख्यातस्योपसंहाराय व्याख्येयस्योपक्रमाय कारिकामाह ।

सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः ।
षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी ।। 44 ।।

(42) सामान्यं कारकमिति व्याख्यातार्थोपसंहारः । तस्य सप्तेत्यादिना व्याख्येयार्थोपोद्घातः । तत्र आद्याः प्रधानभूताः सामान्यसाधनापेक्षया भेदरूपाश्च ता योनयः स्वकानां भेदानामिति भेदयोनयः । अथ वाद्याः सप्त भेदानां च स्वकानां योनयः कारणानि । कथमित्याह `षट् कर्माख्यादिभेदेन' इत्यादि । कर्मादिव्यपदेशभेदेन सप्त कारकशक्तयो लक्ष्यन्तेऽधुनेति साधनसमुद्देशसङ्गतिः ।। 44 ।।

कर्मादिभेदेन सप्तभेदभिन्ना तावत् कारकमुद्दिष्टम् । अथ तदनुक्रमेण कर्म तावत् संख्याभेदप्रदर्शनपूर्वकं व्याख्यातुमाह ।

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ।। 45 ।।

(43) कारकविशेषनिर्देशश्च विभक्त्यनुक्रमानुसारेणेह प्रदर्शितः । सूत्रेषु तु विप्रतिषेधपरिभाषामनुरुध्यापादानादिक्रमेणोक्तम् । तत्र विभक्तयः स्वौजसमाद्याः । कारकमभिहितमनभिहितं च भवति । तत्र प्रथमाभिहितकारकविभक्तिः प्रातिपदिकार्थमात्र एव विधीयते । द्वितीयादयश्च सर्वा अनभिहिते कारकविभक्तय इत्येकप्रकमत्वाद् द्वितीयाद्यर्थानुसारेणैवोपक्रमे । द्वितीयाद्यर्थश्च कर्मादिः । यदुक्तम्

`कर्मणि द्वितीया' (P.2.3.2)

इत्यादि । अतः कर्मण एवादौ व्याख्यावसरप्राप्ता । तत्र कर्तुः क्रियया यदीप्सिततममाप्तुमिष्यमाणतमं तदेव लक्षणं प्रथमसूत्रनिर्दिष्टम् । कर्म त्रिधा त्रिभिः प्रकारैः निर्वर्त्यविकार्यप्राप्यरूपैर्भिन्नमनेकान्तर्निर्दिष्टं बोद्धव्यम् । अथा अन्यत् सूत्रान्तरनिर्दिष्टमपि भेदायितुमाह चतुर्धान्यत्तु कल्पितम् इति ।। 45 ।।

कथमित्याह ।

औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ।। 46 ।।

(44) औदसीन्येन ताटस्थ्येन यत् प्राप्यम् । यथा ग्रामं गन्तुर्वृक्षमूलादि । तथा यत कर्तुरिनीप्सितम् चोरविषादि । एतत्

`तथायुक्तं च नीप्सितम्' (P.1.4.50)

इति द्वितीयसूत्रनिर्दिष्टं तावद् द्विविधम् । तथा च येनैव प्रकारेण कर्तुरीप्सिततमं तेनैव चेत् अनीप्सितम् ईप्सितादन्यद् द्वेष्यं विषादि, इतरच्च यदौदासीन्येन प्राप्यं वृक्षमूलाद्युक्तम् । तथा संज्ञान्तरैः अपादानादिसंज्ञाभिरनाख्यातमपि क्रियानिमित्तम् । एतद्

`अकथितम् च' (P.1.4.51)

इति तृतीयसूत्रनिर्दिष्टं वेदितव्यम् । तथा `यद् यच्चाप्यन्यपूर्वकम्' इति । अन्यत् कारकं पूर्वं यस्य ।

यथा `देवदत्तमभिक्रुध्यति', `देवदत्तमभिद्रुह्यति' इति । अत्र हि

`क्रुधद्रुहोरुपसृष्टयोः कर्म' P.1.4.38

इत्यनेन कुधद्रुहोरुपसृष्टयोः उपसर्गसंबन्धयोः यं प्रति कोपः तत् कारकं पूर्वसूत्रेण संप्रदानसंज्ञमपि कर्मसंज्ञमेव भवति । तथाक्षान् दीव्यतीत्यत्र

`दिवः कर्म च '(P.1.4.43)

इत्यनेन दिवः साधकतमं यत् पूर्वसूत्रेण करणसंज्ञमेव कर्मसंज्ञं भवति ।। 46 ।।

अथ निर्वर्त्यादि त्रिविधमुद्दिष्टं व्याख्यातुमाह ।

सती वाविद्यमाना वा प्रकृतिः परिणामिनी ।

यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।। 47 ।।

(45) यस्य निर्वर्त्यमानस्य घटादेः प्रकृतिः सती वा यथा मुदादिका, अविद्यमाना वा यथा शब्दः संयोगादेः परिणामिनी अभेदेन नाश्रीयते मृदं घटं करोतीत्याद्येवंरूपतया न विवक्ष्यते, किं तर्हि, मृदा घटं करोतीत्यादिभेदेनैव । यदा प्रकृत्या सह विवक्षा तदा तन्निर्वर्त्यं कर्म प्रचक्षते कर्मविदः ।

विकार्यं व्याख्यातुमाह---

प्रकृतेस्तु विवक्षायां विकार्यम्

(46) प्रकृतेः कारमस्य परिणाभित्वेन यदा विवक्षा क्रियते मृदं घटं करोति, काशान् कटं करोति, अङ्गारान् भस्म करोति इत्यादि तदा विकार्यं कर्म प्रचक्षते । अथापरय मतान्तरोपन्यासच्छलेन प्रकारभेदकथनवाञ्छया निर्वर्त्यविकार्ये निरूपयितुमाह---

कैश्चिदन्यथा

निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।। 48 ।।

कथमित्याह

यदसज्जायते सद्वा जन्मना यत्प्रकाश्यते ।

तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ।। 49 ।।

(47) यदसद् वैशेषिकाद्यनुसारेण जायते सांख्यमतेन सदेव वा जायते तदुभयमपि जन्मना प्रकास्यमानत्वान्निर्वर्त्यं कथ्यते । एतदुक्तं भवति । सत्कार्यवादिनामस्माकं निर्वर्त्यं कर्मास्तीति वक्तुं पार्यते । सती तस्य प्रकृतिर्भवत्वसती वा । सर्वथा जन्मना प्रकास्यमानत्वेन निर्वर्त्यत्वस्य न काचित् न क्षतिः । सदसद्वा जन्मना यत् प्रकाश्यते तन्निर्वर्त्यम् । असज्जायते इत्यविद्यमानप्रकृतेः कर्मणा निर्वर्त्यमानता पूर्वोक्तैवानूदिता, असज्जन्मना प्रकाश्यत इति । अयमत्र विशेषः । तद्यथा पुत्रं प्रसूते, शब्दं प्रयुङ्क्ते इत्यत्र कुक्षिस्थस्य सत एव पुत्रस्य विवक्षितस्य च शब्दस्य प्रसवप्रयोगाभ्यां प्रकाशनम् । सतः प्रकाशनं हि जन्मात्र विवक्षितस्य च शब्दस्य प्रसवप्रयोगाभ्यां प्रकाशनम् । सतः प्रकाशनं हि जन्मात्र विवक्षितम् । जन्मग्रहणेन प्रवृतिविवक्षायां विकार्यतामाह । अन्यथाभिव्यज्यमानस्य निर्वर्त्यकर्मताभावमपि जन्मग्रहणेनाह । तेन वेदमधीते इत्यादौ वेदादेरध्ययनेन प्रकाश्यमानस्य निर्वर्त्यकर्मताभावात्

"कर्मणि निर्वर्त्यमानविक्रियमाणे इति चेद् वेदाध्यायादीनामुपसंख्यानम् ।"

(Va. on P.3.2.1)

इत्युच्ते । इत्थं च प्रकृत्यर्थविवक्षायमेवैतन्निर्वर्त्यं कर्पोक्तमिति

कैश्चिदन्यथा

इत्यसङ्गम् । तस्मात् सदसत्कार्यवादिमतभेदेनैतद् व्याख्येयम् । पूर्वं लोकप्रतीत्यनुसारेणोक्तम् । इह तु तीर्थिकमताश्रयेणापीति विशेषः ।। 49 ।।

"विकार्यं च कर्म द्वेधा व्यवस्थितम्" । प्रतिव्यक्ति लक्षणं वक्तुं व्यक्तिभेदः पूर्वमुक्तः । लक्षणमाह---

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत् ।

किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।। 50 ।।

(48) निरन्वयविनाशात् प्रकृतेरुच्छेदः । तद्यथा काष्ठादेर्भस्मादि । काष्ठानि भस्म करोति । पूर्ववत् प्रकृतिविकारयोः क्रियासंबन्धो योज्यः । पूर्वेण तु लक्षणेन निर्वर्त्यमेतत् कर्म प्रकृतेरविवक्षायाम् । विवक्षायां तु विकार्यम् । इह त्वविवक्षायामपि प्रकृतौ भस्मादिकार्यं रूपविशेषादेव काष्ठादिमुपमृद्योपजातमिति प्रतितेर्विकार्यम् । पूर्वत्र तु प्रकृतिः साक्षाद्विकार्यं कर्म, तदभेदेन विकारोऽपि । इह तु साक्षाद्विकार एवेति विशेषः । काष्ठानि दहतीति तु प्रकृतिरेव शब्दवती, सामर्थ्यगम्यस्तु विकारो भस्म् । एवं काण्डानि लुनाति, चर्म करोतीत्यादौ वेदितव्यम् । काचित्तु प्रकृतिरत्यजन्ती स्वरूपं संस्तानान्तरापत्त्या विकृतेत्युच्यते इति गुणान्तरस्य सन्निवेशादेर्धर्मस्योत्पत्त्योपलक्षितमपरं विकार्यं कर्म । तद्यथा सुवर्णी कुण्डले भवत इति । असत्कार्यनये यद्यप्यत्रापूर्वोत्पत्तिः तथापि प्रत्यभिज्ञानाल्लोके तत्त्वाध्यवसायाद्गुणान्तरमात्रापत्तिरुच्यते । एतच्च प्रकृतिविवक्षायां पूर्वलक्षणेनापि सङ्गृहीतम् ।। 50 ।।

इदानीं प्राप्यकर्मलक्षणमाह---

क्रियागतविशेषणां सिद्धिर्यत्र न गम्यते ।

दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।। 51 ।।

(49) निर्वर्त्ये कर्मणि निर्वृत्तरात्मलाभ एव क्रियाकृतो विशेषो दर्शनात् प्रत्यक्षादेवावधार्यते । विकार्ये तु भस्मकुण्डलादौ विकारः क्रियाकृतो विशेषोऽवधार्यते प्रत्यक्षेण । क्वचित् पुनरनुमानाद्विशेषावसायो यथा परत्र जनितानां मुखप्रसकादादिना लिङ्गेनावसायः । जलावसेकादिक्रियावेशितश्च वनस्पतीनां विशेषः प्रतिकलमवाप्तजन्मा सूक्ष्मत्वादुत्पत्त्यनन्तरमनवसीयमानश्चरमावस्थायां प्रचिततरविशेषदर्शनादवधार्यते । न ह्यं प्रचिततरो विशेषोऽनपेक्षितक्रमो झटित्यशङ्कित एवोदेतुं प्रभवतीति प्रतिक्षणमनुमीयमानः सूक्ष्मरूपः, तस्य हि सूक्ष्मस्य रूपस्य दुरवधारत्वम् । यथा षड्जादिस्वरविशेषयोस्तारातितारयोः । तदेवंविधो विशेषो यत्र क्रियाकृतो न संदृश्यते तत्कर्तुः क्रियाया विषयभावमात्रेणेप्सिततमत्वात् प्राप्यं कर्म । तद्यथा आदित्यं पश्यति, नगरमुपसर्पति वेदमधीत इत्यादि । आदित्यादीनां हि संदर्शनादिक्रियया कश्चिदाहितो विशेषो नावधार्यते । प्रमाणाभ्यां क्रियासंबन्धमात्रं तु लक्ष्यते, न च स एव विशेषः । वृत्ते क्रियासंबन्धे वस्तुगतस्य भेदस्य निर्वर्त्यविकार्ययोर्दृष्टत्वात् । नगरे तु गमनक्रियाजनितः संयोगो द्विष्ठो विशेषो भवन्नपि नगरस्य महापरिमाणत्वादल्पपरिमाणेन देवदत्तेन हिमवदङ्गुलिसंबन्धवदलक्ष्यः । पृथिव्येकदेशश्च स्वावयवापेक्षया कल्पितो विशिष्टस्वाधेयाधाररूपो नगरशब्दवाच्यः प्रसिद्ध एवेति न काचिदनुपपत्तिः ।। 51 ।। नास्त्येव प्राप्यं कर्म, सर्वत्र क्रियाकृतविशेषावधारणादिति केचित् । तथा हि---

विशेषलाभः सर्वत्र विद्यते दर्शनादिभिः ।

केषांचित्तदभिव्यक्तिसिद्धिर्दृष्टिविषादिषु ।। 52 ।।

(50) दर्शनादिक्रियाहितविशेषलाभो विकारः सर्वत्र विद्यते, सौक्ष्म्थात्तु नावधार्यते सर्वेणेति केषांचिन्मतम् । तस्य विशेषस्य दृष्टौ विषं येषां तेषु तद्विषयेऽभिव्यक्तेर्निश्चयस्य सिद्धिः । दृष्टिविषैरहिभिर्निरीक्षितो हि विषयो ज्वलनज्वालालीढो लक्ष्यते । तत्साधर्म्यादन्यत्रापि दर्शनादिनाहितः कश्चिद्विशेषो विषये समुन्नेयः । तैजसं हि चक्षुः प्राप्यकारीति तेन युक्तो विषयोऽवश्यं विक्रियते यथा दृष्टिविषदर्शनेन । इंयास्तु विशेषो दृष्टिविषे तेज उत्कटं विषसंपर्काद्विषयं दहति, अन्यत्र तनुतरस्थिति । आदिशब्देनायस्कान्तादीनां ग्रहणम् । तत्सन्निधौ लोहं भ्रमति । कतकफलसन्निधौ हि जलं प्रसीदतीत्यादावस्त्येव क्रियाकृतो विकारः । एतच्च न शास्त्रकारस्य मतम् । केषांचिदित्यन्यमतत्वेनोपन्यासात् । क्वचिद्विशेषदर्शनेऽपि न सर्वत्र तथा भावोऽदृश्यमानविशेषेऽपि युक्तः । किं च क्रियाफलेऽत्र विकारोऽभिप्रेतः । परिदृश्यमानस्तु विषयो क्रियाया हेतुर्न फलम् । दृष्टिविषादावपि तेजःसंयोगाद्विषये विकारो न क्रियाबलात् । एवमयस्कान्तादेर्वस्तुस्वभावोऽयं न क्रियाकृतो विकारः कश्चित् ।

तस्मादस्त्येव प्राप्यं कर्म क्रियाकृतोपकारानपेक्षम् ।। 52 ।।

न चेद्विकारयोगः प्राप्यकर्मणः कथमस्य क्रियासिद्धावङ्गभावः साधनतासम्पत्त्यर्थः । उच्यते ।

आभासोपगमो व्यक्तिः सोढत्वमिति कर्मणः ।

विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः ।। 53 ।।

(51) योग्यदेशावस्थानेन दर्शनपथमवतरति विषय इति योग्यदेशापत्तिः आभासोपगमः स्वभावदस्य दर्शने उपकारः । योग्यदेशस्थितस्यापि नीहारादिप्रकाशप्रतिबन्धकभावाभावदिप्रदीपादिनिमित्ता व्यक्तिः अङ्गम् । विषयस्य प्रकाशयोग्यदेशस्थितस्यासत्यावरकेऽदृष्यस्वभावः पिशाचादिरिति सोढत्वम्, बोधक्षमता, दृश्यस्वभावताङ्गम् । एतैरतिशयैर्दर्शने साधनभावमनुभवति प्राप्यं कर्म । एते च दर्शनक्रियाहेतवो न तत्कृताः । ग्रामं गच्छतीतियादावपि यथायोगं सोढत्वादयो ग्रामादेर्वाच्याः । समीहाविषयीकृता हि ग्रामादयोऽवभासमाना गमनादिसहाः साधयन्ति गमनादिक्रियाम् । एवमधीयमानं वेदादि अध्यमनसहम् । मातरं स्मरतीत्यपि माता कृतोपकारा क्रूरहृदयस्यापि स्मृतिपथमनुपतन्ती साधयति स्मृतिम् । इप्सिततमत्वानपेक्षायां तु संबन्धित्वसामान्यविवक्षायां शेषषष्ठी मातु स्मरतीति ।। 53 ।।

एवं तावाद् यथाविभागं कर्म लक्षितम् । इदं तु वक्तव्यम्--पूर्वमुक्तं गुणक्रियाणां कर्तारः सर्वे साधनविशेषा इति । तत्कथं कर्मतासंभव इति कर्मकर्तृविचारपातनिकां करोति ।

निर्वर्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् ।

कर्त्रन्तराणां व्यापारे कर्म संपद्यते ततः ।। 54 ।।

(52) निर्वृत्तिविक्रियाभासापत्तिक्रियासु यथासंख्यं निर्वर्त्यविकार्यप्राप्यलक्षणं कर्म स्वातन्त्र्यं कर्तृत्वमाश्रित्य तदपेक्षयान्येषां निर्वर्त्यादिकर्मविषयत्वाद् बहूनां कर्तृणां निर्वर्तनादिव्यापारे प्रैषलक्षणे कर्म जायते तेनाप्यमानत्वात् । तथा हि निर्वर्तते विकुरुते आभासमुपैति प्रकाशते इति कर्तारः स्वव्यापारे कर्मभेदात् प्रधानकर्तृव्यापारे विवक्षिते निर्वर्तयति, विकारयति, आभासादिविषयभावमापादयतीति कर्तृप्रैषे स्वामिसन्निधाविव भृत्या न्यग्भवन्तः कर्मभावमनुभवन्ति ।। 54 ।।

एवं तर्हि कर्ता कर्म भवतीति कर्म भूत्वा कर्ता कथं भवति येन कर्मकर्तृत्वसंभव इत्यत आह---

तद्व्यापारविवेकेऽपि स्वव्यापारे व्यवस्थितम् ।

कर्मापदिष्टान् लभते क्वचिच्छास्त्राश्रयान् विधीन् ।। 55 ।।

(53) भिद्यते कुसूल इत्यादौ यदा कर्तृप्रैषस्य निर्वृत्तिः कुसूलादेर्विशरारुरूपतया स्वयमेव भिदानुभवात्, लूयते केदार इत्यादवपि शुष्कतरत्वात् कर्तृप्रयत्नानपेक्षणात्, पच्यते ओदनः स्वयमेतेवेत्यादावपि सौकर्यातिशयवशात् कर्तुरनपेक्षणात् तदा स्वव्यापारे स्वातन्त्र्याश्रये कर्तृत्वे शास्त्रेण यत्नेन कर्मकार्यप्राप्त्यर्थः कर्मवद्भावो विधीयत इति कर्मणि अपदिष्टान् विहितान् विधीन् कार्याणि कर्ताऽपि सन् प्राप्नोति । कर्मकर्त्रन्तकव्यापारपातनेन हि स्वव्यापारे कर्तृत्वात् कर्मकार्याणि न स्युरिति शास्त्रारंभः । क्वचिद् इति । कर्मस्थभावानां कर्मस्थक्रियाणां च धातूनां विषय इत्यर्थः ।। 55 ।।

ननु च कर्तृप्रैषे निवृत्ते तदायत्तं कर्मत्वमत्र मा भूत् कर्तृत्वं तु कथं येन कर्मकर्तेति व्यपदेशः । तथा हि । सति प्रधानकर्तरि कर्मणः स्वक्रियायां व्यापारो दृष्ट इति तदभावे कर्मत्ववत् कर्तृत्वमपि कुत इत्याशङ्क्याह ।

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम् ।

निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ।। 56 ।।

(54) धात्वर्थानुकूल्येन चेष्टनं कर्तुः प्रेषणं स्वव्यापारः कारकान्तविनियोगलक्षणम् । तदनभिधीयमाने कर्तरि पच्यते ओदनः स्वयमेवेत्यादौ निवर्तते । कर्त्राश्रयस्य व्यापारस्य कर्तरि प्रत्ययेनाभिधीयमाने धातुनाऽनभिधीयमानत्वात् । प्रतीयमानत्वं तु तस्य द्वयर्थः पचिरिति भाष्यविरोधादसङ्गतमित्याख्यातम् ।

तानि धात्वन्तराणि

इति च वक्ष्यमाणत्वाद् विषयविभागेन धात्वर्थता कर्तृव्यापारस्य ग्रन्थकृतोऽभिप्रेता । तस्मिन्निवृत्ते स्वस्मिन् क्रियावयवे

प्रधानक्रियापेक्षया गुणभूते स्वव्यापारेकर्म स्थितम्,कर्तृतया भूतपूर्वगत्या त्वस्य कर्मव्यपदेशः । यद्यपि च कर्तृव्यापारेविवक्षिते स्वक्रियायामेवावस्थानं तद्द्वारेण प्रधानक्रियानिर्वर्तनात्, कारकं कर्मेति सामानाधिकरण्याच्च, तथापि सामर्थ्यादत्र प्राधान्येनावस्थानं बोद्धव्यम् । अत एव कर्तृव्यापारापेक्षया कर्मत्वस्य निवृत्तावात्मीये सर्वत्रभवति स्वक्रियाविषये कर्तृत्वेऽवतिष्ठते इति कर्तृव्यापारापेक्षया पूर्वं कर्म भूत्वा सौकर्यातिशयप्रतिपादनपरतया तदविवक्षायां कर्ता सम्पद्यत इति भवति कर्मकर्ता । अयं भावः । न केवलं कर्तृव्यापारस्याविवक्षामात्रे कर्मकर्तृता, अपि तु स्वव्यापारे स्वातन्त्र्यविवक्षायामपि सत्याम् । ततश्चाप्राप्तानि यगादीनि कर्मकार्याणि

"कर्मवत् कर्मणा तुल्यक्रियः" (P.3.1.87)

इति शास्त्रेण प्राप्यन्ते । तदुक्तं वार्तिककृता

"कर्मकर्तरि कर्तृत्वं स्वातन्त्र्यस्य विवक्षितत्वात् " (Va.on P.3.1.87)

इति । तत्र परायत्तोपजनेऽपि भिदादौ कुसूलादेः परानपेक्षा प्रातिपादिता भाष्ये

"यस्तु खलु निवाते निरभिवर्षे अचिरकालकृतः कुसूलः स्वयमेव भिद्यत इति ।"

(M.Bha. on the Va.quoted above)

निवात इति समीरसम्पातमनवाप्येति कर्तृव्यापारो व्युदस्तः । निरभिवर्ष इति सलिलकलासंस्पर्शो व्युदस्तः । अचिरकृत इति कालान्तपरिवासादीयमानविसेषव्युदासः । एते हि पातहेतवः कुसूलस्य संभाव्येरन् इति व्युदस्ताः । एवं चादृढसंनिवेशित्वात् स्वयमेव विशीर्यत इति कर्तृत्वोपपत्तिः । यत्रापि दात्रहस्तो देवदत्तः परिपतन् दृश्यते लूयते केदारः स्वयमेवेति अत्रापि तीव्रकरकिरणसम्पर्कसमुत्सारितस्नेहः परिजर्जरितनालः विशीर्यमाणः केदारः तात्स्थ्यात् व्रीहिरूपो लवने सुकरतामेति । सामग्रीसाध्यत्वाच्च क्रियाणां प्रत्येकं व्यापारोत्कर्षणार्थं स्वातन्त्र्याध्यारोपेणाप्युपपन्नः प्रयोगः देवदत्त छिनत्ति, असिः छिनत्ति, स्थाली पचतीत्यादिः । तत्र च कर्मण एव कर्तुः कर्मवद्भावो नान्यस्य, छिद्यते रज्जुः, पच्यते ओदनः स्वयमेवेति तदेतदुक्तं भाष्ये---

"तत्रापि याऽसौ सुकरता नाम तस्या नान्यः कर्ता..."

(M.Bha.on P.3.1.87)

इति । सौकर्यातिशयवद्व्यापारे केदारे समीहिते न देवदत्तश्छेदस्य कर्तृव्यपदेशं प्रतिपत्तु योग्योऽपि तु केदार एवेत्यर्थः । ओदनविक्लित्तौ तु छेदनवत् कर्तृव्यापारोऽपि नावश्यमपेक्ष्यः । अनपेक्षितकर्तृप्रयत्ना एव हि तण्डुला विक्लिद्यन्ति । करणादिकारकविनियोग एव ह्यत्र मुख्यः कर्तृव्यापारो लक्ष्यते ।। 56 ।।

ननु चैक एव पच्यादिर्धातुः क्वचित् कर्तृव्यापारे गुणभूतमर्थमाह पचत्योदनं भिनत्ति कुसूलं लुनाति केदारं देवदत्त इति । क्वचित्तु कर्तृव्यापारेऽप्रतिपन्नगुणभावं स्वप्रतिष्ठमर्थमाह पच्यत ओदनः स्वयमेवेत्यादावित्येषोऽसति रूपभेदे धातूनां विवेको दुर्लभ इति कर्तृप्रत्ययवाच्यैव भावना भवत्वित्याशङ्क्याह---

तानि धात्वन्तराण्येव पचिसिद्ध्यतिवद् विदुः ।
भेदेऽपि तुल्यरूपत्वादेकत्वपरिकल्पना ।। 57 ।।

(55) कर्मकर्तृविषयाणि पच्यादीनि विक्लित्त्यादिनामात्रवचनानि तदुपसर्जनविक्लेदनादिव्यापारवाचिपच्यादिधातुभ्यो धात्वन्तराणि बोद्धव्यानि । अर्थभेदेन शब्दभेदात् । प्रधानं हि शब्दानां प्रतिपाद्योऽर्थः । प्रधानानुयायी च गुण इति न्यायात् प्रत्यर्थं भिद्यते शब्दः । तद्यथा पचेर्विक्लेदनवचनात् सिध्यतिरन्यो धातुर्विक्लित्तिवचनः । धात्वन्तरत्वेऽपि चैकत्वेन रूपाभेदादुपदेशो धातुपाठे डुपचष् पाक इत्यादि । अभिन्नरूपं ह्येकत्वकल्पनासहं वस्तु । यत्र तूपदेशभेदे फलभेदोऽस्ति तत्र द्विस्त्रिरुपदेशः, तद्यथा क्षियत्यादीनां विकरणभेदात् क्षि क्षये भ्ववादौ, क्षि निवासगत्योरिति तुदादौ दिवादौ च, क्षीञ् हिंसायामिति च क्रयादौ ।। 57 ।।

इदानीम्

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः

इति नयेनाह---

एकदेशे समूहे च व्यापाराणां पचादयः ।

स्वभावतः प्रवर्तन्ते तुल्यरूपसमन्विताः ।। 58 ।।

(56) तुल्येनाभिन्नेन रूपेण स्वभावेन युक्ता एते धातवोऽभिन्नाः , अबाष्यमानस्यैकाकारप्रत्ययस्याभेदावेदकत्वात् । अनेकार्थत्वमेव वाधकमिति चेन्न । शक्तिभेदेनतदुपपत्तेः । अनेकार्थप्रतिपादनशक्तिर्ह्योकोऽपि शब्दो दृष्टः । यथा ग्रामशब्दः शालासमुदायवाटकपरिक्षिप्तदेशजनसमुदायवचनः । यथा वाक्षादिशब्दाः । तत्र कर्मकर्तृविषये विक्लित्तिमात्रवचनः पचिः, पच्यते ओदनः स्वयमेवेति । देवदत्तस्य कर्तुः प्रत्ययेनानाभिदानात्तद्व्यापारस्यात्र धातुवाच्यत्वाभावः । प्रधानभूतो हि पच्यर्थो विक्लित्तिः, सर्वत्र संभवात् । अपेक्षितेऽपि हि कर्तृव्यापारे देवदत्तः पचतीत्यत्र विक्लित्यर्थत्वाद्विक्लेदनस्य कर्तृव्यापारस्यार्थेन रूपेण विक्लित्तेरेव प्राधान्यात्, अत्र च द्वयस्याभिधानात् समूहवृत्तित्वम् । अत्रैव द्वयर्थतोपपत्तिरुक्ता । कर्मकर्तृविषये तु कर्तृप्रत्ययस्याभावात् तद्व्यापारो भावना नाभिधीयते । कर्मैव ह्यत्र कर्ता, तद्व्यापारश्च विक्लित्तिरेवेति सैवाभिधीयते । तद्यथा विक्लिद्यन्ति सिद्ध्यन्ति तण्डुला इति विक्लित्तेरेव कर्तृव्यापारस्याभिधानम्। एवं भिद्यते कुसूलः स्वयमेवेति द्विधाभवनं धात्वर्थः । भिनत्ति कुसूलं देवदत्त इति तदुपसर्जनं द्विधाभवनमित्युदाहार्यम् ।। 58 ।।

तदेवं विचित्रशक्तित्वाच्छब्दानां विषयभेदेनार्थविवेकः समुदितः । इदानीं कर्मकर्तृप्रसङ्गेन

"णेरणौ यत्कर्म"(P.1.3.67)

इत्यत्र

"कर्मकर्तृत्वात् सिद्धम्"(Va.on P.1.3.67)

इत्युक्तत्वात् विचारयति---

न्यग्भावनान्यग्भवनं रूहौ शुद्धे प्रतीयते ।

न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते ।। 59 ।।

अवस्थां पंचमीमाहुर्ण्यन्ते तां कर्मकर्तरि ।

निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते ।। 60 ।।

(57) इहारोहयते हस्ती स्वयमेवेत्ययं हस्तिव्यापाराभिधायी प्रयोगोऽस्ति कर्मकर्तृविषयः । तस्य चान्वाख्यानोपायपरिकल्पना कर्तव्या । तत्र रूपसामान्यानुगमप्रवर्तितेन रेखागवयवदवयवापोद्धारेण तदर्थाश्रयणेन चान्वाख्यानं प्रवर्त्यते । तथा च यावतीषु सोपानस्थानीयासु अर्थविभागभूमिषु पदं विन्यस्येयं प्रायोगिकी पर्यन्तभूमिः प्राप्येत ता अन्तरालभाविन्यो गण्यमाना भूमयोऽवस्थाशब्दवाच्याः । तत्राद्ये भागे रुहिधातुः प्रत्यभिज्ञायते । तस्य चान्यत्रावस्थाद्वयरूपोऽर्थः प्रसिद्धः, स एवेहाङ्गीक्रियते । तदेतदाह---

न्यग्भावना न्यग्भवनं रूहौ शुद्धे प्रतीयते ।

इति शुद्धे केवले णिज्रहित इत्यर्थः । आरोहन्ति हस्तिनं हस्तिपका इत्यत्र न्यग्भवन्तं न्यग्भावयन्तीत्यर्थः । अत्र च धात्वर्थमात्रप्रदर्शने तातपर्यम् । विकरणप्रत्ययाद्युपादानं तु नान्तरीयकम् । नान्यथा प्रयोगार्हः शब्दो लभ्यत इत्यारोहयते हस्ती स्वयमेवेत्यस्यैव धातोरयममर्थः प्रदर्शितो भवति । एवं च कृत्वैकेन शब्देन धातुना नान्तरीयकतयोपात्तप्रत्ययसहायेनावस्थाद्वयं न्यग्भावनान्यग्भवनलक्षणमुपात्तम् । धातुभागादूर्ध्वं चात्र गुणायादेशलक्षणकृतविकारो णिच् प्रत्यभिज्ञायते । स यदि यथास्थितप्रकृत्यर्थनिष्ठे प्रयोजकव्यापारेऽन्वाख्यायते तदा न्यग्भावनिष्ठापरप्रयोजकव्यापारप्रतीतिप्रसङ्गात् प्रकृतवैगुण्यं स्यात् । तेन रुहिधात्वर्थसङ्कोचलभ्यं मध्येऽवस्थान्तरं प्रकृत्यर्थत्वेन णिच आश्रीयते हस्तिव्यापारमाक्षरूपम् । तत्पर्यन्ते पूर्वशङ्कापरिहाराय दर्शितम् ।

निवृत्तप्रेषणाद्

इत्यादिना । ततस्तन्निष्ठे प्रयोजकव्यापारे प्रागवस्थोपचयकारिणि णिजुत्पादितः केवलरुहितुल्यार्थतां सम्पादयति । तदाह

न्यग्भावनान्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते ।

इति । आरुद्यते हस्ती स्वयमेव, आरोहयन्ति हस्तिनं हस्तिपका इत्युदाहरणद्वयमात्र । एकेन प्रयोज्यव्यापारो णिच् प्रकृत्यर्थरूपो दर्शितः । स च नान्यथा शक्यदर्शन इति यगात्मनेपगे कर्मवद्भवात् प्राप्ते नान्तरीयकतयोपात्ते । द्वितीयेन णिजर्थो हस्तिपकव्यापारः प्रदर्शितः । स च प्रयोज्यव्यापारपृष्ठपातित्वेन शक्यदर्शन इति रुहिरुपात्तः । प्रत्ययाद्युपादानं तु नान्तरीयकतया पूर्ववत् । तदेताश्चतस्त्रोऽवस्थाः । तत उर्ध्वमात्मने पदसरूपो भागो दृश्यते हस्तिव्यापारमात्रप्रतीतिश्च । एतच्च कर्मकर्त्रवस्थामन्तरेणाशक्यमिति पूर्वावस्थासंकोचलभ्या साश्रीयते । तदाह---

अवस्थां पंचमीम्

इत्यादि । तदेवं कर्मकर्तृत्वाद् आरोहयते इत्यात्मनेपदे सिद्धे

णेरणौ

इत्यत्र

"कर्मकर्तृत्वात् सिद्धमिति चेद् यक्चिणोर्निवृत्यर्थं वचनम्" (Va.on 1 3 67) इति वार्तिककारेणोक्तम् । तत्र

"न वा यक्चिणो प्रतिषेधात्" (Va. on P.1.3.67)

इत्यादिना कर्मवद्भावेनैवात्रात्मनेपदमिति सिद्धान्तितम् । गणयति गणः स्वयमेवेत्यत्र तु आत्मनेपदनिवृत्त्यर्थं नियमार्थतया `णेरणौ'

इति सूत्रं वार्तिककारेण स्थापितम् । न्यग्भवनं च विक्लित्तिवत् कर्मस्थमिति रुहिः कर्मस्थक्रियो वाक्यकारस्य कर्मवद्भावविषयः ।। 59,60 ।।

दृश्यते च धातूनां प्रकृत्यन्तण्यन्तानां केषांचित् समानोऽर्थ इत्यत्र दृष्टान्तमाह--

ब्रवीति पचतेरर्थं सिद्ध्यतिर्न विना णिचम् ।

स ण्यन्तः पचतेरर्थो प्रकृते व्यवतिष्ठते ।। 61 ।।

(58) सिद्ध्यत्योदन इति विक्लित्तिमात्रवचनो धातुः । पचत्योदनमिति विक्लित्त्युपसर्जनं विक्लेदनलक्षणं पचत्यर्थं णिच्सहितोऽभिधत्ते साधयत्योदनमिति । एवमारूहिर्ण्यन्तोऽपि कचित्तदर्थे वर्तत इति । इदमत्र तात्पर्यम् । भिन्नावेवारुही प्रकृत्यन्तण्यन्तूरपौ पचतिसाधयतिवदेकार्थौ, ण्यन्ते तु प्रैषस्य निवृत्तावारोहयते हस्ती स्वयमेवेत्यपि न्यग्भवनवचनोऽन्य एव धातुरेवमुपायपरिकल्पनया व्युत्पाद्यते । न त्वयमत्र परमार्थतो णिच् येनार्थनिवृत्तौ कथमवतिष्ठतेति चोद्येत । अन्वाख्येयं हि लौकिकं शब्दमुद्दिश्य प्रतिपादकशब्दनिष्ठमुपायपरिकल्पनया प्रकृतिप्रत्ययविभागेनासत्येन सर्वत्रानुशासनं लौकिकार्थानुसारेणैवं क्रियते । नन्वेवमप्यसत्यस्यापोद्धारपदार्थस्यासंभवे कथं शासनं लौकिकार्थानुसारेणैवं क्रियते ।

नन्वेवमप्यसत्यस्यापोद्धारपदार्थस्यासंभवे कथं तच्छब्दः । एवं तर्हि कर्मव्यापारातिशयस्य णिच्प्रत्याय्यस्यास्ति संभव इत्यदोषः ।। 61 ।।

एवं प्रैषस्य निवृत्त्या कर्मणः कर्तृत्वमुपपाद्य प्रैषध्यारोपेणाप्युपपादयितुमाह---

केषांचिद्देवदत्तादेर्व्यापारो यः सकर्मके ।

स विना देवदत्तादेः कटादिषु विवक्ष्यते ।। 62 ।।

(59) कटं करोति इत्यादौ सकर्मके धात्वर्थे देवदत्तादिप्रधानकर्तृविषये प्रधानकर्तुः प्रयोजकस्य यः प्रैषलक्षणो व्यापारः असौ यदा सौकर्यातिशयविवक्षा कर्मणः तदा कर्तारमन्तरेण तत्र कर्मणि विवक्ष्यते । यथा हि देवदत्तः प्रयुङ्क्ते एवं कटोऽपि सुकरो देवदत्तमिति भवति विवक्षा ।। 62 ।।

तदेतत् सामान्येनोक्तं प्रकृते योजयति---

निवृत्तप्रेषणं कर्म स्वस्य कर्तुः प्रयोजकम् ।

प्रेषणान्तरसंबन्धे ण्यन्ते लेनाभिधीयते ।। 63 ।।

(60) कर्तृव्यापारः प्रैषः कर्मणोध्यारोपित इति निवृत्तप्रेषणं तदविवक्षितप्रयोजकव्यापारं स्वातन्त्र्यविवक्षायामात्मीयस्य प्रयोजकस्य प्रयोजकतां सौकर्यातिशयवशात् प्रतिपद्यमानं तत्र कटादिकर्मसंबन्धिनि देवदत्तादिकर्तृविषये प्रेषणान्तरे

प्रयोजकव्यापारान्तरे णिचि सति कारयते कटः स्वयमेवेति ण्यन्ताल्लकारेण कर्मकर्तृविषयेणाभिधीयत इति णिजभिधेयः प्रैषोऽस्तीति भावः । अत्र चोपायपरिकल्पना प्रैषौ णिचो न तु वस्तुतस्तत्संभव इति प्रयोज्यापेक्षाभावः । तथा च प्रयोज्यकर्मसंभवादविद्यमानकर्मान्तरसंबन्धाद्धातोर्विधीयमानं णेरणावित्यात्मनेपदं कथमिति न चोदनीयम् । तथा हि-

सौकर्यातिशयप्रतिपादनाय कर्मणो वास्तवः प्रैषोऽध्यारोपित इति प्रतीते तस्मिन् प्रयोकत्वस्याविवक्षा, कर्मकर्तृप्रतीतिसामर्थ्यात् तु भूतपूर्वप्रेषणावस्थावगम्यत इति तद्विषयो णिञ् न निवर्तते । एवं कर्मकर्तृप्रसङ्गेन णेरणावित्यत्र विचारितम् ।

"त्यदादिषु दृशोऽनालोचने कञ् च"(P.III.2.60)

इत्यत्र वार्तिके

"कृदर्थानुपपत्तिस्तु" (Va.onP.3.2.60)

इति चोदितम् । कर्तरि कृदिति वचनात् कर्त्रा प्रत्ययार्थेन भाव्यम् । स चात्र नोपपद्यते । सदृशलक्षणं ह्यर्थं तादृशादयः शब्दाः प्राहुः, न तु दर्शनक्रियायाः कर्तारमिति वार्तिकार्थः । तत्रोक्तम् ।

"इवार्थे चायं तद्धितः"(Va.on 3.2.60)

इति । इवे प्रतिकृतावित्यत्र प्रकरणेऽयं तद्धितसंज्ञः प्रत्ययो वक्तव्यः । तथा च स इव तादृश इत्याद्यर्थसिद्धिरित्यर्थः । एवं वार्तिककारेण सिद्धन्तितम् । भाष्यकारस्तु कृदर्थानुपपत्तिरिति चोद्यं यथान्यासमेव परिहर्तुं

"कर्मकर्तृत्वात् सिद्धम्"

इति । तत्र दृशः कर्तृस्थभावकत्वात् कर्तृव्यापारदर्शनमात्रवाच्यतया प्रैषस्याभावात् कथं कर्मकर्तृत्वसंभवः । प्रेषणाध्यारोपे तु णिच् स्यात् । अण्यन्तश्च सूत्रे दृशिरुपात्तः ।। 63 ।।

अत्र

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ।।

इत्यनेन न्यायेन कर्मकर्तृत्वं केचित् समर्थयमानाः प्राहुः ।

सदृशादिषु यत्कर्म कर्तृत्वं प्रतिपद्यते ।
आपत्त्यापादने तत्र विषयत्वं प्रतिक्रिये ।। 64 ।।

(61) सदृशतादृशादिषु शब्देषु व्युत्पाद्येषु यत्कर्मकर्तृत्वं प्रतिपद्यते यत्कर्मणः कर्तृत्वमुक्तं तत्र दृशेर्विषयभावविषये हि आपत्त्यापादने क्रिये वाच्ये इति तदाश्रयेण कर्मकर्तृत्वसमर्थता । तथा हि पश्यतीति कोऽर्थः । विषयं घटादिकं दर्शनविषयभावमापद्यमानमापादयतीति । तत्र विषयस्य परिच्छेद्यत्वेन व्यापार आपत्तिः, कर्मभूतस्य तद्विषयमापादनं कर्तृव्यापारो दृश्यर्थो न केवलः । तत्र कर्तृव्यापारे आपत्तिलक्षणो विषयव्यापारो न्यग्भवतीति तत्सन्निधौ स्वव्यापारे स्वातन्त्र्यं विषयस्य तिरोभवति । यदा तु योग्यदेशवस्थितः स्पष्टतरावोकमध्यपरिवर्ती विषयः तदा सुदर्शनो भवन् स्वयमभिव्यक्तदर्शनः कर्तृविनियोगमपाकरोतीति स्वव्यापारे स्वातन्त्र्यविवक्षायां कर्म भूत्वा कर्ता सम्पद्यत इति भवति कर्मकर्तृविषयः ।

एतत्तु नोपपद्यत इत्याह ।

कुतश्चिदाहृत्य पदमेवं च परिकल्पने ।
कर्मस्थभावकत्वं स्पाद्दर्शनाद्यभिधायिनाम् ।। 65 ।।

(62) इह दृशेः कर्तृस्थं दर्शनमात्रं वाच्यं पश्यतीति । न ह्यतो विषयभावापत्तिरवगम्यते । किं तु विषयज्ञानमेव धात्वर्थः । विषयभावापत्तिर्हि सर्वस्य धात्वर्थस्यास्तीति विशिष्टमेव दर्शनं दृशेरभिदेयं न्याय्यम् । तच्च दर्शनं विषयप्रतिष्ठमित्यस्मात् कुतश्चित् सामर्थ्यात् विषयाक्षेपद्वारेण विषयभावापत्त्यादिवाचिपदाध्याहारे

विषयगतव्यापारप्रत्यायनात्तदुपसर्जनकर्तृव्यापारचित्वकल्पने दर्शनासनाद्यभिधायिनामपि कर्मस्थभावकत्वमेव स्यादिति न कश्चिद्धातुः कर्तृस्थभावक्रियो नाम स्यात् ।

अतैतदयुक्तमिति प्रतिपादयितुमाह

आपद्यमानमापादयतीत्येवं विचक्षणतया यतः कुतश्चित् पदमध्याहृत्य भवतेदमुपकल्प्यते । तदेवं सति दर्शनाद्यभिधायिनां

दृश्यादीनां धातूनां कर्मस्थभावकत्वं स्यात् । आदिग्रहणादासनाद्यभिधायिनामासिप्रभृतीनामपि । न चैतदुपपन्नं कर्तृस्थभावकत्वादृश्यादीनामिति । अत्र कर्मस्थभावकत्वं स्यात् इत्यभिदधता कर्तृस्थभावकत्वं यदुपपन्नमेषां तदेवं विघटेतेत्युक्तं भवति ।। 65 ।।

अथ कथं कर्तृस्थभावकत्वं कथं वा कर्मस्थभावकत्वं विज्ञायेतेव्याशङ्क्य प्रसङ्गाद् व्याख्यातुमाह ।

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।

क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकाश्यते ।। 66 ।।

(63) यत्र कर्तरि कर्मणि वा विशेषः कश्चित् परिदृश्यते तत्रैव क्रिया व्यवस्थितेति बोद्धव्यम् । सपरिस्पन्दसाधनसाध्या क्रिया, अपरिस्पन्दसाधनसाध्यो भाव इतिविशेषमनपेक्ष्य सूत्रकाराभिप्रायेण क्रियापि भावोऽभिधीयत इति टीकाकारस्याभिप्रायः । तथा च

लक्षणहेत्वोः क्रियायाः (P.3.2.126)

यस्य च भावेन भावलक्षणम् (P.2.3.37)

इत्यादावमेद एव सूत्रकारस्य क्रियाभावयोश्चेतसि वर्तते ।

अन्ये त्वेतन्नेच्छन्तीत्याह ।

अन्येषां मते क्रियाव्यवस्था शब्दैरेव प्रकाश्यते । एतदुक्तं भवति । येऽपि कर्मस्थभावकाः पच्यादयस्तत्रापि कर्तर्यपि परिश्रमादिको विशेषः परिदृश्यते । ततो नैतद्व्यवस्थापकम्, विशेषदर्शनं यत्र तत्र क्रियेति । तस्माच्छब्दैरेव च यत्र विशेषः प्रकाश्यते प्रातिपाद्यते तत्रैव क्रिया स्थितेति वक्तु युक्तम् । शब्दप्रमाणकानां हि शब्द एव यथा यथार्थमभिधत्ते तथैव तस्याभिदानमुपपन्नम् । न तु वस्तुमुखप्रेक्षितया । शब्दश्च पश्यति घटमित्यादौ दृशिक्रियाविषयविशिष्टमेव प्रत्याययति । काष्ठं भिनत्तीत्यादौ तु भिदिक्रियाविषयं सविशेषमभिधत्त इति तद्वशेनैव कर्तृस्थभावकत्वं कर्मस्थभावकत्वं चाभिधानीयम् । एवं च दृश्यते स्वयमेवेति न भवत्येवेति मन्तव्यम् । यत्त्वपरिस्पन्दसाधनसाध्यो भाव इत्यादि लक्षणमभिदधाय कर्मस्थः पचतेर्भाव इत्यादिकमभिदधति तदप्यव्यवस्थितमिव लक्ष्यते । तथा च पीलुपाके घटं पचतीति घटस्यानलसंपर्कादवयवक्रियाद्वारेणावयवसंयोगविनाशपूर्वकं पूर्वपूर्वकार्यविनाशे उत्तरोत्तरकार्यद्रव्यविनाशात् सपरिस्पन्दपरमाणुविषयपाकक्रियापि । ततश्चाव्यवस्थितमेवैतत् ।। 66 ।।

एव तावत् प्रथमसूत्रलक्षितं निर्वर्त्यविकार्यप्राप्यभेदेन त्रिधा भिन्नं कर्म व्याख्याय तत्प्रसङ्गेन च निर्वर्त्यविकार्यविषयं मतभेदेन निवृत्तप्रेषणण्यन्ताण्यन्तधातुविषयमध्यारोपितप्रेषणं च कर्मकर्तारं प्रदर्श्य प्राप्यविषयस्य प्रदर्शनपूर्वकं प्रत्याख्यानमुक्त्वा तत्प्रसङ्गेनैव कर्मस्थभावकत्वकर्तृस्थभावकत्वे मतभेदेनैव व्यवस्थाप्येदानीं सूत्रान्तरनिर्दिष्टान्यपि कर्माणि व्याख्यातुमुपक्रमते । तत्राकथितसूत्रे ।

"कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् देशश्च ।"(Va. on P.1.4.51) इत्युक्तं तावदनारंभणीयमिति प्रतिपादयितुमाह ।

कालभावाध्बदेशानामन्तर्भूतक्रियान्तरैः ।

सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ।। 67 ।।

(64) अकर्मकाणां कथं कर्मणा योगः स्यादिति कालादीनां तत्संप्रयोगे कर्मत्वं वक्तव्यमुपजायते । अत्रोच्यते । नात्र कर्मसंज्ञा वक्तव्या यस्मात् कालीदीनामकर्मकैर्धातुभिर्योगे कर्मत्वमुपजायत एव । कथमिति विशेषयितुमाह अन्तर्भूताक्रियान्तरैः इति । अन्तर्भूतं प्रधानक्रियापेक्षया क्रियान्तरं येषामिति ते तथा । तैः योगे संबन्धे सति । अतश्च क्रियान्तरापेक्षया तेषां कर्मत्वं सिद्धमेवेति किमुपसंख्यानेन । तथा च मासमास्ते, गोदोहमास्ते, कोशं स्वपिति, कुरून् स्वपितीत्थादौ मासादीन् व्याप्यास्त इति व्याप्त्यङ्गायामासनादिक्रियायां धातुर्वृत्तः । व्याप्त्यदिक्रिययाप्तुमिष्णमाणत्वात् कालादीनां स्फुटमेव कर्मत्वेमितित यत्नान्तरेण नार्थः । यद्येवनमिदानीमासिप्रभृतयः कालबावाध्वकर्मभिः सकर्मकाः सम्पन्नाः, ततश्च तेभ्यः कालरादिश्वेव कर्मसु लकृत्यक्तखलर्थाः प्राप्नुवन्ति न भावे । तत्र मासमास्यते देवदत्तेनेति भावे लकारो न स्यात ।

मासमासितव्यम्, मासमासितम्, स्वासं मासम् इति च कृत्यक्तखलर्था भावे न स्युः । "भावे चाकर्मकेभ्यः" इति वचनात्तत्रापीष्यते । तस्मात्कालादिकर्मसद्भावादकर्मकत्वं कथम् । सकर्मकत्वे भावे लकारः कथमिति । उच्यते । द्विविधं कर्म, अन्तरङ्गं बहिरङ्गं च । तत्र द्रव्यकर्मान्तरङ्गम्, तेनैव च पूर्वं संबन्धः । बहिरङ्गं कालादिलक्षणं कर्म । यद् वक्ष्यते । शक्तिप्रमाण.....
इत्यादिश्लोकेन । तत्र सकर्मकत्वाकर्मकत्वव्यपदेशोऽन्तरङ्गेणैन न्याय्यः । तथा चोक्तमकर्मकाणामित्युच्यत इत्यादिना भाष्येण ।
एवं च लादिभिरप्यन्तरङ्गे भाव्यमित्यन्तरङ्गबहिरङ्गतामेवाह `आधार' इति ।
गोदोहं स्वपिति । यावता कालेन गवां दोहः समाप्यत इति कोशादिः पुनः स्वकालपरिमाणेन क्रियान्तरं परिच्छिनत्ति । देशोऽपि कुतश्चिदवधेः प्राप्यमाणतया परिच्छिन्नकालस्वापादिविशेषहेतुरिति भिन्नाः कालादयः । एतेषां कालादीनां सर्वैरेवाकर्मकैः सकर्मकैश्चापि धातुभिर्योगे प्राकृतमेव कर्मत्वमुपजायत इति नैषां कर्मसंज्ञोपसंख्येयेत्यर्थः । तथा हि । न द्वितीयाविधानार्थमेव कर्मसंज्ञात्र, अपि तु लाद्यर्था अपि । तथा च
"कालाध्वनोरत्यन्तसंयोगे"(P.2.3.5)
इत्यत्र वार्त्तिकम्
"अत्यन्तसंयोगे कर्मवल्लाद्यर्थम्"(Va.onP.2.3.5)
इति । लकृत्यखलर्था अपि संज्ञाफलभिष्यन्त इत्यर्थः ।
अत्र क्रियान्तरस्य व्याप्तिलक्षणस्याप्यास्यादिधातुभिरङ्गीकृतत्वाद् व्याप्तिक्रियाविषयभावोपगमनेन मासादि प्राप्यं कर्मेप्सिततममेवेति प्राकृतमेवैतत् कर्म यथा घटं करोति शकटं करोतीति भाष्य उक्तम् ।
तथाहि, मासमास्ते, गोदोहमास्ते, क्रोशं स्वपिति, कुरुन् स्वपितीति व्यापनाङ्गमासनादि धातुभिरभिधत्ते मासं व्याप्यास्ते, मासमासनया व्याप्नोतीत्यर्थः । एवमन्यत्र यथायोगं योज्यम् । तद्यथा वलाहकाद्विद्योतते विद्युदिति निःसरणाङ्गे विद्योतने धातुर्वर्तते तथात्र प्राप्त्यङ्गेऽर्थे धातोर्वृत्तिः । क्रियान्तरमेवेदमन्तर्भूत व्याप्तिकं कालादिविषयम् । देवदत्तः कि करोति, आस्त इत्यत्र तु व्याप्तिरहिते धातुरासनमात्रे वर्तते । तदेतदे यथाह
एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपसमन्विताः ।।
पचति, पच्यते स्वयमेवेति तथात्र बोध्यम् । एवं चोपसंख्यानस्य प्रत्याख्यानादकर्मकग्रहणमनर्थकम् । सकर्मकाणामपि मासमोदनं पचतीत्यादौ मासादेर्व्याप्तिविषयत्वेन कर्मतासिद्धिः । मासमोदनपाकेन व्याप्नोतीत्यत्रार्थः । एतदर्थं चात्र सर्वग्रहणं व्याख्यातम् । कालादिकर्मणा पचत्यादीनां द्विकर्मकत्वेऽपि प्रधाने द्रव्यकर्मणि लादिविधिरुक्तः
प्रधानकर्मण्याख्येये लादीनाहुर्दिकर्मणाम् ।
इति । सत्यपि वास्यादीनां व्याप्तिक्रियान्तर्भावे कट आस्त इत्यादौ कटादेरासनया व्याप्तिर्नास्ति, अपि तु मासादिरेवासनादिक्रियापरिच्छेदायोपादीयमानो व्याप्यत इति तस्यैव कर्मता न तु कटादेरुपश्लिष्टमात्रस्याधिकरणस्येति सर्वं सुस्थम् ।।67 ।।
(65) कर्तृकर्मव्यवधानेनाधारः क्रियां धारयति यथा, एवं मासादिरपीत्याधारच्छायां भजते । तथा हि उदिते जुहोति, रात्रौ भुङ्क्ते इति प्रयोगः । क्रोशं शेते, `कुरून् स्वपिति' इति च स्फुटमेवाधिकरणत्वमध्वदेशयोः कर्तृधारणात् । मासमोदनं पचतीत्यादौ द्रव्यकर्मविषये च द्रव्यकर्मधारणं स्फुटमेव । व्याप्तिविवक्षायां तु कर्मत्वमाधारभावस्यापगमनादिति इव शब्दः । यद्वा कर्तृकर्मव्यवधानेन यथाधारः क्रियायोगं भजते तथा द्रव्यकर्मव्यवधानेन कालादीत्युपमार्थः । द्रव्यकर्मणा च पूर्वं क्रियायोगः । तद्द्वारेण तु कालादिकर्मणेति भिन्ना कक्ष्या अवस्थास्य कर्मत्वस्य । तथा हि
शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते ।
क्रियासु कालयोगोऽतः प्राग्योगो द्रव्यकर्मणा ।।

इत्युक्तम् । कठिनस्य हि पाक्यद्रव्यस्य चिरेण निष्पत्तिः, महापरिमाणस्य बहुसंख्याकस्य च विपरीतस्य त्वचिरेणेति द्रव्यकर्मापेक्षः कालादिविशेषः । एवं गोदोहं स्वपिति, इषुपातं पचतीत्यत्रापि वाच्यम् । कोशमधीते स्वाध्यायम्, कुरून् पञ्चालानधीते इत्यत्राध्ययनप्रचयापचयायत्तावध्वदेशयोर्वृद्धिह्रासाविति विप्रकृष्यते कालादिकर्म क्रियासंबन्धं प्रति द्रव्यकर्मापेक्षया । अत एवोत्तरकालभवमेतेषां कर्मत्वम् । समस्तसाधनसंबन्धे हि वृत्ते क्रियायाः परिच्छेदहेतवः कालादयोऽपेक्ष्यन्ते इति भिन्नकक्ष्यास्ते

`अकथितं च' (P.1.4.51)

इत्युत्तरेण योगेन कर्मसंज्ञां लभन्ते, नेप्सिततमत्वेन, ईप्साप्रकर्षाभावात् । दुह्यादिपरिगणने चाकथितसूत्रे

"कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् देशश्च । (Va.onP.1.4.51)

इत्यत्रैवोक्तम् । गुणप्रधानसन्निधौ च प्रधानमेव कार्येण युज्यत इति द्रव्यकर्मणि लादिविधिः । मासमोदनः पच्यते, पक्वः, पक्तव्यः, सुपचः क्रोशमधीतोऽनुवाक इत्याद्युदाहार्यम् । द्वितीया तु भिन्नशब्दोपादाना कालादिकर्मण्यपि भवति । एको हि लादिर्गुणप्रधानभूतं कर्मद्वयमशक्तोऽभिधातुमिति प्रधाने कार्यसम्प्रत्ययः । भिन्नरूपप्रातिपदिकद्वयात्तु विभक्तिरुत्पद्यमाना कर्मद्वयमपि प्रत्याययति ।

यतश्च कालादीनां सर्वधातुविषयं भिन्नकक्ष्यं च कर्मत्वम्,

अतस्तैः कर्मभिर्धातुर्युक्तोऽद्रव्यैरकर्मकः ।

लस्य कर्मणि भावे च निमित्तत्वाय कल्पते ।। 69 ।।

(66) यत्रास्ति द्रव्यकर्म तत्र तदपेक्षया कालादिकर्मणोऽप्रधान्याल्लादिस्तत्र न भवति । यत्र तु द्रव्यकर्म नास्ति तत्र कालादावेव कर्मणि लादिः । लग्रहणस्योपलक्षणार्थत्वाच्च । लकृत्यक्तखलर्थाः आस्यते मासः, आसितव्यः , आसितः स्वास इत्यादि । अकर्मकव्यापदेशश्च धातूना द्रव्यकर्माभावनिमित्तः, कालादिकर्मणः सर्वत्र संभवात्, संभव्यभिचाराभ्यां विशेषणयोगात्, इति कालादिकर्मसंभवेऽप्यकर्मकव्यपदेशस्य द्रव्यकर्माभावनिमित्तस्याव्यावृत्तेर्भावे लकारः सिद्ध्यति, मासमास्यते भवतेत्यादि । मासमासितो देवदत्त इति चाकर्मकत्वात् कर्तरि क्तः । गत्यादिसूत्रे चाकर्मकत्वाश्रया प्रयोज्यस्य कर्मसंज्ञा सिद्धयति मासमासयति देवदत्तमित्यादौ । अत एव तत्र

"अकर्मकग्रहणे कालकर्मणामुपसंख्यानम्"(Va.onP.1.4.52)

"सिद्धं तु कालकर्मणामकर्मकवद्वचनात्"(Va.onP.1.4.52)

इति वार्तिकार्थो न्यायसिद्धः । तथा च भाष्यम् ।

"न च केचित् कालभावाध्वभिरकर्मकाः । त एवं विज्ञास्यामः क्वचिद्ये अकर्मका इति । अथवा येन कर्मण सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणाम् । न चैतेन कर्मणा कश्चिदप्यकर्मकः । अथ वा यत्कर्म भवति न च भवति तेनाकर्मकाणाम् । न चैतत् कर्म क्वचिदपि न भवति ।" (M.Bha.on P.1.4.52)

इति । परिहारत्रये को विशेषः । उच्यते । शब्दकर्माकर्मकाणामित्यत्र अविवक्षितकर्मका अकर्मका आश्रियन्ते । एवं ह्यास्ते शेथे इति क्रियामात्रविवक्षायां कालादिभिरप्यकर्मकत्वं संभवति । तथैव पचादीनामप्यविवक्षया कर्मसंबन्धेऽपाकृते अणि कर्तुर्णौ कर्मसंज्ञाप्रसङ्गः । तस्माद्यस्यात्यन्तमसंबन्धः कर्मणा सोऽकर्मकः । स च यदि धात्वर्थ आश्रीयते तदा तस्य क्रियात्मनो विवक्षावशेन कर्मसंबन्धासंबन्धयोर्भेदे कालादिभिरप्यकर्मकत्वे वचनस्य चरितार्थत्वं भवेत् । तस्मादविद्यमाने कर्मास्येति धातुरन्यपदार्थत्वेनाश्रीयते । गत्याद्यर्थत्वेनाणौ णाविति च तस्यैव विशेषणत्वेन प्रक्रमात् ।र्थद्वारके च धातोः कर्मयोगेऽयोगे च रूपस्याविशेषात् अकर्मकत्वं नोपपद्यते , कालादिकर्मभिः सर्वेषां धातूनामवियोगात् । एवं च विशेषणसामर्थ्याद् विशिष्टा एव धातवो द्रव्यकर्मसमन्वयरहिताः समाश्रीयन्ते । द्रव्यकर्मविषयेऽकर्मका इति पूर्वपरिहारार्थः । द्वितीये तु परिहारे वर्तिपदार्थस्य कर्मणः साक्षात् क्रियोपकारकत्वेनान्तरङ्गत्वं विशेषः समाश्रितः । तृतीये तु परिहारे भवति न भवतीत्यभिधानान्निषिध्यमानस्य संबन्धस्य विशेष आश्रीयते । येन कर्मणा कदाचित् संबन्धो भवति तेनैव द्रव्यकर्मणा अकर्मकाणाम्, न नित्यसंबद्धेन कालादिकर्मणेत्यर्थः । द्रव्यकर्मापेक्षत्वाच्च सकर्मकाकर्मकव्यपदेशस्य ।

"उदश्चरः सकर्मकात् "(P.1.3.53)

इत्यनेन मासमुच्चरति धूम इत्यात्मनेपदं न भवतीत्याहुः ।। 69 ।।

न च कालादिकर्मैव भिन्नकक्ष्यम् ,अपि तु
सर्वं वाकथितं कर्म भिन्नकक्ष्यं प्रतीयते ।
धात्वर्थोद्देशभेदेन तन्नेप्सिततमं किल ।। 70 ।।

(67) गां दोग्धि पयः, पौरवं गां याचते, गामवरुमद्धि व्रजम् , माणवकं पन्थानं पृच्छति, वृक्षमवचिनोति फलानि, इत्यादि सर्वमेवापादानादिविशेषकथाभिरकथितम् । द्रव्यकर्मापि गवादि पयःप्रभृतिप्रधानकर्मापेक्षयोपायभूतं नान्तरीयकत्वाद् भिन्नकक्ष्यम् । धात्वर्थस्य हि दोहादेः उद्देश एव भेदो विशेषः तेन हेतुना गवादीप्साप्रकर्षरहितम् । पयःप्रभृति किलोद्दिष्य धात्वर्थः प्रवृत्तः । तत्र तूपायभूता गवादयो नान्तरीयकाः । धात्वर्थेन वोद्देशो विषयीकरणं तस्य भेदः पूर्वापरकालजम् । पूर्वं हि धात्वर्थेन प्रधानं पयःप्रभृति विषयीकृतं पश्चान्निमित्तभूतं गवादि । धात्वर्थं वा दोहादिकमुद्दिश्य यस्माद् गवादयो भेदेनोपायत्वेन प्रवर्तन्ते, अतस्ते भिन्नकक्ष्याः । `किल' इत्यस्मिन् पक्षेऽरुचिं सूचयति । तथा चाभिन्नमेव कर्मेति सिद्धन्तयिष्यति । ननु कालादीनां द्रव्यकर्मायत्तत्वाद् भवतु भिन्नकक्ष्यत्वम्, गवादौ तु विपर्ययात् कथमेतत् । तथा हि गवाद्यायत्तानि पयःप्रभृतीनि कर्माणि । तथा चोक्तम्---

"गुणकर्मणि लादिविधिः पूर्वं गुणकर्मणा भवति योगः ।
मुख्यं कर्म प्रेप्सुर्यस्माद्गव्येव यतते प्राक् ।
तस्माच्छुद्धस्य दुहेर्भवति गवा पूर्वमेव संबन्धः ।।
गोर्दुहिना पयसस्तु प्राक्, तस्माल्लादयस्तस्मिन् "
(M.Bha. on P.1.4.51)

इति । सत्यमेतत् । प्रधानाप्रधानकृतस्तवत्र कक्ष्याभेदः ।। 70 ।।
तथा हि
प्रधानकर्म कथितं यत् क्रियायाः प्रयोजकम् ।
तत्सिद्धये क्रियायुक्तमन्यत्त्वकथितं स्मृतम् ।। 71 ।।

(68) यदुद्दिश्य फलभूतं क्रियाप्रवर्तने साधनानि सज्जीभवन्ति यदवाप्तावुदासते तदीप्साप्रकर्षगृहीतं प्रधानं कर्तुरीप्सिततममिति कर्मसंज्ञया प्रथममेव कथितम् । तच्च पयःप्रभृति तदर्थं तु यदनीप्सितमपि नान्तरीयकं क्रियया समन्वेति तदनवार्तविशेषमकथितकर्माप्रधानत्वाद् भिन्नकक्ष्यमित्यर्थः । तद्यथा गवादि । एवमप्राधान्येऽपि चोपायत्वात् प्रथमं क्रियायोगे लादिविधौ निमित्तत्वाय कल्पते। अनपेक्षिते तु पयसि गौरेव प्रधानम्, क्षीरविच्छेदस्तु तस्य मा भूदित्येवमनर्थ्यपि क्षीरेण सम्प्रति गोसंस्कारार्थं दोहे प्रवर्तत इति ।

अपादानमुत्ताराणि (Va.on P.1.41)

गां दोग्धि' (M.Bha. on the above)

इत्युदाहरणमुपपद्यते विप्रतिषेधेन । अन्यथाकथितकर्मत्वेऽपादानादिसंज्ञा प्राप्त्यभावात् कथं विप्रतिषेधोदाहरणमेतद्भवेत् । अपादानादिविशेषकथाभिरसंस्पृष्टं ह्यकथितं कर्म । तदेवं निमित्तनिमित्तिभावेनावस्थितत्वाद् भिन्नकक्ष्यत्वे कथिताकथितयोः कर्मणोर्भेदादप्राप्ता गवादीनां कर्मसंज्ञा
अकथितं च ।
इत्यनेनारभ्यत इति स्थितम् ।। 71 ।।
इदानीम्

"नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।

द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः ।"(M.Bha. on P.1.4.51)इति भाष्योक्तं व्याचष्टे ।
दुह्यादिवन्नयत्यादौ कर्मत्वमकथाश्रयम् ।
आख्यातानुपयोगे तु नियमाच्छेव इष्यते ।। 72 ।।
(69) अजां नयति ग्रामम्, एधान् वहति नगरम्, हरति भारं संवाहम् । गत्यर्थग्रहणेन गतिबुद्धीत्यादिना येषां द्विकर्मकत्वं ते लक्ष्यन्ते । `तथैव च इत्यनेनानुक्तसमुच्चयार्थेन जयत्यादयो गृह्यन्ते, जयति शतं शतानीकम् स गर्गान् दण्डयति शतमिति । अत्रेप्साप्रकर्षयुक्तमजादिकर्म कथितं प्रधानं पयोवत् । ग्रामादि त्वविधिस्थानीयत्वात् गुणकर्म गवादिवदेव नान्तरीयकत्वादकथितकर्मैव द्रष्टव्यम् परिगणनलक्षणेन तु नियमेनाख्यातानुपयोगे कर्मसंज्ञया व्यावर्त्यते । नटस्य शृणोतीत्यादौ नटादिरुपयोगे ह्यख्यातापादानमित्यनुपयोगे विशेषकथानाक्रान्तत्वाद् भवेदकथितकर्मेति परिगणनलक्षणानियमाच्छेषोऽडयं षष्ठीविषयः ।। 72 ।।
तदेवं प्रधानेतरभावेन कर्मभाव उक्तः । केचित्तु प्रधानमेकमेवेदं कर्मेत्याहुः । तथाहि
अन्तर्भूतणिजर्थानां दुह्यादीनां णिजन्तवत् ।
सिद्धं पूर्वेण कर्मत्वं णिजन्तं नियमस्तथा ।। 73 ।।
(70) अन्तर्भूतो वाच्यतया णिचोऽर्थः प्रयोजकव्यापारः प्रैषलक्षणो येषां दुहियाचिप्रभृतीनां तेषां प्रयोगे गां दोग्धि पय इत्यादौ "कर्तुरीप्सिततमम्" इत्यनेनैव गवादीनामपि सिद्धा कर्मसंज्ञा । यथा "गमयति ग्रामं देवदत्तं यज्ञदत्तः" इत्यत्र णिजन्तविषये प्रयोज्यस्य प्रयोजकव्यापारेणाप्यमानत्वादिति `गतिबुद्धि' इति च नियमार्थं सूत्रं गम्यादीनामेव ण्यन्तानां प्रयोज्यः कर्म, नान्येषां पच्यादीनामित्यण्यन्तविषयेऽत्र न प्रवर्तते । तथा हि गौः पयः क्षरति, देवदत्तः तां क्षरन्तीं क्षारयति,इति दुहेरर्थः । तत्र क्षरणेनाप्यमानत्वात् पयः कर्म, क्षारणेनाप्यमानत्वाद् गौः । यद्यपि चार्थेन रूपेण पयः प्रधानभूतम् , उपायभूता तु गौः तथाप्याभिधेयकेन क्षरमोपसर्जनस्य क्षारणस्य शब्दार्थत्वाद् गौरेव प्रधानं कर्मेति तत्रैव लादयः, दुह्यते गौः, पयः दोग्धव्या,दुग्धा, सुदोहा, इति । "अप्रधाने दुहादीनाम्" इत्यार्थेन रूपेणाप्राधान्यमुच्यते यद्यप्यपायविवक्षां विना क्षारणं नोपपद्यते तथापि
"अपादानमुत्तराणि"(Va.on P.1.4.1)
इति कर्मसंज्ञैवात्र भवति परत्वात् । यदि ह्यकथितसूत्रेण कर्मसंज्ञात्रोच्येत तदापादानत्वात् कथितत्वेनासौ न स्यात् । पूर्वसूत्रेणैव तु कर्मसंज्ञायामुभयसंभवे परत्वाद् `अपादानमुत्तराणि, "गां दोधि" इत्युक्तम् । तथा चात्रापरादानविवक्षावर्णनमसमीचीनम् । एवं पौरवं गां याचते, दापयतीत्यर्थः । पौरवो गां ददाति, तं प्रयुङ्क्ते याचकः श्रद्धोत्पादनेन इति याचेर्ण्यर्थः प्रैषो वाच्यत्वेनान्तर्भूतः । याचनस्य गौः कर्म, प्रैषस्य तु गौः । यदा तु स्थापयतीत्यर्थः तदा व्रजस्याधिकरणता,उभयसंज्ञाप्रसङ्गे तु परत्वात् कर्मसंज्ञोक्ता, अधिकरणं कर्म गेहं प्रविशतीति प्रवेशोपसर्जनमत्र स्थानमर्थः गेहं प्रवेशनेन व्याप्य तिष्ठतीति । निमित्तनिमित्तिभावेन प्रवेशस्थाने प्रतीयेते । तत्र प्रवेशापेक्षया कर्म स्थानापेक्षयाधिकरणमित्युभयप्राप्तौ परत्वात्कर्मोदाहृतम् । माणवकं पन्थानं पृच्छति इति आचष्टे पन्थानं माणवकः, तं प्रयुङ्क्ते आख्यापयतीत्यर्थः । आचिख्यासति वा माणवकः, तं प्रयुङ्क्ते आचिक्यापयिषतीत्यर्थः । एवं पौरवो गां दित्सति, तं प्रयुङ्क्ते याचक इत्यप्यर्थोऽवगम्ययते । एवं भिक्षेरप्यर्थो वेदितव्यः । वृक्षमवचिनोति फलानि, मुञ्चति वृक्षः फलानि , तं मोचयतीत्यर्थः । अपायविवक्षायामपि `अपादानमुत्तराणि' इति कर्मसंज्ञैवात्र । माणवकं धर्मं ब्रूते, प्रतिपादयतीत्यर्थः । तत्र प्रतिपत्तेर्धर्मः कर्म, प्रैषस्य तु माणवकः ।`माणवकमनुशास्ति धर्मम्' इति । शिक्षते धर्मं माणवकः, तं शिक्षयतदीत्यर्थः । कर्मणाभिप्रेयमाणस्य तु माणवरस्यात्र संप्रदानसंज्ञायां प्रधानव्यापारविषयया कर्मसंज्ञयात्र संप्रदानसंज्ञा बाध्यत इति वक्तव्यम् । यद्वा कर्तुर्यदीप्सिततमं कर्म तेनाभिप्रयेमाणस्य संप्रदानस्य संप्रदानत्वम् । यथोपाध्यायाय गां ददातीति । गौर्हि दातुर्वल्लभा । तत एव गुणवते दीयते । धर्मस्तु कर्तुर्नाभिमतः , पूर्वमेव सिद्धेः । तेन तु माणवकोऽनुग्रहीतुमभिप्रेत इति प्रयोज्यस्यात्रोप्सिततमं

कर्म, न प्रयोजकस्येति न संप्रदानसंज्ञाया विषयोऽयमित्यन्ये । एवं नयत्यादावपि पूर्वसूत्रेणैव कर्मत्वम् । अजां नयति ग्रामम्, प्रापयतीत्यर्थः । प्रापणेन प्रधानेन संबद्धाजा प्रधानं कर्मेति

"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्"

(Va. on P.1.4.51)

इति न्यायसिद्धम्, अजा नीयते ग्रामम्, नेतव्या नीता, सुनयेति । एवमन्यत्रापि यतायोगमुदाहार्यम् । सत्यपि चात्र ण्यर्थान्तर्भावे गत्यादिनियमेन प्रयोज्यस्य कर्मसंज्ञा न व्यावर्त्यते सजातीयापेक्षत्वान्नियमस्य, अन्यत्र ण्यन्त एव तेन निवारणात् । अत्र च प्रैषो ण्यर्थो धातुनैव स्वीकृत इति णिच् न भवति ।। 73 ।।

ननु च वास्तवेन रूपेण पयआदेः प्राधान्यात्तस्यैवेप्सिततमत्वं न्याय्यम्, न तु गवादेः प्रतीयमानोपसर्जनभूतक्रियापेक्षमीप्सिततमत्वं युज्यते प्रदानसन्निधाने गुणस्येप्साप्रकर्षविषयत्वाभावात् । न च कारकप्रकरणे

`साधकतमं करणम्' (P.1.4.42)

इति तमब्ग्रहणात् प्रकर्षो न विवक्ष्यते इति शक्यते तत्र वक्तुम्, `ईप्सिततमम्' इति साक्षात् प्रकर्षविवक्षार्थं तमप्श्रुतेरुपादानात् । लिङ्गस्य त्वन्यत्र कृतार्थत्वम् । गङ्गायां घोष इत्यादावधिकरणसंज्ञा यथा स्यादिति । श्रुत्या हि लिङ्गबांधा ।`श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वं पूर्वं बलीयोऽर्थविप्रकर्षादिति न्यायविद्भिरुक्तत्वात् कतं गवादेः पूर्वेण कर्मसंज्ञेत्याशङ्क्याह---

करणस्य स्वकक्ष्यायां न प्रकर्षाश्रयो यथा ।
कर्मणोऽपि स्वकक्ष्यायां न स्यादतिशयस्तथा ।। 74 ।।

(71) यथा कारकान्तरापेक्षया लब्धातिशयस्य करणसंज्ञायां सजातीयकरणान्तरापेक्षया प्रकर्षो नाश्रीयते, येन सर्वस्यैव करणकार्यं प्रवर्तते, अश्वेन पथा दीपिकया याति, पदाभ्यां पथा व्रजति, बलेन पादेनादत्त इति । अन्यथा अश्वादेरेव प्रकृष्टतमस्य भवेदिति । तथा कर्मणोऽपि । करणादीनामपि क्रियायामुपयोगादीप्सिततमत्वमिति इति सिद्धा निमित्तनिमित्तिभाववस्थितस्यापि सर्वस्य कर्मणः पूर्वेणोव योगेन कमसंज्ञेति नास्त्यकथितकर्मेत्येकीयमतेनोपन्यासः ।। 74 ।।

एतत्तु न युक्तमित्याह ।

कर्मणस्त्वाप्तुमिष्टत्व आश्रितेऽतिशयो यतः ।
आश्रीयते ततोऽत्यन्तं भेदः पूर्वेण कर्मणा ।। 75 ।।

(72) इह साधनभावस्य सर्वकारकविषयत्वाद् युक्तं यत्कारकान्तरापेक्षया लब्धातिशयसाधनभावं करणं स्वकक्ष्यागतं प्रकर्षं नाद्रियेत । कर्म त्वीप्साप्रकर्षभावं कारकान्तरापेक्षया प्रतिपत्तुममसर्थम् । न हि कारकान्तराणीप्सितानि । कर्त्रा क्रियया यदाप्तव्यं तदीप्सितम् । कारकान्तराणि तु क्रियायै करणीदीन्याप्तव्यानि, न तु क्रियया । तस्मात्तुल्यजातीयापेक्षत्वादतिशयस्य कर्मण आप्तुमिष्टतमत्वं ईप्सितमित्येवमाप्तुमभिप्रेतत्वे आश्रीयते । तमप उपादानादतिशयो यस्मादङ्गीक्रियते तस्मादीप्सितार्थान्तरापेक्ष एवासौ प्रकर्षोऽभ्युपगन्तव्य इति स्वकक्ष्यागत एव सः । तथा च पयःप्रभृति गवादीप्सितापेक्षया प्रकष्टमीप्सितं पूर्वयोगस्य विषयो गवादेस्तु पूर्वेणासिद्धायां कर्मसंज्ञायामकथितमित्यनेन सिद्धिरित्येष एव पक्षो न्याय्यः । ततश्चभिन्नकक्ष्यं कर्मद्वयमेव तत् । स्वकक्ष्यापेक्षेऽनाश्रिते तु कर्मणः प्रकर्षे तमपश्रुतिरनर्थिका स्यात् । तथा चेप्सितमात्रस्य कर्मसंज्ञायां

`वारणार्थानामीप्सितः'(P.1.4.27)

इत्यत्र यवेभ्यो गां वारयति, कूपादन्धं वारयति, अग्नेर्माणक्कं वारयतीत्युदाहरणं न स्यात् । यवोदरपि कर्मसंज्ञाप्रसङ्गात् । ततश्चैतत् सूत्रं निर्विषयं भवेदिति विषयविभागार्थं कर्मापादानयोः स्वकक्ष्यागतः कर्मणोऽतिशयः सिद्धान्तितः । तथा च वार्तिकम्---

"वारणार्थानां कर्मानर्थक्यं कर्तुरीपतिततमं कर्मेति वचनात्"

(Va. on P.1.4.27)

भाष्यमपि । यत्तु कथितं पुरस्ताद् ईप्सितयुक्तं च तस्य सिद्ध्यर्थमीप्सिततमग्रहणम् इति वारणार्थानामित्यनेन कथितमिति `अकथितं च' इत्यनेनान्धादेरीप्सितेन कूपादिना युक्तस्य कर्मसंज्ञा न सिद्ध्यतीति `ईप्सिततमम्' इत्यनेन सिद्ध्यतीत्यर्थः । यत्पुरनीप्सितमात्रमपादानादिसंज्ञाभिरकथितं तस्याकथितसूत्रेण गवादेः कर्मसंज्ञेति भाष्येऽभिहितम् । ईप्सितमेव तु यत् स्यात् तस्य भविष्यत्यकथितेनेति ।। 75 ।।

यत् पुनरेतदुक्तं दुह्यादीनां णिजन्तवत् सिद्धं पूर्वेण कर्मत्वमिति तत्राप्याह ।

णिजन्ते च यथा कर्ता सक्रियः सन् प्रयुज्यते ।

नयत्यादौ तथा कर्ता निष्क्रियोऽपि प्रयुज्यते ।। 76 ।।

(73) गमयति ग्रामं देवदत्तमित्यादौ णिजन्ते प्रकृतिप्रत्ययवाच्ये द्वे क्रिये भिन्ने प्रतीयते इति तदपेक्षं द्वयोः कर्मत्वं युज्यते । गां दोग्धि पय इत्यादौ तु प्रकृतिवाच्यैकैव क्रियेति कथं कर्मद्वययोगः । न चाप्यन्तर्भूतणिजर्थत्वेन तदुपपत्तिः । णिजर्थस्यात्रायोगात् । प्रैषो हि णिजर्थः । स च प्रवृत्तक्रियस्य सव्यापारस्य कर्तुरुपपद्यते । तथा हि तस्य स्वतन्त्रस्य प्रयोजको यो हेतुः तद्व्यापारो णिजुक्तः । अत एवाप्रवृत्तिक्रियाणां करणादीनां प्रयोजकस्य स्वतन्त्रस्य कर्तुर्हेतुसंज्ञा न भवति । तदेवं गवादेर्निष्क्रियत्वान्न तद्व्यापारेणाप्यमानत्वात् पयआदेः कर्मता, अपि तु दोहेन देवदत्त व्यापारेणैव गोपयसोर्द्वयोरपि आप्यमानत्वमित्यतिशययोगात् पयआदोरेव पूर्वेण कर्मत्वम्, गवादेस्त्वकथितमित्यनेनारभ्यते ।। 76 ।।

ननु च यथा गच्छन्तं संप्रयुक्ते गमयतीति प्रयोगः तथा क्षरन्तीं क्षारयति दोग्धि इत्यर्थ इत्याशङ्क्याह ।

भेदवाक्यं तु यत् ण्यन्ते नीदुहितप्रकृतौ च यत् ।

शब्दान्तरत्वान्नैवास्ति संस्पर्शस्तस्य धातुना ।। 77 ।।

(74) गच्छन्तं प्रयुङ्क्ते इत्यादिना गमयतीत्यादौ ण्यन्ते प्रकृतिप्रत्ययार्थयोर्विभागप्रदर्शनाय यद् वाक्यम्, ग्रामं प्राप्नुवन्तीमजां प्रयुङ्कते , क्षरन्तीं गां प्रयुङ्क्ते इत्यादि च नयति दोग्धि इत्यादौ प्रयोगाच्छब्दान्तरं भिन्नार्थमेव । न ह्येषोऽत्र धात्वर्थः परमार्थतः, अदूरविप्रकर्षेणार्थमात्रकथनमेतत् । यथा राजपुरुषादौ राज्ञः पुरुष इत्यादि । तथा हि गच्छन्तं प्रयुङ्क्त इत्यादौ वाक्ये प्रयोज्यकर्तुर्निदर्शनं गमयतीत्यादौ ण्यन्ते प्रयोज्यक्रियामात्रं प्रतीयते । प्रयोज्यस्तु स्वशब्दोपादानो देवदत्तमिति । यत्र चैतद् भेदवाक्यं विदूरं ण्यन्ते तत्र नयत्यादीनां सुतरां विदूरता । न ह्यत्र वाक्यार्थो धातूपादानः कश्चित् । अतस्तस्य वाक्यस्य वाक्यार्थस्य वा दुहादिधातुना नास्ति संबन्धः । तस्मान्नात्र ण्यर्थान्तर्भाव इति क्रियाद्वयाश्रयेणापि कर्मविशेषसमर्थनमसमीचीनम् । तदेवमेकैवेयं विलक्षणा कर्मद्वयविषया क्रियेति

सर्वं चाकथितं कर्म भिन्नकक्ष्यं प्रतीयते ।

धात्वर्थोद्देशभेदेन तन्नेप्सिततमं किल ।।

इत्येष पक्षोऽवस्थापितः । अप्राधान्येऽपि चाकथितकर्मणोऽन्तरङ्गत्वात् प्रथमं क्रियायोगाल्लादिविधिरुक्तः । नयत्यादौ तु प्राधान्यमजादेरिति तत्रैव लादयः । ण्यन्ते तु ण्यर्थस्य प्राधान्यात्तेनाप्यमानत्वात् कर्तैव प्रधानं कर्मेति तत्रैव लादयः । ततश्च प्रदानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।

अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ।।

इति न्यायसिद्धमिदमुदाहृतम् ।। 77 ।।

इदानीं सिद्धान्तमुद्घाटयति ।

यथैवैकमपादानं शास्त्रे भेदेन दर्शतम् ।

तथैकमेव कर्मापि भेदेन प्रतिपादितम् ।। 78 ।।

(75) ध्रुवमपाये (P.1.4.24)

इत्यनेनैव सर्वत्रापादानसंज्ञा भाष्येऽपि प्रतिपादिता । भीत्रार्थादिविषयेऽपि बौद्धापायस्य भावात् । अबुधबोधनार्थं हि `भीत्रार्थानाम्' (P.1.4.25)

इत्यादिना भेदेन कथनम् । तथा च वक्ष्यति ।
निर्धारणे विभक्ते यो भीत्रार्यानां च यो विधिः ।
उपात्तापेक्षितापायः सोऽबुधप्रतिपत्त्ये ।।

इति । एवं कर्मापीप्सिततममेकमेव, कर्तुः क्रिययाप्यमानत्वस्य सर्वत्र भावात् । मन्दबुद्धयनुग्रहाय तूत्तरसूत्रप्रपञ्च इति कारिकार्थः । यद्यपि च पयःप्रभृत्यर्थं गवादेरुपादानं तथाप्यस्त्येव धात्वर्थेन तस्याप्यमानत्वम् । तद्यथा तण्डुलानोदनं पचतीति । अक्ष तण्डुलानां विक्लित्तिविशिष्टा हि विक्लेदना पचेरर्थः । तत्र विक्लित्त्याख्यगुणद्वारेण तण्डुला अपि कर्म विक्लेदनस्य, साक्षात्त्वोदनम् । तण्डुलन् विक्लेदयन्ोदनं निर्वर्तयतीत्यर्थः । इत्थं च गुणप्रधानभूतैकधातुवाच्यक्रियाभेदाश्रयेणात्र यथा कर्मभेदः तता क्षरणोपसर्जनक्षारणार्थतायां दुहेर्गोपयसी सममेव कर्मभावमनुभवतः । तथा च ण्यर्थान्तर्भावोऽपि युक्तः । ण्यन्तेऽपि प्रकृत्यर्थविशिष्टस्य प्रत्ययार्थस्य प्राधान्यान्निष्क्रियत्वं स्वतन्त्रस्य । न ह्यत्र णिच् क्रियते येन
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ।

इति न्यायोऽनुवर्ण्येत । धातुवाच्यस्तु ण्यर्थः । तद्यथा साधयतीति ण्यर्थः पचतिवाच्यः, भेदवाक्यं तु भवत्यदूरविप्रकृष्टं भिन्नार्थमत्यन्तविशेषापेक्षया । सामान्यपेक्षया त्वेकार्थमेव राजपुरुषवृत्तिवाक्यवत् । तथा च प्रतीयत एवैतद्वाक्यार्थोऽत्र प्रयोगे । न चापि गवादीनां निष्क्रियत्वं न्याय्यं क्रियासमवायभावे कारकत्वाभावात् । आरभ्यमाणेऽप्यकथितयोगे कर्मसंज्ञा न स्यात् । प्राक् प्रयोगान्निष्क्रियत्वमिति चेत् ण्यन्तेऽपि समानमेतत् । यथा च तत्र संभावितक्रियस्य कर्तुः प्रयोजक िति तद्व्यापारोपपत्तिः तथात्रेति न किंचिदवद्यम् । तमब्ग्रहणस्य च प्रत्याख्यानादीप्साप्रकर्षानाश्रयणम् । यत्तु तमब्ग्रहणस्योदाहरणं `दध्ना भुञ्जीय' इति तत्र समकक्ष्यतया दध्योदनयोरीप्सितत्वे तमब्ग्रहणमकिंचित्करम् । संस्कारकत्वे हि दध्नस्तत्संस्कृतस्यौदनस्यैवेप्सिततमत्वमिति नास्त्येतदुद्राहरणम् । तथा च भाष्यम् ।

"तस्याप्योदन एवेप्सितः, न तु गुणेष्वस्यादरः"

(M.Bha. on P.1.4.49)

इति । यदपि कर्मापादानयोर्विषयविभागप्रदर्शनार्थं तमब्ग्रहणमित्युक्तं तत्रापि वारणार्थानां वारयितव्यानां वारणमर्थयन्त इति वारणयोग्यानां यदीप्सितं तदपादानमित्येवं व्याख्यानाददोषः । तथा हि वारयितव्याः प्रतिषेद्धव्याः गवादयः; तेषामीप्सिता यवादय एवापादानम् । तदेवमीप्सितमेव सर्वं कर्म । इत्थं च दुह्याद्युदाहरणार्थं न परिगणनमेतत् । नटस्य शृणोतीत्यादौ नटादि शृणोतिक्रियया निमित्तमात्रं न तु तयेप्सितत्वेन विवक्ष्यत इति कर्मसंज्ञाभावः । शृणोतिक्रियायां च सव्यापारो नटः कारकमुपयोगग्रहणादपादानसंज्ञाया व्युदस्यते । न चान्या संज्ञास्य विहितेति शेषोऽयं षष्ठीविषयः ।
हेतुतृतीयायास्त्वयमविषयः
अनाश्रिते तु व्यापारे निमित्ते हेतुरिष्यते ।
द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।।

इति वचनात् ।। 78 ।।

ननु निर्वर्त्यादिभेदः कर्मणोऽभिहित इति कथमेकमेव कर्मेत्याशङ्क्याह ।
निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः ।
क्रियाणामेव साध्यत्वात् सिद्धरूपोऽभिधीयते ।। 79 ।।

(76) इह साधनाश्रयः शक्त्याधारो निष्पन्नरूपो नामपदैरुच्यते । आख्यातपदैस्तु साध्यस्वभावः क्रियात्मार्थोऽभिधीयत इति क्रियाद्रव्ययोः सिद्धसाध्यास्वभावरूपं लक्षणं शब्दप्रतिपाद्येन तद्रूपेण कथ्यते । यद् भाष्यम्---

"क्रिया चैव हि भाव्यते, स्वभावसिद्धं द्रव्यम्"

(M.Bha.on P.1.3.1)

इति । तथा च कटं करोति, तण्डुलानोदनं पचति, सूर्यं पश्यति इति नामपदैः कर्म शक्त्याधारमविलक्षणं सिद्धतया प्रत्याय्यत इति नास्ति तस्य स्वरूपभेदः स्वगतः । क्रियार्थत्वाच्च वस्तुतः साधानानां क्रियाधर्मेण व्यपदेशः ।

निर्वृत्तिविपरिणतिप्राप्तिलक्षणा हि क्रियाः स्वसामर्थ्यायत्तमुपकारं कर्मणि दर्शयन्त्यो विभिन्नव्यपदेशनिमित्ततामासादयन्ति । एवं च कृत्वा शाब्देन रूपेण सिद्धत्वात् कर्मणः साधनमावोऽप्युपपद्यते । क्रियाविशेषावेशितव्यापदेशभेदानाश्रये तु
क्रियाविषयकारकनिमित्ततयेप्सितमित्येव सामान्याख्यया सर्वं कर्म कथ्यत इति सिद्धम् ।। 79 ।।
गतमदः । इह कथमीप्सितत्वम्, `विषं भक्षयति', `चोरान् पश्यति ' इत्याशङ्क्याह ।
अहितेषु यता लौल्यात् कर्तुरिच्छोपजायते ।
विषादिषु भयादिभ्यस्तथैवासौ प्रवर्तते ।। 80 ।।
(77) वाय्वादिधातुवैषम्यनिमित्तेषु यताऽऽतुरस्य हितमिति भोजननियमासहिष्णोरभिलाषो भवति तथा स्वाम्यादिभयपरिपीडितस्य क्षेत्रियव्याधिदुःखार्तस्य वा परं विषभक्षठमेव ज्याय इति मन्यमानस्य भवति विषं भक्षणेनेप्सितमिति
तथायुक्तं चानीप्सितम् । (P.1.4.50)
इत्येतदपि कर्म पूर्वेणैव सिद्धम् । तदाह भाष्यकारः ।
"यच एष मनुष्यो दुःखार्तो भवति सोऽन्यानि दुःखान्यनुनिशम्य विषभक्ष
णमेव ज्यायो मन्यते ।" (M.Bha.on P.1.4.50)
इति । `लौल्यात् ' इति । न प्रेक्षापूर्वकारिताघटिता सर्वत्रेप्सा, अपि तु प्रकारान्तरेणापि सम्भवतीत्यर्थः ।
भक्षणक्रियाविषयभावापत्तिरेवात्रेप्सितत्वं तथायुक्तग्रह
णादेवावसीयते । सूत्रारंभेऽपि परोपहितं चाविज्ञातविषभावः भक्ष्यमाणीप्सितमेव विषम् । एवं दृशिक्रियया चोरादीप्सितमेव । यदीप्सितादन्यन्नैवेप्सितं नानीप्सितं वृक्षमूलादि तदपि पूर्वमनभिसंहितमपि
तदानीमनुपसर्पणवेलायामीप्सितमेव,अन्यथोपसर्पणक्रियविषयभावमेव नोपेयात् । तमब्ग्रहणं च प्रत्याख्यातमिति श्रमापनोदनार्थं ग्रामगमनेऽप्यन्तरा वृक्षमूलोपसर्पणमपि संहितमिति सिद्ध्यतीप्सितमात्रस्य कर्मसंज्ञा पूर्वेणैव । संज्ञान्तरपूर्व कमपि
कर्मेप्सितमित्येव सामान्यलक्षमेन सिद्धम् । ग्राममधिशेते, नगरमुपतिष्ठति, इत्यादावुपसर्गसंबन्धे सकर्मकत्वाद्धातूनां परत्वात् कर्मसंज्ञायामधिकरणं कर्म गेहं प्रविशतीत्युक्तम् । अनुपसर्गत्वेऽधिकरणसंज्ञा भवति । अक्षान् दीव्यति' इति
विजिगीषोपसर्जनपातनवचने दीव्यतावीप्सितत्वमक्षाणाम्, क्रीडार्थत्वे तु `अक्षैर्दीव्यति' इति करणताक्षाणामित्युभयसिद्धौ
समावेशार्थं सूत्रम्---
`दिवः कर्म च ' (P.1.4.43)
इति । तदुक्तं वार्तिके
`गतिदिविहेतुमत्सु च ग्रहणम्'
इति । असति समावेशार्थे सूत्रे कर्मसंज्ञाया अवकाशो `मनसा दीव्यति' इति । मनसादेव इति कर्मण्यण्प्रत्ययः । करणसंज्ञायास्तु देवनोऽक्ष इति करणे ल्युडिति परत्वाद् द्वितीयां बाधित्वा तृतीयैव स्यात् ।
`मनसस्तृतीयायाः'(P. 6.3.4)
इत्यलुकि, करणसंज्ञाया अप्यवकाशो मनसादेव इत्येतदेवोदाहरणम् । सूत्रारंभे तु चकारसहिते संज्ञाद्वयसमावेशान्यथानुपपत्त्या द्वितीयापि सिद्धयति । एवं कुधद्रुहोरप्यनुपसर्गयोः सम्प्रदानता उपसृष्टयोस्तु परत्वात् कर्मतेत्येवंजातीयमेव कर्म प्रागेव
प्रतिपादितमस्माभिः पुनरपि स्मारितम् ।। 80 ।।
गतमेतत् । इदमिदानीं चिन्त्यते । इह कर्मद्वययोगे प्राधान्यमार्थमाश्रित्यप्रधाने लादिरुक्तः । द्वितीया तु
प्रातिपादिकद्वयादप्युत्पद्यत इति तत्र गुणप्रधानभूतक्रियाद्वय विषयायामपि कर्मशक्तावेकस्या लादिनोक्तत्वेऽपरशक्त्यभिधानाय द्वितीया कस्मान्नोत्पद्यत इत्याशङ्क्याह ।
प्रधानेतकयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ।। 81 ।।

(78) इहार्थानामेकवाक्योपात्तानां समन्वयो भवति । तत्र द्वयोः प्रधानयोः समत्वान् मिथोऽङ्गाङ्गिभावो नोपपद्यते, नापि द्वयोर्गुणयोः

"गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्" (Mi.Su.3.1.12.22)

इति । गुणप्रधानभावेन तु समन्वयोपपत्तावेकवाक्यता भवतीत्याह---

`प्रधानेतरयोर्यत्र'

इति ।। 81 ।।

तत्र प्रधानानुमायित्वाद् गुणानामप्रधानक्रियाविषयकर्मशक्त्यभिधाने द्रव्यस्य गुणक्रियाविषयाप्यभिहितवत् प्रकाश्यत इति प्रधानानुरोधं सामान्येनोक्तं व्याख्यातुमाह ।

प्रधानविषया शक्तिः प्रत्ययेनभिधीयते ।

यदा गुणे तदा तद्वदनुक्तापि प्रकाशते ।। 82 ।।

(79) प्रधानक्रियावाचिनो धातोरुत्पन्नेन प्रत्ययेन लादिना यदा प्रधानक्रियाविषया कर्मशक्तिः प्रत्याय्यते तदा गुणक्रियाविषयापि साक्षाद् अनुक्तापि तद्वत् प्रकाशते इतीयमनुवृत्तिर्व्याख्याता । अत्रोदाहरणमाह ।

पचावनुक्तं यत्कर्म क्त्वान्ते भावाभिधायिनि ।

भुजौ शक्त्यन्तरेऽप्युक्ते तत्तद्धर्मः प्रकाशते ।। 83 ।।

(80) `पक्त्वौदनो भुज्यते' इत्युदाहरणम् । अत्र क्त्वाप्रत्ययस्य तुमर्थग्हणानुवृत्या भाष्यकारमतेन भावे विधानम् । वार्तिककारो हि

`आ च तुमुनः समानाधिकरणे' (Va. on P.3.4.26)

इति पपाठ । यथावकाशं

`शकधृषः.....'(P.3.4.65)

इत्यादिसूत्रविधीयमानाज् आ तुमुन्प्रत्ययादनुप्रयोगधातुना समानाभिधेया णमुलादयः प्रत्यया वक्तव्या इति वार्तिकार्थः । तेन `स्वादुंकारं भुज्यते यवागूर्देवदत्तेन इति णमुला कर्माभिधानाद्यवागूशब्दाद् द्वितीया न भवति । देवदत्तशब्दाच्च तृतीया भवति । अन्यथा कृतत्वात् कर्तरि णमुलुत्पत्तौ देवदत्तशब्दात्तृतीया न स्यात् । अनेनैव न्यायेन `पक्त्वौ दनो भुज्यते' इत्यत्रापि क्त्वाप्रत्ययो `भुज्यते' इत्यनुप्रयोगधातु ना समानाभिधेये कर्मण्येवोत्पद्यत इति नास्ति कस्याश्चिदपि सक्तेरनभिधानमितित वार्तिककारमतेनेदमुच्यते । भाष्यकारस्तु `पक्त्वौदनं गम्यते ग्रामः " इत्यत्रानेन न्यायेन द्वितीया न स्यादिति वार्तिकं प्रत्याचष्टे । तुमर्थग्रहणानुवृत्त्या णमुलादीनां भावे विधानं मन्यते । तुमर्थो हि भावः । कृत्त्वात्कर्तरि सिद्धे सेक्त्वाप्रभृतीनां तुमर्थ इति वचनात् कर्तुरपकर्षः । न चान्यस्तुमुनोऽर्थो निर्दिष्ट इत्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वस्याः प्रकृतेरर्थो भावः सिद्धः । एवं क्त्वान्ते `पक्त्वा' इत्यस्मिन् भाववाचिनि पचिक्रियाविषयौदनस्य कर्मशक्तिरनुक्ता । भुजिक्रियाविषयायां कर्मशक्तौ लेनाभिहितायां तथैव तद्धर्मः तस्य प्रधनस्यैव धर्मः प्रत्यायितत्वलक्षणो यस्य तद्धर्मः प्रकाशते इति द्वितीया न भवत्योदनात् । `पक्त्वौदनं भुङ्क्ते इत्यत्र पचिक्रियापेक्षादेव देवदत्तात् कर्तुलतृतीयाप्यस्मान्न्यायान्न भवति । पक्वौदनं गम्यते ग्राम इत्यत्र तु गमिप्रत्ययेनौदनगता कर्मशक्तिर्नाभिहितेति भवति द्वितीया । यद्यपि च साधनैकार्थसमवेतायां संख्यायां भुज्यत इति विभक्तिरुत्पद्यते तथापि पचिविषयकर्मोपाधिसंख्यानभिधानाद् भवेद् द्वितीयेति न्यायोऽयमुद्घोष्यते । एकत्वादिष्वपि हि विभक्तयर्थेष्यवश्यं कर्मादयोऽङ्गत्वेनापेक्षणीयाः ।। 83 ।।

उदाहरणान्तरमाह ।

इषेश्च गमिसंस्पर्शाद् ग्रामे यो लो विधीयते ।

तत्रोषिणैव निर्भोगः क्रियते गतिकर्मणः ।। 84 ।।

(81) `इष्यते ग्रामो गन्तुम्' इत्युदाहरणम् । अत्रेषेरुभे कर्मणी, गमेर्ग्राम एवेति ग्रामस्थेषिविषयायां कर्मशर्तावभिहितायां

ग्रामविषयापि तद्वत् प्रकाशते । तत्र गमनार्थमेषणाम् । तथा च क्रियायां क्रियार्थायामुपपदे तुमुन्नति फलभूतात्र गमिक्रिया प्रधानं नेषिरिति शङ्क्यामुदाहरणान्तरमिदम् । आख्यातपदवाच्ये ह्यर्थे निर्वर्त्यत्वात् प्रधानता वर्तते । पक्त्वा भुज्यत इत्यत्र त्वार्थमपि प्राधान्यमस्ति । पाकस्य भोजनार्थत्वात् । `गामिसंस्पर्शाद्' इति । इषेर्द्रव्यान्तरसंबन्धः क्रियान्तरमुखेनैव सर्वदा भवति । तदिह दर्शनादिमुखेन ग्रामे इच्छा, अपि त्वेकवाक्योपात्तगमिद्वारेणेत्यर्थः । निर्भोगः चर्वणम्, आख्यानम्, इति यावत् । `इषिणैव' इति । इषिप्रत्ययेन लकारेण कर्मणि विहितेन । तन्त्रेण हि शक्तिद्वयमप्यभिदधाति प्रत्यय इति वाक्यपदीये निर्णीतम् ।। 84 ।।

मतान्तरेणाप्यत्रोपपत्तिमाह ।

पक्त्वा भुज्यत इत्यत्र केषांचिन्न व्यपेक्षते ।

ओदनं पचतिः सोऽसावनुमानात् प्रतीयते ।। 85 ।।

केषांचिन्मतेऽत्र वाक्ये पचिक्रियौदनं नापेक्षते । प्रथमान्तस्यौदनस्य पक्त्वेति संबन्धाभावात् । भुज्यते इत्यनेनैव संबन्धो भवत्योदनस्येत्येकैव कर्मशक्तिः, सा चाभिहितेति क्वेदमुपतिष्ठते प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितवत् प्रकाशत इति । यदि तर्हि पचिनौदनस्यासंबन्धः पक्त्वान्यत् किंचिदोदनो भुज्यत इत्यर्थः स्यात् । तथा च विवक्षितमोदनपाकस्य भुज्यङ्गत्वं न प्रतीयेतेत्याशङ्क्याह `सोऽसावनुमानात् प्रतीयते' इति । स इति परामृष्टस्यौदनस्य बुद्ध्या साक्षात्कृतस्यासाविति प्रत्यक्षानुकारेण प्रतिनिर्देशः । साक्षात्पचिसमन्वयायोग्योऽप्योदनः सामर्थ्यात् पचेरपेक्षणीयत्वेन प्रतीयते । किं सामर्थ्यमिति चेत् एकवाक्यत्वमिति ब्रूमः । श्रुतसंबन्धो ह्यश्रुतसंबन्धपरिकल्पनाल्लघुः । एतच्च सत्येव गुणप्रधानभावे नान्यथेति पूर्वोक्त एव न्यायोऽत्राश्रयणीयः, इति पूर्वोक्तमेव दर्शनं न्याय्यम् । अत एवारुच्यान्यमतत्वेनोपन्यासः किल । भुजि पाकमपेक्षत इति सन्निहितेनैवाकाङ्क्षा पूरयितव्या । पाकस्य भुज्यपेक्षया पूर्वकालस्येति गुणप्रधानभावोपपत्तावेकवाक्यतोपपत्तिः ।। 85 ।।

न केवलं कर्माख्यकारकविषयोऽयं न्यायः, यावत् कारकान्तरेऽपीति व्याप्त्यर्थमुदाहरणान्तरमाह ।

तत्राभिनिविशौ कर्म यत्तिङन्तेऽभिधीयते ।

कृत्वान्तेऽधिकरणत्वेऽपि न तत्रेच्छन्ति सप्तमीम् ।। 86 ।।

(83) `भुक्त्वा नगरोऽभिनिविश्यते' इत्यत्राभिनिविशश्चेति नगरस्याभिनिविशेराधारस्य कर्मसंज्ञायां तिङन्तेरऽभिनिविश्यत इत्यत्र प्रधानभूते विषयेऽभिहिता कर्मशक्तिः । भुक्त्वेति क्त्वान्तविषयेऽधिकरणशक्तिरपि गुणत्वात् स्वकार्यं सप्तमीविभक्तिलक्षणं न प्रयुङ्क्ते । सप्तम्या ह्यत्र प्रधानक्रियाविषया कर्मशक्तिर्न प्रतीयेतेति प्रधानोपरोधो गुणेन कृतः स्यात् । न चैष न्याय्यः । प्रधानानुयापित्वाद् गुणानां प्रधानविरोधिनि स्वकार्ये उदासत एव । प्राधान्यं च सर्वत्र तिङन्तार्थस्य शाब्दव्यवहारविश्रान्तिस्थानस्य वाक्यार्थभूतस्य । अनेनैव न्यायेन नगरेऽभिनिविश्य भुङ्क्ते इत्यत्र भुज्याश्रयेणधिकरणत्वेन नगरस्याभिनिविशिकर्मत्वमपोद्यते ।। 86 ।।

गतमेतत् । इह कथं कर्मत्वं `गुडं भक्षयति' इति । गुडो हि निर्वृत्तो भक्षणक्रियागतं न कंचन विशेषमाकाङ्क्षति तथेप्सितम् । अपि तु भक्षणक्रियाया आश्रयविशेषप्रदर्शनार्थमुपादीयत इति क्रियार्थमेतद् द्रव्यं न तु द्रव्यसंस्कारार्था क्रिया, दन्तावचूर्णनादि न भक्षणक्रियाफलम्, अपि त्वन्नादनादिरूपाभ्यवहारलक्षणस्य भक्षणस्य । प्रीतिस्तृप्तिलक्षणा फलमिति नास्ति क्रियांकृतोऽत्र कश्चनोत्पत्त्यादिविशेषः । तदुक्तं वार्तिके ।

"ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारकत्वे कर्मसंज्ञाप्रसङ्गः, क्रियाप्सितत्वात् "

(Va.on P.1.4.49)

इति । निर्वृत्तस्य इति निर्वत्यकर्मतां प्रतिक्षिपति । उपलक्षणं चैतत् । विकाराद्यभावात् कर्मान्तरतापि नास्ति । निराकङ्क्षस्य वेत्यर्थः । `कारकत्वे'इति क्रियासिद्धौ निमित्तभावमाह । भक्षणक्रियानिष्पत्त्यर्थं गुडस्योपादानात् । अत एव भक्षणाय गुड इति क्रियैव सन्दर्शनादिभिराप्यमानत्वादीप्सिता कर्म, न तु द्रव्यम् । भक्षणमात्रं हि गुडस्येप्सितं न तु भक्षणप्रत्याख्यानेनान्यस्तत्कृतो विशेषः । अत्र वार्तिके परिहार उक्तः ।

`न वोभयेप्सितत्वात्' (Va. on P.1.4.49)

इति ।। 86 ।।

तत्र कथं गुडादेरीप्सितत्वमित्येतद् व्याख्यातुमाह ।

यन्निर्वृत्ताश्रयं कर्म प्राप्तेरप्रचितं पुनः ।

भक्ष्यादिविषयापत्त्या भिद्यमानं तदीप्सितम् ।। 87 ।।

(84) निर्वृत्तो निष्पन्नोऽत एव निराकाङ्क्षः आश्रयो गुडादि द्रव्यं यस्य कर्ममः कर्मशक्तेरिति निर्वत्यकर्मताव्युदासः । विकारानाकाङ्क्षणाच्च विकार्यतापि व्यदस्ता । `प्राप्तेरप्रचितम्' इति । प्राप्तेर्भक्षणक्रियासंबन्धाद्योऽपि प्रचायापचययोर्विशेषस्तेनाप्रयुक्तमप्रचितमिति प्राप्यकर्मतापि व्युदस्ता पूर्वपक्षे । आद्येन हि कारिकार्धेन पूर्वपक्षवार्तिकार्थः संगृहीतः । द्वितीयेनार्धेनोत्तरवार्त्तिकव्याख्यानम् । भक्षिभुज्यादिक्रियाविषयभावापत्त्या भिद्यमानं विशिष्यमाणं गुडादीप्सितं प्राप्यमेतत् कर्मेत्यर्थः । तथा हि,न भक्षणादिक्रियैवात्रेप्सिता । एवं हि लोष्ठमपि भयक्षित्वा कृती भवेत् । नापि गुडः क्रियान्तराश्रयत्वेनेप्सितः, अपि तु भक्षणाश्रयत्वेनेत्युभयमाश्रयाश्रयिभावेन समुदितमीप्सितम् । यस्य हि गुडभक्षणमीप्सितं तस्य गुडोऽपीप्सितः । भक्षणक्रियासंबन्ध एव चात्र क्रियाकृतो विशेषः प्राप्यकर्मतायां विशेषान्तरस्यानाकांक्षणात् । अन्यथा निर्वत्यविकार्याभ्यां को विशेषः स्यात् । भक्षणस्य प्रीत्यतिशयोऽत्र फलम् । स च गुडस्य तत्संबन्धे सति घटत इत्ययमेव विशेषः । क्रियाकृतः स्वानुरूपफलप्रलवयोग्यता हि संस्कारः । ननु च तृप्तिलक्षणायां प्रीतौ गुडोऽङ्गमिति कथं प्रधानकारकरूपं कर्मत्वमस्याः । उच्यते । तृप्त्यङ्गतायां गुडस्यायमितिकर्तव्यातविशेषो यद्भक्षिक्रियाविषयीकरणे तां प्रति प्राधान्यम्, नान्यथा तृप्तिः सम्पादयितुं शक्या । तदस्य तृप्त्यङ्गभावेऽयं प्राथमकल्पिको व्यापारः । तद्यथा गुरुः सेव्यमानो धर्मोत्पत्तावङ्गतामेति, तच्चास्य परिचरणक्रियाविषयभावगमनमन्तरेण न घटनामेतीति गुरुं शुश्रूषत इति प्राधान्योपपत्तिः । तदेवमत्र पूर्वपक्षे द्रव्येप्सापह्नवेव क्रियामात्रस्येप्सा दर्शिता । अतस्तदानुगुण्येन परिहारे द्रव्यस्यापीप्सा प्रदर्शिता । यदि तर्हि क्रियाविषयभावमात्रगमनेन कर्मतासिद्धिः तथा सति सर्वत्र क्रियामात्रेऽपि सकर्मकता स्यात् । ततश्चाकर्मकव्यपदेशाः शास्त्रे विरुध्येरन् । न च विरुध्यन्ते । न ह्यवश्यं क्रियामात्रे बाह्यविषयसंभवः । काचिद्धि क्रिया कर्तर्येव विश्राम्यति । न तु बाह्यभावमपेक्षते । तद्यथा आस्ते, शेते इत्यादि । द्वयर्थः पचिरिति वचनात् सर्वधातुविषयेऽपि भावनालक्षणे व्यापारे धात्वर्थ एवात्र भावनापर्यवसानात् स एव भाव्यः । `आसनं करोति' शयनं करोति इति । अत एवात्र बाह्यभावनिष्ठा भावना तत्र तेन बाह्येन कर्मणा भाव्येन सकर्मकत्वम् । तत्र च किमित्यनुयुज्यते । पचति किमोदनमित्यादि । धात्वर्थस्य हि सर्वत्राव्यभिचाराद् भाव्यत्वेऽपि न तेन सकर्मकाकर्मकविभागः शक्यक्रियः [कालादिकर्मणेव बाह्यं तु कर्म व्यभिचरतीति तदपेक्षोऽयं विभागः । अत्तश्च शुद्धाया भावनाया धात्वर्थः कर्म, धात्वर्थविशिष्टायां तु बाह्यं कर्म । अत एव बाह्यनिष्ठायां भावनायां धात्वर्थः करणमिति न्यायविदः । तेनोदनं पचति, पाकेनौदनं भावयतीति वाक्यार्थः । यद्यपीह दर्शने भावना धात्वर्थ एव तथापि फलपर्यन्तासौ कर्तृव्यापाररूपा दीर्घतरावयवक्रियामात्रात् पृथग्व्यवहारसहा । एवं सर्वत्र योज्यम् ।। 87 ।।

क्वचित् पुनर्वस्तुतो बाह्यकर्मसद्भावेऽप्यकर्मकव्यपदेशो भवतीत्याह ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।

प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।। 88 ।।

(85) प्रसिद्धादर्थादन्यत्रार्थे यदा धातुर्वर्तते तदा तत्रास्य कर्मसमन्यवयरहितक्रिया वाच्या प्रतीयते । तद्यथा वहतिर्देशान्तरप्रापणवचनः सकर्मकः प्रसिद्धो भारं वहतीति । स यदा नदी वहतीत्यत्र स्यन्दनक्रियामभिधायी तदा स्यन्दनस्य जलस्रुतिरूपस्य नद्यात्मभूतत्वात् किमित्यनुयोगाभावादकर्मक इति धात्वर्थमात्रापेक्षयेयं भावना वहति स्यन्दनं करोतीति । यदापि धात्वर्थक्रियायां कर्मान्तर्भवति तदाप्यकर्मकत्वम् । तद्यथा `जीवति' इति । `प्राणान् धारयति' इति ह्यत्र धात्वर्थ इति प्राणलक्षणस्य कर्मणोऽन्तर्भावः एवं `म्रियते' `प्राणान् जहाति' इति । तथा `अस्ति' `आत्मानं विभर्ति' इति । यत्राव्यभिचारेण प्रतिनियतस्य कर्मणः प्रतीतिस्तत्राप्यकर्मिका क्रियेति व्यवहारः । तद्यथा `वर्षति' इति । अत्र हि यथा

वर्षणक्रियायामप्यभिचारादेवः कर्ता प्रतीयते तथा कर्मापि जललक्षणमिति प्रसिद्देरकर्मकत्वाश्रयः कर्तरि क्त उदाहृतः `वृष्टो देवः' इति । यत्त्वप्रसिद्धं कर्म तेन सकर्मकत्वमेवास्याः क्रियायाः, `रुधिरं वर्षति' `शरन् वर्षति' इति । `पांसवो वृष्टाः' इति कर्मणि क्तः । विद्यमानोऽपि वा यत्र कर्मसंबन्धः क्रियामात्रप्रतिपादनतात्पर्यान्न विवक्ष्यते तत्राप्यकर्मकत्वं संभवति । तद्यथा नेह पच्यते, नेह भुज्यते इति । क्रियाप्रतिषेधतात्पर्याद्भावे लकारः । दीक्षितो न ददाति, न पचति, न जुहोति इति कर्मणोऽविवक्षा । अत्र किमिति नापेक्ष्यते । क्रियाप्रतिषेधतात्पर्यात् ।। 88 ।।

तदेवं चतुर्भिः प्रकारैरकर्मकव्यपदेशाः शास्त्रे भवन्ति । एवमन्येऽपि प्रकाराः संभवन्तीत्याह ।

भेदा य एते चत्वारः सामान्येन प्रदर्शिताः ।
ते निमित्तादिभेदेन भिद्यन्ते बहुधा पुनः ।। 89 ।।

(86) य एते सकर्मकाणामपि धातूनामकर्मकत्वनिबन्धनभूता भेदाश्चत्वारोऽभिहितास्ते निमित्तादिभेदेनानेकप्रकारा जायन्ते । निमित्तं सहाय उपसर्गादिः । आदिशब्दादेशकालादयः । तद्यथा चरतिः देशान्तरप्रयोगस्य सामर्थ्याद्भवति । `बाष्प उच्चरति', `धूम उच्चरति' इति । उच्छब्दवशाद्धातुरयमूर्ध्वप्रवृत्तावकर्मकः । आदिग्रहणात्

क्वचिदात्मनेपदप्रयोगादकर्मकत्वाभिव्यक्तिः `उत्तपते' `वितपते' इति । `भासते' इत्यर्थः । `यावद्भक्तमुपतिष्ठते', भोजनकालं यावदुदीक्षते इत्यर्थः ।

`अकर्मकाच्च' (P.1.3.26)

इत्यात्मनेपदम्। `सर्पिषो जानीते', `मधुनो जानीते', इति । तेनोपायेन प्रवर्तत इति ज्ञानपूर्विकायां प्रवृत्तामत्र धातुर्वर्तते ।

`अपह्नवे ज्ञः' (P.1.3.44)

इत्यनुवृत्तौ

`अकर्मकाच्च' (P.1.3.45)

इत्यात्मनेपदम् वाक्यसामर्थ्यात् क्वचिदकर्मकत्वाभिव्यक्तिः । तद्यथा `नदी वहति' इति । नदीलक्षणकर्तृविशेषसामर्थ्यात् स्यन्दनवचनतायामकर्मकत्वम् । एवं `वायुर्वहति' इति । तथा कर्मकर्तृविषये कर्मणः कर्तृत्वप्रतीतिवशादेकदेशवचनतायां धातोरकर्मकत्वं `पच्यते ओदनः स्वयमेव' इति । एवं च कृत्वाकर्मकव्यपदेशनिमित्तं शास्त्रमत्र विषये प्रवर्तते

`मुचोऽकर्मकस्य गुणो वा' (P.7.4.57)

इति । `मोक्ष्यते वत्सः स्वयमेव' इति । एवमर्थान्तरे वृत्तिर्धातोरकर्मकत्वनिबन्धनं निमित्तादिभेदेन भिद्यते । धात्वर्थेनोपसंग्रहेऽपि निमित्तादिभेदेन भेदः । तद्यथा--क्वचित् क्रिया स्वरूपसामर्थ्यलक्षणान्निमित्तात् तिरोहितभेदत्वे कर्मणोऽन्तर्भावेऽकर्मकव्यपदेशो जीवत्यादौ । क्वचिदन्वाख्यानव्यवस्थया निर्धार्यमाणरूपभेदस्याप्यन्तर्भावः । तद्यथा पुत्रीयतौ पुत्रकर्मणः । परमार्थतोऽत्र पुत्रलक्षणं कर्म क्रियाशरीरानुप्रविष्टं कर्म क्रियाशरीरानुप्रविष्टं भेदेनासत्येन प्रक्रियायामन्वाख्याननिमित्तमाश्रीयते तथा च वक्ष्यति

पुत्रीयतौ न पुत्रोऽस्ति विशेषोच्छा तु तादृशी ।
विनैव पुत्रानुगमाद्या पुत्रे व्यवतिष्ठते ।।

इति । आचारक्यचि त्वत्रोपमानकर्मान्तर्भूतमुपमेयकर्मणा तु सकर्मकत्वम् । `पुत्रीयति छात्रम् ' इति । `मुण्डयति माणवकम् ' इति तु सामान्यकर्मान्तर्भूतं विशेषकर्मणा तु सकर्मकत्वम् । एवं `मिश्रयति तिलान्' इत्यादौ । बाष्पायते, ऊष्मायते,रोमन्थायते इत्यादौ विशेषकर्मण एव निर्धारितरूपस्यान्तर्भावः । पचेः पार्थिवं भिदेश्च सावयवं कर्म प्रसिद्धम्, न त्वन्तर्भूतम् । तस्य स्वशब्देनापि वचनात्, पचति पाक्यम्, `भिनत्ति भेद्यम्' इति । अन्तर्भावे तु स्वशब्देन निर्देशो न स्यात् । न हि भवति `जीवति प्राणान्' इति । `जलं वर्षति' इति तु भवति । अन्तर्भावाच्च कर्मणो `नमस्यति देवान् ' इत्यत्र नमःशब्दयोगे चतुर्थी न भवति । तथा च वार्तिके

`नमसः क्यचि द्वितीयानुपपत्तिः'(Va.on P.3.1 19)
इति चोदयित्वा
`प्रकृत्यन्तारत्वात् सिद्धम्' (Va. on P.3.1.19)
इति परिहृतम् । अनेनैवाशयेन धात्वन्तारमेव नमस्यतिशब्दः पूजार्थो न संभवत्येवात्र नमःशब्दोऽवयवकल्पनाद्वारेण त्वेवं व्युत्पाद्यत इत्यर्थः । बाष्यकारस्त्वन्वाख्यानवेलायां नमसः प्रकृतित्वेन परिग्रहात् संभवं मन्यमानः पुनश्चोदयति ।
`ननु नमस्यतिशब्दे नमः शब्ब्दोऽस्ति, तेन योगे चतुर्थी प्राप्नोति'
(M.Bha. on Va. above)
इति । परिहरति च
`अर्थवतो नमःशब्दस्य ग्रहणम्, न च नमस्यतिशब्दे नमःशब्दोऽर्थवान्'
(M.Bha. on Va. above)
इति । सुब्धातुवृत्तिरियम् । अत्र चोपसर्जनार्थः प्रत्ययार्थे गुणीभूत इति नमो देवेभ्य इत्यत्र प्रधानभूतनमःशब्दयोगे सावकाशत्वादत्र चतुर्थी न भवतीति भाष्यार्थः । प्रसिद्धेरपि यत्राकर्मकत्वं तत्राप्यवान्तरो भेदो देशकालवशाज्जायते । तद्यथा दक्षिणापथे पूर्वाह्णे `पच्यताम्' इत्युक्ते यवागूकर्मकः पाकोऽवगम्यते । अपराह्णे पुनरोदनसाधनः । मांसभूयिष्ठे तु देशे माससाधनः पाकः प्रसिद्धः । क्रियास्वरूपसामर्थ्यात् क्वचित् प्रसिद्धं नियतं कर्म, `वर्षति' इति जलं प्रतीयते । कर्तृसामर्थ्यादपि कर्म प्रसिद्धम्, यथा `दुर्जनः करोति' इत्युक्ते उपघातलक्षणं कर्म गम्यते । सुजनः करोति' इति तूपकारोऽवगम्यते । गोष्ठीभेदेन देशभेदेन चापरिमिता प्रसिद्धिरनुगन्तव्या, कियदुदाह्रियते । अविवक्षापि क्वचित् सादृश्यामात्रप्रतिपादनपरतया वाक्यस्य कर्मणो दृश्यते । तद्यथा "अनुवदते कठः कलापस्य" इत्यत्र कठकलापयोर्भाषणसादृश्यं प्रतिपाद्यमिति कर्म न विवक्षितम् । तथा कर्मशक्तिविशेषप्रतिपादने `देवदत्तः किं करोति' इति प्रश्ने `पचति' `ब्रवीति' इति कर्मसंबन्धो न विवक्ष्यते । क्रियाप्रबन्धाव्युपरमप्रतिपादनेऽपि न विवक्ष्यते कर्म `पचत्येव ददात्येव' इति यतायोगमनुसरणीयं प्रयोगजातमिष्टम् ।। 89 ।।
इति भूतिराजतनयहेलाराजकृतौ प्रकीर्णप्रकाशे कर्माधिकारः ।।

इह स्वादिविधिवाक्ये ययाऽऽनुपूर्व्या विभक्तिप्रत्ययाः सन्निविष्यास्तदनुसारेण तदर्थानां कारकाणां विचारः । तत्र द्वितीयार्थे कर्मणि विचारिते तृतीयार्थः करणं पूर्वं विचार्यते । कर्ता तु षष्ठ्या अप्यर्थ इति साधारणत्वान्न्यूनत्वेन पश्चाद्विचारयिष्यते । तत्र क्रियासंसिद्धौ सामग्व्याः साधनत्वात् कोऽतिशयः करणस्य येन तत् साधकतमं स्यादिदित्याशङ्क्य लक्षणमाह ।
क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ।। 90 ।।
(87) सन्निपत्योपकारिषु सर्वेष्वपि साधनेषु यद्व्यापारानन्तरभाविनी क्रिया लक्ष्यते तदवाप्तातिशयं साधकतमं करणम् । तद्यथा छेदने दात्रमनुप्रविश्य छेद्यमवयवविभागं साधयत् प्रकृष्टोपकारतामासादयत्यधिकरणादिकारकान्तरेभ्यः । एवं दर्शने चक्षुः प्रणिधीयमानम् इत्याद्युदाहर्तव्यम् । साधनव्यवहारस्य च बुद्ध्यवस्थासमाश्रयत्वाद् `विवक्ष्यते' इत्याह । विवक्षोपारूढ एव ह्यर्थो व्याकरणेऽङ्गम्, न बाह्यवस्तुसत्तेत्यर्थः । तथा च बलेन लुनाति, `आलोकेन पश्यति' इत्यादावनादृत्य दात्रादिकं वलादि साधकतमत्वेन विवक्षितं करणम् । तत्र साधनान्तराणां वास्तवेऽप्याधारादिभावे बुद्ध्यान्यथात्वम्, यथा स्थाल्या पच्यत इत्यादौ । करणस्य तु रूपमेव विवक्षाधीनमिति
`साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः'
इत्युक्तेऽपि `विवक्ष्यते' इति पुनरुक्तम् ।। 90 ।।
एतदेवाह ।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।

स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ।। 91 ।।

(88) इदमेव नियतजातीयं तु वस्तु करणमित्येवं निरूपयितुं न शक्यते । यस्मान्न वस्तु व्यवस्थितं करणतया नियतमस्ति । प्रज्ञाताधिकरणभावा अपि हि स्थाली तनुतरकपालत्वाच्छीघ्रतरपाककार्यसाधनतयाऽनुभवत्येव वैवक्षिकं करणभावम् । तथा हि प्रयोगः करणतृतीयान्तः `स्थाल्या पच्यते' इति लोके प्रसिद्धः । आर्द्रेन्धनापेक्षया हि सुसन्निवेशा स्थाली क्रियासिद्धौ प्रत्यासीदति ।। 91 ।।

यतश्च क्रियासिद्धौ प्रकृष्टोपकारकं करणमतस्तत्र कर्तृणां संरभ इत्याह ।

करणेषु तु संस्कारभारभन्ते पुनः पुनः ।

विनियोगविशेषांश्च प्रधानस्य प्रसिद्धये ।। 92 ।।

(89) प्रधानस्य क्रियालक्षणस्यार्थस्य प्रसिद्धये प्रकृष्टोपकारकस्य करणस्यैव फलार्थिनः संस्कारमुत्तेजनादिकमसकृद्व्यापारणं चारभन्ते । उपायद्वारेणोपेये प्रवृत्तेः । तत्र काष्ठानामुपधानं संस्कारः । पुनः पुनश्चोपस्थापनं विनियोगः । दात्रस्य तीक्ष्णताधानं संस्कारः । उदत्यमननिपातने विनियोगः । चक्षुषोऽञ्जादिः संस्कारः, प्रणिधानं विनियोगः, इत्याद्यन्यत्रापि यथायोगं वक्तव्यम् ।। 92 ।।

इह कथमुपकारप्रकर्षः "अश्वेन पथा दीपिकया याति" इति बहूनामेककालं विवक्ष्यतइत्याह ।

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते ।

आश्रितातिशयत्वं तु परतस्तत्र लक्षणम् ।। 93 ।।

स्वस्यां कक्ष्यायां करणभावावस्थायां सजातीयापेक्षः प्रकर्षोऽत्र तमप्प्रत्ययवाच्यो नाश्रीयते, अपि तु साधनसामान्यस्यानुगतस्य कारकान्तरापेक्ष एव प्रकर्षस्तमप्प्रत्ययवाच्यः करणत्वमावेदयते । साधकशब्दाद्धि कारकसामान्यवाचिनस्तमबुत्पन्नस्त त एव प्रकर्षं गमयति । परत इति साधनान्तरात् । एवं करणजात्यपेक्षस्यातिशयस्यानाश्रयणादश्वादीनां सर्वेषामपि साधनान्तरापेक्षया प्रतिलब्धप्रकर्षाणां करणत्वमविरुद्धम् । तथा ह्यश्वो देशान्तरप्राप्तौ कर्त्राद्यपेक्षया प्रकृष्टोपकारकः । पन्था अपि साधुश्चोराद्युपद्रवरहितः । दीपिका अपि तमःसंहतिमालोकेन निर्भत्सयन्ती प्रतिपद्यते साधनान्तरेभ्योऽतिशयम् ।। 93 ।।

ननु कर्तृविनियोगोत्तरकालं साधनानां प्रवृत्तेस्तदपेक्षया कर्तुरेव साधकमतत्वं न्याय्यमित्याशङ्क्याह ।

स्वातन्त्र्येऽपि प्रयोक्तार आरादेवोपकुर्वते ।

करणेन हि सर्वेषां व्यापारो व्यवधीयते ।। 94 ।।

(91) यद्व्यापारानन्तरं क्रियानिष्पत्तिस्तत्करणमित्युक्ते कर्तुः करणत्वाप्रसङ्गः । न हि कर्तृव्यापारानन्तरमेव क्रियासिद्धिः । साधनविनियोगे हि कर्तृव्यापारः । विनियुक्तेषु तु साधनेषु व्यापाराविष्टेषु सत्सु क्रिया निष्पद्यते । तत्र चाधिकरणादीनामिव कर्तुरपि व्यापारो विप्रकृष्यते क्रियासिद्धौ कर्त्रन्तरप्रयोगाभावात् । पारतन्त्र्ययोगेऽपि साधनान्तराणां प्रयोक्तारः कर्तारः विनियुक्तसाधनान्तरव्यापारव्यवधानेन क्रियां दूरादेव साधयन्ति । करणव्यापारसमनन्तरमेव तु क्रियासिद्धिः ।। 94 ।।

अथ वा कर्त्रा सहातिशयचिन्ता नैव संभवतीत्याह ।

क्रियासिद्धौ प्रकर्षो वा न्यग्भावस्त्वेव कर्तरि ।

सिद्धौ सत्यां हि सामान्यं साधकत्वं प्रकृष्यते ।। 95 ।।

(92) इह क्रियासिद्धिविषये साधनान्तरेभ्योऽतिशयः करणस्य विवक्षितः । यदा च प्रवृत्तानि गृहीतव्यापाराणि कारकाणि तदा क्रियासिद्धिर्विषयीभवति । कर्तृविनियोगे त्वपेक्षिते कर्तरि न्यग्भवन्ति । साधनान्यनाविष्टस्वव्यापाराणि स्वातन्त्र्यनिबन्धनं सामान्यभूतं साधनव्यपदेशमेव नासादयन्तीति कुतः तदपेक्षया कर्तुरतिशयः स्यात् । तदाह

`सिद्धौ सत्यां हि सामान्यं साधकत्वं प्रकृष्यते ।'

इति । यत्सामान्यं साधनत्वं तत्सिद्धौ निष्पत्तौ सत्यां प्रकर्षमासादयति । निष्पत्तिश्च तस्य कर्तृविनियोगादुत्तरकालं स्वव्यापारावेशे सति । तथा च तस्यां दशायामतिशयश्चिन्त्यमानोऽधिकरणादेस्तुल्यकक्ष्यात् करणस्यैवावतिष्ठते न तु कर्तुः ।

स हि स्वामी प्राक्प्रवृत्ति स्वतन्त्रो न मृत्यैः सह स्पर्धते । सजातीयापेक्षो हि प्रकर्षः । कर्ता तु विजातीय एव, कारकान्तराणां स्वतन्त्रपरतन्त्ररूपत्वात् । एवं च कृत्वा कर्तरि पराधीनस्याधिकरणस्य साधकत्वातिशयः कारकान्तरापेक्षो युज्यते, भिन्नविषयत्वादिति कथमस्वाधीनं प्रकर्षवत् साधनं स्यादिति न चोदनीयम् ।। 95 ।।

यदि तर्हि कर्तुः करणस्य च रूपविप्रकर्षः कथमिदानीं करणस्यापि कर्तृत्वमसिशव्छनत्तीत्याशङ्क्याह ।

अस्यादीनां तु कर्तृत्वे तैक्ष्ण्यादि करणं विदुः ।
तैक्ष्ण्यादीनां स्वतन्त्रत्वे द्वैधात्मा व्यवतिष्ठते ।। 96 ।।

(93) इह यदा छिदिं प्रति सुतीक्ष्णधारत्वात् कर्तृविनियोगतिरस्कारेणासिः स्वातन्त्र्येण विवक्ष्यते तदासौ करणमेव न भवति, अपि तु यदनन्तरभाविनी क्रिया तस्यैव करणत्वं तैक्ष्ण्यगौरवकाठिन्यसंस्थानादेः । तस्यापि कर्तृत्वविवक्षायां विवक्षाप्रापितरूपभेदायत्त करणभावः । तथा हि तैक्ष्ण्यं छिनत्ति स्वसामर्थ्येनेति शब्दभेदोपहितरूपभेदादेकमपि तैक्ष्ण्यं भेदेनैव कर्तृकरणते प्रतिपद्यते । स्वाधीनत्वेनाश्रित आत्मा कर्ता साधकतमत्वेनाश्रितः करणमिति द्वेधा व्यवस्थानम् । क्रियायाः करणाविनाभावात् करणान्तरव्यावृत्तिपरेयं चोदना । तैक्ष्ण्यमेव छिदौ साधकतमं नान्यदिति तस्यातिशयपरिपोषे तात्पर्यम्, तदेवं कर्तृकरणे भिन्ने एव ।। 96 ।।

यद्येवमेकत्राप्राप्तौ संज्ञयोः
`करणं पराणि.....'(Va. on P.1.4.1)
इति विप्रतिषेधः कथमुपन्यस्त इत्याह ।

आत्मभेदेऽपि सत्येवमेकोऽर्थः स तथा स्थितः ।
तदाश्रयत्वाद् भेदेऽपि कर्तृत्वं बाधकं ततः ।। 97 ।।

(94) विवक्षाप्रापिते सत्यपि कर्तृकरणतया रूपभेदे स एकोऽर्थः शत्तयाधारस्थितो न प्रच्यवते रूपादित्यर्थः । अत्रोपपत्तिः `तदाश्रयत्वात्' इति । कल्पनाश्रयत्वात् । काल्पनिको हि भेदो न वास्तविकमेकत्वं विहन्तीत्यर्थः । यद्वा तदाश्रयत्वदिति तदेकार्थाधारत्वात् कर्तृकरणसंज्ञयोरिति केचिद् व्याचक्षते । शक्तिभेदेऽपि तदादारद्रव्यैकत्वादेकः संज्ञयोर्विप्रतिषेधविषय उपद्यते । संज्ञा हि शक्तिविशिष्टस्य द्रव्यस्यैव । तदेवं वस्तुनि विद्यमानमेकत्वं यदा विवक्षोपादत्ते तदैकविषयत्वे विप्रतिषेधे परत्वात् कर्तृसंज्ञा । करणसंज्ञां बाधत इत्युदाहृतम् `असिश्छनत्ति' इति । अत्र हि साधकतमत्वाविवक्षाविनाभाविनी स्वातन्त्र्यविवक्षासेरित्येकविषयत्वे उभयसंज्ञाप्रसङ्गे परत्वात् कर्तृसंज्ञा । साधकतमत्वे हि सति स्वातन्त्र्यमारोप्यते । यथा धनुषा विध्यतीत्यपायभावे सत्येव साधकतमत्वं धनुषः । तदेवं क्रियां प्रति प्रकृष्टोपकारकं करणमिति स्थितम् ।। 96 ।।

उपकारश्च भवताऽर्थेन क्रियते, न त्वविद्यमानेनेत्येतामाशङ्कामप्यपाकरोति । यथा च सन्निधानेन करणत्वं प्रतीयते ।

तथैवासन्निधानेऽपि क्रियासिद्धेः प्रतीयते ।। 98 ।।

(95) दात्रादयः सन्निहिताः क्रियोपाकारतिशयमासादयन्तः करणतया यथा प्रज्ञायन्ते तथैव धनाभावेन मुक्त ित्यादावसन्निहितमपि धनं मुक्तिं साधयत् करणमेव प्रसिद्धम् ।। 98 ।।

अत्रैव सूत्रकारमतं संवादकमाह ।

सतोकस्य वाभिनिर्वृत्तेरनिवृत्तेश्च तस्य वा ।
प्रसिद्धिं करणत्वस्य स्तोकादीना प्रचक्षते ।। 99 ।।

(96) `करणे च स्तोकाल्प....' (P. 2.3.33)

इत्यत्रोदाहरणं स्तोकान्मुक्तः स्तोकेन मुक्त इति । अत्र सत्ववचनानामपि स्तोकादीनां धर्ममात्राभिदानतात्पर्येण प्रयोगादसत्ववचनता । तच्च धर्ममात्रं स्तोकलक्षणं सदसद्वा मुक्तिक्रियायामतिशयेनोपकारकं करणमित्युक्तम् । यस्मात् स्तोकं देयवस्तुनो निष्पन्नं न चान्यत् संभवति निष्किंचनत्वात् अतो मुक्तः ; यदि वा स्तोकं देयवस्तुनोऽवशिष्टमवसितं ततो मुक्तः ।

यदि तु बहु देयं स्यात् न मुच्येतेति स्तोकेनाभवता मुक्तः । एवमेकेन न विंशतिरेकान्न विंशतिरिति एकाभावो विंशतिनिषेधस्य करणम् ।। 99 ।।

तदेवं विवक्षाधीनत्वात् साधनव्यवहारस्य यद्यत् साधकतमत्वेन विवक्ष्यते तत्तत्करणम् । तथा च

धर्माणां तद्वता भेदादभेदाच्च विशिष्यते ।

क्रियावधेपवच्छेदविशेषाद् भिद्यते यथा ।। 100 ।।

(97) आश्रितमात्रं धर्मशब्देनाह । `तद्वता' इत्याश्रयेण । तथा हि `देवदत्तः काष्ठैः पचति' इतीन्धनगतस्य तेजसस्तदभेदविवक्षया प्रयोगः । तथा च देवदत्तकर्तृकेन्धनकरणिका चेयं पचिक्रिया । यदा तु तेजो भेदेनन्धनाद् विवक्ष्यते तदा "एधाः पक्ष्यन्ति तेजसा" इति तेजःकरणिकेन्धनकर्तृका च पचिक्रिया । यदाप्यौष्ण्यं तेजसो भेदेन साधनविशेषात् क्रिया । तद्यताऽवधेर्ग्रामादेरवच्छेदविशेषाद् भेदविशेषात् क्रिया भिद्यते विशिष्यते `ग्रामादागच्छति', `ग्रामस्य समीपादागच्छति' इत्यादौ तद्वदत्रापि बोद्धव्यमित्यर्थः । सारण्यके ससीमके सस्थण्डिलके हि ग्रामशब्दाभिदेयेऽभेदेन `ग्रामादाहच्छति' इति प्रयोगः । वाटपरिक्षिप्ते तु ग्रामशब्दाभिधेयेऽभेदेन `ग्रामादागच्छति' इति भिद्यतेऽवधिः । तद्भेदाच्च क्रिया विशिष्यते । एवं वैवक्षिककरणभेदादपि यथाविवक्षं च तदेव प्रधानकरणं तृतीयावद्धातुप्रत्ययेन ल्युटा घञा वाभिधीयते, पचनमेधः, पचनं तेजः पचनी स्थाली, पचनमौष्ण्यम् इत्यादि यथाविवक्षमुदाहार्यं प्रयोगजातमिष्टम् ।। 100 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे साधनसमुद्देशे करणाधिकारः ।।

---

(98) तृतीयार्थे करणे विचारिते सम्प्रति तदर्थः कर्ता विचार्यते । तस्य लक्षणम्

`स्वतन्त्रः कर्ता' (P.1.4.54)

इति । स्व आत्मा तन्त्रं प्रधानमस्य । करणादीनां हि परः कर्तैव तन्त्रं प्रधानम् । क्रियासिद्धौ तेन प्रयोज्यत्वात् । कर्ता त्वनन्यप्रयोज्यः स्वतन्त्र इत्युच्यते । तत्र करणादीनामपि स्वव्यापारे स्वातन्त्र्यात् कोऽतिशयः कर्तुरित्याशङ्क्योपपादयति । प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।

तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ।। 101 ।।

अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।

आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ।। 102 ।।

करणादिप्रवृत्तेः प्राक् एवार्थितादेरपरस्मान्निमित्तात्, न तु सहकारिभ्य एव सामर्थ्यमासादयति । फलकामो हि कर्ता करणादीन्युपार्जयते । तथा च पूर्वमेव शक्तिमान् स्वतन्त्रः । करणादीनां तु कर्तृविनियोगादेव स्वव्यापारे स्वातन्त्र्यम्, न त्वन्यतः । अत एव कर्त्रा न्यग्भावमात्माधीनतामापाद्यन्ते । तदायत्तव्यापाराश्च । कर्ता तु फलार्थमीहमानः स्वयं व्यापारवान् । अतिप्रवृत्तानि च करणादीनि निवर्त्यन्ते कर्त्रा । स तु फलप्राप्तौ स्वयमेव निवर्तते । चोदितासंभवे करणादीनां प्रतिनिधिरुक्तः । कर्तुः स नास्ति । कर्त्रन्तरं हि क्रियां निर्वर्तयत् प्रतिनिहितं नोच्यते । तस्याप्यर्थिनः समर्थस्यापर्युदस्तस्याधिकारात् । प्रविवेके च कारकान्तराणामभावे दृश्यते कर्ता, तद्यथा अस्ति, भवति, विद्यत इत्यादौ । यद्यप्यत्राधिकरणादयः संभवन्ति तथापि नान्तरीयकास्ते शब्दव्यापारादप्रतीयमानाः । ततश्चाकर्तृकायाः क्रियाया अभावात् संभूयकारिभ्योऽपि विशिष्यते कर्ता । एतेन हेतुकलापेन कर्तुः करणापेक्षया क्रियासिद्धौ विप्रकृष्टोपकारकत्वेऽपि स्वातन्त्र्यं प्राधान्यनिबन्धनमुच्यत इति तस्यैव कर्तृसंज्ञा, न तु करणादेः स्वव्यापारे स्वतन्त्रस्यापीत्यर्थः । एतेन चेदं भाष्यं व्याख्यातम्---

"यत् सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति"

(M.Bha.on P.1.4.23)

इति । एतच्च भाष्यं गर्भीकृतनान्तरीयकार्थं संक्षिप्योक्तमिति गर्भीकृतार्थव्यक्तीकारेणात्र व्याख्यातम् । तथा हि `तदधीनप्रवृत्तित्वात्' इत्यनेन साक्षात् प्रवर्तकत्वं व्याख्यातम् । सामर्थ्याक्षिप्तं च न्यग्भावनादि निर्दिष्टम् । तथा हि

प्रयोक्तृधीनत्वात् प्रवृत्तेर्न्यग्भावः करणादीनां तत्रार्थोक्तः । सा प्रवर्तना च फलार्थमिति तत्प्राप्तावतिप्रवृत्तौ निवर्तनाप्याक्षिप्ता । प्रवर्तयिता चावश्यं प्रवर्त्यादन्यतः शक्तिं प्राग् लभत इति तदपि व्याख्यातम् । असंभवे च प्रवर्तयितुरेवाभाव इति प्रतिनिध्यभावः सामर्थ्योक्तो विवृतः । साक्षात्समर्थस्य क्वचिदन्यानपेक्षणात् प्रविवेके च दर्शनं सामर्थ्यलभ्यं व्याख्यातमिति समस्याभिहितं भाष्यं व्यस्य व्याख्यातम् ।। 101,102 ।।

अचेतनेषु तर्ह्येवंविधधर्मकलापभावात् कर्तृता न प्राप्नोतीत्याशङ्क्याह ।

धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि ।

कर्तुर्धर्मविवक्षायां शब्दात् कर्ता प्रतीयते ।। 103 ।।

(99) अभ्युदितैः उक्तैरेतैः प्रागन्यतः शक्तिलाभादिभिः प्रवर्तयितृत्वादिलक्षणैः धर्मैः स्वभावैरूपलक्षितः स्वतन्त्रः कर्ता इत्येवंलक्षणो नियमोऽवश्यभावः शब्दविषये समाश्रयणीयः । शब्देन यस्यैते धर्माः प्रत्याय्यन्ते स कर्ता बोद्धव्यः, न तु वस्तुविषयतया धर्माणामेषां सम्भवोऽन्वेषणीयः येनाचेतनविषये `अग्निर्दहति', `एधाः पचन्ति' `स्थाली पचति' इत्यादौ `कूलं पतति, `नदी वहति' इत्यादौ च कर्तृत्वं न स्यात् । एते हि धर्मा यदा कर्तृलक्षणाय विवक्ष्यन्ते शब्देन च यथाविवक्षं प्रत्याय्यन्ते तदा शब्दात् कर्ता सुप्रतिष्ठितलक्षणः प्रतीयत इति करणमिव कर्तापि वैवक्षिकः प्रतिपादितः । एवं च कृत्वाचेतनेषूपचरितमपि न भवति कर्तृत्वम्, सर्वत्रास्खलद्वत्तित्वात्प्रयोगस्य मुख्यतासंभवात् । व्याकरणे हि शब्दार्थोऽर्थः न वस्त्वर्थः । ततश्च व्याकरणान्तरे

अर्थी कर्ता

तथायुक्तश्च

इति लक्षणद्वयं चेतनाचेतनविषयतया यत् प्रणीतं तन्न कौशलमित्युक्तं भवति ।। 103 ।।

यदा च विवक्षादीनं स्वातन्त्र्यं तदेदेमपि सिद्धं भवतीत्याह ।

एकस्य बुद्ध्यवस्थाभिर्भेदे च परिकल्पिते ।

कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते ।। 104 ।।

(100) `हन्त्यात्मानमात्मना' इत्येकस्यैवात्मनो विवक्षाप्रापितरूपभेदाधीनः कारकत्रययोगो दृश्यते । स वास्तवे कारकव्यवहारे न घटनामेति । न ह्येकस्य वस्तुनो युगपद् भिन्नानेकरूपता शक्यावसातुम् । न चामूर्तस्यात्मनः शस्त्रादिव्यापारजन्यवधसंभवः । विवक्षा तु शब्दनिबन्धना न विहन्यतेऽत्र । तथा हि बुद्धेरवस्था प्रतिभासनानात्वम्, तदनुसारेण विवक्षया भेदपरिकल्पः । शास्त्राद्युद्यमननिपतनव्यापारवान् हन्तीति कर्ता । आत्मैवात्र विषयभावापतितस्तथैव कर्म । सौकर्यातिशयविवक्षायां शस्त्रादिव्यापारस्य निरासे करमत्वमात्मनः । कर्मकरणे ह्यन्यत्र भेदेन दृष्टे इति तन्निरासाय कर्तैवात्र तथोच्यते भेदेन । अत एव वार्तिके कर्मवद्भावोऽनेन न्यायेन प्रत्याख्यातः ।

सिद्धं तु प्राकृतकर्मत्वात् । (Va. on P.3.1.87)

आत्मसंयोगेऽकर्मकर्तुः कर्मदर्शनात् । (Va.onP.3.1.87)

इति ।

"हन्त्यात्मानम्, आत्मना हन्यत इति ।। 104 ।।

अन्यदपि शाब्दे कर्तृत्वे सिद्धयतीत्याह ।

उत्पत्तेः प्रागसद्भावो बुद्धयवस्थानिबन्धनः ।

अविशिष्टः सताऽन्येन कर्ता भवति जन्मनः ।। 105 ।।

(101) `अङ्कुरो जायते' इति जनिकर्तृत्वं सतोऽसतो वा । तत्र

यदि सज्जायते कस्मादथासज्जायते कथम् ।

इत्यादिना । तत्र वैवक्षिके कर्तृत्वे उपचारार्थोऽपि न कश्चिदित्युच्यते । तथा हि विवक्षारूपाया बुद्धेः शब्दनिमित्ताया येऽवस्थाविशेषाः प्रतिनियतशब्दनिबन्धनाः तदाश्रयेणात्र क्रियान्तरकर्तृत्वतुल्यं जनिकर्तृत्वं सिद्धम् । विवक्षाप्रापितसन्निधाने

ह्यर्थेऽङ्कुर इति शब्दः प्रयुज्यते । स च सदेव वस्तु दर्शयति । ततो `जायते' इति पदसमवधानावधारितजन्मनोऽस्य कुतः सत्त्वमिति बुद्ध्या निश्चितसत्वस्य क्रियासिद्धावुपगृहीतसामर्थ्यस्य बाह्येन रूपेण जन्मेति वाक्यार्थोऽवतिष्ठते । ततश्च येन रूपेण सत्त्वं न तेन कर्तृत्वं न तेन सत्त्वमिति नेयं वास्तवी व्यवस्था अपि तु शाब्दयेवेत्यर्थः । शब्दार्थ एव चार्थ

इत्यस्खलद्वृत्तित्वात् प्रयोगस्य मुख्यतैव सर्वत्र । नोपचारार्थः कश्चित् ।। 105 ।।

वस्तुवृत्तचर्यायामपि चाङ्कुरो जायत इति प्रयोग इत्याह ।

कारणं कार्यभावेन यथा वा व्यवतिष्ठते ।

कार्यशब्दं तदा लब्ध्वा कार्यत्वेनाथ जायते ।। 106 ।।

(102) कार्यमुखेन कर्तृता जन्म च सदसत्पक्षभेदेन नोपपद्यत इति बुद्ध्यवस्थासमाश्रयेण पूर्वमुपपादितम् । इदानीं कारणमुखेन प्रतिपाद्यते । अत एव पक्षान्तरसूचको वा शब्दः । तत्र कारणात् पृथगेव कार्यमाजायते इति पूर्वपक्ष उक्तः । परिणामदर्शने त्वभेदपक्ष इदं कथ्यते । कार्यकारणयोः प्रकृतिविकाररूपतया `क्षीरं दधि सम्पद्यते,' बीजमङ्कुरो जायत इत्यभेदेन व्यवहारदेकस्यावस्थातुरवस्थाविशेषस्वीकरणमात्रं सतत्त्वमिति कार्योन्मुखताया विशिष्टविकाराभिनिर्वृत्तिप्रक्रमे विशिष्टोत्तरावस्था विशेषगतवाचकाध्यासात् । कारणमेव सद्रूपं कर्तृ भवदुत्तरावस्थासाधनलक्षणं जन्म प्रतिपद्यते इति युज्यते `जायतेऽङ्कुर' इति प्रयोग इत्यर्थः ।। 106 ।।

युक्तं चैतद्यदुत कारणमेव कार्यभावेनावतिष्ठत इति स्वसिद्धान्तेनैतदुपपदयितुमाह ।

यथाहेः कुण्डलीभावो व्यग्राणां च समग्रता ।

तथैव जन्मरूपत्वं सतामेके प्रचक्षते ।। 107 ।।

(103) पूर्वं सदसत्पक्षभेदेन कार्यकारणभावासभवं प्रतिपाद्य

अत्यद्भुता त्वियं वृत्तिः (Va.III.स.81)

इत्यादिना विवर्तनयेन सिद्धान्तितम् । तत्र चेयानेव जन्मार्थो विचार्यमाणोऽवतिष्ठते यदुत तथा तथा सन्निवेशमात्रम् । तद्यथा सर्पस्य कौटिल्यमनर्थान्तरम्, पृथग्भूतानां चाङ्गुल्यादीनां सङ्घातो मुष्ट्यादिरित्यवस्थाविशेषमात्रसारः कार्यकारणभाव इत्यवस्थातुरभेदादवस्थास्वनुगमात् सत्त्वे जनिकर्तृतासिद्धिः ।। 107 ।।

इदानीं कार्यकारणयोर्भेदवादेऽपि वास्तवेन रूपेण जनिकर्तृत्वं प्रतिपादयितुमाह ।

विभक्तयोनि यत्कार्यं कारणेभ्यः प्रवर्तते ।

स्वा जातिर्व्यक्तिरूपेण तस्यापि व्यवतिष्ठते ।। 108 ।।

(104) विभक्ता व्यतिरिक्ता योनिः कारणमस्य तस्यासतो विकार्यस्य जायमानस्य कारणेभ्यः सकाशाद्व्यरिक्तस्योत्पत्तेः पूर्वं व्यक्तिरूपेणासत्वेऽपि जात्यात्मना सत्त्वात्तज्जातीयतया निरूप्य साधनविनियोगाज्जातिरेव कारणानां स्वाभिव्यंजकसम्पत्त्यर्थं प्रयोजिकेति सैव व्यक्त्यात्मना जायत इति व्यवहाराज्जातिरूपेण कर्तृत्वं व्यक्तिरूपेण जन्यत्वमिति अत्यन्तं व्यतिरेकाभावाज्जातिव्यक्त्योः सामानाधिकरण्यादुपपद्यत इत्यर्थः ।। 108 ।।

इदानीं शब्दार्थोऽर्थ इति स्वसिद्धान्तं निगमयितुमाह ।

भावष्वेव पदन्यासः प्रज्ञाया वाच एव वा ।

नास्तीत्यप्यपदे नास्ति न चासद्भिद्यते ततः ।। 109 ।।

(105) आकारावग्रहेण ज्ञानशब्दयोः प्रवृत्तेर्निरालंबनतायोगात् प्रतीयमाने एवाकारो भावशब्दावाच्यः सदैव विषयः पदविन्यासस्थानं तयोः । तथा हि नास्तीत्यभावालंबनौ क्चन परपरिकल्पितं स्वयमुत्प्रेक्षितं वाकारमवलंब्य जायेते येन सदाकारावलबनाभ्यां ज्ञानशब्दभ्यामनयोर्विशेषाभावः, स्वाकारावग्रहसाम्यादिति व्यवहारे सर्वमेव भावाभावजातं समानम् । बहिर्वस्तुचर्चा तु नाङ्गम्, इयतैव व्यवहारपरिसमाप्तेरिति सदाकारावग्रहप्रवृत्तौ जायतेऽङ्कुर इति प्रयोगः सूपपाद इत्यर्थः ।। 109।।

बुद्धिशब्दविषयबावातिरेकेण व्यवहारे वस्तूनां बाह्या सत्ता न काचन विद्यत इत्याह ।
बुद्धिशब्दौ प्रवर्तेते यथा भूतेषु वस्तुषु ।
तेषामन्येन तत्त्वेन व्यवहारो न विद्यते ।। 110 ।।

(106) अभिधानप्रत्ययावेव व्यवहार इति यथाप्रत्ययं यथाभिधानं च पदार्थतत्त्वमेषणीयम्, नान्यत् पदार्थस्वरूपमप्रतीयमानमनभिधीयमानं चाश्रित्य प्रत्यवस्थेयमित्यर्थः । तथा चार्थोल्लेखरहिताया बुद्धेरयोगात्तत्सिद्धेन तत्त्वेन जायमानः कर्ता निरूप्यते ; निरूपितश्चाभिधीयते । यथा नास्तीति प्रत्यये बहिरसन्नपि पदार्थो नियतदेशकालयोर्निषिध्यमानो देशकालान्तरोपलब्धेनाकारेणावभासमानः कर्तृप्रत्ययेनाभिधीयते, तथा कार्योन्मुखतायामनागतमपि वस्तु तज्जातीयानुभववासनया बुद्धावभिमुखीभवत्समर्थहेतुवशाज्जायत इति जन्मनः कर्तृत्वेनाभिधीयत इति प्रकरणार्थः ।। 110 ।।
इदानीं संबन्धसमुद्देशोक्तं न्यायं चेतसि सन्निवेश्याद्वैतनयेन जन्मनाशासंभवं प्रतिपादयति ।
आकाशस्य यथा भेदश्छायायाश्चलनं यथा ।
जन्मनाशावभेदेऽपि तथा कैश्चित्प्रकल्पितौ ।। 111 ।।

(107) निष्प्रदेशस्याप्याकाशस्य नित्यस्य संयोगिपदार्थप्रविभागेन देशाध्यारोपाद् भेदपरिकल्पनेत्युक्तम् । भासामभावरूपायाः छायायाश्च निष्क्रियत्वेऽपि वारकद्रव्यक्रियानुगामितया सक्रियत्वाध्यापरोपः । एवमभावस्य पूर्वं निराकृतत्वात् जन्मनि कारणव्यापारस्य च निषेधाद् विनाशेऽपि तदनुपपत्तेरावेदितत्वात् निर्हेतुकलविनाशप्रतिषेधाच्चाबिन्नस्याद्वयस्य तत्त्वस्य नित्यस्य जन्मनाशायोगादविद्यावशात् प्रतिभासमात्रनिष्ठजन्मनाशवशेन परिकल्पितभावाभावारूपतया व्यवहार इति संबन्धसमुद्देश एव विस्तरतो निर्णीतम् । एवं च भावाभावव्यवहारवज्जायत इत्यर्थोऽविचारितरमणीयः सिद्ध इत्यर्थः ।। 111 ।।
नाशस्य कल्पितत्वमुपपादयितुमाह ।
यथैवाकाषनास्तित्वमसन्मूर्तिनिरूपितम् ।
तथैव मूर्तिनास्तित्वमसदाकाशनिश्रयम् ।। 112 ।।

(108) व्यापकस्याकाशस्य सर्वत्र भवतो वस्तुनो न क्वचिदभावः । ततश्चासदप्याकाशनास्तित्वं परिमितदेशघटादिमूर्त्यवष्ठंभवशेन कल्प्यते । यत्र हि घटादयस्तत्रासदाकाशमिति व्यवहारः । एवं मूर्तीनामपि घटादीनां क्वचिन् नास्तित्वं भावतोऽविद्यमानमरि सत्स्वभावस्य स्वरूपविनाशायोगादसत्स्वभावत्वे कदाचिदप्यभावादिति न्यायादाकासस्यान्तराले दर्शनादध्यवसीयते । अन्तराले हि मूर्तीनां सत्तायास्तिरोधाने गगनमेव तद्रहितमवधारयन्तो जन्म प्रतिपद्यन्त इत्येतत् प्रकरणादवगन्तव्यम् । तथा च द्वयोरपि जन्मनाशयोः कल्पितत्वमुपपादितं भवति । यथाध्यवसायं च व्यवहारादजन्मनिरोधा एव पदार्थाः सिद्धाः । न ह्याकाशमभावो वस्तुतः पदार्थानामभावाभावे च सदैवावस्थानाज्जान्मार्थोऽपि न कश्चित् ।। 112 ।।
इदानीं वास्तवेऽपि जन्मनि प्रकारान्तरेण जायत इति प्रयोगं समर्थयितुमाह ।
यथा तदर्थैर्व्यापारैः क्रियात्मा व्यपदिश्यते ।
अभेदग्रहणादेष कार्यकारणयोः क्रमः ।। 113 ।।

(109) `करणं कार्यभावेन' इत्यादिना कार्यकारणयोर्वास्तवमभेदमाश्रित्य समर्थितम् । अधुना तूपचरिताभादाश्रयेणोच्यते यथा हि पचेर्विक्लित्तिः प्रधानार्थ इति तदर्थैः गुणव्यापारैरधिश्रयणोदकासेचनादिभिः कर्त्रादिगतैस्तादर्थ्यादमध्यारोप्य प्रधानक्रियारूपमुच्यते,अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः, काष्ठानि पचन्ति आ विक्लित्तेर्ज्वलन्तीति करणस्य पाक इत्यादिना तथा कार्यार्थत्वात् कारणस्यैवैषानुपूर्वी क्रमोऽभेदेन व्यवहारे । तथा च कारणमेवाङ्कुरशब्दाभिधेयं सत्कर्तृ कार्यात्मना जायत इति युज्यते व्यपदेष्टुमित्यर्थः ।। 113 ।।
ननु च कार्यकारणयोरभेदाध्यारोपेऽपि जन्मनः कर्तृत्वं कार्यस्यैव युज्यते न तु कारणस्य सिद्धत्वादित्याशङ्क्य प्रकृतिविकारविषये पर्यायेण कर्तृत्वं कार्यकारणयोः प्रयोगभेदेनावस्थापयितुमुपक्रम्ते ।

विकारो जन्मनः कर्ता प्रकृतिर्वेति संशये ।
भिद्यते प्रतिपत्तृणां दर्शनं लिङ्गदर्शनैः ।। 114 ।।

(110) इह प्रकृतिविकारविषये सामानाधिकरण्यं दृश्यते क्षीरं दधि सम्पद्यत इत्यादौ । अत्र च संदेहः । तथा हि गुणप्रधानभावस्य समन्वयान्यथानुपपत्त्यवश्यंभावात् किमत्र प्रकृतिः प्रधानं विकारोऽङ्गम्, उत विपर्ययः । तत्र प्रधानस्य कर्तृत्वं जनिं प्रति । अङ्गस्य तु प्रधानद्वारको जनिसंस्पर्श इति सामानाधिकरण्यम् । यदा तु भेदेन निर्देशो बीजादङ्कुरो जायत इति तदाऽसंशयमेव विकरस्य कर्तृत्वम् । अपादानतया प्रकृतेकर्निर्देशात्, जनिकर्तुः प्रकृतिरिति । तत्र विकारकर्तृकाणामाशयः-- आत्मलाभस्य जन्माख्या, असता चात्मा लब्धव्यः । तथा च विकार इति स एवात्र कर्ता युक्तः । प्रकृतिकर्तृकास्तु मन्यन्ते, असतो हि विकारस्यात्मलाभं प्रत्याभिमुख्यायोगात्तल्लक्षणे जन्मनि कर्तृतानुपपत्तिः । आत्मलाभोन्मुखता हि जन्म सिद्धान्तयिष्यते । प्रकृतिरूपेण चात्मनो लब्धत्वादुत्तरावस्थालक्षणात्मलाभौन्मुख्यमवतिष्ठत इति तत्र प्रकृतेरेव कर्त्तुत्वमुचितमिति ।। 114 ।।

तदेतद्दर्शनद्वयं लिङ्गदर्शनैः प्रयोगभेदस्वभावैर्विषयविभागेनावस्थापयितुमाह ।
क्लृपि सम्पद्यमाने या चतुर्थी सा विकारतः ।
सुवर्णपिण्डे प्रकृतौ वचनं कुण्डलाश्रयम् ।। 115 ।।

(111) `क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या' इति वार्तिकस्यायमर्थः सम्पादानक्रियाकर्तरि चतुर्थी विधेयेति । प्रयोगमूलत्वाच्च स्मृतेर्विकारवचनाच्चतुर्थी श्रूयमाणा विकारस्यैव सम्पत्तिक्रियाकर्तृत्वमावेदयते । मूत्राय सम्पद्यते यवागूरिति यावगूर्मत्र जायत इत्यत्र । प्रकृतेरत्र विकारद्वारेण क्रियासमन्वयो न साक्षात् । भेदविवक्षायां तु जनिकर्तुः प्रकृतिकित्यापादानपंचम्येवात्र कारकविभक्तिः, यवाग्वा मूत्रं जायत इति । अभेदविवक्षा तु चतुर्थ्या अवकाशः । अत एव तत्र संदेहे सत्ययं निर्णयो व्यधायि । तथा पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवत इत्यत्र भाष्यप्रयोगे सुवर्णपिण्डस्य प्रकृतित्वेऽपि न तद्नतमेकत्वं दृश्यते, अपि तु विकाररूपकुण्डलद्वित्वाश्रयं भवत इति द्विवचनं कर्तृप्रत्ययरूपं दृश्यत इत्यस्मादपि लिङ्गाद् विकारस्य कर्तृत्वाव सायः ।। 115 ।।

लिङ्गान्तरं विषयभेदेन प्रकृतिविकारयोः कर्तृत्वानुमापकमाह ।
वाक्ये सम्पद्यते कर्ता संघच्व्यन्तस्य कथ्यते ।
वृत्तौ संधीभवन्तीति ब्राह्मणानां स्वतन्त्रता ।। 116 ।।

(112) अभूततद्भावे कुभ्वस्तिविवक्षायां सम्पद्यकर्तरि च्विर्विधीयते । तस्यार्थप्रदर्शनाय यद् वाक्यं क्रियते तत्र विकारस्य सम्पद्यकर्तृत्वं दृश्यते । तद्यथा असङ्घो ब्राह्मणाः सङ्घो भवतीति सङ्घगतैकत्वाश्रयस्य वचनस्य च दर्शनात् सङ्घ एव क्र्ता । वृत्तौ तूच्यते "संधीभवन्ति ब्राह्मणा" इति । अत्र प्रकृतिभूतब्राह्मणगतबहुवचनदर्शनात् प्रकृतेः कर्तृत्वावसायः । तदेवं प्रयोगभेदेन प्ररूढं प्रकृतिविकारयोः कर्तृत्वमुन्नेयम् ।। 116 ।।

इदानीं प्रकृतेः कर्तृत्वे भाष्यकारोक्तं लिङ्गमाह ।
अत्वं सम्पद्यते यस्त्वं न तस्मिन् युष्मदाश्रया ।
प्रकृतिः पुरुषस्यास्ति प्राकृतः स विधीयते ।। 117 ।।

(113) `अत्वं त्वं सम्पद्यते त्वद्भवति'(M.Bha.on P.1.4.108)
इति भाष्य उदाहृतम् । अत्र युष्मदथा विकारः । न च तदाश्रयो मध्यमः पुरुषो दृश्यते अपि तु `भवति' इत्ययुष्मदर्थरूपप्रकृतिगतप्रथमपुरुषदर्शनात् प्रकृतेरेव कर्त्रीत्वावसायः ।। 117 ।।

तदेतद्विषयभेदेन प्रयोगप्रामाण्यादवस्थितं कथं युज्यत इत्यत्रोपपत्तिमाह ।
पूर्वामवस्थामजहत्संस्पृशन् धर्ममुत्तरम् ।
समूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ।। 118 ।।

(114) इह न सर्वथैवानिष्पन्नि जायत इत्यभिधीयते, अपि तु पूर्वां कारणावस्थामविजहदत्यजदिति प्रकृतेरपि कर्तृत्वसंभावनात्र । नापि सर्वात्मनोदासीनमपि तूत्तरावस्थाविशेषं संस्पृशद् आसादयदिति विकारस्यापि कर्तृत्वसंभावना । एवं च पूर्वापरावस्थोपाध्यवच्छिन्नमेकं वस्तु पूर्वावस्थानुगुण्येनोत्तरावस्थासादनोन्मुखं प्रतायमानरूपमिवाध्यवसीयमानं जायत इति धात्वर्थप्रत्ययार्थयोरानुगुण्यमासादयति । तथा च प्रकृतिविकारयोः सामानाधिकरण्यमुभयोरपि च कर्तृत्वमुपपद्यते ।। 118 ।।

यद्येवं सर्वत्रैवोभयोः कर्तृत्वं स्यादित्याशङ्क्याह ।

सव्यापारतरः कश्चित् क्लचिद्धर्मः प्रतीयते ।
संसृज्यन्ते च भावानां भेदवत्योऽपि शक्तयः ।। 119 ।।

(115) द्वयोरपि प्रकृतिविकृत्योरुक्तेन न्यायेनाभेदापत्त्या जनिसमन्वयसहत्वेऽपि कर्तृप्रत्ययोत्पत्तौ क्वचिद् विकारः सव्यापारः क्वचित् प्रकृतिरित्युक्तम् । एवमपि च विषयविभागेन `जायते' इत्यत्र यथोक्तेन प्रकारेण द्वयोरपि कर्तृत्मुपपादितम् । यतो भावानामन्यत्र भिन्ना अपि शक्तयः क्वचित् संसर्गमपि प्राप्नुवन्तीत्यर्थः । यद्वा सर्वत्रैव द्वयोरपि कर्तृत्वमेकस्य तु साक्षादिति प्रकर्षः संव्यापारतरः इत्युक्तः । प्रकृतिविकृत्योर्हि सामानादिकरण्यान्यथानुपपत्त्या एकस्य जनिकर्तृत्वे नान्तरीयकमपरस्यापि तद्वेदितव्यम् । यो हि विधेयः स प्रधानभूतः प्रकर्षेण जनिव्यापारवान्, अन्यस्त्वनूद्यमानो गुणोऽप्रकृष्टव्यापारः ।। 119 ।।

तथा च संसर्गः कर्तृशक्तयोर्यदि तर्हि संसर्गः त्वद्भवतीत्यत्र विकारावस्थाश्रयः पुरुष कस्मान्न भवतीत्याशङ्क्याह ।

विपरीतार्थवृत्तित्वं पुरुषस्य विपर्यये ।
गम्येत साधनं ह्यत्र सव्यापारं प्रतीयते ।। 120 ।।

(116) `अत्वं त्वं सम्पद्यते, त्वद्भवसि' इत्येवं युष्मदर्थाश्रयेऽत्र मध्यमे पुरुषे विवक्षितोऽर्थो न प्रतीयते अयुष्मदर्थः प्रकृतिः, युष्मदर्थो विकृतिरिति । अपि तु युष्मदर्थः प्रकृतिः सव्यापारा प्रत्ययोत्पत्ताविति तस्या अन्या विकृतिः प्रतीयते । `संपद्यसे' इति हि साधनं युष्मदर्थः सव्यापारं प्रतीयत इति तस्य फलवत्तया विकारान्तरमनुषज्येत । तथा च युष्मदर्थस्तद्विपरीतमयुष्मदर्थभावमापद्यत इति विज्ञायेत । तस्मादयुष्मपदार्थस्य प्रकृतेः सम्पद्यमानत्वसंप्रत्ययार्थं प्रथम एवात्र पुरुषो न्याय्यः ।।120 ।।

विपरीतार्थवृत्तित्वमेव व्याचष्टे ।

त्वमन्यो भवसीत्येषा तत्र स्यात् परिकल्पना ।
राज्ञि भृत्यत्वमापन्ने यथा तद्वद्गतिर्भवेत् ।। 121 ।।

(117) यथा `राजन् अराजा सम्पद्यसे' इत्युक्ते राजार्थस्य प्रकृतेर्युष्मदर्थस्याख्यातपदेन प्रत्यायनात् सव्यापारस्य स्वार्थविपरीतभृत्यभावेन सम्पत्तिक्रियाकर्तृत्वं प्रतीयते तथात्र `त्वद्भवसि' इत्युक्तेऽव्यावस्थासादने युष्मदर्थस्य कर्तृत्वावसायात् विवक्षितोऽर्थोष़युष्मदर्थतापत्तिलक्षणो न प्रतीयेतेति तत्सम्प्रत्ययार्थं प्रथमपुरुषो ज्यायान् । न ह्यन्यदभिदित्सतान्यदभिधानीयम् । सुवर्णपिण्डः कुण्डले भवतः" इत्यत्र तु विकारस्यापि कर्तृत्वे कुण्डले सुवर्णपिण्डात्मतया परिणमेते इति विपरीतार्थवृत्तित्वं न भवति । भवतौ कर्तुरवश्यं विकारापेक्षाभावात् । च्विविषय एव हि कर्तुरवश्यं विकारान्तरावेशः कथ्यते । यस्मात् प्रकृतिविवक्षायां च्विर्विधीयते, स्वेनात्मना च सिद्धा प्रकृतिरिति विकाररूपमापद्यमाना सव्यापारा विशिष्टविकारनिवृत्तिप्रतिपत्तये विकारशब्दाभिधेया कर्ती न्याय्या, च्व्यन्तस्य वृत्तौ हि च्व्यन्तस्य क्रियायोगे गतिसंज्ञाविधानात् । गतेः क्रियाविशेषणत्वात् । असत्ववचनत्वे कर्तृत्वायोगात् प्रकृतेरेव कर्त्रीत्वमुचितं विकाररूपगतिसंज्ञकच्व्यन्ताख्यविशेषणविशिष्टायां क्रियायामत्वद्भवति, सङ्घीभवन्ति ब्राह्मणा इति वाक्ये तु च्व्यन्तस्य प्रकृतिविकृत्योः स्वशब्देनोपादानाद्यथाविवक्षं गुणप्रधानभावादुभयोः कर्तृत्वे नियमः । तथा हि प्रकृतेर्निजमेव तत्त्वं सम्पदौ व्यापृतं प्राधान्येन विवक्षितं भवति । कदाचित् समारोपितं विकाररूपम् । तद्यथा महद्भूतश्चन्द्रमा इत्यत्रामहदर्थप्रकृतिरूपस्य कर्तृत्वात् स एव महच्छब्देन विकारवाचिनाभिधीयत इति गौणत्वान्महदर्थस्यात्वं न भवतीत्युक्तम् । "महद्भूता ब्राह्मणी" इत्यत्र तु विकारस्यैव महदर्थस्य भवितृत्वेन कर्तृतया विवक्षितत्वात् समानाधिकरणलक्षणो भवत्येव पुवद्भाव इत्युक्तम् ।। 121 ।।

गतमानुषङ्गिकम् । इदमिदानीं वक्तव्यम् । `प्रागन्यतः शक्तिलाभाद्' इत्यादिना स्वातन्त्र्यं व्याख्यातम् । तच्च प्रयोज्यकर्तुर्नोपपद्यते । स हि करणादिवत् प्रयोजकव्यापारे न्यग्भवन्न स्वतन्त्रः सत्यपि स्वव्यापारे स्वातन्त्र्ये । ततश्च स्वातन्त्र्यनिबन्धना कर्तृसंज्ञा न स्यादस्येति पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र देवदत्तात् प्रयोज्यकर्तुः कर्तृतृतीया न स्यात् । तथा च वार्त्तिकम्---

स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानम्, अस्वतन्त्रत्वात् "

(Va. on P.1.4.54)

इति । हेतुः प्रयोजकः, तद्वति प्रयोज्य इत्यर्थः । हेतुसंज्ञायस्त्वध्येषणं स्याद्विषयो यत्र नियुज्यमानस्यापि तत्प्रयोजकत्वं न विरुध्यत इति `हेतुमति' इत्युपलक्षणं युक्तम् ।

अत्र परिहारवार्तिकम्

`न वा स्वातन्त्र्यात्'(Va.on P.1.4.54.)

इति । स्वव्यापारेऽस्त्येव प्रयोज्यस्य स्वातन्त्र्यमिति सिद्धा कर्तृसंज्ञा । नन्वेवं करणादीनामपि स्यात् । नैतदस्ति । तेषां यथास्वं करणादिसंज्ञाविधानात् । प्रयोज्यस्य तु न कदाचिदन्या संज्ञोक्तेति कर्तृसंज्ञैव । एवं स्थिते प्रयोजकायत्तत्वात् प्रयोज्यप्रवृत्तेः कतं स्वातच्त्र्यमित्याशङ्क्योपपादयति ।

सम्भावनात् क्रियासिद्धौ कर्तृत्वेन समाश्रितः ।

क्रियायामात्मसाध्यायां साधनानां प्रयोजकः ।। 122 ।।

प्रयोगमात्रे न्यग्भावं स्वातन्त्र्यादेव निश्रितः ।

अविशिष्टो भवत्यन्यैः स्वतन्त्रैर्मुक्तसंशयैः ।। 123 ।।

(118) यस्तावदप्रवृत्तक्रियः प्रयोज्यः सोऽनुमितक्रियासामर्थ्या एव प्रयुज्यते । अन्यथा प्रयोग एव न स्यात् । न ह्यशक्तः कस्यांचित् क्रियायां केनचिद् विनियुज्यते सचेतसा । ततश्चावधृतशक्तिः, संभावितक्रियः कर्तैव स्वतन्त्रो विनियुज्यते । योऽपि आत्मसाध्यायां क्रियायां प्रवृत्तः सव्यापारः करणादिकारककलापं प्रयोजयन्नेव प्रलृत्तक्रियः सन् प्रयुज्यते विरामाशङ्कायां मा विरंसीदिति बुद्ध्या सोऽपि स्वतन्त्रः कर्तैव प्रयोज्यः स्वव्यापारे स्वातन्त्र्यादेव च प्रयोगमात्रे प्रयोजकप्रैषे न्यग्भावम् आयत्ततां निश्रितः प्राप्तः । क्रियासिद्धये हि प्रैषः । एवं च क्रिया सिध्यति यदि साधनान्तरविनियोगलक्षणं स्वातन्त्र्यं प्रयोज्यः प्रतिपद्यते नान्यथेति न प्रयोगेण स्वातन्त्र्यं विरुध्यते । विषयभेदाच्च प्रयोगे पारतन्त्र्यं स्वव्यापारे स्वातन्त्र्यमिति । उपाय एव च स्वव्यापारे स्वातन्त्र्यं प्रयोगे पारतन्त्र्यस्य । एवमनन्यप्रयोज्यतया स्वाधीनतया निश्चितैरपरैः समानः स्वतन्त्रः प्रयोज्यः सिद्धः । तदुक्तं वार्तिके।

"इतरथा ह्यकुर्वत्यपि कारयतीति स्यात् । (Va.on P.1.4.54)

नाऽकुर्वतीति चेत् स्वतन्त्रः । (Va. on P.1.4.54)

इति । उदासीनस्यालासस्य । शक्तस्य प्रयोगानुपपत्तेः । सम्भावितस्वातन्त्र्य एव प्रयोज्य इत्यर्थः यद्येवं स्वतन्त्रस्य प्रथोजको हेतुरित्येव स्वव्यापारे स्वतन्त्राणां करणादीनामपि प्रयोजकम्य प्रयोज्यस्य कतुर्हेतुसंज्ञाप्रसङ्गः । भवतु को दोष इति चेत् `हेतुमपि' इति तद्व्यापारो णिचूप्रसंगः । धातुनोक्तत्वात्तस्यायमदोष इति चेन्न, कर्मविषय एव प्रैषो धात्वर्थेऽन्तर्भवेत् फलार्थत्वात् कर्तृभावनाया धात्वर्थस्य तया संस्पर्शात् । अकर्मकधातुविषये तु करणदिविनियोगो वस्तुतः सन्नप्यनवधारित इति तत्प्रत्यायनाय णिजुत्पद्येत । शब्दाद्विशिष्टसाधनक्रियाभावनामात्रं गम्यते । न तु करणादीनां कर्त्ता प्रेषणम् । किं च प्रयोज्यस्यापि हेतुसंज्ञायां तत्प्रयोजक इति स्वतन्त्रस्य प्रत्यवमर्शोऽनर्थकः । करणादिप्रयोजकव्यावृत्तये हि सः । तस्यापि तु करणादेः स्वव्यापारस्वातन्त्र्याश्रयेण प्रयोजकस्य हेतुसंज्ञायामनर्थकः प्रत्यवमर्शः । किं च हेतुसंज्ञैवार्नार्थिका । कर्तृमात्रस्य तस्य `कर्तृमति णिच्' इत्येवास्तु । तथा च ।

`भीस्म्योर्हेतुमये'(P.1.3.68)

`भियोहेतुभये षुक्' (P.7.3.40.)

`बिभेतेर्हेतुभये'(P.6.1.56)

इत्यत्र `कर्तृभये' इति वचनेऽनिष्टं स्यात् । तस्मात् स्वतन्त्रस्य प्रयोजक इति करणादिप्रयोजकस्य हेतुसंज्ञाव्युदासे प्रयतनीयम् । अत्रोच्यते । तस्य प्रयोजक इति सर्वनाम्नानुभवकर्तृसंज्ञस्य स्वतन्त्रस्य परामर्शादिप्रतिलब्धकर्तृसंज्ञानां करणादीनां प्रयोजकस्य हेतुसंज्ञा न भवति । तथा हि स्वव्यापारे स्वतन्त्रत्वेऽपि करणादेः प्रधानव्यापारे पारतन्त्र्यात् कर्तृसंज्ञा न भवति । स्वतन्त्रश्रुतिसामर्थ्याद्धि प्रकृष्टं सामर्थ्यं विवक्षितम् । करणादीनां त्वनुकुर्वाणानां कारकत्वायोगात् तदन्यथानुपपत्त्यानुमीयमानं स्वव्यापारे स्वातन्त्र्यं यदि परं कारकसंज्ञायामुपयुज्येत । न तु कर्तृसंज्ञायाम्; प्रधानविनियोगेनाभिभूतत्वात् । प्रकृष्टस्य स्वातन्त्र्यस्याभावात् । ततश्च न ते कर्तरि सन्तः प्रेष्यन्ते । प्रयोज्यस्तु प्रयोक्तोऽपि साधनान्तरविनियोक्तृत्वलक्षणं प्रकृष्टं स्वाधीनत्वं नैव त्यजतीति सर्वथाऽसौ कर्तैव युज्यते । अत एवोक्तं "कर्तृत्वेन समाश्रितः" इति । भूतेन भाविना वा संभाव्यमानेन बुद्ध्याभिसंहितेन कर्तृत्वेनेति सिद्धमिष्टम् ।। 122,123 ।।

उक्तमिदं "प्रयोगमात्रे न्यग्भावं स्वातन्त्र्यादेन निश्रितः" इति । तदपि वा नास्तीत्याह ।

निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये ।

अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये ।। 124 ।।

(119) स्वार्थलिप्सया सर्वः प्रवर्तमानः पराधीनतां प्रवृत्तौ नासादयतींति केवलं कस्यचित् प्रवृत्तिः कस्यचिदर्थसिद्धयेऽप्यङ्गमित्येतावता भृत्यादेः स्वाम्याद्याशयानुवर्तनेन प्रयोज्यता कथ्यते । निर्वेशनिमित्ता हि भृत्यानां प्रवृत्तिः स्वार्थसाधनाया बीतरागाणामपि कारुण्यात् प्रवृत्तौ परार्थसम्पादनमेव स्वार्थः फलम्, इष्टलक्षणत्वात्तस्य । तदेतद् भाष्येऽभिहितम्---

"सर्व इमे स्वभूत्यर्थं यतन्ते । नेह कश्चित्

परोऽनुगृहीतव्य इति।" (M.Bha. on P.3.1.26.)

इति । स्वभूत्यर्थं प्रवर्तमानेषु कः प्रयोज्यार्थ इति चोद्ये समाधानमप्युक्तम्---

"यदभिप्रायेषु सज्जन्ते" (M.Bha.on P.3.1.26)

इति । प्रयोजकाभिप्रायः क्रियासम्पादनम् । तच्च स्वार्थफलाभिसंधानेन प्रवर्तमानोऽपि प्रयोज्यः साधयत्येव । एवं च कृत्वा `हेतुमति च'(P.3.1.26)

इति । प्रयोजकाभिप्रायः क्रियासम्पादनम् । तच्च स्वार्थफलाभिसंधानेन प्रवर्तमानोऽपि प्रयोज्यः साधयत्येव । एवं च कृत्वा `हेतुमति च ' (P.3.1.26)

इत्यत्रोपसंख्यानानि प्रत्याख्यातानि ।

`न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्'(Va.on P.3.1.26)

इति । स्वरसप्रवृत्तित्वात् सूर्यस्य माहिष्मत्यामुद्गमनं पथिकस्याभिप्रेतं काकतालीयात् सम्पन्नमित्यभिप्रायानुवर्तनात् सूर्यः प्रयोज्यो भवतीत्यादि योज्यम् । तदाह वार्तिककारः---

`प्रवृत्तिर्ह्युभयत्रानपेक्ष्य'(Va. on P.3.1.26)

इति । मुक्तसंशयेऽपि प्रयोज्ये या प्रवृत्तिः सापि न प्रयोज्यस्य स्वार्थमपेक्ष्य, अपि त्वात्मन एवेत्यर्थः । `कंसवधमाचष्टे' इत्यादौ तु

`प्रत्यक्षमिव कंसादीन्'

इत्यादिना पूर्वमेव समर्थितम् । अचेतनविषयेऽपि तर्हि भिक्षा वासयति' इत्यादौ वासाद्यानुकूल्यादभिप्रायाध्यारोपात् प्रयोजकत्वं समर्थनीयम् । एवं च योग्यतामात्रेण निमित्तमात्रं हेतुः प्रयोजक इत्युक्तं निमित्तेभ्यः इति । वार्तिकेऽप्युक्तम्---

`हेतुनिर्देशश्च निमित्तमात्रम् भिक्षादिषु दर्शनात्'

(Va. on P.3.1.26)

इत्यवसितविचारः कर्ता ।। 124 ।।
इति भूतिराजततनयहेलाराजकृते प्रकीर्णप्रकाशे कर्त्रधिकारः ।

कर्तैव प्रयोजकः सन् हेतुरिति कर्तृविचारानन्तरं हेतुं विचारयति ।
प्रेषणाध्येषणे कुर्वस्तत्समर्थानि चाचरन् ।
कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यते ।। 125 ।।
(120) आज्ञापुरःसरा व्यापारणा प्रेषणम्, निकृष्टविषयो नियोग इत्यर्थः । यत्पुनरभ्यर्हितं व्यापारयति तद्अध्येषणम् । अभ्यर्हितविषयं प्रबोधनमित्यर्थः । तत्समर्थानि प्रयोज्यक्रियासम्पत्त्यनुकूलानि चेष्टितानि । अयमेव च मुख्यः प्रयोजकव्यापारो यत् प्रयोज्यक्रियासम्पत्तिसमर्थाचरणम् । व्यापकत्वाद् भिक्षादिष्वपि भावात् । अस्यैव निकृष्टोत्कृष्टविषयतया प्रेषणाध्येणरूपेण प्रविभागः । तथा च गोबलीवर्दन्यायेन तद्विलक्षणं तत्समर्थाचरणं भिक्षाविषयमत्राभिप्रेतम् । व्यवहारभेदाद्भेदेनैषमुपादानम् । यथाभिप्रायानुविधानं प्रयोज्यत्वमुक्तं तथा स्वाभिप्रायप्रकाशनमपि प्रयोजकत्वमिति तत्समर्थाचरणमेव सर्वत्र प्रयोजकव्यापरः । `कर्तैव' इति ।

`तत्प्रयोजको हेतुश्च' (P.1.4.55.)
इति संज्ञासमावेशार्थं चकारं व्याचष्टे । असति चकारेऽत्रैकसंज्ञाधिकारात् कर्तृसंज्ञा न स्यादिति समावेशार्थोऽसौ । तदुक्तं वार्तिके ।

`गतिदिविहेतुमत्सु च ग्रहणम्'
इति । विहितां शास्त्रे' इति । प्रदेशेऽस्यैव ग्रहणं यथा स्यादित्यर्थः । फलसाधनयोग्यः पदार्थो हि लौकिको हेतुर्द्रव्यादिविषयः । तस्य त्वयं विशेषः । क्रियाविषयत्वेन कारकं हेतुः प्रथोज्यप्रयोजकः । अत ए कारकत्वनिबन्धनः प्रेषणादिः स्वव्यापारोऽत्र निर्दिष्टः । तत्र

`हेतुमति च'(P.3.1.26)

`भियो हेतुभये' (P.7.3.40)
इत्यत्र कुत्रिमस्य हेतोर्ग्रहणम् । तृतीयाविधौ तु

`हेतौ' (P.2.3.23)
इत्यत्र प्रयोजको कर्तृत्वादेव तृतीयासिद्धेलौकिकस्य हेतोर्ग्रहणम् । पंचमीविधावपि

`अकर्तरि...' (P.2.3.24)
इति पारिभाषिकः पर्युदस्यते ।

`लक्षणहेत्वोः क्रियायाः'(P.3.2.126)
इत्यत्रापि प्रयोज्यस्य कारकत्वात् क्रियायोगाव्यभिचाराद् विशेषणसामर्थ्याद् द्रव्यगुणक्रियाविषयत्वेन संभवव्यभिचाराल्लौकिक एव हेचुर्गृह्यते । तथा धात्वाधिकाराच्च । न हि धातुः साधनरूपे हेतौ वर्तते । एवं

हेतुहेतुमतोर्लिङ् (P.3.3.156)
इत्यत्रापि हेतोर्धात्वर्थविशेषणत्वात् साधनस्य च धात्वर्थत्वाभावात् लौकिक एव हेतुः ।

`कुञो हेतुताच्छील्यानुलोम्येषु'(P.3.2.20)
इत्यत्रापि न प्रयोजको हेतुः । तत्र णिज्विधानात् कुञ इति च तिञ्रहितस्य निर्देशात् । तेनात्र कृत्त्वात् प्राप्तस्य कर्तुः लौकिको हेतुर्विशेषणम् । तेन च विरोधाभावान्न निवर्त्यते कर्ता । योग्यतारूपेणैव च कृद्भिः कर्तुरभिधानान्निमित्तमात्रं हेतुरुपदीयमानो विशेषणं पुनः श्रुतेरवधारणं प्रकल्पयति `हेतुरेव' इति । तेनाव्यभिचारि कारणं विद्यादि यशः प्रभृतिषु प्रतिपादितं भवति । एते चात्र हेत्वादयः कर्तृविशेषप्रतीतिसामर्थ्याद् गम्यमानाः परम्परया पदार्था एव । अन्यथा वाक्यावस्थायां प्रतीयमानाः पदावधिकस्यान्वाख्यानस्य निमित्तभावं नोपेयुः । इह

प्रैषातिसर्ग.....(P.3.3.163)
इत्यादिसूत्रे चकारेण समुच्चितो लोट् इति प्रैषे णिज्लोटोर्विधानाद्विकल्पप्रसङ्ग इति भाष्ये चोदितम् ।
पृच्छतु मा भवान्, अनुयाङ्क्तां मा भवानित्यत्र णिच् कस्मान्न भवति ।
(M.Bha.on P.3.1.26)
इति । `मा भवान्' इत्यात्मनिर्देशेन प्रयोजकाश्रितं प्रैषं प्रदर्शयन् णिचः प्राप्तिं परिपुष्णाति । अत्र परिहारो भाष्येऽभिहितः ।
`अकर्तृत्वात्' (M.Bha.on P.3.1.26)
इति । स्वतन्त्रस्य कर्तुः प्रयोजको हि तद्व्यापारे णिज् विधीयमानोऽत्र पृच्छिक्रियायामप्रवृत्तस्य तस्य कर्तृत्वाभावात्तत्प्रयोजकस्य हेतुसंज्ञाभावात्तद्व्यापारे प्रैषे णिज् न भवतीत्यर्थः । चोदकस्तु कालादेः प्रश्नाद्यशक्तस्याप्रयोज्यत्वात् प्रवृत्तस्य च नियोगानर्थक्यात् संभावितक्रियत्वेन कर्तुं प्रेषणमिदमित्याह---
"किं च भोः वर्तमानाया एव क्रियायाः कर्त्रा भवितव्यम्,
न भूतभविष्यत्कालायाः" (M.Bha.on P.3.1.26)
इति । अत्रोत्तरम् ।
`अभिसंबन्धस्तत्र क्रियते ।' (M.Bha on P.3.1.26)
इति। सामर्थ्यसम्भावितो भूतभविष्यत्क्रियाविषये क्रियाकारकभावः । तत्र च लोड्विषये प्रयोज्यक्रियैवैका सम्भाव्यत इति `क्रियायां कर्ता भव' इति । न त्वपरः प्रयोज्यव्यापारविषयः प्रयोजकव्यापारोऽस्ति । अनन्तरं भाष्यम् ।
`यच्च कर्ता कथं कर्तृप्रत्ययेनोच्यते' (M.Bha. on P.3.1.26)
इति । अत्रोत्तरम् ।
कथमस्मिन्नपृच्छत्ययं पृच्छिर्वर्तते ।'(M.Bha.on P.3.1.26)
इति । तत् उक्तम् ।
अभिसंबन्धस्तत्र क्रियते, इमां क्रियां कुर्वीति ।'
(M.Bha. on P.3.1.26)
इति । अनन्तरमुक्तम् ।
कर्त्रापि तर्ह्यभिसंबन्धः क्रियते । अस्यां क्रिथायां कर्ता भवेति (V.Bha.on P.3.1.26)
इति । तथा च यथात्र संप्रत्यपृच्छत्यपि पृच्छिक्रियाभिसन्धानेन पृच्छिर्धातुर्वर्तते तथा तत्कर्त्राप्यभिसंबन्धात् कर्तृप्रत्ययो लोट् क्रियत इति कर्त्रापि तर्ह्यभिसंबन्धः क्रियत इत्युक्तम् । एवं च वदता भाष्यकारेण सम्प्रत्यकर्तृत्वादत्र णिज् न भवतीत्युक्तं भवति । तथा हि नवमेवास्याधीयमानं कर्तृत्वं न तु विद्यमानम् । क्रियायां कर्ता भवेति हि प्रेष्यते, न तु कर्तैव सन् । तेन कर्तुः सतः प्रैषः प्रयोजकसमवायी णिज्विषयः, लोट्प्रत्ययस्तु कर्त्रादिषु विधीयते । धात्वर्थोपाधिस्तु तस्य प्रैषो द्योत्यः । स च न धातुप्रत्ययवाच्यः, अपि तु सामर्थ्याद् वक्तैव प्रयोजकोऽवतिष्ठत इति तद्धर्मः प्रैषोऽवतिष्ठमानो न धातुप्रत्ययेन नियतकालतयात्रावच्छिद्यते । तथा च सम्प्रत्यपृच्छत्यपि पृच्छत्विति प्रयोगः । णिचस्तु प्रैषो वाच्य इति शब्दोपादानत्वादभिधेयधर्मो भवन् नियतकालाभिधायिना प्रत्ययेन लडादिना कालनियमेनावच्छिद्यते । शब्देन हि ण्यन्तादुत्पन्नेन कर्तृवाचिना लकारेण तृजादिना चोपात्तो यः कर्ता प्रयोजकस्तस्य संबन्धी प्रतीयतेऽसावित्यभिधेयधर्मः । द्विविधो ह्यर्थः शास्त्रेऽन्वाख्यानाङ्गभावेनोपादीयते । कश्चित् प्रयोक्तृधर्मो यथा वीप्साबाधासूयाकुत्सनादिः । अन्यः प्रतिपाद्यधर्मः । तत्रायं लोड्विषयः प्रैष आबाधादिवत् प्रयोक्तृधर्म इत्यभिधेयत्वाद् व्यावृत्तः ।। 125 ।।
तदेतत् तात्पर्येण प्रतिपादयति ।
द्रव्यमात्रस्य तु प्रैषे पृच्छयादेर्लोड् विधीयते ।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ।। 126 ।।

(121) अप्रवृत्तक्रियस्य द्रव्यमात्रस्य अप्रतिलब्धकर्तृभावस्य कर्तृत्वार्थ एव प्रैषे द्योत्ये लोडुपिदश्यते । पृच्छयनुयुज्यादेर्धातोः परः प्रत्ययः कर्त्रादिकारके वाच्ये । प्रवृत्तक्रियस्य तु विरामाशङ्कायां मा विरंसीदित्यभिसंधाय कर्तुरेव स्वतन्त्रस्य प्रयोजकहेतुव्यापारे णिज् वाचक उपदिश्यते । प्रत्ययार्थविशेषणपक्षो हि `हेतुमति च' इत्यत्र सिद्धान्तितः । तथा च वार्तिकम् ।

`हेतुमतीति कारकोपादानं प्रत्ययपरिग्रहार्थम् ।'

(Va on P.3.1.26)

इति । तदेवं णिज्लोटोर्विभक्त एव विषयः सौकिकाच्छब्दप्रयोगात् प्रैषभेदस्यात्रावधारणात् । णिज्विषयस्य प्रैषस्याभिधेयधर्मत्वेन णिज्वाच्यतया च तद्धर्मभेदाल्लोड्विषयस्य तु द्योत्यत्वेन प्रयोक्तृधर्मत्वेन च भेदात् । अत एव तुशब्दद्वयेन सम्बन्धनीयः । पृच्छतु मा भवानित्यादौ न प्रैषकर्तुर्वाचकः कश्चिद् विद्यते । केवलमुच्चारयितैव कर्ता सामर्थ्यात् प्रतीयते इत्यभिधेयधर्मोऽत्र प्रैषो न भवति । नापि स्वरूपेणाभिधेयः लोटा तदनभिधानात् लोडन्तशब्दोच्चारणाद्धि प्रयोक्तृधर्मत्वेनाबाधादिवत् प्रतीयते प्रैषो न त्वस्य वाचकः कश्चिदस्ति । यदि तर्हि एवमनयोः प्रैषयोः स्फुटो भेदः कथं भाष्ये चोदितम्---

`इह कस्मान्न णिज् भवति पृच्छतु मा भवान्'

(M.Bha. on P.3.1.26)

इति । लोकव्यवहाराधिगम्योऽयं विभागः, शास्त्रेऽन्वाख्यानविभागो न कृत इति प्रैषमात्रं समानं मत्वा पूर्वपक्षः ।। 126 ।।
गतमेतत् । इह प्रयोज्यस्य प्रैषणाध्येषणादिना सर्वस्य प्रयोजकव्यापारेणाप्यमानत्वात् कर्मसंज्ञाप्रसङ्ग इत्याशङ्क्याह ।
गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ।। 127 ।।

(122) स्वतन्त्रतामपरित्यजन्नेव प्रयोज्यः प्रयोजकव्यापारे पाराधीन्यं प्रतिपद्यते । न ह्यस्य प्रयोजकेन स्वातन्त्र्यखण्डना क्रियत इत्युक्तम् । इतरथा ह्यकुर्वत्यपि कारयतीति स्यादिति । तथा च प्रैषेऽपि स्वव्यापारे स्वातन्त्र्यात् कर्तृसंज्ञा भवत्येव । कर्मसंज्ञा तु प्रैषणाप्यमानत्वेन प्राप्ता

`गतिबुद्धि...' (P.1.4.52)

इत्यादिना नियमिता । गत्यादिधातुविषय एव प्रयोज्यः कर्मसंज्ञो नान्यत्रेति पाचयत्योदनं देवदत्तेनेत्यादौ स्वधर्मेण कर्तृत्वेन प्रयोज्यः अभिधीयते इत्यर्थः । ननु प्रषेऽपि स्वातन्त्र्यस्यानिवृत्तौ कर्तृसंज्ञैव परत्वात् स्यादिति कथं गतिबुद्धीत्यादिनियमः कथ्यते । कर्तृसंज्ञाप्रसङ्गे हि कर्मसंज्ञा आरभ्यत इति विध्यर्थता स्यात् । अत्रोच्यते - इह गुणप्रधानभूतक्रियाद्वयविषयशक्तिद्वयविषये प्रधानशक्तिरेव स्वकार्यं प्रयुङ्क्ते न गुणशक्तिरिति प्रागेव प्रतिपादितम् । तत्र धातुवाच्यः प्रयोज्यव्यापारो ण्यर्थविशेषणत्वादप्रधानं प्रयोजकव्यापारस्तु णिज्वाच्यः प्रधानम् । प्रकृत्यर्थावच्छिन्नत्वाद्धि प्रत्ययार्थः सर्वत्रैव प्रधानम् , प्रकृतिप्रत्ययो प्रत्ययार्थं सह ब्रूत इति । अतश्चात्र प्रयोजकव्यापारस्य प्राधान्यात् तदपेक्षया कर्मशक्तिरेव स्वकार्यं प्रापयति, न तु प्रयोज्यव्यापारविषया कर्तृशक्तिः । तद्यथाओदनस्य विक्लित्तौ स्वातन्त्र्येऽपि न कर्तृसंज्ञा, अपि तु विक्लेदनेन देवदत्त्वायापारेणेप्सिततमत्वात् कर्मसंज्ञैव पाचयत्योदनमिति । तदेवमत्रोभयप्रसङ्गाभावे विप्रतिषेधाभावात् कर्त-संज्ञाप्रत्प्या सिद्धैव गत्यादिविषयेऽपि कर्मसंज्ञेति नियमार्थः आरंभः । पचत्यादिविषये नियमेन प्रधानकार्ये प्रसारिते निष्प्रतिपक्षं गुणक्रिया स्वातन्त्र्यं स्वकार्यं कर्तृसंज्ञां प्रवर्तयत्येवेति सिद्धम् ।। 127 ।।
प्रयोजको हेतुरित्युक्तम् । कर्मणश्चापि फलभूतस्य क्रियां प्रत्यस्त्येव प्रयोजकत्वमिति तस्यापि हेतुत्वप्रसङ्ग इत्याशङ्क्य हेतुकर्मणोर्भेदं दर्शयति ।
क्रियायाः प्रेरकं कर्म हेतुः कर्तुः प्रयोजकः ।
कर्मार्था च क्रियोत्पत्तिः संस्कारप्रतिपत्तिभिः ।। 128 ।।

(123) निर्वृत्तिविकारप्रतिपत्तिभिर्यथाक्रमं निर्वर्त्यादित्रिविधकर्मसम्पादकत्वात् क्रियाफलं कर्मात्मसम्पत्त्यर्थं क्रियां प्रयुङ्क्ते । हेतुः

पुनः क्रियार्थी साधनविनियोगे कर्तारं प्रयुङ्क्ते, न तु साक्षात् क्रियाम् । तत्परिपोषाय हि कर्तुः प्रवृत्तिः । तस्य कर्तुः प्रयोजक इति वचनात् , इति भिन्नविषयत्वाद्धेतुकर्मणोः प्रयोजकत्वस्य स्वरूपभेदः स्फुट इत्यर्थः । `च' शब्दो हेतौ । यस्मादुत्पत्त्यादिभिरुपकारात् क्रिया कर्मार्था ततः कर्म क्रियायाः प्रयोजकम् । यद्धि यदर्थं तत्तस्य प्रयोजकमिति व्यपदिश्यते । तदुद्देशेन तत्प्रवृत्तेः । कारकान्तराणि तु क्रियार्थानि न तु तदर्था क्रियेति न तानि तस्थाः प्रयोजकानि । न हि करणाद्यर्थं क्रियाप्रवृत्तिः । उपायमात्रं हि तत् । तदयमवसितविचारो हेतुः ।। 128 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे साधनसमुद्देशे हेत्वधिकारः ।।

विभक्तिविधानक्रमेण साधनानां विचारे तृतीयार्थे कर्तरि निर्णीते चतुर्थ्यर्थं सम्प्रदानं विचारयितुमाह ।

अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणोप्सितम् ।

प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम् ।। 129 ।।

(124) अन्वर्थत्वात् सम्प्रदानशब्दस्य `त्यागाङ्गम्' इति लक्षणलाभः । त्यागो दीयमानस्य स्वत्वनिवृत्त्या परस्वत्वापादनम् । तत्र चाङ्गं निमित्तं पाण्याद्यपि भवतीत्याह - कर्मणेप्सितम् इति । यत् त्यज्यमानं कर्म तेन करणभूतेन प्रारंभ एव कर्त्राप्तुमिष्टमित्यर्थः । तथा च

`कर्मणा यमभिप्रैति' (P.1.4.32)

इति लक्षणपरिग्रहः । तदेवविधं त्यागाङ्गं कथं कारकविशेषरूपां सम्प्रदानतां लभत इत्याशङ्क्य कारकत्वनिबन्धनं व्यापारं क्रियासिद्धौ निर्दिशति अनिराकरणाद् इत्यादिना । `उपाध्यायाय गां ददाति' इत्यादौ त्यज्यमानं कर्म गवाद्युपाध्यायादिना संबध्यते, तदभिप्रायेणैव त्यागात् । स चोपाध्यायस्तदमिसंबध्यमानं न निराकरोति, नापि तत्त्यक्तुः `मा त्याक्षीः' इति निराकरणं विधत्ते । यदि हि निराकुर्यात् त्याग एव न सम्पद्यते । परस्वत्वापत्तिपर्यन्तत्वात्तस्य । अनुमन्यते च दीयमानम् । तथा दीयमानं न निराकरोति बल्यादि देवतादीति तदपि क्रियाङ्गम् । याञ्चापूर्वके च दाने प्रेरणम् अभ्यर्थनया दाने प्रवर्तनमपि सम्प्रदानव्यापारः । तथा च त्यागोपकारित्वात् त्यागाङ्गं भवत्येव कारकं सम्प्रदानम् । ननु च दानस्य तदर्थत्वात् तादर्थ्ये चतुर्थीप्रयोगात् किमर्थं सम्प्रदानसंज्ञा । नैतन्न्याय्यम् । दानक्रियार्थं हि सम्प्रदानम्, न तु दानक्रिया तदर्था, कारकाणां क्रियार्थत्वात् सम्प्रदानार्थं तु दीयमानं कर्मेति वाक्यार्थभूताया दानक्रियाया अतादर्थ्यात् तादर्थ्ये चतुर्थ्या अप्राप्तौ तदर्था सम्प्रादनसंज्ञा न्याय्या । `रजकस्य वस्त्रं ददाति ,''घ्नतः पृष्ठं ददाति' इत्यादौ तु ददात्यर्थो नास्ति । त्यागो हि सः । तेन च हानात्मकेन ममताविच्छेदस्याक्षेपादेव परोपयोगाभिसंधिना परस्वत्वापादनमपि स्वीकृतम् । अत्र च तदभाव इति गौणोऽयं ददातेः प्रयोगः । देवताविषये तु दाने दातुस्तत्स्वामिकत्वसङ्कल्पो विद्यते एव । एवम् `अरोचकिनेऽन्नं ददाति' इत्यादौ उपयोगाभावस्तु न शाब्दः । न शूद्राय यतिं दद्यादित्यत्रापि मतिसंतानस्यापरक्रामतोऽस्त्येव परोपयोगः । तथा च `उपाध्यायादागमयति' इत्यध्ययनसंतानस्यापक्रामतो भवत्थपादानमुपाध्यायः मतिसंतानस्थोकदेशस्त्यज्यमान इति स्वत्वनिवृत्त्यङ्गपरस्वत्वापादनलक्षणो मुख्य एवात्र ददात्यर्थः । अन्ये तु मतेः दातृसंबन्धानवगमाद्नौण इत्याहुः । "कान्यां ददाति" इति जन्यजनकभावाव्यावृत्तावपि स्वस्वाभिसंबन्धस्य निवृत्तेर्मुख्य एव ददात्थर्थः "खण्डिकोपाध्यायस्तमै चपेटां ददाति" इत्यादौ वस्तुतोऽसत्यपि चपेटादिस्वाम्ये तदुपकारितया दातुः स्वामित्वाभिसंधिरस्त्येव । यद्यपि प्रतिकूलरूपत्वाच्चपेटायास्तदानीमुपयोगो नास्ति तथापि फलाद्वरेणास्त्येव परोपयोगित्वम् । चपेटासहत्वे शास्त्राभ्यासयोग्यत्वात् फलावाप्तेः । `मृजिरस्माय विशेषेणोपदिष्टः' (M.Bha.on Va on P.1.1.1.) इति तादर्थ्ये चतुर्थी । अविशेषेण गणे पठितो मृजिर्मार्जकशब्दार्थोऽपि भवतीत्यर्थः ।। 129 ।।

तदेवं प्रथमं सम्प्रदानं व्याख्यातम् । इदानीमुत्तरं व्याख्यातुमाह ।

हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम् ।

रुच्यार्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते ।। 130 ।।

(125) यथा संज्ञान्तरपूर्वकं कर्म प्रागुक्तं तथेदमपि संम्प्रदानमन्यपूर्वकं शास्त्रेण

`रुच्यर्थानां प्रीयमाणः' (P.1.4.33)

इत्यादिना व्याख्यायते । तथा हि `देवदत्ताय रोचते मोदकः' इत्यत्रान्यकर्तृकोऽभिलाषो रुच्यर्थ इत्यभिलाषविषयभावमापद्यमानं मोदकं देवदत्तः प्रयुङ्क्ते लौल्यात्तदानुगुण्यमाचरतीति हेतुसंज्ञायां प्रयोजकस्य देवदत्तस्य प्राप्तायां सम्प्रदानसंज्ञा कथ्यते । तथा च हेतुसंज्ञाबाधे णिचोऽभावाद्धेतुसमवायिन्या द्वितीयस्याः क्रियाया अप्रतीतेर्मोदकः स्वक्रियायां धातुवाच्यायां कर्ता भवति न कर्म । रोचते अभिलाषविषयभावमापद्यत इत्यर्थः । हेतुसंज्ञासनियुक्तायाः कर्तृसंज्ञाया अपि देवदत्तस्य बाधनात् कर्तुः क्रिययेप्सिततमत्वाभावात् । स्वातन्त्र्योपलक्षणायामपि कर्तृश्रुतौ सार्थीद्धीयत इति कर्मणि लकारसमर्थनार्थमत्र मोदकस्य कर्मसंज्ञा न भवति । यत्र हि शब्दोपात्ताया ं क्रियायां स्वातन्त्र्यं प्रतीयते तत्र भवेत्तदाश्रयं कर्मत्वम् । यथा हीयत इति हाने शब्दोपात्ते सार्थस्येति तदाश्रया पथिकस्य कर्मसंज्ञा । इह तु शब्दोपात्तायां मोदकक्रियायां रोचत इत्यस्मान्न देवदत्तस्य स्वातन्त्र्यं प्रतीयते, शब्दव्यापारानपेक्षायां तु वास्तवस्वातन्त्र्यस्य कारकमात्रविषयत्वात् कर्तृश्रुतिरनर्थिका स्यात् । यदा तु देवदत्ताय रोचते मोदक इत्ययमर्थो देवदत्तंमोदकः प्रीणयतीति, तथा च प्रीयमाण इति विशेषणं तदा कर्मसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञारंभः । धातोरर्थान्तरे हि वृत्तौ सकर्मकत्वम् । एवं `देवदत्ताय श्लाघते' इति गुणोत्कर्षेण देवदत्तः शस्यमानो गुणवत्तया तत्समर्थाचरणादध्यारोपितप्रयोजकभावो हेतुसंज्ञां प्राप्तो गुणाख्यानेन वा ज्ञापयितुमिष्टो ज्ञापनेनाप्यमानत्वात् कर्मसंज्ञ इति

`श्लाघह्नुङ्' (P.1.4.34)

इत्यादिना सम्प्रदानसंज्ञः कथ्यते । एवं ह्नौतिप्रभृतीनां यथायोगं वाच्यम् । ह्नौतिप्रभृतयो ह्यत्र स्वार्थोपसर्जनज्ञापनवचनत्वात् सकर्मकाः । तथा च ज्ञीप्स्यमान इति संज्ञिविशेषणमुपात्तम् । `देवदत्ताय शतं धारयति' इति स्वरूपेऽवतिष्ठमानं शतमवस्थापयत्यघमर्णो धारयति । अत्रोत्तमर्णो देवदत्तो दानक्रियाद्वारेण निमित्तं धारणस्य । यतोऽसौ ददाति शतं न च तत्र ददातिक्रिया श्रूयते इत्यश्रूयमाणक्रियाविषयेऽत्र कारकशेषे षष्ठ्यां प्राप्तायां

`धारेरुत्तमर्णः '(P.1.4.35)

इति सम्प्रदानसंज्ञा । यथासंभवं हि हेत्वादित्रयं प्राप्तमुच्यते न तु प्रत्येकम् । `पुष्पेभ्यः स्पृ-हयति' इति पुष्पाणामीप्सिततमत्वात् कर्मसंज्ञाप्रसङ्ग उक्तः । द्रुह्यादौ तु कर्मसंज्ञाप्रसङ्गः । द्रोहस्यापकारत्वात् तदर्थाः सकर्मकाः । एवमीर्ष्यासूयार्था अपि । `देवदत्ताय राध्यति, ईक्षते इति तु दैवं पर्यालोचनं गणकं देवदत्तः प्रयुङ्क्ते इति हेतुसंज्ञायां प्राप्तायां

`राधीक्ष्योः ' (P.1.4.39)

इति सम्प्रदानता । `देवदत्ताय गां प्रतिशृणोति, अशृणोति' इत्यत्र तु देवदत्तो याञ्चया गां प्रतिजानानं प्रयुङ्क्ते इति हेतुसंज्ञायां प्राप्तायां

`प्रत्याङ्भ्यां श्रुवः'(P.1.4.40)

इति सम्प्रदानता । पूर्वस्य हि धात्वर्थस्य याचनलक्षणस्य देवदत्तः कर्ता भवन् प्रतिश्रवेऽङ्गीकापरे प्रयोजको भवति । `होत्रेऽनुगृणाति, प्रतिगृणाति ' इत्यत्रापि `होतारं शंसनेन प्रोत्साहयति' इति होतुः कर्मसंज्ञाप्रसङ्गे

`अनुप्रतिगुणश्च' (P.1.4.41)

इति सम्प्रदानता । शताय परिक्रीतोऽनुब्रूहि' इति साधकतमस्य परिक्रयणे नियतकालस्वीकारे सम्प्रदानता विकल्पेनोक्ता । तत्र रुच्यर्थादिष्वति आदिशब्दोपात्तस्य सुज्ञानत्वात् करणसंज्ञाप्रसङ्गो नोक्तः । विशेषविवक्षाया अभावे चात्र सर्वत्रैव क्रियानिमित्तत्वमात्राश्रयेण शेषत्वे प्राप्ते सम्प्रदानतोदाहार्या । दुह्यादिपरिगणनाद्धि अकथितकर्मतात्र नास्ति । ननु च पूर्वमपि सम्प्रदानशास्त्रेणैवोक्तं

`कर्मणा यमभिप्रैति' (P.1.4.32)

इति । तत्कथमत्र शास्त्रेणेति विशेष्यभणितिः । उच्यते । अन्वर्थत्वाद् सम्प्रदानशब्दस्य लौकिक एव सम्प्रदानार्थः पूर्वमुक्तः । इह तु रुच्यर्थादिविषये तदर्थाभावाच्छब्दसंस्कारमात्रप्रतिपादनाय शास्त्रारंभसामर्थ्यात् सम्प्रदानत्वमुच्यत इति

शास्त्रीयलौकिकभेदेन द्विविधं सम्प्रदानं व्याख्यातम् ।। 130 ।।

इह श्राद्धय निगल्हते, युद्धाय संनह्यते, पत्ये शेते इत्यकर्मकधातुविषये कर्मणोऽभावात्तेनाभिप्रेयमाणस्य सम्प्रदानता न सिद्ध्यतीति

`क्रियाग्रहणमपि कर्तव्यम्'

इति वार्तिकेऽभिहितम् । क्रियया्भिप्रेयमाणस्यात्र स्यात् सम्प्रदानसंज्ञा । एतद्भाष्ये प्रत्याख्यातम् ।

क्रियापि क्रिययाप्यमानत्वात् कृत्रिमं कर्म । श्राद्धाय निगल्हते इत्यादौ च कया क्रियया क्रियाप्यमानेति सन्दर्शनादिक्रिययेत्युक्तम् । तत्र संदर्शनादिक्रिययया अभेदेन धातुनाभिधानात् । कथमभेदाश्रयः क्रियाकारकभावो युज्यत इति समर्थयितुमाह ।

भेदस्य च विवक्षायां पूर्वा पूर्वा क्रियां प्रति ।

परस्याङ्गस्य कर्मत्वान्न क्रियाग्रहणं कृतम् ।। 131 ।।

(126) सन्दर्शनप्रार्थनाद्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म । तत्र प्रैक्षापूर्वकारिणः प्रवृत्तावावश्यकेन सन्दर्शनादयः सन्निहिताः प्रतीयन्त इति तेषां प्रधानक्रियाया भेदविवक्षायां पूर्वपूर्वक्रियापेक्षयोत्तरोत्तरस्याङ्गस्य प्रधानक्रियार्थस्य कर्मत्वमविरुद्धं पूर्वपूर्वक्रिययाप्यमानत्वादिति क्रियाया अपि कर्मतायां तयाभिसंबध्यमानस्य सूत्रेणैव सम्प्रदानता सिद्धेति क्रियाग्रहणं प्रत्याख्यातम् । ददातिकर्मणेत्ययं नाङ्गीक्रियते । तदत्र धातुना प्रधानक्रियैवोच्यते । सामर्थ्यप्राप्तास्तु संदर्शनादयः ततो भिन्ना इति क्रियाकारकभावोपपत्तिः । तद्यथा । सार्थाद्धीयते इति प्रतीयमानं सार्थस्य स्वातन्त्र्यं कर्मत्वनिमित्तं यदि वा तादर्थ्यात् प्रधानक्रियया प्राप्ताभेदानां धातुभिरभिधानेऽपि न सर्वथैव भेदतिरस्कार इत्यभेदाख्यकार्यानुमितभेदप्रतीत्या कर्मतोपपत्तिः ।। 131 ।।

यद्येवमोदनं पचतीत्यादावपि क्रियाकर्मणाभिप्रेयमाणस्य सम्प्रदानसंज्ञा स्यात् । ओदनादेः कर्मसंज्ञा तु क्रियाकर्मसु सावकाशेत्यत आह ।

क्रियाणां समुदाये तु यदैकत्वं विवक्षितम् ।

तदा कर्म क्रियायोगात् स्वाख्ययैवोपचर्यते ।। 132 ।।

(127) सन्दर्शनादिक्रियासमुदायः परस्परमङ्गाभावमनापन्नः समकक्ष्यतथा समुच्चीयमानरूपो यदैकफलत्वादभेदेन धातुनाङ्गीक्रियते तदा भेदनिबन्धनस्य क्रियाकारकभावस्याप्रतीतेरप्रतिलब्धकर्मभावया क्रियया संबध्यमानमोदनादिकर्म स्वाख्ययैव क्रियपेप्सिततमत्वनिमित्तभूतया कर्मसंज्ञयैव व्यवह्रियते, न तु सम्प्रदानसज्ञयेत्यर्थः ।

समुच्चयेनाभिधानादङ्गाङ्गिभावाभावात् क्रियायाः कर्मरूपता नास्त्यत्र पक्षे ।। 132 ।।

भेदविवक्षायां तर्हि सम्प्रदानतात्र स्यादित्याशङ्कयाह ।

भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता ।

तस्माद्गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते ।। 133 ।।

(128) लोकिकप्रयोगः प्रसिद्ध इति तमुद्दिश्यान्वाख्याने यथाप्रयोगमुपायपरिकल्पनया नियतभेदाभेदविवक्षेत्यर्थः । एवं च गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ अपि उभयविवक्षाश्रयेण सिद्धेति नार्थस्तदारंभेण । अन्यत्राभेदविवक्षानियमाद् व्यभिचारोऽतिप्रसङ्गो नास्ति ।। 133 ।।

एतदेवागमेन द्ढयति ।

विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि ।

आरंभेण न योगस्य प्रत्याख्यानं समं भवते ।। 134 ।।

(129) भेदाभेदविवक्षानियमानाश्रयणे सर्वत्र कर्मसम्प्रदानसंज्ञयोर्भावान्नियमार्थं गत्यर्थकर्मणीत्यादिसूत्रं भाष्यकारो न प्रत्याचक्षीत । प्रत्याख्याने ह्यतिप्रसङ्गः स्यात् । यदा तु विवक्षानियमश्चेतसि भाष्यकारस्य स्फरति तदारंभप्रत्याख्यानयोरविशेषं मन्यमानो युक्तं यत् प्रत्याचक्षीत । तदेवं गत्यर्थविषये विवक्षाद्वयम् । श्राद्धाय निगल्हत इत्येवमादौ तु भेदविवक्षैव ।

पचत्योदनमित्यादावभेदविवक्षैव । चेष्टायामनध्वनीत्येतत्प्रत्युदाहरणयोरपि चाभेदविवक्षैव, मनसा पाटलिपुत्रं गच्छत्यध्वानं गच्छतीति । सूत्रारंभे च स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गे

`सिद्धं त्वसंप्राप्तवचनात्' (Va.on P.2.3.12)

इत्युक्तम् । असम्प्राप्तं गमनेनासंबद्धं यत्कर्म तत्र द्वितीयाचतुर्थ्यौ वक्तव्ये । अजास्त्रियौ तु सम्प्राप्ते कर्मणीत्यतिप्रसङ्गो न भवति । एवं च विशेषसूत्रारम्भे `अध्वनश्चानपवादः' (Va on P.2.3.12)

इत्युक्तम् । अध्वनीति प्रतिषेधो न वक्तव्यः । अध्वा हि सम्प्राप्तं कर्मेह प्रतिषेद्धुमभिप्रेतः । तस्य चासम्प्राप्तवचनादेव व्युदासः सिद्धः । अत एव भाष्येऽभिहितम् ।

आस्थितप्रतिषेधो वक्तव्यः (M.Bha on P.2.3.12)

इति । आस्थितोऽध्वात्र प्रतिषेधविषयो विज्ञेयः ।। 134 ।।

(130) `अध्वन्यर्थग्रहणम्' (Va on P.2.3.12)

इति वचनादध्वपर्यायेभ्योऽपि प्रतिषेधः, पन्थानं गच्छतीत्यादौ । आस्थित आक्रान्तो गमिक्रियया अध्वा । उदाहरणम् । प्रवृत्तगमनो हि मार्ग आस्थित इत्युच्यते । अत्र येयं गमिक्रिया सा द्विरूपा भवति, आक्रान्तस्य पथो योऽतिकमणीयो भागः तत्र त्यागरूपं हीनरूपं क्रियायाः । प्राप्ये त्वासादनीये भागे संसर्गरूपं प्राप्तरूपमिति त्यागोपादानलक्षणावयवभेदात् क्रिया द्विविधा तथा च त्यागोपादानरूपाविच्छिन्नप्रवाहगमिक्रियाक्रान्तोऽध्वा क्रियाविषयभावमात्रविधीयमानकर्मसंज्ञागोचरो न तु क्रियया कर्मभूतयाऽभिसंबध्यते क्रियाभेदाभावादिति सम्प्रदानसंज्ञाभावः । ग्रामादेरेव तदुपायाप्राप्यस्यानध्वरूपस्य तद्योगः । यस्त्वनास्थितोऽध्वा तत्र द्वे एव विभक्ती भवतः । कथं चानास्थितोऽध्वा भवति । यदोत्पथेन प्राप्नोति पन्थानं पथे गच्छति, पन्थानं गच्छतीति, तदेवं सूत्रारंभे विशेषो वक्तव्यः । प्रत्याख्याने तु विवक्षानियमेनैवेष्टं सिद्धम् ।। 135 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे साधनसमुद्देशे सम्प्रदानाधिकारः ।।

---

(131) इदानीं विभक्तिविधानक्रमेण तदर्थविचारे चतुर्थ्यर्थे निर्णीते प्राप्तावसरं पंचम्यर्थमपादानं विचारयितुमाह ।

निर्दिष्टविषयं किंचिदुपात्तविषयं तथा ।

अपेक्षितक्रियं चेति त्रिधापादानमुच्यते ।। 136 ।।

अपाये साध्ये यद् ध्रुवमेकरूपमनाविष्टापायलक्षणक्रियमन्यस्मिन्नपायेनाविष्टेऽपि तत्साधनमपादानमित्यवधिविशेषापेक्षत्वात् संरब्धोदासीनोभयकर्तृकोऽपायोऽपादानस्य विषयः स निर्दिष्टः स्वशब्देनोपात्तो यस्य तदेकमपादानमू । तद्यथा`ग्रामादागच्छति', `पर्वतादवरोहति' इत्यादि । उपात्तः क्रियान्तरस्य गुणभावेन प्रधानभावेन वा यत्रापायलक्षणो विषयस्तदन्यदुपात्तविषयपादानम् । तद्यथा `वलहकात् विद्योतते', `कुसूलात् पचति', `ब्राह्मणाच्छंसी' इति । अत्र हि निःसरणांङ्गे विद्योतने नृविद्योतनाङ्गे वा निःसरणे विद्युतिर्वर्तते इति निःसरणवक्षणोऽपायो विद्योतनस्य गुणप्रधानभावेनोपात्तः । वलाहकान्निःसृत्य ज्योतिर्विद्योतते, वलाहकाद्वा विद्योतमानं निःसरतीत्यर्थः । कुसूलाददाय पचतीत्यादानाङ्गे पाके पचिः । ब्राह्मणाद् गृह्णित्वा शंसतीति ग्रहणाङ्गे शंसने शंसिर्वर्तते ।

`पंचमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानम्'

(Va. on P.6.3.2)

इत्यलुक् । तत्र वार्तिककारस्य द्वितीयार्थे पंचम्येषाभिप्रेता । यदाह

`अन्यार्थे च' (Va. on P.6.3.2)

इति । ब्राह्मणानि ग्रन्थविशेषरूपाणि यः शंसति स कथ्यते ब्राह्मणाच्छंसीति वृत्तिविषयेऽत्र द्वितीयार्थे पंचमी वक्तव्या । भाष्यकारस्तु ब्राह्मणाद् गृहीत्वा आहृत्य शंसतीत्याहरणाङ्गे शंसने शंसिर्वर्तते इति ब्रुवन्नुपात्तविषयमेतदुपादानं मन्यते । अपेक्षितक्रियं त्वपादानं यत्र सर्वथैव क्रियाशब्दस्यानुपलब्धेरश्रुता क्रियानुमीयमाना संबन्धिषु द्रव्येषु संज्ञाविशेषहेतूनां

शक्तिभेदानामाविर्भावे निमितत्वाय कलपते । तद्यथा माथुरा पाटलिपुत्रकेभ्य आढ्यतरा इति । अत्र हि प्रकर्षप्रत्यसामर्थ्यात् विभागहेतुरनुमीयमानापकर्षणक्रियापायलक्षणेत्यपेक्षितासावत्र क्रिया । उपात्तविषये तु धातुनैवापायः स्वीकृतः । अनेकार्थत्वेन धातूनाम् । वलाहको विद्योतते, चैत्रः पचति, दाशतयीः शंसति इत्यादौ विद्योतनादिमात्रवचनत्वेऽप्यन्यत्र निःसरणाद्यङ्गे वृत्तेरविरोधात्, पंचमीश्रुतिसामर्थ्याद्ध्यपायोऽत्र प्रतीयते । स च निःसरणाद्यङ्गत्वे धात्वर्थस्योपपद्यते नान्यथेति तदर्थतानिश्चयः ।। 136 ।।

कः पुनरमपायः, किं गतिमात्रं नेत्याह ।

संयोगिभेदादेभिन्नात्मा गमिरेव भ्रमिर्यथा ।

ध्रुवावधिरपायोऽपि समवेतस्तथाध्रुवे ।। 137 ।।

(132) संयोगेन साहचर्याद्विभागोऽप्यवधिः स्वीकृतः । तेन दिग्विशेषावच्छिन्नसंयोगविभागकार्यं यथा गमनमेव भ्रमणमिति व्यपदिश्यते यथा च गमनग्रहणाद् भ्रमणरेचनस्पन्दनादयो गृह्यन्ते न जात्यन्तराणीति काणादाः एवं ध्रुवमचलमनाविष्टापायमवधिर्यस्याध्रुवे चले समवेतस्यासौ संरब्धोदासीनसाधनसाध्यस्त्यागस्तदुभयकारकगतविभागलक्षणफलोऽपायाख्यो गतिविशेष एव बोद्धव्यः गन्तरि समवेतापीयं क्रियाऽवध्यपेक्षणादपायाख्यां लभत इति तत्र ध्रुवस्य क्रियासिद्धौ निमित्तत्वं कारकत्वमुपपद्यत इत्याशयः । स चापादानसंज्ञाया विषयभावेनावस्थितोऽपायो धातुनाभिधीयमानोऽनुमीयमानो वा ध्रुवमपादानसंज्ञमपाये साध्य इति तत्र निमित्तत्वं ध्रुवस्य कारकस्य । एवमपायो व्याख्यातः । ध्रुवं हि स्थिरमचलं लोके प्रसिद्धम् । ततश्च वार्तिके चोदितम् ।

`गतियुक्तेष्वपादानसंज्ञा नोपपद्यते अध्रुत्वात् ' (Va. on P.1.4.25)

इति । धावतोऽश्वात् पतितः, सार्थाद् गच्छतो हीन इत्यादौ गतियुक्तेष्वपादानसंज्ञिषु ध्रुवत्वस्य स्थिपत्वस्याचलत्वस्याभावात् संज्ञा न प्राप्नोतीत्यर्थः ।। अत्र परिहारोऽभिहितो

`न वा ध्रौव्यस्याविवक्षितत्वात्'(Va. on P.1.4.25)

इति ।। 137 ।।

एतद् व्याख्यातुमाह ।

द्रव्यत्वभावो न ध्नौव्यमिति सूत्रे प्रतीयते ।

अपायविषयं ध्रौव्यं यत्तु तावद्विवक्षितम् ।। 138 ।।

(133) ध्रुवं कूटस्थं निष्क्रियमिति द्रव्यस्वभावो ध्नौव्यं सूत्रे न प्रत्येव्यम्, अपि त्वसंतुष्टचलनोऽत्र ध्रुवशब्दः । तथा ह्यपायसाध्ये यद्ध्रुवं तेनापायेनासंस्पृष्टमित्येषोऽर्थः । एवं च कृत्वा धावतोष्श्वात्पतित इत्यत्र पातस्याश्वकर्तृकत्वाभावात्तेनानावेशे ध्रुवताश्वस्य तत्रास्त्येव । संरब्धोदासीनसाधनसाध्यो ह्यपायः । तत्राश्व उदासीनः, अपेता तु संरब्धः । ग्रामादागच्छति पथा पर्वतमिति तु पथः करणस्य पर्वतस्य कर्मणोऽपायेनानावेशाद् ध्रुवतायां सत्यामपि परत्वात् करणादिसंज्ञाभिर्बाधनादपादानसंज्ञा न भवति । तथा च वार्त्तिकम् ।

अपादानमुत्तराणि । धनुषा विध्यति, कंसपात्र्यां भुङ्क्ते, गां दोधि, धनुर्विध्यति ।

(Va on P.1.4.1)

इति । तदेवमपायविषयस्याश्रयणादश्वस्यापायेनानावेशाद्वस्तुतस्तद्विषयमध्रौव्यमभवदेवाविवक्षितमिति वार्तिकार्थः ।। 138 ।। तथा हि ।

सरणे देवदत्तस्य ध्रौव्यं पाते तु वाजिनः ।

आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते ।। 139 ।।

(134) सरणेऽश्वसमवायिन्यां वेगितायां गतौ यथा देवदत्तस्य ध्रौव्यं तेन सरणेनानावेशात् तथा देवदत्तसमवेते पाते पतनक्रियायां वाजिनः अश्वस्य तयानावेशात् ध्रौव्यमिति दृष्टान्तदार्ष्टान्तिकभावान्तर्भावेनेदमुदाहरणम् । हेतुत्वेनापायानावेशो व्यतिरेकमुखेनोमयत्रापि ध्रौव्य उपात्तः । यद्यपि चाश्वसरणे देवदत्तस्य ध्रौव्यं तथाप्यपादानसंज्ञा न भवति

`गतिर्विना त्ववधिना नापाय इति गम्यते' इति वक्ष्मयमाणत्वादवधिभावेन देवदत्तस्यानुपादानात् । तथोपादाने तु भवत्येव सरतो देवदत्ताद्धावत्यश्व इति ।

यत्र तर्हि द्वावपि सपरिस्पन्दौ तत्र कथं ध्रुवाध्रुवविभागो निश्चेय इत्याशङ्क्याह ।

उभावप्यध्रूवौ मेषौ यद्यप्युभयकर्मजे ।

विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ।। 140 ।।

(135) स्थाणोः श्येनोऽपसर्पतीत्यन्यतरकर्मजे विभागे स्फुटभेवापायेनानावेशात् त्याणौ ध्रुवता निश्चीयते । अपसर्पतो मेषान्मेषोऽपसर्पतीत्यत्राप्युभयकर्मजे विभागे यद्यप्युभावपि मेषावपायावेशादध्रुवौ तथापीतरापायेनेतरलस्यानावेशात् कर्तृभेदाद्भिन्ने एवापायलक्षणे क्रिये ।। 140 ।।

ततश्च

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।

मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ।। 141 ।।

(136) इतरेतरक्रियमेतरेतरस्यानावेशादन्यक्रियायामन्यस्य ध्रौव्यं स्वक्रियायां तु कर्तृत्वं द्वयोरपि । यदा तु परस्परमवधिभावो न विवक्ष्यते, अपि त्वेकशब्दोपादाने द्विगतेऽपि क्रिये विवक्ष्यते ।। 141 ।।

तदाह ।

अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता ।

मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः ।। 142 ।।

(137) मेषावपसर्पत इत्याख्यातपदेन कर्तृद्वयनिर्वर्त्या क्रियेक्येन प्रत्यायितेति द्वयोरपि मेषयोः क्रियावेशेन कर्तृत्वमपायेन त्वेकस्यावधित्वमित्यपादानता न भवति । एवं च कृत्वापायकर्तृत्वं मेषयोर्भवति यदान्यः पर्वतादपसर्पत इति परस्परो मेषावपसर्पत इति परस्परतो मेषवपसर्पत इति । एवं त्वभिधाने मेषान्तरक्रियापेक्षमवधित्वं द्वयोः स्वक्रियापेक्षं च कर्तृत्वंमित्युक्तम् । कर्तृभेदाद्ध्यत्र क्रियाभेदानुमानमाख्यातादेक्येनापि प्रतीयते ।। 142 ।।

यद्यन्यो विद्यतेऽवधिः तदा मेषावपायकर्तारौ नान्यथेत्येतद् भाष्यग्रान्थसंवादेनोपपादयितुमाह ।

गतिर्विना त्ववधिना नापाय इति गम्यते ।

वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम् ।। 143 ।।

(138) कारकसूत्रे संज्ञिनिर्देशः कर्तव्यतया चोदितः , साधकं कारकमिति वक्तव्यम्, अन्यथा अक्रियानिमित्तस्यापि कारकप्रसङ्गः

`अपादानं च, वृक्षस्य पर्णं पततीति' (Va. on P.1.4.23)

इत्युदाहतो वार्तिके । सवार्तिकं च भाष्यमिति भाष्य इत्याह । एतच्च गतेः सावधिकाय ्पायत्वे न लिङ्गम् । अपि त्वस्य परिहाराय

`न वाऽपायस्याविवक्षितत्वात्' (Va. on P. 1.4.23)

इति । यदुक्तमित्यनेन भाष्यप्रबन्धोऽत्र निर्दिष्टः । अयं चात्रार्थः । वृक्षसंबन्धिनः पर्णस्य पातो वाक्यार्थो विवक्षितः इति वृक्षस्यावधित्वविवक्षात्र नास्ति । तथा चापायोऽयं न भवति । अपायत्वेनावध्यपेक्षारूपेणाविवक्षितत्वादित्यत्रापादानता वृक्षस्य न भवतीति, यदि त्वपायोऽत्र विवक्ष्यते तदा वृक्षस्यावधित्वात् वृक्षात् पर्णं पततीति भवति, ततश्च न ज्ञायेत कस्य संबन्धि पर्णं कङ्कस्य वा कुरस्य वेत्युक्तम् । तस्मात्पर्णविशेषणत्वेन वृक्षस्य विवक्षितत्वाद् वृक्षमत्यजत्यपि पर्णे साखारथे भूमिं स्पृशति प्रयोगोऽयं भवत्येवेत्यपायविवक्षोक्ता । एतस्माच्चावसीयते सावधिकगतिरपायो न

शुद्धा, अन्यथावध्यविवक्षायामत्रापायसम्भवादपादानत्वं स्यादेवेति ज्ञापकमेतत् । एवं च चापायेनैवावधेराक्षेपात्तस्यैव विशेषणम् । शब्दवत् संज्ञिप्रतिपत्त्यर्थं ध्रुवग्रहणं संरब्धोदासीनोभयसाध्यतामपायस्य दर्शयितुमिति व्याख्याताम् ।। 143 ।।

गतमदः । इदमिदानीं वक्तव्यम् `अपादानमुत्तराणि' इति विप्रतिषेधः कात्यायनेनोक्तः । तथा चोक्तैः कारकैरपादानस्य

बाधितत्वात् वलाहकादि विद्योतते, वलाहके विद्योतते, वलाहको विद्योतते इति भाष्ये संज्ञासमावेशो दर्शितो विरुद्ध इत्याशङ्क्य भाष्यं समर्थयितुमाह ।

भेदाभेदौ पृथग्भावः स्थितिश्चेति विरोधिनः ।
युगपन्न विवक्ष्यन्ते सर्वे धर्मा वलाहके ।। 144 ।।

(139) धूमज्योतिः सलिलमरुतां संघातो वलाहकः, तत्रावयवस्य ज्योतिषो विद्योतनम् । तच्च ज्योतिर्यदा तस्मात् समुदायात्मनो वलाहकाद् भेदेन विवक्ष्यते तदा भेदविवक्षायां पृथग्भावेनैव वा विवक्ष्यते तत्रावस्थानेन वा । यदा पृथग्भावेन विवक्ष्यते तदा वलाहकोऽवधिः पृथग्भावलक्षणस्यापायस्येत्युपात्तविषयमिदमपादानं व्याख्यातम्-कलाहकाद् विद्योतते विद्युज्ज्योतीरूपेति वलाहकात् पृथग्भूय निःसृत्येति निःसरणाङ्गे विद्योततने धातुः । यदा तु निराधारस्य तेजसोऽवस्थानाभावाद् वलाहकोऽवस्थितिहेतुत्वादाधारभावेन विवक्ष्यते तदाधिकरणसंज्ञोऽसौ जायते `वलाहके विद्योतते' इति, वलाहके स्थित्वा प्रकाशत इत्यर्थः । अबिन्धनत्वाद्वैद्युतस्य जातवेदसो वलाहको जलपूर्णोऽप्याधारो युज्यते । एवमुदकसंभेदात् पार्थिवेन धूमेन चाविलीकाराद् वलाहकाद्भेदो नास्ति तावत्तेजसः प्रकाशकर्तृत्वाभाव इति भेदविवक्षायां शक्तिद्वयाविर्भावो वलाहके दर्शितः । पृथग्भावो स्थितौ च भिन्नविषये एव । यदा तु स्वच्छत्वाद् वलाहकद्रव्यस्य तत्रप्युदकादि तेजसः प्रकाशे प्रतिबन्धकं न भवतीत्यभेदेन वलाहकाख्यः समुदायस्तेजोऽवयववशाद्विद्योतनसमर्थो विवक्ष्यते तदात्र कर्तृशक्तिरेवोज्भृम्भते वलाहको विद्योतत इति । अवयवनिबन्धना हि समुदायमनुपतन्ति व्यपदेशाः । तद्यथा किसलयित मुपवनमिति वृक्षसमुदायस्योपवनशब्दवाच्यत्वे तदवयवानां संजातकिसलयत्वे समुदायस्तथा व्यपदेशार्हः । तदेवं विवक्षाभेदात् पर्यायेण भिन्नशक्तिर्वलाहको भाष्य उदाहृतः, न तु युपच्छक्तिविवक्षायामिति न विप्रतिषेधवचनेनास्य विरोधः कश्चित् ।। 144 ।।

यत्तु विप्रतिषेधोदाहरणं तत्र युगपदेव शत्क्योर्विवक्षेत्याह ।
धनुषा विध्यतीत्यत्र विनापायविवक्षया ।
करणत्वं यतो नास्ति तस्मात्तदुभयं सह ।। 145 ।।

(140) धनुषा विध्यतीति परत्वात्करणसंज्ञाऽपादानसंज्ञां बाधत इत्युदाहृतम् । तत्र युगपद् प्राप्तिरावश्यकेन संज्ञयोरिति तद् द्वयं साधकतमत्वमपायश्च सहैकस्मिन् द्रव्ये वर्तते । यतोऽपायविवक्षामन्तरेण साधकतमत्वं व्यधने धनुषो नास्ति । न हि दण्डेनेव धनुषा विध्यति, अपि त्वपसर्पतः शरस्यवाधिभावमुपयद्धनुर्व्यधननिमित्ततां प्रतिपद्यत इति युगपदुभयविवक्षायां भिन्नविषययोरपि शक्तयोः निमित्तनिमित्तिभावेनावस्थानादेकत्र द्रव्ये समावेशात् स्वनिमित्तसंज्ञाद्वयहेतुत्वे युगपदेकस्मात् प्रातिपदिकात् तत्कार्यविभक्तिद्वयोत्पत्त्ययोगात् एकसंज्ञाधिकारोपजनिते विरोधे परत्वात् करणसंज्ञानिमित्ता विभक्तिर्भवति । शक्त्योर्हि नास्त्यत्र विरोधः, भिन्नविषयत्वात् । शरनिःसरणे ह्यपादानं व्यधने तु करणं धनुः । आविष्यशक्ति च द्रव्यमेव संज्ञाविषय इति तदनपेक्षयैकत्र प्राप्तिः । तथा हि विभक्तिविधाने `अपादाने' `करणे' इत्यादिसंज्ञाविशेषेण द्रव्यत्वमेव विशिष्यते । एकस्यानेकसंज्ञाप्रवृत्तावपि च नास्ति विरोध इति संज्ञाकार्यविभक्तिमुखेन विरोधोऽत्र व्याख्येयः ।

एतच्चोदाहरणमुपलक्षणार्थमुपात्तमित्यन्यत्रापि विप्रतिषेधोदाहरणे युगपदविवक्षा योज्या । तथा हि `कंसपात्र्यां भुङ्क्ते' इत्यत्रान्नादनादिरूपाया भुजेः कंसपात्री धारयन्त्यन्नमत्राधारः । स चास्याधारभावस्तावन्नोपपद्यते यावदपादानता नास्ति । कंसपात्र्या ह्यन्नमुद्धृत्य भुज्यत इति भवत्यपादानम् । न हि पर्णपुटेन सहान्नमभ्यवहरतो हस्त्यादेस्तत्र भुङ्क्त इति भवत्याधारसम्प्रत्ययः । यदि च कंसपात्री न भवेदन्नादानस्यावधिस्तदा भुजिर्नैव निष्पद्येतेत्यपाथविवक्षया विनाधिकरणत्वाभावादुभयोर्युगपद्विवक्षायां संज्ञाद्वयप्रसङ्गे `अपादानमुत्तराणि' इत्यधिकरणसंज्ञया परया पूर्वाऽपादानसंज्ञा बाच्यते एव । `गां दोग्धि' इति क्षारणवचने दुहौ नान्तरीयकोऽपायः । न हि गोरनपयति पयसि क्षारणं सम्पद्यत इति ्पादानतानान्तरीयका कर्मशक्तिः गोः परत्वात् कार्यं प्रयुङ्क्ते । एवं धनुर्विध्यतीत्यपायविवक्षां विना व्यधने धनुषः स्वातन्त्र्यं नास्तीत्युभयसंनिधौ `अपादानमुत्तराणि' इति परा कर्तृसंज्ञैव भवति ।। 145 ।।

एवमत्र विषमे द्वे शक्ती अभ्युपगम्य नान्तरीयकत्वादेकत्र द्रव्ये समावेशे संज्ञाद्वयप्राप्तौ विभक्त्याख्याकार्यद्वारेण विरोधे सति

परत्वेन व्यवस्थोक्ता । सम्प्रति शक्त्यभेदमाश्रित्य संज्ञयोरभिन्नविषयोपनिपातमाह ।
एकैव सा सती शक्तिर्द्विरूपा व्यवतिष्ठते ।
निमित्तं संज्ञयोस्तत्र परया बाध्यतेऽपरा ।। 146 ।।

(141) भिन्नक्रियाविषयापि द्रव्यस्यैकैव शक्तिः, तया हि तद् द्रव्यं क्रियाद्वयं सम्पादयति, इति तत्र क्रियाद्वयविषयेऽपादानकरणसंज्ञाद्वयं लभत इत्येकत्र शक्तौसंज्ञाद्वयप्राप्तौ परया संज्ञया न परा अपरा पूर्वा संज्ञा बाध्यते विरोधाद्,एकसंज्ञाधिकारनिमित्तादित्यर्थः । शरनिःसरणेऽवधिभावो धनुषः साधकतमत्वश्क्त्यैवान्तर्भावितः । तेन वाना तदयोगादिति तावत्येकैव शक्तिर्मण्यते । परस्परनिरपेक्षस्य कार्यद्वयस्य प्रविभक्तरूपशक्तिद्वयपरिकल्पकस्याभावात् । व्यधनक्रियाया हि शरापगमनक्रियात्र गुणभूतेति पृथगात्मनि शक्त्यन्तरं नाक्षिपति । केवलमेकैव शक्तिर्गुणप्रधानभूतक्रियाद्वयविषयतया भिन्नरूपेव चकास्ति । द्रव्यमेव तर्ह्येकं क्रियाद्वयं सम्पादयत् साधनमस्तु, किं शक्तिपरिकल्पनया । नैतदुपपद्यते । अभिन्नस्वबावत्वादस्य नानाक्रियाविषयतायोगात् । शक्तिस्तु सामर्थ्यमनेककार्यमपि भवति । यथोक्तम् ---

"न शक्तीनां तथा भेदो यथा शक्तिमतां स्थितिः"

इति । यद्येवं पकूत्वौदनो भुज्यतामित्यत्राप्येकैव शक्तिरस्तु । नैतदुपपद्यते । अन्तर्भूतेनोपायेन पृथगात्मानलभमानेन स्वनिमित्तशक्तिभेदानाक्षेपादिति स्थितम् ।। 146 ।।

पूर्वं तु गुणप्रधानभावानाश्रयेण क्रियाद्वयमात्रविषयं शक्तिद्वयमुक्तम् । ततेतदपादानं

`ध्रुवमपायेऽपादानम्' (P.1.4.24)

इत्यनेनैव लक्षितं सर्वमपादानपंचमीविषयः । अपरस्तु

निर्धारणे विभक्ते यो भीत्रादीना च यो विधिः ।
उपात्तपेक्षितापायः सोऽबुधप्रतिपत्तये ।। 147 ।।

(142) "पञ्चमी विभक्ते" (P.2.3.42)

इति विभक्तिविशिष्टे निर्धारणे गम्यमाने पञ्चमीलक्षणो यो विधिरुक्तः सोऽपेक्षितापायः, अपायस्यानुमीयमानस्यापेक्षणादित्यपादानसंज्ञयैव सिद्धः । तस्य हि माथुराः पाटलिपुत्र केभ्य आढ्यतरा इत्येतदुहारणम् । अत्र निर्धारणस्य विभक्तविषयत्वादत्यन्तविभक्तताप्रतिपत्त्यर्थं विभक्तग्रहणमिति पृथग्भूता एव प्रतिपाद्यमाना एतस्य विषयः, न तु गवां कृष्णा सम्पन्नक्षीरतमेत्यादि, गोत्वेनापृथग्भावात् । तत्रात्यन्तविभागेऽपि विवक्षिते पूर्व माढ्यत्वेन बुद्ध्या साम्यमवश्यापेक्ष्यम् । तथा ह्याढयत्वेन समानेन गुणेन बुद्ध्यैकत्वमापाद्यातिशयविशिष्टाढ्यतावशात् पृथक्क्रियेत्यस्ति बुद्धिसंश्लेषपूर्वको विश्लेषोऽपायाख्य इत्यपादान इत्येव सिद्धात्र पञ्चमी । अपेक्षितक्रियं ह्येतदपादानम् । तदुक्तं भाष्ये

`यस्तैः साम्यं गतवान् स एवं प्रयुङ्क्ते' (M.Bha. on P.1.4.24)

इति । कारकाधिकारे तमब्ग्रहणादतिशयो न विवक्षित इति गौणेऽप्यत्र बौद्धेऽपायेऽपादनताविरुद्धा । तथा हि कारकव्यवहारो बुद्ध्यवस्थानिबन्धन एव सर्वः । तदुक्तं प्राक्--

बुद्ध्या समीहितैकत्वान् पञ्चालन् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदापायः प्रतीयते ।।

इति । एवं सामान्येनैव सिद्धे सूत्रारंभो बौद्धमपायमप्रतिपद्यमानं प्रति विवक्षानियमार्थम्, अपायविवक्षैवात्र कर्तव्येत्येर्थः । तथा

`भीत्रार्थानां भयहेतुः'(P. 1.4.25)

`पराजेरसोढः'(P.1.4.26)

इत्यादिश्च यो विधिरपादानसंज्ञालक्षणः सोऽयुपात्तो गुणभावेन विषयोऽपायलक्षण क्रिया येन स एवंविध इति उपात्तविषयापादानभेदोदाहरणरूपः पूर्ववदबुधबोधनार्थ एव । तथ हि वृकेभ्यो भयं चोराद् बिमेतीति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्धय पश्यति यदि मां वृकाः प्राप्नुयुर्ध्रुवमनिष्टापात इति पूर्वं बुद्ध्या वृकान् प्राप्य बुद्धयन्तरेण ततो विभागं प्रतिपद्यत

इति भयपूर्विकायां निवृत्तौ बिभेतेर्वर्तनाद् अस्त्येवापायः । एवं चौरेभ्यस्त्रायत इत्यनर्थप्रतिघातवचने त्रायतावनर्थं चोरसंसर्गं बुद्ध्या निश्चित्य ततः स्वजनमपनयति सुहृदिति संभवत्यपायः । अध्ययनात् पराजयत इत्यध्ययनाभ्यासपरिखिन्नो गुरुपर्युपासनायासभीरुः । प्राप्याध्ययनं ततो निवर्तत इत्यस्त्येवापयः । पराजयतिश्चात्र खेदपूर्वके निवर्तने वर्तते , अध्ययनात् खिन्नः सन्निवर्तत इत्यर्थः ।

पूर्वमेवाप्रवृत्तौ तु खेदो बुद्ध्या समीक्षितः ।
कष्टेन तपसा नित्यं दृष्टोपचरतो गुरून् ।।

इति येवेभ्यो गां वारयतीति यवसंप्राप्तो गवां यवविनाशकृतं प्रत्यवायमयं निवर्तयति तत इति मुख्य एवापायः कूपादन्धं वारयति, अग्नेर्माणवकं वारयतीति बुद्ध्या कूपाग्निसंप्राप्तिमनिष्टहेतुं मन्यमानोऽनुकम्पया ततो निवर्तयतीति बुद्धिसंश्लेषपूर्वकोऽपायः । उपाध्यायादन्तर्धत्त इत्युपाध्यायसमीपप्राप्तौ प्रेषणोपालंभादिदुःखं बुद्ध्या निश्चित्य ततोऽपैतीत्यपायः । उपाध्यायादधीते, आगमयतीति च ग्रन्थमादत्ते तत इत्यपायः । उपाध्यायमुखोदीरिता हि शब्दाः सन्तानेन वर्तमानः शिष्यमनुप्रवीशन्तीत्युपाध्यायादवधिस्थानीयात्तेषामपक्रमोऽवसीयते । तदुक्तं भाष्ये ।

`संततत्वात् ।' (M.Bha. on P.1.4.29)

इति । अनुपयोगे तु नटस्य शृणोतीत्यपायो न विवक्ष्यते । न हि नटाद् ग्रन्थमादत्ते, अपि तु नटसंबन्धि शृणोतीत्येतावदत्रार्थसतत्त्वम् । शृङ्गाच्छरो जायत इति ततो निःसरतीत्येवं लोकस्य प्रतिपत्तेरस्त्येवापायः । शास्त्रे च पदार्थो लौकिकः प्रविभज्यते

इत्युक्तमिति तिर्थिकपरिकल्पितप्रक्रियानादरः । तीर्थिकानां हि केषांचित् कार्यकारणयोः परिणामाश्रयेण भेद इति विभागभावः । हिमवतो गङ्गा प्रभवतीति स्रोतोरूपा गङ्गा ततः प्रसर्पतीति मुख्य एवापायः । गौणं चापायमाश्रित्य

`जुगुप्साविरामप्रमादर्थानामुपसंख्यानम्'(Va. on P.1.4.24)

प्रत्याख्यातम् । तथाहि अधर्माज्जुगुप्सते विरमतीत्यास्तिकः परत्र दुःखानुबन्धिनमधर्ममवगम्य जुगुप्सापूर्वकं ततोऽपैतीत्यस्त्यपायः । नास्तिकः पुनरिहैव क्लेशफलं धर्ममवगत्य ततः प्रमादेन निवर्तते इति प्रमाद्यतीत्युच्यत इति सर्वत्र पूर्वेणैवापादानसंज्ञायामुत्तरो विधिः प्रपंचार्यः । लक्षणप्रपंचाभ्यां हि व्याकरणम् । यथोक्तम् तत एव विधय इत्यादीति सिद्धम् ।। 147 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे साधनसमुद्देशेऽपादानाधिकारः ।

---

(143)इदानीं विभक्तिविधानुक्रमायातं षष्टयर्थं शेषलक्षणतिक्रम्य कारकविशेषप्रक्रमायातमधिकरणं सप्तम्यर्थं विचारयति ।

कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।। 148 ।।

लोकेऽधिकरणविशेषेण द्रव्यगुणक्रियाविषयमभिधीयते । शास्त्रे त्वस्मिन् कारकप्रकरणात् क्रियाक्षेपे क्रियायामेवोपकारविशेषेण धारणलक्षणेनाधिकरणसंज्ञावतिष्ठते । तत्र क्रिया कर्तरि कर्मणि वावतिष्ठत इति तयोः क्रियाधारणादधिकरणसंज्ञा वचनात् पर्यायेण स्यात् । कर्मस्थक्रियाविषया वा कर्तृसंज्ञा कर्तृस्थक्रियाविषया वा कर्मसंज्ञा स्यादिति तत्र यथायोगं कर्तृकर्मसंज्ञाबावेऽधिकरणसंज्ञा प्रसज्यत इत्याशङ्क्योक्तं `कर्तृकर्मव्यवहिताम्' इत्यादि । कटे आस्ते, स्थाल्यां पचतीति कर्तृकर्मधारणात् तत्समवेतायां क्रियायामुपकारकमधिकरणं पारम्पर्येण । असति ह्याधारे कर्तृकर्मणी क्रियोपकारं न प्रतिपद्येयातामिति तयोराधार उपकुर्वन् क्रियामपि तत्स्थामुपकरोति । कारकाधिकारे च तरतमयोगो नास्तीत्यत्र परम्परया क्रियाधारकेऽधिकरणसंज्ञाया सावकाशत्वात् साक्षात् क्रियाधारकयोः परत्वात् कर्तृकर्मसंज्ञे एव । कारकाणां च क्रियानिमित्तत्वं यथा तथापि भवदाश्रीयत इति व्यवधानेन क्रियापकारकत्वमविरुद्धम् । `व्यवहिताम्' इत्युक्तेऽपि `असाक्षात्' इति वचनं लोकानुसारेणापि पदार्थव्यवस्थायामधिकरणस्य क्रियाधारण प्रति व्यवधानपरिपोषणार्थम् । तथा हि शब्दात् प्रतीयमानोऽर्थो लौकिकः संस्कारनिमित्तमुच्यते । पृथिव्यां शेते, स्थाल्यां पच्यत इत्यादौ चाख्यातशब्दात् क्रियाविशिष्टे कर्तृकर्मणी

प्रतिपद्येते, न क्रियामात्रं ततो निकृष्टरूपमिति क्रियाश्रयधारणादेव लोकेऽधिकरणस्य क्रियोपकारः प्रतीयते न साक्षात् ।। 148 ।।

इदानीमौपश्लेषिकादिभेदेऽप्यधिकरणस्य सामान्भेतल्लक्षणमनुगतमित्याह----

उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु ।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम् ।। 149 ।।

(144) उपश्लेष आधारस्याधेयेन संबन्धः । यद्वशादसावाधारः । तस्य त्रिष्वप्यधिकरणेष्वभेदः । अन्यथा तु संयोगिन्याधारे संबन्धः, अन्यथा तु समवायिनीति संबन्धिभेदाद्भिन्नत्वेन व्यपदेशः । तथा हि कटे आस्ते देवदत्त इति संयोगिनः कटस्य सकलावयवव्याप्त्या देवदत्तोपश्लेषो न दृश्यते, अपि तु कतिपयावयवव्याप्तेत्यविशेषादौपश्लेषिक इति सामान्यसंज्ञयाधारोऽयमुच्यते । तिलेषु तैलमिति तु समवायिना तैलरसेन तिलानां समस्तावयवव्याप्त्या लोकप्रसिद्ध्या संबन्धाद् व्यापकमेतदधिकरणम् । खे शकुनय इत्यत्र त्वाकाशस्या तात्त्विकावयवाभावात् कल्पितप्रदेशतया संबन्धाद्वैषयिकमेतदधिकरणम् । अनन्यत्र भावश्चात्र विषयार्थः । एवं जले मत्स्या इत्याधारप्रदेशापेक्षया चैतदौपश्लेषिकमधिकरणम् । गुरौ वसतीति शिष्याणां गुर्वधीनायां वृत्तौ वैषयिकमधिकरणं गुरुः । उपश्लेषोऽप्यत्र बौद्धः । एवं युद्धे सन्नह्यतीति युद्धाभिसंन्धिना सन्नहनस्य तनुत्रादिबन्धनरूपस्य प्रवृत्तेः युद्धं विषयः । गङ्गायां गाव इति गङ्गाशब्दः सामीप्यात् प्रदेशवृतिरित्यौपश्वेषिकमधिकरणम् । शत्रोरभावे सुखमित्यादावभावस्य बौद्धं कारकत्वमिति प्रागेव निर्णीतम् ।। 149 ।।

के पुनरुपकारा इत्याह ।

अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता ।
दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः ।। 150 ।।

(145) अविनाशः तैलस्य तिलकृत उपकारः । तिलविनाशे हि तैलं विकीर्णं नश्येत् । पर्यङ्के शेत इति शयितुर्गुरुत्वप्रतिबन्धे स्वतन्त्रः कर्ता आधारः । अन्यथा गुरुत्वात् पतनं भवेत् । खे शकुन्तादादय इत्यादौ खेन शकुन्तादीनामधरदिशा संबन्धस्यापावर्तनमित्ययमेव तस्याधेयोपयोगः । आदिशब्दाच्छकटादिनाधारेण देशविशेषसंप्राप्तिः । गुरुणा च शिष्याणां संस्कारातिशयः पर्यङ्कादिना च सौस्थित्यमित्येवमादय उपकारः प्रतिपाद्यन्ते । प्राच्यामादित्य उदेति प्रतीच्यामस्तमेति दक्षिणस्यामगस्त्य उत्तरस्यां ध्रुव इति दिग्विशेषसंबन्धप्रतिपादनमात्रोपयोगमेतदधिकरणम् ।। 150 ।।

मूर्तानां सर्वेषामन्याधीनायां स्थितौ मूर्तस्याधारस्याप्यपरमधिकरणमिति पर्यन्तवर्ति मुख्यमधिकरणं किमित्याह ।

आकाशमेव केषांचिद्देशभेदप्रकल्पनात् ।
आधारशक्तिः प्रथमा सर्वसंयोगिनां मता ।। 151 ।।

(146) ग्रहनक्षत्रविमानादीनां तावदाकाशभेवाधिकरणं प्रसिद्धम् । येषामपि पृथिव्येकदेशो रथादीनामधिकरणं तेषामपि तस्य पृथिव्येकदेशस्याकाशाधरत्वात् पारम्पर्येणाकाशमेवाधार इति सर्वग्रहणेनाह । समवायिनां तु स्वावयवा आधारः । तत्रापि पर्यन्ते परमाणवः । तेषां चाकाशमेव देशप्रविभागकारणमाधार इति मुख्याधारशक्तिराकाशाश्रया भावानाम् । न चैवमेकदेशतया संकरः स्वावष्टब्धपरिमितदेशमुखकभाग प्रकल्पने भिन्नतयाकाशं देशभावं प्रतिपद्यते यतः । तदुक्तम् `देशभेदप्रकल्पनात्' इति । संयोगिनां देशतया व्यवह्रियमाणस्याकाशभेदस्य तैरेव संयोगिभिरव्यापकैः परिकल्पनादाकाशं सर्वेषामसङ्करेणाधिकरणमित्यर्थः । `केषांचित्' इति, ये ह्याकाशमभ्युपयन्ति संसर्हवादिनस्तेषां मत इत्यर्थः । तत्रैतत् स्यात्,किमिदमनध्यक्षमामाणमाकाशं नाम । शब्देन गुणेन गुणी सोऽनुमीयत इति चेदाकाशगुणत्वस्यैवासिद्धेः शब्दस्यानन्वय्येतत् । न स्पर्शवद्विशेषगुणः शब्दः । अयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेरित्यादिहेतूपन्यासो वायं रूपादीनामपि ।। 151।।

सत्यप्याश्रये निमित्तान्तरात् परिवृत्तिदर्शनादाकाशस्य च द्रव्यत्वासिद्धौ शब्दाश्रयत्वस्य विवादास्पदत्वाद् यावद्द्रव्यभावित्वं शब्देऽसिद्धं कर्णशष्कुल्यवच्छिन्नाकाशदेश

एवोपलब्धेश्चाश्रयादन्यत्रोपलभ्यमानत्वमसिद्धम्, समानेन्द्रियग्राह्यक्षणिकानेकविशेषगुणोयोगित्वमपि स्पर्शवतां

स्वकृतान्तनियतमित्याशङ्क्याशसद्भावे लोके प्रसिद्धं लिङ्गमाह ।
इदमत्रेति भावानामभावान्न प्रकल्पते ।
व्यपदेशस्तमाकाशनिमित्तं संप्रचक्षते ।। 152 ।।

(147) इहाधारशक्तिरेवान्यथानुपपत्तेराकाशसद्भावं गमयति । तथा हि शब्दप्रमाणाकानां शब्दार्थोऽर्थः । अस्ति चायं शब्दः-- इदं नक्षत्रमत्र तिष्ठतीति । अत्र इति यन्निर्दिष्टं तत्किचन वस्तु भवत् पृथिव्यादेरन्यत्वादाकाशाख्यामवलंबते । न चावस्त्वेतत्, सर्वसामर्थ्यविरहलक्षणादवस्तुन एवंविधव्यपदेशाभावात् । निरूप्य हि व्यपदेशो निरूपणा च वस्तुनिबन्धना, शाब्दे व्यवहारे निरूपितस्यैव वस्तुत्वात् । अत एव शत्रोपभावे सुखमित्यादौ निरूप्यमाणस्याभावस्याधाराभाव इत्यस्ति लोकप्रसिद्धव्यवहारनिमित्तमाकाशमादारभावपन्नम् । पदार्थानां परमार्थविचारे तु सर्वं प्रपंचरूपमसत्, अद्वयस्यैव सत्वात्, इत्यविचारितरमणीयलौकिकपदार्थाश्रया लक्षणप्रवृत्तिरेव विरुद्धेत्याशयः ।। 152 ।।
आकाशस्य सर्वभावाधारत्वं यदुक्तं तत् सिद्धस्वभावविषयं साध्यस्वभावविषयं तु कालस्याधारत्वमित्याह ।
कालात् क्रिया विभज्यन्ते आकाशात् सर्वमूर्तयः ।
एतावांश्चैव भेदोऽयमभेदोपनिबन्धनः ।। 153 ।।

(148) `प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते' इति वक्ष्यमाणनयेन जन्मस्थितिनिरोधप्रविभागेन भावेषुपकुर्वन् कालः क्रियास्वाधारभावोपगमनेन प्रविभागमवस्थापयति । आकाशं त्वसर्वगतद्रव्यपरिमाणपदार्थसंयोगाहितप्रविभागमसङ्करेणाधारभावमुपयन्नियतदेशतया पदार्थव्यक्तीर्विभजते । मूर्तिक्रियाविवर्त्तरूपं चेदं विश्वं भेदावभासबहुलं लभ्यते व्यवहारे यथायथमाद्यायां दशायामभिन्नमपीत्येतदपेक्षया कालाकाशाख्याभेदनिमित्तः । कालाकाशाख्योऽभेद उपनिबन्धनं निमित्तमस्य मूर्तिक्रियाविवर्त्तस्यैत्यर्थः । दिक्शक्तिनिमित्तोऽपि हि मूर्तिभेदः पूर्वापरदेशात्मकत्वादाकाशाधारप्रविभागेन निष्ठामुपैति । कालाकाशयोरपि च भेदः शक्तित्वादत्यन्ताभिन्नपरब्रह्मनिमित्तः तस्माद्धि ते शक्ती पृथक्क्रियेते इत्युपपादितं प्रथमकाण्डे ।
`उपान्वध्याङ्वसः' (P.1.4.48)
इत्युपादिपूर्वस्य वसतेराधारः कर्मसंज्ञः उक्तः । तत्र वार्तिककारः प्राह ।
`वसेरश्यर्थस्य प्रतिषेधः ।' (Va.on P.1.4.48)
इति । ग्राम उपवसतीति । यथा तिष्ठतिर्गतिनिवृत्तिविशिष्टमवस्थानमाह एवं भोजननिवृत्तिविशिष्टं वासमुपवसिरिति वार्तिककारो मन्यते । तथा चोपवसेस्तिष्ठतिवद् ग्रामेणास्ति संबन्ध इति प्राप्ता कर्मसंज्ञा निवर्त्यते । विवक्षानियमश्चानेन वार्तिकेनावेद्यते । नात्र ग्रामादेरीप्सिततमत्वेन विवक्षा, अपि त्वाधारभावेनेत्यर्थः । भाष्ये तु प्रत्याख्यातमेतद्वार्तिकम् ।
"नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम् । कस्य तर्हि ? अनुपसर्गस्य । ग्रामेऽसौ वसंस्त्रिरात्रमुपवसतीति ।" (M.Bha.on Va on P.1.4.48)
तत्रायमाशयो भाष्यकारस्य । इह कालषिशेषावच्छिन्ना भुजिनिवृत्तिरुपवसेरर्थः । तत्र कालविशेषोऽन्तरङ्गः, प्राकृतमेव कर्म । अभुञ्जानस्य त्ववस्थानं निरधिकरणस्य नोपपद्यते, इत्याधारोऽपेक्षितो नियतः । स चोपपूर्वस्य वसेर्न संबन्धीत्यप्रसक्तैव कर्मसंज्ञा ।। 153 ।।
न ह्येवमपि यदा कालवद्देशोऽपि नियतोऽपेक्ष्यते तीर्थे उपवसतीत्यादौ तदा स्त्येवोपवसेर्देशेन संबन्ध इति स्यात् कर्मसंज्ञेत्याशङ्क्य भाष्यं समर्थयितुमाह ।
यद्यप्युपवसिर्देशविशेषमनुरुध्यते ।
शब्दप्रवृत्तिधर्मात्तु कालमेवावलंबते ।। 154 ।।

(149) तीर्थादिदेशविशेषमवलंब्य भोजनादिनिवृत्तावभिसंहितायां देशविशेषेणापि संबन्धो यद्यप्युपपूर्वस्य वसेरस्ति तथापि नासौ शब्दसामर्थ्योपनिपतितो देशसबन्धः । भोजननिवृत्तिमात्रं ह्युपवासार्थः । स चानियतकालो नोपपद्यत इति कालविशेषोऽन्तकङ्गो गर्भीकृतः शाब्द एव शब्दस्य प्रवृत्तिरभिधानव्यापारः, तस्या धर्मः स्वभावः, शब्दशक्तिरिति यावत् ।

देशस्तु देवदत्तसत्ताय निराधाराया अनुपपत्तेरभिसंहितोऽपि तीर्थादिः शब्दार्थे नान्तर्भवति, भोजननिवृत्त्या देशस्य संबन्धाभावात् । तत्र त्वङ्गभूतो यो वासस्तेनैव देशस्याभिसंबन्धः । तथा चाङ्गभूतवसतिक्रियाद्वारेणोपवासेऽधिकरणता देशः प्रतिपद्यते । साक्षात् कालेनैव तु तथा योगः । भोजननिवृत्तेर्नियतकालत्वात् कालव्यवधिना भोजरूपत्वात् तस्यां तदङ्गस्तु वासो नियतदेश इति तद्द्वारेणात्र देशेऽधिकरणम् । अत एव भाष्ये

`ग्रामे वंसस्त्रिरात्रमुपवसति' (M.Bha on P.1.4.48)

इति उपवासाङ्गस्य वासस्य ग्रामेण संबन्धो दर्शितो न तूपवासस्यैव साक्षात् । सा चात्र वसतिक्रियाङ्गभूतत्वादाक्षिप्तैवेति तद्द्वारेणेष्यते क्रियाकारकसंबन्धः । वसत्यङ्गा हि भोजननिवृत्तिर्नियतकाला उपवसेरर्थः । अतश्च ग्राम

उपधसतीत्युक्तेऽङ्गभूतवसिक्रियापेक्षा देशस्याधिकरणता ।। 154 ।।

प्रधानभूतभोजननिवृत्त्यपेक्षा च कालस्याप्रयुज्यमानस्यापि कर्मता प्रतीयत इत्याह ।

वसतावप्रयुक्तेऽपि देशोऽधिकरणं ततः ।

अप्रयुक्तं त्रिरात्रादि कर्म चोपवसौ स्मृतम् ।। 155 ।।

(150) भाष्य इति शेषः । श्रूयमाणोपवासक्रियासंबन्धानर्हत्वाद् ग्रामादिः सामर्थ्यप्राप्तायामप्रयुज्यमानामपि वसतिक्रियायामधिकरणम् । साधनं ह्यश्रूयमाणामपि योग्यां क्रियामाक्षिपति । तद्यथा प्रविश पिण्डीमिति भक्षिक्रियां कर्मं । अत्र च विशेषप्रतिपत्तिनिबन्धनाबावादव्यभिचरितसंबन्धा सामान्यरूपेण सत्ता प्रतीयते । यस्य च ग्रामाधिकरणा सत्ता ग्रामेऽसौ वसतीति वासं प्रत्यधिकरणं ग्रामादिर्देशोऽवतिष्ठते । श्रूयमाणाया तूपवसतिक्रियायां काल एवान्तरङ्गोऽधिकरणमित्यप्रयुज्यमानमर्यतद्योग्यत्वादाक्षिप्यते प्रवेशनक्रिययेव गृहम् । तत्र च साक्षादुपवसत्याधारे कृतार्था कर्मसंज्ञाङ्गभूतवसतिक्रियाद्वारायातमाधारं ग्रामादिदेशलक्षणं नावगाहते, प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययात् कारकाधिकारे च तमब्ग्रहणात् साक्षात्कारकशक्तीनां प्रकर्षो नाद्रियते, न तु क्रियासंबन्धनिमित्तान्तरङ्गबहिरङ्गभावानादरोऽन्यथा स्वव्यापारे स्वातन्त्र्यात् कर्मणः कर्तृसंज्ञा स्यात् । कर्मसंज्ञायाः सन्दर्शनादिभिरीप्सिततमायां क्रियायां तदा कर्मसंज्ञा देशेऽपि चरितार्था ग्राममुपवसति, अधितिष्ठतीत्यर्थः । अतश्च भोजननिवृत्त्यर्थतायामुपवसेः साक्षात्काल आधारः कर्मसंज्ञः, देशस्त्वभिसंहितोऽप्यङ्गभूतवसिद्वारेणैवाधारो न साक्षादिति स्थितम् । यस्तु निवृत्तिरूपत्वादुपवसेराधारेणासंबन्ध इति व्याचष्टे तस्य कालेनाप्याधारेणासंबन्धोऽत्र ,स्यात् । अस्ति च गतिनिवृत्तिवचनस्यपि तिष्ठतेराधारेण संबन्धः । सर्वव्यापारोपरमलक्षणस्य ग्रामे आस्ते इति निवृत्तेः क्रियान्तरमपार्तयन्त्याः क्रियात्वमविरुद्धभेव । कारकाणां हि प्रवृत्तिविशेषः फलानुमेयः क्रिया । स चात्र नियतकालभोजननिवृत्तिरूपः स्फुट एव । न चापि संकल्पविशेष एव मानसो व्यापारो निवृत्तिः । सन्दर्शनादीनां प्रधानक्रियया सह भेदाभावाद् युद्धाय संनह्यते इत्यादावेव भेदविवेक्षेत्युक्तम् । तथा चात्र संकल्पपूर्वकः कर्तृव्यापारो नियतकालव्यवधिना भोजनादिरूपो धातोरुपवसेरर्थः । क्रियात्मेत्यस्याधारसंबन्धे सत्यपि साक्षाद्देषलक्षणे नाधारेण संबन्धोऽङ्गभूतवसतिक्रियाद्वारेणायोगादिति नान्तरीयककालाख्याधारसंबन्ध एव कर्मसंज्ञाविधिरिति सिद्धम् ।। 155 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे साधनसमुद्देशेऽधिकरणाधिकारः ।।

---

(151) इदानीं षष्ठ्यर्थः सप्तमः कारकभेदो विचार्यते । स च शेषलक्षणः संबन्धः । तस्य कथं कारकभेदत्वं कथं च शेषत्वमित्येतदुपपादयितुमाह ।

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।

श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ।। 156 ।।

कारकेभ्योऽन्यः कर्मादिविशेषलक्षणेभ्यः षड्भ्योऽन्यो यः संबन्धः स शेष इत्युपयुक्तेतरवचनशेषशब्दाश्रयेण ।

"कारकणामविवक्षा शेषः" (M.Bha.on P.2.3.50)

इति भाष्यं व्याख्यातम् । `क्रियाकारकपूर्वकः' इत्यनेन कारकत्वं व्याचष्टे शेषस्य । तथा हि-राज्ञः पुरुषो वृक्षस्य शाखा पशोः पादः पितुः पुत्र इत्यादावश्रूयमाण क्रियाविषये स्वस्वामिभावावयवावयविभावजन्यजनकभावादौ संबन्धे

ददातिस्थितिजन्यादिक्रियाप्रभाविते पूर्वभाविकारकत्वमुत्तरावस्थायामप्यनुगतमिति भवत्येव शेषः कारकम् । राजा हि पुरुषाय ददाति यतस्ततो राज्ञः पुरुष इति स्वस्वामिभावोऽवतिष्ठति । तत्र क्रियाकारकसंबन्धः कारणभूतः शेषसंबन्धस्तु फलभूतः । क्रियाकारकसंबन्धो हि वृत्तः स्वाश्रये शेषसंबन्धं फलं निवेश्योपरमते । तत्र पूर्वं कर्तृसंप्रदानरूपौ राजपुरुषाभूताम् । शेषसंबन्धकाले तु कर्त्रादिविशेषरूपतानवगम इति तच्छेषभूतं सामान्यं कारकत्वमवतिष्ठते । करणादिसाधनभेदोपाख्यानिमित्ताभावात् । कारकेभ्योऽन्यः कारकाणामविवक्षा शेषः । कारकपूर्वक इत्यत्र च कारकत्वैकार्थसमवायिनः करणादयः साधनभेदाः कारकशब्देनोच्यन्ते, न तु कारकसामान्यमपि । द्रव्याणां हि सिद्धस्वभावानामयः शलाकाकल्पनानां परस्परसंबन्धाभावात् क्रियाकृत एव सः । क्रिया हि निःश्रयणीव द्रव्याण्युपश्लेषयति । तथा च भाष्यम्---

"प्रातिपदिकार्थानां क्रियाकृता विशेषा उद्भवन्ति कर्म करणमित्यादि"

(cf M.Bha.on P.2.3.50)

तत्र कर्मादिरूपव्यिरेकेणान्यस्य विशेषस्यादृष्टः शेषाख्यः संबन्धः कर्मादिरूपोऽवतिष्ठमानोऽनुभूतकर्मादिविशेषे स्वाधारे पदमुपनिबध्नन्नविविक्षितकर्मादिभेदरूपमात्मानमुद्दर्शयति । ततश्च राजपुरुषयोर्वर्तमाने दातृत्वसम्प्रदानत्वे एव फलावस्थायामनुद्रिक्तस्वस्वरूपे सामान्यरूपेण संबन्ध इति व्यपदेशमर्हतः । तथा चानुल्लिङ्गितविशेषरूपा सप्तमीयं कारकयोनिः परिगण्यते, शब्दार्थसम्प्रत्ययभेदात् । अन्यो हि सम्प्रत्ययो राजा पुरुषाय ददातीति । न ह्यस्मान्नियमेन स्वस्वामिभावनिमित्तं दानं प्रतीयते । करणादिनापि निमित्तेन दानसंभवात् । अन्यस्तु राज्ञः पुरुष इति, स्वस्लामिभावावगमात् । अतश्च प्रतीतिभेदादन्यत्वे सिद्धे कर्मादिविशेषेणेव शेषाख्येनाप्यनेन प्रातिपदिकार्थो भिद्यमानोऽभिधीयते । तदयमश्रूयमाणक्रियाविषयः संबन्धः स्वस्वामिभावादिनिमित्तानां दानादिक्रियाणामश्रुतेः । संबन्धलक्षणकार्यान्यथानुपपत्त्यानुमीयमानाश्च दानादिक्रियाः संनिहिता एवेति तन्मुखेन समन्वयोपपत्तिः संबन्धिनोः फलस्यापि च संबन्धस्य क्रियानिमित्तत्वं कारकत्वनिबन्धनमस्त्येव कर्मण इवेति सर्वमुपपद्यते । ग्रामस्य समीपादागच्छति, वृक्षस्य पर्णं पतति, इत्यादावप्यस्त्येव समीपसमीपिभावादौ संबन्धे क्रियाकारकपूर्वकत्वम् । समीपस्य हि ग्राम आश्रयः एवं पर्णस्य वृक्ष इति । अयमेव सर्वत्र न्यायः । आगमनादिक्रियां प्रति तु ग्रामादेरकारकत्वमुच्यते । श्रूयमाणक्रियाविषयस्तु संबन्धः कारकभेद एव, अविवक्षितकर्मादिविशेषः संबन्धसामान्यस्वभावः क्रियाकारकसंबन्ध एव स इति न तत्पूर्वकः । तद्यथा नटस्य शृणोतीत्यादि । करणादिसंज्ञानामत्र निमित्ताभावादप्रवृत्तेः । दुह्यादिपरिगणनाच्चाकथितकर्मत्वाभावात् । कारकेभ्योऽन्योऽयं शेषः कारक एव । तथा चोपयोगग्रहणमर्थवदित्युक्तम् । एवं मातुः स्मरति, न माषाणामश्नीयात्, सर्पिषो जानीत इत्यादौ कर्मादिकराकभेद एवाविवक्षिततद्रूपः शेष इत्युक्तम् । अत्र च शेषे षष्ठीविभक्तिरुक्ता । संबन्धस्य द्विष्ठत्वाच्च द्वाभ्यामपि संबन्धिभ्यां षष्ठीप्रसङ्ग इति चोदितम्---

"षष्ठी शेष इति चेद्विशेष्ये प्रतिषेधः (Va on P.2.3.50)

इति । राज्ञः पुरुष इति पुरुषशब्दादपि षष्ठीप्रसङ्गे प्रतिषेधः कार्य इत्यर्थः । संबन्धस्य चोद्भूतत्वात् प्रथमा विशेष्यान्न प्राप्नोतीति सापि विधेयेत्युक्तम्---

"तत्र प्रथमाविधिः"(Va on P.2.3.50)

इति । अत्रोभयत्रापि परिहाराय

"उक्तं पूर्वेण" (M.Bha. on the above two vartikas)

इत्यभिहितम् । प्रातिपदिकार्यसूत्रे

"पटसामानादिकरण्य उपसंख्यानमधिकत्वात् "(Va on P.2.3.46)

इति चोदिते

"न वा वाक्यार्थत्वात् (Va on P.2.3.46)

इत्युक्तम् । तदेवात्रातिदेसायानूदितम् । राज्ञ इत्येतत्पदसमन्यवयवशेन पुरुषस्य संबन्धित्वमवगम्यत इति वाक्यार्थोऽत्र

संबन्धोऽन्तरङ्गे पदार्थमात्राश्रये संस्कारे निमित्तं न भवति, बहिरङ्गत्वादिति वीरः पुरुषो नीवमुत्पलमित्यादिवदत्र षष्ठ्यभावः प्रथमा च सिद्धेत्यर्थः । यद्येवं राजशब्दादपि वीरादिशब्दादिवानेन न्यायेन षष्ठी न स्यात् । प्रथमा च स्यात् । नैतदस्ति विशेष्यगतस्यैवाधिक्यस्य वाक्यार्थत्वात् । तद्धि प्रधानं प्रथममजहत्स्वरूपमेवोपकार्यतामपेक्षिते गुणे समापद्यत इति तस्यैवाधिक्यं वाक्यार्थः कथ्यते । गुणस्य तु प्रधानोपकाराय प्रवर्तमानस्य स्वात्मप्रतिष्ठत्वोपकारकत्वासंभवादुपक्रम एव प्रधानोपयोगक्षमं संबन्धिसामान्यापेक्षया रूपान्तरं विपरिवर्तते । तदुक्तं भाष्ये---

"अर्थरूपमेवैतदेवंजातीयकम्"...(M.Bha on P.2.3.50)

इति । तथा च गुणाच्छेषषष्ठी न्याय्या । समानाधिकरणं तु विशेषणं नीलादि प्रधानेनोत्पलादिना सहैकात्म्यमिबापद्यमानं न व्यतिरेकं भजत इति न तत्र षष्ठी भवति ।। 146 ।।

एतद्वस्तुसतत्त्वं प्रतिपादयति---

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानः सन् प्रधानेऽप्युपभुज्यते ।। 157 ।।

(152) द्विष्ठः एकः संबन्धः । तत्र चैकैव षष्ठी न्याय्या । षष्ठीद्वये संबन्धद्वयं प्रतीयेत । सा चैकैव षष्ठी भवन्ती गुणादेव भवति न प्रधानात् । यस्मादसौ संबन्धो द्वयोरपि संबन्धिनोः स्थितः, तयोर्गुणप्रधानभावेनैकवाक्यत्वात्, प्रधानानुरोधित्वाद् गुणानामेव रूपपरिवर्तनस्यौचित्यात् तत्रैव फलतीति गुणादेव संबन्धकार्या षष्ठी न्याय्या । तथा हि गुणेषु व्यतिरेकमाधिक्यं दर्शयति संबन्धः । प्रधानं तु स्वरूपादप्रच्यवमानमेव संबन्धमनुभवति । एवं हि तस्य प्राधान्यं भवति यदि गुणानुरोधेन रूपपरिवर्तनं नासादयति । गुणाश्रयतया च संबन्धस्याभिधाने षष्ठ्या प्रधानगतमपि रूपमुपभुक्तं स्पृष्टमेवाभिहितमेवेत्यर्थः । एतत्तदुच्यते प्रधानगतस्याधिक्यस्य वाक्यार्थत्वं गुणसंबन्धेन प्रतीतेः । परस्परसाकाङ्क्षस्य पदसमूहस्य वाक्यत्वात् । राज्ञ इति हि स्वामित्वमवगम्यमानमन्यतानुपपत्त्या पुरुषेऽपि स्वत्वलक्षणमतिरेकमावेदयते । तथा च पुरुषादन्तरङ्गात् प्रथमैव भवतीति बहिरङ्गस्य संबन्धस्य पदान्तरसमन्वयान्यथानुपपत्त्यैव गमितत्वात् प्रातिपदिकार्थ एवाधिकास्याननुप्रवेशात् । यदा तु विशेषणविशेष्यभावे कामचारात् पुरुषस्य राजेत्युच्यते तदा गुणात् पुरुषादेव षष्ठीति न व्यभिचरति लक्षणम् ।। 157 ।।

उक्तमिदं क्रियाकारकपूर्वकः संबन्ध इति । तत्र क्रियाकारकसंबन्धोऽस्य निमित्तम् , स च फलभूतात् संबन्धादनुमीयमानो न विशेषेणानुमातुं पार्येत, अपि तु सामान्येन, एवंस्वभावत्वादनुमानस्येति कुतोऽयं विशेषावसाय इत्याह---

निमित्तनियमः शब्दात् संबन्धस्य न गृह्यते ।
कर्मप्रवचनीयैस्तु स विशेषेऽवरुध्यते ।। 158 ।।

(153) पितुः पुत्रः, पशोः पाद इत्यादौ संबन्धिस्वरूपविशेषावधारणादेव नियतस्थितिजननादिक्रियाप्रभावितत्वं संबन्धस्य प्रतीयते । राजपुरुष इत्यादौ तु याञ्चाविनिमयापहारप्रभृतिभिरपि स्वस्वामिभावस्य संभवादाद्यद्यपि नियमनिमित्तत्त्वं नावधार्यते तथापि दानादीनामन्यतमाविनाभावात् क्रियानुमीयत एव संबन्धिस्वरूपादिति नायं कर्मप्रवचनीयविषयः । क्वचित्तु शब्दसामर्थ्यान्निमित्तविशेषो नावधार्यते । निमित्तसामान्यावधारणं तु । सोऽयमेवंविधो विषयः कर्मप्रवचनीयानाम् । तैरन्वादिभिर्निमित्तनियमेनावच्छिद्यते संबन्धथः । तथा हि शाकल्यस्य संहितामनु प्रावर्षदित्यत्र संहिताप्रवर्षणयोर्हेतुहेतुमद्भावो निशमयतिक्रियाजनित इत्यनुनावेद्यते । तथा क्रिययास्यान्यत्रानुनिशम्येत्यादौ साहचर्योपलब्धेः कर्म प्रोक्तवन्त इति च कर्मप्रवचनीयेषत्तिक्रान्तक्रियाप्रकाशनाङ्गीकारात् संप्रति क्रियामयं न द्योतयति । क्रियापदस्य चाश्रुतेः द्योत्याभिधायकाभावे तन्निष्ठद्योतकत्वाभावात् । स्वरूपेण तु संबन्धो विभक्त्यैव प्रतिपाद्यते इति नापि तद्वाचकः । क्रियापदाक्षेपे तु नास्य सामर्थ्यम्,कारकविभक्त्यभावादिति संबन्धविशेषावद्योतकत्वं स्थापितं कर्मप्रवचनीयानाम् । तदुक्तमनन्तरकाण्डे

"क्रियाया द्योतको नायं न संबन्धस्य वाचकः ।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ।।

इति । एवमपि "अधि ब्रह्मदत्ते पञ्चालाः" इति परिपालनादिक्रियानिमित्तत्वं स्वस्वामिभावस्याधिनावेद्यते । "अभिमन्युरर्जुनतः प्रति" इति परपराजयनादिक्रियाकृतोऽनुकार्यानुकरणभावोऽर्जुनाभिमन्यवोः संबन्ध इति प्रतिना प्रकाश्यते । एवमन्यत्रापि

यथायोगमनुगन्तव्यम् । तदयमश्रुतक्रियाविषये संबन्धे कर्मप्रवचनीयानां महिमा । श्रुतक्रियाविषये तु श्रूयमाणैव क्रिया नियतं निमित्तमवधार्यत इति ।। 158 ।।

तत्र त्विदं विचार्यते । शेष इत्येवं सिद्धायां षष्ठ्यां `अधीगर्थ' इत्यादिना पुनर्विधानं किमर्थम् । `कर्मणि शेषे' इति च सामानाधिकरण्येन विशेषणानुपपत्तिः (कर्मत्वविवक्षायां हि न शेषः, कारकाणामविवक्षा शेष इत्युक्तेः । फलभूतशेषविवक्षायां च तिरोहितत्वात् कर्मत्वस्येत्याशङ्क्याह---

साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ।। 159 ।।

(154) कर्मादीनि साधनानि शेषस्य व्यपदेशार्थान्यत्रोपादीयन्ते न तु स्वार्थम् । शेषे षष्ठी । कस्मिन् शेषे । कर्मणि करण इति वा भूतावस्थागतकर्मत्वादिरूपाश्रयेण शेषस्य विशेषणात् कर्माद्येकार्थसमवायिनि फलभूते शेष इत्यर्थोऽवतिष्ठते । तथा च विशेषणोपपत्तिः । षष्ठी तु सिद्धापि प्रतिपदमधीगर्थेत्यादिना नियतविषयतया विधीयते, पुनर्विधानेन समासो यथा निवर्त्येतेति । पुनः श्रुतिर्हि नियमार्था । तथा च षष्ठ्येव भवतीति वाक्यार्थः । नियमे चान्यनिवृत्तिः प्रधानम्, अन्यश्च प्रतियोगी व्यवच्छेद्यः । स चात्र षष्ठ्याभावः स च समासे भवतीति सामर्थ्यात् समासनिषेधोऽयमवतिष्ठते । तदेतदुक्तम् प्रतिपदविधाना षष्ठी न समस्यते इति । सूत्रव्यापार एवानेन वार्तिकेन नापूर्वोऽर्थः । क्व पुनरयं समासप्रतिषेधः । यत्र समासस्य प्राप्तिः । क्व च प्राप्तिः । सुबन्तेषु मातुः स्मृतमिति ।। 159 ।।

तथा ह्यत्र ।

निष्ठायां कर्मविषया षष्ठी न प्रतिषिध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ।। 160 ।।

(155) कृद्योग च षष्ठी समस्यत इत्युक्तम् । तथा च

"कर्तृकर्मणोः कृति"(P.2.3.69)

इति या षष्ठी तत्र भवत्येव समासः `धर्मानुस्मरणम्, अर्थानुस्मरणम्' इत्यादौ । न ह्येष षष्ठ्या नियमः `कर्तृकर्मणोः कृति' इति पुनः कर्मग्रहणाच्छेषग्रहणस्य निवृत्तेरित्यपूर्वविधानमिदम् । तेन षष्ठ्येवेति षष्ठीनियमद्वारेण समासप्रतिषेधमावेदयते । मातुः स्मृतमित्यादौ निष्ठाप्रयोगे

"न लोकाव्यय".....(P.2.3.69)

इत्यादिना `कर्तृकर्मणोः कृति' इतीयं षष्ठी निषिद्धेति

"अधीगर्थदयेशां कर्मणि"(P.2.3.52)

इत्यनेनैव कर्मणि शेषत्वेन विवक्षिते षष्ठीति सामान्येन सिद्धायां पुनर्विधानात् समासप्रतिषेधार्था विज्ञायते । ननु च

"क्तस्य च वर्तमाने" (P.2.3.67)

"नपुसके भाव उपसंख्यानम्" (Va on P.2.3.67)

इत्यनेनात्र षष्ठी । नैतत् ।

"शेषविज्ञानात् सिद्धम्" (Va on P.2.3.67)

इत्यस्य प्रत्याख्यानात् शेषषष्ठयेवेयम् । पुनर्विधानेन समासाभावं ज्ञापयति । एवमपि मातुः स्मृतमिति प्रयोगानुपपत्तिः । स्मरतेः सकर्मकत्वात् कर्मणि निष्ठाप्रसङ्गान्मातृसामानाधिकरण्यान्माता स्मृतेति स्यात् । संबन्ध्यन्तरापेक्षायां तु मातुः स्मृताया इति प्रयोगो न्याय्यः । सत्यमेतत् ।

"कर्मादिष्वकर्मकवद्वचनम्"

इति तूक्तम् । तथा चात्राकर्मकवद्भावे क्तप्रत्ययान्तेन कर्मणाभिधानाच्छेषविवक्षायां तत्र षष्ठी पुनर्विधीयमाना समासप्रतिषेधस्य सम्पद्यत इति स्थितमेतत् । एवं

"ज्ञोऽविदर्थस्य करणे"(P.2.3.51)
इत्यादौ प्रतिपदविधाने सर्पिषो ज्ञानं मधुनो ज्ञानमित्यादिः समासप्रतिषेध उदाहार्यः । ननु चात्र समासे कृते संबन्धमात्रं प्रतीयते, न तु करणपूर्वकः संबन्ध इति विग्रहवाक्यार्थाभिधाने सामर्थ्याभावादत्र समासो न भविष्यतीति किमनेन यत्नेन । नैतदस्ति । वाक्येऽपि न शाब्दः संबन्धविशेषावसायः, सादृश्यात् । तथा हि कर्मषष्ठ्यामपीदृशमेव वाक्यम् । तत्र यथार्थप्रकरणादिना जानातेर्विदर्थत्वसंप्रत्यये कर्मषष्ठ्या भवति समासः तत्त्वज्ञानं वर्णज्ञानमित्यादौ । तथा च सर्पिषो जानामीत्यत्रापि प्रकरणादेरविदर्थत्वसंप्रत्यये करणषष्ठ्या अपि भवेत् समास इति शेषग्रहणानुवृत्त्याऽत्रापि पुनर्विधानमाश्रित्य परिहरणीयः स इति स्थितम् । विभक्तिविधानस्य स्वादिविधिनैकवाक्यत्वेऽप्यवयववाक्यानां स्वव्यापारस्य निवृत्तेः प्रतिपदविधानत्वे न काचिदनुपपत्तिः ।। 160 ।।

द्विष्ठः संबन्धो गुणेषु व्यतिरिच्यत इत्युक्तम् । गुणप्रधानभावस्य चैकत्र विरोधात् भाष्य उक्तम्---
"न तर्हीदानीमिदं भवति राज्ञः पुरुषस्येति'(M.Bha on P.2.3.51) इति । तत्र प्रतिसमाधानमुक्तम् ---
"भवति बाह्यमर्थमपेक्ष्य " (M.Bha on P.2.3.51)
इति । एतद्भाष्यं व्याचष्टे ।
अन्येन व्यपदिष्टस्य यस्यान्यत्रोपजायते ।
व्यतिरेकः स धर्मौ द्वौ लभते विषयान्तरे ।। 161 ।।

(156) राज्ञः पुरुषस्य कम्बल इत्यादौ राज्ञा विशेषणेन व्यपदिष्टस्य विशेष्यतया ज्ञापितस्य पुरुषस्य प्रधानभूतस्य अन्यत्र कम्बलादौ प्रतियोगिनि प्रधाने व्यतिरेक आधिक्यं संबन्धो जायते इति स भिन्निविषयौ गुणप्रधानभावलक्षणौ द्वौ धर्मौ प्रतिपद्यते । `व्यपदिष्टस्य' इति भूतकालेपादानेन संबन्धिद्वययौगो भिन्नकालगुणप्रधाननिमित्तो न विरुध्यत इत्याह ।। 161 ।।
ततश्च ।
प्राधान्यं स्वगुणे लब्ध्वा प्रधाने याति शेषताम् ।
सहयोगे स्वयोगेऽतः प्रधानत्वं न हीयते ।। 162 ।।

(157) अतो विषयभेदाद्धेतोः पुरुषस्य राजानं संबन्धिनं प्रति प्राधान्यं न निवर्तते । स्वस्मिन् हि तत्र गुणेऽप्रधाने राजलक्षणे प्राधान्यं पूर्वमेव तेन लब्धम् । कम्बलादौ त्वपरस्मिन् प्रधाने शेषभावं गुणत्वं यातीति तत्र स्वस्य कम्बलादेर्योगे पूर्वप्रतीतं प्राधान्यं नावगच्छति, विषयभेदात् । गुणप्रधानभावस्यैकत्राविरोधादित्यर्थः । `सहयोगे' इति प्रसङ्गान्निदर्शनमभिन्नयोगक्षेममाह ।
"सहयुक्तेऽप्रधाने"(P.2.3.19)
इत्यनेनाप्रधानात् तृतीया विधीयते पुत्रेण सहागत इति । तत्र पुत्रो देवदत्तस्येति यथा विशेष्यमाणस्तदपेक्षया प्रधानमप्यागमने सहार्थसामर्थ्यादागतसंबन्धादनुमीयमानागमनसंबन्धोऽप्रधानमिति भवति ततोऽप्रधानलक्षणा तृतीया । तथा पुरुषो राजापेक्षया प्रधानमपि स्वविशेष्यापेक्षयाप्रधानत्वाद्राज्ञः पुरुषस्य धनमिति षष्ठीं प्रतिपद्यत इति सिद्धम् ।। 162 ।।
इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे साधनसमुद्देशे शेषाधिकारः ।।
---
(158) एवं तावत् कारकात्मा विभक्त्यर्थो विचारितः । प्रथमा तु
"अभिहिते प्रथमा"(M.Bha on 2.3.46)
इत्येवं कैश्चिद् विहिता । तिङादिभिरभिहिते कर्मादौ कारके प्रथमा । पच्यते ओदनः, मांसपचनो वन्हिः, गोध्नोऽतिथिः, प्रस्कन्दनः स्तंभः , निशा नीशाणा, पचति देवदत्तः इति यथाक्रमं कर्मादिकर्तृपर्यन्तकारकाभिधानं तिङादिनोदाहृतम् । कृतः कट इति कृता कर्माभिधानम्, औपगव इति तद्धितेन संबन्धाभिधानम्, चित्रगुरिति समासेन । राज्ञः पुरुष इत्यत्र परस्परापेक्षयोः संबन्धमात्रे वाक्यपर्यवसानेऽन्यतरपदनिबद्धया षष्ठया द्विष्ठसंबन्धाभिधाने परस्मादभिहितलक्षणैव

प्रथमा । अत्र तु लक्षणे चोदितम्-

"अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति"

(M.Bha on the above Varotika.)

इत्युक्तः । क्रियानुषङ्गमन्तरेणाव्यवहार्यः पदार्थ इति सामान्यरूपाव्यभिचरितसंबन्धा सर्वत्रास्तिक्रिया सन्निधीयत इति वृक्षोऽस्तीति वाक्यप्रयोगादभिहिते तिङा कर्तरीयं प्रथमा । तदुक्तं भाष्ये---

"न सत्तां पदार्थो व्यभिचरति"

इति । वधृतपदार्थाधिकरणत्वाच्छब्दप्रयोगस्यावधारणस्य च सत्तापेक्षत्वादुपचारसत्तासमाविष्टः सर्वः पदवाच्योऽर्थ इत्यर्थः । तथा च प्रागुक्तम्

प्रवृत्तिहेतुं सर्वेषां शब्दानामौपचारिकीम्
एतां सत्तां पदार्थो हि न कश्चिदतिवर्तते ।।

इति । नास्ति बध्यते नीयते इत्याद्यनुषङ्गोऽपि निरूपुतस्य सतो भवति इत्यौत्सर्गिकी सर्वत्रेयं सत्ता ।। तथा च विरोधिभिरविरोधिभिश्च धर्मैरेतस्यामवस्थित एव शब्दः समन्वेतीति प्रागेवोक्तं तत्रैव च निर्णीतम् । एवमपि

"अभिहितानभिहिते प्रथमाभावः"(Va on P.2.3.46)

इति चोदितम् । `प्रसाद आस्ते' इत्यादावासिक्रियापेक्षयाधिकरणशक्तिर्नाभिहिता । सदिक्रियापेक्षया त्वभिहिता कृता । ततश्चाभिहितलक्षणा प्रथमा प्राप्नोति । तथा `फलिता वनस्पतयः', `तारस्वराः परभृताः' इत्यादौ समानाधिकरणसंबन्धे प्रातिपदिकार्थव्यतिरेकाभावान्न किंचित् केनचिदभिहितमित्यभिहितलक्षणा प्रथमा न स्यात् । `उच्चैः' `नीच्चैः' िति चास्तिपदाध्याहारेणाधिकरणशक्तिप्रधानस्याव्ययस्यासंबधान्न केनचिदभिधानमिति कथं प्रथमा एवं

"तिङ्समानाधिकरणे प्रथमा"(M.Bha on P.2.3.46)

इत्येतदप्यनेनैव दृष्टान्तेन लक्षणमलक्षणम् । अपरमप्यत्र द्षणमुक्तम्---

"शतृशानचोष्च निमित्तभावातिङोऽभावस्तयोरपवादत्वात्"

(Va on P.2.3.46)

इति । इह विभाज्यान्वाख्यानपक्षे देवदत्त पचू ल् इति स्थिते यावत्तिङ उत्पत्तिर्नास्ति तावत् तिङ्समानाधिकरणत्वाभावात् प्रथमा न प्राप्नोति । तथा च देवदत्तशब्दादविसेषविहिताः सर्वे स्वादयः स्थिता इति लटः स्थाने द्वितीयाद्यन्तपदसामानाधिकरण्ये विधीयमानौ शतृशानचौ प्राप्नुतोऽपवादभूतौ, न तु तिङः । तेषां तु लिङादिरवकाशो भवेत् । स एव च प्रथमाया अपीति `पचति देवदत्तः' इति लट्समानाधिकरणः प्रयोगः प्रथमान्तो न स्यात् । तदेवं लक्षणान्तरे प्रत्याख्याते

`प्रातिपदिकार्थलिङ्गपरिमाण....(P.2.3.46)

इत्याद्याचार्यीयमेव लक्षणं न्याय्यमवस्थापितम् । तत्र विचार्यते । ङ्याप्प्रातिपदिकस्य स्वादिप्रकृतित्वेन विज्ञातत्वात् प्रातिपदिकस्यैवार्थ इति लब्धेऽर्थे विशेषणं प्रातिपदिकग्रहणं नोपयुज्यते । तथा च तदसंयुक्तमेवार्थशब्देन । अनर्थकात् प्रथमां विधातुम् `अध्यागच्छति, पर्यागच्छति' इत्यनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञोपसंख्याता । यद्येवं संज्ञासामर्थ्यात् प्रथमा भविष्यति । न हि विभक्तिविधानादन्यप्राति प्रदिकार्यस्यात्र संभवः । किं च

अधिपरी अनर्थकौ (P.1.4.93)

इति । गतिसंज्ञाबाधनार्थात् कर्मप्रवचनीयसंज्ञाविधेर्लिङ्गादर्थवत्कृतमेषां भवतीत्यनुमीयते । अन्यथा क्रियाविशेषद्योतकत्वाभावे गतिसंज्ञाप्राप्तिरेव न स्यात् । स्वादिविधाने भिन्नवाक्यतापक्षेऽविशेषेणोत्पद्यमानाः स्वादयः सिद्धा एव । अत्रैकवाक्यतापक्षेऽपि प्रत्ययनियमे प्रकृतापेक्षत्वान्नियमस्य कर्मण्येव द्वितीया न तु करण इत्यनर्थकादव्यावृत्तिरेव । अर्थनियमो वाश्रयणीयः कर्मणि द्वितीयैवेत्यादिः । एवं च कृत्वाल्ययेभ्यो निःसंख्येभ्यः स्वादयो विद्यन्त इत्युच्चैर्नीचैरित्यप्यत्र नोदाहृतम् । अव्ययाल्लुग्वचनमप्यत्र ज्ञापकमस्ति । क्रमव्यतिक्रमे च प्रयोजनाभावात् पाठक्रमायाता प्रथमैवात्र । तस्मादर्थविशेषण मेव

प्रातिपदिकग्रहणम् । सामर्थ्यवलब्धमपि व्याप्त्यर्थं प्रातिपदिकमात्रार्थे प्रथमां विधत्ते, नाव्ययादेव । तत्र प्रातिपदिकसामान्येन विशेष्यमाणोऽर्थः सत्तेति केचिदाहुः । सा हि सर्वत्रार्थेष्वव्यभिचरितसंबन्धा प्रथमं प्रतीयमाना विभक्त्यादिसंबन्धनिरपेक्षस्य प्रातिपदिकमात्रस्यार्थ इति व्यवस्थाप्यते । कल्पितान्वयव्यतिरेकवशेन हि शास्त्रीयार्थ निर्णयः । तत्र च शुद्धस्य प्रातिपदिकस्य वृक्षं वृक्षेणेत्यादौ विभक्त्यर्थानुगमेऽपि सत्तामात्रानुगमात् तदर्थनिश्चयः । निरधिकरणा च सत्ता न संभवतीति द्रव्याधिकरणैव तदर्थः तावति हि निरपेक्षः शब्दः । लिङ्गादौ प्रत्ययापेक्षणान्मात्रग्रहणाच्चेहेयानर्थो व्यवस्थाप्यते । ततश्च पंचकपक्षेणास्याविरोधः । येनाप्युक्तं प्रातिपदिकार्थः सिद्धतेति तेनापि नामपदानामाख्यातपदवैलक्षण्येन सिद्धस्वभावार्थाभिधायित्वमुक्तं न तु साधसंपाद्यता सिद्धतास्याभिप्रेता । येन शब्दान्तरप्रयोगसमधिहम्यत्वात्तस्याः प्रातिपदिकमात्रार्थता न भवेदिति चोद्येत । धर्ममात्रे च शब्दस्य विश्रान्त्यभावान्निमित्तेनात्मरूपतामापादितो निमित्ती प्रातिपदिकार्थ इति केचित् स्फुटमेवाचक्षते । निमित्तं जातिगुणक्रियाः निमित्ती तदाश्रयः समावयवशात् तिरोहितरूप एव । अत एव निमित्तेनात्मरूपतामिवापादित इत्युच्यते । न तु भावतो रूपान्तरापत्तिरत्र विवक्षिता । तदाच्छुरणमात्रं तु तथैवाध्यवसायात् । न चात्र विरम्य व्यापारः उपाध्युपरक्तस्यैव द्रव्यस्य शब्दात् प्रतीतेः । न तु प्रतिपाद्य प्रातिपदिकाच्छुद्धं द्रव्यं पश्चादुभ्दूतं लिङ्गादिविशेषं प्रतीयते । एवं ह्येकपदोपात्तेनापि तेनापत्यादिनेव प्रातिपदिकार्थो व्यतिरिच्येत । न चैवम् तस्माद्विशिष्टस्यैवार्थस्य प्रातिपदिकवाच्यत्वाल्लिङ्गोपरक्तस्यापि प्रातिपदिकार्थत्वात् मात्रग्रहणादधिकव्युदासे कुमारी वृक्षः कुण्डमिति लिंगग्रहणस्योदाहरणं दत्तम् । यथा हि कर्माधिके प्रातिपदिकार्थे प्रथमा न भवति मात्रग्रहणात् संबोधने प्रथमाविधेश्च लिङ्गात् तथा लिङ्गाधिकेऽपि न स्यादिति लिङ्गग्रहणं क्रियते । परिमाणग्रहणं प्रस्थादीनां परिच्छेदकनिमित्तस्तद्वत्यभेदेन प्रयोगः साधुर्यथा स्यादिति , प्रस्थः परिमाणमेषां व्रीहीणां प्रस्थो व्रीहयः खारी आढकमिति । सोऽयमित्यबेदोपचारे दि भेदावहानां मानमेयसंबन्धो न प्रतीयते । आनन्तर्यादिसंबन्धान्तरमपि वा प्रतीयेतेति परिमाणाधिके प्रातिपदिकार्थे मानमेयसंबन्धनिमित्ताबेदोपचाराभिव्थक्त्यर्थं प्रथमा विधीयते । असति तु प्रथमाविधानेष्स्मिन्

`तदस्य परिमाणम्'(P.5.1.57)

इति योगाविभागात् तद्धितः, पक्षे वाक्यं स्यात् । इदानीं तु वचनसामर्थ्यात् त्रयमपि भवति । तदेतत् वक्ष्यति---

मानमेयादिसंबन्धविशेषेऽङ्गीकृते तथा ।
प्रस्थादीनामसाधुत्वं तद्धितेन विना भवेत् ।।
तद्धितो योगभेदेन वाक्यं वा स्याद् विभाषितम् ।
परिमाणाधिके तत्र प्रथमा शिष्यते पुनः ।

इति । क्रियानिमित्तस्य चात्र परिमाणशब्दस्याश्रयणादुन्मानादेरपि ग्रहणम् । शुक्लादीनां मतुब्लोपात्तद्धितवृत्तावभदविवक्षायामेव प्रातिपदिकग्रहणादेव प्रथमासिद्धिः । एवं विंशत्यादीनां गुणिनिवृत्तौ । वचनशब्देन पूर्वाचार्यप्रसिद्धया सङ्क्योच्यते । तेन संख्यायामभिहितायामपि प्रथमानेन विधीयते । तद्यथा एको द्वौ बहवः । द्वितीयादयस्तु यथायथं कर्मादिष्वेभ्यः सिद्धाः । कर्मादिविशिष्टानामेकत्वादीनामेतैरप्रत्यायनात् । मात्रशब्दोऽवधारणार्थ इति कर्मादिविशिष्टे प्रथमा न भवति । तत्र वा द्वितीयादयो बाधकाः । संबोधनविशिष्टे प्रथमाविधानाद्वा लिङ्गात् कर्माद्यधिके तदभावसिद्धिः । न ह्यतिरेकवति प्रातिपदिकार्थे प्रथमाया भावे संबोधने विधिरुपपद्यते, अनेनैव सिद्धत्वादिति मात्रग्रहणं प्रत्याख्यातम् । मीयतेऽनयेति मात्रा संख्या । तस्याः समाहापद्वंद्वेन निर्देशः । तत्र संख्वायामभिहितायामेकादिभ्यो यथा स्यादिति मात्रग्रहणस्य प्रयोजनं वचनग्रहणेनैव सिद्धमिति ।

"अन्यतरच्छक्यमवक्तुम्" (M.Bha on P.2.3.46)

इत्युक्तं भाष्ये । साकल्यार्थं तु मात्रग्रहणं परिमाणशब्दस्य रूढित्वाशंकापनोदनेनोन्मानादिग्रहणार्थमिति केचित् । अवधारणार्थत्वेन स्थिते मात्रशब्दे

"पदसामानाधिकरण्ये उपसंख्यानमधिकत्वात् " (Va. on P.2.3.46)

इत्युक्तम् ।

"न वा वाक्यार्थत्वात्"(Va on P.2.3.46)

इति । चात्र परिहारोऽभिहितः । अनपेक्षितेतरेतरपदार्थसमन्वयव्यतिरिक्त एव प्रातिपदिकार्थे प्रथमाविधिर्वीरः पुरुष

इत्यादावित्यर्थः । तदेवं यथान्यासमेव प्रथमाविधिर्युक्तः ।

(159) संबोधनेऽपि प्रथमोक्ता । तत्र च संबोधनरूपं व्याचष्टे ।

सिद्धस्याभिमुखीभावमात्र संबोधनं विदुः ।

प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते ।। 163 ।।

परिसमाप्तरूपस्य पदार्थस्य क्रियायां विनियोगार्थं यदभिमुखीकरणं तावन्मात्रं संबोधनं प्रातिपदिकार्थाधिकं रूपम् । मात्रग्रहणेन कर्मादिसाधनरूपतां संबोधनस्यापावर्तयति । य एव हि गमनादौ नियुज्यते कर्ता स एवाभिमुखीकृतः संबोधनाधिकः । अभिमुखीकृतस्य च नियोगोत्तकालं क्रियासाधनात् परम्परया क्रियापकारकता मनुभवति संबोधनं न तु साक्षात्कारकम् ।। 163 ।।

क्रियापक्षेऽपि संबोधने विशेषणविशेष्यभाववद् वाक्यार्थता नास्ति, अपि तु कर्मादिसाधनवत् पदार्थत्वमेवेत्याह । संबोधनं न वाक्यार्थ इति वृद्धेभ्य आगमः ।

(160) निश्चायकं प्रमाणम् आगमः । इतरपदनैरपेक्ष्येण संबोध्यतावगतेः पदार्थ एव संबोधनं क्रियाकाङ्क्षित्वेऽपि । तद् यथा कर्मादीनां नानपेक्षितक्रियाणां साधनत्वमवकल्पते इति समाश्रयितव्या क्रिया न चातो वाक्यार्थत्वम्, एवं संबोधनस्यापि । गम्यमानक्रियं चैकपदमपि वाक्यं वृक्ष इत्यादिवदिति वाक्यार्थोऽपि संबोधनं भवत्येव । इदानीं प्रकृतं निगमयति

उद्देशेन विभक्त्यर्था वाक्यार्थात् समपोद्धृताः ।। 164 ।।

संक्षेपवचनमुद्देशः । तेन हेतुना विभक्तीनामर्थाः कर्मादिकारकस्वभावाः पारमार्थिकादखण्डाद् वाक्यार्थादनेककारकविशेषणविशिष्टक्रियास्वभावात् पृथगपोद्धारबुद्ध्यान्वयव्तिरेकाभ्यामपोद्धृताः । यथा हि वाक्यादखण्डात् पदापोद्धारस्तथा वाक्यार्थात् पदार्थापोद्धारः । विभक्त्यर्थश्चापि पदार्थ एव । तत्रापि त्वपोद्धारे पदार्थात् विभक्त्यर्थापोद्धारो व्याख्येयः वाक्यार्थ एव तु स्तितलक्षणोऽसत्यस्तु पदार्थ इति `वाक्यार्थात्' इत्याह । अन्ये त्वाहुः । `उद्देशेन' वाक्यार्थावयवेनोपलक्षिताद् `वाक्यार्थात्' इति वाक्यार्थैकदेशभूतात् पदार्थादेव विभक्ता इत्ययमेव स्पष्टोऽर्थः ।। 164 ।।

इदानीं विभक्त्यर्थस्य प्रातिपदिकार्थादन्यत्वे शास्त्रीयं लिङ्गामाह ।

विभक्त्यर्थेऽव्ययीभाववचनादवसीयताम् ।

अन्यो द्रव्याद् विभक्त्यर्थः सोऽव्ययेनाभिधीयते ।। 165 ।।

(161) अव्ययं विभक्ति---(P.2.1.6)

इति विभक्त्यर्थे वर्तमानमव्ययं समर्थेनोत्तरपदेन समस्यत इत्युक्तम् , `अधिस्त्रि' इति । तत्र यदि द्रव्यमेव विभक्त्यर्थो भवेत् `तदा स्त्रीशब्देनैव तस्योक्तत्वादव्ययमप्रयोगार्हमेव । तदस्याप्रयुज्यमानस्य कुतः समासः । तस्माद् विभक्त्यर्थेऽव्ययीभावशासनाद वसीयते प्रातिपदिकमेव कर्मादीनि साधनानि नाभिधत्त इति । तथा ह्यधिकरणशर्तिमव्ययपदमभिदधदुत्तरपदेनानुवभवति समासम् ।

"दृष्टो ह्यव्यतिरेकेऽपि व्यतिरेकोऽन्वये सति ।'

इत्यादिना पूर्वमन्वयव्यतिरेकाभ्यामयमर्थः साधितः । संप्रति लिङ्गदर्शनेनोपोद्बलितः । ननु च पंचकप्रातिपदिकार्थपक्षे विशिष्टस्य निर्भागस्य द्रव्यस्य प्रातिपदिकेनोक्तात्वाद् विशेषद्योतनाय विभक्तय इव अव्ययमपि प्रयोगार्हं स्यात् । द्योतकानां नियमाबावादिति कथमेतल्लिङ्गं युज्यते । सत्यमेतत् । किं तु त्रिकपक्षे लिङ्गमिदमुपन्यस्यते । तथा हि `अव्ययं विभक्ति....' इति विभक्त्यर्थ उपलक्षितः । पंचकपक्षे तु द्रव्यात्मभूतस्य विशेषस्य विभक्तिभिः प्रकाशनात् पदेनैवार्थ उपलभ्येत,समुदायवाच्यत्वात्तस्य, न केवलया विभक्त्या । पंचकपक्षेऽपि वा नियतस्य शक्त्यात्मनो विशेषस्य प्रातिपदिकामात्रादप्रतीतेर्विभक्तीनामेवासौ विषयः । तथा च प्रातिपदिकवाच्यादनियतशक्तेर्द्रव्यादन्यो नियतशक्तिर्विभक्त्यर्थ इति युक्तमुच्यते । एवं च कृत्वान्वयव्तिरेकावपूर्वाभिधाने द्योतने वा यथायोगं पक्षद्वये व्याप्रियेति ।। 165 ।।

ननु च समानकर्तृकयोः पशौ कर्तरि इत्येवमादेर्लिङ्गाद् द्रव्यस्य साधनत्वावगमात् कथं द्रव्यादन्यो विभक्त्यर्थ इत्याशंक्य शक्तेः साधनत्वमुपपाधयितुमाह ।

द्रव्यं तु यद् यथाभूतं तदत्यन्तं तथा भवेत् ।
क्रियाभेदेऽपि तस्यासौ द्रव्यात्मा नावहीयते ।। 166 ।।

(162)सर्वावस्थास्वनपायादेकस्वभावं द्रव्यं सदैवाचलमिति वृक्षं वृक्षेणेत्यादौसाधनवेचित्र्यनिर्निबन्धनं स्यात् । वृक्षं पश्य वृक्षेण फलितमित्यादिक्रियानानात्वनिमित्तो द्रव्यस्य भेद इत्यपि मिथ्या । क्रियानानात्वेऽपि ध्रुवं द्रव्यं स्वरूपान्न प्रच्यवते ।

संबन्धिभेदमात्राद् वस्तुनोऽन्यथात्वायोगात् ।। 166 ।।
एवं च कृत्वा
तस्माद् यत् करणं द्रव्यं तत् कर्म न पुनर्भवेत् ।
सर्वस्य चान्यथाभावस्तस्य द्रव्यात्मनो भवेत् ।। 167 ।।

(163) करणभावेनाधृतं द्रव्यं कर्मतया न प्रख्यायते । उपलक्षणं चैतत् कारकान्तरेषु । कर्मतया चावगतं शेषतया न विज्ञायेत । एकत्वाच्च द्रव्यस्य साधनस्य प्रासादे आस्ते आसने शेते इति ल्युडभिधानादधिकरणस्य सप्तमी न स्यात् । शक्तेस्तु साधनत्वे क्रियाभेदेन तद्भेदात्सदिक्रियापेक्षायामधिकरणशक्तिवभिहितायामप्यासिक्रियापेक्षायां तु तस्याभिहितादन्यत्रानभिहित इति पर्युदासाश्रयणात् सप्तमी सिध्यति । तथा च वार्तिकम् ।

"अनभिहिते हि विधानम्"(Va on P.2.3.1)

अथ क्रियान्तरयोगे करणस्य कर्मात्मतया परिणामस्तदा सकलस्यैव द्रव्यस्वभावस्य वस्त्वन्तरापत्तिः स्यात्, न करणांशस्यैव, तस्य द्रव्यादन्यत्वात् । शक्तेस्तु साधनत्वे क्रियाभेदेन तद्भेदेऽपि तदाधारस्य द्रव्यस्यान्वयिनोऽवस्थानात् शक्त्यन्तरत्यागोपादानयोगे युक्तः करणादिरूपतया संभवः । असमर्थस्य द्रव्यस्य क्रियासिद्धावनंगत्वात् सामर्थ्यमेव तदाधारं साधनं युक्तम् । न चैतावता द्रव्यस्यापि साधनाधारत्वात् साधनभावः कल्पयितुं न्याय्यः । न हि देवदत्तस्य पचिसाधनत्वे तदाधारस्य पीठस्यापि तत् कल्प्यत इति शक्तय एव साधनं न तु शक्तिमद् द्रव्यम् ।

"समानकर्तृकयोः"(P.3.4.21)

इति तु शक्त्याधारद्रव्यैकत्वाध्यारोपनिमित्तं समानत्वं कर्तृशक्त्योः । `पशौ कर्तरि' हस्तिसूचकयोः कर्त्रोः इति फशौ द्रव्ये यः कर्ता हस्तिसूचकयोः द्रव्ययोः कर्तारौ इति व्याख्येयम् । अथवा कर्तृशक्त्याश्र्यः पशुरेव कर्ता इति सामानाधिकरण्यम् ।

"कर्मणि द्वितीया"(P.2.3.2)

इत्यादावपि शक्तीनां संख्यायोगात् तदाधारं द्रव्यमेव निर्दिश्यते । तेन कर्मैकार्थसमवेतायां संख्यायां विभक्तय इत्यर्थः । निरधारायास्च शक्तेरनुपपत्तेः द्रव्यमेव शक्त्याविष्टं साधनं लकारवाच्यम् । तच्च विशेषात्मकमेव क्रियाकारि नियतेनात्मनानभिहितं पदान्तरेणाभिव्यज्यत इति देवदत्तः पचतीत्यादिसामानाधिकरण्येन प्रयोगोपपत्तिरिति सर्वं सुस्थम् ।। 167 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे साधनसमुद्देशः सप्तमः ।।

Sankyasamudesha

अथ संख्यासमुद्देशः ।
इदानीं संख्यां विचारयति ।
संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते ।
भेदाभेदविभागो हि लोके संख्यानिबन्धनः ।। 1 ।।

भेदापोद्धारलक्षणा संख्या एकादिका परार्धपर्यवसाना । भेदश्चेदं तद् इति सर्वनामप्रत्यवमर्शयोग्यवस्तुगतः । तथा च सर्व एव द्रव्यात्मार्थो भिन्न एको द्वौ बहव इत्यादिसंख्यायुक्तो व्यवह्रियते । द्वित्वादिका संख्या भेदमेकत्वसंख्या चाभेदमाश्रये व्यवहारयति । तथा च कार्यादस्माद् द्रव्ये संख्या निश्चीयते । पृथक्त्ववशाद्धि द्रव्याणां पृथक्त्वेन व्यवहारः, एकादिव्यवहारस्तु

संख्यावशात् संसर्गवादिभिरभ्युपगम्यते । वृत्तावपि च सत्त्वभूत उपसर्जनार्थः संख्यावानेवावधार्यते निस्संख्याव्ययार्थभेदेन । सैव चाभेदैकत्वसंख्या व्याख्यास्यते । विसेषप्रतीतिनिबन्धनाभावाच्च संख्याभेदो नावधार्यते । यत्र त्वस्ति निबन्धनं शौर्पिकादौ तत्र भवत्येव विशेषावसाय इति वक्ष्यत एवेति सर्व एव सत्वभूतोऽर्थः संख्यावानभिधीयते इति व्याप्तिसिद्धिः । यत्रापि तद्धितार्थनिर्देशादावनङ्गं संख्या, तत्रापि नान्तरीयकतया सत्त्वभूतस्यार्थस्य संख्योपादानं भवत्येवेत्यस्ति व्याप्तिः । तदित्थं सत्वभूतस्यार्थस्यैकत्वानेकत्वभेदः संख्यानिबन्धन इति ।। 1 ।।

वैशेषिकाणां द्रव्याश्रिता गुणात्मिका संख्या । न च पदार्थ एवासहाय एकत्वं ससहायश्च यथायोगं द्वित्वादीति सहायविरहतद्योगयोर्धर्मान्तरत्वाभावान्न कश्चिदन्यो द्रव्यात् संख्यालक्षणो गुण इति व्यतिरिक्तसंख्याभाव इति वाच्यम् । प्रत्ययभेदात् । न्यो हि ससहायताप्रत्ययोऽन्यश्च द्वौ त्रय इत्यादिप्रत्ययः । ससहायेष्वपि चैकत्वप्रत्ययोऽस्तीति न तद्विरह एवैकत्वसंख्या । अबाध्यमानविलक्षणप्रत्ययावेदितसद्भावा हि पदार्था यथा यथं भिन्नस्वभावा एव न्याय्याः । अनेकसंख्या च शतादिकानेकस्मिन् द्रव्ये समवेतापेक्षाबुद्धिप्रबावितावधार्यते एव व्यासज्यवृत्तिः संयोगविभागादिवत् । न ह्यनेक द्रव्यं नास्ति, तत्र वा नेयं प्रतीतिः । शतमित्यादिका केवलमनेकाश्रयत्वेऽपि सामान्याद् भिद्यते । संख्यासामान्यस्य प्रत्याश्रयपरिसमाप्तत्वादर्थान्तरापेक्षत्वात्तु सङ्ख्याया इत्यादिवैशेषिकोक्तयुक्तयोऽनुसरणीयाः ।

अव्यतिरिक्तधर्मवादिनस्त्वव्यतिरिक्तामाश्रयात् संख्यां मन्यन्ते । समवायेन तिरोहितभेदत्वाद् व्यतिरेकानवधारणाच्चेदं मतम् । अत्रापि तद्दर्शिता युक्तयो वाच्याः । तथा ह्यत्यन्तभेदे तद्विशिष्टप्रत्ययानुदय इति काल्पनिक एव भेद इति मन्यन्ते ।। 1 ।।

अस्माकं तु शब्दप्रमाणकानां पदार्थविचारानादरात् यथायथं पदार्थकल्पनातीर्थिकैः कृता । तामाश्रित्य लक्षणाङ्गाः पदार्था व्यवस्थाप्या इत्याह ।

स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
भेदहेतुत्वमाश्रित्य सङ्ख्येति व्यपदिश्यते ।। 2 ।।

सङ्ख्यालक्षणो धर्मस्तेषां सत्त्वभूतानां सङ्ख्येयानामात्मैवाभिन्न एव वास्तु, तेभ्यो व्यतिरिक्तो वास्तु । किमनेन निष्प्रयोजनेनास्माभिर्विचारेण, शब्दार्थस्येह विचारयितुं प्रक्रमात् । शब्दाच्चैको द्वौ त्रय इत्यादिभेदव्यवहारे हेतुः कश्चिद् धर्मोऽवधार्यते । न हि पदार्थमात्रादनुपाधेरेव व्यवहारो घटते । स च धर्मः सञ्चष्ट इति सङ्ख्येत्यन्वर्थेन नाम्ना व्यवह्रियते ।। 2 ।।

यदि द्रव्याश्रिता सङ्ख्या कथं गुणादीनां तन्निमित्तो व्यवहार इत्याशङ्ख्याह ।

समवेता परिच्छेद्ये क्वचिदन्यत्र सा स्थिता ।
प्रकल्पयति भावानां सङ्ख्याभेदं तथात्मनः ।। 3 ।।

या द्रव्ये परिच्छेद्ये भेदहेतुः संख्या सा तत्रैव समवेता गुणत्वात् । यदा तु गुणादीनां परिच्छेदिका सा तेभ्योऽन्यत्र द्रव्येऽपि स्थिता तत्रैव तस्याः समवायान्निर्गुणानामपि तेषामेकार्थसमवायात् स्वनिमित्तं व्यवहारं वर्तयति । आत्मनोऽपि च संख्या द्रव्येऽपि स्थिता भेदं व्यवहारयति । तद् यथा शतं शते शतानीत्यादि । नहि शतसंख्यायामेकत्वद्वित्वबहुत्वानि समवेतानि विरोधादद्रव्यत्वान्निर्गुणत्वाच्च । एव द्रव्यगता सङ्ख्या रूपादिषु समारोप्यत इति `चतुर्विंशतिर्गुणाः' इति व्यवहारः । तथैव`पञ्च क्रमजातयो द्वे सामान्ये' इत्यादि । `तथा चत्वारोऽभावाः' इत्यादिरपि निरुपाख्यस्याभावस्य वस्तुधर्मायोगादौपाधिको भेदव्यवहारः । एवञ्च गौणमुख्यभेदेन व्यवहारोपपत्तेस्तावन्मात्रस्य चेहोपयोगात् तीर्थिकपरिकल्पितप्रक्रियानादरेण भेदगणनमात्रलक्षणा सङ्ख्या सर्वत्राविशेषेण वर्ण्यते ।। 3 ।।

द्रव्यसमवायेऽपि गुणादिषु सङ्ख्याया भेदव्यवहारनिमित्तत्वे दृष्टान्तमाह ।

परत्वे चापरत्वे च भेदे तुल्या श्रुतिर्यथा ।
सङ्ख्याशब्दाभिधेयत्वं भेदहेतोस्तथा गुणे ।। 4 ।।

इह देशसंबन्धात् परत्वापरत्वलक्षणौ गुणावपेक्षाबुद्धिप्रभावितौ द्रव्ये समवेतात्पद्येते । तथा च ताभ्यां द्रव्यं परमपरमिति व्यवह्रियते । तद्वदेव च गुणादयोऽपि परापरशब्दाभ्यामभिधीयन्ते । ततश्च यथात्र गुणविषये भेदव्यवहारे तावेव द्रव्यगुणौ सव्यापारावितिं परः अपरः इत्यबिन्नमभिधानं तथा भेदहेतोः द्रव्यसमवेताया एव सङ्ख्याया गुणादिविषयेऽपि तथैवैकादिशब्देन

व्यवहारः, न त्वपरा गुणादावेकत्वादिका संख्या विद्यत इत्यर्थः । देशेन संबन्धः साक्षाद् द्रव्यस्यैवेति तन्निमित्तयोः परत्वापरत्वयोर्द्रव्य एव समवायो निश्चित इति दृष्टान्तोपपत्तिः ।। 4 ।।

किं बहुना स्वाश्रयधर्मेणाश्रितानां व्यवहारः सर्व एव दृष्ट इत्याह ।

अस्वतन्त्रे स्वतन्त्रत्वं परधर्मो यथा गुणे ।
अभेद्ये भेद्यभावोऽपि द्रव्यधर्मस्तथा गुणे ।। 5 ।।

द्रव्याश्रयिणि नित्यपरतन्त्रे गुणे पटस्य रूपमिति द्रव्यधर्मस्वातन्त्र्यं यथा व्यवपदिश्यते तथा सङ्ख्यया व्यवच्छेत्तुमनर्हत्वेऽपि तदवच्छेद्यत्वं स्वातन्त्र्याविनाभावी द्रव्यधर्मो योक्ष्यते पटस्य रूपमेकं द्वे त्रीणीत्यादि । अयमत्र भावः । इह यदा शुक्लः पट इत्यादिर्द्रव्योपसर्जनभावमापन्नो गुणोऽभिधीयते तदासौ द्रव्यसामानाधिकरण्यात् तद्धर्मेण समन्वयं सहत एव । द्रव्यान्निष्कृष्य तु पटस्य शक्ल इत्याद्यभिधाने स्वातन्त्र्यमात्मीयं द्रव्यरूपमसंभवीति स्वाश्रयायातं तद् व्यवस्थापनीयम् । तदेव च शब्दशक्त्यानुवर्तते ।। 5 ।।

तथा हि

स्वबुद्ध्या तमपोद्धृत्य लोकोऽप्यगममाश्रितः ।
स्वधर्मादन्यधर्मेण व्याचष्टे प्रतिपत्तये ।। 6 ।।

न केवलं वैशेषिको गुणस्य द्रव्यधर्मेण व्यवहारं वर्तयति यावद् द्रव्यादन्यो द्रव्ये समवेतो गुण इत्येवंभूतम् । वैशेषिकागममनुवर्तमानो लोकोऽपि तस्माद् द्रव्यादपोद्धारबुद्ध्या तं गुणं भिन्नं स्वतन्त्रं निश्चित्य द्रव्यधर्मेण संख्यावत्त्वादिना गुणधर्मविलक्षणेन परं प्रतिपादयति शब्दशक्तिमनुसृत्य । तद् यथा पटस्येदमेकं चित्रं रूपम् । तदभावपक्षे तु प्रत्यवयवमनेकं भिन्नरूपमेव रूपमित्यवयविनि बहूनि रूपाणि ।। 6 ।।

यदि वा शब्देन संसर्गिधर्माच्छुरितस्य वस्तुनोऽभिधाने द्रव्यगुणादयस्तत्र समाना इत्याह ।

परोपकारतत्त्वानां स्वातन्त्र्येणाभिधायकः ।
शब्दः सर्वपदार्थानां स्वधर्माद् विप्रकृष्यते ।। 7 ।।

परेणान्येन धर्मेणापक्रियमाणमवच्छिद्यमानं तत्त्वं स्वरूपं येषां ते परोपहितोपकाराः पदार्थाः शब्देनाभिधीयन्त इति व्यवहारे सर्वार्थानां द्रव्यगुणादीनामनुपाधि स्वरूपं न शब्देन स्पृश्यते । न हि संसर्गिधर्मविवित्क्ता निजेन शुद्धेन वास्तवेन रूपेण व्यवहारमवतरन्त्यार्थाः । तथा च द्रव्यवद् गुणोऽपि पटस्य रूपमिति स्वातन्त्र्येणाभिधीयमानः संसर्गिसंख्यादिकृतोपकार एवाभिधीयते । शब्दो हि न गुणानामेव, अपि तु द्रव्याणामप्यपरोपाधिकेन रूपेणोपलक्षितानां स्वधर्माद् वाचकत्वाद् दूरीभवति । सामान्याद्यसंसृष्टे तस्य सम्बन्धव्युत्पत्तेः कर्तुमशक्यत्वादिति सर्वत्र शब्दः परोपदर्शितविषय एव ।। 7 ।।

अर्थोऽपि परोपकाराहितविशेष एवेत्यत्र दृष्टान्तमाह ।

यथैवाविषयं ज्ञानं न किञ्चिदवभासते ।
तथा भावोऽप्यसंसृष्टो न कश्चिदुपलभ्यते ।। 8 ।।

ज्ञानं बोधमात्रस्वभावं नियमेन व्यवहारयोग्यं विषयपारतन्त्र्यात् तत्कृतोपरागविवेकेनाशक्यव्यवहारं यथा एवं ज्ञेयमपि संसृष्टधर्मोपरागरहितं वस्तुमात्ररूपतयापि ज्ञेयतामभिधेयतां च नासादयतीत्यत्र परोपकारतन्त्रमेवैतत् ।। 8 ।।

यद्येवमिदं सामान्यं भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तम् , अयं विशेषो व्यावृत्तिप्रत्ययहेतुरित्येवं द्रव्यसंसर्गविवित्क्तः कथं व्यवहारः सामान्यादिषु अपरोपाधेस्तस्याभावादित्याशङ्क्याह ।

भेदेन तु समाख्यानं यल्लोकोऽप्यनुवर्तते ।
आगमाच्छास्त्रसदृशो व्यवहारः स वर्ण्यते ।। 9 ।।

सामान्यविशेषाभ्यां द्रव्येष्वभिन्नभिन्नप्रत्ययाविति निष्कृष्टस्वभावानामुपाधीनां नित्यपरतन्त्राणामपि भेदेन स्वतन्त्रतया प्रतिपादनं शास्त्रे तावदपोद्धाराश्रयेण युक्तम् । लोकोऽपि शास्त्रवासनया तदनुगच्छतीति वैशेषिकागमानुसारेण व्यवहारो लौकिकैः प्रतन्यते ।। 9 ।।

तथा च प्रसिद्धेरत्रापि संसर्गिधर्मपरिकल्पना न्याय्येत्याह ।
बुद्धौ स्थितेषु तेष्वेवमध्यारेणो न दुर्लभः ।
परधर्मस्य न ह्यत्र सदसत्त्वं प्रयोजकम् ।। 10 ।।
द्रव्यान्निष्कृष्यापोद्धारबुद्धयैवं भेदेन सामान्यादिषु समाख्याने परधर्मस्य स्वातन्त्र्याविषयस्योपाधिमत्त्वस्य अध्यारोपो न दुर्लभः, बुद्ध्या सर्वनामप्रत्यवमर्शयोज्यतापादनादुपाधिमद्रूपतायामुपाधिसंसर्गस्य न्याय्यत्वात् । अध्यारोपे च वास्तवे सत्त्वासत्त्वे न प्रयोजके येनोपाधिभूते वस्तुसति सामान्ये विशेषे च स्वातन्त्र्याभावात् कथमुपाधियोगोऽसन् कल्प्यत इति चोद्येत । अत्यन्ताविद्यमानेऽपि हि बहिरर्थे बुद्ध्या समावेशो दृश्यते समुद्रः कुण्डिकेति यथेति कथञ्चिद् बहिः सत्त्वे धर्ममात्रारोपो न विरुध्यते । अत एवासत्त्वमपि यावन्नाध्यारोपे उपयुज्यते ।
सतोऽप्यसत्त्वारोपादपुत्रोऽयमित्य(न?) तिशयख्यापनार्थमसत्त्वमप्यप्रयोजकमित्युक्तम् ।। 10 ।।
यतश्च स्वातन्त्र्येणाध्यारोपस्ततः--
सामान्येष्वपि सामान्यं विशेषेषु विशिष्टता ।
सङ्ख्यासु सङ्ख्या लिङ्गेषु लिङ्गमेवं प्रकल्पते ।। 11 ।।
गोत्वादिसामान्यभेदेषु बुद्ध्यावसितेषु अन्वयिरूपपरिकल्पनया सामान्यान्तरयोगो न विरुध्यते, द्रव्यायमाणानां बुद्ध्या निरूपणात् । एवं विशेषेषु तथाव बुद्ध्या द्रव्यायमाणेष्ववसितेषु विशेषो विशेष इत्यभिन्नाभिधानप्रत्ययहेतुः सामान्यं परस्परव्यावृत्तप्रत्ययहेतुश्च विशेषो युज्यते । द्रव्यवद् उपाधिमत्त्वेनावसायात् शतादिसंख्यायां च शतं शते शतानीत्यादिप्रातिपदिकेन द्रव्यायमाणायामभिधीयमानायामन्या सङ्ख्या द्रव्यधर्म एवारोप्यते । स्त्रीत्वादिषु च लिङ्गेषु तथैव द्रव्यायामाणेषु शब्देनाभिहितेषु द्रव्यधर्मलिङान्तरयोगः पुमान् पौंस्नं पुंस्तेति, गार्ग्यायणी कारीषगन्ध्येति च स्त्रीत्वेऽपि स्त्रीत्वाश्रयो द्वितीयस्त्रीप्रत्ययः । तथा च भाष्यकारः--
`भावोऽपि भावेन युज्यते, स्त्रीत्वं स्त्रीत्वेन' (M.Bha.II.p200,1.8,15)
इत्याह ।। 11 ।।
तदेवं प्रासङ्गिकमभिधाय प्रकृतं निगमयति ।
अतो द्रव्याश्रितां सङ्ख्यामाहुः संसर्गवादिनः ।
भेदाभेदव्यतीतेषु भेदाभेदविधायिनीम् ।। 12 ।।
यतो द्रव्यगतयैव सङ्ख्ययोक्तेन न्यायेन गुणादीनामपि तन्निमित्तो व्यवहारः सिध्यति, अतो धर्माणां संसर्गमेकत्र द्रव्ये येऽभ्युपयन्ति काणादास्ते द्रव्यसमवेतामेव सङ्ख्यां ब्रुवते,निरुपाधिषु भेदाभेदव्यतिक्रान्तेषु द्रव्येषु गुणादिषु च भेदाभेदप्रत्ययनिमित्तभूताम् । एकत्वसङ्ख्या अभेदप्रत्ययनिमित्तं द्वित्वादिका भेदप्रत्ययनिमित्तमित्यर्थः ।। 12 ।।
यदि तर्हि स्वयं भेदाभेदव्यतीताः पदार्थः कथं तेभ्योऽन्या सङ्ख्या तांस्तथा व्यवहारयेदित्यत आह ।
आत्मान्तराणां येनात्मा तद्रूप इव लक्ष्यते ।
अतद्रूपेण संसर्गात् सा निमित्तसरूपता ।। 13 ।।
इह परस्परविविक्ताः पदार्था द्रव्यादयो यथालक्षणं प्रमाणेन प्रतीताः । तत्र चान्येषामपि द्रव्याणाम् अतद्रूपेण गुणादीनां(दिना?) येन संसर्गात् समवायाख्यात् संबंधात् तद्रूप इव गुणादिरूप इवात्मा लक्ष्यते समवायेन भेदतिरोधानात्, सा आभासमात्रे परं निमित्तस्य गुणादेः सरूपता । तस्येव रूपं स्वभावोऽस्येति तत्स्वभावता, न तु परमार्थतः तत्स्वभावत्वमेव, यथायथं स्वप्रमाणतो भिन्नत्वावेदनादिति । परोपधानेन व्यवहारेऽपि न पदार्थाः सङ्कीर्यन्त इत्यर्थः ।। 13 ।।
कथं न सङ्कीर्यन्ते, यावता तथैव सर्वदैवैषामाबास इत्याशङ्क्य कार्यभेदाद् भेदमाह
संसृष्टेष्वपि निर्भागे भूतेष्वर्थक्रिया यथा ।
सत्त्वादिषु च मात्रासु सर्वास्वेवं प्रतीयते ।। 14 ।।

पृथिव्यादिषु भूतेषु अपृथग्भावेन संसर्गं प्राप्तेषु धृतिसङ्ग्रहपक्तिव्यूहावकाशदानलक्षणा अर्थक्रिया यथा प्रत्येकं भिन्नैव, सत्त्वरजस्तमोलक्षणेषु च सर्वभावगतेष्वपि निर्भक्तेषु प्रकाशप्रवृत्तिनियमलक्षणार्थक्रिया विलक्षणा तथा द्रव्यगुणकर्मसामान्यविशेषलक्षणास्वपि मात्रासु अन्योन्यसाहचर्येणापि निर्भक्तासु वस्तुभागरूपास्ववस्थितासु भिन्ना एवार्थक्रिया । तथा हि द्रव्यं गुणानामाश्रयभावेनार्थक्रियाकारि । गुणास्तु द्रव्ये स्वरूपसमर्पणेन यथायथमुपयोगिनः । एवं शेषेष्वपि यथायोगं वाच्यमिति निमित्तनिमित्तिनोरर्थक्रियाभेदाद् भेदसिद्धिः स्वरूपसम्भेदेऽपि ।

इदानीं संख्या स्वरूपेण परीक्ष्यते । तत्र द्वित्वदिका संख्या किमेकत्वादन्या, नान्या वा । अन्यत्वे द्वित्वादीनामेकत्वापेक्षोत्पत्तिर्न स्यात् । अनन्यत्वेऽपि तु भेदो निर्निबन्धन इत्यत आह ।

द्वित्वादियोनिरेकत्वं भेदास्तत्पूर्वका यतः ।
विना तेन न सङ्ख्यानामन्यासामस्ति सम्भवः ।। 15 ।।

तेन एकत्वेन विना अन्यासाम् द्वित्वादीनां संख्यानां यतः सम्भवः उत्पत्तिः नास्ति, अतो द्वित्वादीनाम् एकत्वं योनिः कारणमिति तदपेक्ष्य द्वित्वाद्युत्पत्तिः, न तु तदभिन्ना द्वित्वादिकाः सङ्ख्याः कथं तेन विनान्यासामसम्भव इत्यत्र युक्तिः भेदास्तत्पूर्वका यतः इति । अभेदपूर्वका भेदा इति सहजमेकत्वं भावानामाद्यम् । द्वित्वादयस्तु तत्पूर्वकाः पदार्थान्तरसंन्निधौ जायन्त इति दृष्टम् ।। 15 ।।

एकत्वे बुद्धिसहिते निमित्तं द्वित्वजन्मनि ।
एकत्वाभ्यां समुत्पन्नमेवं वा तत् प्रतीयते ।। 16 ।।

प्रथममिन्द्रियसंयुक्तयोर्द्वव्ययोर्ये एकत्वे समवेते तदाश्रितं यत् सामान्यं तत् संयुक्तसमवेतसमवायादिन्द्रियार्थसन्निकर्षात् प्रतीयते । अतस्तद्विशेषणावच्छिन्नयोरेकत्वगुणयोर्ज्ञानं, तदपेक्षे ते एकत्वे स्वाश्रयपदव्यसमवेतं द्वित्वं जनयतः । द्रव्यद्वयं हि द्वित्वस्य समवायिकारणम्, एकत्वगुणावसमवायिकारणम्, कार्यैकार्थसमवायलक्षणया लघ्व्या प्रत्यासत्त्या । अपेक्षाबुद्धिर्निमित्तकारणम्, न ह्यपश्यत एकत्वे द्वित्वबुद्धिरित्यन्वयव्यतिरेकाभ्यां बुद्धेः कारणत्वनिश्चयः । समवायित्वं च द्रव्यस्यैव, प्रत्यासत्त्यभावाच्चासमवायित्वमपि नास्तीति निमित्तकारणं बुद्धिरवस्थाप्यते । समवाय्यसमवायिव्यतिरिक्तं हि कारणं सामान्यसमाख्यया निमित्तमित्युच्यते । तदेवं कारणत्रितयाज्जाते द्वित्वे प्रथमं तत्सामान्यज्ञानं ततस्तद्गुणज्ञानं ततस्तद्विशिष्टं द्वे द्रव्ये इति ज्ञानमिति काणादनयः ।

"नागृहीतविशेषणा हि विशेष्यबुद्धिः"

इति तेषामाम्नायः । अन्येत्वेकत्वबुद्ध्योर्द्वित्वपरिच्छेद एवान्वयव्यतिरेकाभ्यां व्यापारवधारणादेकत्वे बुद्धिनिरपेक्षे एव द्वित्वं जनयतः । तथा च जातमेकत्वबुद्धिपूर्वकं गृह्यत इति मन्यन्ते । प्रक्रियाभेदोऽत्र ग्रन्थगौरवभयान्न प्रदर्श्यते । प्रथमकाण्ड एव तु कथितः ।। 16 ।।

द्वित्वस्य रूपेऽपि मतभेद इत्याह ।

एकत्वसमुदायो वा सापेक्षे वा पृथक् पृथक् ।
एकत्वे द्वित्वमित्येवं तयोर्द्विवचनं भवेत् ।। 17 ।।

एकत्वाभ्यां नापूर्वं द्वित्वं जन्यते । अपि तु तयो समुदायो वनयूथादिवदवयवाभिन्नो द्वित्वम् । तथा चावयवाश्रयस्तत्र भिन्नाकरावभासः, सङ्घाश्रयश्चैकाकारावभासः प्रत्यय उपपद्यते । वृक्षसमुदायश्च यथा वनमित्यनेन विलक्षणेन शब्देनोच्यते तथैकत्व समुदायोऽपि द्वित्वमिति । एवं समुदायप्रधान्यम् । यदा त्ववयवप्राधान्यविवक्षा, तदा एकत्वे एव परस्परापेक्षे द्वित्वमिति व्यवह्रियते, नातोऽन्यः कश्चित् गुण इत्येतद्दर्शनद्वयमव्यतिरेकपक्षे । अत्र च पक्षे तयोः एकत्वयोः द्विवचनं भवेद् अवयवप्राधान्यात् । एकवचनं त्वेकाकारावभासपूर्वकं द्वित्वमिति दृश्यते इति नैष पक्षो न्याय्य इत्यर्थः । तथा हि द्वयेकयोः.....(P.1.4.22.)

इति द्विवचनं द्वित्वे विधीयमानं द्वित्वस्यैकत्वाभ्यामव्यतिरेकादेकत्वयोरेव तत् स्यात् । तथा च द्वयेकयोरित्येकत्वत्रयस्य द्वन्द्वविषयत्वात् बहुवचनं स्यादिति भावः । तस्मादेकाकारावभासप्रत्ययविषयमेकत्वाभ्यां जनितमन्यदेव द्वित्वमित्येव न्याय्यम् ।

एवं त्रित्वादयोऽपि दशसंख्यापर्यवसाना वेदितव्याः । विंशत्वादिसंख्यायां तु विचारो भविष्यति ।। 17 ।।
नन्वेवं द्वित्वबहुत्वसंख्याभेदस्यैकत्वात् कथं द्वयोद्विर्वचनं बहुषु बहुवचनमिति व्यवहार इत्यत आह ।
एकोऽपि गुणभेदेन सङ्घो भेद प्रकल्पयेत् ।
आश्रयाश्रयिभेदो हि तदाश्रयनिबन्धनः ।। 18 ।।
द्वित्वबहुत्वादिलक्षणस्सङ्घः समुपजातो व्यतिरिक्तः कल्पितो वेति द्वैतम् । तत्रोत्पत्तिपक्षे जन्यपरवशत्वाज्जनकाः गुणाः । कल्पितपक्षे त्ववयवाः समुदायपारतन्त्र्याद् गुणाः । तेषां भेदेन द्वित्वबहुत्वादेर्भेदः स्वात्मना एकस्यापि । तथा च द्वयोर्बहुष्विति च व्यवहारोपपत्तिः । यस्मादाधाराधेययोर्यो भेदो भेदव्यवहारः स तदाश्रयेण सम्बन्धेन हेतुना भवति । तथा ह्याश्रितस्य भेदेन क्वचिदाश्रयस्य भेदे व्यवह्रियते । तद् यथा पाटवस्य भेदेनैकोऽप्यर्थात्मा परुद्भवानपटुरासीत्, पटुतरश्चैषमोऽन्य एवासि संवृत्तः' इति भिन्नो व्यवह्रियते । तथैकत्वाना जनकत्वेनाश्रीयमाणत्वादाश्रयाणां भेदे तदाश्रितं तज्जन्यं बहुत्वादि भेदेन व्यवह्रियत इत्यर्थः ।
द्वयेकयोः (P.1.45.2.)
इत्यत्र तु द्वित्वं स्वगतेनैवाभेदेन निर्दिश्यते ।। 18 ।।
तदेवं दशसंख्यापर्यवसाना सङ्ख्या विचारिता । इदानीं विशत्यादिः सङ्ख्याभेदो विचार्यते । तत्र चोत्पत्तिरेकत्वैरेवापेक्षाबुद्धिसहितैरिति समानं पूर्वेण । किन्तु तदभिधायी शब्दः सङ्ख्यासङ्ख्येयोभयवचनो दृश्यते, गवां विंशतिः, विंशतिर्गाव इत्यादिः । तत्र यदि प्रकृतमर्थनिर्देशमनपेक्ष्य द्वौ दशतौ विंशतिरिति स्वार्थे निपातनं वर्ण्यते तदा विंशतिगवं त्रिंशत्पूलीति समासो न स्यात् । द्वौ हि दशद्वर्गौ विंशतिः, त्रयो दशद्वर्गास्त्रिंशदिति संख्येयेन सामानाधिकरण्याभावः एकवचनं च न स्यात्, विंशतिः, त्रयो दशद्वर्गास्त्रिंशदिति संख्येयेन सामानाधिकरण्याभावः एकवचनं च न स्यात्, विंशतिः, यथायथं वर्गभेदनिबन्धनस्य वचनभेदस्य प्रसङ्गात् । तदुक्तं वार्त्तिके--
`विंशत्यादयो दशदर्थे चेत् समासवचनानुपपत्तिः'
(Va.1.onP.5.1.59.M.Bha.II.p.355.1.7.)
इति । दशद्वर्गद्वयाभिधायिनो द्विशब्दात् स्वार्ते शतिच्प्रत्ययो द्विशब्दस्य च विनुभाव इतीष्टः समासो वचनं च न स्यात् । गवां विंशतिर्गोविंशरिति समासो भवत्येव । `क्रोशशतयोजनशतयोः' इत्यादिज्ञापकाच्चात्र गुणेन नेति निषेधो न भवति । यदि वा गुणात्मन्यवस्थितत्वाद् विंशत्यादीनां
तत्स्थैश्च गुणैः (Va.2.onP.2.2.8.)
इति प्रतिप्रसवः समासस्य
गुणेन न (cf.P.2.2.11.)
इति निषिद्धस्य । अथ सङ्घ इत्यनुवृत्तेः परिमाणोपाधिकात् परिमाणिनि सङ्घे प्रत्ययो द्वौ दशतौ परिमाणस्य सङ्घस्य विंशतिः सङ्घ इति तदा सङ्घस्यैकत्वादेकवचनं सिद्ध्यति समासानुपपत्तिस्तु तदवस्था । विंशतिर्गोसंङ्घ इति चानिष्टं स्यात् । विंशको गोसङ्घ इति हीष्यते । तथा च वार्त्तिकम् ।
`परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययविधानम् (Va.2onP.5.1.59,M.Bha.II.p.335.1.14.)
इति । द्वौ दशतौ परिमाणं यस्य स गोसङ्घो विंशतिरित्यभिधीयते । तत्र विंशतिः परिमाणं यस्य सङ्घस्येति सङघान्तरस्य परिमाणिनोऽसम्भवाद् विंशकः संङ्घ इति सिद्ध्ये
`विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम्' (P.5.1.24.)
इति ड्वनुप्रत्ययः स्वार्थे वक्तव्य इत्यर्थः । तथा
`षष्ठीवचनविधिश्च' (Va.3.onP.5.1.59.M.Bha.II.p.355,1.16.)
इत्युक्तम् । इह सङ्घे परिमाणिनि विंशत्यादीनां केवलानां प्रयोगो नेष्यते, भिन्नेषु तु द्रव्येषु परिमाणिषु

प्रत्ययोत्पत्तावाश्रीयमाणायां विंशतिशब्देन द्रव्याणामभिधानाद् व्यतिरेकाभावाद् गवां विंशतिरिति षष्ठी न प्राप्नोति । द्रव्यसामानाधिकरण्याद् बहुवचनप्रसङ्गश्च । तदेवं व्युत्पत्तिपक्षे दूषणान्यभिधायाव्युत्पत्तिपक्षं निर्दोषमाश्रित्यारम्भः प्रत्याख्यातव्यः

`अनारम्भो वा प्रातिपदिकविज्ञानाद् यथा सहस्रादिषु'

(Va.4.onP.5.1.59,M.Bha.II,p.355 1.20)

इति । वाशब्दस्तर्ह्यर्थे सहस्रादिवदव्यत्पुन्ना एव विंशत्यादयः

अर्थवदधातुः.....(P.1.2.45.)

इति प्रतिलब्धप्रातिपदिकसंज्ञा अर्थवत्सूत्रेणानुज्ञातसाधिमानः सङ्ख्यायां सङ्ख्येये च प्रयोगभेदेनाक्षादिवजनेकार्थतया स्वभावतो वर्तमाना रूढशब्दत्वाच्च नित्यलिङ्गसंख्या यथा आपो दारा इत्यर्थः । एवं वार्त्तिककारेणावस्थापिते भाष्यकारो व्युत्पत्तिपक्षं समर्थयते संघे परिमाणिनि प्रत्ययो निपात्यते । सङ्घश्च समुदायोऽत्र सामान्येन गृह्यते, न तु प्राणिसमूह एव । तेन वृक्षाणां विंशतिरित्यपि भवति । तत्र स्वार्थे प्रत्ययविधानस्य परिहारभाष्यम्--

"संहनने वृत्तः संहनने वर्तिष्यते"(M.Bha.II.p.356,1.12.)

इति ।

एतद् व्याचष्टे ।

सङ्ख्येयसङ्घसङ्ख्यानसङ्घः सङ्ख्येति कथ्यते ।

विंशत्यादिषु सान्यस्य द्रव्यसङ्घस्य भेदिका ।। 19 ।।

अयमर्थः । गवादीनां सङ्ख्येयानामेकः सङ्घो द्रव्यसङ्घ इत्युच्यते । तयोर्द्वयोर्द्रव्यसङ्घयोर्दशतोः सङ्घोऽयं विंशतिशब्दो निपात्यते । स च सङ्ख्यानसङ्घ इत्युच्यते दशद्वर्गयोः सङ्ख्यानयो समुदायः । स च विशंतिशब्दवाच्य इति । सा विंशतिशब्दवाच्या सङ्ख्या अन्यस्य गवादिद्रव्यसङ्घस्य भेदिका परिमाणोपाधिर्विशेषणमिति । तस्मात् संख्यानसङ्घवचनाद् विंशतिशब्दाद् गवादिसङ्घे परिमाणिनि ड्वुन्प्रत्ययो भवति विंशको गोसङ्घ इत्यादि । तथा च दशतोः संहनने सङ्घे वृत्तो विंशतिशब्दो गवादिद्रव्यसंघे परिमाणिनि वर्तिष्यते परार्थाभिवानं वृत्तिरिति प्रत्ययमुत्पादयिष्यतीति भाष्यार्थः । द्रव्याणां द्रव्यसङ्घस्य दशतां दशतुसङ्घस्य च पारमार्थिको भेदो नास्ति, केवलं बुद्ध्यासौ परिकल्प्यते ।

बुद्धिव्यवस्थापितार्थनिबन्धनाश्च शब्दा बुद्धिमेवार्थाकारामुपजनयन्तोऽसत्यपि वास्तवे भेदे भेदमवगमयन्ति । निपातनसामर्थ्याच्च विशिष्टे दाशते सङ्गे वर्तन्तेऽमी शब्दाः । तथा चोक्तं गुरुभिः ।

द्वेर्विनः परिमाणाख्याद् दशदर्थात् गुरुभिः ।

शतिजस्येति सङ्घाते दाशते तु निपातनात् ।।

इति । अस्यार्थः । द्वेरिति द्विशब्दात् । विन इति विन्भाविनो विन्शब्दादेशादित्यर्थः । स्थान्यादेशयोर्ह्यभेदविवक्षा द्विशब्द एव विन्शब्द उक्तः । परिमाणख्यादिति परिमाणोपाधिकात् । सङ्ख्याशब्दो हि सङ्ख्येयाभिधायी न परिमाणाभिधायी,परिमाणोपाधिकास्तु भवत्येव । यद्वाक्यं

`द्वौ दशतौ परिमाणमस्य'

इति । दशदर्थादिति दशद्वर्गसंख्येयवृत्तेरित्यर्थः । तदिति प्रथमासमर्थाच्छतिच्प्रत्ययो भवत्यस्येति परिमाणवत्यभिधेये सङ्घाते । गवां संघस्य दाशतस्य च सङ्घस्य परिणामित्वाविशेषे दाशत एव सङ्घे प्रत्ययो निपातनसामर्थ्यात्, न गोसङ्घे,नापि गोषु । तथा च धर्ममात्रवचनाः शुक्लादिवद् गुणिसमानाधिकरणाः कदाचित् प्रयुज्यन्ते अभेदोपचाराद् विंशतिर्गावः कुण्डानि ब्राह्मणा इति वा । आविष्टलिङ्गसंख्यात्वाच्चान्यलिङ्गसंख्येऽपि सङ्येये सामानाधिकरण्याविरोधः समासश्चोपपन्नः । अत एव विंशतिगवं त्रिंशत्पूलीति । विंशतिसङ्ख्या हि समुदितद्रव्यसमवायिनी, न तु प्रत्येकं शुक्लादिवत् परिसमाप्तेति द्रव्यगतलिङ्गसङ्ख्ये नानुवर्तते । पञ्चादयस्तु नित्यं सङ्ख्येयवचना इति तद्गतलिङ्गसङ्ख्यानुविधायिनो युक्ताः । यदा तु गुणगुणिनोर्भेदेन व्यवहारस्तदा षष्ठी सिद्धा, गवां विंशतिरिति । ननु च दाशतः सङ्घो विंशतिशब्दावाच्यस्तस्य च सङ्येयो

गुणी गवादिर्न भवति । दशतौ हि तस्य गुणिनौ, तत् कथं गोभिः स विशेष्यते । उच्यते । गवां दशतोश्च तात्त्विकभेदाभावाद् गावोऽपि गुणिनः । तत्र दशता व्यभिचाराभावाद् विंशतिर्न विशेष्यते, दशतोर्विंशतिरिति । न हि भवति कृष्णस्य काष्र्ण्यमिति, अपि तु काकस्य काष्र्ण्यमिति । एवं व्यभिचाराद् गोभिर्विशेष्यतेऽश्वादिव्यावृत्तये विंशतिसंख्या गवां विंशतिरिति । दाशतसङ्घरूपायाश्च विंशतेः पारम्पर्येण गावः संबन्धिन्यो भवन्त्येव । भावानयने द्रव्यानयनाच्च गोविंशतिमानयेत्युक्ते गाव आनीयन्ते । तदेवं व्युत्पत्तिपक्षः समर्थितः । सहस्रादयस्तु पृषोदरादित्त्वादनुज्ञातसाधिमानः । अनयैव वा दिशा तेऽपि व्युत्पाद्याः ।। 19 ।।

उपलक्षणत्वाद् विंशत्यादीनाम् एकविंशतिरेकत्रिंशदित्यादयोऽपि संख्याशब्दाः एव । न ह्यत्रावयवौ संख्यावचनौ, न समुदायः । यतः

एकविंशतिसंख्यायां संख्यान्तरसरूपयोः ।
एकस्यां बुद्ध्यनावृत्त्या भागयोरिव कल्पना ।। 20 ।।

"एकादीनां दशादिभिर्द्वन्द्व इति चेद् विंशत्यादिषु वचनप्रसङ्गः"(Va.16.on.P2.2.29.M.Bha.I.p.434,1.17.) इति चोदयित्वा

"सिद्धं त्वधिकान्ता सङ्ख्या समानाधिकरणाधिकारे अधिकलोपश्च"(Va.17.onP.2.2.29.M.Bha.I.p.434,1.17.) इत्येकेनाधिका विंशतिरेकविंशतिरिति वार्त्तिके तत्पुरुषवृत्तिमुक्तां स्वरदोषादुपेक्ष्य एकश्च विंशतिश्चेत्येकविंशतिरित्येव भाष्येऽन्वाख्यानमङ्गीकृतम् । तथा चावयवौ संख्या स्यान्न समुदाय इति वचनप्रसङ्गपरिहाराय कथ्यते । अवयवार्थपरिकल्पनया व्युत्पत्तिमात्रमिदं क्रियते, न त्वत्रावयव एकसंख्या विंशतिसंख्या वा । परमार्थतो नरसिंहवन्निरस्तावयवविभागा ह्यन्यैवेयं संख्या भिन्नबुद्धिग्राह्या । न हि प्रत्यवयवमावर्ततेऽत्र बुद्धिः, संख्यान्तरस्यैवाभेदेन परिच्छेदात् । उपायपरिकल्पना तु विलक्षणा । कश्चित् किल नव द्वादशेति सङ्कलय्य एकविंशतिरित्यवैति । अन्यो दश चैकादश चेत्यादि । अन्यः पुनरेकश्च विंशतिश्चेति । अन्वाख्यानाय भागयोरिव परमार्थत एकस्याम् अस्यां संख्यायामियं कल्पना । यथा जातिविशेषप्रतिपत्त्यर्थं नर इति सिंह इति चांशापोद्धारः । न ह्यंशयोरत्र बुद्धिरावर्तते, अखण्डत्वात् ।। 20 ।।

भवतु संख्याद्वयारब्धेयं संख्या, किं निरस्तावयवविभागया अन्यया संख्ययेत्याशङ्क्य शास्त्रकार्यानुपपत्तिप्रसङ्गेनैतन्निवारयितुमाह ।

असंख्यासमुदायत्वात् संख्याकार्यं विधीयते ।
समूहत्वे तु तन्न स्यात् स्वाङ्गादिसमुदायवत् ।। 21 ।।

निरस्तावयवविभागा सरूपावयवाखण्डश्रुतिगोचरा दशादिवदन्यैव यतो भवतीयं संख्या. ततः संख्यायां विहितकार्यं प्रवर्तते । एकविंशतिरधिकास्मिन् शते एकविंशं शतम् । एवमेकत्रिंशम् ।

`शदन्तविंशतेश्च' (P.5.2.46.) इति डः । तत्रं हि

"शद्ग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात् स तदादेरधिकार्थम्' (Va.I.onP.5.2.46,M.Bha.II,p.381,1.8.) इत्युक्त्वातिप्रसङ्गनिवारणाय

`सङ्ख्याग्रहणं च' (Va.2.on.P.5.2.46,M.Bha,IIp.381,1.12.)

इत्युक्तम् । तथा च शदन्तो विंशत्यन्तश्च संख्यावाची गृह्यते, न तु गोत्रिंशद् गोविंशतिरित्यादि । एकविंशतितयमिति च संख्याकार्यमवयविनि तयप् । एकविंशतितममेकविंशमिति च पूरणे डट् । तत्र च

`विंशत्यादिभ्यस्तमडन्यतरस्याम्' (P.5.2.56.) इति तमट् । एकविंशतिकृत्व इति

"संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" ।(P.5.4.17.)

एकविंशतिमयम्[द्विमयम्] उदश्वद्यवानामिति

"संख्याया गुणस्य निमाने....."(P.5.1.22.)

इति निमाने वर्तमानात् संख्याशब्दान्निमेये मयट् । एकविंशतिक इति परिमाणिनि

"संख्याया अतिशदन्तायाः"(P.5.1.22.)

इति कन् । त्यन्तप्रतिषेधोऽत्र(न?) भवत्यर्थवतस्तत्र तिशब्दस्य ग्रहणात् । अदिकैकविंशा इति च

`संख्ययाव्ययासन्न....' (P.2.2.25)

इति बहुव्रीहिरपि संख्याकार्यम् । अवयवसंख्याद्वयमय्यां त्वस्यां समूहरूपायामेकविंशतिसंख्यायां संख्याकार्यं न स्यात् । तद् यथा-पाणिपादेन स्वाङ्गसमुदायेन भिन्नकार्यस्य स्वाङ्गान्तरस्यानारम्भात् स्वाङ्गसमुदायो न स्वाङ्गमिति कल्याणपाणिपादेति

`स्वाङ्गात्.....'(झ.4.1.54.)

ति ङीष् न भवति । तथा जनपदाभ्यां जनपदान्तरस्यानारम्भाज्जनपदसमुदायो जनपदग्रहणेन न गृह्यत इति जनपदलक्षणो वुञत्र न भवति । काशिकोसलीय इति भवार्थे

`वृद्धाच्छः'(P.4.1.114.)

एव भवति । एवमत्र संख्याभ्यां संख्यान्तरस्य भिन्नव्यपदेशस्य विलक्षणस्यानारम्भात् तत्समूहमात्ररूपत्वे संख्याकार्याभाव इति संख्यान्तरम् । एकविंशतिसंख्या च यथाकथंचिदवयवपरिकल्पनया व्युत्पाद्येतेति द्विवचनप्रसङ्गाभावः ।। 21 ।।

इह कथं संख्यया समासः द्विदशा त्रिदशा इत्यादौ । दशसंख्यया हि द्व्यादिसंख्या सम्बध्यमाना किं सञ्चष्ट इत्याह ।

संख्येयान्तरतन्त्रासु या संख्यासु प्रवर्तते ।

आवृत्तिवर्गसंख्येया तां संख्यां तादृशीं विदुः ।। 22 ।।

द्विर्दश द्विदशा इति

`संख्ययाव्ययासन्न.....' (P.2.2.25.)

इत्यादिना बहुव्रीहिरयं समासः । तत्र च संख्येयान्तरं द्व्यादिसंख्याविषयात् संख्येयाद् अन्यत् संख्येयं परिच्छेद्यं तन्त्रं प्रधानं यासां दशादिसंख्यानां तासु संख्येयप्रधानासु दशादिसंख्यासु यान्या द्वित्वादिका संख्या प्रवर्तते संबन्धमनुभवति समासार्थं तस्या दशादिसंख्यावृत्तिः पुनः पुनः प्रवृत्तिः दशादिसंख्यापरिच्छेद्यो वा वर्गो दशावयवसमूहः संख्येयः परिच्छेद्य इति तां द्वित्वादिकां संख्यां तादृशीम् ावृत्तिवर्गसंख्येयप्रधानां विदुः जानन्ति शाब्दिकाः किल । संख्या अस्या न परिच्छेद्यॉं । सा हि दशसु संख्येयेषु गुणभूतेति न द्वित्वेन योगं भजते । अत एव संख्येयान्तरतन्त्रासु इत्यनेनासंबन्धे हेतुरुक्तः । दशसंख्यासंक्येयेनापि विरोधाद् द्वित्वं न संबध्यते । न हि दश द्वाविति युज्यते । तस्माद् दशसंख्याया आवृत्तिर्द्वित्वपरिच्छेद्या । द्वौ वारौ हीयं दशसंख्या द्विर्दश इति । अत एवाभ्यावृत्तिविषयः सुच्प्रत्ययो वाक्ये । दशावयवो वर्गः परिच्छेद्यो द्वौ दशतावित्यस्ति समन्वयः ।। 22 ।।

श्रुतैव दशसंख्या तत्संख्येया वा दश कथं द्वित्वसंख्यया न परिच्छेद्या इत्याशङ्क्य व्याख्यातामेव युक्तिमुपन्यस्यति ।

न संख्यायां न संख्येये द्वौ दशेत्यस्ति सम्भवः ।

भेदाभावान्न संख्यायां विरोधान्न तदाश्रये ।। 23 ।।

दशसंख्या तावत् संख्येयोपसर्जनत्वान्नार्हति द्वित्वसंख्यासंबन्धमत्रेत्युक्तम् । उपसर्जनत्वेऽपि च बुद्ध्या प्रत्यवमृश्य सम्बन्धे प्रधानेन संख्येयेन योगो भवेद्, यद्युपसर्जनमर्हेत् संबन्धम् । यावता दशसंख्याया एकत्वात् द्वित्वेनासंबन्धः तत्संख्येय अपि दश विरोधाद् द्वित्वेन नावच्छिद्यन्ते । न हि दश द्वौ भवतीत्युक्तमेव । उत्तरा हि संख्या पूर्वसंख्याकृतं व्यपदेशं बाधते ।। 23 ।।

तस्मात्

संख्यायेते दशद्वर्गौ द्विदशा इति संख्यया ।

तद्रूपे वापि संख्येये आवृत्तिः परिगण्यते ।। 24 ।।

दशसंख्यापरिच्छिन्न एको वर्गस्तादृशमपरमाख्यातुं द्वित्वमुपादीयते । तेन द्वयोर्दशगद्वर्गयोर्द्वित्वमत्रावेद्यते । द्वौ दशतौ द्विदशाः । संबन्धान्यथानुपपत्त्या दशशब्दोऽत्र वृत्तिविषये दशद्वर्गे वर्तते । वर्गश्च वर्ग्यभेदापन्नो विवक्ष्यत इत्यवयवगतभेदाश्रयं बहुवचनम् । वर्गवाची चात्र डतिप्रत्ययो वृत्तौ अत एव दशदिति न प्रयुज्यते, वर्गिप्राधान्यात् । तद्रूपे दशसंख्य एव संख्येये सति दशसंख्याया आवृत्तिः पुनः पुनः प्रवृत्तिर्वा गण्यते द्वित्वेन । द्वौ वारौ द्विः, द्विर्दश द्विदशाः । दशशब्दोऽत्र संख्येयमेवाचष्टे । गुणभूतसंख्याद्वारेण तु द्वित्वेन युज्यन्ते दश संख्येयाः । दशसंख्या तु गुणभूतावृत्तिद्वारेण द्वित्वसंख्यायोगमनुभवति । दशसु संख्येयेषु हि दशत्वमावर्तमानं द्वित्वेन परिच्छिद्यते । तथा च संबन्धिसंबधात् संख्येयेषु हि दशस्वपि द्वित्वमन्वयीति तदाश्रयं बहुवचनं भवति । आवृत्तिगणनविषयस्य च सुचः समासेन गतार्थत्वात् प्रयोगो न भविष्यति । तदुक्तं वार्त्तिके---

`सुजभावोऽबिहितार्थत्वात् समासे' (Va.3.onP.2.3.25.M.Bha.I.p.427,1.23.)

इति । गतमेतत् ।। 24 ।।

`संख्याया अवयवे तयप्'(P.5.2.42)

इत्यत्र

"इह कस्मान्न भवति । बहवोऽवयवा अस्याः संख्यात इति"

(M.Bha.II.p.379 1.17.)

इति भाष्ये चोदितेऽभिहितम् ।

"अवयवे या संख्या तस्याः प्रत्यय उच्यते । न च काचित् संख्या अवयविन्यस्ति, यस्या बहुशब्दोऽवयवः स्याद् । "

(M.Bha.II.p.3 79.1.17-18.)

इति । अयमर्थः ।

"अवयविधानेऽवयविनि प्रत्ययः"(M.Bha.II.p.379,1.20)

इत्युक्तम् । न च संख्याशब्दवाच्या काचिद् विशिष्टावयविनी संख्यास्ति । ननु च कथं नास्ति यावता प्रयुज्यत एव वाक्यम्- `बहवोऽवयवा अस्याः संख्यायाः' इत्याह

`ननु चेयमस्ति संख्येत्येव' (M.Bha.IIp.379 1.18)

इति भाष्यम् । अस्योत्तरम् ।

नैषा संख्या । किं तर्हि । संज्ञैषा । (M.Bha.II.p.379,1.19.)

इति । एकत्वादिसंख्याविशेषाणामविशिष्टा संज्ञा नामधेयमेतत् संख्येति, न त्वस्य वाच्यः कश्चिदवयवी । ततश्च संख्यासामान्यनिवेशिनीयं प्रतिभेदमनुवर्तते संज्ञा । न च सामान्यविशेषयोरवयवावयविभावः । कल्पितत्वेऽपि चावयविनः कार्यभेदो रूपभेदः समाख्याभेदश्च भिद्यते । तद्यता वनादेर्विविक्तवृक्षकार्याद्धि समुदितवनकार्यमन्यत् । अत एव रूपभेदः । समाख्या च वृक्षा वनमिति भिन्ना । इह तु परिच्छेदलक्षणं कार्यमेकत्वादिव्यतिरिक्तं संख्याया नास्ति । किञ्चिद्रूपमपि न विविक्तमेकादिव्यतिरिक्तमवधार्यते शुक्लादिव्यतिरेकेणेव रूपस्य । समाख्या त्वर्थाभावादेव न भिन्ना । अपि तु विशेषविषयसामान्यगोचरेयं संज्ञा संख्येति । बहुत्वमपि चैवं त्रित्वादीनां सामान्यमिति बहवोऽवयया अस्यां विंशतौ त्रिंशति वेत्यप्यवयवावयविभावेन योगो न भवति । अपि तु सामान्यविशेषभावेनैव । तथा च यथा बहुतयं रूपमिति शक्लादिव्यतिरेकेण कूपावयविनोऽभावान्न भवति, तथा बहुतयी विंशतिः त्रिंशदित्यपि न भवति । न हि परिच्छिन्नरूपाया विंशत्यादिसंख्यायाः सामान्यरूपमनवधारितविशेषं बहुत्वमुपपद्यते विशेषणम् । तदेतद् भाष्योपक्षिप्तमनुवदति--

संख्या नाम न संख्यास्ति संज्ञैषेति यथोच्यते ।
रूपं न रूपमप्येवं संज्ञा सा हि सितादिषु ।। 25 ।।

सितपीतनीलादिवर्णव्यतिरेकेण यथा विलक्षणकार्यस्वभावं रूपं नाम वर्णान्तरं नास्ति, सितादीनां रूपसामान्यनिमित्ता तु संज्ञा रूपमित्येषा, तथैकत्वादिसंख्याभेदव्यतिरेकेण संख्या नाम अवयविनी न विद्यतेऽन्या । समाख्यामात्रमेषां सर्वेषां

सामान्यभूतमित्युक्तोऽर्थः ।। 25 ।।
सामान्यसमाख्यात्वमेवोपपादयति ।
संख्यानजातियोगात् तु संख्या संख्येति कथ्यते ।
रूपत्वजातियोगाच्च रूपे रूपमिति स्मृतम् ।। 26 ।।
जातिनिमित्तोऽयमुभयरूपोऽपि व्यपदेशो भाष्यकारेण स्मृतो न व्यतिरिक्तार्थनिबन्धन इति बहुतयी संख्या बहुतयं रूपमिति प्रयोगाभावः । न तर्हि भवति बहुतयं चित्ररूपमिति ?। भवति, चित्ररूपस्यावयविन एकत्वान्नीलाद्यवयवयोगोपपत्तेः । एकं चित्रं चेति, चित्रतरमिति चेति भेदसंविदावेदिततत्त्वाः पदार्थाः प्रत्याख्यातुमशक्या एवावयविसामान्यादय इत्यद्वयसिद्धावस्माभिर्विचारितम् । ग्रन्थगौरवभयान्नेह प्रतन्यते । तत् तत एव अवधार्यम् । तथा च चित्रमिति रूपमेकावयविसमवेतमित्यवयवबहुत्वेनावच्छेदमर्हत्येव । किञ्चित् किल चित्रं पीतनीलारब्धं द्वयवयवम्, किञ्चित् पुनः सितरक्तपीतादिबहुविधावयवारब्धमित्यस्ति साफल्यं विशेषणस्य । गतभेदः ।। 26 ।।
संख्याविषयमन्यद् विचार्यते । इह
`बहुषु बहुवचनम्' (P.1.4.21.)
इत्यादिना संख्या विभक्तिवाच्या विहिता । तत्र स्वशब्देनाभिहितायामस्यामेकादिभ्यो वचनग्रहणात् प्रथमा लभ्येत । द्वित्वादयस्तु कथम् । तथाहि-कर्मादिष्वपि विभक्त्यर्थेष्ववस्यमेकत्वादयो निमित्तत्त्वेनापादेया इत्युक्तत्वात् कर्मणि यदेकत्वमेकत्वाद्यवच्छिन्ने वा कर्मणीत्याश्रयणादनभिहितकर्माद्याश्रयेष्वेकत्वादिषु विभक्तय इत्यभिहिविषये तदभावादेकं द्वौ बहूनीत्यादिकं कथमित्याशंक्याह ।
निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ।। 27 ।।
प्रथमासाधारणमिदं प्रतिसमाधानम् । तथाहि-प्रातिपदिकार्थसमवेतायां संख्यायां प्रातिपदिकार्थे वा संख्यासंबन्धिनि पक्षान्तराश्रयेण वा प्रथमायां विधीयमानायामेकादिशब्दस्य प्रवृत्तिनिमित्तमेकत्वादि न तया अभिधीयते, प्रातिपदिकेनैवैकादिशब्देन तस्याभिधानात् । तद्वतः प्रवृत्तिनिमित्तभूतैकत्वाद्यवच्छिन्नस्य प्रातिपदिकार्थस्य यद् अन्यदेकत्वादि तत्र वाच्ये प्राधान्येन प्रकृत्यर्थविशेषणत्वेन वा विभक्तिः प्रथमा विधीयते इति प्रातिपदिकेन स्वनिमित्तभूतैकत्वाद्यभिधानेऽपि तदपरैकत्वाद्यभिधानाय प्रवर्तत एव एको द्वौ बहवः इति । एकशब्दस्योदाहरणार्थत्वात् तद्वतस्तु यदेकत्वम् इत्याह । द्वित्वाद्यपि हि गृह्यते द्वयादिशब्दविषयम् । तथा विभक्तिग्रहणस्य द्वितीयादिसाधारणस्योपादानाद् द्वितीयाद्यपि प्रातिपदिकेनानुक्तमेकत्वादि कथयतीत्युक्तं भवति एकं द्वौ बहून् पश्येत्यादौ । न ह्यत्र प्रातिपदिकेन कर्मादिगतमेकत्वादि स्पृष्टमिति तद्विषया द्वितीयाद्या विभक्तयः ।। 27 ।।
ननु च नात्र प्रकृतिप्रत्ययवाच्यं संख्याद्वयमवधार्यत इत्याह ।
एकस्य प्रचयो दृष्टः समूहश्च द्वयोस्तथा ।
निमित्तव्यतिरेकेण संख्यान्या भेदिका ततः ।। 28 ।।
इह एकस्य तदपरेण समुच्चीयमानस्य प्रचयो दृष्टः । तथा हि सति प्रचयेऽन्यसाहभाव्ये द्वित्वादिसंख्या जायन्ते । द्वयोः च समूहः समुदायोऽभेदो दृष्टः । तद्यथा द्विपुत्र इत्यादौ निवृत्तेऽपि द्विवचने वृत्तावसाववगम्यतेऽन्तरङ्गः । ततः प्रचयसमूहदर्शनाद्धेतोः प्रातिपदिकार्थस्य यन्निमित्तमेकत्वादि एकादिशब्दविषयं तद्व्यतिरिक्ता अन्या विभक्तिवाच्या एकत्वादिसंख्या विद्यते । बहूनामपि समूहो दृष्ट इति योजनीयं बहुपुत्र इत्यादौ । तदियं विशेषावस्थापनेन प्रातिपदिकार्थस्य भेदिका अवच्छेदिका संख्या विभक्तिवाच्यात्रावधार्यत एव । तथा हि प्रातिपदिकात् प्रचितापचितसाधारणमेकत्वमवगम्यते । विभक्तेस्तु विशेषनिश्चयोऽर्थस्य परिसमाप्तेरेक इत्यपचितमिदमेकत्वमिति । एवं द्वौ बहव इत्यसमूहरूपता । यद्येवं प्रचितविषये एकत्वे विभक्तिर्न स्याद् एकश्च एकश्चेति । नैतन्न्याय्यम् । साधारणे एकत्वे प्रातिपदिकवाच्ये विभक्तिर्विशेषं द्योतयति इत्युच्यते । तथा च विभक्त्यात्र द्वित्वाद्युपजनहेतुतामप्रतिपद्यमानमप्रचितमेवैकत्वमावेद्यते । पश्चात्तु पदार्थे पर्यवसिते चशब्दः प्रचयं

द्योतयति पदार्थपृष्ठपातिनम्, न तु प्रातिपदिकार्थगतम् । प्रातिपदिकार्थप्रचयविवक्षायां हि सहविवक्षाविषय एकशब्दाप्रयोग इति ।। 28 ।।

"संख्याया अन्यपदार्थत्वात्" (cf.Va.25.onP.1.2.64.) इत्यादिना एकशेषप्रत्याख्याने तत्समानार्थद्व्यादिशब्दप्रयोगो द्वित्वाद्युपजनात् प्रातिपदिकार्थप्रचयविषये समयाद् विभक्तिर्भविष्यति । यदि सामयिकी नियोगतोऽन्यापि कस्मान्न भवन्ति,कर्मादीनामभावाद् इत्यपरमत्र प्रतिविधानं भाष्य उक्तम् । तथा हि `न केवला प्रकृति? प्रयोक्तव्या' इति `परश्च' (P.3.1.2.)

इति समयपालनार्थं विभक्तौ विधीयमाना(या?)मर्थविशेषानाश्रयणाद् वचनसङ्कर प्राप्नोतीति यथायथमर्थानुगुण्येन विभक्तयोऽङ्गीकृताः । तथा चाभिहितेऽपि रवार्थे एकादिशब्देभ्यस्तदानुगुण्येनैव प्रकृत्यर्थानुविधायिन्यो विभक्तय इत्युपगतं भवति । स्वाभाविकत्वादर्थाभिधानस्य विभक्त्या सह प्रकृतिः स्वार्थमभिधत्त इत्ययमेव नियमः परवचनेन प्रतिपादितः । तदेतद् व्याचष्टे ।

तदेकमपि चैकत्वं विभक्तिश्रवणादृते ।
नोच्यते तेन शब्देन विभक्त्या तु सहोच्यते ।। 29 ।।

स्वाभाविकं सहाभिधानं यथायथं सर्वत्रैव विभक्तिविधाने प्रतिपाद्यते । वृत्तौ तु लुका केवलेनाभिधानं ज्ञाप्यते । शक्तिविशेषो हि शब्दानां वृत्तावुपजायत इति केवलस्याप्यभिधानं न विरुध्यते । एवं संबुद्धिलोपेऽपि केवलप्रयोगः स्वाभाविकः ।। 29।।

अन्योऽप्यत्र परिहारोऽभिहितो भाष्ये

"संख्या नामेयं परप्रधाना । संख्येयमनया विशेष्यम् । यदि चात्र प्रथमा न स्यात् संख्येयमविशेषितं स्यात् ।"(M.Bha.I,p.423,1.8.)

इति । एतद् व्याचष्टे ।

अन्वयव्यतिरेकौ च यदि स्याद् वचनान्तरम् ।
स्यातामसति तस्मिंश्च प्रकृत्यर्थो न कल्प्यते ।। 30 ।।

वृक्षः वृक्षौ वृक्षा इत्यादौ प्रकृतिप्रत्ययोः अन्वयव्तिरेकौ स्तः । तथा चोक्तम्

`दृष्टो ह्यव्यतिरेकेऽपि व्यतिरेकोऽन्वये सति' (Vak.III.सा.43.)

इत्यादि । ततश्च

तत्र योऽन्वेति यं शब्दमर्थस्तस्य भवत्यसौ ।

इति भेदेनापोद्धारकल्पना युक्ता । इह त्वेकशब्दादेकवचनमेव द्विशब्दाद् द्विवचनमेव बहुशब्दाद् बहुवचनमेव, न वचनान्तरमित्यसति व्यतिरेकेऽन्वयस्यानिश्चयात् प्रकृत्यर्थो विवेकेन नावधार्यते । असति हि वचनान्तरेऽन्वयव्यतिरेकौ न स्तः इति एकादिशब्दलक्षणायाः प्रकृतेरभिधेयं प्रत्ययार्थव्यतिरिक्तं न संभवत्यत्र येन संख्येयमवछिन्द्यात् प्रकृतिः केवला । तथा च वृक्षादावेकवचनादीनामन्वयव्यतिरेकार्थनिर्धारणादिह तदभावे प्रकृतिप्रत्ययसमुदायवाच्योऽयमर्थः येनं संख्येयो विशेष्यते संख्यालक्षणेन । तथा चानुक्तार्थत्वादेव भवति । वृत्तौ त्वेकस्या एव प्रकृतेरेकराजादवु(दिरु?) पसर्जनार्थोऽवगम्यते प्रधानार्थसम्भेदमापन्न इति विभक्तिश्चरितार्थत्वान्निवर्तते । यथा हि विना भावप्रत्ययं वृत्तौ तदर्थावगतिः निराकुलस्तिष्ठति सधीरमुवाचेत्यादौ एवमत्र विभक्तिमन्तरेणापि तत्सन्निधानदृष्टमेकत्वाद्युपसर्जनार्थोऽवगम्यत एव । तदेवं पूर्वत्र परिहारे प्रकृत्यर्थानुवादकत्वमभिमतम् । सत्यपि प्रकृत्यर्थे यथायथं तदर्थानुवादकत्वेन वचनानामुक्तत्वात् । इह तु साधारणार्थत्वमभिमतं प्रकृतिप्रत्ययसमुदायवाच्येनार्थेन संख्येयविशेषणस्योक्तत्वादिति परिहारयोर्भाष्यकारोक्तयोर्विशेषः ।। 30 ।।

अन्योऽत्र भाष्ये परिहार उक्तः--

"उभयवचना एवैते द्रव्यं चैवाहुर्गुणं च । यत् स्थोऽसौ गुणस्तस्यानुक्ता एकत्वादय इति प्रथमा भविष्यति"

(M.Bha.I,p.c.441,1.10.)

इति। एतद् व्याचष्टे

एकत्वमेक इत्यत्र शुद्धद्रव्यविशेषणम् ।
सगुणस्तु प्रकृत्यर्थो विभक्त्यर्थेन भिद्यते ।। 31 ।।
शुद्धस्य द्रव्यस्य पूर्वं विशेषणाद् बुद्ध्या निर्ज्ञातस्य विशेषणभावमापन्नं एकत्वमेकः इति प्रातिपदिकेनाभिधीयते । उक्तशब्दो ह्येकत्वविशिष्टं द्रव्यमाह, न संख्यानमात्रमपि विंशत्यादिवत् । अत एवोभयवचनत्वं विशिष्टवचनत्वं विवक्षितं भाष्ये । न तु केवलगुणाभिधानं शुक्लादिवदेषामुपपद्यते । यदि वा
द्व्येकयोः (P.1.4.22.)
इति निर्देशात् संख्यानमात्रवचनत्वभमपीत्युयवचनत्वं स्पष्टम् । तदस्यैकशब्दवाच्यस्य ेकत्वविशिष्टस्य द्रव्यस्य विभक्तिवाच्येनैकत्वेन विशेषणात् सगुणः प्रातिपदिकार्थो विभक्त्यर्थेन भिद्यते विशेषेऽवतिष्ठते । एकत्वविशिष्टोऽयमेकोऽर्थो न तु गुणान्तरविशिष्ट इति प्रकृतिवाच्यमन्तरङ्गं विभक्तिवाच्यं तु बहिरङ्गं बाह्यमिति द्व्यादीनां च द्विपुत्र इत्यादौ बाह्यो भेदो निवर्तते विभक्तिवाच्य इति वक्ष्यति । अन्ये तु शुद्धं च द्रव्यविशेषणं चेति समाहारे द्वन्द्वं मत्वा संक्यानमात्रप्रधानं संख्येयोपसर्जनं चैकत्वं संख्यासंख्येयसामान्यरूपं प्रातिपदिकेनोच्यते । सह गुणेन संख्यानेन यो वर्तते प्रातिपदिकार्थः स विभक्तिवाच्येन भिद्यते अवच्छिन्नः प्रकाश्यते इति विभक्त्यन्तवाच्यं संख्येयं प्राधान्येनेति व्याचक्षते । यस्मिन् द्रव्ये स्थितो गुणः सङ्ख्यानं तस्यानुक्ता एकत्वादयो द्रव्यावच्छेदितया नोक्ता इति चात्र भाष्यार्थः ।। 31 ।।
ननु विभक्त्यन्तेन संख्येयस्य प्रतिपादनात् केवलस्य प्रयोगाभावाद् गुणमात्र वृत्तित्वं कथमेकादीनामवधार्यत इत्याह ।
द्वयेकयोरिति निर्देशात् संख्यामात्रेऽपि सम्भवः ।
एकादीनां प्रसिद्धा तु संख्येयार्थत्वमुच्यते ।। 32 ।।
द्व्येकयोः.....(P.1.4.22.)
इति द्विवचननिर्देशाद् द्वित्वैकत्वयोर्द्वित्वाद्युपपद्यते । संख्येयाच्च निष्कृष्टयोर्द्वित्वै कत्वयोरभिधाने युक्तमिदम् । अन्यथा नित्यसंख्येयप्राधान्ये द्वावेकश्च त्रय इति बहुवचनं स्यात् । आदशभ्यः संख्या संख्येने वर्तन्ते इति लौकिकीं प्रसिद्धिमाश्रित्य भाष्ये
"स्यादेतद् यत्र नियोगतः संख्या संख्येते वर्तते"
इति संख्येयाख्यायित्वमुच्यते । अयमत्रार्थः । संख्यानमात्रे लौकिके प्रयोगे नैषां वृत्तिः । तत्र हि पदं प्रयुज्यते । विभक्त्यन्तं च पदम् । विभक्तिश्च संख्यां प्रातिपदिकार्थसमवेतामाहेति नियतं तत्र संख्येयावधारणम् । शास्त्रे त्वपोद्धारबुद्ध्या संख्यानमात्रवृत्तित्वं वृत्तावसति विभक्तिप्रत्यये काममुपपद्यते इति ।। 32 ।।
इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे संख्यासमुद्देश एकादशः ।।

Ssamudesha

अथ संबन्धसमुद्देशः ।
---
(1) समुद्देशद्वयेन जातिद्रव्ये दर्शनभेदेन शब्दार्थमवस्थाप्य शब्देनार्थस्याभिधाने संबन्धो हेतुः, अन्यथा सर्वं सर्वेण प्रत्याय्येतेति तत्र संबन्धं प्रतिपादयितुमाह--
ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते ।
शब्दैरुच्चरितैस्तैषां संबन्धः समवस्थितः ।। 1 ।।
(2) प्रयोगोणाभिज्वलितैः शब्दैस्त्रितयमवगम्यते-आत्मीयं रूपम्, अर्थश्च फलसाधनः, प्रयोक्तुरभिप्रायश्च न चैतदसति संबन्धे

नियमेन घटत इति वास्तवसंबन्धावसायो न सामयिकः शब्दार्थयोः संबन्धः, अमिधानियमनादनादेः । अत एव समवस्थित इत्याह । स्वभावत एव निरूढो न तु पुरुषेण निवेशित इत्यर्थः ।

(3) तत्र स्वरूपमन्तरङ्गमिधेयमिति तेन मुख्यसंबन्धोऽमिधाननियमः । अत एवान्यथापि पाठक्रमे सामर्थ्यात् स्वरूपे प्रथमं प्रतिपत्तिर्विभजनीया ततोऽध्यस्तस्वरूपेऽर्थक्रियाकारिणीत्याभ्यामर्थस्वरूपाभ्यां शब्दस्य वाच्यवाचकसंबन्धः प्रयोक्तृभिप्रायेण तु सह कार्यकारणभावः ।

(4) ननु च वाच्यावाचकभावलक्षमः संबन्धः प्रस्तुतः । तत्र कः प्रसङ्गो ज्ञानस्वरूपयोः सत्यम् । सर्वपार्षदं पुनरिदं शास्त्रमिति ये बाह्यस्यार्थस्य शब्दवाच्यत्वं नेच्छन्ति तन्मतोपसङ्ग्रहार्थं वक्त्रभिप्रायारूढस्यैव शब्दार्थत्वे तत्र कार्यकारमसंबन्धमाह ।

(5) यथाहुः--

वक्त्रृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते ।
प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ।।

इति । अत एव द्विविधः संबन्धपदार्थो व्यवतिष्ठते, योग्यता कार्यकारणभावश्च । अध्यासस्तु द्वयोरपि परमार्थ एव, न पृथग्रूपः ।। 1 ।।

(6) यथा चेहोपचारसत्तासमाविष्टं वस्तु शब्दार्थं वक्ष्यति तथा कार्यकारणभावोऽपि संबन्धः स्वरूपस्य तु मुख्यमेव वाच्यत्वमित्याह--

प्रतिपत्तिर्भवत्यर्थे ज्ञाने वा संशयः क्वचित् ।
स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते ।। 2 ।।

(7) अयं गौरयमर्थ इति शब्दार्थयोरभेदावभासनात् स्वरूपमभिदधदेव शब्दोऽर्थमभिधत्त इति निश्चयिते । स्वरूपाविवेकेनैव ह्यर्थपरामर्शोऽभिधानमुच्यते । वृद्धव्यवहारात्तथैव संबन्धव्युत्पत्तेः । तथा हि अयं गौरिति सङ्केतः क्रियते, भेदेनैव घटशब्दस्यायमर्थ इति तु व्याख्यातृभूमिर्न व्यवहारदशा अत्रापि चायमिति शब्दाभेद एव । यदा गौरित्युच्यते तदायं सास्नादिमानर्थो बोद्धव्य इत्यप्ययमित्यभेदेनैव परामर्शे सङ्केतप्रवृत्तिः व्यवहारफलो हि सङ्केतः । यथा च लौकिके व्यवहारे प्रतीतिस्तथासौ न्याय्यः । अभेदेन च तत्र प्रतीतिः ।

(8) प्रतीतौ हि किञ्चित्तटस्थमेव तामननुप्रविशदेवोपायमात्रं दृष्टं यथेन्द्रियम् । किञ्चित् पुनस्तत्रानुप्रविशदेव प्रतीतिं जनयद् व्यधिकरणं भवति दण्ड इव, यथा धूमादि लिङ्गम् । शब्दस्तु न जनकतामात्रेणार्थप्रतीतौ संबन्धमनुभवति, अपि तु तत्रार्थः शब्द्यमानः शब्दमय एवावभाति । तादृशा एव हि स प्रतीतिस्वभावः । रूढत्वाच्च न भ्रमः ।

(9) ननु न वर्णमालार्थे समुपलभ्यते । दर्शनानभिज्ञो देवानांप्रियः । इह शब्दो नाम वाचकः स उच्यते योऽयं चिच्छक्तेर्वागात्मा व्यापारः शब्दनापरपर्यायोऽब्रूयमाणोऽप्युपांशुप्रयोगे शब्द इति व्यवह्रियते यतः । तस्य च प्रथममुद्भिद्यमानावस्थस्याविभागापन्नशब्दार्थमयस्वभावस्य परवागात्मना स्वरूपेणावस्थानम् । परतस्तु प्राणवृत्त्यनुप्राणितमनोभूमिसमवलम्वितनिजस्वभावस्य वाच्यवाचकरूपभिन्नशाकाद्वयावलम्बिनः समवस्थानम् ।

(10) अस्यां च मध्यमावस्थायां परामर्शनात्मा वाचकः शब्दोऽभिन्नचैतन्योद्रेकात्मिकां परवागस्थामत्यजन्नेव स्वरूपवाच्यमुखेन तत्संभिन्नमर्थं परामृशति सामानाधिकरण्येन, गौरयमर्थ इति । तथा च स वाच्योऽर्थो वाचकाध्यासवानुच्यते । तदनु च स एव परमर्शकः शब्दः पूर्वावस्थावष्टम्भेनैव स्थानकरणाभिहननात्मावस्थोपारूढः श्रवणविषयतायोग्येनात्मना विभिन्नवाच्यवाचकरूपतया व्यक्तिमासादयन् स्फुटीभवतीत्येतावती शब्दव्याप्तिः । ततश्च परवाग्रूपनिष्पन्दात्मकस्यास्य शब्दस्य त्दरूपानुगमाच्छब्दनात्मकव्यापाररूपस्य स्वसामानाधिकरण्येनार्थरूपशब्दनादभेदेनैवैकया वृत्त्या स्वरूपविशेषेण विशिष्टमर्थाभिधानमवतिष्ठते । तद्यथा शुक्लः पटोऽयमिति शुक्लगुणच्छुरणया सकृदेव विशेष्यपटप्रत्यवमर्शः । न ह्यत्र शुक्लगुणस्य पृथक् परामर्शः । एवं घटोऽयमिति प्रधानभूतविशेष्यानुप्रवेशेनैव घटस्वरूपपरामर्श इत्येकैवेयं शब्दनात्मिका प्रतीतिः शब्दार्थयोः ।

(11) क्वचित्तु स्वरूप एव विश्रान्तिः, तद्यथा-`अग्निमन्तोदात्तमधीष्व,''अग्नेर्ढक्' इत्यादौ । अत्र ह्यनुकार्यं स्वरूपमेव

प्राधान्येनावस्थितम् । बाह्यार्थप्रतिपिपादयिषायां तु स्वरूपार्थयोः सम्भेदेनैवावभास इति न पृथक् स्वरूपपविमर्शः, अपि तु स एतस्यापि यतस्तदभेदभाजोऽर्थस्य । घट इति हि घटशब्देनार्थवत् स्वरूपभिधयैव विषयीक्रियते । ज्ञानशब्दप्रदीपास्त्रयो हि प्रकाशा येनैव प्रकाशेन परं प्रकाशयन्ति तेनैवात्मानमपि । तथा च ज्ञानमर्थं प्रकाशयति प्रथयति तथैवात्मानमपि प्रकाशयति । एवं प्रदीपो रूपभासयन्नात्मानमप्याभासविषयभावोपगमनेन प्रकाशयति ।

(12) तथा शब्दोऽपि वाचकोऽर्थमभिधीयमानतया प्रकाशयन्नात्मानमभिधयैव प्रकाशयतीत्युचितम् । न तु श्रोत्रेन्द्रियविषयभावोपगमनेन अर्थसामानाधिकरण्यापन्नं च स्वरूपमर्थवत् परामृश्यमानं शब्दस्याभिधानविषयोऽभिधेयम् । न तु वाचकतायामभिधीयमानतास्ति, परमार्शस्य परवगात्मनः कर्तृभूभ्युपारूढस्य प्रकाशस्य वाचकत्वात् तत्र च परामृश्यमानात्मकवाच्यताविरोधाता तथा चाह--

न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता ।

इति ।

(13) एवं च कृत्वा सर्वघटशब्दसाधारणं सामान्यरूपमर्थपक्षनिक्षिप्तमर्थसमानाधिकरणं स्वरूपमस्य वाच्यम् । अर्थवत्तत्सामानाधिकरण्यात्, तत्रापि तथा प्रतीतेः, सामान्यरूप एव च सङ्केतोपपत्तेः तेनैवार्थस्य सामानाधिकरण्यात्, तथैव च व्यवहारे श्रोत्रा प्रतीतेः, तदनुसारेणैव प्रतिपाद्यप्रतिपादकभावार्थमेकपरामर्शावस्थितौ सङ्केतोपपत्तेः अत एवच स्वाभिप्रायानुसारेण श्रोत्रा वक्तृज्ञानस्यानुमानात् स्वयं शब्दस्वरूपाध्यस्तमर्थमवबुध्य तथैव वक्तर्यनुमानमुचितमित्यभेदेनैव घटशब्दाध्यस्तं प्रयोक्तृज्ञानमवसीयते । तथा च ज्ञानमप्यध्यासेनैव शब्दः प्रतिपादयति वक्त्रवगतमिति तत्रापि परमार्थदृशाध्यास एव सबन्धः ।

(14) लोलीभूतानि शब्दार्थज्ञानानि घट इत्येवमवगम्यन्ते । यथोक्तम्--

न सोऽस्ति प्रत्यय.... ....

इत्यादि । अत एव

गौरित्यत्र कः शब्दः

इति प्रश्नः । तदहर्जातस्यप्यायमस्त्येव शब्दसंभेदः । सङ्केतसहत्वात् । एवं च कृत्वा तात्पर्यदृशाध्यास एव योग्यतायां कार्यकारणभावे च फलतः संबन्धयोऽवतिष्ठत इति स एव मुख्यः । ज्ञानस्यैव च परस्परसङ्क्रान्तिर्व्यवहार इति शब्देन स्वरूपाध्यस्तं ज्ञानमपि प्रतिपाद्यते परत्रेति तदपि तस्याभिधयैव प्रतिपाद्यमुपपद्यते । घटमानयेति नियुक्तो घटानयनेऽहमनेन प्रेषित इति शब्दपूर्वकमेव प्रतिपद्यते । तदाह वार्तिककारः--

न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययः ।

इति ।

(15) तदेवं शब्दनात्मकेन व्यापारेण परवागात्मनो व्यवहारे प्रवृत्ते प्रकाशस्य तज्जीवितत्वादेकशब्दनानुप्रवेशाच्छब्दार्थयोः सामनाधिकरण्यादभेदाध्यासारव्यसंबन्धविषयता सिद्धा । अविभागदशायां तु पश्यन्त्यभिधानायां वाच्यवाचकभेदानुल्लासान्नाध्यासचिन्ता काचित् इत्थं च कृत्वा शब्दैकजीवितत्वाद् व्यवहारेऽप्यर्थस्य तदवियोगात्तद्विवर्त्तरूपं विश्वं सिद्धमित्यास्तामेतत्, पूर्वमेव संप्रपचमस्यार्थस्य निरूपितत्वात् ।

(16) तत्रान्तङ्गत्वादहेयत्वादसाधारणत्वाच्च स्वरूपं मुख्यमभिधेयम् । तत्र हि सङ्केतानपेक्षा शब्दस्य वृत्तिः । तच्च जात्यादिपक्षभेदेन ब्रह्मकाण्डे निरूपितम् । अभिधानाभिधेयनिमित्तभेदाच्च भिन्नरूपमिति स्वरूपेषु इत्याह । तथा हि-कार-णसन्निवेशि वाचकम्, स्वरूपमर्थपक्षनिक्षिप्तं बाह्याभेदेन सञ्चेत्यमानं वाच्यम्, संबन्धसवेदनसमयानुभूतमभिन्नश्रुतिविषयनियामकत्वादर्थे प्रवृत्तिनिमित्तमिति त्रितयं सर्वत्राव्यभिचारि । व्यवहाराभ्यासाच्छुतिसाम्याच्च नैतत्रितयं विवेकेनावधार्यते । श्रुत्यविशेषाच्च तत्स्वरूपमिति व्यवह्रियते न तु सर्वथैवाविभेदात् । अप्रवृत्तसङ्केतस्य अर्थे त्ययमपि वकतृज्ञानविषयः सन्देहो जायत एवाप्रवृत्तसङ्केतस्याप्यक्षादिसामान्यशब्दादेव चाक्षादौ सन्देहो न तु स्वरूप इति सिद्धम् ।। 2 ।।

(17) संबन्धः समवस्थितः स्वभावत एव निरूढः, न तु सामयिका इत्युक्तम् । तस्य सद्भावे लिङ्गमाह ।
अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते ।
योगः शब्दार्थयोस्तत्त्वमित्यतो व्यपदिश्यते ।। 3 ।।

(18) अस्यार्थस्यायं शब्दो वाचकोऽस्य शब्दस्यायमर्थो वाच्य इति षष्ठ्यन्यथानुपपत्त्यास्त्येव स्वभाविकः शब्दार्थयोर्योग इत्यवसीमते । असंबद्धानां घटपटादीनामेवमन्योन्यापारतन्त्र्येण व्यवहारायोगात् । अत एव च स्वाभाविकात् घटपटदीनामेवमन्योन्यपारतन्त्र्येण व्यवहारायोगात् । अत एव च स्वाभाविकात् संबन्धाच्छब्दार्थयोस्तत्त्वं गौरयमर्थ इत्यभेदेन व्यवह्रियत इत्यर्थः । यदि वा अतः षष्ठ्याः सकाशात्तत्त्वं स्वरूपं संबन्धस्योच्यते ।। 3 ।।

ननु षष्ठी संबन्धस्य कार्यम्, स्वरूपनिवेशि तु लक्षणमुच्यतामित्याशङ्क्याह--
नाभिधानं स्वधर्मेण संबन्धस्यास्ति वाचकम् ।
अत्यन्तपरतन्त्रत्वाद्रूपं नास्यापदिश्यते ।। 4 ।।

(9) इह पदार्थानां स्वरूपमवधार्य तदनुगामिशब्दनिवेशेन लक्षणं क्रियते । तत्र स्वेन असाधारणे धर्मेण स्वभावेनोपलक्षितस्य वाचकं प्रत्यायकम्, अभिधानं षष्ठीव्यतिरिक्तं नास्ति, इदंतया स्वरूपानवधारणात् । गुणा द्रव्याधीना अपि प्राधान्येन शुक्लदिशब्देन कदाचिदुच्यन्ते, नैवं संबन्ध इति अत्यन्त ग्रहणम् । नित्यपरतन्त्रो हि संबन्धः परोपाधिस्वरूपः संबन्धिनो परस्परौन्मुख्यस्वभावो धर्ममात्रलक्षणः । ततो निष्कृष्य संबन्धशब्देन स्वप्रधानः संबन्धिरूपतयाभिधीयमानो न साक्षात् स्प्रष्टं शक्यत इत्यसंविज्ञानपदः कार्यैकगम्यः ।। 4 ।।

तदाह--
उपकारात्स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः ।। 5 ।।

(20) उपकार्योपकारकयोरुपकारप्रभावितः संबन्धोऽसंबद्धानामुपकाराभावात् । धर्म इति नित्यपारतन्त्र्यमाह । धर्मित्वे स्वातन्त्र्यात् संबन्धान्तरप्राप्तेरनवस्थापातात् । न च शक्तिरेव संबन्धः, शक्तीनामप्याधारपारतंत्र्ये नियतकार्यजनने च संबन्ध एव नियामको यतः, गुणनामपि च द्रव्याश्रितत्वास्थापकः संबन्ध एवेति परतन्त्राणामप्युपकारकत्वात् सर्वत्रानुमीयमानस्वरूपो नित्यपरतन्त्रः ।। 5 ।।

ननूक्त एव संयोगसमवायलक्षणः संबन्धः परैरिति कोऽतिश्यस्तप्रतिपादन इत्याशङ्क्याह--
तद्धर्मणोस्तु ताच्छब्द्यं संयोगसमवाययोः ।
तयोरप्युपकारार्था नियतास्तदुपाधयः ।। 6 ।।

(21) पारतन्त्र्यं संबन्धलक्षणमिति संयोगसमवाययोर्द्रव्यगुणादिषु तत्त्वात् संबन्धशब्दप्रवृत्तिः। तस्य संबन्धस्येव धर्मः पारतन्त्र्यलक्षणो ययोस्तौ तद्धर्माणौ । स्वरूपमात्रेण हि तौ संबन्धमनुकुरुतः । तथा च तस्य संबन्धस्येव शब्दस्तयोः, गौणः संबन्धशब्दः संयोगसमवाययोः, न तु मुख्यतस्तावेव संबन्धः । तथा हि-यदा स्वतन्त्रपदार्थन्तरवत् तयोरपि स्वगतोपाधिविवक्षा तदा तदुपक्रियमाणत्वात्स्वातन्त्र्ये सति पारतन्त्र्याभावात् स्वतन्त्रपदार्थवत् संबन्धरूपताहानिः । उपकारार्था उपकारप्रयोजनाः । नियतदा असाधारणाः । तदुपाधय इति । संबन्धस्य उपाधिर्येषाम्, असंबन्धानामनियामकत्वात् । इत्थं चोपाधिमन्तौ स्वतन्त्रौ यौ, ययोश्चोपाध्यवच्छेदे संबन्ध उपयोगी, तौ संयोगसमवायौ कथमुपाधिरूपेण परतन्त्रेण संबन्धनैकात्म्यं भजेतामिति स्वाश्रये संबन्धिप्रतीतिहेतुत्वात् संबन्धसधर्माणौ तौ ।। 6 ।।

तत्र संयोगस्य तावदुपाधयः ।
काचिदेव हि सावस्था कार्यप्रसवसूचिता ।
कस्याचित् केनचिद्यस्यां संयोग उपजायते ।। 7 ।।

(22) परस्परसंयोगेनावयवानामुपसर्पणप्रत्ययाहितेनावयवि द्रव्यं जायत इत्यसमवायिकारणं संयोगोऽवयव्यन्यथानुपपत्त्यावसीयते । तथा च द्रव्यैकनियतत्वं गुणत्वेन सत्तासंबन्धः संयोगस्तेनोपाधिरिति तत्रोपकारः संबन्धेन तस्यावच्छिद्यते । यत्परतन्त्रश्च संयोगस्तेनोपाधिना संबन्धानुगृहीतेनावच्छिद्यत इति पारतन्त्र्यं नाम संबन्धसामान्यरूपमस्यान्वयि न तु तदेकजीवितं पारतन्त्र्यम् अस्य गुणकर्मसामान्यादावपि भावादस्य च द्रव्यैकनियतत्वात् । किं च संयोगस्य गुणत्वात् संबन्धो गुणत्वसंयोगत्वसंबन्धश्च न पदार्थसंबन्धस्य सर्वपदार्थोपकारस्य तद्योगो द्रव्यगुणकर्मभ्योऽन्यत्वात् । वस्तुभूतकार्यकारित्वं च संयोगस्य, योजनामात्रहेतुस्तु संबन्ध इति भेदः ।

समवायादपि संबन्धस्य भेदं नियतोपादिनियमितसमवायस्वरूपानुवादेनाह--

निरात्मकानामुत्पत्तौ नियमः क्वचिदेव यः ।
तेनैवाव्यपवर्गश्च प्राप्त्यभेदे स यत्कृतः ।। 8 ।।
आत्मान्तरस्य येनात्मा तदात्मेवावधार्यते ।
यतश्चैकस्य नानात्वं तत्त्वं नाध्यवसीयते ।। 9 ।।
तां शक्तिं समवायाख्यां शक्तीनामुपकारिणीम् ।
भेदाभेदावतिक्रान्तामन्यथैव व्यवस्थिताम् ।। 10 ।।
धर्मं सर्वपदार्थानामतीतः सर्वलक्षणः ।
अनुगृह्णाति संबन्ध इति पूर्वेभ्य आगमः ।। 11 ।।

(23) सत्कार्यवादे कारणमेव कार्यं भवतीति प्रतिनियतैः शब्दैस्तज्जन्यत इति तत्रैव तदुपलंभो युक्तः । असत्कार्यनये तु नियतेष्वेव कारणेषु कार्यम्, तन्तष्वेव पटः, कपालेष्वेव घट इत्यादिबुद्धिहेतुः समवायोऽभ्युपगतः । सत्यपि च भेदे कार्यकारणयोः तेनैव नियमविषयेण कारणेनैव कार्यस्याविियोगो देशकालभेदात् प्राप्तेः संबन्धरूपतायाः संयोगेन सहाविशेषेऽपि समवायकृतः । तथा च संयोगात् समवायस्य भेदः । अत एव कार्यकारमयोरवयवावयविनोर्धर्मधर्मिणोर्जातितद्वतोर्गुणगुणिनोर पदार्थान्तरत्वेऽपि तादात्म्येनावमासः । यथायोगं स्वगतविशेषसद्भावात्तु तादात्म्यमतत्त्वमिति इव-शब्दः । तेनैवाव्यपवर्ग इत्युक्तस्यैवेदं फलकथनमिति न पौनरुक्त्यम् । अव्यपवर्गादेव ह्यन्यस्यात्मनावभासः । अत एव प्रवादिनां विमतिः, अवयवावयनिनोर्धर्मर्धार्मणोश्चैकत्वं केचिदिच्छन्ति केचिन्नानात्वमिति समवायव्यामोहादपि परमार्थतो न व्यवतिष्ठते । अनेन चायुतसिद्धिः समवायस्पोपाधिरुक्तः ।

(24) एवमयुतसिद्धानामिहप्रत्ययहेतुः समवायो नान्येषामित्ययं नियमः संबन्धेनसमवायस्यावेद्यते । यत्रैव हि पारतन्त्र्यमस्य तत्रवैहबुद्धिमभेदमिव च प्रकल्पयति द्रव्यगुणकर्मसामान्येषु शक्तयोऽपि वाधारपारतन्त्र्येण तेन नियम्यन्ते । समवायिष्विव च समवायस्यापि भेदस्तेभ्यो नावधार्यते । संमूर्छितरूपत्वेनावभासात् । इह प्रत्ययकार्यवशात्त्वनुमीयते सतत्त्वतः संबन्धिव्यतिरेकेणेत्येवं परप्रसिद्धम् । येन इति समवायमनूद्य तां शक्तिमिति शक्तित्वमस्य विधत्ते। अनुग्राहकत्वेन पदानामस्य तैस्तुल्यकक्षतया निर्देशानुपपत्तिरित्यर्थः । शक्तित्वादेव च भेदाभेदावतिक्रान्तत्वम् । तत्त्वन्यतत्वाभ्यामनिर्वाच्या हि शक्तयः । तथोक्तम्--

शक्तीनां वस्तुरूपत्वे तत्त्वान्यत्वविचारणा ।
युज्यते कल्पितानां तु युक्ताद्वयवियुक्तता ।।
इति ।

(25) तथा हि-समवायिसम्मूर्च्छितत्वेनावभासान्न ततो भिन्ना नाप्यभिन्ना । आश्रयासंभविनः कार्यस्येहप्रत्ययलक्षणस्य जननादिति तत्त्वान्यत्त्वाभ्यामनिर्वाच्यता । अतश्च अन्यथैव पदार्थवैलक्षण्येनेयमवस्थिता । यदि वेहप्रत्ययकार्यस्याभेदात्स्वतोऽभिन्ना, तस्यैव तु समवायिप्रकल्पितभेदत्वाद्भिन्नापीत्येवमेकापि सती संबन्धिनानात्वात्कल्पितभेदेति अन्यथा व्यवस्थिता । साधनादिशक्तीनां चाश्रयावस्थानेन उपकारिणी । तदेवंरूपामपि समवायाख्यां शक्तिं सर्वपदार्थगतस्वाधीनत्वलक्षणं धर्ममतिक्रान्तो नित्यपारतन्त्र्यलक्षणोऽत एवोपकारापेक्षं सर्वं वस्तु लक्षणं ज्ञापकमस्य न समवायस्येव प्रतिनियतं संबन्धिरूपमेवेत्येवंरूपः

संबन्धोऽनुगृह्णाति नियमयति, परतन्त्रे एवायुतसिद्धेऽवस्थापयति, पारतन्त्र्यसामान्यात् स्वव्यपदेशं च निवेशयतीत्यागमज्ञाः संबन्धलक्षणं पारतन्त्र्यमाहुः । एवंविधकार्यकारी संबन्धो नाम पदार्थविलक्षण इत्यागमेन द्रढयति ।। 9-11 ।।

एवं च कृत्वा संयोगसमवायावेव नेह संबन्धौ यथान्येषां दर्शनमित्याह--

पदार्थीकृत एवान्यैः सर्वत्राभ्युपगम्यते ।
संबन्धस्तेन शब्दार्थः प्रविभक्तुं न शक्यते ।। 12 ।।

(26) षट्पदार्थवादिभिर्वैशेषिकैर्गुणपदार्थे संयोगः प्रक्षिप्तः । समवायस्तु स्वतन्त्रः पदार्थ इत्युक्तनयेन पारतन्त्र्याच्छक्तिरूपोऽपदार्थोऽपि पदार्थः कृत इव तद्रूपसमारोपात् संबन्धः । न चेहास्य शब्दस्यायमर्थ इति नियमेन प्रविभागे शब्दार्थयोः सोऽभ्युपगन्तुं पार्यत इति तद्व्यतिरिक्तस्तयोरस्ति संबन्ध इत्यव्याप्तिः पदार्थसङ्ग्रहे वैशेषिकाणाम् । तथा हि--

समवायात् स्व आधारः स्वा च जातिः प्रतीयते ।
एकार्थसमवायात्तु गुणः स्वाधार एव ये ।। 13 ।।

(27) खाकाशगगनादयः शब्दाः स्वार्थमाकाशाख्यं तत्र समवायात् प्रतिपादयन्ति, स्वसमवेतां जातिं स्वरूपलक्षणां सर्वे शब्दाः समवायसंबन्धात् प्रत्याययन्ति, तस्याः शब्दव्यक्तिषु समवायात् । शब्दत्वमपि शब्दशब्दस्तत्र समवायात् प्रत्याययति । ये त्वाकाशगुणा महत्त्वादयस्तानेकार्थसमवायाच्छब्दाः प्रत्याययन्ति, महत्त्वादिशब्दानामसाधारणानां महत्त्वादिविशेषगुणानां वाकाशे एकत्र समवायात् । एवं शब्दव्यक्तिलक्षणा गर्जितकूजितभणितहेषितादयो गगनस्यासाधारणा गुणास्तदभिधायका अपि गर्जितादयः शब्दास्तदेकार्थसमवायादेव ।। 13 ।।

तथा--

द्रव्यत्वसत्तासंयोगाः स्वन्याधारोपबन्धनाः ।
तत्प्रदेशविभागाश्च गुणा द्वित्वादयश्च ये ।। 14 ।।

(28) द्रव्यत्वमपरसामान्यं सत्ता च महासामान्यमेकार्थसमवायाद् द्रव्यत्वादिशब्दैः प्रत्याय्यते । सत्ताद्रव्यत्वे हि द्रव्यत्वादिशब्दस्य यः स्व आधार आकाशस्तत्रान्यत्र च पृथिव्यादौ वर्तेत इति स्वान्याधाराभ्यामुपबध्येते, स्वात्मनि नियभ्येते । तथा च स्वान्याधारवृत्तिनी, स्वाश्रयुपरिसमाप्तत्वात्, सामान्यानामाश्रयान्तरसमवायेऽप्येकैकत्र समवायाविरोधात् तथा चाकाशेन पदार्थान्तराणां ये प्रदेशवृत्तयः संयोगविभागद्वित्वपृथक्त्वादयश्च तेऽपि संयोगादिशब्दैरेकार्थसमवायादेव प्रत्याय्यन्ते द्विष्ठत्वात् संयोगादीनामाकाशेऽपि समवायात् ।। 14 ।।

तथा--

केचित् स्वाश्रयसंयुक्ताः केचित् तत्समवायिनः ।
संयुक्तसमवेतेषु समवेतास्तथा परे ।। 15 ।।

(29) स्वशब्दानामाश्रय आकाशः, तेन संयुक्ता रथघटादयो रथघटादिशब्दैः समवेतसंयोगात् प्रत्याय्यन्ते । घटादिसमवेतास्तु रूपादयो गुणा उत्क्षेपणादयश्च कर्मविशेषाः स्वाश्रयसंयुक्तसमवायाद्रूपादिशब्दैः प्रत्याय्यन्ते घटादिसमवेतरूपादिसमवेतास्तु रूपत्वादयो रूपत्वादिशब्दैः स्वाश्रयसंयुक्तसमवेतसमवायादभिधीयन्ते ।। 15 ।।

तथा--

स्वाश्रयेण तु संयुक्तैः संयुक्तं विभु गम्यते ।
समवायस्य संबन्धो नापरस्तत्र दृश्यते ।। 16 ।।

(30) दिक्कालात्मनां विभूनामाकाशेन सहाप्राप्तिपूर्विकायाः प्राप्तेरसंभवात्साक्षात् संबन्धाभावाद्दिक्कालादिशब्दैः स्वाश्रयसंयुक्तसंयोगात्ते प्रतीपाद्यन्ते । आकाशेन हि संयुक्ताः पृथिव्यादयः, तैः संयुक्ता हि दिक्कालात्मानः । एवं पूर्वानुसारेण विद्रव्यसमवेताः गुणाः तत्समवेताश्च सामान्यविशेषाः स्वशब्दैः स्वाश्रयसंयुक्तसमवायात्

स्वाश्रयसंयुक्तसमवेतसमवायाच्चाभिदीयन्त इत्यध्यवसीयत इति पृथङ् नोक्तम् । तदेवं द्रव्यगुणकर्मणां सामान्यानां च प्रतीतेहेतुरुक्तः । विशेषस्थापि परमाणुमनःसमवेतस्य स्वाश्रयसंयुक्तसमवायात् स्वशब्देनाभिधानाम् । आकाशसमवेतस्य त्वेकार्थसमवायात् दिक्कालात्मसमवेतस्य स्वाश्रयसंयुक्तसमवायापेक्षया प्रतीतिरुक्ता । एवमत्र यथायोगं विभजनेऽपि समवायशब्दस्य स्वार्थप्रतिपादने न कश्चित् संबन्धः स्यात् समवायस्याद्रव्यत्वात् केनचित् संयोगाभावात् स्वरूपवृत्तित्वात् समवायान्तराभावाच्च । स्यादेतत्-समवायशब्द आकाशे समवेतो घटादयश्चाकाशेन संयुक्तास्तेषु च समवायः स्थित इति स्वाश्रथसंयुक्तसंबन्धात्तमभिधास्यति । नैतद्युक्तम्, समवायान्तराभावात् समवायस्य घटादिषूक्ता कल्पना न युज्यते ।। 16 ।।

तथा हि--

संबन्धस्याविशिष्टत्वान्न चात्र नियमो भवेत् ।
तस्माच्छब्दार्थयोर्नैव संबन्धः परिकल्पते ।। 17 ।।

(31) यदायमर्थो विशिष्टस्य संबन्धस्याभावादिति तदान्तरेण संबन्धं समवायशब्दः स्वार्थं न प्रत्याययेदित्यनर्थकः, यद्वा प्रत्यायन्न नियमेन सर्वमर्थं प्रत्याययेदिति व्याख्या । प्रकृतापेक्षया वानियमः । निमित्तं विना समवायशब्दस्य स्वार्थाभिधानेऽनिबन्धनलक्षणस्य संबन्धस्याविशिष्टत्वात् सर्वः शब्दः सर्वमर्थं प्रत्याययेत् । यदा तु संबन्धस्याविशिष्टत्वात्तुल्यत्वाद् अन्येन साधारणत्वादित्यर्थस्तदेयं व्याख्या । आकाशशब्देन समवायात् स्वाश्रयाभिधाने घटादयोऽपि शब्दा गगनाभिधायिनः स्युः,आकाशसमवायस्याविशेषात् । एवं च स्वसमवेतजात्यभिधाने शब्दशब्दस्य गुणत्वं सत्ता च प्रतिपद्या स्यात् । घटदिशब्देश्च स्वाश्रयसंयोगाविशेषांत् पटादयोऽपि प्रत्याय्येरन्नितीयं अव्याप्त्यतिव्याप्तिभ्यां व्यवस्था शब्दार्थसंबन्धे विशीर्यते यतस्तस्मात्संयोगसमवायरूपतया नात्र संबन्धपदार्थपरिकल्पनं न्याय्यम् ।। 17 ।।

प्रौढिवादितया वैशेषिकदर्शनं समर्थयितुमेतदाह--

अदृष्टवृत्तिलाभेन यथा संयोग आत्मनः ।
क्वचित् स्वस्वामियोगाख्योऽभेदेऽन्यत्रापि स क्रमः ।। 18 ।।

(32) व्यापकस्यात्मनः सर्वैर्द्रव्यैः संयोगस्याविशेषेऽपि धर्माधर्मवशाच्छरीरादावेव स्वस्वामिभावलक्षणः संबन्धो यथा, एवमिहाप्यविशेष्टेऽपि स्वाश्रयसमवाये स्वाश्रयसंयोगे वादृष्टवशादेव प्रतिनियतः शब्दार्थो व्यवस्थास्यत इत्यतिव्याप्त्यभावः । अदृष्टस्य धर्माधर्मलक्षणस्यात्मगुणस्य वृत्तिः फलदानं प्रति व्यापारः तस्या लाभो देशकालादिसहकारिवशात् प्राप्तिः । तुच्छोऽयं परिहारो हेयत्वादस्य पक्षस्याभिहितः । भोगस्य स्वसुखदुःखसाधनभूतस्य युक्तं कर्माक्षिप्तत्वं न तु सर्वस्य तथाभावो युक्तः । अथ शब्देनार्थप्रतिपादननियमे सति तस्य भोग्यत्वमित्येतदपि कर्माक्षिप्तमेवेत्युच्यते तदा सर्वस्य जगतस्तथाभावाददृष्टहेतुप्रत्याख्यानं सर्वत्रायातम् । अथायमत्राशयः-यथा संयोगे समानेऽपि न सर्वं स्वमात्मनः, नापि सर्वेषामात्मनां प्रत्यात्मगतादृष्टनियमात् तथा संबन्धाभेदेऽपि न सर्वं सर्ववाच्यम्, प्रयोगदर्शनाभ्यासजनसंस्कारपारतन्त्र्यादिति तदा सर्व एव प्रतिनियतविषयः प्रयोगदर्शनाभ्यासात् सङ्केतादवसीयमानस्वरूपः संस्कारो योग्यतारूपः संबन्धोऽस्तु, किमन्येनानिबन्धनेन संयोगसमवायलक्षणेन नान्तरीयकेण कृत्यम् ।। 18 ।।

समवायस्य त्ववाच्यत्वमेवाभ्युपैति ।
प्राप्तिं तु समवायाख्यां वाच्यधर्मातिवर्तिनीम् ।
प्रयोक्ता प्रतिपत्ता वा न शब्दैरनुगच्छति ।। 19 ।।

(33) शब्दप्रतिपाद्यानां वाच्यानां गवादीनामर्थानां धर्मः संसर्गिरूपाच्छुरितत्वम् , निरुपाधीनां शब्दविषयतायोगात् । समवायस्तु निरुपाधिः, न हि तस्य गुणसामान्यादिः कश्चिदुपाधिः परैरङ्गीक्रियत इति वाच्यधर्ममतिक्रान्तः । तयेदं तदिति प्रत्यवमर्शयोग्यत्वं वाच्यधर्ममतिक्रान्तः । नित्यपरतन्त्ररूपश्चासौ समवायशब्दादपि नावधार्यते प्रयोक्तृप्रतिपत्तृभ्यामिति न तत्स्वरूपनिवेशिसंविज्ञानपदं किंचनास्ति इत्यवाच्य एव भावतोऽयम् । संबन्धिरूपतया तु स्वतन्त्रः समवायः शब्दादवगम्यते । तथा च धर्मितया प्रतीतेर्धर्मान्तरयोगसहत्वादस्त्येव स्वाश्रयसंयोगः, तदभिधाने समवायशब्दस्य संबन्ध इति न कश्चिद्दोषः ।

अर्थान्तरे समाजादौ च प्रयोगदर्शनात् समवायशब्दो नासाधारणं संविज्ञानपदमस्य लौकिकम् । किं तर्हि ? वैशेषिकसमय एव रूढम् । वाच्यमर्थं प्रयोक्ता विवक्षित्वा योग्यं शब्दं प्रयुङ्क्ते । समवायस्य तु पारतन्त्र्यात्मनो वाच्यत्वाभावात् प्रयोक्तुर्योग्यशब्दोदाहारे व्यापाराभावः, तदभावात् प्रतिपत्तापि न तत्र कश्चिदित्युभयोपादानम् ।। 19 ।।

अत्रावाच्यत्वे समवायस्योक्ते नैयायिको वाक्च्छलमुद्भावयति--

अवाच्यमिति यद् वाच्यं तदवाच्यतया यदा ।
वाच्यमित्यवसीयेत वाच्यमेव तदा भवेत् ।। 20 ।।

(34)अवाच्यमित्यनेन शब्देन यद् वाच्यं वक्तुमभिप्रेतं तद्यदैवावाच्यतया अवाच्यशब्देन वाच्यं व्यवहर्तव्यमिति प्रतीयते तदैव वाच्यं भवति, प्रतिपादनकाल एव वाच्यतामुपैतीत्यर्थः । तथा च वाच्यमित्युक्तेऽवाच्यशब्दस्यैव वाच्यमित्यवाच्यत्वं विरुध्यते ।। 20 ।।

अथाप्यवाच्यमित्येवं न तद् वाच्यं प्रतीयते ।
विवक्षितास्य यावस्था सैव नाध्यवसीयते ।। 21 ।।

(35) अवाच्यशब्दस्याप्यवाच्यत्वे प्रतिपिपादयिषितं शब्दानभिधेयत्वं समवायस्य न गम्येतेत्यस्य वाच्य एव । तथा च विरोध इत्यर्थः ।। 21 ।।

अथ पारतन्त्र्यात्मनावाच्यो न सर्वथेत्याशङ्क्याह--

तथान्यथा सर्वथा च यस्यावाच्यत्वमुच्यते ।
तत्रापि नैव सावस्था तैः शब्दैः प्रतिषिध्यते ।। 22 ।।

(36) पारतन्त्र्यात्मना न वाच्य इत्यपि प्रकारप्रतिषेधे प्रकारवत एव प्रतिषेधः कृतो भवति । न हि तेनान्येन सर्वेण वा प्रकारेणावाच्य इति प्रकारमात्रस्यावस्थालक्षणस्यैतैः शब्दैः प्रतिषेधः । धर्म्यप्रतिषेधे तदाश्रितधर्मप्रतिषेधानुपपत्तेः । तस्माद्विशिष्टनिषेधेऽपि प्रतिषिद्धमेव वाच्यत्वं समवायस्येति कथमवाच्यशब्दस्यायं वाच्यः स्यादिति चोद्यमेव । यदि वा तथान्यथा इत्यादिना निषेधेऽपि न सैवावस्था निषेद्धुं शक्या यावदवस्थाता न निषिद्ध इति नान्तरीयकोऽस्य निषेधः । शब्दविषयताप्रत्यवमर्शमन्तरेणाकारविशेषः प्रतिषेद्धुं न शक्यत इति शब्दविषयत्वेन तस्य वाच्यत्वोपपत्तेरवाच्यत्वे न विरोध इति पूर्वे व्याचक्षते ।। 22 ।।

अस्य वक्तुरभिप्रेतादर्थान्तराध्यारोपेण वाक्च्छलस्योत्तरं वक्तुमेतत् सदृशं निदर्शनमाह--

न हि संशयरूपेऽर्थे शेषत्वेन व्यवस्थिते ।
अव्युदासे स्वरूपस्य संशयोऽन्यः प्रवर्तते ।। 23 ।।

(37) समानधर्मोपलंभाद्विशेषानवधारणाद् विशेषस्मृतेश्चार्थे संशयिते स्थाण्वादौ स्थाणुर्वा स्यात् पुरुषो वेति यदिदं संशयज्ञनमाजायते तत्र संशयरूपे ज्ञाने ंसशयितेऽर्थे स्वविषये शेषत्वेन तद्विषयव्यवस्थापनाङ्गत्वेन स्थिते तदुपरि तदैनान्यसंशयज्ञानं नोत्पद्यते, अस्यार्थपरतन्त्रस्यापरित्यक्तपारतन्त्र्यस्वरूपस्य स्वविषयविज्ञानं प्रति विषयभावोपगमविरोधात् । यदि हि स्वविषयस्य संशयरूपस्य ज्ञानस्येदं विषयभावमुपेयात्, तदा स्वरूपेणैव संदिग्धत्वादलब्धप्रतिष्ठं स्वस्मिन् बाह्यविमर्शस्वभावे संशयात्मनि स्वरूपे नावतिष्ठेत । तथा च बाह्यस्यार्थस्य दोलायमानत्वं न परिच्छिद्यते युगपद्विषयविषयिभावस्यानुपपत्तेः । तेनैव चार्थुप्रवृत्तेन संशयेन विषयवत् स्वरूपस्यापि संशय्यमानतायोगो व्यापारस्यैकत्वात् । तदेवं यथा संशय आत्मरूपं वर्जयन् विषयं सन्देहयति तथा अवाच्यशब्द आत्मानं वर्जयन् विषयीकृतं वाचयतीति साधर्म्यम् । संशयरूपेऽर्थे संशायभिधाने ज्ञानवस्तुनि वेत्यर्थः । शेषत्वेन व्यवस्थितिरत्रार्थाद् वस्तुविषया ।। 23 ।।

उदाहरणान्तरमप्याह--(37)

यदा च निर्णयज्ञाने निर्णयत्वेन निर्णयः ।
प्रक्रम्यते तदा ज्ञानं स्वधर्मेणावतिष्ठते ।। 24 ।।

(38) विशेषावधारणरूपे निर्णीयमानार्थविषये निर्णयज्ञाने तदैवार्थपरिच्छेदव्यापृतेऽपरः स्वगतो निर्णयो न प्रवर्तते । ज्ञानस्य ह्यर्थपारतन्त्र्यं स्वधर्मः । ततस्तु निष्कृष्य स्वरूपविचारे स्वधर्माद् विप्रकृष्येत, स्वातन्त्र्येण विषयभावापत्तेः अत एव ज्ञानान्तरग्राह्यत्वं न भवतीति घटज्ञानमिति प्रागेव प्रतिपादितमिति ज्ञानान्तरविषयत्वे विषयित्वत्यागात् स्वधर्मस्य हानिः । तदेवमन्यत्र व्यापृतस्य तदैव स्वविषयव्यापाराभावाद्यथा ज्ञानस्य ज्ञेयत्वं नास्त्येकस्यां संवित्तौ तथा वाचकस्य वाच्यत्वं नास्तीत्यवाच्यशब्दः प्रतिपादनावस्थो नात्मन एव वाच्यतामर्थस्य निषेधति,स्वात्मनि क्रियाविरोधात् । न च शब्दान्तरं तदानीं तद्वाच्यतानिषेधकमस्तीत्यवाच्यशब्दस्याभिधाविषभभावमत्रोपगच्छत्येवार्थः । तथा हि शब्दान्तरस्य समवायशब्दस्य समवायस्वरूपेण न वाच्य इत्येतद्वक्तुर्विवक्षितं प्रतीयत एव ।। 24 ।।

तद्यथा--
सर्वं मिथ्या ब्रवीमीति नैतद्वाक्यं विवक्ष्यते ।
तस्य मिथ्याभिधाने हि प्रक्रान्तोऽर्थो न गम्यते ।। 25 ।।

(39) स्ववाक्यानामसत्यार्थताप्रतिपादनाय सर्वम् अहं मिथ्या ब्रवीमि इत्युक्तेऽस्यापि वाक्यत्वान् मिथ्यार्थता न प्रसञ्जनीया । एवं हि प्रक्रान्तं विवक्षितं स्वावाक्यान्तराणां मिथ्यात्वं न प्रतीयेत अथ सत्यपि मिथ्यार्थत्वे प्रतिपादकत्वमस्य वाक्यस्य वाक्यान्तराणामपि तथैव स्यादिति तेषां मिथ्यार्थप्रतिपादनं प्रक्रान्तमफलमित्यपरोऽत्रार्थः ।। 25 ।।

अत्रैव युक्तिमाह--
न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता ।
प्रतिपाद्यं न तत्तत्र येनान्यत् प्रतिपाद्यते ।। 26 ।।

(40) करणसन्निवेशिनस्तदैवाभिधेयता विरुद्धा, अन्यप्रतिपादनप्रवृत्तस्य तदैव प्रत्युदावृत्यात्मनि व्यापाराभावात् । वस्तुस्वभावोऽयं यत् कर्तृशक्तियुक्तं न तत् कर्मशक्तेनधिकरणं तदैव भवति, स्वातन्त्र्यपारतन्त्र्ययोरेकदैकत्र विरोधादित्यर्थः । प्रतिपाद्यं न तत्तत्र इत्यादिना सर्वनिदर्शनसाध्यमन्ते निगमितवान् । यत् प्रतिपादकं न तत् प्रतिपाद्यम् । यथा संशयज्ञानं निश्चयज्ञानं वा । प्रतिपादकं चाभिधानमतो नैतत् प्रतिपाद्यमिति प्रयोगः ।। 26 ।।

ननु मा भूद् वाचकं वाच्यम्, विरोधात् । आत्मकर्तृकवाक्यसमान्यानुप्रवेशात्त्वस्य मिथ्यात्मना केन धार्यत इत्येतदाशङ्क्यैतदेव निदर्शनान्तरेणोपपादयति--
असाधिका प्रतिज्ञेति नेयमेवाभिधीयते ।
यथा तथास्य धर्मोऽपि नैव कश्चित् प्रतीयते ।। 27 ।।

(41) साध्यनिर्देशः प्रतिज्ञा साधनाङ्गं न भवतीत्युक्ते नेयमेव सौगतस्य प्रतिज्ञात्वाविशेषात्तथा भवति, अनर्थकत्वे विवक्षितार्थासिद्धेः । अपि त्वेतद्वर्ज प्रतिज्ञान्तराणां तत्ता । एवं सर्वं मिथ्या ब्रवीमीत्यस्यापि वाक्यस्यायथार्थताप्रतिपादने क्रियमाणे धर्मोऽनृतत्वं न गम्यते तथाभावे विवक्षितार्थप्रतिपादनाभावे प्रयोगवैफल्यात् ।। 27 ।।

एवमवाच्यशब्देऽपि प्रष्टव्यम् । उपसंहरति--
व्यापारस्यापरो यस्मान्न व्यापारोऽस्ति कश्चन ।
विरोधमनवस्थां वा तस्मात् सर्वत्र नाश्रयेत् ।। 28 ।।

(42) अवाच्यशब्दस्य स्वार्थप्रतिपादने यो व्यापारोऽभिधालक्षमस्तस्यान्यो व्यापारः स्वविषयस्तदानीमेव नास्ति येनैकेन व्यापारेण शब्दान्तराभिधेयतां निषेधत्यपरेणात्मनोऽप्यभिधेयतामित्यवाच्यशब्दस्याप्यसावार्थो न वाच्यः स्यादिति विवक्षितं शब्दान्तराणामप्यवाच्यत्वं न प्रतीयेतेति विरोधः स्यात् । निर्निमित्तव्यापारान्तराभ्युपगमे चानवस्था स्यात् । तथा हि- यद्यवाच्यशब्दस्यापि विषयभावनिषेधाय व्यापारान्तरं संभवेत् तदा तस्यापि व्यापारान्तरस्य स्वविषये प्रवृत्तिनिषेधाय व्यापारान्तरं

तदैवेत्यनवस्थानादप्रतिपत्तिः स्यादित्यर्थः । व्यापारान्तराभावात्तु नैष प्रसङ्गः । सर्वत्र इति न केवलं वाच्यतायामेव, अपि तु संबन्धेऽपि, संबन्धस्य संबन्धिभ्यां सहान्यस्य संबन्धस्याभावे तयोरपि संबन्धिनोः शब्दार्थयोः संबन्धो मा भूत् । संबन्धान्तरकल्पने वानवस्थेत्येषानवस्था नाश्रयितव्या । संबन्धस्य स्वयं संबन्धरूपत्वादन्यत्योपश्लोषकस्यायोगादित्यर्थः । अथवा सर्वत्र इति सर्वं मिथ्या ब्रवीमि, असाधिका प्रतिज्ञेत्यादावित्यर्थः ।

तदेवं परप्रसिद्धसंयोगसमवायलक्षणसंबन्धाश्रयेण शब्दार्थप्रविभागेऽतिव्याप्तिरदृष्टवशात् परिहृता । अव्याप्तिरपि, साक्षात् समवायस्यावाच्यत्वे कल्पितेन रूपेण संबन्धितया वाच्यत्वे नास्त्येव तटस्थस्य समवायशब्देनामुखीकृतस्य समवायस्यावाच्यत्वविधाने विरोधभावादिति प्रौढिवादितया शास्त्रान्तरसिद्धसंबन्धाश्रयेणापि शब्दार्थनियमो व्यवस्थापितः ।। 28 ।।

इदानीं स्वनिकायसिद्धं संबन्धपपादयितुमाह--

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ।। 29 ।।

(43) समवायादिनिमित्तानपेक्षयैवोच्चरितमात्राच्छब्दार्थप्रत्ययोत्पत्तेरकृत्रिमा शक्तिरवसीयते । अर्थमात्रेण हि शब्दमात्रस्याविर्योगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते । तथा च योग्यता स्वाभाविकी सिद्धा, संकेतस्तु तामेव द्योतयति । तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता । न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः । एवं गवार्थे घटशब्दनिवेशोऽसाधुः । तथा हि भाष्यम्--

"यो हि गामश्व इति ब्रूयान्न जातुचित् सम्प्रत्ययः स्यात्"

(M.Bh. on P.I.2.64)

इति । यथारुचि सङ्केते हि न वाचकशक्तिपुरःसरीकारेणान्यविषये शब्दाः प्रवर्तन्ते प्रसिद्धार्थाः, अपि तु समयमात्रं तत् । संज्ञाशब्दानां तु सर्वसंज्ञिप्रत्यायनशक्तियुक्तत्वेऽपि विशिष्टे संज्ञिनि शक्त्यवच्छेदः सामायिकः । इयं च योग्यता शब्दानामर्थप्रतीत्यनुसारेणैव व्यवस्थापयितव्येत्यभेदेन शब्दार्थयोः प्रत्ययादध्यासफलैवावस्थितेति स एव मुख्यः संबन्धः । अत एव प्रतीतावर्थस्यापि विषयभावेनापेक्षणात् पारतन्त्र्यसामान्यात् संबन्ध इति व्यपदिश्यते । यदापि चेन्द्रियाणि कारकत्वादज्ञातान्येव ज्ञानं जनयन्ति, शब्दस्तु ज्ञापकत्वात् स्वज्ञानेनान्यधीहेतुः, तथापि पुरुषप्रयत्नानपेक्षा शक्तिः साधारणीति साम्यम् ।। 29 ।।

इहार्थगत्यर्थः शब्दप्रयोगः । साधीयश्चार्थगतिरपशब्देभ्य इति तेषामपि सम्बन्धोऽर्थेन प्रसक्त इत्याशङ्क्याह--

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ।। 30 ।।

(44) दैवी वागशक्तैर्व्यवकीर्णा बालवदन्धादिवदनुमितमूलप्रकृतिर्विदुषां वाचिका । न हि विद्वांसोऽर्थमपशब्दात् साक्षादवस्यन्तीति नापशब्दानामर्थेन कश्चित्संबन्धः । अत एव पुराकल्पेऽनृतादिभिरिवापभ्रंशैरपि रहिता वागासीदिति ब्रह्मकाण्ड उक्तम् । अवाचका एवापभ्रंशाः । ते तु सादृश्यात् साधुशब्दमनुमापयन्ति । तेभ्योऽर्थसम्प्रत्यय इति । तथा च संग्रहकारः--

शब्दप्रकृतिरपभ्रंशः ।

इति । अद्यत्वे त्वधर्मबाहुल्यादनृतादिवद् वाङ्मत्लानां रूढिः । तथा चाव्यवधानेनैवापशब्देभ्योऽर्थप्रतीतौ न म्लेच्छितवै नापभाषितवै साधुभिर्भाषितव्यमिति शास्त्रप्रामाण्यात्साधूनामेव धर्माङ्गत्वमिति तदनुसृतिः शास्त्रेण । तथा च भेदस्योभेदपूर्वकत्नात्पुरुषविकल्पानियमेनानन्तत्वादशब्दानामभिन्नसाधुशब्दपूर्वकत्वमेव निश्चीयत इति शब्दप्रकृतिरपशब्दः सिद्ध इति शब्द एव विद्या । तदत्र यता विद्यावस्थाभिन्नब्रह्मात्मिका तथा साधुशब्दावस्था विद्या । यथा च विद्यायां भेदो विषयः तथापभ्रंशावस्था वाङ्मलरूपेति परमार्थतदितरावस्थापेक्षो विकल्पः । अविद्यादशापेक्षमेव "समानायामर्थगतौ शब्देन चापशब्देन च" इति भष्यम् । अर्थगताविति वचनादर्थाभिधानमपशब्दानामवकर्णयन्ति । अविद्यायां भूयसापशब्दैर्व्यवहारादर्थप्रतीतिमात्रं

भवेन्नामेत्यर्थः । रूढत्वात्त्ु व्यवहारस्याविशेषं ग्रन्थकार आह । तत्र च शास्त्रं नियामकं साधुशब्दैरेवार्थो वक्तव्यो नापशब्दैरेवं क्रियमाणमभ्युदयकारि भवतीति । पुण्यपापयोः पुण्यपापनिमित्तं नियमः क्रियते साधूनां ज्ञानाच्छास्त्रपूर्वकाद्वा प्रयोगादभ्युदय इति । असाधुप्रयोगे तु धमाभाव एव पापत्वेनोपचर्यते । न म्लेच्छितवै इत्येतस्य निषेधस्यातिक्रमात्पापमेव केचिदिच्छन्ति ।। 30 ।।

समवाये संबन्धान्तराभावः पूर्वमुक्तः, अस्मिंस्तु दर्शने स न प्रसजतीत्याह--

संबन्धशब्दे संबन्धो योग्यतां प्रति योग्यता ।। 31 ।। क ख)

(45) संबन्धशब्दो योग्यतालक्षणं संबन्धं योग्यतयैव प्रतिपादयति । एवं समवायशब्दोऽपि योग्यतयैवानादिसिद्धया स्वार्थप्रतिपादकः । तथा योग्यताशब्दोऽपि इति सर्वत्रास्य संबन्धस्य व्याप्तिः ।

सङ्केतस्य तर्हि क्वोपयोग इत्याह--

समयाद्योग्यतासंविन्मातापुत्रादियोगवत् ।। 31 ।। ग-घ

अनादिसिद्धार्थविषयव्यापारस्य शब्दस्य वृद्धव्यवहारपरम्परापरपर्यायात् समयात् स्वाभाविक्येव योग्यता निश्चीयते, न तु समयमात्रादतथाभूतेऽपि तथाभावः समुचितः । न हीयमस्य पुत्रस्य माकेकि जन्यजनकभावः सामयिकः, वस्तुसिद्धस्यैवैवं प्रतिपादनात् । अथ

प्रत्यक्षपूर्वकं संज्ञाकर्म

इत्यस्मद्विशिष्टानामर्थे शब्दनियोगः सामयिक एव । नैतत् । तैरपि योग्यतानुसारेण पूर्वाभ्यासातया निवेशात् । तदुक्तम्--

अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यये ।

इति । किं भवानाहेत्यर्थमात्राविनाभावमवगत्य विशेषप्रश्नादवधार्यते । अविदितसंकेतानपि प्रति शब्दस्य योग्यता, पुरुषेणान्यत्र संङ्केतेऽपि प्ररूढेऽर्थे गवादिशब्दाज्झटिति प्रतिपत्तिः । न च पुरुषेण नियोगः शक्यक्रिय इति वक्ष्यति ।। 31 ।।

इदानीं कार्यकारणभावं शब्दार्थयोः सम्बन्धमाह--

शब्दः कारणमर्थस्य स हि तेनोपजन्यते ।

तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते ।। 32 ।।

(46) श्रोतृबुद्ध्युपारूढस्यार्थस्य शब्दः कारणं जनकत्वात् । शब्दार्थो ह्यर्थो बहीरूपतयावसीयमानः । तथा चान्यच्च, वक्तृबुद्धिनिवेशिनोऽर्थात् कारणभूतात् शब्दः श्रुतिविषयमनुप्राप्तः प्रतीयत इत्यर्थोऽपि शब्दस्य कारणम् । एवं चोभयथा कार्यकारणभाववर्णनाद्धूमाग्निवेलक्षण्येन शब्दार्थयोरभेदेन संबन्धोऽध्यासलक्षणः प्रतिपादितो भवति । तथा हि बुद्धो शब्दार्थयोः पूर्वमभेदेनावस्थानम् । न हि विवक्षितोऽर्थः शब्दसम्भेदशून्यः, अन्तःसञ्जल्परूपस्य तस्य प्रतिभानात् । अनादिशब्दभावनानुविद्धं हि तिरश्चामपि ज्ञानम् । अत एव स्थानकरणव्यापारादभिव्यक्तोऽर्थस्वरूपशबलः शब्दः श्रोतृभिरवधारितस्तथैव स्वरूपाच्छुरणयार्थमवगमयति । प्रतिपाद्यप्रतिपादकयोर्हि परस्पराभिप्रायसङ्क्रान्तिर्व्यवहार इत्यन्तः स्थितमर्थं मूलावस्थामाप्यपरित्यक्तं वक्तृबुद्धिसमाविष्टं श्रोतर्यर्पयति शब्दः । श्रोतापि च तथैव स्ववासनाविकासानुसारेण प्रतिपाद्यते समाविष्टशब्दभावनः । तेन चोद्बोधितशब्दभावनः प्रवर्तत इति निर्णीतं वाक्यपदीये । तदेवमेकपक्षीभाव एवैकवाक्यतया सम्बन्धे तत्र स्थितः सिद्धान्तानुगुणः । यथाविवक्षं च शब्दोऽर्थमवगमयति नियतस्वरवर्णानुपूर्वीक इति स्वरविपर्यये विवक्षान्तरमिन्द्रशत्रुशब्देऽवगन्तव्यं स्वरभेदेनान्यत्वात् । स्वकारणमेव गमयति शब्द इत्यन्तरा विवक्षान्तरं लाघवादस्फुटप्रतिभासं प्रथमवर्णोच्चारणानन्तरं द्वितीयवर्णोच्चारणवदनुमीयते ।। 32 ।।

ननु बुद्धुपारूढे शब्दार्थे कथमोदनं भुङ्क्त इत्यादिव्यवहार इत्याशङ्क्याह--

भोजनाद्यपि मन्यन्ते बुद्ध्यर्थे यदसंभवि ।

बुद्ध्यर्थादेव बुद्ध्यर्थे जाते तदपि दृश्यते ।। 33 ।।

(47) बुद्धिविपरिवर्तिनोः क्रियाकारकयोर्विज्ञाननये साध्यसाधनभावः सिद्धः प्रतिभाससारः । तथा हि बुद्ध्यर्थे बुद्धौ शब्दार्थो

भोजनं भोक्ता तत्संबन्धश्च यदसम्भवित्वेनाभिमतं तदपि सम्भवत्येव । कदेत्याह--बुद्ध्यर्थादेव ओदनादिप्रतिभासादपरस्मिन् भुज्यमानात् । कारकज्ञानसंवेदने जाते सति, वाक्यवादिनः पदमात्रात् प्रतीतेरपरिसमाप्तेः । अभ्युपगमवादश्चायम् । बाह्यनयेऽपि हि शब्दार्थस्य बुद्धिपरिवर्तिनः प्रतीतेः । क्रियाकारकभावे दृश्यविकल्पयोरभेदाध्यवसायात् व्यवहारसिद्धिर्भवत्येव । तथा हि बाह्यार्थो सति दर्शनम् । दर्शनेऽर्थनिर्भासः, तस्मिन् सति वक्तुमीहा ततः प्रयत्नादेः शब्दोच्चारणमिति परम्परया बाह्यार्थ एव वाच्येत तत्र प्रवृत्तिरिति विनापि तु बाह्यार्थं शक्यते विज्ञानमात्रदर्शनेऽपि तन्निर्भासवशेन क्रियाकारकसंबन्धो मेलयितुमित्येवोपन्यस्तम् ।। 33 ।।

यतश्च बुद्धिपरिवर्ती शब्दार्थः ततः शब्दार्थसंबन्धो नित्य उपपद्यत इत्याह--

अनित्येष़वपि नित्यत्वमभिधेयात्मना स्थितम् ।
अनित्यत्वं स्वशक्तिर्वा सा च नित्यान्न भिद्यते ।। 34 ।।

(48) घटादिशब्दादुच्चरितादर्थाकारावग्रहस्य प्रत्ययस्य सदैवोपजननाद् बाह्येन रूपेण प्रध्वंसित्वेऽप्यभिधेयकेन शब्दार्थस्य नित्यत्वान्नित्यो ह्यर्थवतामर्थैरभिसंबन्ध इति प्रवाहनित्यताश्रयेण पस्पशायामुक्तम् ।

कूटस्थनित्यताश्रयेणाप्याह--

पदार्थानां सतामसत्त्वविरोधादतीतानागतयोरध्वनोर्नास्तीति प्रत्ययजनकमद्वयस्य तत्त्वस्य स्वस्य आत्मनो ब्रह्मणो द्रव्यलक्षणस्य सामर्थ्यमेव तत्रानित्यत्वमिति तस्य नित्यादद्वयरूपात्तस्माद्भेदाभावादनित्यशब्देनोपाधिभेदभिन्नस्य पूर्वोक्तेनैव न्यायेन तस्यैव प्रतिपादनान्नास्त्यभावो नाम तदभावतो भावेषु कश्चिदित्यर्थः । ततश्च घटादिशब्दैः सर्वावस्थासूपादिविशिष्टब्रह्मद्रव्यमेव नित्यं प्रतिपाद्यत इति नित्यः शब्दार्थसंबन्धः सिद्धः । तदुक्तम्--

द्रव्येऽपि पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्देऽर्थे संबन्धे चेति ।। 34 ।।

एवं संबन्ध स्वाभाविकमवस्थाप्य तत्रैपोद्बलक परमतेनाह--

शब्देनार्थस्थ संस्कारो दृष्टादृष्टप्रयोजनः ।
क्रियते सोऽभिसंबन्धमन्तरेण कथं भवेत् ।। 35 ।।

(49) इहार्थं कंचनाप्यनभिदधतीनां शाबरादिविद्यानां विषादिशमने सामर्थ्यं दृष्टम् । प्रतितन्त्रं प्रसिद्धानां च बीजाक्षराणां जप्यमानानामदृष्टहेतुत्वमत एवोन्नीयत इत्यवाचककेष्वपि शब्देष्वर्थेन सह संस्कारन्यथानुपपत्त्या संबन्धभावात् सर्वत्र संबन्धावसाय इति कश्चित् ।। 35 ।।

एतन्निवारयति--

नावश्यमभिधेयेषु संस्कारः स तथाविधः ।
दृश्यते न च संबन्धस्तथाभूतो विवक्षितः ।। 36 ।।

(50) घटादिशब्देभ्योऽर्थस्य घटादेर्दृष्टादृष्टप्रयोजनस्य संस्कारस्यादर्शनादत्र संबन्धो न स्यादिति नेदृशसंस्कारनिमित्तमसौ विवक्षितः ।। 36 ।।

अपि तु

सति प्रत्ययहेतुत्वं संबन्ध उपपद्यते ।
शब्दस्यार्थे यतस्तत्र संबन्धोऽस्तीति गम्यते ।। 37 ।।

(51) प्रतिनियतार्थप्रत्यायनान्यथानुपपत्त्या शब्दार्थयोः संबन्धो योग्यतालक्षणश्चक्षूरूपादीनामिवेत्यस्मदुपज्ञमेव ज्याय इत्यर्थः । अर्थे नियते नियतस्य प्रतीतिहेतुत्वं सति संबन्धे युज्यते नान्यथेति यतस्तस्मादर्थप्रत्यायनाख्यात् कार्यात् अस्ति संबन्धः शब्दस्यार्थ इति निश्चीयते । नार्थविशेषाधनरूपः संस्कारोऽत्र संबन्धावेदकः, तस्यानुपूर्वीमात्राद्विशिष्टेन प्रभाववता रचितादपि निष्पत्तेः प्रत्यायकत्वानपेक्षणादित्यर्थप्रतीतिनियमहेतुः शब्दार्थयोः संबन्धः प्रतीतिकृतो न प्राप्तिलक्षण इति प्रतीतिलक्षणादुपकारात् तत्सिद्धिः । यदपि मीमांसकैर्यच्छब्दे विज्ञातेऽर्थो विज्ञायते स संबन्ध इत्युक्तं तदप्यनेनैव दर्शनेन

व्याख्येयम् । यतः कारणाच्छब्दश्रवणानन्तरमर्थज्ञानं भवति स संबन्ध इति सति प्रत्ययहेतुत्वम् इत्येवोक्तं भवति, अन्यथा शब्दार्थयोः कार्यकारणभाववर्णने निमित्तं नियमेनोक्तं स्यात् ।। 37 ।।

सामयिकस्तु संबन्धो न युज्यत इत्याह--

नित्येऽनित्येऽपि वाच्येऽर्थे पुरुषेण कथंचन ।
संबन्धोऽकृतसंबन्धैः शब्दैः कर्तुं न शक्यते ।। 38 ।।

(52) नित्ये तावदर्थे जात्यादौ नित्यशब्दार्थदर्शने वा सर्वस्मिन् पुरुषेणेदं प्रथमतया शब्दस्य सङ्केतः कर्तुं न पार्यते । नित्यत्वादेवेदानीमुपजातस्य पुरुषस्य तत्राव्यापारात् । पूर्वमपि तस्मादाकाशकालदिगादिशब्दानां नित्यशब्ददर्शने वा ब्रह्मणः शब्दवाच्यत्वात् सर्वेषामर्थसंबन्धादादिपुरुषेणापि कृते शक्त्यनुसारस्य प्रतिपादितत्वात् , आदिसर्गात् प्रभृति च प्रवृत्तौ किमन्यन्नित्यत्वात् स्यात् । अनित्येऽप्यर्थेः घटादौ कार्यशब्ददर्शने वा प्रत्यक्षेण सर्वग्रहणायोगाज्जातिद्वारेणापि ग्रहणे जातीनामेकस्मिन्नर्थे भूयसीनां संभवे विवेचनानुपपत्तेरनुमानेनापि शब्दाभेदेनार्थस्य प्रतिपत्तेः शब्दार्थसिद्धौ तस्यायोगात् पारिशेष्याच्छब्दैरेव निरूप्य विषयं सङ्केतः क्रियेत । तथा च निरूपकाणामपि शब्दानां सङ्केते सैव वार्तेति तत्रापि शब्दान्तरैर्निरूपणेऽनवस्था, अकृतसमयैर्निरूपणानुपपत्तेरिति सुदूरमपि गत्वा कस्यचिच्छब्दस्य स्वाभाविकी योग्यतैषणीया । तथा चाविशेषात् सर्वेषामपि तत्प्रसङ्ग इति सिद्धः स्वाभाविकः शब्दार्थयोः सम्बन्धः समयवशादभिव्यज्यमानस्वरूपः ।। 38।।

इदानीं यन्मतुब्वार्तिके भाष्येऽभिहितम्--

"सम्प्रतिसत्तायां यथा स्याद् भूतभविष्यत्यसत्तायां मा भूद् "

(Bha. on P.V.2.94)

इति, तत्र भूतभविष्यतोः सत्ताव्याख्यानमिषेण प्रकृतं संबन्धनित्यत्वं निर्वाहयितुमाह--

व्यपदेशे पदार्थानामन्या सत्तौपचारिकी ।
सर्वावस्थासु सर्वेषामात्मरूपस्य दर्शिका ।। 39 ।।

(53) व्यपदेशे व्यपदेशनिमित्तं शब्देन प्रत्यायने पदप्रत्याय्यानामर्थानां बाह्यानां वस्तूनां बाह्यविलक्षणा सत्ता बुद्ध्योपचरिता बाह्यार्थसत्ताया हि अन्या बुद्धिसमारूढार्थाकाररूपा सत्ता । अत एवौपचारिकी इयम् । उपचारोऽध्यारोपः प्रयोजनमस्याः सर्वावस्थासु इति ्तीतानागतास्ववस्थास्वप्यर्थरूपं दर्शयति, तद्रूपेण बुद्ध्याकारस्य प्रतिभासनात् । एवं चातीतानागतादिशब्दानामप्यर्थसद्भावात्संबन्धनित्यतास्त्येव । विशेषणविशेष्यावस्थायामपीयमेव सत्तार्थानाम् । अन्यथा सदैन विशिष्टस्य निरंशस्य वस्तुनः कथं प्रविवेकः सर्वेषामित्यभावविषयाणां शशविषाणादिशब्दानामप्याकारोल्लेखिनी । तथा हि बुद्ध्या निरूपितवस्तुविषयाः शब्दाः । बुद्धिश्च बहिरसत्यप्यर्थे स्वबीजवासनापरिपाकवशादाकारावग्रहरूपोपजायते वैकल्पिकी । तथैव च शब्दात् प्रतीयत इत्यवधीरिबहिर्गतभावाः शब्दाः बुद्धिप्रतिभासिनमर्थमभिनिविशन्त इत्यलातचकशशविषाणादीनामपि शब्दानां नित्यमर्थैरवियोगात् संबन्धनित्यतासिद्धिः । संविदुपारोहे हि व्यावहार इति तन्मय्येवार्थस्य सत्ता न्याय्या । प्राक् तु संविदोऽप्रामाणिकत्वात् श्रद्धामात्रगम्या सा । तत्र च प्रहतः सत्ताभिमान इति तदनुरोधेनोपचारसत्तावाचोयुक्तिः । अत एव हि अर्थानामात्मलाभ इव शब्दपरामर्शमन्तरेणैषां रूपसंस्पर्शस्याभावात् ।। 39 ।।

एवं चानयैव सत्तया पूरिते व्यवहारे यद्यर्थक्रियाकरणादिना काष्ठबुसप्रायेण केनचिन्निबन्धनेनान्यसत्ता कल्प्यते तद्वर्धतां सा, न तत्र चिन्तास्माकं व्यवहारे तु तस्या नास्त्यनुप्रवेशः, यदि परमस्यामेव सा प्रतिबिंबिता व्यवह्रियत इत्येतत् प्रतिपादयितुं निदर्शनोपक्रममाह--

स्फटिकादि यथा द्रव्यं भिन्नरूपैरुपाश्रयैः ।
स्वशक्तियोगात् संबन्धं तादूप्येणोपगच्छति ।। 40 ।।
तद्वच्छब्दोऽपि सत्तायामस्यां पूर्वं व्यवस्थितः ।
धर्मैरुपैति संबन्धमविरोधिविरोधिभिः ।। 41 ।।

(54) बाह्यस्य वस्तुनो नियतरूपत्वात् भावाभावसाधारण्यानुपपत्तेर्घट इत्युक्तेऽस्ति नास्तींति शब्दान्तरोपधीयमानरूपसंसर्गविरोधः स्यादित्युपचारसत्तासमाविष्टः शब्दार्थः । तथा हि--सर्वसाधारणात् पदान्तरोपधीयमानरूपविशेषसहः काचाभ्रस्फटिकाद्रिवत् सोऽर्थ इति यथायथमस्ति नास्ति इति भावाभावसमन्वयवशेन नियतः प्रतीयते । तथा हि--स्वच्छत्वात् स्फटिकादिद्रव्यं नीलादिसंसर्गेऽपरित्यक्तस्वरूपं तद्रूपमिवाभासते । तथा चोपचाकसत्तापि स्फटिकमणिस्थानींया तद्रूपमत्यजन्ती प्रतिषेधादिभिरुपधानैरभिसंबध्यमाना तादृप्यमिवायाति, प्रतिषेधाद्यात्मिकेवाभाति । स्वशक्तिरच्छत्वं स्फटिकादेर्नानाकारोपग्रहयोग्यत्वं सत्ताया अपि सर्वविशेषस्वीकारयोग्यत्वम् । सामान्यात्मकत्वात् । शब्दोऽपीति, शब्दार्थः, शब्दात इति कृत्वा । यद्बा शब्दोऽस्याः प्रत्यायकत्वेनावस्थितोऽर्थद्वारेण, शब्दान्तरवाच्यैर्धर्मैः सम्बन्ध्यते । विरोधिवचनं साकल्यप्रतिपादनार्थम् । सत्तायामस्याम् इति, ज्ञानाकाररूपायाम् । पूर्वम् इत्याभासावस्यायां पदात् काचाद्यवरोधः । अविरोधिनो धर्मा भावात्मकाः । ते चोपचारसत्तायामनुगुणाः यथा स्फटिकस्य मल्लिकाकुसुमादय इति न ते रूपतिरस्क्रियाहेतवः । अत एव तत्सन्निधाने तदात्मनोपचारसत्ताया विश्रान्तिः । अविरुद्धा हि बाह्या सत्ता तस्याः पूर्णरूपतया प्रत्यासन्ना । तथा चोच्यते--

"यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपर..."

(See Bha. on P.II.3.1)

इत्यादि । वर्तमानावस्था च पूर्णत्वोपकारिणीति भवन्तीपर इत्युक्तम् । सत्ता वा विरुद्धधर्मसामान्यमिति यथायथं विशेषैस्तस्या एव परिपूरणम् । विरोधिनस्तु धर्मा अभावात्मकः ते हि प्रतिषेधात्मकाः रूपतिरोधानमुपचारसत्ताया जपाकुसुमादय इव स्फटिकस्य कुर्वन्ति । यद्यपि चोपचारसत्तायामुभयेषामपि समन्वायद्विरोधाबावस्तथापि बाह्यापेक्षयात्रैतदुक्तम् । बाह्यस्थ नीलोत्पलादेरभिन्नस्य विशिष्टत्वान्नीलमुत्मलमित्युपचारसत्तायामेव विवेकाद् द्रव्यात्मा गुणसंसर्गभेदादश्रीयते पृथगित्यादिविशेषणविशेष्यभावे च वक्ष्यमाणा प्रक्रियोपपद्यते ।

स्फटिकं विमलं द्रव्यैर्यथायुक्तं पृथक् पृथक् ।
नीललोहितपीताद्यैस्तद्वर्णमुपलभ्यते ।।

इत्यपरोऽत्रागमपाठः ।। 40-41 ।।

तमेव विरोध्यविरोधिधर्मसंबन्धं क्रमेण व्याचष्टे ।

एवं च प्रतिषेध्येषु प्रतिषेधप्रक्लृप्तये ।
आश्रितेषुपचारेण प्रतिषेधः प्रवर्तते ।। 42 ।।

(55) बुद्ध्याकारस्य नानाविधधर्मसमन्वययोग्यत्वेऽब्राह्मणादिषु नञर्थोपपत्तिः । तथा हि--सत्ताविरोधान्निषेधायोगान्न ब्राह्मणोऽत्र सन् । असत्त्वे तु कथं तत्र शब्दप्रवृत्तिर्बाह्यशब्दार्थवादिनाम् । तथा च पुनरपि निषेधोऽनुपपन्नः । तदुक्तम्--

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते ।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः ।।

इति । यदा तूपचारसत्तासमाविष्टः शब्दार्थस्तदा सामान्येन भावाभावसाधारणतया ब्राह्मणशब्देन क्षित्रियादिषुं सादृश्याध्यारोपितो ब्राह्मणार्थः समुल्लिखित इति प्रतिषेध्यविषये दर्शिते नेति निषेधः प्रवर्तते । निर्विषयस्य निषेधस्याप्रवृत्तेः । तत्रापि च बुद्ध्याकारस्य भावैकानियतत्वाद् बुद्धिसत्तयैव सत्त्वान्नास्ति साधारणत्वेन निषेधयोग इति तस्य येयं बहीरूपता व्यावहारकैर्दृश्यविकल्पैकीकारादध्यसिता तत्रैव निषेधः फलति । तथा हि योऽयं ब्राह्मणार्थः स बहिरसन् केवलं भ्रान्त्या क्षत्रियेऽध्यवसित इति स्वाभाविकब्राह्मणार्थनिवृत्तिरत्र नञा द्योत्यते । तदुक्तं भाष्ये--

"यदि पुनरयं निवृत्तपदार्थको ब्राह्मणशब्दः किमर्थं प्रयुज्यते, एवं यथा विज्ञायेत, नेति ह्युक्ते सन्देहः स्यात् कस्य पदार्थो निवर्तत ।"

(Bha. on P.II.2.6)

इति । अत्र सर्वथा निवृत्तपदार्थकत्वे प्रयोग एव न स्यादिति बाह्यार्थापेक्षयैव निवृत्तपदार्थकत्वम् । उपचारसत्तापेक्षया तु प्रयोग

इति स्फुटमुक्तं भवति । प्रतिषेधविषयप्रकल्पनार्थं च प्रयोग इति तदेवोपचारफलम् ।। 42 ।।

अविरोधिधर्मसंबन्धमुपचारसत्तासमाविष्टस्यैव प्रतिपादयितुं मुख्यसत्तायां तावदसंभवमाह--

आत्मलाभस्य जन्माख्या सत्ता लभ्यं च लभ्यते ।
यदि सज्जायते कस्मादथासज्जायते कथम् ।। 43 ।।

(56) आत्मलाभो वस्तुनः स्वरूपप्राप्तिः जन्म कथ्यते । तत्र च त्रितयमन्वयि, लब्धा कर्ता, लभ्यं कर्म , लाभश्च क्रिया । एतच्च त्रितयं सद्विषयम् । तथा च जन्मविरोधः सत् आत्मलाभायोगात् । लब्धात्मा हि सन्नुच्यते । कारणे शक्तिरूपतयावस्थानेऽपि सर्वथासतो जन्मायोगादवश्यमपूर्वस्य कस्यचिदंशस्य लाभोऽभ्युपगन्तव्य इति येन रूपेण सन्न तेन रूपेण जन्म येन च जन्म न तेन सन्निति जायतेऽङ्कुर इति प्रयोगानुपपत्तिः । जन्मानुरोधादसत्त्वाभ्युपगमे धात्वर्थे कर्तृत्वानुपपत्तेः प्रत्ययार्थविरोधः । तदनुरोधात्सत्त्वाभ्युपगमे जन्मलक्षणधात्वर्थविरोध इत्यर्थः ।। 43 ।।

अत्रैवार्थे सदृशं दृष्टान्तमाह--

सतो हि गन्तुर्गमनं सति गम्ये प्रवर्तते ।
गन्तृवच्चेन्न जन्मार्थो चेत्तद्वन्न जायते ।। 44 ।।

(57) स्वरूपप्रसरणलक्षण गमिक्रिया जनिक्रियासदृशी । तत्र च सत एव गमनं गन्तुर्दृश्यते व्यतिरिक्तसद्रूपकर्मविषयम् । एवमिहापि प्रादुर्भावितुः गन्तृवत् जन्मानुपपत्तिः । अथ जन्मानुरोधस्तदा सत्त्वाज्जायते क इति कर्तृत्वायोगः । गम्यवच्च लब्धव्योऽप्यत्र व्यतिरिक्तो नास्तीति बाह्यशब्दार्थाभ्युपगमेऽनुपपत्तिः ।। 44 ।।

उपत्तारसत्ताश्रयेण तूपपत्तिरित्याह--

उपचर्य तु कर्तारमभिधानप्रवृत्तये ।
पुनश्च कर्मभावेन तां क्रियां च तदाश्रयाम् ।। 45 ।।
अथोपचारसत्तैवं विधेयास्तत्र लादयः ।
जन्मना तु विरोधित्वात् मुख्या सत्ता न विद्यते ।। 46 ।।

(58) तुशब्दो बाह्यसत्ताया विशेषमुपचारसत्तायाः सर्वंसहत्वेन द्योतयति । इह सर्वात्मना परिनिष्ठितं जायत इति न व्यपदिश्यते । नापि सर्वात्मनासद्रूपम्, अपि तु सदसद्रूपमाश्रितपूर्वापरावस्थं सत्तासादनोन्मुखं वस्तु जायतेशब्दविषयः । तथा च तत्रोत्तरमसद्रूपमवस्याविशेषं पूर्ववस्थायां कारणानां कार्यौन्मुख्यलक्षणायाम् उपचर्य अङ्कुर इत्यभिधानस्य प्रवृत्तौ जायत इति कर्तृत्वोपपतिः । आश्रितपूर्वावस्थात्वाच्च जन्मार्थोपपत्तिः । एवं च कृत्वाश्रितपूर्वावस्थ उपचरितोत्तरावस्थश्च संमूर्च्छितोऽर्थात्मा जायत इत्यभिधानस्य विषयः । पूर्वावस्थाश्रयणाच्च लभ्यत्वेन कर्तैवोपचरितः कर्म नान्यदिति बुद्ध्या विवेचनमिदमाश्रित्य तदाश्रयाम् तयोः साधनयोः कर्तृकर्मणोराश्रयमास्पदं क्रियापेक्षत्वात् साधनभावस्य तन्निबन्धनम्, ते वा कर्तृकर्मणी आश्रयो यस्याः साधनाधीनजन्मत्वादित्युभयथापि पाठः । ताम् जनिक्रियां पूर्वापरीभूतावयवसमाहारात्मिकामध्यारोप्य जायतेऽङ्कुर इति प्रयोगसमर्थनम् । अथ इत्यभ्युपगद्योतनाय । एवं च सत्युपचारसत्तैवमाश्रिता भवति । तथा च तत्रैव कर्तर्यय जायत इति लकारो जात इति च क्तः, जातवानिति च क्तवतुः, जन्माङ्कुरस्येतिि षष्ठी । यद्वा कर्तृकल्पनया लकारः कर्तरि प्रत्ययः, क्रियाकल्पनया धातुः प्रकृतिः, कर्मकल्पनया कर्मकर्तृव्याख्याने वाक्येऽङ्कुर आत्मानं लभत इति द्वितीया कर्मणि । एवमात्मानमात्मना बिभ्रदस्तीत्यादावपि वाच्यम् । एवंविधो वा सर्वः परिकर उपचारसत्तेति तन्निबन्धनत्वादेवमभेदेन व्यपदेशः । मुख्या तु सत्ता पूर्वोक्ताद्विरोधान्न संगच्छते । अतः

आत्मलाभस्य जन्माख्या

इति पूर्वपक्षोऽयम् । सिद्धान्त आत्मलाभोन्मुखता जन्म । तथा च वक्ष्यति--

पूर्वस्मात् प्रच्युता धर्मादप्राप्ता चोत्तरं पदम् ।
तदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ।।

इति । तथा--
पूर्वामवस्थामजहत् संस्पृशन् धर्ममुत्तरम् ।
सम्मूर्छित इवार्थात्मा जायमानोऽभिधीयते ।
इति । पुनश्च कर्मभावेन `तम्' इति क्वचित् पाठः । तत्र तं कर्तारमेव पुनः कर्मभावेनोपचर्येति योजना ।। 45,46 ।।
इदानीं जन्मोत्तरकालभाविनमस्तित्वं भावविकारमङ्कुरोऽयमस्तीत्ययंशब्द उपचारसत्तासमाविष्टमेव
प्रतिपादयति, अन्यथायोगादित्याह ।
आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः ।। 47 ।।
(59) आत्मनात्मानं धारयतीत्यस्तेरर्थः । तथा च निरुक्तकारः ।
"अस्तीत्युत्पन्नस्यात्मधारणमुच्यते"
इति । व्यतिरिक्तकर्तृप्रतिषेधार्थम् आत्मना इति वचनम् । तथा च वास्तवस्य कर्तृकर्मक्रियाभेदस्याभावो भिन्नरूपत्वाद्वस्तुन इत्यर्थः । आत्मना सकर्मकत्वात्तर्ह्यस्तेः प्रसिद्धमकर्मकत्वमपावर्तेतेत्यत्राह-अन्तर्भावाद् इत्यादि । असौ इत्यसिधातुस्तदर्थो वा । धात्वर्थेन कर्मण उपसंग्रहादकर्मकोऽयं धात्वर्थ इति प्रसङ्गाद् व्युत्पादयति । जीवताविव प्राणानामप्यात्मलक्षणस्य कर्मणो धातुवाच्यत्वात्क्रियान्तरमेवेदमात्मनात्मानं धारयतीति व्याख्यायते, न त्वत्र भावतः कर्मयोग इत्यर्थः । यथा वक्ष्यति "न तत्र धारिर्न प्राणाजीवतिस्तु क्रियान्तरम्" इति । एवं जायत इत्यत्राप्यात्मानं लभत इत्यर्थनिर्वचनेऽन्तर्भूतकर्मत्वं द्रष्टव्यम् । यो हि धात्वर्थाद्बहिर्भूतः क्रमार्थः स सकर्मकव्यपदेशहेतुः । धातोरर्थपूरणे हि संपन्ने तस्माद् बाह्यस्य तेनार्थेन संबन्धे भेदाधिष्ठाने सति या कर्मता गामानेयेति शाब्दी प्रविश पिण्डीमित्यादौ च सामर्थ्यलब्धा सा सकर्मकव्यपदेशनिबन्धनम् । इह तु क्रियाकारकसंसर्गपर्यन्तो दीर्घो धात्वर्थ इति भेदाभावः ।। 47 ।।
एवं भेदाभावान्नायं वस्तुतो व्यवहारो युज्यत इति प्रतिपाद्याधुना जायत इतिवत् कर्तृत्वायोगात्
स्वरूपाभावाजप्यसंभवमुक्तोपचारसत्तायामेवोपपत्तिं प्रतिपादयति-- प्राक् च सत्ताभिसंबन्धान्मुख्या सत्ता कथं भवेत् ।
असंश्च नास्तेः कर्ता स्यादुपचारस्तु पूर्ववत् ।। 48 ।।
(60) अस्तीति पूर्वापरीभूता सत्ता साध्यमानावस्था प्रतीयते । अस्यां चावस्थायां निष्पन्नरूपः कर्ता
नास्ति, साधनसंबन्धात्पूर्वमपि सद्भावो नास्ति । न चान्यस्तब्द्यतिरिक्तोऽर्थः साधनमत्र प्रज्ञायते इति सैव सत्ता साध्यं च साधनं च मुख्यतो न संभवति । तथा हि सिद्धरूपेण साधनेन भवितव्यम् । न च सत्तामनुभवन्नेव सिद्धतया प्रज्ञायते, अनुभूतसत्तासंबन्धश्च न साध्य इति लब्वात्मलाभस्यात्मधारणलक्षणा सत्ता बुद्ध्या पूर्वापरीभूततयैवाभिधीयते । तत्र चोपसारसत्तारूढस्य पूर्वभागः कर्ता तदपरस्तु साध्यः कर्म, तदुभयाश्रयक्रियास्वरूपान्तर्भूतमिति पूर्वं जायत इतिवदुपचारसत्तया कर्तृत्वमाश्रित्यास्तीति प्रयोगोपपत्तिः । तदेवमस्ति, नास्ति, जायत इति प्रयोगमुपचारसत्तासमाश्रयणेन समर्थितम् । एत एव त्रयो भावविकाराः । एतेष्वेव चान्ये त्रयोऽन्तर्भवन्ति । तथा हि, जन्मनि वुद्धिरवयवोवोरचयात्मिकान्तर्भूतेति जायत इतिवद् वर्धत इत्ययमपि प्रयोगः समर्थनीयः । एवं परिणामो धर्मान्तराविर्भावलक्षणोऽत्रैवान्तर्भूत इति परिणमत इत्यनेनैव न्यायेनावगन्तव्यम् । परिक्षयस्तु नास्तीति विनाशेऽन्तर्भवति, तत्राप्युपचारसत्ताश्रयेण परिक्षीयत इति प्रयोगः समर्थनीय इति षड्भावविकारयोनित्वात्सर्वस्य क्रियाप्रपञ्चस्य बौद्धसत्ताश्रयेण प्रयोगः ।। 48 ।।
क्रियाभिः साधनानामाक्षेपात्तद्वाचिनामपि तथैव प्रयोग इति सार्वत्रिकीमुपचारसत्तायाः शब्दार्थत्वे व्याप्तिं निगमयितुमाह--
तस्माद्भिन्नेषु धर्मेषु विरोधिष्वविरोधिनीम् ।
विरोधिख्यापनायैव शब्दैस्तैरुपाश्रिताम् ।। 49 ।।
अभिन्नकालामर्थेषु भिन्नकालेष्ववस्थिताम् ।
प्रवृत्तिहेतुं सर्वेषां शब्दानामौपचारिकीम् ।। 50 ।।

एतां सत्तां पदार्थो हि न कश्चिदतिवर्तते ।
सा च सम्प्रतिसत्तायाः पृथग्भाष्ये निदर्शिता ।। 51 ।।

(61) बाह्यो येषां विरोधो भावादीनां धर्माणां तैरुपचारसत्ताया अविरोधो यथोक्तेन न्यायेन । अत एवाह--`विरोधिख्यापनायैव' इति । विरोधिनां प्रकाशनाय तैस्तैर्बाह्मणादिशब्दैरुपगृहीताम् । एतैर्हि शब्दैर्विषय उपदर्शयते धर्माणाम् । ते च धर्मा बाह्याद्वस्तुनो भिन्नाः, शब्देनैव भेदस्य परिकल्पनात् । नीलोत्पलादौ विरोधिना वा भिन्नाद् वर्तमानाद्वस्तुनोऽतीतानागतादयः वीप्सया विशेषणविशेष्यभावविषयनीलोत्पलादिशब्दैरपि उपाश्रिताम् इत्याह । तत्रापि प्रविभज्य मेलनमुपचारसत्तायां युज्यते । अन्यथा संसृष्टे वस्तुनि नेयं कल्पना घटत इत्युक्तम् । अतीतानागतकालव्यापित्वाच्च नियतकलेषवपि बाह्येष्वर्थेष्वियमभिन्नकाला सार्वत्रिकी । अत एव सर्वेषामपि शब्दानां प्रवृत्तिहेतुरियम् । चैत्रोऽभूद् भविष्यतीति बुद्ध्यार्तं निरूप्य तत्र शब्दप्रवृत्तेः, अनिरूपितेऽर्थे तदयोगात् । तथा हि विद्यमानोऽपि वर्तमानकालिकोऽर्थो यावद् बुद्ध्या नावधृतस्तावदविषयः शब्दानामिति सर्वत्रोपचारसत्तारूढ एव शब्दार्थ इत्युक्तं भवति । क्रियाकारकभावेनापि चार्थानां निरूपणं बौद्धमेव । तथा हि- भाव्यमानत्वादेव क्रिया सम्प्रति नास्ति, तदभावात्तदपेक्षं साधनत्वमपि कुत इति आख्यातशब्दस्य क्रियावाचिनः सुबन्तस्य च कारकवाचिनः सर्वस्यैव बुद्धिपरिगृहीत उपचारसत्तासमाविष्टो वाच्योऽर्थोऽवतिष्ठत इति सर्वेषां व्याप्तिसिद्धिः । अभावस्य च ज्ञायमानत्वेन सत्त्वादेतामुपचारसत्तां सर्व एव पदार्थो नातिक्रामतीति सर्वेषामेव तद्विषयत्वादभावादिशब्दानामप्यर्थेन नित्यावियोगः । सिद्धः । अस्याश्चोपचारसत्ताया न निर्मूलत्वमपि तु भाष्यकाराभ्युपगतत्वमेव । मतुब्वार्तिके न सत्तां पदार्थो व्यभिचरतीत्यस्तिशब्दार्थाक्षेपे तत्समर्थनाय सम्प्रतिसत्तायां यथा स्याद् भूतभविष्यत्सत्तायां मा भूत् गावोऽस्यासन्, गावोऽस्य भवितारः ।
इति भाष्यवचनादुवपचारसत्तास्तीति गम्यते । प्रमाणभूतत्वादस्य वचनस्य । न हि भूता भविष्यन्ती वा काचित् सत्ता या अस्तीत्यनेन विचार्येत । भूतभविष्यतोरप्यनुपाख्यत्वान्न काचिन्मुख्या सत्ता । अतीतस्यानुभूतत्वादनागतस्य प्रगुणकारमसांमुख्येन बुद्ध्या तु परामर्शे प्रत्ययपरिवर्तिन्यर्थे शब्दप्रयोग इत्युपचारसत्ता भूतभविष्यतोरुपपद्यते । तथा च तद्व्युदासाय बाह्यसत्तापरिग्रहार्थमस्तीति विशेषणं युक्तम् । बाह्या हि सत्ता सम्प्रति वर्तमाने काले भवतीत्यन्या, ततो भूतभविष्यतोः प्रत्ययात्मना सत्तेयम् । यद्यपि वर्तमानवस्थास्यापि बाह्यस्य प्रतीतिग्राह्यत्वेनैव व्यवहार्या सत्ता तथापि सैव बहिरपि भावादस्तीत्यनेन विशेषणेन विवक्षितवर्तमानकालेन गृह्यते । प्रतीतिमात्रशरणा त्वितरा व्युदस्यते । तदेवमुपचारसत्तायां समर्पितस्वभावानां बाह्यानामेवार्थानामतीतादिभावेन प्रत्यायनाद्यथार्थ एव शाब्दो व्यवहार इति संबन्धनित्यत्वमुपपादितम् ।। 49,50,51 ।।
इदानीं सर्वस्यैव शाब्दस्य व्यवहारस्य यथातत्त्वमप्रवृत्तेर्विप्लुतत्वे गवादिशब्दानामविचारसिद्धार्थवत्ताभ्युपगन्तव्या । तथा च सत्यतीताद्यभावविषयाणामपि शब्दानां भावाभिमतवस्तुविषयैर्घटादिशब्दैः तुल्यतां प्रतिपादयितुमुपक्रमते--
प्रदेशस्यैकदेशं वा परतो वा निरूपणम् ।
विपर्ययमभावं वा व्यवहारोऽनुवर्तते ।। 52 ।।

(62) इह शाब्दो व्यवहारोऽयथातत्त्वं प्रवृत्तोऽर्वाग्दृशाम् । तथा हि पूर्णस्य तत्त्वस्य साक्षाच्छब्दैः स्प्रष्टुमशक्यत्वादविद्यापरिकल्पितप्रतिनियतघटादिप्रदेशगतः शाब्दो व्यवहारः । प्रदेशशब्देन घटादेर्ब्रम्हैकदेशत्वादभिधानं कृत्स्नार्थपरिग्रहासामर्थ्यं शब्दानां प्रतिपादयितुम् । तत्रापि च मात्राकलापात्मको न प्रदेशः समस्तः शब्देनाभिधीयते अपि तु तदेकदेशः । घटशब्देन हि घटत्वजातिरुच्यते । तत्रैव रक्तशब्देन गुणः । एवं शब्दान्तरैरपि प्रतिनियतभावाभिधानमुदाहार्यम् । परेण जात्यादिना च निरूपणम् । संसर्गदर्शने स्वतो गौर्न गौः, गोत्वाभिसंबन्धाद्गौरिति ब्रह्मकल्पं साक्षादव्यवहार्यमेव द्रव्यं परोपधीयमानरूपविशेषं व्यवहारमनुपतति । तत्र विपर्ययोऽभिन्नस्य ब्रह्मणो नानोपाधिवशेन भेदः । विज्ञाननये वा बहीरूपस्य बहीरूपतया भानं विपरीतख्यातिः । अभावः शून्यवादिमते व्यावहारिकः, बाह्यस्य सर्वथैव निषेधात् विज्ञानमात्रस्याकारनानात्वायोगादसेवेदं भेदजातं शब्दविषयम् । तदेषु चतुर्षु दर्शनेषु शब्दानामर्थसंबन्धो न भाविकः । तथा हि- आद्ये दर्शनेऽर्थोऽस्ति गवादिशब्दानाम्,तत्रोपपद्यते संबन्धो यदि सोऽर्थभागो ज्ञानस्य गोचरीभवेत् । न च

भवति, विवेकेनानवधारणात् । अतीन्द्रिया अपि चान्ये धर्मा अभ्युपेयन्ते । अतोऽत्रापि न संपूर्णोऽर्थसंबन्धः । इतरेषु पक्षेष्वर्थाभावादेव संबन्धासिद्धिः । तथा हि परतो निरूपणेऽऽधीयमानरूपमेव नीरूपं निरूप्यतेऽभिधीयते चेति न सत्यवस्तुविषयः संबन्धः । एवं विपर्ययाभावपक्षयोरपि वाच्यम् ।। 52 ।।

एतदेव दृष्टान्तेन साधयति--

यथेन्द्रियस्य वैगुण्यात् सत्ताध्यारोपवानिव ।
जायते प्रत्ययोऽर्थेभ्यस्तथैवोद्देशजा मतिः ।। 53 ।।

(63) तिमिरोपहतनयनश्चन्द्रमेकमप्यनेकं पश्यति । कामली च शुक्लमपि पीतं शङ्खमिति । इन्द्रियदोषादाकारान्तरारूषितार्थामभासी प्रत्ययोऽर्थेभ्यो जायते । अर्थानां तत्रावंबनत्वान्नियतविषयत्वाद्भान्तीनां प्रत्ययधर्माध्यारोपो न वस्तु प्रचिनोतीति इव शब्दः । एवमुद्दिश्यते प्रतिपाद्यतेऽनेनेति उद्देशः शब्दः । तत उत्पन्ना बुद्धिरसदाकाराध्यारोपवती भवति ।। 53 ।।

इन्द्रियवत् किं शब्दे वैगुण्यमित्याह--

आकृत्स्नविषयाभासं शब्दः प्रत्ययमाश्रितः ।
अर्थमाहान्यरूपेण स्वरूपेणानिरूपितम् ।। 54 ।।

(64) इह कारणानुरूपं कार्यं भवति । शब्दस्य च निरूपितार्थविषयत्वान्निरूपणाप्रत्ययः कारणम् । तदुक्तम्--तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते । इति । निरूपणाप्रत्ययश्च विकल्पः । स चैकैकव्यावृत्तिनिष्ठत्वाद्विकल्पनाम् अकृत्स्नविषयावभासः । न हि विकल्पेन यथातत्त्वं वस्तु स्पृश्यते, प्रदेशैकदेशादिना संस्पर्शादित्युक्तम् । अतश्चाकृत्स्नमेवार्थमध्यारोपितरूपभेदं शब्दः प्रतिपादयति । कार्यकारणसंबन्धवशाद्विकल्पात्मको हि प्रत्ययः शब्दाज्जायते । तदुक्तम्--विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः । इति । तथा

"कार्योपादानविकल्पपरिगृहीतः शब्दार्थः"

इति । एवमविद्यामान्द्याद्विकल्पानां यथातत्त्वमवसायपाटवाभावात् समरोपितरूपेणावसायस्य सर्ववादिभिरभ्युपगतत्वात्तदुपदर्शितविषयविषयाः शब्दाः सर्व एव बहिरसदर्थविषयाः प्रत्ययोपारूढरूपाभिधायिनः सिद्धा इत्यतीताद्यभावादिशब्दानामप्यर्थसंबन्धे न विप्रतिपत्तव्यमिति स्थितम् ।। 54 ।।

तत्रैतत् स्यात् निरावरणख्यातीनां भावतत्त्वदृशां यथार्थ एव शाब्दो व्यवहारः, ते चास्माकमुपदेष्टार इति नायथार्थः स इत्याशङ्क्याह--

रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ ।
ज्ञानं प्रत्यमिलापं च सदृशौ बालपिण्डितौ ।। 55 ।।

(65) परस्पराभिप्रायमेलनात्मकत्वाद्व्यवहारस्यावदातदर्शना भावतत्त्वदृशोऽपि व्यवहरन्तो लोकपथवर्तिनः सदृशोऽन्यैरर्वाग्दर्शनैः । रूपणम् आलोचनम् । आलोच्य शब्देन प्रापणं व्यपदेशः । आभ्यां व्यवहरन्तो लौकिके मार्गे तुल्याः । क्व विषय इत्याह ज्ञानं प्रति इत्यादि । बालस्य विपर्यासितमतेर्यज्ज्ञानमर्थसंविकल्पम्, अभिलापो व्यपदेशरूपश्च ते प्रति तद्विषये । यथा बालो विकल्पयत्यर्थमभिधत्ते च, एवं परमार्थदर्शना विद्वांसोऽपि । तथा हि तेऽपि निरूप्य विवक्षित्वा विषयं यथाविवक्षमेव व्यपदिशन्तः पराभिप्रयमेलनमारभन्त इति । यथा पराभिप्रायमेव पूर्वं निरूपयन्ति तथा च तेषामपि निरूपणाज्ञानं विकल्पः तत्पूर्वकश्चाभिलापः शब्दो लौकिकसदृशः । या तु तेषां व्यवहारातीता दशा तस्यां शुद्धं ज्ञानं पारमार्थिकमनिरूपकम् ।। 55 ।।

प्रतिनियतविषयग्राहकमेव ज्ञानं सदैवेति कास्य शुद्धिरित्याह--

सर्वार्थरूपता शुद्धिर्ज्ञानस्य निरुपाश्रया ।

ततोऽप्यस्य परां शुद्धिमेके प्राहुररूपिकाम् ।। 56 ।।

(66) द्वे दशे शुद्धेरुपक्रमपरिसमाप्तिरूपे । इन्द्रियसन्निकर्षादिरूपोपाश्रय निरपेक्षतयाशेषार्थावभासखचितं सर्वज्ञज्ञानमुपक्रमे शुद्धमित्युच्यते । इन्द्रियाद्यपेक्षारूपायाः स्वविषयग्रहणेऽशुद्धेरनवगमात् । निष्ठायां चाकारकालुष्यापगमात् प्रभास्वरं प्रशान्तकल्लोलं संविन्मात्रमेकघनं शुद्धं ग्राह्यग्राहकप्रपंचशून्यं परं ब्रह्म ।। 56 ।।

नियताकारावग्रहो ह्यशुद्धिरित्याह--

अपप्लवो हि ज्ञानस्य बाह्याकारानुपातिता ।
कालुष्यमिव तत्तस्य संसर्गे व्यतिभेदजम् ।। 57 ।।

(67) स्वच्छज्ञानस्यार्थेन संसर्गे सति यस्तेनैवार्थेन व्यतिभेदः प्रतिबिबवशादभेदो व्यामिश्रीभावः ततो जातोऽयम् उपप्लवो बाह्यविषयप्रावण्यम्, उदकस्येव रजःसम्पर्कादाविलीभावः तदपगमे क्रमेण स्वस्मिन् स्वच्छरूपेऽवस्थानम् परा शुद्धिः सर्वदर्शनाभ्युपगता । तदुक्तम्

"तदा द्रष्टुः स्वरूपेऽवस्थानम्" (Y.Dar.I.3)

इति । इवशब्देनार्तरूपसम्भेदेऽपि स्वप्रकाशं ज्ञानरूपमनवगतमित्याह ।। 57 ।।

अर्थस्यापि व्यवहारेऽशुद्धिमाह--

यथा च ज्ञानमालेखादशुद्धौ व्यवतिष्ठते ।
तथोपाश्रयवानर्थः स्वरूपाद्विप्रकृष्यते ।। 58 ।।

(68) आलेखो विषयरूपोपरागः । ततोऽशुद्धं ज्ञानमिति प्रसाधितमर्थमर्थाशुद्धौ साध्यायां दृष्टान्तयति । उपाश्रयो जात्यादिरुपधानम्, तेन च द्वारेण यथादर्शनमर्थो व्यवहार्पथमवतरति । निरूपाधेस्तस्याव्यवहार्यत्वात् । उपाधिसंसर्गश्चातत्त्वमित्यर्थस्येयमशुद्धिः । जात्याद्युपाधिरूपेण समवेतेन शबलितमर्थवस्तु प्रतीयतेऽभिधीयते चेति तथा तद् व्यवहारमवतरति । न तु सर्वथाव्यपदेश्यं द्रव्यम्, एतदेव हि तस्य रूपं यदुपाधिसंसृष्टम्, सदैव तत्संसृष्टस्य प्रत्ययात् ।। 58 ।।

उक्तमर्थ प्रकृते योजयति

एवमर्थस्य शब्दस्य ज्ञानस्य च विपर्यये ।
भावाभाववभेदेन व्यवहारानुपातिनौ ।। 59 ।।

(69) जात्यादिसंसर्गरूपोपरागोऽर्थस्याशुद्धिः । शब्दस्याप्यकृत्स्नार्थाभिधानात्तदुपाधिरूपेणाभिधानाद् अशुद्धिः । ज्ञानस्य बाह्याकारोपरागः । एवं त्रितयमपि विपर्यस्तम् । तथा च भावस्यापि शब्देनाभिधीयमानस्य जायमानस्य वा परोपाधिरूपतयाभावसमकक्ष्यता । अभावोऽपि हि घटाभावः पटाभाव इति परोपाधिरेव शब्दप्रत्ययावनुपततीति साम्यम् । बुद्ध्या निरूप्यमाणो ह्यभावो भावरूपेणैवावच्छिद्यते । यत्तु परमं रूपं तत्रैव व्यवहारास्पदम् । ननु च विपर्यासः प्रतिपत्तृधर्मः, तेन प्रतिपत्तैव विपर्यस्तः कथ्यताम्, अर्थस्तु कथं विपर्यस्तः । उच्यते । विपर्यासविषयत्वात् स्वरूपेणाप्रतिभासनादर्थोऽपि तथा, शब्दोऽपि विपर्यासहेतुत्वात् तथोच्यते ।। 59 ।।

कथमभेदेन व्यवहारानुपात इत्याह--

यथा भावमुपाश्रित्य तदभावोऽनुगम्यते ।
तथाभावमुपाश्रित्य तद्भावोऽप्यनुगम्यते ।। 60 ।।

(70) निरुपाधेरभावस्याविशिष्टत्वात् भावोपाधेर्व्यवहारावतारः । भावस्यापि मद्यावस्थायामेव सत्त्वात् प्रागभावावच्छिन्नमेव व्यवहारे तत्त्वम् । नित्यानामप्यभिव्यंजककालात् प्रागनभिव्यक्तेरसत्तया व्यवहारो न विशिष्यते ।। 60 ।।

एवमन्योन्यापेक्षित्वे भावाभावयोर्व्यवहारे साम्यं भेदमभ्युपगम्य प्रतिपादितदम् । इदानीं भावव्यतिरिक्तमभावं निरसितुमाह--

नाभावो जायते भावो नैति भावोऽनुपाख्यताम् ।
एकस्मादात्मनोऽनन्यौ भावाभावौ विकल्पितौ ।। 61 ।।

(71)द्वैतनये प्रागभावोपमर्देन भावनिष्पत्तिः । भावोपमर्देन प्रध्वंससंभवः । द्वयमपि
चैतदयुक्तम्, भावाभावयोरन्योन्यस्वभावोपगमसंभवात्, स्वभावस्यानपायात् । अतश्चात्यन्तविवेके
भावोपाधितयाभावस्याभावोपाधितया भावस्य प्रतीतिर्न स्यात् । तस्मादेकमेवाद्वयं तत्त्वमात्मशब्दवाच्यं व्यवहारे विकल्पदशायां
भावाभावोपाधिरूपप्रविभक्तं चकास्ति । प्रकाशरूपस्य हि परस्य तत्त्वस्य सर्वथाविभिन्नस्वभावस्य
महासत्तात्मनोऽभावप्रतियोगिनोऽविद्यावशात्सांवृतलोकयात्रनिर्वर्तनसमर्थस्य बहिरिदन्तया प्रतिभाने
वर्तमानकालोपाधितयार्थक्रियाकारिणो भावरूपता, अतीतानागतकालोपाधितया चान्तरेव
संस्काररूपतयानुवर्तनाद्बाह्येन्द्रियविषयतानुपगमात् सर्वप्रमातृसाधारणार्थक्रियाकरणादभावरूपतया व्यवहारः । न च सर्वथा
तदानीमसत्ता स्मर्यमाणत्वादुत्प्रेक्ष्यमाणत्वाच्च । तथा च यस्य संस्काररूपास्ते भावास्तस्य स्मृत्युत्प्रेक्षागताः कल्पयन्त्येव
कामप्यर्थक्रियाम् । अत एव च मध्यावस्थस्य भावस्वभावस्यैव प्रागभावः स्फुटेन
रूपेणेन्द्रियापरिच्छेद्यावस्था, प्रध्वंसश्चोत्तरकालमभावो व्यवह्रियते, न तु सर्वथा भावसंस्कारनिवृत्तावभावः कश्चित्
सर्वशक्तिविरहलक्षणश्चाकास्ति चेतसि । अत एव त्रय्यध्विकाः पदार्थाः समुद्घोष्यन्त इति नाभावो नाम कश्चित् ।। 61 ।।

तत्रैतत् स्यात्-कथं भावाभावौ विकल्पितौ इत्युच्यते, कारणभेदात् सत्यभूतौ यथावसायं कस्मान्न भवत इत्याशङ्क्य
सदसत्पक्षभेदेन कार्यकारमभावानुपपत्तिप्रतिपादनपूर्वकं द्वैतदर्शनमपोद्य विवर्ताश्रयेणाद्वैतनयं स्वमतेन सिद्धान्तयितुमुपक्रमते--
अभावस्यानुपाख्यत्वात् कारणं न प्रसाधकम् ।
सोपाख्यस्य तु भावस्य कारणं किं करिष्यति ।। 62 ।।

(72) इह कार्यस्यात्मलाभमुद्दिश्य कारणं प्रवर्तते । तत्र निःस्वाभावस्योद्देशत्वायोगात् किमवलंब्य कारणस्य पदबन्धः स्यात् ।
जात्यात्मना सत्त्वे तस्या नित्यत्वात्कार्यतानुपपत्तेः पुनरपि कारणं क्व वर्तेत । कथंचिदभेदो जातिव्यक्त्योरिति चेद्
व्यक्त्यात्मना तर्हि कार्यतेति तदवस्थो दोषः । नियतकारणपरिग्रहश्च न स्यात् । असत्त्वस्याविशेषात् सिकताभ्योऽपि तैवं
स्त्रवेत् । नियतशक्ति कारणमिति चेत् कुतोऽवसितमेतत् । तस्मिन् सति सद्भावादिति चेत् तदेवेदं
पर्यनुयुज्यते`कथमत्यन्तासतस्तस्मिन् सति भाव इति । प्रतीतित्वाददोष इति चेत् तदेवेदं
पर्यनुयुज्यते `कथमत्यन्तासतस्तस्मिन् सति भाव इति । प्रतीतत्वाददोष इति चेत् प्रतीतिमात्रमस्तु किमयुक्तिकेन
कार्यकारणभावोपवर्णनेन । तथा च सिद्धान्तयिष्यति--
"भावानां प्रागभूतानामात्मतत्त्वं प्रकाशते"
इति । अथ सत् कार्यं कारण इति नैते दोषाः, अत्रापि कृतस्य करणयोगादकिंचित्करं कारणम् । न ह्येतद्युज्यते कारणं
चात्रोपयुज्यते, न चापूर्वं किंचित् प्राप्यात् इति । अथाभिव्यक्तिः कारणेन कार्यस्य क्रियते साऽपि ततोऽन्याऽन्या वा । अन्यत्वे
सती वा स्यादसती वा । सत्त्वे प्रागिव कारणानुपपत्तिः । अभिव्यक्त्यन्तरकरणे त्वेतदेव पुनरावर्ततेऽनवस्था च । असत्त्वे
प्राप्तमसतो जन्म । तथा च कार्ये को विद्वेषः । अभिव्यक्तौ च कारणव्यापारात् कार्यस्य कार्यता न स्यात् । वस्त्वन्तरोत्पत्तौ च
किं तस्य येनासावशङ्कितमेवोद्भवेत् । तत्संबन्धाभिव्यक्तिकारणादिति चेत्, कोऽयं जन्यजनकयोः संबन्धः ।
तत्त्वेऽप्यभिवयक्तौ तज्जन्यायां तद्विषयः कारणव्यापारो न स्यात्, कार्येणैव तस्या जननात् । तथा कार्यस्य जनने तद्विषयोऽपि
कारणव्यापारो न स्यात् । तथा च तस्यासतो जननेऽसत्कार्यप्रसङ्गः । सतोऽप्यभिव्यक्तौ पुनरप्येतदावर्तते ।
उपकार्योपकारकभावः संबन्धोऽभिव्यक्तिकार्ययोरिति चेत्, केन करयोपकारः । स च किं व्यतिरिक्त उताव्यतिरिक्तः । व्यतिरेके
तस्येति कः षष्ठ्यर्थः । उपकारान्तरकल्पनेऽप्येतदेव चोदनीयमनवस्था च । अव्यतिरेके तु जन्यजनकभाव एव पर्यवस्यति ।
तत्र चोक्तो दोषः ।अनन्यत्वेऽभिव्यक्तेः कार्यात्तदेव कृतं स्यादित्यसत्कार्यनयाश्रयः । तत्र चानुपपत्तिरावेदितेति सङ्कटोऽयं
पन्थाः ।। 62 ।।

इत्थं च कार्यतानिषेधात् प्रागभावप्रध्वंसाभावावपि कृतकवस्तुविषयौ न स्त इति पूर्वोक्तमेवावस्थाभेदेन विकल्पितत्वं भावाभावयोर्निगमयति--

तस्मात्सर्वमभावो वा भावो वा सर्वमिष्यते ।
न त्ववस्थान्तरं किंचिदेकस्मात् सत्यतः स्थितम् ।। 63 ।।

(73) कार्यकारणभावाभावान्मध्ये जातोऽभिव्यक्तो वासन् पूर्वोत्तरयोरवस्थयोरजातोऽनिभव्यक्तो विनाशकारणयोगाद्विनष्टश्च भावो नोपपद्यत इति भावाभावौ नैकस्यावस्थातुः परिणामदर्शनाश्रयेण सत्यभूतावस्थात्मकौ, अपि तु व्यवबारदशायामविद्याप्रवृत्तिरूपायां सत्यस्याभिन्नसंविन्मात्रस्य सत्यभूतावस्थात्मकौ, अपि तु व्यवहारदशायामविद्याप्रवृत्तिरूपायां सत्यस्याभिन्नसंविन्मात्रस्य तत्त्वस्य यथार्थमनवभासात् परमार्थतः सर्वं प्रपंचजातमभाव एवापरमार्थ एव । स च नीरूपो न कश्चिदिति भावव्यतिरेकं न सहते । किंचिद्रूपं हि कुतश्चिद् व्यतिरिच्यते । भेदमात्रस्य चाभिन्नतत्त्वाग्रहणरूपस्य शून्यत्वात् । सांवृतेन तु रूपेण सर्वं भावात्मकम् , प्रथमानस्य वस्तुत्वात्, अवस्तुनः प्रथनायोगात् । भावानां हि ज्ञायमानत्वेन ज्ञानोपारूढतया सत्त्वमेव, बहिरध्यवसानाच्चापि सत्त्वम् । केवलं योऽयं भेदोऽवच्छेदो ग्रहणमसौ न किंचिदविद्या । तत्र च भिन्नः प्रकाशोऽनुगत इति विद्यावस्थतैव । तथा च

"विद्याविद्याप्रविभागमप्रविभागं ब्रह्म"

इति । ब्रह्मकाण्ड उक्तम् ।। 63 ।।

यतश्चैवं सर्वं संवृतिसत् ततः प्रवादिनां दर्शनविकल्पास्तत्राभिमानमात्रमित्याह--

तस्मान्नाभावमिच्छन्ति ये लोके भाववादिनः ।
अभाववादिनो वापि न भावं तत्त्वलक्षणम् ।। 64 ।।

(74) आविर्भावतिरोभावमात्रं जन्मनाशौ सत एवेति वदन्तो भाववादिनः परमर्षयः । तेषामभावो नाम भावपृथग्भूतो न कश्चिद्भावस्यैव पूर्वोत्तरयोकवस्थयोरभावव्यवहारात् । तथा हि-मृदवस्था घटस्य प्रागभावः , कपालावस्था च प्रध्वंसाभाव इति वाच्यम् । सर्वं शून्यमिदं जगदित्यभाववादिनामप्यभावः पारमार्थिको न कश्चित् इति न भावं तत्त्वसक्षणं परमार्थरूपमिच्छन्ति । एवमपि ब्रुवन्तो व्यवहारे भावाभावभेदमर्थक्रियाकारणाकरणनिमित्तं नापह्नुवते । ततश्च संवृत्या सर्वमुपपद्यते साम्येनेत्यभिनिवेशोऽत्र त्याज्यः ।। 64 ।।

अभावप्रतिक्षेपे तर्हि निर्निबन्धनो भावाभावभेद इत्यत आह ।

अद्वये चैव सर्वस्मिन् स्वभावादेकलक्षणे ।
परिकल्पेषु मर्यादा विचित्रैवोपलभ्यते ।। 65 ।।

(75) सर्वस्मिन् परिदृश्यमानभेदजाते स्वभावात् परमार्थरूपात्, न सामान्यसमावेशवशादेकस्वभावे ब्रह्ममये विचित्रेषु विकल्पेषु भावाभाववादिनानात्वेनानादिनियतिशक्तिनियमितेयमविद्यावशान् मर्यादा व्यवस्था नानारूपा दृश्यते । असत्यपि वास्तवे भेदेऽविद्यानिमित्तोऽयं भेदो व्यवहारे रूढ इत्यविचारितसिद्धोऽवगन्तव्य इत्यर्थः ।। 65 ।।

न तु सत्यतोऽयं भावाभावभेद इति निदर्शनेन व्युत्पादयति--

चतस्रो हि यथावस्था निरुपाख्ये प्रकल्पिताः ।
एवं द्वैविध्यमप्येतद् भावाभावव्यपाश्रयम् ।। 66 ।।

(76) प्राक्प्रध्वंसात्यन्तेतरेतरलक्षणोपाधिवशेन नीरूपस्य रूपभेदायोगाद्यथाऽभावस्य चतुर्धा भेदः काल्पनिकः तथैव भावाभावलक्षणोऽपि भेदः काल्पनिक एवावगन्तव्यः इत्यर्थः । बहरिन्द्रियगोचरार्थक्रियोपाधिर्ब्रह्मभागः कल्पितो भावः,बहिरर्थक्रियाशून्यस्त्वभाव इति सङ्केतः ।। 66 ।।

वस्तुतस्तु सर्वव्यवहारातीतौ न पृथग् भावाभावावात्मतत्त्वमुद्दर्शयत इत्याह--

अविरोधी विरोधी वा सन्नसन् वापि युक्तितः ।

क्रमवानक्रमो वापि नाभाव उपपद्यते ।। 67 ।।

(77) नीरूपत्वादभावस्य भावेन सह विरोधाविरोधौ युक्त्या न सङ्गच्छेते । न हि भावमभावः समुच्छिनत्ति अनुगृह्णति वा येन तद्विरोधी वा यथासंख्यं भवेत् सतोऽसत्वायोगाल्लब्धरूपस्यातिशयायोगाच्छ सत्त्वमभावस्यात्मविरुद्धम् । असत्त्वमप्यस्य तद्रूपत्वादेव व्यतिरिक्तं भाववन्नोपपद्यते । एवं हि भावताप्रसङ्गः क्रमोऽपि भावधर्मो नाभावस्य युज्यते, भावस्योच्छेत्तुमशक्यत्वाद् हि तदपेक्षो भावस्य क्रमः, नाप्यभावान्तरापेक्षः, तस्यैवासिद्धत्वात्, नीरूपस्य भेदाभावात् ।

एवमक्रमोऽपि,यौगपद्यमर्थान्तरापेक्षत्वादस्य नास्ति, अन्येन सहासमानकालत्वादिति युक्तितो नोपपद्यते ।। 67 ।। अभावो नामैवंधर्मो यतः एवम्

अविरोधी विरोधी वा सन्नसन्नपि तत्त्वतः ।

क्रमवानक्रमो वापि तेन भावो न विद्यते ।। 68 ।।

(78) यतोऽभावस्येत्थमनुपपद्यमानता तेन भावः अप्येवं परमार्थतो नोपपद्यते । तथा हि-

भावस्यानुच्छेद्यत्वान्निरतिशयत्वाच्चाभावेन सह विरोधिता अविरोधिता च न युक्ता । एवं क्रमाक्रमावपि । अथ भावान्तरेण सह भावस्य विरोधित्वादिति चिन्त्यते तत्रापि स्वतोऽनुच्छेद्यस्य निरतिशयस्य च केनचिदुच्छेत्तुमनुगृहीतं वाशक्तेस्तदनुपपत्तिरेव । क्रमाक्रमावपि भेदाभावान्न पारमार्थिकौ । सत्त्वमपि नियतार्थकियानिमित्तमर्थक्रियान्तराकरणान्न तत्त्वतो व्यवतिष्ठते । सत्तासंबन्धस्य चानुपलब्धेर्न तन्निमित्तं प्रतिभासनाच्चासत्त्वमप्यपारमार्थिकम् । इत्थं सर्वव्यवहारा विकल्पपरिघटिता एवेति भावाभावावपि तथा विज्ञेयौ कल्पना चाविद्याशक्तिः । सा च तत्त्वान्यत्त्वाभ्यामनिर्वाच्येति ब्रह्मकाण्डे निर्णीतम् ।। 68 ।।

कालनिमित्तोऽप्यत्र भेदो न पारमार्थिक इत्याह--

अभावे त्रिषु कालेषु न भेदस्यास्ति सम्भवः ।

तस्मिन्नसति भावेऽपि त्रैकाल्यं नावतिष्ठते ।। 69 ।।

(79) त्रिषु कालेषु इति । कालत्रयनिमित्तको भेदोऽभावविषयो नास्ति । तथा हि नीरूपत्वादभावस्य वर्तमानकृतस्तावत् परिच्छेदो नास्ति । तदभावत्तदपेक्षोऽतीतानागतकालयोगोऽपि न भाविकः । एवं च भावस्याप्याभावापेक्षं त्रैकाल्यं नास्ति । तथा हि प्रागभावाश्रयं भविष्यत्वं प्रध्वंसापेक्षं च भूतत्वमिति प्रागभावप्रध्वंसयोर्भेदाभावादयुक्तं तत् । तदभावाद्वर्तमानत्वमपि नास्ति । नापि स्वापेक्षं पूर्वापरकोट्योर्भेदभावत्, भावस्य कालत्रययुक्तत्वम्, भावे तु सांख्यानां पूर्वापरकोट्योर्भावस्यैकत्वमेवाभिन्नरसमिति पुनरपि कालत्रयायोगः । अवस्थास्ततो न व्यतिरिच्यतन्त इति तासामपि तदभावः । व्यतिरेकेऽपि वा तद्वतः कालभेदो न भावस्य शक्यते लक्षणमनयोर्नोपपद्यत इत्याह--

आत्मतत्त्वपरित्यागः परतो नोपपद्यते ।

आत्मतत्त्वन्तु परतः स्वतो वा नोपकल्पते ।। 70 ।।

(80) कारणाद् भावस्य सतो विनाशो नोपपद्यते । नीरूपस्य कारमसामर्थ्येन जन्यमानतायां नाशस्य रूपवत्त्वप्राप्तेर्भावेन सम्बन्धे प्रागिव तस्योपलब्धिः स्यात् । तेन तस्य विनाशे तत्रापि तथैनेत्यनवस्थापातात्, भवनस्वभावस्याभवनविरोधाच्च स्वतोऽपि विनाशाभाव इत्यभावशब्दार्थो न कश्चिदवतिष्ठते । भवनमपि भावसद्भावपरिनिष्ठतस्य कारणान्नोपपद्यते । स्वतोऽपि भवतो भवनायोगः, अभवनशीलस्य भावता विरुद्धेति भावशब्दार्थोऽपि न कश्चित् ।। 70 ।।

न चैवमपि भावाभावावेकं तत्त्वत इत्याह--

तत्त्वे विरोधे नानात्व उपकारो न कश्चन ।

तत्त्वान्यत्वपरित्यागे व्यवहारो निवर्तते ।। 71 ।।

(81) विधिप्रतिषेधयोरोकत्वं विरुद्धम् । नानात्वे तु भावाभावयोः परस्परापेक्षया निरुपकारिणोर्व्यवहारो न स्यात् तदतद्व्यतिरेकेण विकल्पासंभवो राश्यन्तराभावादिति सर्वव्यवहारातीतत्वं भावाभावादिरूपतया प्रतिभासमानं जगत् सांवृतेन रूपेणाविचारितसिद्धमिति स्थितम् ।। 71 ।।

परमार्थस्त्वयमत्रेत्याह--

यत्र द्रष्टा च दृश्यं च दर्शनं वा विकल्पितम् ।

तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः ।। 72 ।।

(82) ग्राह्याग्राहकादिप्रपञ्चम् विकल्पपरिघटितस्यासत्यत्वात्सर्वप्रपञ्चसमतिक्रान्तं वाङ्मनसातीततत्त्वमविकल्पं परं ब्रह्मानादिनिधनं सत्यमिति ब्रह्मविदः प्राहुः । ऋग्यजुःसामात्मको वेदस्त्रयी, तस्या अन्तः सारभूतार्थनिर्णयमय उपनिषद्भागः । तत्र हि समाप्तौ संक्षिप्य शास्त्रार्थसतत्त्वमाख्यायते, तं जायते तच्छीला ये त एवमभेदं परमार्थरूपमाहुः, न कर्मानुष्ठानाक्षिप्तं भेदम् । अविद्यापरिकल्पितो हि भेदो वितथो वैकल्पिकः । अविद्यापि च तत्त्वान्यत्त्वाभ्यां परस्मादनिर्वाच्यानादिसिद्धजीवात्मगतभेदप्रतिभासकारिणीत्युपपादितं ब्रह्मकाण्डे विस्तरत इति तत एवावधार्यम् ।। 72 ।।

तदेवं यथावभासमसत्यार्थनिष्ठः शाब्दो व्यवहार इत्यलब्धाभिन्नतत्त्वाविश्रान्तिर्भेदष्वत्रोपप्लवत इत्याह--

सामान्यं वा विशेषं वा यस्मादाहुर्विशेषवत् ।

शब्दास्तस्मादसत्येषु भेदेष्वेव व्यवस्थिताः ।। 73 ।।

(83) सामान्यमपि सामान्यान्तराद् व्यावृत्तं शब्दैरुच्यते । तथा विशेषो विशेषान्तराद् व्यावृत्त इत्यसत्येषु भेदेष्वेव शब्दाः कृतपदबन्धा नाभिन्नमद्वयं तत्त्वं संस्प्रष्टुं शक्ता इति वितथ एव शाब्दो व्यवहारः । सन्नित्यपि व्यवहारोऽभावप्रतियोगी । एवं ज्ञेयं प्रमेयमित्यादयोऽपि शब्दाः परिकल्पिताः ज्ञेयादिव्यावृत्तविषया इति सर्वं भेदोपनिपाति शब्दजातम् । तदुक्तं भाष्ये--

"सामान्यमपि यथा विशेषस्तद्वद्"

इति । विशेषवदित्यर्हार्थे वतिः । विशेषमर्हति यदभिधानं तद्विशेषवद्, विशेषो वा यत्रास्तीति मत्वर्थीयः । सामान्योपहितस्य विशेषस्याभिधानं संभाव्येतेति तन्निवृत्तये विशेषणमेतदिति विशेषेणापि संबध्यते ।। 73 ।।

एवं तावन्नीरूपमवस्त्वभावमाश्रित्य भावाभावयोर्विरोधाद्युक्तम् । इदानीं वैशेषिकनयेन सप्तमं पदार्थमभावमाश्रित्याह--

न ह्यभावस्य सद्भावे भावस्यात्मा प्रहीयते ।

न चाभावस्य नास्तित्वे भावस्यात्मा प्रसूयते ।। 74 ।।

(84) भावादर्थान्तरमभाव इति प्रध्वंसस्योपजने किमिति भावो विनश्यति । प्रागभावस्य च व्यावृत्तौ किमिति भावो जायते ।। 74 ।।

एतदेव दृष्टान्तेन द्रढयति--

न शाबलेयस्यास्तित्वं बाहुलेयस्य बाधकम् ।

न शाबलेयो नास्तीति बाहुलेयः प्रकल्पते ।। 75 ।।

(85) पृथग्भूतयोर्भावयोरसंबन्धयोर्यथा परस्परस्य सत्तासत्ते न प्रयोजिके तथा भावाभावयोरपि तथाभूतयोः स्यादित्यर्थः ।। 75 ।।

तदेतद्भावादर्थान्तरस्याभावस्य वस्तुत्वेऽभ्युपगम्यमाने दोषजातमित्युपसंहरति--

अभावो यदि वस्तु स्यात्तत्रेयं स्याद्विचारणा ।

ततश्च तदभावेऽपि स्याद्विचार्यमिदं पुनः ।। 76 ।।

(86)सप्तमपदार्थरूपेऽभावस्य वस्तुत्वेऽभ्युपगम्यमाने तत्सन्निधानासन्निधानाभ्यां भावस्यासन्निधानसन्निधाने न युज्येते इतीयं चिन्ता युज्यते । तथा च वस्तुत्वेऽभावस्य तत्राप्यभावान्तरस्य व्यतिरिक्तस्योदयास्तमययोरभावस्य यथायोगं तौ न स्याताम्, तत्राप्यभावान्तरमित्यनवस्था च स्यादित्यपि वाच्यम् ।। 76 ।।

यदा पुनर्भावप्रच्युतिर्नीरूप एवाभावो बौद्धदृष्ट्याभ्युपगम्यते तदा--

अवस्तुत्वादतीतं यद् व्यवहारस्य गोचरम् ।

तत्र वस्तुगतो भेदो न निर्वचनमर्हति ।। 77 ।।

(87) तिरोभवति भावो न त्वभावो नाम कश्चिद् व्यतिरिक्तो ज्ञायत इति नये नेदं विचारणीयं न ह्यभावस्य सद्भाव इत्यादि । भावप्रच्युरूपत्वादभावस्य कथमवतिष्ठेत । भाव इति नेदं दूषणमवतरति । प्रागभावव्यावृत्तौ च न भावो जायते अपि तु भवितृरूपत्वादिति तुच्छरूपोऽभावो वास्तवं नानात्वं नार्हति । इत्थं च सर्वव्यवहारातीतोऽसत्त्नान्नीरूपत्वादभावो वास्तवभेदादिनिरूपणमाह इति प्रागेवोक्तमुपसंहृतम् ।। 77 ।।

इदानीं कार्यकारणभावानुपपत्तिं पूर्वोक्तामनद्यस्वदर्शने विवर्त्तं सिद्धान्तथितुमाह--

अपदेऽर्थे पदन्यासः कारणस्य न विद्यते ।
अथ च प्रागसद्भावः कारणे सति दृश्यते ।। 78 ।।

(88) उत्पत्तेः पूर्वं कार्यलक्षणोऽर्थोऽपदोऽविद्यमानप्रत्यायकोऽसत्त्वादिति तत्र कारणस्य पदन्यासो व्यापारो नोपपद्यते । जननक्रियावेशयोग्यवस्तुभूतकार्यनिष्ठो हि कारणानां व्यापारः पदन्यासः । स चासति कार्ये नास्ति । न ह्यकिंचिद्रूपमुद्दिश्ये कारणानि प्रवर्तितुमुत्सहन्ते । असत उद्देश्यत्वायोगात् । सत्त्वे तु कारणानुपपत्तिरित्युक्तम् । अथ विनियोक्तृबुद्ध्यनुसंधानं कार्यस्य पदन्यासः सोऽप्यसत्यसम्भवी । जडस्य च कारणस्य सुतरांकार्ये पदन्यासोऽयं नास्ति। दृश्यते च कस्मिंश्चिद्धेतौ सति कार्यमिति तत्रैव यदेव तत्त्वमेवं प्रतिभासमानं न तु वास्तवो हेतुफलभावः कश्चिदित्यर्थः ।। 78 ।।

अथोत्पत्तेः पूर्वं प्रागवस्था भावस्येति नापदस्तदानीमसावर्थ इत्युच्यते तत्राप्याह--

का तस्य प्रागवस्थेति वस्त्वाश्रितमिदं पुनः ।
प्राहवस्थेति न ह्येतद् द्वयमप्यस्त्यवस्तुनि ।। 79 ।।

(89) उत्पत्तेः पूर्वं कार्यस्य का प्रागवस्था इतीदं चोद्यं वस्त्वाश्रितं वस्त्वालंबनमेतत् पर्यनुयोगरूपमित्यर्थः । तथा हि प्रागिति चावस्येति चैतद्द्वयमत्र पर्यनुयोगे । न चैतद् द्वयमप्यवस्तुनि । देशतः कालतो वा पूर्वत्वस्याभावे नीरूपे देशकालयोगायोगिन्यसम्भवात् । अवस्थेति चावस्थात्रपेक्षम् । न चावस्थाता कश्चिदन्वयी विद्यते पूर्वमित्यसत्त्वमेव तत्र । एवमसत्कार्यनये प्रागसत्त्वादेतन्न युज्यते । सत्कार्यनयेऽपि प्रागर्थानुपपत्तिः, इदानीमपि सत्त्वाद् भावस्य । अत एव च जन्मायोगादवस्थातृरूपाभावः । केनचिद्रूपेण जनने तदपेक्षया प्राप्तमसतो जन्म । तथा च तत्राप्यपदोऽर्थः ।। 79 ।।

विनाशेऽप्यसत्त्वमेव नीरूपमगोचरो वाचो भावस्येत्याह--

न चोर्ध्वमस्ति नास्तीति वचनायानिबन्धनम् ।
अलं स्यादपदस्थानमेतद्वाचः प्रचक्षते ।। 80 ।।

(90) प्रच्युतेःऊर्ध्वं निरन्वयध्वंसादसति भावभागेऽस्ति नास्तीत्यभिधानाय न समर्थं वस्तु । सांख्या हि तदानीमप्यस्तीति व्यवहरन्ति । तच्च न युक्तम् । कुतः । अनिबन्धनं यतः । वचने निबन्धनमुपलभ्यमानता । सा च ध्वस्तस्य नास्तीति शब्दागोचरमनिबन्धनमसत्त्वमिति पूर्वापरावस्थयोरव्यवहार्यो भावः ।। 80 ।।

मध्यावस्थायामेव केवलं दृश्यत इत्याह--

अत्यद्भुता त्वियं वृत्तिर्यदभागं यदक्रमं ।
भावानां प्रागभूतानामात्मतत्त्वं प्रकाशते ।। 81 ।।

(91) सदसत्पक्षभेदेन वास्तवस्य कार्यकारणभावस्य निराकृतत्वादुपपत्तिशून्ययाऽऽश्चर्यभूतया वृत्त्या व्यापारेण कार्यं प्रागदृष्टं निरंशं झटित्येवाक्रमं कस्मिंश्चिन्नियते सति दृश्यते इति प्रतिभासमात्रसारः कार्यकारणभावो वितथो वेकल्पिकोऽविद्यानेत्रैर्यथायथं विकल्पनात् । एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहितारूपविवर्तः परमार्थ इत्यर्थः । अत्यद्भुतेयं वृत्तिः । कासावित्याह यदभागम् इत्यादि । इत्येवं पदसमन्वयः । यद्वा यस्यां वृत्तौ सत्याम् अभागं निरंशमत एव अक्रमं तत्त्वं भावानां प्रकाशत् इति संबन्धः । सांशत्वे सति क्रमेणोपजने विलंब्य वृत्तेः कारणसामर्थ्यावधारणान्नाश्चर्यमिदं भवेत् । यतस्तु झटित्यपदमक्रममेव सर्ववादिमतेऽपि कार्यमाजायतेऽतः कारणव्यापारस्य

विचार्यतानुपपत्तेः तथा प्रकाशोऽविद्यावसादाश्चर्यभूतो रूढः ।। 81 ।।

तथा हि--

विकल्पोत्थापितेनैव सर्वो भावेन लौकिकः ।

मुख्येनेव पदार्थेन व्यवहारो विधीयते ।। 82 ।।

(92) मध्यावस्थाभावि दृश्यमानं रूपमपेक्ष्य पूर्वापरावस्थापरिकल्पनया क्रमिकत्वे सति कार्यकारणभावेन भावाभावरूपतया वाविचारितसिद्धो लोकव्यवहारो रूढः । एवमन्योऽपि यः कश्चिद् व्यवहारः स सर्वस्तत्त्वतो बहिर्विद्यमानस्य वस्तुनो भिन्नस्याभावादनादिमिथ्याभ्यासवासनावशोपजात एव सांवृतस्तत्त्वाध्यवसायादसांवृत इवाविद्याप्रवृत्तिरूपे जगति प्ररूढः ।। परमार्थतस्तु न भेदो नाम परिदृश्यमानः सत्यः, अपि तु अद्वयमेव तत्त्वम् ।। 82 ।।

अविद्यानेत्रैरेवमविद्याख्यतच्छक्तिवशादवधार्यत इत्याह--

भावशक्तिमतश्चैनां मन्यन्ते नित्यवादिनः ।

भावमेव क्रमं प्राहुः न भावादपरः क्रमः ।। 83 ।।

नित्यद्वयं ब्रह्मतत्त्वं ये वदन्ति ते भावस्य परस्याद्वयस्य ब्रह्मण एवैवंविधामनादिजीवात्मगतां शक्तिं मन्यन्ते । यद्वशात्तिरोधाय तत्त्वमतत्त्वेन भेदेन व्यवहारः क्रमिकः । अक्रमेऽपि ब्रह्मणि भेदावभासनमविद्याकृतम् । तत्रैव क्रमाभासनं कालाख्यस्वातन्त्र्यशक्तिकृतम् । ते च शक्ती न ब्रह्मणो भावात् परमार्थतो मिन्ने इति स एव तत्त्वत एवं चकास्ति । अन्यस्य तदतिरेकिणो भासमानतानुपपत्तेः । भासमानस्य प्रकाशाव्यचिरेकादप्रकाशस्य तदयोगादित्यन्यत्र निर्णीतम् । तथा च ब्रह्ममयभावोपधानेन क्रमस्यावभासनाद् व्यवहारे भावव्यतिरिक्तं तस्य न किंचिद्रूपमिति हेतुहेतुमद्भावेन योजनादपौनरुक्त्यम् ।। 83 ।।

अत्र क्रमप्रतियोगि योगपद्यमपि तथा प्रतिभानमात्रमित्याह--

क्रमान्न यौगपद्यस्य कश्चिद्भेदोऽस्ति तत्त्वतः ।

यथैव भावान्नाभावः कश्चिदन्योऽवसीयते ।। 84 ।।

(94) एकमेव तत्त्वमविद्यानेत्राणामपारमनवच्छिन्नमशक्यप्रतिभासमिति स्वगतदेशकालपौर्वापर्याध्यारोपेण सक्रममाभाति । पदार्थान्तरसाचिव्येन चाक्रममिति भावतः क्रमाक्रमौ न स्तः । यथा भावाभावावित्युक्तम् । क्रमाभावो यौगपद्यम् । क्रमश्चोक्तदृशा नान्यो भावादित्यभावस्य पूर्वं भावाद् भेदस्य वस्तुत्वस्य च निषेधाद्यौगपद्यमपि तदात्मकं न किंचिदित्यभावदृष्टान्तेन ध्वनति । भावोपधानेन च प्रतीयमानत्वात् भावान्तरसाहित्यं भावस्यात्मैव । तन्न्याय्यम् , न हि साहित्यं नाम सहितादन्यद् विवेकेनावधार्यते ।। 84 ।।

ननु क्रमेण कृतं युगपत् कृतमिति भेदेन प्रतीयेते क्रमाक्रमावित्याशङ्क्याह--

कालस्याप्यपरं कालं निर्दिशन्त्येव लौकिकाः ।

न च निर्देशमात्रेण व्यतिरेकोऽनुगम्यते ।। 85 ।।

(95) अद्य भवोऽद्यतनः कालः श्वो भवः श्वस्तनः काल इति लोके व्यपदेशादविद्यमानोऽद्यतनोऽनद्यतनोऽस्तीति लङ्विधौ भाष्ये वचनादित्येवं समुदायावयवभेदपरिकल्पनया कालतत्त्वस्यैकस्यैवाधाराधेयभेदेन निर्देशो दृष्टः । न चैतावता वस्तुतः कालो भिद्यते, वैकल्पिकत्वाद् भेदस्य । एवं क्रमाक्रमयोर्व्यतिरेकेण निर्देशेऽपि न तत्त्वतो भावात् परस्परतश्च भेद इत्यर्थः ।। 85 ।।

एतदेव पोषयति--

आधारं कल्पयन् बुद्ध्या नाभावे व्यवतिष्ठते ।

अवस्तुष्वपि नोत्प्रेक्षा कस्यचित् प्रतिबध्यते ।। 86 ।।

(96) शत्रोरभावे सुखं सुहृदभावे दुःखरातिवर्गस्य रागादिक्लेशराशेरनुत्पत्तावभावे निर्वाणं मोक्ष इत्येवमादौ व्यवहारे सप्तम्यन्यथानुपपत्त्या अभावे परिकल्प्याधारशक्तिं सुरवाद्याधेयं न कश्चिदवतिष्ठते । अन्तर्भावितण्यर्थत्वान्न

कश्चिदवस्थापयितुमुत्सहत इत्यर्थः । कल्पयन्नपि वाधारभावं न कश्चिदभावेऽधिकरणभूते स्थितिमाधेयत्वं लभते । न तत्रास्य पदबन्धो वस्तुतः, अथ च कल्पयन्तीत्यर्थः । नीरूपस्य सर्वसामर्थ्यविरहलक्षणस्याभावस्याधेयं प्रति स्थित्याधारभावायोगात् । उत्प्रेक्ष्य त्वाधारभावमेवं व्यपदेशः प्रवर्तते । एवमङ्गुल्यग्रे करियूथशतमास्त इत्यादि चोत्प्रेक्षयाभिधीयमानं दृश्यत इति नास्ति विकल्पनामभूमिः ।। 86 ।।

यत एवम्--

तस्माच्छक्तिविभागेन नित्यः सदसदात्मकः ।

एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते ।। 87 ।।

(97) सर्वपरिकल्पातीतं तत्त्वं समाविष्टं सर्वाभिः शक्तिभिर्ब्रह्म यथायथं व्यवहारे भावाभावरूपतया तत्तदुपादिखचितं शब्दाः प्रतिपादयन्तीत्यभावाभिधायिनामपि भावशब्दैस्तुल्यः संबन्धोऽविशेषाच्छब्दानामिति प्रकरणतात्पर्यमुपसंहृतम् । एक इति । भेदस्याभावनिरासेन प्रतिषिद्धत्वात् । अत एव नित्यः, अभावभावात् कार्यकारणभावस्य च निषेधात् । शब्दवाच्यत्वे इति । शब्दव्यवहारार्थं निमित्तसप्तम्या प्रयोजनकथनात् । बहुरूपाः इति क्रमाक्रमादिरूपतया प्रागुक्तयाद्वयस्यैव तत्त्वस्य प्रकाशनात् ।। 87 ।।

इत्थं च सांवृतोऽयं लोकयात्रासु पदार्थप्रयोगो निरूढ इति तथैवास्मिन् शास्त्रेऽनुगम्यत इत्यविषयास्तार्किकविकल्पा इत्याह--

व्यवहारश्च लोकस्य पदार्थैः परिकल्पितैः ।

शास्त्रे पदार्थः कार्यार्थं लौकिकः प्रविभज्यते ।। 88 ।।

(98) वितारितमपि तर्कविकल्पैर्भावतत्त्वं न यथाविचारं लोके व्यवहारमवतरति । न हि

दर्शनान्तरव्यवस्थितविरुद्धभावरूपानुगमो व्यवहारे । न चाविचारेण यथातत्त्वं पार्यते निश्चयः कर्तुम् । "रूपणव्यपदेशाभ्यां सदृशौ बालपाण्डितौ" परस्पराभिप्रायमेलने प्रवर्त्तेति इति गजनिमीलितेनावधार्य पदार्थयाथातथ्यं व्यवहरन्तो लौकिका दृश्यंते । इदं च लौकिकानामेव शब्दानामनुशासनं शास्त्रम् । तदत्र लोकप्रसिद्धैव पदार्थप्रक्रिया समाश्रयणीयेत्यखण्डाद् वाक्यार्थात् क्रियावचनो धातुः सत्त्वप्रधानानि नामानि, प्रत्यायकः प्रत्यय इत्यादिः शास्त्रीयकार्यप्रसिद्ध्यर्थं लौकिक एव क्रियाद्रव्यगुणादिलक्षणोऽपोद्धारपदार्थः प्रविभज्यत इति लोकयात्रायामेकयोगक्षेमाः सर्वे शब्दा भावाभावाभिमतार्थविषया इत्यर्थस्य प्रवाहनित्यात्वाच्छब्दोहारमात्रत्वाच्च प्रतीतेर्नित्यः शब्दार्थसंबन्ध इति सिद्धम् ।। 88 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे

संबन्धसमुद्देशस्तृतीयः ।

Upagrahasamudesha

अथ उपग्रहसमुद्देशः

इदानीमाख्यातार्थमुपग्रहं विचारयितुं स्वरूपमस्यालौकिकत्वात् प्रदर्शयति ।

य आत्मनेपदाद् भेदः क्वचिदर्थस्य गम्यते ।

अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम् ।। 1 ।।

आत्मनेपदपरस्मैपदव्यङ्ग्यः कर्त्रभिप्रायतदितरादिरूपो विशेषो यः क्रियायाः साधनस्य वा स उपग्रह इति पूर्वाचार्यैरभ्युपगतः । पूर्वाचार्यप्रसिद्ध्योपग्रहशब्दवाच्योऽयमर्थो व्यवह्रियतेऽत्र शास्त्रे ।। 1 ।।

कस्यार्थस्यासौ भेद इति सामान्येनोक्तमेव विभजते ।

क्वचित् साधनमेवासौ क्वचित्तस्य विशेषणम् ।

साधनं तत्र कर्मादि व्यक्तवाचो विशेषणम् ।। 2 ।।

साधनं कर्म उपग्रहः आत्मनेपदाभिव्यङ्ग्यः पच्यते गम्यते इति । आदिशब्दात् कर्ता भावश्च । तत्र कर्ता लादेशद्वयव्यङ्ग्यः एधते यातीति । भाव आस्यते शय्यत इत्यात्मनेपदव्यङ्ख्य एव । स च बाह्यो भावो लकारवाच्यः आभ्यन्तरस्य धात्वर्थरूपस्य भावस्य क्रियायाः स्वात्मन्यवस्थितिमेकपदवाच्यसाधनानावेशादावेदयन् भवति साधनम् । व्यक्ता वाग् येषां व्यक्ता वाचि वा येषां (ये?) ते व्यक्तवाचो धात्वर्थं समुच्चारणार्थ(त्म?)कं विशिंषन्तोऽपि साधनस्य कर्तुः विशेषणं सामर्थ्याद् भवन्तो भवन्त्युपग्रह शब्दवाच्याः । तद् यथा संप्रवदन्ते ब्राह्मणा इति ।। 2 ।।

क्वचित् क्रियाविशेषण(ष उ?)मुपग्रह इत्याह ।

क्रिया विषयभेदेन जीविकादिषु भिद्यते ।

लादेशैः स क्रियाभेदो वाक्येष्वपि नियम्यते ।। 3 ।।

विषयविशेषाश्रयेण भिद्यते क्रिया । स च तस्या भेदो लादेशैः परस्मैपदात्मनेपदलक्षणैरभिव्यज्यते पचन्ति यजन्तीति । प्रधानं ह्यत्र क्रियाफलं न कर्तृगामि भृतिमात्रफलत्वाद् भृत्यानाम् । यजमानादिना प्रधानफलोद्देशेन प्रवर्त्यमाना क्रिया आत्मनेपदात् प्रतीयते यजते पचते इति । क्वचित् पुनः स एव क्रियाभेदो वाक्येष्वपि सत्स्वव(स्वशब्देनाव?)धार्यत इति वाक्यगम्यः । तद् यथा स्वं यज्ञं यजते, स्वं यज्ञं यजतीति ।

"विभाषोपपदेन प्रतीयमाने"(P.I.3.77)

इति लादेशद्वयानुशासनात् स्वमिति पदान्तरसंसर्गरचितवाक्यावसेयं क्रियायाः प्रधानफलस्य कर्तृगामित्वम् ।। 3 ।।

विषयभेदं विनापि क्वचित् साक्षात् क्रियाविशेष उपग्रह इत्याह ।

धात्वर्थस्तद्विशेषश्चाप्युक्तः क्वचिदुपग्रहः ।

धात्वर्थो गन्धनादिः स्याद् व्यतिहारो विशेषणम् ।। 4 ।।

गन्धनावक्षेपणादयः क्रियाविशेषो धातुवाच्याः सन्तोऽपि विनात्मनेपदमनभिव्यक्ता इत्यात्मनेपदाभिव्यङ्ग्यत्वादुपग्रहशब्दवाच्या भवन्ति । तद् यथा-उत्कुरुते अवकुरुते इत्यादि । व्यतिहारस्तु क्रियाविशेषणमात्मनेपदाभिव्यङ्ग्यमुपग्रहः । व्यतिपुनत इति ।। 4 ।।

कर्त्रभिप्राये क्रियाफल इति विशेष्य कथमुच्यते, यावता सर्वमेव फलं क्रियायाः कर्त्रारमभिप्रैतीत्यत आह--

क्रियाप्रवृत्तावाख्याता कैश्चित् स्वार्थपरार्थता ।

असती वा सती वापि विवक्षितनिबन्धना ।। 5 ।।

"सर्व इमे स्वभूत्यर्थं यतन्त"(M.Bha.II,p.36,1.1.)

इति । सर्वस्य स्वार्थं प्रवृत्तेः स्वार्थता पारमार्थिकी, परार्थता तु असती एव । सती वा इति तु लौकिकी वाचोयुक्तिः । तथा हि-विवक्षा विवक्षितं निबन्धनं हेतुरस्याः परार्थतायाः । स्वार्थता हि मुख्यैवेति न तस्या विवक्षानिबन्धनत्वम् । तदित्थं पारार्थ्यविवक्षायां मा भूदात्मनेपदमिति कर्त्रभिप्राये क्रियाफल इति फलं विशेष्यते । अन्ये तु प्रधानफलाभिप्रायेण वस्तुत एव स्वार्थपरार्थतामाहुरिति कैश्चित् इति वचनान्मतान्तरमुपक्षिप्तं भवति । तथा हि-यः स्वर्गौदनादिमुख्यफलार्थी स तत्रान्यान् व्यापारयति, निर्वेशेन प्रतिविधानं चारभते । ततश्च तस्य प्रतिविधातुर्मुख्यफलार्थिनः स्वार्थ आरम्भ इति तत्रात्मनेपदं यजमानादौ । यस्तु तत्प्रयुक्तो निर्वेशमात्रफलः स स्वामिचित्तानुवर्तनादेव कृतार्थतां मन्यत इति तस्यासौ परार्थ आरम्भ इति न भवति तत्रात्मनेपदम् ।। 5 ।।

इत्थं च संविधान आत्मनेपदं तत्रैव णिजित्यनयोः समानो विषय इत्याह ।

केषाञ्चित् कर्त्रभिप्राये णिचा सह विकल्पते ।

आत्मनेपदमन्येषां तदर्था प्रकृतिर्यथा ।। 6 ।।

णिचः संविधानमात्रमर्थं मन्यन्त केचित् ।

`सर्व इमे स्वत्भूयर्थं यतन्ते'(M.Bha.II.p.36;1.1)

इति स्वार्थं प्रवर्तमानस्य प्रयोज्यस्य प्रयोजकस्तदानुकूल्याचरणात् संविधाता मण्यते । न ह्ननुविधेयस्य वचनात् स्वार्थमसम्भावतयो वा प्रवृत्तिरिति न प्रैषोणिजर्थः । अपि तु संविधानमात्रम्, तत्रैवात्मनेपदमपीति तुल्यविषयत्वादनयोः पर्यायेण प्रयोगः `यजते याजयति, पचते पाचयति' इति । आत्मनेपदाभिधेयो हि कर्ता संविधानमपेक्षते इति णिचा तुल्यविषयम् आत्मनेपदम् इति विकल्पते तेन सह । यथा तदर्था णिच उत्पादनार्था प्रकृतिः धातुर्णिचा सह विकल्पते । ये धात्वर्थविशेषणतां हेतुमतीत्यस्य मन्यन्ते तेषामन्येषां मते हेतुमति व्यापारे वर्तमानाद् धातोर्द्योतको णिजिति कुतश्चिदर्थसामर्थ्याद्धेतुमतः संविधानविशिष्टस्य व्यापारस्य क्रीणीष्वेत्यादिवदवगमाण्णिजन्रहिता शुद्धा प्रकृतिः प्रयोगमर्हत्येवेतचि मन्यन्ते । ये तु भूयमणिचमन्तरेण प्रैषस्याप्रतीतेर्हेतुमतीत्यस्य प्रत्ययार्थत्वं मन्यन्ते तेषां यथा णिचप्रकृतिर्णिचा सह न विकल्पते तथात्मनेपदमपीति । केषांचिदिति वदन् पक्षान्तरं सूचयति । तथाहि-आत्मनेपदविषयस्य कर्तुः संविधानं क्रियागतो धर्मो धातुवाच्यो भवेत् । आत्मनेपदेन हि क्रियाफलं कर्तृगामि द्योतयता सामर्थ्यात् प्रदानफलयुक्तः कर्ताभिधीयते, न तु प्रैषः स्पृश्यते । न हि प्रयोज्यप्रयोकव्यापारो ण्यन्तवदात्मनेपदान्तधातुविषये प्रतीयते । अत एव शाब्दी प्रतीतिर्भिद्यते । यजत इति फलार्थी स्वतन्त्रो यागं भावयतीत्यर्थः । तत्र चानन्यप्रयोज्यस्य स्वतन्त्रस्य भावनायामौचित्यात संविधानं व्यापारः प्रतीयते, न त्वस्माच्छाब्दव्यापारात् परं प्रयुङ्क्त इत्यवगतिः । याजयतीति यागे परं प्रयुङ्क्ते इति शाब्द एवावगमः । तात्पर्यदृशा तु वास्तवव्यापाराश्रये विषयसाम्यं भवेत् । तस्माद् भिन्नविषयत्वान्नात्र विकल्प इत्येष सिद्धान्तोऽभिमतः ।। अन्यथैकविषयत्वाद् धातुसामान्यविहितस्य णिचो धातुविशेषात् स्वरितश्रितो विधीयमानमात्मनेपदं बाधकं स्यादिति न विकल्पो भवेत्, लस्य तिप्तस्झि.....(P.3.4.78.)
इत्यनेन विधानात्
`स्वरितञितः.....(P.1.3.72.)
इत्यादिर्न विधिरिति चेन्नियमस्तर्हि भविष्यति । स चैकवाक्यतया विधिशेष एव । अन्यथा परस्मैपदबाधकत्वमपि कथमात्मनेपदस्य स्यादिति । तदेवं भिन्नविषये णिजात्मनेपदे, संविधाने आत्मनेपदं तद्विशेषे तु प्रैषे णिजिति । यत्र तु पारार्थ्यं धात्वर्थस्यान्यतोऽवगम्यते तत्र न भवत्यात्मनेपदम् । तद् यथा-उक्तः करोति, प्रेषितः करोतीति प्रैषेण कर्तुः पारार्थ्यावगते स्वार्थतासम्प्रत्ययादात्मनेपदाभावोऽत्र । एवमोदनं पचतीति करणादिकारकान्तरप्रैषेऽपि प्रयोज्यकर्तुः प्रधानफलार्थताभावादात्मनेपदाभावः । तथा अजां नयति ग्राममित्यत्र धात्वर्थप्रैषमात्रविवक्षायां तु स्वात्मनि कर्तरि भवत्यात्मनेपदं अजां नयते ग्रामम् इति ।। 6 ।।
इदानीं ये णिचा सहात्मनेपदस्य विकल्पमिच्छन्ति तेषां विषयसाम्यावगमभ्रान्तिबीजमुपदर्शयति ।
क्रीणीष्व वपते धत्ते चिनोति चिनुतेऽपि च ।
आप्तप्रयोगा दृश्यन्ते येषु ण्यर्थोऽभिधीयते ।। 7 ।।
`स्वात्मानं क्रीणीष्व' इति विनताभिहिता पुत्रानाह `क्रीणीत माम्' इति शिष्टप्रयोगोऽस्ति । अत्र `क्रीणीष्व' इत्यात्मनेपदान्तस्य प्रयोगस्य ण्यर्थः प्रैषोऽवधार्यते । दास्यं प्राप्ता हि विनता नागमात्रात्मानं क्रीणीष्व दास्यान्मोचयेति कद्रूवा क्रयणस्वातन्त्र्ये नियुज्यत इति परप्रयोज्यतावगमाद् ण्यर्थतायामात्मनेपदमिदमिति समानविषयत्वं णिजात्मनेपदयोरोतस्मात् प्रयोगाद् भ्रान्तिबीजं मन्यन्ते । तथाहि-सामर्थ्यादत्र ण्यर्थोऽवगम्यते, नात्मनेपदात् । क्रयणे हि विनियुज्यते विनता । क्रयणस्य चात्र दास्यविनवृत्तिलक्षणं फलं क्रेतुः कर्तुरात्मगामीति कर्त्रभिप्रायक्रियाफलगतमात्मनेपदं विहितम् । इयत्येव शब्दार्थे पर्यवसिते परतोऽर्थसामर्थ्यात् क्रापयेति ण्यर्थोऽत्रावधार्यते । तथा हि-सा विनतात्मानं कथं क्रीणाति दास्यान्मोचयति? यदि प्रत्युपकारं काद्रवेयाणामाचरति । न च सा स्वयं प्रत्युपकर्तुं शक्तेति पुत्रानाह क्रीणीत माम् इति । तथा च `पुत्रैरात्मानं दास्यान्मोचय',`कापय' इत्यमर्थोऽस्य क्रीणीष्व इति पदस्य प्रकरणसामर्थ्यपर्यालोचनया लभ्यत इति न पदार्थविषयेणात्मनेपदेनात्र णिच् समानविषय इति । एवं केशश्मश्रु वपत इति प्रयोगो भ्रान्तिबीजं दृश्यते । तथा हि वपते परनं मुण्डनमन्येन कारयतीत्यर्थः इति णिजात्मनेपदे समानविषये मन्यन्ते । अत्र च तिङन्तात् कर्तृदामि क्रियाफलं प्रतीयत इत्यामनेपदं सामर्थ्यात् तु स्वयमशक्तोऽन्यं प्रयुङ्क्त इत्यवगम्यते । तथा' `तृप्ता पत्नी रेतो धत्ते' इति प्रयोगो दृश्यते

शिष्टानाम् । रेतो धापयतीत्यत्र चार्थः सामर्थ्यगम्यः । न हि पत्न्याः पौंस्नं सम्भवति, तच्च रेतोधारणयोग्यम्, पुमिन्द्रियेण तद्धारणात्, पत्न्यास्तु रेतोधारणयोग्यपुमिन्द्रियाभाव इति सामर्थ्यलभ्योऽत्र ण्यर्थो न तिङन्तवाच्यो येनात्मनेपदेन समानविषयता णिचः स्यात् । आत्मनेपदाद्धि धारणस्वातन्त्र्यमात्रमवगम्यते । तच्च पत्नीसम्बन्धाद् वाक्यार्थपर्यालोचनया प्रयोजककर्तृविषयमात्रमवगम्यते । पदं हि पदान्तरनिरपेक्षं स्वार्थमात्रमावेदयते । वाक्यसामर्थ्यात्तु विशिष्टार्थावगतिः ।

"सैषात्र यज्ञस्य समृद्धिर्योऽग्निं चिनुते यश्चिनोति यश्चीयते"

इत्यत्रापि चिनुत इति शिष्टप्रयोगे संविधाता चयनगतः प्रतीयते । तिङः सामर्थ्यात्तु प्रेषणमशब्दार्थोऽपि णिज्विषयं प्रतीयते । यो हि स्वयं चयनमनुतिष्ठति परप्रयुक्तः स चिनोतीत्येतस्मादेवावगम्यते इति प्रयोजकस्तृतीयोऽर्थाच्चिनुत इत्यतः प्रतीयते । तदेतेषु प्रयोगेष्वर्थसामर्थ्यादिनावसितमपि ण्यर्थमात्मनेपदान्तशब्दार्थ इति मत्वा कैश्चिद् भ्रमाण्णिजात्मनेपदयोर्वषयसाम्यं सर्वत्राश्रित्य विकल्पः प्रतिपादितः । गतमदः ।। 7 ।।

इह संविधाने आत्मनेपदमित्युक्तम् । पचादीनां च प्रधानभूतविक्लित्त्यादिवचनात् कथं संविधानोपादानं येन तद्विशिष्टवचनाद् धातोस्तत्रात्मनेपदं स्यादित्याशङ्ख्याह ।

संविधानं पचादीनां क्वचिदर्थः प्रतीयते ।

तन्निमित्ता यथान्यापि क्रियाधिश्रयणादिका ।। 8 ।।

"कः पचेः प्रधानार्थः । यासौ तण्डुलानां विक्लित्तिः । अथेदानीं प्रेषणमध्येषणं वा युक्तं यत् सर्वं पच्यर्थः स्यात् । बाढं युक्तम् । " (M.Bha.II.p.32,1.25)

इति भाष्ये प्रयोजकव्यापारस्यापि धात्वर्थतोपन्यस्ता । तथा चोदासीनोऽपि प्रयोजकः सामग्रीं परिपोषयन् संविधाता कारक इति तद्व्यापारो धातुवाच्यः पचत इति विक्लित्त्यर्थत्वाद् यथाधिश्रयणोदकासेचनादिः प्रयोज्यकर्तुर्व्यापारः । पचति देवदत्त इति अधिश्रयति उदकमासेचयति इत्याद्यर्थः । पचते देवदत्त इति सम्भारं ढौकयतीत्यर्थः । तस्येव तु प्रयोज्यप्रेषणे विवक्षिते णिज् भवति पाचयतीति । न हि संविधानमेव प्रैषः, अपि तु तत्पूर्वकं प्रेरणं यत्कुर्वन् प्रयोजक इत्युच्यते । संविधानं हि कुर्वन्नपि यावत् प्रेषणं नाचरति न तावत् प्रयोजकः कथ्यते ।। 8 ।।

कर्त्रभिप्राये विधीयमानमात्मनेपदं कथं धातोः संविधानार्थतामाक्षिपतीत्याह ।

कर्त्रभिप्रायता सूत्रे क्रियाभेदोपलक्षणम् ।

तयाभूता क्रिया या हि तत्कर्ता फलभाग् यतः ।। 9 ।।

कर्त्रभिप्रायक्रियाफलग्रहणेन संविधानविशिष्टा क्रिया निर्दिश्यते यस्माद् यैवंभूता क्रिया विशिष्टरूपा तस्याः कर्ता फलेन युज्यते । न ह्यसंविदधद् याजकादिः क्रियाफलं स्वर्गाद्यश्नुते । ततश्च कार्यभूतेन फलसम्बन्धेन कारणभूता । क्रियोपलक्षितेति तत्रात्मनेपदमित्युक्तं भवति ।। 9 ।।

उपलक्षणे दृष्टान्तमाह ।

यथोपलक्ष्यते कालस्तारकादर्शनादिभिः ।

तथा फलविशेषेण क्रियाभेदो निदर्श्यते ।। 10 ।।

`नक्षत्रं दृष्टवा वाचं विसृजेत्'

इति नक्षत्रदर्शनस्य संध्याविगमलक्षणकालविशेषोलक्षणार्थत्वात् घनाघनगहने गगने तदभावेऽपि नालिकादिभिस्तथाविधकालावधारणे वाग्विसर्गो भवत्येव यथा तथा प्रधान फलसंबन्धस्य संविधानोपलक्षणार्थत्वादनादृत्यापि फलविशेषद्योतनमात्मनेपदं संविधानमात्रे भवति ।। 10 ।।

भाष्ये स्वरितञित्ग्रहणं प्रत्याख्यातमिति यातिप्रभृतिभ्योऽपि कस्मादात्मनेपदं न भवतीत्याह ।

क्रियाविशेषवचने सामर्थ्यमुपरुध्यते ।

केषाञ्चदन्ये तु कृताः स्वरितेतो ञितस्तथा ।। 11 ।।

कर्त्रभिप्रायक्रियाफलोपलक्षिते संविधानलक्षणे क्रियाविशेषे प्रत्याय्ये यातिप्रभृतीनां धातूनां शक्तिः प्रतिहन्यते । नियता हि

शब्दशक्तिः । ये तु संविधानाभिधानसमर्थास्तेस्वरितेत्संज्ञका ञकारेत्संज्ञकाश्च पठिता धातुपाठे संविधानविशिष्टक्रियावचनसामर्थ्यमवद्योतयितुमित्यर्थः । स्वाभाविकी हि धातूनां शक्तिर्नियतविषया दुरवसानेति ञकाराद्यनुबन्धस्तदवगमाय कृतो गणकारैः ।। 11 ।।

यद्येवं कथं स्वरितञिद्ग्रहणं प्रत्याख्यायते । असति हि तस्मिन्ननुबन्धाः कथं पठ्यन्ते । तद्धि तेषां कार्यम् । असति तस्मिन् तदभावः । तथा च संविधानविशिष्टक्रियाभिधानशक्तिर्धातूनां कथमवगम्येतेत्याह ।

अनुबन्धश्च सिद्धेऽर्थे स्मृत्यर्थमनुषज्यते ।
तुल्यार्थेष्वपि चावश्यं न सर्वेष्वेकधर्मता ।। 12 ।।

इह क्रियामात्रवचनत्वेन समानाभिधेयेऽष्वपि धातुषु न सर्वेषु क्रियामात्रवचनस्वभावः, अपि तु शब्दशक्तिवैचित्र्याद् यथास्वं विशिष्टक्रियावचनत्वम् । तथा हि-`या प्रापणे', `णीञ् प्रापणे' इति तुल्येऽप्यर्थनिर्धेशे यातेः प्राप्तिः प्रापणमर्थः, नयतेस्तु प्रापणा प्रापणमिति संविधानमर्थोऽवगम्यते । एवमन्येषामपि संविधानार्थता स्वाभाविकी बोद्धव्या । तामेव सूचयितुं ञकाराद्यनुबन्धः स्मरणार्थं निवेश्यते । यो हि प्रयोगादेव स्वभावविशेषमवधारयितुमशक्तस्तं प्रति स्मृत्यर्थोऽनुबन्धासङ्गः, प्रयोगज्ञं तु प्रति नार्थस्तेन । तथा च प्रयोगदर्शिनं च प्रति स्वरितञिद्ग्रहणं शक्यमकर्तुमिति प्रत्याख्यातं एतद्भाष्ये । वचनानुसारिणं तु प्रति क्रियत एवैतत् । तथा च भाष्यम्

"वृत्तज्ञो ह्याचार्यः तत्समर्थान् अनुबन्धान् आसजति"

(M.Bha.I.p.c.266.1.20)

इति । वर्तन्तेऽस्मिन् कार्याणीति वृत्तं प्रयोगो वर्तनं वृत्तमिति शब्दव्यापारो वा । तज्ज्ञः सूत्रकारो वचनानुसारिणमवृत्तज्ञं प्रति ञकारमासतीत्यर्थः ।। 12 ।।

तुल्यार्थेष्वपि नैकधर्मतेत्यत्र दृष्टान्तमाह ।
दृशीक्ष्योः सदृशेऽप्यर्थे नाभेदः प्रतिपूर्वयोः ।
ण्यर्थोपादायिनस्तस्मान्न तुल्यार्थाः पचादिभिः ।। 13 ।।

गणपठितेऽर्ते समानेऽपीक्षते पश्यतीत्यनयोः प्रतिपूर्वयोः नाभेदो न समानार्थता, अपि तु प्रतक्षींत इत्यन्य एवार्थः प्रतिपालनं नाम । प्रतिपश्यतीति तु प्रतीपदर्शनमर्थः । दृशीक्षी चोपलक्षणं रक्षतिपालयत्योरपि, प्रतिरक्षति प्रतिपालयतीत्यन्य एवार्थः । एवं हरतिनयत्योः सम्पूर्वयोः संहरति संनयतीत्याद्यप्युदाहार्यम् । एवं ण्यर्थमपि ये सम्बन्धितया स्वीकुर्वन्ति ते संविधानाभिदायिभिः पचादिभिर्न समानवाच्याः । न हि सर्वे धातवो ण्यर्थेन संगच्छन्त इत्येतावता संविधानाभिधायिनोऽपि स्युः,शक्तिभेदात् । प्रैषो हि ण्यर्थः, संविधानं ततोऽन्यत् तद्धेतुरपीत्युक्तमेव । अत एव संविधानमेव ण्यर्थोऽत्र नाभिमतः । एवं हि पचादिभिस्तदभिधायिनां भिन्नार्थता न भवेत्, पचादीनामपि संविधानाभिधानात् सामान्येन पचादिभिरित्युक्तत्वान्न परस्मैपदान्तैरात्मनेपदान्तानां भिन्नार्थतेति लभ्यते ।। 13 ।।

संविधानेन स्वरितञिद्व्यतिरिक्तानां न सर्वयैवायोगोऽपि तु योगेऽपि ते तदभिधानशक्तिविकला इत्याह ।
उम्भ्यर्थे वर्तमानस्य करोतेर्भिन्नधर्मणः ।
ण्यर्थोपादायिता तस्मान्नियताः शब्दशक्तयः ।। 14 ।।

उदुम्भाञ्चकारेत्यामन्तस्यानभिव्यक्तपदार्थकस्याभिव्यक्त्यर्थं करोतिरनुप्रयुज्यते । स च क्रियासामान्यवाचीत्यत्रोम्भ्यर्थे वर्तते । ततश्च तस्य विशिष्टक्रियोपनिपाते भिन्नधर्मणो नानास्वभावस्य ण्यर्थ इव ण्यर्थः संविधानं तदभिधायित्वं दृष्टम् । तथा च ञिदयं पठितः । यत एवं तस्माच्छब्दानां शक्तयो नियताः । एकस्मिन्नपि ह्यर्थेऽत्रोम्भेः संविधानाभिधाने शक्तिर्नास्ति करोतेस्त्वस्ति । इत्थं चास्ति संविधानेनोम्भेः सम्बन्धो येन तदर्थप्रवृत्तेः करोतेस्तदभिधानशक्तिः । सत्यपि च तस्मिंस्तदभिधानसामर्थ्यमस्य नास्ति । वस्तुत एव तु संविधानेनोम्भेः सम्बंधाभावे करोत्यर्थोऽपि संविधानेन न विशेष्यते ।। 14 ।।

कथमवसीयते करोत्यर्थोऽत्र संविधानविशिष्ट इति तदर्थसंप्रत्यायकस्यात्मनेपदस्यादर्शनादित्याशङ्क्य भाष्यकाराभ्युपगममत्रार्थे

संवादकमाह ।
तथा ह्यनुप्रयोगस्य करोतेरात्मनेपदे ।
पूर्ववद्ग्रहणं प्राप्ते स्वरितं समुपस्थितम् ।। 15 ।।
इह
`आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' (P.1.3.63.)
इत्यात्मनेपदविधानमकर्त्रभिप्राये चरितार्थम् । कर्त्रभिप्राये तु कृञोऽनुयोगस्यात्मनेपदे
`स्वरितञितः कर्त्रभिप्राये क्रियाफले' (P.1.3.72.)
इत्यनेन प्रसक्ते
`पूर्ववत् सनः'(P.1.3.62.)
इत्यतः सूत्रात् स्वरितलिङ्गयुक्तं पूर्ववद्ग्रहणमधिकृतमिति भाष्यकारेणोपगतम् । तथा चानुप्रयोगस्य कृञो यदाम्प्रत्ययात् पूर्वस्य धातोरात्मनेपदं तदा कर्त्रभिप्रायेऽपि तद् भवति नान्यथेति नियमार्थात् पूर्ववद्ग्रहणादत्रात्मनेपदाभावः । एतच्च कथमुपपद्यते यद्यनुप्रयोगस्य करोतेः संविधानाभिधानसामर्थ्यं स्यात् । अन्यथात्मनेपदाप्रसङ्गात् किं पूर्ववद्ग्रहणेन ।। 15 ।।
णिज्योग्यार्थाभिधानेऽपि न सर्वेषां धातूनां संविधानप्रत्यायनसामर्थ्यमप्यनुमेयमित्येतन्निदर्शनोपन्यासेन स्थिरयति ।
एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रितः ।। 16 ।।
साध्यस्वभावत्वात् क्रियायाः स्वतो नास्ति भेदः । तिङन्तपदविषये त्वेकपदोपात्तकर्तृकर्मलक्षणसाधनाधारद्रव्यगतद्वित्वबहुत्वाभ्यां पचतः पचन्ति पच्येते पच्यन्ते इति विशिष्यते । द्विबहुसाधनसाध्यत्वं ह्यत्रोपगम्यते क्रियायाः । यथा च साधनादारद्रव्यसंख्यायोगस्तथा तद्गतलिङ्गविशेषयोगोऽपि कस्मान्न भवतीति न शक्यते वक्तुमाख्याताल्लिङ्गविशेषस्याप्रतीतेः । एकपदोपादाने साधनाश्रयस्य द्वित्वादेरेवावगमो न तु स्त्रीत्वपुंस्त्वविशिष्टेऽर्थे समवेतेयं क्रियेत्याख्यातादवगम्यते । स्वाभाविकं हि शब्दानामर्थ प्रत्यायनं न युक्तिगम्यम् । साधनसङ्गख्ययेत्येव वक्तव्ये व्यापाराविष्टं द्रव्यात्मकमेव सङ्ख्यायुक्तमाख्याताभिधेयं न शक्तिमात्रमित्याश्रयग्रहणेन सूचयति । तथा च देवदत्तः पचतीति द्रव्येण सामानाधिकरण्यं दृश्यते । अत एव द्रव्यवादिनामाख्यातार्थोऽपि द्रव्यमित्यभ्युपगमः ।। 16 ।।
तदयं निदर्शनार्थः साध्येन योज्यते ।
तस्मादवस्थितेऽप्यर्थे कस्यचित् प्रतिबध्यते ।
शब्दस्य शक्तिः स त्वेष शास्त्रेऽन्वख्यायते विधिः ।। 17 ।।
यत एवं शब्दशक्तिभेदापेक्षम भिदानमन्यत्रापि तस्मात् संविधानसंबन्धे सत्यपि धातूनां कस्यचिद् यात्यादेस्तत्प्रत्यायने सामर्थ्यं प्रतिहन्यत इत्युक्तमुम्भ्यादिसमानार्थस्य करोतेः संविधानाभिधानसामर्थ्यं नोम्भेरिति । स चैष शब्दशक्तिनियमार्थः प्रकारः स्वरितञिद्ग्रहणेन शास्त्रे ज्ञाप्यते प्रकटीक्रियते । गतमेतत् ।। 17 ।।
इह यजन्ति याजकाः पचन्ति भक्तकरा इत्येतत् कर्त्रभिप्रायक्रियाफलग्रहणस्य व्यावर्त्यमुदाहृत्य याजकानपि दक्षिणा फलमभिप्रैति कर्मकरानपि भृतिरित्याक्षिप्य
"सर्वत्रैव क्रियाफलं कर्तारमभिप्रैति । तत्र प्रकर्षगतिर्विज्ञायते साधीयो यत् क्रियाफलमभिप्रैति । किञ्च साधीयो यदर्था क्रियारभ्यते"(M.Bha.I.p.293,1.6.) इति भाष्ये समर्थितम् एतद् व्याचष्टे ।
यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत् प्रधानं फलं तेषां न लाभादि प्रयोजनम् ।। 18 ।।
इह कर्त्रभिप्रायक्रियाफलस्य संविधानोपलक्षणत्वात् संविधानक्रियावचनाद् धातोरात्मनेपदमित्युक्तं भवति । यत्र च संविधाने यत् फलं तदेवोपलक्षणं युक्तम् । तच्च यदर्थं संविधानारम्भः , यदुद्देशेन हि संविधाता प्रथममेव संविधानं साधनोपार्जनं योग्यतानुसारेण च प्रवर्तनमारभते तत् स्वार्गादि प्रधानं फलं वेदितव्यम् । संविधात्रा नियुक्तानि कारकाणि तदिच्छया प्रवर्तन्त इति तेषां दक्षिणा भृतिर्वा फलमप्रधानं तादर्थ्येन पूर्वमेव क्रियाप्रवृत्त्ययोगात् । संविधाता पुनः प्रधानक्रियार्थमुदासीनोऽपि

बहुमुखमाचेष्टत इति मुख्यफलाभिसन्धानेन स एव क्रियाः पच्यादिकाः प्रवर्तयति । तदयं फलस्य प्रकर्षस्तादर्थ्येन पूर्वमेव प्रधानक्रियारम्भाद् व्याख्यातः ।। 18 ।।

संविधाने आत्मनेपदमित्यस्मिन् पक्षे सिद्धान्ते चोदितं भाष्ये---

"इह कथं भवितव्यं स्वामिदासौ पचतः" इति ।

एतद् व्याचष्टे ।

यत्रौभौ स्वामिदासौ तु प्रारभेते सहक्रियाम् ।

युगपद् धर्मभेदेन धातुस्तत्र न वर्तते ।। 19 ।।

प्रभुभृत्ययोः सम्भूय द्वन्द्वनिर्देशेनाभिधीयमानयोः क्रियारम्भे तत्साध्यस्य व्यापारस्य भेदात् युगपदेककालं धातुर्वाचकत्वं नासादयति । तथाहि-प्रभुसाध्यं संविधानं सम्भारघटनं भृत्यसाध्यं तु प्रधानक्रियारूपमिति विलक्षणत्वात् व्यापारस्यैकधातुवाच्यता नोपपद्यते । तथा च किमात्मनेपदं संविधात्रपेक्षं क्रियतां किं वा दासापेक्षं परस्मैपदमिति संशयो न व्यावर्तते ।। 19 ।।

अथापि कथञ्चित् क्रियाद्वयं विलक्षणमप्यनेकार्थत्वाद् धातुरभिदधीत तथापि

यत्र प्रतिविधानार्थः पचिस्तत्रात्मनेपदम् ।

परस्मैपदमन्यत्र संस्कराद्यभिधायिनि ।। 20 ।।

प्रतिविधानं संविधानं तद्वचनात् पचेः आत्मनेपदम् आम्नातं वाक्यगतविक्लित्तिपर्यन्तसाधनविनियोगादिलक्षणसंस्कारादिवचनात् तु परस्मैपदम् इति धातुनार्थद्वयस्वाकारेऽप्येकस्मिन् प्रयोगे विरुद्धस्वरूपलादेशद्वयनुपपत्तिः ।। 20 ।।

अत्र समाधिः

संविधातुश्च सान्निध्यात् दासे धर्मोऽनुषज्यते ।

प्लक्षशब्दस्य सान्निध्यान्न्यग्रोधे प्लक्षता यथा ।। 21 ।।

अयमर्थः । अतुल्यकक्ष्ययोर्यद्येकशब्दवाच्यताऽभ्युपगम्यते तदा युगपदधिकरणवचनतायां द्वन्द्वविधानाद् द्वन्द्वनिर्दिष्टौ स्वामिगदासावेकस्मिन् पच्यर्थे सह विवक्ष्यते । तत्र चेतरेतरधर्माध्यासात् साहचर्यमिति स्वामिसाहचर्याद् दासे संविधानं तद्वयापारोऽध्यारोप्यते । तथा च स्वामिना तुल्यो दास इति स्वामिद्वयस्य कर्तृत्वे संविधानवचनाद् धातोरात्मनेपदं क्रियते स्वामिदासौ पचेते इति । तद् यथा प्लक्षन्यग्रोधाविति सहविवक्षायां न्यग्रोधे प्लक्षरूपारोपः प्रक्षरणान्न्यग्रोधोऽपि प्लक्ष इति । तथा चानुस्यूतभेदस्य समुदायस्याभिधानादितरेतरापेक्षायां द्वन्द्वाद् द्विवचनं भवति । एतदग्रे द्वन्द्वविचारे निर्णेष्यामः ।। 21 ।।

कथमतद्रूपेण सन्निधानमात्रादन्यरूपारोप इति दृष्टान्तेन व्युत्पादयति ।

पुरोडाशाभिधानं च धानादिषु यथा स्थितम् ।

छत्रिणा चाभिसंबन्धाच्छत्रिशब्दाभिधेयता ।। 22 ।।

प्रातःसवने

"पुरोडाशैः प्रचरन्ति"

इत्युच्यते । तत्र चैकस्य पुरोडाशस्य बहुत्वसंख्यानुपपत्तेस्तत्सहचरितेष्वध्यारोपितपुरोडाशयागेषु सत्स्वयं प्रयोगः । तत्र पुरोडाशः धानाः करम्भः परिवापः पयस्येति पञ्च पुरोडाशाः कथ्यन्ते । तथा छत्रिणो यान्तीति बहुवचनान्यथानुपपत्त्या पराकृतच्छत्रसंबन्धा अपि छत्रिसाहचर्यात् तच्छब्देनाभिधीयन्ते । एवं दासेऽपिस्वामिसाहचर्याद् द्वन्द्वनिर्देशान्यथानुपपत्त्या स्वामिधर्मासङ्ग इत्यात्मनेपदं भवति । स्वामिदाससाध्यस्य हि व्यापारस्य भेदोऽत्र न विवक्ष्यते

इत्यभिन्नधातुवाच्यक्रियारूपाश्रयप्रधानगतधर्मोपपत्तिः ।। 22 ।।

यद्वा मतान्तरमत्रेत्याह ।

अर्थात् प्रतीतमन्योन्यं पारार्थ्यमविवक्षितम् ।

इत्ययं शेषविषयः कैश्चिदत्रानुवर्ण्यते ।। 23 ।।

स्वामिदासयोः क्रियापकारित्वं विलक्षणमेकस्य मुख्यफलाभिसन्धानादितरस्य तदनभिसन्धानादित्येतदविवक्षित्वा सामान्येन मातापितरौ पुत्रं जनयत इतिवत् क्रियायां कर्तृत्वमात्रविवक्षायां

`शेषात् कर्तरि परस्मैपदम्'(P.1.3.78.)

भवति । स्वामिपदसन्निधानादेव हि संविधानमवगतं दासपदार्थसामर्थ्याच्च तस्यान्यगामि क्रियाफलमिति चरितार्थत्वादाख्यातस्य नात्र व्यापार इति क्रियासामान्यवचनाद्धातोरात्मनेपदविधावनुपयोगाच्छेषात् परस्मैपदं ' स्वामिदासौ पचत इति ।। 23।।

पञ्चभिर्हलैः कृषतीति स्वामिनः प्रतिविधातुस्तथा सम्भवाण्णिचः प्राप्तिमापादयितुं भाष्यकारेणोपन्यस्तम् । तत्र चोद्यते ।

अथ प्रतिविधाता यो हलैः कृषति पञ्चभिः ।

भाष्ये नोहाहृतं कस्मात् प्राप्तं तत्रात्मनेपदम् ।। 24 ।।

युगपत् पञ्चभिर्हलैः कर्षणं स्वामिन उपपद्यते, न कर्षकस्येति प्रतिविधातर्यात्मनेपदं प्रतिविधानवचनाद् धातोः कुतः कारणाल्लक्षणेन प्राप्तं न कृतं भाष्यकारेण ।। 24 ।।

अत्र परिहारं शङ्कित्वा प्रतिक्षिपति ।

प्रतीतत्वात् तदर्थस्य शेषत्वं यदि कल्प्यते ।

न स्यात् प्राप्तविभाषासौ स्वरितेतां निवर्तिका ।। 25 ।।

भृत्यस्य पञ्चभिर्हलैर्युगपद् विलेखनासम्भवात् स्वाम्येव तथेति गतार्थत्वात् संविधानस्यात्मानेपदविधावनुपयोगात् शेषत्वं परस्मैपदनिमित्तं यद्यत्रावस्थाप्यते तदा प्रदेशान्तरविरोधः प्राप्नोति । तथा हि

`न वेति विभाषा' (P.1.1.44)

इत्यत्र

`विभाषोपपदेन प्रतीयमाने' (P.I.3.77.)

इतीयं प्राप्तविभाषा गणिता कर्त्रभिप्राये क्रियाफले स्वरितेत्संज्ञाकानां नित्ये आत्मनेपदे प्राप्ते पक्षे तन्निवृत्त्यर्था । यदि चात्रोपपदेन द्योतिते न स्यादात्मनेपदं तदा स्वं यज्ञं यजतीत्यादावपि तदप्राप्तेः

विभाषोपपदेन.....

इत्यप्राप्तविभाषा भवेद् विधिमुखेन प्रवृत्तेरपि विरोधः । तस्माद् द्वाभ्यामुपपदात्मनेपदाभ्यां संविधानं द्योत्यत इति प्राप्तविभाषावचनाल्लभ्यत इति कथमत्रात्मनेपदं न भवेत् ।। 25 ।।

अत्र केचिदाहुः ।

शुद्धे तु संविधानार्थे कैश्चिदत्रेष्यते कृषिः ।

तद्धर्मा यजिरित्येवं न स्यात्तत्रात्मनेपदम् ।। 26 ।।

ये णिचा समानविषयतामात्मनेपदस्य मन्यन्ते, त एवमिच्छन्ति संविधानमात्रेऽर्थे कृषिर्वर्तत इति न भवत्यात्मनेपदं णिज्वदिति । तथा हि णिच्परिहारायोक्तम्---

"कृष्णादिषु चानुत्पत्तिर्नानाक्रियाणां कृष्यर्थत्वात् (Va.3.onP.3.1.26,M.Bha.II.p,33,1.25.)

"नावश्यं कृषिर्विलेखन एव वर्तते । किं तर्हि । प्रतिविधानेऽपि वर्तते । (M.Bha.II.p,33.1.25.)

एवं शुद्धे विलेखनानवच्छिन्ने संविधानार्थे कृषिः वर्तत इति विलेखनस्य प्रयोज्यव्यापारस्यासम्भवाद् यथा णिञ् नोत्पद्यते तथात्मनेपदमपि, संविधानेन विशेष्यमाणस्यान्यस्य धात्वर्थस्याभावात् । संविधानविशिष्टार्थवाचिनो हि धातोरात्मनेपदं न तु शुद्धसंविधानवचनात् । यद्यपि च विलेखनमत्र धात्वर्थः तथापि तद्विषयं प्रतिविधानं विशिष्टमेव शब्दशक्तिस्वाभाव्यात् कृषिरभिधत्ते। तद् यथा--

`फले लुग्वचनानार्थक्यं प्रकृत्यन्तरत्वात्'

इति प्रत्याख्याते लुकि रूढिशब्दत्वेऽपि शब्दशक्तिस्वाभाव्यादामलकादिभिर्वनस्पतिविशेषप्रभव एव फलविशेषोऽभिधीयते । तदेतन्निवारयति । तथा ह्येवमत्रोच्यमाने यजिः अपि तस्य कृषेरिव धर्मोऽस्येति तद्धर्मा कृषिधर्मा स्यादिति ततोऽपि न

भवेदात्मनेपदम् । यथा हि कृषिः शुद्धे प्रतिविधाने वर्तते तथा यजिरपि वर्तेत । तथा च भाष्ये प्रतिविधाने यजेर्वृत्तिरुक्ता । इदं हि तत्र चोद्यते--

"इह याजका याजयन्तीतीष्यते । हविःप्रक्षेपमात्रवचने तु यजौ याजकाः हविः प्रक्षिपन्ति, तान् यजमानः प्रयोजयन् याजयतीति विपरीतमभिधानं स्यात्" इति ।

अत्र परिहार उक्तः

"यज्यादिष्वविपर्यासो नानाक्रियाणां यज्यर्थत्वात्"

(Va.4.onP3.1.26M.Bha.II.p.34 1.3.)

"नावश्यं यजिर्हविःप्रक्षेपण एव वर्तते । किं तर्हि ।

त्यागेऽपि । तं यजमानः करोति, याजकाः कारयन्ति ।"

(M.Bha.II.p.34.1.5)

इति । एवं च द्रव्यत्यागमात्ररूपो यजेरर्थ इति कृषिवत् ततोऽपि न स्यादात्मनेपदम् । अथ त्यागविशिष्टं प्रतिविधानं यज्यर्थ इति भवत्यात्मनेपदं कृषेरपि विलेखनविशिष्टं संविधानमर्थ इति प्रसज्यत एवात्मनेपदम् । णिच् तु प्रैषस्यासम्प्रत्ययान्न भवति । न हि संविधानमेव ण्यर्थ इति पूर्वमेव निर्णीतम् ।। 26 ।।

कथं तर्ह्यात्मनेपदं न भवतीति सिद्धान्तमाह ।

अत्र तूपपदेनायमर्थभेदः प्रतीयते ।

प्राप्ते विभाषा क्रियते तस्मान्नास्त्यात्मनेपदम् ।। 27 ।।

समीपे श्रूयमाणेन पञ्चभिर्हलैरिति पदेनायं संविधानलक्षणोऽर्थविशेषो गम्यते यतस्ततोऽत्र

`विभाषोपपदेन प्रतीयमाने' (P.1.3.77)

इति प्राप्त आत्मनेपदे विभाषाकरणात् पक्षे न भवतीति कृषतीति साधुः प्रयोगो भाष्येऽवस्थित इति सिद्धमिष्टम् ।। 27 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे उपग्रहसमुद्देशो द्वादशः ।।

.....

vrtti_samuddesa

भर्तृहरिप्रणीतम्

वाक्यपदीयम्

हेलाराजरचित 'प्रकाश-'

श्रीरघुनाथशर्मविरचित

'अम्बाकत्री'टीकाद्वयोपेतम्

अथ तृतीयकाण्डे

वृत्तिसमुद्देशः

प्रकाशः

असमस्तपदगतानर्थान् विचार्य समस्तपदविषयान् विचारयितुं पञ्चप्रकारवृत्ति-

पदविचारः प्रस्ताव्यते ।

तत्र प्रथमं समानाधिकरणतध्दितवृत्तिविचारः । तथाहि--कुत्सितादीनामर्थे
चौल्लिङ्गवचनानुपपत्तिः। कुत्सितादिसमानाधिकरणादिति चेत्, अतिप्रसङ्गः, यथा
टाबादिष्विति प्रत्ययार्थपक्षं समानाधिकरणपक्षं च दोषवन्तमुभ्दाव्य 'सिध्दं तु येन कुत्सितादिवचनं तद्युक्तात् स्वार्थे
प्रत्ययविधानात्" इति प्रकृत्यर्थविशेषणपक्षो
ऽवस्थापितः । येन धर्मेण कुत्सादयः प्रतिपाद्यन्ते तध्दर्मयुक्तार्थाभिधायिनः
प्रातिपदिकात् तेनैव कुत्सादेरुपादा(ना)त् तद्द्योतनाय स्वार्थे कनादयः प्रत्यया
विधेया इति वार्तिकार्थः ।
एवञ्च प्रकृत्यर्थो विशिष्टः प्रत्ययार्थो न कुत्सादिधर्ममात्रमिति लिङ्गवचनोपपत्तिः । उपात्तकुत्सादेरेव चशब्दात् प्रत्यय इति तत्समानाधिकरणादिदमादेः
स्वयमनुपात्तकुत्सादेस्तदभावः ।
एवं स्थिते केन धर्मेण कुत्सादय इत्युक्तम् । 'स्वार्थमभिधाय शब्दो
निरपेक्ष--'इत्यादि । स्वार्थादिपञ्चकाभिधायिनः प्रातिपदिकात् स्वार्थादिनिमित्तकु-त्सनादिद्योतनाय कनादयः प्रत्यया इति
प्रकृत्यर्थविशेषणपक्षः । 'प्रियकुत्सानादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः' इति च न सुबन्तात् प्रत्ययविधानपरमेतद् वचनम्, अपि तु पञ्चकार्थ निमित्तत्वात् कुत्सनादेः 'देवदत्तकः' इत्यादौ कुत्सादिमात्रे
प्रत्ययेन द्योतिते प्रकरणादेस्तध्देतुर्लिङ्गादीनामन्यतमोऽवधार्यते । स च
सुबन्तेन द्योत्यत इति विशिष्टकुत्साद्यर्थप्रतिपादनाय विभक्त्यन्तः प्रवर्तत
इत्युच्यते ।
तदेतद् व्याचष्टे--
कुत्साप्रशंसातिशयैः समाप्तार्थं तु युज्यते ।
पदं स्वार्थदयः सर्वे यस्मात् कुत्सादिहेतवः ।। 1 ।।
स्वार्थद्रव्यलिङ्गसङ्खयाकर्मादिलक्षणेनार्थेन परिपूर्णाभिधेयं पदं स्वार्थादि-
निमित्तेन विशिष्टेन कुत्साद्यर्थेन युक्तमवधार्यते । स्वार्थादयश्चान्यत्र
व्याख्याता नेह प्रपञ्च्यन्ते । तदत्र प्रातिपदिकार्थनिमित्तत्वात् कुत्सादेस्त-
द्विशिष्टार्थाभिधायिनः प्रातिपदिकादेवाधिकारात् प्रत्ययः । प्रत्ययान्ताद् विभक्तिपराच्च कुत्सादिहेतोर्विशिष्टस्याभिव्यक्तिरिति समाप्तार्थं तेन सम्बध्यत
इत्युच्यते ।
तत्र स्वार्थनिमित्ता कुत्सा यथा--पटुकः, पण्डितकः, मृदुक इति ।
पाटवादेरपरिपूर्णत्वाद् दुष्टत्वाद् वा कुत्स्यतेऽर्थः । एवं पटुरूपः पटुतर
इत्यादिप्रशंसातिशययोः स्वार्थनिमित्तयोरुदाहार्यम् । द्रव्यस्य विशेष्यत्वेन

प्राधान्याद् धर्मान्तरमुखेनैव तन्निमित्तः कुत्सादिर्बोध्दव्यः ।
लिङ्गनिमित्ता कुत्सा यथा--पुरुषे क्लीबत्वप्रतिपादनार्था स्त्रीत्वारोपेण
कुत्सा, निर्लज्जत्वाख्यानाय वा स्त्रियां पुंस्त्वारोपेण पुरुषोऽयं स्त्री,
स्त्रीयं पुरुष इति च । परार्थे शब्दप्रयोगादेव कुत्सावगतेः कप्रत्ययस्याय-
मविषयः । एवमेकत्रैव दुर्भरत्वाद् बहुत्वसमारोपादिदमेव मे सहस्रमिति
सङ्ख्यानिमित्ता कुत्सा । प्रत्ययोऽत्र पूर्ववन्न भवति । एवं प्रशंसादावपि यथायोगंप्रदर्शनीयम् ।। 1 ।।

तदत्र `कुत्सितकः, अनुकम्पितकः' इति को न प्राप्नोति,स्वशब्देनाभिहितत्वादिति ।
तद्भाष्ये चोदितं परिहर्तुमाह--
देवदत्तादिकुत्सायां वर्तते कुत्सितश्रुतिः ।
कुत्सितस्था तु या कुत्सा तदर्थः को विधीयते ।। 2 ।।
कुत्सां प्रवृत्तिनिमित्तामाश्रित्य देवदत्ते कुत्सितशब्दो वर्तते । स च कुत्सा-सम्बन्धोपलक्षितं लिङ्गसङ्ख्याकर्माद्युपाधिकं द्रव्यमभिधत्त इति स्वार्थमात्रे
विश्रान्त्यभावादर्थान्तरे लिङ्गादावपि तात्पर्याद् बाह्यकुत्साप्रतिपादने
सामर्थ्याभावात् तत्र प्रत्यय उत्पद्यते । स्वार्थभूता हि प्रातिपदिकवाच्या

देवदत्तादेः कुत्सा,तद्व्यतिरिक्ता तु बाह्या स्वार्थादिनिमित्ता प्रत्ययवाच्या ।

तद् यथा देवदत्तशब्दात् प्रियकुत्सनादिसाधारणार्थाभिधायिनः कप्रत्ययः कुत्सा-
सम्बन्धं प्रकाशयति, तथा कुत्सितशब्दादर्थान्तरनिमित्त प्रवृत्तिनिमित्तभूतकुत्सा-
भिधायिनः स्वार्थगतां बाह्यां कुत्सां प्रकाशयितुं कप्रत्यय इत्यर्थः ।। 2 ।।
एवमतिशायनेऽपि स्वशब्देनाभिहिते तत्प्रत्ययाप्रसङ्गः इति समानन्यायत्वात्चोदितंभवतीति तदपि प्रकृतसमाधानाय प्रतिविधत्ते--
प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः ।
प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते ।। 3 ।।
योऽतिशयेन शुक्लः शुक्लतरः,स प्रकृष्टः शुक्ल इत्युच्यते । निरतिशयापेक्षया हि सातिशयः शुक्लस्तरबन्तेन वा शुक्लशब्देनोच्यते, केवलेन वा प्रकृष्टशब्देन । तथा च
शुक्लादिगतस्य प्रकर्षस्य प्रकृष्टशब्दोऽभिधायक इति न तत्रैव ततस्तरप्रत्ययः ।
यस्त्वपरः प्रकृष्येभ्योऽपि तस्य प्रकर्षः, स नाभिहित इति तदभिधानाय तरप् क्रियते,प्रकृष्यतर इति । यथा ज्येष्टतमायेत्यतिशायनप्रत्ययान्तरम् । आदिग्रहणात् प्रशस्त-
रूपमिति प्रशंसोपाधेः प्रत्ययान्तरमुदाहार्यम् । एवं कुत्सितक इति कुत्सितस्थे
कुत्सान्तरे कः ।। 3 ।।
किं पुनः कुत्सितस्य कुत्सान्तरमित्यत आह--
कुत्सितत्वेन कुत्स्यो वा न सम्यग् वापि कुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ।। 4 ।।

स्वशब्देन कुत्सित इत्यनेन सामान्यशब्देनाभिहितेऽर्थे विशेषो नावधार्यते--
किमस्याकार्यकरणान्निन्दार्हत्वेनैव कुत्सितत्वम्, उत युक्तकार्यपि शत्रुणा दुष्ट-
त्वारोपोण गर्ह्यत इति । उत्पन्ने तु प्रत्यये विशेषावधारणम् । तथा हि--कुत्सितमस्यकुत्सितत्वम्,न सम्यगिदं कुत्सितत्वम्, शत्रुणा तु द्वेषेणाध्यारोपितमिति प्रत्यया-न्तादनगम्यते कुत्सितशब्दात् ।
सा हि कुत्सितस्य कुत्सायां निर्दोषस्यैव क्रियते । यद्वा कुत्साया अपि निन्द्य-तरत्वेन कुत्साविशेषः । तथा

चानिर्धारितधर्मविशेषनिबन्धना कुत्सा कुत्सितशब्द-
प्रवृत्तिनिमित्तम्,ब्रह्महत्यादिविशेषनिबन्धना तु कप्रत्ययहेतुरिति विशेषः । तदेवंकुत्सितार्थसमवेतां द्वितीयां कुत्सामाश्रित्य समर्थितम् ।। 4 ।।
यद्वा नास्त्येवात्र द्वितीया कुत्सा । यैव तु प्रातिरदिकेनोपात्ता, तत्रैव
प्रत्यय इत्याह--
न च साम्प्रतिकी कुत्सा भेदाभावात् प्रतीयते ।
पूज्यते कुत्सितत्वेन प्रशस्तत्वेन कुत्स्यते ।। 5 ।।
कुत्सोपलक्षितस्य द्रव्यस्य कुत्सितशब्देन प्रियकुत्सनादिसाधारणस्याभिधानाद्

वर्तमानकुत्साभिसम्बन्धो नावधार्यतेऽस्मात् । तथाहि--तत् कुत्सयोपलक्षितं द्रव्यं
कदाचित् पूज्यते प्रशस्यतेऽपि कुत्सितरूप इति । यथा वृषलरूपो, दस्युरूप इति ।
तद्यथा प्रशस्तत्वेनोपलक्षितं निन्द्यते प्रशस्तक इति अपरिपूर्णप्रशंसोऽध्यारोपित-प्रशंसो वा । कस्यचिद्धि प्रशंसा न परिसमाप्ता, अंशेन खण्डितत्वात् ।

कस्याचित् प्रशंसा न विद्यते, अरिणाध्यारोपितत्वात् । कस्यचित्तु अरिणा

प्रशस्तस्याप्यप्रशस्तत्वमारोप्यते । एवं कुत्साव्यभिचारसम्भवात् कुत्सितशब्दाद्
वर्तमानकुत्सासाम्बन्धमनवगतं द्योतयितुमुपपद्यते कप्रत्ययः । एवम् अनुकम्पितक
इत्यनेनैव न्यायेनानुकम्पायां कप्रत्ययः समर्थनीय इति समानाधिकरणतद्धितवृत्तौ
किञ्चिद् विचारितम् ।। 5 ।।
यथा कुत्सादिभिः समाप्तार्थं पदं सम्बध्यते, तथा अवच्छेद्यावच्छेदकभावेना-
पीति समानाधिकरणसुब्वृत्तिं विचारयितुमाह--
विशेषणविशेष्यत्वं पदयोरुपजायते ।
व प्रातिपदिकार्थश्च तत्रैवं व्यतिरिच्यते ।। 6 ।।
इह `वीरः पुरुषः' इति वीरादिशब्दोऽनपेक्षितेतरेतरपदलमन्वयोऽव्यतिरिक्त-
स्वार्थमात्रवचनः । तथा च पदान्तरसंनिधानेऽपि तस्य तावत्येवाभिधा निश्चीयते,
तत्र च सम्बन्धे गुणप्रधानभावस्यावश्यंभावाद् विशेषणविशेष्यभावो वाक्यार्थः पदयोः
समन्वितयोरधिको जायते, न प्रातिपादिकार्थयोः । यथा `राज्ञः पुरुषः' इत्यत्र

व्यधिकरणपदविषये राजप्रातिपदिकार्थस्यैव विशेषणत्वमिति ततः षष्ठी न
विशेष्यादुपकार्यत्वेन स्वनिष्ठात् । तथा च "षष्ठी शेषे" (पा 2/3/50)
इत्यत्रोक्तम्--`अर्थरूपमेवैवंजातीयकम् इति । विशेष्यलक्षणरूपमव्यतिरिक्तस्वार्थं

स्वनिष्ठमित्यर्थः ।

यदा च समानाधिकरणविषये विशेषणविशेष्यभावे पदार्थपृष्ठपातित्वेन वाक्यार्थता,
तदा तत्र प्रातिपदिकार्थो न व्यतिरिच्यते रूपान्तरेण न विपरिणमत इति प्रथमा
नोपसङ्खयेया । तथा चोक्तं `न वा वाक्यार्थवद् यदत्राधिक्यं वाक्यार्थछः सः' इति ।
व्यधिकरणविषये तु विशेषणस्य रूपान्तरापत्तिमवसाय भेदमबुद्ध्वा चोदितम्--`प्राति-
पदिकार्थमात्रे प्रथमाविधाने पदसमानाधिकरण उपसङ्खयानमधिकत्वाद्' इति ।
अवच्छेद्यावच्छेदकभावस्य चानियमशचोदितः । `विशेषणविशेष्ययोरुभय-
विशेषमत्वादुभय विशेष्यत्वाच्चोपसर्जनाप्रसिध्दिः' इति ।
विशेष्याभिमतेनापि विशेषणाभिमतस्य स्वात्मनि नियमनात् तस्यापि तं प्रति
विशेषणत्वमिति द्वयोरपि विशेषणत्वमिति समासशास्त्रे प्रथमानिर्देशादुपसर्जन-
संज्ञायां पूर्वनिपातः पर्यायेण स्यात् । अत्र समाधिरुक्तः `न वान्यतरस्य
प्रधानभावात् तद्विशेषणत्वाच्चेतरस्योपसर्जनस्य प्रसिध्दिः' इति ।। 6 ।।

तत्र नियमेन गुणप्रधानभावः किङ्कृत इति व्याचष्टे--
विशेष्यं स्यादनिर्ज्ञातं निर्ज्ञातार्थो विशेषणम् ।
परार्थत्वेन शेषत्वं सर्वेषामुपकारिणाम् ।। 7 ।।
इह विशेषणविशेष्ययोर्लक्षणमन्वर्थेन नाम्नैवावेदितम्, भेद्यं विशेष्यम्, भेदकम् विशेषणमिति । इदं तु गुणप्रधानताज्ञापनार्थम् ।
तत्रोच्यते--सम्बन्धान्यथानुपपत्त्यच सिध्दो गुणप्रधानभावः, द्वयोः समयोः सम्बन्धायोगादिति कुतः सङ्करः ?
प्रसिद्धयप्रसिद्धिभ्यां व्यवस्थापनात् ।
तथाहि--सामान्यात्मना क्रियासम्बन्धितायामुपक्रान्तं विशेष्यं ज्ञातमपि
स्वगतेनात्मभूतेन विशेषणानिश्चितमिति तन्निश्चयाय ज्ञापकत्वादेव निश्चितोऽर्थो
गुणादिः प्रवर्तमानो विशेषणम् । ततश्च ज्ञाप्यं प्रधानं विशेष्यम्, ज्ञापकं
परोपकारायोपादीयमानं शेषभूतमप्रधानं विशेषणम् । द्रव्यस्य च साक्षात्क्रिया-
सम्बन्धात् तदेव तत्र प्रधानम् ।
गुणस्तु तद्द्वारेण क्रियानम्बन्धमनुभवन् द्रव्यावच्छेदकोऽप्रधानभूतः ।
सर्वत्रैव सगुणस्य द्रव्यस्य क्रियासम्बन्धितया विधीयमानत्वम् । आधारद्वारको वा
गुणानां क्रियासम्बन्धः । न तु द्रव्यमनूद्य गुणस्य पृथक् क्रियायां विधानमिति
व्यवस्थितो गुणप्रधानभावः । तेन `कृष्णाजिनमुलूखलस्याधस्तादवस्तृणाति',
`कृष्णाजिनेन दीक्षयति'। `कृष्णाविषाणया कण्डूयति' इत्यादौ सर्वत्र गुणविशिष्टस्य
द्रव्यस्य विधानात् तस्यैव प्राधान्ये सति विशेष्यत्वमितस्य तु कृष्णगुणस्य

विशेषणत्वमित्युपसर्जनप्रसिध्दयर्थमवस्थितो गुणप्रधानयोर्नियमः । स च समानाधि-
करणसमासे षष्ठीसमासे च ।। 7 ।।
तथाहि--
विभक्तिभदो नियमाद् गुणगुण्यभिधायिनोः ।
सामानाधिकरणस्य प्रसिध्दिर्द्रव्यशब्दयोः ।। 8 ।।
पटस्य शुक्ल इति द्रव्यगुणाभिधायिपदप्रयोगे शाब्दो गुणप्रधानभावः । तथा ह्यत्रो-पसर्जनं प्रधानोपकारपरिणतं स्वार्थमाचष्ट

इति गुणविभक्तिं षष्ठीमुपादत्ते । प्रधानंतु स्वात्मन्यवस्थितमपरोपकारीति प्रथमया युज्यत इति नियतो विभक्तिभेदो व्यधिकरणे विषये । `वीरः पुरुषः' इत्यादौ तु समानाधिकरणे विषये द्वावपि द्रव्यशब्दौस्वनिष्ठं स्वार्थमाचक्षाते । तथा च तत्र प्रथमैव । सामर्थ्यनिबन्धनस्तु गुणप्रधान-भाव उक्तः `विशेष्यं स्यादनिर्ज्ञातम्' (का.7)इत्यादिना । एवञ्च सत्यपि गुणप्रधान-भावे शब्दाशब्दत्वकृतो विशेषः सामानाधिकरण्यवैयधिकरणययोरिति षष्ठीसमानाधिकरणयोः समासयोर्भेदः ।। 8 ।।

यदि तर्हि समानाधिकरणे विषये द्वावपि द्रव्यशब्दौ परस्परानुपकारकप्रधानार्थवाचकौ विशेषिशेष्यभावात्मकः, तदा कथमनयोः परस्परसम्बन्ध इत्यत आह--

द्रव्येऽनिर्ज्ञातजातीये कृष्णशब्दः प्रयुज्यते ।
अनिर्ज्ञातगुणे चैव तिलशब्दः प्रवर्तते ।। 9 ।।

अभेदोपचारान्मतुबलोपाद्वा कृष्णशब्दो द्रव्ये वर्तते । स च गुणनिमित्तक इति तत्र नियतजातीयतया निश्चयस्ततो नास्ति । अविनाभावात् तु जातिमात्रमवधार्यत एव ।

एवं तिलशब्दोऽपि जातिनिमित्तोऽनिश्चितनियतगुणसम्बन्धे द्रव्ये वर्तते । तथा च

द्वयोरपि विशेषाकाङ्क्षित्वम् ।। 9 ।।

एवमपि कथं परस्परेण सम्बन्ध इत्याह--

सामान्यानामसम्बन्धात् तौ विशेषेव्यवस्थितौ ।
रूपाभेदाद् विशेषं तमभिव्यङ्क्तुं न शक्नुतः ।। 10 ।।

अनिश्चितनियतजातिगुणानि कृष्णतिलशब्दाभिधेयानि द्रव्याणि सामान्यान्यत्र विवक्षितानि । तेषामत्र स्वात्मव्यवस्थितानां परस्परोपकाराभावात् सम्बन्धो न स्यादित्येकवाक्यतावशात् सम्बन्धान्यखानुपपत्त्या प्रथममेवात्र विशेषे कृष्णतिल-शब्दौ व्यवस्थितौ । कृष्णशब्देन ह्यत्र तिलजातीयमेवाभिधित्सितम्, तिलशब्देन च कृष्णगुणं द्रव्यम् । स च विशेषः प्रतिपत्तृभिः परस्परसम्बन्धात् प्रागवधारयितुं न शक्यते । अन्यजातीयेऽपि कृष्णशब्दस्य प्रवृत्तेरन्यगुणेऽपि तिलशब्दस्यैवंविध-स्येति प्रतिपत्त्रपेक्षया विशेष्टार्थाभिव्यक्तिहेतुत्वं कथ्यते । तक्त्रभि-प्रायात् तु विशिष्ट एवोपक्रान्तोऽर्थः सम्बन्धः ।। 10 ।।

स एव वाक्यैकतावशादभिव्यज्यत इत्याह--

तावेवं सन्निपतितौ भेदेन प्रतिपादने ।
अवच्छेदमिवाधाय संशयं व्यपकर्षतः ।। 11 ।।

एवमिति रूपाभेदाद् विवक्षितविशेषप्रतिपादने प्रतिपत्तारं प्रत्यशक्तत्वेन प्रवृत्तौ कृष्णतिलशब्दौ विशेषोपलक्षितस्य द्रव्यस्य प्रत्यायने प्रतिपत्तृगतं तिलातिलविषयम्,कृष्णाकृष्णविषयं च सन्देहं निवारयतः, कृष्णशब्देऽन्य-जातीयाद् व्यावृत्तिं तिलशब्दे चान्यगुणादाधाय । कृष्णशब्दो हि तिलजातीयमेव तिलशब्देसन्निधानेऽर्थमाहेत्यजातीयात् तस्य निवृत्तिः । एवं तिलशब्दः कृष्णगुणमे- वेत्यन्यगुणादस्यावच्छेदः । स चात्र पूर्वमेव स्वीकृत इतीवशब्दः । प्रतिपत्ता हि सति सम्बन्धेऽवच्छेदमेवैति ।

तदुक्तं भाष्ये--"कृष्णशब्दस्तिलशब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते ।
तथा तिलशब्दः कृष्णशब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते" इति । तदानीं
विशेषवचनत्वस्याभिव्यक्तिरित्यर्थः ।। 11 ।।
तदेवं स्म्बन्धः समर्थितः । स चात्र सामानाधिकरण्यस्वभावः । सामानाधिकरण्यं
च शब्दयोर्भिन्ननिमित्तप्रयुक्तयोरेकस्मिन्नर्थे वृत्तिरिति । यदि समानाभिधेयत्व-
लक्षणम्, तदा विशेषणविशेष्यभावोऽर्थद्वारकस्तयोर्नोपपन्नः, भेदाश्रयत्वात् ।
तस्यार्थैक्ये तदभावात् ।
अथार्थयोः समानाश्रयत्वं सामानाधिकरण्यम्, तदा गुणद्रव्ययोरधिकरणान्तराभावात्
कथमत्र तदुपपत्तिः ? विशेषणविशेष्यभावस्तु स्याद् द्रव्यगुणयोः ।
अथ गुणस्य द्रव्यजातेश्चैकाधिकरण्यमाश्रीयते, तदा विशेषणविशेष्यभावो न स्यात् ।
तयोर्द्रव्यावच्छेदप्रवृत्तयोन्योनानभिसम्बन्धादित्येतदाशङ्कय समर्थयितुमाह--
द्रव्यात्मा गुणसंसर्गभेदादाश्रीयते पृथक् ।
जातिस्म्बन्धभेदाच्च द्वितीय इव गुह्यते ।। 12 ।।
इह द्रव्यात्मा निरंशवस्तु तत्तदुपाधिभदारूपं व्यवहारयोग्यमिति कृष्णगुणसम-

वायोपहितभेदमन्यदिव कृष्णतिलाभिधेयमाक्षीयते । एकैकव्यावृत्तिनिष्ठत्वा-
च्छब्दानां तदभिदेयं भागशः खण्डरूपमेव नियतं प्रतीयते । ततश्च जातिसमवायोपलक्षितं
तिलशब्देन द्वितीयमिव द्रव्यं प्रत्याय्यते । एकस्यैव जातिगुणावाच्छिन्नस्य
प्रतिपादनादेकैकशब्दव्यापारापेक्षया विच्छिद्येव सम्प्रत्ययादिवशब्दः ।। 12 ।।
एतदेव समर्थयितुमाह--

निमित्तैरभिसम्बन्धाद् या निमित्तसरूपता ।
तयैकस्यापि नानात्वं रूपाभेदात् प्रकल्पते ।। 13 ।।
निमित्ताद् गुणजात्यादेर्निमित्तवत्यर्थे द्रव्ये निमित्तसरूपप्रतययो जायमानः
स्वप्रत्ययं विभक्तमेव दर्शयति ।। 13 ।।
तथा च जातिगुणोपरागाद् भिन्नं द्रव्यद्वयमाधेयम् । तस्य त्वाधारभूतं तृतीयं
द्रव्यमभिसम्बन्धकाले बुद्धया निर्भज्यत इत्याह--
द्रव्यावस्था तृतीया तु यस्यां संसृज्यते द्वयम् ।
तयोरेवस्थयोर्भेदादाश्रयत्वे नियुज्यते ।। 14 ।।
जातिगुणोपाधिसंसर्गप्रविभक्तशरीरद्वयमाधेयं यत्र संसृज्यते सम्भेदमापद्यते, तत्
तृतीयं द्रव्यरूपमाधारभूतमवच्छेद्यम् । अवच्छेदकात् तस्माद् द्वयादन्यदाश्रयत्वे
तयोर्द्वयोर्नियुज्यते कल्प्यते ।। 14 ।।
कथमेकस्य वस्तुतो द्रव्यस्य भेदकल्पनेत्याह--
बुद्धयैकं भिद्यते भिन्नमेकत्वं चोपगच्छति ।
बुद्धयावस्था विभज्यन्ते सा ह्यर्थस्य विधायिका ।। 15 ।।

इह प्रत्ययरूढार्थाभिधायिनः शब्दा यथाप्रत्ययं भेदाभेदाभ्यां व्यवहारं वर्त-

यन्ति । प्रत्ययश्च स्वनिमित्तानुविधानेनार्थकारान् बहिर्निर्मिमीत इव ।
तथा च प्राक् समासादुपाधिभेदाच्छुरितस्य द्रव्यद्वयस्याभिधानम् । समासे तु
भेदस्तिरोहितः । सोऽर्थोऽन्तर्भूत इति पदसमुदायात्मकमेकं पदमभेदेन कृष्णातिला
इत्यर्थमभिधत्ते ।
तथा च `नीलमञ्जरी, मत्तमधुकरी ' इति पुंवद्भावः समानाधिकरणलक्षणः
सिद्धः ।। 15 ।।
बुद्धिप्रकल्पितश्च भेदाभेदव्यवहारः कात्यायनाचार्यस्याप्यभिमत इत्याह--
व्यपदेशिवदेकस्मिन् बुद्धया नानार्थकल्पना ।
तया कल्पितभेदः सन्नर्थात्मा व्यपदिश्यते ।। 16 ।।
तत्र `व्यपदेशिवयद्वचनम्, एकाचो द्वे प्रथमार्थम्' इति व्यपदेशिवद्भाववचनम्
`अवचनाल्लोकविज्ञा नात् सिद्धम्' इति प्रत्याचक्षाणो वार्तिककारो बुद्धिप्रतिभासिनंशब्दार्थमभ्युपगच्छति । तथा हि
बुद्धिसमारोपितभेदाश्रयेण मुख्यवदेकस्मिन्नपि
द्विर्वचनादिकार्थं सिद्धम् । शब्दप्रयगाच्च प्रत्ययस्य गौणमुख्ययोरविशेषः,
विपर्ययो भेदेनोक्तः । विकल्पो हि पुरुषस्य चैतन्यं स्वरूपमित्यत्राभिन्नस्यापि
भदप्रदर्शने `राज्ञः पुरुषः' इतिवत् प्रतीतिसाम्यम् ।। 16 ।।
शिलापुत्रकस्य शरीरमित्यभेदेऽपि भेदो लौकिक व्यपदेशिवद्भावे
दृषटान्तितः, तं व्याचष्टे--
क्रियाभेदेन दृष्टानामश्मादिनां पुनः पुनः ।
किञ्चिद् दर्शनमन्येन दर्शनेनापदिश्यते ।। 17 ।।
अनेकशः प्रेषणादिक्रियाभेदोपधारितभेदानां शिलापुत्रकादीनां विवक्षितैक-
क्रियासम्बन्धित्वेन ज्ञानमनेकक्रियागतेन ज्ञानेन सम्बन्धितयावच्छिद्यते ।
नानाक्रियासम्बन्धिनः शिलापुत्रकस्येदमेकक्रियासम्बन्धि प्रतिनियतं
शरीरमिति ।। 17 ।।
एवमिणादिधातुविषयेऽप्येकाच्त्वं भेदकल्पनया--
प्रयोगभेदाद् धातूनां प्रकल्प्य बहुरूपताम् ।
भेदाभेदावुपादाय क्वचिदेकाच्त्वमुच्यते ।। 18 ।।
एकोऽच् यस्य सोऽयमेकाजिति बहुर्वीहावाश्रिते एकवर्णेष्वन्यपदार्थस्य

वर्तिपदार्थभिन्नस्याभावाद् द्विर्वचनाप्रसक्तावेकवर्णेषु च व्यपदेशिवद्वचनादित्यु-क्तम् ।
ततः `एति, अयनम्, इतः, एता, एतव्यम् , आयन्' इत्यादि-
बहुभेदप्रभिन्नप्रयोगगतनानारूपाश्रयेणान्यपदार्थं प्रति नियतप्रयोगगताभेदाश्रयेण
वर्तिपदार्थं च परिकल्प्य `इयाय' इत्यादौ द्विर्वचनसिद्धिरुक्ता ।। 18 ।।
यद्वा,
अन्वयव्यतिरेकाभ्यामर्थवान् परिकल्पितः ।

एको धात्वर्थविगमाद् वर्णत्वेनोपचर्यते ।। 19 ।।
इणो धातोरित्यादौ पदे प्रत्ययरूपभिन्नेऽप्यनुगमाद् योऽनुगतोऽर्थः
स वाच्यः । अन्यत्र तस्मिन्नेव प्रत्यये धात्वन्तरप्रयोगे तदप्रतीतेरित्यर्थ-
वतोऽस्य निरर्थकमिदं वर्णरूपमेकोऽजिति कल्पनया व्यवह्रियते । धातिशब्दो
हि क्रियावचनस्य संज्ञेति तोनार्थवानसावच्यते । अजिति त्वनपेक्षितार्थसम्बन्ध-
वर्णविशेषात्मकं रूपमभिधत्ते ।
तथा च कल्पते व्यपदेशः, एकोऽज् यस्य सोऽयमेकाजिति । प्रथमत्वम-
प्यसत्यप्रथमेऽपेक्षणीयेऽपूर्वत्वात् समारोपितं यथा प्रथमगर्भेण हतेति
निर्णीतम् ।। 19 ।।
तदेवं यथा बुद्धिप्रकल्पितभेदाश्रयेणात्र व्यपदेशसमर्थनम्, तथा सामानाधि-

करण्यमपि बौद्धभेदाश्रयमिति प्रकृतं निगमयति--
द्रव्यात्मानस्त्रयस्तस्माद् बद्धौ नाना व्यवस्थिताः ।
आश्रयाश्रयिधर्मेणत्ययं पूर्वेभ्य आगमः ।। 20 ।।
जातिगुणाच्छुरितमाधेयं द्रव्यद्वयम्, तदाधारभूतं तु तृतीयं गुणजाति-
विशिष्टबुद्धिभेदाद् भिन्नमिति विभक्तमात्मग्रहणं सर्वत्र निरंशवस्तुवाचकमित्यु-
पाधिभेदेनापि प्रतीतौ निरंशवस्तुविश्रान्तिः सूचिता, यथा सामानाधिकरण्यं वाक्येऽपिसिध्यति । तथा च तत्र पुंवद्भावोपपत्तिः ।
एष च वृद्धानामाम्नाय आदरणीयः,
न स्वमनीषिकाचर्चितः ।
तदेवम् `समानाधिकरणेषूपसङ्खयानमसमर्थत्वाद् द्रव्यं पदार्थ इति चेत्'
इति द्रव्यपदार्थपक्षे वारपुरुषशब्दाभ्यां द्वाभ्यामप्येकस्य द्रव्यस्य प्रति-
पादनाद् भिन्नाभिधेयाभावे भेदाधिष्ठानस्य संसर्गस्याभावात् समासाभावो
यश्चोदितः, स द्रव्येऽपि पदार्थे प्रतीयमानवीरत्वादिगुणभेदकृतं द्रव्यस्य
भेदमाश्रित्य समर्थितः । जातावपिहि पदार्थे प्रतीयमानैकद्रव्याश्रयं सामानाधि-
करण्यं वीरत्वपुरुषत्वयोराश्रयणीयम्, अन्यथानुपपत्तेः ।
एवमर्थयोः सामानादिकरण्यमधिकरणान्तरविभजनात् समर्थितम् । अत एव
विशेषणविशेष्यभावोऽपि सिद्धः । यो हि यमभेदेनोपश्लिष्यति स स्वरूपेण नियोगतः
तदुपरञ्जयतीति दृष्टम् ।। 20 ।।
तदित्थमर्थयोः सामानाधिकरण्यनुपपाद्य शब्दयोरप्युपपादयितुमाह--
सामानाधिकरण्यं च शब्दयोः कैश्चिदिष्यते ।
विशेषणविशेष्यत्वं संज्ञासंज्ञित्वमेव वा ।। 21 ।।
कृष्णतिलशब्दयोर्भिन्ननिमित्तप्रयुक्तयोरेकस्मिन् जातिगुणाविशिष्टे द्रव्ये
प्रवर्तमानयोः समानाभिधेयत्वं समानाधिकरण्यमुच्यते । एवं विशेषणविशेष्य-
भावोऽपि तयोरेव । कृष्णशब्दो हि तिलशब्दं स्वार्थविशिष्टेऽर्थऽवस्थापयति ।
तिलशब्दोऽप्यन्यविशेषप्रतिपादनादपावर्तमानोऽवच्छेद्यः । संज्ञासंज्ञिभावोऽपि

प्रत्यस्तयोस्तयोरेव ।
तथाहि--प्रदेशस्थो वृद्धिशब्दः संज्ञासंज्ञिवाक्यस्थेन वृद्धिशब्देन
प्रत्यायितः स्वरूपोपधानेन संज्ञिनं प्रतिपादयति `अदैच्' इत्यादैच्छब्दो-
पहितरूपम् । अतश्च स्वरूपोपधानेन प्रत्यायनात् सोऽयमित्यभिसम्बन्धात्
सामानाधिकरण्यमेकविभक्तित्वं च विशेषणविशेष्ययोः संज्ञासंज्ञिनोश्च
वृद्धिवाक्ये वर्णितम् । तदिह निदर्शनत्वमन्तर्भाव्य निर्दिष्टम् ।। 21 ।।
प्रकारान्तरेणार्थयोः सामानाधिकरण्यमाह--
केषाञ्चिज्जातिगुणयोरेकार्थसमवेतयोः ।

वृत्तिः कृष्णतिलेष्विष्टा शब्दे द्रव्याभिधायिनि ।। 22 ।।
कृष्णातिलेषु प्रतिपाद्येषु वृत्तिरेकार्थीभाव इष्टः । तथाहि--सति विशेषण-
विशेष्यभावे सा भवति । अस्ति चात्र सा, जातिगुणयोरेकत्राश्रये वृत्तेः । यदेव
द्रव्यं जातिनिष्ठं तिलशब्देन साकाङ्क्षमवगमितम्, तदेव कृष्णशब्देनावच्छिद्यते ।
अतस्तद्वाच्यो गुणो विशेषणम् । गुणनिमित्तो हि कृष्णशब्दो द्रव्य इति तस्य
तात्पर्यार्थो गुणः, द्रव्यस्य तिलशब्दोनाप्याक्षेपात् । शब्दे द्रव्याभिधायिनीति
सामानाधिकरण्यार्थमाह--
कृष्णशब्देन हि गुणमात्राभिधाने तिलस्य कृष्णः इति वैयाधिकरण्यं स्यात् ।
तथा च वृत्तिर्न भवेत्, षष्ठीसमासस्यापि गुणेन नेति निषेधात् ।
एवं तिलशब्देन जातिमात्राभिधान इति जातिविशिष्टद्रव्याभिधानमत्रापि पक्षे ।
गुणप्रधानभावकृतमस्तु पक्षभेदः । तथा च प्राधान्येन वाच्यस्य द्रव्यस्य
वस्तुतोऽधिकरणान्तराभावाद् द्रव्यपदार्थपक्षे पूर्वं बौद्धभेदाश्रयेण समर्थितम् ।
इदं तु जातिपदार्थपक्षे कथ्यते । न च जातिगुणौ निराश्रयावत्र
तिलकृष्णशब्दाभ्यां प्रत्याय्यौ, येन तयोरेकाधिकरणत्वं सामानाधिकरण्यं न
स्यात् । नापि तयोः स्वतो विशेष्यत्वम्, द्रव्याच्छेदे प्रवृत्तयोरन्योन्यसमन्वया-
भावात् ।
तस्माद् द्रव्यद्वारेणैवात्र विशेषणविशेष्यभावो विवक्षितः । तिलशब्देन जाति-
निष्ठस्य द्रव्यस्याभिधानात् कृष्णशब्दः प्रवृत्तिनिमित्तद्वारेण तत्र विशेषण-
मित्येव युक्तम् ।। 22 ।।
यत्र तु द्रव्याभिधानं नास्ति, केवलगुणाभिधानम्, तत्र नान्तरीयकद्रव्या-

क्षेपेऽपि विशेषणविशेष्यभावाभावात् समानाधिकरणसमासाभाव इत्याह--
संस्तु रूपरसादीनामाश्रयो नाभिधीयते ।
द्रव्याभिधानेन विना ततस्ते द्वन्द्वभाविनः ।। 23 ।।
रूपरसादिशब्दाः स्वभावात एव द्रव्यान्निष्कृष्टरूपं स्वार्थमाचक्षते ।
निराश्रयस्य तु गुणस्याभावात् सामर्थ्याक्षिप्तमत्र द्रव्यम् । तथा चाभिधाद्वारेण
द्रव्यस्याविषयीकरणाद् रूपरसयोः परस्परमसम्बन्धाद् विशेषणविशेष्यभावभाव इति

समानाधिकरणसमासो न भवत्यत्र । अपि तु द्वन्द्वं भावयन्ते प्राप्नुवन्ति, द्वन्द्वो

वा भावी एषामिति । द्वन्द्वपदवाच्या रूपरसादयः । ते वा रूपरसादिशब्दा
द्वन्द्वभाजः । तदेवं सामाधिकरण्यं विशेषणविशेष्यभावश्चेत्युभयं विचारितम् ।। 23 ।। इदं तु वक्तव्यम्--
कृष्णतिलशब्दयोर्द्वन्द्वयोरपि द्रव्यशब्दत्वाद् गुणजाति-
निमित्ताश्रयेण द्रव्ये प्रवृत्तेः समवायतिरोहितभेदत्वस्य समानत्वेन द्रव्यव्यवधिनाक्रियायोगस्य तुल्यत्वाद् विशेषणविशेष्यत्वानियम इत्युपसर्जनाप्रसिद्धौ चोदितायां
द्रव्यं प्रधानमिति परिहृतं भाष्ये । तत् कथं जातिनिमित्तस्यैव द्रव्यशब्दत्वात्
प्राधान्यम्, न गुणनिमित्तस्यापीत्याह--
द्रव्याभिधायी कृष्णादिराकाङ्क्षावान् प्रवर्तते ।
निमित्तानुविधायित्वात् तत् तिलादौ न विद्यते ।। 24 ।।

इह गुणगुणिनोरभेदोपचारात् कृष्णशब्दो द्रव्यशब्दो द्रव्यमभिद्यते । क्रियया गुणो न साक्षात्सम्बन्धमुपैति, अपि तु द्रव्यद्वारेण द्रव्यस्यैव शक्त्यधिकरणत्वादिति
द्रव्याकाङ्क्षो गुणः क्रियायां प्रवर्तते । द्रव्येण च नित्यमपि योगाभावात् ततो
भिन्नः स्वयमनर्ह एव सम्बन्धे ।
तथाहि--कदाचिद् द्रव्यान्निकृष्यापि गुणो व्यवह्रियते । उपजनापायौ हि गुणस्य
द्रव्ये । अत एव मतुप् षष्ठी च भवति । `अव्यतिरेकात् सिद्धिमिति चेद् दृष्टो
व्यतिरेकः' इति चोक्तम् । जातिस्तूत्पत्तिप्रभृत्याविनाशाद् द्रव्येणाव्यभिचरित-
सम्बन्धा, अरूपकत्वात् । अतश्च निमित्तं जातिमुत्पत्तिकाल एव प्राप्तसम्बन्धा-
मलक्षितविवेकामनुवर्तते, योऽभिधेयमुखेन तिलादिशब्दः, तत्र तत्साकाङ्क्ष-
प्रवृत्तित्वं नास्ति ।
यथा हि गुणो द्रव्याकाङ्क्षो भवन् क्रियया द्रव्यव्यवधिना समन्वयमेति, नैवं

जातिः, तद्रहितस्य द्रव्यस्याभावात् । आत्मकल्पैव हि सा तस्येति साक्षादेव
जातिमद् द्रव्यं क्रियायोगि । अतश्च जातिमद् द्रव्यं विशेष्यं प्रधानमुक्तम्, गुणो
विशेषणमिति तदभिधायिनोरपि शब्दयोः परस्परावच्छेदकत्वेऽपि नियतो
विशेषणविशेष्यभाव इत्यर्थः ।। 24 ।।
तदेतदाह--
एवं जातिमति द्रव्ये प्रत्यासन्ने क्रियां प्रति ।
गुणधर्म गुणाविष्ट द्रव्यं भेदाय कल्पते ।। 25 ।।
एवमिति । यथेदितान्निमित्तानुविधानात् तिलशब्देन जात्याच्छुरितस्य द्रव्यस्य
प्रतिपादनात् तस्यैव साक्षात् क्रियायोगः । कृष्णशब्देन तु गुणाच्छुरितं द्रव्यं न
जात्याविष्टमिव, अपि तु गुणस्येव स्वभावो यस्य तद् व्यवहितक्रियासम्बन्धं गुणभूत-
मुच्यत इति तद्विशेषणं विशेष्यावच्छेदादत्रेत्यर्थः । `नीलोत्पलं पश्यति, स्वादु
फलमास्वादयति, सुरभि कुसुममाजिघ्रति, समुदायार्थस्य द्रवयस्यैव विशेषणविशिष्टस्य

क्षुत्यावेदितकर्मभावस्य क्रियासमन्वयावगमात् । `उत्पलस्य रूपं पश्यति' त्यादावपि वास्तवेन रूपेण गुमस्य द्रव्यद्वारेणैव क्रियायोगः संयुक्तसमवायात् । श्रौतेन तु रूपेम रूपादिभिरिदं तदिति सर्वनाम(प्र,योगयोग्यस्य द्रव्यस्यैव प्रतिपादनम् । एवं `पटस्य रूपं जायते' इत्यादावपि शाब्देन रूपेण द्रव्यमेव क्रियायोगीति गुणस्य द्रव्यव्यवधानेन क्रियासमन्वये नास्ति व्यभिचारः । एवं द्रव्याभिधायित्वेऽपि कृष्णादेर्गुणशब्दस्य विशेषणत्वमुपपादितम् ।। 25 ।।

सम्प्रति तदभावेऽपि तत् प्रतिपादयितुमाह--

गुणमात्राभिधायित्वं केचिदिच्छन्ति वृत्तिषु ।
अताश्वादिषु सम्बन्धाद् रूढीनामिव रूढिभिः ।। 26 ।।

वाक्ये कृष्णशब्दो गुणावच्छिन्नद्रव्यवचनः । वृत्तौ तु तिक्तशब्देनैव द्रव्यस्याभिधानाद् गुणमात्रं तद्विशेषणभूतमाहेति युक्तम् । गुणविशिष्यस्य द्रव्यस्य प्रतीतेर्गुणो विशेषको व्यवस्थाप्यते । यथा `राजपुरुषः' इत्यत्र षष्ठयभावेऽपि राजार्थः ।

दृष्टं च द्रव्यशब्दस्यापि वृत्तौ गुणमात्राभिधायित्वम् , यथा `अजाश्वो देवदत्तः' इत्यत्राजश्वशब्दयौ रूढया नियतजातीयद्रव्याभिधायित्वे विरोधात् सम्बन्धो न स्यादित्यविद्यमानजन्मानोऽश्वा यस्येत्यजन्मलक्षणधर्ममात्रवचनत्वेऽजशब्दस्य सम्बन्धोपपत्तिः । एवमिहापि भिन्नयोः कृष्णतिलद्रव्ययोः सम्बन्धाभावाज्जातिशब्देनैव द्रव्यास्याख्यानात् तस्यैव पुनरभिधाने प्रयोजनाभावाद् गुणमात्रवचनः कृष्णशब्दः सामर्थ्याद् वृत्तौ व्यवतिष्ठते ।

एकार्थीभावकृतश्चायं वृत्तौ विशेष इति वृत्तिष्वित्याह । तथा च व्यातिरेकविभक्त्यभावेऽप्यव्यतिरिच्यमानशरीर एव गुणो द्रव्यमत्रविशिनष्टि, यथा `राजपुरुषः' इत्यत्र पुरुषार्थैकीभावमपन्नो राजार्थः पुरुषम् ।

मीमांसकास्तु--राजशब्दो वत्तौ लक्षणया पुरुषार्थमभिदधातीत्याहुः, तच्चायक्तम्; मुख्यस्यैव राजार्थस्यैकार्थीभावाद् विशेषकत्वेन पुरुषार्थोपादानोपपत्तौ लक्षणाया अभावात् । मुख्यसम्भवे हि साभ्युपगमनीया । लक्षणायां च `राजानं पुरुषमुपास्ते' इत्यत्र वाक्येऽपि राजशब्दः पुरुषं लक्षयेत् । स्वस्वामिसम्बन्धश्च नियोगतो न प्रतीयेत । लक्षणायाः सामीप्यादिनिमित्ताया अपि भावात्, पुरुषशब्देनैव च पुरुषार्थस्य प्रतितत्वान्न लक्षणा ।

काष्र्णोत्तरासङ्गमाकर्षतीति च श्रुत्यर्थसम्भवे कथं लक्षणा ?

न चेदं नोपसर्जनमिति शक्यते वक्तुम्, पूर्वपदप्रकृतिस्वरावधारणाद् बहुर्वीहित्वावसायात् ।। 26 ।।

प्रकारान्तरेणापि गुणवचनस्य कृष्णादेर्विशेषणत्वे नियममाह--

तिले पूर्वमुपात्ते वा तत्रैव मतुविष्यते ।
स च धर्मः समासेषु गुणस्तस्माद् विशेषणम् ।। 27 ।।

तिलजात्यवच्छिन्ने थ्थममुपात्ते विशेष्ये सामान्यस्वभावेनावसिते विशिष्टगुणतयावसायार्थं कृष्णशब्दः प्रवर्तमानो गुणवचनो मतुब्लोपात् तत्रैव वर्तते । अत्र

हि कृष्णोऽस्यास्तीति मतुप् तिलद्रव्य एव हि सम्बन्धिनि सामार्थ्याद् गुणशब्दात्
कृतः । तस्य "गुणवचनेभ्यो लुक्" (वा.5/2/94) इति लुक् सामर्थ्यलभ्यो नोक्तः ।
स च सम्बन्धाख्यो धर्मो मतुपः प्रक्रमात् तदर्थत्वेन प्रत्यासत्तेरवतम्यमानः
समासेष्वन्तर्भवति । अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति
तस्मात् समासविषयात् सम्बन्धाख्याद् धर्माद्धेतोर्गिण एवावच्छेदकः, सम्बन्धे
द्रव्ये स्वरूपसमर्पणात् ।
जातिस्तु न गुणशब्देन पूर्वमुपात्तं द्रव्यमवच्छिनत्ति, गुणापेक्षया जातेरत्या-
सन्नत्वात् पूर्वं तदात्मनैव द्रव्यस्य निरूपणौचित्यात् । गतमेतत् ।। 27 ।।
एवं समानाधिकरणवृत्तिं विचार्य द्वन्द्वैकशेषवृत्तिं विचारयितुमाह--
अनुस्यूतेव भेदाभ्यामेका प्रख्योपजायते ।
यदा सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः ।। 28 ।।
इहकक्रियागुमनिवेशार्थमर्था बुद्धया निरूप्यमाणाः क्रियागुणद्वारेणेतरेतरस्या-
पेक्षया समुदायभावमापद्यमानाः साहभाव्येन वक्तुमभिप्रेता द्वन्द्वैकशेषलक्षणसमासपद-वाच्या भवन्ति । समुदायश्चात्र
नावयवव्यातिरिक्तः, अपि तु त एवावयवाः
संहन्यन्ते । तथा चात्रावयवभेदाभासानुविद्धा प्रतीतिर्नैयमिकी । अवयवाभासाच्च
द्विवचनबहुवचने न विरुध्येते ।
न हि यथा समासान्तरेष्वेक एवान्यावच्छिन्नोऽर्थः प्रधानम्, तथात्र सर्वेषां
पदार्थानां समकक्ष्यत्वादवयवभेदानुगतैकप्रख्यावशाच्चोद्भूतावयवभेदः समुदयो
वृत्तिपदवाच्यः । स चावयवाव्यतिरिक्त इत्यवयवशब्दैरेव व्यपदिश्यते धवखादिर-
पलाशा इति । यस्त्ववयव्यतिरिक्तः स शब्दान्तरेणोच्यते, समुदायो वनं
यूथामित्यादि ।
एकप्रख्यान्यथानिपपत्तेश्चायं समुदायः परस्परापेक्षैः प्रत्येकमेव पदैरुच्यते ।
तत्रावधार्यमाणेन समुदायेन भेदरूपस्य तिरोधानादिवशब्दः । एकसमुदायाभिधा-
यित्वेऽपि च द्वन्द्वस्य पटवीमृद्व्याविति समानाधिकरणलक्षणः पुंवद्भावो न भवति,
वाक्ये व्यभिचारसम्भवात् तद्गतस्य समानाधिकरणत्वस्याश्रयणात् । वृत्तौ त्वेका-
र्थीभावात् तदव्यभिचारः । पट्वी च मृद्वी चेति तु वाक्ये भेदप्रतीतिप्राधान्यम् ।
अत एव भेदाधिष्ठानेन समुच्चयेन योग इति समानाभिधेयत्वाभावः ।। 28 ।।
भेदानुवेधस्य सहविवक्षायामविशेषात् समाहारेतरेतरयोः को भेद इत्यत आह--
इतरेतरयोगस्तु भिन्नसङ्घाभिधायिनाम् ।
प्रत्येकं च समृहोऽसौ समूहिषु समाप्यते ।। 29 ।।
सहविवक्षायामनेकानुस्यूदैकप्रख्यारूपायां द्वैतमवयवप्राधान्यं च । तत्रावयव-
प्राधान्यमितरेतरयोगस्य विषयः ।
तथाहि--भिन्नमुद्भूतमेदं सङ्घं समूहं येऽभिदधति, तेषामयं वाच्यो द्वन्द्वपदानां
प्रतिभागं ह्यसौ समूहः पर्यवस्यति । तत एकैकस्यापि वाच्यः । प्रत्यवयवपरि-
समाप्तो हि समुदाय एकावयवदृष्टावपि गृह्यते । एवमेकावयववाचकेनाप्यभिधीयते ।
यथा च भूयोऽवयवदृष्टौ स्फुटमवधार्यते, तथा समुदायादपि स्पष्टार्थाभिधायिनः स्फुटा प्रतीतिः । तथा च प्रत्यवयवं

प्रतिपत्तावपि न शब्दान्तरवैयर्थ्यम् । सङ्घप्राधान्येतु समाहार इत्यर्थादुक्तम् ।
इत्थमनुस्यूतभेदत्वे समानेऽपि अयं विशेषस्तु शब्दद्योत्योऽवयवप्राधान्यलक्षणः ।अयमेव चैकशेषस्यापि द्वन्द्वापवादस्य विषयः ।। 29 ।।

उद्भूतावयवभेदः समुदायः प्रत्यवयवसमाप्तोऽभिधीयत इत्यत्र सदृशं
निदर्शनमाह--

व्यापारसमुदायस्य यथाधिश्रयणादिषु ।
प्रत्येकं जातिवद् वृत्तिस्तथा द्वन्द्वपदेष्वपि ।। 30 ।।

क्रमिकस्य पूर्वापरीभूतस्य क्रियाकलापस्य पच्यादेर्यथास्वमधिश्रयणादि-
व्यापाररुपे भावे जातेरिवाध्यासाद् वृत्तेः स एको दृश्यमानो वर्तमानः क्रियावयवः
पचतीति वर्तमानकालाभिधायिप्रत्ययान्तपदवाच्यो यथा समर्थितः प्राक्, एवं
द्वन्द्वपदवाच्योऽपि समुदायः प्रत्यवयववृत्तिरिति प्रतिपदमाभिधेयकमापद्यते ।
द्वन्द्वपदार्थेष्वेकैकस्यान्यापेक्षाप्रतीतिरवयवान्तकश्रवणे परिसमाप्यते ।
इयमेव चात्रावयवानुविद्धसमुदायप्रतीतिः । जातिरपि प्रतिव्यक्ति परिसमाप्ते-
त्येकैकव्यक्त्यभिधायिनापि गवादिशब्देन प्रत्याय्यते । प्रथमव्यक्तिदर्शने
स्पष्टावभासा व्यक्त्यन्तरग्रहणे स्फुटीभवति । एवमन्योन्यापेक्षिणामधिश्रय-
णादीनां पचिप्रत्ययः स्फुटः ।। 30 ।।

स्यादेतत् । तादर्थ्यादधिश्रयणादिरपि पचिरिति यत्तं तत्राभिधानं जातावपि
जातिशब्देन । इह पुनर्धवखदिरादिशब्दः पृथगर्थतया वाक्येषु ज्ञातः कथमेकर्था-
भिधायी वृत्तौ स्यादित्याशङ्कय दृष्टान्तेन व्युत्पादयति--

शौण्डार्धर्चपुरोडशच्छत्रिणोऽत्र निदर्शनम् ।
ते विष्णुमित्रा इति च भिन्नेषु सहचारिषु ।। 31 ।।

"सप्तमी शौण्डैः" (2/1/40), "अर्धर्चाः पुंसि च " (2/4/31) इत्यत्र गणपठितदूर्ता-दिशब्दभेदाश्रयं बहुवचनम् ।
तच्चैवमुपपद्यते, यदि धूर्तादयोऽपि शौण्डादिशब्द-
वाच्याः, कथं च ते तथा भवन्ति, यदि साहचर्यादध्यारेपितशोण्डादिभावाः ?
एवं पुरोडासा इति बहुवचनान्यथानुपपत्तेः सहचरिता अपि करम्भपरिवापधानापयस्या
अभिधीयन्ते । तथा `छत्रिणो यान्ति, ध्वजिनो यान्ति, ते विष्णुमित्राः' इति साह-
चर्यादध्यारोपितान्यथारूपास्तच्छब्दवाच्या दृष्टाः ।
एवं द्वन्द्वैकशेषयोर्द्विवचनबहुवचनान्यथानुपपत्त्या प्रतिपदमनेकार्थत्वमवस्था-
प्यते, एकक्रियागुणविषयत्वेन साहचर्यात् परस्पररूपापत्तेः ।। 31 ।।

तदाह--

अर्थान्तराभिदायित्वं तथार्थान्तरवर्त्तिनाम् ।
याभ्यां चैकमनेकार्थं ताभ्यामेवापरं पदम् ।। 32 ।।

यथा शौण्डादिषु साहचर्यादर्थान्तराभिधानम्, तथात्रेति दार्ष्टान्तिके योजितम् ।
सहचरितयोरेव परस्पररूपाध्यासेनाभिधानेऽन्यस्यासहचरितस्याभिधानाभावादुपात्ता-
भ्यामेव `धवखदिरौ' इत्यत्र प्रत्येतमनेकार्थता । तथा च बहुवचनाभाव इत्याशयः ।
क्रिया चार्थान्तरेऽध्यासहेतुरत्रोक्ता, यदि प्रक्षरतीति प्लक्षोः न्यग्रोधे-

ऽप्येतत् तुल्यमिति । तदेवं वार्तिककारोक्ता, युगपदधिकरणता व्याख्याता ।
स हि `चार्थे द्वन्द्ववचने असमासेऽपि चार्थसम्प्रत्ययादनिष्टप्रसङ्गः' इति
चोदयित्वा `सिद्धं तु युगपदधिकरणे द्वन्द्ववचनाद्' इति न्यासान्तरं पपाठ ।
युगपदेकेन शब्देन यदाधिकरणमभिधेयं द्वन्द्वपदवाच्यमभिधीयते, समुदायरूपं
परस्परारोपितस्वार्थम्, तदा द्वन्द्वो वक्तव्य इत्यर्थः । एवं सहविवक्षायां
द्वन्द्व इत्युक्तं भवति । तत्रैव युगपदधिकरणवचनतायाः समर्थितत्वात् ।
ननु चाभिधानक्रमादभिधेयक्रमोऽवश्यम्भावीति कथं हि युगपदधिकरणवचनता ?
नैतत्, प्लक्षन्यग्रोधौ, धवखदिरपलाशा इत्यत्र यदि न्यग्रोधार्थप्रतिपत्तिकाले
प्लक्षार्थस्य नावगतिः, पलाशार्थप्रतिपत्तिकाले च यदि धवाद्यर्थस्य नावगतिः, तदा
न्यग्रोधपलशशब्दयोरेकार्थत्वादेकवचनमेव स्याद्, न द्विवचनबहुवचने, अतो द्विवचन
बहुवचनान्यधानुपपत्त्यात्रैकैकोऽपि शब्दोऽनेकार्थाभिधायीत्यनुमानाद् युगपद्-
वाचिता निश्चीयते ।
तदुक्तम्--`शब्दपौर्वापर्यादर्थपौर्वापर्याभिधानमिति चेद्, द्विवचनबहुवचनानु-
पपत्तिरित्युद्भूतावयवभेदश्च समुदाय इति समुदायाश्रयमेकवचनं न चोदनीयम् ।
साहचर्यं चार्थान्तराभिधाने हेतुर्लोकप्रसिद्धयार्थान्तरत्वात् कथ्यते । प्रक्षरणं तु विस्तारेणावस्थानंन्यग्रोधेऽप्यस्तीति तस्यासौ
स्वार्थ एव । तदुक्तम् `करणाद्
द्रव्ये शब्दनिवोश इति चेत्, तुल्यकारणत्वात् सिद्धम्' इति ।
न चैवमतिप्रसङ्गः, वाक्येऽपि न्यग्रोधशब्देन प्लक्षार्थस्य प्रतिपादनप्रसङ्-
गाद् । `यतस्तद्विषयं च' इत्युक्तम् ।
वृत्तिविषये शब्दानां शक्तिवैचित्र्यादर्थान्तराभिधानम्, न तु सर्वत्रेत्यर्थः।अत एव तत्र साहचर्यादेतदितीतरस्याप्रयोगे तदभाव उक्तः
। एकेनोक्तत्वादपरस्य
प्रयोगोऽनुपपन्न इति चेद्, अनुक्तत्वात् प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोग इति। एवं चेतरेतरसंनिधाने भारोद्यन्तृवत्
परस्परशक्त्यविर्भावनाद् नियतविषयमेव
परस्पराभिधानं शब्दानामित्युक्तम् । अभिधानं पुनः स्वाभाविकमिति । तदेवं
समर्थिता युगपदधिकरणवचनता ।
भाष्यकारेण तु `दुःखा, दुरुपपाद चेयम्' (म.भा.2/2/29)इत्यक्त्वा
पाणिनीय एव सूत्रान्यासः समर्थितः किल । नेयं प्रतीतावुपारोहतीति दुःखा,
प्रमाणाभावाच्च दुरुपपादा ।। 32 ।।
तद् व्याचष्टे--
समुदायान्तरत्वाच्च तादृशोऽर्थ न लौकिकः ।
अन्वयव्यतिरेकाभ्यां शास्त्रार्थोऽपि न दृश्यते ।। 33 ।।
इह लोकाच्छब्दार्थवसायः । न चात्र स्थितलक्षणोऽलोकिकौ व्यवहारोपयोगी
प्रत्येकं पदवाच्योऽर्थो नैकोऽवधार्यते । न हि शब्दान्तरस्य शब्दान्तरार्थाभिधानंलोके दृश्यते । रूढत्वाच्च लौकिकस्यार्थस्य
प्रक्षणमात्रान्नयग्रोधः प्लक्षो
नोच्यते । न हि गमनाद् गौरिति पुरुषोऽपि गच्छन् गौरित्याभिधीयते । तस्माद्
द्वन्द्वलक्षणेन समुदायेनायमन्य एवावयववाच्यात् समुदायादभिधीयमानः समुदायो

विज्ञेयोऽलौकिकः ।
अथ प्रकृतिप्रत्ययार्थवदापोद्धारिकोऽयमन्वयव्यतिरेकलभ्यः शास्त्रीयोऽत्र
प्रत्येकं द्वन्द्वपदवाच्योऽर्थः । तदपि न; यस्मादन्वयव्यतिरेकाभ्यामत्र स्वार्थ
एव प्रसिद्धः प्रत्येकं पदानामवधार्यते, न त्वार्थान्तराभिधानशक्तिरवधारयितुं
पार्यते । प्लक्षशब्दसन्निधाने हि न्यग्रोधस्य प्लक्षोऽप्यर्थ इत्युच्यते,
प्रतीतेः । सा च प्रतीतिस्तस्य स्वशब्दादेव सिद्धेति न स्तोऽन्वयव्यतिरेकौ ।
काममेकशेषे शब्दान्तरस्याप्रयोगाद् भारोद्यन्तृन्यायेन परस्परं शक्त्याविर्भावना-
देकस्यानेकार्थप्रत्यायनशक्तत्वमनेन न्यायेन व्युत्पाद्यते स्ववाचकस्यैवानुपहत-
शक्तेस्तु द्वन्द्वेसम्भवात् कुतोऽप्रतीता शब्दान्तरस्य तत्र शक्तिः कल्प्यते ?
उद्भूतावयवभेदस्य तु समुदायस्य समासवाच्यत्वाद् द्विवचनबहुवचनोपपत्तिः ।
समासाद्धि द्विवचनबहुवचने जायते । नोत्तरपदमात्राद्, येन तदर्थस्य द्वित्वादि-
योगसमर्थेन प्रयस्येत । एकक्रियागुणनिवेशापेक्षया चानेकोऽर्थः प्रख्ययैकया
विषयीक्रियमाणोऽशक्योऽभिधातुमेकेन शब्देनेति पदसमूहाख्येन समासेना-
भिधीयते । स च समासशब्दोऽन्वाख्येयो निरंशोऽपि भागकल्पनेन व्युत्पाद्यते ।
ते च भागाः पृथक् पदान्तरसदृशा इति तदर्था एवानुगम्यन्ते ।
तथा च प्रविभागेनानुशासने साकाङ्क्षमपि पदं स्वार्थ एव पर्यवस्यति ।
अपेक्षामात्रप्रभावितश्चायं समुदायः क्रमवतामर्थानामात्मभूतः । स कथं पदार्थमात्र
प्रतीतौ प्रतिभासेत, येनोत्तरपदार्थप्रतीतावेव वचनं शक्येत ? सङ्कलनाप्रत्यय-
विषयत्वात् समुदायस्य भूयोऽवयवावधारणकालेऽवधारणात् ।
न च विशेषणविशेष्यभावायोगाद् द्वन्द्वपदार्था न संहन्यन्त इति शङ्कनीयम्,
सर्वस्य नामपदार्थस्य क्रिययैव संसर्गः, कस्यचित् तु साक्षात्क्रियया सम्बन्धः,
अन्यस्य तु तद्विशेषणत्वेनेत्येतावान् समासान्तरेषु भेदः ।
द्वन्द्वे तु समुदायविभक्त्या समुदायार्थस्य क्रियासम्बन्धद्योतनादवयवार्थाः
क्रियार्थिनः समुदायात्मतामापद्यन्ते । एतच्च परस्यापि मतम् ।
कथमन्यथैकोऽपि द्वयर्थः स्यात् ? द्वयोरेवार्थयोरपेक्षावतोः समुदायत्वात् ।
अत एवान्योन्यापेक्षायाः समुदायादेवार्थानामवगतेश्चरितार्थत्वाच्चशब्दो निवर्तते ।
वाक्ये त्वर्थानां विच्छेतप्रति भासात् समुच्चयद्योतने चशब्दोऽपेक्ष्यते । तस्मात्समुदायादेवान्योन्यापेक्षाप्रभावितद्वित्वादियोगिनो द्विवचनबहुवचनयोरुपपत्तौ न
काचिद् बिप्रतिपत्तिः ।। 33 ।।
यत एवं--
दुःखा दुरुपपादा च तस्माद् भाष्येऽप्युदाहृता ।
युगपद्वाचिता सा तु व्यवहारार्थमाश्रिता ।। 34 ।।
`दुःखयति, न चेतः परितोषयति' इति दुःखा, प्रतीतावनुपारोहात्, प्रयोजनस्य
चान्यथासिद्धेः, अत एव प्रमाणाभावात् परस्य सुखेन प्रतिपादयितुं न पार्यत इति
दुरुपपादा । सङ्कलनाविषयाश्चार्था समासान्तरेऽपि समुदायभावमापद्यन्त इत्यस्ति
सहविवक्षा । एकजातीयविषयाश्चार्था भवन्त्येकशब्दवाच्या एकशेष इति सहविवक्षायामियं
व्याहृता युगपदधिकरणवचनता वदता भाष्यकारेण कृच्छ्रोपपादनाय गर्भीकृता,

ततश्चेयमङ्गीकृतैवेति ।। 34 ।।

तत्सम्भावनाबीजमाह--

समुदायमुपक्रम्य पदं तस्यां प्रयुज्यते ।
विभागेन समाख्याने ततस्तद् द्वयर्थमुच्यते ।। 35 ।।

इह `प्लक्षन्यग्रोधौ, धवखदिरपलाशाः' इत्यादिः समुदायो लोकिकोऽन्वाक्येयः शब्दोऽवयवविभागकल्पनया व्युत्पाद्यते । तत्र च यावानर्थस्तावानेव विभज्यमानस्यावयवस्यावस्थाप्यते ।

अत्र हि विषये यः प्लक्षादिशब्दोऽवयवः, स स्वार्थमात्रे न विश्रान्तः, अपि तु परिसमाप्तार्थवचनः ।

तथा च समुदायोपक्रमे परस्परसंबन्धादन्विताभिदाननयेन प्रत्येकं पदमितरपदार्थानुगतार्थाभिधानादनेकार्थमेव ।

तस्यां युगपद्विवक्षायां समुदायमभिधेयमुद्दिश्य प्रयुज्यत इति, तथैव प्रक्रियायां प्लक्षौ च न्यग्रोधौ चेति द्वयर्थस्यैवापोद्धारवाक्यम् । एवं धरखदिरपलाशा इत्यत्र बह्वर्थस्यापीति बोद्धव्यम् ।

विवक्षोपारूढो ह्यर्थः शब्दानाम् । अत्र चैतावती विवक्षा । परमार्थतस्त्वभिन्न एव समासोऽर्थसमुदायार्थाभिधायीति न वाक्येऽनेकार्थत्वं लौकिकेऽस्ति ।

प्रक्रियावाक्ये त्ववयवधर्मेण समुदायाभिधानात् प्लक्षावयत्वादुद्भूतावयवभेदोऽयं समुदायः प्लक्षौ न्यग्रोधावयवत्वाच्च न्यग्रोधावित्युच्यते । तद् यथा समावयावत्वात् समं चूर्णमिति । वृत्तौ त्वेकार्थीभावाद् भेदस्य विगलनात् तदधिष्ठानसमुच्चयद्योतनचशब्दाप्रयोगात् समुदाये समप्राधान्येनावयवशब्दो वर्तते । अन्यथा समप्राधान्याद् द्वन्द्वपदानां तदर्थस्य साक्षात्क्रियांसंबन्धसंभवादितरेतरोपश्लोषाभावे वाक्य इव विभक्तार्थाभिधायित्वाद् द्विवचनाद्यनुपपत्तिरेव स्यात् । समासान्तरेषु हि प्रधानमुखेनोपसर्जनं क्रियया युज्यत इति तेन संसृज्येत, न तु द्वन्द्वे, सर्वेषां समप्रधानत्वात् ।

तस्मात् तत्रैकेकेन पदेन समुदायार्थाभिधानमवश्यामभ्युपगन्तव्यम्, येन परस्परार्थसमन्वयोपपत्तावुद्भूतभेदस्य समुदायस्याभिधानाद् द्विवचनबहुवचनोपपत्तिः ।

आश्रयतो हि लिङ्गवचनान्यत्र प्रतिपादयिष्यन्ते । वृत्तिवाक्ययोश्च शब्दशक्तिवैचि-त्र्यं सुप्रसिद्धमिति वाक्ये लौकिके दृष्टार्थान्तराभिधानशक्तिरपि शब्दो वृत्तौ तदभिधायी युज्यते । अत एवोक्तम् `तद्विषयम् च' (भा. वा. 2/2/29) इति।

इति सिद्धा युगपदधिकरणवचनता द्वन्द्वैकशेषयोः ।। 35 ।।

एकमेव शब्दशक्तिवैचित्र्यकृतं विशेषं वृत्तिवाक्ययोः प्रतिपादयति--

वीक्येऽपि नियता धर्माः केचिद् वृत्तौ द्वयोस्तथा ।
ते त्वभेदेन सामर्थ्यमात्र एवोपवर्णिताः ।। 36 ।।

वाक्ये व्यपेक्षायां केचिदर्थभेदा नियताः, केचिद् वृत्तावेकार्थीभावे, केचिद् वृत्तिवाक्ययोर्द्वयोः साधारण इति यद्यपि भेदः, तथापि नासाविदन्तया विषयभेदेन शास्त्रे निर्दिष्टः, अपि तु `समर्थः पदविधिः" (पा.2/1/1)इति सामर्थ्यसामान्य

एव निरूपिता भिन्ना धर्माः । अनाश्रितविशेषे सामर्थ्येनिर्दिष्टे सति यथायथं ते
विभक्ताः । सामर्थ्यमात्रमेतन्नियतरूपमुक्तमित्यर्थः ।। 36 ।।
एवं सामान्येनाभिधाय विशेषेण निर्णेतुमाह--
वृत्तौ विशेषवृत्तित्वाद् भेदे सामान्यवाचिता ।
उपमानसमासादौ श्यामादीनमुदाहृता ।। 37 ।।
"उपमानानि सामान्यवचनैः" (पा.2/1/55) इत्यत्र `शस्त्री श्यामा'
इत्युदाहृतम् । तत्र च श्यामासब्दो विशिष्टायां शस्त्र्यामुपमानभूतायां तदुपमितायांवा देवदत्तायां वर्तत इति विशेषवृत्ति त्वात् कथं सामान्यवचन इति चोद्ये
`प्रागभिसंबन्धाद्यः सामान्यवचनः' (म. भा. 2/1/55) इति भाष्ये समर्थितम् ।
आभिमुख्येन स्वभावसंभेदेन यत्र पदार्थाः संबध्यन्ते, असौ समासोऽभिसंबन्धशब्देना-
त्रोक्तः । तस्मात् प्राग्भेदे वाक्ये पृथगर्थत्वात् सामान्यवचनाः श्यामादयः ।
`शस्त्री इव श्यामा' इत्यत्र हि श्यामत्वसामान्यमुपमानोपमेयगतमाश्रित्य
श्यामशब्दः प्रवृत्तः । वृत्तावेकार्थीभावादस्य विशेषावरोधः । एवमन्यत्रापि
बोद्धव्यमुपमितसमासादौ ।। 37 ।।
उदाहरणान्तरमाह--
वृत्तिरन्यपदार्थे या तस्या वाक्येष्वसंभवः ।
चार्थे द्वन्द्वपदानां च भेदे वृत्तिर्न विद्यते ।। 38 ।।
`स्निग्धानि किसलयान्यस्य'इति वाक्ये पदानामन्यपदार्थे `स्निग्धकिसलयो
वनस्पतिः' इति वृत्तिवद् वृत्तिर्नास्ति, अस्येत्यन्यपदार्थस्य स्वशब्देनैव वाक्ये
गमितत्वात् । वृत्तौ तु मत्वर्थस्य संबन्धस्यान्तर्भावात् पदान्येकार्थीभूय
संबन्धिनं प्रतिपादयन्ति । तथा द्वन्द्वपदानां भेदे वाक्ये चार्थे समाहारेतरे-
तरयोगलक्षणे वृत्तिर्नास्तीति तत्र चशब्दो वाचकः प्रयुज्यते । वृत्तौ
त्वकक्रियावशात् समुदितार्थाभिधायीनि पदानीति तत्र समुच्चितप्रधाने चो न
प्रयुज्यते ।। 37 ।।
अन्यदप्याह--
भेदे सति निरादीनां क्रान्ताद्यर्थेष्वसंभवः ।
प्राग्वृत्तेर्जातिवाचित्वं न च गौरखरादिषु ।। 39 ।।
भिद्यन्तेऽस्मिन्नर्था इति भेदो वाक्यं तत्र निरादीनां निष्क्रान्तः कोशाम्ब्याइत्यादौ क्रान्ताद्यर्थवाचित्वं नास्तीति क्रान्तादेः साक्षात् तत्र प्रयोगः ।
वृत्तौ तु निष्कौशाम्बिरित्यादावस्ति क्रान्ताद्यर्थाभिधानम् । वाक्ये हि
निरादीनामसत्त्ववाचिनां क्रियायोगिनि क्रान्तादौ द्रव्ये वृत्तिर्न संभवति । समासे
तु पूर्वपदार्थस्य प्राधान्यादनेकक्रियायोगी द्रव्यभूतस्तदर्थोऽभिधीयते ।
सोऽयमेकार्थीभावकृतो विशेषः । तथा गौरखरः, कृष्णसर्पो, लोहितशालिरित्यादिवृत्ति-
पदात् प्राग्वाक्ये जातिविशेषप्रत्यायनसामर्थ्यं नास्ति ।
न हि `गौरः खरः, कृष्णः सर्पो, लोहितः शालिः' इत्यत्र जातिविशेषप्रतीतिः
पदसमुदायानभिधेयत्वाज्जातेर्वर्णविशेषावच्छिन्नस्यार्थस्य प्रतीतेः । जातिविशेष-

प्रतीतेः । जातिविशेषे तु वर्णविशेषानादरः । ऐकार्थ्यात् तु समासेनैकपदत्वाद्
विशिष्टा जातिरच्यते । तथा च जात्यभिसंबन्धे विवक्षित कर्मधारयान्मत्वर्थीयो
भवति गौरखरवदरण्यं,कृष्णसर्पवान् वल्मीकः, लोहितशालिनाम् ग्राम इति ।
तेनात्र कर्मधारयमत्वर्थीयाभ्यां बहुर्वीहिर्लघुत्वात प्रक्रमस्येत्येतन्नावतरति । लोहितशालिर्ग्राम इत्यिक्ते विशिष्टजातीयशालिसंबन्धे विवक्षितो न गम्यते ।
एवमुदाहरणान्तरेऽपि योज्यम् । तथा च भाष्यम्--`अस्त्यत्र विशेषो जात्यात्र
संबन्धः क्रियते' (म. भा.2/1/55) इति ।। 39 ।।
तदेकस्मिन् वृत्तिवाक्ययोः स्वाभाविके विशेषे संवादकमाचार्यमतमाह--
क्रीडायां जीविकायां च वाक्येनावचनात् तथा ।
न नित्यग्रहणं युक्तं कौटिल्ये यङ्विधौ यथा ।। 40 ।।
वार्तिककारः पपाठ--`उत्तरयोर्विग्रहेण विशेषासम्प्रत्ययान्नित्यग्रहणार्थक्यमि'ति (भा. वा. 3/1/22 ) `नित्यं कौटिल्ये गतौ' (पा. 3-1-23) `लुपसद--'
(पा.3-1-24)इत्यनयोर्योगयोर्वाक्यनिवृत्त्यर्थं नित्यग्रहणं न कार्यम्, वाक्येन
गतिकोटिल्यस्य भावगर्हायाश्चाभिहितत्वात् । कुटिलं क्रानतीति चेतः कोटिल्ये-
नासदाचारस्यापि प्रतीतेः । चङ्क्रम्यत इति तु गतप्रत्यागतोपाधिः क्रियाविशेषः
प्रतीयते ।
एवं गर्हितं लुम्पतीति धात्वर्थगर्हा नियगतो न प्रतीयते । साधनगर्हाया अपि
प्रतिपत्तेः । लोलुप्यत इति तु वृत्तौ भावगर्हाप्रतिपत्तिः ।
अनेनैव न्यायेन `नित्यं क्रीडाजीविकयोः' (पा.2-2-17) इत्यत्र नित्यग्रहणं
प्रत्याख्येयमिति निदर्शनव्याजेन तदप्युदाहृतम् । यदि वा यथा `नित्यं कौटिल्ये--'
(3-1-23)इत्यत्र साक्षान्नित्यग्रहणस्य वार्त्तिके प्रत्याख्यानम्, तथा `नित्यं
क्रीडाजीविकयोः'(पा.2-2-17)इत्यस्येति । साध्यतयोपन्यासः । तदितरस्य
निदर्शनत्वेन, सिद्धस्य च निदर्शनत्वात् । तदेवाचार्यमतं संवादकमुपपद्यते ।
उद्दालपुष्पस्य भञ्जिका, दन्तानां लेखकः' इति वाक्यात् क्रीडाजीविकयोरप्रतिपत्तिः।
क्रीडानङ्गीभूतस्य जीवनानुपायरूपस्याप्यर्थस्य प्रतीतेः ।
एवं क्रियासमभिहारस्यापि चङ्क्रम्यते लोलुप्यते इत्यतोऽप्रतीतेर्नैतेभ्यस्तत्रयङ् भवति । तथाचोक्तं--`क्रियासमभिहारे नैतेभ्यः' इति (भा.वा.3/1/22)।
एतदर्थं केचिन्नित्यग्रहणं व्याचक्षते--`कुटिलायां गतौ नितयं' भावगर्हायां नित्यं, नक्रियासमभिहारे' इति ।
यथा च वाक्याद् विवक्षितार्थानवगमात् प्रत्याख्यातं नित्यग्रहणम्, तथा
क्रियासमभिहारानवगमादेव तत्र प्रत्ययाभावादेतदर्थमपि तद् प्रत्ययाभावादेतदर्थमपि न
नित्यग्रहणम् । वचनानुसारिणां तु प्रात वाक्यनिवृत्त्यर्थमपि तद् भवितुमर्हति । यथा
चैत वृत्तिविषया विशेषाः, तथा संख्याविशेष उपसर्जनविशेषणं च योगो व्यक्तभिधानमिति
वाक्यैकनियता विशेषाः प्रोक्ताः । विशेषणविशेष्यभावादस्तु द्वयोरप्यनु-
सर्तव्याः ।। 40 ।।
एवं वृत्तिवाक्यवैधर्म्ये सति--
निर्धारणादिविषये व्यपेक्षैव यतः स्थिता ।

समासप्रतिषेधानां ततो नास्ति प्रयोजनम् ।। 41 ।।

व्यपेक्षालक्षमसामर्थ्यं वाक्यैकनियतनिर्धारणविषये व्यवस्थितं स्वभावतो नियतमितिगवां कृष्णा सम्पन्नक्षीरतमेति `न निर्धारणे' (पा. 2-2-10) इति समासप्रतिषेधो

नारम्भणीयः । न ह्यत्रैकार्थीभावे समासे कृते गोकृष्णा सम्पन्नक्षीरतमेति निर्धारणं प्रतीयते निर्धारणहेतोर्बाह्यस्यापेक्षणीयस्य भावादसामर्थ्यादत्र समासाभाव इति

तात्पर्यम् । एवं `पूरण-'(पा. 2-2-11) इत्यादिरपि प्रतिषेधोऽशिष्य

इत्यनुसरणीयम् ।। 41 ।।

ज्ञापकत्वात् शास्त्रस्य स्वभावसिद्धमेव शक्तिवैचित्र्यं शब्दानामनुगन्तुं

शास्त्रारम्भ इत्याह--

विधिभिः प्रतिषेधैश्च भेदाभेदनिदर्शनम् ।

कृतं द्वन्द्वैकवद्भावे सङ्घवृत्त्युपदेशवत् ।। 42 ।।

समासविधिना अभेदः संसर्ग एकार्थीभावः स्वभावसिद्धो ज्ञाप्यते, प्रतिषेधेन तु

भेदोऽसंसर्गो व्यपेक्षालक्षणो मन्दमतीन् प्रति । तद् यथा--द्वन्द्वस्य प्राणितू-

र्याङ्गाजौ स्वाभाविकीसङ्घे समाहारे तिरोहितावयवभेदे वृत्तिः,`प्राणितूर्यसेनाङ्गा-नाम्(पा.2/4/2) इत्येकबद्भावशास्त्रेम समाहार एवेति नियमेनान्वाख्यायते ।

दधिपयःप्रभृतीनां तु स्वाभाविकी प्रोद्भूतावयवभेदे इतरेतरयोगे प्रवृत्तिः प्रतिषे-

धेन । विभाषावचनेन वृक्षमृगादीनामुभयत्रेति शास्त्रमनुवादकम् । न ह्यसती

शब्दानां शक्तिर्वचनशतेनापि कर्तुं पार्यते । `न वा समाहारैकत्वात्'-(भा.वा.2/4/1)

इत्येकवद्भावप्रत्याख्यानस्य साक्षादुक्तत्वात् सिद्धत्वे सति निदर्शनत्वनात्रो-

पन्यासः । न्यायस्तु समानः ।। 42 ।।

तदेवं वृत्तिवाक्ययोः `समर्थः पदविधिः' (पा.2-1-1)इत्यत्र सामान्येन यत्

सामर्थ्यं निर्दिष्टम्, तदेव व्यपेक्षैकार्थीभावलक्षणभेदेन शब्दशक्त्यनुसारिभि-

र्विभक्तमित्याह--

सामर्थ्यमविशेषोक्तमपि लोकव्यवस्थया ।

वृत्त्यवृत्त्योः प्रयोगज्ञैर्विभक्तं प्रतिपत्तृभिः ।। 43 ।।

समर्थपदेन सामान्यवाचिना सङ्गतार्थत्वं वृत्तिवाक्यगतमविशिष्टमुक्तम् ।

लक्ष्यज्ञैस्तु लक्ष्यमूलत्वात् स्मृतेः सूत्रकाराशयमनुसृत्या वृत्तावेकार्थीभावो

वाक्ये व्यपेक्षेति विभागः कृतः । तथाच परिभाषापक्षे षत्वादिविधावपि

व्यपेक्षासामर्थ्यसम्भावादस्यैव व्यापारः । नियतविषयत्वाच्च सामर्थ्यभेदस्य

`वा वतनानर्थक्यं च स्वभावसिद्धत्वात्'(भा.बा.2/2/1) इत्युक्तम् ।

एकार्थीभावप्रकृताश्च वृत्तौ क्रान्ताद्यर्थप्रतीत्यादयो विशेषा उक्ताः । वाक्ये

त्वेकार्थीभावाभावकृताः सङ्ख्याविशेषादयः ।। 43 ।।

कथमविशेषोक्तावयं प्रविभागः, विपर्ययोऽप्यत्र कस्मान्न सम्भाव्यत

इत्याशङ्कयाह--

अर्थस्य विनिवृत्तत्वाल्लुगादि न विरुध्यते ।
एकार्थीभाव एवातः समासाख्या विधीयते ।। 44 ।।
इह द्विविधा वृत्तिः, जहस्त्वार्था अजहत्स्वार्था च । जहन्ति
स्वार्थनुपसर्जनपदानि यस्यां सा जहत्स्वार्था, तद्विपरीता अजहत्स्वार्थेति
मतभेदाश्रयो विकल्पः । तत्र जहत्स्वार्थायामसन्नेवोपसर्जनार्थः । अजहत्स्वा-
र्थायामपि प्रधानेन सम्भेदापत्तेः पृथगसन्निति भेदाधिष्ठानस्य सम्बन्धस्य
निवृत्तत्वात् सङ्ख्याविशेषतिरोधानाच्च विभक्तेः स्वाभाविकमर्थाभावाददर्शन-
मन्वाख्यायमानमुपपद्यते । तथाच समास एकार्थीभावे युक्तः ।
व्यपेक्षायां तु भेदस्य संख्याविशेषाणां च संभवाद् विभक्तिश्रवणे वाक्यमव-
तिष्ठते । लुगादीत्यादिग्रहणात् `स्तोकान्मुक्त' इत्यलुक एकवद्भाववचनं
गृह्यते । भेदतिरोधानाद्धि समासेऽभेदैकत्वसंख्याप्रादुर्भावात् स्वाभाविकमेवै-
कार्थाभिधानमनुगम्यते । तथाचोक्तम् । `एकवद्वचनग्रहणमनर्थकम्'
द्विबहुष्वसमास'(भा.वा.6/3/1) इति ।
तदेवमेकार्थीभावे समासविधानस्य लुगाद्यन्वाख्यानं लिङ्गमुक्तम् । तथाच
वाक्यसमासयोर्नियतविषयत्वात् परस्परविषयावरोधासामर्थ्याद् विकल्पशासन-
मनुपपन्नम् ।। 44 ।।
केचित् तु वाचनिकमेव विषयनियममाहुः, तद् दर्शयति--
व्यवस्थितविभाषा च सामान्ये कैश्चिदिष्यते ।
तथा वाक्यं व्यपेक्षायां समासोऽन्यत्र शिष्यते ।। 45 ।।
व्यपेक्षैकार्थीभावयोर्यत् सामान्यं संबन्जमात्रं सामर्थ्यमित्यविशेषेणोक्तम्,
तत्र विभाषया वाक्यसमासावभ्यनुज्ञायते । व्यवस्थितविभषाविज्ञानाच्च
व्यपेक्षायां सामर्थ्यभेदे वाक्यमेव, एकार्थीभावे तु वृत्तिरेवेति शब्दशक्त्यनु-
सारी विषयनियमः सूत्रकाराभिप्रायमनुसरद्भिरुक्तः । वाक्यकारो वावचनं
प्रत्याचख्याविति पूर्वोक्तनयेन व्यवस्थामाह । सूत्रकारस्य तु सामान्ये
व्यवस्थितविभाषा स्थिता ।। 45 ।।
तथाच सामान्यार्थाश्रये समानशब्दत्वेऽप्येकार्थीभावकृतोऽयमपरो विशेष
इत्याह--
तुल्यश्रुतित्वात् तत्त्वेऽपि राजादीनामुपाश्रिते ।
वृत्तौ विशेषणाकाङ्क्षाऽगमकत्वान्निवर्तते ।। 46 ।।
य एव राजादिशब्दा वाक्ये, त एव वृत्ताविति रूपसादृश्यादभेदे
वृत्तिवाक्ययोः समाश्रितेऽपि `ऋद्धस्य राज्ञः पुरुषः' इति वाक्यवद्
`ऋद्धस्य राजपुरुषः' इति वृत्तावपि विशेषणेनोपसर्जनार्थो न युज्यते
गमकत्वाभावात्, प्रधानसंसृष्टेन ह्यस्वन्त्रेण राज्ञा ऋद्धादेरभिसंबन्धा-
योगात् । एकार्थीभावाद्धि संबन्धस्यान्तर्भावे सति कथमुद्भूतव्यतिरेकेण
विशेषणेन योगः स्यादिति `सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न'

इति वक्तवयम् । कृते हि समासे विशेषणयोगो न प्रतीयते उपसर्जनार्थ-
स्येत्यगमकत्वात् प्रत्यायकत्वाभावात् तत्र विशेषणाकाङ्क्षा नास्ति । वाक्ये
त्वस्ति गमकत्वात् ।
अतश्च शब्दशक्तिभेदादर्थभेदे वृत्तिवाक्ययोरत्यन्तमेव भेदः ।
सारूप्यनिमित्तं त्वभेदावसानं भ्रान्तम् । येनापि वृत्तावेकार्थीभावादुपसर्जनार्थ-
स्य विवेकाभावात् सविशेषणयोगो न भवतीत्यादिरत्र युक्तिरुपन्यस्यते तेनाप्येका-
र्थीभावकृताद्विशेषणाद्भेद एव शब्दशक्तिनिमित्तो वृत्तिवाक्ययोरुक्तो नापूर्वः
कश्चित् ।। 46 ।।
तथाच यत्रास्ति गमकत्वं, तत्रैकार्थीभावेऽपि भवति विशेषणयोग इत्याह--
संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते ।
स्वार्थवत् सा व्यपेक्षास्य वृत्तावपि न हीयते ।। 47 ।।
इह केचिच्छब्दाः स्वार्थमितरापेक्षं नान्तरीयकमभिदधानाः संबन्धिशब्दाः कथ्यन्ते ।तद्यथा--गुरुशिष्यपितृपुत्रमातृभ्रात्रादयः ।
अतश्च ते वृत्तावपि स्वार्थमर्थान्त-
रापेक्षायोगिनमेव प्रतिपादयन्तीति गमकत्वात् तत्र सविशेषणानामपि वृत्तिर्भवतीति
`सविशेषणानां वृत्तिर्न' इत्यत्र `अगुरुपुत्रादीनाम्' इत्यापि न वक्तव्यम् ।
देवदत्तस्य गुरुकुलं, देवदत्तस्य गुरुपुत्र इत्यादि ।
अत्र हि प्रातिपदिकमात्रेणापेक्षितं विशेषणं नोद्भूतव्यतिरेकेणेत्येकार्थीभावाद्व्यतिरेकस्यान्तर्भावऽप्युपसर्जनेन संबध्यते ।
गुर्वादेर्हि वाच्यं शिष्याद्यपे-
क्षमित्येकार्थीभावेऽपि तदाकाङ्क्षा न निवर्तते स्वार्थस्य निवृत्त्यभावात् ।।47।। अत्रैव प्रकारान्तरमाह--
समुदायेन संबन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते च युज्यन्ते तद्वता सह ।। 48 ।।
दासीगृहवत् प्रसिद्धमेव गुरुकुलं देवदत्तेन प्रधानं विशेष्यते, न त्वत्रोपसर्ज-
नार्थस्य गुरोर्देवदत्तापेक्षेत्यपि समर्थने किं देवदत्तस्य समीपं गुरुकुलमुतान्य-
थेति सन्देहे अवश्यमिदं वक्तव्यं देवदत्तस्य यो गुरुस्तस्य कुलमित्येवमवयवान्
गुर्वादीन् संबन्धेन स्वीकृत्य ते देवदत्तादयस्तद्वतावयविना समुदायेन संबध्यन्त
इत्यवयवद्वारेणैव समुदायसंबन्धो `द्विमयमुदश्विद् यवानाम्' इत्यादिवत् ।
एवञ्च य एव देवदत्तेन साक्षाद् गुरोर्योगेऽर्थः, स एव संपन्न इति, नास्ति
प्रकारान्तरत्वमित्यत्र तात्पर्यम् ।। 48 ।।
प्रक्रियायां वाक्योपमर्देन वूत्तेरन्वाख्यानात् कथमत्यन्तभेद इत्याशङ्कयाह--
अबुधान् प्रत्युपायाश्च विचित्राः प्रतिपत्तये ।
शब्दान्तरत्वादत्यन्तभेदो वाक्यसमासयोः ।। 49 ।।
इह राजपुरुषादयो विशिष्टार्थवृत्तयः सङ्घाताः परमार्थतो निरंशा एव
परिकल्पितपूर्वोत्तरावयवप्रविभागेन व्युत्पाद्यन्त इति मन्दमतयः श्रुतिसारूप्या-
दुपायोपेययोरैक्यमध्यवस्यन्ति ।
भावतस्तु यथा रेखागवयेन सत्यगवयप्रतिपत्तावन्य एव रेखागवयोऽन्यश्च
सत्यगवयः, तथा धूलिप्रक्षेपगतं प्रक्रियावाक्यमन्यदेव समासात् । प्रयोगसमवायि

किल वाक्यमनेनोपायेन प्रदर्श्यते । तच्च व्यपेक्षैकनियतमेकार्थीभावविषयात्
समासादन्यदेव । अर्थभेदेन शब्दानां भेदात् । संख्याविशेषादिश्चार्थभेदः प्रदर्शितः। क्वचित् समासान्तादेश्चसंभवाद्
रूपभेदोऽप्यस्ति । भेदसंसर्गलक्षणस्य प्रधान-
स्यार्थस्याभेदाद् दूरविप्रकर्षेण वाक्यप्रकृतिर्वृत्तिर्व्युत्पाद्यते । तथा
क्वचिद् वाक्यार्थे पदवचनमित्येवं विचित्रा व्युत्पादनोपायाः प्रक्रियायाम् । तत्र
च वाक्याविभक्तीनां दर्शनात् समासे लुगन्वाख्यानं नलोपादिप्रत्ययलक्षणकार्य-
सिद्धयर्थम् ।। 49 ।।
यद्येवं गोरथादिवृत्तिविषयेऽपि युक्तादीनां वाक्ये दृष्टानां कथं न लोपाख्यान-
मित्यत आह--
असमासे समासे च गोरथादिष्वदर्शनात् ।
युक्तादीनां न शास्त्रेण निवृत्त्यनुगमः कृतः ।। 50 ।।
विभक्तयोऽसमासे वाक्ये दृष्यप्रयोगा इति प्रक्रियायां तदभेदेन वृत्त्यनुशासने
तासां प्रसङ्गाद्युक्तं यदाचार्योऽर्थाभावात् स्वाभाविकीं निवृत्तिं प्रत्ययलक्षणंप्रार्थयमानोऽन्वाचक्षीत । `गोरथः, दधिघटः' इत्यादौ
तु युक्तादयः प्रक्रियावाक्य-
गता न दृश्यन्ते, नापि तल्लोपलभ्यं किञ्चनापि कार्यमिति न तेषां
लुगन्वाख्यानाम् । तथाच दध्ना ओदनो दध्योदनः गवां रथो गोरथ इति द्रव्याणां
क्रियामन्तरेणासामर्थ्यात् समासाभावे चोदिते, "सिद्धं तु समानाधिकरणाधिकारे
क्तस्तृतीयापूर्वपदोत्तरपदलोपश्च"(भा.वा.2/1/35)"षष्ठीसमासश्च युक्तापूर्णान्तः"
(भा.वा.2/1/35)इत्युक्ते दध्ना उपसिक्तो दध्युपसिक्तः, दध्युपासिक्त ओदनो
दध्योदनः, दध्नः पूर्णो दधिपूर्णः, दधिपूर्णो घटः दधिघटः, गवां युक्तो गोयुक्तः
गोयुक्तो रथो गोरथ इत्येवं समासे उत्तरपदलोपस्य वचने चोदिते "न वा
असमासेऽदर्शनाद्""युक्तार्थसम्प्रत्ययाच्च सामर्थ्यम्" "सम्प्रत्ययाच्च तदर्था-
ध्यवसानन्" (भा.वा.2/1/35), इति प्रत्याख्यातं लोपवचनम् । दध्योदनः,
गुडधाना इत्यन्नव्यञ्जनभावावगतेल्तद्धेतुभूतोपसेकमिश्रणक्रियासामर्थ्यात् प्रतीयत
इति तेन दध्ना ओदन इत्याद्येव वाक्यं क्रियते । नास्त्येवोपसिक्तादिरत्र शब्दः ।
एवं गवं रथः, दध्नो घट इत्येव वाक्यम् । सम्बन्धिसामर्थ्यात् तु युक्ताद्य-
र्थप्रतीतिः । तथाहि--गवां रथस्य वाह्यवाहनसम्बन्धो युक्तार्थमन्तर्भावयति । एवं
दधिघटयोराधाराधेयसम्बन्धः पूर्णार्थमिति यथायोगमनुसरणीयम् ।। 50 ।।
ननु च गोयक्तो रथो दध्युपसिक्त ओदनः दधिपूर्णो घट इति वाक्ये दृश्यन्त
एव युक्तादयः, तथा प्रगतपर्णः प्रपतितपर्णः इत्यादौ प्रपर्णादिवृत्तिविषये वाक्ये
गतादिशब्दः श्रूयत इति लोपोऽन्वाख्येय एवोत्यत आह--
शब्दान्तरत्वाद् युक्तादिः क्वचिद् वाक्ये प्रयुज्यते ।
प्रपर्णप्रपलाशादौ गतशब्दश्च वृत्तिषु ।। 51 ।।
इह द्विविधं वाक्यम् । प्रयोगसमवायि लोकिकं नित्यं, प्रक्रियावाक्यं चानित्यम-
लोकिकं समासप्रकृतिरेखागवयस्थानीयम् । तत्र च युक्तादिर्न दृश्यते । लौकिके
दृश्यते । तच्चान्यदेव गोरथादेः समासस्य पर्यायरूपमिति न पर्यायाणां गजो मतङ्गजो

वृषो वृषभ इत्यादीनां गुरुलाघवादरेण लोपान्वाख्यानमुपपद्यते । प्रपर्णादिविषये
वृत्तष्वेकार्थीभावेषु सत्सु क्वचिल्लौकिके वाक्ये प्रगर्तपर्ण इत्यादौ गतशब्दः
प्रयुज्यते शब्दान्तरभूत इति समन्वयः ।। 51 ।।
प्रयोगसमवायिना च लौकिकेन वाक्येन सत्यप्यवान्तरार्थभेदे प्रधानार्थापेक्षया
वृत्तिरभिन्नार्थेत्याह--
विशेषणविशेष्यत्वं कैश्चिदेकस्तथाश्रयः ।
उपाये तत्त्वदर्शित्वादिष्यते वृत्तिवाक्ययोः ।। 52 ।।
निरंशस्य समासस्यान्वाख्यातिमशक्यत्वाल्लौकिकवाक्यसदृशं प्रक्रियावाक्यमुपायः
कल्प्यते । यत्र चान्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययवदर्थापोद्धारः । अबुधास्तु-
पायोपेययोरैक्यमध्यवस्यन्तोऽर्थाभेदमत्रावयन्ति ।
तथाहि--य एव विशेषणविशेष्यभावो निलमुत्पलमित्यत्र वाक्ये, (अ)भेदनिष्टं
च समानाधिकरण्यं तदविलक्षमेव नीलोत्पलमित्यत्र वृत्तौ ।
एवं व्यधिकरणविषयेऽपि राज्ञः पुरुष इत्यादौ विशेषणविशेष्यभावः संसर्गात्मको
राजपुरुष इति वृत्त्या समान इति वृत्तिवाक्ये अभिन्ने च । तथा च `परस्परव्यपेक्षां
सामर्थ्यमेके,(म.भा.2/1/1)इत्येकीयं मतम् । समासेऽप्यत्र व्यपेक्षैव सामर्थ्यं,
वाक्योपमर्देन कार्यशब्ददर्शने समासप्रादुर्भावादर्थभेदायो गात् प्रातिपदिकेनैव च
पञ्चकदर्शनाश्रयेण विभक्त्यर्थाभिधानात् तल्लुगन्वाख्यानम्, न त्वर्थस्याभावात् ।
तथा च तावकीनादौ विशेषणप्रतिपत्तिनिबन्धने सति सङ्ख्याविशेषोऽवधार्यत एव ।
सर्वथा त्वेकार्थीभावाभावेन स्यादत्र प्रतीतिः । उपसर्जनविशेषणायोगस्तु `सविशेष-
णानां वृत्तिर्ने'ति वाचनिकः । द्वन्द्वे चशब्दस्याप्रयोगश्च तदर्थ एव । तस्यानुशा-
सनात्,न तु भेदविगमनात्, तन्निष्ठसमुच्चयाभावादिति कार्यशब्दवादिनो वृत्तिवाक्ययोः
प्रधानार्थाभेदेन पर्याययोः सर्वथैक्यं भ्रान्त्याध्यवस्यन्ति ।
नैकार्थीभावो नाम विशेषकरः कश्चिद्,व्यपेक्षैव, षत्वादिविषयेऽपि सम्भवात्
सर्वत्र सामर्थ्यमिति प्रतिपन्नाः ।
इत्थं च भिन्ननिमित्ताभ्यां शब्दाभ्यामेकस्यैवार्थस्य प्रत्यायनात् सामानाधि-
करण्यमवच्छेद्यावच्छेदकभावश्च भेदाश्रयो वृत्तावपि युज्यत इति न तत्
प्रयत्नसाध्यम् । एषां च मते वा वचनेन विकल्पो भिन्नविषये क्रियत इति
नानर्थकं तत् ।। 52 ।।
एतदपदर्शनं निराकर्तुमाह--
पदं यथैव वृक्षादि विशिष्टेऽर्थे व्यवस्थितम् ।
नीलोत्पलाद्यपि तथा भागाभ्यां वर्तते विना ।। 53 ।।
वर्णानामानर्थक्यस्य वृक्षादौ प्रतिपादितत्वान्निरंशमविभक्तार्थप्रतयायकं
स्फोट स्वभावं पदं स्वशक्त्या नियतार्थं यथा, एवं नीलोत्पलं सदृशभागप्रकल्पनया
प्रकृतिप्रत्यायदिवद् व्युत्पाद्यतेऽदूरविप्रकर्षेण वाक्येन । यथा वृक्षादावसन्नपिप्रकृतिप्रत्ययार्थविभागोऽन्वाख्यानार्थं कल्पितः, तथा
वृत्तावप्यवयवार्थभेदः ।
वाक्ये हि भेदोऽर्थस्येति सम्बन्धविभक्तिः । वृत्तौ त्वविभागेन पांसूदकवदर्थस्या-

भेदापत्त्या सम्बन्धविगलनात् स्वाभाविकी निवृत्तिर्विभक्तेः, सङ्खयाविशेषोऽपि
नास्ति । पञ्चके प्रातिपदिकार्थे द्योतकाभावादप्रतीतेः । पयः पयो जरयतीत्यत्र
क्रियासम्बन्धान्यथानुपपत्त्या शक्तिप्रतीतिः ।
अभेदैकत्वसङ्खया च सर्वसङ्ख्याविशेषसामान्यभूता वृत्तावस्त्युपर्जनार्थस्य
द्रव्यस्य निस्सङ्खयत्वाभावादिति यथायोगं सति विशेषद्योतके तदवगमो न
विरुध्यते । प्रधानार्थसम्भेदादेव च स्वविशेषणेन न यज्यते उपसर्जनार्थः ।
वचनेन तु शब्दानां शक्त्याधानायोगाद् विषयविवेको दुरवसानः ।
द्वन्द्वेऽपि समुच्चितप्राधान्याच्च शब्दनिवृत्तिर्न तु चार्थेऽनुशासनात् ।
नाह्यत्रार्था विधेयतया शब्देषु निर्दिश्यन्ते, आनन्त्येनाशक्यत्वात् ।
तदुक्तम्--`अर्थानादेशानात्, तच्च लध्वर्थमि'ति(मा.भा.3/3/1)।
सिद्धस्य तु लौकिकस्यार्थस्यानुवादः सर्वत्र । परस्परव्यपेक्षा सामर्थ्यमिति
त्वेकीयमतम् । एकार्थीभावः सामर्थ्यं परिभाषा चेत्येत्रं सूत्रमभिन्नतरकं
भवतीति सिद्धान्तव्यवस्थापनात् । तदेवमेकार्थीभावकृतविशेषदर्शनादत्य-
न्तमेव वृत्तिवाक्ययोर्भेदः । केनचिदंशेन तु सादृश्याध्यवसायो भ्रमः ।। 53 ।।
न चापि सर्वत्र वृत्तिवाक्ययोः सादृश्यानुगम इत्याह--
श्रोत्रियक्षेत्रियादीनां न च वासिष्ठगार्ग्यवत् ।
भेदेन प्रत्ययो लोके तुल्यरूपासमन्वयात् ।। 54 ।।
वासिष्ठगार्ग्यादौ तद्धितवृत्तिविषये यथान्वाख्यानाय प्रकृतिप्रत्ययविभागेन
प्रतिपत्तिः, नैत्रं श्रोत्रियक्षेत्रियपारशवादेः । न ह्यत्र प्रकृतिरूपानुगमो
दृश्यते, छन्दःशब्दपरक्षेत्रशब्दस्त्रीशब्दानामननुगमात् । तथाच वाक्यादन्यदेव
वृत्तिपदम् । तथा सर्वत्रैव बोद्धव्यम् । एतदेव हि सामान्यतो दृष्टमत्र
लिङ्गमुपोद्बलकमर्थभोदादेव सिद्धेः ।। 54 ।।
वृत्तिवाक्ययोः शब्दभेदेऽर्थानुगमोऽपि कचिन्नास्तीत्याह--
सप्तपर्णादिवद् भेदो न वृत्तौ विद्यते क्वचित् ।
रूढयरूढिविभागोऽपि क्रियते प्रतिपत्तये ।। 55 ।।
पर्वणि पर्वणि सप्त पर्णान्यस्येत्येत्रं सप्तपर्णशब्दो व्युत्पाद्यते । न च
सर्व एवंविधो वृक्षः, अपि तु कश्चिदेव शीर्णपर्णोऽपि विशिष्टजातीयोऽभिधीयते ।
यद्येत्रं कथं सप्तपर्णादयो रूढिशब्दा इति प्रसिद्धाः न राजपुरुषादय इत्यत
आह--रूढयरूढीति ।
प्रतिपत्तये न्यायसिद्धार्थाभेदसम्प्रत्ययस्थिरीकरणार्थमयं विभागः । प्रतिपादनो-पायः । प्रधानार्थानुगमाद् राजपुरुषादौ तु
वाक्यगतार्थानुगमव्यभिचाराद्
राजपुरुषादौ यौगिकत्वम्, सप्तपर्णादौ तु वाक्यगतार्थानुगमव्यभिचाराद्
रूढित्वमिति विभागेन व्यवहारः । क्रमेण हि परोऽवबोद्ध्यते ।
न चार्थानुगममात्रां विना रूढित्वम्, सप्तपर्णादावपि रूढिविषये क्वचित्
तत्सम्भवात् । तथाहि रूढीनामपि क्वचित् सप्तपर्णादावर्थानुगमोऽस्ति ।
न चैतावता यौगिकत्वम्, अतिप्रसङ्गात् । तदेवमनङ्गीकृतावयवार्था
एव नीलोत्पलादयः समासाः प्रकल्पितावयवभेदेन व्युत्पाद्यमाना भिन्ना एव तत्त्वतो

वाक्येभ्य इत्यत्यन्तभेदो वृत्तिवाक्ययोः सिद्धः ।। 55 ।।
यद्येकार्थीभावकृतो भेदो वृत्तिवाक्ययोः, तदा बहिर्वीहावनेकवर्त्तिपदसम्भवादन्य-
पदार्थे तेषामेकार्थीभावान्यथानुपपत्त्या परस्परसमन्वये समासान्तरमन्तरा कस्मान्न
भवतीत्याह--
या सामान्याश्रया संज्ञा विशेषविषया च या ।
बहुलग्रहणान्नास्ति प्रवृत्तिरुभयोस्तयोः ।। 56 ।।
सुसूक्ष्मजटकेशादौ समासोऽवयवे यदि ।
स्यात्, स्यात् तन्त्रान्तरङ्गत्वात् बाधकोऽवयवस्वरः ।। 57 ।।
अतिशयेन सूक्ष्मा जटरूपाः केशा यस्य सोऽयं सुसूक्ष्मजटकेशः । अत्र सूक्ष्म-
जटशब्दयोः सति सम्बन्धे विशेषणसमासे समासान्तोदात्तत्वं स्यात् । बहुर्वीहिस्वरेण
हि त्रिपदसमासगतं समासान्तोदात्तत्वं बाधितमेकविषयत्वात् । अवयवयोस्तु
बहुव्रीह्यभावादप्रतिषिद्धं समासान्तोदात्तत्वमेव स्यात् ।
नच परत्वाद् बहुर्वीहिस्वरः अन्तरङ्गत्वादवयवस्वरश्च पूर्वशाला प्रिय इतिवत् ।
तस्मादत्रावयवस्वरनिवृत्त्यर्थं विशेषणं विशेष्येणे'--(पा.2-1-57) इति या
कर्मधारयसमाससंज्ञा, या च `सुप् सुपा'(पा.2/1/4)इति योगाविभागात् सामान्येन
समाससंज्ञा, सा बहुलग्रहणान्न प्रवर्तत इति वाच्यम् ।। 56,57 ।।
ननु च प्रकृतयैव महाविभाषयात्रावयवयोः समाससंज्ञा द्विविधापि न प्रवर्तत
इति कस्मान्नोच्यते, किं बहुलग्रहणात् तदभावः कथ्यत इत्याशङ्क्याह--
समुदायस्य वृत्तौ च नैकदेशो विभाष्यते ।
भेद एव विभाषायां नियतो विषयो यतः ।। 58 ।।
व्यवस्थितविभाषाविज्ञानादेकार्थीभावप्रक्रमे विकल्पो नास्ति । तस्य व्यपेक्षैक-
नियतत्वादित्यन्यपदार्थे वृत्तिमनुभवतामवयवानामन्योन्यसंसर्गस्याविनाभावादेकार्थी-
भाव एव न्याय्य इति प्राप्ता समाससंज्ञा बहुलग्रहणेन निवार्यते । यदा हि
वृत्तिस्तदावयवयोर्वृत्तिरेव । तद्यथा `पञ्चगवधनः, वाक्त्वचप्रियः'इत्यन्तरा
तत्पुरुषो द्वन्द्वश्च प्रवर्तत इति तदाश्रयटच्समासान्तसिद्धिः ।
तदेतद् भाष्ये--`द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्'(भा.वा.
2/1/51) इत्येतद्वार्तिककारवचनसमाधानार्थमुक्तम्--`यदा वृत्तिः, सर्वेषां तदा
प्रवृत्तिः'(म.भा.2/1/51)इति ।। 58 ।।
ननु चैकस्मिन् प्रयोगे बहुर्वीहिसंज्ञाया भावोऽवयवे तत्पुरुषसंज्ञायाश्चाभावो
विभाषयानया प्रतिपाद्यताम् । अयमेव ह्यस्या मुख्यो विषय इत्यत्राप्रवृत्ताव-
चरितार्थेयं स्यादित्याशङ्कयाह--
यतश्चाविषयः सोऽस्यास्तस्मान्नास्त्यकृतार्थता ।
अभेदप्रक्रमेऽत्यन्तं भेदानामपसारणात् ।। 59 ।।
एकार्थीभावविषये पृथगर्थताभावाद् विविधभाषणरूपाया व्यपेक्षानियताया
विभाषाया नास्ति प्रवृत्तिरित्यविषयेऽप्रवृत्तावस्याः कथमचरितार्थत्वम् । अन्यन्त-मिति । न केवलं समुदायगतो भेदो
नास्ति, यावदवयवगतोऽपि । प्रधानार्थपर-

वशत्वेन पांसूदकवद् विभागापत्तेरवयवार्थानाम् ।
तदेवमत्र प्राप्तः समासो बहुलग्रहणेन निवार्यते अवयवयोरिष्टस्वरसिद्ध्यर्थं ।
सुसूक्ष्मजटकेशः. सुनताजिनवासा इत्येवमादौ हि बहुर्वीहिस्वर एवेष्यते ।। 59 ।।
क्वचित् त्ववयवस्वरेण समुदायस्वरो न भिद्यत इति भवत्येव तत्रावयवयोः
समास इत्याह--
महाकष्टश्रितेत्येवं न स्याद् भेदः पदत्रये ।
वृत्तावयवस्यात्त्वं यस्मान्न प्रतिषिध्यते ।। 60 ।।
एवमिति । समुदायस्य वृत्तावयवयोरप्येकार्थीभावाभ्युपगमे सति महत् कष्टं
श्रित इति त्रिपदसमासप्रक्रमेऽवयवयोः `सन्महत्--'(पा.2-1-61)इति समासे
विहिते भवत्यात्त्वमुत्तरपदे विधीयमानाम् । त्रिपदे चात्र समासे न स्यादात्त्वमु-
त्तरपदत्वस्य सर्वान्त्ये लोकविज्ञानान्मध्यपदे तदभावादित्यवयवसमास
आश्रयितव्यः । स्वरे त्वत्र भेदो नास्ति । द्विपदे समासे समासान्तोदात्तत्वस्य
बाधकस्थाथादिस्वरः, तस्यापि बाधकः `अहीने द्वितीया'(पा.6-2-47) इति
पूर्वपदप्रकृतिस्वरः, स एवावयवसमासान्तोदात्तः ।। 60 ।।
क्वचित् तु स्वरेऽत्र भेद इत्याह--
महारण्यमतीते तु त्रिपदाद् भिद्यते स्वरः ।
यस्मात् तत्रान्तरङ्गत्वाद् बाधकोऽवयवस्वरः ।। 61 ।।
महदरण्यमतीत इति त्रिपदे द्वितीयातत्पुरुषे समासान्तोदात्तत्वस्य बाधकं
थाथादिस्वरमवयवाश्रयोऽन्तरङ्गः समासान्तोदात्तो बाधेतेत्यत्र त्रिपदाद् द्विपदे
तत्पुरुषे भिद्यते स्वरः ।। 61 ।।
तथाहि--
सतिशिष्टबलीयस्त्वात् थाथादिस्वर एव तु ।
द्विपदे तेन युगपत् त्रितयं न समस्यते ।। 62 ।।
महदरण्यं महारण्यमिति पूर्वं `सन्महत्--'(पा.2-1-61) इति समासे पश्चान्म-
हारण्यशब्दस्यातीतशब्देन द्वितीयासमासे सतिशिष्टस्वरबलीयस्त्वात् `थाथादि--'
(पा.6-2-144)स्वरोऽन्तोदात्तो भवति । सत्यवयवान्तोदात्तत्वे शिष्टत्वात् कक्ष्या-
न्तरप्राप्त्योत्कृष्यबलत्वेन बाधकत्वात् । तदेवमत्र त्रिपदे समासे मध्योदात्तत्-
वम्, द्विपदे त्वन्तोदात्तत्वमिति भेदः । तथाच सुप् सुपेति संख्याविवक्षायां
त्रिपदसमासो न भवति । महाकष्टश्रिते तु स्वरभेदाभावात् सत्यपि त्रिपदे समासे
नास्ति कश्चिद् दोषः ।। 62 ।।
ननु च श्रितार्थे समन्वयात् परस्परसंसर्गाभावे महत्कष्टशब्दयोः कथं समासः ।
तथाचोत्तरपदे विधीयमानमात्वं न स्यादित्यत आह--
येषामपूज्यमानत्वं परार्थानुगमार्थके ।
विशेषणविशेष्यत्वमपि तेषां न कल्पते ।। 63 ।।
कष्टार्थस्य श्रितार्थानुगमे महता सम्बन्धाभावात् पूज्यमानत्वं नास्तीति वदताम-
वयवानां विशेशणविशेष्यभावोऽपि न स्यादसम्बन्धात् । तथाच पञ्चगवधन इत्यादाव-

वयवयोः समासाभावात् समासान्तोदात्तत्वं न स्यात् । स च सिद्धान्तितः--`नवावयव-
तत्पुरुषत्वात्, तस्यान्तोदात्तत्वं विप्रतिषेधादि'ति । `खादिरेतरशम्यः' इत्यत्र
चावयवसमासाश्रयः पुंवद्भावः । प्रधानानुग्रहाय चावयवाः परस्परेण सम्बध्यन्त एव ।
सगुणस्य हि द्रव्यस्य क्रिया समन्वयः । श्रौतेऽपि समन्वये द्रव्याश्रयत्वात्
तद्विशेषणद्वारेणैव क्रियायोगाद् गुणस्य ।
तस्मादस्त्येव समुदायप्रक्रमेऽप्यवयवयोः परस्परसमन्वय इति महाकष्टश्रिते
रूपस्वरविशेषाभावादभ्युपगम्यापि त्रिपदः समास उक्तः ।
सुप् सुपेति संख्याविशेषविवक्षैव तु सिद्धान्त इति त्रिपदो द्वितीयासमासो नास्ति।तथाच `महारण्यातीतः' इत्यत्र द्विपदे समासे सिध्यतीष्टस्वरः । बहुर्वीहौ द्वन्द्वे
चानेकग्रहणादविशेषेण समासः सिद्धान्तितः । तत्र च दिक्संख्यापूर्व एवावयवत-
त्पुरुषः `तद्धितार्थोत्तरपद--'(पा.2-1-51)इत्युत्तरपदे विहितो भवति । तथाच तत्रैव तदाश्रयोऽन्तरङ्गस्वरः ।
सुसूक्ष्मजटकेशादौ तु बहुलग्रहणादवयवयोर्विशेषणसमासाभावः।
समुदायपारतन्त्र्ये चावयवानां पृथक् स्वकार्याप्रयोजकत्वात् समुदायसमासेनैवैक-
पद्यस्य सिद्धत्वात् । तद्यथा समुदायद्विर्वचने त्ववयवद्विर्वचनं न भवति पपाचेति ।
`पूर्वशालाप्रियः' इत्यादौ तु उत्तरपदे स्वरसमासान्तसिद्ध्यर्थं द्विगुर्वाचनिकोभवति । `खादिरेतरशम्यः' इति इतरा शम्या इतरशम्येति पूर्वं विशेषणसमासे कृते
खादिरी इतरशम्या यस्येति द्विपदो बहुर्वीहिरित्युत्तरपदे पुंवद्भावः सिध्यतीति
सर्वेष्टसिद्धिः ।। 63 ।।
प्रस्तुतमेव वृत्तिवाक्ययोर्वैधर्म्यं विचारान्तरार्थं प्रतिपादयति--
विशेषः श्रूयमाणोऽपि प्रधानेषु गुणेषु वा ।
शब्दान्तरत्वाद् वाक्ये तु वृत्तौ नित्यं न विद्यते ।। 64 ।।
ऋद्धस्य राज्ञः पुरुष इति वाक्ये गुणस्य राज्ञो विशेषः श्रूयते समृद्धतालक्षणः ।
वृत्तौ तु `राजपुरुषः'इत्यत्र ऋद्धस्येति विशेषणं राज्ञो नास्ति, प्रधानार्थसंभि-
न्नस्य स्वविशेषणायोगात् । एतच्च वृत्तिवाक्ययोः शब्दान्तरत्वे सत्युपपद्यते ।
वाक्यप्रकृतौ तु वृत्तौ वाक्यगतधर्मानुषङ्गः ।
एवं चित्रा गावो यस्य देवदत्तस्येति प्रधानस्यान्यपदार्थस्य देवदत्तादिविशेषो
वाक्ये श्रुतोऽपि विवक्षितोऽपि वृत्तौ चित्रगुरित्यत्र नान्तर्भवतीति पदार्थाभि-
धानादनुप्रयोगानुपपत्तौ चोदितायां, `न वा अनभिहितत्वात्'(भा.वा.2/2/19)इति
त्यनुप्रयोगः समर्थितः । अन्यपदार्थसामान्यं ह्यन्तर्भवति, न तु तद्विशेषः ।। 64 ।। ननु च वृत्तौ गुणस्य स्वविशेषणेनासम्बन्धात् कृतपूर्वी कटमित्यत्र कृतेन कटस्य
सामानाधिकरण्याभावादसति क्रियासम्बन्धे कर्मता न स्यादित्यासङ्कयाह--
विशेषकर्मसम्बन्धे निर्भुक्तेऽपि कृतादिभिः ।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते ।। 65 ।।
कृतः पूर्वं कटोऽनेन, भुक्तः पूर्वमोदनोऽनेनेति वाक्ये कटादीनां विशिष्टेन
कर्मणा समन्वय इति निष्ठया तस्य विशिष्टस्य कर्मणो निर्भुक्तत्वादभिहितत्वाद्
द्वितीया न भवति । वृत्तौ तु कृतपूर्वी कटमित्यत्र कृतार्थस्य प्राधानार्थानुगामि-

त्वादसति स्वातन्त्र्ये स्वकर्मणा कटादिना सामानाधिकरण्यं न स्यात् ।। 65 ।।
तस्मादन्य एव वाक्यस्थात् सकर्मकात् कृतशब्दात् वृत्तौ कृतशब्दोऽयमकर्मक
इति बाह्येन कर्मणा कटादिना सम्बध्यत इत्याह--
अकर्मकत्वे सत्येवं क्तान्तं भावाभिधायि यत् ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ।। 66 ।।
वृत्तिवाक्ययोरत्यन्तभेदाद् वाक्ये विशिष्टकर्मसमन्वययोग्योऽपि कृतशब्दो
वृत्तौ विशेषस्याभिधानसम्भवात् सामान्यकर्मैव प्रतीयते । तच्च नान्तरीयकत्वाद-
विवक्षितमित्यकर्मकोऽयं कृतशब्दो भावाभिधायी सम्पद्यते । प्रसिद्धं हि नान्तरीयकं
सामान्यकर्मेति । यथा दीक्षितो न ददातीति प्रसिद्धेरकर्मिका क्रिया, तथेयमपीति
भावोऽत्र निष्ठा कथ्यते । तथाच क्रिययावच्छिन्नः तद्धितवाच्यः कर्ता `कृतपूर्वी-
देवदत्तः' इति । तस्य च बाह्येन कटादिना सम्बन्धो दृश्यते, कटमिति ।
कारकाणां च क्रियाव्यपेतः सम्बन्ध इत्यन्यस्या अत्र क्रियाया अभावात्
तद्धितार्थविशेषणबूतयैव क्रियया सम्बन्धो युक्त इति तदपेक्षमेव कटादेः कर्मत्वम्
कृतपूर्वी कटम्,भुक्तपूर्वी ओदनमित्यादि । भावेऽत्र निष्ठेति क्रियैव तदन्तवाच्या।
तदेतदुक्तं भाष्ये--"योऽसौ कृतकटयोरभिसम्बन्धः, च उत्पन्ने प्रत्यये निवर्तते ।
अस्ति च करोतेः कटेन सामर्थ्यमिति द्वितीया भविष्यती"ति । वाक्यो यो विशिष्टेन
कटादिना कृतस्याभिसम्बन्धः, स उत्पन्ने तद्धिते वृत्तौ निवर्तते । शब्दशक्ति-
स्वाभाव्याद् विशेषाभिधानं नास्ति वृत्तौ, सामान्यकर्मणैव सम्बन्धप्रतीतेः । तथाच
प्रसिद्धेः कर्मणोऽकर्मिकेयं क्रियेति भावाभिधायी क्त इति तत्रत्यया क्रियया
व्याप्यमानं कटादि कर्म भवतीति समन्वयोपपत्तिरित्यर्थः ।। 66 ।।
ननु च तद्धितार्थे कर्तरि गुणीभूता क्रिया वृत्तावभेदेन प्रतीयते, न तु
कर्तुर्भेदेन स्वरूपप्राधान्येनेति कथं तया कटादेः कर्मणो योग इत्याशङ्क्य
निदर्शनेनैतद् व्युत्पादयति--
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
सम्बध्यते क्रिया तद्वत् कृतपूर्व्यादिषु स्थिता ।। 67 ।।
ग्रामं गतो देवदत्तो, ग्रामं गच्छति चेत्यादौ गतादिशब्देन गमिक्रियाकर्तुरभिधा-
नाद् गमिक्रियायास्ततः कर्तुर्विविधं पृथक्त्वेन ग्रहणं नास्तीत्याविग्रहा सा ।
प्रत्ययार्थे हि सर्वत्र गुणभूतः प्रकृत्यर्थः, व्यापाराविष्टस्य साधनस्याख्यातात्
प्रतीतेः कारकमुखेनैव क्रिया प्राधान्यं भजते, न तु स्वतः, सर्वत्र प्रकृत्यर्थस्य
गुणत्वात् । एवञ्च क्रिया सर्वत्र कारकाद् भेदेन नावगृह्यते । कारकाणां हि
प्रवृत्तिविशेषरूपासौ तत्समवेतैव तदभिधायप्रत्ययानुगतप्रकृतिवाच्या न्याय्या ।
न च केवलस्य क्रिया वाचिनो धातोः प्रयोगोऽस्ति । इक्ष्तिबादिना च सिद्धतया
प्रत्याय्यते, न तु साध्यमानावस्थेन स्वरूपेण ।
तस्मात् कारकसंसृष्टैव सर्वा क्रिया कर्मणा सम्बध्यत इति कृतपूर्व्यादावपि
तादृश्या एव समन्वयोपपत्तिः ।। 67 ।।
यदि कृतशब्दो वृत्तौ विशेषकर्मान्तर्भावयितुमसमर्थः, मुण्डं करोति मुण्डयति,

सूत्रयति, मिश्रयतीत्यादावपि वृत्तौ माणवकादेर्विशेषस्यानभिव्यक्तिः स्यात् । न च
कृतशब्दवद् मुण्ड्यादिशब्दः क्रियावाचीति तस्य क्रियाविशेषेऽन्तर्भावात् कथमत्र
बाह्येन माणवकादिकर्मणा योग इत्यत आह--
मुण्डिसूत्र्यादयोऽसद्भिर्भागैरनुगता इव ।
विभक्ताः कल्पितात्मनो धातवः कुट्टिचर्चिवत् ।। 68 ।।
मुण्डं करोतीत्यादि वाक्यं प्रकृतिप्रत्ययपरिकल्पनेनान्वाख्यानोपायमात्रमिति
तद्गतभेदवासनया भागानुगम इवात्र । सत्यतः पुनर्निरस्तोद्देशविभागा विशिष्ट-
क्रियावचना एते धातवं इत्थं व्युत्पाद्यन्ते, समुदायप्रतीत्यावयवप्रतीतेर्बाधनात् ।ततश्च यथायथं स्वकर्मणा सम्बन्धो न विरुध्यते । प्रकृतिवाच्यं हि मुण्डादि
गुणकर्म, प्रत्ययवाच्यस्तु करोत्यर्थ इत्यन्वाख्यानाय विभागः कल्पितः ।
केशच्छेदनवचनो हि मुण्डयतिः । तस्य साक्षादेव माणवकः कर्म ।
एवं सूत्रयत्यादौ व्याकरणादिः । गुमत्वेन नित्यसापेक्षा वा मुण्डादयो बाह्येन
गुणिना माणवकादिना युज्यन्ते । केशच्छेदनं वा क्रियाविशेषरूपं करोतेः कर्म ।
तद्विशिष्टस्य तु माणवकादि कर्म । कुट्टिचर्चिवदिति । साक्षाद् धातुषु
पाठादनयोर्निरंशत्वस्य प्रसिद्धेर्निदर्शनत्वं न्याय्यम् ।। 68 ।।
एवमन्यत्रापि प्रकृतिप्रत्ययभेदोऽन्वाख्यानोपाय इत्याह--
पुत्रीयतौ न पुत्रोऽस्ति विशेषेच्छा तु तादृशी ।
विनैव पुत्रानुगमाद् या पुत्रे व्यवतिष्ठते ।। 69 ।।
पुत्रशब्दोऽत्रासत्यः कल्पितोऽवयवः । तथाच पुत्रविशिष्टेच्छा पुत्रीयतिनाभि-
धीयते ।। 69 ।।
यदि तर्हि पुत्रे व्यवतिष्ठते, तदा बाह्यैः पुत्रविशेषैः सम्बध्येतेयमिच्छेत्या-
शङ्कयाह--
प्राणैर्विना यथा धारिर्जीवतौ प्राणकर्मकः ।
न चात्र धारिर्न प्राणा जीवतिस्तु क्रियान्तरम् ।। 70 ।।
जीवतीत्यस्यार्थः प्राणान् धारयतीति । न चात्र जीवतौ प्राणशब्दोऽस्ति । नापि
धारयतिर्धातुः । अथ च विशिष्टकर्मिकैवंरूपा क्रिया प्रतीयत इत्यन्तर्भूतत्वात्
कर्मणोऽकर्मव्यपदेशमासादयति यथा ।। 70 ।।
तथा विनेषिपुत्राभ्यां पुत्रीयायां क्रियान्तरम् ।
अन्वाख्यानाय भेदास्तु सदृशाः प्रतिपादकाः ।। 71 ।।
इषिपुत्रानुगम उपायमात्रम्, परमार्थतस्तु पुत्रीयायां पुत्रीयाशब्दे क्रियान्तर-
मन्या विशिष्टा क्रिया प्रतीयते । पुत्रीयायां वा क्रियायां क्रियान्तरमिति भाव-
प्रधानो निर्देशः । तेन क्रियान्तरत्वमित्यर्थः ।
एवञ्च यथा जीवतेर्बाह्येन कर्मणाऽयोगः, तथा पुत्रीयतावित्यकर्मिकेयं क्रिया ।
तथा च भाष्यम्--`अथ क्यजन्तस्य कानि साधनानि ? भावः कर्ता च । अथ
कर्म ? नास्ति कर्म' इति । सुबन्तात् कर्मण इच्छायां क्यजिति तु प्रतिपादनोपायोऽ-
न्वाख्यानं भेदेनेति पृथग्भूतपुत्रादिशब्दसादृश्याद् विभागभ्रान्तिरत्र ।। 71 ।।

ननु `मण्डयति माणवकम्' इतिवत् `पुत्रीयति माणवकम्' इति बाह्येन कर्मणा क्रियान्तरत्वेऽपि योगः कस्मान्न भवतीत्याशङ्कयाह--

आक्षेपाच्च प्रयोगेण विषयान्तरवर्तिना ।
सदपीच्छाक्यचः कर्म वाक्य एव प्रयुज्यते ।। 72 ।।

पुत्रविशेषलक्षणं माणवकादिकर्म पुत्रेषणायां विद्यमानमपि वृत्तावर्थान्तरप्रतीतेर्न प्रयुज्यते । `पुत्रीयति माणवकम्' इति ह्युक्ते विषयान्तरमाचारलक्षणम्, तद्वाचिनोपमानक्यचः प्रयोगेणेच्छाविषया क्यजपह्नियते, आचारार्थप्रतीतेः । तस्मात् `पुत्रमिच्छति माणवकम्' इति वाक्य एव विशेषकर्मप्रयोगः ।। 72 ।।

अनेन न्यायेनैतत्सदृशं प्रसङ्गेनान्यदप्युपपादयति--

प्रसिद्धेन कृतः शब्दो भावगर्हाभिधायिना ।
अभ्यासे तुल्यरूपत्वान्न यङन्तः प्रयुज्यते ।। 73 ।।

`लोलुप्यते, चङ्क्रम्यते, जङ्गम्यते' इति यङि कृते गतिकोटिल्यस्य भावगर्हायाश्च प्रतीतेः क्रियासमभिहारे यङन्तोऽयं सदृशोऽपि न प्रयुज्यते, यङन्ताद्, अस्तदप्रतीतेः । भावगर्हाभिधायिनेत्यस्योपलक्षार्थत्वात् कौटिल्याभिधायिनेत्यपि द्रष्टव्यम् ।

तदुक्तम्--"क्रियासमभिहारे च नैतेभ्यः"(भा.वा.3/1/22)इति । एतदर्थं च नित्यग्रहणं केचिद् व्याचक्षते । अभ्यासः पौनःपुन्यं क्रियासमभिहारः । इत्थं च वाक्यवाच्य एव क्रियासमभिहारोऽत्र । भृशं क्रामति, पुनः पुनः क्रामतीत्यादि ।। 73 ।।

तदेवमन्वाख्यानोपायमात्रमवयवविभागपरिकल्पना समुदायार्थप्रतीत्या त्ववयवार्थसंविदां बाधादसत्या अवयवाः । तथाहि--

शब्दा यथा विभज्यन्ते भागैरिव विकल्पितैः ।
अन्वाख्येयास्तथा शास्त्रमतिदूरे व्यवस्थितम् ।। 74 ।।

यथेति वीप्साप्रधानम् । यथा विभज्यन्ते भागैरिव कल्पनाकल्पितैर्निरंशत्वात् सत्यत इत्यन्वाख्येयाः, तथा अन्वाख्यानोपायो भागकल्पनेति यावत् । परमार्थतस्तु शास्त्रमवयवविभागप्रकल्पनारूपमतिदूरे नित्यादन्वाख्येयान्निरंशाच्छब्दतत्त्वादवस्थितम् । प्रतिपादकशब्दनिष्ठं ह्यन्वाख्यानम् । तेन च रेखागवयस्थानीयेन सत्यगवयवदवस्थितशब्दप्रतिपत्तिः । अत एव चोपायानां प्रक्रियाभेदः ।

केचित् किल भवतिशब्दम् `भवात् तिः' इति व्युत्पादयन्ति, केचिद् भूशब्दादतिप्रत्ययेन, अन्ये मध्ये विकरणेन । एवमेकशब्दाञ्ञागारिकट्, एकागारशब्दाञ्ञिकट् । छन्दसः श्रोतभावो घश्च, तदधीते वाक्यार्थे पदवचनमित्यादिप्रक्रियाभेद उक्तः । एवं पुत्रीयादिशब्देऽपि प्रक्रियाभेदोऽभ्यूह्यः । पुतो रीयणे वा पोस्त्रीयेण वा पुत्राड्डीयेण वा व्युत्पत्तिः ।

इत्थं च व्युत्पत्तावपि पुत्रीयशब्दो विशिष्टक्रियावचन इत्यकर्मकत्वम् । यदा च व्युत्पत्तौ नियमाभावः, तदौणादिका अपि केचिदष्टाध्याय्यां व्युत्पाद्यन्ते ।। 74 ।।

इत्थमवयवानामसत्यत्वं सार्वत्रिकं निगमयति--

अर्थस्यानुगमं कञ्चिद् दृष्ट्वैव परिकल्पितम् ।
पदं वाक्ये पदे धातुर्धातौ भागश्च मुण्डिवत् ।। 75 ।।
वाक्यार्था एव स्थितलक्षणः, वाक्यस्यैवाखण्डस्य वाचकत्वात् । तथा चापोद्धार-
बुद्ध्यार्थसामान्यं वाक्यार्थे विशेषेऽनुगतरूपमुद्धृत्य तावदर्थं पदं नाम पृथग-न्वाख्यातुमपोद्ध्रियते, निरंशस्य वाक्यस्यानेकरूपस्यान्वाक्यातुमशक्यत्वात् । पदं
हि सर्ववाक्येषु समानरूपमित्यर्थसामान्यवाचि शक्यते व्युत्पादयितुम् । तच्च
व्युत्पादितं यथायथं वाक्येषु सन्निपतितं तत्तद्वाक्यगताविशेषस्वीकाराद् विशिष्टा-
र्थव्यहारसाधनं जायते ।
न च पुर्वं सामान्यार्थं भूत्वा विशेषं स्वीकर्तुं समर्थम्,
"सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः कावतिष्ठताम् ।।"
इत्यादिदोषापातादिति सामान्यभूतमर्थरूपं परिकल्पितमुच्यते ।
यथैव हि पदेन व्यवहाराभावात् परिकल्पितरूपं तद्, एवं तदर्थोऽपि । तदापि च
पदं प्रकृतिप्रत्ययपरिकल्पनया व्युत्पाद्यत इति तत्राप्यपोद्धाराश्रयेण परिकल्पिता-न्वयव्यतिरेकवशेनार्थमात्रा प्रविभज्यते प्रकृतिप्रत्ययययोः ।
धातुरित्युपलक्षणं प्रकृतिरूपस्य । प्रत्ययोऽपि च गृह्यते । तत्रापि च प्रकृति-
रूपं मुण्डिसूत्रिपुत्रीयाद्यवयवविभागेन प्रकृतिप्रत्ययकल्पनया व्युत्पाद्यते ।
एवमस्तिं सकारमातिष्ठन्ते । अकारस्त्वागमोऽत्रेति केचित् । तथा अतिप्रत्ययस्ति-
प्रत्ययो विकरणश्चेति वा ।
एवं `स्यति, स्यतः, स्यन्ति' प्रत्ययाः, स्यो वा विकरण इत्येवमन्यदप्यूह्यम् ।
एवञ्च भागपरिकल्पने वर्णेष्वेवावस्थानम् तेषां तुरीयादिभागानामव्यवहार्यत्वात् ।
तत्रापि वा परमाणुपर्यन्तभागपरिकल्पने न कश्चित् शब्दः स्यादित्यवश्यं भेदवादिना
वर्णेष्वभिन्नत्वमभ्युपगन्तव्यम्, अभिन्नत्वप्रतीतेः ।
इत्थं च प्रथममेव वाक्यगतया अभिन्नसंविदा भेदस्य बाधनाद् वितथत्वं कस्मा-
न्नोच्यते ? व्यवहारेऽपि वाक्यमेव प्रथमप्रतीतम् । तथा च तदेवाभिन्नबुद्धिप्रत्या-
यितमस्तु सत्यम् । एतच्च वाक्यकाण्गान्निश्चेतव्यम् ।। 75 ।।
तदेवं प्रक्रियाभेदेऽपि--
अविप्रयोगः साधुत्वे व्युत्पत्तिरनवस्थिता ।
उपायान् प्रतिपत्तृणां नाभिमन्येत सत्यतः ।। 76 ।।
साधुत्वे विषये विविधप्रयोगो नानाविधं प्रतिपादनं नास्ति, स्थितलक्षणस्य शब्द-
स्योपेयस्योपायभेदेऽप्येकरूपत्वात् । उपाया हि प्रतिपादनाङ्गभूताः प्राप्तावुपेय-
स्य चरितार्थत्वात् तिरोभवन्तीति न तेषु सत्यताभिमानः कार्यः । विचित्रत्वाच्च
प्रतिपाद्यप्रतिपादकयोर्यथारुचि प्रवृत्तौ व्युत्पत्तिः परं भिद्यते । सर्वत्रैव
चायमेव क्रमः ।
अविद्यैव हि विद्योपायः । प्रतिपत्तिकाले गत्यन्तराभावाद् यथाकथञ्चित्
प्रातिपादनसम्भवादुपेयप्राप्तिश्च तया भवन्ती दृश्यते । तदुक्तम्--

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
अनागमविकल्पा तु स्वयं विद्योपवर्तते ।।"
(वा.प.2/233)
इति ।। 76 ।।
सर्वत्रैव चोपायानामसत्यत्वे यदृच्छाशब्दवन्नैमित्तिकोऽपि शब्दो निरस्तावयवविभागइति नास्ति तत्त्वतो भेदः शब्दानामित्याह--
यथैव डित्थे डयतिः पाचके पचतिस्तथा ।
डयतिश्च पचिश्रैव द्वावप्येतावलौकिकौ ।। 77 ।।
यथैवेति । अस्यैव स्पष्टीकरणम्--द्वावप्येतावलौकिकौ लोकव्यवहारेऽप्रसिद्धौ ।
प्रकृत्यादिविभागस्य लोकेऽसंप्रत्ययान्निरंशस्य डित्थपचतिरूपस्य समुदायस्य लोके
प्रयोगादुभयत्रापि समानैवार्थगतिरभिन्नार्थसमुदायात् । कल्पनया तु डयतिधातुरसंभव-
दर्थो डित्थस्यान्वाख्यानायापोद्धियते । पचतिस्तु सम्भवदर्थः पचतिशब्दस्येत्ये-
तावान् भेदः । तथा च चतुष्टयी शब्दानां प्रवत्तिरुद्घोष्यते साधुत्वस्य
सत्यत्वे ।। 77 ।।
तस्मादभिन्नादभेदपूर्वका भेदाः कल्पिताः शिष्टैरबुधान् प्रति व्युत्पत्त्यर्थमि-
त्याह--
प्रकृतिप्रत्ययावूह्यौ पदात् ताभ्यां पदं तथा ।
अनुबन्धस्वरादिभ्यः शिष्टैः शास्त्रं न तान् प्रति ।। 78 ।।
शब्दानां शिष्टाः प्रमाणम् । ते हि भावतत्त्वसदृशो यद्यद् धर्मेऽङ्गतामेति
तत्तत् साधुत्वेनाभ्युपयन्तः प्रकृतिप्रत्ययावनुगुणावूहित्वा लौकिकं पदं तावद्
वाक्यादपोद्धृतं व्युत्पादयन्ति । तथा च ताभ्यां प्रतिपाद्यं पदमूहितमवयन्ति ।
डित्थादिवापदं प्रत्यक्षकल्पेनोपदिष्टमित्यनुगुणप्रकृतिप्रत्ययोहे कारणम् । पच-
त्यादि तु प्रकृतिप्रत्ययोपदेशेनानुमानकल्पने, शब्दानुशासने सङ्घातस्योहात् ।
द्विविधं हि शिष्टैरनुशासनं प्रारब्धम्--साक्षादुपेयनिर्देशेन, यथा निपातनम् ।
उपायनिर्देशानुसारेण वा, यथा विधिः । तत्र च प्रकृतीनामनुबन्धो ञकारादि-
रूपाग्रहदर्शनान्नियतः कल्पितः, प्रत्ययानां तु स्वरवृद्धयादिदर्शनात् तथैवानुबन्ध-
प्रक्लृप्तिः । शिष्टानां तु निरावरणख्यातित्वात् प्रतिभात्मनि विवृत्तानामेव यथा-
वत् सर्वभावगतत्वप्रख्यानात् संप्रत्युपदेशेन न कृत्यम्, अनादिशास्त्राभ्यासादेव
सिद्धेः । तथा च कचिदुपायानपेक्षापीत्यसत्या एव ते । अत एवोद्धुष्यते--
`शिष्टपरिज्ञानार्थाऽष्टाध्यायी' इति ।। 78 ।।
यस्तु शिष्टस्मरणमनादृत्य शास्त्रमात्रशरणः, सः --
शास्त्रदृष्टिस्तु शास्त्रस्य प्राप्तिमात्रेऽप्यनिश्चिते ।
युज्यते प्रत्यवायेन शास्त्रं चक्षुरपश्यताम् ।। 79 ।।
`बहुलमन्यतरस्यामेकेषाम्' इत्यादिसामान्यलक्षणात् प्राप्तिमात्रे कस्यचिद्
विधेर्विषयविभागेनानिश्चिते शिष्टप्रयोगमननुसृत्य स्वेच्छयैव शब्दान् प्रयुञ्जानो-
ऽसाधुशब्दप्रयोगादधर्मेण सम्बध्यते । प्रयोगमूलौ हि धर्माधर्मौ । तस्माच्छिष्ट-

प्रयोगानुसारेण लक्षणं विषयविभागेनावस्थापयितव्यम् ।
यद्येवम्, अस्तु शिष्टप्रयोग एव, किमनर्थकेन शास्त्रेणेत्याह--अपश्यतां
शिष्टप्रयोगं साक्षादकुर्वता शास्त्रमेव चक्षुरिव चक्षुः, शब्दतत्त्वनिदर्शननिबन्ध-नत्वात् ।
एवञ्च शास्त्रेण लक्षितान् शब्दान् ज्ञात्वा लक्षणनिरपेक्षमेव साधून् प्रयञ्जा-
नान् शिष्टाननुमिमते । तेभ्यश्च सामान्यलक्षणे भ्रान्तिमपनयन्तीति शास्त्रमपि
सफलम् ।
तथा च `लक्ष्यलक्षणे व्याकरणम्' इत्यक्तम् । `सैषा शिष्टपरिज्ञानार्था-
ष्टाध्यायी' इति च ।। 79 ।।
यदि तर्हि शास्त्रं चक्षुः, किमिति तत् क्वचिद् `न वानिष्टादर्शनात्'
(भा.वा.2/2/30) इति प्रत्याख्यायत इत्याशङ्कयाह--
अर्थान्तराभिधानाच्च पौर्वापर्यं न भिद्यते ।
राजदन्ताहिताग्न्यादिराजाश्वादिषु सर्वथा ।। 80 ।।
राजदन्तादौ लौकिकं यन्नियतं पौर्वापर्यम्, तन्न भिद्यते नान्यथा कदाचिदपि
भवतीति विप्रयोगादर्शनाच्छास्त्रमत्र प्रत्याख्यायते । प्रयोगो विप्रयोगश्च द्वयं
यत्रैकस्मिन्नर्थे दृश्यते, तत्र शास्त्रारम्भो विप्रयोकनिवारणेन सफलः । इह तु
`दन्तराजः, अश्वराजः' इति प्रयोगविपर्यासे विवक्षितविपरीतोऽर्थो गम्यते, न तु
य एव राजदन्त इत्यादौ । समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तकः ।
आहिताग्न्यादौ तु प्रयोगानियमेऽप्यर्थाभेदो दृश्यत इति प्रत्याख्यानमेव युक्तम् ।
क्वचित् तु पाठः `पौर्वापर्यमुपेदश्यत्वेन नास्तीत्यर्थः ।। 80 ।।
यदि तर्हि विप्रयोगादर्शनाच्छास्त्रमत्र प्रत्याख्यायते, तदा `गर्गाः'इत्यादावपि
लुक्च्छास्त्रेण किं कार्यमित्यत आह--
विनैव प्रत्ययैर्वृत्तौ ये भिन्नार्थाभिधायिनः ।
गर्गादयो लुका तेषां साधुत्वमनुगम्यते ।। 81 ।।
शब्दानां स्वाभाविकमर्थाभिधानमिति वृत्तावेकार्थीभावे गर्गा वत्सा इत्यादयो-
ऽपत्यप्रत्ययमन्तरेण प्रकृत्यर्थभिन्नं प्रत्ययार्थमपत्यलक्षणमाचक्षते । गार्ग्य
इत्यादि च प्रत्ययसहितं तदभिधानं दृष्टम् । `न केवला प्रकृतिः प्रयोक्तव्यां
इति "परश्च"(पा.3/1/2)इति नियमेनावेदितम् । अतः शास्त्रप्रक्रियानुसारेण
केवलस्य प्रकृतिरूपास्यासाधुत्वे प्राप्ते लुगन्वाख्यानमुपपद्यते ।। 81 ।।
न चैवमपि सोऽयमित्यभिसंबन्धादपत्ये गर्गादीनां प्रयोगः सिध्यति । तद् यथा
भृगुश्चरति, अङ्गिराश्चरतीत्यपत्यवतोऽपत्ये प्रयोग इति किं लुगन्वाख्याने-
नेत्यत आह--
सोऽयमित्यभिसंबन्धात् प्रत्ययेन विना यदि ।
बभ्रूवादयः प्रयुज्येरन्नपत्ये नियमो भवेत् ।। 82 ।।
अपत्यापत्यवत्सम्बन्धपूर्वः (पूर्वकात्) सोऽयमित्यभेदेनोपचारादपत्यवताऽपत्य-
मित्युच्यते गर्गा इति । सोऽयमित्यभेदसंबन्धः कथ्यते । बहुवचनानुपपत्त्या हि
गर्गापत्यान्युच्यन्ते, मूलप्रकृतेरेकत्वाद् बहुवचनानुपपत्तेः । तत्र चाभेदसंबन्धे भेदसंबन्धस्याविवक्षितत्वाद् अपत्यप्रत्ययो नास्तीति

शक्यते लुगवक्तुम्, किन्तु
अभेदसम्बन्धस्योपचरितस्य नियतभेद(संबन्ध)पूर्वकत्वाभावादन्तेवासिनोऽपि गर्गस्य
समारोपितगर्गरूपा बहुवचनेन प्रत्याय्यन्त इत्यपि शक्यते वक्तुमिति नियमेनापत्या-
दीनामभिधानं न प्रतीयते । तस्मादपत्ये नियमार्थमपत्यप्रत्ययस्य लुगुच्यते ।
स्वभावादेव तु प्रत्ययरहिता प्रकृतिस्तदर्थं ब्रूते । अन्यत्र प्रत्ययलक्षणार्थं
लुक्, इह त्वर्थनियमार्थम् ।। 82 ।।
`प्रष्ठेस्येयम्'इतीदमर्थप्रत्ययस्य तर्हि लुगारम्भणीयोः, अन्यथा नियमेन भार्या न प्रतीयतेत्याशङ्कयाह--
सोऽयमित्यभिसंबन्धे लिङ्गोपव्यञ्जनादृते ।
प्रष्ठादिषु न जायैव नियमेन प्रतीयते ।। 83 ।।
सत्यमत्रापि यत्नं विना भार्यायामभेदोरचारान्नियमो न स्यात् । अस्ति ह्यत्रापि
यत्नः, "पुंयोगादाख्यायाम्" (पा.4-1-47) इति स्त्रीप्रत्ययो लिङ्गोपव्यञ्जनो यतः ।
आख्याग्रहणाद्धि यादृशः पुंसि दृष्टप्रयोगः शब्दः, तादृपादेव स्त्रीप्रत्ययोऽन्-वाख्यायत इति तद्धितान्तस्याख्यारूपत्वाभावात्
तदनुत्पत्तावनुमितायां सत्यप्यभेद-
संबन्धे स्त्रीप्रत्ययसहायात् प्रष्ठादिशब्दाद् भार्यावगतिः ।
ननु र्भागन्यादावपि कथं न संप्रत्ययः ? मैवम्, प्रस्थानकर्तृत्वासङ्गाद्धि
स्त्रियामपि प्रस्थाने संविधानं संपादयन्त्यां पुंशब्दः प्रवर्तते । संविधातृत्वं चभार्याया एवोपपद्यते, नान्यस्याः ।। 83 ।।
`प्रस्थो वीहिः' इत्यादौ तर्हि प्रस्थेन प्रमित इति नियमप्रतिपत्त्यर्थं
प्रत्यस्य लुगन्वाख्येय इत्याशङ्कयाह--
मानमेयाभिसंबन्धविशेषेऽङ्गीकृते तथा ।
प्रस्थादीनामसाधुत्वं तद्धितेन विना भवेत् ।। 84 ।।
तद्धितो योगभेदेन वाक्यं वा स्याद् विभाषितम् ।
परिमाणाधिके तत्र प्रथमा शिष्यते पुनः ।। 85 ।।
अत्राप्यध्यारोपेणाभेदसंबन्धे मानमेययोगो नियमेन न प्रतीयते, समीप्यादेरपि
संभवादिति "तदस्य परिमाणम्" (पा.5/1/57)इति योगविभागेन तद्धितः स्यात् ।
वाक्यं वा महाविभाषया, प्रस्थः परिमाणमे वा वीहीणामिति । यत्नान्तरं
परिमाणाधिके प्रातिपदिकार्थे प्रथमालक्षणमारब्धम् । निमित्तिनः प्रस्थप्रमितस्य
वीह्यादेर्गौणस्याभिधाने प्रातिपदिकार्थग्रहणादेव सोऽयमिति संबन्धे सिद्धा
प्रथमा । प्रस्थः परिमाणमेषां वीहीणामिति (प्रस्थो वीहीरिति) ।
परिमाणातिरिक्ते प्रमेये भूयः परिमाणग्रहणेनोपदिश्यते । तेन प्रथमान्तात्
परिमाणशब्दान्मुख्यत एव प्रमेयं प्रतीयते । तद्धितोऽपि विभाषितो वचनसामर्थ्यान्न
बाध्यते `प्रास्थिकः' इति । वाक्यमपि भवति ।। 84,85 ।।
ननु च परिमाणवाचि प्रातिपदिकं कथं परिमिये वर्तत इत्याह--
व्यतिरिक्तस्य साधुत्वे तदेव च निदर्शनम् ।
युज्यतेऽङ्गीकृताधिक्यं तत् सर्वाभिर्विभक्तिभिः ।। 86 ।।
तदेव परिमाणात् पुनः प्रथमाविधानं ज्ञापकं मानमेयसंबन्धोपहितव्यति-
रेकार्थाभिधाने।

प्रस्थादेः स्वाभाविकं ह्यर्थाभिधानं ज्ञाप्यते । तथा च तद्धितेनेव भिन्नं
प्रमेयं प्रथमयाभिधीयते । तत्र चान्तरङ्गे मानमेयसंबन्धे चरितार्था प्रथमा
बाह्याक्रियाविभाविते कर्मादिके भेदे आधिक्येऽपेक्षिते संबन्धे विभक्त्यन्तरै-
र्द्वितीयादिभिर्बाध्यते ।
अतो बाह्यक्रियाविभावितकर्मादिशक्तिभेदलक्षणं प्रातिपदिकार्थाधिक्यमङ्गीकृतं
स्वीकृतं येन तत् परिमेयवाचि पदं यथायथं सकलाभिर्द्वितीयादिविभक्तिभिर्युज्यते
संबध्यते । `प्रस्थं पचति, प्रस्थेन क्रीतम्' इत्यादि । एवमभेदोपचारादभिधानेऽपि
नियमार्थं लुगादियत्नारम्भः ।। 86 ।।
गुणगुणिनोस्तु स्वभावादेव नियतो योग इति किमर्थं गुणवचनेभ्यो मतुपो
लुगन्वाख्यानमित्याह--
शुक्लादिषु मतुब्लोपो व्यतिरेकस्य दर्शनात् ।
असाधुत्वनिवृत्त्यर्थं साधवस्ते बिदादिवत् ।। 87 ।।
`पटस्य शुक्लः' इति व्यतिरेको दृष्टः । तथा च `शुक्लः पटः' इत्यव्यातिरेके
मतुप् स्यादिति केवलायाः प्रकृतेरसाधुत्वशङ्का स्यादिति व्यतिरेकनिबन्धनस्योत्पन्न-स्य मतुप्रत्ययस्य युक्तं लुगन्वाख्यानम् ।
तथा `ह्यव्यतिरेकात् सिद्धमित्युक्-
त्वा'(भा.वा.5/2/94)`दृष्टो व्यतिरेकः'(भा.वा.5/2/94)इति पुनर्लुगेव
समर्थितः । लुगन्वाख्यानद्वारेण च `बिदाः, गर्गाः'इत्यादिशब्दवद्गुणिनि संबन्धाद्
वृत्तिराख्यायते ।
यथा हि स्वार्थविशिष्टापत्यार्थाभिधानाद् `बिदाः'इत्यादयः प्रयोगार्हाः, तथा
शुक्लादयोऽपि, न तु सोऽयमित्यभिसंबन्धादेवेत्यर्थः ।। 87।।
तदेवं समानाधिकरणवृत्तेः प्रस्तावेन विशेषणाविशेष्यभावसमर्थनपूर्वकं प्रसक्तानु-
प्रसक्तायातं विचारं परिसमाप्य प्रकृतमेव विशेषणविशेष्यभावं वृत्तावभेदप्रतीतेरनुप
पद्यमानमाशङ्कयैकीयमतेन तावदुपपादयितुमाह--
विशेषणाद् विशेष्येऽर्थे तद्भावाभ्युच्चये सति ।
पुनश्च प्रतिसंहारे वृत्तिमेके प्रचक्षते ।। 88 ।।
इहैकया प्रख्यया द्वयोर्विशेषणविशेष्ययोर्ग्रहणे परस्परोपकाराग्रहणात् किं भूतो
विशेषणविशेष्यभावः स्यात् ।
न हि वस्तुतो नियतजातीयं विशेषणं नाम किञ्चिदस्ति । न चाप्यत्र शाब्दी
प्रतीतिरेका युज्यते । अभिधानक्रमाद्धयभिधेये क्रमिकैव प्रतीतिर्न्याय्या । ततश्च
`नागृहीतविशेषणा विशेष्ये बुद्धिः' इति पूर्वं विशेषणग्रहणम्, ततो विशेषणाद्धेतोरव-
च्छेदकत्वेन गृहाताद् विशेष्ये तद्भावस्य विशेषणरूपस्याभ्युच्चये अतिरेके सति
पुनः प्रतिसंहारेऽसन्निधेस्तद्भावाभ्युच्चयस्यैवोपेक्षणे वृत्तिरेकार्थीभावः ।
विशेष्ये ह्यतिशयमाधाय कृतार्थं विशेषणं न स्वरूपेण विशेषमयमतिरेचयति, मा
भूद् व्यर्थावसाय इति । तथा च विशिष्टस्यैवार्थस्य वृत्तावववधारणमुपपद्यते ।। 88 ।।
तदेतन्मतं दूषयति--
निमित्ते प्रत्ययः पूर्वो नानुप्राप्तो निमित्तिना ।

निमित्तवति बुद्धेश्च न निमित्तसरूपता ।। 89 ।।
संस्कारसहिताद् ज्ञानान्नोपश्लेषः स्मृतेरपि ।
व्यापारे तन्निमित्तानां न ग्राह्यं स्याद् तथाविधम् ।। 90 ।।
भिन्नाज्ञानालम्बनवादे दूषणमिदम् । निमित्तेऽवच्छेदकाभिमते विशेषणे प्रथमः
प्रत्ययो निमित्तिना विशेष्याभिमतेन नासादितः । न हि विशेषणग्रहणकाले
विशेष्यग्रहणमत्र पक्षे, तस्य तदानीमस्तमयात् । निमित्तवति च विशेष्याभिमते या
बुद्धिर्ज्ञानम्, तत्र निमित्तस्य विशेषणस्याप्रतिभासनान्न तदाच्छुरितत्वम् ।
एवं च वस्तुस्वरूपमात्रग्रहणं ज्ञानं कथं तत्र विशेषणतां विशेष्यतां च
गृह्णीयात् । विशेष्यापेक्षं हि विशेषणत्वं विशेषणापेक्षं च विशेष्यत्वमिति परस्पर-ज्ञाने परस्परस्वरूपानाभासनादापेक्षिकं
विशेषणविशेष्यत्वं न गृहीतं स्यात् ।
अथ पूर्वज्ञानाहितवासनासव्यपेक्षमुत्तरं ज्ञानमिति तस्मात् क्रमेण द्वयोरनु-
भवेऽपि पश्चात् संस्कारक्रमेणायता स्मृतिस्तत्रावच्छेद्यावच्छेदकभावमावेदयत
इत्युच्यते, तदपि न; यस्माद् यथानुभवं स्मृतिरुपजायत इत्यनुभवगृहीतार्थरूपा-
धिक्यमुपश्लेषं परस्परयोजनमवच्छेद्यावच्छेदकत्वेन सङ्घटनं कथं सावकल्पयेत् ।
एवं ह्यनुभूतार्थविषयत्वं तस्या विघटेतेत्यप्रमाणं स्यात् ।
अथ यथा स्मृतिर्बाह्यविषयानुसन्धानात् तद्विषया कथ्यते, तथा बाह्यस्य
तदानीमभावादान्तरस्यानुसन्धातुः प्रमातुर्या विचित्राः शक्तयः, ता अपि तस्या
निमित्तमिति तेषां तन्निमित्तानां व्यापारेऽत्रावच्छेद्यावच्छेदकभावं प्रत्युपयोगेकथ्यमानेऽनुभवग्राह्यं बाह्यं वस्तु विशेषणविशेष्यरूपं न
स्यात् । प्रमातृशक्-
त्यैवासत्यपि संश्लेषेऽर्थानां घटनादिति न भाविको विशेषणविशेष्यभावः
समर्थितः ।। 89,90 ।।
मा भूद् भाविक इति चेदाह--
अन्तःकरणवृत्तौ च व्यर्था बाह्यार्थकल्पना ।
तस्मादनुपकारो वा ग्राह्यं वा न तथा स्थितम् ।। 91 ।।
अन्तः करणं क्रिया, यस्यासावनुसन्धाता प्रमातैवं कथ्यते । सार्वार्थग्राहकं वा
मनोऽन्तःकरणम्, तस्य वृत्तौ व्यापारेऽत्र विशेषणविशेष्यभावादिविषयेऽभ्युपगम्य-
माने सर्वत्रान्तः करणस्यैवाभासो बहीरूपतयाध्यस्तो भवत्यर्थः, तावतैव लौकयात्रा-
सिद्धेरिति किमनुपपद्यमानेन बाह्येन कल्पितेन प्रयोजनमिति बाह्यार्थवादिनं प्रतीद-
मुच्यते । तस्य हि विशेषणविशेष्यभावादिसम्बन्धो वस्तुसमवाय्यभिमतः ।
तथा च कल्पनानामनुभवमूलत्वमिति तदनुभवायातोऽयं विशेषणविशेष्यविकल्पः ।
तत्र च यथास्वं विषयोपक्षयत्वात् प्रत्ययस्य तट स्थस्यार्थस्य विशेष्यावच्छेदकत्व-
लक्षणो नास्त्युपकारः । अनुसन्धातृपमातृवशेन तु मानसे विकल्पेऽभ्युपगते ग्राह्यस्यतद्रूपशून्यत्वमित्युक्तार्थनिगमनम् ।। 91 ।।
एवं परमते भिन्नज्ञानावलम्बनपक्षेऽनुपपत्तिमुद्भाव्य स्वमतेनैकज्ञानावलम्बनवा-
देन वास्तवं विशेषणविशेष्यभावमवस्थापयितुमाह--
अनुस्यूतेव संसृष्टेरर्थे बुद्धिः प्रवर्तते ।
व्याख्यातारो विभज्याथ तां भेदेन प्रचक्षते ।। 92 ।।

तदात्मन्यविभक्ते च बुद्ध्यन्तरमुपाश्रिताः ।
विभागमिव मन्यन्ते विशेषणविशेष्ययोः ।। 93 ।।
इह यथावस्तु प्रत्ययाः प्रभवन्ति । वस्तु जातिगुणोपाधिविशिष्टमभिन्नमित्यभिन्न
एव प्रत्ययः । समवायतिरोहितभेदा हि जात्यादयो वस्तूनामनुरूपकाः । तत्र
समवायिनः श्वैत्यात् श्वैत्ये बुद्धे श्वेते बुद्धिः । ते कार्यकारणभूते इति पारमा-र्थिकपदार्थभेदावलम्बने, अनौचित्यात् क्रमस्योच्येते । प्रतिभासवेलायां तु क्रमो
नास्ति, विशिष्टस्यैव वस्तुनो झटित्येकप्रख्योपारोहात् । अत एव केचिद् जात्यादीन्
संसर्गिणोऽपन्हु वते ।
एवञ्च भेदावभासपूर्वकस्य संसर्गस्याभावादनुस्यूतेवेयं बुद्धिर्जात्यादिभिः
संसर्गिभिः कथ्यते । परमार्थतो भेदपूर्वकस्य संसर्गस्यार्थानामभावात् वस्तुस्थित्यात्वेवमुच्यते ।
एवमभिन्नबुद्धिप्रतिभासिनोर्नीलोत्पलादौ गुणद्रव्ययोर्भेदपूर्वकस्यावच्छेद्या-
च्छेदकभावस्याभावः, किन्तु निरंशस्य वस्तुनः परेभ्यः प्रतिपादयितुशक्यत्वात्
प्रतिपादनकाले प्रतिपादकास्तान् संसृष्टान् जात्यादीनर्थानपोद्धारबुद्ध्या पृथक्-
कृत्यायं गुणो जातिर्वा विशेषणम्, इदं द्रव्यं विशेष्यमिति बुद्ध्यन्तरविभागेन
पूर्वप्रतिपादितरीत्या प्रतिपादयन्ति । तथैव च प्रतिपद्यन्ते प्रतिपत्तारः ।
एवञ्च वस्तुबीजमनुसृत्य प्रतिपादनाद् बाह्येऽस्ति सद्भावो विशेषणविशेष्य-
त्वस्य। तदेव हि बाह्यं संसृष्टं व्याख्यानाय विभज्यते । तत्र चास्ति
गुणादिर्विशेषणं द्रव्योपरञ्जकम्, जात्यादिरहितस्य द्रव्यस्यायोगाच्च तदवच्छेद्यम्,सम्बन्धश्च समवाय इति सर्वं वास्तवम् ।
तथा च विभागकल्पनोपायेन तदात्माऽविभक्त एवार्थः प्रतिपादितो भवति । तयैव
च विभागबुद्धयाहितविशेषणविशेष्यरूपतया प्रतिपद्यन्ते व्यवहर्तारः ।
यद्यपि विभागावस्था वाक्यदशा, तथापि वाक्यावस्थागतज्ञानवासनया वृत्तावपि
विशेषमविशेष्यप्रतीतिरस्त्येव । परमार्थस्तु वृत्तौ निरंश एवार्थ इति सापि निरंशा
वाचिका सिद्धा । तदेवं धर्मभेदेन वृत्तिवाक्ययोरत्यन्तभेदः प्रतिपादितः ।। 92-93 ।। मतान्तरमप्युपक्षिप्तं भाष्ये--`अथ ये
वृत्तिं वर्तयन्ति, किं त आहुः ?
परार्थाभाधानं वृत्तिरिति' । तद् व्याचष्टे--
अबुधान् प्रति वृत्तिं च वर्तयन्तः प्रकल्पिताम् ।
आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम् ।। 94 ।।
निर्विभागं वृत्तिपदार्थरूपमवगन्तुमशक्ताः प्रतिपत्तारोऽबुधाः । ते हि यथाश्रु-तग्राहिणो यथावद्वचनं वाचनिकं मन्यन्ते । ततश्च तान् प्रति वाक्योपमर्देन
प्रक्रियायां वृत्तिर्व्युत्पाद्यमाना वाक्यप्रकृतिकैवावतिष्ठते । ततश्च वाक्यमपि
नित्यं स्वविषय इति तस्यान्नुच्छेद्यत्वात् तत्प्रकृतित्वेन समारोपिता कल्पिता
वृत्तिर्निर्वर्त्यते । तत्र कारणात् कार्यमधिकार्थक्रियाकारि दृष्टं पटादि ।
एवमिहापि वृत्तिलक्षणस्य कार्यस्य वाक्यगतपदार्थाधिक्यं न्याय्यमिति परार्था-
भिधानं वृत्तिलक्षणमारभ्यते । परस्यान्यस्य प्रधानस्य पदस्य योऽर्थः, तस्योप-
सर्जनपदेन प्रत्यायनम्, तत्र,
"एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।"

इति नये वाक्यावस्थायामुपसर्जनपदस्य परार्थाभिधानशक्तिप्रतिघातापेक्षया वृत्तौ परार्थाभिधानमुच्यते । अनेकार्थप्रत्यायनसामर्थ्याद्धि स्वार्थ एव स तस्य तत्र भवति परर्थः ।

यदा `अन्यायश्चानेकार्थत्वम्' इति नयस्तदा वृत्तावन्यदेवोपसर्जनपदमित्य-र्थान्तरमुपादत्ते । एवं परार्थवचने सति द्वैतं भवति । वाक्यावस्थागतमर्थं परित्यज्योपसर्जनं वृत्तौ परार्थमभिदधाति ।

तद्यथा कलशे दधि स्थितमपनीय क्षीरं निधीयते, नावस्थित एव दधनि निधातुं शक्यते तत् । सेयं जहत्स्वार्था वृत्तिः ।

अपौरुषेये शब्दार्थसम्बन्धे कथं त्याग इति चेत्, न; अनुपादान एवात्र त्यागोपचा-रात् । यथा ह्यग्निसंयोगः पाकजान् विशेषणानुत्पाद्य परमाणुषु निवर्तते, तथोपसर्ज-नार्थः प्रधाने विशेषमाधाय तावन्मात्रप्रयोजनत्वान्निवर्तते ।

अत्र निदर्शनं भाष्येभाहितम् । तदा यथा--`तक्षा राजकर्मणि प्रवर्तमानः स्वं कर्म जहाति' इति ।

कोशसमाहरणसन्निधानादौ राजकर्मणि व्याप्रियमाणस्तक्षा स्वं दारुच्छेदचतुर-स्त्रीकरणादिव्यापारं जहाति, स्वव्यापारापरित्यागे राजकर्मणोऽनुष्ठातुमशक्यत्वात् ।एवं स्वार्थानुपादानेन पदान्तरार्थोपादानमुपसर्जनानां वृत्तौ न्याय्यमनेन निदर्शनेन ।

अन्ये तु मन्यन्ते--अवस्थित एव प्राच्येऽर्थेऽर्थान्तराभ्युच्चयोऽसावुपसर्जन-पदानामाधिक्यम् (अर्थाधिक्यम्) तथा हि--सिकताकलशे जलं निहितमवतिष्ठते । लक्षादिहेतुजनितश्च रागाति-शयस्तन्तूनां कार्येऽप्यनुवर्तते । एवमुपसर्जनपदस्य स्वार्थोऽर्थान्तरोपादाने-ऽपि । युक्तं चैतत्, दृष्टस्यार्थस्य स्वरूपवच्छब्दैस्त्यागायोगात् ।

अत्रापि निदर्शनं भाष्येऽभिहितम्--`भिक्षुको द्वितीयां भिक्षामासाद्य पूर्वां न जहाति, सञ्चयायैव यतते'इति । तदियमजहत्स्वार्था वृत्तिः ।

एवञ्च राजार्थेन पुरुषार्थस्य विशेषणाद् विशिष्टार्थसंप्रत्ययः ।

यद्येवं राजार्थस्यापि सम्भवाद् वृत्तौ `राजपुरुषः' इत्यत्र द्विवचनं प्राप्नोतिधवखदिरादिवत् । नैवदस्ति, द्वन्द्वे समप्राधान्याद् द्वयोरुद्भूतावयवभेदत्वात् समुदायस्य युक्तं द्विवचनम् ।

इह तु विशेषणविशेष्यभावावच्छिन्नमर्थान्तरमेवानभिधेयमवयवैः समुदायेनो-पादीयते । यथा बहुर्वीहौ `लोहितवसनश्चित्रगुः' इत्यादि । ततश्चावयवार्थाहित-भेदस्य परार्थस्य समुदायेनाभिधीयमानत्वात् ततः परा विभक्तिः समुदायार्थनिवेशिनीं संख्यामुपादत्ते ।

तथा चार्थवत्त्वे समुदायस्यानेकवचनस्य परिहार उक्तः--`सङ्घातस्यैकार्थ्या-न्नावयवसंख्यातः सुबुत्पत्तिः'(भा.वा.2/1/7) इति ।

तदेवं त्यागश्चाभ्युच्चयश्च यो धर्मः स्वभावोऽस्या वृत्तेः तद्भावस्तत्ता,

तामाहुः परार्थाभिधानलक्षणायां तस्याम् ।। 94 ।।

तत्र जहत्स्वार्थायां वृत्तौ चोदितम्--`राजपुरुषमानाय' इत्युक्ते पुरुषमात्रस्-

यानयनं प्राप्नोति,`औपगवमानयेत्युक्तेऽपत्यामात्रम्' इति ।
ननु चोपसर्जनपदानामर्थत्यागे प्रयोगः किमर्थं इति कथं न चोद्यते ? नास्तेयेतत्,
`यावो यावकः' इतिवत् पर्यायरूपेण `राजपुरुषः'इति प्रयोगोपपत्तेः । तथैकार्थीभाव-
लक्षणसामर्थ्यनिबन्धना समाससंज्ञापि यथा स्यादिति ।
अविशेषे तु समाधिरुक्ताः--`जहदप्यसौ स्वार्थं नात्यन्ताय जहाति । अथवान्वयाद्
विशेषणं भविष्यति' इति । एतद् विवृणोति--
अन्वयाद् गम्यते सोऽर्थो विरोधी वा निवर्तते ।
द्वयर्थमर्थान्तरे वापि तत्राहुरुपसर्जनम् ।। 95 ।।
उक्तमेतदग्निसंयोगाहिता विशेषाः परमाणूनां निवृत्तेऽप्यग्निसंयोगेऽनुवर्तन्त
इति । एवमुपसर्जनपदार्थः प्रधानार्थं विशेष्य निवर्तत इति तदाहितविशेषानुगमाद्
विशिष्टः पुरुषः प्रतीयते, न पुरुषमात्रम् ।
अत्र भाष्ये मल्लिकापुटो दृष्टान्तोऽभिहितः । कुसुमसंसर्गोपहितगन्धविशेषानु-
वृत्तेरपनीतकुसुमोऽपि पुटस्तद्व्यपदेश्यः ।
एवमर्थस्य त्यागे कथं नात्यन्ताय जहातीत्युच्युते--तदप्यंशेनार्थो निवर्ततेऽ-
शेनावतिष्ठत इत्याशङ्कय पक्षान्तरमाह--विरोधी वा निवर्तत इति ।
प्रधानार्थवच्छेदप्रतिद्वन्द्वी स्वभावोऽपैत्युप सर्जनार्थस्य । कश्च तस्य
प्रतिद्वन्द्वी, यः प्रधानभूतः ? अनयोर्हि प्राधान्ये परस्परसम्बन्धाभावाद् विशिष्-टोऽवच्छिन्नः प्रधानार्थो न प्रतीयेतीति
स्वप्राधान्यमुपसर्जनार्थस्य निवर्तते ।
अत एव स्वविशेषणेन समृद्धादिना न युज्यते । प्रधानोपकाराय तु यद्रूपं
विशेषणतात्मकम्, तन्नापैत्यविरोधादिति नात्यन्ताय जहातीत्युक्तिः । सर्वथा हि
स्वार्थपरित्यागे स्वपदार्थेन प्रधानोपकाराभावादुपसर्जनपदं स्वरूपमेव जह्यात् ।
परोपकारप्रभावितं ह्यु पसर्जनत्वम् ।
असति च परोपकारे प्रयोगवैयर्थ्यम् । उत्तरपदादेव प्रधानार्थप्रतीतेः ।
अनर्थकस्य चापरेण सम्बन्धाभावात् सामर्थ्यनिबन्धना समाससंज्ञा न स्यादिति
न सकलार्थपरित्यागः । तक्षापि हिक्कितहसितादीनि प्राणित्वाव्यभिचारीणि राज-
कर्मम्यनुगुणानि न जहाति । स्वप्राधान्यमेव स्वस्य हीयत इति जहत्स्वार्था वृत्तिः ।
अजहत्स्वार्थायां तु वृत्तौ सर्वथैव सन्नुपसर्जनपदार्थः । स्वविशेषणविशिष्टं प्रधा-नार्थं हि तत्रोपसर्जनपदमभिदधातीति
द्वयर्थमुच्यते । प्रधाने च पांसूदकवदभेदापत्ते-र्विवेकाभावात् स्वविशेषेणेन न युज्यते गुणपदार्थः । विषयभेदेन च
शब्दानामर्थवैचि-
त्र्याद् वृत्तौ गुणप्रधानभूतार्थद्वयाभिधानमुपसर्जनपदानां युक्तम् । द्विवचनं तु नभवतीति पूर्वमेवोक्तम् ।
केचित्तु जहत्स्वार्थायां वृत्तावुपसर्जनपदस्य सर्वथैवार्थत्यागं प्रधानार्थवृ-त्तित्वं च मन्यन्ते । वर्णवदनर्थकं ह्यपसर्जनपदं
वृत्तिपदस्यावयवभूतम् ।
पर्यायश्चायं पुरुष शब्दस्य राजपुरुषशब्दः । अत्र पुरुषविशेषप्रतिपत्तिर्न
स्यादिति चोद्यम् ।। 95 ।।
यदि तर्हि वाक्य इव वृत्तावपि विशिष्टार्थप्रतीतेर्नात्यन्ताय हानम्, तदा
जहत्स्वार्थत्वं वाङ्मात्रेण स्यादित्याशङ्कयाह--

उपायमात्रं नानात्वं समूहस्त्वेक एव सः ।
विकल्पाभ्युच्चयाभ्यां वा भेदसंसर्गकल्पना ।। 96 ।।
वाक्ये विच्छेदोपक्रमार्थाभिधानम्, वृत्तौ तु विशिष्टोऽर्थो भेदेन प्रतीयत इति निरंशमेव परमार्थतो वृत्तिपदम् । उपायमात्रं तु वाक्यगतपदार्थभेदेन व्युत्पादनमितिप्राधान्यस्य त्यागाज्जहत्स्वार्थताभणितिः ।
अतोऽनन्तरं भाष्ये पठितम्--`अथवा वृत्तौ समर्थाधिकारः क्रियते, सामर्थ्यं
नाम भेदः संसर्गो वा, भेदसंसर्गोवा' इति ।
तद् व्याचष्टे--विकल्पेत्यादिना । वाक्यप्रकृतित्वं वृत्तिपदस्य मन्यमाना
वाक्यगतभेदसंसर्गकल्पनामत्र कुर्वन्ति ।
तथाहि--भेदो वाक्यार्थः संसर्गो वेति विकल्पः । द्वावपीत्यभ्युच्चयः समुच्चयः ।तत्र पुरुषशब्दस्य भृत्यवाचित्वे स्वामिनः
सामान्येनावगतौ राजशब्दः स्वामिविशेषे-
भ्यो व्यावृत्तिं प्रतिपादयतीति भेदो वाक्यार्थः । अनुमीयमानश्चात्र संसर्गः ।
यदा तु जातिवाची पुरुषशब्दः, तदा राजशब्दाद् विशिष्टेनार्थेनैतदर्थस्य समन्व-
योऽवगम्यत इति संसर्गो वाक्यार्थः । विशिष्टत्वाच्च संसर्गस्यार्थान्तराद् भेदोऽ-नुमीयमानः । एवं गुणप्रधानभेदेन विकल्पः । उभयस्य वा शब्दात् प्रतीतेरविशेषेणोभयं
सामर्थ्यम् । तदेवं विशिष्टार्थवृत्ति वृत्तिपदमिति न पुरुषमात्रस्यानयनमवयवास्यान-र्थक्येऽपि ।। 96 ।।
अत एव चोपायत्वाद्विभागस्य मतभेदोऽविरिद्धोऽनवस्थितत्वाद् रुचिवैचित्र्येणो-
पायानामित्याह--
वृत्त वर्तयतामेवमबुधप्रतिपत्तये ।
भिन्नाः सम्बोधनोपायाः पुरुषेष्वनवस्थिताः ।। 97 ।।
वृत्तिवाक्ययोरभेददर्शिनां प्रकृतिविकारभावेन व्युत्पादयतां व्युत्पादकानां पुरु-
षेषु प्रतिपत्तृषु सम्बोधनोपायाः व्युत्पादने हेतवो रुचिवैचित्र्याद् भिन्नाः
विलक्षणाः ।

ये हि वृत्तिवाक्ययोः समानमर्थमध्यवस्यन्ति, तद्दर्शनेनाजहत्स्वार्थत्वमुच्यते ।
ये तु स्वाभाविकमर्थभेदमनयोः पश्यन्ति, तदर्शनेन जहत्स्वार्थत्वमित्यसत्यभूतभेद-
संसर्गाश्रयेण व्यवस्था भिद्यते ।। 97 ।।
तदेवं परमार्थतोऽत्यन्तभेदो वृत्तिवाक्ययोरिति सङ्खयाविशेषतिरोधानादयो वृत्तौ
विशेषाः प्रोक्ताः । तत्र च विभक्त्यभावादेव सङ्खयाविशेषतिरोधानमिति चोदिते
`न शब्दनिमित्तकेन नामार्थेन भवितव्यमर्थनिमित्तकेन नामशब्देन भवितव्यम् ।
तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकम्' इत्युक्तम् ।
एतद् व्याचष्टे--
वाचिका द्योतिका वापि सङ्खयानां या विभक्तयः ।
तद्रूपेऽवयवे वृत्तौ सङ्खयाभेदो निवर्तते ।। 98 ।।
त्रिके प्रातिपदिकार्थे सङ्खयाया वाचिका विभक्तयः, पञ्चके तु द्योतिकाः । ताश्च
राज्ञः पुरुषो, राज्ञो, राज्ञां पुरुष इति वाक्ये दृश्यन्ते स्वार्थप्रयुक्ताः ।

वृत्तापि राजपुरुष इत्यत्र वाक्यसदृश एव पूर्वपदभागः ।
तथाच तत्रापि सङ्खयाविशेषप्रयुक्ता विभक्तयः श्रूयेरन् । सचि ह्यर्थे तद्वचनः
शब्दः प्राप्नोति, न तु शब्दाभावे वाचनिके वृत्तावर्थाभावाविधानं युज्यते ।

सङ्खयाशब्दाभावाद् वृत्तौ सङ्खयाविशेषो नास्तीत्यनुमीयते ।
तथाहि--प्रधानार्थसम्भेदादुपसर्जनार्थस्य भेदाभावान्निवर्तते सङ्खयाविशेष इति
तदभावात् स्वाभाविक्येवानुत्पत्तिर्विभक्तीनां प्रत्ययलक्षणार्थं लुगन्वाख्यायते ।
इत्थं सादृश्यमात्रं भ्रान्तं वृत्तिवाक्ययोर्न तत्त्वत ऐक्यम्, वाक्ये सङ्खया-भेदसद्भावाद् वृत्तौ तदभावादित्यत्र तात्पर्यार्थः
।। 98 ।।
एवं तावदुपसर्जनार्थो निवृत्तसङ्खयाभेद इत्येकीयं मतम् । अन्ये तु मन्यन्ते--
अभेदैकत्वसङ्खया वा तत्रान्यैवोपजायते ।
संसर्ग(र्गि)रूपं सङ्खयानामविभक्तं तदुच्यते ।। 99 ।।
वृत्तावुपसर्जपदार्थानां सत्त्वभूतत्वादावश्यकः सङ्खयायोगः । न ह्यव्ययवन्नि-
स्सङ्खय एवोपसर्जनार्थो युक्तः, सत्त्वमात्रस्यासम्प्रत्ययात् ।
न च विशेषोऽवधार्यते । अतः सामान्यसङ्खयारूपं सर्वसङ्खयाविशेषाणां संसर्ग(र्गि)रूपं क्रोडीकारकं विद्यत इत्यनुमीयते ।
द्वित्वादिप्रतिपक्षं ह्येकत्वं द्वित्वाद्यपावर्तनान्न समस्तसङ्खयाभेदस्वीकारस-मर्थम् । इदं त्वभेदैकत्वं सर्वानुयायि ।
अत्र हि सर्वे सङ्खयाभेदाः संसर्गमविभागमनुप्राप्ता विद्यन्ते । तथाच सति
निमित्ते ते तत आविर्भवन्तो दृश्यन्ते प्रसेकादिव शाणादिविशेषाः (प्रसेकादिव
गन्धादिविशेषाः) । अतश्च शौर्पिक(पार्पिक)तावकीनमासजातादौ भवति विशेष-
निश्चय इति वक्ष्यते ।
अविभक्तमेकस्वभावत्वात् किञ्चिद् भवति, न तु संसृष्टम् । संसर्गेऽपि च भेदः
स्यादित्युभयमुपात्तं संसर्ग(र्गि)रूपमविभक्तं चेति ।। 99 ।।

एतदेव निदर्शनेन व्युत्पादयति--
यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां सङ्खयां तादृशीं विदुः ।। 100 ।।
मधुनि माक्षिके बहुपुष्परसाः प्रत्यर्पितस्वरूपास्तत्कार्यत्वादिति नानाजातीयौ-
षधिरससम्भेदेन मधुरससम्पादने विचित्रास्ते रसा विवेकेन न लक्ष्यन्ते ।
अथ च कारणभूतौषधिरसानुगुण्येन मधुनो रसवीर्यविपाका अवधार्यमाणा यथास्वं
कार्यदर्शनानुमीयमानसामर्थ्याः सन्निहितास्त इत्यवसीयन्ते । तथैव यथानिमित्तं
सङ्खयाभेदावसायादुपसर्जनपदार्थे सर्वसङ्खयाविशेषाणामविभागेनावस्थानादभेदैकत्व-
सङ्खयापि तथाभूतैव बोद्धव्या । सङ्खयाभेदानां हि ततोऽपोद्धारात् सङ्खयेति कथ्यते,
न तु तया यत् किञ्चिद् गण्यते द्वित्वादिकयेव । सङ्खयासंसर्गस्य च संसृष्ट-

विवेकेन रूपानवधारणात् सङ्खया विशेषसामान्यरूपेयम् ।। 100 ।।

प्रकारान्तरमत्रैवाह--

भेदानां वा परित्यागात् सङ्खयात्मा स तथाविधः

व्यापाराज्जतिभागस्य भेदापोहेन वर्तते ।। 101 ।।

परित्यक्तभेदा तान् भेदान् व्यावर्तयन्ती संखयाव्यपदेशमियमप्यासादयति । तथा च

तथाविधोऽभेदैकत्वस्वभावोऽसौ संखयात्मा व्यक्तिभेदतिरोधानेन जातिरूपाश्रयेण

वर्तते । भेदापोहलक्षणं हि सर्वसंखयानां जातिरूममनुगतम् । पूर्वत्र समस्तभेद-

संसर्गमात्रं समस्तभेदात्मकमभेदैकत्वमुक्तम् ।

इदानीं तु समस्तभेदानुगतरूपमन्यापोहरूपमिति विशेषः । यथा ह्येकत्वं

द्वित्वाद्यपावर्तयति, द्वित्वं च त्रित्वादि, एवमिदमभेदैकत्वं सर्वमेकत्वाद्यपाव-

र्तयतीत्यस्ति संखयात्वम् । सति च निबन्धने द्वित्वैकत्वादि प्रतीयत इति

सामान्यात्मकताभ्युपगताऽत्र ।। 101 ।।

ननु चाभिन्नप्रत्ययावेद्यं सामान्यं गोत्वादि । अत्र चाभेदैकत्वस्य न किञ्चित्

कार्यम् । भेदा एव हि शास्त्रकार्ययोगिन इति किं तत्सद्भावे लिङ्गमित्याशङ्कयाह--

अगृहीतविशेषेण यथा रूपेण रूपवान् ।

प्रख्यायते न शुक्लादिभेदरूपस्तु(रूपन्तु) गृह्यते ।। 102 ।।

भेदरूपसमावेशे तथा सत्यविवक्षिते ।

भागः प्रकाशितः कश्चिच्छास्त्रेऽङ्गत्वेन गृह्यते ।। 103 ।।

गुणैरविनाभावाद् द्रव्यमप्रतीतनीलादिगुणारूपमपि सामान्येन रूपवदिति प्रतीयते

यथा दूरात्, तथा सँखयाविशेषसमवाये प्रतिपाद्यत्वेनानिष्टे संखयावानित्ये-

तावतावगते सत्त्वभूतत्वादुपसर्जनार्थे योंऽशस्तत्संसृष्टो निमित्तविशेषात् तवका-

द्यादेशलक्षणादाविर्भूतः स तावकीनादिशब्दान्वाख्यानाय शास्त्रे निमित्ततयोपादीयते ।

तथाच संखयावत्त्वसम्प्रत्यय एवात्रोपसर्जनार्थस्याभेदैकत्वसंखयाकार्यम् ।।102,103।। यदि तर्हि

सर्वसंखयासंसर्गरूपमभेदैकत्वं न तद्रव्यातिरिक्तं तदोपसर्जनपदैर्विशे-षात्मकमेव कथं न प्रतिपद्यत इत्याह--

सङ्खयासामान्यरूपेण तदा सोंऽशः प्रतीयते ।

अर्थस्यानेकशक्तित्वे शब्दैर्नियतशक्तिभिः ।। 104 ।।

सोंऽशः पूर्वपदार्थभाग उपसर्जनार्थः सत्त्वरूपत्वादनेकसंख्यासमाहारयोग-

योग्योऽपि संख्यावानित्येवमभेदेनैवोपसर्जनपदेन प्रतिपाद्यते । न तु विशेषरूपप्रति-पादने तस्य शक्तिरस्ति । वाक्यवद् वृत्तौ अनेकशक्तिरपि ह्यर्थो न शब्दैः साकल्येन

स्पृश्यते, नियतविषयत्वाच्छब्दशक्तीनामित्यर्थः ।। 104 ।।

ननु च यद्युपसर्जनार्थे संख्याया अभेदः, कथं भेदानुगमः, अथ भेदः, कथ-

मभेदात्मकत्वमित्याशङ्कयाह--

अव्ययानां च यो धर्मो यश्च भेदवतां क्रमः ।
अभिन्नव्यपदेशार्हमन्तरालं तदेतयोः ।। 105 ।।
अलिङ्गासंख्यमव्ययमित्यसंख्यत्वमव्ययानां स्वभावः । एतादृशी हि शब्दशक्ति-
र्यदव्ययानि सत्त्वस्वभावादतिवृत्तमतश्च निस्संख्यमर्थमाहुः । भेदवन्तो विभक्तिवि-
शेषावच्छिन्नाः शब्दाः, तेषामेकत्वादिसंख्याविशेषावच्छिन्नार्थप्रत्यायनं स्वभाव
इति तदर्थो विशिष्टसंख्यायुक्तः, तदेतामुभयीमवस्थामतीत्योपसर्जनपदानामर्था
पैन्ते ।
तदेवं वृत्तावभेदैकत्वसंख्यावगमे विशेषो वाक्यादित्यत्यन्तभेदः ।। 105 ।।
अत्र वार्त्तिककारीयं संवादकमाह--
अलुकश्चैकवद्भावस्तस्मिन् सति न शिष्यते ।
स च गोषुचरादीनां धर्मोऽस्ति वचनान्तरे ।। 106 ।।
इह `स्तोकाभ्यां मुक्तः, स्तोकेभ्योमुक्तः' इत्यापि वाक्ये `स्तोकान्मुक्तः'
इत्येवेष्यते वृत्तिः ।
तथा च "एकवद्भावो वक्तव्यः"(भा.वा.6/3/1)इति चोदिते परिहृतं वाक्य-
कारेण--"एकवद्वचनमनर्थकम्" (भा.वा.6/3/1), "द्विबहुष्वसमासः"

(भा.वा.6/3/1) इति । तदेतत् कथमुपपद्यते ?
यदि वृत्तावभेदैकत्वसंख्याप्रादुर्भावाद् द्वित्वबहुत्वावगत्यभावः । तथा च
तस्मिन्नभेदैकत्वे सति द्विवचनहुवचनयोरभावात् समासाभाव इति द्वित्वाद्यपक्रमेऽ-
प्येकवचनान्तानामेव समास इति नार्थ एकवद्भावानुशासनेन । "एकवचनं तत्सर्गतः
करिष्यते" इति भवति ।
अभेदैकत्वेऽपि वा तदविरोधः, सामान्येनैकत्वे विधानात् ।
कथं तर्हि गोषुचरो वर्षासुजोऽप्सुयोनिरिति बहुवचनान्तानां समास इति चेत्, अह
स चेति ।
सोऽभेदैकत्वाख्यो धर्मो वचनान्तरे एकवचनादन्यस्मिन् बहुवचनेऽप्यत्रास्ति ।
अत्र हि नेदं व्यक्तिबहुत्वे बहुवचनम्, अपि तु `जात्याख्यायामेकस्मिन्
बहुवचनम् । (पा.1-2-57) इति ।
तथाचैकस्यापि यो गवि चरति प्राणी, सोऽपि गोषुचर इन्द्रगोपोऽभिधीयते ।
एकोऽपि चाप्परमाणुरप्छब्देन बहुवचनान्तेनाभिधीयते । वर्षारात्रोऽपि चाभिन्नो
वर्षाशब्देन बहुवचनान्तेन शब्दशक्तिस्वाभाव्यादित्यत्राभेदैकत्वसंख्या वचनभेदप्रति-बन्धं न करोति । तथाप्यभेदैकत्वस्यैव
प्रतीतेरित्यर्थः ।। 106 ।।
द्विवचनं तु नान्वाख्यातं जातावितिं तत् सर्वथा वृत्तिषु संख्याभेदतिरोधानान्न

भवतीत्याह--
जातौ द्विवचनाभावात् तद् वृत्तिषु न विद्यते ।

प्रत्याख्याने तु योगस्य द्रव्ये गोषुचरादयः ।। 107 ।।

तद् द्विवचनं जातावनुपदेशाद् व्यक्तिगतभेदतिरोधानाच्च वृत्तिषु नास्ति, बहुवचनं
तु "जात्याख्यायाम्" इत्युपदेशादस्ति । तथाच वृत्तावेकवचनबहुवचनयोर्भावेऽपि
द्विवतनाभावोऽभेदैकत्वफलमवतिष्ठते ।
यदा तु जातेराश्रयोपाधिक एव बहुत्वे बहुवचनोपपत्तेः "जात्याख्यायाम्" इति
सूत्रं प्रत्याख्यायाते, तदा गोषुचर इत्यत्र गोद्रव्यगतभेदाश्रयमेव बहुवचनं वृत्ता-वपि ।

अनवयवेन हि व्यक्तीः परामृशति गोषुचरशब्दः । `अप्सुयोनिः, वर्षासुजः'
इत्यत्राप्यवयवप्रचयाद् धर्मबहुत्वाद् वा व्यक्तेरेकत्वेऽपि बहुवचनम् । शब्दशक्ति-स्वाभाव्याद्धि किञ्चिद् बहुचनमवयवबहुत्वमाह
किञ्चिद् द्रव्यगधर्मबहुत्वम् ।।107।।

तदेतदनिपपन्नमित्याह--
आश्रयाद् भेदवत्तायाः सर्वभेदसमन्वयः ।
द्रव्याभिधानपक्षोऽपि जात्याख्यायां न विद्यते ।। 108 ।।
सर्वद्रव्यगतिश्चैवमेकशेषश्च नोच्यते ।
प्रत्याख्यातेऽन्यथा सूत्रे भिन्नद्रव्यगतिर्भवेत् ।। 109 ।।
द्रव्यबहुत्वाश्रयेण गोषुचरादौ बहुवचनेऽङ्गीक्रियमाणे वृत्तौ संख्याविशेषयोगः
स्फुटोऽभ्युपगतः स्यात् ।
तथा च भेदवत्ताया आश्रयणात् सर्वैरेकत्वद्वित्वबहुत्वैरपि सम्बन्धः प्राप्त इति
कासावभेदैकत्वसंख्या ? एकस्यां द्वयोर्वापि चरतश्च भवत्यभिधानं गोषुचर इति ।
तथा च नेदं व्यक्तिभेदायत्तं बहुवचनम्, अपि तु जात्याख्यायामेवेति तत्र
द्रव्याभिधानपक्षस्याभावात् कथं द्रव्यभेदाश्रयमिदं बहुवचनं वर्ण्यते । एवम्
`अप्सुयोनिः' इत्यादावपि वाच्यम् ।
तस्माज्जात्याख्यायामेवेदं बहुवचनं न्याय्यम् ।
न च द्रव्यविवक्षश्रयेण योगस्य प्रत्याख्यानमुचितम् । एवं ह्येकशेष आरम्भणीयः

स्यात् , प्रत्यर्थं शब्दनिवेशान्नैकेनानेकार्थाभिधानमिति कृत्वा । जात्याभिधाने तुतत्रैव बहुवचने
सर्वद्रव्यगतिर्बहुवचनान्तादेकस्मादपि शब्दाद् भवतीति प्रत्याख्या-
तमेकशेषसूत्रम्, "आकृत्यभिधानाद् वैकं विभक्तौ वाजप्यायनः" (भा.वा.1/2/64)
इति । "जात्ख्यायायाम्"(पा.1/2/58)इति सूत्रं समर्थितमेवम्,"जात्याख्यायां
सामान्याभिधानादैकार्थ्यम्" (भा.1/2/53)इति ।
ननु च कोऽतिशयो जात्याख्यायामित्यस्य. येनैतदारम्भः समर्थ्यत इत्याह--

प्रत्याख्यात इत्यादि । "जात्याख्यायाम्" इत्यस्मिन् योगेऽनारभ्यमाणे जातिपरायां
चोदनायां बहुवचनाभावाद् गोषुचर इत्यादौ द्रव्यबहुत्वे बहुवचनमिति व्यक्तिबहुत्वप्र-तीतिर्भवेतम । न चैवमिष्यते, एकस्यां गवि द्वयोर्वापि गवोश्चरति गोषुचर इत्यभि-
धानस्य गोषुचरे कुक्कुटाख्ये पक्षिविशेषे रूढिरित्यर्थः ।
तस्माज्जात्याख्यायामेवैतदुपपद्यत इति सत्यप्यभेदैकत्वे तत्रैवेदं वाचनिकं
बहुवचनं विज्ञेयम् ।। 108,109 ।।
इदानीमभेदैकत्वसंख्यायाः सर्वसंख्याविशेषात्मकत्वाद् भेदेन वृत्तौ स्वरूपोप
दर्शनमित्येतदभिधातुं चोद्यपूर्वकमुपक्रमते--
वृत्तौ यो युक्तवद्भावो वरणादिषु शिष्यते ।
अभेदैकत्वसङ्खयायां गोदौ तत्र न सिध्यति ।। 110 ।।
"लुपि युक्तवद् व्यक्तिवचने"(पा.1-2-51) इत्यत्र पक्षद्वयं सम्भाव्यते । तथाहि
यदा व्यक्तिवचने लिङ्गसंख्ये कथ्येते, तदा लुबन्तलक्षणायां तद्धितवृत्तौ विभक्तिनि-वृत्तावप्यर्थनिवृत्तेरभावाद् वृत्तस्य ये व्यक्तिवचने तयोरतिदेश इत्ययं पक्षः ।
यदा पुनर्व्यक्तिद्योतनः शब्दो व्यक्तिः, वचनमप्येकदेशलोपादेकवचनादि
विवक्षितम्, तदा तस्य वृत्तावदर्शनाद् प्राग्वृत्तेर्व्यपेक्षावस्थायां ये व्यक्ति-वचने तयोर्लुबर्थेऽयमतिदेश इत्ययं पक्षः ।

तत्र पूर्वस्मिन् पक्षे गोदयोरदूरभावो ग्रामो गोदौग्राम इति न सिध्यति । यस्माद्
वृत्तावुपसर्जनस्याभेदैकत्वसंख्या प्रादुर्भावतीत्युक्तम् । तद्गतस्यैव च संख्याल-
क्षणस्यार्थस्यातिदेश इति द्वित्वस्यात्रातिदेशाभावाद् द्विवचनं न स्यात् । बहुवचनंतु पञ्चाला इत्यादौ जात्याश्रयं सिध्यति ।। 110 ।।

अथ द्वितीयः पक्षः, तत्रात्याह--
प्राग्वृत्तेर्युक्तवद्भावे षष्ठी भेदाश्रया भवेत् ।
वृत्तौ सङ्खयाविशेषाणां त्यागाद् भेदो निवर्तते ।। 111 ।।
गोदयोरदूरभावो ग्राम इत्यत्र वाक्ये दृष्टा व्यतिरेसनिबन्धना षष्ठीति सा
वृत्तावपि स्यात्, अतिदेशात् । भेदस्याभेदैकत्वेऽपि गोदावित्यत्र `षष्ठयपि हि
वचनम्' (भा. 1/2/53) इत्युक्तं भाष्ये ।
अत्र परिहारः पक्षान्तराश्रयेणोक्तः `वृत्तस्य ये लिङ्गसंख्ये ते अतिदिश्येते'
(भा.1/3/53) इति । तद् व्याचष्टे--वृत्तौ संख्येत्यादिना । युक्तस्य प्रत्ययार्थेन
सम्बद्धस्य प्रकृत्यर्थस्योपसर्जनस्य संख्याभेदानां हानाद् वृत्तावयं विभागो
नास्तीत्यभेदैकत्वसंख्यामात्राश्रयं कार्यमतिदिश्यते, न षष्ठी व्यतिरेक-
निबन्धनेत्यर्थः ।
एतदनन्तरं क्वचिद् भाष्यमस्ति `प्रागपि वृत्तेर्ये लिङ्गसंख्ये, ते अतिदिश्येते।षष्ठी न भवति सामान्यातिदेशे विशेषानतिदेशात्' इति ।

इह प्रकृत्यर्थसम्बन्धि यदेकवचनत्वादि सामान्यानुगतं वचनम्, तदतिदिश्यते
लुबर्थे संख्यान्तरयोगिन्यप्राप्तम् । तच्च यद्यपि विशेषद्वारेणैव प्रवर्तते,
तथाप्यव्यभाचारा एकवचनादयो विशेषा अतिदेशात् प्राप्नुवन्ति, न तु षष्ठी ।

सा व्यतिरेकनिबन्धनेत्यसति तस्मिन्न भवन्ती व्यभिचारिणी वचनसामान्यस्य ।
यथा वसिष्ठादयो ब्राह्मणस्य ।। 111 ।।
एवञ्चात्र `वृत्तस्य ये लिङ्गसङ्खये, ते अतिदिश्येते' इत्यस्मिन् पक्षेऽभेदैक-
त्वसङ्खयायां गोदौ न सिध्यतीतीदमेव चोद्यमवशिष्यते । तत् समाधातुं
पूर्वोक्तमेवाभेदैकत्वसङ्खयालक्षणं तावदनुवदति --
विद्यमानसु सङ्खयासु केचित् सङ्खयान्तरं विदुः ।
अभेदाख्यमुपग्राहि वृत्तौ तच्चोपजायते ।। 112 ।।
केचिदिति । ये सर्वसङ्खयानां संसर्गरूपमभेदैकत्वं मन्यन्ते । अत्र हि दर्शनेऽ-
भेदैकत्वं सर्वसङ्खयाभेदान् स्वात्मनि स्वीकरोति ।
येषां तु `तद्रपेऽवयवे सङ्खयाभेदो वृत्तौ निवर्तते'(वा.प. 3 वृ.100) इति भेदा-
पोहलक्षणमभेदेकत्वम्, न तन्मते सङ्ख्याभेदस्वीकारो युज्जत इति सूचयति ।। 112 ।।
यतश्च विद्यमानासु संख्यास्वभेदैकत्वसङ्खया वृत्तौ प्रादुर्भवति, तदा गोदाविति
सिध्यतीत्याह--
व्यापारं याति भेदाख्यैस्तत् स्वैरवयवैः क्वचित् ।
आत्मा भेदानपेक्षोऽस्य क्वचिदेति निमित्तताम् ।। 113 ।।

तदित्यनुगतभेदमभेदैकत्वं क्वचिदन्तर्भूतद्वित्वादिमुखेनोपयुज्यते, यत्र भेदाना-
माविर्भावहेतुरस्ति ।
क्वचित् तु व्यपगतभेदमभिन्नेन स्वरूपेणोपयुज्यते, यत्र भेदहेतुर्नास्ति ।।113।।

अत्रैवोदाहरणमाह--
दास्याः पतिरिति व्यक्तो गोदाविति च दृश्यते ।
व्यापारभेदः सङ्खयायास्तस्यादेवं व्यवस्थितः ।। 114 ।।
पत्युराक्रोशप्रतिपादनाय दासी सम्बन्धितयोपात्तेति तावन्मात्रस्य विवक्षितत्वाद्द्वित्वबहुत्वानादर इत्यभेदैकत्वसङ्खयायाः
स्वरूपेणात्र व्यापारो व्यक्तो निश्चितः।गोदाविति तु गोदद्वयसामीप्यं विवक्षितम्, ग्रामस्यैकत्वाद् गोदो ग्राम इति न प्रती-
यत इत्यन्तर्गतद्वित्वाश्रयेणाभेदैकत्वसङ्खयाया व्यापारोऽत्र निश्चितः । तथा च
वृत्त्यवस्थागतलिङ्गसङ्खयातिदेशेऽपि सम्भवन्ती द्वित्वादिका सङ्खया लुबर्थे युज्य-तेऽतिदेष्टम् ।
अन्यत्रापि चायं सङ्ख्याधर्मो दृष्टः । तद्यथा--विंशतिसंख्या दशद्वर्गद्वयारब्-धापि न द्वित्वेन सव्यापारा, अपि त्वभेदेनैव
स्वधर्मेण-विंशतिर्गाव इति । विंशती
इति तु विंशतिप्रचये विवक्षिते एकशेषः । द्वौ त्रय इति तु द्वयादिका संख्या
स्वरूपाभेदेऽपि सङ्खयेयाश्रयभेदोपादानेन ।
एवमभेदैकत्वसङ्खयायामपि को विरोधो विषयभेदेन भेदाभेदोपादाने ? न च

संख्यासु सङ्खयान्तराभावादभेदैकत्वसङ्खयायामपि सङ्खयान्तरासम्भव इति वाच्यम्, असत्यपि सङ्खयान्तरयोगे संख्यानां सङ्खयान्तर्भावस्य दर्शनात् ।

तद्यथा--कति भवतः पुत्रा इति । अत्रोत्तरसंख्यायां पूर्वसंख्यानुप्रवेशादेकत्व-द्वित्वादावविशेषेण प्रश्नो भवति । तथा च प्रतिवचनं दृश्यते--एको द्वौ बहव इति । एवमभेदैकत्वसंख्यायामपि संख्यान्तराण्यन्तर्भवन्ति, तथा च निमित्तवशा-दुद्भवन्ति ? अन्यथात्यन्तमसत्त्वे कथमुद्भवः ।
सा चेयं सर्वसंख्यासामान्यभूता `राजपुरुषः' इत्यादावपसर्जनपदोपादानैव समवेतसंख्या । सामान्यं हि स्वार्थमुपसर्जनपदान्याहुः, स्वभावात् ।। 114 ।।
यद्येवं द्विपुत्र इत्यत्रं कथं द्वित्वावगमः उपसर्जनार्थस्येत्यत आह--
द्वयादीनां च द्विपुत्रादौ बाह्यो भेदो निवर्तते ।
विभक्तिवाच्यः स्वार्थत्वान्निमित्तं त्ववतिष्ठते ।। 115 ।।
द्वयोः पुत्र इति विभक्तिवाक्यं द्वित्वं पूर्वमन्यदेव प्रातिपदिकार्थात् समर्थितम् । तदेव च वृत्तावभेदैकत्वप्रादुर्भावान्निवर्ततं । प्रातिपदिकार्थभूतं तु नापगच्छति । अन्यथा निरर्थकत्वे प्रयोग एव न स्याद् द्विशब्दस्य । अस्ति च जहत्स्वार्थायामपि वृत्तावुपसर्जनार्थं इत्युक्तम् । एवं त्रिपुत्र इत्यादौ वाच्यम् ।। 115 ।।
यदि तर्हि स्वार्थो द्वित्वं न निवर्तते, तदाभेदैकत्वसंख्यात्र नास्तीत्यासंक्-याह--
द्वित्वोपसर्जने सङ्घे द्विशब्दस्तत्र वर्तते ।
सोऽयमित्यभिसम्बन्धादुभशब्दे न तत्तथा ।। 116 ।।
वाक्येऽवयवप्राधान्यादुद्भूतभेदौ द्वावुच्येते । वृत्तौ तु समुदायसमुदायिनो-रभेदाध्यारोपाद् द्वित्वगुणावच्छिन्नः समुदाय एक इत्युपसर्जनार्थस्यात्रापि भेदो व्यावर्तते अभेदैकत्वाप्रादुर्भावात् । तदेतत् समुदायवृत्तित्वमुभशब्दविषये तेन प्रकारेण द्वित्वोपसर्जनत्वेन न सम्भवतीत्युभपुत्र इति न कदाचिदपि भवति समासः ।
तथाहि--
"उभयस्तस्य तुल्यार्थो वृत्तौ नित्यं प्रयुज्यते ।"
(वा. प. 3 वृत्ति. 117)
इत्यनन्तरमेव वक्ष्यति । उभाबाहुरित्यादिस्तु प्रयोगो द्विदण्डयादित्वात् साधुः ।

कथमुभशब्दो द्विपर्यायोऽपि तद्वद् वृत्तौ सङ्घ नाभिधत्त इति । चेत्,

शब्दशक्तिस्वाभाव्यादिति ब्रूमः । तथा च वार्त्तिकम्--"अन्याभावो द्विवचनटाब्वि-
षयत्वात्, उभयोऽन्यत्र" (भा. वा. 1/1/27) इति ।। 116 ।।
तदेतदाह--
उभयस्तस्य तुल्यार्थो वृत्तौ नित्यं प्रयुज्यते ।
सूत्रेऽपि नित्यग्रहणं तदर्थमभिधीयते ।। 117 ।।
उभयपुत्रः, उभयथा, उभयत इत्यादौ वृत्तिपदे उभशब्दसमानार्थ उभयशब्दः
प्रयुज्यते । स हि द्वित्वोपसर्जनं सङ्घमभिधातुं समर्थो नोभशब्दः । तथा च
वस्त्वभेदाश्रयेण तुल्यार्थत्वम्, नाभिधाव्यापाराश्रयेण उभाविति भेदरूपेण प्रतिपा-
दनात्, उभय इत्यवयविरूपेण । "उभादुदात्तो नित्यम्" (पा.5-2-44) इत्यत्र
सूत्रे नित्यग्रहणमेतदर्थम्, द्वित्वोपसर्जनसमुदायाभिधानशक्तिविरहमुभशब्दस्य
ज्ञापयितुमित्यर्थः ।
उभशब्दो ह्यसंख्यावाची, प्रत्ययान्तरां चायजित्यत्र पक्षे तयपोऽप्राप्तौ तेन सहविकल्पनिवृत्त्यर्थं नित्यग्रहणं नोपयुज्यते ।
उभशब्दः संख्यावाची तयबादेशश्चायज्
इत्यत्रापि पक्षेऽस्वरितत्वादेव विकल्पनिवृत्तौ नित्यग्रहणं वृत्तिविषये नित्यमय-
जेवेत्युक्तप्रयोजनमेव ।
नचोभशब्देन द्वयवयवः सङ्घोऽभिधीयते, येनोभयशब्देनापि तथेति तुल्यार्थतायां
विकल्पः स्यादिति नित्यग्रहणम् । शब्दशक्तिस्वाभाव्यात् समुदायस्याभिधानं ह्यभय-
शब्देनेति न्यायानुवादः सूत्रे नित्यग्रहणम् ।। 117 ।।
सत्यां त्वभिधानशक्तौ द्विवचनटब्विषये प्रयुज्यत एवोभशब्द इत्याह--
आपि के चापरार्थत्वान्नाभेद उपजायते ।
उभे इति ततः स्वार्थे भेदवृत्तिः प्रयुज्यते ।। 118 ।।
स्त्रीवृत्तेः प्रातिपदिकात् स्वार्थे टाप्, एवं कुत्सितादिद्योतने स्वार्थे क
इति तत्र प्रत्ययार्थे गुणभावानापत्तेरभेदेऽनुपजाते स्वतन्त्रे स्वार्थे भेदे
वर्तमानः प्रयोगार्होऽयमुभशब्दः उभे उभक इति ।
अस्वार्थिके तु प्रत्यये उत्तरपदे च पारार्थ्यात् प्रधानार्थैकार्थीभावाद् उद्-
भूतभेदता (अनुद्भूतभेदता) स्वार्थोऽस्य हीयते इति तत्रास्य प्रयोगोऽन्याय्यः
।। 118 ।।
यदा तर्हि "स्त्रियाम्" (पा.4/1/3)इत्यत्र प्रत्ययार्थविशेषपक्षः, तदा तत्र
प्रकृत्यर्थव्यतिरिक्तेऽर्थे विशेषणायोपादीयमानो न स्वार्थ प्रयुक्तः स्यादिति कथं तत्रोभशब्दप्रयोग इत्याशङ्कयाह--
स्त्रीत्वाभिधानपक्षेऽपि गुणभावविपर्ययः ।
स्वभवादपरार्थत्वात् तत्र भेदो न हीयते ।। 119 ।।
गार्ग्यादौ प्रकृत्यर्थो गुणभूतः, प्रत्ययार्थः प्रधानं प्रतीयते । स्त्रीप्रत्-ययान्तेषु तु प्रत्ययार्थपक्षेऽपि स्त्रीत्वविशिष्टं
द्रव्यमत्राभिधीयते, शब्दश-
क्तिस्वाभाव्यात् । नहि शब्दानामर्थादेशनं शक्यते कर्तुम्, शास्त्रप्रक्रियाभेदेऽ-पि लौकिकस्य स्थितलक्षणस्यार्थस्याभेदात् ।
तस्मादुभे इत्यत्र भेदो न निवर्तते,

परार्थत्वाभावात् ।। 119 ।।

यत एवम्--

तस्माद् द्विवचनाट्टापश्चोभयोऽन्यत्र दृश्यते ।

प्रत्ययं तयपं हित्वा नास्त्युत्तरपदे पुनः ।। 120 ।।

द्विवचनटाब्विषय उभशब्दः उक्तः । टापि च नान्यत्र द्विवचनात् । अतोऽन्यत्र तु
प्रत्यये उत्तरपदे चोभशब्दो नास्ति । अपि तु तत्समानार्थ उभयशब्दः । तयापि तु
प्रकृतित्वेनोभादित्युपादानसामर्थ्यात् तत्रैकार्थीभावविषयेऽप्युभशब्दः प्रयुज्यत।उभाहस्त्यादयस्तु द्विदण्डयादयः । तत्र च
शब्दशक्तिस्वाभाव्यादेवोभशब्दः समुदाय-

रूपेणार्थमाचष्टे द्विशब्दवत् ।। 120 ।।

तदेवमभेदैकत्वसंख्यायाः प्रसङ्गायातं किञ्चिन्निर्णीतम् । इदं त्वत्र चोद्यते--

"ईदूदेद् द्विवचनं प्रगृह्यम्"(पा.1-1-11) इत्यत्र वार्तिकेऽभिहितम्--`ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः' इति ।
कुमारयोरगारं कुमार्यगारमिति,

श्रुत्येदाद्यन्तं प्रत्ययकक्षणेन च द्विवचनान्तमिति प्रगृह्यसंज्ञाप्रसङ्गश्चो-

दितः । स नोपपद्यते, वृत्तावभेदैकत्वसङ्ख्याभ्युपगमे द्विवचनान्तस्य

समासाभावादित्याह--

प्राप्तिः प्रगृह्यसंज्ञाया न स्यात् प्रत्ययलक्षणात् ।
कुमार्यगारे न ह्यस्ति समासो वचनान्तरे ।। 121 ।।

व्याख्यातार्थाः श्लोकः ।। 121 ।।

अन्यदपि चोदयितुमाह--

एकद्वयोर्यञादीनां विभाषा लुङ् न कल्पते ।
यौष्माकस्तावकश्चेति भेदाभावान्न सिध्यति ।। 122 ।।

`यञादीनामेकस्य द्वयोर्वा तत्पुरुषे षष्ठया उपसङ्खयानम्' (भा.वा.2/4/64)

इति पक्षे लुगुक्तो वाक्यकारेण । गार्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलमिति वा,

गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलमिति वेति प्रयोगसिद्धयर्थम् । स चाभेदैकत्वा-
भ्युपगमे द्विवतनान्तानां समासाभावादेकवचनस्यापि द्वयादिप्रतिपक्षस्याभावाद्
विरुध्यते । तथा सूत्रकारमतेनाप्यभेदैकत्वं विरुध्यते ।

तथाहि--"तवकममकावेवचने"(पा.4-3-3 इति युष्माकास्माकबाधकावेकवचने
विदधात्यादेशौ । ततश्च यौष्माक इति वृत्तौ द्वित्वादि मन्यते । तावक इत्येकत्वं
द्वित्वादिप्रतिपक्षमिति कथमभेदैकत्वं स्यात् ।। 122 ।।

किञ्च,

दृष्टो गार्ग्यतरे भेदस्तथा गर्गतरा इति ।
युष्मत्पिता त्वत्पितेति तथादेशौ व्यवस्थितौ ।। 123 ।।

बहुषु "यञञोश्च"(पा.2-4-64) इति लुग्विधानाद् गार्ग्यतर इति प्रत्ययश्रुतौ
नियतं द्वित्वैकत्वे प्रतीयेते, गर्गतरा इति च बहुत्वमिति कथं वृत्तावभेदैकत्वा-
प्रादुर्भावः ? तथा प्रत्ययोत्तरपदयोः "त्वमावेकवचने"(पा. 7-2-97) इति वचनाद्

त्वत्पिता मत्पितेत्येकत्वं प्रतीयते । युष्मत्पिता अस्मत्पिता इति तु द्वित्वबहु-
त्वावगतिरिति । सर्वमेतद् वृत्तावभेदैकत्वाभ्युपगमे विरुध्यते ।। 123 ।।
अत्र प्रतिविधीयते--
उपाधिभूता या सङ्खया प्रकृतौ समवस्थिता ।
आदेशैः संज्ञया वापि विभक्त्याव्यज्यते विना ।। 124 ।।
विद्यमानासु सङ्खयासु तत्संसर्गमय्यभेदैकत्वसङ्ख्या प्रादुर्भवतीत्युक्तम् । तथाच यत्र सङ्ख्याविशेषनिबन्धनमस्ति, तत्रासौ प्रतीयत एवेत्युपसर्जनपदविषये या
प्रकृतिः प्रातिपदिकं तद्विशये तदर्थस्यावच्छेदकत्वेन या भेदसङ्ख्या समवेता, सा
प्रगृह्यसंज्ञाप्रवृत्त्या कुमार्यगारम्' इत्यत्र प्रतीयत एव ।
यदि ह्यत्र प्रगृह्यसंज्ञा स्यात्, तदा प्रकृतिभावे सति द्वित्वमुपसर्जनार्थस्-
यावगम्येत, द्विवचनान्तस्य प्रगृह्यसंज्ञाविधानात् । एवं `तावकः,त्वत्पिता'
इत्यादावप्यादेशादेकवचने विहिताद् विशेषाद् विशेषावगतिः । उपसर्जनस्य हि
प्रातिपदिकस्यापि चैकत्वसङ्ख्यास्वीकारसामर्थ्येऽपि विशेषाभिव्यक्तौ नास्ति
सामर्थ्यमिति तत्र विभक्तिं सहायपेक्षते । एवमादेशाद्यपीति ।
अत एव केचित् प्रकृतिरिव प्रकृतिर्विशेषसङ्ख्यायाः अभेदैकत्वसङ्ख्या,
ततोऽस्या उद्भवादिति तत्रैकात्म्येनावस्थिता सोपसर्जनपदेन शक्तिप्रतिघातादप्रका-
शिता विभक्त्येवादेशैः प्रकाश्यत इति व्याचक्षते । गर्गकुलादौ चैकद्वयोरपि लुगा-
देशे, प्रकरणाद् विशेषावसायो भविष्यति ।
अनारम्भे तु लुको बहुष्वेव लुग्विधानाद् `गर्गकुलम्' इत्येकत्वाद्वित्वप्रतीति-
र्नैव स्यात् । बहुषु तु लुगपत्ये नियमार्थमवश्यारम्भणीयः । एवं `युष्मत्पिता'
इत्यादौ प्रकरणाद् द्वित्वबहुत्वनियमावधारणम्,`गार्ग्यकुलम्' इत्यादौ च ।
इत्थं च कृत्वा `द्विवचनबहुवचनान्तानामसमासः' इति नेदं वचनं सम्भवति,
विशेषावगमे समासप्रवृत्तेः । राजपुरुषादौ तु विशेषावगमनिबन्धनाभावाद् वृत्तिपदमन्-
वाख्यातुं प्रक्रियायां सदृशस्य वाक्यस्य कल्पनादेकवचनान्तानामेव तद्युक्तमिति
न्यायसिद्धार्थानुवादोऽयमत्र ।
यत्र तु द्वित्वाद्यभिव्यक्तिसम्भवः, तत्र समासप्रकृतौ प्रक्रियावाक्ये कुमा-
र्योरगारमित्यादावुपादीयत एव द्विवचनादीति न कश्चिद् विरोधः ।। 124 ।।
अनेनैव च न्यायेनेदमपि सिद्धमित्याह--
शौर्पिके मासजाते च परिमाणं स्वभावतः ।
उपाधिभूतामाश्रित्य सङ्ख्यां भेदेन वर्तते ।। 125 ।।
शर्पेण क्रीतो, मासो जातस्य यस्य सः--शौर्पिको, मासजात इत्यत्र यद्यभेदैकत्व-
सङ्ख्या स्वात्मान्तर्गतसङ्ख्याविशेषानुपादनेन वर्तेत, तदा अनियतसङ्ख्यत्वे विशेषण-स्य क्रीतजातयोर्नियतमूल्यावगमो वयोविशेषावगतिश्च न स्यात् । परिच्छेदार्थं च
शौर्पिकादयः शब्दाः प्रयुज्यन्ते । तत्र च मूलबाधाया अन्याय्यत्वात्, प्रयोगस्वभा-
वादर्थानामात्मभूतं प्राथमकल्पिकं चैकत्वं सङ्ख्याभेदं प्रातिपदिकार्थावच्छेदकमुपा-

दाय परिमाणं वृत्तिमनुभवति ।। 125 ।।

एतदेवाह--

वयस्विनि परिच्छेदः क्रीते चापि न गम्यते ।

इष्टो भेदादृते तत्र परिमाणमनर्थकम् ।। 126 ।।

इष्टोऽभिमतः परिच्छेदो भेदमेकत्वसङ्ख्यालक्षणमन्तरेण क्रीतजातयोर्न गम्यत
इति तत्रैकत्वानुपादाने शूर्पमासयोः प्रयोगो निष्फलः स्यात् ।

ननु चात्र अशूर्पव्यावृत्तये सप्तरात्रादिव्यवच्छेदाय च प्रयोगस्य साफल्यं
स्यात् । नैतदस्ति । अनियतसङ्ख्यत्वे परिमाणस्य परिमेयविशेषो नावधार्यते ।
तद्विशेषावधारणायैव च प्रयोगः परिमाणशब्दानाम् । ते च स्वभावादेव परिच्छिन्न-
रूपार्थाभिधायिनः । ततश्च प्रयोगप्रामाण्यादुपसर्जनार्थस्यैकत्वविशिष्टस्यात्रावगतिः, परिमाणशब्दैरक्तपरिमाणस्यार्थस्याभिधानात् ।। 126 ।।

अत एव--

भिन्नस्याभेदवचनात् प्रस्थादिभ्यः शसो विधिः ।

तद्धर्मत्वादभेदात् तु घटादिभ्यो न दृश्यते ।। 127 ।।

सङेख्यैकवचनाद् वीप्सायां शसो विधानेऽन्वर्थत्वादेकवचनशब्दस्य प्रातिपदिकादेकत्वसङ्ख्यावच्छिन्नार्थाभिधायिनः शस् , न त्वेकवचनान्तात् । एवञ्च वृत्तौ
भिन्नस्य द्रव्यस्य, न तु जातेः;अभेदो यदेकत्वं तस्याभिधानात् परिमाणशब्देभ्यः
प्रस्थादिभ्यः शस्प्रत्ययो भवति । ते हि शब्दशक्तिस्वाभाव्यादेकत्वसङ्ख्यापरिच्छिन्नं स्वार्थमाचक्षत इति तद्धर्मत्वादुक्तपरिमाणार्थाभिधायित्वाद् वृत्तावभेदैकत्व-प्रादुर्भावेऽप्येकत्वावगमाच्छसुत्पत्तिः, प्रस्थशो ददाति, खारिशो ददातीति । घटादिशब्देभ्यस्तु न भवति शस्, ते हि जातिशब्दः ।
तथा च जात्यभेदादभेदैकत्वसंख्यायोग इति न ते भिन्नस्य द्रव्यस्याभेदमभिदधति,
अपि तु जातेः । सा च व्यक्तिभेदेऽपि स्थितेत्यनियतसङ्ख्याश्रयजातिवाचित्वे

घटादिशब्दानां वृत्तौ नियमेन व्यक्त्योकत्वान्तर्भावनाशक्तत्वान्नैकार्थाभिधाननिमित्तः प्रत्ययः । दृशिग्रहणं चात्र प्रयोगानिसरणार्थम् । घटशे ददाति इति प्रयोगो नदृश्यते ।
यत्र तु जातिशब्दानामपि व्यक्तिविशेषप्रत्यायनपरतया प्रयोगः, तत्रैकत्वाद्यवगमदर्शनाद् भवत्येव शस् ।
तद् यथा--`यो वा इमां वाचं वर्णशः पदश अक्षरशो वापि दधाति, स आर्त्विजीनो
भवति' (म.भा.पस्पश.) इति । अत्र हि वर्णसमदायरूपत्वात् पदस्य वर्णेभ्यो भेदेन
निर्देशसामर्थ्यादेकव्यक्तिविवक्षा निश्चीयते । तदेवमभेदैकत्वसङ्ख्याभ्युपगमे यो
विरोध उद्भावितः, स निवारितः । सर्वसंङ्ख्याभेदसंसर्गस्वाभावायां तस्यां यथानिबन्धनं विशेषाविर्भावनस्योपपत्तेरिति युक्तिसिद्धत्वादेतदनुसारेण सूत्रवार्तिकवच-

नानि गमयितव्यानि ।। 127 ।।

इदानीम्`तद्रपेऽवयवे वृत्तौ संख्याभेदो निवर्तते' (वा.प.वृत्ति 100) इति ये भेदापोहलक्षणामभेदैकत्वसंख्यां मन्यन्ते, तन्मतेऽपि विरोधपरिहारायोपक्रमते--

श्रूयते वचनं यत्र भावस्तत्र विशिष्यते ।
निवर्तते यद् वचनं तस्य भोवो न विद्यते ।। 128 ।।

यत्र वाक्ये एकवचनादि श्रूयते, तत्र भावः संख्यालक्षणो धर्मो विशिष्यते,
अन्यस्माद् व्यावृत्तौ विशिष्योऽवसीयते ।
यत्तु वृत्तावेकवचनादि निवर्ततेऽपैति, तस्य भावः स एव संख्यालक्षणो धर्मः
प्रत्याय्यो न विद्यते नास्ति । तदभावादेव हि तत्र तद्वचनस्य निवृत्तिः ।। 128 ।।

सैव तु स्वाभाविकी लुकान्वाख्यायते प्रत्ययलक्षणप्रसिद्धय इत्याह--

कार्यं सत्ताश्रयं शास्त्रदप्रवृत्तिरदर्शनम् ।
वाक्ये दृष्टं यदत्यन्तमभावस्तस्य वृत्तिषु ।। 129 ।।

इह वृत्तौ विभक्तीनामर्थाभावादेवाप्रवृत्तिरनुत्पत्तिः प्रागभाव एवा-
दर्शनम् । तदाश्रित्य प्रत्ययसत्ताश्रयं कार्यं शास्त्रात् `प्रत्ययलोपे प्रत्ययल-
क्षणम्'(पा.1-1-62)इत्यस्मात् प्रवर्तयितुं लुक्छास्त्रमारभ्यते । तवकादिरादेशः
प्रगृह्यसंज्ञा च सति प्रत्ययेऽनुशिष्टेर्वृत्तौ संख्याविशेषाभावादसति प्रत्यये न स्यादिति प्रक्रियायां प्रत्यय उत्पाद्यते । तस्य प्रसक्तस्यादर्शनं लुगिति प्रत्य-यलक्षणेन तत्सिद्धिः ।
कथमप्रवृत्तिः प्रागभावोऽदर्शनमिति चेद्, वाक्ये दृष्टस्य वृत्तावदर्शनाद् वचन-स्य । वृत्तिवाक्ययोर्हि शब्दान्तरत्वेनात्यन्तं भेदादर्थाभावादेवाप्रवर्तनं वृत्तौवचनस्य, न तु प्रध्वंसभाव इत्यर्थः ।। 129 ।।
यद्येवं सुपामनुत्पादनाद् वचनविशेषाक्श्रया विधयः प्रत्ययलक्षणेनापि कथं
लभ्यन्त इत्यत आह--

संज्ञाविषयभेदार्थं प्रसक्तादर्शनं स्मृतम् ।

क्षूयमाणं तु वचनं विशिष्टमुपलभ्यते ।। 130 ।।

सर्वस्य प्रत्ययस्य स्वविषयादन्यत्रात्यन्तादर्शनमित्यतिप्रसङ्गनिवारणाय लोप-
संज्ञाया विषयनियमार्थम् "सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात्" इत्युक्तम्। यद्यपि चात्रार्थाभावाच्छास्त्रीयापि नास्ति प्राप्तिः, तथापि स्वाभाविक एवाप्र-योगो लुका ज्ञाप्यते । न हि संभवदर्थः शब्दः शक्यते वचनेन निवर्तयितुम् । अप्राप्त्यनुमानमेव हि बाधा ।
एवञ्च लुक्छास्त्रैणैवात्र प्रसक्तोराख्यानात् प्रक्रियायां सुप उत्पन्ना निव-
र्त्यन्ते । प्रयोगसमवायिनि हि वाक्ये श्रूयन्ते नियताः सुपः । तच्चान्यदेव
वृत्तेः । तत्सदृशं तु प्रक्रियावाक्यं वृत्तिप्रकृतिभूतं कल्प्यते ।
तत्र च सुपः प्रयोगसमवायिवाक्यानुसारेणैव कल्प्यन्ते तथा च तत्र प्रक्रिया-
वाक्ये विशिष्टमेव वचनं श्रूयते ।
तत्र हि यदुपलभ्यते वचनं तच्छतत्वादेव विशिष्टं विज्ञायते । ततश्च कारणानु-
रूपत्वात् कार्यस्य वृत्तावपि लुका ज्ञाप्यमानं विशिष्टमेव वचनं प्रत्ययलक्षणेन
स्वकार्यं प्रयुङ्क्त इति राजपुरुषादौ वचनविशेषकार्यस्याभावाद् वचनमात्राश्रयं

नलोपादिकार्यं प्रवर्तते ।
तथा च तत्र भूतपूर्वो वचनभेदो नावगम्यत इति संख्याविशेषावगमाभावः ।
तवकादयस्त्वादेशाः प्रगृह्यसंज्ञा च प्रत्ययलक्षणकार्यं वचनविशेषप्रतिबद्धमिति तत्रवचनभेदस्य भूतपूर्वस्यावगमाद् भवति तन्निबन्धनः संख्याविशेषावसायः ।
"श्रयते वचनं यत्र भावस्तत्र विशिष्यते"(वा.प. 3वृ.130)
इति वचनभेदनिबन्धनो हि संख्याभेदावगमः ।

स चात्रादेशादिनानुमितसन्निधान इति कथं स्ववाच्यं न प्रत्याययेदित्यर्थः ।
तदेवं पूर्वमादेशादेरेवाभेदैकत्वसंख्यान्तर्भूतस्य संख्याविशेषस्यावगम इति समर्थितम् ।
इह त्वसत्यपि संख्याविशेषान्तर्भावेऽभेदैकत्वसंख्यामादेशादिना विशिष्ट-
प्रकृत्यानुमाने स्ववाचकद्वारेणैव संख्याभेदप्रतिपत्तिरिति भेदः ।। 130 ।।
अत्र तु दर्शने दोषमाह--
अभावो वा लुको यत्र रूपवान् वा विधीयते ।
व्यभिचारान्निमित्तस्य तत्रासाधुः प्रसज्यते ।। 131 ।।
प्रक्रियावाक्ये यादृशं विशिष्टं वचनम्, तादृश एव प्रसक्तस्य वृत्तौलुगित्युच्-
यते । तथा च यत्र लुकोऽभावः "पञ्चम्याः स्तोकादिभ्यः" (पा.6-3-2) इत्यादौ,
तत्र द्वित्वबहुत्वयोः `स्तोकाभ्यां मुक्तः'`स्तोकेभ्यो मुक्तः' इति प्राप्नोति ।

इष्यते च स्तोकान्मुक्त इत्येवेत्यलुक एकवद्भावो वक्तव्य एव स्यात् । स चाशिष्य इत्युक्त इति विरोधः । एकत्वं हि वृत्तौ प्रतीयते । `स्तोकाभ्यां मुक्तः' इत्यादौ चैकत्वाख्यस्य वृत्तिनिमित्तस्य वचनान्तरश्रुतौ परित्यागाद् द्वित्वादावपशब्दोऽयं स्तोकान्मुक्त इति प्राप्नोति ।
तथा रूपवान् भावात्मकस्तवकाद्यादेशोऽप्येकार्थत्वे विधीयते । अन्वर्थो हि तत्रैकवचनशब्दः । तत्र यदि वृत्तौ भेदापोहलक्षणाभेदैकत्वसंख्याभ्युपगम्यते, ततो द्वयादिप्रतिपक्षभूतस्यैकत्वलक्षणस्यादेशनिबन्धनस्य वृत्तौ परित्यागात्

तवकादिस्तत्रासाधुरप्रयोगार्ह एव स्यात् ।। 131 ।।
तस्मादयमत्र मतद्वयेऽपि परमार्थरूपः सिद्धान्त इत्याह--
भेदः संख्या विशेषोवाव्याख्यातो वृत्तिवाक्ययोः ।
सर्वत्रैव विशेषस्तु नावश्यं तादृशो भवेत् ।। 132 ।।
किमनेन दुःसमर्थेनाभेदैकत्वेनाभ्युपगतेन ? शब्दानामभिधानशक्तयो हि विचित्राः ।
ता विशेषेणानुसर्तुमशक्याः किञ्चित् सामान्यमाश्रित्य ज्ञाप्यन्ते ।
तथा च वृत्तावेकार्थीभावकृतं वाक्याद् विशेषं दर्शयता भाष्यकारेण यः संख्याभेदावगमलक्षणो विशेषो वृत्तौ व्याख्यातो वाक्ये च भेदः संख्याविशेष इति, सोऽभेदेन वृत्तिपदानि प्रातिस्विकभेदानाश्रयेणोपादाय बोद्धव्यः ।

तथाहि--न सर्वत्र वत्तिपदे संख्याविशेषाप्रतीतिः, शौर्पिकमासजाततावकीनादौ
विशेषप्रतीतेः । अस्ति तु राजपुरुषादावविशेष इत्येतावता वाक्याद् भिन्ना वृत्तिर्ल-क्षिता भवत्येव । तद्यथा क्रियावद् गुणवत् समवायिकारणं द्रव्यमित्युक्ते गगनादीनां क्रियावत्त्वाभावेऽपि गुणादिभ्यो द्रव्यस्य भेदः सिध्यत्येव । तेषां कदाचिदपि क्रियावत्त्वाभावात् । द्रव्यस्य तु कस्यचित् कदाचित् तथाभूतत्वात् ।
एवं वाक्ये सर्वत्रैव संख्याभेदप्रतीतेः क्वचित् तद्भूपापि वृत्तिस्ततोऽन्या
भवत्येव ज्ञापिता । सर्वं हि लक्षणं सामान्येनैव प्रवर्तते, प्रतिव्यक्तयशक्यत्वात्तत्प्रणयनस्य । देशकालस्वभावभेदेन विचित्रत्वान्मात्राणाम्, विशेषतः शब्दानामभिधान-शक्तिनियमस्यायोगादिति सति निबन्धने तावकीनादौ संख्याविशेषप्रतिपत्तिर्भवन्ती

लक्षणवयभिचाराय न प्रभवति, सामान्ये लक्षणस्य प्रवृत्तेः सकृत्प्रवृत्तावपि चरिता-
र्थत्वादित्यर्थः ।। 132 ।।
यथा च वृत्तौ संख्याविशेषः क्वचिन्न प्रतीयते, तथा लिङ्गविशेषोऽपि । ततश्च
कुक्कुटयादीनामण्डादिषु पुंवद्भावः "न वा अस्त्रीपूर्वपदस्य विवक्षितत्वात्"
(भा.वा.6-342) इति प्रत्याख्यातः ।
तद् व्याचष्टे--
जातेश्च भेदहेतुत्वान्न लिङ्गेन विशेष्यते ।
प्रधानं मृगदुग्धादौ गार्गीपुत्रे न स क्रमः ।। 133 ।।
`मृग्दुग्धम्, कुक्कुटाण्डम्, छागमांसम्'त्यादौ दुग्धादेरुत्तरपदार्थस्य प्रधान-स्यावच्छेदाय मृगादिपूर्वपदार्थो विशेषणमुपादीयत इति जातिपरायां चोदनायां लिङ्ग-
विशेषस्याविवक्षेति `मृगस्य दुग्धम्' इत्यादिरेव विग्रहः । जात्यन्तरनिवृत्तिपरायांचोदनायां मृगादयः शब्दा नियतजातिवाचका निरस्तलिङ्गभेदा एव प्रभवन्ति
विवक्षितेनार्थेन प्रधानमवच्छेत्तुम् ।
तदेतदुच्यते--"अस्त्री पूर्वपदस्य विवक्षितत्वात् " इति । अस्त्र्यर्थत्वे हि
पूर्वपदस्य किमन्यज्जातिविवक्षायां स्यात् ? तत्राण्डादीनां स्त्रीपुंससाधारण्यात्
कुक्कुटस्याण्डम्,छागस्य मांसमिति कुक्कुटादिना विशेषणमनर्थकम्, अव्यभिचारात् ।
यदा त्वन्यजातिनिवृत्तिरेव विशेषणमभिसंहितम्, तदा वाक्यमेव भवति, न समासः ।
ततो विशेषस्यानिश्चयात् । निवृत्ते हि स्त्रीप्रत्यये स्त्रीत्वस्यानभिव्यक्तेः सैवसामान्यविवक्षा पुंवद्वचनेन सूच्यते ।
क्वचित् तु सर्वथैव लिङ्गविशेषयोगो भवत्युपसर्जनार्थस्य । तद् यथा गार्गीपुत्र-
छागलीमूत्रमहिषीमूवादिषु । पुत्रस्य हि निन्दाप्रशंषापरतया मूत्रविशेषस्य चार्थ-
क्रियाभेदकारित्वात् स्त्रियैव विशेषणं युज्यते ।
तथा चैवमादौ न सानुपूर्वी या कुक्कुटयादिषु (कुक्कुटाण्डादिषु) । तत्र हि
लिङ्गसामान्ययुक्तः पूर्वपदार्थः ।
अत एवादिशब्देनैवंभूता जातिपरा एव कुक्कुटीप्रकारा अभिमताः । न तु यत्र
व्यक्तिविवक्षा प्रयोजनवती गार्गीपुत्रादौ, तेऽपि गार्गीप्रभृतयोऽत्र गृह्यन्त
इति प्रत्युदाहरणमत्रैते भवन्ति । इत्थं च कृत्वा संख्याया इव लिङ्गस्यापि
विषयनियमेन विवक्षाऽविवक्षे विज्ञेये ।। 133 ।।

यतश्च जातिपरत्वे लिङ्गसंख्याभेदस्तिरोधीयते, अत एव--
अभेदे लिङ्गसंख्याभ्यां योगाच्छुक्लं पटाइति ।
प्रसक्ते शास्त्रमारब्धं सिद्धये लिङ्गसंख्ययोः ।। 134 ।।
इह पदावधिकेऽन्वाख्याने पदान्तरानपेक्षया पदे संस्क्रियमाणे नियतावाक्यगत-
विशेषानवधारणात् सामान्ये स्वार्थमात्रे लिङ्गसर्वनामनपुंसकयोगात् सङ्खयासर्वनामा-
भेदैकत्वयोगाच्च शुक्लमिति पदे स्थिते, पटा इति पदान्तरसमन्वयोपजनेऽप्यभि-
निर्वृत्तस्यान्तरङ्गस्य संस्कारस्यानिवृत्तेः पटा इत्यसमन्वितार्थात्वादसमानाधिक-
रणेऽपि प्रयोगे प्राप्ते "विशेषणानां चाजातेः" (पा.1-2-52) इति विशिष्टलिङ्गसङ्-
खयासिद्धयर्थमारभ्यते शास्त्रम् ।
लुबन्तविशेषणानां हि लुबर्थसमानाधिकरणत्वात् "लुपि युक्तवद्" (पा.1-2-51)
इत्यानेनैव लुबर्थगतलिङ्गसङ्खययोः सिद्धत्वाद् "गुणवचनानामाश्रयतो लिङ्गवचनानि"
(म.भा.1/2/51)इत्यस्मिन्नर्थे सूत्रमवस्थापितं भाष्ये । विशेषणानां तैर्युक्तस्येव व्यक्तिवचने भवत इति सूत्रार्थः ।। 134 ।।
तत्र विशेषणशब्देन सामान्यवाचिना गुण एव कथमभिधीयत इत्याह--
परार्थं शेषभावं यो वृत्तिषु प्रतिपद्यते ।
गुणो विशेषणत्वेन स सूत्रे व्यपदिश्यते ।। 135 ।।
भेदकं विशेषणमिति यद्यपि प्रतीतम्, तथापीह परतन्त्रमात्रं विवक्षितम् ।
तथाहि--तद्धितग्रहणसंबद्धस्य युक्तवदित्यस्यानुवृत्तेस्तद्धितार्थयोग एकार्थीभावे
तद्धितवृत्तिषु यो भावः श्रूयते, अन्यं तद्धितार्थमात्मोपधानेनोपकुर्वन् स गुणोऽ-
त्र विशेषणमित्युक्तः । स हि मतुब्लोपात्, मत्वर्थीयाकारान्ततया वा द्रव्यसामान्ये प्रक्रान्तः, तदाश्रितत्वेनात्यपारतन्त्र्याद्
विशेषणम् ।
यस्तु व्यधिकरणः पटस्य शुक्ल इति, स गुणमात्रप्रतिष्ठो द्रव्येण विशेष्य-
माणत्वाद् विशेषणमेव न भवति ।
पुंलिङ्गे च गुणे एकत्र तस्य प्रथमत एव प्राप्तसंस्कारत्वान्न लिङ्गसङ्खयाभेदा-
काङ्क्षा । द्रव्यसमानाधिकरणस्य तु द्रव्यसामान्ये नपुंसकैकत्वयोगिनि स्थितस्य
द्रव्यविशेषलक्षणाश्रयधर्माकाङ्क्षिणो युक्ता विशिष्टद्रव्यलिङ्गवचनप्रतिपत्तिः ।
तस्माद् गुणमुक्तवान् गुणवचनः शुक्लादिरत्र सूत्रे विशेषणमुच्यते ।
यद्यपि चास्य लुप्तप्रत्ययस्य विशेष्यवचनता, तथापि विशेष्यसामान्यवृत्तित्वाद्
विशेषाकाङ्क्षित्वात् तं प्रति विशेषणत्वं भवत्येव ।। 135 ।।
वाक्यावधिके तर्ह्यन्वाख्याने पदान्तरापेक्षया शुक्लो गुणोऽस्य पटस्यास्तीत्यु-क्रम एव विशिष्टलिङ्गसंख्यासिद्धौ किमर्थं
सूत्रमित्याशङ्कयाह--
शब्दान्तरत्वाद् वाक्येषु विशेषा यद्यपि श्रुताः ।
वृत्तेरभिन्नरूपत्वात् तेषु वृत्तिर्न विद्यते ।। 136 ।।
शुक्लो गुणोऽस्य पटस्यास्तीति यदिदं विशेषवाक्यम्, तन्मतुब्लोपात्, मत्वर्थीया-
कारान्ततया वा या वृत्तिस्तस्या भिन्नरूपमेवेति प्रागेव प्रतिपादितम् । ततश्च
वाक्यगता विशेषा वृत्तौ नान्तर्भवन्ति । अभिन्नरूपा हि वृत्तिः पटादिविशेषेष्विति

तस्य (तस्यां) नियतवाक्यगतविशेषाभिव्यक्तिर्नास्तीति सर्वथा सामान्यापेक्षमेव वृत्तिपदानुशासनमिति विशेषलिङ्गसंख्यासिद्धयर्थमिदमारम्भणीयमेव सूत्रम् ।। 136 ।।

नन्वेमपि नियतविशेषनिष्ठस्यैव सामान्यस्य प्रतिपाद्यत्वादनिर्धारितोऽपि विशेषो भविष्यत्यन्वाख्याननिमित्तम्, समन्वयान्यथानुपपत्त्या वा बहिरङ्गमप्याश्रयलिङ्गसंख्यं प्रतीक्षिष्यते । कथमन्यथा सत्यपि वचने तत् सिध्येदित्याशङ्कयाह--

रूपाच्च शब्दसंस्कारः सामान्यविषयो यतः ।
तस्मात् तदाश्रयं लिङ्गं वचनं च प्रसज्यते ।। 137 ।।
सलिङ्गं च ससङ्ख्यं च ततो द्रव्याभिधायिना ।
सम्बध्यते पदं तत्र तयोर्भिन्ना श्रुतिर्भवेत् ।। 138 ।।

इह योऽर्थः शब्दात् प्रतीयते, स एव संस्कारनिमित्तम् । अस्माच्च वृत्तिपदादभिन्नरूपात् सर्वविशेषसाधारणाच्छ्रुतिसामान्यस्वभावादर्थसामान्यं प्रतीयते, न तु विशेषः ।

तथा च विवक्षितस्यापि विशेषस्याप्रतीतस्यासत्समत्वात् सामान्यनिबन्धनमेवान्वाख्यानं युक्तमिति सामान्याश्रययोर्लिङ्गसङ्खयोः प्राप्तिः ।। 137,138 ।।

तयोश्चान्तरङ्गयोः कृतयोर्विशेषसन्निधानेऽपि त्यागाभावाद् व्यधिकरणत्वादसंबन्धे वचनानुसारिणं प्रति प्राप्ते--

भाविनो बहिरङ्गस्य वचनादाश्रयस्य ये ।
लिङ्गसङ्ख्ये गुणानां ते सूत्रेण प्रतिपादिते ।। 139 ।।

वाक्ये पदानां प्रयोगयौगपद्याभावाद् भाविग्रहणमसमानकालताप्रतिपादनपरम्, पूर्वप्रतिपादनेऽप्याश्रयस्य पदान्तरसंस्कारेऽनपेक्षणात् । अत एव बहिरङ्गत्वमनपेक्षणादाश्रयस्याश्रितसंस्कारे । एवमपि वचनसामर्थ्याद् बहिरङ्गोऽप्यर्थोऽपेक्ष्यत इति विशिष्टलिङ्गवचनसिद्धिः "विशेषणानां"(पा.1-2-52) इति सूत्रारम्भात् ।। 139 ।।

यदा तर्हि प्रथमत एव तद्वितवाच्यत्वं विशेष्यस्याभिधित्सितम्, तदा किं वचनेनेत्यत आह--

विशेषवृत्तेरपि च रूपाभेदादलक्षितः ।
यस्माद् विशेषस्तेनात्र भेदकार्यं न कल्पते ।। 140 ।।

विवक्षितेऽपि विशेषे वृत्तिपदस्य साधारण्याद् यदनवधारणं तस्य तत इत्यशब्दार्थोऽन्वाख्याननिमित्तं न भवति विशेष इत्युक्तमेवैतत् ।। 140 ।।

ननु च सामान्यस्य विशेषेषु प्रतिष्ठानात् तन्निबन्धनं कार्यं सामान्योपक्रमेऽप्यभिधानेऽनिवार्यं, निर्विशेषस्य सामान्यस्याभावादित्याशङ्कयाह--

विशेष एव सामान्यं विशेषाद् भिद्यते यतः ।
अभेदो हि विशेषाणामाश्रितो विनिवर्तकः ।। 141 ।।

इह व्यावृत्तिर्विशेषलक्षणम् । परस्परं व्यावर्तमाना हि विशेषाः कथ्यन्ते । तथा च

सामान्यमप्यभेदेनाश्रितं विशेषाणां निवर्तकत्वादविशेषो भवति । सामान्यविवक्षायां हिनियता विशेषा व्यावर्तिता भवन्ति । तत्र यथा नियतो विशेषः समाश्रितो विशेषान्तरं निवर्तयति, तथा सामान्यमपि विशेषानिति सोऽपि विशेषः । तदुक्तम् "सामान्यमपि यथा विशेषस्तद्वत" (म.भा.1/2/52) इति ।

एवञ्च पदान्तरानपेक्षेऽनुशासनेऽभेदः सामान्यमाश्रितं भेदानां निवर्तकमिति कथं विशेषगतलिङ्गसङ्खयालाभः ।। 141 ।।

ननु चाभेदस्य भेदनिवारणे तैरसावुत्तरकालं न संपद्येत, स्वानुरूपप्रत्ययजननं च तेषु, अतो न स्यादित्याशङ्कयाह--

यद् यदाश्रीयते तत् तदन्यस्य विनिवर्तकम् ।
भेदाभेदविभागस्तु सामान्ये न निरूप्यते ।। 142 ।।

अन्यव्यवच्छेदफलत्वाच्छब्दप्रयोगस्य विशेषवत् सामान्यमपि नियतविशेषव्यवच्छेदमाश्रितं सत् करोत्येवेति वीप्सया व्यवच्छेदकत्वं विशेषलक्षणं सामान्यस्यापि योजितम् ।

एवमपि च सामान्यं भेद इति नोच्यते, सामान्यान्तराणामपाकरणेन स्वाश्रयेष्वनुवृत्तेः ।

नाप्यभेद इति शक्यते निरूपयितुम्, नियतविशेषाणां सामान्यान्तराणां च व्यावर्तकत्वात् ।

इत्थं च यथा गौरिति मुख्येऽर्थेऽन्वाख्यातं सामानाधिकरण्यान्यथानुपपत्त्या वाहीकं गोत्वसमारोपेणाभिधत्ते, तथा शुक्लादिशब्दाः सामान्ये मुख्येऽर्थे संस्कृता विशेषैः पदान्तरोपादानैः संयुज्येरन्निति तयोर्भिन्ना श्रुतिर्भवेदिति बहिरङ्गाश्रयगतलिङ्गसंख्यासिद्धयर्थं सूत्रमित्येव स्थितम् ।। 142 ।।

ननु च पदवाच्यानामर्थानां वस्तूनामिव न किञ्चिदन्वयि रूपं दृश्यते, तत् किमेषां सामान्यमित्याशङ्कयाह--

अपोद्धारश्च सामान्यमिति तस्योरकारिणः ।
निमित्तावस्थमेवातस्तत् स्वधर्मेण गृह्यते ।। 143 ।।

यद्यपि स्थितलक्षणार्थविशेषविशयं वाक्यमेव वाचकम्, तथापि तस्मात् संसर्गरूपात् पदानामपोद्ध्रियमाणानां किञ्चिदर्थलेशलक्षणं सामान्यमप्यपोद्धारानुगुणं वाक्यार्थानुगुण्येनापोद्धारात् तदुपकारि व्यवतिषठते । अपोद्ध्रिते संसर्गात् पृथक्क्रियते इत्यपोद्धारः सामान्यमिति ।

एवमपोद्ध्रियमाणत्वेन तस्य सामान्यस्योपकारिणो वाक्यार्थभूतविशेषावगमोपायभूतस्येत्यर्थः । केवलाद्धयापोद्धृतात् पदादर्थसामान्यविषया प्रतिभा जायत इति तद्विषयः सामान्यं न विशेषः ।

तथाहि निमित्ते साकाङ्क्षरूपेऽवस्थितिर्यस्य, न विशेषात्मनि, तत् स्वेनात्मीयेन स्वभावेन निश्चीयते न भेदरूपेण, तस्यानियत्सयोपप्लवात् । अतश्च न विशेषलिङ्गसंख्याभ्यां संबध्यते पदार्थः ।

ननु च नियतवाक्यगतत्वात् पदानामपोद्धारेऽपि पदाभिधेया विशेषा एवेति

किमन्यत् सामान्यं स्यादित्याशङ्कयाह--
अनिर्धारितधर्मत्वाद् भेदा एव विकल्पिताः ।
निमित्तैर्व्यपदिश्यन्ते सामान्याख्याविशेषिताः ।। 144 ।।
पदानां विशेषाभिधानासामार्थ्यादनवगतनियतविशेषरूपा भेदा एव तेभ्यः प्रतीयमानाः
सामान्यमित्यनया संज्ञया कल्पनया व्यवस्थापिताः, न विशेषसमाख्यया । यतश्च
जातिगुणक्रियालक्षणैर्निमित्तैरुपाधिभिरवच्छिन्ना `गौः शुक्लो गच्छति' इत्यादिरूपेणते व्यपदिश्यन्ते, ततो भेदा एवैवंरूपा इति निश्चीयन्ते ।
यद्यपि हि पदैर्व्यवृत्तरूपोऽर्थो नाभिधीयते, तथाप्युपाधिरूपोरधानेनार्थाभिधा-
नाद् भेदा एवाभिहिताः, निरुपाधेः सर्वतोऽव्यावृत्तस्याव्यवहार्यत्वात् ।
दूरादपि रूपमात्रेण व्यक्तौ नैवावसीयते । तस्मात् सर्वस्या वृत्तेः प्रतीतर्भेद-
निष्ठत्वात् पदार्थानां विशेषस्य पदान्तरगम्यस्यानासादनमात्रात् प्रतीतिः सामान्य
स्येति व्यवस्थाप्यते ।
तत्त्वदृष्टया तु तद्वाक्योपादानस्य विशेषस्यानासादनादाकाङ्क्षणाच्च विप्लुत-
रूपत्वादसत्यैव पदार्थानां प्रतीतिः । उपायमात्रं तु सा वाक्यार्थप्रतीताविति
निर्णीतचरमेतत् ।। 144 ।।
तदेवं `विशेषणानाम्' (पा.1/2/52) इत्यारम्भः समर्थितः । `स्वाभाविकमेतत्'
इत्येवं तस्य भाष्ये प्रत्याख्यानमुक्तम् । तदुपपादयितुमाह--
यदा तु व्यपदिश्येते लिङ्गसंख्ये स्वभावतः ।
प्रयोगेष्वेव साधुत्वं वाक्ये प्रक्रम्यते तदा ।। 145 ।।
प्रयोगेष्वेव प्रयुज्यमानेष्वेव पदान्तरेषु वाक्यस्थानां वाक्यावधिकमन्वाख्यानं
यदा प्रस्तूयते, तदोपक्रम एवाश्रयविशेषसामानाधिकरण्यान्यथानुपपत्त्या सोऽयमित्यभि-संबन्धाच्छुक्लादीनां
विशेषलिङ्गसंख्यायोग इति स्वाभाविकमेतादित्युच्यते ।
अत्र हि दर्शने नास्तयेतद्रूपाभेदादलक्षितो विशेषः । न चाप्यन्तरङ्गबहिरङ्गभावः
कश्चित्, उपक्रम एवाश्रयविशेषस्यापेक्षितत्वात् । तथाचान्तरङ्गेऽर्थसामान्ये
संस्कारो पर्यवस्यति ।
तदेवं पूर्वं विच्छेदोपक्रमेऽन्वाख्याने गुणगुणिनोर्भेदमाश्रित्य तद्धितप्रयोगेसत्याश्रयसामान्ये वृत्तेरन्तरङ्गो लिङ्गसंख्यासर्वनामयोग उक्तः ।
इदानीं तु सोऽयमित्यभिसंबन्धाश्रयेणाभेदमाश्रित्य प्रथमत एव नियत-
वाक्योपात्तविशेषवृत्तिता कथिता । तथा चात्र भेदसंबन्धाभावान्मतुपो लुगकारो
वा न विधायत इति नास्त्यभिन्नरूपत्वं वृत्तेः, भेदसंबन्धविवक्षायामेव
तद्विधानात् ।। 145 ।।
नन्वेवमभेदविवक्षव न्याय्या, अन्यथा यथा भेदसंबन्धे गुणवचनेभ्यो मतुपो
लुग् विधीयते, तथा जात्यापि योगे विवक्षिते जातिशब्देभ्योऽपि कस्मात् स न
विधीयत इत्याशङ्य जातिगुणयोर्द्रव्यसमवेतत्वाविशेषेऽप्यवान्तरविशेषप्रतिपादनायाह-- तत्र प्रयोगोऽनियतो गुणानामाश्रयैः सह ।
सामान्यं यत् तदत्यन्तं तत्रैव समवस्थितम् ।। 146 ।।

शुक्लादयो गुणाः समुपजाते द्रव्ये निमित्तवशादनियमेन समवयन्ति, यावदाश्रयं
च नावतिष्ठन्त इत्यनियतः प्रयोगो भेदेनाभेदेन च पटस्य शुक्ल, शुक्लः पट इति ।
जातिस्तूत्पत्तिप्रभृत्याविनादव्यभिचरितसंबन्धा द्रव्येणेति तदभेदेन सोऽयमिति
संबन्धाद् व्यवह्रियते सदैव, न तु कदाचिदपि भेदेन पटस्य शुक्ल इत्यादिवदिति
गुणशब्दा एव मतुब्लोपं भेदसंबन्धविवक्षायां प्रयोजयन्तीत्यर्थः ।
तथा च विच्छेदोपक्रमे सूत्रारम्भः समर्थितः ।। 146 ।।
एतदेव प्रकटयति--
न गोत्वं शाबलेयस्य गौरिति व्यपदिश्यते ।
शुक्लत्वं बाहुलेयस्य शुक्ल इत्यपदिश्यते ।। 147 ।।
भावप्रत्ययमन्तरेण व्यक्तेर्निष्कृष्टं सामान्यं नाभिधीयते जातावपि पदार्थ इति
सर्वथा व्यक्तिरूपतां प्राप्तमभेदेन तदभिधीयते । सोऽयमिति संबन्धाद्धि व्यक्तिरू-
पतां प्राप्तं सामान्यं तथैव निर्देशार्हम् ।
यदा तु व्यक्तेर्निष्कृष्टरूपं विवक्षितम्, तदा भानप्रत्ययान्तवाच्यं शाबलेयस्य
गोत्वमिति । जातावपि हि पदार्थे द्रव्याभेदं गताया जातेरभिधानाद् गोर्गोत्वमिति
प्रतीतिर्भिन्ना । गुणस्तु भेदेनापि कथ्यन्त इत्युक्तमेव । ततश्च तेभ्यो मतुपो
लुगुच्यते ।। 147 ।।
अन्यथा,
व्यतिरेके च सत्येवं मतुपः श्रवणं भवेत् ।
लुगन्वाख्यायते तस्माद् रसादिभ्यश्च नास्ति सः ।। 148 ।।
`पटस्य शुक्लः, इति भेदे सति संबन्धिवृत्तौ मत्वर्थीयप्रत्ययेनासावुच्येत इति
तत्रापि शुक्ल इत्येव यथा स्यादिति मतुपो लुगुच्यते । `अव्यतिरेकात् सिद्धमिति
चेद् दृष्टो व्यतिरेकः' इति हि भेदसंबन्ध एव लुक् समर्थितः । जातेस्तु नास्ति
भेदसंबन्ध इति तद्वचनाद् मतुब् नोत्पद्यते । अयमेव च विषयविभागो लुग्द्वारेणा-
ख्यायते अभिधानशक्तिनियमनिमित्तः । ततश्च यथा श्रूयमाणे प्रत्यये प्रकृत्यर्थाव-
च्छिन्नः प्रत्ययार्थोऽभिधीयते, तथा लुप्तेऽपि शुक्लादावित्युक्तं भवति । रसादि-
भ्यश्च स लुङ् नास्ति ।। 148 ।।
न हि ते मत्वर्थीयरहिताः स्वाश्रयमभिधातुं शक्नुवन्तीत्याह--
यत्सोऽयमिति संबन्धाद्रूपाभेदेन वर्तते ।
शुक्लादिवत् ततो लोपस्तद्रसादौ न विद्यते ।। 149 ।।
वचनग्रहणसामर्थ्याद् ये गुणमुक्त्वा तद्वति द्रव्ये सोऽयमिति संबन्धेन
यादृशा एव गुणमात्रे वृत्तास्तादृशा एव वर्तन्ते, तेभ्यो मतुपो लुग् विधीयते,
गुणमात्रवृत्तित्वस्य दर्शनाद् गुणिनि वृत्तिमाख्यातुम् ।
तत्र निमित्तरूपारोपेणाभेदविवक्षायां शुक्लादीनां द्रव्याभिधानपक्षे भेदनिमित्त-स्य मत्वर्थीयस्याप्राप्तौ किं लुका ? न च `शुक्लः
पटो विद्यते यस्य' इत्यत्र
बाह्ये व्यतिरेके विवक्षिते मतुपो लुगिष्यत इति, श्रौतस्यार्थस्यायोगाल्लाक्षणि-
कोऽर्थोऽत्राश्रीयते ।

ये सोऽयमिति संबन्धेन गुणनिमित्तद्रव्यवचना अविशिष्टरूपा दृष्टाः, तेभ्यः
संप्रति गुणमात्रवृत्तिभ्यो भेदसंबन्धविवक्षायां मतुपः श्रवणं मा भूदिति लुगन्वा-
ख्यायते ।
एवञ्च रसादयो व्यावर्तिता भवन्ति, यतस्तद्रूपाभेदेन रसादिशब्दानां तद्वति
वर्तनं नास्ति । सदैव हि ते मत्वर्थीयान्ता एव स्वाश्रयमाचक्षते रसवान् गन्धवानिति। तथा च "रसादिभ्यश्च"(पा. 5-2-95) इति प्रतिपदमारभ्यते मत्वर्थीयः ।
इनिठनावेभ्यो न दृश्यते इति पुनर्मतुबेव विधीयते ।
तथा च वार्तिकम् `रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम्' इति । अन्यस्य प्रकृत-
स्य प्रत्ययस्य निवृत्त्यर्थमित्यर्थः । रूपिण्यप्सरा इति तु शोभासंबन्धो गम्यते, नचक्षुर्गाह्यरूपगुणसमवायः । `रसिको राजा' इत्यदौ तु श्रृङ्गारादिरससंबन्धो न रसने-
न्द्रियग्राह्यगुणयोगो विवक्षित इति `गुणात्' इति गणे विशेषणाद् गुणशब्देभ्य एव
रसादिभ्य इनिठनोर्निवर्तनादन्यतस्तो भवत एव । उक्तेन न्यायेन तु लुगप्रसङ्गादन्य-
शब्देन वार्त्तिके लुगुच्यत इत्यपव्याख्यानम् ।। 149 ।।
तदेवमुपक्रम एव विशिष्टद्रव्यविवक्षायां स्वाभाविकमेतदिति गुणानामाश्रयेण सह
सोऽयमित्यभेदसंबन्धे सिद्धे लिङ्गसंख्ये इति प्रातिपादितम् । अत्रापि च पक्षे
सूत्रस्योपयोगं प्रतिपादयितुमुपक्रमते--
आवेशो लिङ्गसंख्याभ्यां क्वचिन्मञ्चादिवत् स्थितः ।
सोऽयमित्यभिसंबन्धे स प्रष्ठादौ न विद्यते ।। 150 ।।
इह सोऽयमित्यभेदसंबन्धविषये समारोप्यमाणस्यार्थान्तरे द्वैतं दृश्यते, आविष्ट-
लिङ्गसंख्यतातदभावश्च । तत्र `मञ्चान् युवतीः पश्य,वसांसि वा' इत्यत्र मञ्चशब्दः
तात्स्थयात् समारोप्यमाणोऽजहत्स्वलिङ्गसंख्य एव वर्तते स्वाधेये । तथा गिरिप्रभ-
वासु नदीषु सामीप्याद् गिरिरूपसमावेशेन गिरिशब्दोऽजहत्स्वलिङ्गसंख्य एव प्रवर्त-
मानो दृष्टः, गिरीन् सरितः स्यन्दमानाः पश्येति । प्रष्ठप्रचरादिशब्दास्तु स्वाभा-
र्यायां प्रस्थानादिक्रियासङ्गात् प्रवर्तमानाः परित्यक्तस्वलिङ्गसंख्या एव समावेश-
विषयालिङ्गसंख्योपादायिनो दृश्यन्ते ।
तथा च प्रष्ठी प्रचरीति स्त्रीलिङ्गेनैव समाख्यायते स्त्री । तदत्र द्वे अपि
लिङ्गसंख्ये परित्यक्ते निमित्तिनि प्रवर्तमानेन प्रष्ठादिशब्देन । मञ्चादिशब्दस्तुकश्चित् स्वगतं लिङ्गमेवापादायोपचारतनिमित्ते निमित्तिनि प्रवर्तते, मञ्चान्
योषितो हरीतक्यः फलानीति ।
कश्चित् तु वचनमेवानुवर्तते स्वगतन्, खलतिकं वनानीति ।
कश्चित् पुनर्दे अपि लिङ्गसंख्ये स्वगते समाश्रित्य तद्वति निमित्तिनि वर्तते
शब्दः ।
तद् यथा विंशतिर्ब्राह्मणा इत्यादि । एष च शब्दशक्तिस्वाभाव्यान्नियमो
विषयविभागेन सिद्धः ।। 150 ।।
शास्त्रेऽप्यस्यैवार्थस्यास्ति ज्ञापकमित्याह--
लिङ्गं लिङ्गपरित्यागे सूत्रे प्रत्ययशासनम् ।

सोऽयमित्यभिसंबन्धात् पुंशब्दे स्त्र्यभिधायिनी ।। 151 ।।
"पुंयोगादाख्यायाम्" (पा.4/1/48) इति प्रष्ठादिभ्यः स्त्रीप्रत्ययानुशासनं सोऽ-यमित्यभिसंबन्धेन स्त्रियां तेषां परित्यक्तस्वलिङ्गसंख्यानां प्रवृत्तिरित्यस्या-
र्थस्य ज्ञापकम् ।
तथा ह्याख्याग्रहणादभेदसंबन्धात् पुंशब्दाः स्त्रियां यो वर्तन्ते, ते गृह्य-
न्ते, न तु भेदसंबन्धेन प्रष्ठस्येयमिति तद्धितान्ताः ।
तथा च भाष्यम् "नहि तद्धितान्तमाख्या भवति" इति । सति तद्धिते पुमा-
ख्यानामभिन्नरूपाणामेव नास्ति स्त्रियां वृत्तिरित्यर्थः ।। 151 ।।
तदेवं प्रष्ठादीनामेव शब्दशक्तिस्वाभाव्यालिङ्गाच्च स्वलिङ्गसंख्यापरित्यागे-
नार्थान्तरे वृत्तिः, नान्येषामिति मञ्चादिशब्दवच्छुक्लादिशब्दानामपि सोऽयमित्यभि-
सबन्धेन द्रव्ये स्वलिङ्गसंख्यानामेव प्रवृत्तिप्रसङ्गे "विशेषणानां'(पा.1/1/52)
इति सूत्रमाश्रयविशेषगतलिङ्गसंख्यासिद्धयर्थमारभ्यत इत्याह--
आश्रये लिङ्गसंख्याभ्यामाश्रितं व्यपदिश्यते ।
विशेषणानां चाजातेरिति शास्त्रव्यवस्थया ।। 152 ।।
शब्दशक्तिस्वाभाव्यात् प्रष्ठादिवदाश्रयलिङ्गसंख्योपादाने सिद्धे "पुंयोगादाख्-
यायाम्'(पा.4/1/48)इतिवद् `विशेषणानां' (पा.1/1/52)इत्यपि शास्त्रमनुवादकम् ।
ततश्चाश्रयविषयाभ्यां लिङ्गसंख्याभ्यामाश्रितं शुक्लादिगुणरूपमभिधीयते सामानाधि-
करण्यान्यथानुपपत्त्येति स्थितम् ।। 152 ।।
तथाहि--
निमित्तानुवाधायित्वाद् ये धर्मा भेदहेतुषु ।
त आश्रयेऽपि विद्यन्त इति बुद्धिर्निवर्त्यते ।। 153 ।।
निमित्ताद् निमित्तवत्यर्थे निमित्तसरूपः प्रत्ययो जायत इति निमित्ते शुक्लादिना
गुणेन निमित्ती द्रव्याविशेषस्तिरोहितरूपोऽभिधीयत इति तेषु भेदहेतुषु निमित्तेषु
ये धर्मास्ते तत्राश्रये निमित्तिनि सर्वे प्राप्ता इति यथा शुक्लादिशब्दस्तत्र
प्रवर्तते, तथा तद्गतलिङ्गसंख्याप्राप्तावपि सूत्रारम्भ इत्यर्थः ।
तथा च शुक्लादिगुणगतलिङ्गवचनप्रतिपत्तिः शास्त्रेण निवार्यते द्रव्यस्य
गुणशब्देनाप्याख्यायमानस्य स्वलिङ्गसंख्यामेव व्यपदेश इति ।
दृष्टो हि निमित्तगतलिङ्कसंख्यायोगो निमित्तिनि । तद्यथा पञ्चाला इति
क्षत्रियावच्छेदेन निवासस्याभिधीयमानस्य बहुत्वम् । गोदौ ग्राम इति गोदसामीप्ये-
नाभिधीयमानस्य ग्रामस्य द्वित्वम् ।। 153 ।।
ननु च पञ्चाला इत्यादौ "लुपि युक्तवद् व्यक्तिवचने"(पा.1/2/51)इति
शास्त्रान्निमित्तगतलिङ्गसंख्यायोग इत्याशङ्कयाह--
आख्यायते च शास्त्रेण लोकरूढा स्वभावतः ।
निमित्ततुल्या गोदादौ प्रवृत्तिर्लिङ्गसंख्ययोः ।। 154 ।।
"गोदौ ग्रामः, पञ्चाला जनपदः' इत्यादौ शब्दशक्तिस्वाभाव्यान्निमित्तानुविधानेन

निमित्तिनि शब्दप्रवृत्तिर्लोके सिद्धा वचनेन प्रकाश्यते, न तु वचनमेव शब्द-
शक्त्याधानक्षमम् ।
तथा च "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा.1/1/53) इति प्रत्याख्यातमेतत् ।
संज्ञा हि संज्ञानं लौकिकसंप्रत्ययो रूढः ।
कश्चित् किल शब्दो निमित्तधर्मेण तद्वन्तमाचष्टे, यथा मञ्चादिरिति ।
शुक्लादावप्येवं सन्देहे प्रष्ठादिवन्निमित्तिधर्मेणार्थाभिधानम् `विशेषणानां'
(पा.1/2/52)इति वचनेन प्रकाश्यते ।। 154 ।।
यतश्च शब्दशक्तिरेव वचनेनानुगम्यते, ततो विषयविभागोऽत्र सिद्ध इत्याह--
हरीतक्यादिषु व्यक्तिः सङ्खया खलतिकादिषु ।
मनुष्यलुब्विशेषाणामभिधेयाश्रयं द्वयम् ।। 155 ।।
उक्तमिदं वार्त्तिके--"हरीतक्यादिषु व्यक्तिः खलतिकादिषु वचनं मनुष्यलुपि
प्रतिषेधः"(भा.वा.1/2/52) इति। तत्र वाचनिकत्वे लिङ्गसंख्ययोनिर्निबन्धनोऽयं
विषयविभागः ।
अनेन हि वचनेन स्वभावसिद्ध एवाख्यायतेऽर्थः, वचनस्यार्थप्रभावने शक्त्य-
भावादिति हरीतक्यः फलानि नखरजन्यः काशाः द्राक्षा इत्यादिषु लिङ्गमेव निमित्त-
तुल्यम्, संख्या त्वभिधेयनिमित्तिगतैवेति फलानां बहुत्वाद् बहुवचनमेव भवति ।
न हि पररूपसमारोपे तद्विषयस्य सर्वथैव स्वरूपं तिरोधीयत इति फलस्वरू-
पस्यातिरस्कारात् तदाश्रयं बहुत्वम् । निमित्तसङ्खयोपादाने तु नास्त्यस्य शब्दस्य
शक्तिः ।
तथा खलतिकस्य पर्वतस्यादूरभवानि विन्ध्यस्यादूरभवानीत्यादौ निमित्तगत-
सङ्खयोपादाने शब्दस्य शक्तिः, लिङ्गं तु निमित्तिगतमेव भवतीति वनस्य नपुंसकत्वा-
न्नपुंसकं खलतिकं वनानीत्यादि ।
तथा चञ्चेव मनुष्यश्चञ्चा मनुष्य इत्यत्र "लुम्मनुष्ये" (पा.5/3/98) इति
"इवे प्रतिकृतौ" (पा. 5/3/96) इति विहितस्य कनो लुपि यानि विशेषणान्युपादीयन्ते,
अभिरूपः स्वाकृतिर्दर्शनीय इत्यादीनि, तेषां विशेषणानामिति पञ्चाला बह्वन्ना
इत्यादिवन्निमित्तकतलिङ्गसङ्खयारूपं भवति ।
एवञ्च न्यायसिद्धेऽस्मिन् प्रकरणेऽजातेरित्येतदपि प्रत्याख्यातम् । आविष्ट-
लिङ्गत्वाज्जातेः पञ्चाला जनपद इति जनपदस्य निमित्तलिङ्गसङ्खयानुविधानं न
भविष्यति ।। 155 ।।
यदपि व्याख्यातमजातेरिति जातिप्रयोगं विना यावद्विशेषणानि तानि लुबन्तगत-
लिङ्गसङ्खयानुविधायीनि, जातिविशेषणानि तु न तथेति, तद् व्याचष्टे--
जातिप्रयोगे जात्या चेत् सम्बन्धमुपगच्छति ।
विशेषणं ततो धर्माञ् जातेस्तत् प्रतिपद्यते ।। 156 ।।
कामचाराद् विशेषणेनावच्छेदस्य यदा जातिमभिसन्धाय विशेषणं प्रयुज्यते,
तदा तद्गतलिङ्गसङ्खयासिद्धिः, तद्यथा--वरणा नगरं रम्योपवनं स्वच्छोदकं

सुगन्धिकुसुममिति ।। 156 ।।

यदा तु लुबन्ताभिसन्धानेन विशेषणप्रयोगः, तदा--

लुबन्ते सन्निपतितं जातेरन्यद् विशेषणम् ।

लुबन्तस्य प्रधानत्वात् तद्धर्मैर्व्यपदिश्यते ।। 157 ।।

जातिराविष्टलिङ्गसङ्खयेति ततोऽन्यद्विशेषणं लुबन्तसमानाधिकरणं तल्लिङ्ग-

सङ्खयमेव सिद्धम् । पञ्चालाः प्रियातिथयः स्पष्टाभिधाना विनीतवेषा बह्वन्नाः जनपदः,गोदौ सूक्ष्मकण्टकौ वृक्ष इति ।

एवञ्च कृत्वा नार्थ एतदर्थेन सूत्रेणेति `गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति

इत्यात्रार्थे सूत्रं व्यापारितम् ।

अत्रापि यदाश्रितरूपमाश्रये प्रत्यस्यते, तदाश्रितरूपस्योद्भूतत्वात् तच्छब्द-

मिवाश्रयस्तलिङ्गवचनमपि प्रतिपद्येतेति सूत्रारम्भः ।

यदा त्वाश्रयरूपस्याश्रिते प्रत्यासः, तदाश्रयधर्मप्रतिपत्तिरेव युक्तेति स्वा-

भाविकमेतदिति प्रत्याख्यातं सूत्रम् । आश्रयधर्मरूपस्याश्रितेऽध्यासे हि पटशब्देन

शुक्लगुणोऽभिधीयत इति तद्गत एव लिङ्गसङ्खयायोगो मुख्यः ।

न चैवं स्वशब्देन गुणस्याभिधानं निवर्तत इति शुक्लशब्देन समानाधिकरणेन

तुल्यलिङ्गसङ्खयेनैव भवितव्यम् ।

अपरः कल्पो वात्रारमभप्रत्याख्यानयोर्विद्वद्भिरुक्तः । तथाहि -

निराश्रयस्य गुणस्याभावाद् यदाश्रयमात्रे तस्य निवेशः, तदा द्रव्यसामान्यगत-

लिङ्गवचनसर्वनामप्राप्तौ सूत्रारम्भः ।

यदा तु द्रव्यविशेषविवक्षा पूर्वमेवेति नियते द्रव्ये गुणस्य निवेशः, तदा स्वा-

भाविकमेतदिति प्रत्याख्यातम् । उपक्रम एव हि प्रयोगेष्वेव वाक्ये साधुत्वं

प्रक्रम्यत इत्यस्ति विशेषप्रत्यायने शब्दस्य सामर्थ्यम् ।

तृतीयोऽप्यत्र दर्शनभेदः कामचाराद् विशेषणविशेष्यभावस्य । यदा गुणो विशेष्यते,

तदा स्वगतलिङ्गसंख्याभ्यामेव प्राधान्याद् योगे प्राप्ते गुणिगतलिङ्गसंख्यासिद्धये

सूत्रारम्भः ।

यद्यपि च सूत्रे विशेषणानामित्युक्तम्, तथाप्यत्र गुणो विशेष्योऽपि प्राधान्ये-नाश्रयणात् स्वाधारं प्रत्याश्रितत्वाद्विशेषणं भवत्येवेति कथ्यते । अस्यामपि

प्रधानदशायां विशेषणशब्देन आश्रितमात्रं ह्यत्र विशेषणमभिप्रेतम्, न भेदकमेव,

अस्ति च विशेष्यतया प्राधान्येऽपि गुणस्याश्रितत्वमिति न कश्चिद् दोषः ।

यदा तु गुणो विशेषणम्, तदा तस्य प्रधानानुरोधित्वादाश्रयधर्मप्रतिपत्तिर्न्याय-

सिद्धेति स्वाभाविकमेतदिति प्रत्याख्यानशब्दः । ततश्च न्यायसिद्धार्थप्रदर्शनार्थ-

मिदं सूत्रं सकलशास्त्रव्यापकमिति ।। 157 ।।

येषु भाष्यवार्त्तिकप्रयोगेष्वस्योपयोगः, तानुदिश्य क्रमेण विचारयति--

नञ्समासबहुर्वीहिद्वन्द्वस्त्र्यतिशयेषु ये ।

भेदा भाष्यानुसारेण वाच्यास्ते लिङ्गसंङ्खययोः ।। 158 ।।

एतेषु भाष्यप्रदेशेष्वाश्रयतो लिङ्गलचनान्युक्तानि विचार्यन्ते । भेदा इति

निमित्तानुविधानेन प्राप्तानपोद्याश्रयतो लिङ्गसंख्याविशेषा भाष्ये प्रतिपादिता

इहानुगम्यन्ते ।। 158 ।।
तत्र प्रातिलोम्यक्रमेण लघुक्तव्यत्वादतिशायनसूत्रवार्त्तिकभाष्यं तावद्
व्याचष्टे--
यदि षष्ठीद्वितीयान्तान्निकृष्टात् तरबादयः ।
न्यक्कारिणी स्युरुत्कृष्टे प्रकृतेः स्यात् विलिङ्गता ।। 159 ।।
"अतिशायने तमबिष्ठनौ"(पा.5/3/55) इत्यत्र बहवः पक्षाः, अतिशायनशब्दः
कर्तृसाधनः, करणसाधनः, भावसोधनो वेति । अतिशेते इत्यतिशायनः । बहुलवचनात्
कर्तरि ल्युट् । निपातनाद् दीर्घः । अतिशेते इत्यातिशायनो गुणक्रियालक्षणो द्रव्या-श्रयो धर्मः । द्रव्यस्य हि स्वतः
प्रकर्षाभावादाश्रितधर्मद्वारकः सोऽयवस्थापितः ।तत्र च धर्माश्रयो धर्मी यदाभिभावकत्वेन विवक्ष्यते, तदासावतिशेते इति कर्ता प्रत्ययार्थः ।
यदा तु धर्ममात्रस्यात्र व्यापारः, तदा करणं धर्ममात्रं प्रत्ययार्थः । शुक्लेनहि गुणेन पटोऽन्यानतिशेत इति स एवातिशायनो मुख्यो गुणः ।
अत एव तस्य प्रयोजकत्वादतिशाययतीति ण्यर्थोपपत्तौ निर्देशो न्याय्यः ।
भावसाधनेऽप्यतिशयनमतिशयः प्रकर्षः, स चाश्रितगुणनिमित्त इति स एव गुणस्त-
मबादिप्रत्ययार्थोऽवतिष्ठते, क्रियालक्षणो वा धर्मः । एतेषु चार्थेषु प्रत्यये
विधीयमाने सामर्थ्यात् प्रतियोगिनो निकृष्टादसौ भवति ।
तत्र च विशिष्टा प्रकृतिर्नोपात्तेति ङ्याप्प्रातिपदिकसामान्यं निकृष्टवाचि
प्रकृतित्वेनावतिष्ठते । समर्थविभक्तिश्च सूत्रे नोपात्तेत्युक्तम्--`किमन्तात्
पुनरुत्पत्त्या भवितव्यम्' इति ।
तत्र `द्वितीयान्तादतिशय्यमानात्' इत्युक्तम् । शेतिरकर्मकोऽप्युपसर्गवशात्
सकर्मकेऽभिभवे वर्तत इत्यभिभविता प्रत्ययार्थः । तस्य न्यूनेनाभिभाव्येन प्रकृत्य-र्थेन योग इत्यपकृष्टवाचिनः प्रत्ययाः । सूत्रेषु च येन केनचिच्छब्देनार्थनिर्देश
इति । यदा तिङन्तेन वाक्यम् तदा कर्मणि न्यूने द्वितीया न्याय्येति
द्वितीयान्तादित्याह ।
यदा कृन्दन्तेनैव वाक्यम्, तदा कृत्प्रयोगे कर्मणि षष्ठीति षष्ठयन्तादपि
सम्भवोऽत्र व्याख्यातः । "षष्ठया रुप्य च" (पा. 5/3/54) इत्यतो वा षष्ठी
समर्थविभक्तिरनुवर्तत एव । अर्थाभेदश्चात्रोभयत्रापि समर्थविभक्ताविति्येवं परमेतत्। भाष्ये तु कृद्योगषष्ठयाः कर्तर्यपि भावाजसन्देहेन कर्म द्वितीयाया एवावगम्यत
इति द्वितीयान्तादित्युक्तम् । एवमत्र प्रत्ययार्थाविशेषणपक्षे प्रकृतिप्रत्ययार्थ-योर्भेदात् प्रकृतेर्यल्लिङ्गं तद्विपरीतं प्रत्ययार्थस्य प्रसज्येत ।। 159 ।।
तामेव भिन्नलिङ्गतामुदाहरणेनाप्यभिव्यनक्ति--
काल्यां कालाद् द्वितीयान्तात् काले काल्यास्तरब् भवेत् ।
न्यक्कर्तरि तथा गार्ग्ये गर्गेभ्यः प्रत्ययो भवेत् ।। 160 ।।
कालमतिशेते, तस्य वातिशायिनी कालीति द्वितीयान्तात् षष्ठयन्ताद् वातिशय्य-
मानादतिशयितरि प्रत्यये कालतरा कालीति प्राप्नोति । कालतिरेति चेष्यते । तथा
कालीमतिशेते, तस्या वातिशायनः काल इत्यत्र कालितर इति प्राप्नोति । कालतर

इति चेष्यते । विलिङ्गतेति चात्रोपलक्षणम् । विभिन्नसङ्खयता च प्रसज्यते ।
तथाहि--गर्गानतिशेते गार्ग्य इति । तत्र न्यक्कर्तरि गर्गतर इति प्राप्नोति ।
गार्ग्यतर इति साधुरिष्यते । गार्ग्यमतिशेरते गर्गा इति । तेष्वतिशायकेषु
गार्ग्याद् विधौ गार्ग्यतरा इति प्राप्नोति । गर्गतरा इति चेष्यते । अत्र च वृत्तौ
सङ्खयाविशेष प्रतीतिर्लुगलुग्भ्यामेव प्रतीयत इति भवत्येकवचनबहुवचनान्तात्
तरबिति पूर्वमेव निर्णीतम् ।
एवं प्रत्ययार्थविशेषणपक्षो दुष्टोऽभिहितो भाष्ये । तदनन्तरमेव `तर्हि प्रथमा-
न्तात् स्वार्थिको भविष्यति' इति प्रकृत्यर्थविशेषणपक्षोऽभ्युपगतः ।
तथा ह्यतिशेतेऽतिशायन इति "कृत्यल्युटो बहुलम्"(पा 3/3/114)इति
कर्तर्येवातिशायनशब्दः । तत्र प्रत्ययवाच्यस्य व्यतिरेकहेतोरभावादन्तरङ्गा
प्रातिपदिकार्थमात्रापेक्षा प्रथमा तदन्ताद् विधिः । अर्थान्तरानिर्देशाच्च स्वा-
र्थिरास्तरबादयः । अतिशायने यद् वर्तते, तस्मात् प्रत्ययः स्वार्थे । काली
अतिशेते कालितरा । कालोऽतिशेते कालतर इति विलिङ्गता न भवति, तथा
गार्ग्योऽतिशेते गार्ग्यतर इति । गर्गा अतिशेरते गर्गतरा इति विसङ्खयतापि न
भवति ।। 160 ।।
किन्त्विदमत्रानिष्टमुक्तं--यदि प्रथमान्तात् स्वार्थिकः, कुमारितरा । अव्यति-
रिक्तं वय इति कृत्वा "वयसि प्रथमे"(पा.4/1/20) इति ङीप् प्राप्नोति ।
तदेतद् व्याचष्टे--
न्यक्कर्तृषु च गर्गेषु गार्ग्यात् स्यात् तच्च नेष्यते ।
कुमार्याः स्वार्थिके ङीप् स्यात् प्रकृत्यर्थो हि नाधिकः ।। 161 ।।
कुमारी अतिशेते, किशोरी अतिशेत इति कुमारितरा, किशोरितरा इति "वयसि
प्रथमे'(पा.4/1/20)इति ङीप् स्यात्, स्वार्थिकत्वे तरपः प्रकृत्यर्थस्य प्रथमवयोऽ-वच्छिन्नस्त्रीलक्षणस्यानतिरेकात् । न हि
प्रथमेन ङीपाभिव्यक्तातिशायनस्य
स्त्रीत्वे द्योतितम् ।
ननु च तरपा कुमार्यर्थस्यैव प्रकर्षप्रकाशनात् प्रकृष्टस्यार्थस्य स्त्रीत्वमवग-तमेव । तथा च भाष्यं--"तरपोक्तत्वात् तस्यार्थस्य न
भविष्यति" इति । स्त्रीत्ववत
एव प्रकृष्यमाणत्वात् तरबन्तेनैव द्योतितमेव स्त्रीत्वमिति ङीब् न भविष्यतीत्यर्थः। अत्र चोदितम्--`टाबपि तर्हि न
प्राप्नोति" इति । अभिहितार्थत्वं सर्वस्त्री-
प्रत्ययानुत्पत्तिनिमित्तं समानमित्यर्थः ।
अत्र परिहारोऽभिहितः--`उक्तेऽपि हि भवन्त्येते स्वार्थिकाष्टाबादयः' इति ।
अयमर्थः--स्त्रियां यद्वर्तते प्रातिपदिकम्, तस्मात् स्वार्थे टाबादयो विहिताः।एवञ्च यथा प्रातिपदिकार्थस्य
सर्वलिङ्गसाधारण्यादुपात्तमपि प्रातिपदिकेन स्त्रीत्वंनियमेन न प्रतीयेतेति प्रथमेन स्त्रीप्रत्ययेन तद् द्योत्यते, तथा
कुमारितरेत्यसति
टापि विपरीतार्थावगमप्रसङ्ग इति भवत्यसौ, न तु सर्वथैवोक्तेऽनवस्थाप्रसङ्गात्
स्वार्थीकेनापि भवितव्यम् । यद्येवं टाबपवादो ङीबपि प्राप्नोतीत्युक्तं भाष्य इति
चोद्यमेव ।

ननु च प्रथमेनैव ङीपा प्रथमवयोऽवच्छेदस्योक्तत्वात् स्त्रीत्वमात्राभिव्यक्-
त्यर्थं टाबेव न्याय्यः । नैतदस्ति, अर्थानुगुण्यात् ङीप् एव न्याय्यत्वम् ।
तद्यथा--एको द्वौ बहव इत्यत्रोक्तार्थापि प्रथमा समयाद् भविष्यतीत्युक्ते
चोदितम्--`यदि सामयिकी न नियोगतोऽन्या अपि कस्मान्न भवन्ति इति ।
तत्र परिहारोऽभिहितः--`अर्थतो व्यवस्था इति । न केवला प्रकृतिः प्रयोक्तव्येति
प्रयोगनियमानुपालनायां विभक्तौ यद्यपि न कश्चिदर्थानुरोधः, तथाप्यनुगतार्थत्वात्
प्रथमैव न्याय्येत्यर्थः ।
अत्र दर्शने तत्र यत्रे त्यादावपि सप्तम्येव न्याय्या ।
एवमिहापि प्रक्रमाभेदार्थं ङीबेव न्याय्य इति युक्तमुक्तं ङीबपि तर्हि प्राप्नो-तीति । अन्तरेणापि च तरबादीन् प्रकरणादिवशात्
केवलापि प्रकृतिरतिशयमुपगमय-
तीति । प्रकरणाद्यभावेऽतिशयं द्योतयन्तो भवन्त्येव स्वार्थिकास्तरबादयो न वाचकाः । तथाहि-स्वतन्त्रमर्थन्यानपेक्षं गमयन्तो
वाचकाः कथ्यन्ते शब्दाः । तदपेक्षास्तु
तद्गतमर्थं द्योतयन्तः स्वार्थिकाः । तत्रेव च (तस्यैव च) द्योतनेऽत्रान्वयव्यति-रेकौ सव्यापारौ । `पटुतरो देवदत्तः पटुकल्पः
पटुरूपः' इति च समानाधिकरण्यात्
प्रकृतिप्रत्ययार्थयोः प्रकृत्यर्थानुवादित्वेन स्वार्थिकत्वमेषां तरबादीनां
निश्चीयते । वाचकेषु तु यञादिषु गर्गस्यापत्यं गार्ग्य इति व्यधिकरणत्वम्, न
`यावत् काली तावत् कालितर' इत्यस्माद् भाष्यान्न वाचकत्वावसायः ।
अनभिव्यक्तप्रकर्षा हि काली, सैव प्रकृष्यमाणा कालितरेति प्रकर्षोपादनानु-
पादानलक्षणभेदाश्रयेण भाष्यप्रवृत्तेः । तस्माल्लौकिक एवार्थो नियतोऽवस्थितः
शाश्त्रे वाचकद्योतकप्रविभागेनानुविधीयते, न तु प्रक्रियागता एवामी विकल्पा
निरस्तार्थप्रविभागाः ।। 161 ।।
एवं स्वार्थिकत्वेऽपि दोषमुद्भाव्यानन्तरमभिहितम्--`एवं तर्हि गुणोऽभिधीयते,
अथवा क्रियाभिधीयत' इति । तदेतद् भाष्यं व्याख्यातुमाह--
षठ्यन्तादधिके तस्माद् गुणे स्वाश्रयवर्तिनि ।
उत्कृष्टसमवेतायां क्रियायां वा विधीयते ।। 162 ।।
करणसाधनेनातिशायनशब्देन गुण उच्यतेऽभिभावकः । अतिशयानमभिभवन्तं
स्वाश्रयं प्रयोजयत्यतिशययतीत्यतिशायन इति वा ण्यन्तात् कर्तरि ल्युटि
गुणोऽभिधीयते । प्रकृष्यमाणेन हि गुणेन द्रव्यस्य समानगुणात् प्रकर्षो भवति, स्वतःप्रकर्षाभावात् । तेन च गुणेन
स्वाश्रयसमवायिना स्वाश्रयव्यतिरेकोपजनात् प्रकृति-
र्गुणाश्रयवाचिनी षठ्यन्ता भवति गुणः प्रत्ययार्थः । शुक्लस्यातिशायनो गुणः शुक्ल-
तरः । स्वाश्रयवर्तिनीति च वदन्नाश्रयान्तरवर्तिनि न भवति प्रत्यय इति विलिङ्गतादि-
पूर्वोक्तदोषो नावतरतीत्याह ।
यदा तु भावसाधनो ल्युट् अतिशयोऽतिशायनमिति, तदा क्रिया प्रकर्षाख्योच्यत
इत्येतस्यां वाच्यायां प्रत्ययः । क्रियोपजनिते च व्यतिरेके प्रकृतेः षष्ठी, शुक्ल-
स्यातिशायनं शुक्लतर इति । व्यतिरिक्तश्चात्र गुणक्रियालक्षणः प्रत्ययार्थ इति

वयस्विन्याः कुमार्या विशेषणत्वेनाप्राधान्यान्न भवति तदन्ताद् ङीप्-
प्रत्ययः ।। 162 ।।
अत्र पक्षे गुणक्रियालक्षणोऽर्थः प्रत्ययवाच्यः प्रधानमिति द्रव्याभिधायिभिः
पटादिभिः सामानाधिकरण्याभावो भाष्ये कथं न चोदित इत्याह--
उपात्तं च प्रकृत्यर्थो द्रव्यमेवाश्रयस्तयोः ।
सोऽयमित्यभिसंबन्धादभेदेन प्रतीयते ।। 163 ।।
यदेव प्रकृतेः प्रातिपदिकस्य वाच्यं द्रव्यमत्र सन्निहितम्, तदेवानयोर्गुणा-
क्रिययोः प्रत्ययवाच्ययोः सोऽयमितयभेदसम्बन्धेनाश्रयः प्रतीयत इति भवति सामानाधि-
करण्यम् । प्रकर्षप्रत्ययान्तस्य गुणक्रियामात्रे कदाचिदपि वृत्त्यदर्शनात् केवलं
ङीप्प्रतिसमाधानाय प्रक्रियायां व्यतिरेकार्थत्वं करबादेरुपेयते ।
स्वार्थिका एव त्विमेऽतिशयद्योतनात् । अत एवातिशयविशिष्टस्य द्रव्यस्याति-
शयप्रत्ययान्तेनोपादानाश्रयतो लिङ्गवचनानि भवन्ति ।। 163 ।।
ननु च शुक्लशब्देनात्र गुणोपसर्जनं द्रव्यमुच्यते । तरबन्तेनाप्यतिशयविशिष्टं
तदेव । तथा चाश्रितमात्रस्य कोनचिदनभिधानात् कस्याश्रितस्याश्रयवाल्लिङ्गवचने
स्यातामित्याशङ्कयाह--
रूपाभेदाच्च तद् द्रव्यमाकाङ्क्षावत् प्रतीयते ।
विशेषैर्भिन्नरूपैस्तदाश्रयैरिव युज्यते ।। 164 ।।
इह शुक्लशब्देन गुणोपसर्जनं द्रव्यमात्रमुच्यते । तदेवातिशयविशिष्टं तरबन्ते-
नेति विशेषेषु तस्मात् पटादिषु न प्रतिपत्तिः, साधारण्यात् सर्वविशेषेषु द्रव्यमा-
त्रस्य । तथा च तत् पटादीन् विशेषानपेक्षमाणं प्रतीयत इति ते तस्यापेक्ष्यमाणा
विशेषा विलक्षणा बहिरङ्गा पश्चात्संबध्यमानत्वादाश्रयत्वेन व्यवह्रियन्ते । तच्च
तदाश्रितत्वेन ।। 164 ।।
ततश्च--
भिन्नरूपेषु यल्लिङ्गं विशेषेषु व्यवस्थितम् ।
संख्या च ताभ्यां द्रव्यात्मा सोऽभिन्नो व्यपदिश्यते ।। 165 ।।
स निर्विशेषोऽर्थात्मा गणवचनशब्देनोच्यत इति तस्य संबध्यमानविशेषगत-
लिङ्गसंख्यातिदेशः सूत्रेण प्रतिपाद्यत इति ताभ्यामाश्रयलिङ्गसंख्याभ्यामुपलक्षितः
प्रतिपाद्यते । एवं गुणपक्षे तस्य स्वाश्रयवृत्तित्वात् तद्गतमेव वचनमुपपद्यते ।
क्रियापक्षे तु तस्य यश्चैवातिशेते यश्चातिशय्यते उभौ तावाश्रयौ भवत इत्येवमपि
द्विवचनं प्राप्नोती'ति चोदितं भाष्ये ।
अत्रोत्तरमभिहितम्--`शेतिरकर्मक' इति ।। 165 ।।
अत्र पर्युनुयोगः--`अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति इति ।
सिद्धान्तवादिना तु येनाभिप्रायेणाकर्मक इत्युक्तम्, तदाविष्करोति--`कर्मापदिष्टा
विधयः कर्मस्थभावकानां कर्मस्थक्रियाणाम्,' `कर्तृस्थभावकः शेतिः, इति किल
समवायिकारणमस्य कर्म नास्तीत्येवमकर्मकोऽभिहितः ।
तदेतद् व्याचष्टे--

आश्रयः समवायी च निमित्तं लिङ्गसंख्ययोः ।
कर्तृस्थभावकः शेतिरतो भाष्य उदाहृतः ।। 166 ।।
क्रिया यत्र समवैति, स तस्या आश्रयः । स चैक एवेत्येकवचनं भवति ।
अभिभवनं ह्यत्र शेत्यर्थः कर्तरि समवैति, न कर्मण्यभिभाव्ये । यत्किञ्चित्
कर्म निमित्ततयाभिहितं तत् कर्मण्यपदिष्टमिति द्विवचनमपि कर्मापदिष्टो भाष्य
उक्तः ।। 266 ।।
कर्मैकत्वापेक्षेण हि कर्तुरेकत्वेन द्वित्वस्यात्र जननं स्यात् । यदि कर्माप्य-समवायि गृह्येतेत्याह--
निमित्तमाश्रयत्वेन गृह्येत यदि साधनम् ।
कर्मापदिष्टयोः प्राप्तिस्तत्र स्याल्लिङ्गसंख्ययोः ।। 167 ।।
`गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति' इत्यत्राश्रयशब्देन यदि निमित्त-
मात्रामुच्येत, तदा क्रियाया आत्मलाभे द्वयमपेक्ष्यते कर्तृकर्मरूपमत्र साधनमिति
स्यात् कर्मापेक्षयापि तद्गतं लिङ्गम् । तदपेक्ष्य द्वित्वोरजननाच्च द्विवचनम् ।
अभिभवोह्यभिभाव्यमपेक्षते । तत्र कर्तृकर्मस्थत्वेन च क्रियायाः प्रसिद्धत्वान्न
करणाद्यपेक्षया बहुवचनप्रसङ्गश्चोदितः । तदेवमतिशायनभाष्यं लिङ्गवचनातिदेश-
विचारप्रसङ्गेन व्याख्यातम् ।। 167 ।।
इदानीं तेनैव प्रातिलोम्यक्रमेण स्त्रीसूत्रवार्त्तिकभाष्यं लिङ्गवचनातिदेशावि-चारप्रसङ्गेन व्याख्यातुमाह--
शास्त्रे निर्मित्तभावेन समुदायादपोद्घृतः ।
स्त्र्यर्थस्तस्येच्छया योगः प्रकृत्या प्रत्ययेन वा ।। 168 ।।
स्थितलक्षणो लौकिकोऽर्थः स्त्रीत्वविशिष्टद्रव्यस्वभावो निरंशात् पदात् प्रती-यते । तस्य तु पदस्य
प्रकृतिप्रत्ययपरिकल्पनयान्वाख्याने तयोः प्रकृतिप्रत्ययययोरव-
यवरनुशासनाङ्गत्वेन प्रकृत्यर्थप्रत्ययार्थतया निरंशोऽप्यसावर्थो विभज्यते ।
तत्र समित्, दृषदित्यादौ प्रातिपजिकमात्रेणापि स्त्रीत्वप्रतिपादनं दृष्टम्,
गौरी, किशोरीत्यादौ प्रत्ययसहितेन, इत्यन्वयव्यतिरेकायोर्नियमाभावादन्वाख्यातु-
रिच्छया प्रयोगानुरोधिन्या प्रकृतिप्रत्ययार्थतया तद्विमर्शः ।। 168 ।।
तथाहि--
स्त्रीशब्दो गुणशब्दत्वात् तुल्यधर्मा सितादिभिः ।
गुणमात्रे प्रयुज्यते संस्त्यानवति वाश्रये ।। 169 ।।
संस्त्यानं रूपादीनां संहननं गुणः, तत्र वा स्त्रीशब्दो वर्तते, तद्वति वा
गुणिनीति शुक्लादिशब्दैस्तुल्यः । तेऽपि हि पटस्य शुक्लः पट इत्यादौ गुणमात्रे
गुणिनि च दृष्टप्रयोगाः ।
एवञ्च "स्त्रियाम्" इति निर्देशे यदा गुणमात्रवृत्तिः स्त्रीशब्दः, तदा प्राति-पदिकात् स्त्रीत्वे गुणे वर्तमानात् प्रत्यय इति प्रकृत्यर्थविशेषणपक्षे भवति ।
अभिधेये स्त्रीत्वे टाबादय इति तु प्रत्ययार्थपक्षो जायते ।
यदा तु तद्वति वृत्तिः, तदा संस्त्यानवति द्रव्ये वर्तमानात् प्रातिपदिकात्
स्वार्थे टाबादय इति प्रकृत्यर्थपक्षो भवति ।
अत्र तु पक्षे यथा शुकलादयो गुणं निमित्तीकृत्य तद्वति वर्तन्ते, नैवं

किञ्चित् प्रातिपदिकमस्ति, यस्य द्रव्ये वृत्तौ स्त्रीत्वं निमित्तम् । स्त्रीशब्द एव हि तथा । तत एव विधौ
सर्वप्रकृतिसाधारण्येन "स्त्रियाम्" इत्यपार्थको
निर्देशः स्यात् । अतः स्त्रियां स्त्रीशब्दप्रत्यायितेऽर्थे यत् प्रातिपदिकं
वर्तत इति स्त्रीशब्देन प्रातिपदिकार्थ उपलक्ष्यते ।। 169 ।।
ततश्च कुमारः स्त्रीति स्त्रीशब्दसमानाधिकरणेऽर्थे वर्तमानात् प्रातिपदिकादि-
त्यये पक्षो(प्रत्ययो) जायते । स चानिष्ट इत्युक्तम्--`स्त्रीसमानाधिकरणादिति चेद्,
भूतादिष्वतिप्रसङ्गः । षट्संज्ञकेभ्यश्च प्रतिषेधः' इति ।
तदेतद् व्याचष्टे--
स्त्र्यर्थः संस्त्यानवद् द्रव्यं प्रकृत्यर्थश्च यद्यसौ ।
द्रव्योपलक्षणार्थत्वं संस्त्यानस्य तथा सति ।। 170 ।।
संस्त्यानेन निमित्तभूतेनावच्छिन्नं संस्त्यानवत् । तथा सतीति संस्त्याननिमि-
त्तस्यार्थस्य स्त्रीशब्देन निर्देश सति द्रव्यस्य शब्दान्तरोपादानस्य संस्त्यानमु-
पलक्षणं भवेत् । तन्निमित्तेऽर्थे कस्यचिदप्यप्रवृत्तेरित्यभिप्रायः ।। 170 ।।
एवं सति को दोष इत्याह--
संस्त्यानेन क्वचिद् द्रव्यं दृष्टं यदुपलक्षितम् ।
अनङ्गीकृतसंस्त्यानात् तद्वृत्तेः प्रत्ययो भवेत् ।। 171 ।।
अनङ्गीकृतमनुपात्तं वाच्यत्वेन संस्त्यानं स्त्रीत्वं येन तद्वृत्तेः स्त्रीश-ब्दसन्निधापितेऽर्थे वर्तमानात् प्रातिपदाकात् प्रत्ययः प्रसज्येत । बहिरङ्गस्यैव
पदान्तरोपलक्षितार्थस्यान्वाख्याने निमित्तत्वेनापेक्षणात् ।। 171 ।।
अत्रोदहरणमाह--
भूतादयः षडाख्याश्च संस्त्यानेनोपलक्षिते ।
ब्राह्मण्यादौ यदा वृत्तास्तेभ्यः स्युः प्रत्ययास्तदा ।। 172 ।।
यथाकुमारः स्त्रीति स्त्रीशब्दप्रतयायितेऽर्थे कुमारशब्दो वृत्तः स्त्रीप्रत्-ययमस्मिन् पक्षे प्रतिपद्यते । तथा
भूतमियम्, कारणमियम्, आवपनमियं
ब्राह्मणीत्यत्र भूतादिशब्देभ्यो ब्राह्मणीशब्दोपलक्षितस्त्रीत्वेऽर्थे वर्तमाने-
भ्यष्टाप् स्यात् । तथा पञ्च षट् सप्त नव दश ब्राह्मण्य इति पञ्चादिभ्यः
स्त्रीप्रत्ययप्रसङ्गे "न षट्स्वस्त्रादिभ्यः" (5/1/10)इति प्रतिषेधो वक्तव्यः
स्यात् । प्रकृत्यर्थविशेषणपक्षे स्त्रीत्ववचनाट्टाबादिरित्यनङ्गीकृतसंस्त्यानान्न
भवतीति स्त्रीसमानाधिकरणपक्ष एवायं दोषः ।। 172 ।।
तथाहि--
तद्वन्तो हि प्रधानत्वात् प्रत्ययानां प्रयोजकाः ।
सामानाधिकरण्येऽपि तस्माट्टाबादिसम्भवः ।। 173 ।।
अत्र पक्षे संस्त्यानाभिधानं प्रातिपदिकेन नाश्रीयते प्रत्ययोत्पत्तौ । अपि तु
संस्त्यानवन्तः स्त्रीशब्दोपलक्षिता अर्थाः प्रधानानि प्रत्ययानां प्रवर्तका इत्यु-पसर्जनत्वात् संस्त्यानस्य पदान्तरेण बाह्येन समानाधिकरणत्वेऽपि तथाभूतस्य

संस्त्यानस्य प्रतीतेष्टाबादयो भवेयुरेव ।
न ह्येतदत्र शक्यते वक्तुम्--कथं पदान्तरगम्योऽर्थः शब्दसंस्कारे निमित्तमिति ।तथाभूतस्यैव वचनेनाश्रयणात् ।। 173 ।।
एवं हि स्त्रीसमानाधिकरणपक्षं दूषयित्वा `सिद्धं तु स्त्रियाः प्रातिपदिकविशेषण-त्वात् स्वार्थे टाबादयः' इति
प्रकृत्यर्थविशेषणपक्षोऽभिहितः ।
एतदुत्थानबीजमाह--
गुणमात्राभिधायित्वं स्त्रीशब्दे वर्ण्यते यदा ।
प्रकृत्यर्थश्च संस्त्यानं स्वार्थिकाः प्रत्ययास्तदा ।। 174 ।।
संस्त्यानमात्रं यदा स्त्रीशब्दवाच्यम्, तच्च प्रातिपदिकविशेषणमिति, तदा
स्त्रीत्वे वर्तमानात् प्रातिपदिकाट्टाबादय इत्यर्थस्य तेषामन्यस्यानिर्देशात्
स्वार्थिकत्वं भवति । यदा तु स्त्रीत्वेऽभिधेये इत्यर्थः, तदा प्रत्ययार्थविशेषण-
पक्षो जायते ।। 174 ।।
ननु च स्त्रीत्वमात्रे कस्यचित् प्रातिपदिकस्य वृत्त्यसम्भवात् कथं प्रकृत्यर्थ-विशेषमपक्षो भवतीत्याह--
संस्त्याने केवले वृत्तिः प्रकृतीनां न विद्यते ।
तदाविष्टे ततो द्रव्ये गृह्यन्ते समवस्थिताः ।। 175 ।।
लौकिकोऽर्थः स्थितलक्षणोऽन्वाख्यानाङ्गमुपादीयमानो यथासम्भवमसौ गृह्यत
इति `स्त्रियाम्' इत्युक्तेऽपि स्त्रीत्वमात्रे प्रातिपदिकस्य वृत्त्यदर्शनात्
सामर्थ्यात् तद्विशिष्टार्थाभिधायिनः प्रातिपदिकाद् विधिर्विज्ञायते ।। 175 ।।
तथा च तेन स्त्रीत्वेनाविष्टे सम्भिन्ने द्रव्ये वर्तमानाः प्रत्ययमुत्पादयन्-
तीति पूर्वदोषानवतार इत्याह--
उपकारि च संस्त्यानं येषु शब्देष्वपेक्षितम् ।
तेभ्यष्टाबादयस्तच्च भूतादिष्वविवक्षितम् ।। 176 ।।
वाच्यत्वेनोपयोगि येषु शब्देषु. तेभ्यष्टाबादय इत्युपलक्षणभूतं येषु संस्त्यानं तेभ्यो भूतादिभ्यः प्रत्ययाभाव इत्यर्थः । तदुक्तं
भाष्ये--`भूतमियं ब्राह्मणी'
इति । `नात्र स्त्रीत्वं विवक्षितम्, किं तर्हि पौतन्यम्' इति । स्त्रीत्वे वाच्ये विवक्षिते भवत्येव प्रत्ययः `भूता ब्राह्मणी' इति ।
सत्यवादिनी अतीता वेत्यर्थः,
न पौतन्यम् । तथा ` कारणमियं ब्राह्मणी' इति प्राधान्यं विवक्षितम् । `आवपनमि-
यमुष्ट्रिका' इति सम्भवनम् । आधेयप्रमाणादाधारस्य प्रमाणानतिरेको विवक्षितः ।
पञ्चादीनामपि भेदगणनात्मिका सङ्ख्या वाच्या, न स्त्रीत्वमिति तेभ्यः
स्त्रीप्रत्ययाप्रसङ्गात् ततः प्रतिषेधः प्रत्याख्यातः । एवं निर्दोषः प्रकृत्यर्थ-विशेषणपक्षोऽवस्थापितः ।। 176 ।।
तृतीयोऽपि पक्षोऽभिहितः `अथवा पुनरस्तु स्त्रियामभिधेयायाम्' इति प्रत्ययार्थ-त्वं स्त्रीत्वस्य । अत्र पक्षे सम्भावनाबीजमुपन्यस्य दोषमभिहितं व्याचष्टे--
संस्त्यानं प्रत्ययस्यार्थः शुद्धमाश्रीयते यदा ।
तदा द्विवचनानेकप्रत्ययत्वं न सिध्यति ।। 177 ।।
शुद्धं केवलं द्रव्यविशेषणभावमनापन्नं यदा संस्त्यानं स्त्रियामिति निर्दिष्टं
प्रत्ययार्थत्वेनाश्रीयते, तदा तस्यैकत्वात् कुमार्यौ कुमार्य इति द्विवचनबहुवचने नस्याताम् ।

एकस्य च संस्त्यानस्य प्रत्यायने स्त्रीप्रत्ययो भवन्नेक एव स्यादिति `गार्ग्या-
यणी, कारीषगन्ध्या, कालितर' इत्यादावनेकः स्त्रीप्रत्ययो न स्यात् ।
तदुक्तं वार्त्तिके--`स्त्रियामिति स्त्र्यर्थाभिधान इति चेद् द्विवचनबहुवचनाने-कप्रत्ययानुपपत्तिः' इति ।। 177 ।।
अथ `तिस्रो जातय एवैताः सर्वत्र समवस्थिताः'(वा.प.3लिङ्ग 4) इति दर्शने
स्त्रीत्वजातिरत्र निर्दिष्टा प्रत्ययार्थत्वेन । तस्याश्च व्यक्तिभेदेन `गावौ
गावः' इत्यादिवद् वचनभेदो योक्ष्यत इत्याशङ्कयाह--
जातिश्चेत् स्त्रीत्वमेवासौ भेदोऽन्यत्राविवक्षितः ।
यस्माद् भिन्नैरपि द्रव्यैस्तदेकं सद् विशिष्यते ।। 178 ।।
स्त्रियामिति प्रत्ययार्थत्वेन जातिनिर्देशे `प्रकृतिप्रत्ययौ प्रत्ययार्थं सह
ब्रूत' इति तस्या एव प्राधान्येन विवक्षितत्वादन्यत्र व्यक्तौ यो द्वित्वबहुत्वा-
ख्यो भेदो विशेषः, स नात्र प्रतिपाद्यत्वेन विवक्षितः । यतस्तत् स्त्रीत्वमेकं सद्
भिन्नैर्बहुभिः प्रकृतिवाच्यैराश्रयभूतैर्द्रव्यैः सङ्खयाभेदवद्भिरवच्छिद्यत इति
प्रधानभूतप्रत्ययावाच्यस्त्रीत्वैकत्वाश्रयमेकवचनमेव न्याय्यम् ।
`गावौ गावः' इत्यादौ तु जात्यावेशेन व्यक्तीनामभिधानाद् युक्तो वचनभेदः ।।178।।
अथ गुणावस्था लिङ्गमित्यस्मिन् दर्शने अवस्थानां भेदाद् वचनभेदो भविष्य-
तीत्यत आह--
मात्राणां हि तिरोभावे परिमाणं न विद्यते ।
कुमार्य इति तेन स्यात् कुमार्यां भेदसम्भवात् ।। 179 ।।
मात्राणां सत्त्वादिगुणमयानां रूपरसादीना तिरोभावे प्रतिलयेऽपचयेऽत्र संस्त्-
यानलक्षणे स्त्रीत्वे विवक्षितेऽवस्थाभेदाश्रयेण वचनभेदे कथ्यमानेऽवस्थाभेदानामे-कत्रापीयत्तानवधारणात् सदैव कुमार्य इति
बहुवचनान्त एव प्रयोगः स्यात् ।
तदर्थस्य संस्त्यानस्य बहुत्वसम्भवात् ।
चलं हि गुणवृत्तमिति परिणामस्य क्षणिकत्वादवस्थाभेदः सदातनः ।
अवस्थाभेदानादरेण प्रत्ययानुवृत्तिकार्य मेकं चेत् स्त्रीत्वं, तदा जातिपक्षादस्या-भेद इति नियोगत एकवचनं स्यात् ।
अत एव चात्रापि जातेरेषणीयत्वात् फलत एकपक्षीभावं मन्यमानः पूर्वोक्तार्थो-
पपादनहेतुद्योतनं हिशब्दं पठति, न समुच्चयार्थं चकारम् । यथा चात्र पक्षे द्विवचन-
बहुवचनानेकप्रत्ययानुत्पत्तिदोषः, तथा द्रव्येण सामानाधिकरण्याभावोऽपि । तथा
चास्याः कुमारीति स्यात् । संस्त्यानस्य च धर्ममात्रत्वात् क्रियायोगो न कल्पते,
अलङ्क्रियायां कुमारीति ।। 179 ।।
तदत्र प्रतिसमाधानमुक्तं वार्त्तिककृता--`गुणस्य चाश्रयतो लिङ्गवचनभावाद्'
इति । तदेतद् व्याख्यातुमुपक्रमते--
जातिसङ्खयासमाहारैर्याथैव सहचारिणि ।
द्रव्ये क्रियाः प्रवर्तन्ते एकात्मत्वेऽप्यपेक्षिते ।। 180 ।।
मूर्तिभ्यो मूर्तिधर्माणां तथाऽभेदस्य दर्शनात् ।
सामानाधिकरण्यं च क्रियायोगश्च कल्पते ।। 181 ।।

`गौर्दुह्यताम्, ब्राह्मणशतं भोज्यताम्, पञ्चपूली समानीयताम्' इत्यादौ जाति-
सङ्खयासमाहारैः शब्दोपादानात् करणभूतैः स्वात्मन्यसम्भवादविनाभाविनि द्रव्ये
क्रियाः क्रियन्ते, जातितद्वतोः समवायाद् भेदस्य प्रच्छादनेऽभेदे निरूपिते, धर्मध-र्मिणोरपि तथैव विवेकानवसायात् तत्त्वतो
भेदेऽप्येकात्मत्वे बुद्धया निरूपिते सति।एवं मूर्तिभ्यो वस्तुभ्यस्तद्धर्माणां संस्त्यानादीनामभेदस्य द्रव्यादव्यतिरेकस्य
प्रतिभासनात् सामानाधिकरण्यम्, द्रव्येण क्रियायोगश्च कल्पते ।
स्वभावाद्धि प्रत्ययेन द्रव्याद् व्यतिरेकेण स्त्रीत्वं न प्रत्याय्यते ।
प्रक्रियायां तु प्रत्ययार्थपक्षापोद्धारः । `सर्वाश्च पुनर्मूर्तय एवमात्मिकाः
संस्त्यानप्रसवगुणाः' इति भाष्ये मूर्तिशब्देन वस्तुमात्रस्याभिधानादिहापि मूर्ति-
शब्देन वस्तुमात्रं लक्ष्यते । दिगादीनाममूर्तानामपि स्त्रीत्वाख्यस्य धर्मस्य
सम्भवात् ।। 180,181 ।।
केचिदाहुः--`लुप्तमत्वर्थीयाः कुमार्यादयो द्रव्यवचनैः समानाधिकरणा
भवन्ति' इति । तन्मतमपाकरोति--
सामानाधिकरण्ये तु मतुब्लोपादपेक्षिते ।
लुक् तद्धितलुकीति स्याल्लुक् तत्राप्युपलक्षणम् ।। 182 ।।
संस्त्यानलक्षणधर्ममात्रवचनः स्त्रीप्रत्ययान्त इति गुणवचनत्वान्मतुपो लुका
शुक्लदिवद् द्रव्यसामानाधिकरण्येऽङ्गीक्रियमाणे "लुक् तद्धितलुकि"(1/2/49)
इति स्त्रीप्रत्ययस्य लुक्प्रसङ्गः ।
अथ सर्वदा द्रव्यस्यैव स्त्रीप्रत्ययान्तैः प्रत्यायनात् स्त्रीप्रत्ययस्यालुग् भविष्यति, न तु मतुप एव ।
एवं हि स्त्रीप्रत्ययस्य लुग् नैव प्राप्नोति । तस्माद् विनापि मतुपं स्वभावादेवद्रव्यस्य स्त्रीत्वाभेदेन प्रत्यायनम् । तथा च यत्रापि
मतुपो लुगारब्दः शक्लादौ,
तत्रापि स्वार्थावच्छिन्नप्रत्यायनशक्तिं प्रकृतेरेव ज्ञापयितुमित्युपलक्षणं तत्र
लुक् । असति तु तथार्थाभिधाने लुकापि किं कृत्यम् ।
एवं प्रत्ययार्थपक्षे गुणवचनत्वादभेदोपचारादाश्रयेण सह तत्सामानाधिकरण्यं
वचनभेदश्चोपपादितः। अनेकश्च प्रत्ययो भवति स्वभावाद् द्रव्योपसर्जनस्य स्त्रीत्वस्य क्वचिदनेकप्रत्ययेन
प्रतिपादनात्।।182।।
प्रत्ययार्थपक्ष एव सामानाधिकरण्याद्यपरेण प्रकारेण समर्थयितुमाह-
केषाञ्चित् त्यक्तभेदेषु द्रव्येष्वेव विधीयते।
संस्त्यानवत्सु टाबादिरभेदेन समन्वयात्।।183।।
संस्त्यानवत्सु द्रव्येषु "स्त्रियाम्" (4.1.3) इति स्त्रीशब्दस्य तद्वति वृत्तिमा-
श्रित्य प्रत्ययार्थपक्षेऽपि टाबादिर्विधीयते। स्त्रीप्रत्ययान्ताद्धि नियोगतों
द्रव्यं प्रतीयत इतितदेव प्रत्ययवाच्यं न्याय्यं कल्पयितुम्। यद्येवमेकं प्रकृत्य-
र्थभूतं द्रव्यमपरं प्रत्यार्थभूतमिति द्रव्यद्वयप्रतीतिप्रसङ्गः। न च भेदेन द्रव्यद्वयं प्रतीयते।
प्रकृतिप्रत्ययार्थ द्वयोः परस्परमनभिसम्बन्धप्रसङ्ग इत्याशङ्क्योक्तम्-
यक्तभेदेष्विति।
यस्मादविद्यामनविशेषेणार्थेनाविरोधाद् भवति प्रकृतिवाच्यस्य विशेषस्याभि-
सम्बन्धोऽभेदेन, सर्वत्र स्त्रीत्येवमाकारसंविन्निबन्धनेन सामान्येनावगमात्। तस्मात् प्रकृतिप्रत्ययवाच्यतया सामान्यविशेषकल्पनया

द्रव्येभेदः। प्रकृतिवाच्यं हि विशिष्टं द्रव्यम्, प्रत्ययवाच्यं तु द्रव्यसामानन्यम्। तदेव च प्रकृत्यर्थावच्छिन्नं
विशेषमासादयति।

तथाहि- प्रकृतिवाच्यानां द्रव्यविशेषाणां स्त्रीत्येवमभेदोऽनुगतः प्रतीतयत इति

प्रातीकिकोऽयं भेदः प्रकृतिप्रत्ययार्थयोः, न तु परस्परासंबद्धौ द्वौ द्रव्यात्मा-

नौ।।183।।

तथाहि-

सामान्यभूतो द्रव्यात्मा परिच्छिन्नपरिग्रहः।

क्रियाभिर्युज्यते भेदैर्भागश्चावतिष्ठते।।184।।

प्रकृतिवाच्येन द्रव्यविशेषेणावच्छेदाद् बुद्ध्या परिकल्पितः प्रत्ययवाच्यो द्रव्यात्मा सामान्यमिव, न तु सामान्यमेव।
एकपदनिबन्धनेन हि विशेषेणोपरागान्न
सामान्यत्मनि द्रव्यमत्रावतिष्ठते। अपि तु परिच्छिन्नपरिग्रहः।

एवञ्च कृत्वा क्रियायोगोऽस्य न विरूद्धः। तैश्च प्रकृतिवाच्यैर्भेदैर्वि-

शेषैस्तस्य समूहरूपस्य सर्वत्रानुगतत्वात् सामान्यस्य भागैरिवावच्छेदात् तद्रूपतयावस्थानमिति सामानाधिकरण्यमपि युज्यते।

अयमत्राशयः- प्रकृतिप्रत्ययसुदायाद् विशिष्टं द्रव्यं प्रतीयत इति तत्रापोद्धारे

प्रक्रियायां कल्पनया सामान्यविशेषभावेन भेदमाश्रित्य प्रकृत्यर्थप्रत्ययार्थत्वमव-स्थाप्यते। तदेव द्रव्यं प्रकृतेरर्थादन्यस्माद्

भेदेनावधार्यमाणं विशेषष्टाबादेर-

र्थस्य- स्त्रीत्यनुयायिना स्वभावेनानुगम्यमानं सामान्यमिति। लौकिके तु प्रयोगे

विशेषपर्यवसानैव प्रतिपत्तिरिति सर्वमुपपद्यते।।184।।

तदेवं प्रत्ययार्थपक्षे प्रकारद्वयेन स्वाश्रयतो वचनमुपपादितम्। एतदाक्षिपति-

शुक्लादिष्वाश्रयद्रव्यं प्राधान्येनाभिधीयते।

स्त्रीत्वं तु प्रत्ययार्थ्तवादभिधाविषयो यतः।।185।।

गुणोपसर्जनद्रव्यवचनाः शुक्लादयो युक्तं यदाश्रयगतलिङ्गसङ्ख्यानुवर्तिनः, प्रा-

धान्यादाश्रयस्य। स्त्रीत्वं तु प्रत्ययस्य टाबादर्वाच्यं प्राधान्येन। प्रकृत्य-

र्थस्तु द्रव्यमत्र गुणभूतमिति कथमत्र गुणधर्मान् प्रधानं प्रतिपद्येत। "विशेषणा-

नाम" (1.2.52) इत्यपि सूत्रेण विशेष्यवद् विशेषणानां व्यक्तिवचने

अतिदिश्येते, न तु विशेषणवद् विशेष्याणाम्। अभिधाविषय इति। सत्यपि वास्तवे

द्रव्यस्य प्राधान्ये न शब्दास्तदनुरुध्यन्ते, अपि तु स्वसामर्थ्यानुरुपमेषामभिधान-मित्यर्थः।।185।।

एतत् परिहरति-

सोऽयमित्यभिसम्बन्धादाश्रयं प्रतिपद्यते।

स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्ययः।।186।।

यद्यपि प्रक्रियायां स्त्रीत्वं प्रत्ययार्थ इति व्यवस्थाप्यते, तथापि शब्दशक्तस्व-भावाद् गुणभावस्येह विपर्ययो वैपरीत्यं दृश्यते।
स्त्रीत्वस्याप्राधान्यम्,
द्रव्यस्य तु प्राधान्यमिति।

न हि सर्वत्र प्रत्ययार्थः प्रधानम्। तद्यथा- साधने विधीयमानास्तिङो

नाख्याते साधनं प्राधान्येनाचक्षते, अपि तु क्रियोपसर्जनम्। संख्यायां विधीयमानाश्चविभक्तयः संख्येयोपसर्जनं तामाचक्षते।

दीव्यत्यादिषु च विधीयमानाष्ठगादयः क्रिया-
वन्तमभिदधति प्राधान्येनेति सर्वत शब्दशक्तिरेवानुसरणीया।
एवञ्चाश्रयस्यैव प्राधान्यात् तत्संख्यात्रोपपद्यते।
यद्वा यद्यपि संस्त्यानमात्रमभिधेयं प्रत्यस्य, तथापि तेनोपचरिता भेदाः प्रकृत्यर्थ व्यक्तीः प्रत्ययान्तोऽभिधत्त इति सिद्धं वचनम्।
तदेवं सामानाधिकरण्ये त्रयः
प्रकाराः।
द्रव्यादनतिरिक्तस्य स्त्रीत्वस्य प्रत्यायनम्, तद्यथा- `मूर्तिभ्यो मूर्तिधर्माणाम्'(वा.प.3वृ.181) इत्युक्तम्।अभेदोपचारो द्रव्यस्य वा प्राधान्यमितीहोक्तम्।।186।।
इदानीं संस्त्यानवद् द्रवयसमान्याभिधानपक्षेऽप्यत्र प्रत्ययार्थभूतस्यापि
सामान्यस्य वास्तवगुणत्वसंभवाद् गुणवचनत्वादाश्रयतो लिङ्गवचनातिदेशं योजयितुमाह-
साकाङ्क्षत्वाद् गुणत्वेन सामान्यं वोपदिश्यते।
व्यक्तीनामात्मधर्मोऽसावेकप्रख्यानिबन्धनः।।187।।
यदभेदन संस्त्यानवद् द्रव्यं प्रत्ययवाच्यं सामान्यभूतमुक्तम्,तत् सूत्रे विशेषणश-
ब्देन गुणपर्यायेणोक्तम्। यस्मात् प्रत्ययार्थत्वेन प्रधानमपि द्रव्यसामान्यं प्रकृत्यर्थगतद्रव्यविशेषापेक्षत्वाद्
गुणशब्देनार्हत्यभिधानम्, द्रव्याकाङ्क्षस्यार्थ-
स्य गुणत्वेन प्रसिद्धेः।
न च विशेषेभ्यो विलक्षणं तत्। यस्माद् व्यक्तीनां द्रव्यविशेषाणामसौ गुणस्वभावतां
प्राप्तः। एकप्रख्यानिबन्धनो हि व्यक्तीनां स्वभावः सामान्यं कथ्यते। व्यतिरेकदर्श-
नेऽपि समवायात् स्वरूपतिरोधानात् स्वभावाताप्राप्तिरेव।।187।।
ननु साकाङ्क्षत्वाद् भवतु गुणत्वं द्रवयसामान्यस्य बुद्ध्या परिकल्पितस्य, तत्त्वतस्तु संस्त्यानविशिष्टस्य
द्रव्यस्यैकत्वादाश्रयाश्रयिभावः कथमित्याह-
एवम्भूता च सावस्था भागभेदपरिग्रहे।
कृते बुद्ध्यैव भेदानामाश्रयत्वेऽवकल्पिते।।188।।

निष्कृष्टेष्वपि भेदेषु व्यक्तिरूपाश्रये ततः।
लिङ्गप्रत्यवमर्शेन लिङ्गसंख्ये प्रपद्यते।।189।।
सा सामान्यविशेषरूपाभ्यां शबलावस्था लिङ्गसंख्ये व्यक्तिरूपाश्रये कविशिष्टद्रव्या
श्रये ये प्रतिपद्यत इति समन्वयः।
तथाहि- अपोद्धारबुद्ध्या प्रकृतिप्रत्यभागपरिकल्पने कृते तयैव समुदायवाच्यमर्थं प्रकृतिप्रत्ययोर्विभज्य किञ्चिदस्य भेदरूपं
प्रातिपदिकोपादानमपरं प्रत्ययवाच्यं
संस्त्यानानुविद्धमंशप्रख्यं प्रकल्पितम्।
भेदे च परिकल्पिते, प्रकृतिवाच्यानां विशेषणानामाश्रयत्वे समारोपिते तेषु
प्रृथक्कृतेष्वपि स्वतन्त्रेष्वपि निरूप्यमाणेषु विशेषेषु लिङ्गप्रत्यवमर्शेन
स्त्रीत्येवं निरूपणेन स्त्रीत्ववद् आश्रितत्वादाश्रयगतलिङ्गसंख्याप्रतिलम्भः।
अन्यत्र लिङ्गसंख्ययोः साहचर्येण दृष्टत्वादिह लिङ्गग्रहणम्, न त्वत्र
स्त्रीत्ववतो लिङ्गान्तरस्य विरोधिनोऽतिदेशः संभवति। तदेवं द्विवचनानुपपत्तिः
प्रतिविहिता। अनेकप्रत्ययानुपपत्तिस्त्वत्र न प्रतिविहिता। लिङ्गवचनविचारप्रस्तावेनहीदमिह कथ्यत

इत्यत्राप्रस्तुतानेकप्रत्ययानुपपत्तिः। सुप्रतिविधाना चेयम्।
क्वचित् किल स्वभावाद् द्रव्योपसर्जनस्य स्त्रीत्वस्यानेकेन प्रत्ययेनाभि-
व्यङ्गयत्वात् । न हि व्यञ्जकानां नियमः ।
एतामेव च शब्दशक्तिमनुसर्तुं ष्फस्य षित्वं ङीषर्थं कृतम् । ष्यङश्च ङित्-
करणं "यङश्चाप्" (पा.4-1-74) इत्यत्र सामान्यग्रहणार्थम् ।
भाष्ये त्वन्यथा परिहारोऽभिहितः--`भवस्य च भावयुक्तत्वात्" इति हि
वार्तिकम् । गुणपरिणामरूपत्वात् स्त्रीत्वस्यापि स्त्रीत्वेन योग उपपन्न इत्यर्थः ।विस्तरव्याख्यात्र वार्त्तिकोन्मेषे ।
एतच्च शब्दशक्तिमननुसृत्य प्रत्ययार्थपक्षे संस्त्यानस्य प्राधान्यं
प्रक्रियागतमाश्रित्योक्तम् ।
यथा तु शब्दशक्त्यनुसारेणेह द्रव्यप्राधान्यं विवक्षितम्, तथा अनेकेनापि
व्यञ्जकेन व्यङ्गयप्रतीतिर्दृष्टेति यथासमर्थितमेव ज्यायः ।
तथा ह्यभिधानभेदात् स्त्रीत्वस्य स्त्रीत्वयोग उच्यते । प्रातिपदिकेन
द्रव्यरूपस्याभिधानात् प्रत्ययेन धर्मरूपस्येति प्रत्ययद्वयोपपत्तिः । यथा तदेव
कर्मादिविभक्तिभिः शक्तिरूपं प्रत्याय्यते । प्रातिपदिकेन तु वस्तुभूतम् । अयं
ह्येकत्वादर्थस्य शब्दभेदात् प्रतीतिभेद उपपन्नः ।। 188,189 ।।
क्रमप्राप्त्या द्वन्द्वे लिङ्गवचनातिदेशस्योपयोगो विचार्यते । तत्र चार्थेद्वन्द्वविधानादलिङ्गसंख्यत्वे चोदिते `स्वाभाविकत्वात्' इति परिहारोऽभिहितः । स
कथमुपपद्यते । यतश्चार्थस्य द्वन्द्वेनोपग्रहाद् मा भूच्चास्य तत्र प्रयोगः ।
चशब्दवत् तु द्वन्द्वस्याप्यर्थोऽभिहित इति अलिङ्गसंख्यत्वं केन न स्यादि-त्याशङ्कय क्रमेणैतदुपपादयितुमाह--
अन्तरेण चशब्दस्य प्रयोगं द्वन्द्वभाविनाम् ।
अविशिष्टार्थवृत्तित्वं रूपाभेदात् प्रतीयते ।। 190 ।।
धवखदिरादिशब्दा द्वन्द्वं भावयन्ते प्राप्नुवन्ति, द्वन्द्वो वा भावी
येषाम्, तेषां चशब्दप्रयोगं विना अविशिष्टार्थवृत्तित्वमवगम्यते । समुच्चयाख्य-
विशेषानपेक्षया धवादिजातीयस्यार्थस्य चशब्देनाविशेषितरूपा अविशिष्टरूपा धवादयः
शब्दा वाचका इति समुच्चयद्योतनाय वाक्ये चशब्दमपेक्षन्ते ।। 190 ।।
यतः--
विकल्पवति वा वृत्तिर्निवर्त्येऽर्थे समुच्चिते ।
तेषामज्ञातशक्तीनां द्योतकेन नियम्यते ।। 191 ।।
असति चादिपदप्रयोगे समुच्चयादिविशिष्टेऽर्थे द्वन्द्वभाविनां पदानां
वाक्यावस्थानां वाचकशक्तिर्नावर्धायते । सन्देहो हि स्याद् विकल्पादौ । ततश्च
यथा विकल्प्यमानेऽर्थे वाशब्देन पदानां वाचकशक्तिर्ज्ञाप्यते, नञा च निवर्त्ये
प्रतिषिध्यमाने, तथा चशब्देन समुच्चीयमाने । द्योतकेनेति न वदन् परपदनिष्ठस्य
शब्दस्य वाचकत्वाभावात् द्योतकलक्षणं ज्ञापयति । अकेवलपदप्रयोगो द्योतक इति
निर्णीतं वाक्यकाण्डे ।। 191 ।।
एवं वाक्ये चशब्दप्रयोगः समर्थितः समासे तु द्वन्द्वे नास्ति तस्य प्रयोग
इत्याह--
वृत्तौ विशिष्टरूपत्वाच्चशब्दो विनिवर्तते ।

अर्थमेदेऽपि सारूप्यात् तच्चार्थेनापदिश्यते ।। 192 ।।
एकार्थीभावकृताद् वृत्तिवाक्ययोर्विशेषाद् वाक्यगतधर्मवैलक्षण्येन वृत्तिप-
दानामर्थाभिधानादन्तरेणापि चशब्दं समुच्चयोपाधिकं विशिष्टार्थाभिधानं द्वन्द्वे
स्वाभाविकम्, न तु चार्थे द्वन्द्ववचनात् । न ह्यर्था आदिश्यन्ते । सहविवक्षायां
हि वृत्तावनुस्यूतभेदः प्रत्येकं पदैकन्योन्यापक्षैः समुदायोऽभिधीयत इति तत्र
भेदस्य विगलनात् तदधिष्ठानः समुच्चयो न द्योत्यः ।
वाक्ये तु भेदप्राधान्याच् चशब्देन भेदाधिष्ठानः समुच्चयो द्योत्यते ।
तदेवमत्यन्तार्थभेदेऽपि चार्थेन द्वन्द्वार्थो निर्दिश्यते, क्रियायामितरेतरापे-
क्षासाम्यमात्रात् । अन्वाख्यानाय ह्यर्थो लोकसिद्ध एव सर्वतो व्यावृत्तस्वभावः
कथञ्चित् सादृश्यलेशानुगमनेन शब्देषु निर्दिश्यते । सर्वतो व्यावृत्तस्य प्रतिशब्द-मर्थस्यानन्त्यान्निर्देषुमशक्यत्वात्
प्रक्रियागौरवप्रसङ्गाच्चेति लाघवेनार्थनि-
र्देशो न्याय्यः ।। 192 ।।
तत्र च तद्धितार्थनिर्देशवन्नैर्देशिकस्यार्थस्याप्राधान्यात् स्वभावसिद्ध एवार्थविशेषोऽनुगम्यते ।
यदि तु यथानिर्देशमर्थाः स्युः, तदा--
चस्य चासत्त्वभूतोऽर्थः स एवाश्रीयते यदि ।
तद्धर्मत्वं ततो द्वन्द्वे चादिष्वर्थकृतं हि तत् ।। 193 ।।
`अलिङ्गमसंख्यमव्ययम्' इत्यर्थनिबद्धाव्ययसंज्ञेति चार्थे द्वन्द्वविधानात्तस्य चार्थस्येव धर्मो लिङ्गसंख्यारहितत्वं
द्वन्द्वेऽप्यनुषज्येत । द्वन्द्वस्य
चादिष्वपाठादव्ययसंज्ञा न प्राप्नोतीत्याशङ्कयोक्तम्--`चोदिष्वर्थकृतं हि तत्' इति। अलिङ्गसंख्यत्वे चादीनामव्ययत्वं
स्वभावसिद्धं पाठेनानूद्यते, न तु पाठ
एव विधायकः, उदाहरणार्थत्वात् तस्येति च समानार्थत्वे द्वन्द्वेऽप्यव्ययत्वं
स्यादेव ।
मा भूद् वाव्ययसंज्ञा पाठनिबद्धा, अलिङ्गासंख्यत्वं त्वर्थाश्रयं केन
निवार्येतेत्यर्थः । अन्वर्थत्वाद् वाव्ययसंज्ञायाः सापि भवेत् ।। 193 ।।
तस्मान्न वचनानुरोधी स्वार्थः शब्दानामित्यभिधानवैचित्र्यादर्थवैचित्र्य-
मुदाहरति--
चार्थः शक्तेः क्वचिद् भेदात् कथञ्चित् समवस्थितः ।
द्योतकाश्चादयस्तस्य वक्ता द्वन्द्वस्तु तद्वताम् ।। 194 ।।
शब्दशक्तिभेदाद् यथा समुच्चयशब्दो लिङ्गसंख्यायुक्तं चार्थमाह, तथा
द्वन्द्व इति समुच्चयोपाधिकार्थाभिधायकोऽसौ । पदान्तरोपादानार्थनिष्ठास्तु
द्योतकाः चादय इति वाचकत्वद्योतकत्वकृत एवायं विशेषो व्यक्तिवचनाभ्यामयोगो
योगश्च ।। 194 ।।
तथाहि--
विकल्पाद्यभिधेयस्य चार्थस्यान्यपदार्थता ।
द्योतकत्वान्न कल्पेत तस्मात् सदुपलक्ष्यते ।। 195 ।।
विकल्पः समुच्चयः प्रतिषेध इत्येवमादिभिः शब्दैरभिधीयमानस्यार्थस्यान्येन

रूपेण लिङ्गसंख्यायोगिना पदप्रत्याय्यता वाप्रभृतिर्विकल्पादिशब्दानामर्थाभेदे
वाशब्दादिद्योतकत्वान्न घटेत ।

अस्ति तु लिङ्गसंख्यायोगिनोऽर्थस्य विकल्पादिशब्दैरभिधानात् सान्यपदार्थ-
तेत्येकस्यैव वस्तुनः शब्दशक्तिभेदान्नानाकारस्य प्रकाशनमिति शब्दार्थोऽर्थ इति
नये स्वाभाविक एवायमर्थभेद इति सत् सत्त्वभूतं वस्तु द्वन्द्वविषयत्वेन (विषयकेण)
चशब्देनोपलक्ष्यते कुतश्चित् सामान्यात् । न त्वसौ तत्त्वतश्चशब्देनेव द्वन्द्वेन
प्रत्याय्यत इत्यर्थः ।

तदेतदुक्तं भाष्ये--"नेदं वाचनिकमलिङ्गता असङ्खयता वा । किं तर्हि,

स्वाभाविकमेतत्"इति ।। 195 ।।

एतदेवाह--

तत्र स्वाभाविकं लिङ्गं शब्दधर्मे व्यपेक्षिते ।

शब्दः कश्चित् तमेवार्थं कथञ्चित् प्रतिपद्यते ।। 196 ।।

शब्दधर्मे शब्दस्वभावेऽभिसंहिते भाष्य एतदुक्तमित्यर्थः । तथाहि--वस्तुन
ऐक्येऽपि शब्दभेदादर्थवैचित्र्यम् ।

तद्यथा - काश्र्यम्, क्रशिमा, कृशतेति प्रकृतिप्रत्ययार्थयोः प्रकृतिरूपस्-याभेदेऽपि प्रत्ययश्रुतिभेदनिबन्धनः

स्थितिप्रसवसंस्त्यानभेदः । जलम्, आपः, दारा,
भार्येति च शब्दशक्तिभेदाल्लिङ्गवचनभेदः । तथा द्वैधमित्यलिङ्गोऽसंख्यः स
एवमतिद्वैधानीति सलिङ्गसंख्योऽर्थः प्रतिपाद्यते ।

अत्र हि "धमुञन्तात् स्वार्थे डदर्शनम्" (वा.5/3/45)इति प्रत्ययान्तरत्वे

शब्दान्तरत्वम् । एवं द्वन्द्वोऽपि सलिङ्गसंख्यार्थाभिधायी ।। 196 ।।

स्यादेतत् वक्तुरभिप्रायादर्थानां व्यवस्था, न शब्दधर्मत इत्याशङ्कयाह--

शब्दादर्थाः प्रतायन्ते स भेदानां विधायकः ।

अनुमानं विवक्षायाः शब्दादन्यन्न विद्यते ।। 197 ।।

जातावेकवचनं शब्दादिति । यथाभिप्रेतमर्थं प्रतिपादयितुं वक्ता योग्यान्

शब्दानुदाहरतीति तेभ्यः शब्देभ्यो वक्तृनिनक्षानुमानाद् व्यवहारे शब्दा एवार्थ-

व्यवस्थापने प्रभवः । अक्षिनिकोचादीनामपि शब्दैनैवानुमापकत्वं, सङ्केतितत्वात् ।

तथाहि--शब्देभ्यो वस्त्वर्था एकस्वभावा अपि विस्तारं भजन्ते, तेभ्यो
नानारूपाणां प्रकाशनात् ।

तथा च दारशब्दः स्त्रियं पुंस्त्वविशेषणामाचष्टे, भार्याशब्दः स्त्रीत्वावि-

शिष्टाम्, अप्शब्दोऽवयवात्मकं तमेवार्थं बहुत्वावच्छिन्नमाह ।

उदकशब्दस्तु समूहरूपमेकमित्यादिशब्दधर्मोऽनुगन्तव्यः । अतश्च सशब्दः
स्वशक्तिवशाद् भेदानां वाच्यविशेषणां विधायको निर्माता । भागभेदस्य वस्तुनि
समारोपणमिवार्थस्य स्वभावात् तत्कृतं नानात्वमित्यर्थः ।। 197 ।।

तदेवं स्वाभाविको लिङ्गसंख्यायोगो द्वन्द्वे समर्थितः । `अथवाश्रयतो लिङ्ग-वचनानि भविष्यन्ति' इति पक्षान्तरं वाचनिकं

भाष्ये उक्तं विचारयितुमाह--

समुच्चितः स्याद् द्वन्द्वार्थो गुणभूतसमुच्चयः ।

समुच्चयो वापि भवेद् गुणभूतसमुच्चितः ।। 198 ।।

समुच्चयोपाधिकाः समुच्चिता वा अर्था द्वन्द्वेनोच्येरन्, समुच्चितोपसर्जनो वा समुच्चय इति द्वैतम् ।। 198 ।।

तत्र,

समुच्चितस्य प्राधान्ये लिङ्गसंख्ये स्वभावतः ।
समुच्चयस्य प्राधान्ये शास्त्रं स्यात् प्रतिपादकम् ।। 199 ।।

समुच्चयेपसर्जनस्य सत्त्वभूतस्यार्थस्य द्वन्द्ववाच्यत्वे स्वाभाविके लिङ्-गसंख्ये इत्युक्तम् ।

यदा तु वचनेनार्थनिर्देशे समुच्चयः प्राधान्येन द्वन्द्ववाच्यः, तदा वचने-
नैव "विशेषणानाम्"(पा.1/2/52)इत्याश्रयतो लिङ्गवचने विधीयते । धर्मरूपत्वात्
समुच्चयस्याप्राप्तयोरिष्टयोर्लिङ्गसंख्ययोः शास्त्रं विधायकम् । तत्र समुच्चयस्य
प्राधान्येऽप्याश्रितमात्रस्य विशेषणशब्देनाभिधानाद् युज्यतेऽतिदेशः ।। 199 ।।

समुच्चितप्राधान्येऽपि शास्त्रस्योपयोगमेकीयमतेनाह--

समुच्चयवतोऽर्थस्य प्राधान्येऽप्यपरे विदुः ।
निमित्तानुविधायित्वादसिद्धिं लिङ्गसंख्ययोः ।। 200 ।।

निमित्तरूपेण निमित्तिनोऽवधार्यमाणस्य तदावेशाद् रूपतिरोधानमितीहापि समु-
च्चयाख्यानिमित्तावच्छादितस्य समुच्चितस्य स्वधर्मप्रतिपत्त्ययोग्यत्वात् तदीययो-
र्लिङ्गसंख्ययोरप्राप्तावतिदेश इति पक्षद्वयेऽपि शास्त्रमुपयोगि ।। 200 ।।

एतदयुक्तमित्याह--

समुच्चयो निमित्तं चेत् स्यान्निमित्तानुवर्तनम् ।
अन्वयव्यतिरेकाभ्यां चार्थो द्वन्द्वनिबन्धनः ।। 201 ।।

समुच्चयोपाधिरर्थो न द्वन्द्ववाच्यः, येन निमित्तानुविधानं स्यात् । अपि तु योऽर्थोऽन्वयव्यतिरेकाभ्यां द्वन्द्वस्य वाच्य
इत्यवधारितः, स चार्थ इत्येवं
द्वन्द्वस्यान्वाख्यानायानुभाष्यते ।
स च क्रियायां समकक्ष्याणामर्थानां समूह उद्भूतकारकशक्तिः । तस्य
च कथञ्चित् समुच्चितशब्देनाभिधानदर्शनाद् भ्रान्त्या समुच्चयो निमित्तत्वेनाध्या-
रोप्यते ।। 201 ।।

परमार्थस्त्वयमत्रेत्याह--

समुच्चितनिमित्तत्वे चार्थस्यापगमेऽपि वा ।
स्वभावसिद्धे द्वन्द्वस्य लिङ्गसंख्ये व्यवस्थिते ।। 202 ।।

यदा समुच्चितो द्वन्द्वस्य निबन्धनम्, तदा प्रधानधर्मानुविधानाद् न्याय-
प्राप्ते तदीये लिङ्गसङ्खये ।
यद्वात्यन्तवैलक्षण्याच्चार्थ एवार्थसमुच्चयो नास्ति, यस्य द्रव्येण सह
गुणप्रधानभावाश्चिन्त्येत । सादृश्यलेशानुगममात्रेण तु शब्दानुशासने यथाकथञ्चि-
दर्थो निर्दिश्यते द्वन्द्वनिमित्तत्वेन चार्थ इति ।
सत्त्वभूत एव तु स्वभावतो द्वन्द्वार्थ इति समुच्चयस्यासत्त्वादेव
निमित्तभावो नास्ति ।। 202 ।।

अन्योन्यापेक्षा द्वन्द्वान्तर्वर्तिपदार्था द्वन्द्ववाच्याः,स एव च
समुच्चयः । तत् किमुच्यते चार्थस्यापगम इत्याशङ्कय पूर्वोक्तमर्थभेदं स्मारयति--
पदान्तरस्थस्यार्थस्य द्योतकत्वान्न युज्यते ।
निपातो लिङ्गसङ्खयाभ्यां द्वन्द्वस्त्वर्थस्य वाचकः ।। 203 ।।
वस्त्वर्थस्याभेदेऽप्यभिधाव्यापारभेदाच्छब्दार्थो भिद्यत इति द्वन्द्वे
सत्त्वभूतार्थाभिधानाच्चार्थस्य वाक्येऽसत्त्वभूतस्य दृष्टस्यापगमो वर्णित
इत्यर्थः । वाचकद्योतकशक्तिविलसितं चैतत् प्रागेवोक्तम् ।। 203 ।।
पुनरपि निमित्तानुविधानदर्शनमुपालभते--
निमित्तानुविधाने च द्रव्यधर्मानपेक्षणात् ।
गुणप्रधानभावेन क्रियायोगो न कल्पते ।। 204 ।।
निमित्तानुविधाने निमित्तरूपाच्छुरितस्य निमित्तिनो द्रव्यस्याभिधानात्
तस्य धर्मः शक्तिर्बुद्धया नावधार्यत इति क्रियाभिः प्राधान्येन गुणत्वेन वास्य
योगो न स्यात् । द्रव्यं हि साधनम् । तस्य चानवधारितस्वशक्तेः कथं
क्रियाभिसम्बन्धः ?
न च निमित्तस्य क्रियायोगोऽसत्त्वभूतत्वात् । तत्र गुणभावेन करणादिरूपतया
क्रियासम्बन्धः, प्रधानभावेन कर्मरूपतया च तस्य क्रियाभिरुत्पत्तिसंस्कारप्रतिप-
त्तिविषयस्य समन्वयात् ।। 204 ।।
मा भूत् क्रियायोग इति चेदाह--
यस्य नास्ति क्रियायोगः स्वतन्त्रोऽसौ न विद्यते ।
अर्थो द्वन्द्वस्य तत्र स्यादुपादानमनर्थकम् ।। 205 ।।
"क्रियानुषङ्गेण विना न पदार्थः प्रतीयते" (वा.प.2/425)इति स्वतन्त्रः
स्वनिष्ठः क्रियाभिरसम्बध्यमानः पदार्थो नास्ति । ततश्च तस्मिन्नर्थे निमित्तानुर-
क्ते क्रियायोगाभावा द्द्वन्द्वस्य वाचकत्वेन परिग्रहो निष्प्रयोजन इति नान्वाख्-
येयोऽसौ भवेदव्यवहार्यः । तस्मादन्वाख्यानादेवावसीयते निमित्ताननुविधानमत्र।।205।।
नचापि सर्वत्र निमित्तानुविधानमित्याह--
समुच्चयवतोऽर्थस्य वाचको नानुवर्तते ।
निमित्तमपि चास्यार्थः स्वधर्मैर्युज्यते ततः ।। 206 ।।
येऽप्येते समुच्चितादयः शब्दाः समुच्चयोपाधिकार्थाभिधायकत्वेन प्रसिद्धाः, तेऽपि निमित्तं नानुरुध्यन्ते । प्रागेव तु द्वन्द्वः, यत्र समुच्चयोपाधित्वे
भ्रान्तिः, यत्र हि निमित्तरूपेण निमित्तिनि तिरोहितस्वरूपे प्रतिपत्तिः, तत्र निमित्तानुविधानम्, यथा शुक्लादौ ।
इह पुनर्निमित्तेन भिन्नेनावच्छिन्नस्याख्यानमिति नास्ति तत् । अत एव
समुच्चयवत इति मतुबुपात्तः । भिन्नेन निमित्तेनावच्छिन्नस्यात्राख्यानमिति मतुपा
दर्शयति ।
यत्र तु निमित्तरूपेणाभिधानम्, तत्र शुक्लादौ मतुब् नोत्पद्यते ।
तस्मान्निमित्तानुविधानाभावादत्र समुच्चितशब्दः स्वार्थं स्वलिङ्गसंख्यायोगिनमभि-
धत्ते, तद्वद् द्वन्द्वोऽपीति न कश्चिद् दोषः ।

तदेवम् `समुच्चितः स्याद् द्वन्द्वार्थ' (वा. प. 3 वृ. 20) इत्यत्र पक्षे
स्वभावत एव लिङ्गसंख्ये इत्येतदेव युक्तम् । समुच्चयप्राधान्ये तु "विशेषणानाम्"
(पा.1/2/52)इति शास्त्रेण लिङ्गसंख्याविधानं तत्रैव तद् वक्तव्यम् ।। 206 ।।
समकक्ष्यानर्थानभिदधतो द्वन्द्वस्य कः समानाधिकरणपदवाच्य आश्रयः,
यस्य व्यक्तिवचने प्रतिपद्येतेत्याशङ्कयाह--
बाह्यो नास्त्याश्रयो द्वन्द्वे विशेषौ तत्र हि श्रुतौ ।
समुच्चयस्तदाधारस्तद्धर्मैर्व्यपदिश्यते ।। 207 ।।
`शुक्लाः पटाः' इत्यत्र यथा पटशब्दोपादानो गुणवचनस्याश्रयोऽस्ति, नैवं
पदान्तरोपादानो द्वन्द्वे विद्यते । श्रुत्यैव द्वन्द्वपदाभ्यां विशेषयोर्भेदयोरुपादानात्तदन्तरङ्गयोः । धवखदिराविति तावेव विशेषौ समुच्चीयमानौ समुच्चयस्याधार
आश्रय इति तल्लिङ्गसंख्ये समुच्चयवाचिनौ द्वन्द्वस्य भवतः ।
तत्र च पूर्वोत्तरपदगताभ्यां विरुद्धाभ्यां लिङ्गाभ्यां युगपद् व्यपदेशास-
म्भवात् पर्याये प्राप्ते परवल्लिङ्गं नियम्यते । संख्याप्यवयवगतैकत्वसमाहारात्मिकाद्वित्वबहुत्वलक्षणावयवलक्षणाश्रयवद् द्वन्द्वस्य भवति ।। 207 ।।
एवं परस्परापेक्षा अवयवार्था एव द्वन्द्वार्थ इत्यत्र दर्शने प्रतिपादितमि-दम् । इदानीं युगपदधिकरणवचनतायाश्चार्थस्यासम्भवपक्षे प्रतिपादयितुमाह--
यो वावयवभेदाभ्यां भेदवद्भ्यामिवान्वितः ।
एकः समूहो धर्मान् स भागयोः प्रतिपद्यते ।। 208 ।।
अवयवभेदानुगतः समुदायः सहविवक्षायां द्वन्द्ववाच्यः, अभिधानं पुनः
स्वाभाविकम् `याभ्यां चैकमनेकार्थं ताभ्यामेवापरं पदम्' (वा.प.3 वृ. 32)
इति प्रत्येकं पदैरभिधीयमानोऽर्थ इत्यत्र दर्शने व्यक्तिवचने अवयवाश्रये समुदायः
प्रतिलभत इति स्पष्टमेतत् । अनुस्यूतभेदस्य च समुदायस्य द्वन्द्वेनप्रतिपाद्यत्वाद्भेदवद्भयामिवेत्याह । न
त्वत्यन्तभिन्नाभ्यामित्यर्थः ।
अभेदानुगमाच्च तयोर्भागयोराश्रयभूतयोः समुदायो लिङ्गसंख्ये अनुवर्तते ।
अन्यथा निरस्तभेदस्य वनयूथादिवदभिधाने भेदयोराश्रयभूतयोरनुपादानाद् वर्तिपदाभ्यां
कस्य लिंङ्गसंख्ये भजेत द्वन्द्व इत्यभिप्रायः ।। 208 ।।
नन्वेवमप्यवयवव्यतिरेकेण समुदायानुपलक्षणात् क्व आश्रयाश्रयिभाव
इत्याह--
एकश्च द्वयात्मकोऽर्थोऽसौ भेदाभेदसमन्वितः ।
यौ भेदावाश्रितस्तत्स्थे लिङ्गसङ्खये प्रपद्यते ।। 209 ।।
अवयवात्मतया गृह्यमाणः समुदायो भिन्नः, स्वतस्त्वेकप्रश्यानिबन्ध-
नतयाऽभिन्न इति द्विरूपः ।
तथाच प्रत्येकं पदैर्भेदात्मना प्रत्याय्यमान आश्रयः, समूहात्मना त्वर्था-
श्रितः (त्वाश्रितः) इत्याश्रयभूतवर्तिपदार्थसमवेते लिङ्गसंख्ये समवलम्बत इति
स्थितम् ।। 209 ।।
इदानीं बहुर्वीहौ व्यक्तिवचनातिदेशोपयोगं क्रमेण व्युतपादयितुमाह--

यथा स्वशब्दाभिहिते चैत्रार्थे न प्रयुज्यते ।
चैत्रशब्दो बहुर्वीहावप्रयोगस्तथा भवेत् ।। 210 ।।
इहान्यपदार्थे बहुर्वीहिरन्वाख्यायते । ततश्च तेनैवान्यपदार्थस्योक्तत्वाद्
द्वन्द्व इव चशब्दस्य तदभिधायिनश्चैत्रादेः प्रयोगो न प्राप्नोति ।
तद्यथा--चैत्रशब्देनोक्ते स्वार्थे पुनश्चैत्रशब्दो न प्रयुज्यते । उक्ता-
र्थानां ह्यप्रयोगः । तदुक्तं वार्त्तिके--"पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहि-
तत्वात्" इति ।
अत्र परिहारोऽभिहितः "न वानभिहितत्वात्, सामान्याभिधाने हि
विशेषानभिधानम्" इति ।। 210 ।।
एतद् व्याचष्टे--
यथा गौरिति शुक्लादेरभिधानं न विद्यते ।
एवं यस्याभिसम्बन्धो गोभिस्तावत् प्रतीयते ।। 211 ।।
सम्बन्धिसामान्ये बहुर्वीहिरिति तद्विशेषप्रतिपत्तिरतो न भवति । तद्यथा--
सामान्यवाची गोशब्दो विशेषाभिदानायासमर्थ इति प्रयुज्यते विशेषप्रतिपत्तये शब्दः,
तत्र `गौः शुक्लः कृष्णो वेत्यादिः । एवं `चित्रगुश्चैत्रो मैत्रो वा' इति प्रयोगो विशेषप्रति पत्तये न्याय्यः । चित्रा गावो यस्येति
स्वामिमात्रस्य प्रतीतेः।।211।।
यत्र तु शब्दशक्तिस्वाभावाद् बहुर्वीहिणैव विशेषोऽङ्गीकृतः, तत्र तदभिधायीन प्रयुज्यत इत्याह--
सम्बन्धी नियतो रूढश्चित्राणां न च विद्यते ।
गवां यथा वज्रपाणिस्त्र्यक्षो वापि व्यवस्थितः ।। 212 ।।
वज्रं पाणौ यस्य, त्रीण्यक्षीणि यस्येति नियतः प्रसिद्धोऽव्यभिचारी रूढः
शक्रः शिवश्च सम्बन्धी वृत्तावन्तरेण विशेपदप्रयोगमवगम्यत इति भवति तत्र सम्बन्ध
विशेषेऽन्यपदार्थे बहुव्रीहिः। चित्रगुरित्यत्र विशेषो नावधार्यते, चित्रैर्गोभिर-
विशेषेणं स्वामिमात्रस्य समन्वयसम्भवादिति विशेष्यस्यानुप्रयोगोऽत्राविरुद्धः।
प्रकरणादेस्तु विशेषावगमेऽत्रापि तत्प्रयोगो नास्ति।।212।।
एवं वार्त्तिककृता विसेषाबिधानायानुप्रयोगे समर्थिते चोदितं भाष्ये
"भवेत् सिद्धम्, यदा सामान्ये वृत्तिः। यदा तु विशेषे वृत्तिः, तदा न सिध्यति
। चित्रा गावोऽस्य देवदत्तस्य" इति।
अत्र सरमाधिः `नेदमुभयं युगपद् भवति वाक्यं समासश्च। यदा वाक्यं
, न तदा समासः, यदा समासः, सामान्ये तदा वृत्तिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। चित्रगुः कः, देवदत्तः इति।
तदेतद् व्याचष्टे--
शब्दान्तरत्वाद् वाक्येषु विशेषा यद्यपि श्रुताः।
वृत्तिशब्दोऽन्य एवायं सामान्यस्याभिधायकः।।213।।
निर्णीतचरमेतद् वृत्तिवाक्ययोरर्थरूपभेदेन शब्दान्तरत्वमिति। विशेषप्रक्रमेऽपि वाक्ये वृत्तिशब्दो विशेषाभिधानप्रहतशक्तिरिति युक्त
एवानुप्रयोगः। न हि वाक्यमेव
वृत्त्यावनन्तरर्भावात् सामान्यमेवासावाचष्टे। अदूरविप्रकर्षेण तु वृत्त्यर्थो
वाक्येनोपदर्श्यते। न तु सर्वतः परिच्छिन्ने वाक्यार्थे वृत्तिपदस्याभिधानशक्तिः,

संख्याविशेषादेरतोऽप्रतीते।।213।।
यद्येवं किमनेनानवगमितविशेषेण साकाङ्क्षेण सामान्याभिधानायिना बहुव्रीहि
समासेन प्रयुक्तेनेत्याशङ्क्याह-
अगोरचित्रगोश्चैव रूपभेदान्निवर्तकः।
एवं चित्रगुविशेषाणां रूपाभेदात्तु वाचकः।।214।।
चित्रगुशब्देनाविद्यमानगोसम्बन्धाद् व्यावृत्तोऽर्थाभिधीयते। चित्रत्वेन विशेषणाद-चित्रगोर्व्यावृत्तिः।
एवञ्च न सर्वथा सामान्यशब्दोऽयम्, अपि त्वन्यव्यावृत्तिविशेषस्या-
प्यभिधातेत्यर्हति प्रयोगम्।
एतावतीं विवक्षां पुरस्कृत्य चित्रगवीसम्बन्धे हि प्रतिपाद्ये भिन्नरूप एवायं शब्दः। तन्निष्ठापरविशेषप्रतिपादने तु
रूपसामान्यादशक्त इति सामान्यस्याभिधायकः कथ्यते। चैत्रोऽपि हि स्याच्चित्रगुर्मैत्रोऽपीत्यत्राविशेषः।।214।।
एवं विशेषशब्दानामनुप्रयोगे साधिते पुनश्चोदितम्- `सामान्यस्यैव तर्हनुप्रयोगगो न प्राप्नोति। चित्रगु तत्, चित्रगु किम्, चित्रगु सर्वम्' इति।
अत्र समाधिः- `सामान्यमपि यथा विशेषः, तद्वत् चित्रगु इत्युक्ते सन्देहः
स्यात्, सर्वं वा विश्वं वेति, तत्रावश्यं विशेषोऽनुप्रयोक्तव्यः'इति।
अत्र सामान्यस्य कथं विशेषसादृश्यमिति व्याचष्टे--
यथा चित्रगुरित्येतत्प्रयुक्ते न प्रयुज्यते।
एवं यदि स्यात् सामान्यं तस्य न स्यात् प्रतिश्रुतिः।।215।।
चित्रगुरित्येवं चित्रगवीस्वामिन्याख्याते न तदर्थ एव शब्दोऽनाकाङ्क्षितार्थः
प्रयोगमर्हति। एवंभूतं यदि सर्वादिपदोपादानं सामान्यमनाकाङ्क्ष्यमाणं स्यात्, तदा
अन्यव्यावृत्ताभिधानाच्च विशेषपदमेवैतदित्याह-
सर्वादयो विशेषास्तु प्रदेशानां निवर्तकाः।
यथा प्रदेशाः सामान्यप्रदेशान्तरबाधकाः।।216।।
इह भेदकत्वं विशेषलक्षणमिति यथा चैत्र इत्युक्ते मैत्रादिविशेषान्तरव्यव-
च्छेदः प्रतीयते, सामान्यस्य च निवृत्तिः, तथा `सर्वं विश्वम्' इत्यादिसामान्यपद-
प्रयोगेऽपि विशेषनिवृत्तिप्रतीतेरन्यव्यवच्छेदकमिदं सामान्यमपि विशेषो भवत्यपेक्षावशादित्यर्थः।।216।।
एवं पदार्थाभिधानपक्षेऽनुप्रयोगानुपपत्तिचोद्यं समाहितम्।
यदा तु चित्रा गावो यस्येति विभक्त्यर्थेऽन्यपदार्थे सम्बन्धलक्षणे
बहुव्रीहिः, तदा सम्बन्धवाचिका विभक्तिः षष्ठी मानुप्रयोजि, द्रव्यं तु सम्बन्धन-
भिहितमिति तदभिधानायानुप्रयोग उपपद्यत एव।
तदुक्तं भाष्ये-" अथवा विभक्त्यर्थोऽभिधीयते। एतच्चात्र युक्तम्। अत्र हि सर्वपश्चात्पदं वर्तते' इति।
चित्रा गावो देवदत्तस्येति यथैतत् षष्ठ्यन्तं पदं तदभिधाव्यापारेण प्रातिप-
दिकार्थोपसर्जनं विभक्त्यर्थं प्राधानयेनाचष्टे। तथा च समबन्ध्युपसर्जनस्य सम्बन्ध-
स्यान्यपदार्थता न्याय्येति सर्वपश्चाच्छब्देन षष्ठ्यन्तस्य पदस्य तत्र विभक्त्य-
र्थे व्यतिरेके सम्बन्धलक्षणे वृत्तिमाह अभिधाव्यापारेण। `नागृहीतविशेषणा विशेष्ये बुद्धिः' इति न्यायात् पूर्वमवच्छेदके
प्रातिपदिकार्थे सम्बन्धिनि वृत्तिः, पश्चात् तदुपहितविशेषे सम्बन्ध इति स एवान्यपदार्थः प्रधानभूतो न्याय्यः।

तदेतदाह--

विभक्त्यर्थाभिधानाद् वा षष्ठी नानुप्रयुज्यते।

द्रव्यस्यानभिधानात्तु तच्छब्दोऽनुप्रयुज्यते।।217।।

गतार्थोऽयं श्लोकः।।217।।

अत्र पक्षे चोदितम्- " विभक्त्यर्थाभिधाने द्रव्यस्य लिङ्गसङ्ख्योपचारानुपपत्तिः" इति विभक्त्यर्थस्यासत्त्वभूतत्वात् सत्त्वस्य द्रव्यस्य ये लिङ्गसङ्ख्ये
तदुपचारो व्यवहारोऽत्र समासवात्त्यस्य न स्यादित्यर्थः।

अत्र समाधिरूक्तः- "सिद्धं तु यता गुणवचनेषु"इत। तत्र गुणवचनानामाश्रयतो
लिङ्गवचनानि भवन्ति। शुक्लादीनामाश्रयैर्मतुब्लोपेन सामानाधिकरण्यात्।

इह तु सम्बन्धमात्रवचनस्य बहुव्रीहेः सम्बन्धिवचनैर्मतुब्लोपात् सामानाधिकरण्यं न युज्यत इत्याह--
सामानाधिकरण्यं चेन्मतुब्लोपात् प्रकल्पते।

मतुपोऽपि तदर्थत्वादनवस्था प्रसज्यते।।218।।

बहुर्वीहिवन्मतुपापि सम्बन्धस्यैव प्रतिपादनात् सम्बन्धिनोऽनभिधाने पुनर-

परो मतुब् विधेयः, तेनापि सम्बन्धिनोऽप्रत्यायने पुनरपर इत्यनवस्था अनिष्टा
मतुपामत्र स्यात् । मतुपा तु सम्बन्ध्यभिधाने मत्वर्थे बहुर्वीहेर्विधानात् तेनापि तथैवार्थाभिधाने विभक्त्यर्थाभिधानपक्षो न भवेत् ।। 218 ।।

न केवलमनवस्था, यावत्--

सम्बन्धस्य च सम्बन्धी सम्बन्धोऽन्यः प्रसज्यते ।

विभक्त्यर्थप्रधाने च क्रियायोगो न कल्पते ।। 219 ।।

बहुर्वीहिवाच्यः सम्बन्धः प्रकृत्यर्थः । तेनावच्छिन्नोऽपरो मतुब्वाच्यः
सम्बन्धः । प्रकृत्यर्थोपरक्तत्वाच्च प्रत्ययार्थस्य प्रकृत्यर्थसम्बन्धावच्छिन्नः प्रत्ययार्थः प्रकृत्यर्थस्य सम्बन्धी स्यात् ।
तथा च प्रकृत्यर्थस्य सम्बन्धरूपता हीयते । उपाधिमत्त्वात् सम्बन्धिरूपता
प्राप्तेत्यभिप्रायः । षष्ठयर्थप्रधाने च बहुर्वीहौ चित्रगुरानीयतामित्यादिः

क्रियायोगो न स्यात्, सम्बन्धस्यासत्त्वभूतत्वेन कारकशक्त्याविर्भावायोगात्।।219।।

अथ `तत्र पश्य, ततः पश्य' इति विभक्त्यर्थप्रधानेऽपि दृष्टः क्रियायोगः,

नेत्याह--

विभक्त्यर्थप्रधानत्वात् ततस्तत्रेति न क्रिया ।

दृश्यादिः कर्मकर्त्रादिनिमित्तत्वाय कल्पते ।। 220 ।।

अपादानाधिकरणशक्तिप्रधानयोस्ततस्तत्रेत्यनयोर्दृशितिष्ठतीत्यादिका क्रिया

कर्तृकर्मशक्ती नाविर्भावयति, विभक्त्यन्तरार्थविरोधात् ।

किन्त्वत्रावधिमतत आधेयस्य च क्रियायोगः प्रतीयते । ततः पश्य, तत्र

तिष्ठतीति ।। 220 ।।

एवं विभक्त्यर्थाभिधानपक्षे दोषः ।

किञ्च विभक्त्यर्थाभिधाने चित्रगुर्देवदत्तस्येति षष्ठी स्यात् ? न भविष्-

यति । "अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्नः" इति ।

अत एव क्रियायोगो भविष्यतीत्याशङ्क्याह--

अन्तर्भवेच्च सम्बन्धः प्राधान्याभिहितः कथम् ।
स प्रातिपदिकार्थश्च तथाभूतः कथं भवेत् ।। 221 ।।
चैत्रस्येति यथा षष्ठया सम्बन्धः प्राधान्येनोद्भूतरूपोऽभिधीयते, तथा च
बहुर्वीहिणेति स कथमत्रान्तर्भवेत् ? यो हि सम्बन्ध्युपसर्जनः सम्बन्धोऽभिधीयते,
सोऽन्तर्भवति समासे ।
तद्यथा--`राजपुरुषः' इत्यत्र राजविशिष्टस्य पुरुषार्थस्य प्राधान्यात् सम्बन्धो गुणभूत इति भवत्वसौ प्रातिपदिकार्थः, इह तु व्यतिरेकेणोच्यमानः कथं प्रातिपदि-
कार्थः स्यात् ।। 221 ।।
इदानीं क्रियायोगं तावदुपपादयति--
असम्भवात्तु सम्बन्धे सम्बन्धसहचारिणि ।
जातिसङ्ख्यासमाहारकार्याणामिव सम्भवः ।। 222 ।।
`गामालभेत' ब्राह्मणानां शतमानय, पञ्चपूली बध्यताम्' इति जात्यादिषु
शब्दचोदितेषु क्रियायोगानुपपत्तेस्तत्सहचारिण्यविनाभाविनि द्रव्ये क्रिया यथानुष्ठीयन्ते, तथा `चित्रगुरानीयताम्' इति सम्बन्धमात्रे क्रियानुपपत्तेः, तदविनाभूते
सम्बन्धिनि तन्निवेशः ।। 222 ।।
स्यादेतत् । जातिशब्दैः स्वारूपाच्छुरितोऽभिधीयतेऽभेदेन सहचारीति युज्यतेतत्र क्रियायोगः । इह तु सम्बन्धस्य प्राधान्यात् कथमेतदित्याशङ्क्यात्रापि सामाना-धिकरण्यमुपपादयितुमाह--
सोऽयमित्यभिसम्बन्धाद् विशिष्टाश्रयवाचिनाम् ।
शुक्लादिवल्लिङ्गसङ्ख्ये शास्त्रारम्भाद् भविष्यतः ।। 223 ।।
मा भून्मतुब्लोपदत्र सामानाधिकरण्यम्, सोऽयमित्यभिसम्बन्धाश्रयेण तु
शुक्लादिवत् सम्बन्धेनोपचरिताभेदः सम्बन्धी वृत्तिपादवाच्यः सम्बन्धमात्रेऽपि
वृत्तिविधाने, शब्दशक्तिस्वाभाव्यादिति मञ्चादिवन्निमित्तानुविधानपरिहारार्थम्
`विशेषणानाम्"(3/1/52)इति सूत्रेण सम्बन्धिगतलिङ्गसङ्ख्यासिद्धिः । निमित्तानुविधा-
नेतु सम्बन्धस्य दिष्ठत्वाद् द्विवचनं स्यात् । शास्त्रारम्भात्तु प्रधानभूतान्यप-
दार्थाश्रये व्यक्तिवचने सिध्यतः ।। 223 ।।
यद्येवं कथमिदमुक्तं भाष्ये--"यदि तर्हि विभक्त्यर्थोऽभिधीयते, कृत्स्नः
पदार्थः कथमभिहितो भवति सद्रव्यः, सलिङ्गः,ससङ्ख्यश्च" इति ।
यावता सोऽयमित्यभिसम्बन्धाल्लिङ्गः सङ्ख्योपपत्तिरित्याशङ्खय भाष्यकारा-
भिप्रायं व्याचष्टे--
भेदेन तु विवक्षायां सामान्ये वा विवक्षिते ।
सलिङ्गस्य ससङ्ख्यस्य पदार्थस्यागतिर्भवेत् ।।
सम्बन्धिनो व्यतिरेकेण यदा सम्बन्धस्य बहुर्वीहिणा प्रतिपादनमिष्टम्, तदा
द्रव्येणासामानाधिकरण्यात् तल्लिङ्गसंख्योरयोगात् कृत्स्नस्य पदार्थस्यागतिरुक्ता ।
सोऽयमिति सम्बन्धिविवक्षायामेव वा निर्विशेषस्य सामान्यस्य चित्रगोरिद-
मुचितमित्यचित्रगुव्यावृत्तिमात्रपरेऽभिधाने बहिरङ्ग्य चैत्रादिपदान्तरगम्यस्या-

श्रयस्याभावाल्लिङ्गसंख्यासर्वनामनपुंसकैकवचनप्रसङ्गात् कृत्स्नः पदार्थः कथमभिहितोभवतीत्युक्तम् । अतश्चात्र सोऽयमित्यभिसम्बन्धेऽपि कृत्स्नपदार्थाभिधानाभावाद्

विभक्त्यर्थाभिधानपक्षस्त्याज्यः, द्रव्याभिधानपक्ष एवाश्रयितव्यः ।। 224 ।।

स कथमुपपद्यत इत्याह--

साधुत्वं न विभक्त्यर्थमात्रे वृत्त्स्य दृश्यते ।

कृत्स्नार्थवृत्तेः साधुत्वमित्यर्थग्रहणं कृतम् ।। 225 ।।

प्रयुक्तानां शब्दानामन्वाख्यानात् षष्ठ्यर्थमात्रे द्रव्यादिरहिते वृत्त-

स्यैकार्थीभावापन्नस्य बहुर्वीहैः समासस्य प्रयोगो यतो न दृश्यते, द्रव्यप्रधानस्यैवान्यपदार्थस्यस्मात् प्रतीतेः । अतोऽर्थग्रहणं सकलार्थवाचिनः प्रयोगज्ञापनार्थं

कृतम् ।

तदुक्तं भाष्ये-"अन्यपद इत्येतावता सिद्धे यदर्थग्रहणं करोति, तस्यैतत्

प्रयोजनं कृत्स्नः पदार्थो यथा विज्ञायेत सद्रव्यः सलिङ्गः ससंख्यश्च" इति ।

सद्रव्य इत्येवमपि निर्देशे द्रव्यमेव प्रधानमभिसंहितम्, न गुणादयोऽपि समकक्ष्याः,द्रव्यस्यैव तात्पर्यदृशा गुणाद्युपरक्तस्य प्रतीतेः ।

तत्र पद इत्युक्ते सामर्थ्याद् विभक्त्यर्थः सन्निहितः प्रतीयते, शब्दे

शब्दस्य वृत्त्यभावात् । अर्थशब्दोपादाने तु पदेनार्थो विशेष्यमाणः सर्वपदावधिको

विज्ञायेत ।

यथा ह्याधिक्याद् वाक्यार्थोऽत्रैव व्यावर्त्यते, तथा न्यूनत्वाद् विभक्-

त्यर्थमात्रमिति लिङ्गसंख्यावत् पदार्थभूतं द्रव्यमेवान्यपदार्थ इति पदार्थाभिधान-

पक्ष एव ज्यायान् । ततश्चानुप्रयोगः समर्थितः ।। 225 ।।

अत्र च पक्षे व्यक्तिवचनातिदेशस्य नास्त्युपयोग इति तस्य पक्षान्तरे

सप्रयोजनत्वमाह--

सोऽयमित्यभिसम्बन्धाद् द्रव्यवृत्तिरयं यदा ।

सलिङ्गस्य ससङ्ख्यस्य तदा साधुत्वमुच्यते ।। 226 ।।

विभक्त्यर्थप्रधानपक्षे द्रव्यसामान्येन सम्बन्धस्योपचरिताभेदस्याभिधानेऽपि विशेषगतलिङ्गसंख्यासिद्ध्यर्थम् `यथा

गुणवचनेषु"इति वार्त्तिककारेण व्यक्तिवचना-तिदेशस्योपयोग उक्तः, न त्वर्थपक्षे । अर्थग्रहणात् कृत्स्नद्रव्याभिधाने स्वाभावि-

कत्वाल्लिङ्गवचनयोरत्रेत्यर्थः ।। 226 ।।

अत्र त्वयमुपालम्भः--"यदि तर्हि कृत्स्नः पदार्थोऽभिधीयते, लैङ्गाः

सांख्याश्च विषयो न सिध्यन्ति" इति भाष्य उक्तः । तमेव व्याचष्टे --

अन्तर्भूतविभक्त्यर्थे षष्ठी न श्रूयते यथा ।

तथाऽश्रुतिः प्रसज्यते लिङ्गसङ्ख्याभिधायिनाम् ।। 227 ।।

अर्थग्रहणात् सलिङ्गसंख्यस्य द्रव्यस्य प्राधान्येनाभिधाने तद्गुणाभूतस्य

विभक्त्यर्थस्य सम्बन्धस्यान्तर्भावात् प्रातिपदिकार्थत्वे यथा षष्ठीविभक्तिर्न

भवति, तथा लिङ्गे स्त्रीत्वे भवा लैङ्गष्टाबादयः, संख्यायामेकत्वादिकायां भवाः

साङ्खयाः स्वादयस्तेषामप्यश्रुतिरश्रवणमप्रयोगः प्रसज्येतापद्येत ।। 227 ।।

स्वाद्यभावे केवला प्रकृतिः कथं प्रयोगार्हेत्याशङ्क्याह--

साधर्म्यमव्ययेन स्याद् बहुर्वीहेस्तथा सति ।
लिङ्गसङ्ख्यानिमित्तस्य संस्कारस्यापवर्तनात् ।। 228 ।।
लिङ्गसङ्खाप्रापितस्य संस्कारस्य टाबादिस्वाद्युत्पत्तिलक्षणस्याभावादलिङ्-गसङ्खयैख्ययैर्बहुर्वीहिपदानामेकयोगक्षेमता स्यात् । यथैवाव्ययस्य स्त्रीप्रत्ययवि-भक्तिरहितस्य प्रयोगनियमापवादात् केवलस्य प्रयोगः साधुः, एवं बहुर्वीहेर्भवेदित्य-र्थः ।। 228 ।।
चैत्रादिना सत्त्ववचनेन पदान्तरेण तर्हि कथं सामानाधिकरण्यमित्यत आह--
प्रयुक्तेन च सम्बन्धाच्चैत्रादिश्रवणं भवेत् ।
विना विभक्त्या सम्बन्धो विभक्त्या विद्यते विना ।। 229 ।।
बहुर्वीहिपदेन द्रव्यसामान्यवाचिना विभक्तिरहितेनोच्चरितेन चित्रग्वित्या-दिना विशेषप्रतिपादकानां चैत्रादीनां तत्समानाभिधेयत्वात् तद्वदेव विभक्तिरहितानां प्रयोगो भवेत् । विभक्तिरहितस्य विभक्तिसून्येनैव सह सम्बन्धो न्याय्यः, न तु
सविभक्तिकेनात्यन्तवैधर्म्यात् । तथा चासम्बद्धे द्रव्यसामान्यनिष्ठद्रव्यविशेषा-भिधानं न स्यात् ।। 229 ।।
एवमत्र पदार्थाभिधानपक्षे चोद्यभाष्यं व्याख्यातम् ।
अत्रैव परिहारभाष्यम्--"लैङ्गेषु तावदुक्तम्--सिद्धं तु स्त्रियाः प्रातिप-दिकविशेषणत्वात् स्वार्थे टाबादयः" इति ।
यथान्यत्र टाबादयो द्योतकाः, तथा बहुर्वीहेरपि भविष्यन्तीत्यर्थः ।
साङ्ख्येष्वप्युक्तम्--"कर्मादीनामनुक्ता एकत्वादयः" इति द्वितीयादयो भविष्यन्तीत्यादि ।
तदेतद् विवृणोति--
अभिधानेऽपि सङ्खयायाः संख्यात्वं न निवर्तते ।
षष्ठ्यर्थस्याभिधाने तु स्यात् प्रातिपदिकार्थता ।। 230 ।।

बहुर्वीहिपदैरभिहितापि संख्या स्वकार्यं स्वादिलक्षणं प्रापयत्येव । तद्य-था-`एकः,द्वौ, बहवः ; इत्यत्र ।
नह्यभिहितापि संख्या स्वरूपं जहाति । ततश्च कर्मादिविशेषणायाः संख्याया अभिधानाय द्वितीयादयस्तावदुत्पद्यन्ते । प्रथमापि `न केवला प्रकृतिः प्रयोक्तव्या' इति समयपालनायोत्पत्स्यते । अव्ययात्तु लुग्वचनेनायं प्रयोगनियमो बाधितः । न चैवं बहुर्वीहिपदेभ्यो लुगन्वाख्यातः ।
तुल्ये समयपालने द्वितीयादयः कस्मान्न भवन्तीति चेन्न, अर्थाभावात् ।
कर्मादिषु हि द्वितीयादयः, तदभावे कथं भवेयुः ? तस्मादेकादिशब्देभ्य इवार्थानुगु-ण्यात् प्रथमैकवचनादीन्येव भविष्यन्ति प्रातिपदिकार्थमात्रे । तदुक्तम्--`अर्थतो व्यवस्था' इति ।
वचनग्रहणाद्वा प्रथमा भविष्यत्युक्तार्थापि । षष्ठ्यर्थस्य तु सम्बन्धस्य द्रव्ये गुणभतस्याभिधाने प्रातिपदिकार्थत्वादभिहितः सोऽर्थोऽन्तर्भूत इति षष्ठी नभवति ।
यत्र हि प्राधान्येनोद्भूतः सम्बन्धः, स विषयः षष्ठयाः । तदेवं

पदार्थाभिधानेऽनुप्रयोगापपत्तिचोद्यप्रतिसमाधानाय विभक्त्यर्थाभिधानपक्ष
समाश्रितः । तत्र च सामानाधिकरण्यं क्रियायोगश्चोपपादितः ।
किञ्चार्थग्रहणात् कृत्स्नार्थवृत्ते साधुत्वं प्रयोगप्रामाण्यादवस्था-
पितम् ।। 230 ।।
केचित् पुनर्मतान्तरमाहुरित्याह--
अनुप्रयोगसिद्ध्यर्थं न विभक्त्यर्थकल्पना ।
वस्त्वन्तरमुपक्षिप्तमिति केचित् प्रचक्षते ।। 231 ।।
`पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात्' इत्यस्य प्रतिसमाधानाय
विभक्त्यर्थाभिधानपक्षो नाश्रितः `न वानभिहितत्वात् । सामान्यभिधाने हि विशेषान-
भिधानम्' इत्येवमनुप्रयोगस्योपपादित्वात् ।
किन्तु दर्शनान्तरमेवेदं युक्तायुक्तविचारविषयतयोपन्यस्तमित्यन्येषां मतम्। तथा ह्यत्रापि सोऽयमित्यभिसम्बन्धाद्
द्रव्यस्याभिधानमिष्यते । तथा
चानुप्रयोगानुपपत्तिरिति तदवस्थो दोषः । तत्र पुनस्तथैव प्रतिविधेयम् `न वानभिहितत्वात्' इति । तत् कथं परिहारान्तरमिदं
भवेदिति ।
कोचिदिति वचनादत्रारुचिं सूचयति ।
तथा हि भाष्येऽथवेति समाधानान्तरत्वेनैवास्योपक्षेपः । `एवच्चात्र
युक्तम्, अत्र हि सर्वपश्चात्पदं वर्तत' इति चास्य पक्षस्योत्कर्षोऽभिहितः ।
यद्यपि चात्रापि पक्षे सोऽयमिति सम्बन्धाद् द्रव्याभिधानम्, तथापि
प्रक्रियायामनुप्रयोगसिद्ध्यर्थं विभक्त्यर्थप्राधान्यमेव । अनुप्रयोगप्रामाण्-
यात्तु कृत्स्नाभिधानमर्थग्रहणात् सिद्धान्त इति प्रागुक्तमेव ज्यायः । तत्र च
स्वाभाविके (स्वाभाविक्यौ) लिङ्गसंख्ये । पक्षान्तरे तु शास्त्रादिति निर्णी-
तम् ।। 231 ।।
वस्त्वन्तरोपक्षेपदर्शने पक्षद्वयसङ्कलनायाह--
सम्बन्धिभिर्विशिष्टानां सम्बन्धाना निमित्तता ।
सम्बन्धैर्वा विशिष्टानां तद्वतां स्यान्निमित्तता ।। 232 ।।
वर्तिपदोपादानैः सम्बन्धिभिरवच्छिन्नानां सम्बन्धानां बहुर्वीहिप्रवृत्तौ
निमित्तत्वं विभक्त्यर्थाभिधानेपक्षे । बहुर्वीहिप्रवृत्तौ निमित्तत्वम् । बहुवचन-मत्रापि पूर्ववत् ।। 232 ।।
एतदेवैकयोगक्षेममत्वर्थीयदर्शनेन व्युत्पादयति--
केचित् संयोगिनो दण्डाद् विषाणात् समवायिनः ।
तद्वति प्रत्ययानाहुर्बहुर्वीहिं तथैव च ।। 233 ।।
संयोगाख्येन सम्बन्धेन विशिष्टाद् दण्डात् सम्बन्धिनि प्रवृत्तिनिमित्तात्
समवायाख्यसम्बन्धोपकृताच्च विषाणात् तद्वति संयोगिदण्डसम्बन्धिनि समवायि-
विषाणसम्बन्धिनि च प्रत्ययान्मत्वर्थीयान् इनिठन्मतुब्लक्षणान् वर्णयन्ति दण्डी
विषाणीत्यादौ ।
तथैव तेनैव प्रकारेण द्रव्याभिधानपक्षावलम्बिनो बहुर्वीहिं सम्बन्धोपकृत-
सम्बन्धिनिमित्तमाचक्षते । यथा दण्डविषाणसम्बन्धोपकृतौ सम्बन्धीनौ मत्वर्थीय-

निमित्तमेवं यथास्वं सम्बन्धोपकृतो वर्तिपदार्थलक्षणः सम्बन्धी बहुर्वीहिसमासस्य
प्रवृत्तिमनिमित्तम् ।
अन्यपदार्थलक्षणस्तु सम्बन्धी वाच्य इति पदार्थाभिधानपक्ष इत्यर्थः ।
पालाशदण्ड इति संयोगोपकृतः सम्बन्धी निमित्तम् । तिग्मविषाण इति समवायो-
पकृतः ।। 233 ।।
पक्षान्तरमाह--
भिन्नं सम्बन्धिभेदेन सम्बन्धमपरे विदुः ।
निमित्तं सविभक्त्यर्थः समासेनाभिधीयते ।। 234 ।।
वर्तिपदार्थलक्षमसम्बन्धिविशेषोपकृतः सम्बन्धो वा यथायथं भिन्नोऽत्र
मत्वर्थीयनिमित्तम् । तथाहि-दम्डी विषाणीत्युक्ते सम्बन्धिनः सम्बन्धस्य च सन्निधा-नाच्छब्दप्रवृत्तावविशेषेण द्वयोरपि
निमित्तत्वमवधार्यते, द्वाभ्यामपि प्रतीतावनु-
रागजननात् । प्रक्रियाभेदस्तु कल्पनाकल्पितः ।
एवं बहुर्वीहिणापि समासेन स विभक्त्यर्थः सम्बन्धिविशेषोपकृतः
सम्बन्धः प्रतिपाद्यत इत्युक्तमेव । सम्बन्धमात्रे चात्र विश्रान्त्यभावादुभयत्र
सोऽयमिति सम्बन्धेन तद्वदभिधानम् ।। 234 ।।
तदेवं बहुर्वीहेरन्यपदार्थविषयत्वे सम्बन्धस्य यदा निमित्तमात्रत्वम्,
तदवच्छिन्नस्तु सम्बन्धी वाच्योऽर्थग्रहणसामर्थ्यात्, तदा पूर्वः पक्षः ।
यदा तु सम्बन्ध एव प्रधानमन्यपदार्थतया स्वैरुपाधिभिर्गुण-
भूतैरवच्छिन्नोऽभिधेयो वाच्यः, तदा द्वितीयः पक्ष इति निगमयितुमाह--
प्रधानमन्यार्थतया भिन्नं स्वैरुपसर्जनैः ।
निमित्तमभिधेयं वा सर्वपश्चादपेक्ष्यते ।। 235 ।।
प्रधानमन्यपदार्थतया सम्बन्धो वर्तिपदार्थगुणभूतैरवच्छिन्नः सम्बन्धिनि
प्रवर्तमानस्य बहुर्वीहेर्निबन्धनमिति पूर्वस्य पक्षस्य निगमनम् । स एव वा
सम्बन्धो वाच्यः । तथाहि सर्वपश्चादपेक्ष्यत इति सम्बन्धाभिधानपक्षं भाष्येण
संवादयति ।
अत्र हि `सर्वपश्चात्पदं वर्तते' इति भाष्ये उक्तम् । अभिधानव्यापारेण
षष्ठ्यन्तस्य पदस्य सम्बन्ध्ययवच्छिन्नसम्बन्धप्रधानत्वादस्य पक्षस्योत्कर्षः
प्रतिपादितः ।। 235 ।।
ननु च चित्रा गावो यस्येति व्यतिरिच्यमानेन तत्र गुणभूतेन स्वामिना
स्वपदार्थभूता गाव एव विशेष्यमाणाः प्रधानमिति कथं सम्बन्धविशिष्टः सम्बन्धी,
सम्बन्धिविशिष्टो वा सम्बन्धो बहुर्वीहिवाच्यः स्यादित्याशङ्क्याह--
स्वामिनि व्यतिरेकश्च वाक्ये यद्यपि दृश्यते ।
प्राधान्य एव तस्येष्टो बहुर्वीहिर्विवक्षिते ।। 236 ।।
वृत्तिवाक्ययोरत्यन्तभेदादर्थभेदोऽविनाभावीति वाक्येऽन्यपदार्थस्योपसर्ज-नत्वेऽपि वृत्तौ प्राधान्यं तस्याभिमतम् ।। 236 ।।
एवं च नेदमनुगुणं वाक्यमित्याह--
गवां विशेषणत्वेन यदा तद्वान् प्रवर्तते ।

अस्यैता इति तत्रार्थे बहुर्वीहिर्न विद्यते ।। 237 ।।
कस्यैताश्चित्रगव्य इति जिज्ञासायां चित्रा गावोऽस्योति यदा वाक्यं प्रयु-
ज्यते, तदोपसर्जनत्वे तद्वतो गोस्वामिनो वाक्यादस्मादवगते वृत्त्यर्थो न प्रदर्शितःस्यात् परिपूर्णः ।। 237 ।।
इदं त्वनुगुणं वाक्यमित्याह--
यदा प्रत्यवमर्शस्तु तासां स्वामी गवामिति ।
गोभिस्तदाभिसम्बन्धो निमित्तत्वाय कल्पते ।। 238 ।।
आसां चित्रगवीनां कः स्वामीति जिज्ञासायां यदा स्वमिविशेषप्रतिपत्त्यर्थं
चित्रगव्य उपलक्षणत्वेनाश्रीयन्ते, तदान्यपदार्थस्य वर्तिपदार्थर्गोभिरभिसम्बन्धो
बहुव्रीहिसमासस्य निमित्तं जायते । ततश्च चित्रा गावो यस्य सोऽयं चित्रगुरित्येव-
मत्रान्यपदार्थप्राधान्ये वाक्यमुचितमित्यर्थः ।। 238 ।।
यदा तर्हि सम्बन्धान्निमित्तात् सम्बन्धी समासावाच्यः, तदा लिङ्गसंख्याति-
देशस्योपयोगो न वेत्याह--
अपेक्षमाणः सम्बन्धं रूढित्वस्य निवृत्तये ।
निमित्तानुविधायित्वात् तद्धर्मार्थः प्रसज्यते ।। 239 ।।
सम्बन्धावच्छिन्नः सम्बन्धी वाच्य इति निमित्तस्य सम्बन्धस्यानुविधानमनु-
प्रवृत्तिरिति तस्यैव सम्बन्धस्य धर्मो लिङ्गसंख्यारहितत्वं यस्य तथाभूतो बहुर्वी-
हिवाच्यः प्राप्नोति । सम्बन्धो हि निमित्तम् । असत्त्वभूतः स च नानुविधीयतेऽत्र
निमित्तमिति न वाच्यम्, यस्मान्निमित्तेऽननुविधीयमाने रूढिशब्दो बहुर्वीहिः
स्यात् । रूढिष्ववयवार्थानुसरणाभावात् । `चित्रगुः'त्यादौ चावयवार्थोऽनुस्त्रियत
एव ।। 239 ।।
एतदेव निदर्शनेन द्रढयति--
नानाचित्रा इति यथा निमित्तमनुरुध्यते (वर्तते) ।
नानाभूतेऽपि वृत्तः सन् बहुर्वीहिस्तथा भवेत् ।। 240 ।।
नानाशब्दोऽसहभावमात्रवचनोऽव्ययः । स सदाऽसहभावं निमित्तमुपादाय
तद्वति सत्त्वरूपे वर्तते, तदापि निमित्तानुविधानादसत्त्वभूत एव ।
एवं बहुर्वीहिरपि स्यात् । निमित्तान्निमित्तवत्यर्थे निमित्तसरूपः
प्रत्ययो जायत इति निमित्तिनः स्वरूपस्य शुद्धस्याप्रतिभासनात् स्वकार्ययोगाभावे
निमित्तकार्यमेव न्याय्यमित्यत्र युक्तिर्गर्भीकृता, न तु दृष्टान्तमात्रादर्थ-
सिद्धिः ।। 240 ।।
तदेवं निमित्तानुविधानेऽत्र प्राप्ते व्यक्तिवचनातिदेशः सफरः ।
यदा तु वर्त्तिपदार्थभूताः सम्बन्धिनो निमित्तमन्यपदार्थस्य द्रव्यस्य, तदानार्थोऽतिदेशेनेत्याह--
सम्बन्धिनि निमित्ते तु द्रव्यधर्मो न हीयते ।
लिङ्गाभावो हि लिङ्गस्य विरोधित्वेन वर्तते ।। 241 ।।
प्रवृत्तिनिमित्तं सम्बन्धी वाच्योऽपि सम्बन्धी लिङ्गसंख्यासमन्वययोग्य
इत्यत्र पक्षे स्वाभाविके लिङ्गसंख्ये, नार्थोऽतिदेशेन ।

न ह्यत्र निमित्तानुविधानेऽपि द्रव्यधर्मस्य लिङ्गसंख्ययोगित्वस्य हानिः,
निमित्तस्यापि लिङ्गसंख्यायोगित्वात् ।
यद्यपि चान्यलिङ्गसंख्याश्चित्रा गावश्च सम्बन्धिन्यो निमित्तभूताः,देवद-
त्तश्चान्यपदार्थो वाच्यः अन्यलिङ्गसंख्यः, तथापि सम्बन्धिनामवयवार्थानामत्र
प्रवृत्तिनिमित्तानां निमित्तिरूपातिरोधायकत्वम्, भेदेन वृत्तिहेतुत्वात् ।
तथा चातिरस्कृतात्मान्यपदार्थः सम्बन्धी प्रतीयमानः स्वलिङ्गसंख्यायोगार्ह
एवेति नास्ति विरोधः । सम्बन्धस्य तु प्रवृत्तिनिमित्तत्वे स्वशब्दोपादानोऽसौ
स्वरूपाविरोधेन सम्बन्धिनं गमयेत् । तथा च तेन निमित्तेनालिङ्गसंख्येन तिरो-
हितरूपः सम्बन्धी स्वलिङ्गसंख्याकार्यं नासादयति । लिङ्गभोवो लिङ्गविरोधी,
नान्यलिङ्गता ।। 241 ।।
तथाहि--
संख्यावाँल्लिङ्गश्चार्थोऽभिन्नधर्मा निमित्ततः ।
आसन्न एव द्रव्यत्वात् तद्धर्मैर्न विरुध्यते ।। 242 ।।
यदा सम्बन्धी निमित्तं, स एव च लिङ्गसंख्यावानन्यपदार्थः, तदासावभिन्न-
धर्मा तुल्यधर्मा । केनाभिन्नधर्मेत्याह--निमित्तत इति । ल्यब्लोपो पञ्चमी । निमि-
त्तमपेक्ष्येत्यर्थः । निमित्तेन तुल्यधर्मेति यावत् । द्वयोरपि सम्बन्धिनोः सत्त्वरूपत्वात् । एवञ्चासन्न एवान्यपदार्थो निमित्तस्य
तुल्यधर्मत्वान्निकटः, नातिदूरः
सम्बन्धनिमित्तपक्षवत् । अतश्च निमित्तधर्मैर्लिङ्गसंख्याभेदैरन्यपदार्थो न विरुध्-यते । अतिरोहितात्मा ह्यभिधीयमानः
स्वलिङ्गसंख्याभ्यां योक्ष्यत इत्यर्थः ।
क्वचित् तु विरोधे सति निमित्तधर्मानुवृत्तिर्भत्येव ।
तद्यथा--हरीतक्यः फलानि, खलतिकं वनानीति । इत्थं च व्यतिरेकेण
प्रतीय-मानस्य निमित्तस्य द्वयी गतिः तद्धर्मानुविधानं हरीतक्यादिषु । तदभावोयथा
बहुव्रीहौ । स्वरूपावेशेन त्वभेदेन प्रतीयमानस्य निमित्तस्य निमित्तिना
धर्मोऽनुविधीयत एव । गतमेतत् ।। 242 ।।
इदं तु वक्तव्यम्--विभक्त्यर्थपक्षेऽपि सोऽयमिति सम्बन्धात् सम्बन्धीनि-ष्ठत्वे, कः पदार्थाभिधानपक्षाद् भेद इत्यत आह--
विभक्त्यर्थेन चाविष्टं शुद्धं चेति द्विधा स्थितम् ।
द्रव्यं शुद्धस्य यो धर्मः स न स्यादन्यधर्मणः ।। 243 ।।
षष्ठीलक्षणविभक्तिवाच्येन सम्बन्धेनापादिताभेदं द्रव्यं विभक्त्यर्थाभिधा-नपक्षे वाच्यम्, अनन्योपहितं शुद्धं च पदार्थाभिधानपक्षे
वाच्यमिति प्रकारद्वयेन
द्रव्यस्य प्रवर्तनात् पक्षभेदः ।
तत्र शुद्धस्य स्वेनाच्मनाभिधीयमानस्य यो धर्मो लिङ्गसङ्ख्ये, स न भवति
सम्बन्धेनाविष्टस्याख्यायमानस्य, पररूपोपरागादिति लिङ्गसङ्ख्यातिदेशोऽत्र सफलः ।
पदार्थाभिधानपक्षे तु शुद्धस्य द्रव्यस्यान्यपदार्थस्य वर्तिपदार्थविशिष्टस्याभिधा-नाद् वर्तिपदार्थलक्षणाः सम्बन्धिनः
प्रवृत्तिनिमित्तमिति द्रव्यधर्माहानि-
रुक्ता ।। 243 ।।

एतदोव वाच्यस्य प्रकारद्वयेन वर्तनं पक्षयोर्विभजति--

द्रव्यमात्रस्य निर्देशे भेदोऽयमविवक्षितः ।

ग्रन्थे पूर्वत्र भेदस्तु द्वितीयेऽनुप्रदर्शितः ।। 244 ।।

विभक्त्यर्थावेशलक्षणो यो विशेषः, द्रव्यमात्रस्य शुद्धस्य सम्बन्धानुपहितस्य निर्देशे प्रतिपादने पूर्वस्मिन् ग्रन्थे यत्रानुप्रयोगानुपपत्तिश्चोदिता `न

वाऽनभिहितत्वात्' इत्यादिना च प्रतिसमाहिता भाष्ये, तत्र पदार्थाभिधानपक्षे नामिधातुमिष्टः ।

`अथवा विभक्त्यर्थोऽभिधीयते' इत्यत्र तु द्वितीये भाष्यग्रन्थेऽयं विशेषः साक्षादेवोक्तः ।

अत्रापि च विभक्त्यर्थाविष्टं द्रव्यमेवोच्यते, अन्यथा द्रव्यानभिधाने सर्वेथवासद्व्यक्तिवचनं कथमतिदेशादपि प्राप्येत । प्रधानं तु सम्बन्धोऽत्र विवक्षितः ।। 244 ।।

यद्येवं तेन संवृतस्वरूपत्वाद् द्रव्यस्याभिधानाभाव इति कथमिदमुक्तम्--

`सद्रव्यः सलिङ्गः ससंख्यः' इत्यत आह--

द्रव्यस्य ग्रहणं चात्र लिङ्गसंख्याविशेषणम् ।

द्रव्याश्रितत्वं हि तयोस्ततोऽन्यस्य न सिध्यतः ।। 245 ।।

यद्यपि लिङ्गसङ्ख्ययोर्द्रव्यं विशेष्यम्, तथापि तयोर्विशेषणमत्र द्रव्य-ग्रहणं बोद्धव्यम् । अन्यस्य गुणादेस्ताभ्यामयोगप्रतिपादनार्थं द्रव्याश्रितत्वमेवानयोरिति सम्बन्धाभिधानेऽपि लिङ्गसङ्ख्यासिद्ध्यर्थं सद्रव्य इत्युक्तम् ।

सम्बन्धो हि षष्ठीवाच्यमुद्भूतमत्र रूपं हित्वा द्रव्याभेदेनाभिधीयमानः सद्रव्योऽभिहितो भवति । न तु द्रव्यस्यात्र गुणभावादनभिधानम् । आर्थेन हि रूपेण प्राधान्यं द्रव्यस्यैव । पक्षमेदार्थं तु सम्बन्धल्य शाब्दं प्राधान्यमाश्रि-तम् ।। 245 ।।

तथाहि--

सम्बन्धिभिन्नसम्बन्धपरिच्छिन्ने प्रवर्तते ।

समासो द्रव्यसामान्ये विशिष्टार्थानुपातिनि ।। 246 ।।

वर्तिपदार्थभूतैः सम्बन्धिभिर्विशेषितो यः सम्बन्धस्तेन परिच्छिन्ने स्वरू-पसम्भेदेनावच्छिन्ने सम्बन्धिनि द्रव्यसामान्ये विभक्त्यर्थाभिधानपक्षे बहुर्वीहि-र्वाचकत्वेन प्रवर्तते । सामान्य इति पदार्थविशेषाणामनभिहितानामनुप्रयोगोपपत्तिम-त्रापि दर्शने पक्षान्तरवदाह ।। 246 ।।

अतश्च विशेषैः सामानाधिकरण्यात् तदनुपातित्वे फलमाह--

द्रव्यधर्मानतिक्रान्तो भेदधर्मेष्ववस्थितः (ष्वशक्तितः) ।

भविष्यदाश्रयापेक्षे लिङ्गसङ्ख्ये प्रपद्यते ।। 247 ।।

द्रव्यसामान्यवृत्तित्वाद् योग्यतामात्राद् द्रव्यधर्मं लिङ्गसङ्ख्यालक्षण-मनतिक्रान्तः समासो द्रव्यविशेषगतं च रूपाभेदादसमर्थो लिङ्गवचनं प्रतिपत्तुमिति "विशेषणानां" (पा.1/2/52) इति शास्त्रसामर्थ्यात् पदान्तरप्रयोगावधृतद्रव्यविशेषा-

श्रयगते यथायथं लिङ्गसङ्ख्ये समवलम्बते । इत्यवसितविचारो बहुर्वीहिः ।। 247 ।।

क्रमप्राप्ते नञ्समासे लिङ्गवचनातिदेशं विचारयितुं भाष्योपक्षिप्तं पश्र-

त्रयं समर्थयते--

शास्त्रप्रवृत्तिभेदेऽपि लौकिकार्थो न भिद्यते ।

नञ्समासे यतस्तत्र त्रयः पक्षा विचारिताः ।। 248 ।।

एकत्र गुणप्राधानभावस्यानवस्थानात् कथं पक्षत्रयोपपत्तिः ? अब्राह्मणादे-

र्ह्यन्यपदार्थस्यैव क्षत्रियादेरवधारणात् तत्प्रधानत्वमेव न्याय्यमि त चोदितं

सतीदं समर्थयते--`अर्थानादेशनात् तच्च लघ्वर्थम्' इति वदता स्थितलक्षणोऽर्थः

प्रक्रियाभेदेऽप्यव्यभिचारी लौकिकः उक्तः ।

तथाहि--यदान्यपदार्थः प्रधानम्, तदा व्यक्तिवचनमुत्तरपदम्, अविद्यमाना

ब्राह्मणव्यक्तिराश्रयभूतास्मिन् क्षत्रिये क्षत्रियजातावि ति ।

यदा तु पूर्वपदार्थो नञर्थो निवृत्तिरूपः प्रधानम्, तदा तस्यासतः क्रियायो-गाभावान्निषेधस्य प्रसङ्गपूर्वकत्वादुत्तरपदार्थसदृशमेव प्रतीयते ।

एवमुत्तरपदार्थप्राधान्येऽपि ब्राह्मण्येनावसितः क्षत्रियादिरेवावगम्यत

इति नास्ति भेदः स्थितलक्षणस्यार्थस्य । अपोद्धारपदार्थस्त्वन्वाख्यानाङ्गमिति

प्रक्रियायां स भिद्यते ।

तथा च `किंप्रधानोऽयं समासः, उत्तरपदार्थप्रधानः, पूर्वपदार्थप्रधानः,

अन्यपदार्थप्रधानो वा' इति पक्षत्रयमुपन्यस्य भाष्ये यस्मिन् पक्षे शास्त्रप्र-

क्रिया न विलुप्यते, तमवस्थापयितुं विचारो न विरुध्यते ।। 248 ।।

यद्यपि नारोद्धारपदार्थः प्रतिपादकशब्दनिष्ठः, तथापि--

शब्दान्तरेऽपि चैकत्वमाश्रित्यैव विचारणा ।

अब्राह्मणादिषु नञः प्रयोगो न हि विद्यते ।। 249 ।।

न ब्राह्मणोऽब्राह्मण इत्यादिपरिकल्पितावयवविभागप्रतिपादकशब्दनिष्ठं

पूर्वपदोत्तरपदगतार्थविभागपरिकल्पनयान्वाख्येयस्थितक्षणार्थशब्दानुशासनं क्रियते

लाघवार्थम् ।

यथाहि--प्रक्रियायामपि वाक्याद् वृत्तेः शब्दान्यत्वेऽपि वाक्येन सहाभेदं

परिकल्प्य परीक्षा विधीयते ।

तथा चाब्राह्मणादिषु समासेषु यद्यपि नञ् नाम न कश्चिद् दृश्यते,

तथापि वाक्ये नञो दृष्टेस्तदभेदेन व्युत्पादनम् । सर्व एव हि वृत्तेः संसृष्टा-

र्थाया विशेषणविशेष्यादिभेदोऽर्थानां वाक्याभेदसमाश्रयः, वाक्यार्थस्या वृत्तौ

सम्प्रत्ययात् ।

ततश्च निवृत्तिलक्षणस्य नञर्थस्य संप्रत्ययादब्राह्मणादिष्वकाररूपमिदं

नञ्सम्बन्धीति निश्चीयते । अधिकापनयादिषु त्वकाररूपमेवानुवर्तते, न

नञर्थः ।

परमार्थतस्त्वब्राह्मणादिर्निरस्तावयवविभागो मुण्डिसूत्र्यादिवदिति

`ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्ब कम्बले, (वा.प.2/14)

इत्यादिना निर्णीतमेव ।। 249 ।।

एवं पक्षत्रयविचारोपपत्तिमुक्त्वा कीदृगर्थो वाक्ये नञो दृश्यते, तस्य

तदभेदेन वृत्तौ व्युत्पाद्यमानायामनुगम इत्याह--

प्राक् समासात् पदार्थानां निवृत्तिर्द्योत्यते नञा ।

स्वभावतो निवृत्तानां रूपाभेदादलक्षिता ।। 250 ।।

वाक्ये नञ्प्रयोगे निवृत्तिरवसीयते । सा च न स्वतन्त्रा, निर्विशेषणस्या-

भावस्याप्रतीतेरिति पदार्थनिष्ठासौ । तत्र सन् पदार्थो नञ्प्रयोगमात्रान्निवर्तितुं नोत्सहते । शब्दान्तरप्रयोगेऽपनि च पदानां वाच्यस्य न्यूनतातिरेकयोरनुपपत्तिः ।

तस्मात् स्वभावेनैव निवृत्तानां नञ् द्योतको निवृत्तेः । निवृत्तास्तर्हि कथं

शब्देनोच्यन्त इति चेद् , न वस्त्वर्थः शब्दार्थः । उपचारसत्ताश्रयस्तु

भावाभावसाधारणः प्रतीतिप्रतिभासी शब्दवाच्य इति `व्यपदेशे पदार्थानामन्या

सत्तौपचारिकी' (वा.प. 3 सं.39) इति । कृतनिर्णयम् ।

तथा च भावाभावसाधारण्यात् प्रयोगस्यानभिव्यक्ता निवृत्तिर्नञापि (वि)

द्योत्यत इति परपदार्थनिष्ठस्यार्थस्यावेदनाद् द्योतकत्वमुच्यते ।। 250 ।।

यद्येवं नञः स्वतन्त्रः पदार्थ एव नास्ति, यः प्राधानं स्यात् ।

सति वा तस्मिन्नभावात्मना तेन विशेष्यमाण उत्तरपदार्थः स्वभावात् प्रच्युतःकथमसत्त्वात् प्राधान्यं प्रतिपद्यते ?

सति च वर्तिपदार्थयोरभिसम्बन्धे तदवच्छिन्नन्यपदार्थाभिधानमपि न

कल्पेतेति कथं पक्षत्रयोपपत्तिः ।

अथोत्तरपदार्थगता क्रिया प्रतिषिध्यते, तदा समास एव नास्तीत्याह--

ब्राह्मणादिस्थया वाक्येष्वाख्यातपदवाच्यया ।

क्रियया यस्य सम्बन्धो वृत्तिस्तस्य न विद्यते ।। 251 ।।

क्रिया प्रतिषिध्यमाना पदान्तरोपादाना वा स्याद्, वृत्तिपदवाच्या वा ।

प्रथमे कल्पे `ब्राह्मणो न भुङ्क्ते, ब्राह्मणो नाधीते' इति तिङन्तपदप्रतिपाद्ययाब्राह्मणादिसमवायिन्या यस्य नञः क्रियया

योगः, तस्योत्तरपदेनासामर्थ्यात् समासो

नास्ति । क्रियया हि नञोऽत्र सम्बन्धः, न ब्राह्मणादिभिरुत्तरपदैः । ततश्च

समासस्यैवात्राभावाद् गुणप्रधानभावविकल्पो वर्तिपदार्थानां निरालम्बनः । पदार्थात्मभूतया त्वस्तिक्रियया नञो योगे समासो भवत्येव । तदानीं ह्युत्तरपदार्थनैव

सामर्थ्यम्, ब्राह्मणो नास्तीति ।

अव्यभिचारा हि सत्ता पदार्थस्याप्रयुज्यमानेऽपि क्रियापदे प्रतीयत इति

सामर्थ्यलभ्यायास्तस्या निषेधे निवृत्तपदार्थकैरेवोत्तरपदैरूपात्तेऽर्थद्योतकस्य

नञः प्रयोगात् सिद्धान्तयिष्यते समासः ।। 251 ।।

नन्वनेन न्यायेनोत्तरपदस्वीकृतयान्ययापि क्रियया नञः सामर्थ्ये

भवतु समास इत्यत आह--

पाचकादिपदस्था चेन्नञा सम्बन्ध्यते क्रिया ।

तत्र सत्तानुपादानात् त्रिपक्षी नोपपद्यते ।। 252 ।।

उत्तरपदेन पाचकादिना या गुणभावेन रच्यादिक्रियापात्ता, सा यदि

नञा द्योतकेन वाक्य इव युज्यते, तदा स्वार्थावच्छिन्नाया वाच्यत्वेन नञा
सत्ताया परिग्रहात् पक्षत्रयं न घटते । द्योत्यार्थनोत्तरपदेनैव सम्बन्धादुत्तरपदा-र्थप्राधान्यमेवैकं भवेत् ।
नहि नञः स्वतन्त्रः कश्चित् पदार्थः, यः प्रधानं, गुण इति वा निरूप्यते
द्योतकत्वाद् द्योत्यार्थनिष्ठत्वात् ।
तथा च यत्र द्योत्येन क्रियालक्षणेनार्थेनास्ति सम्बन्धः, तत्र समासो न
पाचकोऽपाचक इत्यादि । अत्र हि गुणभूत्तोत्तरपदेन क्रियाभिधीयत इति नञा निषेध्यतया
तस्याः सम्बन्धः । ब्राह्मणादेस्तूत्तरपदस्य गुणभूतापि क्रिया न वाच्येति तेन नञः
सम्बन्धाभावात् पूर्वोक्तपक्षत्रयानुपपत्तिः । तस्माद् द्योतकत्वं नञऽनुपपन्नम्
पक्षभेदानुपपत्तिप्रसङ्गादिति वृत्तिविषये वाचकत्वमभ्युपगमनीयम् ।
तथा चासत्तावचनत्वान्नञो निवृत्तपदार्थकैरुत्तरपदैर्ब्राह्मणादिभिरसम्बन्-
धात् पक्षत्रयमुपपद्यते । असत्तासामान्यवचनो हि नञ् तद्विशेषवचनैर्योगमनुभवन्
यथाविवक्षं पूर्वोत्तरान्यपदार्थप्रधानेतरेतरभावसमाश्रयेण वृत्तिमापद्यते ।। 252 ।।
यद्येवम्--
सत्तयैवाभिसम्बन्धो यदि सर्वत्र कल्प्यते ।
असन्निति समासेऽस्मिन् सत्तान्या परिकल्प्यताम् ।। 253 ।।
सर्वपदार्थानां सत्तायोगस्याव्यभिचारात् सत्तयैव पदार्थात्मभूतया न क्रिया-न्तरेण व्यभिचारिणा यदि नञो योगः कल्प्यते, तदा असन्नित्यत्रापि नञ्समासे सत्ताया
उत्तरपदनिबन्धनायाः सम्बन्धि सत्तान्तरं नञा प्रत्याय्यमानं न कल्पनीयमापतति ।
चैवं सत्ताभेदः प्रतीयते, एकस्या एवात्र निषिध्यमानायाः सत्ताया अवगमात् ।। 253 ।।
अत्रैवापरं दोषमाह--
कृत्वान्ते च तुमुनन्ते च नञ्समासे न दृश्यते ।
विशेषणविशेष्यत्वं नञा (नञः) सत्ताभिधायिनां ।। 254 ।।
अकृत्वा अकर्तुमित्यत्राख्यातेनेव कृत्वसुजादिसम्बन्धयोग्यतया साध्यसयैवा-
र्थस्य प्रधानत्वेनाख्यायमानस्यासन्नित्येवमर्थेन नञा करोतेरभिसम्बन्धोऽवच्छेद्या-वच्छेदकभावो नोपपद्यते । न हि सत्तां निषेधता नञा करोतेः सम्बन्धो युज्यते,
प्रतिषेध्येनैव भवेदिति कथमभिसम्बन्धः ।
तस्मादसत्तावाचित्वे नञः उभयत्राप्यत्र नोपपत्तिरिति निषेधमात्रवचनोऽत्र
नञ् ।
तथा चासिन्नित्यत्रोत्तरपदार्थभूतां सत्तां निषेधतीति सम्बन्धोपपत्तिः ।
किंत्वब्राह्मणादावनुपपत्तिः, ब्राह्मणार्थस्य सतो निषेद्धुमशक्यत्वात् । अत्रापि
सन्नन्तः करोत्यर्थश्च भावात्मकः कथं निषेद्धुं शक्यते ?
एवं तर्हि स्वभावतो निवृत्तस्यार्थस्य द्योतको नञ् वाक्य इव वृत्तौ
प्रयुज्यते, तत्रापि द्वयी गतिः । क्रियायोगमन्तरेण पदार्थस्य केवलस्यानुपपत्ते-
र्विशिष्टक्रियाश्रयो वार्थात्मा स्वभावतो निवृत्तो द्योत्यताम्, क्रियासामान्या-
श्रयो वा ।
पूर्वत्र कल्पे सामर्थ्याभावाद् वृत्तिर्नास्ति । सति वा सामर्थ्ये

पक्षत्रयानुपपत्तिरित्युक्तम् ।

द्वितीये पक्षे सत्तालक्षणस्य क्रियासामान्यस्य नञ्द्योत्यस्य सामान्वयवा-चिनैवोत्तरपदेन सम्बन्धेऽनवस्थोक्ता । विशेषवाचिना त्वसम्बन्ध इति द्योतकत्वमत्र

नोपपद्यते । द्योतकत्वे हि द्योत्यार्थनिष्ठत्वात् सत्यपि सम्बन्धे उत्तरपदार्थ-
प्राधान्यमेवैकं स्यात् ।
तस्माद् वाचकत्वमभ्युपेयम् । तथा च नञः स्वतन्त्रोऽर्थ इति यथायोगं
तस्य गुणप्रधानभावोपपत्तौ पक्षत्रयविचारः ।। 254 ।।

तत्रासत्तावचनो नञिति, यथा द्वितीया सत्ता नापतति, यथा चाकृत्वेत्यादौ

संबन्धो युज्यते, तथोपपादयति--
क्रियायाः साधनाधारसामान्ये नञ् व्यवस्थितः ।
ततो विशिष्टैराधारैर्युज्यते ब्राह्मणादिभिः ।। 255 ।।
सामान्याभिधानेऽपि नञोऽसत्तावचनत्वेन प्रस्तावत् सत्तालक्षणात्र क्रिया ।

तथा ह्यभावात्मको नञोऽर्थो भावस्य सत्तायानिषेधरूपः, तस्याः साधनमकर्मक-

त्वात् कर्तृशक्तिः । निराश्रयायाः साधनभावानुपपत्तेः सामर्थ्यलभ्यस्तदाधार आश्रयो-ऽनाश्रितविशेषः सामान्यमस्तीत्येवंरूपोऽत्र निर्दिष्टः । तत्र वाचकत्वेन नञ्
व्यवस्थितः प्रवृत्तः ।
किं विद्यमानोऽर्थोऽस्तीत्येवंरूपो नञो वाच्यः । नेति ब्रूमः ।

कथं तर्हि `क्रियायाः साधनाधारसामान्ये नञ् व्यवस्थितः' इत्युच्यते ?

स्वार्थमभावात्मकं तत्र निवेशयतीत्येवमेतदुच्यते । ततश्चाभावोपरक्तमस्ति-
क्रियासाधनाधारसामान्यं वृत्तिविषये नञ् वाच्यमिति नास्तीत्येवंरूपो नञोऽर्थः ।
तत्र किं नास्तीति विशेषाकाङ्क्षा तदुत्तरपदैः पूर्यते ।

तथा च ततः सामान्यावस्थानाद्धेतोर्विलक्षणैः सत्ताविशेषसाधनाधारविशेष-

वचनैर्ब्राह्मणादिशब्दैः सम्बध्यते नञिति तदर्थयोः सामान्यविशेषभावेन विशेषणविशेष्-

यभावोपपत्तिः । सामान्यरूपं ह्यविद्यमानं विशिष्टैरविद्यमानैर्युज्यते, गोत्वं शाब-लेयादिभिरिव । तत्र ब्राह्मणस्यासत्त्वमिति यदा कामचाराद् विशेषणाविशेष्ययोर्वि-

वक्षा, तदा पूर्वपदार्थप्रधानता । असद् ब्राह्मण्यमस्येत्येवमन्यार्थगामित्वे
वर्तिपदार्थयोरन्यपदार्थप्राधान्योपपत्तिः ।

एवं विशेषे सामान्यस्याव्यभिचारात् पाचकादौ पच्यादिक्रियाविशेषानुगत-
सत्तात्मकक्रियासामान्याश्रयपक्षभेदोपपत्तिः ।

एवं विशेषे सामान्यस्याव्यभिचारात् पाचकादौ पच्यादिक्रियाविशेषानुगत-
सत्तात्मकक्रियासामान्याश्रयपक्षभेदोपपत्तिः ।

एवं करोतिना सत्तात्मनैव युज्यते, न विशेषरूपेणेति विशेषे सत्तामेव समवा-
यिनीं नञर्थोऽसत्सामान्यं निषेधयोग्यतयाकृत्वा कर्तुमित्यादावास्कन्दति ।

असन्नित्यत्रापि प्रकरणाद् विशेषनिवेशिनीमेव सत्तामसत्तासामान्यं निषेध्यत-यावलम्बते । अनच्छिन्नविषयस्यासत्त्वस्य प्रयोजनाभावेनाप्रतिपाद्यत्वात् । ब्राह्म-णादिरेव हि कश्चित् सन् निषेद्धमात्रोपादीयते, न सन् ब्राह्मण इति । प्रकरणात्तु विशेषावसाये ब्राह्मणादिपदप्रयोगानादरः ।

तथा च ब्राह्मणादिरित्येवात्राप्यर्थ इति सामान्यविशेषयोरेवायं विशेषणविशे-ष्यभावः । न हि द्वयोः सामान्ययोः
प्रयोगोऽस्ति, नैपाकाङ्क्ष्यानुपपत्तेरिति
सत्तान्तरपरिकल्पनादोषानवतारः । सर्वत्र चात्रोत्तरपदार्थसदृशप्रतिपत्तिः । अन्य-
त्राध्यारोपितस्य हि स्वतो निवृत्तस्य निषेधः सुवचः ।
तदित्थं वाचकत्वमभ्युपगम्य सर्वमुपपद्यते ।। 255 ।।
द्योतकस्य तर्हि वाक्ये नञो वृत्तौ वाचकत्वं कथमुपपद्यत इति चेदाह--
वृत्तौ यथा गताद्यर्थमुपादाय निरादयः ।
युज्यन्ते साधनाधारैर्नञ्समासेऽपि स क्रमः ।। 256 ।।
निष्कौशाम्बिः अतिखट्वः प्रपर्ण इत्यादिवृत्तिपदेषु पूर्वपदभूता निरतिप्र-भृतयोऽसत्त्ववचना अपि वाक्ये दृष्टाः
सत्त्वभूतार्थाभिधायिनः ।
तथाहि--गतक्रान्तादिससाधनक्रियावचनाः कौशाम्ब्यादिभिरपादानादिसाधन-
शक्त्याधारैर्द्रव्यैः सम्बध्यन्ते । यदि चासत्त्ववचना एव स्युः, तदा तैः
सत्त्ववचनैः सम्बन्धो न स्यादिति तदन्यथानुपपत्त्या निष्क्रमणादिक्रियोपसर्जने साध-नशक्त्याधारे द्रव्ये वृत्तिरेषामनुमीयते ।
वाक्यपरदृष्ट एव च तत्र वृत्तिरभिधानश-
क्तिनियमादिति नातिप्रसङ्गः । यदाह वाक्यकारः--`तदर्थगतेर्वा' इति । येनार्थेन
निरादेर्भवति कौशाम्ब्यादिना सामर्थ्यम्, तदन्यथानुपपत्त्या तस्यैव प्रतीतेरित-
यर्थः ।
एवं यथात्र वृत्तौ पूर्वपदं पदान्तरसम्भिन्नार्थतया वाक्यपरिदृष्टं विशेषम-
न्तर्भावयति, तथैवाब्राह्मणादाविति साम्यम् ।
अत्रापि ह्युत्तरपदार्थसम्बन्धान्यथानुपपत्त्या नञोऽसत्सामान्यवाचकत्वं
परिकल्प्यत इति वाचकत्वोपाया सैवानुपूर्वी ।। 256 ।।
एवमप्यसत्सामान्याभिधायित्वे कथं पक्षत्रयोपपत्तिः, पूर्वोत्तरपदार्थयो-
र्गुणप्रधानभावानियमे सति हि त्रयः पक्षा उपपद्येरन् । स तु कथमत्रानियम
इत्याह--
तत्रासति नञो वृत्तेर्ब्राह्मणक्षत्रियादिभिः ।
विशेषणविशेष्यत्वं कल्प्यते कुब्जखञ्जवत् ।। 257 ।।
द्वयोरपि खञ्जकुब्जशब्दयोर्गुणनिमित्तत्वाद् विशेषमविशेष्यभावं प्रत्यनियम
उक्तो भाष्ये--खञ्जकुब्जः कुब्जखञ्ज इति ।
एवमसत्सामान्ये नञो वाचकत्वेन वर्तनात् तद्विशेषवचनैर्ब्राह्मणादिभिर्य-
थारुचि विशेषणविशेष्यत्वं गुणप्रधानभावः पर्यायेण घटते ।। 257 ।।
तथा चाब्राह्मणोऽक्षत्रिय इत्यादौ किं सिद्धमित्याह--
कामचारे च सत्येवमसतः स्यात् प्रधानता ।
गुणत्वमितरेषां च तेषां वा स्यात् प्रधानत् ।। 258 ।।
`सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्' इति खञ्जकुब्जादिवदनियमे यदास-
त्सामान्यं नञर्थः प्राधान्येन विशेष्यतया विवक्ष्यते, तदा पूर्वपदार्थप्रधानता इत-रेषामुत्तरपदार्थानां ब्राह्मणादीनां गुणत्वविवक्षायां

सत्याम् । यदा तु तेषामुत्त-पदार्थानां प्राधान्यं विवक्ष्यते, तदोत्तरपदार्थप्रधानो नञ् समासः ।
अत एव च पूर्वोत्तरपदयोरभिसम्बन्धेऽर्थान्तरविषये विवक्षिते अन्यपदार्थ-
प्राधान्यमप्युक्तं भवति । वाक्ये तु निषेध्यनिष्ठतया निषेधस्यानवगतेर्न स्वतन्त्रोनञः पदार्थ इत्यवाचकत्वाद् द्योतकत्वम् ।
अतश्च गुणप्रधानभावे विवक्षानियमाभावात् तत्र पक्षत्रयानुत्थानम् ।
अत एव चादिवदलिङ्गासङ्ख्यत्वमव्ययधर्मो नञर्थस्य वाक्ये, न तु वृत्तौ,
सत्त्वभूतार्थवाचित्वात् ।। 258 ।।
इत्थं पक्षत्रयोपपत्तौ समर्थितायां प्रथमं भाष्य उपक्षिप्तमुत्तरपदार्थ-
प्राधान्यं परीक्ष्यम् । तथाहि--विरोधादसता कथं ब्राह्मणादिर्विशेष्येतेत्यत आह--
प्राधान्येनाश्रिताः पूर्वं श्रुतेः सामान्यवृत्तयः ।
विशेष एव प्राकान्ता ब्राह्मणक्षत्रियादयः ।। 259 ।।
सतो निषेद्धुमशक्यत्वान्निवृत्तिविशिष्ट एव विशिष्टेऽर्थे ब्राह्मणादयः
शक्ता वाचकत्वेनात्रोरक्रम एव प्रवृत्ताः ।
यदा तु तेषां भावरूपेऽप्यर्थे श्रुतेः शब्दस्य रूपमीदृशमेव, तदासौ स्वा-
र्थरूपा निवृत्तिर्द्योत्यते नञा । नञ्पदप्रयोगे हि स विशेषः प्रकाशत इति विरोधाभा-वात् कल्पते विशेषणविशेष्यभावः
।। 259 ।।
`प्राधान्येनाश्रिता' (259)इत्युत्तरपदार्थप्राधान्यपक्षमवलम्बते । एतदेव
निदर्शनेन व्युत्पादयति--
यथा गौरादिभिस्तेषामवच्छेदो विधीयते ।
असताप्यनभिव्यक्तं तादात्म्यं व्यज्यते तथा ।। 260 ।।
गौरः शुक्लः कृष्णो ब्राह्मणः इत्यादौ यथा गौरादिभिर्विशेषणैरवच्छिद्यन्ते
सामान्यभूता ब्राह्मणादयः, तथाऽसद्विशेषवचनाः श्रुतिसारूप्यादनवगतविशेषा नञा
विशेष्यन्ते ।। 260 ।।
ननु गौरादयो विद्यमानार्थगतमेव विशेषमादधाना युक्तं यद्विशेषणं स्युः ।
नञा उत्तरपदार्थोन्मूलकेन कथं विशेषणविशेष्यभावः ? नञप्रयोगो ह्युत्तरपदार्थोऽस-
न्नित्यवधार्यते । तथा चासत्त्वादुत्तरपदार्थस्याप्रयोग एव ब्राह्मणादिशब्दानां
प्राप्नोतीत्याशङ्क्याह--
यथा सत्ताभिधानाय सन्नर्थः परिकल्प्यते ।
तथा सत्ताभिधानाय निरुपाख्यो विकल्प्यते ।। 261 ।।
इह पदादुच्चरिताद् भावाभावसाधारणोऽर्थः प्रतायते । न चासौ तथाविधो बाह्यः,
तस्य भावैकनिष्ठत्वात् । स एव चेच्छब्दैरुच्यते, तदा तस्य सत्ताऽव्यभिचारात् तां
प्रत्याकाङ्क्षानुपपत्तेः सन् ब्राह्मण इति नावकल्पेत विशेषणविशेष्यभावः । अवकल्पतेच ।
तस्मादुपचारसत्तारूढोऽर्थः पदवाच्यत्वेन कल्प्यते सामान्येन भावाभावसम्बन्-धस्य इत्यसन् ब्राह्मण इत्यत्रापि
परिकल्पितार्थनिष्ठत्वेन नञप्रयोगो न विरुध्यते । बुद्धिर्ह्यस्य बहिः सदसत्त्वमनपेक्ष्याकारं निरूपयन्ती विरोध्यवि-
रोधिविशेषणसमन्वयक्षमं तं पदार्थीकरोतीति प्रागेव निर्णीतम् ।
तत्र यथा नीलोत्पलमिति बुद्ध्या भागभोदकल्पनया सामान्यात्मना वस्तु
निरूपितं नीलविशेषणेन सम्बध्यते, तथा भावाभावसाधारण्येन बुद्धया गृहीतस्य

निवृत्तिर्विशेषणं युज्यते । न ह्युत्पलं नाम किञ्चित् सामान्यं जगत्यस्ति वस्तु,
यन्नीलसम्बन्धाद् विशेषमाश्रयेत । एकमेव हि तदपि निर्भागं नीलोत्पलमिति बुद्धयैव
भागभेदोपपत्तिः ।

एवमिहाप्यब्राह्मण इति निर्विषयस्य प्रतिषेधस्याप्रवृत्तेः सत्ता निषेध्य-

त्वेनोपचर्यते । बुद्धिस्थायाश्च सत्ताया बाह्यत्वेनारोपाद् बाह्यसत्ताविषयः प्रति-
षेधोऽवतिष्ठते ।

तेनैतदचोद्यं बुद्धिप्रतिभासस्यापि ब्राह्मणशब्दस्य प्रयोग उपपादिते तत्स-

दृशाधिकरणप्रतिपत्तिं नञ्समासे प्रतिपादयितुमाह--
क्षत्रियादौ पदं कृत्वा बुद्धिः सत्तान्तराश्रया ।
जात्या भिन्नां ततः सत्तां प्रसक्तामपकर्षति ।। 262 ।।

ब्राह्मणसत्ताविषया बुद्धिर्यदा कुतश्चिद् भ्रान्तिकारणात् क्षत्रिये प्रव-र्तते, तदा ब्राह्मणशब्दस्तत्र प्रयुज्यते । सोऽयं

मिथ्याध्यवसायो यदा तत्त्वज्ञा-नान्निवर्तते, तदा नञः प्रयोग इत्ययं विषयो नञ्समासस्य ।
अब्राह्मणोऽयं क्षत्रिय इति क्षत्रियसामानाधिकरण्यात् तदवगतिः । एवञ्च
नञ्प्रयोगादुपजाता सम्यग्बुद्धिर्ब्राह्मणकत्वैकार्थसमावायिनीं सत्तां क्षत्रिये
ब्राह्मणशब्दप्रयोगात् प्रसक्तामपकर्षति ततो निवारयति ।

नायं ब्राह्मणो मिथ्या त्वेवमवसितस्तत्सदृशोऽब्राह्मणोऽयमिति, सदृशः

क्षत्रियादिरेव समासार्थः सम्पद्यते न लोष्टादि, समारोपनिबन्धनस्य सादृश्यादेर-
भावात् ।

तथा चोक्तम् `नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः' इति ।। 262 ।।

इह कथं नञ् समासः अभाव इति । न ह्यत्रोत्तरपदार्थसदृशार्थसंप्रत्ययः, अपि

तु निषेधः प्रतीयते भावस्योत्तरपदार्थस्य, तस्य चासतः कथं भावशब्दविषयतेत्यत आह--
अभाव इति भावस्य प्रतिषेधे विवक्षिते ।
सोपाख्यत्वमनाश्रित्य प्रतिषेधो न कल्पते ।। 263 ।।

प्रतिषेधविषयप्रक्लृप्त्यर्थमत्रापि बुद्धया निरूपितमाकारमवलम्ब्य भावशब्द-प्रयोगात् तस्य श्रुतिसाम्यादसद्विषयतानवगमात्
तदवगमाय नञ्प्रयोग उपपद्यते । निरू-

पाख्ये हि व्यामोहाद् भावतत्त्वसमारोपे तत्त्वाध्यवसायान्नञ्प्रयोग इत्यर्थः ।।263।।

एवं चैतत् । "अथवा सर्व इमे शब्दा गुणसमुदाये वर्तन्ते' इति दर्शनमुपक्षि-

प्तमत्र भाष्ये । तदवलम्बनेनाप्याह--
अनेकधर्मवचनैः शब्दैः सङ्घाभिधायिभिः ।
एकदेशेषु वर्तन्ते तुल्यरूपाः स्वभावतः ।। 264 ।।
जातिगुणक्रियालक्षणो धर्मोऽत्र गुणशब्देन विवक्ष्यत इति धर्मपदेनाह ।
समुदायस्य शब्दात् प्रतीतेः स एव शब्दार्थो न्याय्यः ।

तच्च `तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारकम्' इत्युक्तम् । यस्य परिपूर्णा धर्मा जात्यादयः श्रुतादयश्च स मुख्यो ब्राह्मणः
। तदभिधायी ब्राह्मणशब्दो
रूढः । तेन तुल्यश्रुतिरवयवे वर्तते ।

समुदायोषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तते । तद् यथा--`तैलं भुक्तम्

घृतं भुक्तम्' इत्युक्तम् । यद्यपि च सङ्घाभिधाय्येकदेशाभिधायी चार्थभेदात् स्वभाव-तोऽत्यन्तभिन्न एव शब्दः, तथापि श्रुतिसाम्यादर्वाग्दर्शना भेदं नावगच्छन्तीत्यभे-दमाश्रित्य समुदायावयववृत्तित्वं कथ्यते ।

तथा च ब्राह्मणजातिरहिते क्षत्रिये विद्याविनयलक्षणैकदेशाश्रयो ब्राह्मणश-
ब्दप्रयोग इति तस्यैकदेशवृत्तिता श्रुतिसारूप्यादनवगता नञ् प्रयोगादवधार्यते ।

`तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः'

इति वा ब्राह्मणक उच्यते, यो गुणहीनो जातिमात्रेण तु ब्राह्मणः ।

इत्थं चात्र गुणसमुदायविषयत्वात् पूर्वोत्तरपदयोः सामानाधिकरण्यमुपपद्यते । अत्र हि नञा यस्यैव गुणस्य स्वाभाविकी निवृत्तिः, सैव द्योत्यत इत्यवशिष्टानां गुणानामर्थात् सद्भावोऽवगम्यते । तत्र पूर्वमुपचारसत्ताश्रयेणोक्तम् । इदानीं तु पारमार्थीकस्यैव कस्यचिद् धर्मस्य नञा निवर्तनेऽपि परिशिष्टमात्राकलापे समुदायाध्यासेन शब्दप्रवृत्तिर्न निर्विषयेत्येतदाख्यायते । उभयोरपि च तयोरवयवयोः समुदायात्मनाध्यासात् तस्यैव निषेधः, तत्रैव च शब्दप्रवृत्तिरिति ।। 264 ।।

नेदं चोद्यम्, उत्तरपदार्थानुपादानांशनिषेधात् कथमुत्तरपदेन समन्वय इति ।

तथाहि--

यथैकदेशकरणात् कृत इत्यभिधीयते ।

अकृतश्चेति सङ्घातः स एवाब्राह्मणे क्रमः ।। 265 ।।

यथा एकदेशस्य निष्पत्तेस्तदपरस्य चैकदेशस्यानिष्पत्तेः कृताकृतः सङ्घातोऽभिधीयते । अवयवात्मकत्वात् समुदायस्यावयवधर्मोपचारो न विरुध्यते ।

एवं गुणसमुदायस्यैकदेशे प्रवृत्तिनिवृत्तिभ्यां ब्राह्मणाब्राह्मणशब्दवाच्यता ।। 265 ।।

अत्र दोषमाह--

ब्राह्मणोऽब्राह्मणस्तस्मादुपन्यासात् प्रसज्यते ।

अकृते वा कृतासङ्गादविशिष्टं कृताकृतात् ।। 266 ।।

एकदेशं सङ्घातात्मनावसाय ब्राह्मणोऽयमिति कथ्यते । एकदेशान्तरस्यासत्त्वात् पुनः स एवाब्राह्मण इति प्राप्नोतीति विरोधापत्तिः ।

यदि वा सर्वथैवाकृते समुदाये समर्थसाधनसन्निधेर्निर्वृत्तिसम्भावनया कृतशब्दो यथा प्रयुज्यते, तद्वत् क्षत्रियादौ ब्राह्मणसमानधर्मदर्शनाद् ब्राह्मणशब्दवाच्यमात्राकलापं प्रत्यस्य ब्राह्मणत्वसम्भावनया ब्राह्मणशब्दप्रयोगे सति यदा नञा मुख्यार्थता निवर्तनेन गौणार्थतेदृशी प्रकाश्यते, तदा कृताकृतशब्देन तुल्योऽयं नञ् समासइति द्वितीयार्धेन चोद्यं निवारितम् ।। 266 ।।

एकदेशे च ब्राह्मणशब्दोऽमुख्य इति सादृश्यान्मुख्यभ्रान्तिः स्यात् । तामपाकर्तुं नञ् प्रयुज्यमानो भवति विशेषणमित्याह--

अमुख्यसम्भवे तत्र मुख्यस्य विनिवृत्तये ।

शास्त्रान्वाख्यानसमये नञ् प्रयुक्तो विशेषकः ।। 267 ।।

उपक्रम एवामुख्येऽर्थे ब्राह्मणशब्दः प्रयुक्तोऽनधिहतविवक्षितार्थ इत्यब्राह्मण शब्दस्य लौकिकस्याखण्टस्यान्वाख्यानार्थमेवं विभागे विवक्षितार्थसिद्ध्यर्थमुपपद्यते नञ् प्रयोग इत्यर्थः ।। 267 ।।

अत्रोत्तरपदार्थप्राधान्ये भाष्ये चोदितम्--`अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति' इति । तत् कथम् ? यावता राजपुरुषादिवत् पूर्वपदार्थोपहितविशेषस्योत्तरपदार्थस्य प्रतीतेरित्याशङ्क्य भाष्यकाराभिप्रायामाचष्टे--

पदार्थानुपघातेन दृश्यते च विशेषणम् ।

अथ जातिमतोऽर्थस्य कश्चिद् धर्मो निवर्तितः ।। 268 ।।

राजपुरुषादौ राजाद्यर्थः पुरुषाद्यर्थस्यानुच्छेदेन विशेषोपसंहाराद् युक्तंविशेषणम् ।
इह तु नञर्थ उत्तरपदार्थोच्छेदकः कथं विशेषणं स्यात् ? अनर्थक एवात्र नञ् । तथा च ब्राह्मणमात्रस्यानयनं स्यादिति भाष्यकाराभिप्राय इत्यर्थः ।।
अथ न सर्वथोत्तरपदार्थनिवृत्तिरत्र, अपि तु--
नञोति शेषः । गुणसमुदाये जातेः प्रवृत्तिहेतुत्वात् । तद्वतः समुदायस्य प्रदेशमात्रस्य निवृत्तिर्नञा द्योत्यते । तदपरस्य तु प्रदेशस्य स्थितिरिति भवति विशेषावसायः ।। 268 ।।
यद्येवम्--
अवश्यं ब्राह्मणे कश्चित् क्वचिद् धर्मो न विद्यते ।
विशेषावचनात् तत्र नञः श्रुतिरनर्थिका ।। 269 ।।
नहि सर्वो ब्राह्मणः परिपूर्णगुणो लभ्यत इति ब्राह्मणशब्दः प्रदेशवृत्तिरेवसर्वः, पूर्णेगुणेऽपि जातिमात्रसंस्पर्शेन प्रवृत्तेः । तथा च नञ् प्रयोगेऽपीत्यनर्थको नञ् ।। 269 ।।
किञ्चास्मिन् पक्षे--
अविशिष्टस्य पर्यायो नञ्विशिष्टः प्रसज्यते ।
अन्वाख्यानाद्धि साधुत्वमेवम्भूते प्रतीयते ।। 270 ।।
य एवार्थो ब्राह्मणशब्दस्य निवृत्तैकदेशः स एवाब्राह्मणशब्दस्येति नञ्समासनचनेन प्रज्ञापितसाधुभावोऽब्राह्मणशब्दो ब्राह्मणशब्दस्य पर्यायः प्राप्नोति।।270।। एतत् समाधत्ते--
पदार्थानुपघातेन यद्यप्यत्र विशेषणम् ।
उपचारसतोऽर्थस्य सावस्था द्योत्यते नञा ।। 271 ।।
एकदोशोऽप्यत्र न मुख्यो ब्राह्मणजातीय इति बुद्ध्या तमुपचर्य तच्छब्दप्रयोगः । तथा चास्य सोपचरितलक्षणावस्था नञा प्रकाश्यत इति पदार्थानुपघातेनैवेदमपि विशेषणं युज्यत इत्यर्थः ।। 271 ।।

तथाहि--
विशेष्येषु यथाभूतः पदार्थः समवस्थितः ।
तथाभूते तथाभावो गम्यते भेदहेतुभिः ।। 272 ।।
राजपुरुषनीलोत्पलादावपि यथावस्थिविशेष्यपदार्थनिष्ठो विशेषणपदार्थ इति भेदहेतुभिर्विशेषणैर्यथायथमर्थोऽवगम्यते; एवमिहापि ब्राह्मणपदार्थो बुद्ध्योपचरितरूप इत्येवं नञपदप्रयोगादवगम्यत इति युक्तं विशेषणम् । तदुक्तं भाष्ये--
"अथेह `राजपुरुषमानय' इत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति ?
अस्त्यत्र विशेषः । राजात्र विशेषकः प्रयुज्यते । तेन राजविशिष्टस्यानयनं भवति । इहापि तर्हि नञ् विशेषकः प्रयुज्यते । तेन नञ्विशिष्टस्यानयनं भविष्यति" इति ।।272।।
अत्र चोदितम्--`कः पुनरसौ'? तत्रोक्तम्--`निवृत्तपदार्थकः' इति । एतदाक्षिपति--
निवृत्तेऽवयवस्तस्मिन् पदार्थे वर्तते कथम् ।

नानिमित्ता हि शब्दस्य प्रवृत्तिरुपपद्यते ।। 273 ।।
बुद्धिपरिगृहीताकारेऽपि शब्दः प्रवर्तमानो बाह्यगतं बीजमवलम्बत एव । तथा च दृश्यविकल्पयोरेकत्वाध्यवसायाद् बाह्यमेव शब्दार्थं मन्यन्त इति क्षत्रियादौ ब्राह्मणादेरेकदेशवाचित्वादवयवशब्दस्य कथमसति निमित्ते प्रवृत्तिः । येन सावस्था नञा द्योत्यत इत्युच्यते ।। 273 ।।

अथ स्वाभाविकी निवृत्तिरिति क्षत्रियेऽपि ब्राह्मणशब्दः, तदा--
आराच्छब्दवदेकस्य विरुद्धेऽर्थे स्वभावतः ।
शब्दस्य वृत्तिर्यद्यस्ति नञः श्रुतिरनर्थिका ।। 274 ।।
यथा दूरान्तिकार्थवृत्तिराराच्छब्दः, तथा ब्राह्मणक्षत्रियवृत्तिः स्वभावतो ब्राह्मणशब्दो रूढ इत्युपगमे विनापि नञ्प्रयोगं प्रकरणादिवशात् क्षत्रियावगतिर्ब्राह्मणशब्दाद् भविष्यतीति किं नञा कृत्यम्, येन नञ्समासोऽन्वाख्यायते । नह्यवश्यमनेकार्थानां पदान्तरप्रयोगाभिव्यङ्ग्यविशेषत्वमुपलब्धम् । तदुक्तं भाष्ये--"यदि स्वाभाविकी निवृत्तिः, किं नञ् प्रयुज्यमानः करोति " इति ।। 274 ।।
अतोऽनन्तरमुक्तम्--`अथ वाचनिकी । तद् वक्तव्यं नञ् प्रयुज्यमानः पदार्थं निवर्तयति' इति । एतद् व्याचष्टे--
अथ स्वभावो वचनादन्वाख्येयत्वमर्हति ।
तद्वाच्यमप्रसिद्धत्वान्नञार्थो विनिवर्त्यते ।। 275 ।।
स्वभावोऽपि दुरवधारणत्वान्नञित्यनेन यदि शब्देन ज्ञाप्यते; तदेदमपि वचनेनान्वाख्येयं नञ्प्रयोगे पदानां प्रसिद्धोऽर्थो विनिवर्तत इति ।
अथास्यायं स्वभावः प्रयोगपारम्पर्यावसेयः, तदा सर्वस्यैव व्यापारे शब्दान्तरानपेक्षणादुत्तरपदेनापि निवृत्त्याभिधाने नञ् नापेक्षितव्य इत्यर्थः ।। 275 ।।
अतोऽनन्तरं `कीलप्रतिकीलवद् वाचनिकी निवृत्तिः । यद्येवं नञो माहात्म्यम्,न जातुचिद् राजानो हस्त्यश्वं बिभृयुः' इति दूषयित्वा स्वाभाविकी निवृत्तिः सिद्धान्तिता । तत्र च नञ् निमित्ता तूपलब्धिः । तद्यथा--समन्धकारे द्रव्याणां प्रदीपनिमित्तं दर्शनम् इत्युक्तम् । एतद् व्याचष्टे--
यद्यप्युभयवृत्तित्वं प्रधानं तु प्रतीयते ।
प्रस्थानं गम्यते शुद्धे तदर्थेऽपि न तिष्ठतौ ।। 276 ।।
गतिनिवृत्तिवचनस्तिष्ठतिः प्रसिद्ध इत्यन्तरेण प्रशब्दमुपसर्गम् (स्थाधातुः) प्रस्थानार्थोऽपि तमर्थमवगमयितुमपर्याप्तो यथा, एवं क्षत्रियवचनोऽपि ब्राह्मणशब्दो नञमन्तरेण न तदर्थनिश्चयाधायीत्यर्थः । न हि प्रशब्दस्य प्रस्थानमर्थः तिष्ठतेर्निरर्थकत्वप्रसङ्गादित्यसौ तिष्ठत्यर्थः । प्रशब्दस्तु द्योतकः । एवमत्रापि विज्ञेयम् ।। 276 ।।
ननु च यदि क्षत्रिये मुख्यो ब्राह्मणार्थो नास्ति, तदा किमर्थं सन्दिग्धार्थो ब्राह्मणशब्दस्तत्र वाचकोऽभ्युपगम्यते । तस्य चाययममुख्योऽर्थो नञ् प्रयोगादवधार्यत इति । `यदि पुनरयं निवृत्तपदार्थकः, किमर्थं ब्राह्मणशब्दः प्रयुज्यत' इत्युक्तं भाष्ये । तदाह--
किमर्थमतथाभूते सति मुख्यार्थसम्भवे ।
भेदे ब्राह्मणशब्दस्य वृत्तिरभ्युपगम्यते ।। 277 ।।
व्याख्यातार्थोऽयं श्लोकः ।। 277 ।।
अत्र परिहारभाष्यम्--"एवं यथा विज्ञायेत अस्य पदार्थो निवृत्त इति । नेति ह्युक्ते सन्देहः स्यात्--कस्य पदार्थो निवृत्त इति । तत्रासन्देहार्थं ब्राह्मणशब्दः प्रयुज्यते" इति । एतद् व्याचष्टे--
अयं पदार्थ एतस्मिन् क्षत्रियादौ न विद्यते ।
इति तद्वचनः शब्दः प्रत्ययाय प्रयुज्यते ।। 278 ।।
अयमर्थः--अज्ञानाद् दुरुपदेशाद् वा केनचिद् ब्राह्मणार्थः क्षत्रियेऽध्यवसितः । स एवं बोध्यते--नायं ब्राह्मणोऽब्राह्मणोऽयमिति । क्षत्रिय इति तूक्ते ब्राह्मणार्थस्य तत्र निषेधो न कृतः स्यादिति विवक्षितार्थो न प्रतीयते ।
तस्माद् बुद्धया तत्र ब्राह्मणार्थमाश्रित्य नञो विषयप्रक्लृप्तौ तदर्थनिवृत्तिः कथ्यत इति युक्तम् ।। 278 ।।

बोद्धुश्च शब्दार्थः समारोपितरूपः सर्वत्र युज्यत एवेत्याह--
बुद्धेर्विषयतां प्राप्ते शब्दादर्थे प्रतीयते ।
प्रवृत्तिर्वा निवृत्तिर्वा श्रुत्या ह्यर्थोऽनुषज्यते ।। 279 ।।
इह यः शब्दादर्थः प्रतीयते, स व्यवहाराङ्गं बहिः सदसत्त्वमनपेक्ष्येति `शब्दादर्थाः प्रतायन्त' इत्यादिना पूर्वं निर्णीतम् । तथा च भावाभावसाधारणशब्दैः स्वार्थः समुल्लिख्यत इति तत्र-तत्र पदार्थेऽनवस्थिते यथायोगं भावरूपमभावरूपं वा विशेषणमुपकल्पत एव ।। 279 ।।
तत्रोत्तरपदार्थप्रधाने नञ् समासे `नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः" इत्युक्तत्वाद् यत्रैव ब्राह्मणशब्दस्य भ्रान्त्या प्रयोगस्तत्रैव तदर्थनिषेधे तदधिकरणसम्प्रत्ययो न सर्वत्रेत्यतिप्रसङ्गाभावार्थं `सन्देहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते' इत्यादि भाष्यम् । तद् व्याचष्टे--
असम्यगुपदेशाद् वा निमित्तात् संशयस्य वा ।
शब्दप्रवृत्तिर्न त्वस्ति लोष्टादिषु विपर्ययम् ।। 280 ।।
दुरुपदेशात् क्षत्रिये ब्राह्मणशब्दप्रवृत्तिः । पङ्गलकेशादेरुपदिष्टस्य विषयविवेचनावधारणात् कस्यचिद् भवति । सन्देहनिमित्तं गुणः सन्देहशब्देनात्रोक्तः ।
तथाहि--सादृश्यलक्षणात् संशयनिमित्तात् तत्र शब्दप्रवृत्तिरित्यत्यन्तविसदृशेषु लोष्टादिषु
ब्राह्मणशब्दप्रवृत्त्यभावादब्राह्मणशब्दादुत्तरपदार्थसदृश एव क्षत्रियोऽवगम्यते, न लोष्टादि । भ्रान्तिनिवारणाय हि नञः प्रयोगः । भ्रान्तिश्च सति
निमित्ते, निर्बीजभ्रान्त्ययोगादिति सदृश एव तस्य (नियमः) विषयः ।
अत एव च नञा ब्राह्मणार्थे मुख्ये क्षत्रिये निवारिते तदधिकरणभूतः क्षत्रियोऽवस्थित एवेति प्रतिपद्यतेऽसौ क्रियासु साधनभावमब्राह्मणमानयेत्यादौ । प्रतिषेधमात्रोपक्षयत्वे तु नञ्समासस्यात्रासाधनः समासार्थः स्यादिति न समारोपितरूपप्रतिषेधमात्रोऽस्य व्यापारः ।
समारोपस्य च प्रतिपत्तृणां विपर्यासितदर्शनान्नियमाभाव इत्यसत्यपि सादृश्ये कुतश्चिद् भ्रान्तिकारणात् सर्वत्र प्रसिद्धे नञ्समासे समारोपोऽनुगन्तव्यः ।
उपचरितोत्तरपदार्थप्रतिषेधेन ह्युत्तरपदार्थप्रधानो नञ्समास इत्यप्राणिनामस्त्रीविषयादयोपधादचित्तवत् कर्तृकादिति प्रयोगदर्शनात् समारोपनिमित्तानुसरणेनोत्तरपदार्थसदृशप्रतिपत्तिर्विज्ञेया ।। 280 ।।
`इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सङ्गृहीतं भवति । किम्, अनेकम्' इति भाष्यम् । तद् व्याचष्टे--
अनेकस्मादस इति प्राधान्ये सति सिध्यति ।
सापेक्षत्वं प्रधानानामेवं युक्तं त्वतल्विधौ ।। 281 ।।
एकशब्दार्थस्यात्र प्रधानत्वे तदाश्रयमेकसङ्ख्यत्वादेकवचनमनुपसर्जनत्वात् सर्वनामसंज्ञाकार्यं स्मायादि च भवति । यदि तु पूर्वपदार्थस्यान्यपदार्थस्य वा प्राधान्यं स्यात्, तदैकार्थस्योपसर्जनत्वात् `संज्ञोपसर्जनप्रतिषेधः' इति सर्वनामसंज्ञा न स्याति । तथा अस इत्यत्रान्तर्गणकार्यम्, "त्यादादीनामः" (पा.7/2/102) इत्येवमादि तदर्थस्य प्राधान्ये सिध्यति। गणपाठो हि सार्वार्थ्येन प्राधान्येन विशेष्यत इत्युक्तम्--`पाठात् पर्युदासः, पठितानां संज्ञाकरणं सर्वाद्यानन्तर्यकार्यार्थम्' इति ।
तथा `त्वतल्भ्यां नञ्समासः पूर्वप्रतिषिद्धः त्वतलोः स्वरसिद्ध्यर्थम्' इत्यस्य परिहारार्थं यदुक्तं भाष्ये--
`नात्र त्वतलौ प्राप्नुतः । किं कारणम् ? असामर्थ्यात्' इति ।
तदुत्तरपदार्थप्राधान्ये युज्यते ।
तथाहि--अब्राह्मणत्वमित्यस्य निरस्तावयवविभागस्य लौकिकस्य शब्दस्यान्वाख्यानाय यदा विभागः क्रियते, तदा नञर्थस्य प्रतिषेधस्य भावस्य चापोद्धृतस्य ब्राह्मणादन्यस्य भाव इति, यदा युगपद्विवक्षा, तदा परत्वात् त्वतलौ स्याताम् । तयोः कृतयोः

पुनः प्रसङ्गविज्ञानान्नञ्समासे समासस्वरः स्यात् । सति शिष्टत्वादव्ययपूर्वपदप्रकृतिस्वरः, प्रत्ययस्वरश्चेष्यत इति पूर्वविप्रतिषेधेनात्र नञ्समासे चोदिते परिहारोऽयंभाष्येऽभिहितः--नात्रेत्यादि ।

ब्राह्मणादन्यस्य भाव इति प्रतिषेधमपेक्षमाणो ब्राह्मणार्थस्तद्धितेनैकार्थीभावमनुभवितुं पूर्वसमर्थ इति प्रथममत्र नञ्समासः क्रियते ।

ननु च भावार्थमपेक्षमाणोऽपि ब्राह्मणार्थः सापेक्ष एवेति नञ्समासोऽपि न स्यात् । नैतदस्ति । प्रधानमिदानीं सापेक्षमिति भवति वृत्तिः ।

तद्धिते तु प्रकृत्यर्थस्योपसर्जनस्य सापेक्षत्वम् । तदेतत् कथमुपपद्यते, यद्युत्तरपदार्थप्रधानो नञ्समासः ।

पूर्वपदार्थान्यपदार्थप्राधान्ये तु अभावप्रत्यययोरेकयोगक्षेमो नञ्समासः स्यात् । उभयत्रापि गुणस्य सापेक्षत्वादिति परिहारभाष्यं नोपपद्येतेत्युत्तरपदार्थप्रधानताया उत्कर्षः ।

ननु च नित्यशब्ददर्शने विभज्यान्वाख्याननयेऽपि "वाह ऊठ" (पा.6-4-32)

इति लिङ्गाद् युगपत्सन्निधानेऽप्यन्तरङ्गयोरन्तारङ्गं बलवदिति नञ्सम्बन्धमात्राश्रयो नञ्समास एव पूर्वं भवति । सत्यमेतत् । भावार्थं त्वपेक्षमाणो ब्राह्मण उद्भूतव्यतिरेको नञा सम्बध्यत इति प्रधानमत्र सापेक्षमित्येतदेव युक्तम् । पूर्वविप्रतिषेधवचनं तु ज्ञापकमुक्तम्--`अतोऽन्यो भावप्रत्ययो नञ्समासात् प्राग् भवति' इति । तथा च

तत्रोत्तरपदवृद्धिर्नञ्स्वरश्च भवति ।। 281 ।।

अतोऽनन्तरं भाष्यम्--`किमत्र सङ्गृहीतम्, एकवचनम्' इति । तद् व्याचष्टे--

एकस्य च प्रधानत्वात् तद्विशेषणसन्निधौ ।

प्रधानधर्माप्यावृत्तिरतो न वचनान्तरम् ।। 282 ।।

एकार्थस्य प्रधानत्वात् तन्निषेधेनानेक इत्यत्र बहुष्वपि प्रतिपाद्येषु प्रधानार्थानुयाय्येकवचनमेव भवति, न तु बहुवचनमित्यर्थः ।। 282 ।।

ननु च द्व्यादयोऽत्रैकशब्दवाच्याः समारोपितैकत्वा इति नञा तत्रैकार्थप्रतिषेधे तदाधाकस्य द्व्यादेः सम्प्रत्ययात् । तद्गतमेव वचनं न्याय्यमित्याशङ्क्याह--

प्रधानमत्र भेद्यत्वादेकार्थो विकृतो नञा ।

हित्वा स्वधर्मान् वर्तन्ते द्व्यादयोऽप्येकतां गताः ।। 283 ।।

नञ्विशिष्टोऽनेक इत्यत्रैकार्थः प्रधानम् विशेष्यत्वादिति तदाच्छुरितरूपाःपरित्यक्तस्वभावधर्माः द्व्यादयो निमित्तसरूपतामापन्ना निमित्तानुविधानादेकत्वेनैव प्रतीयन्त इत्येकवचमेव न्याय्यम् ।। 283 ।।

विरुद्धेषु द्वित्वादिषु कथमेकत्वयोग इति चेदाह--

ब्राह्मणत्वं यथापन्ना नञ्युक्ताः क्षत्रियादयः ।

द्वित्वादिषु तथैकत्वं नञ्योगादुपचर्यते ।। 284 ।।

नञ्प्रयोगाद् ब्राह्मणशब्दो यथाऽब्राह्मण इत्यत्र क्षत्रियवृत्तिरवधार्यते, तथानेक इत्यत्रापि द्व्यादिवृत्तिरेकशब्दः । प्रतीयते ह्युत्तरपदार्थसदृशोऽर्थः । तत्र चाध्यारोपितो दुरुपदेशादिना निमित्तेनोत्तरपदार्थ इति सर्वत्र समानम् ।। 284 ।।

तथाहि--

एकत्वयोगमासज्य स धर्मः प्रतिषिध्यते ।

द्व्यादिभ्यस्तेषु तच्छब्दो वर्तते ब्राह्मणादिवत् ।। 285 ।।

भ्रान्त्या द्व्यादावेकत्वमारोपितं नञा निवार्यते, न त्वेकशब्दः । तथाहि भ्रान्तिनिवारणं विवक्षितं न प्रतीयोतेति क्षत्रियादौ ब्राह्मणादिशब्दगवदेकशब्दोऽत्रप्रयोगार्हः । असति ह्येकशब्दे द्वयादिष्वेकत्वारोपाभावात् किं बाधितुं नञ् प्रयुज्येत ।। 285 ।।

तस्मान्नञो विषयप्रक्लृप्त्यर्थमेकशब्दः प्रयुज्यमानः प्रधानार्थ इति स्वधर्माननुवर्तते वृत्तिवाक्ययोरविशेषेणेत्याह--

आविष्टसङ्ख्यो वाक्येऽसौ यथा द्वयादौ प्रयुज्यते ।
वृत्तौ तस्य प्रधानत्वात् सा सङ्ख्या न निवर्तते ।। 286 ।।
एकं चेन्नञित्कितौ, नैकं द्वयादय इति यथा वाक्ये सङ्ख्यान्तरेऽप्येकशब्दोऽपरित्यक्तस्वसङ्ख्य एव प्रयुज्यते, तथा समासेऽपि तदर्थस्य प्रधानत्वादनेक इत्यत्र स्वसङ्ख्यापरित्यागो नास्ति ।। 286 ।।
तत्परित्यागे तु विवक्षितार्थाप्रतीतिरित्याह--
प्रतिषेध्यो यथाभूतस्तथाभूतोऽनुषज्यते ।
वचनान्तरयोगे हि न सोऽर्थः प्रतिषिध्यते ।। 287 ।।
प्रतिषेधाविषयप्रक्लृप्त्यर्थमसदर्थमप्युत्तरपदं प्रयुज्यत इति यादृशोऽध्यस्तः प्रतिषेध्यः, तादृशार्थाभिधानायोत्तरपदमुपादीयते । द्वयादौ चैकत्वं प्रतिषेध्यमित्युत्तरपदस्यैकवचने सत्ययं विवक्षितः प्रतिषेधोऽवगम्यते । द्विवचनाद्युपादने त्वेकत्वं प्रतिषिध्यमानं न प्रतीयते । तस्माद् विवक्षितार्थौपयिकत्वादेकवचनमेव न्याय्यम् ।। 287 ।।
`कथं पुनरेकस्य प्रतिषेधे द्विबहूनां सम्प्रत्ययः' इति भाष्यमेकत्वनिवृत्तिमात्रं प्रसज्यप्रतिषेधरूपमभिप्रेत्य प्रवृत्तं पर्युदासाश्रयणेन समर्थयते--
अशुक्ल इति कृष्णादिर्यथार्थः सम्प्रतीयते ।
सङ्ख्यान्तरं तथानेक इत्यत्राप्यभिधीयते ।। 288 ।।

पर्युदासे शुक्लनिवृत्त्या नीलादयोऽविशेषेणाशुक्लशब्दाद् यथा प्रतीयन्ते, तथा
द्व्याद्योऽप्येकसङ्ख्यानिवृत्त्याऽविशेषेणानेकपदादवगम्यन्ते ।। 288 ।।
एतदेव समर्थयितुं भाष्यम्--`प्रसज्यायं क्रियां गुणं वा ततः पश्चान्निवृत्तिं करोति । तद्यथा--आसय भोजय शाययानेकम्' इति । तद्व्याचष्टे--
क्रियाप्रसङ्गात् सर्वेषु कर्मस्वङ्गीकृतेषु च ।
एकस्मिन् प्रतिषिद्धेऽपि प्राप्तमन्यत् प्रतीयते ।। 289 ।।
क्रियापदमर्थसामर्थ्यात् साधनान्याक्षिपत्यविशेषेण । तथासयेत्युक्ते कर्मसामान्यमवगम्यते । तत्र विधिपूर्वकत्वान्निवृत्तेः क्रियासामर्थ्याक्षिप्तनानासङ्ख्याश्रयकर्मप्रसङ्गे सत्येकप्रतिषेधादप्रतिषिद्धस्य सङ्ख्यान्तरयोगिन एव साधनत्वमवबुध्यते ।। 289।।
एवच्च कस्मिन् पक्षे कथ्यत इत्याह--
क्रिया श्रुतिश्च प्रक्रान्ते प्रसज्यप्रतिषेधेन ।
पर्युदासे तु नियतं सङ्ख्येयान्तरमुच्यते ।। 290 ।।
प्रसज्यप्रतिषेधे प्रतिषेधोपक्षयत्वाच्छब्दस्य क्रियासामर्थ्यात् प्रतिषिद्धवर्जं साधनोपादानम् । पर्युदासे तु शब्दादेवानेकमित्यस्मादुत्तरपदार्थसदृशनियतसाधनोपादानमित्युक्तमेव ।। 290 ।।
`आसय शायय भोजय' इति प्रयोज्यप्रयोजकप्रैषोपादानेन विरुद्धक्रियानिर्देशस्योपादाने भाष्यकारस्याभिप्रायं व्याचष्टे--
धात्वर्थः कर्मविषयो व्यपदिष्टः स्वसाधनैः ।
अर्थात् सर्वाणि कर्माणि प्रागाक्षिप्यावतिष्ठते ।। 291 ।।
सकर्मको धात्वर्थ आसनादिभेदभिन्नः पूर्वं यदा निर्दिष्टः प्रयोज्यप्रयोजकादिस्वसाधनावच्छिन्नो विरुद्धक्रियास्वभावः, तदा तस्य विरुद्धानेकस्वभावस्यैकेन साधनेन साध्यत्वायोगात् पूर्वमेवानेकं साधनमुपात्तमित्येकनिषेधेन तस्यैव सम्प्रत्ययः ।। 291।।
अनन्तरं भाष्यम्--"यद्यपि तावदत्रैतच्छक्यते वक्तुम्, यत्र क्रियागुणौ प्रसज्येते । यत्र तु खलु न प्रसज्येते तत्र कथमनेकं

तिष्ठति" इति ।
तत्र परिहारः--`भवत्येवंजातीयकेष्वप्येकस्य प्रतिषेधे बहूनां सम्प्रत्ययः' इति ।
अत्र चोद्यभाष्ये प्रसज्यप्रतिषेधे निषेधमात्रोपक्षयाद् द्वयादीनामप्रतिपत्तिः स्यादित्यर्थः ।
पर्युदासे समानजातीयस्य सङ्ख्यान्तरस्यैकत्वसमारोपास्पदत्वात् सिद्धः सम्प्रत्यय इति परिहाराभिप्रायः ।
एतद् व्याचष्टे--
निर्ज्ञातसाधनाधारे यत्राख्याते प्रयुज्यते ।
अनेक इति पश्चाच्च तिष्ठतीत्यनुषज्यते ।। 292 ।।
साध्यत्वात् तत्र सिद्धेन क्रिया द्रव्येण लक्ष्यते ।
प्रागेवाङ्गीकृतं द्रव्यमतः पूर्वेण भिद्यते ।। 293 ।।
यत्र कुतश्चिद्धेतोरेकतयावधृतः साधनशक्त्यधिकरणभूतो द्रव्यात्मा आख्याते, तद्वाच्यायां क्रियायां पुनरयथार्थतावसायादनेक इति प्रतिषिध्य पश्चात् क्रियापदं तिष्ठतीति प्रयुज्यते । तत्र प्रागवधृतस्य शक्तिमतो द्रव्यस्य परार्थमुपादीयमानत्वात्तदात्मानुरूपां साध्यामाक्षिपति क्रियां, न क्रियासामर्थ्येनाक्षिप्यते द्रव्यमिति पूर्वस्मादस्य भेदः ।
अत्रापि च ज्ञातसाधनविषयोपनिपातादेकप्रतिषेधस्य प्रतिषिद्धपरिहारेण प्रतीयते साधनम् ।
तदेवमश्रुतेऽपि पूर्वं क्रियापदे नैकनिषेधमात्र एव वाक्यं पर्यवस्यति, क्रियाकाङ्क्षणादिति तत्राप्येकनिषेधे सङ्ख्यान्तरस्य साधनत्वमवगम्यते ।। 292,293 ।।
एवं यत्रापि हि क्रियापदेशे नास्ति तात्पर्यम्, तत्रापि तावत्सङ्ख्यान्तरं प्रतीयत एवेति दृष्टान्तितं भाष्ये । `तद्यथा न न एकं प्रियं, न न एकं सुखम्' इति ।तद् व्याचष्टे--
सङ्ख्यैव प्रतिषेधेन सङ्ख्यान्तरमपेक्षते ।
वाक्येऽपि तेन नैकत्वमात्रमेव निवर्त्यते ।। 294 ।।
"न न एकं प्रियं, न न एकं सुखम्" इत्येतद् वाक्यम् । "आबाधे च"
(पा. 8/1/10) इत्यत्र द्विर्वचनम्, शत्रोः सुखेन प्रियेण च प्रयोक्तुराबाधः ।
अत्र च क्रियापदस्याश्रवणात् सुखप्रियप्रतिषेधमात्रव्यापारेऽपि वाक्ये सङ्ख्यान्तराध्यासितानि सुखानि प्रियाणि च प्रतीयन्ते । एकं शत्रोर्न सुखम्, अपि तु बहूनि । एवं प्रियाणीति ।
अयं ह्यत्र वाक्यार्थः--विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् । सर्वसुखप्रियनिषेध एकपदोपादानमनर्थकं स्यात् । एवञ्च यत्र वाक्येऽप्येतत्सामर्थ्यम्, तत्र वृत्तावुत्तरपदार्थसदृशस्यार्थस्य पर्युदासे प्रतीतो का विचिकित्सा ? तत्र ह्येकपदमेव द्विबहूनाहेति नैकत्वमात्रे निवृत्तिः, अपि तु तन्निवृत्तिविशिष्टस्य द्व्यादेः प्रतिपत्तिः सिद्धा ।। 294 ।।
ननु कथं द्व्यादिरेव नियमेन प्रतीयते । एकप्रतिषेधेऽन्यदेव शेषरूपं प्रतीयतामित्याशङ्क्याह--
स्नेहान्तरादवच्छेदा यस्तथासत्तेः प्रतीयते ।
तैलेन भोजने प्राप्ते न त्वन्यदुपसेचनम् ।। 295 ।।
यथा भोजनमतैलेन विधेयमिति चोदिते तैलप्रतिषेधसामर्थ्यात् सर्पिरादिस्नेहान्तराद्धेतोरवच्छेदो विशेषणं भोजनस्य प्रत्यासत्तेरेकजातीयत्वात्, प्रतीयते, न दध्ना पयसा वा, तथेहाप्येकप्रतिषेधे समानकार्यं सङ्ख्यान्तरमेव सङ्ख्याजात्या प्रत्यासन्नं प्रतीयते, न त्वविशेषेण यत्किञ्चिदेवान्यदिति स्थितमुत्तरपदार्थप्रधानतायां नञ्समासस्यानेकमित्यस्योपपत्तिरिति । कथं तर्हि "वृत्तिभेदप्रयोजकं चित्तमेकनेकेषाम्" इति भगवतः पतञ्जलेः प्रयोगः ?
एकशेषाश्रयेणेति ब्रमः । एकनिषेधेऽपि हि कुतश्चिन्निमित्तान्नियतामेव व्यक्तिं सम्भावयोदिति सम्प्रत्येकशेषो न्याय्यः । भाष्यकृता त्वेकवचनं समर्थितम्, न तुबहुवचनं निवारितम् ।। 295 ।।

इदानीमन्यपदार्थप्रधानपक्षविचारायाह--

एकार्थे वर्तमानाभ्यामसता ब्राह्मणेन च ।

यदा जात्यन्तरं बाह्यं क्षत्रियाद्यपदिश्यते ।। 296 ।।

तदावकल्पतेऽन्यपदार्थप्रधानो नञ्समास इति प्रकरणादवसेयम् । इहाब्राह्मणादिभिर्नञ्समासैरुत्तरपदार्थविपरीतवस्तुप्रत्यायनं दृश्यते । तत्र चान्वाख्यानप्रक्रियायां यदोत्तरपदोपादानाः समारोपितब्राह्मणाद्यर्थाः क्षत्रियादय इति नयः, तदोत्तपदार्थप्राधान्यं निर्णीतम् `प्राधान्येनाश्रिताः पूर्वम्' इत्यादिना ।

यदा त्वसत्सामान्यवृत्तिरप्ययं नञ् सद्विशेषानिबन्धनया ब्राह्मणश्रुत्या सामान्यविशेषभावेनैकाधिकरण्येन संबन्धमनुभूय तत्संबन्धप्रापितार्थातिशयं बाह्यं पदान्तरोपादानं क्षत्रियाद्यनुपतति, न तावत्येव विश्राम्यति तदान्यपदार्थप्रधानो नञ्समासः । तथा ह्यविद्यमानो ब्राह्मणो ब्राह्मणव्यक्तिराश्रयभूता यस्य क्षत्रियस्य क्षत्रियजातेरित्यस्य अन्यपदार्थभूताया वर्त्तिपदार्थाभ्यामभावब्राह्मणाभ्यामवच्छेद इति जात्यन्तरं बाह्यं भवति ।। 296 ।।

उत्तरपदार्थप्राधान्ये तु क्षत्रियादौ समारोपिताया ब्राह्मणजातेः प्रतिषेधात्, सदृशं क्षत्रियादिजात्यन्तरमुत्तरपदवाच्यमेव न बाह्यं भवति, बहुर्वीहाविवान्यपदार्थ इत्यस्याश्रुतेरन्तरङ्गे स्वपदार्थ एव युक्ता वृत्तिरित्याशयैतत्सदृशतत्पुरुषान्तरनिदार्शनेन व्युत्पादयति--

श्यामेव शस्त्री कन्येति यथान्यद् व्यपदिश्यते ।

असन् ब्राह्मण इत्याभ्यां तथान्यं क्षत्रियादयः ।। 297 ।।

शस्त्रीव श्यामा शस्त्रीश्यामा कन्येति श्यामाशब्दस्य शस्त्र्यं वृत्तौ समासवाच्यमुपमेयमुक्तमिति तत्र यथा वर्त्तिपदाभ्यामनभिधायमानापि कन्या समासेनाभिधीयते। यतः कन्याशब्देन समामानाधिकरण्यं प्रतिपद्यते समासः, तथासन्निति नञाऽसदर्थेन ब्राह्मण इति च तद्विशेषवचनेनानभिधीयमानोऽपि क्षत्रियः समासेनाभिधीयते । तथा च यथोपमानसमासो विशेषविहितः सामान्यविहितेन बहुर्वीहिणा न बाध्यते, तथा नञ् समासोऽपीति वचनादन्यपदार्थेऽप्ययं तत्पुरुष इत्यर्थः ।। 297 ।।

अत्रैव निदर्शनान्तरमाह--

असास्नो गौरिति यथा गवयो व्यपदिश्यते ।

जात्यन्तरं न गोरेव सास्नाऽभावः प्रतीयते ।। 298 ।।

गौरवश्यं सास्नासंबद्ध इत्यसास्न इत्युक्ते यदि परं सास्नामात्रमस्य नास्ति, परिशिष्टावयवसंनिवेशसाम्यमिति गोसदृशस्य गवयस्य प्रतिपत्तिः, न गोरेव प्रतिषिद्धसास्नायोगस्य, अतो वाक्यात् प्रतीतिर्गवयसामानाधिकरण्याद् । एवब्राह्मण इत्युक्ते जात्यन्तरं क्षत्रियोऽवगम्यते । ब्राह्मणजातिमात्रनिषेधे परिशिष्टतद्धर्मसाम्यप्रतिपत्तेः ।। 298 ।।

तथा--

तुल्यरूपं यथाख्यातं कण्टकै(कङ्कटै)र्भेदहेतुभिः ।

खदिरं जातिभेदेन खर्जूरात्(बर्बुरात्) प्रतिपद्यते ।। 299 ।।

खदिरखर्जूरौ (खदिरबर्बुरौ) गौरकाण्डौ सूक्ष्मपर्णावित्यभेदेन पूर्वमाख्याते सदृशौ खदिरखर्जूरौ (खदिरबर्बुरौ) प्रतिपद्य पश्चात् कणटकवान् (कङ्कटवान्) खदिर ित्यभिधाने कङ्कटानां खर्जूरेऽभावात् (कङ्कटानां बर्बुरेऽभावात्) ततः खदिरस्य भेदहेतुभ्यस्तेभ्यो विशेषः प्रतिपद्यते । तथा च खदिरः खर्जूरादन्यः (बर्बुरादन्यः) एव, नतु कण्टरादि (कङ्कटादि) संबन्धमाधिकं तस्यैव प्रतिपद्यते, तथा ब्राह्मणधर्मैः सादृश्यमवधार्य क्षत्रिये ब्राह्मणत्वावसायाद् ब्राह्मणशब्दे प्राप्ते कथ्यते नायं ब्राह्मण इति जातिभेदमात्रम्, अन्यत् सर्वं सदृशमिति जात्यन्तरमिति प्रतीयत इति ।।299।।

दार्ष्टान्तिकमाह--

अविद्यमानब्राह्मण्यो यादृशो ब्राह्मणो भवेत् ।
अङ्गीकृतोपमानेन तथान्यार्थोभिऽधीयते ।। 300 ।।
शस्त्री श्यामा कन्येति यथा वर्तिपदाभ्यामनुपात्ता कन्याभिधीयमानोपमानोपमेयभावमवगमयति, असास्नो गौरिति च सास्नावर्जमवयवसादृश्यं गोगवययोरर्थान्तराभिधाननिबन्धनम्, कङ्कटवर्जं च गौरकाण्डादिसादृश्यमेव विवक्षितमिति सर्वत्रोपमानगर्भमन्यार्थाभिधानम्, तथाऽब्राह्मण इत्यत्रापि । तथा च ब्राह्मणजातिवर्जमन्यैर्धर्मैः सादृश्यात् क्षत्रियादिरेवान्योऽर्थोऽभिधीयते ।
तथाहि--वैश्यः क्षत्रियो वा ब्राह्मण इवायमब्राह्मणः । तत्र सर्वथा भेदेऽभेदे वा नास्ति सादृश्यमिति गोगवयवत् कथञ्चिद्भेदाभेदावनुसर्तव्यौ ।
यथा हि ब्राह्मणः कुतश्चिन्निमित्तादपोद्धृतब्राह्मण्यसामान्यस्तथाजातीयकोऽयमित्यर्थः । ब्राह्मण्यस्यापि हि संबन्ध इत्यब्राह्मण इत्यभिधानं कथमिव क्षत्रियादेर्न स्यादित्यतिशयोक्तिगर्भमेतदुक्तम् । तदेवमुपमानोपमेयभावमङ्गीकृत्य नञ्समासः क्षत्रियादिजातिभेदोपादानमर्थमासादयति । दृष्टश्च सादृश्यान्तर्भावो नञ्समासे । तद्यथा--`अवर्षा हेमन्त' इति । अत्र हि नञ्समासे वर्षासदृशो हेमन्तोऽभिधीयते ।।300।।
कथमत्र सादृश्यमित्याह--
अवृष्टयो यथावर्षा नीहाराभ्रसमावृताः ।
तद्रूपत्वात् स हेमन्त इत्यभिन्नः प्रतीयते ।। 301 ।।
न वर्षा अवर्षा हेमन्तो वर्षासदृश इत्यर्थः । अविद्यमानवर्षणक्रिया यथा वर्षाः प्रक्रीयमामनीहारनिकराः प्रलम्बमाननीलघनाच्छादितदिगन्तराः । तथायं हेमन्तस्तमः-सन्ततितिरस्कृतालोक इत्येवंविधवर्षासादृश्याद् वर्षा इत्यभिधीयते । तादूप्येण स्वपदार्थेऽपि ह्यं तत्पुरुषो व्युत्पादितो गर्भीकृत्योपमामन्यपदार्थे वर्तते।
न त्वविद्यमाना वर्षा वर्षात्वमस्येत्युपक्रम एवान्यपदार्थे व्युत्पाद्यते । उपसर्जनह्रस्वत्वप्रसङ्गात् । एवं गर्भीकृतोपमा नञसमासाः प्रक्रियायामन्यपदार्थप्रधानविषया इत्येकेषां दर्शनम् ।। 301 ।।
अपरे ब्राह्मणादीनां सर्वेषां जातिवाचिनाम् ।
द्रव्यस्यान्यपदार्थत्वे नञा योगं प्रचक्षते ।। 302 ।।
जातिपदार्थपक्षे ब्राह्मणादयः शब्दा जातिमेवाधारविविक्तां प्राधान्येनाचक्षत इति वर्तिपदेन द्रव्यस्यनुपादानात् तदभिधायी समासोऽन्यपदार्थप्रधानो भवति ।
असन् ब्राह्मणोऽविद्यमानं ब्राह्मण्यं क्षत्रियद्रव्यलक्षणेऽर्थेऽसावब्राह्मण इति जातिवाचिना ब्राह्मणशब्देन सह तत्पुरुषः । तत्र ब्राह्मणजातेर्यत्राश्रयान्तरे संभाव्यते समवायस्तत्रैव निषेधः समुचितः, नात्यन्तविजातीय इति क्षत्रियादिद्रव्यमेवान्यपदार्थ उक्तः ।। 302 ।।
अस्मिन् दर्शने बहुर्वीहिनञ्समासयोर्विषयविवेकोऽपि कल्पत इत्याह--
न चैवंविषयः कश्चिद् बहुर्वीहिः प्रकल्पते ।
अगुरश्व इति व्याप्तिर्नञ्समासेन यस्य न ।। 303 ।।
एवंविषयो जात्यवच्छिन्नान्यपदार्थद्रव्याभिधायी नञ्समासवन्न कल्पते बहुर्वीहिः, मत्वर्थे भूमादौ बहुर्वीहिविधानात् । अविद्यमाना गावो यस्येत्यगुरयमश्व इत्ययंबहुर्वीहिर्यस्य नञ्समासेनानेन गोचरो नाक्रान्तः, स कल्पत इत्यर्थादुक्तं भवति । अविद्यमानो गौर्गोत्वमस्याश्वस्य सोऽयमगौरश्व इति हि नञ्समासप्रतिपत्तिः । उत्तरपदार्थविजातीयस्य नञ्समासेन स्वभावादभिधानात् । अविद्यमाना गावो यस्येति तु मत्वर्थे बहुर्वीहिरित्यनयोर्विष्यविवेकः सिद्धः ।
यदा तु `नञोऽस्त्यर्थानां बहुर्वीहिर्वा चोत्तरपदलोपश्च' इति प्रतिपदविहितो नञाश्रयो बहुर्वीहिस्तदैवं व्याख्यायते नञ्समासेन यस्य न व्याप्तिरवकाशदनं स एवं भूतविषयो न कश्चिद् बहिर्वीहिः प्रकल्पते । ततोऽनयोः समाने विषये प्राप्ते स्वाभाविको

यथापवर्णितो विषयविवेक इत्येतत् सामर्थ्याज्ज्ञेयम् । इत्थमर्थानुगुण्येऽप्यन्यपदार्थप्रधानतापक्षेऽत्र प्रक्रियायां दोष उक्तः ।। 303 ।।

"यद्यन्यपदार्थप्रधानः अवर्षा हेमन्त इति हेमन्तस्य यल्लिङ्गं वचनं च तत् समासस्य प्राप्नोति" इति भाष्येऽभिहितम् । एतद् व्याचष्टे--

द्वन्द्वैकदेशिनोरुक्ता परवल्लिङ्गता यतः ।
अवर्षासु ततोऽसिद्धिरिष्टयोर्लिङ्गसंख्ययो ।। 304 ।।

अवर्षा हेमन्त इत्यन्यपदार्थप्राधान्ये हेमन्तगतलिङ्गसंख्याप्रसङ्ग इतीष्टं बहुत्व स्त्रीत्वं च न स्यात् । न चापि "परवल्लिङ्गं द्वन्द्वितत्पुरुषयोः" (पा.2/4/26)इति परवल्लिङ्गता भवति । एकदेशिसमास एव तत्पुरुषे परवल्लिङ्गता नियमिता, यतः तत्पुरुषमात्रे हि परल्लिङ्गतायां प्राप्तजीविकादावतिप्रसङ्गः स्यात् । तथा च वार्त्तिकम्' "प्राप्तादिषु चैकदेशिग्रहणात् सिद्धम् " इति । `उपसर्जनह्रस्वत्वमप्यत्र प्राप्नोति' इति । अवर्षा इति अगौरिति च, अन्यपदार्थप्रधानत्वाविशेषाद् बहुर्वीहिवत् । न चापि `परवल्लिङ्गमिति शब्दशब्दार्थौ' इत्यतः परिहर्तुं शक्यते । विशिष्टेतत्पुरुषेऽस्य वचनादित्यन्यपदार्थप्रधानपक्षो दुष्टः ।। 304 ।।

इदानीं पूर्वपदार्थप्राधान्यमधिकृत्य--

विशेषणं ब्राह्मणादि क्रियासंबन्धिनोऽसतः ।
यदा विषयभिन्नं तत् तदाऽसत्त्व प्रतीयते ।। 305 ।।

यदा नञ्पदोपादानोऽसदर्थः क्रियासंबन्धितया प्रक्रान्तः, तदोत्तरपदार्थेन ब्रह्मणेन स एवावच्छिद्यमानो विशिष्टः प्रतीयते । ब्राह्ममलक्षणेन विशेषणेन भिन्नमवच्छिन्नमसत्त्वं नञर्थः प्रतीयमानं प्रधानं भवतीति पूर्वपदार्थप्रधानतापक्षो जायते ।। 305 ।।

ननु चासतः कथं क्रियासंबन्धत्वमित्याशङ्क्याह--

ब्राह्मणत्वेन चासत्त्वादुच्यतेऽसत्तदन्यथा ।
असदित्यपि सत्त्वेन सतः सत्ता निवर्त्यते ।। 306 ।।

क्षत्रियादिरूपेण सन्नेवार्थो ब्राह्मण्येनासन्नित्येवं विशिष्टविषयमसत्त्वं नञुपादत्ते, न सर्वथासत्त्वमिति नास्ति क्रियासंबन्धविरोधः । अत एव सादृशार्थासंप्रत्ययोऽपि सिद्धः । असदित्यपि नञसमासे सत्त्वेनेति । अत्राप्यन्यथेति संबध्यते । भावविशेषानुपहितस्याभावस्याव्यवहार्यत्वात् प्रकारान्तरेण वस्तुत्वेनोपलक्षितस्य सतउत्तरपदार्थस्य विद्यमानता निषिध्यते । तथा चास्य भावरूपानुपातिना क्रियाविशेषेण योगोऽस्त्येव ।। 306 ।।

तदेतस्मिन् पूर्वपदार्थप्रधानपक्षे भाष्ये चोदितम्--`अव्ययसंज्ञा प्राप्नोति । अव्ययं ह्यस्य पूर्वपदम्' इति । तद् व्याचष्टे--

सामान्यद्रव्यवृत्तित्वान्निमित्तानुविधायिनः ।
अयोगो लिङ्गसंख्याभ्यां स्याद् वा सामान्यधर्मता ।। 307 ।।

उत्तरपदार्थविशिष्टो नञर्थः प्राधान्येनाभिधीयत इति तस्यात्र द्रव्यसामान्यरूपे क्षत्रियादौ शब्दप्रवृत्तिनिमित्तस्यालिङ्गसंख्यत्वान्निमित्तानुविधानान्निमित्तवतः स्वेन तत्त्वेनाव्यपदेशात् सत्यपि सत्त्वरूपत्वेऽव्ययधर्मोपपत्तिरित्यर्थमात्रलक्षणाव्ययसंज्ञाप्रसङ्गात् समासार्थोऽलिङ्गसंख्यः स्यात् । नञो हि वाक्येऽभावसामान्यमर्थोऽसत्त्वभूतो दृष्टः । स एवात्र वृत्तावृत्तरपदार्थविशिष्टः प्राधान्येनाभिधीयत इति कृतो लिङ्गसंख्ये स्याताम् ।

अथ समासस्याव्ययेषु पाठाभावादव्ययसंज्ञाभावाद् विभक्तेर्लुङ् नास्तीत्युच्यते, तथापि व्यपदेशनिवृत्तावपि वस्तवर्थो न निवर्तत इत्यव्ययधर्मा भवेयुरेव । तथा च भाष्यम् `पाठेनाव्ययसंज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति' इति । `यश्चेहार्थोऽभिधीयते, न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति' इति ।

अननुविधीयमानेऽपि वा निमित्ते सत्त्वसामान्यगतं लिङ्गसर्वनाम स्यादेकत्वसंख्या चेत्यब्राह्मणमित्येव प्रयोगः स्यात्, न त्वब्राह्मणावब्राह्मणा इत्यादि । व्यक्तिविशेषनिबन्धनो हि लिङ्गसंख्याभेदः । अत्र च व्यक्तिविशेषो न वाच्यः, क्रियायोग्ये सत्त्वमात्रे नञ्समासस्याभिधाव्यापारादविशेषस्याप्रतीतेः ।। 307 ।।

अत्र परिहारो भाष्येऽभिहितः--`नेदं वाचनिकमलिङ्गता असंख्यता वा । किं तर्हि स्वाभाविकमेतत्' इत्यादि । ` तत्र किमस्माभिः शक्यं वक्तुम्, यन्नञः प्राक् समासाल्लिङ्गसंख्याभ्यां योगो नास्ति, समासे तु भवति' इति । तद् व्याचष्टे--

प्रागसत्त्वाभिधायित्वं समासे द्रव्यवाचिता ।

निमित्तानुविधानं च न सर्वत्र स्वभावतः ।। 308 ।।

इहापौरुषेयी शब्दानामर्थप्रत्यायनशक्तिर्नियतविषया योग्यताभिधाना प्रयोगप्रामाण्यावसेयसतत्त्वा । तत्र वृत्तिवाक्ययोः शब्दभेदाद् भिन्नशक्तित्वे वाक्ये नञर्थोऽसत्त्वभूतोऽपि वृत्त्या सत्त्वभूतोऽभिधीयते । तथा च क्रियायोगो दृश्यते ।

तथाहि--वाक्ये नञ्प्रतिषेध्याद् व्यतिरेकेण प्रतिषेधमाचष्ट इति प्राधान्येनाव्ययार्थस्याभिहितत्वाल्लिङ्गसङ्ख्यायोगो नास्ति। वृत्तौ तु प्रतिषेधोपसर्जनस्य प्रतिषेध्यस्य नञर्थत्वात् प्रतिषेध्यप्राधान्याल्लिङ्गसङ्ख्यायोग उपपद्यते ।

न चावश्यकमन्यत्रापि निमित्तानुविधानम्, हरीतक्यादिषु व्यक्तिवचनयोर्व्यवस्तानदर्शनात् । ततश्च नञ्समासे लिङ्गसङ्ख्यायोगस्य दर्शनाच्छुक्लादिवन्निमित्तानुविधानं नास्तीत्यर्थः ।। 308 ।।

तथाहि--

निमित्तानुविधाने च क्रियायोगो न कल्पते ।

तथाचाव्यपदेश्यत्वादुपादानमनर्थकम् ।। 309 ।।

नञर्थस्यासत्त्वरूपस्य निमित्तस्यानुविधाने समासार्थस्य लिङ्गसङ्ख्यायोगवद्`अब्राह्मणमानय, पश्य वा' इत्यादिदर्शनादिक्रियासाधनभावो न स्यादित्याक्रियाङ्गस्य नामपदार्थस्य कीर्तनमफलमित्यनन्वाख्येयो नञ्समासः स्यात् । दृश्यते चास्य क्रियाङ्गभाव इति प्रयोगप्रामाण्यादननुविहितनिमित्तः सत्त्वभूतार्थाभिधायी युज्यते लिङ्गसङ्ख्याभ्या नञ्समासः ।। 309 ।।

इयता च लिङ्गसङ्ख्यासम्बन्धमात्रं स्वाभाविकताभिधानेन स्यात्, प्रयोगानुपाती तु यथायथं लिङ्गसङ्ख्याविशेषो विवक्षित इति तत्सिद्ध्यर्थं पक्षान्तरमत्र भाष्ये प्रतिपादितम्--`अथवा गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति' इति । तद् व्याचष्टे--

असत्सामान्यवृत्तिर्वा विशेषैः क्षत्रियादिभिः ।

प्रयुक्तैराश्रयैर्भिन्नो याति तल्लिङ्गसङ्ख्यताम् ।। 310 ।।

उत्तरपदार्थविशिष्टमसत्सामान्यं समासार्थोऽनिर्ज्ञातविशेष इति तज्जिज्ञासायां विशेषप्रयोगे, तैर्विशेषैराश्रयैरसौ समासार्थो विशिष्टः प्रयोगयोग्य इति तल्लिङ्गसङ्ख्य एव न्याय्यः । अर्थानामितरेतराभावाव्यभिचाराद् ब्राह्मणादिनिवृत्तेः क्षत्रियादय एवाश्रय इति तद्गते एव लिङ्गसङ्ख्ये युक्ते ।

सर्वमूर्तीनां च सर्वलिङ्त्वाच्छब्दशक्तेर्लिङ्गप्रतिनियमे क्षत्रियः क्षत्रमिति यथा स एवार्थो भिन्नलिङ्गाभ्यां शब्दाभ्यामभिधीयते, एवमब्राह्मणः क्षत्रमित्यब्राह्मणशब्देन पुंस्त्वविशिष्टः सोऽर्थः प्रतिपाद्यते । निवृत्तिवचनेनाभेदोपचारात् तद्वत एवोपादानात् ।

यथा चान्ये जातिशब्दा आविष्टलिङ्गसङ्ख्याः, तथा नञ्समासोऽपीति क्षत्रादिनाभिन्नलिङ्गेनापि सामानाधिकरण्यमस्योपपन्नम् । एवमनापः पृथिवी' इत्याद्युपपत्तिः ।

अत एव चात्रापि स्वाभाविकत्वमेव लिङ्गसङ्ख्याव्यवस्थाहेतुः । पूर्वत्र तु परिहारे द्रव्यवचनत्वे स्वाभाविकत्वं हेतुरित्येतावता विशेषः ।। 310 ।।

ननु निर्विशेषस्य सामान्यस्याभावात् सामान्यशब्देनैवोपगृहीतो विशेष इति कथंतद्वाचिनः प्रयोग इत्याह--

प्रागाश्रयो हि भेदाय प्रधानेऽभ्यन्तरीकृतः ।
पुनः प्रत्यवमर्शेन विभक्त इव दृश्यते ।। 311 ।।
असत्सामान्ये समासवाच्ये प्रथमत एव यद्यपि विशेषः स्वाश्रयो गर्भीकृतः तथापि सामान्यश्रुतेर्विशेषस्यावधारणाभावाद् विशेषशब्देन पुनरसौ प्रत्यवमृश्यत एव । तथाच सामान्याद् विशेषस्य विभाग इव शब्दनिबन्धन
इत्याश्रयाश्रयिभावप्रतीतावाश्रयगतसङ्ख्यायोग उच्यते ।। 311 ।।
तथाहि--
समासे श्रूयते स्वार्थो येन तद्वास्तदाश्रयः ।
द्रव्यं तु लिङ्गसङ्ख्यावदसताभ्यन्तरीकृतम् ।। 312 ।।
वृत्तौ नञः सत्त्प्रधानार्थत्वाल्लिङ्गसङ्ख्यायोगि द्रव्यसामान्यमभावानुरक्तम्, तेनासतासद्वचनेनाभ्यन्तरीकृतं प्रतिपादितमिति पूर्वस्य परिहारस्य स्वाभाविकत्वदर्शनस्यार्थो निगमितः । गुणवचनदर्शने तु द्वितीये परिहारे समासे स्ववाच्योऽर्थः
प्रतीयते,योनासत्सामान्येन क्षत्रियादिस्तद्वान् निवृत्तिविशिष्टोऽवधार्यते तस्याधार इति ।। 312 ।।
निमित्तनो निमित्तानुविधाने गुणवचनवल्लिङ्गसंख्यायोगः कथितः, स्वपदार्थः अन्यपदार्थो वा क्षत्रियादिः कथम्, येन
पक्षद्वयोपपत्तिरित्याह--
एकार्थविषयौ शब्दौ तस्मिन्नन्यार्थवर्तिनौ ।
असतैव तु भेदानां सर्वेषामुपसंग्रहः ।। 313 ।।
प्राक् समासान्नञ् वाक्ये निवृत्तिद्योतकः, ब्राह्मणशब्दश्च निवृत्तिविशिष्टार्थाभिधायी । एवमन्यार्थवर्तिनावेतौ शब्दौ । तस्मिन् समासे उत्तरपदार्थेनावच्छिन्नो नञर्थ एकः प्रतिपाद्यः, ययोस्तावेकार्थविषयौ, उपसर्जनसम्भिन्नस्यैकस्यैव नञर्थस्य वाच्यत्वात् ।
सर्वैषां तु भेदानां क्षत्रियादीनामभावेन नञर्थेनैव स्वीकारादुत्तरपदस्य तद्द्योतनमात्रे व्यापारात् पूर्वपदार्थप्राधान्यम् ।। 313 ।।

यदा त्वन्यपदार्थप्राधान्यम्, तदाह--
ते क्षत्रियादिभिर्वाच्या वाच्या वा सर्वनामभिः ।
यान्तीवान्यपदार्थत्वं नञो रूपाविकल्पनात् ।। 314 ।।
क्षत्रियो वैश्य इत्येवमादयः शब्दा अब्राह्मण इत्यत्रत्यान् विशेषान् स्फुटमितरेतरविवेकेन गमयन्ति प्रयुक्ताः सन्तः । तदप्रयोगे तु सर्वनामपदं सामान्यरूपेण तदर्थमाह ।
एवञ्च कृत्वा वर्तिपदाभ्यामुपगृहीतोऽप्ययमर्थो न शक्यतेऽवधारयितुं पदान्तप्रयोगमन्तरेणेति
शब्दशक्तिमनवधारयन्तोऽन्यपदार्थत्वम्, क्षत्रियादेरवगच्छन्तोऽन्यपदार्थप्रधानत्वं नञ्समासस्याहुः ।
नञ्पदं हि प्रतिषेधमाह, ब्राह्मणपदं तु स्वजातीयमर्थमिति क्षत्रियोऽन्यपदार्थ इति भ्रान्ताः । शब्दशक्त्यनुसारिणां तु स्वपदार्थ एवात्र सदृशलक्षणोऽर्थ इतीवशब्दः ।
तथाहि--नञो रूपमीदृशमत्र न विकल्प्यते न विशेषेणानुगम्यते यैः, यदुतोत्तरपदार्थभावविशिष्टमसत्सामान्यं
क्षत्रियाद्याश्रयभेदोपकल्पितविशेषं नञर्थ इति तेषां भ्रान्तिः । पूर्वपदार्थप्रधानतायां लिङ्गवचनातिदेशस्योपयोगः ।। 314 ।।
अत्र पक्षे दोषमुद्भावयति--
विशेषस्याप्रयोगे तु लिङ्गसङ्ख्ये न सिध्यतः ।

अवर्षादिषु दोषश्च हेमन्तोऽन्याश्रयो यतः ।। 315 ।।
असत्सामान्यस्योत्तरपदार्थोपकृतस्य समासवाच्यत्वेऽत्र यदा क्षत्रियादयो विशेषाः प्रयुज्यन्ते, तदा तैः
प्रयुक्तैपाश्रयैर्विशिष्टलिङ्गसंख्यासिद्धिरस्तु । तदप्रयोगे तु व्यक्तिविशेषनिबन्धने लिङ्गसङ्ख्ये न सिध्यत इति सामान्याश्रये एव

नपुंसकैकत्वलक्षण ते स्याताम् । अवर्षा हेमन्तः, अनापः पृथिवी, अपञ्चाला जनपदः, अगोदौ ग्रामः, अतेजः सिकता, अनर्थो गृहाः, अनिदाघो वर्षा इत्यादिषु चेष्टलिङ्गसङ्ख्या सिद्धिर्न स्यात् । यस्माद्वर्षाभ्योऽन्यो हेमन्तोऽत्राश्रयः समासार्थस्येत्यवर्षा इतिहेमन्तगतलिङ्गसङ्ख्याप्रसङ्गः ।

एवमन्यत्र योज्यम् । हेमन्तग्रहणस्योपलक्षणार्थत्वात्, पूर्वपदार्थप्राधान्याच्च वर्षार्थस्योपसर्जनत्वाद्ध्रस्वप्रसङ्ग इति पूर्वपदार्थप्रधानपक्षोऽपि दुष्टः ।
उत्तरपदार्थप्राधान्यमेव त्वत्र सिद्धान्तः । तथा च यथायथमुत्तरपदार्थगतलिङ्गसङ्ख्यासिद्धिः । अतिदेशस्य तु नायं विषयः । ये हि बाह्यपदार्थसम्बन्धे भेदे विपरिवर्तन्ते, ते गुणवचनाः स्वाश्रयतो लिङ्गसङ्ख्ये प्रतिपाद्यन्ते । तद्यथा शुक्लादयः,यथा बहुर्वीहिः समासः । नञ्समासस्तूपात्तलिङ्गसङ्ख्याभेदापरित्यागेनात्यन्तमनुवर्तते वर्षादिष्विति
जातिशब्दानामिवाविष्टलिङ्गत्वान्नाश्रयतो लिङ्गानुगमोऽत्र क्रियते । तथाह्यब्राह्मणः क्षत्रम्, अब्राह्मणः क्षत्रिय इत्युत्तरपदार्थसमवाय्येव लिङ्गं दृश्यते । अत एव स्वाभाविकमेतदित्युक्तम् ।
सङ्ख्याप्यवर्षादिषूत्तरपदार्थसमवेतैवेति सापि स्वाभाविकी । अब्राह्मणावित्यादौ तु क्वचिद् बाह्यपदार्थापेक्षा सङ्ख्या । यद्येवं शब्दशक्तिप्रतिनियमादप्रयोगेऽपि विशेषस्य विशिष्टे लिङ्गसङ्ख्ये सिध्यत एवेति पूर्वपदार्थप्रधानपक्षोऽपि न त्याज्यः । अत एव भाष्ये चोद्यप्रतिसमाधानेन समर्थित एवायम् । असः असर्वस्मा इति च सर्वनामकार्यं भवत्येव, नञर्थस्याव्यतिरेककरत्वात् समानाधिकरणत्वात् । अतिसर्वायेत्यादावेव हि व्यधिकरणविशेषणविषये सर्वाद्यर्थस्याप्राधान्यम्, न तु समानाधिकरणे, नञ्समासे ।
वाक्य इव स्वार्थापरित्यागेनैव हि नञ्समासे सर्वादयो नञर्थविशेषणं भवतीति प्रवर्तत एव सर्वनामकार्यम् । अत एव प्रधानसामानाधिकरण्यान्नानाविभक्तित्वादप्रथमानिर्देशाच्चासत्युपसर्जनत्वे ह्रस्वत्वमपि न प्राप्नोति ।
न चोपसर्जनकार्येषु पारिभाषिकसम्भवे लौकिकमुपसर्जनमुपादेयम् ।
तस्मादुपपन्नं पूर्वपदार्थप्राधान्यदर्शनम् । तदेवं नञ्समासादौ लिङ्गसङ्ख्यातिदेशो यथाभाष्यमनुसृतः ।। 315 ।।
यथा नञ्समासादौ, एवम् `आकृत्यभिधानद्वैकं विभक्तौ वाजप्यायनः' इति
जातिपदार्थश्रयेणैकशेषप्रत्याख्याने `लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात्' इत्युक्तम् । गुणो द्वित्वस्त्रीत्वादिकः । स चैकार्थसावायाज्जातेरवच्छेदकः । नियतलिङ्गसंख्यैश्च जातिशब्दैर्जातिः प्रत्याय्यत इति शब्दशक्तिस्वभावापेक्षयाऽनित्यत्वं तस्य कथ्यते ।
काचित् किल जातिः स्त्रीत्वयुक्तेन शब्देन प्रत्याय्यते, काचित् पुस्त्वयुक्तेनेत्यादि । तथा काचिदेकत्वयुक्तेनेत्याद्यपीत्यनित्यत्वम् । अत एव `गुणविवक्षानित्यत्वाद्' इति भाष्ये पाठः । अत्रैव पक्षान्तरमभिहितम् `गुणवचनवद् वा' इति ।
लिङ्गवचनसिद्धिरित्येव ।
तदेतद् व्याख्यातुमुपक्रमते--
आकृतिः सर्वशब्दानां यदा वाच्या प्रतीयते ।
एकत्वादेकशब्दत्वं न्याय्यं तस्यां च वर्ण्यते ।। 316 ।।
`प्रख्याऽऽविशेषादाकृतिसद्भावे चोदनासु च तस्यारम्भाद् ज्ञायते चैकोपदिष्टम्' इति तस्या एव शब्दार्थत्वं निर्णीतम् । तथाचैकशब्दत्वे तदाश्रये सिद्धे प्रत्याख्यात एकशेषः । आकृतेरेकत्वात् तत्र सम्बन्धग्रहणोपपत्तेः सैव शब्दवाच्या । न च प्रितिनियतो विशेषः शब्दात् प्रतीयत इति सामान्याभिधानमेव । आश्रयभेदापायोपजनेष्वपि चैकप्रख्यानिबन्धनाया जातेर्भेदापायोपजनाभावात् तत्प्रयुक्तः शब्द एक एव न्याय्यः ।
अर्थभेद हि शब्दानां भेदः । अर्थश्च प्रधानभूतो जातिरेकेत्येक एव शब्दः ।। 316 ।।
एवमुपक्षिप्य लिङ्गं तावद् विचार्यते । तथाहि--इयमाकृतिः शब्दैरभिधीयमाना आविष्टलिङ्गोक्ता । आविष्टं लिङ्गं यया सा आविष्टलिङ्गा नियतलिङ्गेत्यर्थः । सर्वत्रसर्वेषां लिङ्गानां सद्भावेऽपि केनचिच्छब्देन किञ्चिल्लिङ्गं प्रत्याय्यत इति

शब्दविशेषापेक्षया आविष्टलिङ्गत्वमुच्यते । तदेतदाह--

आविष्टलिङ्गता तस्यां स्याद् ग्राम्यपशुसङ्घवत् ।
द्रव्येभेदेऽपि चैकत्वात् तत्रैकवचनं भवेत् ।। 317 ।।

"ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री" (पा. 1/2/73) इति जातिपदार्थे प्रत्याख्याते सूत्रे स्वभावात् प्रतिनियतलिङ्गभेदोपग्रहः । तथाहि--तत्र मूलोदाहरणविषयेषु स्त्रीत्वमेव गाव इमा इति । प्रत्युदाहरणविषयेषु तु पुंस्त्वमेव तरुणेष्विति । एवं जातिशब्दानां नियतलिङ्गता स्वभावात् ।

जातिपदार्थदर्शनाश्रयेण हि सूत्रप्रत्याख्याने शब्दशक्तिभेदाश्रयो लिङ्गनियमः । तथा च ब्राह्मणो ब्राह्मणीत्यादावपि जात्यभिधाने शब्दशक्तिनिमित्तमेवोभयलिङ्गाभिधानम् । वृक्ष इत्यादौ तु पुंस्त्वमेव नियतम्, जातेरेव चाभिधीयमानत्वात् । अनुमीयमानद्रव्यभेदेऽपि तस्य शब्देनानुपादानागभिधीयमानजातिबन्धनमेकवचनमेव भवेदिति जात्याख्यायामेकस्मिन् बहुवचनमारभ्यते । पूर्वश्लोके यद् यदेति, तत्सम्बन्धादिह तदेति योज्यमिति समन्वयोपपत्तिः ।। 317 ।।

यदि तर्हि लिङ्गभेदेन योगः, कथमाविष्टलिङ्गता जातेरित्यत आह--

आश्रयाणां हि लिङ्गैः सा नियतैरेव युज्यते ।
तथा च युक्तवद्भावे प्रतिषेधो निरर्थकः ।। 318 ।।

एकार्थसमवायादाश्रयगतलिङ्गोपादना जातिः शब्दशक्त्यनुसारेण नियममङ्गीकृतवती।

तथाहि--वृक्षः पादपस्तरुरिति वृक्षत्वजातिराश्रयगतं पुंस्त्वमेवोपादत्ते, न कदाचिदत्र स्त्रीत्वनपुसकत्वे दृश्यते । शिंशपादयः स्त्रीत्वमेनाश्रयन्ते । पनसमित्यादयस्तु नपुंसकत्वमेव । इष्वशनिप्रभृतयो द्विलिङ्गाः, पद्मशङ्खादयश्च । तटादयस्त्रिलिङ्गाः । ब्राह्मणो ब्राह्मणीति च द्विलिङ्गः ।

न ह्यत्र लिङ्गव्यतिकरः कदाचिदपि दृश्यत इति शब्दशक्तिभेदापेक्षो लिङ्गनियमोऽयमाविष्टलिङ्गता जातेर्विवक्षिता । अत एव च "विशेषणानां चाजातेः" (पा. 1/2/22) इति जातिप्रतिषेधो निष्फलः । जातिशब्दा हि स्वसामर्थ्यानुरोधेन लिङ्गोपादायिनो च युक्तस्य लिङ्गमनुरुध्यन्ते ।। 318 ।।

नन्वेवं गुणवचनवदाश्रयगतलिङ्गपरिग्रहे न जातेः स्वतो लिङ्गयोगः कश्चिद्, द्रव्यधर्मत्वाल्लिङ्गस्य । सत्यमेतत् । प्रभूतोऽयं प्रयोग इति तु शब्दसंस्कारमात्रमत्र लिङ्गम् । आविष्टलिङ्गो वा पादपशब्दोऽनुभवति भिन्नलिङ्गेन सामानाधिकरण्यम् । तद्यथा--ब्राह्मणोऽयं नपुंसकमिति । प्रवृत्तिमन्तो हि सर्वेऽर्थास्तिसृभिः प्रवृत्तिभिरवियुक्ता इति यथायथं शब्दैरनुगम्यन्ते । अत एव चैतदाविष्टलिङ्गत्वं जातेः स्तनकेशादिव्यञ्जनलौकिकलिङ्गपरिग्रहे नोपपद्यत इत्याह--

सर्वत्राविष्टलिङ्गत्वं लोकलिङ्गपरिग्रहे ।
विरोधित्वात् प्रसज्येत नाश्रितं तच्च लौकिकम् ।। 319 ।।

लोकव्यवहारनिरूढे लिङ्गे समाश्रीयमाणे स्तनादीनां व्यञ्जकानां प्रतिनियमात् तद्व्यङ्ग्यस्य स्त्रीत्वादेरेकार्थसमवायविरोधात् सर्वस्मिन्नर्थे नियतलिङ्गत्वमेतच्छब्दानां प्राप्नुयात् । स्तनकेशयोगाभिव्यक्तस्त्रीत्वा योषित् स्त्रीलिङ्गेनैव शब्देन व्यपदिश्येत, न दारकलत्रशब्दाभ्यां पुंनपुंसकलिङ्गाभ्याम् । अस्वादयश्च नपुंसकेन वाहनशब्देन नोच्येरन् । तस्मादात्मीयः सिद्धान्तः शब्दार्थोऽर्थो यथा नानालिङ्ग उपपद्यते, स प्रतिज्ञेयः । अर्थव्यक्तिवस्तुशब्दैः सर्वार्थानां व्यवहाराद् यथा त्रिलिङ्गता सम्पद्यते, तथा परिभाषणीयम् ।

तथा च भाष्यम्--`तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम् । अवश्यं कश्चित् स्वकृतान्तः आस्थेयः' इति ।। 319 ।।

तथाहि--

सामान्यमाकृतिर्भावो जातिरित्यत्र लौकिकम् ।
लिङ्गं न सम्भवत्येव तेनान्यत् परिगृह्यते ।। 320 ।।

सामान्यादयः शब्दाः पदार्थमेकमाचक्षते भिन्नलिङ्गा । न च तस्य पदार्थस्य लौकिकमस्ति लिङ्गमित्यलिङ्गास्तदाश्रयणे प्रसज्यन्त एते शब्दाः । तस्मादन्यत् व्यापकं शस्त्रीयं लिङ्गमाश्रीयते ।। 320 ।।

किं तदित्युक्तं भाष्ये `संस्त्यानप्रसवौ लिङ्गम्' इति । तद् व्याख्यातुमाह--

प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते ।
आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते ।। 321 ।।

अजस्रपरिमाणिनां गुणानां परिणामविशेषानादरेण प्रवृत्तिः परिणाम इत्येव सामान्यं लिङ्गलक्षणम् । तथाहि `कस्य पुनः संस्त्यानां स्त्री प्रवृत्तिर्वा पुमान्' इति चोदयित्वा `गुणानां रूपादीनाम्' इति भाष्यम् । सत्त्वरजस्तमस्संनिवेशानां रूपादीनां संस्त्यानं संहननं विवेकेनावस्थाय धर्माणां केषाञ्चित् प्रकृतौ प्रविलयस्ति रोधानं स्त्रीत्वम् । अपरेषां प्रसवो धर्मिणि उद्भव अविर्भावः पुंस्त्वम् । रजसः प्रवृत्तिधर्मणोऽङ्गितायां प्रादुर्भावः । गुणानां चात्यन्तमितरेतरसाहचर्यात् तमस उद्भूतस्याङ्गभूतरजोधर्मप्रवृत्त्यनुरोधे तिरोभावः । धर्मिरूपस्यापि तिरोभूतधर्मावस्थायामनुवृत्तिः, तमसः सत्त्वधर्मोपरागात् स्थितिर्नपुंसकं स्त्रीपुंसनिषेधरूपतयैव गम्यमान्तावन्न भेदेन लक्षितम् । अत एव संस्त्यानप्रसवावस्थाव्यापित्वात् स्थितेर्लिङ्गसर्वनाम नपुंसकम् । स्थितिरोभावावस्थयो रजोधर्मस्य प्रवृत्तेर्गुणान्तरेऽप्यनुवेधादन्वयित्वे सति लिङ्गानां सामान्यमेतत् ।। 321 ।।

अनेन लिङ्गेन सर्वे पदार्था व्याप्ता इत्युक्तं भाष्ये `प्रवृत्तिः खल्वपि नित्या । नहि कश्चित् स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते' इत्यादि । तद् व्याचष्टे--

प्रवृत्तिमन्तः सर्वेऽर्थास्तिसुभिश्च प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः ।। 322 ।।

`वर्धते यावदनेन वर्धितव्यमपायेन वा युज्यते' इत्यनुग्रहोपघातनिमित्तसन्निध्ये भावानां परिणाममनुभवतामाविर्भावादिलक्षणाभिर्विशेषप्रवृतिभिरजस्रमवियोगः । तथाहि--प्रतिकलमवस्थान्तरावधारणान्यथानुपपत्त्या समुन्नीयते परिणामः ।

तदुक्तं भाष्ये--`सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः' इति । एवंरूपाश्च पदार्थाः शब्दैरनुगम्यन्ते । न हि शुद्धं परिणामि वस्तुतत्त्वमभिधानविषयः, आकारोपग्रहेण शब्दवाच्यत्वादिति सर्वशब्दानां स्वशक्त्यनुसारी लिङ्गनियमः समञ्जसः ।। 322 ।।

तत्र प्रकृतेस्त्रिगुणाया रजसानवरतमस्तु प्रवृत्तिशीलता, तद्विकाराणां च भोग्यात्मकानाम् । यस्तु भोक्ता पुरुषश्चेतनः, सोऽत्यन्तविधर्मा भोग्यजातान्निर्गुमःप्रवृत्तिमननुभवन् कथमात्मा चैतन्यं चितिरिति लिङ्गविशेषनियताभिधानविषयतामनुभवतीत्याशङ्क्याह--

यश्चाप्रवृत्तिधर्मार्थश्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तीविष्वगाश्रयाः ।। 323 ।।

बुद्धिदर्पणे चिच्छायासङ्क्रान्त्या भोगनिष्पत्तेर्भोग्यभावशबलितमेव चैतन्यं व्यवहारेऽध्यक्ष्यते । तदेव च शब्दगोचरोऽत्यन्ताज्ञातस्याभिधानयोगात् । तथा चान्येषां भोग्यानां पृथगपरिमितपदार्थरूपानुगताः प्रवृत्तीः परिणामविशेषाननुगच्छतीत्याभासगतलिङ्गभेदोपचारो निराभासेऽपि चैतन्ये ।। 323 ।।

तथाहि--

तेनास्य चितिरूपं च चितिकालश्च भिद्यते ।
तस्य स्वरूपभेदस्तु न कश्चिदपि विद्यते ।। 324 ।।

तेन बुद्धिदर्पणसंक्रान्तेन भोग्यजातेनास्य भोक्तुश्चितिक्रिया भिद्यते प्रतिभोग्यं विवेकेन गृह्यते । विषरूपानुकारेण हि ज्ञानमन्यथा प्रविभज्यते । अत एवावच्छिन्नापीयं चितिक्रिया चेत्यगतकालभेदोपचारात् प्रविभक्तकालेवावधार्यते ।

परमाथतः पुनश्चैतन्यमात्ररूपस्य भोक्तुर्न कश्चन स्वरूपतो देशतः कालतो वा भेदः । चितिक्रियापि न ततो भिन्ना, निराभाससंविन्मात्ररूपत्वात् तस्य ।
पुरुषस्य चैतन्यमिति तु विकल्पकल्पिताकारो भेदो राहोः शिर इत्यादिवत् । अनुत्पन्नविवेकख्यातयोऽर्वाग्दर्शना गुणपुरुषयोः स्वरूपमेलनेन व्यवहरन्ति ।। 324 ।।

इत्थञ्च कृत्वा पारमार्थिकेन चैतन्यरूपेण व्यवहाराभाव इत्याह--
अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते ।
प्रतिबिम्बकधर्मेण यत्तच्छब्दनिबन्धनम् ।। 325 ।।
बुद्ध्याकारसंनिविष्टेषु सत्त्वादिगुणेषु जडेषु सत्त्वधर्मस्वच्छत्वातिशयशवशेन चैतन्योपराग िति तत्रादर्शतलप्रख्ये प्रतिसङ्क्रान्तं बिम्बं व्यावहारिकं चैतन्यमभिधानविषय इति तदन्येषां प्रवृत्तीरनुविदधदनुभवति लिङ्गयोगमित्यर्थः ।
यत्तु पत्रं स्वयं ज्योतिरपेतविकारग्रन्थि तद्परिणामि नावतरति व्यवहारम् ।तदुक्तम् `चितिशक्तिरपरिणामिनी' इत्यादि ।। 325 ।।

तदेवं व्यवहारे चैतन्येऽपि लिङ्गयोगाद्--
अवस्था तादृशी नास्ति या लिङ्गेन न युज्यते ।
क्वचित्तु शब्दसंस्कारो लिङ्गस्यानाश्रये सति ।। 326 ।।
भोकतृभोग्ययोर्लिङ्गभेदानुगमस्य साधित्वात् तद्व्यतिरेकेम पदार्थान्तराभावान्न काचिदसौ पदार्थावस्था, यस्या लिङ्गसम्बन्धो नास्तीति व्यापकमिदं लिङ्गलक्षणं जातावप्यन्वयि । अवस्थात्रयस्यावियोगात् सर्वभावानां नित्याया अपि जातेस्तदनपायात् । सम्भवदपि चेदं लिङ्गं क्वचिदविवक्षयापाकीर्यते ।
तदाह भाष्यकारः--`तच्चोभयं सर्वत्र । यद्युभयं सर्वत्र, कृतो व्यवस्था । विवक्षातः । स्त्यानविवक्षायां स्त्री, प्रसवविवक्षायां पुमान्, उभयोरविवक्षायां नपुंसकम्' इति ।
तथा च शब्दसंस्कारमात्रम् `न केवला प्रकृतिः प्रयोक्तव्या' इति लिङ्गप्रत्ययस्तत्र । यथोच्यते `तद्धितार्थानिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात्' इति ।। 326 ।।
यदुक्तम्--`अवस्था तादृशी नास्ति या लिङ्गेन न युज्यत'(326) इति । तदेव व्यक्तयति--
कृत्तद्धिताभिधेयानां भावानां न विरुध्यते ।
शस्त्रे लिङ्गं गुणावस्था तथा चाकृतिरिष्यते ।। 327 ।।
पाकः पक्तिः पचनमिति कृदभिहितो भावोऽवस्थाभेदेन भिद्यमानस्तदनुगतं लिङ्गभेदमनुभवन्नियतलिङ्गैः शब्दैर्विषयीक्रियते । एवं गरिमा गुरुता गुरुत्वमित्यादिस्तद्धिताभिधेयः ।
एकापि हि यावदवस्थावस्थान्तरमनुभवत्येव । न हि कश्चित् स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते यतः । तथा च संस्त्यानं संस्त्यायः संस्त्येति धातूपादानैकाप्यवस्था लिङ्गभेदनिबन्धनैः शब्दैः प्रत्याय्यते । तदेवं गुणावस्थालक्षणं शास्त्रे परिभाषितं लिङ्गं न विरुध्यते कृत्ताद्धिताभिधेयानां भावानां भिन्नमपि । अन्यथैकत्वाद् भावस्य किञ्चिदेकमेव लिङ्गं युज्येत ।
तदित्थं सिद्धेऽस्य लिङ्गलक्षणस्य व्यापित्वे, उपसंहरति--तथा चाकृतिरिष्यतइति ।
तथा च एवं सति गुणानां रूपादीनां सत्त्वादिगुणपरिणामरूपाणामाविर्भावाद्यवस्था प्रवृत्तिसामान्यरूपा लिङ्गजातिरभ्युपगम्यत इत्युपसंहारः कृतः ।। 327 ।।

इत्थञ्च जातिशब्दानां लिङ्गव्याप्तिसिद्धेर्द्रव्यपदार्थकेन यत्र लिङ्गासिद्धिः प्रसञ्जिता, सा प्रतिसमाहिता भवतीत्याह--
लिङ्गं प्रति न भेदोऽस्ति द्रव्यपक्षेऽपि कश्चन ।
तस्मात् सप्त विकल्पा ये सैवात्राविष्टलिङ्गता ।। 328 ।।
द्रव्यपदार्थपक्षेऽपि गुणावस्था लिङ्गम् । आकृतिपदार्थनयेऽपि ता एव त्यक्तभेदाव्यक्तयो जातिरिति गुणावस्थासम्भवाद् यथायथं

स्वशक्त्यनुसारेण शब्दैर्नियतलिङ्गा जातिर्द्रव्यं वा नियतलिङ्गं प्रतिपाद्यत इति दर्शनद्वयेऽपि लिङ्गं प्रति भेदभावः ।
कथं न भेदो यावता जातिराविष्टलिङ्गा, द्रव्यं पुनरनियतलिङ्गमित्याशङ्क्य निगमयति--तस्मादिति ।
द्वित्र्येकलिङ्गतया `उपादानविकल्पाश्च लिङ्गानां सप्त दर्शिताः' इति जातिशब्दैस्तदुपग्रहे नियतैरेवासङ्करेण लिङ्गोपादानादाविष्टलिङ्गता जातेः कथिता । न त्वेकलिङ्गपरिग्रह एवेति पक्षद्वयसाम्यम् ।
वैयाकरणैर्हि न वस्तुधर्मो लिङ्गमिष्यते । अपि तु शब्दार्थस्य लिङ्गयोगः । प्रतीयते च शब्देभ्यो जातिरुपगृहीतलिङ्गसम्बन्धा । तेन जातेः स्वमेव लिङ्गम् । अत आश्रयलिङ्गेन लिङ्गवत्त्वे नाभिनिविश्यते ।
अत एव गुणविवक्षानित्यत्वादित्येतदभ्युपपद्यते, द्रव्यव्यभिचारेण जातेरपि गुणस्य स्त्रीत्वादेर्विवक्षाप्रक्लृप्तेः ।। 328 ।।
एवं स्वपक्षे द्रव्यपक्षसाम्यं लिङ्गं प्रति समर्थितं जातिपदार्थकेन, सम्प्रति वचनं समर्थयितुमाह--
वचने नियमः शास्त्राद् द्रव्यस्याभ्युपगम्यते ।
यतस्तदाकृतौ शास्त्रमन्यथैव समर्थ्यते ।। 329 ।।
द्रव्यपदार्थदर्शनेऽपि "बहुषु बहुवचनम्" (पा.1/4/21)इत्यादिशास्त्रसामर्थ्याद् वचननियमः, न तु द्रव्यस्य सङ्ख्यास्तीत्येव, साङ्कर्यपरिहारार्थं ह्यवश्यं वचनमारम्भणीयम् । एवञ्चेच्छास्त्रशरणा व्यवस्था तदा जातावपि पदार्थे तच्छास्त्रमन्यथा वर्ण्यते ।। 329 ।।
कथमित्याह--
वर्तते यो बहुष्वर्थो भेदे तस्य विवक्षिते ।
स्वाश्रयैर्व्युपदिष्टस्य शास्त्रे वचनमुच्यते ।। 330 ।।
यो जातिलक्षणो बहुषु वर्तते, तस्य भेदे भिन्नाधारसमवाये विवक्षिते, बहुष्विति स्वाश्रयैः शास्त्रे कथितस्य बहुवचनं विधीयते । एवं द्वयोरिति व्यपदिष्टस्य द्विवचनमित्यादि वाच्यम् ।
तदयमर्थः--द्वित्वसङ्ख्यावच्छिन्नव्यक्तिविशेषाधिकरणा जातिर्द्विवचनान्तेन शब्देन प्रत्याय्यते, बहुत्वसङ्ख्यावच्छिन्नाधारसमवेता तु बहुवचनान्तेन, एकसङ्ख्याधारावच्छिन्ना त्वेकवचनान्तेन । तदेतदुक्तं भाष्ये--
"अथ यस्य द्रव्यं पदार्थः, कथं तस्यैकवचनद्विवचनबहुवचनानि । एवं स वक्ष्यति`एकस्मिन्नेकवचनम्, द्वयोर्दिवचनम्, बहुषु बहुवचनम्' इति । यदि तर्हि, तस्यापि वाचनिकानि, न स्वाभाविकानि । अहमप्येवं वक्ष्यामि--
एकस्मिन्नेकवचनम्, द्वयोर्द्विवचमून,बहुषु बहुवचनमिति ।" एकस्मिन् या वर्तते जातिरित्याद्यर्थः ।
केचिदकारप्रश्लेषेणाभेदे तस्येति पठन्तस्तस्यैकशब्दतार्थमेकत्वे सहजे शब्देन प्रतिपादयितुमिष्ट इति व्याचक्षते ।
एवमनधिगतभेदायामेव जातावाश्रयतो वचनमुपपद्यते ।। 330 ।।
यदा त्वाश्रयभेदेन भेद एव प्रतीयते ।
आकृतेर्द्रव्यपक्षेण तदा भेदो न विद्यते ।। 331 ।।
आश्रयभेदेन जातेर्भेदानुविधाने वचनभेदः स्वगत एव । तथा चानेकशब्दत्वमपीति एकशेष आरभ्यत एवेति द्रव्यपदार्थपक्षेण जातिपदार्थपक्षस्य भेदो नास्ति । उभयत्रापि प्रत्यर्थं शब्दनिवेशात् । एतच्च दर्शनं भाष्ये हेयत्वेनोक्तम् । "यदि कदाचिदाकृतिरेकत्वेन विवक्षिता, कदाचिद् द्वित्वेन, कदाचिद् बहुत्वेन एका आकृतिरिति प्रतिज्ञा हीयते । यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तम्--एकशेषो न वक्तव्य इति,स इदानीं वक्तव्यो भवति" इति ।। 331 ।।
तस्मात् प्रागुक्तमेव युक्तमित्यपसंहरति--
अभेदे त्वेकशब्दत्वाच्छास्त्राच्च वचने सति ।
एकशेषो न वक्तव्यो वचनानां त सम्भवः ।। 332 ।।
व्यक्तिनिबन्धनभेदानुविधानाभावेऽपिस्वाश्रयभेदनिबन्धनम् "बहुषु बहुवचनम्" (पा. 1/4/21)इत्यादिशास्त्राद् यथोक्तेन न्यायेन

यदा जातिर्वचनभेदं प्रतिपद्यते, तदा प्रयोजकस्यार्थस्यैकत्वादेकशब्दत्वे सिद्धे प्रत्याख्यायते सूत्रमेकशेषलक्षणम् ।। 332।।

अत्र चोदयति--

ननु चानभिधेयत्वे द्रव्यस्य तदपाश्रयः ।

आकृतेरुपकारोऽयं द्रव्याभावान्न कल्पते ।। 333 ।।

आकृतेः शब्दार्थत्वे द्रव्यस्यानभिधीयमानत्वात् तदाश्रयलिङ्गसंख्यासिद्धिः कथम् ? शब्दार्थनिमित्तो हि शब्दसंस्कारः ।

अनभिधीयमानस्य च वस्तुतः सत्त्वेऽपि संस्कारं प्रत्यसत्त्वमेव ।। 333 ।।

एतत् परिहर्तुमाह--

व्यपदेशोऽभिधेयेन न शास्त्रे कश्चिदाश्रितः ।

द्रव्यं नाम पदार्थो यो न च स प्रतिषिध्यते ।। 334 ।।

"बहुषु बहुवचनम्" (पा.1/4/21)इत्यादिशास्त्रेऽभिधीयमानाश्रयभेदनिबन्धनानि वचनानीति न वचनमस्ति । किन्तु सामान्येनैतदुच्यते । तथा च भिन्नाधारा जातिर्वचनभेदंप्रतिपद्यत एव ।

न च जातिपदार्थदर्शने द्रव्यं नाम पदार्थो नास्ति । तथा च भाष्यम्--`न ह्याकृतिपदार्थसकस्य द्रव्यं न पदार्थो, द्रव्यपदार्थकस्य वाकृतिर्न पदार्थः' इति । आकृतिपदार्थवादिनो द्रव्यं नाम यः पदार्थो न स नास्ति । अपि तु विद्यमान एवेति

भिन्नद्रव्यसम्बद्धाया जातेराश्रयगतो वचनभेदोऽविरुद्धः ।। 334 ।।

अतोऽनन्तरं भाष्यम्--`कस्याचित्तु किञ्चित् प्रधानभूतम्, किञ्चिद् गुणभूतम्' इत्यादि । तद् व्याचष्टे--

गुणभावोऽभिधेयत्वं प्रति द्रव्यस्य नाश्रितः ।

उपकारी गुणः शेषः पदार्थ इति कल्पना ।। 335 ।।

जातिपदार्थकस्य जातिः प्रधानं शब्दवाच्या, द्रव्यं तु गुणत्वेन शब्दवाच्यमिति न विवक्षितमत्र । अपि त्वनभिधीयमानस्यापि द्रव्यस्योपकारित्वाज्जातिं प्रति गुणमुच्यते ।

तथाहि--लोके यो यस्योपकारी, स तदर्थः शेषभूतो गुण इति कल्प्यते । तथाच द्रव्यं जातावेति तत्सम्बन्धेन

तद्गतवचनभेदप्रतिपत्तिरित्युक्तं भवति ।। 335 ।।

कथधमभिधेयत्वं प्रति गुणभावो द्रव्यस्यात्र भाष्ये स्पष्टो न व्याख्यायत इत्यत आह--

द्रव्ये न गुणभावोऽस्ति विना द्रव्याभिधायिताम् ।

आकृतौ वा प्रधानत्वमत एवं समर्थ्यते ।। 336 ।।

द्रव्याभिधायितां विनेति। अत्रासति द्रव्याभिधाने यस्माद् द्रव्ये गुणभावो नास्ति, जातेर्वा प्राधान्यम्, तस्मादेवमेतद् भाष्यं

व्याख्यायते--गुणत्वमुपकारित्वेन द्रव्यस्य नाभिधीयमानत्वेनेति । अभिधीयमानतायां हि द्रव्यस्याकृतिरवच्छेदिका स्यादिति तदेव प्रधानमभिधीयमानं स्यात् । आकृतिस्त्वच्छेदोपयोगिनी गुण एव स्यात्, न प्रधानम् ।

तथा च यथा राजपुरुष इत्यत्र राजार्थो न संख्याभेदं प्रधानगतमवलम्बते, तथा जातिरपि नावलम्बेत । सत्यपि तु गुणत्वे तदनुवृत्तौ वचनभेदापत्तेरेकशेषप्रत्याख्यानमयुक्तं स्यात् ।

यदा तु नाभिधीयते द्रव्यम्, तदानभिधीयमानमभिधीयमानाया जातेर्गुडशब्द इव (गुड इव)

माधुर्यादेर्भेदकमित्यात्माधारलिङ्गसंख्योपहारेणोपकारित्वाद् गुण इति युज्यते वक्तुम् ।। 336 ।।

केचिदभिधीयमानयोरपि जातिद्रव्ययोर्गुणप्रधानभावं समर्थयन्त इत्याह--

कैश्चिद् गुणप्रधानत्वं नामाख्यातवदिष्यते ।

न वृत्तिवत् परार्थस्य गुणभावस्तु वर्ण्यते ।। 337 ।।

पाचकः पचतीति यथाभिधीयमानयोरेव क्रियाकारकयोर्गुणप्रधानभावः, तथात्रापि । तथाहि--नामपदेन

क्रियाकारकसम्बन्धोपसर्जनः साधनाश्रयः प्राधान्येनाभिधीयते, धात्वर्थस्यात्र प्रत्ययार्थविशेषणत्वात् । तेन चात्र भूतेन भाविनापि च स विशेष्यत इति न क्रिया प्रधानम्, भाव्यावस्थायामेव तथात्वात् । अत एवात्र सम्बन्धे भावप्रत्ययः, तस्यैव प्रवृत्तिनिमित्तत्वात् ।

क्रिया त्वत्र गुणभूतापि भेदेनावसीयते । आख्यातपदेन तु साधनविशेषप्रतिलब्धानुग्रहा क्रिया प्राधान्येनोच्यते । भाव्यामानावस्था ह्यत्र क्रिया व्याप्रियमाणेन साधनेन विशेष्यते प्रत्ययार्थेनापि सता । कर्तृव्यापाररूपा हि भावना भाव्यरूपधात्वर्थनिष्ठेति प्रधानभूतव्यापारावेशेन कर्तुर्य एवावगमः, स एव परार्थस्यापि प्राधान्यावगमहेतुः । तदेवं गुणभूतमप्यत्र साधनं भेदेनावधार्यते । तथा च विशेषणैर्युज्यते देवदत्तः पचतीति ।

अत एव स्वसंख्यया क्रियामुपकरोति पचतः पचन्तीति ।

एवं जातिपदार्थकानां जातिः प्राधान्येन शब्दवाच्या । द्रव्यपदार्थकानां जातिरप्राधान्येन शब्दवाच्या । द्रव्यपदार्थकानां तु द्रव्यम्, विवक्षानियमेन हि युज्यते गुणप्रधानभावः । यथा तु राजपुरुषादौ वृत्तिपदे परार्थस्योपसर्जनपदार्थस्य गुणभावोऽप्रधानत्वम्, नैवं नामाख्यातयोः साध्यसाधनभावस्य कथ्यते ।

तथाहि--वृत्तावुपसर्जनार्थस्य प्रधानेन सम्भेदापत्तेर्विवेकाग्रहणात् स्वप्रयुक्तसंस्कारनिमित्तता नोपपद्यते । शाब्द एव हि गुणभावस्तस्य ।

तथा च ऋद्धादि विशेषणं न युज्यते । पाचकः पचतीति तूभयत्रापि साध्यसाधनभावावच्छेदेनोभयमपि क्रियाकारकरूपं प्रतीयत एव । केवलं सामर्थ्याद् गुणप्रधानभावः प्रतीयते यथायोगम् ।

तथाहि भूतं भव्यायेति परिनिष्ठितरूपं साधनं परार्थम्, परिनिष्ठितत्वादेवान्यस्योपकारायोपादीयमानत्वात् । यदुद्धिश्य च तत्प्रवृत्तिस्तत् साध्यं प्रधानमाख्यातपदे । नामपदे तु कारकशक्तिः प्रवृत्तिनिमित्तमिति तदाधारः प्राधान्येनाभिधीयते । एवमिह दर्शनभेदेऽपि द्वयोरपि शब्दार्थत्वेन यदाकृतेराधारप्रकल्पितातिशयसम्पादनाय द्रव्योपादानम्, तदाकृतिः प्रधानं विशेष्यत्वेनोपक्रमात् । यदा तु व्यक्तिविशेषावच्छेदपरमाकृत्युपादानम्, तदा विपर्ययः ।। 337 ।।

यद्येवमाकृतिपक्षेऽपि द्रव्यस्याभिधीयमानत्वात् तद्गतवचनभेदवच्छब्दभेदप्रसङ्ग इत्यारब्धव्योऽत्राप्येकशेष इत्याशङ्कयाह--

गुणभूतस्य नानात्वादाकृतेरेकशब्दता ।
सिद्धो वचनभेदश्च द्रव्यभेदसमन्वयात् ।। 338 ।।

आकृतिपदार्थकानां द्रव्यं गुणभूतं भिन्नमिति न गुणभूतशब्दार्थभेदापेक्षमनेकशब्दत्वम् । अपि तु प्रधानभूतशब्दार्थाभेदापेक्षमेकशब्दत्वमेव न्याय्यमिति नार्थ एकशेषेण । वचनभेदस्तत्र सुतरां सिद्धोऽभिधेयेन द्रव्येण भिन्नेन योगात् ।

अयमभिप्रायः--भेदाभेदयोर्गुणप्रधानभूतयोर्विरोधात् प्रधाने युक्तमेवैकशब्दत्वम् । नहि प्रधानमनादृत्य गुणविधानं युक्तम् । स्वनिमित्तं तु संस्कारं प्रधानानुग्रहाय गुणो वचनभेदलक्षणं प्रधानानुपरोधिनं प्रापयतु, कोऽत्र विरोधः ।। 338 ।।

तथाहि--

साधनं गुणभावेन क्रियाया भेदकं यथा ।
आख्यातेष्वेकशब्दाया जातेर्द्रव्यं तथोच्यते ।। 339 ।।

क्रियाप्राधान्येऽप्याख्यातस्य यथा गुणभूतसाधनाश्रयो वचनभेदः पचतः पचन्तीति, तथैकशब्दवाच्यायाः प्रधानभूताया जातेस्तेनैव शब्देन द्रव्यस्याभिधाने सन्निहितोऽभिधीयमानो गुणोऽसावात्माधारं संख्याभेदं तत्र कल्पयति । येन हि गुणधर्मेण प्रधानस्योपरोधो न भवति, तं प्रधानोपकारायोपस्थापयत्येव गुणः ।

अन्यथा गुणत्वमेवास्य हीयते । यत उपकारप्रभावितत्वात् तस्य । इत्थं च नामाख्यातवदिति निदर्शनं सुसदृशमुक्तम्, न वृत्तिवदिति । नहि राजपुरुषे राजार्थनिमित्तः कश्चिद् वचनभेदादिः संस्कारोऽत्यन्तमभेदापत्तेः प्रधानार्थनोपसर्जनार्थस्य । अत्र च साधनं क्रियायां न भिन्नां संख्यामुपहरति । अपि त्वविद्यमानभेदापि स्वतः क्रियाश्रयगतवचनभेदापेक्षया पचतः पचन्तीति तिङन्तेनाभिधीयत इत्युच्यते । तथा च गुणभूतसाधनभेदादेव निर्ज्ञातभेदत्वान्न तिङ्न्तान्येकशेषारम्भं प्रयोजयन्तीति

भाष्येऽभिहितम् ।। 339 ।।

तदेवं जातिविशिष्टस्य द्रव्यस्याभिधानेऽपि प्रधान्याज्जातिपदार्थाभ्युपगमेलिङ्गवचनसिद्धिरूपपादिता लिङ्गवचनासिद्धिर्गुणस्यानित्यत्वादिति । गुणोऽत्र द्रव्यं विवक्षितम् । यदा तु जातिमात्राभिधानमेव, तदा गुणवचनवदाश्रयतो लिङ्गवचनानि व्याख्यातुमाह--

एकत्वे तुल्यरूत्वाच्छब्दानां प्रतिपादने ।
निमित्तात् तद्वतोऽर्थस्य विशिष्टग्रहणे सति ।। 340 ।।
सोऽयमित्यभिसम्बन्धादाश्रयैराकृतेः सह ।
प्रवृत्तौ भिन्नशब्दायां लिङ्गसंख्ये प्रसिध्यतः ।। 341 ।।

आधारैः सह जातेरभेदे सति शब्दैः प्रत्यायने क्रियमाणे ये जातिविशिष्टद्रव्याभिधायिनः, ये च जातिमात्राभिधायिनः शब्दास्ते तुल्यरूपत्वादभेदेनाध्यावसीयन्ते ।

तथाहि, स्वार्थप्रतिपादने जातिशब्दैर्जातिलक्षणं निमित्तं तद्वति द्रव्येऽध्यारोपितमाश्रित्य जातिविशिष्टस्य द्रव्यस्यभेदेन प्रत्यायनमिति तैराश्रयभूतैर्द्रव्यैः सह जातेः सोऽयमित्यभेदप्राप्तौ निमित्तानुविधानेन निमित्तिनोऽप्यभिधानात् तद्गतलिङ्गसंख्योपादानं शुक्लदिवदविरुद्धं भिन्नशब्दायामपि प्रवृत्तौ । यदा हि जातितद्वन्तौ द्वावप्येकशब्दवाच्यौ, तदैकशब्दा प्रवृत्तिर्व्याख्याता ।

इह तु जातिमात्रस्य शब्देन प्रतिपादने भिन्नशब्दा प्रवृत्तिः । अत्रापि च निमित्तसरूपप्रत्ययोपजनाद् यथाप्रत्ययं च शब्देनाभिधानान्निमित्तसंक्रान्तैव शब्दप्रवृत्तिः ।

तथा ह्यस्य गौरिति व्यतिरेको न दृष्ट इत्यभेदोपचारादाश्रयलिङ्गवचनसिद्धिः ।एवञ्च फलतः पक्षयोरभेदः । पूर्वत्र तु गुणप्रधानभावेन द्वयोरभिधानम्, इह त्वभेदोपचारादित्येतावान् विशेषः ।। 340, 341 ।।

यद्वा पूर्वत्रानभिधीयमानमपि द्रव्यमुपकारकं विवक्षितम् । तथा च चोदितम् --`ननु चानभिधेयत्व' इत्यादि ।

जातिलक्षमनिमित्तानुविधानमन्तरेण च न व्यक्तयो यथास्वं विशेषेण व्यवहारमवतरन्तीत्याह--

प्राक् च जात्यभिसंबन्धात् सर्वनामाभिधेयता ।
वस्तूपलक्षणाः सत्त्वे प्रयुज्यन्ते त्यदादयः ।। 342 ।।

यावज्जातिरूपमाधारे न प्रत्यस्यते, तावद्व्यक्तीनां रूपानवसायादनिरूपणमेव विशेषणम् । आरूपिका हि जातिराधारं निरूपयन्ती व्यवहारयति यथास्वं विशेषशब्दैर्विशिष्टजातिरूपणाभावे तु विशेषशब्दानामगोचरः पदार्थ इति सत्त्वे द्रव्ये सिद्धस्वाभावे वस्तुमात्रोपलक्षणाः सर्वनामशब्दास्त्यदादयः प्रयुज्यन्ते । ते हि वस्तु किञ्चिदिति सामान्यमात्रतया पदार्थमवगमयन्ति ।

तस्माद् विशेप्रत्यायनाय जातिरूपाध्यासेन निमित्तरूपतां प्राप्ताः पदार्था यथायथं जातिशब्दैरभिधीयन्ते गवादिभिरित्याभेदोपचाराज्जातिशब्दानां द्रव्याभिधानं न गौणम्, अपि तु मुख्यमेवेत्याश्रयलिङ्गवचनसिद्धिरुक्ता ।। 342 ।।

अत्रैव मतान्तरमाह--

पाकौ पाका इति यथा मेदकः कैश्चिदाश्रयः ।
इष्यते चानुपादानो धर्मोऽसौ गुणवाचिनाम् ।। 343 ।।

पाकशब्दः क्रियाधर्मवचनो नोपादत्ते तदाश्रयम् । अनुपादानोऽपि चात्र क्रियाश्रयो भेदकः । तथाहि द्विवचनबहुवचने भवतः कर्मस्थावात् पचिक्रियायास्तद्भेदे पाकभेदाभिधानमत्र ।

एवं गुणवाचिनां शब्दानां सोऽयमिति सम्बन्धाश्रयानुपादानेऽप्यनुपादानोऽसावाश्रयो भेदक इति जातिशब्दानां गुणवचनत्वादनुपात्तद्रव्याणामपि वचनभेदः सेत्स्यतीतिकैश्चिदभ्युपगम्यते ।

एतत्तु न युक्तम् । पाकौ पाका इति सोऽयमित्यभिसम्बन्धेनाश्रयोपादानस्यादृष्टेः युक्तं यदाश्रयभेदेन पाकभेदाद् भिन्नशब्दभिधेयत्वे स्वत एव वचनभेदः । न ह्ययमाश्रयगतः । आश्रयभेदेनाश्रितस्य भेदादश्रितभेदोऽनुयाय्येव ।

तथा च गुडतिलतण्डुलौदानानां पाक इत्याश्रयभेदावगमादेवाश्रितभेदप्रतीतेर्न बहुवचनम् । शुक्लादिशब्दानां तु सोऽयमिति सम्बन्धेन दृष्टमाश्रयोपादानम् । त एव च जातिशब्दानां भाष्ये निदर्शनत्वेनोपन्यस्ता `गुणवचनवद्' इति ।

तथाहि--जातिशब्दा अप्याश्रयमभेदोपचारादुपाददत एव । आश्रितमात्रश्च गुणो विवक्षित इति जातिरपि तथा प्रसिद्धवस्तु । गुणवचनत्वेन शुक्लादिरित्युपमानम् ।

न चाधारभेदेऽपि जातिभेदः पाकादिवदित्यभिन्नशब्दत्वे प्रत्याख्याते एकशेषेऽभेदोपचारेण तद्वृत्तिवृत्ते लिङ्गवचनसिद्धिरत्र विवक्षिता, न त्वाश्रयानुपादानेन ।। 343 ।।

तथाहि--

आश्रयस्यानुपादाने केवलं लभते यदि ।

आधारधर्मान् सामान्यं पुरस्तात् तद्विचारितम् ।। 344 ।।

अनुपात्ताधारं शुद्धमेव जातिशब्देन सामान्यमभिहितमित्याधारगताल्लिङ्गसंख्यालक्षणान् धर्मान् प्रतिपद्यत इति नेदं गुणवचनवदित्यत्र परिहारे व्याख्यातु युज्यते । एतद्धि पूर्वत्र परिहारे `लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात्' इत्यत्र पक्षान्तरं व्याख्यातम् ।

तथाहि--तत्र `ननु चानभिधेयत्वे' इत्यादिना चोदयित्वा `व्यपदेशोऽभिधेयेन न शास्त्रे कश्चिदाश्रित' इति परिहृतम् । द्वितीयश्चापि पक्षोऽत्र व्याख्यातः `कैश्चिद् गुणप्रधानत्वमि' त्यादिना द्वयोरप्यभिधीयमानत्वलक्षणो गुणप्रधानभावेन । अस्मिंस्तु परिहारे जातेरेवाभिधीयता । अभेदोपचारात्तु तदाश्रयोपादाने तद्धर्मसिद्धिः ।। 344 ।।

तत्र कथमभेदोपचार इत्युक्तं भाष्ये--`सामान्ये वृत्तस्या वृत्तिरूपजायते' इति । तदुपपादयितुमाह--

जातौ पूर्वं प्रवृत्तानां शब्दानां जातिवाचिनाम् ।

अशब्दवाच्यात् सम्बन्धाद् व्यक्तिरप्युपजायते ।। 345 ।।

निमित्तपुरस्सरा निमित्तिनो वृत्तिरिति पूर्वं निमित्तभूतायां जातौ शब्दप्रवृत्तिः ।

सा च जातिर्निराश्रया न सम्भवतीति शब्देनाभिधायकेनाविषयीकृतादपि तद्वत्सम्बन्धलक्षणात् सामर्थ्याद् व्यक्तिस्तद्वान् प्रत्ययपथमुपारोहति । तथा चाह--`अधिकरगतिः साहचर्यात्' इति ।। 345 ।।

प्रत्ययानुसारेण च शब्दाः प्रवर्तन्त इति क्रमोऽप्यत्रोपपन्न इत्याह--

सोऽयमित्यभिसम्बन्धाज्जातिधर्मोपचर्यते ।

द्रव्यं तदाश्रयो भेदो जातेश्चाभ्युपगम्यते ।। 346 ।।

अभेदाध्यासाज्जातेरिव धर्मोऽस्येति द्रव्यं जातिशब्देनोच्यते । जात्यात्मकत्वापत्तेः । निमित्तरूपाच्छुरितस्य पदार्थस्यावगमात् तथैवाभिधानप्रवृत्तिरिति जातिलक्षणनिमित्तं व्यक्तावध्यस्य तदभेदेन शब्दस्तत्र वर्तते ।

तथा च द्रव्यास्यापि निमित्ताच्छुरितस्य निमित्तनिबन्धनेन शब्देनाभिधानमर्थतो जायत इति तदाश्रयः संख्याभेदो निमित्तेऽपि प्रतिज्ञायते, न हि जातिशब्देन द्रव्यं स्वेन रूपेणाभिधीयते, अपि तु निमित्तस्य तत्र सन्निधानान्निमित्तमभिदधता शब्देन सामर्थ्यान्निमित्त्युपादानम्, निमित्तिनो निमित्तस्य निष्कृष्टस्याभावात् । उपात्तनिमित्तिगतस्तु धर्मप्रतिलम्भः । विरम्य व्यापारायोगाच्च शब्दस्य नायमभिधायां क्रमः।

प्रतिपत्तारस्तु--तमेकमेव संसृष्टमर्थं स्वकल्पनाभिर्विभजन्त इति तदभिप्रायेण सामान्ये वृत्तेस्येति भाष्ये क्रम उक्तः ।। 346 ।।

एतदेव निदर्शनेन साधयति--

मञ्चशब्दो यथाऽऽधेयं मञ्चेष्वेव व्यवस्थितः ।

तत्त्वेनाह तथा जातिशब्दो द्रव्येषु वर्तते ।। 347 ।।

मञ्चाः क्रोशन्तीति क्रियासम्बन्धस्याधेये मञ्चस्थे प्राणिन्युपपत्तेराधाररूपाभेदेनाधारवचनोऽपि मञ्चशब्दस्तदाधेयवचन इति निश्चीयते । एवमानीयन्तां गाव इति क्रियासम्बन्धस्य जातावनुपपत्तेस्तदभेदापन्ना व्यक्तयः क्रियासमन्वयसमर्था जातिनिबन्धनेन

शब्देनोपादीयन्त इत्यवगमः ।। 347 ।।

यद्येवं कथं जातिरेव पदार्थ इत्यत आह--

तत्र जातिपदार्थत्वं तथैवाभ्युपगम्यते ।

जातिरुत्सङ्ख्या तु द्रव्यात्मन्यनुषज्यते ।। 348 ।।

यथाधेयाभिधानेऽपि मञ्चशब्दस्तदाधारवचन इत्युच्यते, तथैव सत्यप्याश्रयद्रव्योपादाने जातिशब्दो जातिपदार्थ एव व्यवस्थाप्यते । द्रव्यमपि हि नासौ स्वरूपेणाचष्टे, अपि तु जातिरूपाध्यासेनेत्युपचरितं जातिरूपसमावेशाद् द्रव्याभिधानं वाहीकाभिधानवत् । मुख्यं तु जात्यभिधानमेव । निरूढत्वाच्च नोपचारप्रतीतिः ।

यद्येवं निमित्ताभिधानं मञ्चादिवदेव स्यात् । तथा चैकजात्याच्छुरिता व्यक्तयः सर्वा ऐक्येनाभिधीयेरन्निति वचनभेदो न स्यादित्याशङ्क्योक्तं--जातिरुत्सृष्टसङ्ख्येत्यादि ।

जातेः स्वतः सङ्ख्यारहितत्वान्निरस्तसङ्ख्यास्वरूपेण केवलमसौ द्रव्येऽध्यस्यत इति न तदाश्रया काचिदत्र सङ्ख्या प्राप्नोति । नापि लिङ्गमलिङ्गत्वात् तस्या इत्याधारगतलिङ्गसङ्ख्योपग्रह एव न्याय्यः ।। 348 ।।

तदेवमुपपन्नो जातिशब्दानां लिङ्गवचनयोगः, शुक्लादिशब्दवत् । तत्र शुक्लादिशब्दानां मतुब्लोपादभेदोपचाराद् वा तद्वति वृत्तिः । जातिशब्दानां तु व्यतिरेकस्य कदाचिदप्यदर्शनान्मतुब्लोपेन नार्थोऽभेदोपचाराद् वा तद्वति वृत्तिः । जातिशब्दानां तु व्यतिरेकस्य कदाचिदप्यदर्शनान्मतुब्लोपेन नार्थोऽभेदोपचारादेव तद्वति वृत्तिः । तथापि च तद्वदभिधानमात्रं समानमाश्रित्य उपायभेदानादरेण शुक्लादीनां दृष्टान्ततोपपत्तिरत्रेत्याह--

अस्येदमिति वा यत्र सोऽयमित्यपि वा श्रुतिः ।

वर्तते परधर्मेण तदन्यदभिधीयते ।। 349 ।।

मत्वर्थीयवशेनाभेदोपचारेण वा शब्दोऽन्यत्र वर्तताम् । निमित्तरूपाध्यासेन तु निमित्तिनोऽभिधानं तुल्यम् । इयता चेह प्रयोजनमित्यर्थः ।

इत्थञ्च यथा गुणशब्दत्वं द्रव्यवाच्यत्वेऽपि शुक्लादीनामुच्यते, तथागवादीनां जातिशब्दत्वेऽपि न कापि हानिः ।। 349 ।।

तथाहि--

यत् प्रधानं न तस्यास्ति स्वरूपमनिरूपणात् ।

गुणस्य चात्मना द्रव्यं तद्भावेनोपलक्ष्यते ।। 350 ।।

निरुपाधेरर्थस्य द्रव्यात्मनः क्रियासम्बन्धक्षमस्य शुद्धं रूपं व्यवहारे नास्ति शाब्दे वैकल्पिके वा निरूपणपूर्वको हि व्यवहारः । तच्च निरूपणमर्थस्योपाधिरूपाच्छुरणेनैव । ततश्च गुणस्य यथायथं शुक्लजात्यादेर्विशेषमस्यात्मना स्वरूपेण द्रव्यं व्यवहारे तद्भावं गुणात्मतामिवोपगतमुपलक्ष्यते । निमित्तसरूपतां प्राप्तं निमित्तीत्यर्थः ।। 350 ।।

एवमपि च जातिप्राधान्यं न त्रुट्यतीत्याह--

गुणस्य भेदकाले तु प्राधान्यमुपजायते ।

संसर्गश्रुतिरर्थेषु साक्षादेव न वर्तते ।। 351 ।।

यदा द्रव्यं प्राधान्येन विवक्षितं भवति, तदा जात्युपधीयमानं तदभिधीयते । यदा तु गुणस्यान्यस्माद् भेदेनाख्यानं प्रधानतया, तदा स्वसामान्यावेशेन तदभेदप्राप्तस्य तस्य प्रत्यायनम् । यदा तु जातिरेव प्राधान्येनाभिमता, तदा तस्याः शब्दस्वरूपाध्यासेनाभिधानम् ।

तथाहि--धर्मान्तसंसर्गोपहितविशेषं वस्तु शब्दाः शक्नुवन्त्यभिधातुं, न शुद्धम् । अत एव संसर्गनिमित्ता श्रुतिः शब्दः संसर्गश्रितिरित्युच्यते ।

सा च धर्मान्तरमुखेनार्थोषु निविशते, नोपधान्तयागेन साक्षान्निरूपाधेरनिरूपणान्निरूपणपूर्वकाणां शब्दानामविषयत्वात् ।। 351 ।।

एवं तावज्जातिपदार्थताप्रसङ्गाद् द्रव्यपदार्थतापि कथं भवतीत्याह । यदि वा सोऽयमिति सम्बन्धाद् द्रव्याभिधानेऽपि यदि जातिपदार्थता, कथं तर्हि द्रव्यपदार्थतेत्याह--

जातौ वृत्तो यदा द्रव्ये स शब्दो वर्तते पुनः ।
जातेरेव पदार्थत्वं न तदाभ्युपगम्यते ।। 352 ।।

जातौ वर्तित्वा तद्विशिष्टं यदा द्रव्यमप्याह, न जातावेवाभिधाविरामः शब्दस्य, तदा जातेरेव केवलाया न पदार्थत्वम् । अभेदोपचाराच्च सोऽयमिति सम्बन्धेन यथा समर्थितं न द्रव्योपादानमभ्युपगम्यते । अपि तु तद्वत्यक्षोऽयं पूर्वत्र परिहारेऽभिहित इत्यर्थः ।। 352 ।।

ननु च विरम्भ व्यापारानुपपत्तेः शब्दानां कथं जातौ वर्तित्वा स एव शब्दो द्रव्ये वर्तते । दर्शनभेदेन हि भिन्ना एव शब्दा जातिमात्रवचनास्तद्वचनाश्चेत्यत आह--

प्रवृत्तानां पुनर्वृत्तिरेकत्वेनोपवर्ण्यते ।
प्रतिपत्तेरुपायेषु न तत्त्वमनुगम्यते ।। 353 ।।

सादृश्यादभेदावसायेनैवमेकत्वेन व्यवहारः प्रतिपादनोपायः । संसृष्टार्थाभिधानं ह्यक्रममप्येवं कल्पनया क्रमेण प्रतिपाद्यते । न च परप्रतिपत्त्युपायानां परमार्थानुगमो न्याय्यो हेयत्वात् तेषाम् । तथा च तद्वदभिधाननयेऽक्रममेवोभयाभिधानम् ।। 353 ।।

अत्रापि चोभयाभिधाने प्राधान्याप्राधान्यविवक्षावशेन जातिपदार्थता द्रव्यपदार्थता च दर्शनभेदेन समुतिष्ठत इत्याह--

अपृथक्।छब्दवाच्यस्य जातिराश्रीयते यदा ।
द्रव्यस्य सति संस्पर्शे तदा जातिपदार्थता ।। 354 ।।

एकशब्दोरादानत्वेऽपि जातिद्रव्ययोर्यदा जातिराधारभेदप्रकल्पितभेदा कार्यप्रवृत्तौ प्राधान्येनाश्रीयते, ब्राह्मणाः शुश्रूषितव्याः, योऽयं पानीयं पिबति स गौः पदा न स्प्रष्टव्यः, गौरनुबन्ध्य इत्यादौ, तदा सत्यपि द्रव्यस्य शब्देन संस्पर्शे जातिपदार्थपक्ष एव, जातिभेदप्रतिपादनमात्रोपक्षयत्वाद् द्रव्यस्य ।। 354 ।।

द्रव्यस्य सति संस्पर्शे द्रव्यमाश्रीयते यदा ।
वाच्यं तेनैव शब्देन तदा द्रव्यपदार्थता ।। 355 ।।

जात्युपादायिनैव शब्देन द्रव्योपादाने सत्यपि तस्याभिधेयतयैव सम्बन्धे संस्पर्शे यदा द्रव्यं प्राधान्येन कार्यसम्बन्धितयाश्रीयते, जातिस्तद्विशेषणमात्रोपक्षया, ब्राह्मणमिमं भोजयेत्यादौ, द्रव्यपरायां चोदनायां, तदा द्रव्यपदार्थपक्षः । तदेतदुक्तं `कस्यचित् तु किञ्चित् प्रधानम्' इति ।। 355 ।।

जातिपरायामपि चोदनायां क्रियासम्बन्धक्षमत्वाद् द्रव्यमेव तात्पर्यदृशा पदार्थोऽवतिष्ठत इत्याह--

अपृथक्च्छब्दवाच्यापि भेदमात्रे प्रवर्तते ।
यदा सम्बन्धवज्जातिः सापि द्रव्यपदार्थता ।। 356 ।।

द्वयोरपि शब्दोपादानत्वे कार्यप्रतिपत्त्योग्यत्वादनादृत्य जातिं द्रव्यमेवपदार्थमातिष्ठन्ते व्यालिप्रभृतयः । यदाहुः--`चोदनासु च तस्यारम्भाद्' इति ।

जातिस्तु भेदमात्रे स्वाश्रयव्यवच्छेदमात्र एव तत्र प्रवर्तते शब्दाभिधेयापि । तद्यथा--राजपुरुष इत्यत्र समासवाच्योऽपि सम्बन्धः सम्बन्धिस्वरूपावच्छेदमात्रोपयोगीत्युत्तरपदार्थप्रधान एव समासः, न सम्बन्धप्रधानः ।

एवं गवादिशब्दा जात्यभिधायिनोऽपि तद्वत्प्रधानाः । यथा च राजपुरुषादयः शब्दाः सम्बन्धोपाधिमर्थं सकृदेवाभिधानम् । एवं दर्शनभेदेन पदार्थद्वयं विभक्तम् ।। 356 ।।

केषाञ्चित्तु शुद्धैव जाति शब्दवाच्येति जातिपदार्थपक्षे, शुद्धं च द्रव्यं शब्दवाच्यमिति द्रव्यपदार्थपक्ष इतीदमपरं पक्षद्वयमित्याह--

अत्यन्तभिन्नयोरेव जातिद्रव्याभिधायिनोः ।
अवाच्यस्योलपकारित्व आश्रिते तूभयार्थता ।। 357 ।।

केवलजात्यभिधायी शब्दोऽन्य एव । अन्यश्च केवलद्व्याभिधायी । उभयत्रापि चानभिधीयमाना जातिर्द्रव्यं वा यथायोगमाधारभेदप्रकल्पेन स्वगतलिङ्गसङ्ख्यादिधर्मप्रकल्पेन चोपकरोतीति भगवतः पाणिनेराचार्यस्यायं पक्षः सर्वपश्चान्निर्दिष्टः । तथा च विषयभेदेन क्वचिज्जातिपदार्थता मद्रह्रदादिसिद्ध्यर्थमाश्रिता ।

क्वचिद् द्रव्यपदार्थता दध्युकादिसिद्ध्यर्थमाश्रिता । अत एव "जात्याख्यायां" (पा. 1/2/58) "सरूपाणाम्"(1-2-64) इति च योगद्वमारब्धवानाचार्यः ।। 357 ।।

तदेवं प्रसङ्गाद् दर्शनभेदोपक्षेपः । प्रकृतमुपसंहरति--

आश्रिते त्वाश्रयकृतं भेदमभ्युपगच्छता ।

पुनश्चाप्येकशब्दत्वं जातिशब्देऽनुवर्णितम् ।। 358 ।।

व्यक्तिविशेषाश्रितायां जातौ शब्देनाभिधोयमानायां संनिहिताश्रयनिबन्धनं शब्दसंस्कारनिमित्तं लिङ्गवचनभेदमङ्गीकुर्वता प्रयोजकस्य शब्दार्थस्याभेदादेकशब्दत्वं जातिपदार्थवादेऽत्र पूर्वस्मिन् पक्षे भाष्यकारेण `यदि तस्यापि वचनानि नाचनिकान्य हमप्येवं वक्ष्ये बहुषु योऽर्थो वर्तते तत्र बहुवचनम्' इति ब्रुवता वर्णितमभिहितम्। तथा चैकशेषः प्रत्याख्यायते । प्राधान्येन जातिः शब्देनाभिधीयत इति सिद्ध एकस्तदभिधायी शब्दो व्यक्तिभेदेऽपि ।

ये तु सम्बन्धिनो जातेस्ते भेदनिबन्धनं संस्कारं शब्दस्यैकस्य निर्वर्त्तयन्ति । द्वितीयस्मिन्नपि पक्षेऽत्र `गुणवचनवदाश्रयतो लिङ्गवचनानि' इति गुणभूतस्याभिधीयमानस्यापि द्रव्यस्य शब्दभेदप्रयोजकत्वाभावात् तदेवैकशब्दत्वमुपपादितम् । सम्बन्धिनो हि जातेः सामर्थ्याद् वा सन्निहिता निमित्तरूपाच्छुरिता वोपादीयन्त इति परिहारद्वयतात्पर्यं व्याख्यातम् ।। 358 ।।

तदेवं वृत्तिविचारप्रसङ्गातं गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनसिद्धिविचारं भाष्यप्रदेशानुवादेन यथायथं परिसमाप्योपमानसमासविचारायोपक्रमते । तत्र प्रथमं तावदुपमानलक्षणोपयोगि भाष्यम्--`मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते । अनिर्ज्ञातमर्थं ज्ञास्यामि' इति । एतद् व्याचष्टे--

अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते ।

प्रस्थादि तेन मेयात्मा साकल्येनावधार्यते ।। 359 ।।

मीयते परिच्छिद्यते येन तन्मानमिति सामान्येनावधारितस्य पदार्थस्य निश्चयेन विशेषरूपेणावधारणनिबन्धनं साकल्येन परिच्छेदकं प्रस्थः खारी आढकमित्यादि मानं कथ्यते । एतच्च मानसामान्यलक्षणमिति । प्रस्थादीत्यादिग्रहणात् प्रमाणोन्मानादयोऽपि गृह्यन्ते । मानस्य ह्युत्प्रपरिभिर्विशेषणम् । तत्र प्रस्थादि परिमाणम्, दिष्ट्यादि प्रमाणम्, पलाद्युन्मानम् ।। 359 ।।

मानसमीपमुपमानं व्याख्यातुमाह--

अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते ।

साकल्येनापरिज्ञानादुपमानं तदुच्यते ।। 360 ।।

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् । तथा ह्यप्रसिद्धमनिर्ज्ञातं गवयादि प्रसिद्धेन गवा सादृश्यस्तद्धर्म तस्येव धर्मो यस्य तदिवेति परिच्छिद्यते । सादृश्यमात्रेण परिच्छेदो नारोहपरिणाहतः साकल्येन विशेषात्मनापि । अत एव सादृश्यं प्रत्यक्षेण स्फुटमत्रावधार्यत इति तदपेक्षोपमानस्येति नेदं मानम्, अपितु तस्य समीपम्, किञ्चिद्रूपतया परिच्छेदात् । अत एवोपमानस्य प्रामाण्येऽपि विवदन्ते किल ।

प्रत्यायितार्थकं वाक्यमेव प्रमाणम् । सादृश्यकथनं तूपाय इति । उपमीयतेऽनेनेति च करणव्युत्पत्त्या सदृशज्ञानमुपमानम् । साक्षात् तेनोपमेयपरिच्छेदात् । संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः फलं केषाञ्चित् ।

अन्येषामनेन सदृशी मदीया गौरिति फलम् । गवादिस्तूपमानं परम्परयोपयोगाद् व्यवह्रियते, चक्षुरादीव प्रमाणशब्देन ।। 360 ।।

एवमुपमाने व्याख्याते सामर्थ्यादुपमेयमपि व्याख्यातं भवति, उपमितिक्रियाया उपमेयविषयत्वात् । ततश्च

सामान्यधर्मव्याख्यानोपक्रमं सूत्रार्थं व्याचष्टे--

द्वयोः समानो यो धर्म उरमानोपमेययोः ।

समास उपमानानां शब्दैस्तदभिधायिभिः ।। 361 ।।

येन निमित्तेनोपमानोपमेयभावोऽर्थयोरसाववश्यसन्निधिरत्र धर्मः सादृश्यं सामान्यमुच्यते । द्विवृत्तित्वात् सामान्यं ब्रुवन्ति सामान्यवचनाः । तैः शब्दैरूपमानवचनानां समास इति सूत्रार्थः । शस्त्रीश्यामा । शरकाण्डगौरिति ।। 361 ।।

ननु चात्र श्यामत्वादिगुणः प्रत्याश्रयसमवेतत्वाद् भिन्न एवेति कथं सामान्यमित्याशङ्क्याह--

आधारभेदाद् भेदो यः श्यामत्वे सोऽविवक्षितः ।

गुणोऽसावाश्रितैकत्वो भिन्नाधारः प्रतीयते ।। 362 ।।

आश्रयभेदाच्छ्यामत्वागुणस्य यो भेदः, सोऽत्र सामान्यवचनैरिति वदतो नाभिधित्सितः । आश्रयविशेषसमवेतोऽप्यपेक्षितमेकत्वं येन स तथाभूतः सामान्यवचनसामर्थ्यादेवावगम्यते गुणः । भिन्नाश्रयत्वेऽपि हि गुणस्यान्वयि रूपमस्त्येव । यद्वशाच्छ्याम इत्यभिन्नाभिधानप्रत्ययसम्भवः । न चात्राभेद एव विवक्षितः ।। 362 ।।

अपि तु--

गुणयोर्नियतो भेदः गुणजातेस्तथैकता ।

एकत्वेऽत्यन्तभेदे वा नोरमानस्य सम्भवः ।। 363 ।।

अत्यन्तैकत्वे भेदाधिष्ठानस्य सादृश्यस्याभावान्नोपमानोपमेयभावः । न हि भवति गौरिव गौरिति । नात्यन्तभेदेऽन्वयिनो रूपस्याभावे हिमवानिव लोष्ट इत्युपमास्ति । तस्माद् भेदाभेदविमर्शेनोपमायामाधारभेदाद् भेदं स्वालक्षण्येनान्वयिरूपवशेन चाभेदमाश्रित्य गुणोऽत्र सव्यापारः ।

एवंविध एव चार्थात्मा शब्दवाच्यः । न हि शब्दाः स्वालक्षण्येन भेदमर्थानामावेदयन्ते । सामान्य एव सम्बन्धग्रहणात् ।। 363 ।।

मा भूदत्यन्तभेदे उपमा । अभेदे तु कथं न भवति । गुणो ह्येको द्वयोरुपमानोपमेयभावं वर्तयत्येवेत्याशङ्क्याह--

जातिमात्रव्यपेक्षायामुपमार्थो न कश्चन ।

श्यामत्वमेकं गुणयोरुभयोरपि वर्तते ।। 364 ।।

अनाश्रिताधारभेदस्य श्यामतामात्रस्य विवक्षायां शस्त्रीदेवदत्तयोः श्यामगुणसमवेतमेकं श्यामत्वं सामान्यमित्येव वचनव्यक्तिः । तथा च सादृश्येन परिच्छेदाभावः ।। 364 ।।

तथाहि--

येनैव हेतुना श्यामा शस्त्री तत्र प्रवर्तते(प्रतीयते) ।

स हेतुर्देवदत्तायाः प्रत्यये न विशिष्यते ।। 365 ।।

येनैव अभिन्नसामान्यानुगतेन श्यामगुणेन समवेतेन शस्त्री श्यामेति समधिगम्यते । तेनैव चाभिन्नसामान्याधारेण गुणेन देवदत्तापि श्यामेति प्रत्ययमुपारोहतीत्युभयोः श्यामत्वमेकमित्येव प्रतीतिर्नोपमार्थः कश्चिदत्र ।। 365 ।।

तस्मात्,

आश्रयाद् यो गुणे भेदो जातेर्या चाविशिष्टता ।

ताभ्यामुभाभ्यां द्रव्यात्मा सव्यापारः प्रतीयते ।। 366 ।।

आधारभेदनिमित्तो यो गुणे विवेकोऽन्वायिरूपहेतुकश्चाविवेकस्ताभ्यां गणगताभ्यां भेदाभेदाभ्यां कारणभूताभ्यां द्रव्यस्वभाव उपमानाख्यः परिच्छेदकरणे उपमेयस्य व्यापृतोऽवधार्यते । ततश्चोपमानोपमेयप्रक्लृप्तौ तयोरुपमानोपमेयलक्षणः सम्बन्धोऽवतिष्ठते ।। 366 ।।

ननु भेदाभेदौ विरुद्धौ कथमेकत्र व्यापृतौ स्यातामित्याशङ्क्याह--

सोऽयमेकत्वनानात्वे व्यवहारः समाश्रितः ।
भेदाभेदविमर्शेन व्यतिकीर्णेन वर्तते ।। 367 ।।
सोऽयमित्यनुभवसिद्धत्वेनाप्रत्याख्येयत्वमाह किल । भेदाभेदावयमाश्रितः सादृश्यव्यवहारः सङ्कीर्णेनैकत्वनानात्वरूपेण हेतुनावतिष्ठमानो बुद्धावुपारोहतीति को विशेषः । तथाह्यत्यन्ताभेदे स एवायमिति बुद्धिः । अत्यन्तभेदे त्वन्यदेवेदमिति । सदृश इति तु बुद्धिर्भेदाभेदोभयरूपसम्भिन्ना जायते । तथा च जातिसमुद्देशेऽभिहितम्--
"सकृतत्प्रवृत्तावेकत्वामावृत्तौ सदृशात्मताम् ।
भिन्नात्मिकानां व्यक्तीनां भेदापोहात् प्रपद्यते ।।"इति ।। 367 ।।
एतदेव व्यतिरेकमुखेनोपपादयति--
श्यामेत्येवाभिधीयते जातिमात्रे विवक्षिते ।
शस्त्र्यादीनामुपादाने तत्र नास्ति प्रयोजनम् ।। 368 ।।
श्यामत्वसामान्यनुगतस्य गुणमात्रस्याधारविशेषणत्वेऽभिधित्सिते श्यामेयं देवदत्तेत्येव वक्तव्यं स्याद्, एतावताविशिष्टजातीयेन सम्बन्धस्य प्रतिपादनात् । तत्रकिमर्थं शस्त्रीवेत्युच्यते । अविशिष्टगुणयोगस्य गुमपदादेव प्रतीतेर्न कञ्चनातिशयमुपमानशब्दाः प्रत्याययन्तीति निष्प्रयोजनमेषामुपादानम् ।। 368 ।।
नन्वेवं भेदाभेदविमर्शेनोपमानोपमेयभावेऽतिप्रसङ्गः । तथाहि--श्यामगुणः सकलाश्रयवर्त्यप्याधारभेदाद् भिन्नो जात्येकत्वाच्चैक इति कथं शस्त्र्येवोपमानमित्याशङ्क्य स्वालक्षण्येन गुणयोरुपमाविषययोस्तावद् विशेषमाह--
अशब्दवाच्यो यो भेदः श्याममात्रे न वर्तते ।
श्यामेषु केषुचिद् वृत्तिर्यस्यसोऽत्र व्यपेक्ष्यते ।। 369 ।।
प्रत्याधारं सूक्ष्माणां भेदानामसाधरणः=भेदानामाधारः स्ववाचकासम्भवादसंविज्ञानपदः श्यामगुणविशेषो वाचकाभावेऽपि वाच्यानपायादस्ति स सर्वस्मिन्ननन्वयी क्वचिदेव वर्तमानोऽस्मिन्नुपमानोपमेयसम्बन्धे व्यपेक्ष्यते-सव्यापारत्वेनाश्रीयते । तथाहि शस्त्रीश्यामेति वृत्तिपदादेवोपमानोपमेययोः श्यामगुणो विलक्षणः प्रतीयते । योऽन्यत्रासम्भवीति नातिप्रसङ्गः । इत्थं चाधारभेदादन्योऽपि कयाचित् स्वरूपप्रतिपत्त्यानवसितविवेकत्वाद् गुण एन सामान्यं भेदाभेदरूपाभ्यामौपम्यमवस्थापयतीत्युक्तं भवतीति ।। 369 ।।
गुणजातेरपि न सर्वस्या अत्र व्यापार इत्याह--
श्यामेषु केषुचित् किञ्चित् किञ्चित् सर्वत्र वर्तते ।
सामान्यं कश्चिदेकस्मिन् श्यामे भेदो व्यवस्थितः ।। 370 ।।
किञ्चिदपरसामान्यं केषुचिच्छ्यामगुणेषु वर्तते तदुपमायां सव्यापारम् ।
किञ्चित् तु सर्वत्र वर्तते महासामान्यम् । तदविशेषादुपमानिमित्तं न भवति । कश्चित् तु श्यामे गुणे प्रतिनियते भेदो विशेषो वर्तते । सोऽप्यतिशयप्रख्यापनायोपमाननिमित्तं भवत्येव । तद्यथा--चन्द्रमसः कान्तिविशेषः कन्यावदनस्योपमानिमित्तमतिशयाध्यारोपात् । उत्कृष्टगुणेन हि न्यूनगुणस्योपमानादुत्कर्षसमारोपात् प्रशंसाजायते । पूर्वं तु निरतिशयो भेदो नोपमानाङ्गमित्युक्तम् ।। 370 ।।
गुणसामान्यव्यतिरेकेणापरा जातिरत्र नावधार्यत इत्याशङ्क्या तामुपपादयितुमाह--
तथाहि सति सौरभ्ये भेदो जात्युत्पलादिषु ।
गन्धानां सति भेदे तु सादृश्यमुपलभ्यते ।। 371 ।।
जात्युत्पलादिगन्धानां गन्धत्वमहासामान्यव्यतिरेकेण सौरभ्ये शोभनामोदत्वलक्षणेऽपरसामान्ये सति भेदोऽवधार्यते । येषां सौरभ्यं नास्ति, ततो व्यतिरेको लक्ष्यते ।
तथाह्युत्पलगन्धमाघ्राया सन्तमसेऽपि प्रत्यभिजानात्युत्पलमिदमिति । एवं ज्ञातिगन्धाद्यपि । ततश्च

सुरभित्वमपरसामान्यमाधारविशेषनियतमस्तीति निश्चयो यत्सम्बन्धात् सुरभीणि सुगन्धीनीमानि द्रव्याणीति निरूपणा । सत्यपि चैवं सौरभ्येण गन्धानां विशेषे केषाञ्चित् सादृश्यमप्यस्ति ।

तथाहि--गन्धयुक्तद्रव्यैर्नखशैलेयादिभिर्गन्धद्रव्ययुक्तैर्न शैलेयादिभिरवान्तरभेदभिन्नसुरभिगन्धैरपि कयाचित् स्वभावप्रत्यासत्त्या पद्मादिसुरभिसदृशगन्धं द्रव्यान्तरं निर्वर्त्यते, पद्मगन्धि किञ्जल्कगन्धि मालतीगन्धि इत्यादि । एवं गन्धवद्रूपस्याप्यवान्तरजातिभेदो न्याय्य इति श्यामेषु केषुचित् वर्तमानं सिद्धं प्रतिनियतगुणवृत्त्यपरसामान्यमिति ।। 371 ।।

गुणानां प्रतिनियमः किंकृत इत्याह--

गुणानामाश्रयाद् भेदः स्वतो वार्यनुगम्यते ।
अनिर्देश्याद् विशेषाद् वा सङ्करादवा गुणान्तरैः ।। 372 ।।

स्वकारणादासादितभेदाद् द्रव्यलक्षणादाधारात् कश्चिद् गुणानां विशेषः । तद्यथा--उत्पलमालादिगतस्य श्यामत्वस्य । तथा चात्र स्वभावसाम्यादुपमाप्रवृत्तिः--

"रोलम्बगरलव्यालतमालश्यामलं नभः ।
नभोनिर्मलनिस्त्रिंशव्यग्रपाणय आहवे ।।" इति ।

एकजातीयाधारसमवायेऽपि कश्चित् स्वरूपादेचिन्त्यैवभवाद् गुणानां विशिष्टानामेवोत्पत्तेर्विशेषोऽद्यक्ष्यत एव धूसरत्वादिः । कश्चित् पुनरसंविज्ञानपदः कारणमात्रादनुत्पन्नः कालपरिवासहेतुको विशेषो गुणानाम् । तद्यथा--सुरादीनां परिणामविशेषासादनेन रसगन्धवैचित्र्योत्पत्तिः ।

तथाहि तत्र सामग्रया खण्डशः कार्यानुत्पादात् सामग्रयन्तर्गतात् कारणादयमतिशय इति निर्देष्टुं न शक्यते । द्रव्यान्तरगतगुणसम्मिश्रणाद् वा विशेषो गुणानाम् ।

तद्यथा--सहकारगन्धाधिवासस्यासवस्य मालतीकुसुमाधिवासितस्य च तैलस्य । तदेवमुपात्तभेदानां गुणानां कयाचित् प्रत्यासत्त्या केषाञ्चिदपरसामान्यसद्भावे सामान्यवचनेनोरमानवचनस्य समाससिद्धिः ।। 372 ।।

न च नियोगतो गुणानां साम्यमेवेपमाहेतुः । अपितूत्कृष्टगुणमुपमानामित्याह--

उपमानं प्रसिद्धत्वात् सर्वत्र व्यतिरिच्यते ।
उपमेयत्वमाधिक्ये साम्ये वा न निवर्तते ।। 373 ।।

व्यतिरेकोऽत्राधिक्यं विवक्षितम्, तेनादिकगुणमुपमानमित्यर्थः । तच्चाधिक्यं वास्तवेन रूपेण भवतु मा वा भूत् । किन्तु प्रसिद्धत्वात् प्रतीतत्वाद् ज्ञापकत्वेनोपमेयं प्रत्याश्रीयमाणं प्रसिद्धमेव न्याय्यमिति तद्गुणस्योत्कर्षः प्रसिद्धतैव।

तथा च न्यूनगुणमपि श्रृङ्गाररसपरिपोषणपरतया नारीमुखं शशिबिम्बस्योपमानत्वेन निर्दिशन्ति । कामिनां हि प्रेयसीमुखमुत्कृष्टगुणत्वेन प्रसिद्धम् । यथा--

"ईर्ष्यावशेन कलुषत्वमुपागतस्य
दूरान्मुखस्य तव सुन्दरी ! साम्यमेत्य ।
चेतःप्रहर्षभरपूरितपूर्णदेहः
स्वाङ्गेष्वपि प्रसभमद्य न माति चन्द्रः ।। "

इत्थञ्च कृत्वा परिपूर्णगुणेन न्यूनगुणमुपमीयत इति यथाप्रसिद्धि परिपूर्णगुणता व्याख्येया । अत एवाह--सर्वत्रेति । न केवलं वस्तुतो यत्रोत्कृष्टो गुणस्तदुपमानं यावन्न्यूनगुणमपि स्वप्रसिद्ध्याश्रयेणोपमानं व्यतिरिच्यते गुणाधिक्येन व्यवतिष्ठते ।

उपमेयभावस्तु गुणस्य वस्तुत आधिक्येऽतिरेके साम्ये तुल्यत्वे वा न निवर्तते नापैति । उपमानं नियोगतोऽधिकगुणमेव विवक्षितम् । उपमेये त्वनियम इत्यर्थः ।। 373।।

इदानीं प्रकारान्तरेणोपमानं लक्षयितु मानलक्षणभाष्यमन्यथा व्याचष्टे--

अन्यैस्तु मानं जात्यादि भेद्यस्यार्थस्य वर्ण्यते ।
अनिर्ज्ञातस्वरूपो हि ज्ञेयोऽर्थस्तेन मीयते ।। 374 ।।
भेद्यस्यावच्छेद्यस्य द्रव्यस्योपाधिविवक्तस्य प्रतीत्यनुपारोहात् प्रतीयते जातिगुणक्रियाः समाश्रीयमाणा मानव्यपदेशमासादयन्ति ।। 374 ।।
मितस्तु स्वेन मानेन प्रसिद्धो यो गुणाश्रयः ।
ऐश्रयान्तरमानाय स्वधर्मेण प्रवर्तते ।। 375 ।।
रूपान्तरेण संस्पर्शो रूपान्तरवतां सताम् ।
भिन्नेन यस्य भेद्यानामुपमानं तदुच्यते ।। 376 ।।
स्वेनात्मीयेन जात्यादिमानेन परिच्छिन्नो यो गुणविशेषाधारः प्रसिद्धः--प्रतीतः सोऽप्रतीतगुणान्तरप्रज्ञापनाय स्वसमवेतेनैव गुणेन यदा व्याप्रियते, तदा तेन रूपान्तरेण भिन्नेन रूपान्तरवता भिन्नानामरि भेद्यानां--परिच्छेद्यानां परिच्छेदकं तदुपमानमुच्यते । तत्र संस्पर्शः सम्बन्धोऽत्यन्तभिन्नानां नोपपद्यत इत्यर्थादन्वयिधर्माक्षेपः । ततश्च भेदाभेदविमर्शेनैतदप्युपमानम् । सादृश्यमात्रेण च परिच्छेदान्नात्यन्ताय मानमुपमानमिति लक्षणमवस्थापितम् । तत्र शस्त्रीदेवदत्तयोर्गुणः श्यामत्वमुपमानोपमेयभावनिबन्धनं शस्त्रीश्यामेति ।। 375, 376 ।।
यदा तु श्यामत्वामिदमनेन सदृशमित्युच्यते तदा--
धर्मः समानः श्यामादिरुपमानोपमेययोः ।
आश्रीयमाणप्राधान्यो धर्मेणान्येन भिद्यते ।। 377 ।।
उपमानोपमेयभावव्यवस्थापको यः श्यामादिर्धर्मः स यदोपकारित्वव्युदासेनाश्रयभिन्नः
प्रादान्येनोपमेयतयोपादीयते, तदाद्रव्यायमाणत्वात् तस्यापरेण स्वगतेन धर्मेण विशेष्यमामत्वमित्यन्यो
धर्मोऽत्रोपमानोपमेयभावनिबन्धनम् ।। 377 ।।
एतदेवोदाहरति--
शस्त्रीकुमार्योः सदृशः श्याम इत्येवमाश्रिते ।
व्यपदेश्यमनेनेति निमित्तं गुणयोः स्थितम् ।। 378 ।।
अनेन करणभूतेन धर्मेण दीप्त्यादिना श्यामगुणगतेन तुल्योऽयं श्यामगुण इति निरूपणीयम् । तत्रापि च श्यामगुणयोरयं दीप्त्याख्यो धर्मः समान इति प्राधान्ये धर्मस्य धर्मान्तरमुपमायां सव्यापारमन्वेष्यमित्यनवस्थैवात्र ब्रह्मकाण्डे प्रतिपादिता--
"सामान्यमाश्रितं यद्यदुपमानोपमेययोः ।
तस्य तस्योपमानेषु धर्मोऽन्यो व्यतिरिच्यते ।।" इति ।। 378 ।।
यावच्चात्र विवक्षा तावदपर्यवसाना धर्माणां विवक्षा, विरामे तु विरतिः, एतच्चोपमानमुपमेयाद् भेदेन यदा
विवक्ष्यते, तदोपमानोपमेयभावः शाब्द इत्याह--
यदा निमित्तैस्तद्वन्तो गच्छन्तीव तदात्मताम् ।
भेदाश्रयं तदाख्यानमुपमानोपमेययोः ।। 379 ।।
उपमानोपमेयभावे यन्निमित्तं गुणः श्यामादिस्तेन यदा तौ निमित्तिनावुपमानोपमेयावैकात्म्यमिव प्रतिपद्यते
गुणगुणिनोरभेदोपचारात्, तदा भेदाधीनो व्यपदेशो विवेकेनोपमानस्योपमेयस्य च । तथा च
तत्रोपमानोपमेयभावलक्षणसम्बन्धद्योतकमिवादिपदमुपादीयत इति परिपूर्णेयमुपमा । देवदत्ता शस्त्री यथा श्यामा । गौरिव गवयः । शैला इव वलाहका इति ।
अत्र ह्युपमानोपमेयभावसम्बन्धहेतोर्गुणस्य तद्वताऽभेदेन निर्देशे सम्बन्धश्चाभिहित इति प्रथमा । अभिहितः--सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति न्यायात् तद्वाचिकाया विभक्तेरभावात् प्रथमान्तयोः समन्वयो न स्यादिति द्योतकमिवाद्युपादीयते

समन्वयार्थमित्युपमानोपमेयतद्भावद्योतकपदसाधारणधर्मवाचकपदप्रयोगात् परिपूर्णत्वम् ।। 379 ।।
यदा तु सादृश्यहेतुकोऽभेदाध्यारोपः, तदोपमानोपमेयभावस्य गर्भीकार इत्याह-- तत्त्वासङ्गविवक्षायां येषु भेदो निवर्तते । लुप्तोपमानि तान्याहुस्तद्धर्मेण समाश्रयात् ।। 380 ।।
उपमानोपमेययोस्तत्त्वासङ्गोऽभेदाध्यारोपो यदा विवक्ष्यते, तदा भेदस्य निवृत्तत्वात् तदधीन उपमानोपमेयभावोऽपि तिरोधीयते । गौर्बाहीकः, सिंहो माणवक इति । परार्थे शब्दप्रयोगान्यथानुपपत्त्या चात्र कार्यात् कारणानुमानेन यास्कप्रभृतय आचार्याः समानधर्मान्तर्भावनेन लुप्तोपमानीमान्युपमानान्याचक्षते । लुप्ता साक्षादनवधार्यमाणा उपमा येषाम् । तद्धर्मेण समाश्रयादिति । तेन समानेन धर्मेण गर्भीकृतेन सता उपमानशब्देनोपमेयस्य परिग्हहादित्यर्थः ।। 380 ।।
एवञ्च कार्यस्य नियतकारणपूर्वकत्वमुक्तम् । `अन्यैस्तु मानं जात्यादीत्यनेन प्रकारेण यन्नात्यन्ताय मिमीते तदुपमानम्' इति भाष्यं तात्पर्येण व्याचष्टे--
शस्त्र्यां प्रसिद्धं श्यामत्वं मानं सा तेन मीयते ।
अन्याश्यामातु तद्रूपा (त्वतद्रूपा) तेनात्यन्तं न मीयते ।। 381 ।। साकल्येन परिच्छेदकं मानम् । तच्च शस्त्रीगतं श्यामत्वम् । तद्धि तत्र प्रसिद्धं परिच्छेदकम् । अन्या तु देवदत्ता श्यामापि न प्रसिद्धेति तेन श्यामत्वेन करणभूतेन परिच्छिद्यते । एवमपि परिच्छिद्यमाना नात्यर्थं सर्वतः परिमीयते । नहि धर्मसामान्यानुगममात्रात् सर्वात्मनार्थोऽवधारयितुं पार्यते ।। 381 ।।
तदेवं शस्त्रीगतेन श्यामत्वेन देवदत्ता यदा नात्यन्ताय परिच्छिद्यते, तदा न्त्यन्ताय मानमुपमानं शस्त्री सम्पद्यत इत्याह--
शस्त्रीं स्वेन गुणेनातो मिमानामाश्रयमान्तरम् ।
असमाप्तगुणं सिद्धेरुपमानं प्रचक्षते ।। 382 ।।
निजेन समाप्तकालेन श्यामगुणेनासमाप्तगुणमाधारान्तरं देवदत्तालक्षणं परिच्छिन्दतीं शस्त्रीमुपमानमाहुः--सिद्धेरिति । परिपूर्णगुणत्वादित्यर्थः ।। 382 ।।
एवं प्रकारद्वयेनोपमानोपमेयौ व्याख्याय सामान्यवचनत्वं विचार्यते । तथा हि निमित्ताभेदापन्नस्य निमित्तिनोऽभिधानादुपमानगतं वा तदभेदापन्नं निमित्तमुच्यते, तदुपमेयगतं वा, न तूभयगतं सकृदभिधातुं शक्यत इत्यनन्वयात् कथं
सामान्यववचनत्वमित्याशङ्क्याह--
उपमेये स्थितो धर्मः श्रुतोऽन्यत्रानुमीयते ।
श्रुतोऽथवोपमानस्थ उपमेयेऽनुमीयते ।। 383 ।।
इह साधारणधर्मप्रयुक्त उपमानोपमेयभावः । तत्र च युगपदुभयगतत्वेन साधारणधर्मस्याभिधानं न सम्भवतीति शस्त्रीश्यामा देवदत्तेत्युक्ते श्रुतेनैव श्यामत्वेन समन्वयादश्रुतकल्पनायोगादेकत्रोपक्षयेऽपि शब्दस्यार्थान्तरेऽप्यनुमानाद् गुणसम्बन्धावसाय इति यो दृष्टः समानो गुमस्तस्यैकतरोपक्षयेऽप्यभिधाने सामान्यवचनत्वोपपत्तिः ।। 383 ।।
तत्रोपमेये श्रुतेर्निदर्शनमाह--
अधीयते ब्राह्मणवत् क्षत्रिया दृश्यते ।
उपमेयस्य भिन्नत्वाद् वचनं क्षत्रियाश्रयम् ।। 384 ।।
उपमेयानां क्षत्रियाणां बहुत्वाद् बहुवचनमत्र श्रूयमाणमध्ययनस्य साधारणस्य धर्मस्योपमेयगतत्वमावेदयते । सामर्थ्यात् पुनरुपमानैर्ब्राह्मणैरस्य सम्बन्धः प्रतीयते । उपमानस्य पुनरुपकारित्वात् तद्गतः श्रतो धर्म उपमेये नियोगतोऽवगन्तव्य इति न तत्रोदाहृतम् ।। 384 ।।
इत्थं चोभयगतत्वेनानभिधानेऽपि सामान्यवचनत्वमुपपद्यत इत्याह--
साधारणं ब्रुवन् धर्मं क्वचिदेव व्यवस्थितम् ।
सामान्यवचनः शब्द इति सूत्रेऽपदिश्यते ।। 385 ।।
अन्यतरगतत्वेनापि शब्देनाभिधीयमानो धर्मो वास्तवेन रूपेण भेदापरमर्शात् सामान्यमिति तमभिदधद् भवति सामान्यवचनः

शब्दः । नहि यतः शब्दो वक्त्युभयगतत्वेनातः साधारणो धर्मो भवति । विशेषस्य ब्राह्मणादेः शब्देन सामान्येनाभिधानेऽपि साधारणत्वाभावात् । तस्माद् वास्तवेन रूपेण साधारणं श्यामत्वसामान्यमेकगतत्वेनाप्यभिधीयमानमन्यत्रानुमानात् साधारणमेवाभिहितं भवति ।। 385 ।।

तदेवं गुणजातौ वृत्तः सामान्यवचनः । यदापि गुणः श्यामादिस्तत्रापि वर्तमानः श्यामादिः शब्दः सामान्यवचन एवेत्याह--

नाभेदेन न भेदेन गुणो द्विष्ठोऽभिधीयते ।
भिन्नयोर्धर्मयोरेकः श्रूयतेऽन्यः प्रतीयते ।। 386 ।।

द्वयोरुपमानोपमेययोर्वर्तमानो गुणः श्यामलक्षणो नाभेदेनान्वयिरूपावेशेनाभिधीयते शब्देन । यस्मादुपमानेनावच्छिद्यते उपमेयेन वा । तथा चैकगतत्वेन विशिष्ट इति नाभेदेनाभिधानम्, नापि सहजेन व्यावृत्तेनात्मनाभिधीयते ।

न हि स्वालक्षण्येन भेदं शब्दाः स्पृशन्ति, सामान्यवचनत्वात् ।
नापि व्यावृत्तेनात्मना उपमायामुपयोगः ।
तस्माच्छ्यामशब्देव तावद् गुणोऽविशेषेण कथ्यते, अन्यतरसम्बन्धाद् अवच्छिद्यमानोऽपि सामर्थ्यादितरगतत्वेनावधार्यत इति भवति तच्छब्दः सामान्यवचनः ।। 386 ।।

एवं तात्पर्यतो भाष्यं व्याख्याय पाठपूर्वकं साक्षाद् व्याचष्टे--

नात्यन्ताय मिमीते यत् सामान्ये समवस्थितम् ।
सादृश्यादुपमेयार्थः समीपे परिकल्प्यते ।। 387 ।।

यदत्यन्ताय मेयशरीरं परिच्छिनत्ति तन्मानं प्रस्थादि जात्यादि वा व्याख्याताम् । तत्समीपे यत् तदुपमानम्, अत्र च तदित्यनेन प्रज्ञापनीयत्वेनाधिकृतत्वात् प्रधानमुपमेयं प्रत्यवमृश्यते । तस्योपमेयस्य यत् समीपे, तदुपमानम् । सामीप्यं च धर्मप्रत्यासत्तिकृतम् । तथा च सादृश्येन परिच्छेदकत्वात् सामान्ये साधारणे धर्मे सम्बन्धहेतावववस्थितं तदपेक्षमुपमानं नात्यर्थं परिच्छिनत्ति ।

यो हि साधारणो धर्मस्तावतोपमेयस्यात्र परिच्छेदो विधीयते उपमानेन, न त्वन्येन धर्मेण । शस्त्र्या हि श्यामगुणतयावच्छिद्यते देवदत्ता, न तु संस्त्यानादिरूपेणेत्यपरिपूर्णमिदं मानमुपमेयसमीपवति ।। 387 ।।

तत्समीप इत्यस्य भाष्यस्य व्याख्यानान्तरमाह--

मानं प्रति समीपं वा सादृश्येन प्रतीयते ।
परिच्छेदाद्धि सादृश्यमिह मानोपमानयोः ।। 388 ।।

इह यदा प्रधानानुग्रहाय गुणो व्याप्रियते, तदास्योपसर्जनत्वात् परामर्शो मा भूत्, इह तु मेयं प्रति परिच्छेदोपयोग्यपि मानं स्वरूपे लक्ष्यमाणे प्रधानमिति तदेव तच्छब्देन परामृश्यते ।

तथा च मानस्य यत्समीपं तदुपमानम् । सामीप्यं च समानधर्मयोगात् । अस्ति चेह सादृश्यं परिच्छेदहेतुत्वं नाम मानोपमानयोः । एकमत्यन्ताय परिच्छेदकम् । अपरं नात्यन्तायेति भेदः ।। 388 ।।

एवमुपमानलक्षणार्थं `मानं हि नामानिर्ज्ञातज्ञानार्थामुपादीयते--अनिर्ज्ञातमर्थं ज्ञास्यामीति । तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानम्' इति भाष्यं व्याख्यातम् । अतः पूर्वं तूपमानलक्षणप्रस्तावहेतुः प्रश्नभाष्यम्,`किं यदेवोपमेयम्, आहोस्विदन्यदुपमानमन्यदुपमेयम्' इत्यस्ति ।

तद् व्याचष्टे--

एकजातिव्यपेक्षायां तदेवेत्यवसीयते ।
भेदस्यैव व्यपेक्षायामन्यदेवेति गम्यते ।। 389 ।।

इह यथाप्रत्ययमर्थाव्यवहार्यतामापद्यन्ते । तत्र यदोपमानोरमेययोरभिन्नमन्वयिरूपं व्यक्तिभेदतिरोधानेनैकगुणजात्यात्मकमभिसंहितम्, तदा तदेकरूपाध्यासादनयोरभेदो निश्चीयत इति तदेवेत्युच्यते ।

यदा तु निजो भेदो व्यावृत्तिर्व्यक्तिरूपनिरूपणेनाभिसंहिता, तदार्थान्तरत्वस्यैव प्रसिद्धस्यावधारणादन्यदेवेति भणितिः ।
किमुपमानत्वेऽत्यन्ताभेद उपयुज्यते, किं वात्यन्तभेद इत्यभिप्रायः ।। 389 ।।
ननु चोपमानमुपमेयमिति साधनविभागानुरोधी व्यपदेश एवानयोर्भेदं दर्शयति । कर्मकरणसाधनौ हि प्रत्ययौ भिन्नार्थाविति कथमभेदाशङ्केति ।
एतदभ्युपगच्छति--
कर्मत्वं करणत्वं च भेदेनैवाश्रितं यतः ।
अत्यन्तैकत्वविषयान्न स्यात् तेनात्र संशयः ।। 390 ।।
प्रत्ययाभ्यां विभागेन यस्मात् कर्मत्वं करणत्वं चोपात्तम्, तस्मादत्र निरस्ताशेषभेदनिबन्धनं वास्तवं यदेकत्वं तत् संशयस्य पक्षो विषयो नोपपद्यत इति भिन्नयोरेव सामान्यधर्मोराधिकमेकत्वं संशयविषयो न विरुध्यते ।। 390 ।।
दृश्यते चैवंविधेन भिन्नानामपि काल्पनिकेनाभेदेन व्यवहार इत्याह--
भेदेन तुल्यरूपत्वाच्छालींस्तानिति दृश्यते ।
जात्यभेदात् स एवायमिति भिन्नोऽभिधीयते ।। 391 ।।
अवधृतात्मभेदा अपि शालयो रूपसामान्यापहृतभेदैः प्रत्ययैरभेदेनावसाय त एव भुज्यन्त इति व्यपदिश्यते । एवम् `तान्येव वासांसि परिधीयन्त' इति च । एतच्च सादृश्यपर्यायं रूपसामान्यमभेदनिबन्धनमुक्तं शास्त्रे, `रूपसामान्याद् वा' इत्याकरवार्त्तिके । तदेवोपपादयितुं `तानेव शालीन् भुञ्ज्महे ये मधुरायां दृष्टाः' इति दृष्टान्तितम् । न केवलं च सादृश्यमात्रनिमित्तोऽभेदावसायो यावज्जात्यभेदनिबन्धनोऽपि । तथा ह्येकसामान्याध्यासिता व्यक्तयोऽभेदेन व्यपदिश्यन्ते । `चत्वारो ब्राह्मणा उदकुम्भानाहरेयुः' इत्यादो ।
अत्र हि माठरादिभेदेऽपि ब्राह्मण्येनाभेद उपात्तः । एवामिहाप्युपमानोपमेययोः सदृशधर्मनिमित्ताया प्रत्यासत्त्या तद्गतैकचातिसमावेशनाद् वाऽभेदस्य युज्यते संशयविषयता ।। 391 ।।
भेदस्यापि युज्यत इत्याह--
कथं ह्यवयवोऽन्यस्य स्यादन्य इत् चोच्यते ।
अत्यन्तभेदे नानात्वं यत्र तत्त्वं न विद्यते ।। 392 ।।
हलन्ताच्च् (पा.1/2/10)इत्यत्रान्तशब्दामवयवमाश्रित्य हल् अन्ते यस्येकः तस्मादिति व्याख्यायमाने चोदितमिदम् । `कथं हि इको नाम हल् अन्तः स्यादन्यस्यान्यः' इति । अत्र चावयवावयविनोरन्यत्व एवोपपत्तिरित्यत्यन्तभेदोऽयं विवक्षितः । तथा ह्यत्यर्थेन ययोर्भेदो यत्र न कथञ्चित् तत्त्वमभेदः सम्भवति । तस्मिन् सति यन्नानात्वमत्यन्तं तदभिसन्धायैतदुक्तमन्यस्यान्य इति ।
उभाभ्यामन्यशब्दाभ्यामैकान्तिकमन्यत्वं निर्दिशति । अवयवस्त्ववयविनः कथञ्चिदनन्यः, समवायेन तिरोहितभेदत्वात् । वर्णस्तु वर्णान्तरस्यानारम्भकत्वात् सर्वथैव भिन्नो नावयवो युज्यते ।
तदेवमत्र यथाकथञ्चिदनन्त्वेऽप्यवयवस्यात्यन्तभेदभिप्रायमनुपपत्तिरुक्ता । एवमिहाप्युपमानोपमेययोर्जात्यभेदाद् रूपसामान्याद्वा कथञ्चिदभेदेऽपि तदानादरेणात्यन्तभेदमाश्रित्यान्यदेवेति संशयविषयता कथिता ।। 392 ।।
तत्रावयवावयविनोरेवाभेदसम्भवो भिन्नयोरपि, न तु वर्णयोः परस्परमनारम्भकयोरित्याह--
अभेदस्य विवक्षायामेकत्वं सङ्घसङ्घिनोः ।
सङ्घिनोर्न त्वभेदोऽस्ति तथान्यत्वमुदाहृतम् ।। 393 ।।
सङ्घोऽवयवी, सङ्घिनोऽवयवाः, तेषां समावायादपोदितभेदानां यदा विवक्षा, तदाऽभेद एवाभिमतः । सङ्घः समुदायो वा वनादिः । तद्वन्तः समुदायिनो वृक्षादयः, तेषां समुदायेन सहाभेदेन अव्यतिरेकेऽभिधित्सिते वनं वृक्षा ब्राह्मणाः सङ्घ इत्येकत्वमभेदो भवति । तथाहि--वनादिशब्दाः सङ्घात्मना तान् समुदायिनः प्रतिपादयन्ति । वृक्षादयस्तु जातिभेदानुरागेण

तानेवेत्यस्ति भिन्ननिमित्तप्रयुक्तयोः शब्दयोरेकत्र वृत्तिः सामानाधिकरण्यम् ।
यदा तु भेदविवक्षात्र, तदा वनादिशब्दाः सङ्घलक्षणधर्ममात्रवचना इति तदुपजनितव्यतिरेकाणां सङ्घिनामभिधानम्--वृक्षाणां वनम्, ब्राह्मणानां सङ्घ इति । एवं सङ्घसङ्घिनोर्भेदाभेदौ । सङ्घिनोः--समुदायिनोस्तु न कदाचिदभेदो भवति,असम्बन्धात् ।
तथा हि शिंशपायाः पलाशस्य वा नाभेदप्रतिपत्तिः । माहरस्य कौण्डिन्यस्य च । एवं वर्णा अपि परस्परमनारम्भात् सङ्घिनोऽत्यन्तभिन्नाः परस्परेणाभेदं न योग्याः प्रतिपत्तुमित्यन्यत्वमेव कथितम् । तथा च भेदाभेदावन्योन्यानुविद्धौ शुद्धौ च सम्भवत इतीह शुद्धौ विहायेतरौ विवक्षिताविति भेदाश्रयः प्रत्ययभेदोऽभेदाश्रयश्चैकत्वेन प्रश्न उपपद्यत एव ।
अथवोपमानमुपमेयमिति यत् प्रसिद्धं लोके तत् किमेकमुतानेकमिति विचारविषयत्वेन प्रसिद्धभेदानुवादः ।। 393 ।।
एतदनन्तरम् `किञ्च भोः' इत्युपक्रम्येदं भाष्यम् "यदि यदेवोपमानं तदेवोपमेयं क इहोपमार्थो गौरिव गौः, अथाप्यन्यदुपमानमन्यदुपमेयं क इहोपमार्थो गौरिवाश्वः" इति ।।
एतत् क्रमेण व्याचष्टे--
तत्राभिन्नव्यपेक्षायामुपमार्थो न विद्यते ।
यो हि गोरिति विज्ञाने हेतुः सोऽस्ति गवान्तरे ।। 394 ।।
इह येन धर्मेण यः प्रसिद्धः, तेनाप्रसिद्धं ज्ञापयन्नौपम्यमनुभवति । अभिन्नस्य तु सामान्यस्योपमाहेतुत्वेनापेक्षायां न किञ्चित् फलमुत्पश्यामः ।
तथा हि--गौरिव गौरिति यदेव जातिरूपमुपमानावसाये निबन्धनम्, तदेवोपमेयाभिमतेऽपीत्यज्ञातस्योपमेयस्य ज्ञापनाभावान्नोपमानोपमेयभावः ।
एवञ्च गोगवययोरप्यन्वयिधर्ममात्रापेक्षायां नोपमार्थं इत्युक्तं भवति ।। 394 ।।
अत्यन्तभेदेऽपि नोपमार्थं इति विवृणोति--
व्यावृत्तानां विशेषाणां व्यापारे तु विवक्षिते ।
न कश्चिदुपकारोऽस्ति बुद्धेर्बुद्ध्यन्तरं प्रति ।। 395 ।।
अन्वयिना धर्मेणाननुगतानामप्यत्यन्तव्यावृत्तानां भेदानामपेक्षणे नोपकारः कश्चिदुपमानप्रतीतेरुपमेयप्रतीतौ धर्मसामान्यमन्तरेण समन्वयाभावाद् गोऽश्वयोः ।। 395 ।।
अत्र हि परिहारभाष्यम्--`एवं तर्हि यत्र किञ्चित् सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेयभावः' इति ।
एतद् व्याचष्टे--
किञ्चिद् यत्रास्ति सामान्यं यदि भेदाश्च केचन ।
गोत्वं गोष्वस्ति सामान्यं भेदाश्च शबलादयः ।। 396 ।।
तत्रोपमानोपमेयभाव इति शेषः ।
तथा च प्रागेव व्याख्यातम् ।
एवञ्च कृत्वा द्वयोरपि गवोः सामान्यविशेषापेक्षो भवत्येवोपमानोपमेयभाव इत्याह--
ततश्च शाबलेय इव च बाहुलेय इति शाबलेयत्वाद्यवान्तरजातिभिन्नयोरप्येकार्थकारित्वादिनैकजातीयत्वेन प्रत्यासत्तौ भवत्येवोपमानोपमेयभाव इत्यर्थः ।। 396 ।।
यद्वा यत्र किञ्चित् सामान्यमत्यादिभाष्यस्यायमाक्षेपः--सर्वत्र पदार्थेषु सामान्यविशेषयोगादौपम्यं स्यादित्यातिप्रसङ्गो मेरुरिव सर्षप इत्यपि स्यात्, गौरिव गौरिति चेति श्लोकार्धस्यार्थः । अत एवैतच्चोद्यप्रतिसमाधानत्वेन वक्ष्यमाणोऽयं ग्रन्थ उपपद्यते ।
तथा हि--न महासामान्यमत्र विवक्षितं, किन्तर्हि--
सामान्यं श्यामताद्येव तद्धि साधारणं द्वयोः ।

तदेव सिद्ध्यसिद्धिभ्यां भेद इत्यपदिश्ते ।। 397 ।।

`यत्र किञ्चित् सामान्यम्' इत्यत्र भाष्ये सामान्यशब्देन न जातिरभिधित्सिता, अपि तु ततोऽर्थान्तरं श्यामत्वादि । तच्च द्वयोरुपमानोपमेययोरन्वयि साधारणमिति सामान्यमुच्यते ।

तथा ह्युत्तरत्र भाष्यमस्ति--`न चावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमाह सोऽपि सामान्यवचनः' इति ।

एवञ्च द्विवृत्तिः श्यामत्वादिरत्र सामान्यमिति गम्यते । तदेव च सामान्यमपि व्यावृत्तेरपि भावाद् विशेष इत्युच्यते `कश्चिच्च विशेषः' इत्यत्र भाष्ये ।

तथा हि--यथोपमाने तत्प्रसिद्धं न तथोपमेये, न्यूनत्वादित्यास्ति भेदः । एवञ्च जातेरन्यत् सादृश्यं भेदाभेदानुस्यूतमिह सामान्यशब्देन साधारमपर्यायेण कथितमिति, ययोः साधारणो धर्मः प्रसिद्धाप्रसिद्धदर्शनः, तयोरुपमानोपमेयभावस्तदुपनिबन्धन इत्युक्तं भवति ।

एवञ्च कृत्वा सजातीययोरपि संस्थानादिधर्मसादृश्यकृतः शाबलेयबाहुलेययोरुपमानोरमेयभावो नैकजातिनिबन्धनो द्वयोर्गौरिव गौरिति ।। 397 ।।

अत्रैव मतान्तरमाह--

श्यामत्वमेव सामान्यमन्येषामुभयोः स्थितम् ।

सम्पूर्णत्वात् तदन्यस्माद् विशेष इति गम्यते ।। 398 ।।

पूर्वं प्रसिद्ध्यप्रसिद्धिभ्यां भेद उक्तः । इदानीं सम्पूर्णासम्पूर्णतयेति विशेषः ।

तथाहि--श्यामत्वलक्षणो गुण एव द्विवृत्तिराश्रयभेदाद् भिन्नोऽपि सौक्ष्म्यादलक्षितविवेकः सामान्यमित्युक्तः । स एवोपमाने सर्वात्मना परिसमाप्तत्वाद् उपमेये तु केनचिदंशेन न्यूनत्वादनाश्रितेऽप्याधारभेदोपाधौ भेदे विशेष्यमाणो विशेष इत्युक्तः । तथाच भेदाभेदाभ्यामवधार्यमाणो गुण एव सादृश्यं न ततोऽर्थान्तरम् ।। 398 ।।

यद्वा जातिरप्यस्तु उपमायां सव्यापारा, न त्वभेदेनैवावसीयमाना, किन्तु भेदेनापीत्याह--

आकृतौ वापि सामान्ये क्वचिदेव व्यवस्थिताः ।

श्यामादयोऽवसीयन्ते विशेषास्त इहाश्रिताः ।। 399 ।।

जात्येकार्थसमवायिनो ये सूक्ष्मा विशेषाः प्रतिनियते क्वचिदेव जात्याधारेऽवस्थिताः, ते जातेर्भेदहेतवो यदा समाश्रीयन्ते, तदा तैर्विशिष्टा जाति क्वचिदेव समवेता सव्यापारा भवत्युपमानोपमेयभावलक्षणे सम्बन्धे ।

तथा हि--शस्त्रीदेवदत्तागतयोः श्यामगुणयोर्या गुणजातिः, साश्रयविशेषगतकान्तिमत्त्वादिधर्मविशेषैरनुज्यमाना भेदानुवेधात् सादृश्यप्रत्ययं प्रसूयते । गौरिव गोरित्यत्र विद्यमानो हि विशेषो जातेर्भेदकः शब्दान्नावधार्यत इति न भवत्युपमा । शस्त्रीश्यामा देवदत्ता, शाबलेय इव बाहुलेय इत्यादौ तु गुणाधारभेदादेवावधार्यते विशेषः ।। 399 ।।

इत्थं भाष्यग्रन्थं व्याख्याय पिण्डितार्थमाह--

जातेरभेदे भेदे वा सादृश्यं तत् प्रचक्षते ।

कश्चित् तदाचिदर्थात्मा तथाभूतोऽपदिश्यते ।। 400 ।।

जातेरभेदेऽनन्यत्वेऽप्येकार्थसमवेताविशेषाहिते च भेद इत्यनन्तरोक्तार्थानुवादः । भेदे वेति `सामान्यं श्यामताद्येवे'ति पूर्वोक्तार्थानुवादः ।

एवं यत् सामान्यमुक्तं तत् सादृश्यमित्याहुः । तेन च सादृश्येन कश्चिदेव न सर्वोऽर्थात्मोरमेयस्तथाभूतः सदृश इति कथ्यते निरूप्यते चाभिधानस्य निरूपणपूर्वकत्वात् ।

इत्थं च सत्त्वज्ञेयत्वादि न सादृश्यम्, ततः सदृशप्रत्ययाभावादिति सामान्यधर्मयोगादेवौपम्ये नातिप्रसङ्गः ।। 400 ।।

इदानीं सदृशप्रत्ययस्य विषयं व्यवस्थापयितुं तत्प्रत्यनीकभूतं प्रत्ययान्तरमुदाहरति--

यत्रार्थे प्रत्ययाभेदो न कदाचिद् विकल्पते ।

अविद्यमानभेदत्वात् स एक इति गम्यते ।। 401 ।।

यस्मिन् वस्तुनि प्रत्यस्याकाराभेदो न कदाचिद्विकल्पेन भेदप्रत्ययेन सह पर्यायं नापद्यते, सदैवाभेदाकारेणोत्पत्तेः, तद्वस्तु धर्मिरूपमवस्थानानात्वेऽपि तत्कृतस्य भेदस्यासंविदितत्वाद् व्यवहारे प्रतिभातस्य सत्कल्पत्वादविद्यमानभेदमेक इति प्रत्ययविषयः ।। 401 ।।

प्रतियभिज्ञाप्रत्ययमुदाहरति--

योऽर्थ आश्रितनानात्वः स एवेत्यपदिश्यते ।
व्यापारं जातिभागस्य तत्रापि प्रतिजानते ।। 402 ।।

प्रसिद्धभेदोऽपि यः पदार्थः स एवेति प्रत्यभिज्ञायते, तत्र जात्यंशस्य व्यापार इत्याहुः । जातेर्व्यक्तिभिरैकात्म्यापत्तौ भागवाचोयुक्तिः । एवञ्च केवलाया जातेः प्रत्यभिज्ञाप्रत्यये व्यापारः, न सदृशप्रत्यये ।

यत्र च सादृश्यनिबन्धात् तत्त्वसमारोपात् प्रत्यभिज्ञा, भ्रान्तिरसौ लूनपुनर्जातकेशेष्विव जात्यापादिता । भेदानां तु तत्त्वनिबन्धनैव प्रत्यभिज्ञा ।। 402 ।। वस्तुनि हि संविदा भेदाभेदसंस्पर्शः कथमित्याह--

जातिभागाश्रया प्रख्या तत्राभिन्ना प्रवर्तते ।
व्यक्तिभागाश्रया बुद्धिस्तत्र भेदेन जायते ।। 403 ।।

जात्यंशस्य व्यापारादभेदेनैकजातीयः परामृश्यते, गौरेवायमिति । व्यक्तिरूपाश्रया तु तत्र संविद्भे दोपलक्षिता प्रभवति ।। 403 ।।

इदानीं सदृशप्रत्ययं लक्षयति--

अन्यत्र वर्तमानं सद् भेदाभेदसमन्वितम् ।
निमित्तं पुनरन्यत्र नानात्वेनेव गृह्यते ।। 404 ।।
आधारेषु पदन्यासं कृत्वोपैति तदाश्रयम् ।
स सादृश्यस्य विषय इत्यन्यैरपदिश्यते ।। 405 ।।

निमित्तं प्रकृतत्वात् सदृशप्रत्ययस्य श्यामत्वाख्यमन्यत्राधारे शस्त्रीगते गुणे वर्तमानं सद् भूय आश्रयान्तरे देवदत्तागुणे वर्तमानं नानात्वेनेव भेदेनेव परिच्छिद्यते, तेनाश्रयान्तरेणावच्छेदात् । अभेदेनापि तु समन्वयादिवशब्दः ।

अत एव भेदाभदसमन्वितं सामान्यविशेषरूपसम्बद्धिमित्यर्थः । तदेवंविधनिमित्तमाधारेषु स्वाश्रयेषु गुणेषु पदन्यासं विधाय तदालम्बनं सादृश्यप्रत्ययमुत्पाद्य तस्यगुणस्य य आधारो द्रव्यं तत् प्राप्नोति, समवेतसमवायात् तत्र सदृशप्रत्ययं जनयति । तथा च स गुणाश्रयः सादृश्यस्य विषयः । तत्र सादृश्यनिमित्त उपमानोपमेयभाव इत्यर्थः ।

इत्थंञ्चेदं सादृश्यं भेदाभेदसमन्वयाज्जातेरन्यदभेदात्मिकायाः । जातिश्चान्यत्र नानात्वेन न गृह्यते । अपि त्वेकत्वेनैव । अनेन च ग्रन्थेनैकीयमतेन `यत्र किञ्चित् सामान्यं कश्चित् विशेषः' इति भाष्यमन्यथा व्याख्यातम् ।

तथा हि--पूर्वं यत्राधारे किञ्चित् सामान्यं कश्चित् विशेषस्तत्रोपमानोपमेये भवत इति भवितृभ्यां भावस्योपलक्षणात् तत्रोपमानोपमेयभाव इत्यर्थोऽभीष्टः ।

इह तु यत्र निमित्ते भेदाभेदसमन्विते सति सामान्यविशेषावभासप्रत्ययो द्रव्ये भवति, तत्र निमित्ते सत्युपमानोपमेये द्वे द्रव्ये भवतः । तन्निमित्तरूपस्य सादृश्यस्य तत्र पारम्पर्येण समवायादित्यर्थः ।

अत्रापरं भाष्यम्--`किं वक्तव्यमेतत् । नहि । कथमनुच्यमानं गंस्यते । मानं हि नाम' इत्यादि । तत् प्रागेव सूत्रार्थौपयिकत्वेनोपमानलक्षणरूपं व्याख्यातम् ।। 404, 405 ।।

अतोऽनन्तरं भाष्यम्--`कामं तर्ह्येतेनैव हेतुना यस्य गवयो निर्ज्ञातः गौरनिर्ज्ञातः' तत्कर्तव्यं स्याद् गवय इव गौरिति । बाढं कर्तव्यमि'त्यनेनोपमानोपमेययोरव्यवस्थाभ्युपगता ।

तां निदर्शनेन व्युत्पादयितुमाह--

परापेक्षे यथा भावे कारणाख्या प्रवर्तते ।

तथान्याधिगमापेक्षमुपमानं प्रचक्षते ।। 406 ।।

कार्यापेक्षं कारणत्वमित्यन्यापेक्षत्वेऽपि न कार्यकारणभावसङ्करः । नहि यमेव प्रति कार्यं तमेव प्रति कारणम् ।

एवमप्रसिद्धमुपमेयं प्रसिद्धमुपमानं तदपेक्षया यद्यपि व्यवह्रियते, तथापि पिरसिद्ध्यप्रसिद्ध्योः

सङ्कराभावान्नोपमानोपमेयभावविपर्यास इत्यर्थः ।। 406 ।।

अत्रैव निदर्शनान्तरम्--

गुरुशिष्यपितापुत्रक्रियाकालादयो यथा ।

व्यवहारास्तथौपम्यमप्यपेक्षानिबन्धनम् ।। 407 ।।

न गुरुर्गुर्वन्तरापेक्षया । शिष्योऽपि न स्वशिष्यापेक्षया शिष्यः । पिता न पित्रन्तरापेक्षया । पुत्रोऽपि न स्वपुत्रं प्रति पुत्रः । क्रिया स्वासाधानापेक्षया साध्या न हि क्रियान्तरं प्रति । साधनमपि न तु स्वसाधनापेक्षयैव ।

यथोक्तं--

"तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया ।

सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति" ।। इति ।।

(वा.प. 3 क्रिया 50)

प्रसिद्धपरिमाणा क्रिया परिच्छेद्यक्रियान्तरं प्रति कालः, परिच्छेदकत्वात् । न तु परिच्छेद्याया एव परिच्छेद्या । आदिग्रहणात् विशेषणविशेष्यभावादेरापेक्षिकस्य सङग्रहः ।

एवं यस्य गवयः प्रसिद्धस्तस्यासावुपमानं वनेचरस्य, गौरप्रसिद्ध उपमेयः । नागरकस्य तु विपर्ययः । अत एव कामिनः

श्रृङ्गाररसपरिपोषणपरतया नारीमुखमुत्कृष्टगुणत्वेन प्रसिद्धमिति शशिबिम्बस्योपमानं भवतीत्युक्तम् ।। 407 ।।

अतः परमिदं भाष्यं `किं पुनरिहोदाहरणम् । शस्त्रीश्यामा । क्व पुनरयं श्यामाशब्दो वर्तते । शस्त्र्यामित्याह । केनेदानीं देवदत्ताभिधीयते । समासेने'ति ।

एतद् व्याचष्टे--

श्यामत्वमुपमाने चेद् वृत्तं वृत्तौ प्रयुज्यते ।

उपमेयं समासेन बाह्यं तत्राभिधीयते ।। 408 ।।

पक्षान्तरस्यापि वक्ष्यमाणत्वाच्चेदित्यस्य पक्षस्याभ्युपगमं द्योतयति । उपमाने शस्त्र्यां यदि श्यामत्वं वृत्तौ समासे स्थितमभ्युपगम्यते, तदा वर्तिपदयोरुपमानवृत्तित्वात् ततो बाह्यं ताभ्यामनुपगृहीतमुपमेयं समासेनाभिधीयत इत्यायातम् । तथाचान्यपदार्थप्रधानोऽयं समासस्तत्पुरुषोऽपि ।

नहि तस्योत्तरपदार्थप्राधान्यनियमः, नञ्समासे पक्षत्रयविचारानुपपत्तिप्रसङ्गात् । न चार्थादेशनं वचनानुसारि, लोकप्रसिद्धार्थस्यानुवादात् ।

तथाचेह समानाधिकरणसमासानुरोधाद् वृत्तौ शस्त्रीशब्दसमानाधिकरणत्वेनापि श्यामाशब्दस्य प्रयोगे भवत्युपमेयस्य सम्प्रत्यय इत्यन्यपदार्थप्रधानत्वेन व्यवस्था ।

यद्येवमनेनैव न्यायेन बहुर्वीहावन्यपदार्थप्राधान्यसिद्धेः किमन्यपदार्थग्रहणेन । सत्यम् । किन्तु न सर्वं प्रत्याख्येयं प्रयोगानुसारेणेत्यन्तरङ्गे स्वपदार्थे सम्प्रत्ययाशङ्कापनोदाय युक्तमन्यपदार्थग्रहणम् । तत्र शेषाधिकारविहितत्वाच्च बहुव्रीहेर्न तेनास्य बाधः ।

अन्यथा बहुव्रीहिसंज्ञायां गुमवचनस्या श्यामाशब्दस्य विशेषणत्वात् पूर्वनिपातः स्यात् । क्लृप्तव्यवस्थितविभाषाविज्ञानादपि परिह्रियते । स्वरस्त्वभिन्नः, तत्पुरुषेऽप्यत्रोपमानाश्रय एव पूर्वपदप्रकृतिस्वरो भवति ।

ननु च बहुव्रीहौ शस्त्री श्यामा यस्येत्येवं सम्बन्धे न भवेदौपम्यप्रतीतिः । नैतदस्ति । शस्त्री श्यामा यस्या देवदत्ताया इति सम्बन्धसामान्ये बहुव्रीहिः । सामान्यं च विशेषनिष्ठम् । कश्चात्र सम्बन्धविशेष इत्युपमानोपमेयभाव एव प्रतीयेतान्यस्यायोगात् । तस्माच्छेषवचनाद् बहुव्रीहेरयं न विषयः ।

अथ `सङ्ख्यासमानाधिकरणनञ्समासेषु दोषः' इति यदा शेषवचनं प्रत्याख्यायते, तदा कथम् । तदापि `प्राक्वडारात् परं कार्यम्' इत्यत्र दर्शने वचनसामर्थ्यादयं तत्पुरुषो भवति । अनवकाशोऽयमिति परमेवेति नियमानुपपत्तिः ।

यदापि `प्राक् कडारादेका संज्ञे'ति दर्शनं तदाप्यनेन विशेषविधिनोपमानानि सामान्यवचनं च विशेषमाश्रित्य प्रवृत्तेरुपमेयलक्षणान्यथानुपपत्त्या सादृश्यमन्तर्भाव्योपमेयमाचष्टे, यथा शस्त्री श्यामा तथा देवदत्तेति शस्त्रीश्यामा कथ्यते । शस्त्रीव श्यामा देवदत्तेति वाक्ये श्यामाशब्दस्योरमेयाभ्यां सम्बन्धयोग्यत्वादेकतरोपक्षयत्वे तदितरो वाक्यार्थः । समासे तु समानाधिकरणप्रस्तावादुपमान एव सामान्यवचनः सकृदुच्चरित इत्युपमेयः समासार्थो वर्ण्यत इति विशिष्यवृत्तावित्याह ।। 408 ।।

अतोऽनन्तरमिदं भाष्यं `यद्येवं शस्त्रीश्यामो देवदत्त इति केन टाप्न श्रूयते' इति ।

एतद् विवृणोति--

टाबन्त एव चैत्रादौ श्यामाशब्दस्तथा भवेत् ।

सूत्रे च प्रथमाभावान्न श्यामाद्युपसर्जनम् ।। 409 ।।

शस्त्र्यां वर्तमानः श्यामाशब्दो गुणवचनानामाश्रयतो लिङ्गवचनभावात् स्त्रीवृत्तिष्टाबन्त इति समासवाच्यत्वे चैत्रोदेरुपमेयस्य शस्त्रीश्यामा चैत्र इति स्यात् । सामान्यवचनैरिति च तृतीयानिर्देशात् प्रथमानिर्दिष्टमित्युपसर्जनसंज्ञाऽभावे ह्रस्वत्वमत्र नास्ति । उपमेयवृत्तित्वे तु तल्लिङ्गं सिध्यति ।

अतोऽनन्तरं भाष्यम् `उपसर्जनह्रस्वत्वमत्र भविष्यती'ति तत्र प्रथमानिर्देशाभावे `एकविभक्ति--'(पा. 1/2/44)इत्युपसर्जनत्वं स्यात् । अन्वर्थत्वेन वाऽप्रधानत्वात् । तथाचानन्तरं चोद्यभाष्यं--`यदि तर्ह्युपसर्जनान्येवञ्जातीयकानि भवन्ति, तित्तिरिकल्माषी, कुम्भकपाललोहिनीत्यनुपसर्जनलक्षम ईकारो न प्राप्नोतीति ।

तदेतद् व्याचष्टे

अथवैकविभक्तित्वाद् गुणत्वाद् वोपसर्जनम् ।

नैव तित्तिरिकल्माष्यामिष्टः स्त्रीप्रत्ययो भवेत् ।। 410 ।।

प्रतियोगिनः पदस्य नानाविभक्तियोगेऽपि यदभिन्नविभक्ति तदुपसर्जनमुक्तं कौशाम्ब्यादि । इहापि समासे कर्तव्यत्वेन विषयभूते यत् प्रक्रियावाक्यं, तत्र प्रधानमन्यपदार्थं पदं नानाक्रियावेशादनेकविभक्तीति तदपेक्षया गुणवचनं भवत्येवैकविभक्ति। प्रधानस्य नानाक्रियावेशेऽपि हि न गुणः स्वरूपादपैति । तथाच `बहुव्रीहावनेकवचनमुपसर्जनार्थं नवैकविभक्तित्वादिति प्रत्याख्यातम् । तत्र च प्रधानस्यान्यपदार्थस्म पदस्य नानाविभक्तित्वमाश्रित्यैकविभक्ति वर्त्तिपदम् । एवमिहापि भविष्यतीत्ययस्त्येकविभक्तित्वादुपसर्जनत्वम् । अन्यत्र तु समानाधिकरणसमासेऽनिष्टप्रसङ्गो नास्त्युत्तरपदार्थप्राधान्याच्चोत्तरपदार्थो गुणः ।

न चैवं लौकिकेऽर्थे समाश्रीयमाणे संज्ञाकरणमफलम्, प्रधानस्यापि कस्यचित् पूर्वनिपातार्थं संज्ञाविषयत्वात् । तद्यथा--पुरुषव्याघ्रः, पाचकवृन्दारिका, पूर्वकायः, अर्धपिप्पलीति । अत्र पूर्वपदार्थः प्रधानमिति समासशास्त्रे प्रथमानिर्देशादुपसर्जनसंज्ञा सफला । विषयभेदेन च कृत्रिमाकृत्रिमयोः शास्त्रे समाश्रयणान्नात्र लौकिकमुपसर्जनमाश्रीयते ।

तथाच पूर्वनिपाताव्यवस्थाभावः, राज्ञो गोः क्षीरमिति समासशास्त्रे द्वयोः षष्ठीति प्रथमानिर्देशादुपसर्जनत्वेऽन्वर्थत्वाश्रयमेकस्यैव तद्व्यवस्थानम् ।

एवञ्च कौशाम्ब्यादीनां समासे परार्थत्वादेवोपसर्जनत्वे सिद्धेऽप्येकविभक्तेः कृत्रिमतासिद्ध्यर्थमुपसर्जनसंज्ञा अपूर्वनिपातार्थं युज्यत एव । कृत्रिमाकृत्रिमत्वेऽप्युपसर्जनस्य पूर्वनिपाते कृत्रिमस्यैवाश्रयणम् । उभयोः कृत्रिमत्वेऽन्वर्थत्वेन व्यवस्था । ह्रस्वविधौ तु व्याप्तेर्न्यायादुभयोराश्रयणम् । `लुक् तद्धितलुकि' (पा. 1/2/49) इति स्त्रीप्रत्ययान्तरस्योत्तरपदत्वेन

प्रथमानिर्देशाभावेऽपि तद्धितार्थविशेषणत्वादन्वार्थमुपसर्जनत्वम् ।
तदेवमत्र श्यामादेरुपसर्जनत्वमुपपद्यत इति ह्रस्वः सिध्यति । उपमेयस्यान्यपदार्थस्य नानाविभक्तित्वेऽप्येकविभक्तित्वं तदपेक्षम्, उपमानस्य चोपमेयार्थत्वाद् गुणभाव इत्युपमानापेक्षमत्र श्यामादेर्गुणत्वमिति विकल्पः समर्थनीयः । अन्यथोपमेयापेक्ष एव गुणत्वे तेनैवैकविभक्तिरिति विकल्पो नोपपद्येत ।
एवमनेन प्रकारेण ह्रस्वसिद्धावपि तित्तिरिकल्माषीत्यत्र `अन्यतो ङीप्' (पा.4/1/40) इति स्त्रीप्रत्ययोऽभिमतो न स्यात् । तथाह्यत्र पूरव स्त्रीप्रत्यये तित्तिरिणोपमानेन पुल्लिङ्गेन कल्माषीशब्दस्य सामानाधिकरण्यं न स्यादिति पूर्वमकृत्वैव स्त्रीप्रत्ययं सामानाधिकरण्यादुपमानवृत्तित्वे वर्तिपदयोः समासः क्रियते । समासवाच्या चोपमेया स्त्रीति स्त्रियामनुपसर्जनाधिकारान्ङीष् न स्यात् । कल्माषस्योपमेये गुणत्वात् । ततश्च टाबत्र स्त्रीप्रत्ययःप्रसज्येत ।
एवं कुम्भकपाललोहिनीति `वर्णादनुदात्तात्--'(पा. 4/1/39) इति ङीप् न स्यादित्यर्थः । एवं सत्युपसर्जनत्वेऽनिष्टमिदमभ्युपगम्योक्तम् । न त्वत्रोपसर्जनत्वं न्याय्यम् ।
कृत्रिमे हि सम्भवति ह्रस्वविधौ तस्यैव सम्प्रत्ययो युक्तः । `लुक् तद्धितलुकि' (पा. 1/2/49) इत्यत्र प्रकृतस्य कृत्रिमस्यासम्भवादनुवृत्तिसामर्थ्याल्लौकिकमन्वर्थमाश्रीयते । ततोऽन्यत्र त्वकृत्रिमाश्रयमेव युक्तम् । अत्र च कृत्रिमत्वं नास्ति । `एकविभक्ति' (पा. 1/2/48)इति ह्येवं व्याख्यायते--समास इत्याधारसप्तमी, न विषयसप्तमी । तेन समासाधारं यदेकविभक्ति तत्रैव प्रतियोगिनो नानाविभक्तित्वे तदुपसर्जनसंज्ञमिति ।
अत्र स समासस्थस्य प्रतियोगिनः पदस्य विभिन्नविभक्तियोगाभावः समानाधिकरमसमासो ह्यमिति कथं भिन्नविभक्तियोगः स्यात् ।
अत एव भाष्यकारेणारुचिरत्र सूचिता `यदि पुनरुपसर्जनान्येवञ्जातीयकानि भवन्ती'ति । नैवंविधेषूपसर्जनसंज्ञावकल्पत इत्यर्थः । तस्मादुपसर्जनत्वाभावाद्ध्रस्वत्वमत्र न स्यादिति स्थितमेतत्--
`टाबन्त एव चैत्रादौ श्यामाशब्दस्तथा भवेत्' (वा.प.वृ 409) इति ।
यत्तु चोदितं कैश्चित्--सत्यपि चोपसर्जनह्रस्वत्वे `परवल्लिङ्गं--' (पा. 2/4/26) इति शब्दार्थातिदेशात् पुनराकारप्रसङ्ग इति ।
तदनुपपन्नम् । दत्ता यवतीत्यत्र शब्दातिदेशे द्वितीयस्य तिशब्दस्य प्रसङ्गात् । प्रत्याख्यातं तदिति, कुतः पुनराकारप्रसङ्गः ।। 410 ।।
अभ्युपगम्योपसर्जनत्वं स्त्रीप्रत्यये दोष उक्तः । तत्र समाधानं शङ्कित्वादोषान्तरप्रसङ्गेन निराकरोति--
सति शिष्टबलीयस्त्वाद् बाह्ये ङीषि च सत्यपि ।
उपमानस्वरो न स्यात् तस्मात् स्त्र्यन्तः समस्यते ।। 411 ।।
कृते समासे तस्योपमेयार्थवृत्तेरनुपसर्जनत्वात् तस्मात् समासाद् बहुर्भूतः स्त्रीप्रत्ययोऽत्र भविष्यति । तित्तिरिकल्माषकुम्भकपाललोहितादयो हि समुदाया एव वर्णविशेषवाचिनो रूढाः । कल्माषादीनामेव तु वर्णवाचित्वे ग्रहणवता प्रातिपदिकेन तदन्तविधेः प्रतिषेधात्, समुदायादत्र स्त्रीप्रत्ययोऽभ्युपपगम्याप्युच्यते । अत एवाह--सत्यपि ङीषि चेति ।
यद्वा `अनुपसर्जनात् (पा. 4/1/14) इति प्रधानेन तदन्तविध्यर्थो योगो व्याख्यातः । अत्र च नैवञ्जातीयकान्युपसर्जनानीति भाष्याभिप्रायाद् वर्णवाचिना प्रधानेन तदन्तविधेः समासात् स्त्रीप्रत्ययो जायते । एवमप्युपमानपूर्वपदप्रकृतिस्वरोऽत्रेष्टो न स्यात् ।
तथाहि--कृते समासे पूर्वपदप्रकृतिस्वरस्तावत्येव प्रवर्तते । पदग्रहणं हि परिमाणार्थमित्युक्तं न सुबन्ततिङन्तपरिग्रहार्थम् । तत्र स्त्रीप्रत्यये प्रत्ययस्वरः सतिशिष्टत्वादुपमानपूर्वपदप्रकृतिस्वरं बाधेत । ङीषि चायं दोषः । तत्र स्वरस्य प्रत्ययोदात्तस्यभावात् । ङीषि त्वनुदात्तत्वादुपमानस्वर एवावशिष्यत इति विशेष्य ङीषीत्युक्तम् ।
यत एवं स्वरदोषस्तस्मात् पूर्वमकृते समासे स्त्रीप्रत्यये कृते तदन्तस्य सामान्यवचनस्योपमानेन समासः कार्यः ।
तथा च सतिशिष्टत्वादुपमानस्वर एवेष्ट सिध्यति । एतच्चोपमाने सामान्यवचनस्य वृत्तौ न लभ्यते, तित्तिरिणा पुंसा

कुम्भकपालेन नपुंसकेन च सामानाधिकरण्यात् स्त्रीप्रत्ययानुत्पत्तेरिति सामान्यवचनस्योपमाने वृत्तावयं दोषः ।। 411 ।।

किञ्च--

गुणे न चोपमानस्थे सापेक्षत्वं प्रकल्पते ।

प्राधान्यस्य (प्रधानस्य) तथा न स्याद् व्याघ्रादौ लिङ्गदर्शनम् ।। 412 ।।

पुरुषोऽयं व्याघ्र इव शूरः पुरुषव्याघ्र इति `उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (पा.2/1/56) इति समासे सामान्यवाचिनः शूरादेः शब्दस्य प्रयोगे तत्सापेक्षत्वादसामर्थ्यादेव समासो न भविष्यतीति किं सामान्याप्रयोग इति वचनेन ।

तत्तु ज्ञापयति--भवति प्रधानस्य सापेक्षस्यापि समास इति व्यवस्थापितं लिङ्गदर्शनम् । एतच्च गुणे सामान्यधर्मे शौर्यादौ व्याघ्राद्युपमानगते पुरुषादेः प्रधानस्य तदपेक्षत्वं न स्याद्, उत्तरस्योपसर्जनस्य सापोक्षत्वादिति नोपपद्यते विवक्षितार्थज्ञापनम् । उरमेयवृत्तौ हि गुणस्यैतद् ज्ञापकं युज्यते, नोपमानवृत्तिविति प्रदेशान्तरपर्यालोचनयापि नोपमानस्थत्वं गुणवचनस्य युक्तम् ।। 412 ।।

उपसर्जनत्वेन ह्रस्वसमर्थनमनुपपन्नमितीमं पक्षं हेयतयोपसंहर्तुमाह--

तस्मात् सति गुणत्वेऽपि प्राधान्यं विग्रहान्तरे ।

नैवञ्जतीयकं शास्त्रे सम्भवत्युपसर्जनम् ।। 413 ।।

उपमानवृत्तेरुपमेयविशेषणत्वात् सत्यप्यप्राधान्ये श्यामादेर्विग्रहान्तरे प्राधान्यमस्ति, यदोपमेयवृत्तिर्गुणस्तदा यद् वाक्यं तत्र । तथाहि--शस्त्रीव देवदत्ता श्यामेत्यत्र उपमेयवृत्तेः श्यामस्य प्राधान्यम् । उपमानवृत्तित्वेऽपि च समासेनोपमेयस्याभिधानाद् वस्तुतः प्राधान्यमेव धर्मस्य, प्रक्रियावाक्यापेक्षया तु गुणत्वम् ।

तथाचैवंप्रकारं वस्तुतः प्रधानं शास्त्रेऽपि नोपसर्जनमुपपद्यते । प्रकियाभेदेऽपि हि लौकिकोऽर्थः शास्त्रेणानुविधेयः । लोके च प्रधानमेवेदमित्यन्तवर्थमपि शास्त्रे लोकसिद्धार्थानुवादके नास्त्युपसर्जनत्वम् । अत एव `उपसर्जनान्यप्येवञ्जातीयकानी'ति भाष्येऽरुचिः सूचितेत्युक्तम् ।। 413 ।।

तदेवमुपमानवृत्तित्वं गुणवचनस्यानुपपन्नमुक्त्वातोऽनन्तरं भाष्येऽभिहितम्--`एवं तर्हि शस्त्र्यामेव शस्त्रीशब्दो वर्तते । देवदत्तायां श्यामशब्द इत्युपमेयवृत्तित्वमाख्यातम् ।

अत्र तु चोदितम्--"एवमपि गुणोऽनिर्दिष्टो भवति । बहवश्च शस्त्र्यां गुणाः सूक्ष्मा मृदुतरी" इति । उपमेये सामान्यवचनस्य वृत्तेर्यथायथं तल्लिङ्गपरिग्रहः सिद्धः । प्रकृतं चोत्तरपदार्थप्राधान्यमेव निर्वाहितं भवति ।

किन्तु शस्त्रीव श्यामा देवदत्तेति श्यामगुणोपलक्षितस्योपमेयस्य निर्देशादुपमानगतस्य गुणस्य स्त्रीशब्देन जातिविशिष्टार्थाभिधायिना नियतस्यासंस्पर्शादोपम्यहेतोर्धर्मस्य प्रतिनियतस्य प्रज्ञापनं न स्यादिति भाष्यार्थः ।।

अत्र परिहारभाष्यम्--`अनिर्दिश्यमानस्यापि गुणस्य भवति लोके सम्प्रत्ययः' इति ।

एतद् विवृणोति--

उपमेयात्मनि श्यामे वर्तमेनोऽभिधीयते ।

उपमानेष्वनिर्दिष्टः सामर्थ्यात् सम्प्रतीयते ।। 414 ।।

यद्यपि साधारणो धर्मः श्यामादिरुपमेयस्थः स्वशब्देन प्रत्याय्यते । सकृदभिधाव्यापाराच्च शब्दस्य तदुपक्षयत्वमेव । तथाप्युमाने समानधर्मस्यान्यस्याश्रुतेः संनिधानात् साकाङ्क्षत्वाच्च श्रुतेनैव योगः परिकल्प्यते, अश्रुतपरिकल्पनायाः श्रुतसम्बन्धस्य न्याय्यत्वात् ।। 414 ।।

अत्रैव दृष्टान्तभाष्यं--`तद्यथा--चन्द्रमुखी देवदत्तेति । बहवश्च चन्द्रे गुणाः । या चासौ प्रियदर्शनता, सा गम्यते' इति ।

एतद् व्याचष्टे--

द्रव्यमात्रेऽपि निर्दिष्टे चन्द्रवक्त्रेऽनुगम्यते ।

विशिष्ट एव चन्द्रस्थो गुणो नोपप्लवादयः ।। 415 ।।

चन्द्रमुखीति सामान्यधर्ममन्तरेणोपमानभूतद्रव्यमात्रोपादानेऽपि प्रसिद्धेरुपमानहेतुराहृणादकत्वादिः साधारणो धर्मोऽनुवर्त्यते, न त्वन्ये चन्द्रधर्मा उपप्लवादयः । उपप्लवः शशाख्यो मलः । आदिशब्दाद् वृद्धिक्षययोगः ।
अन्ये तु वृद्धिक्षययोगो नित्यप्रवृत्तगतित्वं वोपप्लवः । आदिशब्दाच्छशलाञ्छनत्वादय इति व्याचक्षते ।
इत्थञ्च यत्र नामानिर्दिष्टो गुणः प्रसिद्धेरुपमानहेतुर्विशिष्टः प्रतीयते,तत्रैकत्र श्रुतोऽपि सामर्थ्यादन्यत्र कथं न प्रतीयेतेत्यतिशयो निदर्शने गर्भीकृतः।। 415 ।।
तदेवमुपमेयवृत्ति सामान्यवचनमित्ययं पक्षः । एतच्चात्र प्रक्रियायां नानात्वं वितार्यते । परमार्थतस्तु लौकिकः
शस्त्रीश्यामादिरखण्डः शब्दो विशिष्टोपमेयार्थवाचीत्याह--
भेदभावनयैतच्च समासेऽप्युपवर्ण्यते ।
विशिष्टगुणभिन्नेऽर्थे पदमन्यत् प्रयुज्यते ।। 416 ।।
उपमानवृत्तित्वे सामान्यवचनस्यैकं वाक्यम्, उपमेयवृत्तित्वे तु द्वितीयमितिवाक्ये भेदस्य
नानात्वस्योपमानार्थत्वमुपमेयार्थत्वमित्येवम्भूतस्यानुभवेन याहिता वासना संस्कारस्तया हेतुभूतया वाक्यसमानार्थत्वं वृत्तेरवसाय तत्राप्येतदुपमानोपमेयार्थवचनत्वं सामान्यवचनस्य कथ्यते । उपमानोपहितभेदश्यामादिगुणविशिष्टे तूपमेये निरंशं समासपदं वाक्यादन्यदेवोच्चार्यते । तदन्वाख्यानोपायपरिकल्पना तु प्रक्रियानुरोधाद् यथान्यद् दोषजातं नापतति तथा कर्तव्येति सम्प्रत्युपमेयवृत्ति सामान्यवचनं स्थितम् ।
एवं हि शस्त्रीश्यामो देवदत्त इति सिध्यति । तित्तिरिकल्माषीति चेष्टः स्त्रीप्रत्ययो भवति ।। 416 ।।
अत्रापि पक्षे चोद्यभाष्यम्--`एवमपि सामानाधिकरणेनेति वर्तते। व्यधिकरणानां समासो न प्राप्नोती'ति । उपमेयवृत्तित्वे श्यामाशब्दस्य शस्त्रीशब्देन सामानाधिकरण्याभावात् समानाधिकरणप्रकरणं नानुगृह्येतेत्यर्थः ।
अत्र परिहारोऽभिहितः--`किं हि वचनान्न भवती'ति । अन्यत्र कृतार्थत्वाद् दुर्बलतरमत्र प्रकरणमकृतार्थतया श्रुत्या बाध्यत इत्याशयो भाष्यकारस्य ।
ननु चोपमानवृत्तित्वे सामान्यवचनस्यास्ति वचनस्यावकाशः । तथाच प्रकरणानुग्रहोऽपि कृतो भवति । नैतदस्ति ।
विशिष्टार्थवृत्तेः पदस्यान्वाख्याने शास्त्रप्रक्रियाभङ्गाय यः प्रभवति, असावपोद्धारपदार्थो नाश्रयणीयः । उपमानविषये च सामान्यवचने द्वयोरपि पदयोरुपमेयं प्रति गुणत्वात् सापेक्षत्वेऽसामर्थ्याद् वृत्तिर्न स्यात् ।
उपमेयवृत्तित्वे तु संन्निहितोभयाधिकरणः सम्बन्धो निराकाङ्क्षो वर्तते । तथाच सामर्थ्यामिति व्यधिकरमयोरपि गमकत्वाद् वचनं विधत्ते वृत्तिम् ।
अतोऽनन्तरं भाष्यं--`यद्यपि तावद्वचनात् समासः स्यात् । इह तु खलु मृगीव चपला मृगचपला । समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति' इति ।।
तदेव विवृणोति--
यदि भिन्नाधिकरणो वचनादनुगम्यते ।
मृगीव चपलेत्यत्र पुंवद्भावो न सिध्यति ।। 417 ।।
यदि वचनसामर्थ्यात् प्राकरणिकं सामानाधिकरण्यमनादृत्य व्यधिकरमयोरप्ययं समासोऽनुविधीयते, तदा मृगचपलेत्यत्र कर्मधारयाश्रयोऽन्यत्र समानादिकरणपदे चरितार्थः पुंवद्भावो न स्यात् ।। 417 ।।
अत्र परिहारं प्रदेशान्तरोक्तत्वाद् भाष्येऽनुक्तमप्याशङ्कते--
अस्त्रीपूर्वपदत्वात् तु पुंवद्भावो भविष्यति ।
तथैव मृगदुग्धादो न चेत् स्त्र्यर्थो विवक्ष्यते ।। 418 ।।

जात्यन्तरनिवृत्तिपरायां चोदनायां मृगक्षीरादौ पुंवद्भावः, तत्फलं पुमर्थशब्दप्रयोगः सिद्ध इतिं प्रत्याख्यातः पुंवद्भावः `न वा अस्त्रीपूर्वुपदविवक्षितत्वादि'ति ।

एवमिहापि मृगचपलादौ मृगजातीयस्य चापलस्य विवक्षितत्वान्मृग इव चपलेत्येव विग्रह इति स्त्रीत्वाविवक्षायां सिद्धमिष्टम् ।

तथाहि--कृतेऽपि पुंवद्भावे शब्दात् स्त्रीत्वस्यागतेरविवक्षैव समर्थनीया । स हि विवक्षितोऽर्थः, यः शब्दात् गम्यते ।

यदा तु विशिष्टस्य स्त्रीचापलस्य स्त्रियैवोपमोपपत्तेः स्त्रीत्वविवक्षा, तदारम्भणीय एवात्र पुंवद्भावः । कृते च तस्मिन् वृत्तौ स्त्रीत्वस्यान्तर्भावो वक्तव्यः ।

अत एव न चेत् स्त्र्यर्थो विवक्ष्यत इति पाक्षिकत्वेनायं परिहारः शङ्कितः । अनेनैव चाशयेन भाष्ये नोपन्यस्तमिदम् ।। 418 ।।

अत एवातोऽनन्तरं निर्दोषपक्षाश्रयोण भाष्यम्--`एवं तर्हि; तस्यामेवोभयं वर्तत इति ।

एतद् व्याचष्टे--

शस्त्रीव शस्त्री श्यामेति देवदत्तैव कथ्यते ।

तस्यामेवोभयं तस्मादुच्यते शास्त्रविग्रहे ।। 419 ।।

इहोपमानवृत्तित्वे सामान्यवचनस्योपमेयः समाववाच्योऽभिहिंतः । एवञ्चात्र वाक्ये वर्तिपदयोरेवोपमेयवृत्तित्वमस्तु ।

तथाहि--उपचाराच्छस्त्रीव शस्त्रीति देवदत्ता कथ्यते । अतस्तस्यां देवदत्तायामुपमेयभूतायामेवोभयमुपमानवचनं सामान्यवचनं च वर्तत इति सामानाधिकरण्योपपत्तौ पुंवद्भावसिद्धिः । प्रकरणं च न बाधितं भवति । उपमानसम्बन्धमन्तर्भाव्य च देवदत्तायां शस्त्रीशब्दः प्रवर्तत इत्यभेदाध्यासाद् गम्यते । परार्थे शब्दप्रयोगो गर्भीकृतेवार्थो युज्यते, नान्यथा ।

तद्यथा--सिंहो माणवक इत्यादिः । सिंहमध्यापयेति चोपचरितेन शब्देन व्यवहारो दृश्यते । एवमिह शस्त्रीशब्देन देवदत्तैव व्यवह्रियते ।

एतच्च तस्यामेवोभयं वर्तत इति शास्त्रविग्रहे शास्त्रप्रक्रियागते वाक्ये कथ्यते । वाक्यावस्थायां हि समानाधिकरणतासमर्थनार्थमिदमभिधीयते । तत्र च शास्त्रप्रक्रियायां विविधनानाभूतमपोद्धारपदार्थानां ग्रहणम् । लौकिके तु पदे विशिष्टार्थवाचके निरंशे विभागाभावान्नास्योपन्यासस्यावसरः । तत्र हि वर्णवत् पदविभागस्यासत्यत्वान्न कश्चिच्छस्त्रीशब्दस्तदर्थो वा, यस्योपचरितार्थत्वं वर्ण्येतेत्यभिप्रायः ।। 419 ।।

एष एव पक्षः सिद्धान्ततया भाष्येऽवस्थापितः । तथाह्यनन्तरं भाष्यम्--`एतच्चात्र युक्तं, यत्तस्यामेवोभयं वर्तते । इतरथा बह्वपेक्ष्यं स्यादि'ति ।

एतद् व्याचष्टे--

पुंवद्भावस्य सिद्ध्यर्थं पक्षे स्त्रीप्रत्ययस्य च ।

बह्वपेक्ष्यमतस्तस्यामुभयप्रतिपादनम् ।। 420 ।।

यदा श्यामाशब्द उपमेये वर्तत इति पक्षस्तदात्र पक्षे वैयाधिकरण्याद् वचनसामर्थ्यात् समासेऽपि पुंवद्भावस्य सिद्ध्यर्थमस्त्रीपूर्वपदविवक्षानियमोऽपेक्ष्यः । मृगक्षीरादिवदत्र मृगचपलादौ सामान्यस्यैव विवक्षा, न विशेषस्येत्येतदनुसरणीयम् ।

एष विवक्षानियमोऽशब्दकोऽत्रानुस्त्रियमाणो गौरवं प्रतिपत्तावापादयतीति बह्वपेक्षत्वमत्र ।

यदा तु शस्त्र्यामुपमाने श्यामाशब्ज इति पक्षस्तदात्र पक्षे शस्त्रीश्यामो देवदत्त इत्युपसर्जनह्रस्वत्वेन सिद्धौ तित्तिरिकल्माषीत्यादावनुपसर्जनाधिकारादिष्टस्य स्त्रीप्रत्ययस्य सिद्ध्यर्थं समुदाया एवैते वर्णविशेषवाचिनो नैवञ्जातीयकं वोपसर्जनमिति प्रधानेन तदन्तविधेः समासाद् बाह्यो ङीषिति वाच्यम् । तथाच स्वरे दोष इत्येतदत्र बह्वपेक्ष्यम् । यत एवमनयोः पक्षयोर्बह्वपेक्ष्यम्, अतस्तस्यामेवोभयस्योपमानोपमेयवचनस्य भाष्येऽभ्युपगम इत्यर्थः ।। 420 ।।

प्राक् समासादुपमेयवृत्तेः कल्माषादेः स्त्रीप्रत्ययस्येष्टस्य सिद्धेर्यथायथमुपमेयगतलिङ्गसिद्धेश्च प्रकारान्तरेणात्र बह्वपेक्षत्वं व्याचष्टे--

श्यामा शस्त्री यथा श्यामा शस्त्रीकल्पेति चोच्यते ।
तत्रोपमानेतरयोः श्यामेत्येतदपेक्ष्यते ।। 421 ।।
श्यामा शस्त्री यथेत्युपमेयवृत्तौ श्यामाशब्दस्य विग्रहवाक्यं प्रदर्शितम् । श्यामा शस्त्रीकल्पेत्युपमानवृत्तौ श्यामाशब्दस्य विग्रहवाक्यम् । तदत्रैकनिष्ठस्य गुणस्याभिधाने तदितरगतत्वेन सामर्थ्यात् कल्पनं, धर्मसामान्यप्रयुक्तत्वादुपमानोपमेयस्य सन्निधानादेकत्र श्रुतोऽपि साधारणो धर्मोऽपरत्रानुमीयत इति बह्वपेक्षत्वं केचिदाहुः ।
तदेतदुक्तं भाष्ये--`यदि तावदेवं विग्रहः क्रियते, शस्त्रीव श्यामा देवदत्तेति, शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात् । अथाप्येवं विग्रहः क्रियते यथा शस्त्री श्यामा तद्वदियं देवदत्तेति । एवमपि देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यादि'ति ।। 421 ।।
ननु विग्रहवाक्यं लौकिकार्थानुगुणं प्रदर्शनीयमित्युभयत्रापि श्यामाशब्दो वाक्ये प्रयोक्तव्यः । वृत्तौ तु द्वितीयस्य श्यामाशब्दस्यान्तर्भूतत्वादप्रयोग इति कथं बह्वपेक्ष्यमित्यत आह--
अथ श्यामेव शस्त्रीवं श्यामेत्येवं प्रयुज्यते ।
शस्त्री यथेयं श्यामेति तावदेव प्रतीयते ।। 422 ।।
श्यामा शस्त्री यथा तथा इयं देवदत्ता श्यामा इत्येवं द्वयोः श्यामाशब्दयोरूपमानोपमेयगतयोः प्रयोगे शस्त्री यथेयं श्यामेति सकृच्छ्यामाशब्दप्रयोगे यत्परिमाणं वस्तु तावत् तत्परिमाणमेवावगम्यते ।। 422 ।।
तथाहि--
उपलक्षणमात्रार्था गुणस्यास्य यदि श्रुतिः ।
पृथग् द्वयोः श्रुतोऽप्येष नेष्टस्यार्थस्य वाचकः ।। 423 ।।
वस्तुमात्रोपलक्षणाय गुणशब्दस्योपादानेऽसकृत्प्रयोगेऽपि नेष्टस्यौपम्यस्य प्रतिपादनं स्यात् । या श्यामगुणोपलक्षिता शस्त्री, सा धर्मान्तरेणापि तथाभूताया देवदत्तायाः परिच्छेदिकेत्यपि प्रतीतेरैपम्यनिबन्धनत्वं नियोगतः श्रुतस्यासकृत्प्रयोगेऽपि न गम्येत ।। 423 ।।
अथोपमायां सव्यापारत्वमत्र श्रुतस्य, तदा--
उपमेयं तु यद् वाच्यं तस्य चेत् प्रतिपादने ।
सव्यापारा गुणास्तत्र सर्वस्योक्तिः सकृच्छ्रुतौ ।। 424 ।।
उपमानसम्बन्धेन परिच्छेद्यमुपमेयं यत् प्रधानं वाच्यमभिधेयं, तस्य रूपविशेषप्रज्ञापने यदि व्यापृता गुणा नोपलक्षणमात्रार्थाः, तदैकगुणप्रयोगेऽपि सर्वस्योपमानस्यापि गुणप्रतिपादनं सामर्थ्यादिति द्विरभिधानं नोपयुज्यते । सादृश्यावच्छेदेन हि सम्बन्धं नियन्तुं गुणस्योपादानमिति यथाविवक्षितार्थप्रतिपत्तिर्भवति । तदेवमुपमाने उपमेये वा वृत्तौ सामान्यवचनस्य इतरगतत्वेनापेक्षणाद् बह्वपेक्ष्यमिति `तस्यामेवोभयं वर्तत' इत्येष एव सिद्धान्तो भाष्यकारेणावस्थापितः ।। 424 ।।
अतः परं वाक्यकारः पपाठ--`उपमानसमासे गुमवचनस्य विशेषभाक्त्वात् सामान्यवचनाप्रसिद्धिरि'ति ।
तदेतद् व्याचष्टे--
प्रकाराधारभेदेन विशेषे समवस्थितः ।
शब्दान्तराभिसम्बन्धे सामान्यवचनः कथम् ।। 425 ।।
पूर्वं `साधारणं ब्रवन् धर्मम्' (वा.प.वृ.385) इत्यादिना सामान्यवचनत्वे प्रतिपादितेऽप्युपमेयगतत्वेनोपमानगतत्वेन वा गुणस्येहोक्तत्वादेकतरोपक्षये कथं साधारण्यमित्याक्षेपोऽयमुपपद्यते । तथाह्याधारनिष्कर्षेण गुणमात्राभिधानेऽनियतेनाधारेणावच्छेदाद् भवेत् सामान्यवचनत्वम् ।
तदा चायं गुणः स्वप्राधान्येनाभिधीयमानोपमायां सव्यापारः, अपितु धर्मान्तरेणोपमानिमित्तेन सम्बध्यते । यथोक्तं--`धर्मः समानः श्यामादिः' (वा.प.वृ.377) इत्यादि ।

यदापि साधारणगुणनिमित्तस्तत्त्वाध्यारोपस्तदा सामान्यवचनस्य प्रयोग एव नास्ति । यदा पुनरभेदोपचारान्मतुब्लोपाद् वा द्रव्यसमानाधिकरणो गुणवचनस्तदायं समानाधिकरणः समासः । सामान्यं साधारणो धर्मो गुणः, तमुकृत्वा तद्वति यो वर्तते,स सामान्यवचन इत्युक्तम् । तत्र चाधारेण नियतेन योगात् तद्भेदेन विशिष्ट एव गुणः संसर्गिधर्मान्तरादिभेदाद् वा । यथोक्तं--`गुणानामाश्रयाद् भेदः स्वतो (वा.प.वृ. 372) इत्यादि ।

यद्यपि चैकत्र श्रुतोऽन्यत्र सामर्थ्यात् प्रतीयत इत्युक्तं, तथापि वचनग्रहणादिहाभिधाव्यापारेण साधारण्यं विवक्षितं, न श्रुत्यर्थाभ्याम् । श्यामाशब्दश्च गुणमात्रस्यापि प्रतीतौ शब्दान्तरेणोपमानवाचिना वा योगात् तन्नियतत्वेन विशेषवृत्तिरेव । ननु चासौ वाक्यार्थो न पदसंस्कारं प्रतिबध्नाति । नैतदस्ति । निरस्तावयवभेदस्य वृत्तिपदस्यान्वाख्येयत्वात् पूर्वपदोत्तरपदप्रविभागे क्रियमाणे तदर्थानुसारेणैवापोद्धारपदार्थः प्रविभजनीयः । तत्र च विशिष्टार्थवचन एव श्यामाशब्दः प्रविभक्तुं न्याय्य इति कथं सामान्यवचनता ।। 425 ।।

अत्र परिहारः--

सादृश्यमात्रं सामान्यं द्विष्ठं कैश्चित् प्रतीयते ।
गुणो भेदेऽप्यभेदेन द्विवृत्तिर्वा विवक्षितः ।। 426 ।।
व्यापारो जातिभागस्य द्रव्ययोर्वाभिधित्सितः ।
रूपात् सामान्यवाचित्वं प्राग्वा वृत्तेरुदाहृतम् ।। 427 ।।

उभयगतं सादृश्यमात्रं सामान्यशब्देनात्र विवक्षितम् । सादृश्यं च भेदाभेदाभ्यामेव भवति । तथा चैकगतत्वेनाप्यभिधाने तस्यान्यापेक्षत्वादभिधाव्यापारादेवोभ्यनिष्ठतावगम्यत इत्युपपद्यते सामान्यवचनत्वम् । गुण एवात्र प्रकाराधारविशिष्टोऽप्युपमायां व्यावृत्तोऽविशेषेणोपमानोपमेयगतो विवक्षितः । सामान्यवचनशब्दस्य प्रत्याययितुमिष्ट इत्यर्थः । तथा चान्वयिना रूपेणोच्यमानो गुण एव सादृश्यम्, न ततोऽर्थान्तरम् । तदेतदुक्तं भाष्ये--`न चावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमाह । द्वयोरपि यः सामान्यमाह, सोऽपि सामान्यवचनः' इति ।

यत्तु वाक्यकारेणोक्तम्--`न वा श्यामत्वस्योभयत्र भावात् तद्वाचकत्वाच्च शब्दस्य सामान्यवचनप्रसिद्धिः' इति । तद् व्याचष्टे--व्यापारो जातिभागस्येत्यादिना । द्रव्ययोरुपमानोपमेयलक्षणयोर्गुणजातेर्व्यापारो गुणाभेदप्रत्ययकरणद्वारेणौपम्यसम्बन्धप्रत्यायनं सामान्यवचनेन विवक्षितम् ।

यद्यपि गुणजातिः सकवाश्रयसमवेताऽऽभिन्नत्वान्नोपमायामुपयोगिनीत्युक्तम्, तथापि स्वधारहकसूक्ष्मविशेषोपरागादवान्तरसामान्यरूपतामापन्ना सादृश्यशब्दवाच्यौपम्योपयोगिनी भवति । तथा च जात्यापादिताभेदस्य श्यामत्वगुणस्योभयत्रोपमानोपमेययोः समवेतस्याभिधायकः सामान्यवचनशब्दः । तदाह--`रूपात् सामान्यवाचित्वम्' इति ।

उपमानोपमेयगतस्य गुणस्य रूपसामान्यावेशादभिन्नस्य प्रत्यायने सामान्यवचनता श्यामादेः शब्दस्य सिध्यतीत्यर्थः । अभेदोपचाराद् द्रव्यवृत्तिता चात्र शब्दस्येति द्रव्ययोरित्याह । परिहारान्तरं स्पष्टमिदं भाष्येऽभिहितम् । `अथवा सामान्यवचनैरित्युच्यते । सर्वः शब्दोऽन्येन शब्देनाभिसम्बध्यमानो विशेषवचनः संपद्यतेऽत एवं विज्ञास्यामः प्रागभिसम्बन्धाद् यः सामान्यवचनः' इति । तदेवाह--`प्राग् वा वृत्तेरुदाहृतम्' इति ।

आभिमुख्येनान्योन्यरूपसम्मिश्रणेन सम्बध्यन्ते यस्मिन्नर्था इति समासोऽभिसम्बन्धशब्देन विवक्षितः, तत्रार्थानां निर्विभागत्वात् । यथा `विशेषणं विशेष्येण', (पा. 2/1/57) `द्वितीया श्रितादिभिः (पा. 2/1/34) समानाधिकरणेन' (पा.2/1/49) "अर्धं नपुंसकम्" (पा. 2/2/2) इत्यादिव्यवहारो वाक्यगतभेदभावनावशादाश्रीयते, तथा सामान्यव्यवहारोऽपि ।

तथाहि--वृत्तिवाक्ययोः संसृष्टासंसृष्टार्थतया सत्यपि भेदे रूपसामान्यादभेदाभिधानोपपत्तेर्वाक्यगतैर्धर्मैर्वृत्त्यान्वाख्यानमपोद्धारपदार्थकल्पनयोपपद्यत एव । ततश्च समासे सामान्यस्योपमेयावरुद्धत्वेऽपि ततः पूर्वं वाक्ये विच्छिन्नार्थप्रत्यायकपदप्रयोगे विशेषावरोधाभावात् सामान्यवचनतोपपत्तिः ।

यद्वा सामान्यमुक्तवान् सामान्यवचन इति वाक्यावस्थापरिदृष्टं सामान्यवचनत्वं भूतपूर्वगत्याश्रीयते । यथा शस्त्रीशब्दस्य वृत्तावुपमेयवृत्तित्वेऽपि भूतपूर्वगत्योपमानवाचित्वमिति सर्वेष्टसिद्धिः ।। 426,427 ।।

इदानीम् "उपमितं प्याघ्रादिभिः" (पा. 2/1/56) इत्यत्र भाष्यं विचार्यते । तथाहि-तत्र सामान्यवचनस्य प्रयोगे शूरशब्दस्य पुरुषोऽयं व्याघ्र इव शूर इति समासो मा भूदिति सामान्याप्रयोग इत्युच्यते । अत्र च

पूर्वोत्तरपदयोरुपमानोपमेयार्थऊभेदाद्वैयधिकरण्यादेव समासस्याप्रवृत्तिः ।

यद्येवं मूलोदाहरणेऽपि पुरुषव्याघ्र इति कथं सामानाधिकरण्यमित्यत आह--

व्याघ्रशब्दो यदा शौर्यात् पुरुषार्थोऽवतिष्ठते ।

तदाधिकरणाभेदात् समासस्यास्ति सम्भवः ।। 428 ।।

शौर्यादिसमानगुणान्तर्भावनेनोपमानवचना अपि व्याघ्रादयो यदा तत्त्वाध्यारोपादुपमेयवृत्तयो भवन्ति, तदा समानाभिधेयत्वात् समानाधिकरणाधिकारविहिता वृत्तिरुपपद्यते, पुरुषव्याघ्र पुरुषसिंह इति । अत्र च सामान्यधर्मस्यान्तर्भावादप्रयोगः ।। 428।।

यदा तु स प्रयुज्यते, तदा--

शूरशब्दप्रयोगे तु व्याघ्रशब्दो मृगे स्थितः ।

भिन्नेऽधिकरणे वृत्तेस्तत्र नैवास्ति सम्भवः ।। 429 ।।

स्वशब्देनैव सामान्यधर्मस्योपमेयगतस्याभिधाने मृगजातीये स्वार्थ उपमान लक्षण एव व्याघ्रशब्दो वाचकत्वेन वर्तते, नोपमेये पुरुषे; भेदसम्बन्धस्योद्भूतस्येवादिना द्योतितत्वादभेदेनायोगात् ।

एवञ्च भिन्नाधिकरणत्वात् प्राकरणिकः समासो न प्राप्नोतीति किं प्रतिषेधेनेत्यर्थः ।। 429 ।।

एतत् समर्थयते--

सामानाधिकरण्येऽपि गुणभेदस्य सम्भवात् ।

प्रयोगः शूरशब्दस्य समासेऽप्यनुषज्यते ।। 430 ।।

यदापि समानगुणान्तर्भावनेन व्याघ्रशब्दः पुरुषे वर्तते, तदापि शूरशब्दस्य प्रयोगः स्यात्, समानस्य धर्मस्य नियमख्यापनाय । अन्यथा सामानाधिकरण्यान्यथानुपपत्त्याध्यारोपहेतुनियतो गुणः प्रतीयते ।

तथाहि--गुणभेदस्यास्ति सम्भवो व्याघ्रे, शौर्यहिंस्रत्वबलवत्त्वादिरपि गुणः सम्भवादन्तर्भूत इत्यवधार्यते । तथा च नियमाय शूरशब्दप्रयोगेऽपि समासः स्यादित्यर्थवान् प्रतिषेधः ।। 430 ।।

ननु सिंहो व्याघ्र इति पूजायाम्, श्वा काक इति कुत्सायामित्युद्घोष्यते । तथा च पुरुषव्याघ्रः, पुरुषसिंह इति शोर्यमेव पूजार्थमन्तर्भूतो गुण इति कथमनियम इत्याशङ्क्याह--

पूजोपाधिश्च यो दृष्टः कुत्सनोपाधयश्च ये ।

तेषां भिन्ननिमित्तत्वान्नियमार्था पुनः श्रुतिः ।। 431 ।।

पूजाप्रतिपादनपरतया ये गुणा उपमेयोपकारिणोऽन्तर्भाव्यन्ते उपमानेन ते बहवो व्याघ्रादेः प्रकरणभेदगताः । ततश्च सामान्यशब्दादस्मान्नियमेन नावगम्यन्त इति पुनः श्रुतिः शूरादिशब्दोऽवधारणार्थः प्रयोक्तव्य एव ।

तद्यथा--`अभिमनायते, सुमनायते, दुर्मनायते' इत्यत्र सुदुरभीनां प्रत्ययार्थविशेषणपक्षे गतार्थानामपि प्रत्यय--प्रयोगाद्रपसामान्यात् प्रत्ययान्तस्य मनायत इति सर्वसाधारण्याद् विशेषानभिव्यक्तौ प्रयोगस्तादर्थ्येनोपपद्यते, तथात्र ।

एवं पुरुषवाक इति निन्दाप्रतिपादनपरतयापि प्रयोगे काकगताशुचिभक्षणानवस्थायितादयो निन्दाहेतवो बहव इति नियमाय पुनः श्रुतिः साधारणवचनस्येति समासप्राप्तौ युक्तः प्रतिषेधः ।

चन्द्रमुखादौ तु प्रसिद्धिवशाद् विशिष्टधर्मप्रतिपत्तिरुक्ता । इहापि प्रकरणादिवशाद् विशेषप्रतिपत्तावपि यदा प्रकरणाद्यभावस्तदा प्रयोगे साधारणवचनस्य समास निषेध उपपद्यत एव ।। 431 ।।

किं वात्र सामानाधिकरण्यसमर्थनेन । तथाहि--सामान्यप्रयोगेऽपि सापेक्षत्वेनासामर्थ्यात् समासाप्राप्तौ प्रधानस्य सापेक्षस्यापि

भवति समास इति ज्ञापकार्थमेतदुक्तम् । एवञ्च वैयधिकरण्येन समासाप्राप्तावपि भवत्येवैतज्ज्ञापकमित्याह--
असम्भवेऽपि वा वृत्तेः स्यादेतल्लिङ्गदर्शनम् ।
अच्वेरिति यथा लिङ्गमभावेऽपि भृशादिषु ।। 432 ।।
वैयाधिकरण्यादसम्भवेऽप्राप्तौ वृत्तेः समासस्य तत्सम्भावनया यदेतत् सामान्याप्रयोग इति वचनम्, तत् सुतरामेव लिङ्गदर्शनं ज्ञापकं भवेत् । न केवलं सापेक्षात्वादसामर्थ्यम्, यावद् वैयधिकरण्यादपि । प्रधानस्य च
स्वातन्त्र्यादनेकविशेषणयोगोपपत्तिर्न्यायसिद्धा । गुणो ह्येकेन वशीकृतो नान्येन सम्बध्येत । गुणत्वमेव हि तदा जह्यात् । प्रधानस्य युगपदनेकेनोपकारिणा सम्बन्धो भूषणमेव, प्राधान्यस्य परिपोषणादिति न्यायसिद्धेऽर्थे लिङ्गदर्शनमिदम् । दृष्टं चासम्भवेऽपि सम्भावनामात्रेणोपादीयमानं लिङ्गम् ।
तद्यथा--"भृशादिभ्यो भुव्यच्वेः" (पा. 3/1/12) इत्यत्र भवत्यर्थे क्यङो विधाने, तत्रैव भवतियोग च्विप्रत्ययस्यापीति च्वावुत्पन्ने तेनैव भवत्यर्थस्योक्तत्वात् तदन्तेभ्यो भृशादिभ्यः क्यङोऽनुत्पत्तौ सिद्धायामपि प्राप्तिं सम्भाव्यच्वेरिति प्रतिषेधः क्रियमाणो लिङ्गं यत्रार्थे च्विस्तत्रैव क्यङित्यस्यार्थस्येत्यभूततद्भावे क्यङ् सिद्धो भवति, अभृशो भृशो भवति भृशायत इति ।
एवमिहापि वैयधिकरण्यादेव समासाप्राप्तौ प्राप्तिसम्भावनया सामान्याप्रयोग इति प्रतिषेधः प्रधानस्य सापेक्षस्यापि भवति समास इत्यस्यार्थस्य लिङ्गं जायते । तेन राजपुरुषः शोभन इत्यादि सिद्धम् ।
उपमेयगत्वे चात्र सामान्यवचनस्या प्रधानगामिता भवति, नान्यथेति प्रागेव निर्णीतम् ।। 432 ।।
इदानीमुपमानप्रसङ्गेनेदमपरं विचार्यत इत्याह--
वत्यन्तावयवे वाक्ये यदौपम्यं प्रतीयते ।
तत्प्रत्ययविधौ सूत्रे निर्देशोऽयं विचार्यते ।। 433 ।।
ब्राह्मणवदधीते, क्षत्रियवद् युध्यते, वैश्यवदर्जयतीति वत्यन्तपदैकदेशकं यद् वाक्यम्, तत्रोपमानोपमेयभावलक्षणः सम्बन्धोऽवधार्यते ।
तथा ह्यद्ययनादिक्रियालक्षणोऽत्र समानो धर्म उपमेयगतत्वेन श्रूयते । अर्थादुपमानगतत्वेन प्रतिपत्तिरिति भवत्यैपम्यस्यावगमः । तस्यैपम्यस्य प्रतिपादको योऽत्र प्रत्ययो वतिः, तद्विधायके सूत्रे "तेन तुल्यं क्रिया चेद् वतिः" (पा. 5/1/115) इत्यत्र योऽयं निर्देशः, स परीक्ष्यते ।
तथा हि--प्रकृत्यर्थत्वेन वात्र क्रिया निर्दिश्येत, प्रत्ययार्थत्वेन वा । यद्यपि प्रकृत्यर्थत्वेन
प्रत्येया, धर्मसाधारण्यप्रयुक्तत्वादुपमानोपमेयभावस्येतिफलाभेदः, तथापि कः सम्बन्धी क्रियायां न्याय्यः, लक्ष्यव्यवस्था च कथं न भिद्यत इत्यस्ति विचारस्य प्रयोजनम् ।। 433 ।।
तत्रेदं भाष्यम्--`इदमयुक्तं वर्तते । किमत्रायुक्तम् ? यत् तृतीयासमर्थं क्रिया स्यात्' इति । तत्र कोऽभिप्रायो भाष्यकारस्य ? येन तृतीयासमर्थं क्रियेति प्रकृत्यर्थविशेषणपक्षमभ्युपगम्याक्षिपतीत्यत आह--
क्रियेत्युपाधिः प्राथम्यात् प्रकृत्यर्थस्य यद्यपि ।
न प्रातिपदिकं तत्र क्रियावाच्युपपद्यते ।। 434 ।।
तेनेति समर्थविभक्तिरर्थविशेषनिबन्धना । तथा ह्युपमेयापेक्षया तदुपकारायोपसर्जनीभूतः परिगृहीतव्यतिरेकः प्रकृत्यर्थ उपमानलक्षणः (प्रत्ययार्थेन) प्रत्ययार्थत्वेन समन्वययोग्योऽनया व्यतिरेकविभक्त्या ज्ञाप्यत इति समर्थविभक्तिरियमुच्यते । सामर्थ्यं च प्रकृत्यर्थस्य प्रत्ययार्थेनेति प्रकृतेरियं विभक्तिः । तुल्यमिति प्रत्ययार्थः । प्रत्ययसन्निधौ तस्यानधिगतस्यावसायात् । तत्र क्रियेति विशेषणमुपादीयमानं सन्निहितत्वात् प्रकृत्यर्थेन वा सम्बध्येत प्रत्ययार्थेन वा ।
श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभिश्च पदार्थानां गुणविनियोगादिह स्थानान्नियमः ।
तथाहि--प्रथमस्थानपतितं तेनेत्येतदिति तस्यैव क्रमव्यतिक्रमे प्रयोजनाभावाद् युक्तं क्रियेति विशेषणम् । तद्यथा--"सास्य देवता" (पा. 4/2/24) इति सेत्यस्योपाधिर्देवता । "तेन रक्तं रागाद्" (पा. 4/2/1) इति च तेनेत्यस्य रागादिति विशेषणम्

।

पञ्चामीनिर्देशादेव प्रकृत्यर्थविशेषणतात्र, न स्थानबलात् ।

तदेवं यद्यपि तृतीयासमर्थं क्रियेति न केनचिदत्र प्रथममुक्तम्, तथापि न्यायबलात् क्रियेत्युपाधिः प्राथम्यात् प्रकृत्यर्थस्येति युक्तम् `यत् तृतीयासमर्थं क्रिया चेत् सा भवतीत्युच्यते' इति भाष्यम् । न्यायायातोऽमर्थोऽवश्याभ्युपगमनीय इत्युक्त कल्पत्वादुच्यत इति भाष्ये व्यपदिष्टः । तत्र तृतीया सत्त्ववाचिनः प्रातिपदिकाद् विधीयते ।

न च तत् क्रियावाचि, साध्यमानरुपायाः क्रियायास्तिङन्तैकगोचरत्वादिति कथं तृतीयासमर्थस्य क्रियेत्यनेन विशेषणम्, असम्भवादित्याक्षेपः ।। 434 ।।

विशेषणसामर्थ्यात् क्रियावाचि, तर्हि तृतीयासमर्थं भविष्यतीत्याह--

सत्त्वृत्तस्य शेषे वा तृतीया साधनेऽपि वा ।

तिङामसत्त्वाचित्वादुभयं तन्न विद्यते ।। 435 ।।

सत्त्वं सीदन्त्यस्मिन् जातिगुणक्रिया इति इदं तदिति व्यपदेशयोग्यं द्रव्यमुच्यते । तत्र वृत्तस्य प्रातिपदिकस्य तृतीयया योगः । तथाहि--स प्रातिपदिकार्थः परोपकाराधानयोग्यत्वात् तदुपकारोपजनितव्यतिरेकस्तद्वाचिकां विभक्तिमाश्रयते ।

स च व्यतिरेकः क्रियाकारकसम्बन्धनिमित्तः कश्चिच्छेषसम्बन्धः । तद्यथा--अध्ययनेन वसति । दध्ना जडः । तपसा कृशः । धनेन कुलमिति हेतुहेतुमद्भावोऽयं शेषसम्बन्धः ।

कश्चित् पुनः क्रियाकारकसम्बन्ध एव व्यतिरेकः, तत्रापि तृतीया तद्यथा--दात्रेण लुनाति । परशुना छिनत्तीत्यादि । तदेतद् द्वयमपि तृतीयानिमित्तं क्रियावाचिनां तिङामसम्भवि । आख्यातस्य क्रियावाचिता ।

क्रिया च साधनव्यापारास्वभावा प्रसृतावयवा साध्या सिद्धस्वभावद्रव्यविलक्षणेति साध्योपयोगिनीनां शक्तीनामनाश्रयः । सिद्धस्वभावानां चार्थानामन्योन्योपकारे साधनशक्तिप्रभावितः शेषसम्बन्धः, न तु साध्यस्वरूपायाः क्रियाया इति नास्ति क्रियावाचिन आक्यातात् तृतीया ।

क्रियावाचिनस्तृतीयासमर्थताविरोधप्रतिपादनतात्पर्याच्चाप्रातिपदिकत्वं तिङन्तस्यानुपात्तम्, अर्थविरोधादेव तृतीयानुपपत्तेः सिद्धत्वात् ।

यद्यपि च तुल्यार्थे वतिविधानात् तन्निमित्ता शेषविषयैवेह तृतीया सम्भाव्यते, तथापि सर्वथाऽसम्भवमाख्यातुं साधनेऽपि तृतीयोपन्यस्ता ।

ननु च "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववतनस्य" (पा. 2/3/33) इत्यसत्त्वभूतार्थाभिधायिनोऽपि करणभाव उक्तः । सर्वथाऽसत्त्वभूतत्वे क्रियां प्रति साधनत्वायोगात् करणभावोऽघटमानः स्यादिति धर्ममात्रवचनोऽत्र विवक्षितः । धर्ममात्रस्य हि द्रव्यायमाणस्य स्वेनात्मना सिद्धत्वात् करणभावोपपत्तिः । क्रिया तु साध्यत्वेनालब्धस्वभावा सर्वथा नान्यत्रोपकाराय प्रभवति ।। 435 ।।

पाकाररयस्तर्हि क्रियावचनास्तृतीयासमर्था भविष्यन्तीत्यत आह--

पाकादस्तृतीयान्ताः सत्त्वधर्मसमन्वयात् ।

न क्रियेत्यपदिश्यन्ते कृत्वोर्थप्रत्यये यथा ।। 436 ।।

धात्वर्थसिद्धतायां घञादीनां विधानाद् द्रव्यधर्मेण सिद्धत्वेन योगान्न तदन्ताः क्रियाभिधायिन इत्याख्यायन्ते । अत एवैषामक्रियावचनत्वाल्लपिङ्गसङ्ख्यासमन्वयोपपत्तौ कृदभिहितो भावो द्रव्यवदित्युच्यते । सिद्धता च क्रियाधर्मो न द्रव्यं भवतीति द्रव्यवदिति वतिनिर्देशः ।

उपसंहृतसाधनव्यापारत्वात् सिद्धावस्था साध्यत्वाभावान्न क्रिया, अपितु भूतपूर्वया क्रियया व्यपदिश्यते तद्धर्म इति । न तु सिद्धतायामेव साध्यातास्ति, विरोधाद् यौगपद्यासम्भवात् ।

एवञ्च कृत्वा घञाद्यन्तप्रयोगे क्रियाव्यावृत्तिगणने वाच्ये ये प्रत्ययास्ते न भवन्ति । पञ्चकृत्वः पाकः, द्विः पाक इति ।

अतश्चाभ्यावृत्तिग्रहणं पञ्च पाका इत्येतद् व्यवच्छेदार्थम् ।
अन्यथा धर्मधर्मिणोरभेदप्रतिपत्त्या स्यादत्र क्रियागणनात् प्राप्तिः । साध्यस्य त्वर्थस्याव्यावृत्त्या पुनः पुनः प्रवृत्तिरूपया योगः । यदि च घञादिवाच्यः साध्यः स्यात्, सोऽप्यव्यावृत्तिविषयैः प्रत्ययैर्युज्यते । न च युज्यते । तस्मादत्र कृत्वोर्थप्रत्ययविषये तदनुत्पत्त्यैव यथा पाकादयो न क्रियावचना इति निश्चीयन्ते, तथा सर्वत्रैषा क्रियाभिधायित्वाभावो न्यायसिद्ध इत्यर्थः ।।436 ।।
एवं तर्हि तुमुनः स्वार्थे विधानात् क्रियावाचि तदन्तं प्रातिपदिकमस्ति । तथा च पञ्चकृत्वो गन्तुमिति कृत्वोर्थप्रत्ययप्रयोगस्तुमुनन्तस्य । ये च तुमुन्नर्थे विधीयन्ते क्त्वाप्रभृतयः, तेऽपि साध्यार्थवाचिनो युज्यन्ते च कृत्वोर्थैर्द्विर्भुक्त्वेत्याशङ्क्याह--
ये चाव्ययकृतः केचित् क्रियाधर्मसमर्न्विताः ।
तेषामसत्त्वाचित्वं तिङन्तैर्न विशिष्यते ।। 437 ।।
यान्येतान्यव्ययानि कृदन्तानि, तेषां भाव्यमानरूपोऽर्थो वाच्य इत्याख्याततुल्यास्ते तद्वदेव तृतीयया न युज्यन्त इत्यर्थः । प्रातिपदिकार्थमात्रे तु प्रथमात्र न विरुध्यते ।। 437 ।।
कृत्यादिवाच्या तर्हि क्रिया स्वेन रूपेण सती क्रियान्तरसाधनं स्यादिति युज्यते तृतीययेत्यत आह--
कृत्वसुञ्विषया यापि शयितव्यादिषु क्रिया ।
उपमानोपमेयत्व तत्राप्यन्तमसम्भवि ।। 438 ।।
पञ्चकृत्वः शयितव्यमिति कृत्वोर्थप्रत्ययदर्शनाद् यद्यपि शयितव्यादयः साध्यस्वभावक्रियावचनाः तथाप्यत्र विषये उपमानोपमेयभावासम्भवान्नैते क्रियावाचिनस्तृतीयान्ताः प्रकृतित्वेनात्राभीष्टा इत्यर्थः ।
ननु च धातुनैव साध्या क्रियोपात्तेति शयितव्यादौ कान्या व्यतिरिक्ता क्रियाप्रत्ययार्थः स्यात् । न चैते प्रत्ययाः स्वार्थिकाः । `तयोरेव कृत्यक्तखलर्थाः"(पा. 3/4/70) इति भावकर्मणोर्विधानात् ।
अत्र प्रतिपाद्यते--इह धातुः कृद्विषयां साधनमवच्छिन्दन्तीं क्रियामवस्थान्तरपरिदृष्टेन भाव्यत्वेनोपलक्षितामाह, न वर्तमानेन भाव्यत्वेनोपलक्षिताम् । ततश्च प्रत्ययोपात्तसव्यापारसाधनसम्बन्धादभिव्यज्यते भाव्यता वर्तमानक्रियायाः । तद्यधा--`पचति देवदत्त'इत्यत्र लकारवाच्यकर्तृसम्बन्धाद् धात्वर्थो भाव्यतां भजते । एवं पाचक इत्यादौ । इत्थं चास्यते देवदत्तेनेत्यत्रापि लकारवाच्यभावनासम्बन्धाद् धात्वर्थो भाव्यतामनुभवतीति व्यतिरिक्तो भावो लकारवाच्यः, स एव कृत्यादिष्वनुवर्तते । `कृत्वा शयितव्यम्' इत्यादावपि भावे प्रत्ययविधिरिति बाह्योऽयं प्रत्ययवाच्यो भावः ।। 438 ।।
कथमत्रात्यन्तमुपमानोपमेयभावासम्भव इत्याह--
न केवलौ द्रव्यगुणौ तद्वान् वाप्युपमीयते ।
शयितव्यादिभिस्तेषु नोपमार्थोऽस्ति कश्चन ।। 439 ।।
शयितव्यादिवाच्यया क्रियया द्रव्यं वोपमीयेत, गुणो वा शुद्धः, तद्वान् द्रव्यवान् गुणी वेति पक्षभेदाः । तत्र स्वेनात्मना सिद्धत्वान्न द्रव्यमुपमेयम्, नहि शयितव्येन तुल्यो देवदत्त इति क्रियाद्रव्ययोः कश्चिदन्वयी धर्मः सादृश्यनिमित्तमस्ति। नापि शयितव्येन तुल्यं देवदत्तस्य स्वमिति द्रव्यवतः कश्चिदुपमार्थः ।
नापि शयितव्येन तुल्यः स्थूलः, शयितव्येन तुल्यं स्थौल्यमिति गुणगुणिनोरौपम्यं विद्यते, क्रियया सादृश्यहेतुधर्माभावात्, प्रसिद्धगुणक्रियाहेतुको ह्युपमानोपमेयभावश्चन्द्रमुखादौ दृष्टः, न चेह तथा प्रसिद्धिः ।। 439 ।।
तत्रैतत् स्यात्--सन्नपि क्रियाद्रव्यगुणादेः समानो धर्मोऽत्र न प्रयुज्यत इति सदृशधर्मान्तराभिधायिनः शब्दस्याप्रयोगादुपमानोपमेयभावानवगम इति ।
नैतद् युक्तमित्याह--
उपमानोपमेयत्वे द्रव्ये चानुक्तधर्मिणि ।

निमित्तत्वेन गम्यन्ते रूढयोगाः क्रियागुणाः ।। 440 ।।

अनभिहितेऽपि सदृशे धर्मे प्रसिद्धिवशादुपमानोपमेयभावनिमित्तत्वेन गुणक्रिया निरूढसम्बन्धाः पदार्थैकदेशभावापन्ना इवाविनाभाविनः प्रतीयन्त एवेति न ते नियमेन श्रुतिमपेक्षन्ते ।

तथाहि--चन्द्रवन्मुखमस्या इत्युक्ते प्रियदर्शनत्वं कान्तिमत्त्वं चाश्रुतमपि प्रतीयत इत्युक्तमेव । एवमिहापि शयितव्येन तुल्य इत्युक्ते प्रतीयेत कश्चिद्धर्मो यद्युपमा युज्येत ।। 440 ।।

एवं तर्हि क्रियायां प्रत्यासन्नः क्रियावानुपमीयत इत्यत आह--

होतव्यसदृशो होतेत्यत्राप्यर्थो न विद्यते ।

विरोधात् क्रियया तस्मात् क्रियावान् नोपमीयते ।। 441 ।।

शयितव्येन तुल्यः शायकः, होतव्येन तुल्यो होतेति कृत्यान्तेन क्रियावचनेन स्वाश्रयः क्रियावानुपमेयो न युज्यते । क्रिया हि साध्यस्वभावा सिद्धस्वभावेन सह विरुद्धत्वान्न सम्बन्धक्षमा । साध्यत्वेन चाप्राप्तस्वरूपा क्रिया परं कथं प्रज्ञापयेत् । समानगुणयोगाच्चौपम्यम्, अत्यन्तभेदश्च क्रियाद्रव्ययोरित्यत्राप्यर्थ उपमायां प्रयोजनं नास्ति ।। 441 ।।

एवं तर्हि समानत्वात् क्रिययोरेव साक्षादुपमानोपमेयभावो भवत्वित्याशङ्क्याह--

क्रिया समानजातीय तद्भावान्नोपमीयते ।

जातिभेदेऽपि पाकेन (वा केन) भिन्नाः पाकादयः क्रियाः ।। 442 ।।

तुल्यजातीया क्रियान्तरस्योपमानं स्याद्, भिन्नजातीया वा ? पूर्वत्र पक्षे तद्भावादेकात्म्यान्नोपमेयाः क्रियाः ।

तथाहि--शयितव्येन तुल्यं शयितव्यम्, अध्येतव्येन तुल्यमध्येतव्यमित्यत्यन्ताभेदे गौरिव गौरितिवन्नोपमार्थः कश्चित् ।

तथा च भाष्यकारः--`यदि यदेवोपमानं तदेवोपमेयम्, क इहोपमार्थो गौरिव गौः' इति । भिन्ना अपि ह्यर्था एकजात्यावेशेनावधार्यमाणा नोपमाम्, भेदाश्रयत्वात् तस्येत्याशयः ।

द्वतीये तु पक्षेऽत्यन्भेदान्नोपमार्थः,, नहि भवति वक्तव्येन तुल्यं पठितव्यमिति । जातिभेदादेव ज्ञाते हि भेदे भिन्ना इति पुनर्वचनमुपमानहेतोः समानधर्मस्यासम्भवसूचनार्थम् । भिन्नजातीये हि समानधर्माभावान्नोपमार्थः ।

तथा च भाष्यम्--`अथान्यदुपमानमन्यदुपमेयम् । क इहोपमार्थो गौरिवाश्वः' इति । एवं न केनचित् प्रकारेणोपमानोपमेयत्वमत्रेत्यत्यन्तासम्भवीत्युक्तम् । गुणलेशेनापि यदपि साम्यम्, तदपीह न सम्भवतीत्यत्यन्तग्रहणेनाचष्टे । नापि भिन्नजातीयत्वेऽपि क्रियया द्रव्यगुणादीनां सत्त्वज्ञेयत्वादिभिर्धर्मैः सादृश्यमाश्रित्योपमा कल्पत इति वाच्यं, सत्त्वादिधर्माणां सर्वार्थसाधारण्यान्न निमित्तत्वमुपमायामत्र प्रत्यये सम्भवतीति पूर्वपक्षभाष्यं व्याख्यातम् ।। 442 ।। अत्रेदानीं शयितव्यादिगतानां सजातीयानां क्रियाणामुपमानोपमेयभावनिमित्तभूतं भेदमुपपादयितुमाह--

आधारभेदाद् भिन्नायामुपमानस्य सम्भवः ।

अध्येतव्येन विप्राणां तुल्यमध्ययनं विशाम् ।। 443 ।।

तुल्यचातीयायाः क्रियाया आश्रयभूतद्रव्यभेदाद् विशेषजात्यनुगमाच्च साम्ये भेदाभेदप्रयुक्तस्योपमात्वस्यास्ति सम्भवः । तथाहि--ब्राह्मणानामध्येतव्येन सदृशमिदं क्षत्रियादीनामध्ययनम्, राज्ञः शयितव्येन तुल्यं देवदत्तस्य शयितव्यमिति प्रयोगो दृष्टः ।। 443 ।।

ननु चात्र क्रियावचनः शब्दो भेदप्रतिपत्तये अधिकरणमपेक्षमाणः सापेक्षत्वादसमर्थो भवन्नानुभवति तद्धितवृत्तिमित्याशङ्क्याह--

अर्थात् प्रकरणाद् वापि यत्रोपेक्ष्यं प्रतीयते ।

सामर्थ्यादनपेक्षस्य तस्य वृत्तिः प्रसज्यते ।। 444 ।।

यस्मिन् विषये सामर्थ्यात् कुतश्चित् प्रस्तावाद् वा यदापेक्षणीय आधारो निर्ज्ञातो भवति, तदाध्येतव्यादेरेव शब्दाश्रयविशेषावच्छेदस्यावगमात् तद्वाचकपदप्रयोगमन्तरेणानपेक्षोऽसावनुभवेत् सामर्थ्यनिबन्धनां वृत्तिम् । ब्राह्मणाध्येतव्येन

तुल्यं क्षत्रियाध्येतव्यम्, राज्ञः शयितव्येन तुल्यं देवदत्तशयितव्यमित्यत्र च समासे कृते भेदाभावादेकार्थीभावे सति सोपक्षत्वाभावः ।

तथा स्थातव्येन तुल्यं गमनम्, मन्दत्वात्, नृत्तेन तुल्यं गमनं बहुविकारत्वादिति भिन्नजातीया नामपि क्रियाणामस्त्येवोपमानोपमेयभावः । कृदभिहितस्य च भावस्य न केवलं द्रव्यवद्भावः, क्रियावद्भावोऽपि दृश्यते ।

तथाहि--भोक्तुं पाकः, बोद्धुं पाठः, कारकस्य गतिरिति क्रियायामुपपदभूतायां विधीयमानौ तुमुन्ण्वुलौ दृश्येते घञाद्यन्तेष्वप्युपपदेष्विति तेषां क्रियाधर्मवत्त्वनिश्चयः।। 444 ।।

ननु चात्र धातुभागवाच्यक्रियाश्रयेण तुमुन्ण्वुलौ भविष्यतः । नैतदस्ति, प्रत्ययवाच्यायाः क्रियागताया निर्वृत्तेरेव सुतरां भोजनाद्यर्थत्वात् । यद्येवं क्रियाशब्देनोपपदस्य निर्देशे कथं सिद्धरूपता, तद्धर्मोऽप्युपपदत्वेन गृह्यते । धर्मधर्मिणोरभेदाश्रेयण क्रियाशब्देन धर्मस्यापि प्रत्यायनमविरुद्धमित्यदोषः ।

एवं तर्हि कृत्त्वोर्थप्रत्यया अपि कथं न भवन्ति घञाद्यन्तप्रयोगात् ? उच्यते, अभ्यावृत्तिग्रहणात् तत्र क्रिया कर्तव्यतात्मकेन स्वेनैव रूपेणोपयुज्यते, न सिद्धतया, निर्वृत्तस्यानिर्वर्त्यतया पुनः प्रवृत्त्ययोगात् । ततश्चाख्यातप्रयोगमन्तरेण तत्र क्रियायाः कर्तव्यतानवगमादभ्यावृत्त्यभावात् प्रत्ययाभावः । आख्यातप्रयोगे तु वाक्यपरिसमाप्तिः, स्तत्राख्यातस्य साध्यस्वभावक्रियाभिधायित्वादिति तदाश्रयः कृत्वोर्थप्रत्ययो भवति, पञ्चकृत्वः पाको वर्तत इति ।

ननु च धर्मधर्मिणोरभेदाश्रयेण भोक्तुं पाक इति क्रियोपपदनिमित्तः प्रत्ययो भवतु, निर्वृत्तेर्भोजनार्थत्वापपत्तेः । तथा च समन्वयः पदानाम् । ओदनस्य पाक इत्यादौ तु कथं कर्मणा समन्वयः, प्रत्यार्थत्वेन प्रधानभूतस्य सिद्धताख्यस्य साधनसंबन्धानुपपत्तेः । साध्यस्यैव हि कारकैर्योगः । सत्यम्, उपसर्जनभूतधात्वर्थद्वारकस्तु कर्मयोगः ।

यद्येवमभ्यावृत्त्याप्युपसर्जनभूतसाध्यस्वभावधात्वर्थद्वारेणास्तु योगः । न भवति, विरोधात् ।

तथाहि प्रधानस्यार्थान्तरैः संबन्धो गुणधर्मेण स्वभावविरोधिना न भवति । अभ्यावृत्तिर्हि सिद्धताविरोधिनी, निवृत्तस्य पुनः प्रवृत्त्ययोगात् तद्वाच्यमपि क्रिया तृतीयान्ता संभवत्यत्रोपमानभूता प्रत्ययार्थ इत्याह--

तैलापाकेन तुल्ये च धृतपाके विवक्षिते ।
क्रियावदपि कार्याणां दर्शनात् प्रत्ययो भवेत् ।। 445 ।।

न केवलं कृदभिहितस्य भावस्य द्रव्यवत् कार्याणि लिङ्गसंख्यायोगलक्षणानि दृश्यन्ते;यावत् तुमुन्नादीनीति प्रदर्शितम् । एवञ्च तैलपाकेन तुल्यो घृतपाक इति तृतीयासमर्थात् क्रियावाचिनो वतिर्भवेत् । सापेक्षत्वं चात्र नास्ति, एकपदोपात्तत्वादधारस्य ।। 445 ।।

घञाद्यन्त उपपदे क्रियावत् कार्ययोस्तुमुन्णवुलोर्भाव वार्तिककारमतं संवादकमाह--

अतिङ्ग्रहणमेवं तु समासस्य निवर्तकम् ।
गमनं कारकस्येति ण्वुल्यन्यस्मिन्न संभवेत् ।। 446 ।।

"उपपदमतिङ्"(पा.2/2/29) इत्यत्र सुपसुपेत्यधिकारात् तिङन्तस्योपपदस्य कारको व्रजतीत्यादौ समासप्राप्तिरेव नास्तीति किमतिङिति प्रतिषेधेनेति चोदिते सति वाक्यकारः पपाठ--`उपपदमतिङिति तदर्थपतिषेधः' इति ।

तच्छब्देन तिङः परामर्शः । तस्यार्थो यस्य तस्याय सुबन्तस्य संभवतीति सामर्थ्यादुष्ट्रमुखवदुपमानगर्भः समासः । तस्येवार्थो यस्येति क्रियार्थस्येत्युक्तं भवति। अतिङित्यर्थप्रधानो निर्देशः इत्यर्थः ।

अत एव स्पष्टमिदं पठितव्यमित्याह--`क्रियाप्रतिषेधो वा' इति । उपपदमक्रियेत्येव विवक्षितार्थप्रतिपादकः स्पष्टः सूत्रन्यासः कर्तव्य इत्यर्थः ।

एवञ्च यत् क्रियाप्रधानं सुबन्तमुपपदम्, तस्य समासप्राप्तौ प्रतिषेधोऽयं संपद्यते । तद्यथा--कारकस्य गतिः, कारकस्य गमनम्, कारकस्य ब्रज्येत्युदाहृतम् ।
एतच्च कथमुपपद्यते यदि गत्याद्युपपदेषु तुमुन्ण्वुलौ भवतः । अन्यथा सिद्धतावचनत्वात् तदभावे कथमिदं समासप्रतिषेधस्य प्रयोजनं स्यात् ?
न चान्यस्मिन् "ण्वुल्तृचौ"(पा. 3/1/233)इति सामान्यलक्षणेन यो विहितस्तत्र ण्वुलि तदन्तेन क्रियावचनस्य समासनिषेधोऽयमुपपद्यते, तत्रोपपदस्याभावात् । क्रियावचनस्य समासप्राप्तवसत्यां प्रतिषेधस्यानर्थकत्वात् । तदेवं कारकगतिरित्यादौ गत्यादेः सुबन्तत्वादुपपदसमासस्य प्रसङ्गादुपपद्यमानः प्रतिषेधो घञाद्यन्तेषूपपदेषु क्रियाकार्यं तुमुन्ण्वुलादि ज्ञापयति, न तु गत्याद्यर्थरूपत्वनिबन्धनमस्य सिद्धरूपस्यार्थस्य क्रियात्वमवगमयति, वस्तुस्वभावविपर्ययख्यापनस्याशक्यत्वात् ।। 446।।
तदित्थं शयितव्यादीनां पाकदीनां च क्रियावचनानामत्र तृतीयासमर्थतोपपत्तावापि केनाशयेन `नैष दोषः । सर्व एते गुणशब्दा समुदायेषु वर्तन्ते' इत्याद्युपक्रम्य `समुदायेषु वृत्ता शब्दा अवयवेष्वपि वर्तन्ते' इति ब्राह्मणादीनां शब्दानामध्ययनादिलक्षणक्रियामात्रवृत्तित्वाश्रयेण यत् तृतीयासमर्थं क्रिया चेत् सा भवतीति प्रकृत्यर्थविशेषणपक्षो भाष्यकारेण समर्थित इत्याशङ्क्याह--
सर्वस्य परिहारार्थं समुदायत्वमाश्रितम् ।
शुद्धायाः संभवान्नस्यात् क्रियाया ब्राह्मणादिषु ।। 447 ।।
संभवत्यपि होतव्यादौ क्रियावाचिनि तृतीयसमर्थे यदर्थस्य समुदायत्वम् `सर्व एते शब्दा गुणसमुदाये वर्तन्ते' इत्याश्रितं भाष्यकारेण सिद्धान्ततया तत्रायमाशयश्चूर्णीकृतः सर्वसाधारणः परिहारो यथा स्यादिति ।
अन्यथा शुद्धायाः केवलायाः शयित व्यादिपदोपादानायाः क्रियायाः प्रत्ययप्रकृतित्वेन तृतीयासमर्थायाः संभवाद् ब्राह्मणादिशब्दविषये वतिप्रत्ययो न स्याद् ब्राह्मणवदधीते क्षत्रिय इत्यादौ ।
ब्राह्मणादिशब्दोह्युपचारादेकदेशवृत्त्या क्रियावाची । होतव्यपाकादिशब्दस्तु मुख्यया वृत्त्या क्रियाभिधायीति सति मुख्ये विषये कुतो गौणपरिग्रहः स्यात् ।
नन्वेवं समुदायैकदेशभावकल्पनयापि क्रियावचनसमर्थने संभवति मुख्ये विषये कथं गौणपरिग्रह इति कथं न चोद्यते । व्याप्तेर्न्यायात् सर्वस्य परिग्रह इत्यदोषः ।
यद्वा, क्रियायास्तृतीयासमर्थतामनुपपन्नामभ्युपगम्य प्रकारान्तरेण प्रतिसमादधतश्चूर्णीकारस्यासंभवः एव शुद्धक्रियावचनस्य तृतीयासमर्थस्येत्याशयः ।। 447 ।।
तथाहि--
उपमानविवक्षायां स्वधर्मश्च निवर्तते ।
क्रियाया न श्रुताद् यस्मादुपमानं समाप्यते ।। 448 ।।
पाकादिपदोपादानायाः क्रियाया उपमानत्वेनापेक्षायां स्वो धर्मः स्वभावसत्त्वभूतत्वलक्षणो निवर्तते, यतो नोपमानस्य श्रवणमात्रात् तत्त्वं परिपूर्णं भवति ।। 448 ।।
अन्वयिधर्मापेक्षायां तत्त्वाद् अपेक्ष्यतां तर्ह्यन्वयिधर्मः । किमेतावता उपमानभूतायाः स्वधर्मोऽपैतीत्यत आह--
तृतीयाऽप्याश्रितो भेदो धर्मः साधारणो द्वयोः ।
व्यापारवान् न कृत्स्नस्य साम्यं कृत्स्नेन विद्यते ।। 449 ।।
तृतीयः स्वाभावव्यवस्थार्थमुपमानोपमेयाभ्यामपेक्षितो यो विशेषोऽपरस्माद् व्यावृत्तस्तयोर्द्वयोः समानः सोऽपि नोदासीन एवापेक्ष्यते, येनाकिञ्चित्करत्वात् तस्य स्वधर्मान्न क्रियापेयात् । किंतु व्यापारवान्, द्वयोः समवायात् ।
तथा च क्रियायामाश्रितत्वादुपमानत्वस्य संपादने व्यग्रो व्यापृत इति समानधर्माधारत्वेन क्रिया विप्रकीर्यमाणत्वात्

साध्यस्वभावादपैति ।
स्वातन्त्र्येण द्रव्यायमाणा हि स्वाश्रितधर्मवशादुपमेयपरिच्छेदसंपादनाङ्गभावगमनात् सिद्धतयात्मानमुद्दर्शयेत् ।
नहि स्वभाव एव रूपेऽवस्थितायाः क्रियायाः प्रज्ञापनहेतुत्वमुपमेयं प्रति युज्यते, अनिष्पन्नस्य परं प्रत्यङ्गभावायोगात् ।
इत्थञ्च तैलपाकादिरिदं तदिति प्रत्यवमृष्टः समानधर्माधारतां प्रतिपद्यत इतिद्रव्यमसौ, होतव्यादिश्च सौष्ठवादितुल्यधर्माश्रयोऽपि तथैवेति न क्रियावाचि एतत्तृतीयान्तमस्यामवस्थायम् ।
नहीह वास्तवेन रूपेण क्रियाद्रव्यादिः पदार्थो वर्ण्यते, अपि तु सिद्धसाध्यतादिरूपेण शब्दवाच्येन । तथाह्येकोऽपि ध्वनिः क्रियागुणद्रव्यरूपतयाभिधीयते । ध्वनति घण्टेति क्रमोपजातावयवः शब्दसन्तानः पूर्वापरीभूतः साधनप्रतिबद्धोत्पादो यदा विवक्ष्यते, तदेयं क्रियाविप्रसृतावयवा ध्वनतीत्याख्यातेनाभिधीयते ।
यदा तु कारणान्तरनिरासार्थं संबन्धिन्या घण्टया विशेष्यते `घण्टाया ध्वनिः'-इति, तदा निष्पन्नरूपोऽसौ गुणः सुबन्तेन शब्देनोच्यते । ध्वनित्वमित्यत्र तु भाव प्रत्ययान्तेन शब्देन द्रव्यभावापन्नो जातेर्गुणीभूतः प्रातिपदिकार्थः कथ्यते । ध्वनति शब्द इति च कारकशक्तियुक्तः स एवार्थोऽभिधीयते । व्यक्तवर्णस्य चात्र कर्तृत्वमव्यक्तस्य साध्यत्वमित्यनवस्थिता व्याकरणे पदार्थाः ।
तस्मात् क्रियापदादपि न साक्षात्क्रिया साध्यस्वभावात्र प्रतीयते, अपि तु सिद्ध स्वाभावेति द्रव्यमेवैतदिति सुबन्तं न क्रियावाच्यस्ति । आख्यातमेव तथा । ततश्चाप्रातिपदिकत्वात् तृतीया नास्ति ।
अत एव च नामाख्यातभेदेन सिद्धसाध्यार्थभेदाद् द्विधा पदं संक्षेपेणोक्तम् ।तत्रैतत् स्यात् । कस्मात् समानोऽर्थ धर्मो व्यापारवानित्यत उक्तम् न कृत्स्नस्येत्यादि । सकलस्यार्थस्य सकलेन सर्वधर्माणं साम्ये भेदाभावान्न साम्यं सादृश्यमुपमानोपमेयभावाधायि संभवति, भेदाभेदाभ्यां तदुपपत्तेरुक्तत्वादिति ।। 449 ।।
साधारणो धर्मो भेदाभेदाभ्यामत्र सव्यापार एव भवतु । द्रव्येण सिद्धरूपेणासावपेक्ष्यते, न साध्यस्वभावया क्रियया उपमानभूतयेत्याशङ्क्याह--

द्रव्ये वापि क्रियायां वा निमित्तात् तत् प्रकल्पते ।
क्रियाणां विद्यमानत्वाद् वृत्तिर्न स्याद् गवादिषु ।। 450 ।।

तदिति पूर्वप्रकान्तं साम्यं निर्दिश्यते । द्रव्यं वा भवतु, क्रिया वार्थान्तरप्रज्ञापनेनोपमाम्, सर्वथा सादृश्यनिबन्धनत्वादर्थनां साम्यस्य तद्धेतुर्निमित्तं साधारणो धर्मोऽन्वेष्यः ।
तथाहि--शुद्धं स्वात्मावस्थं द्रव्यमर्थान्तरस्योपमेयस्य परिच्छेदकं न संभवतीति तदर्थं समानं गुणमाकाङ्क्षति । ततो हि निमित्तात् साम्येन परिच्छेदः संभवति ।
एवं क्रियाप्यनपेक्षितसमानधर्मा नोपकारायार्थान्तरस्य प्रज्ञापनीयस्य प्रभवतीत्यवश्यमपेक्षणीयं निमित्तमनयापि ।
तथा च द्रव्यायमाणेयं क्रियात्वं जहाति । साधनव्यापारावस्थाप्रतिपत्तये हि निर्वर्त्यमाना प्राधान्येनोपदीयमाना क्रिया भवति । यदा तु साधनव्यापारावस्था कथयितुं न प्रकृता, नापि क्रिया प्रतिलब्धप्राधान्येनोपादीयते, किन्तु धर्मान्तरं प्रत्याश्रयभूता साधनव्यापारनिरपेक्षोपादीयते, तदा व्यापारानपेक्षया धर्मान्तराणामाश्रयभूतत्वेन चेदं तदिति व्यपदेश्यं द्रव्यमेवोच्यते, न क्रियासौ ।
यदि पुनरनपेक्षितनिमित्तानां स्वरूपादेव क्रियाणामुपमानत्वं युज्यते, तदासां शुद्धानामुपमानभूतानां संभवात् किमर्थं गौणक्रियावचनगवादिशब्दविषये वतिप्रत्ययो भवेत् । संभवति मुख्ये विषये गौणपरिग्रहस्याय्यत्वादिति `गोवत्, ब्राह्मणवत्' इति प्रयोगो न स्यात् ।। 450 ।।
यदा तु साधारणधर्माश्रयैणौपम्यं भवति, तदा क्रियाभिरपि धर्मान्तराणामपेक्षणादुक्तनयेन स्वरूपहानामुख्ये विषयेऽसम्भवति गौणाश्रयणं युक्तमित्याह--

अभावात् केवलायास्तु तद्वानर्थः प्रतीयते ।

प्रधानासम्भवे युक्ता लक्षणार्था क्रियाश्रुतिः ।। 451 ।।

क्रमव्यतिक्रमे प्रयोजनाभावात् प्रथमश्रुतं तेनेत्येतत् क्रियोपाधिना यदा सम्बध्यते, तदा प्रकृत्यर्थविशेषणपक्षेऽपि यथोदितनयेन शुद्धायाः क्रियायाः सम्भवो नास्तीति श्रौतार्थपरित्यागे लाक्षणिकोऽर्थः समाश्रीयते । स्वाधारेण नित्यमवियोगाच्च क्रियायाः स एवाविनाभावितया लक्ष्यत इति तृतीयासमर्थं क्रियाविष्टद्रव्यवचनमाश्रीयते । ततश्चैकदेशवृत्त्या ब्राह्मणादयः क्रियावचनाः प्रकृतिः । तद्वदेव शयितव्यादयोऽपि ।। 451 ।।

तेषमपि ह्यत्रोपमानत्वे ब्राह्मणादिभिः सर्वथा सामान्यमित्याह--

क्रियाधर्मान्तरेषु सापेक्षाः क्रियाशब्दाः क्रियान्तरे ।
उपकाराय गृह्यन्ते यथैव ब्राह्मणादयः ।। 452 ।।

क्रियान्तरेऽन्यस्यां क्रियायां क्षत्रियाध्येतव्यादिलक्षणायामुपकाराय सादृश्येन परिच्छेदाय क्रियाशब्दा उपमानवचना ब्राह्मणाद्येतव्यादयः क्रियान्तरेषूपमानहेतुसोष्ठवादिषु साकाङ्क्षाः प्रयुज्यन्ते । अतश्च यथाद्ययनादिसादृष्यहेतुक्रियापेक्षा ब्राह्मणादयः शब्दाः क्षत्रियादिपरिच्चेदायोपादीयन्ते, तथैत इति सर्वप्रकारं क्रियाशब्दानां द्रव्यवचनैरुपमानत्वं साम्यमित्युभयेऽपि वृत्तिमनुभवन्तीत्यर्थः ।। 452 ।।

तत्रैतत् स्यात्--क्रियाप्युपमानत्वेनोपादीयमाना यदि धर्मान्तरापेक्षिणी, तदानवस्थात्रेत्याशङ्क्य निदर्शनपूर्वकं तामभ्युपगन्तुमाह--

यथा प्रकर्षः सर्वत्र निमित्तान्तरहेतुकः ।
द्रव्यवद् गुणशब्देऽपि स निमित्तमपेक्षते ।। 453 ।।

`न वै द्रव्यस्य स्वतः प्रकर्षापकर्षौ स्तः' इति निरुपाधेरतिशयाभावात् संसर्गिधर्मान्तरनिमित्तः प्रकर्षोऽस्य व्यवस्थापितः । शुक्लतरः पट इति स्वसमवायिशुक्लगुणहेतुकोऽतिशयः । एवं यदासौ शुक्लो गुणोऽतिशयवत्त्वेन विवक्ष्यते, तदा द्रव्यायमाणः स्वशब्देनाभिहितो भास्वरतादिस्वगतनिमित्तापेक्षस्तथोच्यते शुक्लतरमस्यरूपमिति ।। 453 ।।

अत्रैवार्थे निदर्शनान्तरमाह--

यो य उच्चार्यते शब्दः स स्वरूपनिबन्धनः ।
यथा तथोपमानेषु व्यपेक्षा न निवर्तते ।। 454 ।।

इह करणसन्निवेशी परिगृहीतक्रमः शब्दो वाचकः `अग्निमन्तोदात्तमधीष्व' इति । तस्य च निरुपाधेर्वाचकतायोग इति स्वरूपक्रममुपाधित्वेनासावाश्रयति । तथा च तदधिष्ठानाः श्रुतयः प्रत्याय्यमर्थमभिनिविशन्त इति ब्रह्मकाण्डेऽभिहितम् । तदेव च संहृतक्रमं स्वरूपमस्याभिधेयमत्रार्थमपि स्वरूपाच्छुरितं शब्दो वक्तीति निर्णीतचरम् । तत्र करणसंनिवेशिनः स्वरूपाच्छुरितस्य वाचकत्वे प्रयोगस्थं वाच्यं स्वरूपम् । तदपि यदा करणोपारोहि, तदाप्यपरं वाच्यं संहृतक्रमं स्वरूपमस्याभिधेयमत्रार्थमपि स्वरूपच्छुरितं शब्दो वक्तीति निर्णीतचरम् । तत्र करणसंनिवेशिनः स्वरूपाच्छुरितस्य वाचकत्वे प्रयोगस्थं वाच्यं स्वरूपम् । तदपि यदा करणोपारोहि, तदाप्यपरं वाच्यं संहृतक्रमं कल्पयितव्यमिति सर्वत्र त्रितयमन्वयि, निमित्तं तद्वानभिधेयं चेति । तदेव वीप्सया सार्वत्रिकत्वेन दर्शयति--यो य इति ।

यदपि हि प्रवृत्तिनिमित्तं स्वरूपं, तदपि यदा करणसन्निवेशि भवति तदापरं प्रवृत्तिनिमित्तमवश्यापेक्ष्यम्, निरुपाधेर्वाचकत्वाभावादिति कृतनिर्णयमेतत् काण्डान्तरे, पूर्वमिहापीति पुनरिह न वितन्यते । एवं यथा प्रकर्षे धर्मान्तरस्य यावत् सम्भवो वचसस्तावत् परिकल्पनं स्वरूपे च स्वरूपान्तरस्य, तथौपम्येऽपि तन्निमित्तस्य प्रकल्पनादुपमानमुपमेयं तयोश्च साधारणो धर्म इति सर्वत्र त्रितयमपरिहार्यम् । अतश्च ब्राह्मणवत् क्षत्रियोऽधीत इत्यध्ययनं साधारणो धर्मः । तस्याप्युपमानत्वे ब्राह्मणाध्ययनेन क्षत्रियाध्ययनं तुल्यमिति सोष्ठवादिधर्मान्तरं साधारणं कल्प्यम् । तस्याप्युपमानत्वेऽन्यदिति शब्दव्यापारोपरमान्निवृत्तेर्नानवस्थेयं मूलक्षतिकरी, पर्यवसानसम्भवात् ।। 454 ।।

तदेवं शुद्धायाः क्रियायास्तृतीयासमर्थाया असम्भव इति पूर्वपक्षभाष्यं समर्थितम् । इदानीम् `अत्रैवेदमयुक्तं वर्तते' इति यद् भाष्यम्, तत् पूर्वपक्षसमर्थानुवादेन गमयति--

कियावृत्तेस्तृतीयान्तस्यैतच्चासंगते सति ।
प्रसिद्धन्यायकरणो भाष्ये युजिरुदाहृतः ।। 455 ।।
इदमयुक्तं वर्तत इति युजिक्रियायाः करणं किमिति नोपात्तमिति चोद्ये कथ्यते प्रसिद्धत्वात् करणस्य भाष्यकारेणानुपादानं वचनेनेत्यर्थः । तथाहि--तृतीयान्तस्य क्रियावचनस्योक्तेन न्यायेनासम्भवः प्रतिपादित इति न्यायलक्षणमत्र करणं प्रसिद्धेः साक्षान्न निर्दिष्टम्, तेन न्यायेनायुक्तमित्यर्थः । यत् किल क्रियास्वरूपमासर्थ्यपर्यालोचनया साधनमवगम्यते, तस्य स्वशब्देनोपादानमनादृतम् ।
तद्यथा--अर्हन्निति विशिष्टमेव कर्म सत्कारादि प्रतीयत इति न स्वशब्देनोपादीयते । वर्षतीति च प्रसिद्धेः कर्मणोऽकर्मिकेयं क्रियोक्ता, कर्तापि चात्र प्रसिद्ध ितिि न स्वशब्देनावश्यं कथ्यते देव इति ।। 455 ।।
यस्तु मन्यते--अन्तर्भूतमत्र क्रियास्वरूप एव न्यायलक्षणं करणमिति न प्रयोगमर्हतीति, तन्मतं निरस्यति--
अन्तर्भूते तु करणे प्रयोगो न पुनर्भवेत् ।
न्यायेनायुक्तमित्यत्र जीवतौ प्राणकर्मवत् ।। 456 ।।
यथा जीवति प्राणान् धारयति, जायतेऽस्त्यात्मानं बिभर्तीति प्राणादिलक्षणस्य कर्मणः क्रियास्वरूपेऽन्तर्भावज्जीवति प्राणान्, अस्त्यात्मानमिति प्रयोगो न भवति, एवं न्यायलक्षणस्य करणस्य युजावन्तर्भावे न्यायेनायुक्तमुपपत्त्याऽयुक्तमिति न कदाचित् प्रयोगो भवेत् । बहिर्भूतं हि साधनं क्रियायाः पृथक् प्रयोगमर्हति, नान्तर्भूतम् ।
तस्मात् प्रसिद्धिरेवात्र करणस्याप्रयोगेऽनुसरणीया । एतच्चान्वाख्यानसमयपालनाय कथ्यते, युक्तमित्यस्य शब्दस्यान्वाख्याने युजिक्रिया प्रकृत्यर्थः, करणं न्याय इति ।। 456 ।।
परमार्थतः पुनर्निरस्तावयवविभागोऽयं शब्दो नात्र काचिद् युजिक्रिया, यस्याः करणमुच्येत, व्युत्पत्तिकर्मणि केवलं क्रियेयं परिकल्प्यत इत्याह--
शास्त्राभ्यासाय भेदोऽयमयुक्तमिति वर्ण्यते ।
अशोभनमसम्बद्धमिति रूढिर्व्यवस्थिता ।। 457 ।।
अन्वाख्याने व्युत्पत्तिनिमित्तमनुगुणाया युजिक्रियाया अस्या उपादानादकरणिकाया अस्या असम्भवात् प्रसिद्धो न्यायः करणं साक्षान्नोपात्तमिति भाष्यकाराभिप्रायोऽयमस्माभिर्व्याख्यायते ।
प्रयोगे तु लौकिके निरस्तावयवविभागोऽशोभनमसम्बद्धमन्याय्यमश्लिष्टमयुक्तशब्दः प्रतिपादयतीति नात्र युजिक्रिया काचिदित्यनेनैवाशयेन भाष्यकारः करणं नात्र निरदिक्षत् ।। 457 ।।
तदेवं क्रियावाचिनस्तृतीयान्तस्याभावात् प्रकृत्यर्थविशेषमपक्षाक्षेपः । असम्भव एव त्वस्य पक्षस्येति प्रतिपादयितुमाह--
विविभक्तिः प्रकृत्यर्थं प्रत्युपाधिः कथं भवेत् ।

विभक्तिपरिणामे च प्रकल्प्यं विषयान्तरम् ।। 458 ।।
तेनेति तृतीयासमर्था प्रकृतिरत्र प्रधानं विशेष्यत्वात् । तदर्थमुद्दिश्य क्रियेत्ययमुपाधिः प्रथमान्तत्वेन भिन्नविभक्तिः कथमुपपद्यते, सामानाधिकरण्याभावात् । `अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः' इति हि समानाधिकरणोऽर्थ उपाधित्वेन लक्षितः । तद्यथा--दृतिहरिः पशुः । दण्डः प्रहरणमस्यां दाण्डा । `सास्य देवता' (पा. 4/2/24) इति प्राजापत्य इत्यादि ।
विशेषणं त्ववच्छेदकमात्रलक्षणं विविभक्तमपि भवति । यथा गार्गिकया श्लाघत इति श्लाघा । तत्रैतत् स्यात्, सन्बन्धान्यथानुपपत्त्या विभक्तिविपरिणामः कल्प्यत इति । तच्च न, श्रुतस्य प्रथमान्तत्वस्येदमेवोत्पत्तिवाक्यमित्यन्यत्र

कृतार्थत्वाभावात् कथं विपरिणामः ? विपरिणामे हि विषयान्तरं प्रकल्प्यम्, यत्र कृतार्थत्वं स्यात्, अन्यथा प्रथमान्तश्रुतेर्निष्फलता स्यात् । ऊहन्यायो हि परिणामः । चत्र च प्रकृतौ श्रतस्य विकृतावन्यथात्वं न्याय्यम् ।। 458 ।।

एतदेवोपपादयति--

विभक्त्यन्तरयोगो हि यस्य तद्विषयान्तरे ।
विभक्त्यन्तरसम्बन्धः सामर्थ्यादनुमीयते ।। 459 ।।

सारूप्यात् तु तदेवेदमिति तत्रोपचर्यते ।
शब्दान्तरे विभक्त्या तु युक्तं शास्त्रे तदश्रुतम् ।। 460 ।।

यस्य शब्दस्य श्रुता विभक्तिः क्वचिद् विषये केनचिदुपकारेण समन्वयमेति, तस्यान्यस्मिन् योगे साक्षादनिर्दिष्टसम्बन्धिनि प्रकृतत्वात् स्वरितलिङ्गदपेक्षणीयत्वे श्रुतयैव विभक्त्या समन्वयायोगे तदन्यथानुपपत्त्या तदन्वययोग्यविभक्त्यन्तरसम्बन्धोऽनुगम्यते । तत्र च नित्यत्वाच्छब्दार्थसम्बन्धस्य नोपात्तस्य शब्दस्य तदर्थस्य वान्यथाभावो युज्यत इति शब्दान्तरमेव योगयविभक्तियुक्तं साक्षादनुच्चारितमप्युत्प्रेक्ष्यते । प्रकृतिभागेन तु पूर्वेण सादृश्यादभेदाध्यवसाये स एव शब्दो विभक्त्यन्तरेण परिणमत इति परिणामव्यवहारः । तद्यथा--तदेव क्षीरं दधि जातमिति परिणामः । अत्रापि हि क्षीरधर्माणां केषाञ्चिदन्वयाद् भेदेऽपि क्षीराद् दध्नः परिदृश्यमाने, परिणामव्यवहारस्तदेवेदमिति च प्रत्यभिज्ञानम् । एवमिहापि प्रत्ययभागभेदेऽपि प्रकृतिभागान्वयादभेदाध्यवसायः ।

इत्थं च विभक्तिविपरिणामो भावतोऽन्यस्यैव कल्पनमूह इति कथमुत्पत्तिवाक्य एव श्रुतस्य युज्यते ? प्रकृतौ ह्युपयुक्तस्य विकृतावूहो न्याय्यः ।

तथा हि-"भूवादयो धातवः" (पा.1/3/1) इति संज्ञासम्बन्धे धातव इति प्रथमायाः श्रुतायाश्चरितार्थत्वे `अनुदात्तङित--' (पा.1/3/12) इत्यादौ समन्वयान्यथानुपपत्त्या पञ्चम्यन्तं धातोरिति शब्दान्तरमनुमीयते । तस्मादुच्चार्यमाणा विभक्तिरुपयोगवती कस्मिंश्चिद् वाक्यार्थे प्रदर्शनीया । ततो विभक्तिविपरिणामः कल्प्यते । अन्यथा यद्विभक्तिरवयव उच्चरितस्तद्विभक्त्यर्थापेक्षो वाक्यार्थो यदि नाभिप्रेतः, तदा तद्विभक्त्युच्चारणमनर्थकमेव स्यात् ।

न ह्यन्यथोच्चारयितव्येऽन्यतोच्चारयतो वक्तुः कश्चिद् गुणोलक्ष्यते । असम्बद्धाभिधायित्वमेव हि परं स्यात् । क्वचित् पुनरेकविभक्त्यन्तान्तर्भावतात्पर्येण निर्देशाद् यथायथं तदुपयोगो युज्यत एव । तद्यथानल्विधाविति सर्वविभक्त्यन्तसमासः । नानाविभक्त्यर्थयोगी हि प्रातिपदिकार्थः सकृन्निर्देशेऽप्यत्राभिप्रेतः ।

तथा चार्थतन्त्रे तत्र निर्देशे श्रुताया विभक्तेर्नान्तरीयकत्वमवस्थाप्य विधिशब्दमन्तरेणापि विवक्षितार्थलाभो वर्णितः ।

इह तु क्रियेति नियतत्वाद् विभक्त्यर्थस्य नैतद् युज्यते वर्णयितुम्, तृतीयार्थेनैव समन्वयस्येष्टेः ।। 459,460 ।।

ततश्च तेनेत्यस्मात् प्रथमं प्रकृतिस्तृतीयान्तावगतेति तदनुरोधात् क्रिययेत्यपि तृतीया निर्दिश्येत । अन्यथा प्रथमानिर्देशे प्रधानस्य तृतीयान्तस्य तदनुरोधेन विपरिणामाभावात् कथं समन्वय इत्याह--

प्रकृतिश्चेत् तृतीयान्ता तेनेत्यस्मात् प्रतीयते ।
क्रियेति प्रथमान्ता सा कथं भवितुमर्हति ।। 461 ।।

परिणामायोगस्योपपादितत्वाद् विविभक्तित्वे कथं सम्बन्ध इत्युक्तमेतत् ।। 461 ।।

सत्यपि वा विभक्तिविपरिणामे तेनेत्यनेन क्रिययेत्यस्यासमन्वय एवेत्याह--

क्रिययेति तृतीया च प्रयोगे कस्य कल्प्यताम् ।
तेनेत्यस्य हि सम्बन्धः सूत्रस्थेन न विद्यते ।। 462 ।।

सूत्रे श्रुतेन तेनेत्यनेन क्रियेत्यस्य लिङ्गभेदात् सम्बन्धो न विद्यत इति कस्य प्रयोगे क्रिययेति तृतीयोपाधिः कल्प्यताम्, न कस्यचिदित्यर्थः । समानलिङ्गस्य सम्बन्धिनः प्रयुज्यमानस्यासम्भवात् । क्रियया तुल्यमित्येवं प्रत्ययार्थेन समन्वये तु प्रकृतेरयमुपाधिर्न स्यात् ।। 462 ।।

तदेवं सम्बन्धमाक्षिप्य समर्थयितुमाह--

सोपस्कारेषु सूत्रेषु वाक्ये शेषः समर्थ्यते ।

तेन यत् तत् तृतीयान्तं क्रिया चेत् सेति गम्यते ।। 463 ।।

इह सूत्रवाक्यानां क्रियापदाश्रवणात् साध्याहारत्वमवसीयते । लक्ष्यानुगुण्येन च लक्षणप्रणयनाद् यथायथं लक्ष्यभेदानुसारेण क्रियापदमध्याहर्तव्यम् । ततश्चात्र चेच्छब्देन सम्बन्धभेदस्यावेदनाद् यत् तत् तृतीयासमर्थं क्रिया चेत् सा भवतीत्येवं वाक्यशेषसमर्थनादुपपन्नः सम्बन्धः ।

अयमत्राशयः--मा भूत् सूत्र एव विपरिणामः । तस्य तु यत् समन्वयवाक्यं व्याख्यानरूपम्, तत्र परिणामोपपत्तिः । तत्र च तेनेति तृतीयानिर्देशः प्रकृतेस्तृतीयान्ततामप्रज्ञापने चरितार्थ इति चेच्छब्देन पुनः प्रत्यवमृश्योपाधिसम्बन्धमनुभवितुं स्वातन्त्र्यमापादितस्य तस्य युज्यते यथोपाधिपरिणामः ।

तद्यथा--"इको गुणवृद्धी" (पा.1/1/3) इत्यस्याः परिभाषायाः समग्रप्रधानविषयोपकारकत्वम् । यत्र तु गुणवृद्धी इति ब्रूयात् , तत्रेक इत्युपस्थितं द्रष्टव्यमिति वाक्याध्याहारेण समर्थ्यते ।। 463 ।।

तदेवमत्र क्रियेत्युपाधेस्तेनेत्युपाधिमता समन्वयो वाक्याध्याहारेण । न चावश्यं समानशब्द एवोपाधिरन्यथापि सम्भवादित्युपाधिवैलक्षणं प्रतिपादयितुमाह--

उपाधेः कस्यचिद् वाक्ये प्रयोग उपलभ्यते ।

प्रतीयमानधर्मान् यो न कदाचित् प्रयुज्यते ।। 464 ।।

"तदस्यां प्रहरणम्" (पा.4/2/57) इति नेदमेव साक्षात्प्रत्ययविधानवाक्यम्, पञ्चम्या अश्रवणात् । अपि तु प्रयोगे दण्डः प्रहरणमस्यां क्रीडायाम्, मुष्टिः प्रहरणमस्यां क्रीडायामिति भिन्नानां वाक्यानां सामान्येनानुकरणम् । प्रयोगवाक्ये च दण्डादेर्व्यभिचारिणी प्रहररूपता सामानाधिकरण्येनोपादीयत इति तथैव सूत्रेऽप्यनुकारः ।

तदयमुपाधिः समानशब्दो यस्य लोकेऽभेदविषये व्यभिचारात् प्रयोगः ।

अपरः पुनरुपाधिः सामर्थ्यगम्यस्वभावत्वात् प्रयोगे नैव श्रूयते । ततश्च तस्य प्रयोगेऽश्रवणात् सूत्रेऽपि तथैवानुकरणं नास्ति। केवलं यथाकथाञ्चित् सूत्रेऽसावुपक्षेप्तव्यः ।

तथा चायमिह क्रियालक्षण उपाधिः । नहि ब्राह्मणेन तुल्यमधीते क्षत्रिय ित्यत्र ब्राह्मणगतत्वेन क्रिया साक्षात् प्रयुज्यते, अपि तु सामर्थ्यात् प्रतीयत इति तस्यास्योपाधेः प्रथमान्तस्यापि सूत्रे निर्देशे न कश्चित् पर्यनुयोगः, वाक्याध्याहारेण समन्वयोपपत्तेः ।। 464 ।।

तत्र प्रतीयमानोपाधेरुदाहरणमाह--

नीलमुत्पलमित्यत्र न विशेष्ये न भेदके ।

कश्चित् तद्धर्मवचनो वाक्ये शब्दः प्रयुज्यते ।। 465 ।।

नीमुत्पलमित्यत्र वाक्ये सामानाधिकरण्यादेव गम्यमानत्वात् तद्धर्मस्य विशेषणविशेष्यत्वस्य तदभिधायी नीलं विशेषणमुत्पलं विशेष्यमिति न प्रयुज्यते शब्दः । केवलं सूत्र एव "विशेषणं विशेष्येण" इति(पा...) पदयोरवच्छेदार्थं प्रयोगः ।। 465 ।।

अतश्च

अत्यन्तानुगमात् तत्र न सूत्रे न च विग्रहे ।

विभक्तिपरिणामेन किञ्चिदस्ति प्रयोजनम् ।। 466 ।।

अवच्छेद्यावच्छेदकत्वस्यात्यर्थेनान्तर्भावान्नीलं च तदुत्पलं चेत्यत्र वाक्ये विशेष्यशब्दस्य सूत्रे तृतीयान्तस्य विशेष्यमुत्पलमिति नास्ति परिणामफलम् , सामानाधिकरण्यादेव विशेष्यत्वस्यावगतत्वात् ।

इत्थञ्च वाक्ये प्रयोगाभावाद् विशेष्यादेः शब्दस्य सूत्रेऽपि कस्यानुकरणमिदं स्यात्, यदनुरोधाद् विशेष्येणेति तृतीयान्तं प्रथमान्ततया विपरिणम्येत ।

एवञ्जातीयके विषये विभक्तिपरिणामस्याप्रसक्तिः प्रकृतोपपादनपरतयोच्यते । न तु विशेष्येणेत्यत्र विभक्तिपरिणामः समन्वयार्थः

सम्भाव्यते, श्रुतेनैव समन्वयोपपत्तेः ।। 466 ।।

अत एवैतन्निदर्शनीकृत्य प्रकृते योजयितुमाह--

तृतीयान्तं क्रियेत्येतद् विग्रहे न प्रयुज्यते ।

यथा दण्डः प्रहरणं क्रीडायामिति दृश्यते ।। 467 ।।

ब्राह्मणेन तुल्यमधीते क्षत्रिय विग्रहवाक्ये क्रिययेति तृतीयान्तस्य प्रयोगो नास्ति। यस्मादुपमेये श्रुता क्रियेति सामर्थ्यादुपमानेऽपि प्रतीयेत । अन्यथोपमानोपमेयभाव एव न स्यादिति यथाकथञ्चिदप्युपक्षेपेऽस्योपाधेर्न दोषः ।

दण्डः प्रहरणमस्यां क्रीडायामित्यत्र तु वाक्ये प्रहरणस्योपाधेः प्रयोगो दृश्यते । प्रहरणक्रियासाधकतमत्वं हि दण्डस्य न दण्डपदप्रयोगादेव गम्यते, स्वार्थमात्रस्य ततः प्रतिपत्तेरिति स्वशब्देन प्रहरणमित्यनेन तस्य तत्त्वमावेद्यते । तथा च तथैव सूत्रेऽनुकारः ।। 467 ।।

तत्रैतत् स्यात् । नीलं विशेषणं विशेष्यमुत्पलमित्यपि प्रयोगो दृश्यत इति कथमिदमन्तर्भूतधर्मण उपाधेर्निदर्शनं स्यादित्याशङ्क्यापरं निर्विवादमत्रोदाहरणमाह--

घविधौ घश्च संज्ञायामिति सूत्र उदाहृतम् ।

उपादानं प्रयोगेषु तस्यात्यन्तं न विद्यते ।। 468 ।।

`पुंसि संज्ञायां घः प्रायेण" (पा. 3/3/118) इत्यत्र घप्रत्ययविधौ संज्ञायामिति प्रयुक्तो य उपाधिः, तस्य प्रयोगेष्वत्यन्तमनुच्चारणम्, प्रकृतिप्रत्ययसमुदायस्य संज्ञात्वात् समानशब्दोऽयमुपाधिर्गतार्थत्वान्नोपादीयते । एवं क्रिययेत्यपि ।। 468 ।।

तत्रैतत् स्यात्--प्रधानानुविधायित्वाद् गुणानां तेनेत्यभिसम्बन्धे क्रिययेत्यवश्यं विपरिणमनीयमित्याशङ्क्याह--

यैरप्रयुक्तैः संस्कारः प्रधानेषु प्रतीयते ।

ते भेदेऽपि विभक्तीनां निर्दिश्यन्त उपाधयः ।। 469 ।।

प्रयोगे प्रयोगमन्तरेणापि क्रियेत्ययमुपाधिः प्रधानातिशयाय प्रभवतीति किं प्रधानानुवृत्त्या ?

तथा हि--भिन्नविभक्तित्वेऽपि यदि प्रधानोपकारो विघटते, तदा प्रधानविभक्तिराश्रीयेत । यावतान्याविभक्तित्वेऽपि व्यवच्छेदमात्रफलत्वादुपाधेर्लभ्यते प्रधानोपकार इति न तद्विभक्तावत्रादरः ।

तथा हि--क्रिययेत्यपि विभक्त्युपादाने भिन्नविङ्गत्वादसामानाधिकरण्यं तदवस्थमिति यथाकथञ्चिदप्युपक्षेपे गुणानां लभ्यते प्रधानोपकारसम्पादनायोपादानतात्पर्यादभिसम्बन्ध इति स्थितम् ।। 469 ।।

एवं प्रकृत्यर्थविशेषणपक्षे क्रियावचनस्य तृतीयान्तस्यासम्भवात् `सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते' इति क्रियावाचिनस्तृतीयान्ततासमर्थनार्थं यद् भाष्यम्, तदिदानीं व्याचष्टे--

समुदायेषु वर्तन्ते भावानां सहचारिणाम् ।

शब्दास्तत्त्वाविवक्षायां समुच्चयविकल्पयोः ।। 470 ।।

गौरत्वशुच्याचारत्वपिङ्गलकेशत्वादीनां नियतजात्याच्छुरितानां सहभाविनां धर्माणां यः समुदायः, तत्र वाचकत्वेन ब्राह्मणादिशब्दा वर्तन्ते ।

यद्यपि चैते धर्माः कदाचिद् व्यभिचारान्न नियोगतः सहभाविनः, तथापि ये यज्जातिसहचरा धर्मास्ते तज्जातिनिमित्तेन शब्देनोच्यन्त इति ब्राह्मणत्वादिजात्या सहभावोऽव्यभिचारो विवक्षितः ।

अत एव च शब्दार्थसङ्करो न भवति । सर्वेषां मात्राकलापवतनत्वेऽपि नियतजातिसाहचर्योपलक्षिताः प्रतिनियता एव शब्दानामर्था यतः । तदेतत् पुनः समुच्चयस्य विकल्पस्य चाविवक्षायां समुदायवचनत्वमच्यते शब्दानाम् ।

अविद्यमानविकल्पोऽयं वायं वेत्येवंरूपोऽविद्यमानश्च समुच्चयोऽयं चायं चेत्येवंरूपो यस्य तस्य समुदायस्य विवक्षायाम् ।। 470 ।।

ननु मा भूद् विकल्पः समुदायार्थविरोधित्वादत्र, समुच्चयस्तु यगपदनेकार्थरूपः कथं समूहार्थतां विरुणद्धीत्याशङ्क्याह--
समुच्चयस्तु क्रियते येषु प्रत्यर्थवृत्तिषु ।
भेदाधिष्ठानया योगस्तेषां भवति सङ्ख्यया ।। 471 ।।

प्रत्यर्थवृत्तित्वे वाचकस्य समुदायः समुच्चरूपेण वाच्यः स्यात् । तथा हि--समकक्ष्यताया समुदायान्तर्गतानामवयवानामभिधाने सर्वे प्राधान्येन समुच्चिता अभिहिता भवन्ति । एवञ्च भेदस्योद्भूतत्वात् प्रधानार्थप्रयुक्तं बहुवचनं स्यात् ।

तद्यथा --वृक्षा इति भेदप्राधान्येनाभिधीयमाना बहुत्वयोगिनः ।

यदा तु वनमितिवद्विगलितभेदः समुदायोऽभिधीयते, तदैकवचनमेवार्थैकत्वान्न्याय्यम् । तदा च भेदाधिष्ठानस्य समुच्चयस्याभावः । एवमिह समुदायार्थत्वे प्रत्यर्थवृत्तित्वायोगात् समुच्चयाभावः ।। 471 ।।

यदि तर्हि न तुल्यकक्ष्यतया मात्राकलापोऽभिधीयते, तदा जातिविशिष्टद्रव्याभिधानपक्षदस्य पक्षस्य को भेद इत्याह--
सर्वैर्विशिष्टास्तैरर्थैर्जन्यन्ते सहचारिभिः ।
बुद्धयः प्रतिपत्तृणां शब्दार्थास्तानतो विदुः ।। 472 ।।

जातिगुणाक्रियाभिः सहभाविरर्थैः प्रतिपत्तृणां यतो विशिष्टाः, तदाच्छुरिता जात्यवच्छिन्नार्थग्राहिण्यो बुद्धयो जायन्ते, अतो बुद्ध्यनुसारेण निरूपितेऽर्थे शब्दप्रयोगात् ततोऽपि तथैव प्रतिपत्तेर्गुणसमुदाय एव प्रतीयमानः शब्दार्थ इति व्यवस्थाप्यते । द्रव्यस्य चार्थक्रियायोगात् तदेव प्रधानं जातिगुणक्रियादिधर्मसंसृष्टमभिधानगोचर इत्यर्थैक्यादत्राप्येकवचनमेव । जात्याविष्टं तु द्रव्यमेवोच्यते द्रव्याभिधानपक्षे ।
क्रियागुणास्तु द्रव्यस्य निष्क्रियस्य निर्गुणस्य चानुपपत्तेः सामर्थ्यादवगम्यन्त इति पक्षान्तरादस्य विशेषः
पक्षस्य, सर्वस्याप्यभिधागोचरत्वादत्र ।। 472 ।। तदेतदाह--
संसृष्टाः प्रत्ययेष्वर्थाः सर्व एवोपकारिणः ।
तेषां प्रत्ययरूपेण सर्वेषां शब्दवाच्यता ।। 473 ।।

बाह्यं वस्तु स्वभावत एव निरंशत्वाद् विशिष्टम् । न तत्र भेदपूर्वकः संसर्गव्यवहारः कश्चित् । तत् पुनर्बद्धौ विपरिवर्तमानमनादिवासनाविभ्रमजुषां प्रत्ययानामविकलमविषय इति परिकल्पितभागविभागेनावसीयते । अवसाय च पृथक् प्रत्ययैरनुसन्धीयते । तथा च प्रत्ययेष्वेवार्था जातिगुणक्रियाद्रव्यलक्षणा भेदपूर्वकं संसर्गं भजन्त इति तदभिप्रायेण समुदायवाचोयुक्तिः ।

तथा हि--प्रत्ययोपारूढाकाराभिधायिनः शब्दा ब्राह्ममभिनिविशन्तेऽभेदाध्यवसायादिति मात्राकलापात्मनोऽर्थस्य सर्वस्यैव बुद्धिविपरिवर्त्याकारानुविधानेन वाचकाः शब्दा व्यवस्थाप्यन्ते । बुद्धावपि च यथाबाह्यं गुणप्रधानभावेनार्थानामुपरोहाद् जातिगुणक्रियासंसृष्टस्य द्रव्यस्यैव प्राधान्येनाभिधानादेकार्थ्यं भवति ।। 473 ।।

यद्येवं द्रव्यस्यैवाभिधानमस्तु, कोऽनुरोधो गुणसमुदायनय इत्याशङ्क्याह--
केवलानां तु भावानां न रूपमवधार्यते ।
अनिरूपितरूपेषु तेषु शब्दो न वर्तते ।। 474 ।।
निरूपणपूर्वकत्वादभिधानस्योपाधिविविक्तिस्य च द्रव्यमात्रस्य रूपमगोचरो निरूपणाया इति संसृष्टोपाधि द्रव्यं गुणसमुदायदर्शने शब्दवाच्यम् । तत्र समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते ।

तद्यथा--पूर्वे पञ्चाला इत्युक्तम् । जनपदवचनस्य च पञ्चालशब्दस्य प्रसिद्धस्यैकत्वाज्जनपदस्य पूर्वशब्देन
विशेषणानुपपत्तावववयववृत्तिः समुदायशब्दस्य ।। 474 ।। ततश्च समुदायात् प्रच्युत्यावयवे वर्तमानः
शब्दोऽनित्यमर्थसम्बन्धमाक्षिपेदित्याशङ्क्य समर्थयितुमाह--
पूर्वशब्दप्रयोगाच्च समूहान्न निवर्तते ।

वर्ततेऽवयवे वापि नोपात्तं त्यजति क्वचित् ।। 475 ।।
शब्दार्थसम्बन्धस्य नित्यत्वान्नेह समुदायाद् वाच्याद् विचलति पञ्चालशब्दः । पूर्वशब्दप्रयोगाद्धेतोर्नाप्यपूर्वमवयवे वाचकत्वमासादयति । निरूढस्य त्यागोऽपूर्वस्य चोपादानं न क्वचिद् विषये शब्दानामिष्टम् ।। 475 ।।
यदि तर्ह्युपात्तस्य समुदायस्य न त्यागः, तदा कथं समन्वयः ? तस्मात् समुदायेन समन्वयान्यथानुपपत्त्या समुदायशब्दोऽप्ययमवयवमुपादास्यत इत्याशङ्क्याह--
समुदायाभिधायी च यदि भेदं विशेषयेत् ।
तत्रातुल्यविभक्तित्वं पूर्वकायादिवद् भवेत् ।। 476 ।।
एकत्वाज्जनपदस्य पूर्वशब्देन व्यवच्छेदाभावात् समुदायाभिधायी पञ्चालशब्दोऽत्र पूर्वशब्देन सम्बन्धानुरोधाद् भेदमेकदेशं यदि व्यवछिन्द्यात् , तदावयवोपजनिते व्यतिरेके समुदायस्य षष्ठ्या भाव्यमिति समानविभक्तिकत्वं न स्यात् । यथा कायस्य पूर्वः परो वा भाग इति । एवं पञ्चालानां पूर्व इति स्यात् ।
तथा च सामानाधिकरण्यबाधः । न चाबाधितेऽपि सामानाधिकरणये मुख्यार्थत्यागेनावयवार्थोपादानं युक्तम्, नित्यत्वात् सम्बन्धस्य । तस्मादत्यज्यत एव मुख्यमर्थमवयवोपादानं वैयधिकरण्येन स्यादत्र, न सामानादिकरण्येनेत्यर्थः ।। 476 ।।
इदानीमवयवे वृत्तिं समर्थयते--
समूहे च प्रदेशे च पञ्चावा इति दृश्यते ।
तथा विशेषणं सर्व इत्येतदुपपद्यते ।। 477 ।।
इहेमे पञ्चालादयः शब्दा निवासाधिकरणभावानुगमनेन वा व्युत्पाद्येरन् व्युत्पत्तिप्रत्याख्याने वा स्वाभाविकार्थविशेषसम्बन्धाः समनुज्ञायेरन् ।
पूर्वत्र पक्षे यथा संस्त्यायविशेषः समस्तो जनपदभिधेयः स्वामिविशेषाणामाधारभावमनुभवति, तथा तदेकदेशोऽपि, न ह्ययमवयवी कायादिवद्, अपि तु वनस्थानीयः ।
तथा च सकलावयवस्य समूहस्यादर्शनात् प्रत्यवयवपरिसमाप्तेश्च भागश एवाधारतां प्रतिपद्यते । ततश्च निमित्तरूपानुविधानेन निमित्तिनमभिदधदयं शब्दः समुदायैकदेशयोस्तुल्यप्रवृत्तिः, उभयत्रापि निमित्तरूपस्य निवासाधिकरणभावस्य समानत्वात् समुदायोऽपि ह्येकदेशद्वारेणैव कार्येषूपादीयते ।
तद्यथा--पञ्चालान् प्रविष्टः, पञ्चालादृश्यन्ताम्, पञ्चालेषु कृतमिति । स्वाभाविकदर्शनेऽपि शब्दानामनेकार्थत्वाद् समूहैकदेशयोर्वर्तमानत्वमुपपद्यत एवेति न त्यागोपादानार्थः कश्चिदत्र ।
अतश्चोभयथा पञ्चालशब्दस्य दृष्टेर्व्यभिचारसम्भवे सर्वे पञ्चाल लब्धा, हृता, आच्छिन्ना इति समुदायप्रतिपिपादयिषायां विशेषणं सर्वशब्दः कथ्यते ।
अन्यथा समूहस्यैकत्वात् कृत्स्नत्वेन विशेषणं न सम्बध्येत । तदेवं समुदायशब्दस्यापि प्रसिद्धस्यावयवे वृत्तिर्मुख्यतयैवेत्युक्तम् ।। 477 ।।
अत्रैव भाष्यकारमतं संवादकमाह--
तथार्धपिप्लीत्यत्र जात्यन्तरनिवृत्तये ।
अर्धं च पिप्पली चेति खण्डे शब्दः प्रयुज्यते ।। 478 ।।
समानाधिकरणसमासाभ्युपगमेनैकदेशिसमासः प्रत्याख्यातो भाष्ये । तथा चार्धं च पिप्पली चेत्यर्धपिप्पलीति सामानाधिकरण्यं कथमुपपद्येत, यदि खण्डेऽवयवेऽत्रावयववाची पिप्पलीशब्दो नाभ्युपगम्यते ।
युक्तं चैतत् । यदयं जातिशब्दो व्यक्तौ प्रचयापचयानपेक्षोऽत्र वर्तते ।
तथाह्येकदेशिसमासेऽप्यर्धं पिप्पल्या इति जात्यन्तरापोहार्थमर्धं पिप्पल्यावच्छिद्यते । तथा च समानाधिकरणसमासेऽपि जात्यन्तरनिवृत्त्यर्थमेवार्धशब्दस्य पिप्पली विशेष्येति फलतः प्रतीत्योरभेदः । प्रक्रियाभेदात्तु पूर्वपदार्थप्रधानतैकदेशिसमासे । तत्र

परवल्लिङ्गतारम्भः । एकदेशिसमासस्यैव तत्पुरुषस्य तदिष्टेः । समानाधिकरणसमासेतूत्तरपदाथप्राधान्यादेव तत्सिद्धिरिति तत् प्रत्याख्यातम् ।। 478 ।।

एवं यथात्र जात्यभिव्यक्तिसमर्थावयविवचनोऽपि पिप्पलीशब्दस्तदेकदेशे जात्यन्तरनिवृत्तिपरायां चोदनायां वर्तते, तथेहापि पञ्चालशब्द इत्याह--

पञ्चालानां प्रदेशोऽपि भिन्नो जनपदान्तरात् ।
तत्रान्यस्य विवृत्त्यर्थे शब्दे भेदो न गम्यते ।। 479 ।।

यथा समस्तो जनपदः पञ्चाला मगधादिजनपदान्तराद् विलक्षणः, तथा तदवयवोऽपि ग्रामादिरिति जनपदान्तरनिवृत्तिपरायां चोदनायां पञ्चालशब्दे प्रयुक्ते समुदायावयवविभागस्याविवक्षितत्वादसौ भेदः समुदायावयवलक्षणो विशेषो नावसीयत इत्यनादृत्य तं सन्निहितेऽर्थे मुख्यतयैव शब्दस्यात्र वृत्तिरित्यर्थः ।

इत्थञ्चावयवेन सामानाधिकरण्यादतुल्यविभक्तित्वमत्र नास्ति, जात्यन्तरनिवृत्तिविवक्षायां प्रयोगस्याविशेषात् समुदायावयवयोः ।। 479 ।।

यद्येवं तयोस्तुल्येऽभिधेयत्वे कथमुच्यते `समुदायेषु हि वृत्ताः शब्दाः' इत्यत आह--

प्रसिद्धास्तु विशेषेण समुदाये व्यवस्थिताः ।
प्रदेशे दर्शनं तेषामर्थप्रकरणादिभिः ।। 480 ।।

पञ्चालादयः शब्दाः समूहे यथा प्रसिद्धाः, न तथावयवे, सामर्थ्यप्रकरणादिवशेनावयववृत्तित्वस्य निश्चयादिति समुदायेषु मुख्यत्वमेषां कथ्यते प्रसिद्धतरत्वादित्यर्थः ।। 480 ।।

एवं ब्राह्मणादिशब्दानामपि समुदाये इव मुख्या वृत्तिरवयवेऽपीत्याह--

यदुपव्यञ्जनं जातेः सहचारि च कर्मसु ।
तत्र वा रूढसम्बन्धं यत् प्रायेणापलक्षितम् ।। 481 ।।
समुदायः प्रदेशो वेत्येवं तस्मिन्ननाश्रिते ।
अर्थात्मन्यविशेषेण वर्तन्ते ब्राह्मणादयः ।। 482 ।।

जातेरभिव्यञ्जकमुपनयनादिसंस्कारविशेषोपबृंहितमुपदेशसहायं द्रव्यम्, कर्मसु यजनयाजनादिकासु क्रियासु सहचार्यव्यभिचारि शौचश्रद्धाविद्वत्तादि, तत्र तस्यां जातौ रूढसम्बन्धं प्रसिद्धयोगं मृदुचित्तता सत्यवादित्वमवैरानुशय इत्येवमादि बाहुल्येनानुमितम्, तदाश्रित्य शब्दः प्रवर्तमानः समुदायाभिधायीति व्यवस्थाप्यते, प्रसिद्धेः ।
तत्र च जात्यन्तरनिवृत्तिपरायां चोदनायां जातिनिमित्तस्यास्य शब्दस्य समुदायावयवविभागानश्रयेण प्रवृत्तेरवयवेऽपि वृत्तिरविरुद्धा । अर्थप्रकरणादिवशात् पुनस्तथावसाय इत्यमुख्यत्वमेव ।। 481,482 ।।

एवं तर्हि समुदायार्थोऽन्य एव, अन्य एव चावयवार्थः, शब्दार्थभेदाद् भेदोपपत्तेरिति कथमभेदेन `समुदायेषु वृत्ताः शब्दा अवयवेषु वर्तन्त' इति व्यपदेश इत्यत आह--

यश्च तुल्यश्रुतिर्दृष्टः समुदाये व्यवस्थितः ।
तेनोपचरितैकत्वं प्रदेशेऽप्युपलभ्यते ।। 483 ।।

तुल्यश्रुतित्वाद् रूपसाम्यादेकत्वमवसाय समुदाये वाचकत्वेन व्यवस्थितोऽवयवेऽपि वर्तत इत्युक्तम् । नहि समुदायात् प्रयुत्यावयवे तस्यैव शब्दस्य वृत्तिरस्ति, सम्बन्धानित्यत्वप्रसङ्गादित्युक्तमेव ।। 483 ।।

एवं सारूप्याद् तदेवेदमित्युपचारादवयवे समुदायशब्दस्य वृत्तौ, `पूर्वे पञ्चालाः' इत्येकं निदर्शनं व्याख्यातम् । अपरमपि `तैलं भुक्तं घृतम्, भुक्तम् ।
तद् व्याचष्टे--

संस्कारादुपघाताद् वा वृत्तोऽक्तपरिमाणके ।
तैलादौ जातिशब्दोऽत्र सामर्थ्यादवसीयते ।। 484 ।।
नेक्षिता जातिशब्दानां समुदायानुपातिता ।
जातिमाचक्षते ते हि व्यक्तिर्जातिसमाश्रया ।।
(स्फोटसिद्धिः 9)
तैलादिशब्दानां जातिनिमित्तत्वे कथं समुदायवचनतायामत्र दृष्टान्ततोपपत्तिरित्याक्षेपे प्रतिसमाधानमिदम् ।
तथाहि--रोगविशेषप्रशमनाय यदौषधाहितविशेषं धृतं तैलं वा मात्रापरिच्छिन्नम्, तदिह तैलादिशब्दवाच्यं विवक्षितम् । तच्च षोजश द्वात्रिंशदित्यादिपलपरिमाणत्वात् परिच्छिन्नपरिमाणमिति समुदायो भवति ।
श्वकाकाद्युष्टत्वेन वोपहतं परित्याज्यं घृततैलाद्यत्र नियतपरिमाणमेव विवक्षितम्, प्रकरणसामर्थ्यात् । अन्यथा जातिनिबन्धनेऽत्र तैलादिशब्दे जातिसमवायाविशेषात् समुदाये, अवयवे वा वृत्तिरित्येतन्नोपपद्यते ।
अक्तपरिमाणे तु वृत्तौ यदेतत् घृतं तैलं वा, तस्य प्रतिदिनमेकदेशाभ्यवहारेऽपि तदेवेदं भुक्तमिति समुदायाभेदाध्यारोपेणावयवे वृत्तिरुपपद्यते । एवं श्वादिसम्पर्कदूषितेऽपि तदिदं श्वघृतं तैलं वेत्यवयवे समुदायारोपाद् वृत्तिः ।। 484 ।।
कथमयमाशयो भाष्यकारस्यावसीयत इति चेदाह--
न जातिगुणशब्देषु मूर्तिभेदो विवक्षितः ।
ते जातिगुणसम्बन्धभेदमात्रनिबन्धनाः ।। 485 ।।
जातिगुणनिमित्ताः शब्दा मूर्तिभेदमसर्वगतद्रव्यपरिमाणविशेषमनाश्रित्य तद्वन्मात्रे वर्तन्ते । उपचयापचयानपेक्षा हि तेषां विशिष्टजातिगुणयोगावधारणाय प्रवृत्तिः ।
तथाहि--जातिगुणसम्बन्ध एवान्यस्माद् भिद्यत इति भेदो विशेषस्तन्मात्रं मूर्तिभेदानपेक्षं निबन्धनं निमित्तमेषामिति । ये तु परिमाणशब्दा द्रोणादयस्तेऽक्तपरिमाणमर्थमभिदधति । तथा चैकदेशापाये न वर्तन्ते । ततश्च जातिनिमित्तायां वृत्तौ तैलादिशब्दानां समुदायावयवयोरविशेषः स्यादिति संस्कारोपघातविशिष्टेऽर्थेऽत्र भाष्यकारस्यतैलादिशब्दोऽभिमत इत्युन्नीयते । प्रदेशान्तरे हि चूर्णीकारः परिमाणशब्देभ्यो जातिगुणशब्दानां द्रोणः प्रस्थः शतमिति भेदमुपागमत् ।। 485 ।।
इदानीं शुक्लो नीलः कृष्ण इत्युदाहरणान्तरमत्रैव व्याख्यातुमाह--
कृष्णादिव्यपदेशश्च सर्वावयववृत्तिभिः ।
गुणैस्तेऽप्येकदेशस्थाः पटादीनां विशेषकाः ।। 486 ।।
गुणनिमित्तानां शब्दानां मूर्तिभेदानपेक्षा इदानीमेवोक्ता । तथापि लोके समस्तावयवव्याप्त्या यो गुणो वर्तते, तत्र तद्व्यपदेशः सिद्धः । कृष्णः पटः, शुक्लः पट इति ।
तथा च समुदायशब्दा एते मुख्यया वृत्त्या कथ्यन्ते । यत्र त्ववयवः कश्चिच्छुक्लोऽपरः कृष्णः, तत्रापि समुदायारोपाच्छुक्लादिशब्दप्रवृत्तिः । यस्य हि पटस्यावयवोऽपि नाशुक्लस्तन्निवृत्तिपरायां चोदनायां
समुदायारोपाच्छुक्लादिशब्दप्रवृत्तिः । यस्य हि पटस्यावयवोऽपि नाशुक्लस्तन्निवृत्तिपरायां चोदनायां
समुदायावयवयोरभेदविवक्षायामयं प्रयोगः ।
तथा हि सद्यः--प्रक्षालितपटावयवमलिनीकरणे साभ्यसूया वक्तारो भवन्ति कृष्णः पटः कृत इति ।। 486 ।।
तत्रैव प्रकारान्तरमाह--
पटावयववृत्तास्तु यदा तत्र पटादयः ।
तदा तैलादिवत् तेषां जातिशब्दत्वमुच्यते ।। 487 ।।
एकदेशकृष्णे पटे पटः कृष्ण इत्यभिधाने द्वयी गतिः । समस्तावयवकृष्णस्याध्यारोपादवयवे कृष्णशब्दो यथा प्राग् व्याख्यातम् । यदा तु पटशब्दोऽत्रैकदेशे प्रवृत्तः, तदा सन्निहितः कृष्णोऽवयवः कृष्णशब्देन कृत्स्नावयवव्यापिकृष्णगुणनिमित्तेन

मुख्यतयाभिधीयते । पटस्तु समुदायवचनोऽवयवे प्रवृत्तोऽत्रोदाहरणम् । तस्य च तदानीं तैलादिशब्दवज्जातिवाचित्वं बोद्धव्यम् ।

यथा हि जातिशब्दा अपि तैलादयः संस्कारोपघातप्रापितातिशये द्रव्ये समुदायशब्दतां प्रतिलभ्य तदन्यव्यावृत्तिपरेऽभिधानेऽवयवे तद्रूपारोपादसादयन्ति प्रत्यायकत्वम्, तथेमेऽपि पटादयोऽवयवेऽपि प्रवर्तन्त इत्यर्थः ।

अनयैव च दिशा घृतादिशब्दो मुख्यार्थः ।

भुक्तशब्दस्तु समुदायेऽवयवरूपाध्यासात् प्रयुक्तो मन्तव्यः, यदि क्रियाशब्दस्यापि भुक्तशब्दस्याक्तपरिमाणे कर्मणि प्रसिद्धरनुगन्तुं पार्यते ।

तथाहि--यदा भुक्तत्वमुपहतस्य संस्कृतस्य वा तैलादेः सन्दिग्धम्, तदाऽभुक्तत्वव्यावृत्तये तैलं भुक्तमित्युच्यमाने समुदायावयवयोर्भेदविवक्षा नास्तीति युज्यते समुदायशब्देनावयवस्याभिधानम् ।

तदयमत्र परमार्थः--यदा पटः प्राधान्येन विवक्षितः, तदा शुक्लशब्दोऽवयवे वर्तते; यदा तु शुक्लोऽवयवः प्राधान्येन विवक्षितः, तदा पटशब्दोऽवयवे वर्तते । एवं तैलं भुक्तमित्यत्रापि वाच्यम् । यथा च जनपदान्तरनिवृत्तिपरायां चोदनायां पञ्चालशब्दोऽवयवेऽपि मुख्यः । पिप्पलीशब्दश्च तदितरव्यवच्छेदविवक्षायामेकदेशेऽपि मुख्यः, तथा तैलादिशब्दोऽप्यन्यव्यावृत्तिपरेऽभिधान इति ।। 487 ।।

निगमयितुमाह--

निवृत्त्यर्था श्रुतिर्येषां भेदस्तेष्वनपेक्षितः ।
प्रदेसे समुदाये वा गुणोऽन्येषां निवर्तकः ।। 488 ।।

अन्यनिवृत्तिपरेऽभिधाने समुदायावयवभेदमनादृत्य प्रदेशे वा समुदाये वा वर्तमानः शब्दो गुणाद्यभिधायी कृष्णादिरन्यव्यवच्छेदं करोत्येवेति मुख्यैवेयं शब्दप्रवृत्तिः ।। 488 ।।

तदेवं निदर्शनान्युपपाद्य दार्ष्टान्तिकभाष्यम् `एवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेऽपि वर्तते' इत्येतद् व्याख्यातुमाह--

ब्राह्मणाध्ययेन तत्र वर्तते ब्राह्मणश्रुतिः ।
सादृश्यं तत्र दृष्टं हि क्षत्रियाध्ययनादिभिः ।। 489 ।।

केचित् तावदाहुः--ब्राह्मणवदधीते क्षत्रिय इत्युपमेयेऽध्ययनस्य श्रुतेस्तद्धेतुकमेवात्र साम्यमुपलक्षितम् । तथा च ब्राह्मणशब्दोऽध्ययनमात्रेऽवयवे वर्तते । तपः श्रुतमध्ययनमित्यादौ हि समुदाये मुख्यो ब्राह्मणशब्दः प्रसिद्ध इति तदेकदेशेऽध्ययनमात्रे समुपचरितः । ततश्चाध्ययनक्रियावाचिनस्तृतीयासमर्थाद् वतिरित्येकीयं मतम् ।। 489 ।।

एतदनुपपन्नमित्याह--

ब्राह्मणाध्ययने वृत्तिर्यदि स्याद् ब्राह्मणश्रुतेः ।
वक्तव्यं केन धर्मेण तुल्यत्वं क्रिययोरिति ।। 490 ।।

अध्ययनमात्रवाचित्वे ब्राह्मणशब्दास्याध्ययनयोरेवोपमानोपमेयभावोऽवगम्येत, नाध्यायकयोः तन्निमित्तः ।

अध्ययनयोश्चोपम्यनिमित्तधर्मः सौष्ठवादिर्वाच्यः स्यात् ।

तथा च तदधिकरणभावापन्नमध्ययनमिदं तदिति व्यपदेश्यत्वात् क्रियात्वं जह्यादिति न क्रियावाचिनस्तृतीयासमर्थता समर्थिता स्यादित्यभिप्रायः ।। 490 ।।

तस्मादिदमत्र युक्तमिति स्वमतेन सिद्धान्तमुपन्यस्यति--

अध्येतरि यदा वृत्तिरुच्यते ब्राह्मणश्रुतेः ।
निमित्तत्वं तदोपैति क्रियैवाध्येतरि स्थिता ।। 491 ।।

शुद्धक्रियावाचिनस्तृतीयान्तस्यासम्भवात् क्रियाविशिष्टद्रव्यवचनो गृह्यते । तत्र ब्राह्मणशब्दस्य समुदायवाचकत्वेऽप्यध्ययनप्रधाने द्रव्ये गुमसमुदायावयवे वृत्तिः कल्प्यते ।

तथा चाध्ययनक्रियाव्यापारप्रधानाद् ब्राह्मणशब्दात् तृतीयान्ताद् ब्राह्मणेन तुल्यमधीते क्षत्रिय इति ब्राह्मणवदिति वतिप्रत्यये कृते शब्दोपात्ताध्ययनहेतुको ब्राह्मणक्षत्रिययोरुपमानोपमेयभावोऽवगम्यत इतीष्टसिद्धिः ।। 491 ।।

एकीयमते तु दोषान्तरमाह--

सिंहशब्देन संबन्धे शौर्यमात्राभिधायिना ।
चैत्रात् षष्ठी प्रसज्येत योगे शौर्यादिभिर्यथा ।। 492 ।।

यः किल ब्राह्मणवदित्यत्र ब्राह्मणशब्दस्याध्ययनमात्राभिधायितामाह, तस्य शौर्यमात्राभिधायिना सिंहशब्देन चैत्रस्याभिसम्बन्धे चैत्रस्य सिंह इति व्यतिरेकनिबन्धना विभक्तिः प्रसज्येत, यथा चैत्रस्य शौर्यमिति ।

अस्मत्पक्षे तु तद्वति सिंहशब्दस्य प्रवृत्तेरुपमानोपमेययोस्तत्त्वासङ्गे सामानाधिकरणयमुपपद्यते ।। 492 ।।

उपलम्भान्तरमरमप्येकीयमतस्याह--

ब्राह्मणायेव दातव्यं वैश्यायेत्येवमादिषु ।
सम्प्रदानादियोगश्च क्रियामात्रे न कल्पते ।। 493 ।।

अध्ययनक्रियामात्रे ब्राह्मणशब्दे वतिविषयेऽभिधीयमाने ब्राह्मणवद् वैश्याय दातव्यम्, ब्राह्मणवद् वैश्यादध्येतव्यम्, ब्राह्मणवद् वैश्ये वर्तितव्यमिति सम्प्रादानापादानाधिकरणादिसम्बन्धो न स्यात्, क्रियामात्रस्य तदनुपपत्तेः । नहि ब्राह्मणाध्ययनादध्येतुं शक्यते । अस्मत्पक्षे तु तद्वतोऽभिधाने सर्वमेतद् युज्यते ।। 493 ।।

किञ्च भाष्यविरोधोऽप्येकीयमत इत्याह--

क्रियामात्राभिधायित्वादव्ययेषु वतेर्न च ।
पाठः कदाचित् कर्तव्यस्तुल्यौ पक्षावुभौ यतः ।। 494 ।।

प्रत्ययार्थविशेषणपक्षेऽत्रैव भाष्यकारः प्राह--`अपि चाव्ययेषु वतेः पाठो न कर्तव्यो भवति । क्रियायामयं भवल्लिङ्गसङ्ख्याभ्यां न योक्ष्यत' इति । यदि च प्रकृत्यर्थविशेषणपक्षेऽप्युपमानशब्दानां क्रियामात्रवचनत्वम् , तदा क्रियायास्तुल्या क्रियैव प्रत्ययार्थो न्याय्य इत्यसत्त्वभूतत्वात् तस्याः सिद्धेऽलिङ्गसङ्ख्यत्वे स्वरादिषु सत्त्ववचनेषु मध्येऽव्ययसंज्ञार्थं वतेः पाठोऽत्रापि प्रकृत्यर्थविशेषणपक्षे न कार्यः स्यादिति प्रत्ययार्थविशेषणपक्षमुत्कर्षयितुं कथमेवं तत्रैव पाठः कर्तव्यः स्यादिति भाष्यकारः प्राह । क्रियामात्रवचनत्वे हि ब्राह्मणादिशब्दानां द्वावपि प्रकृत्यर्थप्रत्ययार्थविशेषणपक्षौ समानावुभयत्रापि क्रियायाः प्रत्ययार्थत्वात् । यदा त्वस्मत्पक्षे क्रियावान् ब्राह्मणशब्दवाच्यः, तदोपमेयोऽपि तेन तुल्यः क्रियावानेव न्याय्य इति तस्य सत्त्वभूतत्वाल्लिङ्गसङ्ख्याप्राप्तावव्ययेषु वतेः पाठोऽस्मिन्नेव पक्षे कर्तव्यः स्यादिति युक्तं प्रत्ययार्थविशेषणपक्षस्य तदापाठेनोत्कर्ष आख्यातुम् ।।494 ।।

तदेवमेकीयमतं सावद्यमुद्भाव्य स्वमतं निरवद्यतया निगमयितुमाह--

जहाति जातिं द्रव्यं वा तस्मान्नावयवे स्थितः ।
क्रियायास्तु श्रुतिर्यस्मात् तद्वत्यर्थेऽवतिष्ठते ।। 495 ।।

यत एवं क्रियामात्राभिधाने दोषः, तस्मादेकदेशेऽपि वर्तमानो ब्राह्मणशब्दो जातिं द्रव्यं वा न परित्यजति । जातिरत्रोपमानत्वेनोपात्ता द्रष्टव्या । यथा साङ्कर्यपरिहारार्थं गुणसमुदायेऽपि वर्तमानः शब्दो जातिनिमित्तत्वं न त्यजति, तथावयवेऽपि वर्तमानो द्रव्यं वाच्यं न जहाति ।

यस्माच्च सूत्रे क्रियायाः प्रकृत्यर्थेपाधित्वेन श्रवणम्, तस्मात् तद्वति क्रियावति द्रव्ये ब्राह्मणादिशब्दोऽत्र वर्तमानो गृह्यते, अन्ये तु सहचारिणो धर्मास्त्यज्यन्त इत्यवयवयवृत्तिताप्युपपद्यते ।। 495 ।।

यदि तर्हि क्रियावानाभिधेयः, तदा क्रियायास्तृतीयासमर्थत्वं कथमित्यत आह--

आक्रियाणां निवृत्त्यर्था यतश्चात्र क्रियाश्रुतिः ।

क्रियोपलक्षिते तस्मात् क्रियाशब्दः प्रतीयते ।। 496 ।।

मुख्यस्य क्रियामात्राभिधायिनस्तृतीयान्तस्यासम्भवादक्रियायां द्रव्यगुणतद्वतां निवृत्तितात्पर्येण क्रियाशब्दोऽत्र कथ्यमानः क्रियावन्तमुपलक्षयति मुख्यार्थसम्भवे लक्षणाया गङ्गादिषु दृष्टत्वात् ।। 496 ।।

कथमेतत् ? यावता होतव्यादयः क्रियामात्रवचनाः सन्तीति ।

तदाह--

होतव्यादिषु यस्माच्च क्रियान्या ब्राह्मणादिवत् ।

अपेक्षणीया शुद्धेऽर्थे तस्माद् वृत्तिर्न कस्यचित् ।। 497 ।।

ब्राह्मणवदित्युक्ते यथाध्ययनमुपमाननिमित्तत्वेऽपेक्षणीयं साधारणो धर्मः, तथा ब्राह्मणहोतव्येन तुल्यं क्षत्रियस्य होतव्यमित्यत्राप्यन्या क्रिया साधारणधर्मभूतापेक्षणीया स्यात् । अन्यथा समन्वयानुपपत्तिः ।

तथा च सत्त्ववचनैर्ब्राह्मणादिशब्दैस्तुल्या होतव्यादयः । तत्रापि धर्मान्तराधार भावमनुभवन्ती क्रिया स्वरूपादपैति, सत्त्वभावापत्तेरिति केवलक्रियावचनाभावान्मुख्यार्थासम्भवे क्रियाशब्देन तद्वदुपलक्षणं न्याय्यमेव ।। 497 ।।

तत्रैतत् स्यात्--यद्युपमेये क्रियाश्रुतेः सैवोपमानेऽप्याश्रीयते साधारणो धर्मः, तदा किमवयववृत्तिपरिकल्पनाप्रयासेन ? अस्तु समुदाय एव वाच्यः, तथापि हि तत्स्थां क्रियामेवोपकारिणीमपेक्षिष्यामाह इत्याशङ्क्याह--

सर्वं वाप्येकदेशो वा यस्मिन्नाश्रीयते क्वचित् ।

विशेषवृत्तिं तं सर्वमाहुर्भेदे व्यवस्थितम् ।। 498 ।।

समुदायवचनोऽवयववचनश्च यः शब्दस्तं सर्वं शब्दं विशेषवृत्तिं विशिष्टार्थवाचकमाचक्षते, यतो भेदे विशेषे सर्वस्य शब्दस्यावस्थानम् । तथाहि--यदावयवे प्रयोगः, तदा सर्वं समुदायरूपं नापेक्ष्यत इति तन्निवृत्त्या विशेष एव शब्दार्थः । यदापि समुदाये प्रयोगः, तदैकदेशो नापेक्ष्यत इति तन्निवृत्त्या विशेष एव शब्दार्थः । यदापि समुदाये प्रयोगः, तदैकदेशो नापेक्ष्यत इति तन्निवृत्त्या विशेषवचन एव शब्दः ।

यथा हि प्रदेशः प्रदेशान्तरमवच्छिन्दन् विशेष इत्युच्यते, तथा समुदायोऽप्यवयवं निवर्तयन् विशेष इत्युभयवृत्तिरपि शब्दो विशेषविषयः । ततश्च समस्तधर्माच्छुरितस्यार्थस्या निरूपणात् तथैव शब्देनाभिधाने गुणसमुदायविषयत्वे शब्दानां समर्थिते ब्राह्मणशब्देन यदा समुदायाभिधानम्, तदावयवस्यावच्छेदान्निवारणात् कथं स प्रतीयते, येन समुदायवचनत्वेऽपि तन्निमित्त उपमानोपमेयभावोऽवगम्यते । समुदायाभिधाने हि तस्यैव प्राधान्यं विकल्पसमुच्चयव्युदासेनोक्तम् । संमूर्छितरूपो हि समुदायोऽभिधीयते । न त्वत्रावयवा भेदवन्तः कथ्यन्ते । विकल्पेन समुच्चयेन वा भेदविवक्षायां हि विकल्पो वा स्यात् समुच्चयो वा ।

अभेदप्राप्तास्तु समुदिता यदा अभिधीयन्ते, तदा न विकल्पो न समुच्चयः । अत ेव वृक्षशब्देन मूलादीनां भेदेनानभिधानाद् बहुवचनं न भवति ।

तस्मात् समुदायाभिधानेनाभिधीयमानोऽवयव इति तेन निष्कृष्टरूपेणानभिधीयमानेन न कश्चिदुपकार इति समुदायादपोद्धृतोऽवयवः समाविष्टव्यापारद्रव्यलक्षणोऽत्र ब्राह्मणशब्दस्यार्थो वाच्यः । केवलायाः क्रियाया वाच्यत्वे दोषाभिधानात् क्रियोन्मुखं द्रव्यमभिदेयमिति क्रियामुखेन तुल्यतोपपत्तिस्तस्य ।। 498 ।।

यद्यवयवे समुदाये च शब्दस्य वृत्तौ विशेषवचनत्वम्, किमिदानीं सामान्यवचनं स्यादित्यत आह--

समुच्चयो विकल्पो वा प्रकाराः सर्व एव वा ।

विशेषा इति वर्ण्यन्ते सामान्यं वाऽविकल्पितम् ।। 499 ।।

यदि समुच्चिताः सर्वे भेदाः शब्देनाभिधीयन्ते, अथ विकल्पिताः । सर्वथा विशेषवचनत्वमेव शब्दानाम् । तथा ह्यनेकार्थो भिन्नरूपः समकक्ष्यतयाभिधीयमानः समुच्चितोऽभिहितो भवति जातिगुणक्रियादिरूपः । तत्र चैकदेशमात्रस्य विकल्पस्य च

निवृत्तिरिति विशेष एवायम् । एवं पर्यायणाभिधीयमानास्त एवार्था विकल्पिता भवन्ति । तत्रापि च समुच्चयस्य व्युदासाद् विशेषरूपतैव ।

यद्यपि च समुदायोऽविकल्पसमुच्चयो वाच्य इत्युक्तम्, तथाप्यनेकार्थताप्रकारपरसंख्याप्रसङ्गेनात्र विकल्पसमुच्चयावुपात्तौ । समुच्चयाद् भेदेनोपादानाच्च प्रकारइति । प्रकारा इति द्रव्यं प्रति गुणभूता धर्मा निर्दिष्टाः । तथा च सामान्यावेशप्राप्ता गुणप्रधानभावेनात्र धर्मा विवक्षिता इति तृतीयोऽयं पक्षः । समप्राधान्यं पर्यायो गुणप्रधानभावश्चेति एतावानत्र प्रकारः संभवी क्रमेणोपन्यस्तः । त एते सर्व एवाभिधीयमानाः प्रकाराः प्रतिनियतभेदापोहहेतुत्वाद् विशेषा एवावगन्तव्याः । सामान्यमप्यविकल्पितं प्राधान्येनाभिधीयमानं विशेष एव प्रतिनियतविशेषापावर्तनात् ।

तथाहि सामान्यरूपोपरागेण युगपदेव बहवो विशेषाः कथ्यमानाः प्रतिनियतमपावर्तयन्त्येव विशेषम्, सर्वेषामभिन्नसामान्यानुवेधेन क्रियायोगात् । अत एव भाष्यम्-`सामान्यमपि यथा विशेषस्तद्वत्' इति ।। 499 ।।

एवं विशेषवचनत्वे शब्दानां व्याप्तिरुपदर्शिता । तथा च समुदायवचनत्वेऽपि तत्सिद्धिः । इदं तु वक्तव्यम्--उपमाने क्रियागुणयोरेवोपकारात् तद्विषयं शब्दानां समुदायवचनत्वं कीदृशमित्याह--

न हि ब्राह्मण इत्यत्र भेदः कश्चिदुपाश्रितः ।
अपाकृतो वा तेनायं समुदाये व्यवस्थितः ।। 500 ।।

नियतस्य भेदस्य प्रतिपादने तदपरस्य निवारणात् समुदायवचनत्वं न स्यात् । न चात्र कश्चिदङ्गीकृतोऽपरश्च निवारितो विशेष इति युक्तं समुदायवचनत्वम् । प्रकरणादिनिरपेक्षो हि ब्राह्मणशब्दः समूहमेवाचष्टे ।

इत्थं च समुदायवचनत्वे क्रियागुमयोः शब्दार्थत्वादुपमाहेतुत्वमित्युपमानविषये समुदायवचनत्वस्यापयोगः ।। 500 ।।

तथा ह्यवयववृत्तित्वं तत्र यत्नादित्याह--

क्रिया त्वाश्रीयते यस्मिन् स भेदोऽध्यवसीयते ।
तथान्यथा सर्वथा चेत्यप्रयोगे न विद्यते ।। 501 ।।

यस्मिन्नुपमाने क्रियाश्रीयते साधारणधर्मत्वेनापेक्ष्यते, तत्र स क्रियाख्यो धर्मः समुदायवृत्तस्य शब्दस्य निश्चीयते । ब्राह्मणेन तुल्यमधीत इत्यत्र ह्यध्ययनस्य साधारणस्य धर्मस्याश्रयणमिति शब्दान्तरसंनिधानात् तत्रैवावयवे ब्राह्मणश्रुतिः समर्थ्यते । यतः शब्दान्तरस्याप्रयोगे स नियतोऽभिमतः प्रकारोऽन्यः सर्वो वा न संभवति । अनपेक्षितशब्दान्तरप्रयोगादिः शब्दो झटिति स्वार्थं प्रसिद्धं समुदायरूपमेवाह यतः, तस्मादुपमाविषये यत्नात् समुदायशब्दास्यावयवे वृत्तिरित्यर्थः ।। 501 ।।

तमेव यत्नमाह--

उपमाने क्रियावृत्तिमुपमेये क्रियाश्रुतिः ।
प्रत्याययन्ती भेदस्य करोतीव पदार्थताम् ।। 502 ।।

`ब्राह्मणवदधीते क्षत्रियः' इत्युपमेये क्षत्रिये क्रिया श्रूयमाणा उपमानेऽपि ब्राह्मणशब्दे क्रियार्थत्वं सूचयति । समानधर्मप्रयुक्तो ह्युपमानोपमेयभाव इत्युभयत्र क्रियासाधारणत्वम् । ततश्च भेदस्य प्रदेशस्यात्रोपमानपदेनाभिधानं निश्चीयते । उपमेयगता क्रियाश्रुतिरुपमानगतां क्रियां नाभिदधाति, किन्तु ततोऽवसीयते क्रियावचनत्वमुपमानशब्दस्येतीवशब्दः ।। 502 ।।

न च शुद्धायाः क्रियाया वचनं संभवतीति क्रिययोरप्युपमानोपमेयभावेऽभिसंहिते व्यापाराविष्टद्रव्यवचनादेव तृतीयासमर्थाद् वतिरित्याह--

व्यापारेणैव सादृश्ये व्यापारस्य विवक्षिते ।
क्रियावद् वचनाच्छब्दात् प्रत्ययः प्रतिपाद्यते ।। 503 ।।

ब्राह्मणाध्ययनेन तुल्यं क्षत्रियाध्ययनमित्यपि क्रिययोः साम्येऽध्ययनवदिति सौष्ठवादिधर्मान्तराधारभावं प्रतिपाद्यमाना क्रिया प्रातिपदिकार्थो द्रव्यायमाणैवेत्यत्रापि पूर्ववत् क्रियाश्रुतेरुपलक्षणत्वात् क्रियाविष्टद्रव्यवचनादेव तृतीयासमर्थाद् वतिरिति समानं पूर्वेण ।। 503 ।।

यदि द्रव्यवचनादपि समाश्रितक्रियाप्रधानात् प्रत्ययोऽभ्युपगम्यते, तदा क्रियाया असत्त्वभूतत्वादलिङ्गसंख्यत्वे सिद्धे स्वरादिषु वतेः किमर्थः पाठश्चोद्यत इत्याशङ्क्याह--

क्रियावतोऽपि सादृश्ये वक्तुमिष्टे क्रियावता ।
अध्येता ब्राह्मण इव प्रत्ययो न निवर्तते ।। 504 ।।

क्रियावतोर्द्रव्ययोरप्युपमानोपमेययोरुपात्तक्रियाद्वारकं सादृश्यमाश्रित्य ब्राह्मण इवायं क्षत्रियोऽध्येता, ब्राह्मणेन तुल्योऽध्येता ब्राह्मणवदिति स्यादनिष्टः प्रत्ययो वतिः ।
तथा च सत्त्ववतनत्वादव्ययेषु वतेः पाठः कर्तव्य इत्युक्तम् । द्रव्यप्राधान्ये हि सत्त्वं वत्यन्तस्येति लिङ्गसंख्यायोगः स्यात् । अतः स्वरादिपाठेनाव्ययत्वमारभ्यते ।। 504 ।।

ननु च क्रियावतोरपि क्रियाद्वारक एवोपमानोपमेयभावः, तत्र चेष्यत एव वतिरिति कथमनिष्टत्वेन प्रत्ययो न निवर्तते इत्युक्तमित्याह--

अधीते तुल्य इत्येवं पुंल्लिङ्गेन विशेषणम् ।
क्रियावति क्रियायां तु तुल्यशब्दे नपुंसकम् ।। 505 ।।

क्रियावतोः सादृश्ये वतिर्विधीयमानः, सत्त्वरूपत्वात् तयोस्तुल्यशब्दस्तल्लिङ्ग एव प्रयुज्यते, ब्राह्मणेन तुल्योऽधीते क्षत्रिय इति । तथा च क्रियानिमित्तं तुल्यत्वं नियमेन न प्रतीयते । अन्येन केनचिद् धर्मेण तुल्योऽधीत इत्यप्यवगमात् क्रियातुल्यत्वस्यासंप्रत्ययादत्र प्रत्ययो नेष्यते । क्रियानिमित्ते तु सादृश्ये प्रत्यय इति तत्र तुल्य शब्दः निपतन्नसत्त्वभूतत्वात् तस्याः शब्दसंस्काराथं लिङ्गसर्वनामनपुंसकमेवाश्रयते । तथा च क्रियानिमित्तं तुल्यत्वं ब्राह्मणेन तुल्यमधीत इति नियोगतः प्रतीयत इति तत्रैवेष्यते वतिः ।

अत्र च पक्षे सत्त्वभूतस्यापि क्रियाविशेषणस्य विशेष्यधर्मानुवृत्तेर्लिङ्गविशेषायोगादव्ययेषु पाठो न कार्यो वतेः ।। 505 ।।

इदानीमत्रैव प्रकृत्यर्थविशेषणपक्षे "यदि तर्हि तृतीयासमर्थं विशेष्यते, प्रत्ययार्थोऽविशेषितो भवति । तत्र को दोषः ? तृतीयासमर्थात् क्रियावाचिनो गुणतुल्यत्वेऽपि प्रत्ययः प्राप्नोति । पुत्रेण सह तुल्यः स्थूलः, पुत्रेण सह तुल्यः पिङ्गलः" इति यो भाष्ये गुणतुल्येऽपि प्रत्ययः प्रसञ्जितः, स कथमुपपद्यते ? यावता न पुत्रशब्दः क्रियावाचीत्याशङ्क्य भाष्यं समर्थयितुमापातयात--

प्रकृत्यर्थे विशिष्टेऽपि प्रत्ययार्थाविशेषणात् ।
पुत्रेण तुल्यः कपिल इति वृत्तिः प्रसज्यते ।। 506 ।।

एकत्वात् क्रियाशब्दस्य प्रकृत्यर्थविशेषणोपक्षये प्रत्ययार्थस्य तुल्यत्वस्याविशेषितत्वाद् गुणेनापि कपिलत्वेन तुल्ये पुत्रशब्दात् तृतीयासमर्थाद् वतिः स्यादिति चोद्यभाष्यं विवृतम् ।। 506 ।।

पुत्रशब्दस्य क्रियावाचित्वं समर्थयितुमाह--

याः पुत्रे रूढसम्बन्धाः क्रियालोके विवक्षिताः ।
ताभिः क्रियावतः पुत्राद् गुणतुल्ये वतिर्भवेत् ।। 507 ।।

पितुर्निदेशे यो वर्ततेऽधीते, सन्तानमनुवर्तते च, स पुत्रः सदाचारानुपालनात् कथ्यते । यस्तु न नियोगकारी, नाध्येता, न सदाचारः, तमपुत्रोऽयमिति व्यवहरन्तीति निदेशस्थानादिक्रियाः पुत्रशब्दार्थे निरूढयोगः पुत्रशब्दोऽन्तर्भावयति, यथा ब्राह्मणादयोऽध्ययनादिकान् धर्मानिति । तद्वदयमपि समुदायवचन इत्यत्रोपात्तक्रियाभिः क्रियावतः पुत्रादवयववचनात् तृतीयासमर्थाद् गुणेनापि तुल्ये विवक्षिते वतिर्भवेत् ।। 507 ।।

तत्रैतत् स्यात्। `पुन्नाम्नो नरकाद् यस्मात् त्रायते पुत्र इत्यतः' इति पुत्रशब्दप्रवृत्तिनिमित्तं पवनादिक्रियामवधीर्य को निदेशस्थानादिषु बाह्यासु पुत्रार्थसहचारिणीषु क्रियास्वादर इत्यत आह--

अन्तर्भूतं निमित्तं च रूढिशब्देषु यद्यपि ।

क्रियास्तु सहचारिण्यो रूढाः सन्ति पदार्थवत् ।। 508 ।।
इह रूढिषु नावयवार्थानुगम इति प्रवृत्तिनिमित्तभूतामन्तरङ्गामपि क्रियामनादृत्य पदवाच्यद्रव्यतुल्याः साहचर्येणाव्यभिचारात् प्रतीयमानाः प्रसिद्धा निदेशस्थानादयः क्रियाः समाश्रीयन्ते । प्रवृत्तिनिमित्तभूता हि क्रिया व्युत्पत्तिनिबन्धनत्वेन परमाश्रीयते । नार्थक्रियासु तस्या व्यापारः । तदेवमेकेन विशेषणेनोभयविशेषणायोगात् क्रियाग्रहणेन प्रकृत्यर्थे विशेषिते क्रियावदुपलक्षणार्थत्वात् क्रियाश्रुतेर्ब्राह्मणादिशब्देभ्यः क्रियावद्वचनेभ्यः प्रत्यये समर्थितेऽपि प्रत्ययार्थस्याविशेषितत्वाद् गुणतुल्येऽपि प्रत्ययप्रसङ्ग इति ।। 508 ।।

अस्तु तर्हि प्रत्ययार्थविशेषणम्, यत्तत् तुल्यं क्रिया चेत् सा भवती'ति पक्षान्तरमुपन्यस्तं भाष्ये व्याख्यातुमाह--
क्रमं तु यदि बाधित्वा प्रत्ययार्थविशेषणम् ।
प्रधानानुग्रहात् साम्याद् विभक्तेश्चावतिष्ठते ।। 509 ।।
स्थाननिमित्तः क्रम उक्तः । प्राथम्यात् तेनेत्येतत् क्रियाशब्देन विशेष्यत इति तस्य त्तत्र बाधः । समानविभक्तिकत्वात् प्रधानत्वाच्च प्रत्ययार्थस्य तुल्यमित्यस्य क्रियेति विशेषणं न्याय्यमित्येवं कल्प्यते । तथाहि प्रधानस्य प्रत्ययार्थस्य विशेषणयोगे कल्प्यमाने गुणस्य प्रकृत्यर्थस्य तदनुपपत्तिः । सामानाधिकरण्येन च सम्बन्धसम्भवेऽधायाहारेण तेनेत्यस्य क्रियेति सम्बन्धो न न्याय्यः । विभक्तिसाम्यं हि शब्दवत् । अशब्दस्तु क्रमः ।। 509 ।।

एवं प्रकृत्यर्थविशेषणपक्षं बाधित्वा यदि प्रत्ययार्थविशेषणपक्षः कल्प्यते, तदात्रापि पूर्वदोषसाम्यमित्याह--
प्रकृतेरविशिष्टत्वात् क्रियातुल्ये प्रसज्यते ।
पुत्रादौ गुणशब्देभ्यः पूर्वोक्तस्य विपर्यये ।। 510 ।।
एकेन विशेषणेन द्वयोरयोगात् क्रियाग्रहणेन प्रकृतिरविशेषितात्र स्यात् । ततश्च गुणवचनेभ्यः स्थूलादिभ्यः पूर्वोक्तनिदेशस्तानादिकया क्रियया तुल्ये पुत्रे वाच्ये वतिर्भवेत् ।

तथाहि--प्रकृत्यर्थविशेषणे यदुदाहृतम्, तदेवात्र विपर्ययेणोदाहर्तव्यम्, स्थूलेन तुल्यः पुत्र इति । तदुक्तं भाष्ये--`एवमपि तृतीयासमर्थमविशेषितं भवति । तत्र को दोषः । तृतीयासमर्थादक्रियावाचिनः क्रियातुल्येऽपि प्रत्ययः प्राप्नोति' इति ।। 510।।

केचित् पुनरत्र साक्षाद् भाष्येऽनुदाहृतत्वात् स्थूलेन तुल्यो यातीत्येवमुदाहरन्ति । तथाह्याख्यातादुपमेयस्य क्रियाविशिष्टस्य प्रतीतिरितीदमेव युक्तमिति मन्यन्ते । तच्च न । यतः--
स्थूलेन तुल्यो यातीति बहिरङ्गा क्रियाश्रुतिः ।
अनिमित्तं वतेस्तुल्यं यातीत्यत्रेष्यते वति ।। 511 ।।
तुल्यो यातीति पुंलिङ्गेन सामानाधिकरण्यान्नियोगतः क्रियातुल्यत्वं नावगम्यते । यः केनचिदन्येन धर्मेण स्थूलेन तुल्यो देवदत्तः, स यातीत्येवमपि प्रतीतेः । तथा च देवदत्ते निरूढेन धर्मान्तरेण तुल्यतया निर्ज्ञाते तस्य पश्चात् सन्निपतन्ती क्रियाश्रुतिर्वतेः प्रत्ययस्योत्पत्तौ निमित्तं हेतुर्न भवति ।
शाब्दी हि क्रिया भवेदुपमानोपमेयसम्बन्धे निबन्धनम् । न चेह स्थूलेन तुल्य इति पदद्वयसम्बन्धकाले तत्प्रत्योत्पत्तिनिमित्ते काचित् सन्निहिता क्रिया, स्थूलशब्दस्य गुणवचनत्वात्, तुल्यशब्दस्य च पुंलिङ्गत्वेन क्रियाविषयत्वाभावात् ।
वृत्ते तु सम्बन्धे प्रत्ययोत्पत्तिनिमित्ते पदान्तरात् पश्चात् प्रतीयमाना क्रिया बहिरङ्गा नोपमासम्बन्धे निमित्तम् ।
एवञ्च स्थूलेन तुल्यः पुत्र इत्यस्मादस्याविशेषः । यदा तु स्थूलेन तुल्यं यातीति नपुंसकलिङ्गेन तुल्यशब्देन सामानाधिकरण्यं यातीत्यस्य, तदा क्रियाप्राधान्यं नियोगतः प्रतीयते, असत्त्वभूतत्वात् क्रियायास्तद्विशेषणस्य, नपुंसकत्वोपपतेः । तथा चात्रेष्यते वतिः । स्थूलवद् याति मन्दायमानपदविन्यासश्चालितोदरकलश इति ।

अत्र हि प्रकृतिप्रत्ययार्थाभिधायीपदद्वयसमन्वयकाल एव शब्दवाच्या क्रिया संभवत्युपमानोपमेयभावनिमित्तम्, ब्राह्मणवदधीत इतिवदिति न बहिरङ्गात् प्रतीतिः ।। 511 ।।

तदेवं पक्षद्वयेऽपि समीकृतस्य दोषस्य भाष्ये समाधिरमिहिता--`नैष दोषः । यत् तत् तुल्यं क्रिया चेत् सा भवतीत्युच्यते ।

तुलया च संमितं तुल्यम् । यदि च तृतीयासमर्थमपि क्रिया प्रत्ययार्थोऽपि क्रिया, ततस्तुल्यं भवति' इति । तदेतत् तात्पर्यतो विवृणोति--

द्वयं विशेष्यते तेन यदेकत्र विशेषणम् ।
तुल्यशब्दो हि तं धर्ममुभयस्थमपेक्षते ।। 512 ।।

यत् क्रियाग्रहणमेकत्र श्रुतं सद्विशेषणं तेन क्रियाग्रहणेन द्वयं प्रकृतिप्रत्ययार्थलक्षणं विशेष्यतेऽवच्छिद्यते । कथमेकेनोभयविशेषणम् । एवं हि प्रवृत्तिभेदस्तस्यभवेदित्यत आह--तुल्यशब्दो हीत्यादि । सादृश्यस्योभयाधिष्ठानत्वाद् यस्मात् तुल्यशब्दस्तं क्रियाख्यं धर्ममुभयगतमङ्गीकरोति, तस्मादुभयविशेषणं सामर्थ्यादवतिष्ठते श्रुत्यैकनिष्ठत्वेऽपीति ।। 512 ।।

एवं हि तुल्यशब्दार्थ उपपद्यत इत्याह--

एकः समानो धर्मश्चेदुपमानोपमेययोः ।
तुलया संमितं तुल्यमिति तत्रोपपद्यते ।। 513 ।।

भाष्येऽभिहितं `तुलया च संमितं तुल्यमि'ति । यद्यपि सदृशेऽर्थे तुल्यशब्दो रूढः, तथापि व्युत्पत्तिनिबन्धनं क्रियानुविधीयत इत्याशयः । तथा च यथा तुलया किञ्चित् परिच्छिद्यते, तथा समानेन धर्मेण परिच्छेद इति संमितत्वं समानमस्ति । एवञ्चैकत्रापि श्रुतोऽपरत्र सामर्थ्यादन्वयी समानो धर्मोऽवगम्यत इति तात्पर्येण तुलया संमितत्वमुक्तम् । तस्मात् प्रकृत्यर्थविशेषणेऽपि प्रत्ययार्थः क्रिया । न ह्यन्यस्तुल्यः क्रिययास्ति, अन्यदतः क्रियायाः ।। 513 ।।

एवं प्रत्ययार्थविशेषणेऽपि तुल्यशब्दसामर्थ्यात् प्रकृत्यर्थक्रियाक्षेप इत्युभयपक्षभावी दोषो नास्ति । स चात्र समानो धर्मो न यः कश्चित् । अपि तु यश्चोदनायां संनिहित इत्याह--

सूत्रे श्रुतश्च द्विष्ठोऽसावभेदेन प्रतीयते ।
न च सामान्यशब्दत्वादश्रुता गम्यते क्रिया ।। 514 ।।

असौ क्रियाख्ये धर्मः सूत्रे क्रिया चेदिति श्रुतः शब्देनैकगामित्वेऽपि चोदिते तुल्यातासामर्थ्यादुभयगतोऽवधार्यते । एवञ्च पुत्रेण तुल्यः स्थूलः, स्थूलेन तुल्यः पुत्र इत्यत्र प्रत्ययो न भवति । यत्र हि श्रूयते क्रिया, तत्रोभयगतत्वेनापेक्ष्यतां न त्वत्राश्रूयमाणे क्रियाशब्दे । न च पुत्रशब्द एव क्रियावचनोऽस्य सामान्यशब्दत्वात् । सकिये निष्क्रिये चाविशेषेण हि पुत्रशब्दः प्रत्यायकत्वेन वर्तते । ततश्चा नियोगतः क्रिययैव सादृश्यमिति नास्त्यवगमः । धर्मान्तरेणापि साम्यसंभवे समुदायशब्दस्य क्रियावत्यवयवे प्रवृत्तेरप्रमाणकत्वात् । यत्नसमधिगम्या हि प्रदेशे वृत्तिः शब्दस्येत्युक्तम् ।। 514 ।।

ननु च निदेशस्थायितादयो निरूढसंबन्धाःस पुत्रार्थे क्रियाः प्रतिपादिता इति तासामसंप्रत्ययः कस्मात् पुत्रशब्दादित्यत आह--

अश्रुताश्च प्रतीयन्ते निदेशस्थायितादयः ।
ये धर्मा नियतास्तेषां पुत्रादिशु न विद्यते ।। 515 ।।

श्रुतेः प्रतीतिहेतुत्वादश्रुताः कथं प्रतीयन्त इत्युक्तं नियता इति । तदयमर्थः--श्रुत्यभावादयमेव धर्म इति प्रतीतिर्नास्ति । सामान्येन तु प्रतीतावस्ति निमित्तं नैयत्यं नाम ।

तथा हि निरूढयोगत्वात् प्रसिद्धेः पदार्थैकदेशभूतानां भवति क्रियाणामन्तरेणापि स्ववाचकप्रयोगं पुत्रशब्दात् सामान्येन प्रतीतिः । एवमपि तेषां बहूनां धर्माणां निरूढत्वान्नियतस्य वाचकस्याभावान्नियोगतः क्रियाया एवोपमाहेतुत्वस्यासंप्रत्ययात् तेषां सामान्यधर्माणां संबन्धत्वेन पुत्रादिषु वाच्येषु तद्धितवृत्तिर्नास्ति । पुत्रवदयं माणवक इत्यत्र वत्यर्थसामर्थ्यात् क्रिया योग्याध्याहर्तव्या । पुत्रवदयं माणवको द्रष्टव्य इत्यादि ।

एवं स्थानिवदादेश (1-1-56) इत्यत्रापि स्थानिवद् वर्तत इत्यर्थः । इत्थञ्च स्थूलेन तुल्यं याति स्थूलवद् याति इति वृत्तिरुक्ता । अनपेक्षिते तु क्रियापदे नास्त्यवगतिः ।। 515 ।।

एतमेवार्थं निगमयति--

अनाश्रितक्रियस्तस्मान्न तुल्योऽस्ति क्रियावता ।

क्रियायाः श्रवणे सापि क्रियावत्ता प्रतीयते ।। 516 ।।

असति क्रियापदप्रयोगे यस्मान्नियमेन क्रिया साधारणी न प्रतीयते, तस्मात् पुत्रादिषु नियोगतः क्रियानिमित्तस्योपमानोपमेयभावस्याप्रतीतेर्वृत्तिर्नास्ति । अतोऽनपेक्षितासाधारणक्रियो नापरेण क्रियावता सदृशो विद्यते । ब्राह्मणवदधीते क्षत्रिय इत्यादौ तु मलोदाहरणे साक्षादुपमेयगतत्वेन क्रियायाः श्रवणे क्रियासंबन्धनिमित्तत्वेनोपमानेऽपि गम्यत इति द्वयोरपि पक्षयोर्दोषप्रतिविधानसाम्यम् ।। 516 ।।

एवमपि प्रत्ययार्थविशेषणपक्ष एव सिद्धान्तितः । तथा हि भाष्यम्--"किं पुनरत्र ज्यायः । प्रत्ययार्थविशेषणपक्ष एव ज्यायः । कुत एतत् । एवं हि कृत्वाचार्येण सूत्रं पठितम् । वतिना सामानाधिकरण्यं कृतम् । अपि चाव्ययेषु वतेः पाठो न कर्तव्यो भवति क्रियायामयं भवँल्लिङ्गसंख्याभ्यां न योक्ष्यते" इति । एतद् व्याचष्टे--

द्वयोः प्रतिविधानाच्च ज्यायस्त्वमभिधीयते ।

नित्यासत्त्वाभिधायित्वात् प्रत्ययार्थविशेषणे ।। 517 ।।

उबयोरपि पक्षयोर्दोषप्रतिविधानात् प्रशस्यत्वे प्रत्ययार्थविशेषणपक्षे ज्यायस्त्वमधीयते । यत्नान्तरापेक्षया ह्यत्र पक्षे लाघवमिति प्रशस्यतरत्वमाख्यायते ।

तथा हि--क्रियाया असत्त्वभूताया नित्यं नियोगतो वतेः प्रत्यायकत्वादलिङ्गसंख्यतयाव्ययत्वसिद्धेः स्वरादिषु पाठो न कर्तव्यो भवति ।। 517 ।।

ननु चात्रापि पक्षे क्रियावतः सत्त्वभूतस्य वतिवाच्यतेति कर्तव्य एव स्वरादिषु वतेः पाठ इत्याशङ्क्याह--

असत्त्वभूतो व्यापारः केवलं प्रत्यये यतः ।

विद्यते लक्षणार्थत्वं नास्ति तेन क्रियाश्रुतेः ।। 518 ।।

प्रत्यये विषयभूते वाच्यत्वेन यस्मादसत्त्वभूतो व्यापारः क्रियालक्षणः केवलो द्रव्यरहितोऽस्ति, तेन क्रियाश्रुतेः क्रियाशब्दस्य क्रियावदुपलक्षणत्वं नास्त्यत्र पक्षे यथा प्रकृत्यर्थविशेषणपक्षे शुद्धायाः क्रियायास्तृतीयासमर्थाया असंभवात् पूर्वमुक्तम् । संभवति हि श्रौते मुख्येऽर्थे लक्षणाया अनुपपत्तिः ।

तथा च क्रियामात्राभिधायित्वात् प्रत्ययस्याव्ययत्वोपपत्तौ तत्र पाठो न कर्तव्यः ।। 518 ।।

तत्रैतत् स्यात् । यथा प्रकृत्यर्थविशेषणपक्षे शुद्धायाः क्रियाया असंभवात् तद्वदुपादानम्, तथात्रापि पक्षे प्रत्ययवाच्यायाः क्रियायाः क्रियैव तुल्यत्वात् तस्याः शुद्धाया अभावे क्रियावचनादेव प्रत्यय इति कः पक्षयोर्विशेष इत्यत आह--

क्रियावतस्तु ग्रहणात् प्रकृत्यर्थविशेषणे ।

क्रियामात्रेण तुल्यत्वे सिद्धाऽसत्त्वाभिधायिता ।। 519 ।।

प्रकृत्यर्थविशेषणपक्षे क्रियावतः प्रकृत्यर्थत्वेनोपादानात् तुल्यतासामर्थ्याद् यदा क्रियैवोपमेयेति पक्षः, तदासत्त्वभूतार्थत्वाद् वत्यन्तस्याव्ययत्वं सिद्धम् ।। 519 ।।

यदा तु क्रियावान् प्रत्ययार्थ इति पक्षस्तदाह--

यदा क्रियानिमित्तं तु सादृश्यं स्यात् क्रियावतोः ।

क्रियावतोऽभिधेयत्वात् तदाऽद्रव्याभिधायिता ।। 520 ।।

तुल्यमिति नपुंसकेन विशेषणात् साक्षात् क्रियैव सदृशी समधिगम्यते । सा च क्रिया क्रियान्तरं यदा सौष्ठवादिना समानेन धर्मेणोपमिमीते, तदा प्रत्ययार्थविशेषणपक्षः ।

यदा तु क्रियावानुपमीयते, तदा द्वैतम् । व्यापारानुविद्धस्य वा प्राधान्यं तस्य व्यापारोपलक्षितस्य वा । पूर्वत्र पक्षेऽसत्त्वभूतत्वाद् अव्ययत्वं सिद्धम् । आख्यातवाच्यो ह्युपमेय इत्याख्यातस्यासत्त्वभूतार्थप्राधान्यादव्ययत्वम् ।। 520 ।। क्रियोपलक्षितस्य द्रव्यस्य

तु प्राधान्ये प्रकृतिवाच्योऽपि क्रियावान्, प्रत्ययार्थोऽपि क्रियावांस्तुल्यतावशाद् इति वतेः सत्त्वभूतार्थवाचित्वात् पाठेनाव्ययत्वमुक्तमित्याह--

अव्ययेषु वतेः पाठः कार्यस्तत्र स्वरादिवत् ।
ब्राह्मणेन समोऽध्येतेत्यत्र च प्रत्ययो भवेत् ।। 521 ।।

स्वरादीनां सत्त्ववचनत्वम्, स्वी रोहावः, स्वर्यात इति सत्त्वसंबन्धाव्यभिचारिणः कर्मादिभावस्य दृष्टत्वात् । अत एव चादिष्वसत्त्ववचनेष्वेषां पाठो न कृतः । पृथक् पाठेनाव्ययसंज्ञारब्धा । एवं वत्यन्तस्य द्रव्यवचनत्वे तद्वत् पाठेनाव्ययसंज्ञा कार्या । पाठसामर्थ्याद्धि सत्त्ववचनत्वेऽप्यव्ययसंज्ञा प्रवर्तते । पूर्वत्र तु पक्षेऽन्वर्थत्वादव्ययत्वं सिध्यति । भाष्यकारमते हि न व्येतीत्यव्ययमित्येव लक्षणम् । प्रपञ्चार्थस्तु पाठः ।

सूत्रकारमतेऽप्यपठितानां केषाञ्चित् सङ्ग्रहार्थमन्वर्थसंज्ञैव लक्षणम्, प्रपञ्चार्थः पाठ इत्येव न्याय्यम् । वार्त्तिककारमते त्वलिङ्गासंख्यमव्ययमित्येतदेवाव्ययलक्षणमिति । मुनित्रयदर्शनेऽपि प्रत्ययार्थविशेषणपक्षे पाठमन्तरेण सिद्धाव्ययसंज्ञा वत्यन्तस्येत्यस्य पक्षस्योत्कर्षः । उत्तरसूत्रेणापि वतेर्विहितस्यासत्त्वभूतार्थाभिधायित्वमिवशब्दस्येव । `तदर्हम् (पा. 5/1/117) इत्यनेनापि क्रियायां वतिर्विधीयत इति न तदर्थोऽपि पाठः ।

प्रकृत्यर्थविशेषणपक्षे चाव्ययेषु पाठचोदनाप्रणालिकया भाष्यकारेण ब्राह्मणेन क्रियामात्रवाचित्वे ह्यसत्त्वरूपतेति सामर्थ्यात् तद्वद्वाचित्वे सत्त्वरूपतायां तत्रैव तद्वति प्रत्ययोऽनिष्टः स्फुटमुक्तो भवति ।। 521 ।।

इदानीमत्र पक्षे वतिना सामानाधिकरण्यं विवरीतुमाह--

सामानाधिकरण्यं च वत्यर्थेनापदिश्यते ।
तुल्यमित्यन्यथा कल्प्यो वाक्यशेषोऽश्रुतो भवेत् ।। 522 ।।

वतिशब्देन भाष्ये वत्यर्थस्तुल्यशब्द उक्तः । तथा हि--विधीयमानत्वाद् वतेरसिद्धावस्थस्य विशेषणीयत्वं नास्ति । प्रसिद्धस्य हि भेदाय विशेषणोपादानमर्थवद् भवति । साधुत्वप्रतिपत्तये विशेषणापेक्षायां च न युगपद् वतेः सामर्थ्यं विद्यते । न चाप्यस्य क्रियारूपता अक्रियारूपता चास्ति, येनाक्रियानिवृत्यर्थं क्रियेत्येतद् विशेषणमुपादीयेत । तस्माद् वत्युपलक्षितेन वत्यर्थवाचिना तुल्यशब्देनात्र क्रियाशब्दस्य सामानाधिकरण्यं भाष्ये विवक्षितम् ।

तुल्यार्थो हि क्रिया चास्त्यक्रिया चेति युक्तं विशेषणम् । यत्तत् तुल्यं क्रिया चेत् सा भवतीति च श्रौतमेव सामानाधिकरण्यम् । प्रकृत्यर्थविशेषणपक्षे तु तेनेत्यस्य क्रियेत्यसमानाधिकरण्याद् यत् तत् तृतीयासमर्थं क्रिया चेत् सा भवतीति वाक्यशेषाध्याहारेण समन्वयः कल्पयितव्यः स्यात् । संभवति तु श्रौते समन्वयेऽध्याहारेण तदुपपत्तिर्गरीयसी ।। 522 ।।

अध्येतरि च प्रत्ययोऽनिष्टोऽत्र पक्षे न प्राप्नोतीत्याह--

क्रियावतोश्च सादृश्ये प्रत्ययार्थविशेषणे ।
अध्येत्रा सदृशोऽध्येतेत्यत्र नास्ति वतेर्विधिः ।। 523 ।।

सामानाधिकरण्येन क्रियाया एव तुल्यतया विशेषणात् तदाविष्ट एव कर्तर्यपि प्रत्ययोऽत्र पक्षे, न प्रधानभूते द्रव्ये । एवञ्च कृत्वाख्यातेनात्र क्रियाप्रधानेन निर्देशो ब्राह्मणेन तुल्यमधीत इति । पूर्वत्र पक्षे क्रियावता प्रत्ययार्थेन तथाविधस्यैन प्रत्ययार्थस्य (प्रकृत्यर्थस्य) साम्यमुपमाहेतुत्वेन क्रियाया गुणत्वादिति द्रव्यप्राधान्येऽनिष्टः प्रत्ययः प्रसजेत् ।

नाप्युत्तरसूत्रेण `तत्र तस्येव' (पा. 5/1/116) इत्यनेन पुत्रेण तुल्यः स्थूल इत्यादौ प्रत्यय इष्यते । बाह्मेन ति सम्बन्धिनोपजनितः प्रातिपदिकार्थव्यतिरेकात् षष्ठ्यन्तात् सप्तम्यन्ताद् वा तत्र प्रत्यय इष्यते । तेन पुत्रवत् स्थूल इत्यत्र नैवोत्पत्तव्यं प्रत्ययेन ।

यदा तु पुत्रवत् स्थूलो वर्तत इत्युच्यते, तदा क्रियाकृतो भवत्युपमानोपमेयभावो न गुणकृत इति भवति प्रत्ययः । सर्वथा क्रियानाश्रयणे तदभावः । तदेवं श्रौतस्य सामानाधिकरण्यस्योपपत्तेरव्ययेषु पाठाप्रसङ्गादध्येतरि तुल्येऽनिष्टप्रत्ययाप्रसङ्गाच्च प्रत्ययार्थविशेषणपक्षः प्रशस्यतरत्वेन सिद्धान्तितः ।। 523 ।।

इदानीं `तत्र तस्यैव' (पा. 5/1/116) इत्ययं वतिरिवार्थविषयो विचार्यते । तत्रेदं भाष्यं--`किमर्थमिदमुच्यते । न तेन तुल्यं क्रिया चेद् वतिरित्येव सिद्धमि'ति । तत्रेवतुल्यशब्दयोः समानार्थत्वेऽपि पूर्वेण तृतीयान्ताद् विधिः, अनेन तु सप्तम्यन्तात् षष्ठ्यन्ताच्चेति समर्थविभक्तिभेदात् कथं पूर्वेण सिद्धिरिति पूर्वपक्षभाष्याभिप्रायं व्याचष्टे--

तुल्यार्थैरिति या तस्यास्तृतीयाया न भिद्यते ।
अर्थो भेदेऽपि सर्वाभिरितराभिर्विभक्तिभिः ।। 524 ।।

`तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्, (पा. 2/3/72) इति या तुल्यार्थैर्योगे तृतीया विधीयते, तस्या योऽर्थः, स सकलाभिर्विभक्तिभिरिवयोगे विधीयमानाभिः करणभूताभिर्योऽर्थोऽभिधीयते, ततो न भिद्यते । भेदेऽपीति । सामर्थ्यादन्यत्वेऽपि विभक्तीनाम् ।

यद्वाभिधाव्यापारभेदेऽपि वस्त्वभेदः । वृत्तौ ह्यत्र विभक्तेरपगमात् तदर्थभेदकृतस्यावच्छेदस्यासम्भवः, सदृशार्थसम्प्रत्ययस्य समानत्वात् । केवलं विग्रहवाक्यमात्रमत्र भिद्यते ।

तस्माद् वस्त्वभेदात् पूर्वेणैव सिद्धिरुक्ता ।। 524 ।।

तमेवार्थाभेदमुदाहरति--

भुज्यते ब्राह्मणेनेव तुल्यं भुक्तं द्विजातिना ।
पश्यति ब्राह्मणमिव तुल्यं विप्रेण पश्यति ।। 525 ।।
ब्राह्मणेनेव विज्ञातं तुल्यं ज्ञातं द्विजातिना ।
दीयतां ब्राह्मणायेव तुल्यं विप्रेण दीयताम् ।। 526 ।।
ब्राह्मणादिव वैश्यात् त्वमधीष्वाध्ययनं बहु ।
इत्येवमादिभिर्भेदस्तृतीयाया न कश्चन ।। 527 ।।

तुल्यार्थयोगे तृतीया शेषविभक्तिः, इवार्थयोगे क्रियासाधने विभक्तयः । शेषसम्बन्धश्च क्रियाकारकसम्बन्धपूर्वक इति तृतीययात्र समस्तस्य क्रियाकारक सम्बन्धस्य हेतुभूतस्याक्षेपाद् वस्त्वर्थस्य भेदो नास्ति । आदिग्रहणात्--

विप्रेण तुल्यं वैश्यात् त्वमधीष्वाध्ययनं बहु ।
ब्राह्मणस्येव वैश्यस्य धनमेतदुपस्थितम् ।।
विप्रेण तुल्यं वैश्यस्य धनमेतदुपस्थितम् ।
गुणा विप्र इवात्रैते क्षत्रिये बहवः स्थिताः ।।
विप्रेण तुल्यं तिष्ठन्ति क्षत्रिये बहवो गुणाः ।

इत्युदाहार्यम् ।। 525--527 ।।

अत्र चोदयति--

तुल्यं मधुरयाधीये मात्रा तुल्यं स्मरामि ताम् ।
मधुरायाश्च मातुश्च कथं सादृश्यकल्पना ।। 528 ।।

मधुरायामिव पाटलिपुत्रेऽधीयेऽहम्, मातुरिव देवदत्तायाः स्मरामि इत्यत्र "तत्र तस्येव" (पा. 5/1/116) इतीष्यते वतिः, मधुरावदधीये, मातृवत् स्मरामीति । पूर्वेणैव तु सिद्धावत्रेदं वाक्यं स्याद्, मधुरया तुल्यमधीये, मात्रा तुल्यं स्मरामीति । तथा चाध्ययनस्य मधुरया सादृश्यम्, स्मरणस्य च मात्रा । तत्र मातुः स्मर्यमाणाया अधिकरणस्य च मधुराया न काचित् तादृशी क्रिया लक्ष्यते, याध्ययनस्मरणयोस्तुल्या स्यादिति तस्यां मातृमधुराशब्दयोर्वृत्तिः कल्प्यते ।

यदि परमध्ययनस्याध्ययनान्तरं स्मरणस्य च स्मरणान्तरमाश्रयभेदेन भिन्नं सदृशं स्यात्, तच्च कर्तृसमवेतमिति कर्माधिकरणयोर्मातृमधुरयोरस्यासम्भव एव ।। 528 ।।

तस्मात् कथमत्र पूर्वेण प्रत्यय इत्यत आह--

मधुराविषयः पाठः स्मरणं मातृकर्मकम् ।
मधुरामातृशब्दाभ्यामभेदेनाभिधीयते ।। 529 ।।
मदुरया तुल्यमधीय इत्युपमेयेऽध्ययनक्रिया श्रूयमाणोरमानेऽपि तामवगमयति समानधर्मप्रयुक्तत्वादौपम्यस्य । तथा च मधुराधिकरणकमध्ययनं मधुरेत्याधाराधेययोरभेदविवक्षायामयं प्रयोगः । एवं मातृविषयं स्मरणं विषयविषयिणोरभेदाभिसन्धानेन मातृशब्देन कथ्यत इति मात्रा तुल्यं स्मरामीति प्रयोगः । मधुराधिकरणेनाध्ययनेन तुल्यं स्मरामीति प्रयोगः ।
मधुराधिकरणेनाध्ययनेन तुल्यं पाटलिपुत्रेऽध्ययनम्, मातृविषयेण स्मरणेन तुल्यं देवदत्तायाः स्मरणमित्यर्थः ।
यद्यपि च मातात्र शेषः, तथापि वास्तवं कर्मत्वमभिप्रेत्य स्मरणं मातृकर्मकमित्युक्तम् । कर्मप्रभावितो ह्यत्र शेषः ।
तथाच " अधीगर्थदयेशां कर्मणि" (पा. 2/3/52) इति कर्मणः शेषत्वविवक्षायामियं षष्ठी प्रतिपदोक्ता समासनिवृत्त्यर्थमिति निर्णीतचरम् ।। 529 ।।
यथा च पूर्वं समुदायशब्दानामवयवे वृत्तिरुपपादिता, तथात्राप्यस्तीति निदर्शनपूर्वकमाह--
उष्ट्रावयववतुल्येषु मुखेषूष्ट्रश्रुतिर्यथा ।
वर्तते गृहतुल्ये च प्रासादे मधुराश्रुतिः ।। 430 ।।
उष्ट्रो मुखमस्येत्येवमुष्ट्रमुखशब्दो व्युत्पाद्यते । तत्र चोपमानपूर्वपदस्योत्तरपदलोपः प्रत्याख्यातो भाष्ये ।
सामानाधिकरण्यान्यथानुपपत्त्या ह्युष्ट्रशब्दोऽत्रोष्ट्रावयये मुखे वर्तते ।
न च प्राण्यन्तरमुखं प्राण्यन्तरस्य सम्भवतीति सामर्थ्यादिवार्थगर्भीकारेणात्र सम्बन्धः ।
इत्थं चात्र यथा समुदायशब्दोऽवयवे वर्तते, तथा मधुराशब्दः समुदायवचनोऽप्यत्रैकदेशे गृहे वर्तत इति मधुरातुल्याः पाटलिपुत्रे गृहा इत्यप्ययमर्थो मधुरागृहैस्तुल्याः पाटलिपुत्रगृहा इति । चशब्दोऽत्र तथाशब्दार्थे । यद्वा निदर्शनान्तर्भावनेन दृष्टन्तदार्ष्टान्तिकयोः समुच्चयेन निर्देशोपपत्तिः । एवमनेन मधुराया इव पाटलिपुत्रस्य गृहा इतीवार्थविषयो वतिः सङ्गृह्यते ।। 430 ।।
यद्वात्रोपचारात् क्रियायां द्रव्यवचनस्य वृत्तिर्मा भूत् । क्रियाद्वारकं तु द्रव्ययोरेव साम्यमिति निदर्शनद्वारेण व्युत्पादयितुमाह--
यथाध्ययनयोः साम्यमध्येत्रोरपदिश्यते ।
तथा क्रियागतैर्धर्मैरुच्यन्ते साधनाश्रयाः ।। 431 ।।
ब्राह्मणवदधीते क्षत्रिय इत्यध्ययनक्रिययोः साम्यं तुल्यत्वमध्येत्रोस्तत्साधनयोः कर्त्रोराख्यायते ।
तथा ह्यध्ययनद्वारेणाधीयानयोरुपमानोपमेयभावो व्यवस्थाप्यते । एवं मधुरावदधीते, मातृवत् स्मरतीत्यध्ययनस्मरणाख्यक्रियाश्रयैर्धर्मैः सादृश्यलक्षणैः कारकशक्त्याधारा मधुरादयः कथ्यन्ते ।
अद्ययनस्मरणद्वारेण हि तत्कर्माधिकरणयोरुपमानोपमेयभावलक्षणः सम्बन्धोऽवतिष्ठते । न हि कर्तार एव क्रियाद्वारेण सम्बन्धमनुभवन्ति, साधनमात्रेण क्रियाया अविनाभावात् । तदेवं मधुरया तुल्यमधीते, मात्रा तुल्यं स्मरतीत्यादावपि पूर्वेणैव वतिः सिद्धः ।। 431 ।।
तत्रैतत् स्यात्--क्रियोपाधौ सादृश्ये पूर्वेण विधिः । तथा च वतिनैवान्तर्भावात् क्रियायास्तद्वचनस्य प्रयोगो न भवति ।
इह तु सामान्ये सादृश्यमात्रे विधानमित्यस्ति विशेष इत्याशङ्क्याह--
इवार्थे यच्च वचनं पूर्वसूत्रे च यो विधिः ।
क्रियाशब्दश्रुतौ भेदो न कश्चित् विद्यते तयोः ।। 432 ।।
सति क्रियापदप्रयोगे "तेन तुल्यं क्रिया चेद् वतिः" (पा. 5/2/225) इत्यनेन पूर्वसूत्रेण "तत्र तस्यैव" (पा. 5/2/116) इत्यस्य योगस्य विषयो व्याप्त इति नेदमारब्धव्यम् ।। 432 ।।
न च पूर्वेण विधौ क्रियापदप्रयोगो नास्ति, यतः--
यद्यप्युपाधिरन्यत्र नियतो न प्रयुज्यते ।

रूपाभेदात् त्वनिर्ज्ञाता क्रियात्र श्रूयते पुनः ।। 533 ।।

"हरतेर्दृतिनाथयोः पशौ" (पा. 3/2/25), "सास्य देवता' (पा. 4/2/24) इत्यादावयं पश्वादिरुपाधिरवच्छेदको विशिष्ट इति दृतिहरिरित्यादौ प्रयोगे स्वशब्देन नोपादीयते, प्रत्ययेनैव गमितत्वात् । नियते ह्यर्थे विधीयमानः प्रत्ययो नार्थान्तरे सन्दिह्यते । इह पुनः सामान्येन क्रियोपाधिरिति वत्यन्तान्नियोगतः क्रियाविशेषस्यावगमाद् विशिष्यक्रियावचनस्य प्रयोगोऽवश्यम्भावी वृत्तिपदं ह्यविशिष्यरूपं क्रियामात्राप्रत्यायने समर्थं स्यात्, न तु नियतक्रियावेदने तस्य शक्तिः ।। 533 ।।

एतदेव निदर्शनेन साधयति--

यथा व्युत्परयऋ पुच्छौ क्यङ्न्ते सुदरादयः ।

सत्यपि प्रत्ययार्थत्वे भेदाभावादुदाहृताः ।। 534 ।।

पुच्छादुदसनव्यसनपर्यसनेषु णङो विधिरुक्तः । तथा च पुच्छौ ण्यन्ते पुच्छयतावविशेषादुदसनादीनां सामान्येनावगमे विशेषाभिव्यक्तये प्रत्ययेनैवान्तर्भाविते व्युदसनादावुदादेरुपसर्गस्य प्रयोगोऽङ्गीकृतः । उत्पुच्छयते, विपुच्छयते, परिपुच्छयत इति । तथा भृशादिष्वभिमनस् इत्यादावुपसर्गाणां प्रकृत्यर्थविशेषणपक्षेऽडादिषु दोषात् सिद्धान्तिते, भवत्यर्थलक्षणप्रत्ययार्थविशेषणपक्षे प्रत्ययेनैवोपगृहीतार्थत्वेऽपि रूपाभेदात् प्रत्ययान्तस्य विशेषाभिव्यक्तावसामर्थ्यात् प्रयोगोऽङ्गीकृतः ।

अभिमनायते,सुमनायते, दुर्मनायत इति ।

एवं क्रियामात्रे वतेर्विधानात् तदन्तेन क्रियाविशेषानभिव्यक्तौ तदभिव्यक्त्यर्थं क्रियापदप्रयोगो न्याय्यः । तथा च क्रियाशब्दश्रुतौ भेदाभावात् पूर्वेणैव सिद्धमिति स्थितम् ।। 534 ।।

एतदेव निगमयति--

एवञ्च सति पूर्वेण सिद्धोऽत्रापि वतेर्विधिः ।

नियमे वाभिधाने वा भिद्यते न क्रियाश्रुतिः ।। 535 ।।

इह यदा पूर्वसूत्रेण वतिः, तदापि तेन क्रियासामान्यस्याभिधानाद् विशेषव्यक्तये क्रियापदप्रयोग इति नियमो भवति, विशेषान्तरव्यच्छेदात् । अनेन तु योगेन यो वतिः, स सादृश्यमात्रमुपादत्त इत्यनाख्यातत्वाद् वत्यन्तेन क्रियायाः क्रियाशब्देन प्रत्यायनमपूर्वमवतिष्ठते ।

इत्थं चैतावानत्र भेदः । क्रियाशब्दप्रयोगस्तु सर्वथा न भिद्यते न विशिष्यत इत्यनर्थकः पुनर्वतेरनेन विधिर्लक्ष्ये विशेषाभावादित्यभिप्रायः पूर्वपक्षभाष्ये व्याख्यातः ।। 535 ।।

अनन्तरमक्रियार्थोऽयमारम्भ इति योगप्रयोजनमुक्तं व्याचष्टे--

इवे द्रव्यादिविषयः प्रत्ययः पुनरुच्यते ।

क्रियाणामेव सादृश्ये पूर्वसूत्रे विधीयते ।। 536 ।।

"तेन तुल्यम्" (पा. 1/1/115) इत्यनेन क्रियया तुल्यत्वस्य विशेषणात् क्रियानिमित्ते साम्ये वतिरुक्तः । तथा च गवा तुल्यो गवय इत्यत्र क्रियासादृश्ये वतिर्न भवति । अनेन त्विवार्थे वतिर्द्रव्यगुणनिमित्तेऽपि सादृश्ये भूयो विधीयत इत्यस्ति विशेषः ।। 536 ।।

तथा ह्यत्रोदाहरणम्--

मधुरायामिव गृहा ब्राह्मणस्येव पाण्डुराः ।

इत्यत्र द्रव्यगुणयोः पूर्वेण न वतिर्भवेत् ।। 537 ।।

मधुरायामिव पाटलिपुत्रे गृहा निचितनवरत्ना इत्यत्र गृहद्रव्ययोस्तुल्यत्वम्, ब्राह्मणस्येव क्षत्रियस्य शुक्ला दन्ता इति शौक्ल्यगुणनिमित्तं सादृश्यम् ।

अत्र पूर्वसूत्रेण वतिर्न भवति, तस्य क्रियानिमित्तसादृश्ये नियमितत्वादिति पुनरिहोच्यते ।। 537 ।।

एतदाक्षिपति--
आरम्भस्याक्रियार्थत्वे नार्थो योगेन विद्यते ।
ऋते क्रियाया ग्रहणात् पूर्वयोगेन सिध्यति ।। 538 ।।
"तत्र तस्येव" (पा. 5/1/116) इत्यस्य योगस्य द्रव्यगुणतुल्यत्वार्थे करणेऽङ्गीक्रियमाणे पूर्वत्र क्रियाग्रहणमकृत्वा नारब्धव्यमिदम् ।
तथाहि--क्रियाग्रहणस्य द्रव्यगुणनिमित्ते सादृश्ये मा भूदिति प्रयोजनम् । तत्रापि चानेन विधावनर्थकं तद्व्यावर्त्याभावादिति तेन तुल्यमित्येवास्तु सर्वविषये सादृश्ये वतिविधानमित्यत्रार्थः ।। 538 ।।
ननु च न मधुरया तुल्या गृहाः, नापि देवदत्तेन तुल्या दन्ताः, अपि तु मधुराधिकरणैर्गृहैरितरे तुल्याः, देवदत्तसम्बन्धिभिश्च दन्तैरितरे दन्ता इति पूर्वेणासिद्धौ षष्ठीसप्तमीसमर्थाद् वतिविधानं युक्तमेवेत्याशङ्क्याह--
मधुरावयवे वृत्तिर्व्याख्याता मधुराश्रुतेः ।
ब्राह्मणावयवान् दन्तान् वक्ष्यति ब्राह्मणश्रुतिः ।। 539 ।।
नेदमपूर्वं चोद्यते, प्रागेवास्यार्थस्य निर्णीतत्वात् । तथा ह्यष्ट्रशब्दो यथावयवे मुखे वर्तते, तथा मधुरादिशब्दस्तदवयवे गृहे वर्तिष्यत इति मधुरया तुल्या इत्यादिविग्रहोपपत्तिः । नियतावयवपरिग्रहश्चात्र दन्तादीनामुपमेयत्वेन प्रयोगादवधार्यते ।।539 ।।
इदानीं पूर्वत्र क्रियाग्रहणस्य व्यवच्छेद्यमुपदर्शयन्निवार्थविषयस्य वतेरारम्भसमर्थनार्थमाह--
न काचिदिवयोगे तु बाह्यात् सम्बन्धिनो विना ।
षष्ठी विधीयते तत्र पूर्वेण प्रत्ययो भवेत् ।। 540 ।।
यदि पूर्वत्र क्रियाग्रहणं न क्रियते, तदा गौरिव गवय इत्यत्रापि वतिः स्यात् । इवशब्दयोगे हि व्यतिरेकविभक्तिः षष्ठी न काचिदुपदिश्यतेऽनपेक्ष्य बाह्यं सम्बन्धिनमिवार्थमात्रे । इवार्थो हि सामानाधिकरण्येनैव समन्वेति, न तु व्यतिरेकं जनयति । तथा च तद्योगे प्रथमैव भवति ।। 540 ।।
ननु पूर्वत्र तृतीयासमर्थाद् वतिरित्यत्र प्रथमासमर्थात् कथं प्रसङ्ग आपद्यते इत्यत आह--
आधिक्यं तुल्यशब्देन सम्बन्ध उपजायते ।
षष्ठीतृतीये तत्र स्तस्तुल्यशब्दो हि वाचकः ।। 541 ।।
तुल्यशब्दः स्वतन्त्रस्यार्थस्य वाचक इति तेन सत्त्वभूतार्थाभिधायिना समन्वये प्रतियोगिनो व्यतिरेकः समुद्भवति । तथा च "तुल्यार्थैः--" (पा. 2/3/72) इति विकल्पेन व्यतिरेकविभक्ती षष्ठीतृतीये भवतः ।। 541 ।।
तुल्यशब्दसमानार्थस्तु यदेवशब्दः प्रयुज्यते, तदा--
इवशब्दप्रयोगे तु बाह्यात् सम्बन्धिनो विना ।
नाधिक्यमुपमानेऽस्ति द्योतकः सम्प्रयुज्यते ।। 542 ।।
परपदार्थनिष्ठत्वेन प्रयोगात् तद्गतं विशेषं प्रकाशयन् स्वतन्त्रेणार्थेनायोगाद् व्यतिरेकमिवशब्दो द्योतको नापादयति । ततश्च यदा तुल्यशब्दसमानार्थेनेवशब्देन सादृस्यमुपदर्श्यते, तदा व्यतिरेकविभक्त्यभावादसति क्रियाग्रहणे पूर्वेण वतिर्भवेदित्यवश्यकर्तव्यमेतन्निवृत्त्यर्थं क्रियाग्रहणम् । तथा चाक्रियार्थोऽयमारम्भो युज्यत इत्यर्थः ।
न चानेनेवार्थे प्रथमासमर्थाद् गौरिव गवय इत्यत्र प्रसज्यते, `तत्र तस्येव' इति समर्थविभक्तिनियमादिति न किञ्चिदनिष्टम् ।। 542 ।।
ननु पूर्वत्र तुल्यशब्देनैव सादृश्यमुपदर्शयितव्यं तृतीयानिमित्तव्यतिरेकहेतुना, अनपेक्ष्य बाह्यं सम्बन्धिनं प्रकृत्यर्थस्येवार्थेन समन्वयाभावादिवशब्देन सादृश्योपदर्शनायोगादिति कुतो गौरिव गवय इत्यत्र प्रत्ययप्रसङ्ग

इत्याशङ्क्य, इवतुल्यनिमित्तयोर्व्यतिरेकयो र्भेदप्रदर्शनेनासति क्रियाग्रहणे पूर्वयोगेन तुल्यनिमित्ते व्यतिरेके विधीयमानो वतिस्तुल्यशब्देनापि सादृश्योपदर्शनेऽतिप्रसज्जेदेवेत्याह--

इवे यो व्यतिरेकोऽत्र स प्रालादादिहेतुकः ।
तुल्ये तद्विषयापेक्षमाधिक्यमुपजायते ।। 543 ।।

मधुरायामिव पाटलिपुत्रे प्रासादाः, देवदत्तस्येव यज्ञदत्तस्य दन्ता इति योऽयमिवशब्दप्रयोगे व्यतिरेकः षष्ठीसप्त मीविभक्तिनिमित्त उपलभ्यते, नासाविवार्थनिबन्धनः । अपि त्वनपेक्षित एवेवार्थयोगे दन्ताप्रासादादिनिमित्तोऽयम् । ततश्च प्रत्ययार्थहेतुकस्य व्यतिरेकस्यात्रासम्भवात् सामर्थ्याद् बाह्यसम्बन्धिनिमित्तषष्ठीसप्तम्यन्ताद् वतिरवतिष्ठते । पूर्वेण तुल्यार्थे तु यो वतिस्तत्र बाह्यं सम्बन्धिनमनपेक्ष्यैव तुल्यार्थनिमित्त एव व्यतिरेके तृतीयान्ताद् वतिरिति भिन्नविषयतानयोः ।।543 ।।

तथा चासति पूर्वत्र क्रियाग्रहणे तुल्यार्थनिमित्ते व्यतिरेकेऽतिप्रसङ्गमुदाहरति--

गवयेन समोऽनड्वानिति वृत्तिस्तदा भवेत् ।
न त्वस्ति गौरिवेत्यत्र व्यतिरेक इवाश्रयः ।। 544 ।।

क्रियानिमित्ते तुल्यत्वे क्रियाग्रहणप्रत्याख्यानेऽनादृते गवयेन तुल्योऽनड्वानित्यत्रापि वतिः स्यात् साक्षाद् द्रव्ययोरेव सादृश्ये । तस्मादवश्यकर्तव्यंपूर्वत्र क्रियाग्रहणमिति तेनासिद्धौ द्रव्यगुणसादृश्ये द्वितीययोगस्यारम्भो युक्तः ।

न च द्वितीयेन योगेन गवयेन तुल्योऽनड्वानित्यत्र प्राप्नोति, इवार्थनिबन्धनो हि व्यतिरेको न सम्भवतीति बाह्यसम्बन्ध्यपेक्षे तस्मिन् वतिर्द्वितीयेन योगेन न भवति । न चात्र बाह्यसम्बन्ध्यनुसरणम् । अत एव सादृश्यभावः ।

न चापि गौरिव इत्यत्रापि द्वितीयेन योगेन प्रत्ययः प्राप्नोति, इवार्थनिबन्धनस्य व्यतिरेकस्याभावाद् बाह्यसम्बन्ध्यननुसरणात् । तथा चात्र षष्ठ्यभावात् प्रथमैव । न च प्रथमासमर्थाद् द्वितीयेन योगेन प्रत्ययो विहितः ।

यदा तु बाह्योऽपेक्ष्यते सम्बन्धी, तदा गौरिव गवयस्य संस्थानमिति भवत्येव वतिर्गोवदिति ।। 544 ।।

तदेवं क्रियाग्रहणसमर्थनेन योगद्वयारम्भे समर्थिते पूर्वोत्तरयोर्योगयोर्विषयविभागेनावस्थानमाह--

उपमेयेन सम्बन्धात् प्राक् तु प्रासादादिहेतुके ।
व्यतिरेके वतेर्भावो न तु तुल्याथ्हेतुके ।। 545 ।।

प्रागुपमेयसम्बन्धात् प्रासादिदिनिमित्तवशेसञ्चातेव्यतिरेके तद्विभक्तौ षष्ठ्यां सप्तम्यां चोपजातायां पश्चादिवार्थयोगे सत्युपमेयसम्बन्धे वतिर्द्वितीयेन योगेन । बाह्यसम्बन्धि समुत्थापिते व्यतिरेके समुपजातेऽन्तरङ्गे तन्निमित्तव्यतिरेकविभक्तीस्तृतीया समर्था ।

तत्र हि तुल्यार्थनिमित्तस्यैव व्यतिरेकस्योद्भवाद् बाह्यसम्बन्ध्यपेक्षा निष्प्रमाणिका । किन्तु असति क्रियाग्रहणे ब्राह्मणेन तुल्यः क्षत्रिय इति धर्मान्तरनिमित्तेऽपि सादृश्ये स्याद् वतिरिति विभक्तविषयत्वेऽपि योगयोः क्रियाग्रहणं कर्तव्यमेव । तदेवमक्रियार्थः समर्थितः "तत्र तस्येव" (पा. 5/1/16) इत्यारम्भः ।। 545 ।।

तत्रैतत् स्यात्--प्रकृतांविभक्तिं परित्यज्य किमर्थं समर्थविभक्त्यन्तमुपादीयते, तत्र भाष्यम्--`न काचिदिवशब्देन योगे तृतीया विधीयते' इति ।

तद् व्याचष्टे--

इवशब्देन सम्बन्धे न तृतीया विधीयते ।
प्रकृतां तामतस्त्यक्त्वा विभक्त्यन्तरमाश्रितम् ।। 546 ।।

इवशब्देन प्रत्ययार्थे निर्दिष्टे प्रकृताया एव विभक्तेस्तेन सम्बन्धः कल्प्येत, यदीवशब्दयोगे शेषविषये तृतीया विधीयेत "तुल्यार्थैः" (पा. 2/3/72) इति तृतीया इवशब्दयोगेऽविधानादिवशब्दस्य द्योतकत्वात् तुल्यार्थत्वाभावात् । एवं तावदन्तरङ्गे सम्बन्धे नास्तीवयोगे तृतीया, नापि तद्योगे शेषविषये तृतीया ज्ञापयितुमिष्टा सप्तमीवत् ।

बाह्यसम्बन्ध्यपेक्षायां तु शेषविङक्तिर्नास्तीवार्थयोगे । अपि तु कारकविभक्तिर्यथायथं क्रियासम्बन्धे भवति । न च तया कारकविभक्त्या तृतीयया सर्वो विभक्त्यर्थो व्याप्तस्तुल्यार्थयोगे तृतीयावद् यथा प्राक् प्रदर्शितमिति प्रकृतासम्भवन्तीं तृतीयां परित्यज्य षष्ठीसप्तम्यौ बाह्यार्थसम्बन्धोपजनितव्यतिरेकनिमित्ते निर्दिश्येते । ताभ्यां च तुल्यशब्दस्य समन्लयानुपपत्तेः प्रत्ययार्थोऽप्यन्य इवशब्देनेह दर्शितः । तथा चान्तरङ्गे सम्बन्धे पूर्वो विधिः, अयं तु बाह्यसम्बन्ध्यपेक्षायामिति स्फुटो विवेकः । अतोऽनन्तरं भाष्यम्--`ननु च सप्तम्यपि न विधीयते । एवं तर्हि सिद्धे सति यदिवशब्दयोगे सप्तमी शास्ति, तज्ज्ञापयत्याचार्यो भवतीवशब्देन योगे सप्तमीति । किमेतस्य ज्ञापने प्रयोजनम् । देवेष्विव नाम ब्राह्मणेष्विव नामेत्येष प्रयोग उपपन्नो भवति' इति ।

शेषविषये यथा तृतीया नास्ति, तथा सप्तम्यपीत्यत एव ज्ञापकाद् यथा सप्तमी भवत्येवं तृतीयापि भविष्यति । इवशब्दयोगे तस्मादेव ज्ञापकादित्यनुवृत्त्यैव तृतीयान्ताद् वतौ सिद्धे तत्रेति सप्तमीनिर्देशो ज्ञापयति शेषविषये भवतीवशब्दयोगे सप्तमीति । तृतीया तु नेष्यत इति नासौ ज्ञाप्यत इति भाष्यार्थः ।। 546 ।।

एतद् विवृणोति--

सप्तम्यपि न तत्रास्ति ज्ञापनार्था तु सा कृता ।
इष्टा सा शेषविषये नियतासु विभक्तिषु ।। 547 ।।

बाह्यसम्बन्धिनिमित्तस्य व्यतिरेकस्य षष्ठ्यैव संग्रहात् सप्तमीविभक्तिरत्र तृतीयावदेव नास्ति । तथा चेयमपि नोपादेया । ननु च षष्ठीसमर्थाद् विधौ सप्तम्यर्थस्य न सग्रहः, येन सप्तम्यन्तमुपमेयं प्रयुज्येत मधुरावत् पाटलिपुत्रे प्राकारा इति । षष्ठ्यर्थो हि शेषः, सप्तम्यर्थस्त्वाधारः साधनम् ।

न च युगपच्छेषसाधनयोर्विवक्षा न्याय्या, विरोधात् । साधनानां ह्यविवक्षा शेष इत्युक्तम् ।

अत्र प्रतिपाद्यते-षष्ठीसमर्थादपि वतौ वृत्तौ विभक्तिविशेषस्याश्रवणादुपमानोपमेयभावमात्रस्यावगतेः सम्बन्धसामान्ये सर्वविशेषान्तर्भावाद् युज्यते सप्तम्यन्तमुपमेयम् ।

तथाहि--वत्यन्तेन पदेनौपम्यमात्रं प्रतिपाद्यते, लोके विशेषाविर्भावने तस्याशक्तत्वादिति शास्त्रे तथैवानुगमात् सम्बन्धसामान्ये षष्ठीसमर्थादेव वतिरुपदिश्यते । सर्वविशेषाणां च सम्बन्धसामान्येऽन्तर्भावाद् यदोपमेयं सप्तम्यन्तं प्रयुज्यते, तदा तत्राधिकरणत्वविवक्षायामुपमानेऽप्यधिकरणविषयत्वमवसीयते । गुणीभूतं ह्युपमानं प्रकृत्यर्थः प्रत्ययार्थे वत्यर्थेऽत्रेत्युपमेयाद् विशेषावधारणं तस्य । तथा चोद्घोष्यते--उपमाने यः संशयः स उपमेयाद् व्यावर्तत इति ।

नन्वनेन न्यायने मतुप्प्रत्ययोऽपि षष्ठीसमर्थादेव विधेयः, तथापि सप्तमिय्र्थस्यावगमादिति किं तत्रास्मिन्निति सप्तमीनिर्देशेन । नैतत् समानम् । मतुपो हि षष्ठीसप्तम्यर्थ एव वाच्यः प्रधानमिति वृक्षवान् पर्वत इत्यादावाधारभावः श्रुत्यैवावगम्यमानोऽस्मिन्निति भेदेन षष्ठ्या निर्देष्टुं न्याय्यः ।

अन्वाख्याने हि प्रतीयमानो लोकेऽर्थोऽङ्गभावेनोपादीयते । अस्ति चात्र विशेषेण प्रतीतिः । वतौ पुनरुपसर्जनभूतः प्रकृत्यर्थ इति तदन्तादौपम्यमात्रस्य प्रतीतिः प्रधानस्य प्रत्ययार्थस्येति तदेव षष्ठ्या समर्थविभक्त्या गुणभूतेन प्रकृत्यर्थेन योजनीयमिति तयैव सप्तम्यर्थस्य व्याप्तेः सप्तमी नोपादेया सती ज्ञापनायोपादीयमाना प्रकल्पते ।

तथाहि--यथायोगं नियतविषयावस्थानासु विभक्तिषु परस्परविषयावगाहनमनुपपन्नमित्यत्र षष्ठीविषये शेषे सप्तमी भवतीति ज्ञाप्यते, यथेवशब्दयोगे षष्ठी भवति बाह्यसम्बन्धिनिमित्ता तथा सप्तम्यपीत्यर्थः ।। 547 ।।

तदन्यास्तु विभक्तयः स्वविषयप्रतिनियता इवयोगेऽपि न सङ्कीर्यन्त इत्याह--

यदि तु व्यतिरेकेण विषयेऽस्मिन् विभक्तयः ।
प्रवर्तेरंस्तृतीयैव व्यभिचारं प्रदर्शयेत् ।। 548 ।।

असमिन्निवार्थविषये सर्वा विभक्तयो यद्यविशेषेण स्वाविषयातिक्रमेण सङ्करेण स्युरित्येवं ज्ञापनमत्रेष्टं स्यात्, तदा प्रकृता तृतीयैवेममर्थं शक्नोति ज्ञापयितुमिति तां त्यक्त्वा विभक्त्यन्तराश्रयणे न स्यात् ।

विभक्त्यन्तरोपादाने तु सप्तम्येव शेषविषयेऽत्र भवति, नान्या विभक्तय इति विशेषेण ज्ञापनमिष्टमित्यवसीयते । ततश्च देवैरिव नामेत्यादिप्रयोगोऽसाधुः ।। 548 ।।

एतदेव निगमयितुम् `एवं तर्हि सिद्धं' इति भाष्यं निगमयति--

व्यभिचारे तथासिद्धे सप्तमीग्रहणाद् विना ।
सप्तम्येवोच्यते सर्वा न सन्त्यन्या विभक्तयः ।। 549 ।।

तथेति तृतीयानुवृत्त्या सङ्करे निश्चितेऽन्तरेणापि सप्तमीग्रहणं यत् तस्या उपादानम्, तज्ज्ञापकस्य नियतविषयतां दर्शयति ।। 549 ।।

एवं तर्हि सप्तम्येवात्रोपदीयताम् । तथा हि--ज्ञापनमपि सिध्यति । षष्ठ्यान्ताच्च वतौ योऽर्थः, स एव सप्तम्यन्तादपि । विषयभावलक्षणो हि सप्तम्यर्थः षष्ठ्यर्थमपि सङ्ग्रहीतुं प्रभवति । तथा च भाष्यम्--`नित्यं परिग्रहीतव्यं परिग्रहीत्रधीनं भवति' इत्याशङ्क्याह--

अत्यन्तस्य विषये सप्तम्या ज्ञापनार्थया ।
बाधिता विनिवर्तेत षष्ठी सा गृह्यते पुनः ।। 550 ।।

इवार्थविषयेऽसम्भवन्ती सप्तमी निर्दिश्यमाना स्वात्मनोऽभावं तत्र नित्यमेव ज्ञापयतीति पक्षे षष्ठी नैव स्यादिति तस्या अपि ग्रहणमत्र पक्षे भावार्थम् ।

ननु चासति षष्ठ्युपादाने केवलसप्तमीनिर्देशे बाह्यसम्बन्धिनिमित्तेऽधिकरण एव सप्तम्या उपपद्यमानत्वे कथं शेषविषये भावो ज्ञाप्यते । सत्यां हि षष्ठ्यां शेषोऽयमिति निश्चीयते, तत्रैव षष्ठ्युपपत्तेरिति तत्साहचर्येण सप्तमी निर्दिश्यमाना स्वात्मानं तद्विषयं ज्ञापयेत् ।

तस्मात् षष्ठ्या अनिर्देशे सप्तम्या ज्ञापकत्वमेव नोपपद्येत । कुत एव तया षष्ठी बाध्येत । सत्यमेतत् अन्यतास्यैव तु विभक्त्यात्रेतरविषयव्याप्तिसिद्धेरुभयोपादानादेका ज्ञापनार्था सम्पद्यते । तत्र च सप्तमीविषये षष्ठ्या अनिष्टत्वात् सप्तम्येव ज्ञापनार्था भाष्येऽभिहिता । षष्ठ्यन्तादपि च वतेरिष्टत्वात् स्वविषये षष्ठी नापावर्ततेऽत्रेतीयमेवास्या अबाधाख्यायते ।

ननु च यदि शेषविषये सप्तमीयम्, अत एव ज्ञापकादित्युच्यते, तदाधिकरणसप्तम्यन्ताद् वतिर्न स्यात् । मधुरायामिव पाटलिपुत्रे प्राकारा इति । एतस्मिन् हि विषये शेषविषयेयं सप्तमीत्यनुप्रयोगे पाटलिपुत्र इति सप्तमी न स्याद् अन्तरेणाधाराधेयविवक्षाम् । इवशब्दयोगे हि शेषविषया सप्तमी ज्ञाप्यते । न चानुप्रयोगेऽस्तीवशब्दः । तस्मान्मधुरायामिव पाटलिपुत्रस्य प्राकारा इत्येव सिध्येत् । सत्यमेतत् । तत्रेत्येतत् पुनरावर्तते, तन्त्रेण वा निर्देश इत्यधिकरणसप्तम्यन्ताद् वतिरेकेन क्रियते । अपरेण शेषविषये सप्तमी ज्ञाप्यत इति भाष्यकाराभिप्रायमुपाध्याया वर्णयन्ति ।

अन्ये त्वाहुः--सप्तम्यर्थोऽप्याधाराधेयभावः सम्बन्धसामान्यविहितया षष्ठ्यान्तर्भावयितुं शक्यत एवेत्यनुप्रयोगे सप्तम्यन्तेऽपि षष्ठ्यन्तादेव प्रत्ययः । न ह्यत्राधाराधेयभावविवक्षायां वतिप्रत्ययो निवार्यते सप्तम्यर्थे, अपि तु शेषविवक्षायामिवशब्दप्रयोगेऽस्ति सप्तमीत्येव ज्ञाप्यते परम् । गतमेतत् ।। 550 ।।

इदानीं क्रमप्राप्तः "तदर्हम्" (पा. 5/1/117) इति विहितोऽर्हार्थे वतिर्विचार्यते । तथाहि--तत्राक्षेपभाष्यम्--`किमर्थमिदमुच्यते ? न "तेन तुल्यं किया चेद् वतिः' इत्येवं सिद्धम्' इति । एतद् व्याचष्टे--

पूर्वाभ्यामेव योगाभ्यां विग्रहान्तरकल्पनात् ।
अर्हार्थेऽपि वतिः सिद्धः स त्वेकेन निदर्श्यते ।। 551 ।।

इह राजानमर्हति वृत्तं राजवद् वृत्तमित्युदाहरणम् । अत्र च क्रियाग्रहणस्यानुवृत्तेस्तदिति द्वितीयासमर्थादर्हतेः कर्तरि क्रियालक्षणे प्रत्ययो वतिः । अर्हतेः कर्त्री या क्रिया वृत्तादिलक्षणा तस्यां प्रत्ययः । एष चार्थो यदा विभागप्रदर्शकं राज्ञा तुल्यं वर्तते वृत्तिमिति वाक्यं क्रियते, तदापि प्रतीयते । ततश्च तृतीयान्तात् `तेन तुल्यम्' (5-1-115) इत्येवात्र वतिः सिद्धः । यदापि राजानमर्हति धैर्यं राजवद् धैर्यं वेषो वा, ब्राह्मणमर्हत्युपशमो ब्राह्मणवदुपशम इत्युदाहरणम्, तदापि "तत्र तस्येव" (पा.

5/1/116) इत्यनेन प्रत्ययः सिद्धः ।
क्रियातुल्यत्वाभावात् `तेन तुल्यम्' इत्यनेनात्रासिद्धिः । यत् किल राजानधैर्यम्, तद्राज्ञ इव धैर्यमिति शक्यते वक्तुं, केवलं मर्हत्यन्यस्य विग्रहवाक्यभेजमात्रम्, वस्तुनोऽभेदः ।
यया तु भाष्ये, `तेन तुल्यमित्येव सिद्धम्' इत्येकेन योगेन सिद्धिरुक्ता,सोरलक्षणार्था वेदतव्या । उदाहरणमात्रं हि तत् ।
तथा च स वतिरेकेन निदर्श्यते उपलक्ष्यत इत्यर्थः । पूर्वेणैवात्र सिद्धिरित्येतावति तात्पर्यम् ।। 551 ।।
तत्र "तेन तुल्यं" (5/1/115) इत्यनेन तावद् कथं सिद्धिरित्याह--
तेन तुल्यमिति प्राप्तेः क्रियोपाधिः प्रसिध्यति ।
राजवद् वर्तते राजेत्यत्र भेदे विवक्षिते ।। 552 ।।
क्रिया तुल्यार्थलक्षणप्रत्ययार्थावच्चेदद्वारेणोपाधिर्विशेषणं यस्य वतेः स सिध्यति । "तेन तुल्यम्" (5/1/115) इत्यनेनैवात्र प्राप्तेस्तस्यानया वा प्राप्तेश्चेत्यर्थः । वर्तते राजेत्यर्थः, तदा कथम् ?
तथा हि--राजनमर्हति वृत्तमित्येष एवार्थो राज्ञा तुल्यं वृत्तमस्येति । ननु च भवेत् सिद्धं यदा राजवद् वर्तते ब्राह्मण इति विवक्षा, यदा तु राजवद् ।
न हि तेनैव तस्योपमानं सम्भवतीत्यत आह-अत्र भेदे विवक्षित इति । भेदोऽत्र विवक्षित इत्यौपम्यमस्ति ।। 552 ।।
कथमेकस्य भेद इत्याह--
राजत्वेन प्रसिद्धा ये पृथुप्रभृतयो नृपाः ।
युधिष्ठिरान्तास्तेऽन्येषामुपमानं महीक्षिताम् ।। 553 ।।
इह पृथुभरतययातिदिलीपप्रभृतयोऽनवद्यचरिताः परिपूर्णराजवृत्ता युधिष्छिरावधयो राजानः । ते च प्राथमकल्पिकाः साम्प्रतिकस्यापरिपूर्णराजौचितसमाचारस्य प्रशंसार्थमुपमानमुपादीयन्ते, प्रसिद्धेन राज्ञा तुल्यमस्य वृत्तं राज्ञो राजवदयं वर्तत इति । अपरिपूर्णराजसमाचारस्य हि राजविपरीतमपि वृत्तं सम्भाव्यत इति प्रशंसायां राजवद् वृत्तमस्येत्युच्यते । तथा च भेदे सत्युपमानोपमेयभावः ।
प्रयोगसामर्थ्यादेव चैवंविधभेदावसायोऽत्र, अभेदे वतेरनुपपत्तेः ।। 553 ।।
ननु च प्रजापालननिमित्तं राजत्वमुपमेयस्याप्यस्तीति राजैवायमिति केन विशेषेणान्येनोपमीयते ? अथास्य रक्षादिराजकार्यं नास्ति, तदास्य सादृश्याभावात् कथमस्य प्रसिद्धो राजोपमानं स्यादित्यत आह--
सिद्ध्यसिद्धिकृतो भेद उपमानोपमेययोः ।
सर्वत्रैव यतोऽसिद्धं प्रसिद्धेनोपमीयते ।। 554 ।।
परिपूर्णापरिपूरणगुणनिमित्तः प्रसिद्ध्यप्रसिद्धिवृतः सर्वत्रोपमानोपमेयभावो नेहैवेति नात्र विचिकित्सा, सर्वथा भेदेऽभेदे वा तस्यानुपपत्तेरावेदितत्वात् । तथाहि--ब्राह्मणवदधीते क्षत्रिय इति करणसौष्ठवातिशयाद् ब्राह्मणाध्ययनं प्रसिद्धमप्रसिद्धस्य क्षत्रियाध्ययनस्योपमानम् । एवमिह यस्य परिपूर्णं राजत्वं चतुरुदधिमेखलापर्यन्तपृथिवीपालनात्, स प्रसिद्धो भरतादी राजैव व्यपदिश्यते । न त्वस्य राजानं वृत्तमर्हतीति व्यपदेशः ।
यस्त्वेकदेशस्वामी कोशदण्डादिसाधनदरिद्रोऽकृतात्मरक्षोऽविश्रृङ्खलचेष्टः सम्भावितः, स प्रशस्यते, राजवद् वृत्तमस्येति । एवं प्रसिद्धेन वसिष्ठादिना ब्राह्मणेनान्यो ब्राह्मणवदयं वर्तते ब्राह्मण इत्युपमीयते । तदेवमत्र "तेन तुल्यम्" (पा. 5/1/115) इति सिद्धिः ।। 554 ।।
"तत्र तस्येव" (पा. 5/1/116) इत्यनेन क्व सिद्धिरित्याह--
राजवद् रूपमस्येति राजन्येव विवक्षिते ।
अक्रियार्थेन योगेन द्वितीयेन भविष्यति ।। 555 ।।

अक्रियार्थोऽयमारम्भ इति व्यवस्थापितम् । तथा च रूपादिगुणतुल्येऽनेन सिध्यति वतिः । भरतस्य राज्ञ इवास्य रूपं धैर्यमुपशमो राजवदिति ।

एतच्चारब्धेऽपि "तदर्हम्" (पा. 5/1/117) इत्यस्मिन्नर्हतेः कर्त्र्यां क्रियायामेव प्रत्ययस्येष्टेर्न सिध्यतीत्यवश्यं पूर्वेण साध्यम् । तदेवं पूर्वेण सिद्धिरूपपादिता ।। 555 ।।

्तोऽनन्तरमारम्भसमर्थनार्थं भाष्यम्--`न सिध्यति । तृतीयासमर्थात् तत्र यदान्येन कर्तव्यां क्रियामन्यः करोति, तदा प्रत्यय उत्पद्यते । इह पुनर्द्वितीयासमर्थादात्मार्हायां क्रियायामर्हतिकर्तरि निश्चितबलाधाने प्रत्यय उत्पद्यत' इति । एतद् व्याचष्टे--उपमानाविवक्षायां नियमार्थोऽयमुच्यते ।

धर्मोऽर्हतिक्रियाकर्ता तदर्थं वचनं पुनः ।। 556 ।।

इह यदा सामान्यवचनो राजशब्द उपादीयते, तदा जातिमात्रोपादाने भेदस्याविवक्षितत्वात् तन्निबन्धन उपमानोपमेयभावो नास्ति । तत्र हि राजानमेवायमाचारोऽर्हति नान्यमित्यवधारणविवक्षा । राजसम्बन्धित्वेनावधारितस्यापि वृत्तस्यान्यसम्बन्धापाकरणेन बलाधानं स्थैर्योत्पादनमत्र विवक्षितं राजवदिदं वृत्तं वर्तत इति ।। 556 ।।

किञ्च, यदा तेषामेव प्रसिद्धानां राज्ञां कश्चिदुच्यते राजवद् वर्तत इति, तदोपमानोपमेयभावो नास्ति । तदाह--
कृतहस्तवदित्येतत् प्रसिद्धेष्वेव दृश्यते ।
राजत्वेन प्रसिद्धे च राज्ञि राजवदित्यपि ।। 557 ।।

कृतोऽभ्यासान्निवेशितो हस्तो येनासौ कृतहस्तोऽर्जुनप्रभृतिः प्रसिद्धः । स एव चैवमुच्यते `चिच्छेद कृतहस्तवद्' इति । नात्रापरेण कृतहस्तेन तुल्यत्वं विवक्षितम् । किं तर्हि, दृढमुष्टेरस्यैव य उचितश्छेदः शरीरपाटनं तदनेन कृतमित्येषोऽर्थो विवक्षितः । तथा चोपमानोपमेयभावाभावात् कृतहस्तमर्हति नान्यमित्येवं विज्ञातस्यापि कृतहस्तत्वेन नियमार्थं पुनः श्रुतिः कृतहस्तवदिति ।

एवं प्रसिद्धस्य राज्ञो राजत्वेन निर्ज्ञातस्यापि--
पाण्टोर्विदुर सर्वाणि प्रेतकार्याणि कारय ।
राजवद् राजसिंहस्य ।। (म.भा.)

इत्येतत् प्रयुज्यते । न चात्र पाण्डोरन्येन राज्ञा सम्भवत्युपमानम्, परिपूर्णगुणत्वात् ।

ततश्चायमत्रार्थः--यानि राजानमेवार्हन्ति प्रेतस्य परलोकप्राप्तस्य कार्याणि सम्पाद्यानि, तानि विधत्स्वेति ।। 557 ।।

तथा चास्य योगस्यायं तात्पर्यतो विषय इत्याह--
अराज्ञि येषां धर्माणां दृष्टोऽत्यन्तमसम्भवः ।
ते राजनि नियम्यन्ते त्यज्यन्ते व्यभिचारिणा ।। 558 ।।

ये राजन्येव दृष्टा धर्मास्तेषां तत्रैव निश्चितानां बलाधानं स्थैर्योत्पादनं यदा विवक्षितं भवति, तदा नियमाय भवति प्रयोगः । नियमे चान्यनिवृत्तिरिति राजानमेवेदमेव च वृत्तमर्हतीत्युभयतो नियमः सम्पद्यते ।

यदाह--त्यज्यन्ते व्यभिचारिण इति । राजानमेवेदं वृत्तमर्हति, नेदमन्यैः साधारणमराजसु नास्त्यस्य सम्भव इति । `आत्मार्हायां क्रियायामर्हतिकर्तरि निश्चितबलाधाने' इत्यस्य भाष्यस्यार्थः । अर्हतिकर्ता वृत्तम्, व्यापारः क्रिया, तस्य च कर्तुव्यापारस्य कर्त्रन्तरेभ्यो यदावच्छेदो विवक्षितः, तदानेन सूत्रेण वतिरित्यर्थः ।

सा च क्रिया आत्मार्हा, द्वितीयान्तवाच्यस्यार्थस्यात्मनोऽर्हा नान्यार्हेति । राजवद्रूपं राजवद् धैर्यमित्यादौ तु "तत्र तस्येव" (पा. 5/1/116) इत्यनेनैव वतिः । "तदर्हम्" (पा. 5/1/116) इत्यनेन त्वर्हतेः कर्त्र्यां क्रियायां विधानादत्राप्राप्तेः । तदिदमत्रतात्पर्यम्--भेदे विवक्षिते पूर्वेण वतिः सिद्धः । अभेदविवक्षायां तूपमानोपमेयभावाभावान्नियमफलेनानेन वतिरिति ।। 558 ।।

ननु च राजानमर्हत्येतद् वासः, ब्राह्मणमर्हत्येष कमण्डलुरित्यत्र कस्मादयं वतिर्न भवति ? अनभिधानात् । तथा चेह क्रियाग्रहणानुवृत्तेरर्हतेः कर्त्र्यां क्रियायामेवायं प्रत्यय इत्याह--

अर्हतेश्च क्रिया कर्त्री या तस्यां वतिरिष्यते ।
राजानमर्हतिच्छत्रमिति न त्वेवमादिषु ।। 559 ।।

अर्हतिकर्तरीति सामान्येन विधानेऽपि वृत्तादिकायां क्रियायामेव प्रत्यय इष्यते, न छत्रादावर्हतिकर्तरि द्रव्ये ।। 559 ।।

कुत एतदित्याह--

प्रयुक्तानां हि शब्दानां शाश्त्रेणानुगमः सताम् ।
छत्राद्यर्थे तु वचने प्रत्याख्यानं न सम्भवेत् ।। 560 ।।

`सिद्धे शब्दार्थसम्बन्धे' शास्त्रारम्भान्न शास्त्रेण शब्दा जन्यन्ते, अपि तु शिष्टप्रवाहप्रयुक्तानां विद्यमानानामेव तेषां साधुत्वानुसरणमात्रमिति निर्णीतचरमेतत् । ततश्च `राजवच्छत्रम्, ब्राह्मणवत् कमण्डलुः' इत्यस्य शब्दस्योपमानोपमेयभावानङ्गीकरणेनार्हत्यर्थस्य विवक्षितस्याप्रत्यायकत्वादसाधुत्वेऽन्वाख्यानं नोपपद्यते । किञ्च `तेन तुल्यं--' (पा. 5/1/115) इत्यनेनैव सिद्धे प्रत्याख्यानं यदस्य योगस्य क्रियते, तदेवं सति न स्यात् । तथा हि--राजवच्छत्रमित्यादौ तेन तुल्यमित्यनेनासिद्धिः,क्रियोपाधौ तुल्यत्वे तेन विधानावच्छत्रादिषु कर्तृष्वसिद्धेरित्येतदर्थमिदं सूत्रं स्यादिति कथं प्रत्याख्यायते ? अभ्युपगम्य च तत्प्रत्याश्यानमन्यथा समर्थ्यमाने राजवद् वृत्तमित्यादौ प्रयोगे छत्रादौ कर्तरि प्रत्ययस्याभावः स्फुटमुक्तो भवति भाष्यकृतेत्याशयः ।

ततश्चारम्भेऽपि क्रियैवास्य वाच्येत्येवमारम्भप्रत्याख्याने समानफले भवतः ।। 560 ।।

तदेवं भाष्ये समर्थितोऽस्यारम्भः । प्रत्याख्यानं तु तत्र नास्तीति कुतो निश्चितं तदित्याह--

तदर्हमिति नारब्धं सूत्रं व्याकरणान्तरे ।
सम्भवत्युपमात्रापि भेदस्य परिकल्पना ।। 561 ।।

आपिशलाः काशकृत्स्नाश्च सूत्रमेतन्नधीयते । अतोऽवसीयते प्रत्याख्यानमस्य । तथाहि--भाष्यकारस्तन्त्रान्तरादेवावसितमर्थं स्ववचनेनादिदेश । `परमतमप्रतिषिद्धमनुमतमिति' हि तत्र युक्तिः । तत्र कोऽभिप्रायस्तेषामाचार्याणां, ये सूत्रमिदं नाधीयते । उच्यते--इहाभिन्नेऽप्यर्थे भेदपरिकल्पनयोपमानोपमेयभावोपपत्तेः पूर्वेणैव सिद्धो वतिरित्यस्यानारम्भः ।। 561 ।।

कथं भेदपरिकल्पनेत्याह--

एकस्य कार्यनिर्ज्ञानात् सिद्धस्य विषयान्तरे ।
तद्धर्मत्वविवक्षायां बुद्ध्या भेदः प्रकल्प्यते ।। 562 ।।

एकस्याप्यर्थस्य विषयान्तरे निर्ज्ञातकार्यस्य यत्र विषयान्तरेऽन्यस्मिन् विषये तद्धर्मत्वं तत्कार्यकरणशक्तत्वं यदा विवक्षितं भवति, तदा तत्कार्यकरणनिमित्तया कल्पनया बुद्ध्या नानात्वं समारोप्यते । तथा च नानात्वस्यावस्थापनान्निजाच्चाभेदाद् भेदाभेदाश्रयमुपमानोपमेयत्वमुपपद्यते ।

तथा हि--यता भवानन्यस्मिन् रणे पूर्वत्राभ्यासवशाद्धस्तलाघवेनाच्छैत्सीत्, तथा तेन तुल्यमन्यदापि च्छिनत्तीति । एवं पूर्वापरकालतया कार्यभेदात् प्रसिद्ध्यप्रसिद्धिभ्यां च भेदकल्पनया `चिच्छेद कृतहस्तवत्' इत्येकत्राप्युपमानोपमेयभावोपपत्तौ सिद्धः पूर्वेणैव वतिः । तथा सामान्यवचनेऽपि राजशब्दे निर्ज्ञातविशेषवृत्तौ वा विषयान्तरे दृष्टेन धर्मेण प्रसिद्धेनप्रसिद्धस्योपमानम् । यानि वा भूतपूर्वाणां राज्ञां प्रेतकार्याणि तत्तुल्यतया पाण्डोरपि विधत्स्वेत्यर्थः ।। 562 ।।

अवश्यं चैतदेवं विज्ञेयम् । अन्यथा सूत्रारम्भे वतिर्भवतु । इवशब्दस्तु भेदाभावादत्र न स्यादित्याह--

सूत्रारम्भान्न चैतस्मादिवशब्दस्य विद्यते ।
प्रयोगः सोऽपि चैतस्य विषये विद्यते वतेः ।। 563 ।।

क्रियमाणे सूत्रे वचनात् प्रत्ययो लभ्यते । इवशब्दप्रयोगस्तु प्रसिद्धाद् भेदपरिकल्पनामन्तरेण न घटनामेतीत्यावश्यकोऽत्र भेदः ।। 563 ।।

दृश्यते च परिकल्पितभेदेऽन्यत्रापीवशब्द इत्याह--

दस्युहेन्द्र इवेत्येतदेन्द्रे मन्त्रे प्रयुज्यते ।

अन्यत्र दृष्टकर्मेन्द्रो यथेत्यस्मिन् विवक्षिते ।। 564 ।।

इन्द्र इव ह्युपस्तूयसे । इन्द्र इव दस्युहा भव, क्षेत्राणि सृजेत्यत्रेन्द्रदेवताके मन्त्रे दृष्टोऽयमिवशब्दो नानात्वाध्यारोपेणोपमानोपमेयभावं द्योतयति ।

तथाहि--इन्द्र एवेन्द्र इवेत्यत्रोपमीयते । नानात्वं च विषयान्तरे निर्ज्ञातकार्यस्य विषयान्तरे तद्धर्मत्वविवक्षायामत्र । ततश्चायमर्थः--यथा त्वमन्यत्रेन्द्रस्तस्करनिपातनव्यापारो भूतः, तथेहापि भवेति इन्द्रः इवेन्द्रः प्रसिद्ध्यप्रसिद्धिकृताद् दृष्टादृष्टकार्यभेदाद् भेदपरिकल्पनया कथ्यते ।। 564 ।।

अत्रैव लौकिकमप्युदाहरणमाह--

पूर्वामवस्थामाश्रित्या यावस्था व्यपदिश्यते ।

सदृशस्त्वं तवैवेति तत्रैवमभिधीयते ।। 565 ।।

अवस्थाभेदेन पदार्थभेदमाश्रित्य सादृश्यसम्प्रत्ययो दृष्टः । तद्यथा यौवनावस्थां चारुत्वातिशयवतीं प्रसिद्धामाश्रित्यान्या स्थाविरावस्थोपमीयते, तवैव सदृशस्त्वमिति । अवस्थाभेदे ह्यवस्थावतो भेदमाश्रित्य त्वया तुल्यस्त्वमित्येक एवोपमीयते ।।565 ।।

तदयमत्र सङ्क्षेपः--

प्रसिद्धभेदं यत्रान्यदुपमानं न विद्यते ।

उपमेयस्य तत्रात्मा स्वबुद्ध्या प्रविभज्यते ।। 566 ।।

वास्तवे भेदेऽसति स्तुत्यतिशयविवक्षयानन्वयालङ्कारमुखेनैकस्यैवोपमानोपमेयभावः प्रतीतचरः । तद्यथा--`रामरावणयोर्युद्धं रामरावणयोरिव' इति ।

एवं नान्यो भवतः सदृशः सम्भवति, यदि परस्त्वमेवात्मनः सदृश इत्युपमानान्तरासम्भवेन स्तूयतेऽर्थः । तत्र च बुद्धिपरिकल्पनया भेदः समवलम्बनीयः । तदेवं काल्पनिकस्य भेदस्य राजेव त्वं राजेतीवशब्दप्रयोगान्यथानुपपत्त्यावधारित्वात् पूर्वेणैव सिद्धेः प्रत्याख्यानं सिद्धम् ।। 566 ।।

तत्रैतत् स्यात्--गौणोऽयं विषयः । पूर्वसूत्रस्य सति च मुख्ये वास्तवभेदविषये कथमत्र प्रवृत्तिरित्याशङ्क्याह--

योऽपि स्वाभाविको भेदः सोऽपि बुद्धिनिबन्धनः ।

तेनास्मिन् विषये भिन्नमभिन्नं वा न विद्यते ।। 567 ।।

योऽपि वस्तुसन्निवेशी भेदः, सोऽपि बुद्ध्युपारूढ एव भेदव्यवहारं वर्तयतीति बुद्धेरेवात्र स्वातन्त्र्यादस्मिन् शब्दव्यवहारे वस्तुतो नाना एकं वा न सम्भवति, अभिन्नेऽपि बुद्ध्या भेदाद् भिन्नेऽपि चाभेदसमारोपेण व्यवहारात् तानेव शालीन् भुञ्ज्महे इति । उपमायां च बुद्धिपरिकल्पितभेदस्य हेतुत्वं प्रागेव प्रतिपादितम् ।। 567 ।।

अत्रैव भाष्यकारीयं संवादमाह--

अङ्गदी कुण्डली चेति दर्शयन् भेदहेतुभिः ।

चैत्रमीदृश इत्याह बुद्ध्यवस्थापरिग्रहात् ।। 568 ।।

"उपदेशेऽजनुनासिकः" (पा. 1/3/2) इत्यत्र गुणैः परिप्रापणमुद्देश इत्युद्देशलक्षणस्येदमुदाहरणं भाष्ये--`अङ्गदी कुण्डली व्यूढोरस्कस्ताम्रायताक्षो वृत्तबाहुरीदृशो देवदत्त' इति । तत्र गुणैरङ्गदित्वादिभिरवच्छेदकैर्देवदत्तमेव लक्षयन्नीदृशोऽनेन तुल्य

इत्याचष्टे । तत्र नान्येन तुल्यो विवक्षितः । किं तर्हि, अङ्गदित्वादिभिधर्मैरुपलक्षितो यो बुद्धौ तदानीं परिस्फुरति, तेन सदृश इत्यभिमतम् ।

अतश्च बुद्धिप्रतिबिम्बेन बाह्यस्य सारूप्याभिधानाद् बुद्धिसमारोपितभेदः स्फुटमेवोपमानोपमेयभाव उक्तः ।। 568 ।।

किमेवमभिधाने फलमित्याह--

एतैः शब्दैर्यथाभूतः प्रत्ययात्मोपजायते ।

तत्प्रत्ययानुकारेण विषयोऽप्युपपद्यते ।। 569 ।।

अङ्गदीत्यादिभिः शब्दैर्यदर्थावभासो ज्ञानविशेष उद्भवति, तदाकारसादृश्येन बाह्योऽर्थोऽवबुद्ध्यते । ज्ञानाकारस्यैव बाह्यत्वेन व्यवहर्तृभिरध्यवसायात् ।

तदिदमत्र तात्पर्यम्--अङ्गदित्वादिभिर्धर्मैराच्छुरितो बुद्धावाकारो यमर्थं बाह्यं पश्यतस्ते समुद्गच्छति, स त्वया देवदत्त इति व्यवहर्तव्य इति दृश्याविकल्पयोरभेदाध्यवसायेन व्यवहारसिद्धिः ।। 569 ।।

तस्मात् काल्पनिक एव भेदः सर्वत्रोपयोगीति व्याप्तिमाह--

बुद्ध्यवस्थाविभागेन भेदकार्यं प्रतीयते ।

जन्यन्त इव शब्दानामर्थाः सर्वे विवक्षया ।। 570 ।।

यद्यच्छास्त्रे भेदकार्यम्, तत् तद् बुद्धिकृतभेदावलम्बनम् । तथा हि--कारकव्यवहारो बुद्ध्यवस्थानिबन्धनोऽभिहितो व्यरदेशिवद्भावाच्चैकाचो द्विर्वचनमित्याद्यनुसन्धेयम् ।

युक्तं चैतत्, यतो बहिः सदसत्त्वमनपेक्ष्यैव विवक्षाप्रापितसंनिधानेऽर्थेकृतपदबन्धाः शब्दाः । तथा च प्रयोक्त्रभिसन्धानेन शब्दानामर्थप्रादुर्भावोऽवतिष्ठते । चिरातीतानामपि कंसादीनां प्रत्ययोपहृतसदाकाराणां प्रयोज्यप्रयोजकभावव्यवस्थायां कंसं घातयति, बलिं बन्धयतीत्यादिप्रयोगप्रवृत्तेः ।। 570 ।।

तस्माच्छब्दार्थो न वस्त्वर्थ इत्याह--

तथाविधेऽपि बाह्येऽर्थे भिद्यन्ते यत्र बुद्धयः ।

न तत्र कश्चित् सादृश्यं सदपि प्रतिपाद्यते ।। 571 ।।

व्यक्त्यन्तरसादृश्येष्वप्यर्थेषु साधारणधर्मावलम्बना यावद् बुद्धयो न जाताः, तावत् सदप्यनङ्गीकृत्य सादृश्यमत्यन्तव्यावृत्ताकारबुद्धिपरिच्छेद्यतया न कश्चित् प्रतिपत्ता साम्यमपगच्छति । गवयसंस्थानानुपलम्भे हि गवि न तत्सदृशप्रत्ययः ।। 571।।

अत्यन्तव्यावृत्ते च बुद्धिसमारोपिताभेदाश्रयो भवति सम्प्रत्यय इत्याह--

अत्यन्तं विषये भिन्ने यावत् प्रख्या न भिद्यते ।

न तावत् प्रत्यभिज्ञानं कस्यचिद् विनिवर्तते ।। 572 ।।

अत्यन्तव्यावृत्तायामपि व्यक्तौ बुद्धेर्भिन्नाया अनुत्पत्तावन्वयिधर्माच्छुरणयाऽभेदावसाये स एवायमित्येकाकारपरामर्शोऽविचलः समुदेति ।

तथाहि--मन्दालोके देशे दूराद्वा रूपमात्रेणार्थावधारणाद् विवेकानवसाये पूर्वदृष्टाकारानुसन्धानेनाभेदेनावसायः । निकटे स्फीतालोकेऽपि च प्रथमाक्षसन्निपाते झटिति पूर्ववासनोद्बोधात् स एवायमिति प्रत्यभिज्ञेत्पत्तिः । एवं देवदत्तयज्ञदत्तयोर्भेदमनवसायैक्यप्रतिपत्तिः ।। 572 ।।

तदेवं भेदा भेदव्यवहारस्य बहिः सदसत्त्वपरमर्शोऽनुपकारक इति प्रत्ययप्रतिभासिना भेदाकारेण सम्भवत्येकस्यैवोपमानोपमेयभाव इति राजवद् वृत्तमित्यादेः पूर्वेणैव सिद्धावबुधबोधनार्थं `तदर्हम्' इत्यस्यारम्भ इत्याह--

अयमेव तु सूत्रेण भेदो भेदेन दर्शितः ।

प्रसिद्धमपि दुर्ज्ञानमबुधः प्रतिपद्यते ।। 573 ।।

अयमेव बुद्ध्यवस्थाश्रयो भेदव्यवहारे योगारम्भेण व्युत्पाद्यते, वास्तवाद् भेदादयमन्यो भेद इति भेदेन पृथक्त्वेन ख्यापितः सूत्रारम्भेण । नहि सर्वः स्वयमेवंविधमर्थं विवेक्तुमुत्सहते । सर्वपुरुषाधिकारेण च शास्त्रप्रवृत्तिरिति प्रतीतेऽप्यर्थे मन्दबुद्धिव्युत्पादनाय शास्त्रारम्भो युक्तः ।

राजानमर्हतीति च विग्रहान्तरं दृश्यते, मन्दमतीनां पूर्वेणासिद्ध्यध्यवसायनिमित्तम् ।। 573 ।।

तदत्र दुर्ज्ञानत्वमेकस्योपमानोपमेयभावाभावात् स्यात् । तच्च न युक्तम् । दृश्यते ह्येकस्याप्युपमानोपमेयभाव इत्यबुधबोधनार्थमपि नेदमारब्धव्यमित्याह--

वैयाकरणवद् ब्रूते न वैयाकरणः सदा ।
वैयाकरणवद् ब्रूष्वेत्यतः सोऽप्यभिधीयते ।। 574 ।।

व्याकरणज्ञो हि कश्चित् ग्राम्यदुर्भगाभिधानप्रयोगादपगतसंस्कारशब्दाभिधानाच्च वैयाकरणत्वमतिक्रान्तः साधुशब्दप्रयोगकुशलैर्वैयाकरणैरुपमीयते वैयाकरणवत् कथयेति । अन्यैस्तुल्यमभिधत्स्व, म्लेच्छभाषणदुर्ग्रहं त्यजेति ।। 574 ।।

तथा--

केचित् पुमांसो भाषन्ते स्त्रीवत्, पुंवच्च योषितः ।
व्यभिचारे स्वधर्मोऽपि पुनस्तेनोपदिश्यते ।। 575 ।।

व्यभिचार इति स्वधर्मस्य । तथा च सम्भावितस्वधर्माः सजातीयैरेवोपमीयन्तेऽर्थाः । पुंवदभिधीयताम् । अन्यैरनतिवृत्तपुरुषोचितभाषणैस्तुल्यं भवद्भिः कथ्यताम्, किमप्रगल्भोक्तिभिः सदसि योषित्सम्भावनयोपहास्यातामत्मा नीयत इति । तथातिप्रगल्भभाशिणी काचिदभिधीयते--स्त्रीवदभिधीयताम् । अन्याभिव्रीडाततीभिः स्त्रीभिस्तुल्यं कथ्यताम् । मातिप्रगल्भोक्तिभिर्योषित्सीमानं हासीरिति । तथा क्लैब्यमाचरन् कश्चिदुच्यते--पुवद् युध्यस्व । यथानतिवृत्तपौंस्ना युध्यन्ते तथा युध्यस्वेत्यर्थः ।

तदेवं स्वोचितानुष्ठानत्यागदर्शनाद् आत्मीयाचारोऽप्यप्रसिद्धत्वादुपमाया विधीयते इति दृष्टम् । तथा चैकस्योपमानोपमेयभावो न दुर्ज्ञानः ।। 575 ।।

यत्तु प्रागुक्तं पूर्वामवस्थामाश्रित्य तवैव सदृशस्त्वमित्यवस्थान्तरं साम्प्रातिकमुपमीयत इति, तत्रोक्तितात्पर्यं व्याचष्टे--

सदृशस्त्वं तवैवेति लोके यदभिधीयते ।
उपमानान्तरं तत्र प्रसक्तं विनिवर्तते ।। 576 ।।

सर्वोपमानधर्मातिक्रान्तस्त्वमित्यन्योपमानव्यावृत्त्या स्तुतिपरमेतदभिधानमनन्वयालङ्कारच्छाययेति व्याख्यातमेतत् । तदेवं सर्वत्र भेदकल्पनयोपमानोपमेयभावप्रक्लृप्तेर्व्याकरणान्तरे नारब्धमिदं सूत्रम् । इहाप्युपमानविवक्षायामनारम्भोऽस्याभ्युपगत एव ।। 576 ।।

विवक्षान्तरे त्वावश्यकमिदमित्याह--

युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शने ।
उपमानाविवक्षायां तदर्हमिति पठ्यते ।। 577 ।।

युक्तमिदमुचितमिदं राज्ञो वृत्तं राज्यानुपालनेऽप्युपायभूतमिदमिति राजानमेवार्हति नान्यमिति निश्चितबलानख्यापने नास्त्युपमानोपमेयभावविवक्षेति तत्सम्बन्धे विहितस्य वतेनार्यं विषय इति पृथक्सूत्रमत्र प्रत्ययविध्यर्थं पठ्यत इत्यारम्भोऽस्य समर्थितः ।

अयमाशयः--भवेदुपमानविवक्षायां सिद्धिः । तथा च व्याकरणान्तरेऽस्यानारम्भः । एवमिहाप्यनारम्भ, परमतस्याविरुद्धस्याप्रतिषिद्धत्वात् । अर्हत्ताप्रतिपिपादयिषायां त्वस्यारम्भः सफल इति व्याकरणान्तरेऽव्याप्तिरुद्भाविता ।

अत एव भाष्यकारः प्रयोजनस्थापनादेव विरतो नौपम्याश्रयेण प्रत्याचख्यौ ।
इत्थं च वैयाकरणवद् ब्रूहीत्यादावपि यदौपम्यमविवक्षित्वा योग्यतामात्रं प्रतिपिपादयिषितं भवति, तदानेनैव वतिरिति सिद्धम् ।। 577 ।।
इदानीं वक्ष्यमाणप्रस्तावार्थमाह--
प्रसक्तानुप्रसक्तस्तु वतिशेषोऽभिधीयते ।
उपमानाभिसम्बन्धादस्मिन् वतिरुदाहृतः ।। 578 ।।
इह वृत्तिपदविचारः प्राधान्येन प्रस्तुतः । तत्र चोपमानसमासविचारानुषङ्गेणोपमानसम्बन्धे विधीयमानस्य वतेरिहोपन्यासो विचारायेत्युपमानवतिरनुषङ्गायातः प्रसक्तः । तस्यानु पश्चात् क्रमायातोऽनुपमानवतिरपि "उपसर्गाच्छन्दसि धात्वर्थे" (पा. 5/1/118) इत्ययमपि शिष्टः प्रसङ्गेन विचारार्थं निरूप्यत इति प्रकरणानुसन्धिः ।। 578 ।। तत्र अर्थग्रहणं किमर्थम्? न, उपसर्गाच्छन्दसि धातावित्येवोच्येतेति भाष्येऽर्थग्रहणमाक्षिप्तम् ।
तत्राभिप्रायं व्याचष्टे--
प्रधानकल्पनाऽभावे गुणशब्दस्य दर्शनात् ।
उपसर्गाद् वतौ सिद्धा धातौ धात्वर्थकल्पना ।। 579 ।।
धातुशब्देन भूवादेर्मुख्यतः प्रत्यायनाद् धातावित्युक्ते तस्य शब्दस्य प्रत्ययवाच्यत्वाभावादन्तरेणाप्यर्थग्रहणं धातुरूपाध्यासाद् गुणकल्पनया सामर्थ्यात् तत्सहचरितोऽर्थो लभ्यत इति किमर्थग्रहणेनेत्यर्थः ।
अत एव भाष्यं--`शब्दे कार्यस्यासम्भवादर्थे कार्यं विज्ञास्यते' इति ।। 579 ।।
तत्रैतत्साहचर्यान्नियोगतोऽर्थे प्रतिपत्तिः कथम् ? अन्यस्यापि धातुसम्बन्धिनः शब्दधर्मस्य धातुना साहचर्यादित्यत आह--
स्वं रूपमिति चैतस्मिन्नर्थस्यापि परिग्रहः ।
रूपवज्ज्ञापितस्तस्मादसन्नोऽर्थो ग्रहीष्यते ।। 580 ।।
अन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च स्वंशब्दस्येत्येव स्वत्वेन विशेषितस्य रूपस्य परिग्रहे सिद्धे `स्वं रूपम्' इति (पा. 1/1/68) रूपग्रहणं रूपवदर्थोऽप्यङ्गीक्रियत इति ज्ञापनार्थम् ।
तथा च रूपसमानकक्ष्यः प्रत्यासन्नतरः सम्बन्धी प्रसिद्धो वाच्योऽर्थ एव ग्रहीष्यते । तावतैव वाक्यार्थस्योपपत्तौ शब्दधर्मः सम्बन्धी कथमनुरोधाद् गृह्येतेति भावः ।। 580 ।।
अत्रोत्तरं भाष्यम्--`इदं तर्हि प्रयोजनम् । उत्तरपदलोपो यथा विज्ञायेत । धातुकृतोऽर्थो धात्वर्थः । कः पुनर्धातुकृतोऽर्थः । साधनम्' इति ।
एतद् व्याचष्टे--
धात्वर्थेनोपजनितं साधनत्वेन साधनम् ।
धातुना कृतमित्येवमस्मिन् सूत्रे प्रतीयते ।। 581 ।।
धातुशब्देन स्वार्थस्यात्रोपलक्षणाद् धातुकृतः क्रियाकृतः क्रियया प्रादुर्भावितोऽर्थोऽत्र निर्दिष्टः । स च साधनं कारकम् । तथाहि--यद्यपि सिद्धस्वरूपं कारक क्रियां प्रत्युपादीयते साधनत्वेन, तथापि न स्वारूपेण क्रियया साधनं कृतं जनितम्, अपि तु साधनत्वेन, साध्यापेक्षत्वात् साधनभावस्य सामान्यस्य कर्मादिविशेषरूपस्य च क्रिया हि साधनानि प्रवर्तयतीति ।
प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।
शक्तीरेकाधिकरणे स्रोतोवदपकर्षति ।।
इत्यादिना पूर्वमेव निर्णीतमेतत् ।। 581 ।।
यदुक्तमुत्तरपदलोप इति । तत्र कोऽयमनन्वाख्यातः सूत्रकारेणोत्तरपदलोपो नामेत्यत आह--
यः शब्दश्चरितार्थत्वादत्यन्तं न प्रयुज्यते ।

विषयेऽदर्शनात् तत्र लोपस्तस्याभिधीयते ।। 582 ।।

इहार्थप्रयुक्तस्य शब्दस्य सत्यर्थे वचनशतेनापि प्रयोगो निवारयितुं न पार्यते, केवलमन्यतो निर्ज्ञातार्थस्य चरितार्थत्वात्, कृतकृत्यत्वात्, प्रसक्तादर्शनस्य लोपसंज्ञा प्रत्ययादर्शनवत् सर्वत्र व्यवह्रियते । ततश्च धातुशब्देन क्रियाभिधानात् तत्कृतोऽर्थस्तदुपचारात् स एवेति धातुरेवार्थो धात्वर्थ इति गौणे सामानाधिकरण्ये मयूरव्यंसकादित्वात् सति समासे धातुकृतोऽर्थ इति यद् वस्तु सम्पद्यते, तद् भाष्यकारेण दर्शितम् ।

यद्वा, धातुस्तदर्थः क्रिया अर्थः प्रयोजनं यस्य साधनस्येत्येवमयं बहुर्वीहिः क्रियते । क्रिया च साधनस्य साध्यत्वादेव प्रयोजनं भवति । तस्मिन् साधने वर्तमानादुपसर्गात् स्वार्थे वतिः ।। 582 ।।

एवमर्थग्रहणसामर्थ्यात् साधनलाभे प्रयोजनमुक्तम्--`साधनेऽयं भवल्लिङ्गसंख्याभ्यां योक्ष्यते' इति । तत्र शक्तिरूपत्वेन क्रियावदसत्त्वभूतत्वात् साधनस्य कथं लिङ्गसङ्ख्यायोग इत्यत आह--

क्रियायां साधने द्रव्ये प्रादयो ये व्यवस्थिताः ।
तेभ्यः सत्त्वाभिधायिभ्यो वतिः स्वार्थे विधीयते ।। 483 ।।

साधनशक्त्याश्रयो द्रव्यमत्र साधनशब्देन विवक्षितम्, शक्तिशक्तिमतोरभेदात् । तस्मिन् द्रव्ये क्रियासाधनाक्षिप्ते ये वाचकत्वेन प्रवृत्ताः प्रादय उपसर्गास्तेभ्यः साधनक्रिया (क्रियासाधन) वाचिभ्यः स्वार्थे वतिप्रत्योऽयं विधीयते । तथा च सत्त्वभूतार्थाभिधानल्लिङ्गसंख्यायोग उपपद्यते ।। 583 ।।

तत्रैतत् स्यात्--क्रियाविशेषद्योतकाः प्रादयोऽवधृताः । नैषां द्रव्याभिधानसामर्थ्यमवधृतमित्याशङ्क्याह--

प्रत्ययेन विना प्रादिस्तत्रार्थेन प्रयुज्यते ।
भेदेन तु समाख्याने विभागः परिकल्पितः ।। 584 ।।

वाक्ये केऽपि नियता धर्माः । केचिद् वृत्तिरिति शब्दशक्तिप्रतिनियमाद् यद्यपि वाक्ये प्रयुक्तानां प्रादीनां द्रव्याभिधानशक्तिर्नास्ति, तथापि वृत्तिविषये शक्तिरियमवगम्यते । उद्गतानि उद्वतः, निगतानि निवत इत्यखण्डोऽयं शब्दः प्रकृतिप्रत्ययविभागेनान्वाख्यायमानः प्रकृतिभागस्य क्रियासाधनोपसर्जनद्रव्यवचनत्वं प्रत्ययभागस्य च स्वार्थिकत्वं प्रतिपद्यते । इत्थं चोपसर्गाणामत्र वृत्तिविषयेऽस्य स्वभावोऽर्थग्रहणेनानुविधीयते, लौकिकस्यैवार्थस्यान्वाख्यानाङ्गभावेनोपादानात् । असति पुनरर्थग्रहणे शब्दे कार्यासम्भवात् क्रिया प्रतीता, अविनाभावात् साधनशक्तिमेवोपलक्षयेत् । अर्थग्रहणात् तु तदभेदापन्नं द्रव्यं प्रतीयते । अन्यथार्थग्रहणमफलं स्यात् ।। 584 ।।

यदि च साधनशब्देन शक्तिमत्र विवक्षितं स्यात्, तदा--

अनङ्गीकृतसत्त्वं तु यदि गृह्येत साधनम् ।
विभक्तिभिर्न योगः स्याद् यथैव तसिलादिषु ।। 585 ।।

अनुपात्ताधारे साधनमात्र गृह्यमाणे ततस्तन्नेत्यादाविवात्यन्तप्राधान्यायाः शक्तेः शक्त्यान्तरायोगाद् यथायथं विभक्तयो न स्युः सर्वाः । समयादेकवचनमेव स्यात् । ततश्चासर्वविभक्तित्वे अव्ययसंज्ञा प्रसज्येतेति लिङ्गसंख्यायोगो विरुध्येत । अर्थग्रहणसामर्थ्यात् तु गुणीकृतक्रियासाधनं द्रव्यं प्राधान्येनोपसर्गाणां वाच्यमत्रानुगम्यत इति वत्यन्तस्य सत्त्ववचनतायां यथायथं क्रियासमन्वये सर्वविभक्तियोगादव्ययसंज्ञाभावे उद्वतो निवत इत्यादिबहुवचनान्तप्रयोगपपत्तिः । `एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्' इति च लिङ्गान्तरयोगो न विरुध्यते ।। 585 ।।

नन्वेवमपि स्वरादिषु वतेः पाठात् प्राप्तमव्ययत्वमित्यत आह--

पाठाद् यैरविभक्तित्वं वत्यन्तेष्वनुगम्यते ।
तेषामुद्वत् इत्यत्र वक्तव्या सविभक्तिता ।। 586 ।।

अविभक्रित्वं विभक्त्यदर्शनं तन्निबन्धनमव्ययसंज्ञा कथ्यते । तथा च स्वरादिपाठादव्ययत्वेऽविभक्तित्वं विभक्त्यदर्शनमिति सामर्थ्यात् तन्निबन्धनाव्ययसंज्ञापाठाद् यैरङ्गीक्रियते तेषां मते, उद्वत इत्यत्राव्ययत्वाल्लोपे प्राप्ते सविभक्तिता वक्तव्या प्रतिपाद्या

।
तथा ह्यर्थग्रहणसामर्थ्यादव्ययत्वं न भवति । अन्वर्थसंज्ञा हि साऽलिङ्गसंख्यत्वेऽवतिष्ठते । अत्र च साधनस्य द्रव्यस्य ग्रहणात् सत्त्ववचनत्वात् तदभाव इत्यर्थः ।। 586 ।।
तदेवं वतिः परीक्षितः । तत्प्रसङ्गन तत्रत्यमन्यदपि विचार्यते--वाक्यकारः पपाठ--`स्त्रीपुंसाभ्यां वत्युपसंख्यानम्' इति । "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" (पा. 4/1/87) इत्यवधिविशषोपादानेन प्राग् भवनात् प्रकृतिविशेषादस्मान्नञ्स्नञावुप दिश्यमानावपत्यादिष्वर्थेषु सिद्ध्यर्थं वतिरत्रोपसंख्येयः । तत्र वतीति वतिसहचरितस्यार्थस्याधिकरणत्वेन निर्देशः । यद्वा वतौ विधीयमाने स्त्रीपुंसाभ्यामप्यसौ विधेय इत्यर्थः । भावलक्षणे सप्तमीयम् । एतस्य वार्त्तिकस्य भाष्ये प्रत्याख्यानमुक्तम्--`आचार्यप्रवृत्तिर्ज्ञापयति न वत्यर्थे नञ्स्नञौ भवत इति । यदयं स्त्रियाः पुंवदिति निर्देशं करोति' इति ।
एतद् व्याचष्टे--
वत्यर्थं नावगाहेते पुंवदित्यस्य दर्शनात् ।
नञ्स्नञावपवादस्य बाधकं तन्निपातनम् ।। 587 ।।
"स्त्रियाः पुंवद्" (पा. 6/3/34) इत्युच्चारणाद् वत्यर्थादुत्कर्षो नञ्स्नञोर्ज्ञायते । यदि ह्येतौ वत्यर्थमवगाहेयाताम्, अपवादेन निवर्तितो वतिर्न श्रूयते । श्रुतस्तु नूनमेतावेतमर्थमुत्क्रामतः, येनानयोर्विषये उत्सर्गः श्रूयत इति ज्ञापयति । ननु च पुंवदिति निर्देशाद् वतिरप्युस्तु, यथाप्राप्तौ च नञ्स्नञावपि वत्यर्थेऽधिकारेण प्रतिपादितसंनिधानौ भवेतामित्याशह्क्योक्तं`बाधकं तन्निपातनमि'ति ।। 587 ।।
कथमस्य बाधकत्वमित्येतदेव व्यक्तयति--
एवमुत्क्रामतो नूनं वत्यर्थं नञ्स्नञाविति ।
तयोः प्रवृत्तावुत्सर्गो बाधनान्नोपपद्यते ।। 588 ।।
अपवादविषये प्रवृत्तिरुत्सर्गस्योपलभ्यामानान्यथानुपपत्त्यापवादमपावर्तयति ततः । अन्यथा सत्येवापवादशत्रावयमुत्सर्गो वराकस्तत्र कथं प्रवर्तेतेति बाधकत्वनिश्चयोऽस्य । अप्राप्त्यनुमानं हि बाधा ।
तत्र यथापवादः स्वरूपनिर्वृत्तौ ससंरम्भोऽपि सामान्यविधेः स्वविषयेऽप्राप्तिं सूचयति, तथा निपातनमात्मस्वरूपप्रतिलम्भव्यापृतमपि यथाप्राप्तबाधने पर्यवस्यति, तथा सर्वादिवार्त्तिके निपातनमप्येवंजातीयकमिति बाधकानि निपातनानि व्यवस्थापितानिी । अतश्च वत्यर्थे पौंस्नमित्यादिप्रयोगोऽसाधुः ।। 588 ।।
`एवमपि स्त्रीवदिति न सिध्यति' इति चोदयित्वा `योगापेक्षं ज्ञापकम्' इति भाष्यम् । तद् विवृणोति--
नञ्स्नञौ विहितौ येन स योगो नावगाहते ।
वतिकरणं तद्धि लिङ्गमेव समर्थ्यते ।। 589 ।।
सामान्यतो दृष्टमिदं लिङ्गमनुमानं ज्ञापकम् । तथाहि--"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" (4/1/87) इति यो योगः स वत्यर्थं नाक्रामतीत्यवंव्यापारमिदं लिङ्गमुपपाद्यते । वतिप्रकरणमिति । "तेन तुल्यं"-(पा.5/1/115),"तत्र तस्येव" (पा.5/1/116) "तदर्हम्" (पा. 5/1/117) इति सूत्रत्रयविहितेऽपि वतावर्थं नञ्स्नञावुत्क्रामत इत्यर्थः । तथा चैतान् योगानपेक्षत इति योगापेक्षं तज्ज्ञापकं सूत्रम् । ततश्च वत्यर्थे नञ्स्नञोरभावात् स्त्रीवदित्यपि सिध्यति, विशेषनिरपेक्षस्य लिङ्गस्य ज्ञापकत्वत इति सिद्धम् ।। 589 ।।
तदेवमुपमानप्रसङ्गायातो वतिर्विचारितः । इदमिदानीमुपमानविचारे परीक्षणीयम् । बहूनामुपमेयानामुपमानं यदैकमुपादीयते, तदा किमुपमेयभेदमनुवर्तते तत् । अथाभिन्नमेवोपकाराय प्रभवतीति संशीतावाह--
अभेदेनोपमानस्य भिन्नार्थोपनिपातिता ।
ऊहस्तथोपमाननामङ्गवन्नोपलभ्यते ।। 590 ।।

इह प्राधानानुग्रहाय गुणाः प्रयुज्यमाना यथानुग्रहो भवति प्रधानस्य, तथैवात्मरूपमनुवर्तन्त इति न्यायः । एकत्वेनैव तु स्वधर्मेण युक्तं शक्नोत्युपमानमुपमेयमनेकमुपकर्तुमिति किमनुरोधाद् भेदमवलम्बेत ।

अत एव विकृतावुपमेयभेदेऽपि प्रकृतिगतमेव वचनमभिन्नार्थावेदकमुपमानमित्यूहो यथोपमेयं वचनभेदो न दृश्यते ।

तद्यथा-अङ्गनाम्नामूहाभावोऽङ्गिभेदादेव, निर्ज्ञातभेदत्वात्, संख्यान्तरपरिणामस्य कृतकृत्यत्वादिति सम्बन्धाबाधनमेवात्र । तथा चोहविदामाम्नायः--

अङ्गानि जातिनामानि उपमा इन्द्रियाणि च ।
एतानि नोहं गच्छन्ति अद्भ्रिगौ (अद्विगौ) विषमं हि तत् ।। इति ।

तत्रोहोपात्तमेव दृष्टान्तदार्ष्टान्तिकमुदाह्रियते । अङ्गनामनूहो यथा--`यत्पशुर्मायुमकृतोरो वा पद्भिराहताग्निर्मा तस्मादेनसः प्रमोचयतु' (तै.सं.3/1/49) इत्यत्रैकपशुके प्रकृतियागे उर इत्येकवचनमङ्गनाम । द्विपशुकेऽपि विकृतियागे अस्योहाभावात् पशू इत्याहंसातामिति चास्यैव विपरिणामः, न पुनरुरसी इति विपरिणम्यते । अङ्गिभेदादेवाङ्गानां संख्याभेदस्यावधारणादिति चात्र न्यायः ।

एवं बहुपशुकेऽपि विकृतियागे पशव आहंसतेत्यूह्यते, नोरांसीति । तद्वदुपमानानामनूहो यथा--`कश्यपे वासां अच्छिद्रे श्रोणी कवषोरूस्त्रेकपर्णे'त्यादि । अभेदेनैवोपमातुं शक्तेरुपमानवचनानां कश्यपकवषस्त्रेकाणां कच्छपमत्स्यजातीयकरवीरवाचिनां यथोपमेयलिङ्गसंख्यान्तरविपरिणामो न भवति ।। 590 ।।

एवमूहाभावो न्यायविदां प्रसिद्धोऽत्राभेदेनोपमानस्य संवादक उक्तः । संवादकान्तरमप्याह--

गावेधुके चरौ दृष्टा गोविकर्ताक्षवापयोः ।
पशू रुद्र इव ह्येतावित्येकवचनश्रुतिः ।। 591 ।।

`रुद्र इवैतौ गोविकर्ताक्षवापौ पशू अभिमन्येते' इति वेदे श्रूयते । तथाहि--गवेधुना तृणजातिविशेषेण संस्कृते चरौ प्रकृते गोविकर्ताक्षवारयोर्विशसित्रोरियमुपमा `रुद्र इवैतौ विशसितारौ गोविकर्ताक्षवापौ'। गा विकृन्ततीति गोविकर्तः, अक्षान् वपतीत्यक्षवापः, तन्नामानौ पशूनां विशसितारौ । तौ चोपमेयावेकवचनान्तेन रुद्रशब्देनोपमानेनात्र दृष्टौ ।

तथा चैकवचनश्रुतिरियं रुद्र इति दृष्टास्मिन्नाम्नाय
इत्यस्मादप्यामाम्नायादुपमानम् `उपात्तैकसंख्यमेवानेकमप्युपमेयमुपसंस्करोति' इति निश्चीयते ।। 591 ।।

यदि पुनरुपमेयभेदेनोपमानं भिद्येत, तदा--

उपमानस्य भेदाच्च बहुषु स्यादञो विधिः ।
कश्यपा इति लोपः स्यात् तथा प्रतिकृतिष्वपि ।। 592 ।।

"यञञोश्च" (पा.2/4/64) इति बहुषु लुगुच्यते । तत्र चोद्यते-बैदस्य बैदयोर्वा पत्यानि बहूनि माणवका बिदा इत्यत्राञ् यो बहुष्वित्यर्थे व्याख्यायमाने बहुषु लुङ्न प्राप्नोति । अञो बैदस्य बैदयोरित्येकद्वयोरुत्पत्तेः ।

अत उक्तम्-`माभूदेवम् । अञन्तं यद् बहुष्वित्येवं भविष्यति' । तत उक्तम्-`नैवं शक्यम् । इहापि स्यात् । काश्यपप्रतिकृतयः काश्यपा' इति । कश्यरस्यापत्यं काश्यपः बिदाद्यञ् । काश्यप इव प्रतिकृतयः काश्यपा इति "इवे प्रतिकृतौ" (पा.4/3/96) इत्युत्पन्नस्य कनो देवपथादित्वात् "जीवकार्थे चापण्ये" (पा.5/3/99) इति लुपि कृते प्रतिकृतिबहुत्वेऽञन्तस्य वर्तमानत्वादञन्तं बहुष्विति लुक् स्यात् । तथा च कश्यपा इति प्रतिकृतिषु साधुः स्यात् । न चेष्यते । काश्यपा इत्येवेष्यत इति अञ् यो बहुष्विति स्थापितम् । बैदस्यापत्यानि बिदा इत्यत्र तु `एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनी' त्युक्तत्वाद् अदोषः ।

यदि चात्रोपमेयभेदादुपमानभेदः, तदा प्रतिकृतीनामुपमेयानां बहुत्वादुपमानं काश्यपोऽपि भिन्न इति बहुष्वेवायमञ् स्यात् । तथा च अञ्यो बहुषु इत्येवमप्यत्र लुक् प्रसज्येतेति भाष्यविरोधः । काश्यपा इति प्रतिकृतिषु चानिष्टप्रयोगप्रसङ्गः ।

तस्मादुपमेयभेदेऽपि नोपमानं भिद्यते ।। 592 ।।

नन्वेवं काश्यप इव प्रतिकृतय इति विहितस्य प्रत्ययस्य लुपि युक्तवद्भावादेकवचनमेव स्यादित्याह--
एवं तु युक्तवद्भावादत्रैकवचनं भवेत् ।
लुम्मनुष्ये तथोक्तं स्याल्लिङ्गस्यैकस्य सिद्धये ।। 593 ।।
एवमित्युपमेयभेजेऽप्यजहदेकसंख्याकस्योपमानस्य प्रवृत्तौ प्रतिकृतिबहुत्वेऽप्येकवचनमतिदेशादनिष्टमापद्येत ।
अत्र परिहारमुत्प्रेक्षितमाह--
`लिङ्गसिद्ध्यर्थं लुम्मनुष्ये' इति वार्त्तिके लिङ्गग्रहणात् केवलाद् वचनमत्र प्रकरणेऽतिदेशान्न भवतीत्यवसीयते । अन्यथा लिङ्गवचनसिद्ध्यर्थमित्येव वचनं भवति। चञ्चेव मनुष्यः, मनुष्यौ चञ्चे, मनुष्याश्चञ्चा इति मनुष्यसंख्यैव । लिङ्गं तु चञ्चाश्रयम् । एवं काश्यपा इत्यत्रापि पुल्लिङ्गमतिदेशाद्, वचनं तु प्रतिकृतिगतमेव ।। 593 ।।
ननु चाविशेषेण "लुपि युक्तवद् व्यक्तिवचने" (पा.1/2/51) इत्युक्ते कथं वार्त्तिके लिङ्गमात्रपाठादत्र वचनमपाक्रियते ? अतिदेशप्राप्तमपि चामनुष्यलुप्येव वार्त्तिकप्रामाण्यादस्तु । तत्रापि हरीतक्यादिषु व्यक्तिः" (पा. 1/2/52) इति वचनात् सिद्धिरिति काश्यपा इत्यत्र कथं वचनं युक्तवद्भावान्न स्यादित्याशङ्क्य परिहारान्तरं वक्तुमाह--
उपमेयेषु भिन्नेषु किञ्चिदेकं प्रवर्तते ।
प्रत्ययस्य विधौ तत्र नित्यं युक्तवदिष्यते ।। 594 ।।
नानाभूतेषु परिच्छेद्येषु प्रतिकृतिरूपेष्वभिन्नं वा कन उत्पत्तिनिमित्तमुपमानमत्र व्याप्रियते, प्रत्युपमेयं वा भिन्नमिति द्वौ पक्षौ स्तः । तत्राभिन्नस्य व्यापारे प्रतिकृतिबहुत्वे"लुपि युक्तवद्" (पा.1/2/51) इति यक्तवद्भावो नियत एव प्रवर्तते । तथा चेष्यत एवेति न काचिदनिष्टापत्तिः ।। 594 ।।
यदा पुनरुपमानं भेदेनोपमेयं प्रति वर्तते, तदा काश्यपा इति सिद्धिरित्याह--
यदा प्रत्युपमेयं तु तदेकैकमवस्थितम् ।
तदा बाह्यार्थभेदेन तद्धितान्तं प्रचीयते ।। 595 ।।
उपमेयभेदे प्रत्येकमुपमानं यदा परिच्छेदाय प्रवर्तते, तदा प्राथमकल्पिकेऽर्थे भेदो नास्ति । तथा च काश्यपस्य प्रतिकृतिः काश्यपः । एवं द्वितीयोऽपि काश्यपः, तृतीयोऽपि काश्यप इति प्रत्येकमभिसंबन्धान्नानात्वमत्र नास्ति। केवलमेतत् तद्धितान्तं लिप्तप्रतिकृतिप्रत्ययं शब्दरूपं प्रचीयते प्रचयमनेकत्वमापद्यते ।
तथाहि--सारूपाणामेकशेषवशेन काश्यपश्च काश्यपश्च काश्यपश्च काश्यपा इति बहुत्वेन संबध्यते ।
न चेदानीमतिदेशशास्त्रस्य "लुपि युक्तवद्" (पा. 1/2/51) इत्यस्य व्यापारोऽस्ति, वृत्तत्वात् तद्व्यापारस्य ।
यदा तु काश्यप इवायं प्रतिकृतिसमूह इति प्रथममेव प्रत्ययस्तदास्य व्यापारः । तदा हि युक्तस्य संख्याभेदोऽस्ति तन्निबन्धनम् । इदानीं तु प्रतिकृतीनां प्रचय इत्यन्योऽयं बाह्यार्थभेदनिबन्धनः संख्याभेदो न वर्तते ।। 595 ।।
ननु चैवमपि लुबर्थ एवायं प्रचीयमान इति युक्तवद्भावः कस्मान्न भवतीत्याशङ्क्य निदर्शनद्वारेण व्युत्पादयति--
यथा समूहप्रचये द्विगूनां भिन्नसंख्यता ।
पञ्चपूल्यादिषु तथा सुबन्तप्रचये भवेत् ।। 596 ।।
पञ्चपूलाः समाहृताः पञ्चपूलीति "द्विगुरेकवचनम्" (पा. 2/4/1) इति कृते एकवद्भावे, पञ्चपूली च पञ्चपूली च पञ्चपूली चेत्येकशेषे पञ्चपूल्य इति बहुत्वे पुनरेकवद्भावः कस्मान्न भवतीति चोद्ये `न किन्त्वन्यस्यैकशेषशब्दस्येदं बहुत्वम्,वान्यस्यानेकत्वात्' इत्युत्तरमुक्तम् । अयं हि नद्विगुरनेकार्थाभिधायी, किन्त्वन्यस्यैकशेषशब्दस्येदं बहुत्वम् । द्विग्वर्थस्य ह्येकवद्भाव आरब्धः । अकृते चैकशेषेऽर्थान्तरानपेक्षस्य द्विगोरेव योऽर्थस्तत्रैकवद्भावः ।
स एव हि द्विग्वर्थो न्यायः । कृते त्वेकशेषे द्विग्वर्थसमुदायस्य प्रचितस्य द्विग्वर्थादन्यत्वादन्तरङ्गे प्राथमकल्पिके द्विग्वर्थे चरितार्थत्वादेकवद्भावस्य पुनरप्राप्तिः । एवमिह लुपः सोऽर्थः, यो लुबन्तादेव प्रतीयतेऽन्यानपेक्षादित्येकशेषे कृते

शब्दान्तरत्वादन्तरङ्गे चरितार्थो युक्तवद्भावो बहुरङ्गेऽत्र प्रचयबहुत्वे न प्रवर्तते ।। 596 ।।

तदत्र दृष्टान्तोऽयमसदृश इत्याह--

प्रचये भिद्यमाने तु संख्या पूलेषु भिद्यते ।

अर्थभेदो लुबन्तेषु नैव कश्चन दृश्यते ।। 597 ।।

पञ्च पूलाः समाहृताः पञ्चपूलीति योऽर्थो द्विगोरवधार्यते, नासावेव पञ्चपूल्य इति प्रचयविवक्षायामेकशेषे कृते । पूर्वत्र हि पञ्चसंख्यावच्छिन्नोऽर्थः । एकशेषे तु पञ्चदशसंख्यावच्छिन्नः । द्वयोरेकशेषे तु पञ्चपूल्याविति दशसंख्यावच्छिन्नः । तस्माद् द्वित्वबहुत्वादीनां प्रचये भिद्यमाने द्विग्वर्थसंख्याया अन्यैव संख्या जायते ।

तथा च नायं द्विग्वर्थ इति शक्यते वक्तुम् । पञ्चसंख्यावच्छिन्नसमाह्रियमाणार्थवाचकत्वादेव द्विगोरिति युक्तोऽत्र `न वान्यस्यानेकत्वात्' इतिपरिहारः ।

इह तु लुबन्तविषये न कश्चनार्थस्य भेदः । य एव ह्यर्थः प्रत्येकमुपमानसंबन्धे प्रचयविवक्षायामेकशेषे कृते, स एवैकस्याप्युपमानस्य बहुषूपमेयेषु संबन्धे प्रथमत एव बहुवचनस्य प्रवृत्तौ । तथा चार्थभेदाभावादत्र प्रचयार्थोऽपि लुबर्थः शक्यते वक्तुमिति तत्र वचनातिदेशः स्यादेव । ननु चास्त्येवात्रार्थभेदः ।

तथाहि--प्रत्येकं प्रतिकृतीनामुपमानसंबन्धे सत्येकशेषेण बहुवचनान्तप्रयोगे प्रतिकृतेरेकैकस्याः काश्यप उपमानत्वेन प्रतीयते । अभिन्नस्य तूपमानस्य बहुषूपमेयेषु विशेषेऽप्यस्ति भेदः । सत्यमेतावानस्ति । विशेषः । किन्तु लुबन्तस्यार्थानपगमाल्लुपा संबन्धित्वेन प्रचयोऽप्यर्थोऽवच्छेदमर्हत्येव ।

तथा हि य एव लुबन्तवाच्यः प्रतिकृतिरूपोऽर्थः स एव प्रचये बहुत्वमापद्यते, नान्यः । किञ्च काश्यप इव काश्यप इत्यत्र प्रयोजनाभावादतिदेशो न प्रवर्तते, द्वयोरपि प्रकृतिप्रत्ययार्थयोरेकार्थत्वात् ।

तथा च प्रचयविवक्षायामेव युक्तवद्भानेन कृत्यम् । काश्यप इव प्रतिकृत्य इत्यत्रापि हि प्रतिकृतीनामुपमेयानामेकशेषादेव बहुत्वमवधार्यत इति बहिरङ्ग एवार्थे संभवति युक्तवद्भावः प्रवर्तेतैव । तस्मात् प्रकारान्तरेणात्र काश्यपा इत्यस्य सिद्धिर्वक्तव्या । न त्वेकशेषेणाप्यत्र सिद्धिः ।। 597 ।।

तत् प्रकारान्तरमाह--

येषूपमेयवचनः शब्दोऽन्यो न प्रयुज्यते ।

उपमानस्य तत्रान्यैः संख्याया भेद इष्यते ।। 598 ।।

येषु लुबन्तेषु उपमेयवचनः परिच्छेद्यभूतप्रतिकृत्यर्थः शब्दो लुबन्तादन्यो नोच्चार्यते, तत्रोपमानस्य काश्यपस्य संख्याभेद इष्यते, भिन्नमत्रोपमानं प्रवर्तत इत्यर्थः ।

तथा ह्युपमेयवचनस्य शब्दस्योपादाने तत एव बहुत्वावगतेरुपमानमभिन्नमेवेपमेयोपकाराय प्रभवति ।

तद्यथा काश्यप इव देवदत्तयज्ञदत्तविष्णुमित्रा इमाः प्रतिकृतय इत्यादौ । यदा तूपमेयवाची शब्दो न प्रयुज्यते, तदा काश्यप इत्युक्ते सन्देहः, किमेकस्याः प्रतिकृतेरिदमुपमानमुतानेकस्या इति । अनेकस्या ह्युपमाने युक्तवद्भावेन काश्यपशब्दस्यैकवचनान्तस्योपपत्तेः । तस्मादत्रोपमेयभेदपरिच्छेदायोपक्रम एव काश्यप आत्मभेदमुपमानभूतः प्रतिपद्यत इति काश्यपाः प्रतिकृतय इति सिद्धम् । अन्यैरिति चात्र वचनं मतान्तरस्य वक्ष्यमाणत्वात् ।। 598 ।।

अत्रैवार्थे निदर्शनमाह--

यथा गुडतिलादीनां प्रयोगादेकसंख्यता ।

पाकादेरप्रयोगे तु भिन्नसंख्याभिधीयते ।। 599

गुडतिलतणडुलानां पाकः ताम्रः पलाशेषु बभूव राग इत्यादौ पाक्यादिबहुत्वादेवावधृतनानात्वः पाकादिरेकत्वेनैव निर्दिश्यते । यदा तु पाक्यभेदावधारणनिमित्तः स्वाश्रयभेदावधारणनिमित्तश्च शब्दान्तरप्रयोगो नास्ति, तदा पाको राग इत्युक्ते सन्देहः,किमेकपाक्यद्रव्यगतोऽयं पाकोऽथानेकाधार इति निश्चियप्रतिपत्त्यर्थं पाकौ पाकाः, रागौ रागा इत्यनेकसंख्यायुक्त एवार्थः

प्रतिनिर्दिश्यते ।। 599 ।।

एवमिहापीति दार्ष्टान्तिके योजयितुमाह--

यः संबन्धिगतो भेदः स प्रयोगे प्रतीयते ।

संबन्धिनामतो भेद उपमेये न गम्यते ।। 600 ।।

यः स्वतो न भिद्यते, अपि तु संबन्धिभेदाद् भेदमवलम्बते, स संबन्धिवचनस्य प्रयोगे भेदप्रतीतिमासादयति पदार्थः । तद्यथा-- गुडादीनां प्रयोगे पाकादिः ।

अप्रयोगे तु संबन्धिवचनस्य यथा पाकादेर्विशेषो नावधार्यते, तथा प्रतिकृतिवचनस्याप्रयोगे तद्वतो भेदो विशेष उपमेये परिच्छेद्ये नावधार्यत इति तदर्थमुपात्तभेदमेवोपमानं प्रवर्तते । तथा च भिन्नेनोपमानेनोपमेयस्य भेद आवेद्यत इत्यर्थः ।। 600।।

एतदेव निगमयति--

तस्मात् सामान्यशब्दत्वप्रसङ्गविनिवृत्तये ।

उपमेयगतो भेद उपमानेषु दृश्यते ।। 601 ।।

काश्यप इत्युक्तेऽपत्यं गोत्रं प्रतीयते, न नियमेन प्रतिकृतिः । सत्यामपि वोपमानसंबन्धप्रतिपत्तावेकानेकसाधारणस्योपमेयस्यावगमात् सामान्यशब्दत्वमुच्यते । ततश्च

तन्निवारणायोपमेयाश्रयभेदप्रतिपत्त्यर्थं प्रधानानुयायित्वाद् गुणानामुपमानमवलम्बते भेदम् ।। 601 ।।

उपक्रम एव यदा तर्ह्युपमेयवचनस्य प्रयोगस्तदा गतार्थत्वाद् बहुत्वस्याप्रयोग इत्याशङ्क्यान्यैरिति वचनान्मतान्तरं यदत्र सूचितम्, तदुपक्रमते वक्तुम्--

उपमानं समस्तानामभिन्नं श्रूयते क्वचित् ।

भिन्नानामुपमेयानामेकैकं वोपमीयते ।। 602 ।।

इह कदाचित् समुदितानामेकमुपमानमुपमेयानाम्, कदाचित् तु नानाभूतानां प्रत्येकमुपमानप्रवृत्तिरिति द्वैतम् ।। 602 ।।

पूर्वत्र पक्षे निदर्शनमाह--

यथा गरुड इत्येतद् व्यूहापेक्षं प्रयुज्यते ।

एकेन यत्र सादृश्यं वैनतेयेन हस्तिनाम् ।। 603 ।।

गजानां सन्निवेशविशेषो गरुडेनोपमीयते, गरुड इवेमे हस्तिन इति । एवमश्वानां रचनाविशेषो मकरेण, मकर इवेमे वाजिन इति । तथा श्येन इवेमा इष्टका इति। एवञ्चायं गरुडव्यूहादिसंनिवेशविशेषो रचनाभेदः सैनिकादेः परिकल्पितः शक्यते वैनतेयादिनोपमातुम्, यद्येकत्वतनान्त एव गरुडशब्दः प्रयुज्यते ।

तथा हि--गरुडाकृतयो गजा गम्यन्त इति संस्थानविशेषो गरुडेन परिच्छिन्ना भवतीति सम्बन्धिभेदादत्र भेदो न भवति । न हि गरुडस्योरमेया गजाः सम्बन्धिनः, अपि तु तद्व्यूहः ।

यदा तु गरुडा इवेमे हस्तिनः, मकरा इवेमे वाजिन इति बहुवचनप्रयोगः, तदा प्रत्येकं हस्तिनामश्वानां चोपमेयत्वं प्रतीयते । तथा च शीघ्रजवत्वादिना सादृश्येनोपमानत्वमवगम्येत, न तु व्यूहः परिमेयोऽवधार्येत ।। 603 ।।

एवमिहापि--

एकस्यापि प्रतीयते भिन्ना प्रतिकृतिः सह ।

काश्यपस्येति तेनायं प्रत्येकमवतिष्ठते ।। 604 ।।

यदि काश्यप इवेमाः प्रतिकृतयः काश्यप इत्येकवचनान्तमुपमानं प्रयुज्यते, तदा गरुडस्येव हस्तिनो व्यूहेन तुल्याः, काश्यपस्य नानाभूता प्रतिकृतिः केनचित् सन्निवेशादिना धर्मेण सह तुल्या विज्ञायते । न तु प्रत्येकमुपमानं गम्येत । सहशब्दस्तुल्यार्थः । तद्योगे काश्यपस्येति षष्ठी । तस्मात् प्रत्येकमुपमानभावप्रतिप्रत्त्यर्थमत्र काश्यपशब्दः प्रत्युपमेयं भेदेनैवावतिष्ठते । पूर्वत्र दर्शने

उपमेयशब्दस्याप्रयोगे उपमेयभेदावगमायोपमानं पारार्थ्यादात्मभेदं प्रतिपद्यत इत्युक्तम् ।
इह पुनः सत्युपमेयशब्दप्रयोगे भेदेनोपमानस्य दृष्टत्वात् प्रत्युपमेयमेकैकमुपमानमिति प्रतिपर्त्त्थमुपक्रम एव भेदमुपमानमुपादत्त इति दर्शनभेदः ।। 604 ।।

इदानीमेकेन समुदितानामुपमाने निदर्शनान्तरं प्रसिद्धतरमाह--

मेघाः शैल इवेत्युक्ते समस्तानां प्रतीयते ।
सादृश्यं गिरिणैकेन प्रत्येकं तेन भिद्यते ।। 605 ।।

शैल इवामी बलाहका महापरिमाणा, नानाविधरागविच्छुरितानेकसंस्थानशिखरत्वादिति पर्वतेनैकेन बलाहकानामुपमीयमानत्वे समुदितानां गिरितुल्यत्वमवधार्यते, न तु प्रत्येकम् । न ह्येकैको मेघः
पर्वतसदृशोऽनेरवर्णविच्छुरितानेकसंस्थानशिखरत्वादिपर्वतसाधारणधर्माभावादेकैकस्य । समुदितानामेव हि तथाभावः । यत एवमेकवचनान्तमुपमानस्यातोऽनवधारणात् प्रत्येकमुपमानसम्बन्धप्रतीत्यर्थमिदं काश्यपलक्षणमुपमानमुपक्रम एवात्मभेदं प्रतिपद्यत इत्यर्थः ।
तदेवं विवक्षितार्थप्रतीत्यर्थं काश्यपा इति बहुवचनप्रयोगोऽवस्थापितः ।
नन्वेवमुपक्रम एव भेदप्रतिपत्तेरञो बहुषूत्पत्तिः स्यादित्यञो बहुष्वित्येवं लुगत्र प्राप्नोति । नैष दोषः । अञेकत्व एव ह्यर्थ उत्पद्यते । तथा च युक्तवद्भावादेकवचनं प्राप्तमित्येकशेषेण बहुवचनं समर्थितम् । तत्रापि च युक्तवद्भावस्याप्राप्तिमाशङ्क्योपमेयभेदप्रतिपत्त्यर्थं बहुवचनमिदं समर्थितम् ।
तथा च विवक्षितार्थप्रतिपादनानुरोधाद् युक्तवद्भावायातं वचनमत्र बाध्यते । एतमव च न्यायं गर्भीकृत्य `हरीतक्यादिषु व्यक्तिः' इत्युक्तमितीदमपि तत्रैव द्रष्टव्यम् । अञन्तं यद् बहुष्वित्यपि चाश्रीयमाणेऽत्र लुगप्रसङ्गो भाष्येऽभिहितः ।
तथा हि-"यञञोश्च" (पा. 2/4/64) इत्यत्र "यस्कादिभ्यो गोत्रे" (पा.2/4/63) इत्यतो गोत्रग्रहणानुवृत्तेर्लौकिकस्य चापत्यलक्षणस्य तत्र गोत्रस्य ग्रहणादञन्तं यद् बहुषु गोत्रमित्याश्रयणात् प्रतिकृतिबहुत्वस्य गोत्रबहुत्वाभावाल्लुहविषयोऽयम् । इत्थं च कृत्वा बैदस्य बैदयोर्वा अपत्यानि बहूनि बिदा इत्यत्राप्यञन्तस्य गोत्रबहुत्वे वर्तमानत्वादनेनैव लुक् सिद्ध इति एकवचनद्विवचनान्तस्य च (एकवचनान्ताञन्तस्य द्विवचनान्ताञन्तस्य च) प्रवृत्तौ यूनीत्येतदनारब्धव्यमिति भाष्ये सिद्धान्तोऽवस्थापितः । लौकिकस्य हि गोत्रस्य "यञोश्च" (पा. 2/4/64) इत्यत्र ग्रहणाद् युवापि गोत्रमिति । गतमेतत् ।। 605 ।।

इदानीमुपमानप्रसङ्गेन "समासाच्च तद्विषयात्" (पा.5/3/106) इत्ययमिवार्थविषयश्छविधिविचार्यते । तत्र `तदित्यनेन किं प्रतिनिर्दीश्यते' इति भाष्यम् । सर्वनाम्ना प्रधानपरामर्शः समुचितः । समासश्चात्राप्रधानम्, प्रत्ययप्रकृतित्वेन गुणभावाद् इवार्थोऽपि छविधौ गुणभावादप्रधानम् इत्यन्यस्यासम्भवात् कस्य परामर्श इति प्रश्नः ।
अत्रोत्रं छप्रत्यय इति । स एव हि विधेयत्वात् प्रधानं सर्वनामसम्बन्धयोग्य इत्याशयः ।
अनन्तरमुक्तम्-`कथं समासो नाम छविषयः स्यात्' इति । भवेत् प्राधान्याच्छप्रत्ययस्य परामर्शः, किन्त्वर्थस्यासङ्गतिः ।
तथा हि--छप्रत्ययो विषये यस्य तस्मात् समासाच्छप्रत्ययो भवतीत्यर्थः सम्पद्यते । समासस्य कथं छप्रत्ययो विषयः स्यात् । न हि शब्दः शब्दस्य विषयो भवति। अर्थ एव हि शब्दस्याभिधेयो विषयो न्याय्यः । शब्दस्त्वनुकरणस्य प्रत्याय्यो भवेद् विषयः । न च समासस्यानुकरणम्, छ एव हि तथा स्यात् ।
अथात्रायमाशयः--अनन्यत्रभावो विषयार्थ इति छप्रत्ययादन्यत्र यस्य समासस्याभावः, स छविषयः समास इति ।
एतदप्ययुक्तमित्याह--

छापेक्षा तद्विषयता विधेयत्वान्न गम्यते ।
काकतालीयमित्यत्र प्रसिद्धं ह्युपलक्षणम् ।। 606 ।।

यः समासश्छप्रत्ययादन्यत्र न भवति, ततश्छो भवतीत्येवं छप्रत्ययापेक्षं समासस्य तद्विषयत्वं न घटते । काकतालीयमित्यत्र

व्युत्पाद्यते । यस्माद् यन्निर्ज्ञातम्, तदन्यस्य ज्ञप्तिहेतुरुपपद्यते । छप्रत्ययोष़नेनैवेदम्प्रथमतया विधेय इत्यप्रसिद्धममुमुपाश्रित्य विशेषणं कथमेतद्विषयतया प्रकृतिभूतः समासोऽवच्छेत्तुं पार्यत ।

यदि हि छुप्रत्ययो सक्षणान्तरेण लब्धात्मरूपो भवेत्, तदा तत्र नियतत्वं प्रकृतेः समासस्यावधार्य प्रत्ययविध्यर्थमुपादानं युज्यते । न तु लक्षणान्तरेण छो विहितः । इदमेव ह्युत्पत्तिवाक्यमस्य । तथा च प्राक् छविधेः समासस्य छविषयत्वमसिद्धं कथमूद्यते ।

अथ भाव्यवस्थाश्रयेण छविषयत्वं समर्थ्यते, तदा किमनेनोक्तेन । यस्मात् समासाच्छो विधास्यते, स चेच्छविषयो भवति, तस्माच्छप्रत्ययो भवतीत्येवमर्थे विज्ञायमाने न कश्चित् प्रकृतेरुपकारोऽभिहितो भवति । छप्रकृतेः समासस्य छविषयत्वाव्यभिचारादन्यस्य निवर्तनीयस्य सिद्धस्याभावात् ।। 606 ।।

ननु च भाव्यवस्थाश्रयेण विशेषणस्यास्ति प्रयोजनम् । तथाहि--छविषयत्वेन समासस्य विशेषणे विषयार्थस्यानन्यत्रभावरूपत्वाच्छप्रत्ययादन्यत्राप्रयोगः समासस्यास्य ख्यापितो भवतीत्याशङ्क्याह--

राजाश्वादिश्च विषयः स्यादन्यो वेत्यनिश्चितम् ।
तेन छस्य विधानात् प्राग् व्यपदेशो न विद्यते ।। 607 ।।

तद्विषयादित्यनेन छविषयः समासोऽविशेषणोपादीयमानः सर्वो राजाश्वादिप्रसिद्धो विधास्यमानछप्रकृतित्वादेव छविषयोऽन्यो वा प्रकारान्तरेण सम्भाव्यमानश्छविषयो गृह्येतेत्येतावन्नावधारितम् । येन प्रसिद्धस्य निश्चितच्छविषयत्वप्रणालिकया साधुत्वं ज्ञाप्यते समासस्य । प्रकारान्तरेण हि छविषयत्वानुपपत्तेश्छप्रत्ययप्रकृतितवादेव समासस्य तद्विषयत्वम् ।

इत्थञ्च सर्वस्यै समासस्य प्रकृतित्वोपपत्तौ किमनेन विशेषणेन व्यवच्छिद्येत ।

न च सर्वस्य समासस्य छप्रत्ययादन्यत्रासाधुत्वमेव ज्ञाप्यते, अनिष्टेः । न चानिष्टार्था शास्त्रप्रकृलृप्तिर्न्याय्या । तदित्यस्य तु परामर्शनीयमन्यत् कल्प्यताम् । तस्माच्छविधेः पूर्वं नियतस्य समासस्य प्रसिद्धतद्विषयस्याभावाच्छविषयादिति विशेषणं न युक्तम् । सिद्धे हि प्रत्यये कार्यान्तरे तेन विशेषणं प्रकृतिरूपस्य दृष्टम् । तद्यथा--"षष्ठ्यतसर्थप्रत्ययेन" (पा. 2/3/30) इति । न तु स्वयमलब्धात्मलाभः स्वनिमित्तस्यैव विशेषणं युक्तम् । स्वज्ञानेनान्यधीहेतुः सिद्धे ह्यर्थे ज्ञापको भवति । तदेवं प्रधानप्रत्यवमर्शासम्भवे सर्वनाम्ना छविधौ निमित्तभूतः प्रत्ययार्थो गुणभूतोऽपिप्रत्यवमृश्यते इवार्थः । सोऽपि ह्यत्र प्रकृतत्वात् संनिहित इत्युक्तम् "एवं तर्हि इवार्थः प्रतिनिर्दिश्यते" इति । इवार्थश्चात्र प्रत्ययवाच्य इति कथं प्रकृतिभूतः समासस्तद्विषयः स्यादिति सर्वनामप्रत्यवमर्शसामर्थ्यादिवार्थस्यात्र द्वौ व्यापारौ सम्पद्येते । तेनैकेन व्यापारेणेवार्थः समासस्यावच्छेदकोऽपरेण प्रत्ययवाच्यो जायते । इवार्थविषयात् समासादिवार्थें छ इत्यर्थः ।

अत्रैतमभिप्रायऽयमबुद्ध्वा चोदितम्--`समासेनोक्तार्थत्वात् तद्धितो न प्राप्नोति' इति । एकस्यैवार्थस्य व्यापारभेदाभावात् समासविशेषणत्वे समासवाच्यत्वाच्छप्रत्ययो न स्यात् । न ह्यभिधानमन्तरेण समासस्य विषयभावमुपगन्तुमर्हतीवार्थ इत्यर्थः । अथ वचनादभिहितेऽपीवार्थे प्रत्ययः, यथा तद्धितार्थे द्विगुरिति वचनाद् द्विगुतद्धितयोः साधारणोऽर्थः, तदा शस्त्रीश्यामादेरपि समासादिवार्थाभिधायकाच्छप्रत्ययः स्यात् । अत्र परिहारोऽभिहितो `द्वाविवार्थावि'ति । सर्वनामप्रत्यवमर्शान्यथानुपपत्त्या व्यापारभेद इवार्थस्येत्यभिप्रायः पूर्वमेव निर्णीतः ।। 607 ।।

कौ द्वावत्रेवार्थावित्याह--

द्वयोरिवार्थयोरत्र निमित्तत्वं प्रतीयते ।
एकेनावयवो युक्तः प्रत्ययोऽन्येन युज्यते ।। 608 ।।

`काकतालीयम्, अजाकृपाणीयम्' इत्यत्र द्वाविवार्थौ गम्येते । तयोरेकेन समासैकदेशः पूर्वपदमुत्तरपदं च सम्बद्धमिति तमिवार्थं प्रत्याययन् समासो भवतीवार्थविषयः । तद्धितान्तशब्दापेक्षया वा प्रकृतिभूतः समास एवात्रावयवः । सोऽपि च स्वावयद्वारेणेवार्थेन युज्यते, न तु साक्षाद् । अपरेणेवार्थेन वाच्येन छप्रत्ययः सम्बध्यते । शस्त्रीश्यामेत्यत्र पुनः प्रसिद्धश्यामगुणया यथा शस्त्र्या देवदत्ता उपमीयते, तथान्यापीति देवदत्ताख्येनोपमेयेनोपमानस्याप्योजनत्वाद् एक इवार्थः

।। 608 ।।

तत्र येनेवार्थेनावयवो युज्यते, तमाह--

चैत्रस्य तत्रागमनं काकस्यागमनं यथा ।

दस्योरभिनिपातस्तु तालस्य पतनं यथा ।। 609 ।।

काकतालीयमित्यत्र काकस्यागमनमुपमानम्, चैत्रागमनमुपमेयम् । तथा तालपतनमुपमानम्, दस्युसमागमः पुनरुपमेयः । अतर्कितोपनत्वमुभयत्रापि समानो धर्मः । तदयं समासवाच्य इत्यर्थः ।

प्रत्ययवाच्यमप्याह--

संनिपाते तयोर्यान्या क्रिया तत्रोपजायते ।

वधादिरुपमेयेऽर्थे तया छविधिरिष्यते ।। 610 ।।

काकतालयोः समागमे सति या अपरा तत्समागमनिमित्ता वधोऽङ्गभङ्गः स्फोट इत्यादिक क्रिया जायते, तया य उपमेयः परिच्छेद्यश्चैत्रवधादिलक्षणोऽर्थस्तत्रोपमानोपमेयसम्बद्धे द्वितीये इवार्थे वाच्ये सूत्रेण छुप्रत्ययो विधीयते ।। 610 ।।

ननु च काकगमनेन चैत्रागमनं बाह्यमुपमीयत इति तत् प्रति तस्य गुणभावः । तालपतनेन च दस्युसमागम उपमीयत इति तत्र गुणभाववः । ततश्च काकतालयोरन्योन्यसम्बन्धाभावादसति सामर्थ्ये समासः कथम् ? अनेनैव छविधिना ज्ञापकेनात्र समासो भाष्येऽवस्थापित इति चेत, तथापि `सुप् सुपा' इत्यस्यैव व्यापारो भाष्ये गमित इति कथमसामर्थ्ये तत्प्रवृत्तिः । भवतु वा समासः । किन्त्वसमन्विताभ्यामवयवार्थाभ्यां समुदायार्थस्यानुपजनात् केन प्रकृत्यर्थेन प्रत्ययार्थो विशेष्येतेत्याशङ्क्याह--

क्रियायां समवेतायां द्रव्यशब्दोऽवतिष्ठते ।

पातागमनयोः काकतालशब्दौ तथा स्थितौ ।। 611 ।।

दध्योदनो गुडधाना इत्यादौ यथा द्रव्याणां सिद्धस्वभावानां परस्परसम्बन्धाभावात् तदन्यथानुपपत्त्योपसेकादिक्रियायामात्माश्रितायां द्रव्यशब्दो दध्यादिर्वर्तते, तथात्र काकतालशब्दौ समवेते व्यापारे वर्तेते । ततश्च काकागमनं काकशब्दवाच्यम्, तालपतनं तालशब्दवाच्यमित्यस्ति परस्परमसम्बन्धः । प्रतिपादिता च ब्राह्मणवदधीत इत्यादौ ब्राह्मणादेरन्यत्र द्रव्यशब्दस्यापि क्रियायां वृत्तिविषये वृत्तिः ।

ततश्चायमत्रार्थः-काकागमनमिवातर्कितोपसम्प्राप्तमिदं तालपतनमिव चातर्कितोपसम्प्राप्तमिदं काकागमनमिति परस्परोपमानेन पूर्वोत्तरपदार्थयोः समन्वयोपपत्तौ प्रत्ययार्थविशेषणतोपपत्तिः । काकागमनतालपतनयोर्हि समन्वयोपपत्तौ ताभ्यां देवदत्तागमनदस्यूपनिपातयोरुपमेयत्वात् तत्रेवार्थे वाच्ये समासस्योपपत्तौ तद्वधाद् देवदत्तवधे उपमेये छप्रत्ययप्रवृत्तिः ।। 611 ।।

ननु चोपक्रम एवाशङ्कितोपनतेन तालकृतेन काकवधादिना देवदत्तवधादिर्दस्युकृतः किमिति नोपमीयते । तथाहि--काकगमनतालपतनयोर्गौण्या वृत्त्या काकतालशब्दयोरत्र वृत्तिः परिकल्पयितुं नोपयुज्यत इति किं काकगमनतालपतनयोरत्रान्योन्योपमानेनेत्यत आह--

यदन्वाख्यायकं वाक्यं तदेवं परिकल्प्यते ।

प्रयोगवाक्यं यल्लोके तदेवं न प्रयुज्यते ।। 612 ।।

इह प्रकृतिप्रत्ययविभागवशेनान्वाख्यानमिति प्रक्रियावाक्यमनेन प्रकारेण समन्वितार्थपदं सम्पाद्यते । काकगमनमिव तालपतनम्, तालपतनमिव काकागमनमित्यन्योन्योपमानेन हि प्रक्रियायाम् अन्वाख्यानोपायभूतमिदं वाक्यम्, न त्वेतल्लोके प्रयुज्यते । अन्यथा वधेनैव तालकर्तृकेण काकः सम्बध्येत, न तालेन, यदि नेदमुपरच्येत प्रक्रियावाक्यम् । स्थितलक्षणार्थप्रत्यायकं तु प्रयोगवाक्यं लौकिकं नैवम्भूतम् ।

न हि छप्रत्ययमन्तरेण काकतालशब्दो वाक्यस्वभावो लोके प्रयुज्यते । केवलं काकतालीयमित्यस्य लौकिकस्य शब्दस्यान्वाख्यानोपायपरिकल्पनेपायपरिकल्पनेयम् । यथासमन्वयं हि परिकल्पनमित्यनुगुणतरोऽयमुपायः ।। 612 ।।

तदाह--
ययोरतर्किता प्राप्तिर्दृश्यते काकतालवत् ।
तयोः समासप्रकृतेर्वृत्तिरभ्युपगम्यते ।। 613 ।।
यथा काकतालयोरनाशङ्कितोपस्थितयोर्वधादिनिमित्तः सम्बन्धः, तथा ययोर्दस्युदेवदत्तयोर्दृश्यते, तयोः सम्बन्धोपाधिकयोस्तत्समागम इववाच्ये समासलक्षणा या प्रकृतिस्तस्याः सकाशाच्छस्य प्रत्ययस्य वृत्तिः प्रतिज्ञायते । तदेवं काकतालद्वयसम्बन्धोपाधिः प्रकृत्यर्थो विभज्यते । उपमेये तु वधादौ छप्रत्ययः, तद्विषयैव च नियमेनेयं प्रकृतिरित्यन्यत्रास्याः साधुत्वाभावः । इदमेव च वस्तुभाष्ये विस्तरेण प्रदर्शितम् ।। 613 ।।
कस्मिन्नर्थे वृत्तिरभ्युपगम्यत इत्याह--
काकस्य तालेन यथा वधो यस्य तु दस्युना ।
तत्र चित्रीकृतेऽन्यस्मिन्नुपमेये छ इष्यते ।। 614 ।।
काकतालसमागमसमो दस्युदेवदत्तसमागम एकः समासार्थ इवार्थः पूर्वं दर्शितः । अयं त्वपरः प्रत्ययावाच्योऽत्र प्रदर्श्यते यदिहान्यस्मिन्निति । यथा यदृच्छयोपरि नपतता तालेन यदृच्छागतस्य काकस्य वधो वृत्तः, तथाऽशङ्कितोपनिपतता दस्युना असम्प्रधारितोपस्थितस्य देवदत्तस्य वध इत्येवमद्भुतरूपतां प्राप्ते परिच्छेद्येऽर्थे छप्रत्ययः । काकतालसम्प्राप्तिनिमित्तोपजनितक्रियाविशेषोपमितेऽन्यस्मिन् क्रियाविशेषे छविधिरित्यर्थः । तेन यथा तालेन काको यदृच्छया हतः, तथा यदपरसमीहितमाश्चर्यभूतं जायते, तत् काकतालीयमुच्यत इत्यर्थः । गतमेतत् ।। 614 ।।
उपमानप्रसङ्गेवार्थप्रस्तावाच्छविधिवदन्यदप्यत्र विचार्यते । तथाहि--"स्थूलादिभ्यः प्रकारवचने कन्" (पा.5/4/3) इत्यत्र सादृश्यं प्रकारार्थः । तत्र `चञ्चद्बृहतोरुपसंख्यानम्' इत्युक्तम् । चञ्चत्सदृशश्चञ्चत्को बृहत्कः । कस्यैतदभिधानमित्याह--
चञ्चत्प्रकारश्चञ्चत्को बृहत्क इति चापरे ।
मणिमण्डूकखद्योतान् सादृश्येन प्रचक्षते ।। 615 ।।
प्रकारोऽत्र सादृश्यमिति चञ्चत्प्रकारो बृहत्प्रकारश्चञ्चत्को बृहत्क इति मणिप्रभृतीनामन्यतमस्याभिधानमाचार्या मन्यन्ते । अपर इत्याचार्याणामभिन्नमतानां निर्देशः ।। 615 ।।
कीदृशमत्र मण्यादिसादृश्यमित्याह--
तत्रोन्मेषनिमेषाभ्यां खद्योत उपमीयते ।
श्वासप्रबन्धैर्मण्डूकः स्पन्दमानप्रभोमणिः ।। 616 ।।
अचलन्नपि खद्योतः स्वप्रभाच्छुरितश्चलन्निवावधार्यमाणश्चञ्चत्कशब्दवाच्यः । तथा हि--स्वप्रभोन्मीलननिमीलनक्रियाभेदात् स्पन्दमान इव लक्ष्यते । तथानवरतप्रवर्तमानोच्छ्वासवशोच्छूनशरीरतया चलितशरीर इवावधार्यमाणो भेकश्चञ्चत्काभिधानविषयभावमुपैति । एवमविच्छिन्नोद्गमदीप्यमानरश्मिचक्रवालचलितमूर्तिरिव मणिश्चञ्चत्कः ।। 616 ।।
बृहत्के कः प्रकारार्थ इत्याह--
प्रविकासिप्रभोऽल्पोऽपि महान् य उपलभ्यते ।
बृहत्क इति तत्रैव मणौ शब्दः प्रयुज्यते ।। 617 ।।
परिकृशोऽपि मणिः सर्वतः प्रसर्पिप्रभाजालवशेन स्थूलतरमूर्तिरवधार्यमाणो बृहत्सदृशो बृहत्क इत्यभिधीयते ।। 617 ।।
प्रसङ्गेन प्रकारस्वरूपं दर्शनभेदेन विचारयति--
सादृश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते ।
भेदेऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यते ।। 618 ।।
"प्रकारवचने थाल्" (पा.4/3/23) "प्रकारे गुणवचनस्य" (पा. 8/1/12) "स्थूलादिभ्यः प्रकारवचने कन्"

(पा.5/4/3) इत्यादौ सर्वत्र शास्त्रे सादृश्यमेव प्रकारशब्दार्थः ।

तथाहि--यथा तथेति तुल्यत्वमेव द्योत्यते । पटुजातीय इति तु जातीयरा सदृशः प्राधान्येनाभिधीयते । पटुपटुरिति द्विर्वचनेन सादृश्यमेव तद्वति गुणभूतं द्योत्यते । एवं स्थूलप्रकारः स्थूलक इति ।

कैश्चित् तु भेदेऽपि प्रकाराख्येष्यते । अत्रापि सर्वत्रेति यथा तथेति भेद एव वाच्यः । स एव समानः सादृश्यहेतुरिति तदप्यर्थाद् गम्यते । एवं पटुपटुः स्थूलक इत्यत्रापि ।

इत्थञ्च भेदसादृश्ययोः सर्वत्र प्रतीतावेकोऽभिधयोऽपरः सामर्थ्यगम्य इति मतभेदेन प्रकारो विभज्यते । पशुप्रकारो देवदत्त इत्यत्र सामान्यविशेषभावायोगात् सामान्यमेव प्रकारः । तद्गर्भादपि पशुर्देवदत्त इत्यभेदाभिधानात् कार्यात् तद्धेतुसादृश्यमेव गम्यते, न तु प्रयोगद्वयेऽप्यत्र भेदोऽवसीयते । ब्राह्मणप्रकारा माठरादय इति तु सामान्यस्य विशेषेऽन्वयाद् भेदेनाप्रतीतौ सादृश्यासम्भवे भेदः प्रकार इत्याहुः ।। 618 ।।

अस्तु सादृश्यं भेदः प्रकारो वा । इदं तु विचार्यते--"किं सर्वनामबहुभ्यः प्रकारवचने विधीयमानस्थाल् प्रातिपदिकसामान्याद् विहितस्य जातीयरो बाधकः । तथा च किञ्जातीय इति न सिध्येत् । प्रकारस्य च थालैवाभिव्यक्तौ तथाजातीय इति कथं प्रयोग इत्यत आह--

प्रकारवचनः कश्चित् प्रकारवति संस्थितः ।

प्रकारमात्रे वर्तित्वा कश्चिद् तद् व्यतिवर्तते ।। 619 ।।

कश्चिदिति जातीयर् कंश्च प्रत्ययो द्विर्वचनं च । अत्र हि प्रत्यये स्वभावाद् गुणभूतस्य प्रकारस्याभिधानमिति प्रकारवानेव प्राधान्येनोच्यते । अत एवंप्रकार उच्यते यस्मिन् स प्रकारवचनस्तस्मिन् प्रातिपदिकादयं प्रत्यय इति प्रकारवति भवति । थाल् पुनः प्रकारमात्र एव, न तद्वति । किन्तु प्रकारे वृत्तिमनुभूय तद्वति जातीयर्सहितो वर्तत इति सामर्थ्यादवसेयम्, न तु शुक्लदिवत् तद्वति वृत्तिस्थालन्तस्येह दृश्यते ।

एवञ्च भिन्नविषयत्वाद् बाध्यबाधकभावश्च न भवति । तथाजातीय इति च प्रयोगो भवति । यथा देवदत्तस्तथा यज्ञदत्त इत्यत्रापि न थालन्त एव प्रकारवन्तमभिधत्ते, अपि तु क्रियायां वाक्यस्यास्य परिसमाप्तेर्वर्तते दृश्यते वेत्यादिका यासावपेक्षिता क्रिया, तत्र करणभावमापन्नः प्रकार एव प्रतीयते । येन प्रकारेण देवदत्तो वर्तते, तेन प्रकारेण यज्ञदत्तोऽपीत्यर्थः । अतश्च क्रियासंबध्यमानः करणतयात्र प्रकारः प्रकारवति षष्ठीनिमित्तं व्यतिरेकं नापादयति । न तु तद्वदभिधानं षष्ठ्यभावादनुमेयम्, अन्यथासिद्धेः षष्ठ्यभावस्य ।। 619 ।।

यदि तर्हि थालः सादृश्यं प्रकारार्थस्तदा यथार्थेऽव्ययीभावमुक्त्वा किमर्थं पुनः सादृश्येऽन्वाख्यायत इत्याह--

सादृश्यग्रहणं सूत्रे सदृशस्योपलक्षणम् ।

तुल्ययोरव्ययीभावे सहशब्दोऽभिधायकः ।। 620 ।।

वीप्सासादृश्ययोर्वृत्तिर्या यथार्थाभिधायिनः ।

स चायमव्ययीभावे भेदो भेदेन दर्शितः ।। 621 ।।

"अव्ययं विभक्ति" (2/1/6) इत्यादौ सूत्रे सादृश्यग्रहणेन धर्मी सदृशो लक्ष्यते । धर्मो ह्यव्यभिचारात् स्वाश्रयमुपलक्षयितुं पर्याप्त एव । तथा च सदृशः सख्या ससखीति सदृशयोरव्ययीभावे सहशब्दो वाचको न सादृश्यमात्रस्येति सामर्थ्यादत्र सूत्रे धर्मिणो धर्मः सदृशस्योपलक्षणम् ।

वृत्तिकारैर्हि पूर्वैरुदाहरणमिदमत्रोक्तमिति तदाश्रयेण सहशब्दोऽभिधायको वाचकः सदृशाख्यस्य धर्मिण उच्यते । एवञ्च यदव्ययमभिधायकं सदृशार्थस्य, तस्य सादृश्यग्रहणेन समासः कथ्यते । सत्त्वभूतार्थाभिधायित्वेऽपि चास्य वचनाद् "अव्ययीभावश्च" (पा.1/1/41) इत्यस्मादव्ययतवम्, यथा स्वरादीनाम् ।

यत् पुनरव्ययं यथार्थाभिधायि समासभाक्त्वेन निर्दिष्टम्, तस्य वीप्सायां सादृश्ये च वृत्तिर्धर्ममात्रे न धर्मिणि । प्रत्यर्थम्, अनुरूपमिति । "यथाऽसादृश्ये" (पा. 2/1/7) इति प्रतिषेधाद् यथाशब्दः सादृश्यवचनो न समस्यते ।

थालन्तप्रतिरूपको वा यथाशब्दो वीप्सावचनो निपातः समस्यत एव । वीप्सा च यथार्थो भेदः ।
तथा हि प्रत्यर्थमित्यत्रार्थसामान्यस्य क्रियाया व्याप्यमानताविशेषः प्रतिना प्रकाश्यत इति साकल्येन पदार्थानां क्रियया समन्वयो वीप्सामान्यस्य भेदको विशेषः प्रकारो भवति यथार्थः ।
तदेवं यथार्थे सादृश्यमात्रेऽव्ययीभावः स्यादिति तद्वति सादृश्यग्रहणेन पुनर्विधीयत इत्ययं विशेषः पृथक् प्रणयनादेव धर्मधर्मिणोरत्राभिमतः ।। 620 ।। 621 ।।

प्रकारान्तरमत्रैवाह--

सादृश्यं योग्यता कैश्चिदनावभ्युपगम्यते ।
यत् तु मूर्तिगतं साम्यं तत् सहेनाभिधीयते ।। 622 ।।

अनावनुशब्दविषये या योग्यता तेनानुशब्देन द्योत्या, तदेव सादृश्यं यथार्थं इति समासस्तत्र । अनुरूपं सुरूपो वहतीति । रूपेण तुल्यो हारकटकादिना वेषोऽन्यो वा कश्चिच्छोभातिशयहेतुत्वात् तं सुरूपो धारयतीत्यर्थः ।
इत्थञ्च कृत्वात्र गुणस्य रूपस्य सादृश्ये यथार्थेऽव्ययीभावः । योग्यतालक्षणो हि यथार्थः सादृश्यमात्रगुणविषयः ।
यत्तु मूर्तिगतं वस्तुनिष्ठमवयवसंनिवेशादिना सादृश्यं द्रव्यविषयम्, तत् ससखीत्यत्र सहशब्देनाख्यायते । तथाहि सादृश्यं सख्या ससखि, न तु सदृश इति ।
एवं द्रव्यगतत्वेन भिन्नं सादृश्यं सूत्रे सादृश्यशब्देनोपादीयते, यथाशब्देन तु योग्यताख्यं गुणगतत्वेनेतति भिन्नंविषयतैव समासयोः ।
यदा तु योग्यता वीप्सा सादृश्यं च यथार्थ इति भेदेन निर्देशादनुरूपं सुरूपो वहतीत्यत्र सादृश्यादन्यैव योग्यताशब्दार्थो यद्योग्यं रूपस्य शोभाकारित्वेन यदुचितं तदनुरूपमिति, तदा पूर्व एव धर्मधर्मिभेदः पृथगुपादाने हेतुर्वाच्यः ।। 622 ।।

सादृश्यमेव सर्वत्र प्रकार इति यदुक्तम्, तदव्यापकम् । तथा हीत्थंभावे कमण्डलुना च्छातमित्यत्र मनुष्यतासामान्यस्य छात्रादिर्विशेष इति भेदोऽत्र प्रकारो न सादृश्यम्, अपरस्य भेदवतोऽनपेक्षणादित्येतत् समर्थयितुमाह--

इत्थंभावेऽपि सादृश्यं बुद्ध्यवस्थानिबन्धनम् ।
ग्रहणे भेदमात्रस्य तत्रान्यैवाभिधीयते ।। 623 ।।

अङ्गदी कुण्डलीत्यादिना पूर्वमीदृशो देवदत्त इति बुद्धिप्रकल्पितसारूप्योपादानादत्रापीत्थंभावे ग्रहणे प्रत्यये भेदमात्रा कथ्यते । बाह्यवस्तुन उपरागाद् भेदलेशो न तत्त्वतो भेदः । ततश्च ज्ञानानुकारो बहिरर्थस्य व्यवस्थापकत्वात् प्रकार इति सादृश्यमप्यत्र प्रकार उपपद्यते ।
एवं पञ्चधा भुङ्क्ते, त्रेधाधीते इत्यादावपि "संख्याया विधार्थे धा" (पा. 5/3/42) इति ग्रहणनिर्भासस्य बाह्यानुकारित्वेन सादृश्यं प्रकारार्थ उपपाद्यः । सङ्कल्पितभेदसदृशस्य क्रियाविशेषस्य हि निर्वर्तनमत्र ।। 623 ।।

तदेतदागमोपबृंहितं शोभत इत्यागमरुचिरुपासितवृद्धतामुपदर्शयन् सर्वत्र प्रकारार्थः सादृश्यमित्यत्र भाष्यकारमतं संवादकमाह--

गौर्वाहीक इति द्वित्वे सादृश्यं प्रत्युदाहृतम् ।
शुक्लादौ सति निष्पन्ने बाहीकोन द्विरुच्यते ।। 624 ।। इति ।

"प्रकारे गुणवचनस्य" (पा. 8/1/12) इत्यत्र द्विर्वचनविधौ गुणवचनग्रहणस्य प्रत्युदाहरणम्--`अग्निर्माणवकः, गौर्वाहीकः' इति भाष्येऽभिहितम् । यदि च प्रकारः सादृश्यम्, तत एतदुपपद्यते । गोसादृश्याद्धि वाहीको गौः । अग्निसादृश्याच्च माणवकोऽग्निः । न तु सामान्यस्य गोत्वस्याग्नित्वस्य चायं विशेषो भेदः । तदनेन द्विर्वचनविधेरन्यत्रापि प्रकारः सादृश्यमिति सूचितं भवति, द्विर्वचनाभावेऽपि तस्यैव प्रदर्शनात् ।
ननु च गवादिशब्दो गुणनिमित्ताभेदाध्यवसायादेव वाहीकादौ प्रयुक्त इति कथं च गुणवचन इत्याशङ्क्याह--शुक्लादौ सति निष्पन्ने बाहीको न द्विरुच्यत इति ।
परिसमाप्तरूपगुणवचने शुक्लादौ प्रसिद्धे सम्भवति वाहीके वाहीकाभिधायी गोशब्दो न द्विष्प्रयुज्यत इत्यर्थः ।

इतिग्रन्थसमाप्तौ, शुक्लादिशब्दो हि गुणे तद्वति समारोपितगुणसम्बन्धे वर्तमानो गुणवचन एव । गोशब्दस्तु वाहीक एव तथा, न जातौ । अत एव गुणमुक्तवान् गुणवचन इत्यभिधीयते । गोशब्दस्तु वाहीके वर्तमानो न गुणमुक्तवान्, पूर्वं जातौ प्रवृत्तेः ।

इत्थञ्च कृत्वा `प्रकृत्यर्थविशेषणत्वात् सिद्धम्' इत्युक्तम् ।

द्विर्वचनकारणत्वात् प्रकृतिर्द्विवचनस्यात्र स्थानी कथ्यते । तदर्थो गुणवचनस्येत्यनेन विशेष्यते, न तु प्रकारार्थः ।

तथा चाह--`प्रकारे सर्वेषां गुणवचनत्वात् सर्वप्रसङ्गः' इति । द्रव्यवाचिनामपि गवादीनां वाहीकादौ गुणनिमित्तसादृश्यवशेन प्रवृत्तेः प्रकारे गुणवचनत्वस्येवेति किं विशेषणेन व्यावर्त्येत ।

तस्माद् गुणवचनग्रहणसामर्थ्याद् गुणवचनो यः शब्दो निर्ज्ञातस्तस्य प्रकारे सादृश्ये द्योत्ये द्विर्वचनमिति नास्त्यतिप्रसङ्ग इति गुणोपसर्जनद्रव्यवाचिनः शुक्लादेरेव द्विर्वचनं गुणमात्रवाचिनश्चेति `शुक्लशुक्लः पटः, शुक्लशुक्लं रूपम्, पटुपटुः' इतीष्टं सिद्धम् ।

तदेवं संसर्गावस्थः पदार्थो वाक्यार्थादपोद्धृत्य पदविभागपूर्वकं समीक्षित इति परिसमाप्तोऽर्थद्वारकः पदविचार इति शुभम् ।। 624 ।।

इति भूतिराजतनयहेलाराजकृते प्रकीर्णक-
प्रकाशे वृत्तिसमुद्देशश्चतुर्दशः ।।
समाप्तं चेदं पदकाण्डम् ।

अकारादिश्लोकानुक्रमणिका

श्लोकाः श्लो.सं.

अ
अकर्मकत्वे सत्येवं क्तान्तं 60
अक्रियाणां निवृत्त्यर्था 496
अगृहीतविशेषेण 120
अगोरचित्रगोश्चैव 214
अङ्गदी कुण्डली चेति 568
अचेतनेषु संक्रान्तं 325
अतिङ्ग्रहणमेवं तु 446
अत्यन्तानुगमात् तत्र 446
अत्यन्तभिन्नयोरेव 357

अत्यन्तमत्र विषये 550
अत्यन्तं विषये भिन्ने 572
अथवैकविभक्तित्वात् 410
अथ श्यामेव शस्त्रीयं 422
अथ स्वभावौ वचनाद् 275

अधीते तुल्य इत्येवं 505
अधीयते ब्राह्मणवत् 384
अध्येतरि यदा वृत्तिः 461
अनङ्गीकृतसत्त्वं तु 585
अनाश्रितक्रियस्तस्मात् 516
अनिर्ज्ञातस्य निर्ज्ञानं 359
अनिर्ज्ञातं प्रसिद्धेन 360
अनिर्धारितधर्मत्वाद् 144
अनुप्रयोगसिद्ध्यर्थं 231
अनुस्यूतेव भेदाभ्यामेका 28
अनेकधर्म वचनैः 264
अनेकस्मादस इति 281
अन्तः करणवृत्तौ च 91
अन्तर्भवेच्च सम्बन्धः 121
अन्तर्भूतं निमित्तं च 508
अन्तर्भूतविभक्त्यर्थे 227
अन्तर्भूते तु करणे 456
अन्तरेण च शब्दस्य 190
अन्यत्र वर्तमानर्त्व सद् 404
अन्यैस्तु मानं जात्यादिः 374
अन्वयात् गम्यते सोऽर्थो 95
अन्वयव्यतिरेकाभ्याम् 19
अपरे ब्राह्मणादीनां 302
अपृथक्छब्दवाच्यस्य 354
अपृथक्छब्दवाच्यापि 356
अपेक्षमाणसम्बन्ध 239
अपोद्धारञ्च सामान्यं 143
अबुधान् प्रत्युपायाश्च 49
अबुधान् प्रति वृत्तिं च 94
अमुख्यसम्भवे तत्र 267
अभाव इति भावस्य 263
अभावत् केवलायास्तु 451
अभावो वा लुको यत्र 156
अभिधानेऽपि सङ्ख्याया 230

अभेदस्य विवक्षायां 393
अभेदे त्वेकशब्दत्वात् 332
अभेदेनोपमानस्य 590
अभेदे लिङ्गसंख्याभ्यां 134
अभेदैकत्वसंख्या वा 99
अयमेव तु सूत्रेण 573
अयं पदार्थं एतस्मिन् 278
अराज्ञि येषां धर्माणां 558
अर्थस्य विनिवृत्तत्वात् 44
अर्थस्यानुगमं कञ्चिद् 75
अर्थात् प्रकरणाद् वापि 444
अर्थान्तराभिधानाच्च 80
अर्थान्तरभिधायित्वं 32
अर्हतेश्च क्रियाकर्त्री 559
अलुकश्चैकवद्भाव 106
अवस्था तादृशी नास्ति 326
अवश्यं ब्राह्मणे कश्चित् 269
अविग्रहा गतादिस्था 67
अविद्यमानब्राह्मण्यो 300
अविप्रयोगः साधुत्वे 76
अविशिष्टस्य पर्यायो 270
अवृष्टयो यथा वर्षा 301
अव्ययानां च यो धर्मो 105
अव्ययेषु वतेः पाठः 521
अशब्दवाच्यो यो भेदः 369
अशुक्ल इति कृष्णादिः 288
असत्सामान्यवृत्तिर्वा 310
असत्त्वभूतो व्यापारः 518
असम्भवात्तु सम्बन्धे 222
असम्भवेऽपि वा वृत्तेः 432
असमासे समासे च. 50
असम्यगुपदेशाद् वा 280
अस्त्रीपूर्वपदत्वात् तु 418
अस्येदमिति वा यत्र 349

असास्नो गौरिति 298
आ
आकृतिः सर्वशब्दानां 316
आकृतौ वापि सामान्ये 399
आक्षेपाच्च प्रयोगेण 72
आख्यायते च शास्त्रेण 154
आधारभेदाद् भिन्नायां 443
आधारभेदाद् भेदो यः 362
आधारेषु पदन्यासं 405
आधिक्यं तुल्यशब्देन 541
आपि के चापरार्थत्वात् 118
आरम्भस्य क्रियार्थत्वे 538
आराच्छब्दवदेकस्य 274
आविष्टलिङ्गता तस्यां 317
आविष्टसंख्यो वाक्येऽसौ 286
आवेशो लिङ्गसंख्याभ्यां 150
आश्रयस्यानुपादाने 344
आश्रयः समवायी च 166
आश्रयाद् भेदवत्तायाः 108
आश्रयाद् यो गुणे भेदो 366
आश्रयाणां हि लिङ्गैः सा 318
आश्रये लिङ्गसंख्याभ्यां 152
आश्रिते त्वाश्रयकृतम् 358
इ
इतरेतरयोगस्तु 29
इत्थंभावेऽपि सादृश्यं 623
इवशब्द प्रयोगे तु 542
इव शब्देन सम्बन्धे 546
इवार्थे यच्च वचनं 532
इवे द्रव्यादिविषयः 536
इवे यो व्यतिरेकोऽत्र 543
उ
उपकारि च संस्त्यानं 176
उपमानं प्रसिद्धत्वात् 373

उपमानं समस्तानाम् 602
उपमानविवक्षायां 447
उपमानविवक्षायां 556
उपमानस्य भेदाच्च 592
उपमाने क्रियावृत्तिं 502
उपमानोपमेयत्वे 448
उपमेयात्मनि श्यामे 414
उपमेयेन सम्बन्धात् 545
उपमेयेषु भिन्नेषु 594
उपमेये स्थितो धर्मः 383
उपमेयं तु यद्वाच्यं 424
उपलक्षणमात्रार्था 423
उपात्तंच प्रकृत्यर्थो 163
उपाधिभूता या संख्या 124
उपाधेः कस्यचिद् वाक्ये 464
उपायमात्रं नानात्वं 97
उ
उभयस्तस्य तुल्यार्थो 117
उष्ट्रावयववतुल्येषु 530
ए
एकजाति व्यपेक्षायां 389
एकत्वयोगमासज्य 285
एकत्वे तुल्यरूपत्वात् 340
एकार्थविषयौ शब्दौ 313
एकार्थे वर्तमानाभ्यां 296
एकद्वयोर्यञादीनां 122
एकश्च द्व्यात्मकोऽर्थो 920
एकः समानो धर्मश्चेद् 513
एकस्य कार्यविज्ञानात् 562
एकस्यापि प्रतीयते 604
एकस्य च प्रधानत्वात् 282
एतैः शब्दैर्यथाभूतः 569
एवं जातिमति द्रव्ये 25
एवं तु युक्तवद्भावात् 593

एवंम्भूता च सावस्था 188
एवमुत्क्रामतो नूनम् 588
एवञ्च सति पूर्वेण 535
क
कथं ह्यवयवोऽन्यस्य 392
कर्मत्वं करणत्वं च 390
काकस्य तालेन यथा 614

कामचारे च सत्येवं 258
कार्यं सत्ताश्रयं शास्त्राद् 129
काल्यां कालात् द्वितीयान्तात् 160
किञ्चिद् यत्रास्ति सामान्यं 396
किमथमतथाभूते 277
कुत्साप्रशंसातिशयैः 1
कुत्सितत्वेन कुत्स्यो वा 4
कृतहस्तवदित्येतत् 557
कृतद्धिताभिधेयानां 327
कृत्वसुञ्विषया यापि 438
कृतौ यो युक्तवद्भावो 110
कृष्णादिब्यपदेशश्च 486
केचित् पुमांसो भाषन्ते 575
केचित् संयोगिनो दण्डात् 233
केवलानां तु भावानां 474
केषाञ्चिज्जातिगुणयोः 122
केषाञ्चित् त्यक्तभेदेषु 183
केश्चिद् गुणप्रधानत्वं 337
क्त्वान्ते च तुमुनन्ते च 254
क्रमं तु यदि बाधित्वा 509
क्रिया त्वाश्रीयते यस्मिन् 501
क्रियेत्युपाधिः प्राथम्यात् 434
क्रियान्तरेषु सापेक्षाः 452
क्रियाप्रसंगात् सर्वेषु 289
क्रियाभेदेन दृष्टानाम् 17
क्रियामात्राभिधायित्वात् 494

क्रियाया साधनाधार 255
क्रियायां समवेतायां 611
क्रियायां साधने द्रव्ये 583
क्रिययेति तृतीया च 462
क्रिया श्रुतिश्च प्रक्रान्ते 290
क्रियावतस्तु ग्रहणात् 519
क्रियावतोऽपि सादृश्ये 504
क्रियावतोश्च सादृश्ये 523
क्रियावृत्तेस्तृतीयान्त 455
क्रियासमानजातीयाः 442
क्रीडायां जीविकायां च 40
क्षत्रियादौ पदं कृत्वा 262
ग
गवयेन समोऽनड्वान् 544
गवां विशेषणत्वेन 237
गावेधुके चरौ दृष्टा 591
गुणभावोऽभिधेयत्वं 335
गुणभूतस्य नानात्वाद् 338

गुणमात्राभिधायित्वं 26
गुणमाज्ञत्राभिधायित्वं स्त्रीशब्दे 174

गुणयोर्नियतो भेदः 363
गुणस्य भेदकाले तु 351
गुणनामाश्रयाद् भेदः 372
गुणे न चोपमानस्थे 412
गुरुशिष्यपितापुत्र 407
गौर्वाहीक इति द्वित्वे 624
घ
घविधौ घश्च संज्ञायाम् 468
च
चञ्चत्प्रकारश्चञ्चत्को 615
चस्य चासत्त्वभूतोऽर्थः 193

चार्थः शक्तेः क्वचिद्भेदात् 194
चैत्रस्य तत्रागमनं 609
छ
छापेक्षा तद्विषयता 606
ज
जहाति जातिं द्रव्यं वा 495
जातिप्रयोगो जात्या चेत् 156
जातिभागाश्रयाप्रख्या 403
जातिमात्रव्यपेक्षायां 364
जातिश्चेत् स्त्रीत्वमेवासौ 178
जातिसंख्यासमाहारैः 180
जातेरभेदे भेदे वा 400
जातेश्च भेदहेतुत्वात् 133
जातौ द्विवचनाभावात् 107
जातौ वृत्तौ यदा द्रव्ये 352
जातौ पूर्वप्रवृत्तानां 345
ट
टाबन्त एव चैत्रादौ 409
त
तत्त्वासङ्गविवक्षायां 380
तत्र जातिपदार्थत्वं 348
तत्र प्रयोगोऽनियतो 146
तत्र स्वाभाविकं लिङ्गं 196
तत्राभिन्नव्यपेक्षायां 394
तत्रासति नञो वृत्तेः 257

तत्रोन्मेषनिमेषाभ्यां 616
तथार्धपिप्पिलीत्यत्र 478
तथाविधेऽपि बाह्येऽर्थे 571
तथा विनेषिपुत्राभ्यां 71
तथाहि सति सौरभ्ये 371
तदर्हमिति नारब्धं 561
तदात्मन्यविभक्ते च 93
तद्धितो योगभेदेन 85

तद्वन्तो हि प्रधानत्वात् 173
तस्मात् सति गुणत्वेऽपि 413
तस्मात् सामान्यशब्दत्व 601
तस्माद् द्विवचनाद् टाप् 120
तावेवं सन्निपतितौ 11
तिले पूर्वमुपात्ते वा 27
तुल्यं मधुरयाधीते 527
तुल्यरूपं यथाख्यातं 299
तुल्यश्रुतित्वात् तत्त्वेऽपि 46
तुल्यर्थैरिति या तस्या 525
तृतीयान्तं क्रियेत्येतद् 467
तृतीयोप्याश्रितो भेदो 449
ते क्षत्रियादिभिर्वाच्या 314
तेन तुल्यमिति प्राप्तेः 552
तेनास्य चितिरूपं च 324
तैलपाकेन तुल्ये च 445
द
दस्युहेन्द्र इवेत्येत 564
दास्याः पतिरिति व्यक्तो 114
दुःखा दुरुपपादा च 34
दृष्टो गार्ग्यतरे भेद 123
देवदत्तादिकुत्सायां 2
द्वन्द्वैकदेशिनोरिक्ता 304
द्वयं विशेष्यते तेन 518
द्वयोरिवार्थयोरत्र 608
द्वयोः प्रतिविधानाच्च 517
द्वयोः समानो यो धर्म 361
द्वित्वोपसर्जने सङ्घे 116
द्व्यादीनां च द्विपुत्रादौ 115
द्रव्यधर्मादनिष्क्रान्तो 247
द्रव्यमात्रस्य निर्देशे 244
द्रव्यमात्रेऽपि निर्दिष्टे 415
द्रव्यस्य ग्रहणं चात्र 245
द्रव्यस्य सति संस्पर्शे 355

द्रव्यात्मा गुणसंसर्ग 11
द्रव्यात्मानस्त्रयस्तस्माद् 20
द्रव्याभिधायी कृष्णादि 24
द्रव्यावस्था तृतीयातु 14
द्रव्येऽनिर्ज्ञातजातीये 9
द्रव्येन गुणभावोऽस्ति 336
द्रव्ये वापि क्रियायां वा 450
ध
धर्मः समानः श्यामादि 377
धात्वर्थकर्मविषयो 291
धात्वर्थेणोपजनितं 581
न
न काचिदिव योगे तु 540
न केवलौ द्रव्यगुणौ 439
न गोत्वं शाबलेयस्य 147
न च साम्प्रतिकी कुत्सा 5
न चैवं विषयः कश्चित् 303
न जातिगुणशब्देषु 485
नञ्स्नञौ विहितौ येन 589
नञ्समासबहुर्वीहि 158
ननु चाभिधेयत्वे 333
नहि ब्राह्मण इत्यत्र 500
नात्यन्ताय मिमीते यत् 387
नाना चित्रा इति यथा 240
नाभेदेन न भेदेन 386
निमित्तमाश्रयत्वेन 167
निमित्तानुविधाने च द्रव्य 204
निमित्तानुविधाने च 309
निमित्तानुविधायित्वात् 153
निमित्ते प्रत्ययः पूर्वो 89
निमित्तैरभिसम्बन्धाद् 13
निर्ज्ञातसाधनाधारे 292
निर्धारणादिविषये 41
निवृत्त्यर्था श्रुतिर्येषां 488

निवृत्तेऽवयवस्तस्मिन् 273
निष्कृष्टेष्वपि भेदेषु 189
नीवमुत्पलमित्यत्र 465
न्यक्कर्तृषु च गर्गेषु 161
प
पञ्चालानां प्रदेशोऽपि 479
पटावयववृत्तास्तु 487
पदार्थानुपघातेन 268
पदार्थानुपघयद्यप्यातेन 271
पदान्तरस्थस्यार्थस्य 203
पदं यथैव वृक्षादि 53
परार्थ शेषभावं यो 135
पराक्षेपे यथाभावे 406
पाकादयस्तृतीयान्ताः 436
पाकौ पाका इति यथा 343
पाचकादिपदस्था चेत 252
पाठाद् यैरविभक्तित्वम् 586
पुत्रीयतो न पुत्रोऽस्ति 69
पुंवद्भावस्य सिद्ध्यर्थं 420
पूजोपाधिश्च यो दृष्टः 431
पूर्वशब्दप्रयोगाच्च 475
पूर्वाभ्यामेव योगाभ्यां 551
पूर्वामवस्थामाश्रित्य 565
प्रकाराधारभेदेन 425
प्रकारवचनः कश्चित् 619
प्रचये भिद्यमाने तु 597
प्रकृष्ट इति शुक्लादि 3
प्रकृतिप्रत्ययावूह्यौ 78
प्रकृतिश्चेत् तृतीयान्ता 461
प्रकृत्यर्थे विशिष्टेऽपि 406
प्रकृतेरविशिष्टत्वात् 410
प्रवृत्तानां पुनर्वृत्तिः 353
प्रवृत्तिमन्तः सर्वेऽर्था 322
प्रवृत्तिरिति सामान्यं 321

प्रत्ययेन विना प्रादिः 584
प्रतिषेध्यो यथाभूतः 287
प्रधानकल्पनाऽभावे 589
प्रधानमत्र भेद्यत्वात् 283
प्रधानमन्यार्थतया 235
प्रयुक्तानां हि शब्दानां 560
प्रयुक्तेन च सम्बन्धात् 229
प्रयोगभेदाद् धातूनां 18
प्रविकासिप्रभोऽल्पोऽपि 617
प्रसक्तानुप्रसक्तस्तु 578
प्रसिद्धभेदं यत्रान्यद् 566
प्रसिद्धास्तु विशेषेण 480
प्रसिद्धेन कृतः शब्दो 73
प्राक् च जात्यभिसम्बन्धात् 342
प्राक् समासात् पदार्थानां 250
प्राग्वृत्तेर्युक्तवद्भावे 111
प्रागाश्रयो हि भेदाय 311
प्रागसत्त्वाभिधायित्वं 308
प्राधान्येनाश्रिताः पूर्वं 259
प्राप्तिः प्रगृह्यसंज्ञाया 121
ब
बाह्यो नास्त्याश्रयो द्वन्द्वे 207
बुद्ध्यवस्थाविभागेन 570
बुद्ध्यैकं भिद्यते भिन्नं 15
बुद्धेर्विषयतां प्राप्ते 279
ब्राह्मणत्वं यथापन्ना 284
ब्राह्मणत्वेन चासत्त्वाद् 306
ब्राह्मणादिव वैश्यात् त्वम् 527
ब्राह्मणादिस्थया वाक्येष्वा 251
ब्राह्मणाध्ययने तत्र 489

ब्राह्मणाध्ययने वृत्तिः 490
ब्राह्मणायेव दातव्यं 493
ब्राह्मणेनेव विज्ञातं 526

ब्राह्मणोऽब्राह्मणस्तस्माद् 266
भ
भाविनो बहिरङ्गस्य 139
भिन्नरूपेषु यल्लिङ्गं 165
भिन्नं सम्बन्धिभेदेन 234
भिन्नस्याभेदवचनाद् 127
भुज्यते ब्राह्मणेनेव 525
भूतादयः षडाख्याश्च 172
भेदभावनयैतच्च 416
भेदरूपसमावेशे 103
भेदानां वा परित्यागात् 101
भेदः संख्याविशेषो वा 132
भेदेन तु विवक्षायां 224
भेदेन तुल्यरूपत्वात् 391
भेदे सति निरादीनां 39
म
मञ्चशब्दो यथाऽऽधेयं 347
मधुरायामिव गृहा 537
मधुराविषयः पाठः 529
मधुरावयवे वृत्तिः 539
महाकष्टश्रितेत्येवं 60
महारण्यमतीते तु 61
मात्राणां हि तिरोभावे 179
मानं प्रति समीपं वा 288
मानमेयाभिसबन्ध 84
मितस्तु स्वेन मानेन 375
मुण्डिसूत्र्यादयोऽसद्भिः 68
मूर्तिभ्यो मूर्तिधर्माणां 181
मेघाः शैल इवेत्युक्ते 605
य
यतश्चाविषयः सोऽस्या 59
यत्प्रधानं न तस्यास्ति 350
यत्रार्थे प्रत्ययाभेदो 409
यत्सोऽयमिति सम्बन्धात् 149

यथा गरुड इत्येतद् 603
यथा गुडतिलादीनां 599
यथा गौरादिभिस्तेषां 260
यथा गोरिति शुक्लादेः 211
यथा चित्रगुरित्येतत् 215
यथाध्ययनयोः साम्यं 531
यथाप्रकर्षः सर्वत्र 453
यथा सत्ताभिधानाय 261
यथा समूहप्रचये 596
यथा स्वशब्दभिहिते 210
यथा व्युत्परयः पुच्छौ 534
यथैकदेशकरणात् 262
यथैव डित्थे डयतिः 77
यथौषधिरसाः सर्वे 100
यदन्वाख्यायकं वाक्यं 612
यद् यदाश्रीयते तत् 142
यदा क्रियानिमित्तं तु 520
यदा तु व्यपदिश्येते 148
यदा त्वाश्रयभेदेन 331
यदा निमित्तैस्तद्वन्तो 379
यदा प्रत्यवमशंस्तु 238
यदा प्रत्युपमेयं तु 595
यदा तु व्यतिरेकेण 548
यदि भिन्नाधिकरणो 417
यदि षष्ठीद्वितीयान्तात् 159
यदुपव्यञ्जनं जातेः 481
यद्यप्युपाधिरन्यत्र 533
यद्यप्युभयवृत्तित्वं 276
ययोरतर्किताप्राप्ति 613
यश्च तुल्यश्रुतिर्दृष्टः 483
यश्चाप्रवृत्तिधर्मार्थः 323
यस्य नास्ति क्रियायोगः 205
यः शब्दश्चारितार्थत्वात् 582
या सामान्याश्रया संज्ञा 56

युक्तमोपयिकं राज्ञ 577
ये चाव्ययकृतः केचित् 437
येनैव हेतुना श्यामा 365
येषामपूज्यमानत्वं 63
येषूपमेयवचनः 598
यैरप्रयुक्तैः संस्कारः 469
योऽपि स्वाभाविको भेदः 567
योऽर्थ आश्रितनानात्वः 402
यो य उच्चार्यते शब्दः 454
यो वावयवभेदाभ्यां 207
यः सम्बन्धिगतो भेदः 600
याः पुत्रे रूढसम्बन्धाः 507
र
राजत्वेन प्रसिद्धा ये 553
राजवद् रूपमस्येति 555
राजाश्वादिश्च विषयः 607
रूपाच्च शब्दसंस्कारः 137
रूपान्तरेण संस्पर्शो 376
रूपाभेदाच्च तद् द्रव्यं 164
ल
लिङ्गं प्रति न भेदोऽस्ति 328
लिङ्गं लिङ्गपरित्यागे 151
लुबन्ते सन्निपतितं 156
व
वचने नियमः शास्त्राद् 329
वयस्विनि परिच्छेदः 126
वत्यर्थं नावगाहेते 587
वत्यन्तावयवे वाक्ये 433
वर्तते यो बहुष्वर्थो 330
वाक्येऽपि नियता धर्माः 36
वाचिका द्योतिका वापि 98
विकल्पाद्यभिधेयस्य 195
विकल्पवति वा वृत्तिः 191
विद्यमानासु संख्यासु 112

विधिभिः प्रतिषेधैश्च 42
विनैव प्रत्ययैर्वृत्तौ 81
विभक्तिभेदो नियमात् 8
विभक्त्यन्तरयोगो हि 459
विभक्त्यर्थप्रधानत्वात् 220
विभक्त्यर्थाभिधानाद् वा 217
विभक्त्यर्थेन चाविष्टं 243
विविभक्तिः प्रकृत्यर्थं 458
विशेषकर्मसम्बन्धे 65
विशेषणविशेष्यत्वं कैश्चि 52
विशेषणविशेष्यत्वं पदयो 6
विशेषणाद् विशेष्येऽर्थे 88
विशेषणं ब्राह्मणादि 305
विशेषस्याप्रयोगे तु 315
विशेष एव सामान्यं 141
विशेषवृत्तेरपि च 140
विशेषः श्रूयमाणोऽपि 64
विशेष्येषु यथाभूतः 878
विशेष्यं स्यादनिर्ज्ञातं 7
वीप्सा सादृश्ययोर्वृत्ति 621
वैयाकरणवद् ब्रूते 574
वृत्तिं वर्तयतामेवं 97
वृत्तिरन्यपदार्थे या 38
वृत्तौ यथा गताद्यर्थं 256
वृत्तौ विशिष्टरूपत्वात् 192
वृत्तौ विशेषवृत्तित्वाद् 37
व्यतिरिक्तस्य साधुत्वे 86
व्यतिरेके च सत्येवं 148
व्यपदेशिवदेकस्मिन् 16
व्यपदेशोऽभिदेयेन 334
व्यभिचारे तथासिद्धे 549
व्यवस्थितविभाषा च 45
व्याघ्रशब्दो यथा शौर्यात् 428
व्यापारसमुदायस्य 30

व्यापारेणैव सादृश्ये 503
व्यापारो जातिभागस्य 427
व्यापारं याति भेदाख्यै 113
व्यावृत्तानां विशेषाणां 395
श
शब्दादर्थाः प्रतायन्ते 197
शब्दान्तरत्वाद् युक्तादिः 51
शब्दान्तरत्वाद् वाक्येषु विशेषा 136
शब्दान्तरत्वाद् वाक्येषु 213
शब्दान्तरेऽपि चैकत्वं 249
शब्दा यथा विभज्यन्ते 74
शस्त्रीव शस्त्री श्यामेति 419
शस्त्रीकुमार्योः सदृशः 378
शस्त्री स्वेन गुणेनातो 382
शस्त्र्यां प्रसिद्धं श्यामत्वं 381
शास्त्राभ्यासाय भेदोऽयं 457
शास्त्रदृष्टिस्तु शास्त्रस्य 79
शास्त्रप्रवृत्तिभेदेऽपि 248
शास्त्रे निमित्तभावेन 168
शुक्लादिषु मतुब्लोपो 87
शुक्लादिष्वाश्रयद्रव्यं 185
शूरशब्दप्रयोगे तु 409
शैषिके मासजाते च 105
शौण्डार्धर्चपुरोडाश 31
श्यामत्वमुपमाने चेत् 408
श्यामत्वमेव सामान्यं 398
श्यामाशस्त्री यथा श्यामा 401
श्यामेत्येवाभिधीयेत 368
श्यामेव शस्त्री कन्येति 297
श्यामेषु केषुचित् किञ्चित् 370
श्रूयते वचनं यत्र 108
श्रोत्रियक्षेत्रयादीनां 54
ष
षष्ठ्यन्तराधिके तस्माद् 162

स

सतिशिष्टवलीयस्त्वात् थाथा. 62
सतिशिष्टवलीयस्त्वात् बाह्ये 411
सत्तयैवाभिसम्बन्धो 253
सत्त्ववृत्तस्य शेषे वा 435
सदृशस्त्वं तवैवेति 576
सन्निपाते ययोर्यान्या 610
सप्तपर्णादिवद् भेदो 55
सप्तम्यपि न तत्रास्ति 547
समानाधिकरण्ये तु 182
समानाधिकरण्यं च 522
समानाधिकरण्यं चेत् 218
समासे श्रूयते स्वार्थो 312
समुच्चयस्तु क्रियते 471
समुच्चयवतोऽर्थस्य वाचको 206
समुच्चयवतोऽर्थस्य प्राधा 200
समुच्छितनिमित्तत्वे 200
समुच्चितस्य प्राधान्ये 199
समुच्चितः स्याद् द्वन्द्वार्थे 198
समुच्चयो निमित्तं चेत् 201
समुच्चयो विकल्पो वा 499
समुदायान्तरत्वाच्च 33
समुदायाभिधायी च 476
समुदायमुपक्रम्य 35
समुदायप्रदेशो वा 480
समुदायस्य वृत्तौ च 58
समुदायेन सम्बन्धो 48
समुदायेषु वर्तन्ते 470
समूहे च प्रदेशे च 477
स लिङ्गं च ससङ्ख्यं च 138
सर्वत्राविष्टलिङ्गत्वं 319
सर्वद्रव्यगतिश्चैव 109
सर्वस्य परिहारार्थं 447
सर्वादयो विशेषास्तु 216

सर्वैर्विशिष्टास्तैरर्थैः 470
सर्वं वाप्येकदेशो वा 498
साकाङ्क्षत्वाद् गुणत्वेन 187
सादृश्यग्रहणं सूत्रे 627
सादृश्यमात्रं सामान्यं 426
सादृश्यमेव सर्वत्र 618
सादृश्यं योग्यता कैश्चित् 622
साधर्म्यमव्ययेन स्याद् 208
साधनं गुणभावेन 339
साधारणं ब्रुवन् धर्मं 385
साधुत्वं न विभक्त्यर्थ 225
साध्यत्वात् तत्र सिद्धेन 293
सामर्थ्यमविशेषोक्तं 43
सामानाधिकरण्येऽपि 430
सामानाधिकरण्यं च 21
सामान्यानामसम्बन्धात् 10
सामान्यमाकृतिर्भावो 320
सामान्यद्रव्यवृत्तित्वात् 307
सामान्यभूतो द्रव्यात्मा 184
सामान्यं श्यामताद्येव 397
सारूप्यात् तु तदेवेदम् 460
सिद्ध्यसिद्धिकृतो भेदः 554
सिंहशब्देन संबन्धे 490
सुसूक्ष्मजटकेशादौ 57
सूत्रारम्भान्न चैतस्माद् 563
सूत्रे श्रुतश्च द्विष्ठोऽसा 514
सोऽयमित्यभिसम्बन्धाज्जाति. 346
सोऽयमित्यभिसम्बन्धादाश्रयै. 341
सोऽयमित्याभिसम्बन्धादाश्रयं 186
सोऽयमित्यभिसम्बन्धात् 82
सोऽयमित्यभिसम्बन्धात् द्रव्य 226
सोऽयमित्यभिसम्बन्धाद् विशि. 223
सोऽयमित्यभिसम्बन्धे 83
सोऽयमेकत्वनानात्वे 367

सोपस्कारेषु सूत्रषु 463
संख्यावांल्लिङ्गवाँश्चार्थो 242
संख्यासामान्यरूपेण 111
संख्यैव प्रतिषेधेन 294
संज्ञाविषयभेदार्थ 130
सम्बन्धस्य च सम्बन्धी 921
सम्बन्धिनि निमित्ते तु 241
सम्बन्धिभिन्नसम्बन्ध 246
सम्बन्धिभिर्विशिष्टानां 232
सम्बन्धिशब्दः सापेक्षो 47
सम्बन्धी नियतो रूढः 212
संस्कारदुपघाताद्वा 484
संस्कारसहिताद् ज्ञानात् 90
संस्तु रूपरसादीनाम् 23
संस्त्याने केवले वृत्तिः 175
संस्त्यानेन क्वचिद् द्रव्यं 171
संस्त्यानं प्रत्ययस्यार्थः 177
संसृष्टाः प्रत्ययेष्वर्थाः 473
स्त्र्यर्थः संस्त्यानवद् द्रव्यं 170

स्त्रीत्वाभिधानपक्षेऽपि 119
स्त्रीशब्दो गुणशब्दत्वात् 169
स्थूलेन तुल्यो यातीति 511
स्नेहान्तरादवच्छेदो 295
स्वामिनि व्यतिरेकश्च 236
स्वं रूपमिति चैतस्मिन् 580
ह
हरीतक्यादिषु व्यक्तिः 155
होतव्यादिषु यस्माच्च 497
होतव्यसदृशो होते. 441

प्रकाशसहितवाक्यपदीयवृत्तिसमुद्देशे

उद्धरणश्लोकानुक्रमणिका

श्लोकाः श्लो.सं.

अङ्गानि जातिनामानि 621
अङ्गानि ज्ञातिनामानि 622
ईर्ष्यावशेन कलुषदत्वमुपा. 396
एष बन्ध्यासुतो याति 21
उभयस्तस्य तुल्यार्थो 141
ऊर्ध्वमानं किलोन्मानं 684
एकमाहुरनेकार्थं 114
क्वचित् प्रवृत्तिः 73
गगनं गगनाकारं 599
तत्र यं प्रति साध्यत्व 435
नेक्षिता जातिशब्दानां 519
पाण्डोर्विदुर सर्वाणि 591
प्रवृत्तिरेव प्रथमं 612
रामरावमयोर्युद्धं 599
रोलम्बगरलव्याल 395
विप्रेण तुल्यं वैश्यात् 560

विप्रेण तुल्यं वैश्यस्य 560
शब्दोपमानयोर्नैव 385
शास्त्रेषु प्रक्रियाभेदैर 96
सकृत्प्रवृत्तावेकत्व 390
स गोदोहनमात्रं हि 424
सदृशं त्रिषु लिङ्गेषु 555
संयोगो विप्रयोगश्च 516
सामर्थ्यमौचिती 516
सामान्यमाश्रितं यद् यद् 399
सामान्यार्थस्तिरोभूतः 94
सुसूक्ष्मजटकेशेन 73
स्वरूपपररूपाभ्यां 328
